THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 103

THE

VĀJASANEYI-SAṂHITĀ

IN THE

MĀDHYANDINA AND THE KĀNVA-ŚĀKHĀ

WITH THE

COMMENTARY OF MAHIDHARA

EDITED BY
Dr. ALBRECHT WEBER

THE
CHOWKHAMBA SANSKRIT SERIES OFF
VARANASI-1
1972

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi-1
Printer : The Vidya Vilas Press, Varanasi-1
Edition : Second, 1972
Price : Rs. 50-00

UNIVERSITY OF JODHPUR LIBRARY
ACC. NO. 108995 SUB. Sanskrit
CALL NO. 0 1 5 4 . 1 1 X 2

© The Chowkhamba Sanskrit Series Office
Publishers and Oriental & Foreign Book-Sellers
P. O. Chowkhamba, Post Box 8,
Varanasi-1 (India)
1972
Phone : 63145

TO HIS EXCELLENCY

THE CHEVALIER Dr. C. C. J. BUNSEN

THE NOBLE FRIEND AND PATRON OF LINGUISTIC STUDIES,
ALIKE CELEBRATED AS SCHOLAR AND AS STATESMAN,

WITH PROFOUND RESPECT

DEDICATED

BY THE GRATEFUL EDITOR.

PREFACE TO THE EDITION OF 1972

Already at the age of twenty, Albrecht Weber (1825–1901) presented a "Yajurvedae specimen cum commentario" to the Breslau University, which was accepted for the award of their Ph. D. degree in the same year, 1845. After that preliminary study he completed his edition of "The Vājasaneyisaṃhitā (in the Mādhyaṃdina—and Kāṇva-śākhā with the commentary of Mahīdhara)" not until seven years later.

By bringing out this work, Weber was one in the line of German vedic savants, who during the second half of the nineteenth century published in Europe most of the *editiones principes* of all the four Vedas, viz.,

1848, the Sāmaveda was edited by Theodor Benfey,
1849–74, the Ṛgveda by F. Max Mueller,
1856, the Atharvaveda by Rudolf Roth and his American colleague William D. Whitney,

and from 1852 onwards the different versions of the Yajurveda:

1852, the *Vājasaneyisaṃhitā* by Albrecht Weber *(the present reprint)*,
1871–72, the Taittirīyasaṃhitā by Albrecht Weber,
1881–86, the Maitrāyaṇīyasaṃhitā by Leopold von Schroeder,
1900–10, the Kaṭhasaṃhitā by Leopold von Schroeder.

But Weber, certainly the most dynamic and productive German Sanskritist, did not content himself with the publication of the Vājasaneyisaṃhitā (together with Mahīdhara's commentary). He continued his enormous work editing in 1855 the Śatapathabrāhmaṇa (with extracts from three commentaries), and in 1859 the relevant Śrautasūtra of Kātyāyana (with extracts from two commentaries).

The literary tradition of the White Yajurveda, edited with those three voluminous quartos is to be considered as one of the most eminent monuments of the cultural heritage of India.

Being out of print for many decades, it was a great occasion to all Sanskritists at home and abroad, when the Chowkhamba Sanskrit Series Office (Varanasi) decided to bring out again of the above mentioned volumes at least Weber's Śatpathabrāhmaṇa in 1964.

Since then the world of Indological studies eagerly awaited also the reprints of Weber's monumental publications of the Vājasaneyisaṃhitā and the Śrautasūtra of Kātyāyana.

Now, that those two important editions are made available again more than hundred years after their first appearance, our thanks are due to the famous Chowkhamba Publishing House for all their great endeavours, and to the Government of my country, the native country of Albrecht Weber, for making possible these publications by very generous financial support. Anyone ever concerned may deeply feel indebted.

Institute of Indology,
University of Cologne,

Klaus L. Janert

5 Koeln 41 (Germany)
December 1971.

This edition of the Sanhitâ of the white Yajurveda is intended to comprehend only the text. An introductory essay, a translation with additional notes, a glossary, Kâtyâyana's Prâtiçâkhyasûtra, a comparison of the corresponding passages in the other Vedas — all this together shall form the subject of a separate work. (*) I shall therefore content myself here with enumerating the critical apparatus I have made use of and giving a brief explanation of the accents. —

A. I Manuscripts of the text only of the *Vâjasaneyi-Sanhitâ*, without a commentary: *a.* in the *Mâdhyandina-Çâkhâ*. —

Padapâṭha: with accents, Chambers-coll. (in the Royal library of Berlin) nr. 27. 28 Samvat 1838 (= A.). —

Saṅhitâpâṭha. 1. *with accents*. Chamb. nr. 29. 30 Samvat 1653: a most excellent copy (= B.). — Bibl. Nationale in Paris Dev. 201. 202 (= C.) a very good old copy (with 25 new leaves dated Samvat 1843.), a transcript of which Dr. Th. Goldstuecker was kind enough to communicate to me. —

2. *without accents*. Chamb. nr. 31. 32 Samvat 1840. nr. 33. 34 a copy of the preceding. nr. 756. — Paris Dev. 59 a. Samvat 1813. — London E. I. H. 2125. 2391. (**). —

b. in the *Kâṇva-Çâkhâ*: *Jaṭâpâṭha*: Oxford Bodlei. Wilson. Coll. nr. 92. 93 with accents: a very good old copy. —

Saṅhitâpâṭha. Bodl. Wils. nr. 367. 364 with accents. Samvat 1657: a most excellent copy. — The 40th lecture or the Îçâ-Upanishad with *Çankara's* Commentary: Chamb. nr. 118. 128. 131. — E. I. H. 1638. — Bodl. Wils. nr.

(*) A list of the authors of each verse as well as of the metres (to which the Roman letters inserted in the text refer) is given in the Appendix p. LI-LIV and LX-LXIX.

(**) In the printed catalogue of the Wilson Collection in the Bodleian library in Oxford three manuscripts, viz. the nros. 361. 362. 455, are erroneously mentioned as copies of the *Vâjasaneyi*-Sanhitâ: nr. 361 contains the first Ashṭaka of the *Taittirîya*-Sanhitâ in the Padapâṭha Samvat 1860. without accents: — nr. 362 (Samvat 1557), and nr. 455, a recent copy of the latter, contain the second Ashṭaka of the *Rik*-Sanhitâ.

94. 484. — The editions of this Upanishad are enumerated by *Gildemeister* in his Bibliothecae Sanscritae Specimen p. 23. —

II. Manuscripts of the *Commentaries* on the *Vâjasaneyi*-Sanhitâ, whether with the text or without it: —

Of *Ûvaṭa's* Commentary I have found only a few fragments, extracted from the whole work to illustrate a *Rudrajapa* which contains in eight lectures the following verses of the Vâjas. S.: XXIII, 19. 33. 34. XXXIV, 49. 1-6 ॥ १ ॥ XXXI, 1-22 ॥ २ ॥ XVII, 33-49 ॥ ३ ॥ XXXIII, 30-43 ॥ ४ ॥ XVI, 1-66 (*) ॥ ५ ॥ III, 56-63. XXXIX, 7-9. XXV, 19. XVIII, 36. V, 21. XIV, 20. XXXVI, 17 ॥ ६ ॥ XVIII, 1-29 ॥ ७ ॥ XXXVI, 1-24 ॥ ८ ॥. *Ûvaṭa's* explanation is given for XXXIV, 2 — III, 63, besides some small fragments relating to the XVIIIth lecture. The mspt. is dated Samvat 1643: it belongs to the collection of the Rev. Dr. Mill, which has been added to the Bodleian library. —

For *Mahîdhara's* Commentary, the socalled *Vedadîpa*, I have made use of several copies. My transcript is made from E. I. H. 2479. 2465 (= A.), which manuscripts, containing also the unaccented text, were copied in *Calcutta*, probably for Mr. *Colebrooke*, by two different scribes, foll. 1-20. 83-189 in 2479 by the one, foll. 21-82. 190-294 in 2479 and foll. 1-140 in 2465 by the other. The first of them copied from a mspt., which must have been pretty correct, with the only exception, that the explanation of XIV, 1-30 is wholly wanting. The second scribe on the contrary copied from a rather incorrect mspt, belonging to the college of Fort William (dated Samvat 1791, see p. L), in which the interpretation of XXXIV, 22-58 is wanting, besides a great number of smaller defects. —

A second manuscript (= M.) belongs to the above mentioned collection of the Rev. Dr. Mill, since incorporated with the Bodleian library: it contains only the explanation of the first twenty adhyâyas, without the text. The first three adhyâyas, contained in the first 52 old leaves, were purchased at Benares; the following twelve, occupying from foll. 53-277 inclusive, were copied by two different scribes in Calcutta (foll. 53-97 by the one, foll. 98-277 by the other) from a second copy, and a very correct one, belonging to the college of Fort William, (except three leaves), the remaining five, from foll. 278-371 incl.,

(*) A commentary of this adhyâya, as it occurs in the *Taittirîya* Sanhitâ ashṭaka IV, praçna 5, anuvâka 1, made by Bhaṭṭa *Bhâskara Miçra*, is extant E. I. H. 1625 b. Having made a transcript of it I am now in the possession of three different explanations of this curious adhyâya.

were (as well as foll. 138-140, where the former copy failed) copied by the second scribe from the same incorrect mspt, which was made use of by the second scribe of A. —

A thirth copy (= O.) exstant Bodl. Wils. nr. 64 (227 foll.). 65 (225 foll.). 66 (192 foll.) being likewise of very recent date has been probably copied for Mr. Wilson: it contains also the *text* in the Samhitâpâtha without accents: for want of time I have collated it only for the defects of the last 25 lectures. —

A fourth copy, and a very beautiful one, is in the possession of Mr. *Eugène Burnouf* in Paris, and has been copied for him in *Bombay* Çâke 1761 (= 1840 A. D.) by the care of the Rev. Mr. *Stevenson*. Mr. Burnouf had formerly proposed himself editing the Vâjasaneyi-Sanhitâ and copied for this purpose Adhy. I, 1 - IV, 19 in a very elaborate manner: afterwards relinquishing this project, he presented this apograph (= B.) to Dr. Th. Goldstuecker, who on his part since communicated it to me. The remaining books IV, 20 - XL, 17, having been three years ago copied in chemical ink from the mspt of Mr. Burnouf by Dr. M. Mueller, are through the kindness of this my learned friend likewise now in my hands (= MM.), while an impression thereof made on transparent paper is in the possession of Mr. Goldstuecker. —

The fifth and last manuscript of the Vedadîpa brought to Europe, is exstant in Paris Bibl. nat. Dev. 206. It is a very recent, imperfect and most incorrect copy, very likely copied from the same incorrect mspt of Fort William, which has been used by the second scribe of A and for the last part of M: for want of time I have collated it only for the first 4 adhyâyas (= P.). A fragment of this copy from I, 8 - II, 4 incl. having been copied in chemical ink by Dr. M. Mueller is now in my hands and having been impressed on transparent paper also in the hands of Mr. Goldstuecker. —

III. 1. The *Anukramaṇî* made by *Kâtyâyana* in 5 adhyâyas. E. I. H. nr. 965. Samvat 1650. nr. 309 (a recent copy out of the collection of Colonel Martin). Bodl. Wils. nr. 20 (likewise a recent copy). —

A most excellent *paddhati* of this work, made by Pandita Çrî *Halâkhya*, is exstant Chamb. nr. 38. The conclusion (from XXXIX, 2) is wanting. —

2. An *anuvâkânukramaṇî* is annexed to the former in E. I. H. nr. 309. —

3. The beginning words (pratîkâni) of the Adhyâyas and the Kandikâçatas are enumerated from the Mâdhyandina-Çâkhâ in the *Rishitarpaṇam* Chamb. 606b. 735. —

IV. *Kâtyâyana's Prâtiçâkhyasûtra* in eight adhyâyas. Chamb. nr. 35. Samvat 1680. — *Ûvaṭa's* commentary thereof, called *Mâṭrimodaka* Chamb. 454 (Samvat 1650). E. I. H. 598. —

B. The *accentuation* of the *Vâjasaneyi-samhitâ* is in general the same as that of the *Rik*-Sanhitâ, besides some particularities regarding the *Svarita*. —

1. At the beginning of the verse the *unaccented* syllables, till the first accented one, are denoted by horizontal strokes beneath them: परमे, पृथिविसत्, अन्तरिक्षसत्, हेमन्तशिशिरौ, त्रिणवत्रयस्त्रिंशौ.

2. The *udâtta* is denoted by an horizontal stroke beneath the preceding *unaccented* syllable, and by a perpendicular one above the following *unaccented* syllable नृषदंम्, either of these strokes being of course wanting, if there is no preceding (पतिः) or no following syllable (नृषत्), or if the preceding (यः पतिः) or the following syllable (नृषद्भ्येषाम्, मक्षो ये धनम्, पर्णा न वेरनु, युद्ध्वा हि ये तवाश्वासः) is an accented one. — The perpendicular stroke is changed into an horizontal one, if the next following syllable is accented नृषदं यः. —

3. The *svarita* has various forms: *a.* at the *beginning* of the verse: before an unaccented syllable कोऽसि — before an accented one: 1) before an udâtta योऽसौ च. 2) before a svarita क्व स्वः: — if it stands alone क्व. —

b. after an *unaccented* syllable: before an unaccented one आस्येन (आस्येन in the Kânva-Çâkhâ): — before an accented one: 1) before an udâtta आस्ये यासाम् (आस्ये यासाम् in the Kânva-Çâkhâ). 2) before a svarita? (I do not remember having found an instance of this case): — at the end आस्ये. —

c. after an *accented* syllable: I) after an udâtta: before an unaccented syllable परमे व्योमन्: — before an accented one: 1) before an udâtta पृष्ठात्स्वर्ज्योतिः 2) before a svarita? — at the end परमꣳ स्वः. — II) after a svarita: before an unaccented syllable क्व स्वरस्ति — before an udâtta or svarita? — at the end क्व स्वः. —

I proceed now to offer my humblest thanks to those noble Patrons of sciences, by whose united assistance alone I succeeded in bringing forth this edition: I owe them to the Illustrious *Royal Academy* of Sciences *in Berlin*, by whose liberality I was enabled to search through the splendid collections of San-

SYNOPSIS

OF THE VÂJASANEYI-SANHITÂ, THE ÇATAPATHA-BRÂHMAṆA, AND THE KÂTYÂYANA-SÛTRA. VARIOUS READINGS AND CORRECTIONS OF THE PRESS.

Adhyâya I. k.१-8 are explained in the Çat. Br. १,७,१,१-२१ and quoted by Kâty. 8, २,१-३8. k.५-३१. - Ç. १,१,१,२-३,२,१८. - K. २,१,११-७,१०.

1.) श्रीरामो जयति M. श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीमदनन्तगुरुचरणारविन्दाभ्यां नमः । श्रीमत्साम्बमूर्तिर्दक्षिणामूर्तिर्जयतितराम् । श्रीरेणुकामातण्डकपर्दीश्वरब्रह्मचारिरूपकुलदेवताभ्यो नमः ॥ विचार्य सर्ववेदान्तैः संचार्य हृदयाम्बुजे । प्रचार्य सर्वलोकेषु व्याचार्यं शंकरं भजे ॥१॥ पद्मपादो विश्वरूपो हस्तामलकत्रोटकौ । अद्वैतदीक्षागुरवः साचार्याः पञ्च पान्तु माम् ॥२॥ नारायणेन्द्रपादाब्जं विद्येन्द्रचरणाम्बुजम् । नृसिंहेन्द्रपदाम्भोजं कैवल्येन्द्रपदाम्बुजम् ॥३॥ एतानि पद्मरत्नानि चत्वारि हृदयाम्बुजे । मामकीने प्रकाश्यन्तां भक्तिमुक्तिप्रसिद्धये ॥8॥ प्रणम्य B. 2.) विलोक्यौश्रटमा° M. 3.) व्यक्तानृ° P. 4.) °सामर्थ्यादग्निरूपां मूर्तिविद्यां B. 5.) वाजसनिः कर्णस्तत्र विद्यतऽइति तदपत्यमिति वा वाजसने° P. 6.) तं मध्यन्दिनवेदं M. B. 7.) वैफल्यात् M. by a second hand. 8.) °पदाव° B. पदावसानायावद्रूपकं P. 9.) बोद्धव्यं B. 10.) वक्तव्यानि B. 11.) प्रतिपद्दिने B. 12.) °पमग्न्यन्वाधा° B. 13.) यत्पत्रं B. 14.) क्रियापदस्याकाङ्क्षितत्वादर्था° B. 15.) शाखालग्नधू° B. 16.) °नीयमतिथिबन्धु° B. 17.) °णादधिहेतुभूतं B. 18.) तीव्रपापेन P. 19.) धातुको B. पातको P. 20.) व्याकरणास्वरप्रक्रिया लिख्यते B. 21.) शिष्टस्वरबलीयस्त्वमिति B. 22.) यास्कोक्तेः B. 23.) स्वरः पूर्ववत् B. 24.) निपातत्वादुदात्तः B. 25.) च णिच् B. 26.) नत्रि the mspts. 27.) एकादेश is wanting in A. B. P. 28.) कप्रत्ययः B. 29.) तत्पुरुषत्वे B. 30.) पां तांतंतामः B. 31.) °ट् सलोपश्च B. 32.) उद्भूतया B. 33.) तिर्यङ्मुखायां वा B. adds. 34.) °वत् कृत्वाद° B. °वत्तयोद° P. 35.) मन्दे°ग्नौ B. मन्दोमे A.

P. 36.) °दृशेविद् B. 37.) दधिविशेषस्य the mspts. 38.) का° - °दयेति is wanting A. M. 35. [sic!]) अन्यथा is wanting in all the mspts. 36.) स्ना B. पा धातुपा° २४. ४४. 37.) °ज्ञविरोध° B. 38.) किंचिद्वा° B. 39.) व्रीहिं स्पृणेदिति P. 40.) वालकेभ्यः A. 41.) is wanting निघ° २. १९. 42.) °चारणापूर्वकं B. 43.) The second हविष्कृदेहि is wanting in A.B. 44.) °शमि श्यन्विकरणः [पा° ३. १. ६९.] व्यत्ययेनात्मनेपदम् B. 45.) °धातुकऽइति दीर्घ ईट् वक्तव्यं छन्दसीति [पा° २. ४. ७३.] शपो लुक् । आदिशप्रत्यययोरिति [पा° ८. ३. ५९.] षत्वम् B. 46.) °नादिका B. 47.) सेयं B. 48.) °तेन संपद्यते B. 49.) अन्तःस्थितस्येषदन्तवर्णस्य B. 50.) सेयं B. 51.) तदेतद्धि° B. 52.) संबुध्या° B. 53.) °त्वादौत्वम् B. 54.) प्राशित्रप्रहरि-णा B.P. 55.) I have not met with this rule in the Kâtyâyanasûtra. मूलादुपविषं करोतीति B. 56.) धृ° - च is wanting in A.M. 57.) नाशंकररक्षो° P. 58.) B. adds स्कभ्नोतिः स्तम्भनकर्मा लोकस्य स्तम्भनीः 59.) °संयवनीया B. 60.) समं वि° the mspts of Kâtyây. 61.) अप्यमा° B. 62.) सोऽत्र मा भूदित्यर्थः B. 63.) दिवि नाको नामाग्निः रक्षोहेति नामकः स्वर्गस्थोऽग्निः B. 64.) °यानि P. 65.) प्रहरणादीनि Kâty. mspts. 66.) निपात्य B. P. M. 67.) निपाय्य B. 68.) शान्ता is wanting A. शिता P. 69.) मिथो मल्लितमेतस्या भूमेर्यत्कृष्णं देवयजनं चन्द्रे स्थापयाम इति मनसि निधाय स्थापयामासुस्तत्कृष्णवर्णमप्यापि B. 70.) रप्सति B. रपाति P. 71.) यज्ञे B.P. 72.) विदितव्यं P. 73.) मृज्यूष B.M. —

The first 72 pages have been printed and corrected during my temporary absence from Berlin: this accounts for the numerosity of orthographical and typographical errors. *Read:* ऽइति or ऽइत्य° pag. 2, lin. 7. 11, 20. 12, 13. 14, 20. 15, 23. 19, 12. 17. 23. 20, 20. 21, 20. 22, 13. 24, 7. 19. 20. 23. 25, 10. 26, 13. 29, 2. 33, 18. *Read:* pag. 1. lin. 1. भाष्यं वि°. 4 ब्रह्मप°. 2, 10 पडुत्तर°. 3, 2 वं. 3 यज्ञ°. 12 दोहनाद्यं°. 23 क्रियाप°. 4, 1 संन°. 10 घ ।. 17 °र्तते. 5, 13 °स्य पशू°. 6, 16 मध्योदात्तं. 7, 13 °स्मिन्निति. 8, 22 ऽयं म°. 9, 15 ऽएव. 25 °होधक°. 10, 8 °गछ सो° and व्यछ र्°. 12 ऽउत्त°. 15 and 16 त्वया दु-

ग्धा मया च पृष्टा?? 11,10 ऽइद्मक्तमिति वेति. 15 °जन्मन. 12,21 °त्र स्थि°. 25 का° [२.३.१२.] ग°. 13.3 यो. 21 ज्ञा (36.). 23 व्रीहि°. 14,4 द्रु क्ष्व°. 9 ऽऽरू. 16 °त्याह्व वारु°. 15,6 ग्रहणासा°?? 19 व्यु र्°. 16,7 °स्यऽइति । उप°. 20 ऽअयं पवतऽए° and °मिति. 18,17 पातितम्? 19 प्रतिगृह्य. 19,8 °स्तत्र क्षि°. 20,6 मधु°. 9 °र्यति. 12 तव श°. 13 संग्रा°. 25 कविःप्रति°. 21,2 पाति°? 13 °व्याद्ध. 22,16 °धार्य. 23,1 °ज्वाल°. 24,5 प्रत्यु°. 8 °नशिले. 25,14 ऽइद्°. 29,19 मल्ल°. 30,1 °त्रेण. 2 त्रैष्टु°. 31,19 दात्रीं. 32,18 वाजि-ध्यायै. 34,16 °शं°. 20 सस्निं°. 23 °तिं देवायुवम्]. 24 ऽश्रुद्धः पराऽघानीतदिदं. 35,2 शं° and °ष्व. 9 देव. 13 °र्हं. —

Adhyâya II. k.१-६ are explained in the Çat. Br. १,३,३,१-४,१६. and quoted by Kâty. २,७,१८-८,२०. k.७-९. - Ç.१,४,५,१-७. - K.३,१,१३-२,२. k.१०.११a. - Ç. १,८,१,४१.४२. - K.३,४,१८-२१. k.११b-१३. - Ç.१,७,४,१३-२२. - K.२,२,१६-२१. k.१४-१९a. - Ç.१,८,२,४-३,२७. - K.३,५,२-६,१९. k.१९b is not yet found out in the Çat. Br., is quoted by Kâty. ३,६,२१. k.२०-२८ are explained in the Çat. Br. १,१,२,२०-३,२३; and quoted by Kâty. ३,७,१७-८,२१. k.२१-३१. - K.४,१,७-३५. k.२१-३१. - Ç.२.४,२,१३-२४. k.३२-३४ being not yet met with in Ç.

1.) इध्मपुत्तकस्य B. 2.) ईयसो लो° B.P. 2a.) See कात्या° २५.२.७. 3.) श्रुतिकथा B.P. 4.) °नभूतस्य B. 5.) °दिन्द्रस्य बा° B. 6.) आवृत्य वेदिं ब° B. 7.) कृवा स्थालीपूर्वकमिति B. The word स्था° is wanting in the mspts of Kâty. 8.) ध्रुवाणीमानि B. 9.) मन्त्रिति B. 10.) दक्षिणेन क्राम° B. 11.) स्था-नान्नियुक्तः B. स्थानाडुपयुक्तः P. 12.) धनवतस्तथास्मान्य° B. 13.) एकैकशः B. 14.) षडवत्ते once only P. °त्तं B. 15.) अतः परं प्रकृत्यन्तमार्षम् B. 16.) B. adds उद्योगं करोति. 17.) प्रथममिति । यं परिधिम् । त्रिष्टुब्विराड्रूपा । एका-दशिनस्त्रयोऽष्टकश्च प्रथमः । आग्नेयी B. 18.) नन्तम् the mspts. 19.) गुणो या-देशः B. 19a.) is wantiug निघ° २.७. 19b.) is wanting निघ° २.२०. 20.) B. adds उत्तरार्धेन परमेश्वरप्रार्थना. 21.) यज्ञप्रयोगे B. 22.) उपसर्गाणामग° B. 23.) संबन्धः the mspts. —

Read: ऽइति or ऽइत्य° pag. 36 lin. 17. 41,3. 44,1. 23. 47,5. 48,19. 23.

50,1 twice. 51,21. 52,19.20 twice. 54,15. Read: pag. 37 lin. 12 °ति दा°. 39,8 ऽअभि°. 11 -इव. 14 अभिनि°. 40,1 ऽउक्त° and जुह्वः A. M. 9 °भ्राड्ये°. 41,1 °धास्तु. 20 °ति या°. 42,8 ऽएत°. 13 °ति नि°. 43,10 °ज्ञानातु. 17 [क°. 44,2 दानादि°. 9 °ज्ञ७ स°. 12 °तेर्गति° and क्तिप्र°. 45,5 [क°. 47,6 ऽवालया°. 48,8 एव भा°. 13 ऋविर्दा°. 49,13 मनुष्यो. 50,5 ऽइमं. 22 सम्मृ°. 51,4 सम्मङ्क्ष्व. 52,12 स्वः. 15 क्रमणं. 19 अस्माद्न्नादिति. 55,16 पितॄन्प्रति. 56,2 ऽऋतवः. 10 °धर्तुं. 16 कुमारं. 21 स्रक्. 57,19 अग्रे. 58,10 °स्वान्पर्यस्वान्. 21 गातुमित्वा गा°. —

Adhyâya III. k. १-८ are explained in the Çat. Br. २,१,४,२७-३० and quoted by Kâty. ४,८,४-१,१२. k. १-१०. - Ç. २,३,१,३१-३८. - K. ४,१४,१४-१५,११. k. ११-४३. - Ç. २,३,४,१०-४,१,१. - K. ४,१२,१-२३. k. ४४-५०. - Ç. २,५,२,२१-३,१२. - K. ५,५,१०-६,३८. k. ५१-६१. - Ç. २,६,१,३८-२,१७. - K. ५,१,२१-१०,२३. k. ६२-६३ have not yet been met with in Ç. they are quoted by K. ५,२,१६-१७. —

1.) प्रेक्षावन् A. M. 1a.) कूर्यति in the निघ°. 2.) ककुद्मः in the निघ°. 3.) स्रक्त्वो B. P. M. 4.) यद्वा—मुनयः is wanting in B. यद्वा अप्नवानृषिः अप्नवानः प्रभृतयो P. यद्वा अप्नवान्प्रभृतयो A. M. The तत् is my coniecture. 5.) यजमानाख्येश्वर° B. 6.) समुत्पन्ने B. 7.) °क्षाजातमिति B. See शतपथब्रा° ३,३,३, २. कात्या° ७,८,८. 8.) B. adds धनवत्यो गावः. 9.) वारटे M. 10.) विश्रम्भणा the mspts. 11.) सुष्ठु प्राप्तुं B. 12.) दृशा° - °ट् is wanting in B. 13.) अतस्मिंस्त° A. M. 14.) मनिन् is against the accent. See पा° ६. १. ११७. 15.) अविलम्बितकारी M. अविलम्बकारी B. 16.) सेवने B. 17.) सेवसे सेवनं B. 18.) धनदानं B. 19.) जपति B. जपे विनि P. जपेति A. M. 20.) व्याकृतित्रया° B. 21.) °णाग्निं गहति B. 22.) शम्भुदृष्टाः B. 23.) °वन्धिर° the mspts. 24.) निर्मितानि मेषमेष्यादिरूपाणि B. 25.) ऐन्द्र - °कोऽत्र is wanting in B. 26.) शुष्मिमिति?? 27.) णिजन्तो B. 28.) instead of का° - त्य इति B has: का° [५.५. ३०.३१.] अवभृथेति जायापती स्नात इति. 29.) °प्रणभ्रू A. M. 30.) °स्मत्कृतं B. 31.) निरन्तरं B. 32.) घस्रादि° the mspts. 33.) B. adds स्तुवीमहि. 34.) °त्या-

शंसते B. 35.) एष A.M. 36.) यꣳ क्षिनस्ति is wanting in B. 37.) एष इति the mspts of Kâty. 38.) भोजयाम B. 39.) कर्कव्यादिः B. 40.) वा is wanting in the mspts of Kâty. 41.) क्वनार्थं B. 42.) °मेवा°? 43.) °नपेक्ष° the mspts of Kâty. —

Read: ऽइति or ऽइत्य° pag. 61. lin. 9. 63, 9. 17. 64, 12. 16. 17. 65, 15. 67, 12. 68, 5. 70, 7. 71, 9. 87, 8. — Read: pag. 59. lin. 21 [क°. 60, 20 °ध्य. 61, 18 °त्कराः? 63, 2 प्राप्तवान्. 64, 9 °श्च त्रिं°. 25 [क°. 65, 15 ऽउग्घ°. 66, 9 ऽग्नीऽउ°. 11 °स्तोऽअ°. 67, 2 ऽएतेऽआ°. 11 °ग्नी त्रि°. 68, 4 °र्मात्ति. 22 विभुव°. 69, 9 °न्येनया. 12 दीप्तिं. 19 °दां च°. 70, 1 यन्मे. 2 °त्यानि. 71, 14 ऽअस्य. 72, 7 । तानि यथा ।. 8 ऽआत°. 9 ऽआमि°. 10 °मण्डः. 25 °नाद्. 77, 17 विनियु°. 79, 8 ऽअभि°. 24 पभू°. 82, 1 बिभ्रतो. 84, 21 [निघ° २. 87, 5 पुनरु°. 12 °र्धन. 89, 7 एव क्र°. 92, 21 पितृ°. 93, 3 °म्बकह्°? 94, 2 प्रज्ञन°. —

Adhyâya IV. k. १-३७ are explained in the Çat. Br. ३, १, १, ११-३, ४, ३०. and quoted by Kâty. ७, १, ३६-१, ३२. —

1.) is wanting in B.P. 1a.) against the accent. 2.) °द्य अरङ्कधौतं क्षानवासः क्षानवस्त्रं स्नातो वस्ते यत् स्नातावस्यं वासोऽत्र धौतं विचिकितकेशं B. °द्य क्षानवासः क्षानवस्यं स्नातो वस्ते यत् वाऽमौत्र° M. 3.) अकृनत् M. अनुत् A.O. 4.) यज्ञ आश्रितः B. 5.) प्रथमैकेन B. 6.) शुल्ककृष्णसंधिमा° B. and the mspts of Kâty. 6a.) यज्ञायातिष्ठमाने the London-Mspt of the Taittirîya-Sanhitâ E.I.H. 1702. 7.) मेखलादिवत्यं B. 8.) ऊर्णावत् अदाः B. 9.) सोमयज्ञा° B. 10.) त्रिवल्तीं पञ्चवल्तीं B. 11.) मौनावस्थि° B. मौनापस्थि A.M. 12.) °ताः सुत्यक्ताः सत्यो B. 13.) कान्तिषु B. 14.) वन्दितुमयोग्यात् B. 15.) निरु° ७. १५ [२०]. 16.) दानस्याग्र° B. 17.) मार्गान्यातु?? 18.) मार्गान्यातु M. 18a.) the accent requires आवर्तयतु. 19.) प्राप्य MM. 20.) श्रोणौ in the निघ°. 21.) against the accent. 22.) °दर्शिनम् MM. 23.) द्योतते MM. द्योतयते M. 24.) MM. adds अमतिरमामयी मतिरात्ममयीति यास्कः [निरु° ६.

१२.]. 25.) See उणा° 8. १४१. 26.) सविमा MM. I do not find this passage in the Amara-Kosha. 27.) °णं दत्त्वा स्वीकुर्वंस्तं निराकुर्यादिति MM. 28.) क्ष्मा MM. 29.) the निघ° reads गौर्म्मा ज्मा क्ष्मा क्षा क्षमा. 30.) यजमानसमीपे the mss. of Kâty. 31.) तत्साम्यात्प्रज्ञा° MM. 32.) तेन परमः पशुः in the Çat. Br. 32.) (sic!) against the accent. 33.) वरिमा । ग्युलोकोपमानम् MM. 34.) नेत्रत्वमारोक् MM. 35.) कनीनिकां MM. 36.) त्रायते इति पुरुत्रः A. 37.) शाम्ये MM. 38.) °मूतामा° the mss. of Kâty. उतां सूत्रादिना बद्धां वेञ् तन्तुसंताने marginal gloss in M. 39.) MM adds वर्धयतीति. 40.) मह्नीनां J. 41.) कृणु व्रतं is wanting in J. 42.) तनूः J. —

Read: pag. 98. lin. 10 °वामौ°. 102, 14 रिति [पा°. 108, 19 °ति ब्रूः. 115, 7 अनु श्वा°. 116, 18 °श्नुनाज्ञ°. 119, 9 °ग्राज्ञमा°. 123, 22 धामा°. —

Adhyâya V. kaṇḍik. १-३० are explained in the Çatap. Brâhm. ३, ४, १, १-६, १, २६. and kaṇḍ. ३५-४३ Çatap. Brâhm. ३, ६, ३, ७-४, १६. — kaṇḍ. १ is quoted by Kâtyây. ८, १, ४. - kaṇḍ. २-४ are quoted by Kâty. ५, १, २८-२, ६. - kaṇḍ. ५-८ by Kâty. ८, १, १६-२, ३८. - kaṇḍ. ९-१३ by Kâty. ५, ३, २०-४, १७. - kaṇḍ. १४-२६ by Kâty. ८, ३, २६-५, ३२ [kaṇḍ. २२ by Kâty. ६, २, ८.]. - kaṇḍ. २६. २७ by Kâty. ६, २, ८-३, ११. - kaṇḍ. २८-३२ by Kâty. ८, ५, ३५-६, २२. - kaṇḍ. ३३. ३४ by Kâty. २, ८, २२-२७. - kaṇḍ. ३५ by Kâty. ५, ४, २६. - kaṇḍ. ३५-३९ by Kâty. ८, ७, २-१९. - kaṇḍ. ४० by Kâty. ८, २, ४. - kaṇḍ. ४१-४३ by Kâty. ६, १, ३-२१. —

1.) विनैव क्षुधया MM. 2.) °ग्नेवायुप्र° M. 3.) द्वितीयतृतीयावेकादशार्णो MM. 4.) °शास्त्येन्यमज्ञसा B. 5.) according to the accent, which is the same in A. B. C., व्रतपास्त्वे may be the locative of an abstract, see ३. ६३ सुप्रज्ञास्त्वाय, but A (the Pada) divides it, as well as Mahîdhara does, in two words: Mahîdhara's interpretation requires, that the second व्रतपाः be accented as Nominative व्रतपाः, not, as it is, as Vocative. 6.) सर्वतः चिराव° MM. 7.) against the accent. 8.) °यती A. सति MM. 9.) °षः क्षरति the mss. of Kâty. 10.) °दिर्मन्त्रेषूच्यते MM. 11.) कोणास्तत्र प्रदेशेन MM. 12.)

गुल्गुलुसुग° the mss. of Kâty. 13.) सर्वदृष्टौ MM. 14.) सर्ववेदोक्ता MM. 15.) यद्विदं A. the passage is quoted from the Mâdhyandinaçâkhâ. 16.) ज्ञानबला क्रिया MM. 17.) समूढमज्ञातमकृता° MM. 18.) against the accent, for द्यावापृथिवी is Accus. 19.) °शब्देनान्नाभ्यवहार्याणि वसूनि MM. 20.) against the accent: for देवश्रुतौ is Nom. 21.) °स्थेऽभिम° the mss. of Kâty. °स्थेऽग्न MM. 22.) विस्तीर्णे वा MM. 23.) गायत MM. 24.) °तोत्तरत स्थूणां पू° the mss. of Kâty. 25.) बर्हु कृत्वा आवृत्या A. MM. 26.) श्रेष्ठसं° A. 27.) विस्तृतत्वाच्च A. 28.) the Nirukti reads वत्सो वृ°. 29.) वलगान्प्रखनन् A. MM. 30.) °त्यवमर्श° the mss. of Kâty. 31.) तान् नुपरि A. 32.) अधिषवणफलके? 33.) but the text reads आपृण! 34.) wanting in A. M. 35.) हेयमानिनानिन A. 36.) कुडावदावरणं M. कुडयवदा° MM. Read कुड्यवदा°. 37.) against the accent. 38.) Read तारस्वरेण with A. M. 39.) °त्युद्गता° A. 40.) श्यामित्रः A. 41.) °ङायतोति श्रुतिः M. °ङायेदित्युक्तेः MM. 42.) प्राज्ञाक्षित A. 43.) कृती छेदने is a marginal gloss in M. 44.) यङ्ती° - तृच् is a marginal gloss in M. 45.) °स्मात्र MM. 46.) आपू व्याप्तौ marginal gloss in M. 47.) कर्मण्यपोति केचित् marginal gloss in M. 48.) क्रुङ्क्तेः? 49.) स्वाहा - °स्तु is wanting in M. 50.) उरु बर्हु यथा तथा is wanting in M. 51.) क्रुतमस्तु M. 52.) विक्षंसिषुः MM. 53.) Here ends a great lacuna in A beginning from °धीन्यन्नानि in the explanation of kand. 37. 54.) see the fifth note. —

Read: 145,4 उपसर्गाङ्°. 152,3 क्षीणं. 153,21 सगराः. 154,18 °कमुरु. 156,16 अर्कं. —

Adhyâya VI. kaṇḍik. १-३७ are explained in the Çatap. Brâhm. ३, ७, १, १-१, ४, २४. — kaṇḍ. १-२२ are quoted by Kâtyâyana ६, २, ८-१०, ५. (kaṇḍ. ६ being quoted by him ८, ८, २३.), and kaṇḍ. २३-३७ by the same ८, १, ७-१, ४, २०. —

1.) च is wanting in A. 1[sic!].) वदपावस्थानं A. वडुपरि आस्थानं M. तडुपरि अवस्थानं MM. 2.) उपरेणाधोऽधोभागेन पृथिवीं M. अपरेणाधोभागेन अवटप्रदेशेन पृथिवीं MM. 3.) तकारश्छान्दसो A. 4.) °धिनीः A. धिन्याः MM.

5.) आविश अनिशज्ञा° - °विश A. आविश stands alone in M. and MM. 6.) अनर्वा प्रेत्यस° A. अनर्वा - श्रुतिः is wanting in M. 7.) °व्यापनुत्सै M. °व्याप्यनुत्त्यै A. 8.) आधारानादारयोः A. आधारानद्योः M. आधारादरयोः MM. See धातुपा°. २६.२७. in WWestergaards Radices linguae sanscritae. 9.) श्रृतं A. 10.) °ज्ञमानरूपा आभ्यां मल्लाभ्यां MM. 11.) स्थानात् is wanting in A. 12.) इतिकार° MM. 13.) रसो द्रुवापः the mss. of the Çat. Brâhm. रसोऽमाऽद्रवापः A. रसात्धुवापः MM (this mspt reads constantly त्ध instead of द्ध). 14.) स्वतृप्त्यर्थं MM. 15.) against the accent and the Pada: ऊप is a praeposition reigning the Locative. 16.) सोमं is wanting in A. 17.) °र्थरितिप्रणीति MM. 18.) Yâska reads धीसादिनी वा धीसानिनीति वा. 19.) against the accent: नपात् is Vocative. 20.) कार्षिः कृष्यतऽइति कार्षिः MM. 21.) आपः MM. 22.) बङ्कमाननामान्विता A. 23.) रायो M. 24.) Pânini reads वच उम्. 25.) the mss. of Kâtyây. read ऽल्पाऽभूनवधाय. 26.) क्र्तार्। यङ्। in the Jaṭâpâṭha. —

Read: p. 161, 17 इति क्सप्रत्ययः. 163, 12 गुणैर्°. 14 वीतो. 164, 5 °वेत्यर्थः. 17 रमय. 168, 11 द्वेषु. 171, 8 ऊर्धनभाः. 174, 13 गुद्°. 178, 21 निरु° ८.३. —

Adhyâya VII. kaṇḍ. १-३८ (with the exception of ३२. ३७. ३८. ३०.) are explained in the Çatap. Br. ३, १, १, १-३, ३, ३२. — and are quoted (but in different order) by Kâtyâyana १, ३, २३-१०, ३, १०.

1.) श्रीनरसिंहो जयताम्। श्रीमद्वत्सऋषेः (!) कुले समभवडलाकरः (!) पण्डितस्तत्सूनुः(!) फनुसंज्ञकः समजनि श्रीविश्वयोर्भाजनम् तत्पुत्रस्तु महीधरः समलिखन्मन्त्रार्थं (र्थं cod.) मैत्रे पुरे स्वीयज्ञानकृते तेनो (!) तनुतां सन्मङ्गलं श्रीपतिः॥ ऊव्वटेन कृतं भाष्यं माधवं काण्वशाखिकम्। विलोक्य द्वेऽअनुसरन्महीदासोऽलिखत्स्वयम्॥ निजबोधाय शिष्याणां पाठनाय च (व cod.) तुष्टये। श्रीमल्लक्ष्मीनरहरेर्भक्तस्त्वेकृपावतः (°क्रियावतः cod.)॥ षष्ठे M. 2.) Read °मंश्रुभ्यां खण्डाभ्यां पूतः MM reads गाण्डाभ्यां. 3.) The Dhâtupâṭha २७. १७. reads अश्रू. 4.) सं-

गकृत MM. 5.) का° १. ६. ३. 6.) °सोमपातः A. °मपा ग्रतः MM. 7.) प्रयः is wanting here in the mss. of the Nighaṇṭu, but maintained by Devarâjayajvan. 8.) गवाङ्किकाद्विःकादिना MM. 9.) °तम् काशयति वा इमं इति A. काशयति प्रकाशयति वाडमयं इति M. काशयति प्रकाशयति वाङ्म इति MM. 10.) this rule is here wanting in the Kâtyâyanasûtra. 11.) वैश्वदेवी वत्सादृष्टा A. M. 12.) ततनं A. M. MM. 13.) वर्तमान° A. M. 14.) रायो भूयो A. 15.) कथं ज्ञायते । M. कथं ज्ञाता यतो A. 16.) this root is wanting in Pâṇini's Dhâtupâṭha. 17.) वक्तीनाञ् is wanting M. MM. 18.) the Nighaṇṭu reads ग्रापः. 19.) ?. 20.) °छिना कस्मिकग्रेषर° M. कस्मिकत्रेनाशर° A. कस्मिकात्रेषर° MM. 21.) पर्याप्तमतिं is wanting in M. but see १२. २८. °ग्रमतिपूर्क° MM. 22.) 23.) against the accent. ग्रां is a praeposition belonging to the preceding Locative. 24.) °नमधस्था° A. °नमवस्था° M. 25.) का° १०. ७. ७. 26.) तद्रूपाय - °जीवनं is wanting in MM. 27.) there is wanting a verb for these Accusatives. 28.) इट्शब्देन ऊर्क्शब्देन च ?. 29.) वाचननीया A. वाचनीया MM. ग्रविता° - °स्कोक्तिः is wanting in M. 30.) °स्तव शर्मणि सुखे निमित्ते A. M. MM. 31.) वण् MM. See Pâṇ. ३. २. ६२-६8, where the affix is called णिव. 32.) कण्ठमरू° MM. 33.) दीर्घादटि - °सिकत्वं is wanting in MM. 34.) तु is wanting in M. MM. 35.) 36.) against the accent. 37.) राजन्यामात्या°? 38.) मीञ् धातुपा° ३१. 8. 39.) the Nirukti ७. २० reads देवो दानाद्वा दीपनाद्वा, but in the second recention (that, which is followed by Prof. Roth in his edition of the Nirukti) ७. १५ it reads देवो दानाद्वा दीपनाद्वा द्योतनाद्वा, both times differing from Mahîdhara's reading. 40.) सूर्यद्वित° A. MM. 41.) the different division of this verse, made in the text, follows the arrangement of the Anukramaṇî. 42.) रूपैस्तामनुपागतास्ततस्ते स्वे MM. 43.) against the accent and the Pada. 44.) °संधाने MM. —

Read: p. 187, 13 निष्क्रमणमिति and निष्क्रामेत्. 190, 20 इन्द्रवो. 196, 4

विश्वेः. 12 विश्वेदेवैः. 199, 3 धूपशकलं. 206, 25 °गतश्च सुतं. 211, 5 °त्पलाय-ना°. 23 °द्धिरतश्इति. 213, 17 द्वितीया°. 215, 20 स पितृमतः. 216, 9 °प्रतिप्र-स्थाता°. —

Adhyâya VIII. kaṇḍ. १-६० are explained in the Çatap. Brâhm. ४, ३, ५, ६-६, १, २४, with the exception of kaṇḍ. ४७-५० (see Çat. Br. ११, ५, १, ७-११.) and ५४-५१ (see Çat. Br. १२, ६, १, १ foll.): the kaṇḍik. ६१-६३ have not yet been met with in the Çatap. Br. — kaṇḍik. १ is quoted by Kâtyâyana १, १, १५-२१. - kaṇḍ. २-१० are quoted by Kâty. १०, ४, ४-७, ३. - kaṇḍ. ११-२७ by the same १०, ८, १-१, ३. - kaṇḍ. २८-३२ by the same २५, १०, ७-१८. - kaṇḍ. ३३-५३ by the same १२, ३, १-१३, ४, २० (but in different order). - kaṇḍ. ५४-६३ by the same २५, २, ८. १. and २५, ६, १-१. —

1.) धारातो - °अर्कं. These are the very words used by Yâjnikadeva in his commentary on this passage of the Kâtyâyanasûtra. M. and MM. omit them: M. reads only: विच्छिद्य पुनरादित्य°, where as MM. reads: विच्छि-द्य तथैव पुनरादि°. A reads erroneously पुनतथैवरादि° instead of तथैव पुन-रादि°. 2.) चतुर्थमायातीतं MM. 3.) The Pada reads आशीर्देत्याशीः । दा । 5[sic!].) चनः is wanting निघ° २. ७. 4.) against the accent. 6.) अग्माऽइ (sic!) B first hand. अग्माइइ (sic!) second hand. अग्माइँऽइ A (the Pada). अग्माइऽइ C. अग्माइऽइ पत्नीवन् the mss. of the Çat. Brâhm. Read अग्माइऽइ. 7.) उक्थानि - तदेतानि is wanting in MM. 8.) but the Pada reads अकः । 9.) but the text reads the first time निचुम्पुण as Vocative, not as Impe-rative and the second time निचुम्पुणः as Nominative, not as Imperative. The interpretation here given by Mahîdhara is quite different from that proposed by him at ३, ४८, where the same verse is occurring. 10.) गर्भ-रसमयमादायेति द्विः समवदायार्धर्युणा MM. 11.) सोमदृशो A. M. MM. 12.) व-पयैकपदयुतां is wanting in MM. वयेमेकप° A. M. 13.) गौतम° MM. 14.) श्रु-त्वास्मिन्योज्ञ° A. 15.) I have not yet met with this rule in the Kâtyâyana-sûtra. 16.) see वोपदेव° ५. २५. 17.) पवति A. पव M. MM. 18.) कुरुसुति°

M and Kâtyâyana's Anukramaṇî on the *Ṛ*iksanhitâ. कुरुमुनि MM. कुरुस्तुति (or °स्रुति?) A and Kâtyâyana's Anukramaṇî on the Vâjasaneyi-Sanhitâ. 19.) against the Pada and the accent. 20.) यथा in the Pada, but यथा in the Sanhitâpâṭha: see १२. ८५. and Çântanâcârya 8. १५. 21.) मियदिश° A. MM. मिपा° M. 22.) दर्शनशीलं M. देवनं शीलं A. 23.) °भीध्रान्तरे the mss. of Kâty. 24.) °ध्यस्थं MM. 25.) तव एतानि एतादृशान MM. 26.) शास° Anukram. श्यास° A. M. श्यावास MM. 27.) शास° Anukram. and A. सास° M. श्यावास° MM. 28.) मधूत्तमानां B. 29.) पर्ययत्यो A. 30.) but not in the निघ° ३. ३. 31.) बृहत् (Pada) belongs to ब्रूपम्. 32.) यज्ञमानामात्यस्तुतिः A. MM. 33.) स्थनि M. स्वाहा प्रजा° - परमेष्ठिने is wanting in MM. 34.) संकलितो M. 35.) सानः A. MM. प्रातः M. 36.) the mss. read प्रोक्ष्यमाणाः at the beginning of the next verse, but the Anukramaṇî and Mahîdhara join it to this verse, which is required too by the sense. 37.) जगत्संकृतिविशिष्टो विज्ञुः तदा विज्ञवि MM. 38.) the mss. read सन्नः at the beginning of the next verse: see note 36. 39.) भक्ष्यार्थं A. M. 40.) M. adds इति वेददीपेऽष्टमोऽध्यायः समाप्तः । श्रीरामायनमः । नमः कृष्णाय । MM adds इति श्रीमन्महीधरपण्डितविरचितमाध्यन्दिनिशाखीयसंहिताभाष्ये वेददीपाख्येऽष्टमोऽध्यायः समाप्तः श्रीसांबसदाशिवो जयतितरां ॥

Read: p. 219, 21 विछिद्य. 23 चनेति निपातः. 224, 17 आइ. 227, 11 १४॥१६॥ must form a new line. *The text of the sixteenth verse is the same as that of the fourteenth.* 228, 13 पपिवाञ्सश्च. 232, 16 °सिषमव मर्त्यैर्मर्त्यकृतं पुरुरा°. 23 तद्वायासिषं. 242, 3 त्रयम्. 246, 10 सत्रऽर्द्धि° 17 हुत्सद्म°. 253, 18 मनोहरे । 255, 4 °विंशत्यनु°. —

Adhyâya IX. kaṇḍik. १-8० are explained in the Çatap. Brâhm. ५, १, १, १४-३, ३, १२ and quoted by Kâtyây. १४, १, ११-१५, 8, १५. —

1.) भक्षनीयानुष्ठा° MM. 2.) त्रिधाऽवालं A. 3.) दस्तीति ददिशे is wanting

in MM. 4.) विविधेन MM. 5.) किं भ्यत् A. यत् is used here in the sense of the greek ὅτι. 6.) against the accent and the Pada: संवाक् is a compound. 7.) तडि A. MM. 8.) °बद्धेन MM. 9.) °ज्ञावाबद्धः A. °ज्ञाबद्धः MM. 10.) स्यन्दमानः ? coniect. 11.) °रेण च तृचेन the mss. of Kâtyâyana. 12.) कर्म देवतातिः सर्वदेवात्तिल्तातिलौ च छन्दसीति (see पाणि° ५. ४. ४१.) देवश° A. कर्म देवतातिः तिलतातिलौ च छन्दसीति देवश° MM. 13.) ऽप्रति A. प्रति MM. 14.) सृप्तवन्तो A. सृप्यवन्तो MM. 15.) वैचित्ये the mss. and the Dhâtupâṭha २६. ८१. Read वैचित्त्ये. 16.) °दक्लृप्यपि the mss. 17.) निःश्रेण्या MM. 18.) °पमुत्क्रमति (!) क्रेऽमृता A. 19.) भवतु अस्माकं सवंशिन A. भवंतु अस्माकं संवंशिन MM. 20.) सक्तस्य च कृतस्य A. 21.) see Çatap. Brâhm. १. ५. २. १६-१८. 22.) ?°वांतदि° A. M. °वातदि° MM. O. 23.) परिचयविद्धः A. परिचरावद्धः MM. 24.) सुवतामित्यर्थः A. इन्द्रस्या° - °ष्य पुत्रम् is wanting MM.

Read: 258, 9 उपर्यु°. 273, 4 स्तोममजयन्. 12 पश्चात्स°. 275. 18 °पेक्षमिति. 276, 25 आत्म°. —

Adhyâya X. kaṇḍ. १-३४ are explained in the Çatap. Brâhm. ५, ३, ४, ३-५, ४, २६. and quoted by Kâtyây. १५, ४, २०-१०, १२. —

1.) असम्भवात् तदीयातपवर्षणादेरिति द्विः तदानीमातपवर्षणादिर्निमि° MM. 2.) ज्वलरागिन्नूपा O. ज्वलरात्रिशिन्नूपा MM. 3.) वक्तीनोमाः O. °क्तीनां - अपयतीरिति वक्° is wanting in MM. 4.) ध्यमै O. धर्मे MM. 5.) व्रवस्य O. श्रुतेः - ज्ञनयन्तीति is wanting in MM. 6.) Causativum from गुक्ष् as रोपयति from रुक्ष्. 7.) सङ्घाता O. स ऽङ्घाता - तृतीयपर्याये (at the end of the comment on k. 11.) is wanting in MM. 8.) एक एक O. 8[!Read 9].) सूर्यश्च तऽुदेति O. सूर्यश्चे तदा ऽदेति MM. 10.) पर्वतस्तस्य तः पर्वमरुद्भ्यां त इति O. पर्वतस्तस्य अतः पर्वमरुत इति MM. see पाणि° ५. २. १२२. वा° ११. 11.) मो मा अहिं° O. मो माहिं MM. pag. 293, 15 The çloka अग्नौ प्रा° is taken from Manu ३. ७६. Mahâ-Bhâr. १२. १४०६ (where the reading is: °तिर्ब्रह्मन्नादि°). 12.)

but the text reads मयि! 13.) Mahîdhara omits the अभि! 14.) the Pada (and the Jaṭâpâṭha too) reads indeed only विशौजाः, where as it divides the word सत्यौजाः in two parts: सत्यौजा इति सत्य। ओजाः। 15.) सुमङ्गलनामानंतरमाका° O. MM. सुमङ्गलनामानं नरमाका° A. M. 16.) कात्या° १६. ६. २०. 17.) मध्यमद्विवचने O. A. M. मध्यमैकवचने MM. 18.) M and MM add इति वेद्दीपे राजसूयचरकसौत्रामणीवर्णनो नाम दशमोऽध्यायः. 19.) स्वाराग्नौ K first hand. —

Read: 286, 22 °णाभ्यामा°. 288, 23 °तिसृभिर्दश°. 296, 16 रश्मीन्. —

Adhyâya XI. kaṇḍik. १-८३ are explained in the Çatap. Brâhm. ६, ३, १, १२-६, ४, ७ (with the exception of kaṇḍik. ७८. ७९.): and quoted by Kâtyây. १६, २, २७-४, ४२. and १६, ६, ८. —

1.) नमः श्रीकृष्णाय। रमा° M. श्रीगणेशाय नमः। श्रीसांब प्रसंन्। रमा° MM. 2.) इष्टकाभिः MM. 3.) but the text reads प्रसुवाति. 4.) प्रसुवाति MM. 5.) कुक्षि° M. MM. 6.) °न्नुत्क्रमय° the mss. of Kâty. and the Çat. Brâhm. 7.) पृथिवी is a gloss and wanting in the Çat. Br. 8.) अग्ने the mss. अग्नेः is my coniecture: I prefer also to read आग्नेयी instead of आग्नेयी. 9.) °त्येनेन पिण्डमधि° the mss. of Kâty. 10.) °वृत्तये A. 11.) 12.) against the accent and the Pada. 13.) see in VVestergaards Radices linguae sanscritae the Dhâtupâṭha २५. १०. 14.) Read with MM. आग्नेयादि°. 15.) The Pada reads भङ्गुरवताम्। भङ्गुरवतामिति भङ्गुर। वताम्। 16.) हि परं ब्रह्म उपलभ्यते MM. 17.) इतो वायुमूर्ध्वे MM. 18.) पूर्वं ऋचो MM. 19.) आरोग्यदात्र्यः A. MM. In the following lines the disiunction of स्थानात् from आ is against the Pada and the accent. आस्थानात् is a compound, see kaṇḍ. २१. 20.) भरन्सन् M. भरन्धारन् A. Read with MM. धारयन्सन्. 21.) अज्ञाख्यानि पूर्वलो° M. MM. आज्ञाख्यानि पूर्वलो° A. पूर्वं is my coniecture. 22.) VVe expect मखस्य before यज्ञस्य, but the mss. omit it. 23.) श्रद्धणा कृत्वा MM. Read with the mss. of Kâtyây. श्रद्धणां कृत्वा. 24.) गृभ्णात्य° M. गृणात्य° A.

MM. गृह्णात्य° the mss. of Kâtyây. 25.) °श्चलेण्डैरु° °श्चलेण्डमा° M. °यति द्-द्वि° - °मादयि° is wanting in MM. 26.) ह्व is wanting in the mss. of the Brâhm. 27.) the word is wanting in the Nighaṇṭu. 27[sic!].) पाकाद्वर्धे M. 28.) °कर्मस्वयं पठितः MM. 29.) °लायातस्ती° M. °लायाविस्ती° A. लाया-वस्ती° MM. and the mss. of Kâtyây. 30.) अष्टऋग्भिः A. M. MM. 31.) The Nominative of मलिम्लून् is not मलिम्लुचः, but मलिम्लवः, and so also reads the text of verse 79 in A. B. C. J. K (secunda manu), but Mahîdhara and his text (in E. I. H 2479) as well as K prima manu read there मलिम्लुचः, see मलिम्लुचः (sic!) निघ° ३. २१. 32.) मस्मसा B. C. K. J.—

Read: pag. 307, 21 चितिर्ऋषयः. 310, 5 वेत्तीति. 316, 17 °षसामु°. 18 ज्ञा-तं-ज्ञातं. 319, 13 °मूर्ध्व. 21 दृशेः. 338, 13 देवीर्वि°. —

Adhyâya XII. kaṇḍik. १-४३ (with the exception of २१-२१.) are explained in the Çatap. Brâhm. ६, ७, २, २-८, ३, १. and kaṇḍ. ४४-११७ (with the exception of ५३-६० and ७७-१०१) in the same ७, १, १, २-३, २, ८. - kaṇḍ. १-११७ are quoted by Kâtyây. १६, ५, १-१७, ३, २१. —

1.) इति वेददीपे एकादशोऽध्यायः ॥ लक्ष्मीनरहरिं नत्वा हेरंबं गुरुयक्तजं (!)। संक्षिताद्वादशाध्यायि मल्लदीपः प्रकाश्यते ॥ एकादशाध्यायि M. इति वेददीपे एकाद-शोऽध्यायः । श्रीगणेश प्रसंन् (!) । श्रीनृसिंहं रमाकान्तं ब्रह्मादिव्यूहसेवितं । वरा-भयधनुश्चक्रकरं चन्द्रनिभं भजेत् ॥ एकादशाध्यायि MM. 2.) M adds रात्रिदिवसौ. 3.) °न्युद्भणं च तस्मिन् MM and the mss. of Kâtyây. 4.) करोति तस्मिन्क्र° MM. 5.) ग्रहणं ग्रहणं A. 6.) in the second recension. 7.) हि यस्माद्यः ज्ञ-ज्ञानः उत्प° M. हि स्मात् यज्ञात् उत्प° MM. 8.) before धनं we exspect रयिं, but the mss. omit it. 9.) but the sûtra reads: पूर्वपदात्संज्ञायां. 10.) ज्ञानीम A. MM. 11.) पठत्सु is wanting MM. 12.) °प्रगादिद्रूपे A. °प्रगुणादिद्रूपे MM. 13.) रोदसी च वयं A. M. रोदसी व वयं MM. 14.) घृतिः is omitted in the commentary. 15.) On account of the accent भाः is not to be disjoined from बृहत्, बृहद्भाः is a compound. 16.) 17.) बोधामेति A. 18.) The edi-

tions of Pâṇini read: रु. 19.) ब्राह्मण A. 20.) तत्स्वस्थान° A. तत्स्थान° MM. 21.) °र्णां मयि ते कामधरणमभूदिति मयि ते पशवो the Brâhm. 22.) संपत्त्यर्थः A. 23.) against the Pada and the accent. आ belongs to अप्सु see Adhyâya VII. not. 22. 23. 24.) आपश्च A. MM. 25.) °सीत्येवं MM. 26.) here seems to be a lacuna in the mss., as the explanation of त्रिधा रोचनि दिवः is wanting. 27.) दुष्टशिष्टा M. दुष्टशीक्षा MM. 28.) °णादेव यज्ञनात्रि° A. M. MM. 29.) स्यतिद्रुपस्यष्टो MM. 30.) सुम्रया A. B. सुम्रया C. K. J. Mahîdhara's text (E. I. H. 2479.) and the Brâhmaṇa. 31.) युङ्क्त is wanting in MM. 32.) पविर्धा° MM. Read with A. पवी धारा°. 33.) ओषधियुक्ताः A. 34.) ज्ञगच्छननभ° MM. 35.) नहिवृतिवृत्यौत्या° MM. see Adhyâya VI. not. 13. The editions of Pâṇini read वृषि instead of वृधि nor do they enumerate रुध् amongst the verbs comprehended in the rule. 36.) I have not yet met with this rule. 37.) Yâska reads अथाप्यस्यां ताद्धितेन कृ°. 38.) sic! सनोतिः coni. 39.) आनयति MM. 40.) see Adhyâya VIII. not. 20. 41.) °स्तवोदितः MM. 42.) On account of the accent उप is here preposition, not adverb. 43.) बलाशस्या° B. and Mahîdhara's text (E. I. H. 2479). 44.) °गद्रु° M. °दद्रु° MM. 45.) प्रतिदिशं is wanting in A. MM. it is taken from the mss. of Kâtyây. 46.) The Nighaṇṭu reads आनट्. 47.) लोकेष्टको° MM. 48.) आशीर्देवी MM. 49.) °पङ्क्तिः M. MM. °पङ्क्ती A. 50.) यज्ञापर्यासमन्त्र A. यज्ञभपर्यास° MM. 51.) धनं A. 52.) The Pada reads मानुषा. 53.) मनुष्यज्ञानियु° A. 54.) °षाट् A. 55.) The editions of Pâṇini read इनिठ°. °दी ग्रहा° - °शयेन म° is wanting in MM. 56.) तिष्ठति A. 57.) °दिसिकत्तात्तो M. MM. 58.) M. and and MM add इति वेददीपे रुक्मशोचनादिसिकताभिमन्त्रणात्तोऽध्यायः ॥. —

Read: pag. 352, 1 प्रयाणंमु°. 359, 12 [पा° ८. 8. ३ (9.).]. 364, 19 अग्ने. —

Adhyâya XIII. kaṇḍik. १-५३ are explained in the Çatap. Brâhm. ७, 8, १, १-५, २, ६१. and kaṇḍik. ५8-५८ in the same ८, १, १, 8-२, १. - kaṇḍik. १-५८ are quoted by Kâtyây. १७, ३, २७-६, १. —

1.) श्रीनृसिंहं गणपतिं गुरुं दुर्गां शिवं गिरं । नत्वा त्रयोदशेऽध्याये वेददीपं ब्रुवे शुभं । द्वादशे M. and MM. 2.) See पाणि° ६. ४. ७३. 3.) सम्यक् MM. 4.) शत्रुत्र सहते MM. शत्रून्न स° A. 5.) षेवालेषु MM. 6.) समुद्रवन्ति? 7.) against the accent and the Pada. अन्तः is to be disjoined from कृदा. 8.) सप्त-सप्त । एकैकमित्यन्ये M. MM. 9.) °यादीकारः A. °यादीकारौ M. °यादीकारो MM. 10.) चितिं चेतव्यं MM. चित्तिं चेतव्यं A. The text reads °चित्तिं. 11.) रजसो प्रज्ञायते A. M. MM. 12.) एतच्च A. 13.) नृन् A. नृः B. नॄः C. नॄँः EIH 2479. नृ७ः K. J. See १८. ७७. where we find the following readings: नृः B. नॄँः C. नॄः EIH 2479. नृ७ः K. J. 14.) एमन् A. MM. 15.) मन् लोपश्च A. मन्नो लोपश्च MM. 16.) °मोन्मन् A. MM. 17.) इयमपाम° the Brâhm. The word पृथिवी is a gloss. 18.) Kâtyâyana reads दश-दश पुरुषमुपार्ध्वैके रेतःसिग्विलायां च सर्वतो यथायोगमयं पुर इति प्र°. 19.) भरत् A. 20.) °त्तरतस्तस्थौ A. °त्र तस्थौ MM. 21.) °त्सुमित्रं A. °त्समित्रं M. MM. 22.) °मित्रऋषिरूपं A. MM. 23.) चे-चे ना° A. MM. 24.) °कर्मऽर्षि° A. MM. 25.) °तृष्णा लो° MM. 26.) विश्वेति A. MM. see Adhyâya XII. not. 16. 17. 27.) M. and MM add. इति वेददीपे प्रथमचित्युपधानं नाम त्रयोदशोऽध्यायः. —

Adhyâya XIV. kaṇḍ. १-३१ are explained in the Çatap. Brâhm. ८, २, १, ४-४, ३, १९ and quoted by Kâtyâyana १७, ८, १५-१०, १९.

1.) श्रीनृसिंहं गणपतिं प्रणम्य कृपया तयोः । अयं चतुर्दशाध्याये वेददीपो वितन्यते ॥ त्रयोदशाध्याये M. and MM. but M reads both times °शेऽध्याये. 2.) उख्यस्याग्ने M. °स्याग्ने MM. 3.) वीर्येणेह तिष्ठति M. MM. 4.) द्रविणो MM. 5.) मन्त्रविशेषो? coni. उद्भुख - पठ्य is wanting in MM. 6.) ज्यैष्ठमासः M. 7.) प्रातिकसु° M. प्रतिकसु° MM. 8.) समानस्य is wanting in M. 9.) वयोनाधाः M. ते वयोनाधाः - श्रुतिः is wanting in MM. 10.) M adds एवमुत्तरमन्त्रेष्वपि. 11.) सर्व - विश्वैर्दे° is wanting in MM. 12.) ज्ञनयचा M. 13.) दर्शनसमर्थं - °वणसमर्थं is wanting in MM. 14.) बङ्कशासुश्रव° M. the शव् is my

coni. 15.) चतस्रः पुरस्तात् is wanting in some mss. of Kâtyâyana. 16.) वस्त्वजः द्वि° M. वस्तस्त्वजः द्वितीयस्यैकव° MM. 17.) वयसा is wanting in M. MM. 18.) व्याकृताः M. 19.) क्वयं पृष्टि the Brâhmaṇa. 20.) पूर्वऋत° M. MM. 21.) आप्यायेषु MM. 22.) द्वादश२ M. द्वादश MM. 23.) मितछादा छन्दो MM. 24.) °रूपं छन्दस्त° MM. 25.) पादौ M. MM. 26.) मङ्क्ष M. 27.) संस्तंबः MM. 28.) वायुर्भूत्वा M. 29.) पञ्चऋतु° M. MM. 30.) M adds अधिकमासानिप्रायेण. 31.) द्वादश M. 32.) °गच्छति जन्मना M. 33.) एतद्वै the mss. of the Brâhmaṇa. 34.) I should like to add here पतिरेव. 35.) °रस्तुत M. 36.) but the accent of the Brâhmaṇa divides both words into two. 37.) Here closes a great lacuna in A., where the whole Adhyâya from the beginning till to these words is wanting. 38.) °रस्तुत A. 39.) M. and MM. add इति वेददीपे द्वितीयतृतीयचतुर्थचितिमल्लनिरूपणं चतुर्दशोऽध्यायः ॥

Adhyâya XV. kaṇḍik. १-६३ are explained in the Çatap. Brâhm. ८, ५, १, ८-७, ४, ११ (with the exception of २०-३८): the are quoted by Kâtyây. १७, ११, १-१२, २७. —

1.) गजास्यं नृहरिं गङ्गां वाचं लक्ष्मीमुमां गुरुम् । नत्वा पञ्चदशेऽध्याये वेददीप उदीर्यते ॥ चतुर्दशेऽध्यायि M. MM. 2.) ऽस्माकधि° A. 3.) °तानुत्पत्स्यमानानपि A. 4.) °न्द्ररूपञ्चदश° MM. 5.) against the Pada and the accent, who show, that we are to read आर्यजास्व, not यजास्व. 6.) दश MM. दश२ A. M. 7.) भूक्ता A. 8.) प्रज्ञाम° MM. 9.) आव्रियत is wanting in A. 10.) विचतिर्व्या°? coni. 11.) समुद्रवत्य°? coni. 12.) We exspect समुद्रश्छन्दः as the Brâhmaṇa too reads: but the mss. omit the छन्दः. 13.) वा is wanting in A. 14.) कुप्रदी° A. ककुप् दी° MM. 15.) कपीत° A. 15.) °रावतिर्य° A. °राबलिर्य° MM. 17.) विलेखनयोः A. 18.) भोज्यन्ते A. भोजन्ते MM. भोद्यन्ते is my coniecture. 19.) is wanting in A. 20.) We are to exspect गिरश्छन्द. 21.) आज्ञश्छन्दः C. 22.) is wanting in MM. असुभ्र A. 23.) करेशिम° A. 24.) दुःखिन रोरुणं A. 25.) °प्रयाजज्ञात° A. 26.) तद्रि this root is wanting in Pâṇi-

ni's Dhâtupâṭha. 27.) स्थले र् A. स्थले२ M. 28.) अथवा वाक्या° A. 29.) द्वितीयांतं A. MM. 30.) °त्यन्वेतिरत्नम् A. MM. 31.) रात्रिं MM. 32.) °नाध्यापनायोप्र° A. तेनाधीतायाध्ययनायो° MM. 33.) °र्गमनत्युत्क्रा A. 34.) अन्नाय M prima manu. 35.) ऊर्जा अन्नरसं A. 36.) but Yâska reads गृत्स इति मेधाविनाम गृणा° 37.) स इनां A. स सेना MM. 38.) समग्रामं A. 39.) परिचारिकौ A. परिचरिकौ MM. 40.) पुञ्जिकृतस्य A. पुञ्जीभूतस्य M. 41.) माक्षिक्षिरिति A. माक्षिक्थिरिति M. 42.) युक्ते A. 43.) अग्ने A. MM. 44.) दक्षिणा is wanting in MM. दक्षिणतः in A. 45.) असौ MM. 46.) स्फूर्जा A. स्फूर्जी MM. ट्वोस्फुर्जा Pâṇini's Dhâtupâṭha. 47.) प्रोक्षतो MM. 48.) तस्यापि MM. 49.) विप्रयुक्तः । A. 50.) स्तुतयो यस्य स्य ऽरुव्यश्वो गतिर्यस्येति A. 51.) is wanting MM. 52.) सुतेरि° MM. 53.) इलोप A. M. 54.) °त्सोऽपः प्रविश° MM. see Vâjas. S. spec. II, 86. 55.) मथनाड्ना° A. M. मथ्यमानाड्ना° MM. 56.) च सुशब्दो A. 57.) °क्तुमागह° MM. 58.) °द्वलपुत्रत्वं सक्तस्यु° MM. सक्तसः पुत्र° M. 59.) वपा A. 60.) MM adds उपस्करभूतो वा. 61.) एवन्यः A. एणयः M. The affix एन्य is wanting in the Uṇâdisûtras: but see ऽणा° ३. १७. 62.) कल्याणादो MM. 63.) तापपापप्र° MM. 64.) मेने A. 65.) लड्डु° A. M. 66.) द्रवन्ति MM. 67.) स MM. 68.) °स्ये शंगागमः A. °स्य शगागमः M. °स्य शागमः MM. See Pâṇ. ६. १. १५१. 69.) This quotation is wholly misplaced, for रथीः is not formed by ईरच्, but by ई see पा° ५. २. १०१. वा° २.: besides the quotation itself seems to be incorrect see पा° ५. २. १११ and १०१. वा° ३. A reads °चाविस्त्यर्थे and MM. °र्थे ईरप्रत्ययः. 70.) स्वधरः is omitted in the interpretation. 71.) °मण्डलं - गृह्णाना A. 72.) सेति A. सेति M. MM. प्रेति is my conjecture, as I have not yet found this passage in the Çatap. Brâhm. 73.) वकृति° A. 74.) शिशिरक्षतो° A. शिशिरक्रतूरव° MM. 75.) तृतीयां विश्वज्योतिषं A. परमेष्ठी - °तिषं is wanting in MM. 76.) अविष्यत्यत्तिक° A. आभविष्यंनित्यंक° MM: the Nighaṇṭu reads अविष्यन्. 77.) स-

मुखपुच्छमग्निं MM. 78.) सोदकं तिं A. सोदकंस्तिं MM. 79.) मनोकरे M. MM. 80.) MM adds इति श्रीमन्महीधरकृते वेददीपे पञ्चदशोऽध्यायः । 81.) See मलिम्लुचः Adhyâya XI. not. 31. —

Adhyâya XVI. The kaṇḍ. १, १७, २३, ३६, ३७, ५३, ६३-६६ are partly explained in the Çatap. Brâhm. १, १, १, १३-३७: kaṇḍ. १ is quoted by Kâtyây. १८, १, १-५.

1.) श्रीगणेशाय नमः । श्रीसांवसदाशिवाय नमः ॥ लक्ष्मीं नरहरिं नत्वा महागणपतिं गुरून् । वदामि षोडशेऽध्याये मल्लदीपं यथामति ॥ पञ्चदशेऽध्याये MM. 2.) °याख्या व्होम° MM. A. °ख्यव्हो° is my conjecture. 3.) अनुवाकजपान्ते MM. 4.) कैलासे MM. 5.) is wanting in A. 6.) See पा° ६. ३. १२०. वा° २. अडि वेत्वात्वम् M. अडि वै वेत्वम् A. अडि वेत्येवम् MM. 7.) हे मीढुष्टम से [मिह् सेचने युवतम परिणामनिषेधद्वारेण स्तुतिः अस्मात्सर्वं भवति इति उव्वटभाष्ये] कृतम कायवर्षुक ते त इति अवर्थकः (!) । उव्वटः । ते हेतिः खड्गरूपमायुधं । ते हस्ते धनुरिति तेपद् तव हस्ते यो धनुः हेतिः धनुरूपमायुधं MM. U'aṭa's scholion reads as follows: या तव हेतिरायुधं हे मीढुष्टम मिह् सेचने सेक्तृतम युवतम परिणामनिषेधद्वारेण स्तुतिः अस्मात्सर्वं प्रभवति हस्ते बभूव भूता ते इति अनर्थकः धनुरिति हेतेर्विशेषणम् तया हेत्या अस्मान्विश्वतः सर्वतः त्वमयक्ष्मया यक्ष्मा व्याधिः व्याधिरहितया परिभुज परिपालय । 8.) विश्वतः सर्वपापेभ्योऽपराधेभ्यो वेति अहो बलः सर्वतः नोऽस्मान् त्वं परिभुज भुजेर्वि° MM, but the text reads अस्मान्, not नो. 9.) एव । किरिकेभ्य इत्येतावत्पर्यन्तम् MM. 10.) इषुमद्य - योगात् is wanting in A. 11.) °स्काराः । ते च न भयेत्याद्याः तेषां MM. 12.) एकै° - रुद्राः is wanting in MM. 13.) पथामिति प्राप्ते छान्दसं । उव्व° । पथीनां MM. U'aṭa reads पथामिति प्राप्तं. 14.) °तृतीय(!)पुनः-पुनः संसारिणः MM. 15.) अहल्ये MM. 16.) न हि सारथिः कमपि हन्ति MM. 17.) आलो° - नमः is wanting in A. 18.) हस्त्यश्वरथपदातिः पत्तिः । एको MM. 19.) The MBh. reads एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ 20.) कृत्स्नायतस्य भावः कृत्स्तायता तया A. कृत्स्नायस्तस्य भावः कृ-

त्स्नायता तया कृत्स्नायततयेति प्राप्ते तकारलोपश्छान्दसः MM: these last words are taken from U'aṭa. 21.) तलोपश्छान्दसः is wanting in MM. 22.) सत्वनः A. MM. 23.) against the accent and the Pada: नक्तं चरन्त्यः are two words, not a compound. 24.) व्रतपतय° A. MM. 25.) क्षितारः MM. The mss. of the text read क्षतृभ्यः. 26.) See उणा° २. ११: क्षत्तृ is wanting there, its formation being taught in the preceding rule २. १०. 27.) the mss. of the text read पुञ्जिष्टेभ्यश्च. 28.) श्वभ्योऽपि प्रणातिर्युक्ता शिवाधिष्ठानशङ्कया । श्वानो वेदाः श्वपतयो वेदानां परिपालकाः । शिवरूपस्थे [°रूपस्थे the mst] मल्लाख्यरिपुसंहारं कर्तुं भैरवरूपधृक् । भयौ [?यथौ?] स वाणतूणीरखड्गचर्मधरो हरः । तदा किरातवेषेण देशः [?देवाः?] सर्वे समाययुः । तदा वेदाः श्वरूपेण ययुर्देवगणान्विताः ॥ दिशं संपूरयन्तस्ते ध्वनिभिर्मल्लभीषकाः । ततो ममार तं मल्लं हरो भैरवरूपधृक् । तदा प्रभृति रुद्रोऽयं मल्लारिरिति [°रीरिति the mst] कीर्तितः । इत्यस्कोबलभाष्यं (!) । अतः शुनां [शुनं the mst] नमस्कारः क्षेत्यादिपः पराकृतः । भास्करीयभाष्ये त्येवं (!) शिपिः शेफ (!) इव निर्विष्टितः [See निरु° ५. ८.] खलतिरभिधेयः प्रजननरहिष्टरहितः (!) इति उग्रटः ॥ श्वानः MM. The words from भास्करी° - उग्रटः are certainly misplaced here: they very probably may have been taken from a marginal gloss v. 29, where the word शिपिविष्टाय is explained by U'aṭa as follows: शिपिविष्टः शिपि इव (!) निर्विष्टितः खलिभिरित्याभिधेयः । (Bhâskara's explanation of शिपिविष्ट see: Indische Studien II, 37.) The story of मल्लारि is no where mentioned by U'aṭa nor by Bhaṭṭa Bhâskara Miçra. 29.) कर्कुरास्त° MM. 30.) °चका इतिक्रान्ताः वा MM. 31.) चवलमे° A. 32.) कैलासे MM. 33.) the mss. of the text read उर्म्याय. 34.) A reads प्रतिशर्याय च. 35.) is wanting in A. 36.) कणे MM. 37.) वेदांता A. वेदाता MM. 38.) काले MM. 39.) ज्ञपे धमे MM. 40.) वृद्धौन्वो ज्ञलं प्रस्त° A. 41.) कक्षः शुष्पूवने MM. 42.) वैशन्तो MM. 42[!].) धनागम° A. 43.) पुरो - नमः is wanting MM. 44.) °धविवस्ता A. °धनिवद्ता-

व MM. 45.) उलुपा A. उरूपा MM. 46.) उलुप्यस्तस्मै A. 47.) शोभन ऊर्वः सूर्वस्तत्र MM. 48.) स्वर्गादौ MM. 49.) the Nighaṇṭu ३. ३ reads तवसः, not तवः 50.) चर्मेत्या° A. MM. 51.) संख्यैक° - °र्थः is wanting in A. 52.) पूवऋचोऽनु° A. MM. 53.) wanting in A. 54.) शिव ऋतस्य ऋतस्य शिवा शिव ऋतस्य J.

Adhyâya XVII. kaṇḍik. १-१३ (with the exception of १६-३२, ३५-५२, ८१-११.) are explained in the Çatap. Brâhm. १, १, २, ५-३, १, २६ and quoted by Kâtyây. १८, २, १-४, २६ (with the exception of ३५-३८.). —

1.) श्रीनृसिंहं रमानाथं ब्रह्मादिव्यूहसेवितम् । कंठे त्रिनयनं दिव्यं शेषं छत्रं चतुर्भुजम् ॥ पीतांशुवरचक्राभ्याधरं (!) वंदे सितत्विषम् । अरुरादिषु चक्रेषु चक्राद्यै वेष्टितं बहिः ॥ श्रीगणेशं रमानाथं गिरिं नत्वा प्रकाश्यते । दीपः सप्तदशेऽध्यायि नृसिंहस्य च तुष्टये ॥ षोडशाध्यायि MM. 2.) see पा° ५. २. १२२. वा° ११ (but तप्!). 3.) the accent and the Pada show, that अधि सम्भृतं are two words, not a compound. 4.) हि A. MM., but वै the mss. of the Brâhmaṇa. 5.) ईष्टदाः A. सर्वश्रेष्ठदाः MM. 6.) A (Chamb. 27) and E. I. H. 2479 read ध्रु° in the text, and so do also the mss. of Mahîdhara: ध्रु° seems to me indeed the elder form, but as B (Chamb. 29.) C. K. J. maintain ध्रुव°, I have done the same in the text. 7.) see निघ° १. १. 8.) °रम्भणं मृदिव घटानां । तथा MM. 10.) °दयत्याफम्यांरंभन इति भाः MM. 9.) निस्तक्षाकृतवान् MM. निस्तक्षनिस्तक्ष्यलकृतवान् O. The whole passage from °कर्मा द्यावा° to गृहादिनिर्माण° is wanting in A. 11.) दिवा A. MM. 12.) °त्यैरधि A. °त्यैरेचि MM. 13.) वीर्यमथाक्षिपत् A. Manu reads वीजमवासृजत्. 14.) Manu reads सहस्रांशुसमप्रभम्. 15.) च यमात्मानं ज्ञानी इति A. यज्ञदत्तोऽहमिति - युष्माकमहं° is wanting in MM. 16.) वक्ष्यहम्प्र° A. 17.) युष्माकनहम्प्र° A. 18.) सर्वावदातं MM. सर्वावदांतं A. 19.) तीवन्नपवदत्तेपि A. जीवन्नपवतदपि MM. 20.) चेन्न MM. 21.) वर्षुक्षशब्दो MM. 22.) [निरपे]क्षं शत्रूनेक एव to संयोगितनिरपे[क्ष इत्यर्थः] at the end of the interpretation of kaṇḍ. ३५

is wanting in MM. 23.) see पा° ६, १, ११८. ८, १, ११. 24.) The interpretation of इषुहस्तैः and निषङ्गिभिः is wanting in A. MM: through the kindness of Dr. M. Müller I supply it here from an Oxford mst: it runs thus: कीदृशः इषुहस्तैः इषवो हस्ते येषां तैः निषङ्गिभिः निषङ्गः खड्गो विद्यते येषां तैर्धानुष्कैः खड्गिभिश्च स्वकीयैः परकीयैर्वा. 25.) संयोगिलनि° A. 26.) अपचियते MM. 27.) न B.K. 28.) so the Padapâṭha (A), whereas the Jaṭâpâṭha reads विश्वाहा, which reading I would prefer. 29.) against the accent, for then the word ought to be accented विश्वाहा. 30.) च (conj.) is wanting in A. MM. 31.) °हूह्या रात्रौ घृतस्थिता A. °हूस्था रात्रौ घतस्थिता MM. 32.) द्वितीयेन्द्रदेवत्या is wanting in A. MM. I have supplied it from the Anukramaṇî. 33.) the mss. of Kâtyây. omit the प्रति. 34.) °त्यादिऋक्प° MM. O. [चित्यं प्र]तिगह्णन्ति - °पाठ इति is wanting in A. 35.) °यां प्रज्ञामंघां A. °यप्रज्ञामाज्ञां MM. 36.) against the accent. 37.) न उ सादिशा° MM. त्तेजुसादिशा° O. °°सादेशा° A. M. See पा° ८. ३. १. 38.) पृथा संलग्नं A. 39.) °त्यादिऋक्कतु° A. MM. 40.) पञ्चऋग्भि° A. MM. 41.) उपधानात् MM. 42.) against the accent. 43.) यज्ञार्थे MM. 44.) इष्टिका° A. MM. 45.) °संबंधं A. MM. °संबद्धं O. 46.) क्षोत्र MM. 47.) क्षोत्रे यज्ञे येषां MM. 48.) क्षिरण्यागगनाघ्याघ्या A. 49.) but the Muṇḍaka reads सुलोहिता या च सुधूम्रवर्णा. 50.) उक्थः A. MM. उक्थ्यः is my conjecture. 51.) पञ्चमऋचि A. MM. 52.) The mss. of the Text read this verse not here, but अध्या° ३१. ७. in the Âraṇyaka portion of the Vâjasaneyi-Saṁhitâ, on account of its being अरण्येऽनूच्यः (see Indische Studien I, [74] 185 not.), and it is also on account of this its separation from the foregoing verses that relate to the same subject, that this verse seems to have been denoted by the epithet विमुखमन्त्र, which occurrs several times in the Kâtyâyanasûtra. 53.) [सुग्ल]क्षणं स्तनं to उत्समुत्स्यन्दनं सुग्ल[क्षणं कूपं] is wanting in MM. 54.) see Mugdhabodha ५.

२५. 55.) against the accent. 56.) अन्नेनेत्रेताङ्गति A. 57.) ?बङ्क्वा MM. 58.) against the accent.

Adhyâya XVIII. kaṇḍ. १, ७७ are (with many exceptions) explained in the Çatap. Br. १, ३, २, ५-५, २, १ and quoted by Kâtyây. १८, ५, १-६, २३. १७, ७, १. २.

1.) श्रीगणेशाय नमः । लक्ष्मीनृसिंहकृशशिशेखरचन्द्रकान्ते (!) शेषासने (!) त्रिभुवनैकगुरो दयाब्धे । ब्रह्मादिदेवपरिवेष्टितदीनबंधो मद्बुद्धिलेखितमिदं सफलं विधेहि ॥ सप्तदशेऽध्याये MM. 2.) ?? the number of the kâmâs is not 115, but 378. viz. (19 × 12 =) 228 + 14 + 8 + 13 + 10 + 32 + 22 + 10 + 8 + 13 + 20! 3.) समुदयावित्थया A. 4.) असुस्तवृत्ति° A. असुश्चवृत्ति° MM. असुः प्रवृत्ति° is my conj. 5.) °व्याध्याधिरा° MM. 6.) धस्तथालोपे A. [समाना ग्धि]र्भोजनं - जश्त्वं ग्धि[र्बन्धुभिः] is wanting in MM. 7.) ञेत्रभावो A. 8.) against the accent, the Padapâṭha and the Jaṭâpâṭha. 9.) प्रसिद्धाः is wanting in A. 10.) °श्रणकाः MM. 11.) is wanting in A. 12.) °स्यैवादृश्यमाणवद् A. 13.) रूपमीर्नं तदृग्रूपो A. 14.) ?°शब्देनातिग्राह्यो coni. [°ग्राह्यो]विवक्षितः - निग्राह्यो [विवक्षितः] is wanting in MM. 15.) °ठात्तर्दशायन्नो A. 16.) ऊवौ A. 17.) ज्ञानू MM. 18.) °ण्डिकायां A. 19.) नुत्तरेण A. 20.) समालंबनारोहे° MM. 21.) वृष is wanting in A. MM. 22.) °द्भोपघातिनी MM. 23.) मक्ष्मुपयोग° MM. 24.) अपि MM. 25.) against the Padapâṭha and the Jaṭâpâṭha of this passage when occurring in the ninth adhyâya (१. २०): for here (as well as in the similar passage २२. ३२) those words of the text, which had been already enumerated before, are wanting in both pâṭhâs, according to their general usage: if we ought to read here अमुग्धाय, this difference would certainly have been pointed out by them. 26.) बाङ्लकात् कल्यपि नशेरमागमः A. °ल्कादसुल्यपि नशेरमागमः MM. 27.) [कार्त्ति]काय - कार्त्ति[काय] is wanting in A. 28.) against the Padapâṭha and the Jaṭâpâṭha at १. २०. see before note 25. 29.) विनंशाय A. 30.) ज्ञी-

ति A. the Bhagavadgîtâ reads °र्षोऽक्रम्. 31.) माध्यस्तानादि A. माध्यस्तानादि-ना MM. 32.) कल्पक्रोमः A. 33.) ब्रह्म A. The Padapâṭha omits the ब्रह्मा, not so the Jaṭâpaṭha. 34.) against the accent. देवाः is Vocative. 35.) श-ब्लौपे सनम्यत्वेन A. शब्दे लोपे सस्य नत्वे MM. 36.) the word दानं is not mentioned at all in this explication! 37.) but the text reads सर्वाः not. विश्वाः! 38.) ऽयोज्ञनां A. 39.) अभिषेकस्य द्रव्यसाध्यात्वात्. 40.) विद्यते MM. 41.) विभज्य-विभज्य द्वादशांशमृतेत्यादि° A. 42.) ब्रह्मादीनि तान्यपकृष्य A. 43.) तान्यपकृष्योत्तरो A. 44.) °क्षान्त उत्तरो A. °क्षा उत्तरोत्तरेन्मल्लः MM. 45.) ज्ञेयः पुंसे A. 46.) नाम is wanting A. MM. 47.) उणादि इरप्र° A. उणादि - इषिर् इति [क्षिप्र इ°] is wanting in MM. 48.) °भृती A. भृति क्षाणस्त° MM. 49.) °क्तेवाकारलोपः A. °क्तेः । चकारलोपः MM. 50.) वाहं A. 51.) °वत् । आकरधारि° A. 52.) इञ् in the Uṇâdisûtra. 53.) णिच । MM. 54.) in A B C K J. unaccented against पा° ८. १. १८. २८. 55.) क्षत्नुरूप° A. चन्नू रूप° MM. 56.) इति प इत्लोपः MM. इति परलोपः A. 57.) वेदिभूम्या च बर्हिषा दर्भपूञ्ज-केन MM. 58.) अनद्वितवादिनी A. अग्न्यदेवादिनी MM. 59.) °मात्मन्यदेवतं MM. 60.) is wanting in A. 61.) is wanting in MM. 62.) see पा° ६. ३. १६. १७. 63.) so A. M. MM: a second hand in MM has corrected this hemistich into its usual form श्रीमन्महीधरकृते वेददीपे मनोहरे. 64.) MM. adds इति वेददीपेऽष्टादशोऽध्यायः । लिषितं माक्षदेवः (!) संवत् १८१४ फा-ल्गुन सुद्ध ८ मंदवासरे शुभमस्तु । 65.) ज्ञगंध J (sixtimes). ज्ञघंध K: but cor-rected in K. J by a second hand into ज्ञघंघ.

Adhyâya XIX. kaṇḍ. १-११: ३२-३६: ३५-३८ are explained in the Çatap. Br. १२, ७, ३, ५-८, १, २२. — kaṇḍ. ७१, ७२ are explained Çatap. Br. १२, ७, ३, ३ and kaṇḍ. ८० is explained Çatap. Br. १२, ८, ३, १३. — kaṇḍ. १-११, ३२-६१, ७२-९५ are quoted by Kâtyâyana १९, १, २२-३, १२.

1.) ध्यध्याये MM. 2) मुखिनरक्षि° A. मुखोत्तर° MM. 3.) ग्येक्षा A. °ज्ञलो यक्षा MM. 4.) °र्निःस्राव° A. °र्णिःस्रावुदंम MM. 5.) स्थापयत द्व° A. स्थापयत

द्वयं चूर्णावामद्वः MM. 6.) °संसर्गेण MM. 7.) °भ्यां यथाय MM. असि - विपरिणामः is wanting in A. 8.) दधन्वान् A (the Pada). J in the Padapâṭha, but दधन्वा यो in the Samhitâpâṭha. See २७. २३. प्रातिशा° ३. ७. ८. 9.) चेन्द्रेणोत्तमे नेः तितिसृणां MM. 10.) निशी MM. रक्षितं - तेनैव मन्त्रेण is wanting in A. 11.) स दृष्ट्वा दौक्षितेन MM. 12.) वायोः क्षोमपवित्रेण MM. 13.) उत्तर A. उत्तरे दे MM. 14.) व्याघ्रिः A. MM. 15.) अनुपकृत° A. अनुपकृत° MM. 16.) पानचालनी A. पावनं चालना MM. 17.) यद्धविः क्रियते तत्सौ° MM. 18.) इदमर्थः MM. 19.) पर्युप्तिः परिवा° A. पर्युत्युपरिवा° MM. 20.) दधिनिक्षिप्ते धनभा° MM. दधि क्षिप्ते घनभाग A. 21.) शर्तातृणाभ्यां A (शतातृणाभ्यां?). सशतच्छिद्राभ्यां MM. 22.) आसिव्यषु बुद्धिः A. 23.) संवृतः कडुकिम्रेति A. भवत्यवृतः कडुकिस्तेति MM. 24.) °श्चिभ्यांमानिनम° A. °भ्यामीतम° MM. 25.) विशेषणात् विशेषणत्वादितिद्धिः MM. The whole passage from कर्मभिः - शिनेन is wanting in A. 26.) नाशेषासति MM. 27.) मायत्रीद्वयं A. गाय°? 28.) उत्तरे च the mss. of Kâty. 29.) is wanting in A. 30.) °एडाः । यमेमे MM. °एडाः समेमे A. 31.) °पावनानन्तरं A. पाठना°? 32.) ऊती is wanting. 33.) ?पुनः । स्तधनं A. पुनः । सधनं कुर्वतः MM. 34.) आद्धेः श्वत्सु A. आत्धेस्मत्सु MM. 35.) कुतय चासने दधादिति श्रुतेः MM. 36.) श्रुतिमुखाद्व° MM. 37.) शय्यक्र° A. शष्यक्र° MM. 38.) पत्तं MM. 39.) I do not see this सं in the text. 40.) रुयूपर्वतनी MM. 41.) °चरुभिः । स्रावैः MM. 42.) पेशलानि गृह्ण पेशलं क्रि° A. क्रिरण्यद्रप्ययोर्नाम शेशलाति गृणह्राति क्रिरण्यवद्रू° MM. 43.) सर्वं च MM. सर्वं न A. 44.) मैत्रयाज्ञ°. 45.) बुंधभावं A. 46.) उतानि पेशः शुक्रं सितं असितं कृष्णं च नेत्रगतद्रूपाणि वसाते आच्छादयेत कुर्वाति इत्यर्थः MM. उतानि चक्षुनि लोमा° A. 47.) एकोनविंशो MM. —

Adhyâya XX. kaṇḍ. १, २, १०-३३ are explained in the Çatap. Br. १२, ८, ३, ८-१, २, १०. — kaṇḍ. १-१० (with the exception of २१, ५३, ५४.) are quoted by Kâtyâyana १२, १, १२-७, १. —

1.) प्रष्ट देशो A. 2.) त्रयेति A. MM. 3.) °साना देवत्या A. 4.) °देशगम°

MM. 5.) जुहोति च the mss. of Kâty. 6.) against the accent. 7.) I do not find this वा in the text. 8.) सरस्वत्या कृतस्य A. 9.) गोभिर्वपावान् तथा युक्तः MM. 10.) देवीः घोतमानाः MM. 11.) स्पर्धानां MM. स्त्यर्था A. 12.) पूर्वऋचो A. MM. 13.) against the accent and the Pada: there is no praeposition आ contained in आवत (Imperfect). —

Adhyâya XXI. This adhyâya (as well as २०. २४-३०) contains only *hautrâ ṛicah*, which are not mentioned at all in the Çatap. Br. — kaṇḍ. १-२३ are quoted by Kâtyây. १२. ७. १३-२०. — kaṇḍ. २४-४७ by the same १२. ६. १४-२५: and kaṇḍ. ४८-६१ by the same १२. ७. ८-१०.

1.) श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीविद्व्यासाय नमः श्रीमत्साम्बो जयतितरां। प्रणम्य MM. 2.) पृश्नृश्णिवति A. 3.) अग्यास्मिन्दिने? 4.) व्युष्टकाले A. 5.) गयस्फानदृष्टा MM. गयः प्लावः the Anukram. 6.) against the accent. युज्ञा is Instrumental Singular, युज्ञा is Nominative Dual. 7.) शमिता यज्ञे Pâṇini. 8.) यज्ञतु A. MM. 9.) निश्रावं A. निस्राव MM. see Adhy. XIX. not. 4. 10.) प्रथमो भिषक्शब्द आर्षः to be added? 11.) पङ्क्ति छन्दः A. MM. 12.) is wanting in A. सुरावत्तौ MM. 13.) इव चार्थः A. MM. 14.) इन्द्रस्य - अयाट् is wanting in A. MM., conj. 15.) समासेति काक्कवयः A. 16.) The accent marks दधत् as Particip. praes. 17.) द्रष्टव्यस्तथा A. द्रष्टव्यस्तथा MM. 18.) सुष्ठु is wanting in A. MM. 19.) B joins this word here (and at the end of k. ६०.) euphonically with the beginning of the following kaṇḍ., reading सुरासोमात्सूप° (resp. सुरासोमाँस्त्वाम°): and the Anukramaṇî in the same way gives only the beginning of kaṇḍ. ५१, including in it the kaṇḍ. ६० and ६१. 20.) °त्यादि A. MM. 21.) पंक्तीः MM. 22.) सूपस्था A. MM. 23.) °णान्तमः MM.

Adhyâya XXII. kaṇḍ. १-३४ are explained or quoted in the Çatap. Br. १३. १. २. २-२. १. ७: ५. १. ४. and quoted by Kâtyâyana २०. १. १-४. ३१.

1.) श्रीविश्वेश्वराय MM. 2.) °ध्यामानद्रव° A. °ध्यमाभद्रव° MM. 3.) कव्याः

A. MM. 4.) रसना° A. MM. 5.) The Anukramaṇî does nôt divide *a* into two parts. 6.) अधर्युरितिन A. MM. 7.) अर्वण इति पूर्वार्धे श्वस्तुतिः परोऽर्धो A. यो अर्वन्तं गायत्री पूर्वार्धेऽश्वस्तुतिः परोऽर्धो MM. 8.) मल्लादिशः MM. 9.) °क्तीव MM. 10.) °तायतं यन्धिरुक्त MM. 11.) प्रोथन् पर्यायणे A. प्रोथून् पर्यायणे MM. 12.) भूतं A. MM. लूनं is a coni. 13.) विचृत्ताय K. J. B. 14.) आ। अर्यनाय A (the Pada). J. 15.) शानच् MM. 16.) Böhtlingk reads वनिप्. 17.) against the accent. The Pada indeed reads ब्रह्मन्, but B. K. ब्रह्मन्.

Adhyâya XXIII. kaṇḍ. १-३२. ४५-६५ are explained or quoted in the Çatap. Br. १३. २. ६. १-१. १ and ५. २. २-३. ७. — kaṇḍ. १-६२ are quoted by Kâtyây. २०. ५. १-७. २६.

1.) श्रीविश्वेश्वरो जयति। श्रीरामचन्द्राय नमः। MM. 2.) विपक्षसौ - ययोस्तौ is wanting in MM. 3.) The Pada reads लाङ्गीन् as an oxytonon, but B. J. K. agree in reading it as a paroxytonon. 4.) पिशं is wanting निघ° ३, ७. 5.) but the text reads °गवः. 6.) but the Brâhmaṇa reads: सोमपुरोगवमेवि°. 7.) As the text does not read: अम्बेऽअम्बालेऽम्बिके, this rule of Pâṇini is erroneonsly adverted to: Pâṇini's reading refers probably to the black Yajus: see Indische Studien I, 183. 8.) अकृष्य A. MM. 9.) conj., लट् MM. लक् A. 10.) अधि MM. 11.) °डुत्थितपुण्ड्रा° MM. 12.) ? conj., नारी नेत्यर्थः A. MM. 13.) वतु प्राप्तत° MM. वतुरासितम° A. 14.) the text has लोम, not रोम. 15.) ग्रन्थिना MM. 16.) ?षष्ठधा° A. षपृधा° MM. 17.) ! We should read quite the contrary चतुर्धा षष्ठ्यर्थे. 18.) का° - वेति is wanting in A. MM., but thinking the addition of these words necessary I have inserted them. 19.) ?ग्र स्तक्षणं A. °ग्रः स्थक्षणः MM. 20.) The Brâhmaṇa reads उदिते ब्रह्मोद्ये प्रपद्याधर्यु°. 21.) ह्ये A. MM.

Adhyâya XXIV. kaṇḍ. १ and २४ are quoted and explained in the Çatap. Br. १३, २, २, २-१३. and ५, १, १३-१५: — this adhyâya consists of *çrutirûpâ mantrâh* and is therefore not quoted by Kâtyâyana, *viniyogâbhâvât.*

1.) श्रीविश्वेशाय नमः MM. 2.) ? so has A., तरासाय MM. 3.) श्वेताद्यो B. K. 4.) षण्मासिको विधिः [!कावधिः?] कालोऽविः व्यवयो गायत्र्यै सार्ध° MM. 5.) गायत्र्यै - °स्रयः is wanting in A. एकादशे after गायत्र्यै is wanting in MM., I have supplied it from conjecture. 6.) मङ्गून् A. मंडून् MM. 7.) सधिभ्यो B. A prima manu. K. J., संधि° B. A sec. m. E I H. 2465. 8.) ज्ञंतूः A. MM., but the mss. of the text (with the exception of E I H. 2465) have ज्ञतूः. 9.) काशान् A. MM., but the text has कशान्. 10.) ऋष्यान् A. MM., but the text has ऋश्यान्. 11.) कुलङ्गान् A. MM., but the text has कुलुङ्गान्. 12.) बिडालाः MM. 13.) A. MM., but the text has कुलुङ्ग. 14.) कुक्कटः MM. 15.) शार्गः MM. शार्ङ्गः K. 16.) ?मनुष्यवद्वदीती A. °ष्यवद्वंती MM. 17.) O. MM., the text has द्°. आडी - °शेषाः is wanting in A. 18.) मङ्गुः A. MM. and the Padapâṭha, s. Indische Studien I, 263. 19.) the Padapâṭha reads दार्वाघाटः । दार्वाघात इति दारु । आघातः 20.) भल्लाकः MM. 21.) सुषिञ्लीका J prima manu. A., सुञ्षिल्लीका J sec. m. 22.) A. MM. but the text reads ऋश्यो. 23.) कुडृणाची MM. कूणडृणाची B prima manu, कुडृणा° sec. m. 24.) वाध्रीनसः A. वाध्रीन° MM. The mss. of the text are not constant: A reads वाद्धीनसः without dividing it into two words: B has वाध्रीनसः prima manu, वाध्रीनि° sec. m.: E. I. H. 2465. K. and J. (three times) read वाध्रीन°, but J. has also three times वाध्रीनि°, the long *i* being once corrected into the short one. The word is omitted in J. in the text itself, but has been supplied at the margin. 25.) खड्गो A. MM. K. J., but A (the Padapâṭha) and B read खड्गो.

Adhyâya XXV. The beginning of kaṇḍ. १ is quoted Çatap. Br. १३. ३. ५. १, the end of kaṇḍ. ३ ibid. ३. ७. ५, and the beginning of kaṇḍ. २४ ibid. ५. १. १८: Kâtyâyana quotes २०. ८. ५-१८ the kaṇḍ. १-३. २४-३०. ३६. ३७.

1.) so reads B., K has °दित्यान् श्म°, J. °त्यान्श्म°. We should expect °त्याञ्श्म°. 2.) वेद्दीप उदीर्यते MM. 3.) अवदानात्कृत्वा MM. Two mss. of

the Brâhmaṇa (M and C) read अवदानाय, a third (B) अवदाना omitting the final य. 4.) the second अवदानं being wanting in the mss., I have supplied it from conjecture. 5.) both, the Padapâṭha and the Jaṭâpâṭha, read तेगान्. 6.) ? ऌलयो ऋः A. ऌलयोर्भेदः MM. 7.) वनिष्टुः A. The Padapâṭha too and K read वनिष्टुना. 8.) यकृत् क्लोतुमा A. यत्कृतल्कोमा MM. 9.) conj., विधार् MM. विघा A. 10.) वैधा MM. 11.) न सृज्यते इति is wanting in A. 12.) नवर्णो MM. 13.) but Pâṇini has: छन्दस्यपि दृश्यते, not बहुलं छन्दसि. 14.) ? श्वेतबाहुल्यशासतेति MM. श्वेतवाहुक्यशासतेति A. see Pâṇ. ३.२.७१. 15.) °गुपलक्षणाः A. °गुपलक्षकः एते येन वक्ष्यमाणाः MM. 16.) उषायाः B. 17.) युङ्भोरिति A. युडुघञोरिति MM. 18.) conj., तनबादिशः A. MM. 19.) अपयछि° A. अययछिद्राणि MM. 20.) ? conj., ते एवा° MM. त एवां° A.

Adhyâya XXVI. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) लक्ष्मीनरहरिं वाणीं गणेशं गिरिजारवौ (!)। नत्वा प्रवक्ष्ये षड्विंशेऽध्याये निगमदीपकः (!) ॥ MM. 2.) ? अरणभागतः। कः शत्रुः MM. 3.) प्रणमतु A. 4.) Pâṇini has not उच्च, but उत् only. 5.) मोदूतो ङुतं नरा MM. मो दूतो ङुवं नरा A. 6.) Pâṇini has पूर्वपदात् only. 7.) see पा° ६.३.१३८. 8.) but there is no नः in the text. 9.) संधिश्च ह्रा° MM. संधिश्च श्का° A., the Pada has भूमिः 10.) °ऽपेण गत्यनंतरं तं A. 11.) then we are to expect ग्रावान्. 12.) The accent shows that अर्योक्ते is a compound, but also the Padapâṭha has indeed only: अर्यः। क्ते, treating it as two words. 13.) J. has only अग्निरुक्थेन वाक्सा।

Adhyâya XXVII. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) श्रीमद्गजवदनाय नमः MM. 2.) B reads °श्वन्वानु°, but A. K. J. have °न्मा°. 3.) ?, so A. MM., I conjecture °स्तेऽर्चिभिरग्य. 4.) ? conj., A has भयं

भलोकभयं. MM. omits [मरणात्] मुञ्च मर॰ - °स्मादपि [मुञ्च किं च]: there is no भयं in the text. 5.) ? conj., इतस्य A. MM. 6.) but the text has महिना. 7.) this is a gross mistake: अयामि is 3 p. S. Aor. Pass. from यम्. 8.) ? conj., निसृत A. MM. 9.) पूर्व ऋच A. पूर्वत्रत्व MM. 10.) We expect सत्यः after कीदृशः, but it is not found in A or MM, whether this be the fault of the copies or of Mahîdhara himself, who not seldom omits single words of the text in his explanation of it. 11.) against the accent, हिन is oxytonon, whereas if a verb it ought not to be accented at all. 12.) this passage does not occur in the Jyotisham of the Yajus or in that of the Rik.

Adhyâya XXVIII. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

13.) sic!, A. MM. 14.) स्वदाति MM.*)

1.) but the text has सुसमिद्धम्. 2.) conj., is wanting in A. MM. 3.) conj., जगदुत्पादकात्वष्टुः A. MM. 4.) in K, for J omits this whole verse as having been already treated [२१. ५१-६१.]. 5.) K. divides v. 46 and enumerates v. 46. c. as v. 47., besides adding another v. 48., which is nothing but a recapitulation of vv. 36-46: it runs thus: शुचिमुल्लिखा प्राणमनुष्टुभा बलं बृहत्या श्रोत्रं पङ्क्त्या शुक्रम् । देवी त्रिष्टुभा त्विषिम् । जगत्या शूषं विराजा रूपं द्विपदा भगं ककुभा यशोऽतिछन्दसा क्षत्रमिन्द्राय (sic!) वयोधसे क्षागमिन्द्राय (sic!) वयोधसे (sic!) क्षागेन ॥ ४८ ॥

Adhyâya XXIX. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) against the accent: सुष्टरीम is no verb, but an adjective. 2.) against the accent: पुरोगाः is Vocative: K. indeed has पुरोगाः by the first hand, but the accent is struck out by a second. 3.) the Pada has साद्या, sâddhvyâ? 4.) कीदृश्यो रशना॰ A. MM. 5.) instead of गृणाते॰ we expect गिरते॰.

*) By a mistake these two nros are counted as if belonging to the foregoing adhyâya.

6.) °त्तनूनपातादयो A. MM. 7.) ? conj.. स्वबुंध्यानित्याह A. स्वबुध्यानेत्याह C प्र]स्तीर्यते - - प्राग्ग्रं[बर्हिः is wanting in MM.. 8.) ? conj.. वीरतरं A. MM 9.) See पा° ७. १. ३९, where a similar but not identical vârttikam occurs 10.) आनिसीदताम् A. MM. 11.) ? conj., योद्धून् यु° A. योत्धून यु° MM. 12 °रवं A. 13.) समनाः A. 14.) देतिः MM. [दत्तो हेतिः?]. 15.) ? conj. प्रूढ इ त्यर्थः A. MM. 16.) sic! A. MM., the text has भोगैः. 17.) ज्योहेतिं MM. ज्या हेतिं A. 18.) उपशब्दस्य A. MM. 19.) °षमेतामि° MM. °षमेत्यामि° A.

Adhyâya XXX. The beginning of kaṇḍ. १-५ is quoted in the Çatap. Br. १३. ६ २. १-१०. Kâtyâyana does not mention this adhyâya.

1.) °कृष्णाय MM. The Padapâṭha (A) has: अतिकृष्टायेत्यतिकृष्टाय and th Taitt. Br. reads अतिकष्टाय. 2) conj., क्षत्रिया° - वा is wanting in A., MM has क्षत्रियायां वैश्यायुंसो ज्ञात वा. 3.) नरिष्टायै A. MM. A. C. Taitt. J prim manu. 4.) ? conj., प्रत्यचारक° A. प्रत्यंचाक° MM. 5.) पौंड्रिष्टं both A and B C. J. °ष्ठं K. MM. 6.) ?, पुंड्रिष्टोऽत्यजः O. MM. 7.) विदल्ल° A. MM., but th text has बिदल्ल°. 8.) ?, कण्ठकीं र्मणकर्म तत्कार्णं A. कण्ठकी कार्म तत्कार्ण MM. The Padapâṭha has कंठ°. 9.) आर्त्याऽइत्या । ऋत्यै A. 10.) अराध्यै a the mss. 11.) °ऋष्ट्रियाय K. °ऋष्टिर्याय first hand in J. 12.) परिस्कन्दं K 13.) मानः । कृतम् the Pada, and J. 14.) but the Pada has परि । आयि नीम्. 15.) परिक्रीं A. 16.) so also the Padapâṭha, but B has बैन्दं. 17 शोष्क° MM. and the Padapâṭha. 18.) पश्चा । दोषाय the Pada. 19.) ज्ञाग ह्रपकं A. MM. 20.) आऽऋत्यै the Pada. 21.) अवरस्पराय । अवरपरायेत्यवर पराय the Pada. 22.) कर्पुर° A. कर्पूर° MM. 23.) ? conj., पञ्चशतीत्युत्तर° A MM. 24.) MM. adds: इति मल्लदीपे त्रिंशोऽध्यायः ।

Adhyâya XXXI. The beginning of the two anuvâkas is quoted Çatap. Br. १३ ६. २. १२-२०. Kâtyây. २१. १. ११-१८.

1.) ? conj., नेत्रसक्ह्वयेन MM. नेत्रसक्ह्वयन A. 2.) so has MM. स A. 3.

? so has Uvaṭa, इतप्रदान्नाद्धि MM. इतः प्रदान्नाद्धि A. 4.) the Nṛisiṁhopanishad reads: सृष्ट्वा प्रविश्यामूढो मूढ-इव व्यवहरन्नास्ते. 5.) ? दधिमिमाज्यं MM. In A the whole compound is wanting. 6.) this is the reading of v. 5. in the *Riksamhitâ*, whereas here in the Yajus the reading is: ततो विराडजायत. 7.) so A. MM. instead of नाभ्या इति, very probably a blunder of Mahîdhara himself. 8.) ? so has Uvaṭa: फलदातोत्सुकाला इति A. फलदानोत्मकाः काला इति MM. 9.) this is the order observed in the *Riksamhitâ*. 10.) this passage does not occur in the Jyotisham belonging to the Yajus or in that of the Rik.

Adhyâya XXXII. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) तृतिकाष्टाधद्ग्याद्यः A. निमेष तृदिकाष्ठाध्यधाद्यः O. निमेषा तृटिकाष्टाध्याद्यः MM. 2.) द्विऋचो A. द्विऋचे MM. 3.) against the accent, but indeed any other construction seems impossible. 4.) शरीग्रीवेन A. 5.) शरीरीभावेन MM. 6.) ?, °मेधाग्रहोऽपि A. MM. 7.) भवनं is wanting in A. 8.) अयाचिषं अयाचि MM.

Adhyâya XXXIII. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) °रुत्कं MM. 2.) वार्धकूक्ष्णी° A. वार्धकीक्ष्णी° MM. 3.) पृथक् A. MM. 4.) कीदृशौ A. 5.) दस्म MM. 6.) अन्तरिक्षे शे A. समीपे - क्षणे is omitted in MM. 7.) ऊर्वाम् A (the Padapâṭha). ज्ञनांनामूर्वामूर्वां (र्वानूर्वां second hand) ज्ञनांनां ज्ञनांनामूर्वां (°र्वान् second hand) । ऊर्वां दज्ञयन्त (sic!) दज्ञयन्त ऊर्वां (ऊर्वान् second hand) ऊर्वां दज्ञयन्त J. °मूर्वां K. °मूर्वान्द° B and A (E. I. H. 2465.): the reading of the latter two is not decisive for the true reading, as they always change the म् before a dental into न्. (The reading दज्ञयन्त of J., though six times repeated, is a blunder, K has the

right form: दर्यत्त). 8.) °अवणे A. 9.) is wanting निघ° ३. ७. 10.) ? conj., वर्तते A. वतते MM. 11.) श्रियते आश्रीयंते MM. 12.) these three words are wanting in A. 13.) °अवणे A. °अपणे MM. 14.) डुडुक्षन्। डुधुक्षन्निति डुधुक्षन्। A (the Padapâṭha): J has sixtimes डुधुक्षन्. 15.) सर्वमेध A. MM. 16.) °पुरोरुक् A. MM. 17.) ऽगतृ A. तृप्यथ - °भूतणर्घः is wanting in MM. 18.) तर्पयथ A. 19.) is wanting in A. 20.) the Padapâṭha (A. C.) and the Rudrajapa read also वट्, but B. K. J. maintain the व. 21.) अभक्षत भक्षते A. 22.) °मेयाते Yâska. 23.) ? conj., पीतननो A. MM. 24.) निरालवंते A. निरालंबित MM. 25.) वीआदेश ननोते A. MM. 26.) I do not comprehend why मारुत is accented in the text, instead of being left unaccented according to the general rule. 27.) We should expect: तम्. 28.) अपणे A. 29.) ? conj., तद्वीत्यै A. तद्वित्यै MM. 30.) नयत् अनयत् MM. नयत् अर्पयत् प्रापयोत् A. 31.) I do not find this passage in the Nirukta, but see निरु° ११. २४: सरमा सरणात्. 32.) ? अत्रे वेसुन्प्रत्य° A. MM. 33.) °दन्ति त उत्कर्मयन्ति तर्पयन्ति वा अनृष्यन्ति वा A. 34.) °मत्ता A. 35.) A. MM. have अ° and so has also the text in A (E. I. H. 2465.): the other mss. of the text read अ°, the reading of K however is doubtful. 36.) तूदपर् A. कूदार् MM. 37.) against the accent and the Padapâṭha. प्र belongs to दद्भिरे. 38.) In the text the ई is *pluta* both times, not the second time only. 39.) °यावासी° A. °यानी° MM. I prefer now to read मायावानीश्वरः. 40.) निःकृष्ट A. निःकृष्टं MM. 41.) प्रतिता भ्योक्ता A. 42.) ? conj., स्यावरां प्रस्त° A. स्यावरां प्रस्तरादौ तदुपलंघ्यैः MM. 43.) त्रैलोक्ये A. MM. 44.) लौकिकवास्तोमै° A. लौकिकवाकसमै° MM. 45.) ? conj., आविस्येते A. MM. 46.) भावादृष्टे A. 47.) प्राणान्यतो A. 48.) सुतासः is not mentioned at all. 49.) ? conj., °माना मां A. प्रार्थते यजमानाया। MM. 50.) सोमां। MM. O. सौमां A. 51.) the Uṇâdisutra reads अविसिविसिभ्युषिभ्यः. 52.) सर्वज्ञमपी° A. MM. 53.)

नास्ति A. 54.) सक्तुं is not mentioned at all. 55.) ? conj., यज्ञेषु विप्रराज्ये विप्राणां राज्ये स्तोत्रशस्त्रादि तत्रायं A. यज्ञेषु विप्रराज्ये - - संदंहं - - कर्मराज्यं स्तोत्रशस्त्रासंघदि पठने त्र यां य MM. 56.) द्विलो° A. 57.) °वैदुष्यादन्ति° A. MM. 58.) यमुपरमे A. MM. 59.) मध्यमैकवचनं A. MM.: for a similar blunder see Adhyâya X. nro. 17. It *may be* a mistake of Mahîdhara himself. 60.) see Vṛihad. Âr. Mâdhy. V, 2. 61.) संयतं इत्यर्थः A.

Adhyâya XXXIV. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtîya-Sûtra.

1.) यात्रे A. 2.) ता A. सत्ता MM. 3.) मनःस्थां A. 4.) ? I do not conceive, what this quotation refers to. 5.) दिदिहि A. MM. and so read also the mss. of the text. 6.) सोऽइति सो A (the Padapaṭha) and J. 7.) ? गिर्वणश° MM. 8.) ऽस्त्यर्थे A. MM. 9.) ? अनु द्वा A. चतस्रः - किम्भूतं त्वां is wanting in MM. 10.) The remainder of this book is wanting in A. 11.) अनुपन्यंतां O. अनुपम्यंन्यंतां । अनुयम्य MM. 12.) here something seems to be wanting. 13.) I conjecture, we are to supply: कथमिव रथमिवाश्वाः. 14.) ? स्वस्वामि° O. स स्वामि° MM. 15.) देवलोकेषु MM. 16.) स्रुवन्ति O. MM. 17.) ? शस्त्रे च पठ° MM. शस्त्रेऽत्र पठनीयं मन्त्रमवदि° O. 18.) K gives the six first verses, adding after the sixth the following words: इति षट्कण्डिका(ः) परशाखोक्ताः; then it begins with giving a new the first verse, after it the seventh and so on.

Adhyâya XXXV. kaṇḍ. १-१७ are explained in the Çatap. Br. १३, ८. २. ३-४. १२, and quoted by Kâtyây. २१. ३. ३२-४. २८.

1.) ? conj., वायुमङ्कित्यारभ्याधीतान्म° A. MM. 2.) श्मशानान्तं] कर्म to निखेयाः । [एतत्कुर्वतां निकटे is wanting in A. 3.) MM adds ११०. 4.) MM adds ११, whereas O १२१. 5.) °वाणाश्म° O. 6.) °त्कुर्वता O. MM. 7.) °स्तृणापूर्वलकमु° O. तृणफलकमु° A. तृणपूलकमुद्धृत्य MM. 8.) °भुक्षेत् O. MM.

9.) दक्षिणाग्रे° MM. 10.) °वेकष्ट° MM. वेकेष्ट° A. °वेष्ट° Kâtyây. 11.) the Pada has अश्मन्वती, not अश्मन्वतीः; the *r* seems to be taken from the beginning of रीयते, such incorrect divisions occur not rarely in the Kâtîya Sûtra. Or are we to suppose a different interpretation: अश्मन्वतीः रीयते (or ईयते)? 12.) दुःस्वप्नं A. MM. 13.) this is one of the cases mentioned in note 11. 14.) एतदर्थं A. MM.! 15.) ? conj., किं A. किं च MM. 16.) किं च is wanting in A. 17.) तस्यैवाद्दोरण MM. 18.) °नेतान्वितॄन् A. MM. 19.) स्रस्तरारोहणाशयने MM. 20.) °पत्त्यल्ये A. वाक्षात्पू° MM. 21.) the accent refers अधि to अस्मात्, not to ज्ञातः. 22.) विशेषे MM. °वचनं A. 23.) the kaṇḍ. ५७.५८ are a modern addition: they are wanting in J; and even in K it is here stated, that the fourth anuvâka has only २१ kaṇḍikâs (अपेतो यन्तु २१। चतुरनुवाकेषु ५६).

Adhyâya XXXVI. This adhyâya is not mentioned either in the Çatapatha-Brâhmaṇa or in the Kâtyâyanasûtra.

1.) ? °मल्लादायस्याध्या° A. °मंत्रास्याध्या° MM. 2.) ? °र्यीचरणेन A. °र्याचरेणा MM. 3.) ? मदि स्वपते A. मदि स्वयंते MM. 4.) ? परोभ्यः पूरो A. परोभ्यः पुरो MM. 5.) °न्यो रसशब्देन्द्र° MM. 6.) ? conj., पर्जन्यो पर्जन्येषो MM. पर्जन्यो गर्जत्येषो A. 7.) इन्द्रापूषणा J. 8.) ? यावनाय A. MM. 9.) these two words are wanting in MM. 10.) विश्वेदेवेषु MM. 11.) धृते J. 12.) the accent of दृंह shows, that this last interpretation is the right one. 13.) यतो यतः समीहसे K. sec. hand (!).

Adhyâya XXXVII. This adhyâya is explained in the Çatap. Br. १४. १. २. ७-२. १. ५, and quoted by Kâtyâyana २६. १. ३-४. १४.

1.) श्रीवेदव्यासाय नमः MM. 2.) हे is wanting in A. MM. 3.) erroneously instead of देवी इति. 4.) विष्णुं MM. 5.) पि]एडवद्देवी - °दत्ते पि[एडव° is wanting in A. 6.) दक्षिणतः MM. 7.) आसीर्मुखस्य J. K third

hand. आसीन्म° K first hand. आसीत् म° K second hand. 8.) संभान्द्वारेण A. 9.) ? प्रदे° A. प्रदेशाच्च MM. 10.) मखस्य is wanting in A, MM reads मखस्य वा शीर्ष्णे. 11.) पयर्पणेन MM. 12.) °शकृंति ग्राह्यानि A. °शत्रूंनि गृह्णाति MM. 13.) ? °काद्विरोद्धति A. MM. 14.) ? the words तथा - वै लोकः सुक्षितिर् are my conjecture, A. MM. read सुक्षितिर्भूमिः सुष्ठु क्षियतिरस्मिन्हि. 15.) °राद्दक्षिणे भूमौ A. MM. 16.) the text has मा, not नो. 17.) मरुद्भिरधिकं A. MM. 17[sic!].) against the accent. 18.) Pâṇini's text has अचः only, not अचश्च. 19.) ? गोपयतीति A. MM. 20.) against the accent. 21.) ? एवयुताः A. MM. 22.) against the accent and the Padapâṭha: सकृपत्या is a compound. 23.) A. offers a very different reading: शिरः प्रवर्ग्यो यथाकालं ह्यु तत्र दधा°. The words यथाकालं ह्यु are erroneously taken from the next following sentence. 24.) मनोहरे MM.

Adhyâya XXXVIII. This adhyâya is explained (except kaṇḍ. २८ b.) in the Çatap. Br. १३. २. १. ६ - ३. १. ३१ and quoted by Kâtyây. २६. ५. १ - ७. ५६.

1.) श्रीवेद्व्यासाय नमः MM. 2.) द्रुभ्यां क्षयति हे इडे A. 3.) so MM., स्तन इ A. 4.) परीशासौ संदशो (°दंशौ!) A. 5.) कृत्तवा A. 6.) °न्नाद्यं सर्वमुपय° A. MM., but the Brâhmaṇa has सर्व once only. 7.) ? हि आकृती° A. धातु कृती° MM. 8.) against the accent and the Padapâṭha. अहर्दिवाभिः are two words, not a compound. 9.) see Amara ३.३.११०. Trikâṇḍa Çesha ३. ३.३५३. Medinîkosha rânta 80-8२. 10.) °न्दोप्रधा° A. °न्दात्रिधा° MM. 11.) धर्यसाधके MM. 12.) against the accent. सुधर्मं is a Nominative, not a Vocative. 13.) निः । स्त्यायताम् Pada. 14.) ? conj., प्रभावतः A. MM. sic! 15.) ? conj., क्षारोदाद्याः A. MM. (क्षार् salt). 16.) against the accent. संवृक् is a Nominative. 17.) मनोहरे MM.

Adhyâya XXXIX. The kaṇḍ. १-8 are explained in the Çatap. Br. १8. ३. २. ३ - २०: kaṇḍ. ५-१३ are not directly mentioned in the Çatap. Br., but see Ma-

hidhara at k. ८. — Kâtyâyana quotes १-६ in his sûtra २६, ७, ४१. ५१, the seventh k. at १८. 8. २8 and the rest at २०, ८, ६-८.

1.) श्रीकृष्णाय नमः MM. 2.) स्यद् MM. The text has °ष्य, °स्प. 3.) मध्ये वर्तमानं MM. 4.) The Anukramaṇî reads: तत्रोक्त. 5.) वनिष्टुना K. J. 6.) कोशाभ्यां MM. K. and the Padapâṭha, कोश्याभ्यां B. J. 7.) सिङ्गीनि J. 8.) शोभनमित्या° A. 9.) सबलतोह्° MM. 10.) प्रयासाय the Padapâṭha.

Adhyâya XL. This adhyâya is not mentioned either in the Çatapatha-Br. or by Kâtyâyana on account of its being an Upanishad.

1.) कृरीन्सद्मीत्वा MM. 2.) °चरमेऽध्याये MM. 3.) श्रीग° - °तन्यते is wanting in A. 4.) निका° A. निःका° MM. 5.) जंगमादीनि? 6.) °सारस्तत्व-स्वरू° MM. 7.) °तन्यासः A. 8.) व्यापारव्यवहितत्वादमन आभा° MM. 9.) भूतानि - सर्वभूतानि is wanting in MM. 10.) आत्मव्यति° - पश्यति is wanting in A. 11.) ? समाभ्योऽर्थाय MM. समाभ्यो निरंतरंतर अनन्तवर्षेभ्यो A. 12.) अकायः अशरीरवर्जित इत्यर्थः A. 13.) नान्यदृतोऽस्ति द्र° A. तान्यदनो ऽस्ति द्रष्टिति MM. 14.) ? °ज्जीवः MM. 15.) ? च व्याकृतोपासनद्वयं A. व्याकृताकृोपासन° MM. 16.) प्रकृतिलक्षणम्° MM. 17.) ? conj., परिष्यतो A. द्वे यजुषी - वाक्यशेषः is wanting in MM. 18.) ? conj., °त्मक अमृतं A. 19.) ? नः स्मर MM. नः स्मर A. 20.) यवं MM. 21.) कूवे A. लिंबे स्मर् कल्पते MM. 22.) ज्ञशादेश - कृतं स्मर् is wanting in MM. 23.) ? conj., वचनात्म° A. MM. 24.) ओम् खं ब्रह्म is added in B by a second hand at the margin. The text in O omits these words. and the text in A (E. I. H. 2465) has: ॥१७॥ खं ब्रह्म without the ओम्. A (the Padapâṭha) reads: ब्रह्म् ॥१8॥ ओ३म्। खम्। ब्रह्म। See Vṛihad-Âraṇy. Mâdhy. 8. 8. १. 25.) दिक MM. द्रिक् O. After the conclusion इति वेदीपे चत्वारिंशोऽध्यायः ॥ MM. adds the following çlokas: भाष्य वुध्या समाश्लोक्य घत्रौऋट (!) च शांकरं। यन्मया लिखितं संतस्तत दृष्ट्वा क्षन्तुमर्हथः ॥ श्रीकृष्णार्पणमस्तु शुभं भवतु। भग्नपृष्टकटीग्रीवा स्त-

ब्धदृष्टिरधोमुखं कष्टेन लिखितं ग्रंथं यत्नेन परिपालयेत् । यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न विद्यते । श्रीसांबसदाशिवार्पणमस्तु । शके १७६१ विकारीनामसंवत्सरे तद्दीनेदं पुस्तकं लिखितं समाप्तं ॥

Read: page 2, line 13 विंशति°. — 3, 1 श्रेष्ठतमाय. — 6, 8 निरु° ३. ८. — 7, 6 [पा° ८. १. ११.]. — 67, 4 स्वतिङास. — 69, 15 चातुर्मास्य°. — 70, 10 णां भवति. — 76, 10 सूत्रार्थः. — 78, 3 पालितानां. — 80, 14 °तिष्ठते. — 81, 5 अस्मासु. — 84, 17 संग्रामनाम [निघ° २. १७.]. — 89, 4 ज्योक्. — 90, 14 शमयतीति. — 90, 20 मल्विणो°. — 97, 22 °पसोस्तनूरसि. — 164, 8 प्रतिपूर्वो. — 260, 8 विश्ववेदस. — 274, 14 अग्निनेत्राः. — 316, 1 पुरीष्यम°. — 328, 3 चेति. — 333, 5 श्रुतेः. — 335, 8 अदीनि. — 335, 14 समूह्यो. — 338, 19 विश्वेषां. — 344, 7 लुप्ते. — 349, 2 यास्कोक्तेः. — 355, 19 शपो लुक्. — 356, 1 किं च. — 356, 11 °कृतवान°. — 358, 24 इक्षास्यामु°. — 360, 13 तृतीये. — 363, 23 मेधाविनो. — 366, 17 द्वाभ्यामप्स्व°. — 367, 14 उपस्थे. — 369, 22 and 370, 18 अयधं. — 376, 23 सहितो. — 378, 9 सुतरां. — 379, 8 °रुपसृष्टो „joined by an upasarga"? — 381, 20 कृतान्तपशुघातिनो° see Hemacandra नानार्थ° ३. ७१९. — 382, 11 धेनु. — 385, 6 याभिस्ताः. — 391, 2 °द्दिवकिल्विषात्. — 394, 5 वृक्षाः. — 395, 21 गोषु मदीय°. — 408, 17 करोतीति विश्वकर्मा. — 410, 10 °संख्यार्थो. — 421, 22 बर्हिर्वेद्यु°. — 423, 15 (12.) and in like manner the chiffres of the notes are to be changed till to the end of this adhyâya (13-27 instead of 12-26). — 472, 15 का°. — 512, 4 कियान् श्वेत. — 533, 1 मृणाति°. — 534, 6 प्रतियोद्धास्येति. — 534, 12 °ज्ञतीनां. — 536, 18 शत्रूणां. — 633, 6 बर्हिर्बर्दरैः. — 635, 21 हिंसीत्. — 637, 12 चत्वार्विराट्. — 646, 17 °र्भिर्द्वात्रिंशद्वसा°. — 655, 21 वर्षितारम्. — 656, 16 मधा. —

669, 24 दैवीं. — 675, 19 शैशिरेण. — 688, 6 ॥५४॥. — 692, 19 °समाप्तिप°. — 695, 8 प्लावयति. — 717, 19 °वश्यासौ. — 722, 20 णीभिर्म°. — 728, 19 °त्पूर्वचिं°. — 728, 21 काऽईमरे पिशंगिला काऽईं. — 746, 1 वाधीनिसः. — 755, 5 न सृज्यते. — 844, 11 स्वर्गार्थं. — 845, 12 पलिक्नीं. — 859, 20 त्रुटिकाष्ठाघट्या°. — 876, 24 तृप्यथ. — 886, 12 (31.). — 886, 14 (32.). — 888, 5 भूयिष्ठाभिमानः. — 894, 22 नकिः. — 896, 21 किं च. — 926, 14 ओकोऽसि. — 944, 18 °र्दैवीति (3.). — 978, 17 °तन्यते (3.) ॥. —

The mspt. of Fort William which was copied by the second scribe of A (see preface p. VIII) bore the date *samvat* 1791 (A. D. 1735) मासि वैशाषे कृष्णपक्षे, which date has passed into A itself, standing there at the end of the XX. adhyâya.

APPENDIX.

1., List of the *Ṛ*ishis, named as authors of the verses contained in the Mâdhyandinîyâ-sa*ṃ*hitâ, according to Halâkhya's paddhati of Kâtyâyana's sarvânukrâma*ṇ*î.

Agastya III, 46. V, 35. VII, 43. XXXIII, 27. 34. 78. 79. XXXIV, 7. 48.
Agni III, 1-8. XIII, 20. 21. XXVII, 1-9. 11-22.
Aghaça*ṅ*sa I, 28.
Ajamî*ḍ*ha XXVII, 30. XXXIII, 19.
Atri VIII, 15.
— his daughter XXXIII, 12.
Apratiratha XVII, 33-44. 60.
Abhitapana Sûrya XI, 35.
Aru*ṇ*a ? XXII, 18.
Avatsâra ? VII, 12. XII, 115. XXXIII, 49.
Açvinau X, 31.
Asita XXXIII, 62.
Astunîti XXXIII, 21.
Â*ṅ*girasa II, 11. 12. III, 1. IV, 10. VII, 42. XI, 71. XII, 30. XX, 36-46. XXVII, 34. XXXIII, 43. XXXIV, 24-27.
Âtreya IV, 8. XXI, 12-22.
Âtharva*ṇ*a XII, 75-89. XXXIII, 80. XXXVI, 1-XL, 17.
Âditya III, 37-40. XXXIII, 55-XXXV, 22.
Ântarvat ? II, 19.
Âptya XXV, 47. XXXIII, 90.
Âbhûti XIX, 3. 4.
Âmahîyava XXVI, 16-18.
Âru*ṇ*i XI, 72.
Âçvatarâçvi XX, 24-26.
Âsuri III, 37.
Indra IX, 1-34 (together with Brihaspati). XVIII, 68. 69. 72-74.
Indrâgnî XIII, 22. 23. XIV, 11-22.
Isha XV, 29.
Utkîla XI, 49. XVIII, 75.
Udvâlavat ? II, 19.
*Ṛ*ijiçvan XXXIII, 55. XXXIV, 42. 53.
*ṛ*ishaya*ḥ* XIV, 23-31.
sapta *ṛ*ishaya*ḥ* XVII, 79.
a female *ṛ*ishi III, 6-8. XVII, 11. XXXIII, 15. XXXIV, 32.
Aindra XII, 55. XVIII, 71. XXXIII, 92.
Au*ta*thya V, 18. 20.
Audanya XXV, 9.
Aurṇavâbha III, 49. 50.
Ka*ṇ*va XI, 37. 42. XVII, 74. XXXIII, 89. XXXIV, 56. 57.
Kapi II, 16.
Kaçyapâ XXXIV, 32.
Kâxîvata X, 32-34. XIX, 6.
Kâ*ṇ*va XXXIII, 47.
Kâçyapa VII, 12. VIII, 63. XXXIII, 49.
Kâtya XI, 49. XVIII, 75.
Kumâra XV, 41.
Kumârahârita XII, 69-72.
Kutsa VII, 42. VIII, 4. XII, 2. XVI, 15.

16. 48. XVII, 70. XVIII, 73. XXVI, 7. XXXIII, 5. 29. 37. 38. 42. 68. XXXIV, 29. 30.
Kurustuti? VIII, 39.
Kuçika XXXIII, 59.
Kuçrî XI, 13.
Kusîdin XXXIII, 47.
Kûrma XXXIII, 51.
Kauṇḍinya XX, 32.
Kausurubindi VIII, 42. 43.
Kratu V, 35.
Gandharvâh III, 1-8.
Gaya XXI, 6.
Garga XX, 50-52. XXVII, 43.
Gavishṭhira XV, 23. 24.
Gâlava XVII, 56. 57.
Gârtsamada XXXIII, 51. XXXIV, 54.
Gṛitsamada VII, 9. 34. XI, 23. 24. 27. 36. XVII, 75. 88. XX, 81-83. XXVI, 3. 24. XXVII, 29. 32. XXXIV, 10. 11. 58.
Gotama III, 11. IV, 37. VIII, 31. 35. XII, 112-114. XV, 35-37. XXV, 19-23. XXVI, 11. XXXIII, 3. 16. XXXIV, 20-23. 33.
Gautama III, 51. 52. VIII, 33. XIII, 27-29. XXV, 14-18.
Gaurîviti XXXIII, 28. 64.
Ghaura XXXIV, 56. 57.
Cailaki III, 9.
Jamadagni XI, 73. 74. XXIX, 12-36. XXXIII, 39. 40. 85. 87.
Jaya XVIII, 71.
Jîvala III, 9.
Jetṛi XII, 56. XVII, 61.
Taxan III, 9.
Tâpasa IX, 26-28. XII, 31. XVII, 53. XXXIII, 86.
Trasadasyu VII, 10. XXII, 18 (?).
Trita XI, 43. XII, 13. XXXIII, 90.
Triçiras XIII, 15.
Triçoka VII, 32. XXXIII, 24.
Tryaruṇa? XXII, 18.
Daxa XXXIII, 72. XXXIV, 50-52.
Dadhikrâvan IX, 14. 15. XXIII, 31.
Dadhyañc XXXVI, 1-XL, 17.
Damana XXXV, 19.
Dîrghatamas V, 18. 20. VI, 3. XII, 42. XXV, 24-29. XXXVII, 17. XXXVIII, 5.
Devagandharva XII, 66.
Devâh I, 1-II, 34. III, 1-8. 11-37. VIII, 41. 47-52. IX, 35. 36. 38-40. XIII, 9. 13. 26. XIV, 1-10. XXXV, 1-22.
Devala II, 17. XXXIII, 62.
Devavâta III, 14. IX, 37. XI, 35. XVIII, 66. XXXIV, 14. 15. 18. 19.
Devaçravas III, 14. VII, 26. IX, 37. XI, 35. XIII, 5. XVIII, 66. XXXIV, 14. 15. 18. 19.
Dhruva XII, 11.
Nâka (? Luçodhâ-nâka) XVIII, 31. XXXIII, 17. 52.
Nâbhânedishṭha IX, 17. XI, 12. 75. 76.
Nârâyaṇa III, 62. XXX, 1-22. XXXI, 1-22.
Nṛimedha XX, 30. XXXIII, 41. 66. 67. 95. 96.
Naidhruvi VIII, 63.
Nodhas XXVI, 11. XXXIV, 16. 17.
Parameshṭhin I, 1-II, 34. XXXIII, 74.
Parâçara XXXIII, 11.
Paruchepa VII, 19. VIII, 53.
Pâvako'gniḥ XII, 106-111.
Pâyu XI, 26. XXIX, 38-57.
Purusha XXX, 1-XXXI, 22.
Purushamedha XX, 30.
Purumîḍha XXVII, 30. XXXIII, 19.

Purodhasa XI, 17.
Pragâtha XXXIII, 50.
Prajâpati III, 1-10. 44-VIII, 32. XI, 1-XVIII, 77. XXIII, 38.
Prajâpaty-Açvi-Sarasvatyaḥ XX, 76. 77.
Pratixatra XXXIII, 48.
Praskaṇva VII, 41. VIII, 40. XV, 31. XX, 21. XXXIII, 15. 31-33. 36. XXXIV, 28.
Prâjâpatya I, 1-II, 34. X, 22. XXV, 10-13. XXVII, 25. 26. XXXIV, 49.
Prâdurâxi XXVI, 6.
Prâvatsâra III, 16.
Priyamedha XII, 55.
Plâva XXI, 6.
Bandhu III, 25. 53-56. XII, 90.
Bârhaspatya III, 41-43. VIII, 6. XXVII, 37. 42. 44.
Budha XII, 67. 68. XV, 23. 24.
Bṛihaduktha XXIX, 1-11.
Bṛihaddiva XXXIII, 18.
Bṛihaddevâḥ III, 10. 17-22. 27.
Bṛihaspati II, 11. 12. IX, 1-34 (with Indra).
Brahmaṇaspati III, 28-30.
Bharadvâja III, 3. 13. VII, 24. 39. VIII, 6. XI, 33. 34. XIII, 36. XVII, 10. 16. XVIII, 74. XIX, 2. XXVI, 9. 13. XXXIII, 8. 9. 13. 61. 84. XXXV, 18.
Bharadvâjaputrî XXXIV, 32.
Bhâradvâja VIII, 44-46. XVIII, 70. XXIX, 38-57. XXXIV, 45.
Bhârata III, 14. IX, 37. XVIII, 66.
Bhârgava V, 35. XXIX, 12-24.
Bhâlandana XII, 18-29.
Bhishaj XII, 75-89.
Bhauvana XVII, 17-32. XXV, 47.
Madhuchandas III, 23. 24. 34. V, 29. VI, 29. VII, 8. 33. VIII, 34. XX, 84-89. XXVI, 25. 26. XXIX, 37. XXXIII, 4. 25. 57. 58.
Manasaspati II, 21. VIII, 21.
Manu XXXIII, 91. 94.
Mayobhuvaḥ (plur.) XI, 18.
Mâdhuchandasa XII, 56. XVII, 61.
Muṇḍibha XXV, 9.
Mudgala XXVI, 19.
Medha XXXIII, 92.
Medhâtithi III, 28-30. V, 15. VI, 4. 5. 24 e. VII, 11. VIII, 32. XVII, 9. XXII, 10. XXVI, 20-22. XXX, 4. XXXIII, 10. 45. 46. 81-83. 97. XXXIV, 43. 44. XXXV, 21.
Yajna XXXIV, 49.
Yajnapurusha XXII, 2. XXVI, 19.
Yavamat II, 19.
Yâjnavalkya XXXIII, 55-XXXIV, 58.
Ramyâxi XXVI, 4. 5.
Râhugaṇa III, 11.
Luçodhâ nâka (?) XVIII, 31. XXXIII, 17. 52.
Lopamudrâ XVII, 11.
Laugâxi XXVI, 2.
Vatsa IV, 16. VII, 40. XXVI, 15.
Vatsaprî XII, 1. 6. 18-29. XXXIII, 1.
Vatsâra ? see Av. XXXIII, 49.
Varuṇa X, 1-30.
Vasishṭha VII, 7. VIII, 54-62. IX, 16. 18. 19. XII, 34. XV, 32. 62. XVII, 76. XX, 54. XXI, 9. XXVI, 9. 10. XXVII, 23. 24. 27. 28. 35. 36. XXXIII, 14. 18. 20. 44. 70. 76. 88. XXXIV, 34-40.
Vasuçruta III, 2.
Vasûyava XVII, 8. XXVI, 12.
Vâmadeva X, 24. XIII, 9-13. XVII, 89. XX, 47-49. XXI, 3. 4. XXVII, 39-41. XXXIII, 6. 16. 54.

Vâmadevya IX, 14. 15. XXIII, 31. XXIX, 1-11.
Vâruṇi III, 31-33.
Vidarbhi XX, 55-66.
Vidhṛiti XVII, 62.
Viprabandhu III, 26.
Vibhrâj XXXIII, 30.
Virûpa III, 1. 11. XI, 71. XII, 36. 116. XIII, 37. XV, 21. XXII, 17. XXXIII, 2.
Virûpâxa XII, 30.
Vivasvat (I, 1-XL, 17.) VIII, 36. 37. XXVI, 1. 8. 14.
Viçvakarman XIV, 11-22. XVII, 17-32. XVIII, 58-65.
Viçvamanas (?) XI, 41.
Viçvavârâ XXXIII, 12.
Viçvâmitra (VII, 31. 35-38 Mah.). XI, 62. XII, 47. 51. XVIII, 68. 69. XX, 29. 53. XXI, 8. XXII, 16. XXVI, 23. XXXIII, 7. 22. 60. 63. 69. 75.
Viçvâvasu XII, 66. XVII, 59.
Vihavya XXXIV, 46.
Vṛisha XV, 41.
Vena VII, 16.
Vaikhânasa VIII, 38. XIX, 38. XXXV, 17.
Vaivasvata XXXIII, 91.
Vaiçvâmitra III, 23. 24.
Vyaçva XXVII, 34.
Çaṅkha XIX, 49-61.
Çamyu III, 41. 43. XXVII, 37. 38. 42. 44.
Çâktrya XXXIII, 11.
Çâsa VIII, 44-46. XVIII, 70.
Çirimbiṭha XXXV, 18.
Çivasamkalpa XXXIV, 1-6.
Çunahçepa VIII, 23. X, 27. XI, 14. XII, 12. XVIII, 49. XXI, 1. 2. XXXV, 11.
Çûrpa II, 19.
Çyâvâçva V, 14. XII, 3. XXX, 3.
Çrutakaxa XXXIII, 35.
Çrutabandhu III, 26.
Saṃkasuka XXXV, 7. 15.
Satyadhṛiti III, 31-33.
Sadasyu ?? XXII, 18.
Saṃvatsara XXII, 2.
Saṃvanana XV, 30.
Saṃvaraṇa X, 22.
Savitṛi XI, 1-8. XIII, 26.
Sâdhana XXV, 47.
Sâdhyâḥ XI, 1-XVIII, 77 (Mah.).
Sârparâjnî III, 6-8.
Sindhudvîpa XI, 38. 50-52.
Sukaxa XXXIII, 35.
Sukîrti X, 32-34. XIX, 6.
Sucîka XXXIII, 23. XXXV, 10.
Sutambhara XV, 27. XXII, 15.
Subandhu III, 25.
Suhotra XXXIII, 53. 77. 93. XXXIV, 41.
Sûrya IV, 35.
Somaka XI, 25.
Somasûxman (? °çushma Mah.) II, 18.
Somâhuti XI, 70. XII, 43.
Saubhari XV, 38.
Saumya XII, 67. 68.
Saurya XXXIII, 30.
Svasty-Âtreya IV, 8. XXI, 12-22.
Hiraṇyagarbha XII, 102. XIII, 4. XXIII, 3. 64. XXV, 10-13. XXVII, 25. 26.
Hiraṇyastûpa XXXIII, 43. XXXIV, 12. 13. 24-27. 47.
Haimavarci XIX, 10.

2. The conclusion*) of Kâtyâyana's sarvânukramaṇî, adhyâya IV, 10 - V, 8.

अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सवितानुष्टुभः सोमो बृहत्या बृहस्पतिः पङ्क्तेर्वरुणस्त्रिष्टुभ इन्द्रो जगत्या विश्वे देवा विराजो मित्रः स्वराजो वरुणोऽतिछन्दसः प्रजापतिर्विछन्दसो वायुर्द्विपदायाः पुरुष एकपदाया ब्रह्मा । सर्वा ऋच आग्नेय्यः सर्वाणि यजूंषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणानि च । स्वाहाकारस्याग्निर्वषट्कारस्य विश्वे देवाः । कर्मारम्भे मन्त्राणां देवता वेदितव्याः संन्यस्य मनसि देवतां ततो हविर्हूयते देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते । स्वाध्यायमपि योऽधीते मन्त्रदैवतज्ञः सोऽमुष्मिं लोके देवैरीड्यते

तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतो ।
मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति ॥

मन्त्रार्थज्ञानात्तु विधूतपाप्मा नाकमभ्येति

न हि कश्चिदविज्ञाय याथातथ्येन देवताः ।
श्रौतानां कर्मणां विप्रः स्मार्तानां चाश्नुते फलम् ॥ १० ॥

---

*) The beginning of the work reads thus: मण्डलं दक्षिणमक्षि हृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान्याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय माध्यन्दिनीये वाजसनेयके यजुर्वेदाम्नाये सर्वे सखिले सशुक्रिय ऋषिदैवतछन्दांस्यनुक्रमिष्यामो यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वा ऽनःशाखोखाशम्योपवेषकपालेध्मोलूखलादयश्च प्रतिमाभूताः छन्दांसि गायत्र्यादीनि । एतान्यविदित्वा योऽधीते ऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयाम भवत्यथान्तराश्वगर्तं वापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवत् अथ योऽर्थविन्नस्य वीर्यवत्तर भवति जपित्वा जुहोत्वा तत्फलेन युज्यते ॥ १ ॥ इषे त्वादि खं ब्रह्मात्तं विवस्वानपश्यत् ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो (! °र्णर्षयो) वेदितव्याः परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणामृषिर्देवा वा प्राजापत्या इषे त्वा शाखानुष्टुब्विनियोगः कल्पकारोक्त एवमूर्जे त्वा । ---.

अनादिष्टमधरादौ सवात्ते कर्मणि परिभाषितं मन्त्रगणं वक्ष्यामः*) । सर्वमाग्नेयं गायत्रं गौतमीयꣳ सर्वꣳ सावित्रमौष्णिहं भारद्वाजीयः सर्वꣳ सौम्यमानुष्टुभमाथर्वणिकꣳ सर्वं बार्हस्पत्यं वार्हतमाङ्गिरसꣳ सर्वं वारुणं पाङ्क्तमालम्बायनीयꣳ सर्वमैन्द्रं त्रैष्टुभं याज्ञवल्कीयꣳ सर्वमादित्यदैवतं जागतं कौत्सम् ॥ ११ ॥

ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामो दीक्षायां भृगुरग्निर्विष्णू गायत्री प्रायणीयऽआङ्गिरसोऽदितिरुष्णिक् क्रये विश्वामित्रः सोमोऽनुष्टुप् आतिथ्ये वसिष्ठो विष्णुर्बृहती प्रवर्ग्ये कश्यप आदित्यः पङ्क्तिः उपसत्स्वात्रेय उपसद्देवता त्रिष्टुप् अग्नीषोमीयेऽगस्त्योऽग्नीषोमौ जगती प्रायणीयेऽतिरात्रऽआग्निवेश्योऽहोरात्रेऽअतिजगती चतुर्विꣳशत्यहे सौकरायणः संवत्सरः शक्वरी अभिप्लवे षडहे सावर्णोऽर्धमासा मासाश्चातिशक्वरी पृष्ठे षडहे सायकायन ऋतवोऽष्टिः अभिजिति प्रियव्रतोऽग्निरत्यष्टिः स्वरसामसु सरस्वत्यापो धृतिः विषुवति रौहिणायन आदित्यो [ऽति]धृतिः विश्वजिति सौभर इन्द्र ऋतिः [?इन्द्रः कृतिः?] गोऽआयुषोर्वार्कलिर्मित्रावरुणौ प्रकृतिः दशरात्रऽआचार्यो विश्वे देवा आकृतिः दाशरात्रिके पृष्ठे षडहे भालुक्तेयो दिशो विकृतिः छन्दोमेषु शौल्वायन इमे लोकाः संकृतिः दशमेऽहनि पराशरः संवत्सरोऽभिकृतिः महाव्रते शैलिनः प्रजापतिरुत्कृतिः उदयनीयेऽतिरात्रे भौवनायनो वायुश्छन्दाꣳसि सर्वाणि ॥ १२ ॥

ऋषिभिरुपलक्षितं वाक्यमृषयः छन्दोभिरुपलक्षिता देवता मन्त्रवर्णाद्गयज्ञुषयोर्विनियोगतश्च विज्ञेयाः । सर्वमेतच्छन्दो दैवतमार्षं च विज्ञाय यत्किंचिज्जपहोमादि करोति तस्य फलमश्नुते । ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषमेनोनिर्णोदनꣳ शरीरे न्यसेत् तिर्यग्बिलश्चमस ऊर्ध्वबुध्नः (see Nirukti १२. ३८. Vṛihad-Âraṇy. Mâdhy. २, २, ५, ६. Brahmasûtra ३. ४. १.) तस्याक्षिणी गोतम-

---

*) Halâkhya: अध्वरादिसवान्ते काण्डत्रयविहिते कर्मणि तत्तत्प्रकरणोक्तमन्त्र ऋष्यस्यानादेशे [ऋष्याद्यस्या?] वक्ष्यमाणं ज्ञेयम् । (Making last summer a catalogue of the Chambers-collection I found two leaves more belonging to the ms. of Halâkhya's paddhati, see preface p. IX.)

भरद्वाजौ श्रोत्रे विश्वामित्रजमदग्नी नासिके वसिष्ठकश्यपौ वागत्रिः । गायत्रीं छन्दोऽग्निर्देवता शिरसि विन्यसेदेवमेवोष्णिहꣳ सवितारं ग्रीवास्वनूके बृहतीं बृहस्पतिम् वाङ्मोर्बृहद्रथन्तरे द्यावापृथिवी मध्ये त्रिष्टुभमिन्द्रꣳ श्रोण्योर्जगतीमादित्यम् मेढ्रेऽतिछन्दसं प्रजापतिम् पायौ यज्ञायज्ञियं वैश्वानरम् ऊर्वोरनुष्टुभं विश्वान्देवान् अष्ठीवतोः पङ्क्तिं मरुतः पादयोर्द्विपदां विष्णुम् प्राणेषु विछन्दसं वायुम् न्यूनातिरिक्तेषूपद्रवेषु न्यूनाक्षरं छन्द आपो देवतेत्येवꣳ सर्वाङ्गेषु योजयित्वा वेदमयः सम्पद्यते शापानुग्रहसमर्थो भवति ब्राह्म्यं तेजश्च वर्धते न कुतश्चिद्भयं विन्दते ऋग्भयो यजुर्मयः साममयो ब्रह्ममयस्तेजोमयोऽमृतमयः सम्भूय ब्रह्मैवाभ्येति । तस्मादेतन्नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्रोऽनुब्रूयादनेनाधीतेन चान्द्रायणाद्फलमवाप्नोति अनेन च सम्यग्ज्ञानेन ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्याप्नोति ॥ १३ ॥

इति सर्वानुक्रमणी[यि] चतुर्थोऽध्यायः ॥ ४ ॥

अथ छन्दाꣳसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृतयश्चतुर्विꣳशत्यक्षरादीनि चतुरुत्तराणि । ऊनाधिकैनैकेन निचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ । पादपूरणार्थं तु नैप्रसंयोगैकाक्षरीभावान्व्यूहेत् । आद्ये तु सप्तवर्गे पादविशेषात्संज्ञाविशेषास्ताननुक्रामन्त एवोदाहरिष्यामो विराड्रूपा विराट्स्थानाश्च बहवो ना अपि त्रिष्टुभ एवेत्युद्देशः तत्र दशैकादशद्वादशाक्षराणां वैराजत्रिष्टुभजागता इति संज्ञा अनादेशेऽष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥

प्रथमं छन्दस्त्रिपदा गायत्री । पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः । षट्सप्तैकादशा उष्णिग्गर्भा । त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृद्दशकश्चेद्यवमध्या । यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमाना विपरीता प्रतिष्ठा । द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी ॥ २ ॥

द्वितीयमुष्णिक् त्रिपदाल्पो द्वादशकः । आद्यश्चेत्पुरउष्णिग्मध्यमश्चेत्ककुप् । त्रैष्टुभजागतचतुष्काः ककुब्न्यङ्कुशिरैकादशिनोः परः षट्कस्तनुशिरा मध्ये चेत्पिपीलिकमध्याद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा । चतुःसप्तकोष्णिगेव ॥ ३ ॥

तृतीयमनुष्टुप् । पञ्च पञ्चकाः षट्कश्चैको महापदपङ्क्तिः । जागतावष्टकश्च कृतिः । मध्ये चेदष्टकः पिपीलिकमध्या । नवकयोर्मध्ये जागतः काविराट् । नवचैराजत्रयोदशैर्नष्टरूपा । दशकास्त्रयो विराडेकादशका वा ॥ ४ ॥

चतुर्थं वृहती तृतीयो द्वादशकः । आद्यश्चेत्पुरस्ताद्बृहती । द्वितीयश्चेन्यङ्कुसारिण्युरोबृहती स्कन्धोग्रीवी वा । अन्त्यश्चेदुपरिष्टाद्बृहती । अष्टिनोर्मध्ये दशकौ विष्टारबृहती । त्रिजागतोर्ध्वबृहती । त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या । नवकाष्टकैकादशाष्टिनो विषमपदा । चतुर्नवका वृहत्येव ॥ ५ ॥

पञ्चमं पङ्क्तिः पञ्चपदा । अथ चतुष्पादा विराड्दशकाः । अयुजौ जागतौ सतोबृहती युजौ चेद्विपरीताद्यौ चेत्प्रस्तारपङ्क्तिरन्त्यौ चेदास्तारपङ्क्तिराद्यन्त्यौ चेत्संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपङ्क्तिः ॥ ६ ॥

षष्ठं त्रिष्टुप् त्रैष्टुभपदा । द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुप् । वैराजौ जागतौ चाभिसारिणी । नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानिकादशिनस्त्रयोऽष्टकश्च विराड्रूपा । द्वादशिनस्त्रयोऽष्टकश्च ज्योतिष्मती यतोऽष्टकस्ततो ज्योतिः । चत्वारोऽष्टका जागतश्च महाबृहती । मध्ये जागतश्चेद्यवमध्या । आद्यौ दशकावष्टकास्त्रयः षड्डयुत्तरा विराट्पूर्वा वा ॥ ७ ॥

सप्तमं जगती जागतपदा । अष्टिनस्त्रयः स्वौ च द्वौ महासतोबृहती । अष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापङ्क्तिः ॥

माध्यन्दिनीये वाजसनेयके सर्वानुक्रमणिकैषा कृतिर्भगवतः कात्यायनस्यैषा कृतिर्भगवतः कात्यायनस्य ॥ ८ ॥

इति सर्वानुक्रमणीये पञ्चमोऽध्यायः ॥ ५ ॥ ॥

---

3. That part of Piṅgala's chandaḥsûtram, which relates to the Vedic metres (s. Colebrooke misc. ess. II, 152. 153).

छन्दः । गायत्री । दैव्येकम् । आसुरी पञ्चदश । प्राजापत्याष्टौ । यजुषां षट् साम्नां द्विः ऋचां त्रिः । द्वौ द्वौ साम्नां वर्धत स्त्रीस्त्रीनृचाम् चतुरश्चतुरः प्राजापत्याः एकैकं शेषे । जक्ष्यादासुरी । तान्युत्त्रिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः । तिस्रः (तिस्रस्तिस्रः Halâyudha) सनाम्न्य एकैका ब्राह्म्यः प्राग्यजुषामार्ष्य इति ॥

पादः । इयादिपूरणाः । गायत्र्या वसवः । जगत्या आदित्याः । विराजो दिशः । त्रिष्टुभो रुद्राः । एकद्वित्रिचतुष्पादुक्तपादम् । आर्षं चतुष्पादृषिभिः । क्वचित्त्रिपादृषिभिः सा पादनिचृत् । अष्टौ सप्त षट्पेति प्रतिष्ठा । एषैव विपरीता वर्धमाना । षट्सप्तकयोर्मध्यज्योत्यतिपादनिचृत् । द्वौ नवकौ षट्कश्च सा नागी विपरीता वाराही । तृतीयं द्विपाज्जागतगायत्राभ्याम् । त्रिपात्त्रिष्टुभः ॥

उष्णिक् गायत्री जागतश्च । ककुप् मध्ये चेदल्पः । पुर उष्णिक् पुरतः । परोष्णिक् परतः । चतुष्पादृषिभिः ॥

अनुष्टुब्गायत्रैः । त्रिपात्त्वक्षिज्जागताभ्यां च । मध्येऽन्ते च ॥

बृहती जागतस्त्वयश्च गायत्राः । पथ्या पूर्वश्चेत्तृतीयः । न्यङ्कुसारिणी द्वितीयः स्कन्धोग्रीवी क्रौष्टुकेः उरोबृहती यास्कस्य । उपरिष्टाद्बृहत्यन्ते । पुरस्ताद्बृहती पुरः । क्वचिन्नवकाश्चत्वारः । वैराजौ गायत्री च । त्रिभिर्जागतैर्मध्येबृहती सतोबृहती ताण्डिनः ॥

पङ्क्तिर्जागतौ गायत्री च । पूर्वौ चेदयुजौ सतःपङ्क्तिः । विपरीतौ च । प्रस्तारपङ्क्तिः पुरतः । आस्तारपङ्क्तिः परतः । विष्टारपङ्क्तिरन्तः । संस्तारपङ्क्तिर्बर्हिः । अक्षरपङ्क्तिः पञ्चकाश्चत्वारः । द्वावप्यल्पशः । पदपङ्क्तिः पञ्च । चतुष्कपङ्क्तौ त्रयश्च । पथ्या पञ्चभिर्गायत्रैः । जगती षड्भिः ॥

एकेन त्रिष्टुब्ज्योतिष्मती । तथा जगती । पुरस्ताज्ज्योतिः प्रथमेन । मध्येज्योतिर्मध्यमेन । उपरिष्टाज्ज्योतिरन्त्येन ॥

एकस्मिन्पञ्चके छन्दः शङ्कुमती । षट्के ककुम्मती । त्रिपादणिष्ठमध्या पिपीलिकमध्या । विपरीता यवमध्या । ऊनाधिकैनैकेन निचृद्विराजौ । द्वाभ्यां विराट्स्वराजौ ॥

---

4. List of the measures made use of in the Mâdhyandiniyâ Vâjasaneyi-Saṃhitâ, according to Halâkhya's paddhati of Kâtyâyana's sarvânukramaṇî.

I. chandâṇsi.

1. gâyatrî	24	syllables.
2. ushṇih	28	-
3. anushṭubh	32	-
4. bṛihatî	36	-
5. paṇkti	40	-
6. trishṭubh	44	-
7. jagatî	48	-

II. atichandâṇsi (called also: yajûṇshi).

1. atijagatî	52	syll.	8. kṛiti	80	syll.
2. çakvarî	56	-	9. prakṛiti	84	-
3. atiçakvarî	60	-	10. âkṛiti	88	-
4. ashṭi	64	-	11. vikṛiti	92	-
5. atyashṭi	68	-	12. samkṛiti	96	-
6. dhṛiti	72	-	13. abhikṛiti	100	-
7. atidhṛiti	76	-	14. utkṛiti	104	-

III. yajûṇshi.

	gâyatrî.	ushṇih.	anushṭubh.	bṛihatî.	paṇkti.	trishṭubh.	jagatî.
1. daivî	1	2	3	4	5	6	7
2. âsurî	15	14	13	12	11	10	9
3. prâjâpatyâ	8	12	16	20	24	28	32
4. yâjushî	6	7	8	9	10	11	12
5. sâmnî	12	14	16	18	20	22	24
6. ârcî	18	21	24	27	30	33	36
7. brâhmî	36	42	48	54	60	66	72

yajûṇshi of 17. 19. 23. 25. 29. 31. 34. 35. 37. 38. 39. 40. 41. etc. syllables are not marked by a special name and merely called: yajus.

I. chandâṇsi.

1. gâyatrî (24.)

gâyatrî: II, 4. 33. III, 1-4. 6-8. 10 a b. 11. 12. 16. 22 b. 23. 24. 28-33. 35. 36. 44. 53-56. V, 15. VI, 4. 5. 29. VII, 8 a. 9 a. 11 a. 31 a. 32 a. 33 a. 34 a. 40 a. 41. VIII, 31. 32. 38 a. 39 a. 40 a. 41 a. 63. IX, 22 a. 29. X, 27. 31 d. XI, 2. 13. 14. 25. 32 b-34. 50-52. 62. 68. 70. 71. XII, 9. 10. 30. 36. 40. 41. 43 a. 67. 104. 112. 115-117. XIII, 14 a. 27-29. 32. 33. 36. 37. 52 (aniruktâ). XV, 20-22. XVI, 1. XVII, 8. 9. 16. 81. XVIII, 57. 68. 72. 77. XIX, 3 a b. 4. 38. 40-43. XIX, 71. XX, 2 a. 7. 23 c (aniruktâ). 29. 31. 81-89. XXI, 1. 7. 8. XXII, 9-17. XXIII, 5. 6. 21. 39. XXVI, 4 a. 5 a. 6 a. 8 a. 9 a. 10 a. 13. 15-18. 20-22. 25. 26. XXVII, 29. 31. 32. 34. 39. 40. XXIX, 37 (aniruktâ). XXX, 2-4. XXXII, 13. XXXIII, 2-5. 9. 10. 19-21. 24. 25. 31-33. 35. 36. 45-47. 56-58. 61. 62. 65. 71-73. 76. 77. XXXIV, 28. 41. 43. 44. XXXV, 1 a. 2. 5. 16. 21. 22. XXXVI, 3 b. 4. 5. 7. 12-16. XXXIX, 7.

gâyatry ushṇig vâ XVII, 85.

gâyatry ushṇiggarbhâ (6 + 7 + 11) XVII, 82 (gâyatrî Mahîdhara). XX, 4 (explained by Mahîdhara).

gâyatrîbṛihatyau madhye 'vasânahîne XXXVIII, 17.

gâyatry anavasânâ (avasânahînâ, -rahitâ) V, 35 b. VI, 22 c. XI, 8 b. XX, 18 a. XXXVIII, 28 a.

pâdanicṛid gâyatrî (7 + 7 + 7) VI, 24 e. XX, 81 according to Mahîdhara. XXVII, 41 (explained by Mahîdhara at 39). XXXI, 6.

pratishṭhâ gâyatrî (8 + 7 + 6) IV, 16 a. XI, 32 Mahîdhara.

svarâḍ gâyatrî (8 + 8 + 10) XVII, 4. 5 (explained by Mahîdhara, but without giving the name).

padapaṅktir gâyatrî (5 + 5 + 5 + 5 + 6 or 5 + 5 + 5 + 4 + 6) XV, 44-46 (expl.). XVII, 77.

virâṭ çaṅkumatî gâyatrî XII, 73 (Mahîdhara: ârshî gâyatrî).

gâyatrî çaṅkumatî (8 + 8 + 5) XI, 2 Mahîdhara.

ekapadâ gâyatrî III, 9 a-e. XI, 46 b.

dvipadâ gâyatrî XX, 1 a. XXXII, 3 a. XXXVI, 11 a.

2. ushṇih (28.)

ushṇih (7 + 7 + 7 + 7 or 8 + 8 + 12 or aniyatâxarapâdâ) III, 62 (expl. 7 + 7 + 7 + 7). VI, 36 (8 + 10 + 10). VIII, 51 b (expl. 8 + 8 + 12). XI, 59 c (8 + 8 + 14 expl. anushṭub vâ Mah.). XII, 57 (19 + 10 expl.). 59 (14 + 15 ârshî Mah.). 103 (8 + 8 + 12). 114 (8 + 8 + 12). XIII, 40 (8 + 8 + 12 expl.). XV, 35-37 (8 + 8 + 12 expl.). XVII, 80 (10 + 9 + 9). 83 (16 + 13). 85 (8 + 10 + 8 gâyatrî vâ). XVIII, 56 (13 + 15). XXIII, 33 (7 + 7 + 7 + 7). XXXIV, 50 (13 + 16). XXXV, 6 (20 + 8). XXXVIII, 12 (18 + 12 svarâḍ ushṇih Mah.). XL, 17 (16 + 12 expl.).

ushṇig vishamapâdâ XXVII, 11-22.

svarâḍ ushṇih XXXVIII, 12 Mah.

vardhamânâ ushṇih (6 + 7 + 8 + 9) VII, 29 a (expl.).

anushṭubgarbhoshṇih XXXIV, 7 (ushṇih Mah.).

paroshṇih (8 + 8 + 12) XVIII, 54 (expl. 10 + 7 + 12). XXXIV, 33. XXXVII, 19 (expl.). XXXVIII, 22.

kakummatî paroshṇih XIV, 22 a.

pura-ushṇih (12 + 8 + 8) IX, 6 (expl. anavasânâ). 7 (ushṇih Mah.). XXXVI, 24 (! brâhmî trishṭup Mah.; the statement of Halâkhya: तच्चतुरित्यस्याः दध्यङ् आथर्वण ऋ° सूर्यो दे° पुर उष्णिक् २१ ॥२४॥ must certainly refer to another reading. There was an addition in the margin of the ms., but it is torn off, only the word विनियोगः remaining.).

ushṇig anushṭub vâ XI, 59 c Mah. gâyatrî vâ XVII, 85.

kakubh (8 + 12 + 8) III, 59 (expl.). XIII, 1 (expl.). explained at XIV, 9. XV, 38-40 (expl.). XXXVIII, 13 (expl. kakub-ushṇih Mah.).

3. anushṭubh (32.)

anushṭubh II, 14 a. III, 14. 38. 40. 42. 45. 47. 49. 50. 60 a b. IV, 5. 8. 14. 21 (bṛihatî vâ). 29. 32. V, 29. 38. 41. VI, 23. 25. 28. VIII, 33 a. 34 a. 35. 44 a. IX, 3 a. 4 a. 26-28. 37. X, 33. XI, 1. 3. 11. 18. 19. 26. 30. 31. 40. 44. 48. 54-57 a. 67. 72-74. 77-82. XII, 11. 16. 17. 31. 32. 37-39. 50. 52. 54-56. 72. 75-101. XIII, 6-8. 17. 20-23. XIV, 11. 21. XV, 29-31. 55. 56. 59-61. XVI, 2. 3. 8-14. 49. 52-63. XVII, 45. 46. 50-53. 61-65. 68. XVIII, 32. 46-48. 62-65. 67 b. 70. 76. XIX, 1 a. 10. 12-31. 37 a b. 39. 45. 46. 64. 65. 70. XX, 5. 6. 8. 13-16. 20. 21. 24-28. 34. 55-76. 80. 90. XXI, 12-28. XXII, 21. XXIII, 9-12. 14. 18 d. 22. 24-33. 35-37. 40-48. 53-56. 63. XXVI, 2 b. 12. XXVII, 10. 30. XXIX, 49. 50. XXXI, 1-15. 20. 21. XXXII, 1. 2. 15. 16. XXXIV, 8-11. 15. XXXV, 4. 8. 11. 13. 14. 18. XXXVI, 9. 10. 21. 22. XXXVIII, 10. 21. 24. XXXIX, 4. XL, 1-3. 5-7. 9-14.

anushṭub ushṇig vâ XI, 59 c Mah. bṛihatî vâ IV, 21.

pipîlikamadhyâ kṛitir anushṭubh XXII, 18 (expl.).

nashṭarûpâ 'nushṭubh VII, 45 Mah.

nashṭarûpâ 'nushṭub virâṭ-chandah VII, 1 (expl.).

anushṭub virâṭchandah XIII, 26 Mah. XIV, 1 a. XVII, 76 (expl.). XVIII, 35. 36 (expl. virâj Mah.).

tripadâ virâj (30) II, 21 b. 34. VIII, 21. XIII, 26 (Mah. virâḍ anushṭubh). XXIII, 15.

dvipadâ virâj (20) III, 25 a b 26 a b. XV, 48. XX, 19 a. XXV, 46. 47. XXXVI, 8.

ekapadâ virâj (10) V, 35 c. XII, 65 b.

4. bṛihatî (36.)

bṛihatî VII, 25 c (explained by Mahîdhara). VIII, 2 a (expl.). 52 (expl.). XI, 20 (ârshî Mah.). 37. 64. XIII, 35. 39 (ârshî Mah.). XV, 32-34. XVII, 7. 11. 57. XIX, 2. 11 a. XX, 30. 53. XXIII, 7. XXVI, 14. XXVII, 35. 37. 42. 43. XXXIII, 14. 15. 39. 41. 81. 82. 85-93. 96. XXXIV, 56. 57. XXXV, 9. XXXVI, 20. XXXVII, 7 a. XXXVIII, 19 (uparishṭâdbṛihatî Mah.).

bṛihaty anushṭub vâ IV, 21. paṇktir vâ VIII, 26. XVII, 3. 15. 56.

pipîlikamadhyâ bṛihatî XVII, 67 (13 + 9 + 14 expl.).

purastâdbṛihatî (12 + 8 + 8 + 8) IV, 28 (expl.).

nyaṇkusâriṇî bṛihatî (8 + 12 + 8 + 8) III, 39 (expl.).

nyaṇkusâriṇî urobṛihatî skandhogrîvi vâ bṛihatî XI, 38 (expl.). 63 (bṛihatî Mah.).

pathyâ bṛihatî (8 + 8 + 12 + 8) III, 34 (expl.). VI, 34 (expl.). 37. VIII, 3 a (bṛihatî Mah.). XI, 41 (expl.). 45. XXVI, 11. XXXIII, 66. XXXIV, 32.

uparishṭâdbṛihatî (8 + 8 + 8 + 12) II, 16 f (bṛihatî Mah.). XI, 42 (expl.). 53 (expl.). 83 (expl.). XII, 58 (expl.). XVI, 47 (expl.). XX, 35. XXIII, 22. XXXVIII, 19 Mah.

ûrdhvabṛihatî (12 + 12 + 12) IV, 33 (expl.). XII, 7 (expl.). XIII, 16 (expl.). XXXVII, 16 (expl.).

satobṛihatî (12 + 8 + 12 + 8) XII, 108-110 (expl.). explained at XIV, 9. XV, 32. 38. XXVII, 36. 38. 44. XXXIII, 40. 67. 83. 94. 95. 97.

viparîtâ bṛihatî (8 + 12 + 8 + 12) VI, 33 (expl.).

mahâbṛihatî (12 + 8 + 8 + 8 + 8) XIX, 72-74 (expl.). 78.

mahâbṛihatî trishṭubh XII, 8 (expl. mahâbṛihatî Mah.). XXXVIII, 20 (mahâbṛihatî Mah.).

5. paṇkti (40.)

paṇkti III, 51 (expl.). 52. 58. V, 3 (expl.). VI, 27 (expl.). XII, 60 (expl. ârshî Mah.). 71. XIII, 30 (svarâṭ paṇktiḥ Mah.). XV, 41 (expl.) - 43. XVI, 4-6. XVII, 48. 72. XX, 11 (tryavasânâ). 22. 32. XXXVIII, 27.

paṇktir bṛihatî vâ VIII, 26. XVII, 3. 15. 56.

svarâṭ paṇktiḥ XI, 29 (expl.). XIII, 2. 30 Mah.

paṇktir virâj V, 4 (expl. virâj Mah.). IX, 16 (virâj Mah.). XI, 21 (expl.). XVII, 71 (expl.).

catushpadâ virâj III, 46 (expl.). V, 4 Mah. IX, 16 Mah. XXI, 10 (!).

paṇktis trishṭubh VIII, 61. XI, 27 Mah.

mahâpaṇkti III, 18 a (expl.). VIII, 28 (expl.). 42 (expl.). XVIII, 55 (expl. mahâpaṇktir *jagatî* Mah.).

tryavasânâ mahâpaṇktiḥ III, 43 (expl.). VI, 17 (expl.). XI, 46 a (expl.). XX, 9.

prastârapaṇkti (12 + 12 + 8 + 8) VIII, 43 (expl.). XIII, 18 (expl.). XVIII, 44 (expl.).

âstârapaṇkti (8 + 8 + 12 + 12) III, 61 (expl.). IV, 23 (expl.). XI, 12 (expl.)

vishṭârapaṇkti (8 + 12 + 12 + 8) XII, 106 (expl.). 107. XVIII, 53 (paṇkti Mah.).

saṃstârapaṇkti (12 + 8 + 8 + 12) XXXVI, 12 (paṇkti Mah.).

6. trishṭubh (44.)

trishṭubh I, 28 a. II, 18 a. 24. 30. III, 13. IV, 30 c. 31. 37. V, 16. 18 a. 19 a. 20. 36. 37. VI, 3. 20 b. VII, 5. 7 a. 10 a. 14 b. 16 a. 17 a. 19. 24. 26. 35 a. 36 a. 37 a. 38 a. 39 a. 42-44. VIII, 4 a. 6. 9 b. 14-20. 23 b. 24. 36. 37 a. 45 a. 46 a. 59 d. 62. IX, 1. 8. 18. 19. 23-25. X, 1. 7. 16 a. 19 a. 20 a. 22. 33 a. 34. XI, 5. 7. 17. 22-24. 35. 36. 39. 43. 47 c. 49. 69. 75. 76. XII, 1. 2. 6. 12. 13. 15. 18-29. 33-35. 44. 45. 47-49. 51. 61-64. 66. 68. 70. 102. 105. 113. XIII, 3-5. 9-13 a. 15. 31. 34. 38. 41-51. XIV, 2-5. XV, 1. 2. 3 c. 23-25. 49-54. 62. XVI, 50. XVII, 17-44. 47. 49. 54. 55. 58-60. 66. 69. 70. 73. 75. 79. 87-99. XVIII, 31. 33. 34. 49. 51. 52. 59-61. 66. 69. 71. 73-75. XIX, 5. 6 a. 32-35. 44. 47. 49-58. 60-63 66-69. XX, 36-52. 54. 77. 79. XXI, 2-6. 9. 11. XXII, 2. XXIII, 1-3. 16. 38 49-52. 57-62. 65. XXV, 10-13. 21-25. 27. 28. 30-45. XXVI, 3 a. 7 a. 19. 23

XXVII, 1-9. 23-28. 33. XXIX, 1-36. 38-42. 44-46. 48. 51-57. XXX, 1. XXXI, 16-19. 22. XXXII, 4-12. 14. XXXIII, 1. 7. 8. 11-13. 16-18. 22. 23. 26-28. 34. 37. 38. 42-44. 48. 50-55. 59. 60. 63. 64. 68. 70. 74. 78-80. XXXIV, 1-6. 14. 16-24. 26. 27. 29-31. 35-40. 42. 46. 48. 49. 52-54. 58. XXXV, 7. 10. 15. 17. 19. 20. XXXVI, 11 b. XXXVII, 17. XXXVIII, 5 a. XL, 4. 8.

trishṭubh jagatî vâ XVII, 6.

mahâbṛihatî trishṭubh: see before.

paṅktis trishṭubh: see before.

virâḍrûpâ trishṭubh II, 17 a (expl.). 22. III, 41 (expl.). VIII, 25 (virâj Mah.). XI, 15 a (expl.).

virâṭsthânâ trishṭubh XI, 27 Mah. XXV, 19 (expl.).

yavamadhyâ trishṭubh XVI, 51 (expl.).

purastâjjyotis trishṭubh XVII, 74 (trishṭubh Mah.).

madhyejyotis trishṭubh XII, 65 a (trishṭubh Mah.).

uparishṭâjjyotis trishṭubh XII, 111 (expl.).

7. jagatî (48.)

jagatî III, 15 (expl.). IV, 12. 35 (expl.). V, 14. VII, 12 a. VIII, 5 b. IX, 9. 14. 15. 17. XI, 4. 6. XII, 3. 14 a. XV, 26-28. XVI, 15. 16. 48. XVII, 10. 13. 14. 84. XVIII, 58. XIX, 7. 59. 80-95. XX, 78. XXV, 14-18. 20. 26. 29. XXVI, 24. XXVIII, 25 Mah. XXIX, 43. 47. XXXIII, 6. 29. 30. 49. 69. 75. 84. XXXIV, 12. 13. 25. 34. 45. 47. 55. XXXVII, 2. XL, 16.

jagatî trishṭub vâ XVII, 6.

mahâpaṅktir jagatî: see before.

II. atichandâṅsi.

1. atijagatî (52) IX, 5 b. 39. X, 24. XVII, 78. XVIII, 30. XIX, 75. 79. Mahîdhara at XXII, 19. XXVIII, 2. 5. 7. 9. 12. 15. 17. 18. 24. 40. 42-43.

2. çakvarî (56) XXXIV, 51. Mahîdhara at XIII, 24. XV, 58. XVII, 86. XXIII, 2. XXVIII, 10. 11. 13. 26. 27. 30-32. 39. XXXVI, 17.

3. atiçakvarî (60) XIX, 76 (expl.). 77. XXXVIII, 17 (expl. tryavasânâ) Mahîdhara at XX, 10. XXVIII, 20. 28. 29. 34.

4. ashṭi (64) XIX, 48 (tryavasânâ). Mahîdhara at XV, 47. XXI, 29. 49. XXIII, 4.

5. atyashṭi (68) IV, 1. 2 (tryavasânâ Mah.). 25 (63 syll., erroneously: ashṭi Mah.). VIII, 53 a (expl. tryavasânâ Mah.). IX, 40. X, 18. Mahîdhara at VIII, 60. XI, 28. XXI, 30. XXVIII, 33. XXXVII, 18.

6. dhṛiti (72) Mahîdhara at XVI, 64-66. XXI, 60.

7. atidhṛiti (76) Mahîdhara at XI, 9. XV, 47.

8. kṛiti (80) XII, 4 (73: erroneously, caturavasânâ). Mahîdhara at XXVIII, 19.

9. prakṛiti (84) V, 7 (caturavasânâ). Mahîdhara at XX, 12.

10. âkṛiti (88) Mahîdhara at XV, 64.

11. vikṛiti (92). Mahîdhara at XIV, 12. XXI, 61. XXVIII, 16. 23 c. 46 c.

12. samkṛiti (96): wanted.

13. abhikṛiti (100) Mahîdhara at XXVII, 45.

14. utkṛiti (104) Mahîdhara at XIV, 6. XV, 16. 57. XXII, 22.

III. yajûṃshi.

daivî gâyatrî (1.) III, 5 a (bhûr, svar). XL, 15 (om). 17 (om).

daivî ushṇih (2.) III, 5 a (bhuvar). VI, 19 b (diçaḥ). g (digbhyah, without the svâhâ!). Mahîdhara at XXXVII, 13 (madhu).

daivî anushṭubh (3.) I, 1 a. b. 14 a. 19 a. 22 d. 30 c. IV, 22 d. e. VI, 19 c. d. e. f. XIV, 18 a. 19 c. f. k. IX, 1 b. X, 8 h. i. k. XXII, 1 c. XXXVIII, 3 b.

daivî bṛihatî (4.) I, 1 c. 3 c. 4 a. 13 d. 17 a. 20 b. d. f. 21 b. 22 b. 23 c. d. II, 5 a. 16 a. b. 25 d. f. IV, 22 g. 25 b. 26 b. V, 2 b. c. d. 12 f. 25 g. 30 c. VI, 15 g. VII, 3 d. e. 15 d. VIII, 55 c. 57 f. 58 g. 59 a. b. IX, 22 c. X, 5 f. 9 a. 15 b. XIII, 55 d. 57 c. f. XIV, 8 f. h. 18 b. e. f. i. l. 19 d. g. h. l. m. 23 a. XV, 4 a. c. e. f. g. h. l. n. 5 a. b. c. d. e. i. k. l. n. p. t. v. 65 d. XVII, 1 b. c. 12 a. e. XX, 2 b. c. 19 c. i. XXIII, 13 b. 18 b. XXXVII, 10 a. b. c. 11 a. b. XXXVIII, 2 a. d. 6 e. XXXIX, 1 f. 2 a. d. f. 3 a.

daivî paṇkti (5.) I, 4 b. c. 9 d. f. 20 c. 23 e. 25 c. 30 b. II, 2 b. 7 b. c. 11 c. 16 c. IV, 22 b. c. V, 12 a. 21 b. c. d. 25 f. 33 b. VI, 7 a. 11 d. e. 16 b. 18 c. VII, 6 c. 12 f. 13 c. 17 e. 18 c. VIII, 1 b. 54 c. d. 56 a. c. 57 g. h. 58 d. IX, 20 a. b. d. e. X, 5 b. c. d. h. i. k. l. m. n. 8 l. 21 f. XII, 46 a. b. XIII, 54 g. i. 55 c. e. 56 c. d. f. 58 b. c. d. XIV, 8 a. c. i. g. 14 a. b. d. e. f. g. h. k. 18 c. g. h. k. m. 19 a. i. 20 a. b. c. f. m. 23 g. l. p. XV, 4 b. d. i. k. m. o. 5 g. h. m. o. q. r. s. w. 65 e. XVII, 12 b. c. d. XVIII, 50 b. XIX, 36 d. XXII, 6 a. b. d. e. f. g. i. 19 d. XXIII, 13 d. 18 a. c. XXXV, 3 a. XXXVII, 12 g. XXXVIII, 2 b. c. 3 c. 9 b. 14 a. b. 15 b. XXXIX, 1 b. c. e. g. 2 b. g. 3 b-g.

daivî trishṭubh (6.) I, 20 g. V, 9 a. b. 33 c. VI, 6 b. 14 a. b. c. d. e. f. g. 15 b. VIII, 56 d. 57 c. e. 58 f. IX, 21 h. i. X, 5 e. 21 a. e. XIII, 54 a. XIV, 8 b. e. 17 c. i. 18 d. 19 b. c. 20 d. e. g. h. l. 23 b. c. f. i. k. m. r. XV, 4 q. s. 5 f. u. 65 c. XVIII, 50 a. c. d. e. XXII, 6 k. XXXV, 3 b. XXXVIII, 4 a. c. 6 a. b. 9 c. 14 c. d. XXXIX, 2 c. e.

daivî jagatî (7.) I, 2 b. 12 a. 17 c. 22 c. 25 b. II, 2 d. IV, 1 e. 10 d. e. V, 9 c. d. 13 d. 26 g. 31 d. 32 e. VI, 12 a. 14 h. 15 a. c. d. e. i. VI, 22 a. VIII, 23 a. 47 d. 54 a. e. f. 55 b. 57 d. 58 e. IX, 20 m. XIV, 8 k. 20 i. k. 23 d. e. g. n. XV, 4 p. r. 65 a. XXII, 6 c. h. 19 f. XXXV, 3 d. XXXVII, 1 b. 11 c. 13 b. XXXVIII, 4 b. XXXIX, 1 d.

âsurî gâyatrî (15.) I, 14 e. 19 d. 26 a. II, 2 c. 5 b. d. e. IV, 10 a. 25 c. VI, 3 c. 10 b. 16 g. 24 a. VII, 9 b. 22 c. 23 b. 27 e. 33 b. 34 b. 35 b. 36 b. 37 b. 38 b. VIII,

23 c. 33 b. 34 b. 35 b. 40 b. 41 b. 50 b. IX, 5 a. 35 c. 36 a. 38 l. X, 2 c. d. 3 c. d. i. k. 4 g. h. p. q. r. s. 5 a. 15 a. 28 b. XXXVIII, 15 d.

âsurî ushṇih (14.) I, 16 d. II, 1 a. 29 c. V, 22 c. 26 c. d. VII, 27 c. g. 30 n. VIII, 13 b. 38 b. 44 b. 50 a. XII, 46 e. XXXVIII, 11 a (Mah. sâmoshṇih).

âsurî anushṭubh (13.) I, 14 b. c. 18 f. 19 b. c. 27 a. b. c. II, 1 b. III, 17 d. V, 1 e. 11 a. d. 12 c. VI, 11 c. VII, 27 a. b. f. 28 a. b. c. 30 b. f. k. m. 35 c. 36 c. 37 c. 38 c. 39 b. 40 b. VIII, 13 a. c. d. 33 c. 34 c. 35 c. 39 b. 55 a. IX, 2 c. d. f. i. 3 c. 4 c. X, 4 e. f. i. k. 9 f. 23 c. XI, 16 c. XIII, 53 t. XV, 3 b. XIX, 36 g. XXIII, 8 a. c. XXVI, 10 b. XXXVIII, 6 g.

âsurî bṛihatî (12.) I, 7 a. b. 29 a. b. d. e. VII, 30 a. c. d. e. i. l. VIII, 13 e. XXXVII, 18 c.

âsurî paṅkti (11.) I, 27 f. III, 17 a. c. V, 9 f. VIII, 57 b. IX, 20 i. XII, 46 d. XIII, 53 u. XXVI, 3 c. XXXVII, 18 d.

âsurî trishṭubh (10.) III, 17 b. IV, 7 a. b. c. d. V, 11 b. VII, 30 g. h. 39 c. 40 c. XV, 3 a.

âsurî jagatî (9.) I, 15 b. 27 e. IV, 36 a.

prâjâpatyâ gâyatrî (8.) I, 6 b. 7 c. 10 b. 11 a. c. d. 22 a. g. 27 d. II, 2 a. e. f. 11 d. 16 e. 32 h. III, 27 a. 37 d. IV, 13 a. c. V, 9 e. o. 13 e. 24 a. c. d. 31 a. 32 h. i. 33 a. VI, 21 b. 24 b. 32 b. c. d. VII, 13 d. 18 d. IX, 21 a. f. X, 8 e. 14 b. 19 b. 25 b. XI, 47 a. 60 f. XIII, 24 a. b. XIV, 8 d. XXXVIII, 1 b (Mahîdhara). 5 b. 16 b.

prâjâpatyâ ushṇih (12.) II, 1 c. VII, 27 d.

prâjâpatyâ anushṭubh (16.) I, 17 b. 19 f. 22 h. II, 19 a. IV, 3 a. V, 11 e. 25 a. VI, 18 a. VII, 23 c. X, 2 a. b. 4 t. 21 b. XXII, 1 a.

prâjâpatyâ bṛihatî (20.) I, 10 a. 21 a. 24 a. 29 c. f. II, 11 b. III, 57 a. 63 a. IV, 17 a. 26 a. V, 22 a. 26 a. VI, 9 a. 30 a. VII, 15 c. 45 a. VIII, 47 a. 51 a. IX, 11 b. 30 a. 33 a. 38 a. XI, 9 a. 28 a. XVIII, 37 a. b. XX, 3 a. 33 b. XXII. 1 b. XXXVII, 1 a. 9 a. XXXVIII, 1 a.

prâjâpatyâ paṅkti (24.) I, 12 b. 31 b. VI, 12 b. VII, 14 a. X, 6 b.

prâjâpatyâ trishṭubh (28.) III, 21. IV, 11 c. V, 5 a. 39 b. VI, 6 a. VII, 4. 48. IX, 11 a. 19 b. 30 b. X, 29 a. XI, 61 b. c.

prâjâpatyâ jagatî (32.) I, 2 c. 24 c. IV, 2 a. 11 b. XXVIII, 23 a (Mahîdhara).

yâjushî gâyatrî (6.) I, 4 e. 9 c. e. 11 b. 16 b. e. 18 e. 22 e. 23 a. 28 c. 30 a. II, 5 c. 6 f. 9 h. 23 b. 25 e. g. IV, 1 d. 26 c. 30 a. V, 2 e. 22 b. 23 i. 26 b. 30 a. b. d. 31 c. 32 a. g. 42 b. VI, 10 a. 15 h. 16 a. e. 21 h. i. VII, 12 d. 17 c. 45 d. VIII, 58 c. 59 c. IX, 20 c. X, 8 a. m. 19 d. 28 d. e. 31 a. XI, 57 b. 59 a. XIII, 54 d. e. f. 55 f. h. i. 56 e. g. i. 57 a. b. d. e. i. 58 e. i. XIV, 13 a. XIX, 1 c. 36 g. XXIII, 13 c. XXXVIII, 14 f.

yâjushî ushṇih (7.) I, 2 a. 16 f. 18 a. 19 e. 28 b. III, 37 b. c. IV, 4 a. b. 6 a. b. c. d. 10 b. V, 2 a. 21 a. VI, 21 a. f. m. VIII, 27 b. 58 b. IX, 20 f. g. 38 c. X, 8 b.

c. d. 19 c. 28 c. 31 b. XI, 60 e. g. XIII, 54 c. h. 56 h. 57 g. h. 58 i. XIV, 13 d. XV, 6 g. 8 d. XIX, 1 d. XXIII, 13 b. e. XXXVIII, 15 a. c.

yâjushî anushṭubh (8.) I, 14 d. IV, 6 c. 30 b. V, 32 b. c. d. VI, 21 e. k. VII, 45 c. VIII, 1 a. X, 23 c. d. XIII, 53 a. b. 54 b. 55 g. 56 a. XIV, 9 i. l. 10 c. 13 b. c. 23 h. q. XV, 8 c. 9 a. b. c. d. e. g. h. 65 b. XIX, 9 d. 36 e. f. XX, 1 b. XXIII, 13 f. g. XXXVII, 11 e. XXXVIII, 1 b. 15 e. f. Mahîdhara at 16 b.

yâjushî bṛihatî (9.) I, 1 e. 13 e. 16 c. 20 a. II, 26 b. 27 b. 32 a. b. c. d. e. IV, 27 a. V, 12 b. 21 e. 24 b. 31 b. 32 f. 33 d. 34 a. VI, 2 c. 11 a. 16 f. 21 d. g. 32 e. VII, 2 a. 3 b. 6 b. 11 b. 17 b. 22 b. 26 b. VIII, 56 b. e. 57 a. IX, 20 k. l. 21 g. X, 8 f. 9 b. c. e. g. 21 d. 31 c. XI, 59 b. XIII, 53 c. e. i. n. 55 a. b. 56 b. 58 f. XIV, 9 b. e. f. g. h. 10 a. b. d. f. g. 13 e. XV, 6 c. h. 8 b. 9 f. i. XVII, 1 d. XIX, 1 c. 9 a. f. XXII, 5 c. XXIII, 13 a. XXXVII, 12 f. XXXVIII, 6 d. 14 e.

yâjushî paṇkti (10.) I, 10 c. 15 d. 24 b. II, 28 b. IV, 36 b. c. V, 1 a. 13 b. c. 17 a. d. 26 f. 33 e. VI, 2 b. 21 c. l. VII, 8 c. d. 10 b. 12 c. e. 17 d. 31 c. 32 c. VIII, 49 b. 54 b. 55 e. 58 a. IX, 20 h. X, 8 n. 15 c. 23 a. b. XI, 66 a. e. f. XII, 46 c. XIII, 14 b. 53 d. k. l. m. o. p. XIV, 9 a. c. k. 10 c. 23 o. XV, 6 a. b. f. i. 8 a. XIX, 9 b. c. e. XXII, 5 b. XXVI, 10 c. XXXVII, 3 b. 4 b. 9 b. 11 d. 13 a. XXXVIII, 7 a. b. e. 8 b. c. 16 a.

yâjushî trishṭubh (11.) I, 13 f. 18 d. 31 c. II, 8 e. 20 b. c. IV, 1 c. 2 b. 22 f. 36 d. V, 1 b. 2 f. g. h. 28 b. 39 c. VI, 9 b. 24 c. d. 26 b. VII, 11 c. 25 b. VIII, 39 c. 55 d. X, 28 g. XI, 66 b. XIII, 53 f. g. h. 58 g. XV, 7 b. c. d. e. f. XIX, 11 b. c. 36 a. XXII, 5 a. XXIII, 2 b. XXVI, 6 c. 7 c. 8 c. XXXV, 3 c. XXXVII, 11 f. XXXVIII, 3 a. 7 c. f. XXXIX, 1 a.

yâjushî jagatî (12.) I, 4 d. II, 6 d. III, 18 b. 57 b. IV, 10 c. V, 1 c. d. 26 e. VI, 16 d. VII, 12 b. 21 b. 31 b. 32 b. 33 c. 34 c. 45 b. VIII, 8 b. 11 b. 38 c. 40 c. 41 c. 44 c. IX, 2 a. X, 9 d. 28 f. XI, 16 b. 66 c. d. XIII, 53 q. r. s. XIV, 9 d. m. XV, 6 d. e. k. XXII, 5 d. e. XXIII, 4 b. 8 b. XXVI, 4 c. 5 c. 9 c. XXXVII, 4 d. (Mahîdhara). XXXVIII, 7 d. 11 b.

sâmnî gâyatrî (12.) I, 5 b. IV, 36 e. VI, 32 a. VII, 16 b. XI, 47 b. XXXVIII, 4 d. 6 c.

sâmnî ushṇih (14.) III, 27 b. V, 10 a. b. c. 11 c. 12 e. 28 c. 42 c. VI, 6 c. 22 b. 26 a. VIII, 45 c. 46 c. IX, 22 b. 35 a. 38 d. X, 3 a. b. 21 c. 28 a. XIII, 58 h. XIX, 36 c. Mahîdhara at XXXVIII, 11 a.

sâmnî anushṭubh (16.) II, 32 g. III, 22 a. V, 12 d. 35 a. VII, 13 b. 18 b. VIII, 45 b. 46 b. IX, 2 b. e. h. 3 b. 4 b. 35 d. 36 b. X, 3 g. h. 4 a. b. c. d. XI, 65 a. XII, 53 a. XXXVII, 21 (Mahîdhara).

sâmnî bṛihatî (18.) II, 31 a. b. IV, 18 c. VIII, 1 c. X, 3 e. f. XII, 53 b. XXXVII, 20 a.

sâmnî paṅkti (20.) I, 11 e. II, 28 a. IX, 32 d. 33 c. 36 e. XIV, 24 a. 29 a. XVIII, 45 c. XX, 3 b. XXII, 4 a.

sâmnî trishṭubh (22.) I, 3 b. 6 a. 16 g. II, 6 a. b. c. 11 a. IV, 10 f. 16 b. V, 9 g. VII, 13 a. 18 a. IX, 31 b. d. 32 c. 34 c. X, 4 v. 20 c. 29 b. 32 b. XIV, 24 b. 28 a. d. XIX, 6 b. 8 a. XX, 33 a. XXVII, 15 a.

sâmnî jagatî (24.) I, 31 a. IX, 9 b. 10 b. 13 b. 36 d. X, 25 a. XIV, 24 c. 25 a. b. 28 c. 29 b. c. 30 d.

ârcî gâyatrî (18.) I, 22 f. 23 b. IV, 3 b. V, 25 d. 39 a. VI, 23 a. d. 46 b. XI, 16 a. 60 a. c. XIII, 54 k. 55 k. 56 k. 57 k. 58 k. XX, 3 c. d. XXVI, 1 a. b. d. XXXVII, 12 b. 20 a (Mahîdhara, sic!). XXXVIII, 6 f. 8 d. XL, 15.*)

ârcî ushṇih (21.) I, 5 a. 15 a. 31 d. II, 7 d. 15 c. 32 f. V, 27 b. VI, 8 c. 21 n. VIII, 11 a. 50 c. IX, 33 d. XI, 32 a. XIV, 25 c. 29 d. XVIII, 45 b. XXII, 19 b.

ârcî anushṭubh (24.) V, 22 e. IX, 34 a. c. XI, 61 c. XXXVII, 5.

ârcî bṛihatî (27.) V, 43 b. VII, 46 a. VIII, 13 f. IX, 10 c. 13 a. XI, 61 a. d. XIV, 24 d. 29 e. XXXVIII, 16 e. Mahîdhara at 14 g (25 sic!).

ârcî paṅkti (30.) II, 15 d. IV, 22 a. V, 22 d. VI, 18 b. 19 a. X, 11. XI, 61 f. XIV, 25 d. XXXVII, 14 (Mahîdhara, sic!). XXXVIII, 18 a. c. Mahîdhara at 14 a + b + c + d + e (31 sic!). 18 b (29 sic!).

ârcî trishṭubh (33.) I, 16 a. 18 c. 20 e. IV, 17 b. 27 c. VII, 47 a. VIII, 10 b. 29. XXXVII, 6 a + b (Mahîdhara). 14. 20 b.

ârcî jagatî (36.) XIV, 30 e.

brâhmî gâyatrî (36.) VIII, 9 a. IX, 12 b. — Mahîdhara at XXVIII, 46 a. XXXVII, 3 a + b. 5 a + b. XXXVIII, 6 e + f + g.

brâhmî ushṇih (42.) VI, 11 b. IX, 12 a. XIV, 7 b. c. XV, 63. XXXVIII, 26. — Mahîdhara at XXVIII, 14. 23 b.

brâhmî anushṭubh (48.) I, 18 b. III, 19. 48. VIII, 27 a. 30. XI, 58 c. — Mahîdhara at XXVIII, 8. 41. 46 b. XXXVII, 15.

brâhmî bṛihatî (54.) II, 27 a. IV, 15. — Mahîdhara at XXVIII, 37. 38. 44. 45.

brâhmî paṅkti (60.), wanted.

brâhmî trishṭubh (66.) XV, 58. — Mahîdhara at XXXVI, 24.

brâhmî jagatî (72.), wanted.

yajûṃshi I, 1 d. 3 a. 8 a. 12 c. 13 g. 15 c. 17 d. 18 b. 21 c. 25 a. d. 30 d. II, 3 a. b. c. 6 e. 7 a. 8 f. g. 10 a. b. 12. 13. 14 b. 15 a. b. 16 d. 17 b. 18 b. 19 b. 20 a. 21 a. 23 a. 25 a. b. c. 26 a. 29 a. b. III, 5 b. 20. 37 a. 63 b. IV, 1 a. b. 2 c. 4 c. 6 d. 9 a. b. 11 a. 13 b. 19. 20. 24 a. b. 26 d. 27 b. 34. V, 5 b. 6. 8 a. b. c. 9 k. n.

---

*) वायुरनिलम् अथेदमिति द्वे यजुषी । अथ या प्रथमा प्राजापत्या गायत्री द्वितीया यजुर्बृहती । कण्वेभाष्ये एकैव तदा ऋग्गायत्री । ओमित्येकाक्षरस्य ब्रह्मा ऋषिः दैवी गायत्री छन्दः । - - । क्रतो स्मर इत्यासां दैवी बृहती । Halâkhya.

17 b. c. 18 b. 19 b. 23 f. g. h. 25 b. c. e. 27 a. 28 a. 33 f. 34 b. 40. 42 a. 43 a. VI, 2 a. d. 3 b. 7 b. 9 c. 10 c. 13. 15 f. 16 c. 20 a. 22 d. 30 b. c. 31. 35. VII, 2 b. c. d. 3 a. c. 6 a. 7 b. 8 b. 20. 21 a. 22 a. 23 e. f. 25 a. 28 d. 29 b. 36 d. 47 b. c. d. VIII, 2 b. 3 b. 4 b. 5 a. 7. 8 a. 10 a. 12. 22 a. b. 37 b. 38 d. 39 d. 40 d. 47 b. c. 48. 49 a. 53 b. 60. IX, 2 g. 4 d. e. 6 b. 10 a. d. 22 d. 31 a. c. 32 a. b. 33 b. 34 b. e. 35 e. f. 36 c. X, 4 a. 6 c. 10 b. 12. 13. 14 a. 16 b. 17. 20 b. 24 b. 25 c. 26 c. 30. XI, 8 a. 9 b. 10. 11 b. 15 b. 28 b. 58 a. b. d. 60 b. d. 65 b. c. d. XII, 5. XIII, 13 b. 19. 24 c. 25. 47 b. 48 b. 49 b. c. 50 b. c. 51 b. c. XIV, 1 b. 7 a. d. e. 12. 14. 15. 16. 26 a. b. 27. 28 b. 30 a. b. c. 31 a. b. c. XV, 10-19. 57. 64. XVI, 17-46. 64-66. XVII, 1 a. 2. 86. XVIII, 1-29. 38-43. 45 a. 67 a. XIX, 8 b. XX, 10. 12. 17. 18 b. 19 b. 23 a. b. d. XXI, 29-61. XXII, 3. 4 b. 7. 8. 19 a. 20. 22-34. XXIII, 2 a. c. 4 a c. 8 d (wanted with Halâkhya). 17. 19. 20. 64. XXIV, 1-40. XXV, 1-9. XXVI, 1 c. e. 2 a. XXVII, 45. XXVIII, 1-46 (Mahîdhara specifies the single atichandâṇsi). XXIX, 58-60. XXX, 5-22. XXXV, 1 b. 12. 21 b. XXXVI, 1. 17. 18. 19. 23. XXXVII, 3 a. 4 a. 6. 8. 12 a. c. d. e. 15 b. 18 a. 21 a. b. XXXVIII, 14 g. 16 c. d. 18 b. 23. 25. 28 b. XXXIX, 5. 6. 8-11.

Mahîdhara specifies several times measures under the name of ârshî, so:

ârshî gâyatrî XII, 73. XXIII, 64.
ârshî ushṇih XII, 59.
ârshî anushṭubh XIII, 19.
ârshî bṛihatî XI, 20. XIII, 39.
ârshî paṇkti XII, 60. XXXVII, 4 a + b.
ârshî trishṭubh XVII, 1. XXI, 48. XXVIII, 1. 4. 6. 21. 22. 35. 36.

5. The pratîkâni (beginning words) of the single kaṇḍikâs in the Mâdhyandinîyâ Vâjasaneyi-Saṃhitâ.

añçur añçush ṭe deva somâ V, 7.
añçunâ te añçuḥ pṛicyatâm XX, 27.
añçuç ca me raçmiç ca XVIII, 19.
akran karma karmakṛitas III, 47.
akrandad agni XII, 6. 21. 33.
axann amîmadanta hy III, 51.
axarâjâya kitavam XXX, 18.
agna âyûñshi pavase XIX, 38. XXXV, 16.
agnaye kavyavâhanâya svâhâ II, 29.
agna indra varuṇa mitra XXXIII, 48.
agnaye kuṭarûn XXIV, 23.
agnaye gâyatrâya trivṛite XXIX, 60.
agnaye gṛihapataye svâhâ X, 23.
agnaye tvâ mahyam VII, 47.
agnaye 'nîkavate prathamajân XXIV, 16.
agnaye 'nîkavate rohitâñjir XXIX, 59.
agnaye pîvânam XXX, 21.
agnaye svâhâ somâya svâhâ XXII, 6.
agnaye svâhâ somâya svâhendrâya XXII, 27.
agnâ3i patnîvant VIII, 10.
agnâv agniç carati pravishṭas V, 4.
agniṃ taṃ manye yo vasur XV, 41.
agniṃ dûtaṃ puro dadhe XXII, 17.
agniṃ yunajmi çavasâ XVIII, 51.
agniñ stomena bodhaya XXII, 15.
agniñ hṛidayenâ XXXIX, 8.
agniñ hotâraṃ manye dâsvantam XV, 47.
agniḥ paçur âsît tenâ 'yajanta XXIII, 17.
agniḥ pṛithur dharmaṇas patir X, 29.
agniḥ priyeshu XII, 117.
agnim adya hotâram XXI, 59. XXVIII, 23. 46.
agnir asmi janmanâ XVIII, 66.
agnir ṛishiḥ pavamânaḥ XXVI, 9.
agnir ekâxareṇa IX, 31.
agnir jyotir jyotir agniḥ svâhâ III, 9.
agnir jyotishâ jyotishmân XIII, 40.
agnir devatâ vâto devatâ XIV, 20.
agnir mûrdhâ divaḥ kakut III, 12. XIII, 14. XV, 20.
agnir vṛitrâṇi XXXIII, 9.
agniç ca pṛithivî ca saṃnate XXVI, 1.
agniç ca ma âpaç ca XVIII, 14.
agniç ca ma indraç ca XVIII, 16.
agniç ca me gharmaç ca XVIII, 22.
agnishvâttâḥ pitara eha XIX, 59.
agnishvâttân ṛitumato XIX, 61.
agnis tigmena çocishâ XVII, 16.
agnîshomayor ujjitim anûjjesham II, 15.
agne achâvadeha naḥ IX, 28.
agne aṇgiraḥ çatam XII, 8.
agne gṛihapate sugṛihapatis II, 27.
agne jâtân praṇudâ naḥ sapatnân XV, 1.
agne tam adyâ 'çvaṃ na stomaiḥ XV, 44. XVII, 77.
agne tava çravo vayo XII, 106.
agne tvaṃ no antama uta III, 25. XV, 48. XXV, 47.
agne tvaṃ purîshyo XII, 59.
agne tvañ su jâgṛihi IV, 14.
agne 'dabdhâyo 'çîtama II, 20.
agne divo arṇam XII, 49.
agne naya supathâ V, 36. VII, 43. XL, 16.
agne patnîr ihâvaha XXVI, 20.
agne pavasva svapâ asme VIII, 38.
agne pâvaka rocishâ XVII, 8.
agne prehi prathamo XVII, 69.
agne brahma gṛibhṇîshvâ I, 18.
agne 'bhyâvartin XII, 7.

agne yat te divi varcaḥ XII, 48.
agne yat te çukram XII, 104.
agne yuxvâ hi ye tava XIII, 36.
agner anîkam VIII, 24.
agner janitram asi V, 2.
agner vo 'pannagṛihasya VI, 24.
agne vâjajid vâjam II, 7.
agne vâjasya gomatas XV, 35.
agne vêr hotram II, 9.
agne vratapate vrataṃ carishyâmi I, 5.
agne vratapate vratam acârisham II, 28.
agne vratapâs tve V, 6. 40.
agne çardha mahate saubhagâya XXXIII, 12.
agne sahasva pṛitanâ IX, 37.
agne sahasrâxa çatamûrdhañ XVII, 71.
agnes tanûr asi I, 15. V, 1.
agne svâhâ kṛiṇuhi XXVII, 22.
agneḥ paxatir vâyor nipaxatir XIV, 4.
agre bṛihann ushasâm XII, 13.
agreṇîr asi svâveças VI, 2.
aṇgâny âtman bhishajâ XIX, 93.
aṇgiraso naḥ pitaro XIX, 50.
acikradad vṛishâ XXXVIII, 22.
achâ 'yam eti çavasâ XXVII, 14.
achinnasya te deva VII, 14.
ajasram indum XIII, 43.
ajâ 're piçaṃgilâ XXIII, 56.
ajîjano hi pavamâna sûryam XXII, 18.
ajo hy agner ajanishṭa XIII, 51.
ati niho ati sridho XXVII, 6.
ati viçvâḥ pratishṭhâs XII, 84.
atyanyâñ 2ns agâm V, 42.
atra pitaro mâdayadhvam II, 31.
atrâ te rûpam uttamam XXIX, 18.
athaitân ashṭau virûpân XXX, 22.
adabdhebhiḥ savitaḥ pâyubhish ṭvañ XXXIII, 69. 84.
aditir dyaur aditir XXV, 23.
aditish ṭvâ devî XI, 61.
adityâs tvag asy IV, 30.
adityâs tvâ pṛishṭhe XIV, 5.
adityâs tvâ mûrdhann IV, 22.
adityai rasnâ 'si I, 30.
adityai râsnâsîndrâṇyâ ushṇishaḥ XXXVIII, 3.
adityai râsnâ 'sy XI, 59.
adityai vyundanam asi II, 2.
adṛiçram asya ketavo VIII, 40.
adbhyaḥ xîraṃ vyapibat XIX, 73.
adbhyaḥ sambhṛitaḥ XXXI, 17.
adbhyaḥ svâhâ vârbhyaḥ svâhâ XXII, 25.
adyâ devâ uditâ sûryasya XXXIII, 42.
adhâ yathâ naḥ pitaraḥ XIX, 69.
adhâ hy agne krator bhadrasya XV, 45.
adhi na indraishâm XXXIII, 47.
adhipatny asi bṛihatî dig XV, 14.
adhyavocad adhivaktâ XVI, 5.
adhvaryo adribhiḥ XX, 31.
anaḍvân vayaḥ paṅktiç chandaḥ XIV, 10.
anaḍvâham anvârabhâmahe XXXV, 13.
anâdhṛishṭâ purastâd XXXVII, 12.
anâdhṛishyo jâtavedâs XXVII, 7.
anu te çushmaṃ turayantam XXXIII, 67.
anuttam â te maghavan XXXIII, 79.
anu tvâ mâtâ manyatâm IV, 20.
anu tvâ ratho anu maryo arvann XXIX, 19.
anu no 'dyâ 'numatir XXXIV, 9.
anu vîrair anu pushyâsma XXVI, 19.
anejad ekaṃ manaso XL, 4.
antar agne rucâ tvam XII, 16.
antarâ mitrâvaruṇâ caranti XXIX, 6.
antaç carati rocanâ III, 7.
antas te dyâvâpṛithivî VII, 5.
andhaṃ tamaḥ praviçanti XL, 9. 12.

andha sthâ'ndho vo bhaxîya III, 20.
annapate 'nnasya XI, 83.
annât parisruto rasam XIX, 75.
anyad evâhuḥ sambhavâd XL, 10.
anyad evâhur vidyâyâs XL, 13.
anyavâpo 'rdhamâsânâm XXIV, 37.
anyâ vo anyâm XII, 88.
anv agnir ushasâm XI, 17.
anv id anumate tvam XXXIV, 8.
apaçyaṃ gopâm XXXVII, 17.
apâṃ gambhant XIII, 30.
apâṃ tvemant XIII, 53.
apâṃ pṛishṭham asi XI, 29. XIII, 2.
apâṃ perur asy VI, 10.
apâṃ phenena namuceḥ XIX, 7.
apâñ rasam IX, 3.
apâ 'gham apa kilvisham XXXV, 11.
apâtâm açvinâ gharmaṃ XXXVIII, 13.
apâdhamad abhiçastir XXXIII, 95.
apâm idaṃ nyayanam XVII, 7.
apâ'raruṃ pṛithivyai I, 26.
api teshu trishu padeshv asmi XXIII, 50.
apeta vîta vi ca sarpatâ XII, 45.
apeto yantu paṇayo XXXV, 1.
apo adyâ 'nvacârisham XX, 22.
apo devâ madhumatîr X, 1.
apo devîr upasṛija XI, 38.
apnasvatîm açvinâ XXXIV, 29.
apsv agne sadhish ṭava XII, 36.
apsv antar amṛitam IX, 6.
abodhy agniḥ samidhâ janânâm XV, 24.
abhi gotrâṇi sahasâ XVII, 39.
abhi tyaṃ devañ savitâram IV, 25.
abhi tvâ çûra ṇonumo XXVII, 35.
abhidhâ asi bhuvanam asi XXII, 3.
abhipravanta samaneva XVII, 96.
abhibhûr asy X, 28.
abhi yajnaṃ gṛiṇîhi no XXVI, 21.
abhîmaṃ mahimâ divam XXXVIII, 17.
abhî shu ṇaḥ sakhînâm XXVII, 41. XXXVI, 6.
abhyarshata sushṭutim XVII, 98.
abhyâdadhâmi samidham XX, 24.
abhyâvartasva pṛithivi XII, 103.
abhrir asi nârya asi XI, 10.
amîshâṃ cittaṃ XVII, 44.
amutrabhûyâd adha XXVII, 9.
ameva naḥ suhavâ â hi XXVI, 24.
ayam agniḥ purîshyo III, 40.
ayam agniḥ sahasriṇo XV, 21.
ayam agnir gṛihapatir III, 39.
ayam agnir vîratamo XV, 52.
ayam iha prathamo III, 15. XV, 26. XXXIII, 6.
ayam uttarât samyadvasus XV, 18.
ayam upary arvâgvasus XV, 19.
ayaṃ te yonir ṛitviyo III, 14. XII, 52. XV, 56.
ayaṃ daxiṇâ viçvakarmâ tasya mano XIII, 55.
ayaṃ daxiṇâ viçvakarmâ tasya rathasvanaç ca XV, 16.
ayaṃ no agnir varivas V, 37. VII, 44.
ayaṃ paçcâd viçvavyacâs tasya caxur XIII, 56.
ayaṃ paçcâd viçvavyacâs tasya rathaprotaç ca XV, 17.
ayaṃ puro bhuvas XIII, 54.
ayaṃ puro harikeçaḥ sûryaraçmis XV, 15.
ayaṃ vâṃ mitrâvaruṇâ VII, 9.
ayaṃ venaç VII, 16.
ayañ sahasram ṛishibhiḥ XXXIII, 83.
ayañ so agnir yasmint XII, 47.
artheta stha X, 3.
ardhaṛicair ukthânâñ XIX, 25.
ardhamâsâḥ parûñshi te XXIII, 41.
armebhyo hastipam XXX, 11.

aryamaṇaṃ bṛihaspatim IX, 27.
arvâñco adyâ bhavatâ yajatrâ â vo XXXIII, 51.
avatatya dhanush ṭvaṁ̃ XVI, 13.
avapatantîr avadan XII, 91.
avabhṛitha nicumpuṇa III, 48. VIII, 27.
ava rudram adîmahy III, 58.
avaṣṛishṭâ parâpata XVII, 45.
avir na mesho nasi XIX, 90.
aveshṭâ dandaçûkâḥ X, 10.
avocâma kavaye medhyâya XV, 25.
açmann ûrjam parvate XVII, 1.
açmanvatî rîyate XXXV, 10.
açmâ ca me mṛittikâ ca XVIII, 13.
açyâma taṃ kâmam XVIII, 74.
açvatthe vo nishadanam XII, 79. XXXV, 4.
açvas tûparo XXIV, 1.
açvasya tvâ vṛishṇaḥ çaknâ XXXVII, 9.
açvâvatîṁ̃ somâvatîm XII, 81.
açvâvatîr gomatîr XXXIV, 40.
açvinakṛitasya te XX, 35.
açvinâ gobhir indriyam XX, 73.
açvinâ gharmaṃ pâtaṁ̃ XXXVIII, 12.
açvinâ tejasâ caxuḥ XX, 80.
açvinâ namuceḥ sutam XX, 59.
açvinâ pibatam madha XX, 90.
açvinâ bheshajaṃ madhu XX, 64.
açvinâ havir indriyam XX, 67.
açvibhyâṃ caxur amṛitam XIX, 89.
açvibhyâm pacyasva X, 31.
açvibhyâṃ pinvasva XXXVIII, 4.
açvibhyâm prâtaḥsavanam XIX, 26.
açvo ghṛitena tmanyâ XXIX, 10.
ashâḍhaṃ yutsu pṛitanâm XXXIII, 20.
ashâḍhâ 'si sahamânâ XIII, 26.
ashṭau vyakhyat kakubhaḥ XXXIV, 24.
asaṅkhyâtâ sahasrâṇi XVI, 54.
asave svâhâ vasave svâhâ XXII, 30.
asi yamo asy âdityo XXIX, 14.
asunvantam ayajamânam XII, 62.
asuryâ nâma te lokâs XL, 3.
asau yas tâmro aruṇas XVI, 6.
asau yâ senâ XVII, 47.
asau yo 'vasarpati XVI, 7.
askannam adya devebhya II, 8.
astâvy agnir XII, 29.
asmâkam indraḥ XVII, 43.
asmât tvam adhi jâto 'si XXXV, 22.
asmin mahaty arṇave XVI, 55.
asme rudrâ mehanâ XXXIII, 50.
asme vo astv indriyam IX, 22.
asya pratnâm anu dyutam III, 16.
asyâjarâso damâṃ XXXIII, 1.
asyed indro vâvṛidhe vṛishṇyaṁ̃ XXXIII, 97.
ahaḥ ketunâ jushatâm XXXVII, 21.
ahar ahar aprayâvam XI, 75.
ahâni çam bhavantu naḥ XXXVI, 11.
ahâvy agne havir-âsye te XX, 79.
ahir iva bhogaiḥ XXIX, 51.
ahne pârâvatân XXIV, 25.
ahrutam asi I, 9.
âkûtim agnim XI, 66.
âkûtyai prayuje 'gnaye svâhâ IV, 7.
â kṛishṇena rajasâ XXXIII, 43. XXXIV, 31.
âkrandaya balam ojo XXIX, 56.
âkramya vâjin pṛithivîm XI, 19.
âgatya vâjy adhvânaṁ̃ XI, 18.
â'ganma viçvavedasam III, 38.
âgneyaḥ kṛishṇagrîvaḥ sârasvatî meshî XXIX, 58.
âgrayaṇaç ca me vaiçvadevaç XVIII, 20.
â ghâ ye agnim indhate VII, 32.
âcyâ jânu daxiṇato XIX, 62.
âchac chandaḥ prachac chandaḥ XV, 5.
âjaṅghanti sânv eshâm XXIX, 50.

âjighra kalaçam VIII, 42.
âjuhvâna îḍyo vandyaç câ XXIX, 28.
âjuhvânaḥ supratîkaḥ XVII, 73.
âjuhvânâ sarasvatî XX, 58.
â tam bhaja sauçravaseshv XII, 27.
â tat ta indrâ "yavaḥ panantâ XXXIII, 28.
âtithyarûpam mâsaram XIX, 14.
âtishṭhantam pari viçve XXXIII, 22.
âtishṭha vṛitrahan ratham VIII, 33.
â tû na indra vṛitrahann XXXIII, 65.
â te vatso XII, 115.
âtmane me varcodâ VII, 28.
âtmann upasthe na vṛikasya XIX, 92.
âtmânaṃ te manasâ "râd XXIX, 17.
â tvâ jigharmi XI, 23.
â tvâ 'hârshaṃ XII, 11.
âdityaṃ garbham XIII, 41.
âdityair no bhâratî XXIX, 8.
âdhatta pitaro garbham II, 33.
â na iḍâbhir vidathe XXXIII, 34. 47.
â na indro dûrâd â na âsâd XX, 48.
â na indro haribhir yâtv achâ XX, 49.
â na etu manaḥ punaḥ III, 54.
â nâsatyâ tribhir XXXIV, 47.
â no niyudbhiḥ çatinîbhir XXVII, 28.
â no bhadrâḥ kratavo XXV, 14.
â no mitrâvaruṇâ XXI, 8.
â no yajnaṃ divispṛiçam XXXIII, 85.
â no yajnaṃ bhâratî XXIX, 33.
ântrâṇi sthâlîr madhu XIX, 86.
âpataye tvâ paripataye V, 5.
âpaye svahâ IX, 20.
â pavasva hiraṇyavad VIII, 63.
âpaç cit pipyu staryo no XXXIII, 18.
âpo asmân mâtaraḥ IV, 2.
âpo devîḥ pratigṛibhṇîta XII, 35.
âpo ha yad bṛihatîr XXVII, 25. XXXII, 7.
âpo hi shṭhâ mayobhuvas XI, 50. XXXVI, 14.
âpyâyasva madintama XII, 114.
âpyâyasva sam etu te XII, 112.
â brahman brâhmaṇo brahmavarcasî XXII, 22.
â mandrair-indra haribhiḥ XX, 53.
â mâ vâjasya prasavo IX, 19.
â 'mûr aja XXIX, 57.
â'yaṃ gauḥ pṛiçnir III, 6.
â yad ishe nṛipatim XXXIII, 11.
âyantu naḥ pitaraḥ somyâso XIX, 58.
âyâtam upabhûshatam XXXIII, 88.
âyâtv indro 'vasa upa na iha XX, 47.
âyâsâya svâhâ XXXIX, 11.
âyur me pâhi XIV, 17.
âyur yajnena kalpatâm IX, 21. XVIII, 29. XXII, 33.
âyushmân agne havishâ XXXV, 17.
âyushyaṃ varcasyaṁ̃ XXXIV, 50.
âyosh ṭvâ sadane sâdayâmy XV, 63.
â râtri pârthivaṁ̃ rajaḥ XXXIV, 32.
â rodasî apṛiṇad XXXIII, 75.
â vâco madhyam aruhad XV, 51.
â vâyo bhûsha VII, 7.
âvir maryâḥ X, 9.
â viçvataḥ pratyañcam XI, 24.
â vo devâsa îmahe IV, 5.
âçuḥ çiçâno XVII, 33.
âçus tivṛid bhântaḥ paṇcadaço XIV, 23.
âçrâvayeti stotriyâḥ XIX, 24.
âsandi rûpaṁ̃ râjâsandyai XIX, 16.
âsînâso aruṇînâm XIX, 63.
â sute siñcata çriyaṁ̃ XXXIII, 21.
â sushvayantî yajate XXIX, 31.
â 'ham pitṛînt XIX, 56.
ichanti tvâ somyâsaḥ XXXIV, 18.
iḍa ehy adita ehi III, 27. XXXVIII, 2.
iḍâbhir agnir îḍyaḥ XXI, 14.

iḍâbhir bhaxân âpnoti XIX, 29.
iḍâm agne purudaṅsaṁ XII, 51.
iḍâyâs tvâ pade vayam XXXIV, 15.
iḍe rante havye VIII, 43.
idam âpaḥ pravahatâ VI, 17.
idam uttarât svas XIII, 57.
idaṃ pitṛibhyo namo 'stv adya XIX, 68.
idaṃ me brahma ca XXXII, 16.
idaṃ vishṇur vicakrame V, 15.
idaṁ haviḥ prajananaṃ me astu IX XVII, 48.
indur daxaḥ çyenas XVIII, 53.
indra âsâṃ netâ XVII, 40.
indraṃ duraḥ kavashyo XX, 40.
indraṃ daivîr viço maruto XVII, 86.
indraṃ viçvâ aviṣṛidhant XII, 56. XV, 61. XVII, 61.
indraḥ sutrâmâ svavâṅ XX, 51.
indraḥ sutrâmâ hṛidayena XIX, 85.
indra gomann ihâyâhi XXVI, 4.
indraghoshas tvâ vasubhiḥ V, 11.
indra marutva iha pâhi VII, 35.
indram id dharî vahato VIII, 35.
indravâyû ime sutâ VII, 8. XXXIII, 56.
indravâyû bṛihaspatim XXXIII, 45.
indravâyû susaṃdṛiçâ XXXIII, 86.
indraç ca marutaç ca VIII, 55.
indraç ca samrâḍ VIII, 37.
indrasya kroḍo XXV, 8.
indrasya rûpam ṛishabho XIX, 91.
indrasya vajro marutâm XXIX, 54.
indrasya vajro 'si IX, 5. X, 21.
indrasya vṛishṇo XVII, 41.
indrasya syûr asi V, 30.
indrasyauja stha XXXVII, 6.
indrâgnî apâd iyam XXXIII, 93.
indrâgnî avyathamânâm XIV, 11.
indrâgnî âgataṁ sutam VII, 31.
indrâgnî mitrâvaruṇâ XXXIII, 49.
indrâgnyoḥ paxatiḥ XXV, 5.
indrâya tvâ vasumate VI, 32. XXXVIII, 8.
indrâ 'yâhi citrabhâno XX, 87.
indrâyâhi tûtujâna XX, 89.
indrâyâhi dhiyeshito XX, 88.
indrâ 'yâhi vṛitrahan pibâ XXVI, 5.
indrâyenduṁ sarasvatî XX, 57.
indremaṃ pratarâṃ XVII, 51.
indrehi matsy andhaso XXXIII, 25.
indro viçvasya râjati XXXVI, 8.
indro vṛitram avṛiṇochardhanîtiḥ XXXIII, 26.
indhânâs tvâ çataṁ himâs III, 18.
iyaṃ tu yajniyâ tanûr IV, 13.
iyaṃ vediḥ paro antaḥ pṛithivyâḥ XXIII, 62.
iyaty agra âsîn makhasya XXXVII, 5.
iyad asy âyur X, 25.
iyam upari matis XIII, 58.
irajyann agne XII, 109.
irâvatî dhenumatî V, 16.
imaṃ jîvebhyaḥ paridhiṃ XXXV, 15.
imaṃ devâ asapatnam IX, 40. X, 18.
imaṃ no deva savitar XI, 8.
imaṃ mâ hiṅsîr ekaçapham XIII, 48.
imaṃ mâ hiṅsîr dvipâdam XIII, 47.
imaṃ me varuṇa XXI, 1.
imaṁ sâhasraṁ çatadhâram XIII, 49.
imaṁ stanam ûrjasvantam XVII, 87.
imam ûrṇâyum XIII, 50.
imâ u tvâ purûvaso XXXIII, 81.
imâṃ te dhiyaṃ prabhare. maho XXXIII, 29.
imâ gira âdityebhyo ghṛitasnûḥ XXXIV, 54.
imâ te vâjinn avamârjanâni XXIX, 16.
imâ nu kam bhuvanâ XXV, 46.
imâm agṛibhṇan raçanâm XXII, 2.

imâ me agna ishṭakâ dhenavaḥ XVII, 2.
imâ rudrâya tavase XVI, 48.
imau te paxâv ajarau XVIII, 52.
isham ûrjam aham ita âdam XII, 105.
ishaç corjaç ca XIV, 16.
ishiro viçvavyacâs XVIII, 41.
ishe tvorje tvâ I, 1.
ishe pinvasvorje pinvasva XXXVIII, 14.
ishe râye ramasva XIII, 35.
ishkartâram adhvarasya XII, 110.
ishkṛitir nâma vo mâtâ XII, 83.
ishṭo agnir âhutaḥ XVIII, 57.
ishṭo yajno bhṛigubhir XVIII, 56.
iha ratir iha ramadhvam VIII, 51.
ihaivâgne adhi XXVII, 4.
îḍito devair harivâñ XX, 38.
îḍṛixâsa etâḍṛixâsa û shu ṇaḥ XVII, 84.
îḍṛiṅg câ'nyâḍṛiṅg ca XVII, 81.
îḍyâç câsi vandyaç ca vâjinn XXIX, 3.
îrmântâsaḥ silikamadhyamâsaḥ XXIX, 21.
îçânâya parasvatas XXIV, 28.
îçâ vâsyam XL, 1.
uchushmâ oshadhînâm XII, 82.
uta no 'hir budhnyaḥ XXXIV, 53.
uta smâ 'sya dravatas IX, 15.
utedânîm bhagavantaḥ XXXIV, 37.
utkrâma mahate saubhagâya XI, 21.
uttamâyâm ava bharâ XXXIV, 14.
uttishṭhann ojasâ saha VIII, 39.
uttishṭha brahmaṇaspate XXXIV, 56.
utthâya bṛihatî XI, 64.
utsakthyâ ava gudaṃ dehi XXIII, 21.
utsâdebhyaḥ kubjam XXX, 10.
uktâḥ saṃcarâ etâ aindrâgnâḥ XXIV, 15. 17.
uktâḥ saṃcarâḥ etâḥ çunâsîrîyâḥ XXIV, 19.
ukthebhir vṛitrahantamâ XXXIII, 76.
ukṣhâṃ kṛiṇotu çaktyâ XI, 57.
uxâ samudro aruṇaḥ XVII, 60.
ugraṃ lohitena XXXIX, 9.
ugraç ca bhîmaç ca (XVII, 86). XXXIX, 7.
ugras tveshanṛimṇaḥ XXXIII, 80.
ugrâ vighaninâ mṛidhas XXXIII, 61.
uccâ te jâtam andhaso XXVI, 16.
ud akramîd draviṇodâs XI, 22.
ud agne tishṭha praty â tanushva XIII, 12.
udîcîm ârohâ X, 13.
udîratâm avara ut XIX, 49.
ud u tishṭha XI, 41.
ud uttamaṃ varuṇasya XII, 12.
ud u tyaṃ jâtavedasam VII, 41. VIII, 41. XXXIII, 31.
ud u tvâ viçve devâ agne XII, 31. XVII, 53.
ud enam uttarâṃ XVII, 50.
ud eshâṃ bâhû XI, 82.
udgrâbhaṃ ca nigrâbhaṃ ca XVII, 64.
ud divaṁ stabhânâ V, 27.
uddharshaya maghavann XVII, 42.
udbudhyasvâgne pratijâgṛihi XV, 54. XVIII, 61.
ud vayaṃ tamasas pari XX, 21. XXVII, 10. XXXV, 14. XXXVIII, 24.
unnata ṛishabho vâmanas XXIV, 7.
upa jmann upa vetase XVII, 6.
upa tvâ 'gne havishmatîr III, 4.
upa naḥ sûnavo giraḥ XXXIII, 77.
upaprayanto adhvaram III, 11.
upa prâgâchasanaṃ vâjy XXIX, 23.
upa prâgât paramaṃ yat sadhastham XXIX, 24.
upa prâgât suman me 'dhâyi XXV, 30.
upayâmagṛihîto 'si dhruvo 'si VII, 25.
upay.'si prajâpataye XXIII, 2. 4.

upay.'si bṛihaspatisutasya VIII, 9.
upay.'si madhave tvop. VII, 30.
upay.'si sâvitro 'si VIII, 7.
upay.'si suçarmâ 'si VIII, 8.
upay.'si harir asi VIII, 11.
upay.'sindrâya tvâ VII, 22.
upay.'sy agnaye tvâ VIII, 47.
upay.'sy antar VII, 4.
upay.'sy açvibhyâṃ tvâ XX, 33.
upay.'sy âgrayaṇo 'si VII, 20.
upay.'sy âdityebhyas tvâ VIII, 1.
upay.'sy âçvinaṃ tejaḥ XIX, 8.
upaçvâsaya pṛithivîm XXIX, 55.
upahûtâ iha gâvas III, 43.
upahûtâḥ pitaraḥ somyâso XIX, 57.
upahûto dyaush pitopa II, 11.
upahvare girîṇâm XXVI, 15.
upâvasṛija tmanyâ XXIX, 35.
upâvîr asy upa VI, 7.
upâsmai gâyatâ naras XXXIII, 62.
ubhâ pibatam açvinobhâ XXXIV, 28.
ubhâbhyâṃ deva savitaḥ XIX, 43.
ubhâ vâm indrâgnî âhuvadhyai III, 13.
ubhe suçcandra sarpisho XV, 43.
uçantas tvâ nidhîmahy XIX, 70.
uru vishṇo vikramasvoru V, 38. 41.
uçik tvam deva somâ VIII, 50.
uçik pâvako XII, 24.
uçig asi kavir V, 32.
ushas tac citram âbharâ XXXIV, 33.
ushâsânaktam açvinâ XX, 61.
ushâsânaktâ bṛihatî XX, 41.
ushe yahvî supeçasâ XXI, 17.
usrâv etaṃ dhûrshâhau IV, 33.
ûrk ca me sûnṛitâ ca XVIII, 9.
ûrg asy âṇgirasy IV, 10.
ûrjaṃ vahantîr II, 34.
ûrjo napâj XII, 108.
ûrjo napâtaṁ̃ sa hinâ 'yam XXVII, 44.
ûrdhva û shu ṇa ûtaye XI, 42.
ûrdhvaṃ enam uchrayatât XXIII, 27.
ûrdhvâm enâm uchrâpaya XXIII, 26.
ûrdhvâ asya samidho bhavanty XXVII, 11.
ûrdhvâm âroha X, 14.
ûrdhvo bhava prati XIII, 13.
ṛiksâmayoḥ çilpe IV, 9.
ṛicaṃ vâcaṃ prapadye XXXVI, 1.
ṛice tvâ ruce tvâ XIII, 39.
ṛico nâmâ 'smi yajûṁ̃shi XVIII, 67.
ṛijave tvâ sâdhave tvâ XXXVII, 10.
ṛijîte parivṛiṅgdhi no XXIX, 49.
ṛitaṃ ca me 'mṛitaṃ ca XVIII, 6.
ṛitaṁ̃ satyam XI, 47.
ṛitajic ca satyajic ca XVII, 83.
ṛitaye stenahṛidayam XXX, 13.
ṛitavas ta ṛitusthâ parva XXIII, 40.
ṛitavas te yajnaṃ vitanvantu XXVI, 14.
ṛitava stha ṛitâvṛidhas XVII, 3.
ṛitaç ca satyaç ca XVII, 82.
ṛitâvânaṃ mahisham XII, 111.
ṛitâvânaṃ vaiçvânaram XXVI, 6.
ṛitâshâḍ ṛitadhâmâ XVIII, 38.
ṛituthendro vanaspatiḥ XX, 65.
ṛidhag itthâ sa martyaḥ XXXIII, 87.
ekayâ ca daçabhiç ca svabhûte XXVII, 33.
ekayâ 'stuvata prajâ adhîyanta XIV, 28.
ekas tvashṭur açvasyâ viçastâ XXV, 42.
ekasmai svâhâ XXII, 34.
ekâ ca me tisraç ca XVIII, 24.
ejatu daçamâsyo VIII, 28.
eṇy ahno maṇḍûko XXIV, 36.
etaṃ jânâtha parame XVIII, 60.
etaṃ te deva savitar II, 12.
etaṁ̃ sadhastha pari te XVIII, 59.
etat te rudrâ 'vasam III, 61.
etâ arshanti hṛidyât XVII, 93.

etâ u vaḥ subhagâ viçvarûpâs XXIX, 5.
etâ aindrâgnâ dvirûpâ XXIV, 8.
etâvad rûpaṃ yajnasya XIX, 31.
etâvân asya mahimâ XXXI, 3.
edam aganma devayajanam IV, 1.
edho 'sy edhishîmahi (XIX, 9). XX, 23. XXXVIII, 25.
enâ viçvâny arya â XXVI, 18.
enâ vo agniṃ namasorjo XV, 32.
ebhir no arkair bhavâ no arvâñg XV, 46.
evaç chando varivaç chandaç XV, 4.
eved indraṃ vṛishaṇam XX, 54.
esha châgaḥ puro açvena XXV, 26.
esha te gâyatro bhâgas IV, 24.
esha te niṛṛite bhâgas IX, 35.
esha te rudra bhâgaḥ III, 57.
esha va stomo maruta iyaṃ gîr XXXIV, 48.
esha sya vâji IX, 14.
eshâ te agne samit II, 14.
eshâ te çukra tanûr IV, 17.
eshâ vaḥ sâ satyâ saṃvâg IX, 12.
esho ha devaḥ pradiço 'nu sarvâḥ XXXII, 4.
ehy û shu bravâṇi te XXVI, 13.
aindraḥ prâṇo VI, 20.
ojaç ca me sahaç ca XVIII, 3.
omâsaç carshaṇîdhṛito VII, 33.
oshadhayaḥ pratigṛibhṇîta XI, 48.
oshadhayaḥ samavadanta XII, 96.
oshadhîḥ pratimodadhvam XII, 77.
oshadhîr iti mâtaras XII, 78.
kaḥ svid ekâkî carati XXIII, 9. 45.
kakubhaṁ rûpam VIII, 49.
katy asya vishṭhâḥ katy XXIII, 57.
kadâ cana prayuchasy VIII, 3.
kadâ cana starîr asi III, 34. VIII, 2.
kanyâ iva vahatum etavâ u XVII, 97.
kayâ tvaṃ na ûtyâ XXXVI, 7.
kayâ naç citra âbhuvad XXVII, 39. XXXVI, 4.
kalpantâṃ te diças tubhyam XXXV, 9.
kavashyo na vyacasvatîr XX, 60. (differing from) XXI, 34.
kas tvâchyati XXIII, 39.
kas tvâ yunakti I, 6.
kas tvâ vimuñcati II, 23.
kas tvâ satyo madânâm XXVII, 40. XXXVI, 5.
kâ îm are piçaṃgilâ XXIII, 55.
kâṇḍât kâṇḍât prarohantî XIII, 20.
kâmaṃ kâmadughe XII, 72.
kâya svâhâ kasmai svâhâ XXII, 20.
kârshir asi VI, 28.
kâvyayor âjâneshu XXXIII, 72.
kâ svid âsît pûrvacittiḥ XXIII, 11. 53.
kiṁ svit sûryasamaṃ jyotiḥ XXIII, 47.
kiṁ svid âsîd adhishṭhânam XVII, 18.
kiṁ svid vanaṃ ka u sa vṛixa âsa XVII, 20.
kukkuṭo 'si madhujihvaḥ I, 16.
kutas tvam indra mâhinaḥ XXXIII, 27.
kumbho vanishṭhur XIX, 87.
kurvann eveha karmâṇi XL, 2.
kulâyinî ghṛitavatî XIV, 2.
kuvid 'aṅga yavamanto X, 32. XIX, 6. XXIII, 38.
kṛiṇushva pâjaḥ prasitim XIII, 9.
kṛishṇagrîvâ âgneyâḥ XXIV, 6. 9. 14.
kṛishṇâ bhaumâs XXIV, 10.
kṛishṇo 'sy âkhareshṭho II, 1.
ketuṃ kriṇvann aketave XXIX, 37.
keshv antaḥ purusha âviveça XXIII, 51.
ko asya veda bhuvanasya nâbhim XXIII, 59.
ko 'dât kasmâ adât VII, 48.
ko 'si katamo 'si VII, 29. (differing from) XX, 4.

kramadhvam agninâ nâkam XVII, 65.
kravyâdam agniṃ prahiṇomi XXXV, 19.
xatrasya tvâ paraspâya XXXVIII, 19.
xatrasya yonir asi (X, 8). XX, 1.
xatrasyolvam asi X, 8.
xatreṇâgne svâyuḥ XXVII, 5.
xapo râjann uta tmanâ XV, 37.
khaṇgo vaiçvadevaḥ XXIV, 40.
gaṇânâṃ tvâ gaṇapatim XXIII, 19.
gandharvas tvâ viçvâvasuḥ II, 3.
garbho asy oshadhînâm XII, 37.
garbho devânâṃ pitâ matînâm XXXVII, 14.
gâyatraṃ chando 'si XXXVIII, 6.
gâyatrî trishṭub jagaty XXIII, 33.
gâyatreṇa tvâ chandasâ parigṛihṇâmi I, 27.
gâva upâvatâ'vatam XXXIII, 19. 71.
gṛihâ mâ bibhîta III, 41.
gotrabhidaṃ govidaṃ XVII, 38.
gobhir na somam açvinâ XX, 66.
gomad û shu ṇâsatyâ XX, 81.
grahâ ûrjâhutayo IX, 4.
grîshmeṇa ṛitunâ XXI, 24.
gharmaitat te purîsham XXXVIII, 21.
ghṛitaṃ ghṛitapâvânaḥ VI, 19.
ghṛitaṃ mimixe XVII, 88.
ghṛitavatî bhuvanânâm XXXIV, 45.
ghṛitâcî stho dhuryau II, 19.
ghṛitâcy asi juhûr nâmnâ II, 6.
ghṛitena sîtâ madhunâ XII, 70.
ghṛitenâktau VI, 11.
ghṛitenâñjant sam patho XXIX, 2.
caxushaḥ pitâ manasâ XVII, 25.
catasraç ca me 'shṭau ca XVIII, 25.
catuḥsraktir nâbhir XXXVIII, 20.
catustriñçat tantavo VIII, 61.
catustriñçad vâjino XXV, 41.
catvâri çṛiṇgâ trayo XVII, 91.
candramâ apsv antar XXXIII, 90.
candramâ manaso jâtaç XXXI, 12.
cittiṃ juhomi manasâ ghṛitena XVII, 78.
citpatir mâ punâtu IV, 4.
citraṃ devânâm udagâd VII, 42. XIII, 46.
cid asi tayâ devatayâ XII, 53.
cid asi manâ 'si IV, 19.
codayitrî sûnṛitânâm XX, 85.
janayatyai tvâ I, 22.
janasya gopâ ajanishṭa jâgṛivir XV, 27.
janishṭhâ ugraḥ sahase XXXIII, 64.
javo yas te vâjin IX, 9.
jihvâ me bhadram XX, 6.
jîmûtasyeva bhavati XXIX, 38.
jushâṇo barhir harivân XX, 39.
jyaishṭhyaṃ ca ma âdhipatyam XVII, 4.
jyotir asi viçvarûpam V, 35.
taṃ patnîbhir anugachema devâḥ XV, 50.
taṃ pratnathâ VII, 12.
taṃ tvâ yâmi brahmaṇâ XVIII, 49. XXI, 2.
taṃ tvâ çocishṭha dîdivas III, 26.
taṃ tvâ samidbhir III, 3.
taṃ yajnaṃ barhishi prauxan XXXI, 9.
taṃ vo dasmam ṛitîshaham XXVI, 11.
tac caxur devahitam XXXVI, 24.
tato virâḍ ajâyata XXXI, 5.
tat savitur vareṇyam III, 35. XXII, 9. XXX, 2. XXXVI, 3.
tat sûryasya devatvam XXXIII, 37.
tad açvinâ bhishajâ XIX, 82.
tad asya rûpam amṛitaṃ̃ XIX, 81.
tad id âsa bhuvaneshu XXXIII, 80.
tad ejati tan naijati XL, 5.
tad evâgnis tad âdityas XXXII, 1.
tad viprâso vipanyavo XXXIV, 44.
tad vishṇoḥ paramam VI, 5.

tanûnapâchucivratas XXI, 13.
tanûnapât patha ṛitasya yânân XXIX, 26.
tanûnapâd asuro XXVII, 12.
tanûpâ agne 'si III, 17.
tanûpâ bhishajâ sute XX, 56.
tantunâ râyas posheṇa râyas posham jinva XV, 7.
tan nas turîpam adbhutam XXVII, 20.
tan no vâto mayobhu XXV, 17.
tan mitrasya varuṇasyâ 'bhicaxe XXXIII, 38.
tapaç ca tapasyaç ca XV, 57.
tapase kaulâlam XXX, 7.
tapase svâhâ tapyate svâhâ XXXIX, 12.
taptâyanî me 'si V, 9.
tam id garbham prathamam XVII, 30.
tam indram paçavaḥ XX, 69.
tam îçânaṃ jagatas XXV, 18.
tam u tvâ dadhyañg XI, 33.
tam u tvâ pâthyo vṛishâ XI, 34.
taraṇir viçvadarçato XXXIII, 36.
tava bhramâsa âçuyâ XIII, 10.
tava vâyav ṛitas pate XXVII, 34.
tava çarîraṃ patayishṇav XXIX, 22.
tavâ 'yaṁ somas tvam ehy XXVI, 23.
tasmâ araṃ gamâma vo XI, 52. XXXVI, 16.
tasmâd açvâ ajâyanta XXXI, 8.
tasmâd yajnât sarvahutaḥ ṛicaḥ sâmâni XXXI, 7.
t. y. s. sambhṛitam XXXI, 6.
tasya vayaṁ sumatau XX, 52.
tasyâs te satyasavasaḥ IV, 18.
tâ asya sûdadohasaḥ XII, 55. XV, 60.
tâ ubhau caturaḥ padaḥ XXIII, 20.
tâṁ savitur vareṇyasya XVII, 74.
tâ na âvoḍham açvinâ XX, 83.
tâ nâsatyâ supeçasâ XX, 74.
tân pûrvayâ nividâ XXV, 16.
tâ bhishajâ sukarmaṇâ XX, 75.
tiraçcîno vitato XXXIII, 74.
tisra iḍâ sarasvatî XXI, 19.
tisras tredhâ sarasvaty XX, 63.
tisro devîr barhir edaṁ XXVII, 19.
tisro devîr havishâ vardhamânâs XX, 43.
tîvrân ghoshân kṛiṇvate XXIX, 44.
tubhyaṃ tâ aṇgirastama XII, 116.
te asya yoshaṇe divye XXVII, 17.
te âcarantî samaneva yoshâ XXIX, 41.
te âyajanta draviṇaṁ XVII, 28.
tejaḥ paçûnâṁ havir XIX, 95.
tejo'si tejo mayi dhehi XIX, 9.
tejo'si çukram amṛitam XXII, 1.
te no arvanto IX, 17.
te hi putrâso aditeḥ III, 33.
trayâ devâ ekâdaça XX, 11.
trâtâram indram avitâram XX, 50.
triñçad dhâma virâjati III, 8.
tridhâ hitam paṇibhir XVII, 92.
tripâd ûrdhva udait XXXI, 4.
trivṛid asi trivṛite tvâ XV, 9.
triṇi ta âhur divi bandhanâni XXIX, 15.
triṇi padâ vicakrame XXXIV, 43.
triṇi çatâ trî sahasrâṇy XXXIII, 7.
trînt samudrânt XIII, 31.
tryambakaṃ yajâmahe III, 60.
tryavayo gâyatryai XXIV, 12.
tryaviç ca me tryavî ca XVIII, 26.
tryâyushaṃ jamadagneḥ III, 62.
tvam agna îḍitaḥ kavyavâhanâ XIX, 66.
tvam agne dyubhis XI, 27.
tvam agne prathamo aṇgirâs XXXIV, 12.
tvam agne vratapâ asi IV, 16.
tvam aṇga praçaṁsisho VI, 37.
tvam indra pratûrtishv XXX, 66.
tvam imâ oshadhîḥ XXXIV, 22.
tvam uttamâ 'sy oshadhe XII, 101.

tvaṃ no agne tava deva XXXIV, 13.
tvaṃ no agne varuṇasya XXI, 3.
tvaṃ yavishṭha dâçusho XIII, 52. XVIII, 77.
tvañ soma pitṛibhiḥ XIX, 54.
tvañ soma pracikito XIX, 52.
tvayâ hi naḥ pitaraḥ XIX, 53.
tvashṭâ turîpo adbhutas XXI, 20.
tvashṭâ dadhachushmam XX, 44.
tvashṭâ vîraṃ devakâmam XXIX, 9.
tvâm agne aṅgiraso guhâ hitam XV, 28.
tvâm agne pushkarâd adhy XV, 22.
tvâm agne yajamânâ anu dyûn XII, 28.
tvâm agne vṛiṇate XXVII, 3.
tvâm adya ṛishe ârsheya ṛishîṇâm XXI, 61.
tvâm id dhi havâmahe XXVII, 37.
tvâṃ gandharvâ akhanañs XII, 98.
tvâm citraçravastama XV, 31.
tvâñ hi mandratamam XXXIII, 13.
tve agne svâhuta XXXIII, 14.
dañshṭrâbhyâṃ malimlûn XI, 78.
daxiṇâm âroha X, 11.
dadhikrâvṇo akârisham XXIII, 32.
dasrâ yuvâkavaḥ sutâ XXXIII, 58.
digbhyaḥ svâhâ candrâya svâhâ XXXIX, 2.
divaḥ pṛithivyâḥ pary ojas XXIX, 53.
divas pari prathamam XII, 18.
divi dhâ imaṃ yajnam XXXVIII, 11.
divi pṛishṭo arocata XXXIII, 92.
divi vishṇur vyakramîsta II, 25.
divo mûrdhâ 'si pṛithivyâ nâbhir XVIII, 54.
divo vâ vishṇa uta vâ V, 19.
dîxâyai rûpañ çashpâni XIX, 13.
dîrghâyus ta oshadhe XII, 100.
duro devîr diço mahîr XXI, 16.
dṛiñhasva devi XI, 69.
dṛite dṛiñha mâ jyok XXXVI, 19.
dṛite dṛiñha mâ mitrasya XXXVI, 18.
dṛiçâno rukma urvyâ XII, 1. 25.
dṛishṭvâ parisruto rasañ XIX, 79.
dṛishṭvâ rûpe vyâkarot XIX, 77.
deva indro narâçañsas XXI, 55. XXVIII, 19.
devaṃ devaṃ vo 'vase XXXIII, 91.
devaṃ barhiḥ sarasvatî sudevam XXI, 48.
devaṃ barhir indrañ sudevam XXVIII, 12.
devaṃ barhir vayodhasam XXVIII, 35.
devaṃ barhir vâritînâm XXI, 57.
devaṃ barhir vâritînâṃ devam indram XXVIII, 21.
devaṃ barhir vâritînâṃ devam indraṃ vayodhasam XXVIII, 44.
devakṛitasyainaso VIII, 13.
devaçrutau deveshv âghoshatam V, 17.
deva savitaḥ prasuva yajnam IX, 1. XI, 7. XXX, 1.
deva savitar esha te V, 39.
devas tvâ savitodvapatu XI, 63.
devasya cetato mahîm XXII, 11.
devasya tvâ savituḥ prasave I, 10. 21. 24. V, 22. 26. VI, 1. 9. 30. IX, 30. 38. XI, 9. 28. XVIII, 37. XX, 3. XXVII, 9. XXXVIII, 1.
devasya savitur matim XXII, 14.
devasyâhañ savituḥ save IX, 10. 13.
devahûr yajna â ca vaxat XVII, 62.
devâ gâtuvido VIII, 21.
devâ devânâṃ bhishajâ hotârâv XXI, 53.
devâ daivyâ hotârâ devam indram XXVIII, 17.
devâ daivyâ hotârâ devam indraṃ vayodhasam XXVIII, 40.
devânâṃ bhadrâ sumatir XXV, 15.

devân divam agan yajnas VIII, 60.
devâ yajnam atanvata XIX, 12.
devâso hi shmâ manave XXXIII, 94.
devî ushâsânaktâ devam indraṃ vayodhasam XXVIII, 37.
devî ushâsânaktendram XXVIII, 14.
devî ushâsâv açvinâ sutrâmendre XXI, 50.
devî ûrjâhutî dughe XXI, 52. XXVIII, 16. 39.
devî joshṭrî vasudhitî devam indram XXVIII, 15. 38.
devî joshṭrî sarasvaty XXI, 51.
devî dyâvâpṛithivî XXXVII, 3.
devîr âpa esha vo garbhas VIII, 26.
devîr âpaḥ çuddhâ voḍhvam VI, 13.
devîr âpo apâṃ napâd VI, 27.
devîr dvâra indraṁ XXVIII, 13.
devîr dvâro açvinâ bhishajendre XXI, 49.
devîr dvâro vayodhasam XXVIII, 36.
devîs tisras tisro devîḥ patim indram XXVIII, 18.
devîs tisras tisro devîr XXI, 54. XXVIII, 41.
devena no manasâ XXXIV, 23.
devebhyo hi prathamaṃ yajniyebhyo XXXIII, 54.
devo agniḥ svishṭakṛid XXI, 58.
devo agniḥ svishṭakṛid devam indram XXVIII, 22.
devo agniḥ svishṭakṛid devam indraṃ vayodhasam XXVIII, 45.
devo devair vanaspatir XXI, 56. XXVIII, 20.
devo narâçaṅso devam indraṃ vayodhasam XXVIII, 42.
devo vanaspatir devam indraṃ vayodhasam XXVIII, 43.
devyo vamryo XXXVII, 4.
dehi me dadâmi te III, 50.
daivyâ adhvaryavas tvâ XXIII, 42.
daivyâ mimânâ manushaḥ XX, 42.
daivyâya dhartre XVII, 56.
daivyâv adhvaryû âgataṁ XXXIII, 33. 73.
daivyâ hotârâ ûrdhvam adhvaraṃ no XXVII, 18.
daivyâ hotârâ prathamâ XXIX, 32.
daivyâ hotârâ bhishajendreṇa XXI, 18.
dyâṃ mâ lekhîr V, 43.
dyubhir aktubhiḥ paripâtam XXXIV, 30.
dyauḥ çântir antarixaṁ çântiḥ XXXVI, 17.
dyaur âsît pûrvacittiḥ XXIII, 12. 54.
dyaus te pṛithivy antarixam XXIII, 43.
dyaus te pṛishṭham XI, 20.
drapsaç caskanda XIII, 5.
draviṇodâḥ pipîshati XXVI, 22.
drâpe andhasaspate XVI, 47.
drupadâd iva mumucânaḥ XX, 20.
drvannaḥ sarpirâsutiḥ XI, 70.
dvâro devîr anv asya XXVII, 16.
dvipadâ yâç catushpadâs XXIII, 34.
dve virûpe carataḥ XXXII, 5.
dve sṛitî açṛiṇavam XIX, 47.
dhanvanâ gâ dhanvanâjiṃ XXIX, 39.
dhartâ divo vibhâti XXXVII, 16.
dhâtâ râtiḥ VIII, 17.
dhânâḥ karambhaḥ saktavaḥ XIX, 21.
dhânânâṁ rûpaṃ kuvalam XIX, 22.
dhânâvantaṃ karambhiṇam XX, 29.
dhânyam asi I, 20.
dhâmachad agnir XVIII, 76.
dhâman te viçvam bhuvanam XVII, 99.
dhûmrân vasantâyâlabhate XXIV, 11.
dhûmrâ babhrunikâçâḥ XXIV, 18.

dhûr asi dhûrva I, 8.
dhṛishṭir asi I, 17.
dhruvaxitir dhruvayonir XIV, 1.
dhruvasadaṃ tvâ IX, 2.
dhruvâ 'si dharuṇâ XIII, 16.
dhruvâ 'si dharuṇeto jajne XIII, 34.
dhruvâ 'si dhruvo 'yam V, 28.
dhruvo 'si pṛithivîm V, 13.
naktoshâsâ samanasâ XII, 2. XVII, 70.
naxatrebhyaḥ svâhâ XXII, 28.
na taṃ vidâtha ya imâ jajânâ XVII, 31.
na tad raxâṅsi na piçâcâs XXXIV, 51.
na tasya pratimâ asti XXXII, 3.
na te dûre paramâ cid XXXIV, 19.
na tvâvâṅ ३॥ anyo divyo XXVII, 36.
nadîbhyaḥ pauñjishṭham XXX, 8.
nabhaç ca nabhasyaç ca XIV, 15.
nama âçave câjirâya ca XVI, 31.
nama ushṇîshiṇe giricarâya XVI, 22.
namaḥ kapardine ca XVI, 29.
namaḥ kûpyâya ca XVI, 38.
namaḥ kṛitsnâyatayâ dhâvate XVI, 20.
namaḥ parṇâya ca XVI, 46.
namaḥ pâryâya câvâryâya XVI, 42.
namaḥ çaṃgave ca XVI, 40.
namaḥ çambhavâya ca XVI, 41.
namaḥ çushkyâyaca XVI, 45.
namaḥ çvabhyaḥ XVI, 28.
namaḥ sabhâbhyaḥ XVI, 24.
namaḥ sikatyâya ca XVI, 43.
namaḥ su te nirṛite XII, 63.
namaḥ senâbhyaḥ XVI, 26.
namaḥ sobhyâya ca XVI, 33.
namaḥ srutyâya ca XVI, 37.
namas ta âyudhâyâ XVI, 14.
namas taxabhyo XVI, 27.
namas te astu vidyute XXXVI, 21.
namas te rudra manyave XVI, 1.
namas te harase çocishe XVII, 11. XXXVI, 20.
namo gaṇebhyo XVI, 25.
namo jyeshṭhâya ca XVI, 32.
namo dhṛishṇave ca XVI, 36.
namo babhluçâya vyâdhine XVI, 18.
namo bilmine ca XVI, 35.
namo mitrasya varuṇasya IV, 35.
namo rohitâya sthapataye XVI, 19.
namo vaḥ pitaro rasâya II, 32.
namo vaṅcate parivaṅcate XVI, 21.
namo vanyâya ca XVI, 34.
namo vâtyâya ca XVI, 39.
namo visṛijadbhyo XVI, 23.
namo vrajyâya ca XVI, 44.
namo 'stu nîlagrîvâya XVI, 8.
n. 'stu rudrebhyo ye 'ntarixe XVI, 65.
n. 'stu r. ye divi XVI, 64.
n. 'stu r. ye pṛithivyâm XVI, 66.
namo 'stu sarpebhyo XIII, 6.
namo hiraṇyabâhave senânye XVI, 17.
namo hrasvâya ca XVI, 30.
na yât paro nântaras XX, 82.
narâçaṅsaḥ prati çûro XX, 37.
narâçaṅsasya mahimânam XXIX, 27.
narmâya puñçcalûṅ XXX, 20.
navadaçabhir astuvata çûdrâryâv asṛijyetâm XIV, 30.
navabhir astuvata pitaro 'sṛijyanta XIV, 29.
navaviñçatyâ 'stuvata vanaspatayo 'sṛijyanta XIV, 31.
na vâ u etan mriyase XXIII, 16. XXV, 44 (different in the second hemistich).
na hi teshâm amâ cana III, 32.
na hi spaçam avidann XXXIII, 60.
nânâ hi vâm devahitaṅ XIX, 7.
nâbhâ pṛithivyâḥ XI, 76.
nâbhir me cittam XX, 9.

nâbhyâ âsîd antarixaṁ XXXI, 13.
nâryas te patnyo loma XXIII, 36.
nâçayitrî balâsasyâ XII, 97.
nikramaṇaṇ nishadanam XXV, 38.
niyutvân vâyav âgahy XXVII, 29.
niveçanaḥ saṇgamano XII, 66.
nishasâda dhṛitavrato X, 27. XX, 2.
ni hotâ hotṛishadane XI, 36.
nîlagrîvâḥ çitikaṇṭhâḥ çarvâ adhaḥ XVI, 57.
nîl. çitikaṇṭhâ divaṁ XVI, 56.
nṛittâya sûtam XXX, 6.
nṛishade veḍ XVII, 12.
paṇca diço daivîr XVII, 54.
paṅca nadyaḥ sarasvatîm XXXIV, 11.
paṅcasv antaḥ purusha âviveça XXIII, 52.
pathas pathaḥ paripatim XXXIV, 42.
payaḥ pṛithivyâṇ payas XVIII, 36.
payasâ çukram amṛitam XIX, 84.
payaso rûpaṇ yad yavâs XIX, 23.
payaso reta âbhṛitam XXXVIII, 28.
paraṇ mṛityo anu parehi XXXV, 7.
paramasyâḥ parâvato XI, 72.
parameshṭhî tvâ sâdayatu divas pṛishṭhe jyotishmatîm XV, 58.
p. tvâ s. divas p. vyacasvatîm XV, 64.
parameshṭhy abhidhîtaḥ VIII, 54.
parasyâ adhi saṇvato XI, 71.
pari te dûḍabho ratho III, 36.
pari te dhanvano hetir XVI, 12.
pari tvâ girvaṇo V, 29.
pari tvâ 'gne puraṇ XI, 26.
pari dyâvâpṛithivî sadya XXXII, 12.
pari no rudrasya hetir vṛinaktu XVI, 50.
pari mâ'gne duçcaritâd IV, 28.
pari vâjapatiḥ XI, 25.
parivîr asi pari tvâ VI, 6.
parito shiñcatâ sutaṁ XIX, 2.
parîtya bhûtâni XXXII, 11.
parîme gâm aneshata XXXV, 18.
paro divâ para enâ pṛithivyâ XVII, 29.
pavamânaḥ so adya naḥ XIX, 42.
pavitreṇa punihi mâ XIX, 40.
pavitre stho vaishṇavyau I, 12. X, 6.
paçubhiḥ paçûn âpnoti XIX, 20.
pashṭhavâṭ ca me XVIII, 27.
pashṭhavâho virâjas XXIV, 13.
pâtaṇ no açvinâ divâ XX, 62.
pâvakayâ yaç citayantyâ kṛipâ XVII, 10.
pâvakavarcâḥ XII, 107.
pâvakâ naḥ sarasvatî XX, 84.
pâhi no agna ekayâ XXVII, 43.
pitâ no 'si pitâ no bodhi XXXVII, 20.
pituṇ nu stosham XXXIV, 7.
pitṛibhyaḥ svadhâyibhyaḥ svâhâ XIX, 36.
pivoannâ rayivṛidhaḥ XXVII, 23.
putram iva pitarâv X, 34. XX, 77.
punantu mâ devajanâḥ XIX, 39.
punantu mâ pitaraḥ somyâsaḥ XIX, 37.
punar âsadya sadanam XII, 39.
punar ûrjâ XII, 9. 40.
punar naḥ pitaro mano III, 55.
punar manaḥ punar âyur IV, 15.
punas tvâ 'dityâs XII, 44.
punâti te parisrutam XIX, 4.
purâ krûrasya visṛipo I, 28.
purîshyaso agnayaḥ XII, 50.
purîshyo 'si XI, 32.
purudasmo vishurûpa indur VIII, 30.
purusha evedaṁ sarvam XXXI, 2.
purushamṛigaç candramaso XXIV, 35.
pûrṇâ darvi parâ pata III, 49.
pûshaṇaṇ vanishṭhunâ XXV, 7.
pûshan tava vrate vayam XXXIV, 41.
pûshâ paṇcâxareṇa IX, 32.
pṛichâmi tvâ citaye XXIII, 49.

pṛichâmi tvâ param antam pṛithivyâḥ XXIII, 61.
pṛithivi devayajany oshadhyâs te I, 25.
pṛithivî ca ma indraç ca XVIII, 18.
pṛithivî chando 'ntarixaṃ chando XIV, 19.
pṛithivyâ aham ud antarixam XVII, 67.
pṛithivyâḥ purîsham asy XIV, 4.
pṛithivyâḥ sadhasthâd XI, 16.
pṛithivyai svâhâ XXII, 29.
pṛiçnis tiraççînapṛiçnir XXIV, 4.
pṛishadaçvâ marutaḥ XXV, 20.
pṛishṭîr me râshṭram XX, 8.
pṛishṭo divi pṛishṭo agniḥ XVIII, 73.
praghâsino havâmahe III, 44.
prajâpataye ca vâyave ca XXIV, 30.
prajâpataye tvâ jushṭam proxâmî XXII, 5.
prajâpataye purushân XXIV, 29.
prajâpatiḥ sambhriyamâṇaḥ XXXIX, 5.
prajâpatir viçvakarmâ XVIII, 43.
prajâpatiç carati garbhe XXXI, 19.
prajâpatish ṭvâ sâdayatv XIII, 17.
prajâpate na tvad etâny anyo X, 20. XXIII, 65.
prajâpates tapasâ vâvṛidhânaḥ XXIX, 11.
prajâpatau tvâ devatâyâm XXXV, 6.
pra tad vishṇu stavate V, 20.
pra tad voced amṛitaṃ nu XXXII, 9.
prati xatre prati tishṭhâmi XX, 10.
pratipad asi pratipade tvâ XV, 8.
prati panthâm apadmahi IV, 29.
pratiçrutkâyâ artanam XXX, 19.
prati spaço visṛija XIII, 11.
pratîcîm âroha X, 12.
pratûrtaṃ vâjinn âdrava XI, 12.
pratûrvann ehy XI, 15.
pratyushṭaṁ raxaḥ I, 7. 29.
prathamâ dvitîyair XX, 12.
prathamâ vâṁ sarathinâ XXIX, 7.
pra nûnaṃ brahmaṇaspatir XXXIV, 57.
pra no yachatv aryamâ IX, 29.
pra parvatasya X, 19.
pra prâ 'yam agnir XII, 34.
pra bâbavâ sisṛitam XXI, 9.
pra manmahe çavasânâya XXXIV, 16.
pramuñca dhanvanas tvam XVI, 9.
pra yâbhir yâsi dâçvâṁsam XXVII, 27.
pra va indrâya bṛihate XXXIII, 96.
pra vâyum achâ bṛihatî XXXIII, 55.
pravâvṛije suprayâ barhir XXXIII, 44.
pra vîrayâ çucayo XXXIII, 70.
pra vo mahe mandamânâyâ XXXIII, 23.
pra vo mahe mahi XXXIV, 17.
prasadya bhasmanâ yonim XII, 38.
prastareṇa paridhinâ XVIII, 63.
prâg apâg udag VI, 36.
prâcînaṃ barhiḥ pradiçâ XXIX, 29.
prâcîm anu pradiçaṃ prehi XVII, 66.
prâcyai diçe svâhâ XXII, 24.
prâṇaṃ me pâhy XIV, 8.
prâṇadâ apânadâ XVII, 15.
prâṇapâ me apânapâç XX, 34.
prâṇaç ca me 'pânaç ca XVIII, 2.
prâṇâya me varcodâ VII, 27.
prâṇâya svâhâ 'pânâya svâhâ XXII, 23. XXIII, 18.
prâtar agnim prâtar indram XXXIV, 34.
prâtarjitam bhagam XXXIV, 35.
pretâ jayatâ nara indro XVII, 46.
pred agne jyotishmân XII, 32.
preddho agne dîdihi XVII, 76.
praitu brahmaṇaspatir XXXIII, 89. XXXVII, 7.
praitu vâjî kanikradan XI, 46.
praishebhiḥ praishân âpnoty XIX, 19.
prothad açvo na yavase 'vishyan XV, 62.

baṭ sûrya çravasâ XXXIII, 40.
baṇ mahâñ 2ॐ asi sûrya XXXIII, 39.
barhishadaḥ pitara ûty XIX, 55.
balavijnâya sthaviraḥ XVII, 37.
bâhvînâm pitâ bahur asya putraç XXIX, 42.
bâhû me balam XX, 7.
bîbhatsâyai paulkasam XXX, 17.
bṛihad indrâya gâyata XX, 30.
bṛihann id idhma eshâm XXXIII, 24.
bṛihaspate ati yad aryo arhâd XXVI, 3.
bṛihaspate paridîyâ XVII, 36.
bṛihaspate vâjaṃ jaya IX, 11.
bṛihaspate savitar bodhayainaṁ XXVII, 8.
bodhâ me asya XII, 42.
brahma xatram pavate XIX, 5.
brahma jajnânam XIII, 3.
brahmaṇaspate tvam asya XXXIV, 58.
brahmaṇe brâhmaṇaṃ XXX, 5.
brahma sûryasamaṃ jyotir XXIII, 48.
brahmâṇi me matayaḥ XXXIII, 78.
brâhmaṇam adya videya VII, 46.
brâhmaṇâsaḥ pitaraḥ XXIX, 47.
brâhmaṇo 'sya mukham XXXI, 11.
bhaga eva bhagavâñ XXXIV, 38.
bhaga praṇetar bhaga XXXIV, 36.
bhadraṃ karṇebhiḥ XXV, 21.
bhadrâ uta praçastayo XV, 39.
bhadro no agnir âhuto XV, 38.
bhadro me 'si pracyavasva IV, 34.
bhavataṃ naḥ samanasau V, 3. XII, 60.
bhâyai dârvâhâram XXX, 12.
bhujyuḥ suparṇo XVIII, 42.
bhuvo yajnasya XIII, 15. XV, 23.
bhûtâya tvâ I, 11.
bhûmyâ âkhûn XXIV, 26.
bhûr asi bhûmir asy XIII, 18.
bhûr bhuvaḥ svaḥ suprajâḥ prajâbhiḥ III, 37.
bhûr bhuvaḥ svaḥ XXXVI, 3.
bhûr bhuvaḥ svar dyaur iva bhûmnâ III, 5.
bheshajam asi III, 59.
makhasya çiro 'si XXXVII, 8.
madhave svâhâ nâdhavâya svâhâ VII, 30. XXII, 31.
madhu naktam XIII, 28.
madhumatîr na ishas kṛidhi VII, 2.
madhumân no XIII, 29.
madhu vâtâ ṛitâyate XIII, 27.
madhuç ca mâdhavaç ca XIII, 25.
madhvâ yajnaṃ naxase XXVII, 13.
manasaḥ kâmam âkûtim XXXIX, 4.
manas ta âpyâyatâm VI, 15.
manojûtir jushatâm âjyasya II, 13.
mano na yeshu VII, 17.
mano nv âhvâmahe III, 53.
mano me tarpayata VI, 31.
manyave 'yastâpam XXX, 14.
mayi gṛihṇâmy agre agniṁ XIII, 1.
mayi tyad indriyam bṛihan XXXVIII, 27.
mayîdam indra indriyam II, 10.
mayuḥ prâjâpatya ulo XXIV, 31.
marutâṁ skandhâs XXV, 6.
maruto yasya hi xaye VIII, 31.
marutvantaṃ vṛishabham VII, 36.
marutvâñ 2ॐ indra vṛishabho VII, 38.
marmâṇi te varmaṇâ XVII, 49.
maçakân keçair XXV, 3.
mahâñ 2ॐ indro nṛivad VII, 39.
mahâñ 2ॐ indro ya ojasâ VII, 40.
mahâñ 2ॐ indro vajrahastaḥ XXVI, 10.
mahânâmnyo revatyo XXIII, 35.
mahi triṇâm avo 'stu III, 31.
mahî dyauḥ pṛithivî ca VIII, 32. XIII, 32.

mahînâm payo 'si IV, 3.
mahîm û shu mâtaraṁ XXI, 5.
maho agneḥ samidhânasya XXXIII, 17.
maho arṇaḥ sarasvatî XX, 86.
mâ chandaḥ pramâ chandaḥ XIV, 18.
mâ ta indra te vayam X, 22.
mâtâ ca te pitâ ca te 'graṃ XXIII, 24.
mâtâ ca te pitâ ca te 'gre XXIII, 25.
mâteva putram XII, 61.
mâ tvâ 'gnir dhvanayîd XXV, 37.
mâ tvâ tapat priya âtmâ XXV, 43.
mâ naḥ çaṅso ararushas III, 30.
mâ nas toke tanaye XVI, 16.
mâ no mahântam uta mâ XVI, 15.
mâ no mitro varuṇo XXV, 24.
mâ'po maushadhîr VI, 22.
mâ bher mâ saṃvikthâḥ I, 23. VI, 35.
mâ mâ hiṅsîj janitâ XII, 102.
mâ vo rishat XII, 95.
mâ su bhitthâs XI, 68.
mâ 'hir bhûr mâ pṛidâkur VI, 12. VIII, 23.
mitraṁ huve pûtadaxam XXXIII, 57.
mitraḥ saṁsṛijya pṛithivîm XI, 53.
mitraç ca ma indraç ca XVIII, 17.
mitrasya carshaṇîdhṛito XI, 62.
mitrasya mâ caxushexadhvam V, 34.
mitrâvaruṇâbhyâm tvâ VII, 23.
mitro na ehi sumitradhas IV, 27.
mitro navâxareṇa IX, 33.
miḍhushṭama çivatama XVI, 51.
mukhaṁ sad asya çira it XIX, 88.
muñcantu mâ çapathyâd XII, 90.
mûrdhânaṃ divo aratim VII, 24. XXXIII, 8.
mûrdhâ vayaḥ prajâpatiç chandaḥ XIV, 9.
mûrdhâ 'si râḍ dhruvâ 'si dharuṇâ XIV, 21.
mṛigo na bhîmaḥ kucaro XVIII, 71 (differing from V, 20).
medhâṃ me varuṇo XXXII, 15.
mo shû ṇa indrâ'tra pṛitsu III, 46.
ya âtmadâ baladâ yasya XXV, 13.
ya indra indriyaṃ dadhuḥ XX, 70.
ya imâ viçvâ bhuvanâni juhvad XVII, 17.
ya ime dyâvâpṛithivî XXIX, 34.
ya etâvantaç ca bhûyâṅsaç ca XVI, 63.
yaṃ krandasî avasâ XXXII, 7.
yaṃ te devî niṛitir XII, 65.
yaṃ paridhim paryadhatthâs II, 17.
yaḥ prâṇato nimishato XXIII, 3. XXV, 11.
yakâ 'sakau çakuntikâ XXIII, 22.
yako 'sakau çakuntaka XXIII, 23.
yajâ no mitrâvaruṇâ XXXIII, 3.
yajurbhir âpyante grahâs XIX, 28.
yaj jâgrato dûram XXXIV, 1.
yajna yajnaṃ gacha VIII, 22.
yajnasya doho VIII, 62.
yajnâ yajnâ vo agnaye XXVII, 42.
yajnena yajnam ayajanta XXXI, 16.
yajno devânâm pratyeti VIII, 4. XXXIII, 68.
yate svâhâ dhâvate svâho- XXII, 8.
yato yataḥ samîhase XXXVI, 22.
yat te gâtrâd agninâ XXV, 34.
yat te pavitram arcishy XIX, 41.
yat te sâde mahasâ XXV, 40.
yat te soma divi jyotir VI, 33.
yat purushaṃ vyadadhuḥ XXXI, 10.
yat purusheṇa havishâ XXXI, 14.
yat prajnânam uta·ceto XXXIV, 3.
yatra dhârâ anapetâ XVXI, 65.
yatra bâṇâḥ sampatanti XVII, 48.
yatra brahma ca xatraṃ ca XX, 25.
yatrendraç ca vâyuç ca XX, 26.

yatraushadhîḥ samagmata XII, 80.
yathemâṃ vâcaṃ kalyâṇîm XXVI, 2.
yad akrandaḥ XXIX, 12.
yad agne kâni kâni cid XI, 73.
yad atty upajihvikâ XI, 74.
yad atra riptaṁ rasinaḥ XIX, 35.
yad adya kac ca XXXIII, 35.
yad adya sûra udite XXXIII, 20.
yad açvasya kravisho XXV, 32.
yad açvâya vâsa upastṛiṇanty XXV, 39.
yad asyâ aṁhubhedyâḥ XXIII, 28.
yad âkûtât samasusrod XVIII, 58.
yad âpipesha XIX, 11.
yad âpo aghnyâ iti XX, 18.
yad âbadhnan dâxâyaṇâ hiraṇyaṁ XXXIV, 52.
yadi jâgrad yadi svapne XX, 16.
yadi divâ yadi naktam XX, 15.
yad imâ vâjayann aham XII, 85.
yad ûvadhyam udarasyâ XXV, 33.
yad grâme yad araṇye III, 45. XX, 17.
yad dattaṃ yat parâdânam XVIII, 64.
yad devâ devaheḍanam XX, 14.
yad devâso lalâmagum XXIII, 29.
yad dhariṇo yavam atti XXIII, 30. 31.
yad dhavishyam ṛituço XXV, 27.
yad vâjino dâma saṃdânam XXV, 31.
yad vâto apo aganîgan XXIII, 7.
yad vâhishṭham tad agnaye XXVI, 12.
yantâ ca me dhartâ ca XVIII, 7.
yantrî râḍ yantry asi XIV, 22.
yan nirṇijâ rekṇasâ XXV, 25.
yan nîxaṇam mâṁspacanyâ XXV, 36.
yan me chidraṃ caxusho XXXVI, 2.
yam agne kavyavâhana XIX, 64.
yam agne pṛitsu VI, 29.
yam açvinâ namucer asurâd adhi XIX, 34.
yam açvinâ sarasvatî XX, 68.
yamâya tvâ 'ṇgirasvate XXXVIII, 9.
yamâya tvâ makhâya tvâ XXXVII, 11.
yamâya yamasûm XXX, 15.
yamâya svâhâ 'ntakâya svâhâ XXXIX, 13.
yamena dattam trita enam XXIX, 13.
yavânâm bhâgo 'sy ayavânâm âdhipatyam XIV, 26.
yaç cid âpo mahinâ XXVII, 26. XXXII, 7.
yas tu sarvâṇi bhûtâny XL, 6.
yas te adya kṛiṇavad XII, 26.
yas te açvasanir VIII, 12.
yas te drapsa skandati VII, 26.
yas te rasaḥ sambhṛita oshadhîshu XIX, 33.
yas te stanaḥ çaçayo XXXVIII, 5.
yasmâj jâtaṃ na purâ kiṃcanaiva XXXII, 5.
yasmân na jâtaḥ VIII, 36.
yasmint sarvâṇi bhûtâny XL, 7.
yasminn açvâsa ṛishabhâsa uxaṇo XX, 78.
yasminn ṛicaḥ sâma yajûṁshi XXXIV, 5.
yasya kurmo gṛihe havis XVII, 52.
yasya prayâṇam XI, 6.
yasyâ 'yaṃ viçva âryo XXXIII, 82.
yasyâs te ghora âsan XII, 64.
yasyeme himavanto XXV, 12.
yasyai te yajniyo VIII, 29.
yasyaushadhîḥ XII, 86.
yâ ishavo yâtudhânânâm XIII, 7.
yâ oshadhîḥ pûrvâ jâtâs XII, 75.
yâ oshadhîḥ somarâjnîr bahvîḥ XII, 92.
yâ osh. som. vishṭhitâḥ XII, 93.
yâṁ2ऽ âvaha uçato VIII, 19.
yâṃ medhâṃ devagaṇâḥ XXXII, 14.
yâḥ phalinîr XII, 89.
yâḥ senâ abhîtvarîr XI, 77.

yâ te agne 'yaḥçayâ V, 8.
yâ te gharma divyâ çug XXXVIII, 18.
yâ te dhâmâni paramâṇi XVII, 21.
yâ te dhâmâni haviṣhâ IV, 37.
yâ te dhâmâny uçmasi VI, 3.
yâ te rudra çivâ tanûr XVI, 2. 49.
yâ te hetir miḍhushṭama XVI, 11.
yâm ishuṃ giriçanta XVI, 3.
yâvatî dyâvâpṛithivî XXXVIII, 26.
yâ vâṃ kaçâ VII, 11.
yâ vo devâḥ sûrye ruco XIII, 23. XVIII, 47.
yâ vyâghraṃ vishûcikobhau XIX, 10.
yâ çatena pratanoshi XIII, 21.
yâç cedam upaçṛiṇvanti XII, 94.
yâs te agne sûrye ruco XIII, 22. XVIII, 46.
yuktena manasâ XI, 2.
yuktvâya savitâ XI, 3.
yuxvâ hi keçinâ VIII, 34.
yuxvâ hi devahûtamâñ XIII, 37. XXXIII, 4.
yuje vâm brahma XI, 5.
yuñjate mana uta V, 14. XI, 4. XXXVII, 2.
yuñjanti bradhnam XXIII, 5.
yuñjanty asya kâmyâ XXIII, 6.
yuñjâthâñ râsabham XI, 13.
yuñjânaḥ prathamam XI, 1.
yunakta sîrâ XII, 68.
yuvaṃ tam indrâparvatâ VIII, 53.
yuvañ surâmam açvinâ X, 33. XX, 76.
yushmâ indro 'vṛiṇîta I, 13.
yûpavraskâ uta ye yûpavâhâç XXV, 29.
ye agnishvâttâ ye XIX, 60.
ye ceha pitaro ye ca neha XIX, 67.
ye janeshu malimlavas XI, 79.
ye tîrthâni pracaranti XVI, 61.
ye te panthâḥ savitaḥ XXXIV, 27.
ye tvâ 'hihatye maghavan XXXIII, 63.
ye devâ agninetrâḥ IX, 36.
ye devâ devânâm XVII, 13.
ye devâ deveshv XVII, 14.
ye devâso divy ekâdaça VII, 19.
yena ṛishayas tapasâ satram â'yann XV, 49.
ye naḥ pûrve pitaraḥ XIX, 51.
ye naḥ sapatnâ apa te XXXIV, 46.
yena karmâṇy apaso XXXIV, 2.
yena dyaur ugrâ XXXII, 6.
yena vahasi sahasram XV, 55. XVIII, 62.
yena samatsu sâsaho XV, 40.
yenâ pâvaka caxasâ XXXIII, 32.
yenedaṃ bhûtaṃ bhuvanam XXXIV, 4.
ye 'nneshu vividhyanti XVI, 62.
ye pathâm pathiraxasas XVI, 60.
ye bhûtânâm adhipatayo XVI, 59.
ye rûpâṇi pratimuñcamânâs II, 30.
ye vâjinam paripaçyanti XXV, 35.
ye vâ 'mî rocane ḍivo XIII, 8.
ye vṛixeshu çashpiñjarâḥ XVI, 58.
yeshâm adhyeti pravasan III, 42.
ye samânâḥ samanasaḥ pitaro XIX, 45.
ye s. samanaso jîvâ jîveshu XIX, 46.
yo agniḥ kavyavâhanaḥ XIX, 65.
yo agnir agner adhy XIII, 45.
yo asmabhyam arâtîyâd XI, 80.
yoge yoge tavastaram XI, 14.
yo devebhya âtapati XXXI, 20.
yo naḥ pitâ janitâ yo vidhâtâ XVII, 27.
yonâv abhûr ukhâ XII, 61.
yo bhûtânâm adhipatir XX, 32.
yo revân yo amîvahâ III, 29.
yo vaḥ çivatamo rasas XI, 51. XXXVI, 15.
raxasâm bhâgo 'si VI, 16.
raxohaṇaṃ valagahanam V, 23.
raxohaṇo vo valagahanaḥ V, 25.

raxohâ viçvacarshaṇir XXVI, 26
rajatâ hariṇiḥ XXIII, 37.
rathavâhaṇaṁ havir asya nâma XXIX, 45.
rathe tishṭhan nayati XXIX, 43.
rayiç ca me râyaç ca XVIII, 10.
raçminâ satyâya satyaṁ jinva XV, 6.
râjantam adhvarâṇâm III, 23.
râjny asi prâcî dig XIV, 13.
râjny asi prâcî dig vasavas te XV, 10.
râtiṁ satpatiṁ mahe XXII, 13.
râyâ vayaṁ sasavâṁso VII, 10.
râye nu yaṁ jajnatû rodasî XXVII, 24.
rucaṁ no dhehi brâhmaṇeshu XVIII, 48.
rucaṁ brâhmam XXXI, 21.
rudrâḥ saṁsṛijya pṛithivîm XI, 54.
rûpeṇa vo rûpam VII, 45.
reto mûtraṁ vijahâti XIX, 76.
revatî ramadhvam III, 21. VI, 8.
rohito dhûmrarohitaḥ XXIV, 2.
lâṅgalam pavîravat XII, 71.
lokam pṛiṇa XII, 54. XV, 59.
lomabhyaḥ svâhâ lomabhyaḥ svâhâ XXXIX, 10.
lomâni prayatir XX, 13.
vaxyantîved âganîganti XXIX, 40.
vanaspatir avasṛishṭo na XX, 45.
vanaspate 'vasṛijâ XXVII, 21.
vanaspate vîḍvaṅgo hi bhûyâs XXIX, 52.
vaneshu vy antarixam IV, 31.
vayaṁ te adya rarimâ XVIII, 75.
vayaṁ nâma prabravâmâ XVII, 90.
vayaṁ soma vrate tava III, 56.
vayaṁ hi tvâ VIII, 20.
varuṇaḥ xatram indriyam XX, 72.
varuṇaḥ prâvitâ bhuvan XXXIII, 46.
varuṇasyottambhanam asi IV, 36.
varûtrîṁ tvashṭur XIII, 44.
varshâbhir ṛitunâ XXI, 25.
varshâhur ṛitûnâm XXIV, 38.
vasantâya kapiñjalân XXIV, 20.
vasantena ṛitunâ XXI, 23.
vasavas trayodaçâxareṇa IX, 34.
vasavas tvâ kṛiṇvantu XI, 58.
vasavas tvâchṛindantu XI, 65.
vasavas tvâ 'ñjantu gâyatreṇa XXIII, 8.
vasavas tvâ dhûpayantu XI, 60.
vasu ca me vasatiç ca XVIII, 15.
vasubhya ṛiçyân XXIV, 27.
vasubhyas tvâ rudrebhyas tvâ II, 16.
vasûnâṁ bhâgo 'si rudrâṇâm âdhipatyam XIV, 25.
vasoḥ pavitram asi I, 2.
vasoḥ pavitram asi çatadhâram I, 3.
vasvy asy aditir asy IV, 21.
vaha vapâṁ jâtavedaḥ XXXV, 20.
vâcaṁ te çundhâmi VI, 14.
vâcaspataye pavasva VII, 1.
vâcaspatiṁ viçvakarmâṇam VIII, 45. XVII, 23.
vâce svâhâ prâṇâya svâhâ XXXIX, 3.
vâjaḥ purastâd uta XVIII, 34.
vâjaç ca me prasavaç ca XVIII, 1.
vâjasya nu prasava âbabhûva IX, 25.
vâjasya nu prasave IX, 5. XVIII, 30.
vâjasya mâ prasava udgrâbheṇod XVII, 63.
vâjasyemaṁ prasavaḥ IX, 23.
vâjasyemâṁ prasavaḥ çiçriye IX, 24.
vâjâya svâhâ prasavâya svâhâ XVIII, 28. XXII, 32.
vâje vâje 'vata vâjino IX, 18. XXI, 11.
vâjo naḥ sapta pradiçaç XVIII, 32.
vâjo no adya prasuvâti XVIII, 33.
vâtaṁ prâṇenâpânena nâsike XXV, 2.
vâtarañhâ bhava IX, 8.

vâtasya jûtim XIII, 42.
vâtâya svâhâ dhûmâya svâhâ XXII, 26.
vâto vâ mano vâ IX, 7.
vâmam adya savitar VIII, 6.
vâyavyair vâyavyâny XIX, 27.
vâyuḥ punâtu savitâ punâtv XXXV, 3.
vâyur agregâ yajnaprîḥ XXVII, 31.
vâyur anilam amṛitam XL, 15.
vâyush ṭvâ pacatair avatv XXIII, 13.
vâyoḥ pûtaḥ pavitreṇa X, 31. XIX, 3.
vâyo ye te sahasriṇo XXVII, 32.
vâyo çukro ayâmi te XXVII, 30.
vârtrahatyâya çavase XVIII, 68.
vikiridra vilohita XVI, 52.
vijyaṃ dhanuḥ kapardino XVI, 10.
vittaṃ ca me vedyaṃ ca XVIII, 11.
vidad yadî saramâ rugṇam XXXIII, 59.
vidmâ te agne tredhâ trayâṇi XII, 19.
vidyâṃ câvidyâṃ ca XL, 14.
vidhṛitiṃ nâbhyâ XXV, 9.
vidhema te parame janmann XVII, 75.
vi na indra mṛidho jahi VIII, 44. XVIII, 70.
vi pâjasâ pṛithunâ XI, 49.
vibhaktâraṁ havâmahe XXX, 4.
vibhûr asi pravâhaṇo V, 31.
vibhûr mâtrâ prabhûḥ pitrâ XXII, 19.
vibhrâḍ bṛihat pibatu XXXIII, 30.
vimâna osha divo madhya âste XVII, 59.
vimucyadhvam aghnyâs XII, 73.
virâḍ asi daxiṇâ dig rudrâs te XV, 11.
virâḍ jyotir adhârayat XIII, 24.
vivasvann âdityaisha te VIII, 5.
viçvakarman havishâ vardhanena VIII, 46. XVII, 24.
viçvakarman havishâ vâvṛidhânaḥ XVII, 22.
viçvakarmâ tvâ sâdayatv antarixasya pṛishṭhe jyotishmatîm XIV, 14. vyacasvatîm XIV, 12.
viçvakarmâ vimanâ âd XVII, 26.
viçvakarmâ hy ajanishṭa XVII, 32.
viçvataçcaxur uta viçvatomukto XVII, 19.
viçvasmai prâṇâyâ'pânâya XIII, 19.
viçvasya ketur XII, 23.
viçvasya dûtam amṛitam XV, 33.
viçvasya mûrdhann adhi XVIII, 55.
viçvâ âçâ daxiṇasad XXXVIII, 10.
viçvâni deva savitar XXX, 3.
viçvâ rûpâṇi XII, 3.
viçvâsâṃ bhuvâm pate XXXVII, 18.
viçve adya maruto XVIII, 31. XXXIII, 52.
viçve devâ añçushu nyupto VIII, 57.
viçve devâḥ çṛiṇutemaṁ havaṃ XXXIII, 53.
viçve devâç camaseshûnnîto VIII, 58.
viçve devâsa âgata VII, 34.
viçvebhiḥ somyaṃ madhv XXXIII, 10.
viçveshâm aditir yajniyânâm XXXIII, 16.
viçvo devasya netur IV, 8. XI, 67. XXII, 21.
vishṇoḥ karmâṇi paçyata VI, 4. XIII, 33.
vishṇoḥ kramo 'si XII, 5.
vishṇo rarâṭam asi V, 21.
vishṇor nu kaṃ vîryâṇi V, 18.
vîtaṁ haviḥ çamitaṁ XVII, 57.
vîtihotram tvâ kave II, 4.
vṛishṇa ûrmir asi X, 2.
vedâ 'ham asya bhuvanasya nâbhim XXIII, 60.
vedâham etaṃ purusham XXXI, 18.
vedena rûpe vyapibat XIX, 78.
vedo 'si yena II, 21.

vedyâ vediḥ samâpyate XIX, 17.
venas tat paçyan nihitaṃ XXXII, 8.
vaiçvadevî punatî devy XIX, 44.
vaiçvânarasya sumatau XXVI, 7.
vaiçvânaro na ûtaye XVIII, 72. XXVI, 8.
vyacasvatîr urviyâ XXIX, 30.
vrataṃ kṛiṇutâ 'guir IV, 11.
vrataṃ ca ma ṛitavaç ca XVIII, 23.
vratena dîxâm âpnoti XIX, 30.
vrîhayaç ca me yavâç ca XVIII, 12.
vreçînâṃ tvâ VIII, 48.
çaṃ ca me mayaç ca XVIII, 8.
çaṃ te parebhyo gâtrebhyaḥ XXIII, 44.
çaṃ no devîr abhishṭaye XXXVI, 12.
çaṃ no bhavantu vâjino IX, 16. XXI, 10.
çaṃ no mitraḥ çaṃ varuṇah XXXVI, 9.
çaṃ no vâtaḥ pavatâṁ XXXVI, 10.
çaṃ vâtaḥ çaṁ hi te XXXV, 8.
çataṃ vo amba dhâmâni XII, 76.
çatam in nu çarado anti XXV, 22.
çamitâ no vanaspatiḥ XXI, 21.
çarma ca stho varma ca XI, 30.
çarmâ 'sy avadhûtaṁ raxo I, 14. 19.
çâdaṃ dadbhir XXV, 1.
çâradena ṛitunâ XXI, 26.
çiro me çrîr yaço XX, 5.
çilpâ vaiçvadevyo XXIV, 5.
çivena vacasâ tvâ giriçâchâ XVI, 4.
çivo nâmâ 'si svadhitis te pitâ III, 63.
çivo bhava prajâbhyo XI, 45.
çivo bhûtvâ mahyam agne XII, 17.
çukraṃ tvâ çukreṇa IV, 26.
çukrajyotiç ca citrajyotiç ca XVII, 80.
çukraç ca çuciç ca XIV, 6.
çuddhavâlaḥ XXIV, 3.
çunaṁ su phâlâ vikṛishantu XII, 69.
çaiçireṇa ṛitunâ XXI, 28.
çrâyanta iva sûryam XXXIII, 41.
çrîṇâm udâro XII, 22.
çrîç ca te laxmîç ca XXXI, 22.
çrudhi çrutkarṇa vahnibhir XXXIII, 15.
çvâtrâḥ pîtâ bhavata IV, 12.
çvâtrâ stha vṛitraturo VI, 34.
çvitra âdityânâm XXIV, 39.
shaḍ asya vishṭhâḥ XXIII, 58.
shoḍaçî stoma ojo draviṇam XV, 3.
sa idhâno vasush kavir XV, 36.
sa ishuhastaiḥ sa XVII, 35.
saṃkrandanenâ 'nimisheṇa XVII, 34.
saṃ cedhyasvâ 'gne XXVII, 2.
saṃjnânam asi XII, 46.
saṃ te payâṁsi XII, 113.
saṃ te mano manasâ VI, 18.
saṃ te vâyur XI, 39.
saṃ tvam agne sûryasya III, 19.
saṃdhaye jâram XXX, 9.
saṃpracyavadhvam upa samprayâtâ XV, 53.
saṃ barhir aṇktâṁ havishâ II, 22.
saṃbhûtiṃ ca vinâçaṃ ca XL, 11.
saṃ mâ sṛijâmi payasâ XVIII, 35.
saṃvatsaro 'si parivatsaro XXVII, 45.
saṃ varcasâ payasâ II, 24. VIII, 14. 16.
saṃvasâthâṁ svarvidâ XI, 31.
saṃ vâṃ manâṁsi XII, 58.
saṁçitam me brahma XI, 81.
saṁçito raçminâ rathaḥ XXIII, 14.
saṁ sam id yuvase vṛishan XV, 30.
saṁsîdasva mahâṁ asi XI, 37.
saṁsṛishṭâṃ vasubhî XI, 55.
saṁsravabhâgâ sthęshâ II, 18.
saṁhitâ 'si viçvarûpy III, 22.
saṁhito viçvasâmâ XVIII, 39.
sakhâyaḥ saṃ vaḥ samyaṇcam XV, 29.
sa jâto garbho asi XI, 43.
sajûr abdo ayavobhis XII, 74.

sajûr ṛitubhiḥ sajûr vidhâbhiḥ XIV, 7.
sajûr devena savitrâ III, 10.
sajoshâ indra sagaṇo VII, 37.
satyaṃ ca me çraddhâ ca XVIII, 5.
satrasya ṛiddhir asy VIII, 52.
sa tvaṃ naç citra vajrahasta XXVII, 38.
sa tvaṃ no agne 'vamo bhavotî XXI, 4.
sadasaspatim adbhutam XXXII, 13.
sa dudravat svâhutaḥ XV, 34.
sadyo jâto vyamimîta XXIX, 36.
sadhamâdo dyumninîr X, 7.
sa na indrâya yajyave XXVI, 17.
sa naḥ pâvaka dîdivo XVII, 9.
sa naḥ piteva sûnave III, 24.
sa no bandhur janitâ XXXII, 10.
sa no bhuvanasya pate XVIII, 44.
sa pary agâchukram XL, 8.
sapta ṛishayaḥ pratihitâḥ çarîre XXXIV, 55.
sapta te agne samidhaḥ XVII, 79.
saptâ 'syâ "san paridhayas XXXI, 15.
sa prathamo bṛihaspatiç VII, 15.
sa bodhi sûrir XII, 43.
sam akhye devyâ dhiyâ IV, 23.
sam agnir agninâ gata XXXVII, 15.
sam adhvarâyoshaso XXXIV, 39.
samâs tvâ 'gna ṛitavo XXVII, 1.
samitaṁ saṃkalpethâm XII, 57.
samid asi sûryas tvâ II, 5.
samiddha indra ushasâm XX, 36.
samiddhe agnâv adhi XVII, 55.
samiddho agniḥ samidhâ XXI, 12.
samiddho agnir açvinâ XX, 55.
samiddho aṅjan kṛidaraṃ XXIX, 1.
samiddho adya manusho duroṇe XXIX, 25.
samidhâgniṃ duvasyata III, 1. XII, 30.
sam indra ṇo manasâ VIII, 15.
samudraṃ gacha VI, 21.
samudrasya tvâ 'vakayâ XVII, 4.
samudrâd ûrmir XVII, 89.
samudrâya tvâ vâtâya XXXVIII, 7.
samudrâya çiçumârân XXIV, 21.
samudre te hṛidayam apsv antaḥ VIII, 25. XX, 19.
samudre tvâ nṛimaṇâ apsv XII, 20.
samudro 'si nabhasvân XVIII, 45.
samudro 'si viçvavyacâs V, 33.
samyak sravanti sarito XIII, 38. XVII, 94.
samrâḍ asi pratîcî dig âdityâs te XV, 12.
sa yaxad asya mahimânam XXVII, 15.
sarasvatî manasâ peçalaṃ XIX, 83.
sarasvatî yonyâm XIX, 94.
sarobhyo dhaivaram XXX, 16.
sarve nimeshâ jajnire XXXII, 2.
savitâ te çarîrâṇi XXXV, 5.
savitâ te çarîrebhyaḥ XXXV, 2.
savitâ tvâ savânâṁ IX, 39.
savitâ prathame 'hann XXXIX, 6.
savitâ varuṇo dadhad XX, 71.
savitus tvâ prasava utpunâmy I, 31.
savitrâ prasavitrâ X, 30.
sahadânum puruhûta xiyantam XVIII, 69.
saha rayyâ XII, 10. 41.
sa havyavâd amartyas XXII, 16.
sahaç ca sahasyaç ca XIV, 27.
sahasâ jâtân praṇudâ naḥ sapatnân XV, 2.
sahastomâḥ sahachandasa âvṛitaḥ XXXIV, 49.
sahasraçîrshâ purushaḥ XXXI, 1.
sahasrasya pramâ 'si XV, 65.
sahasrâṇi sahasraço XVI, 53.
sahasva me arâtîḥ XII, 99.
sâkaṃ yaxma XII, 87.
sâ viçvâyuḥ I, 4.

siñhy asi sapatnasâhî V, 10.
siñhy asi svâhâ V, 12.
siñcanti parishiñcanty XX, 28.
sinîvâli pṛithushṭuke XXXIV, 10.
sinîvâlî sukapardâ XI, 56.
(sannaḥ) sindhur avabhṛithâyodyataḥ VIII, 59.
sindhor iva prâdhvane XVII, 95.
sîda tvaṃ mâtur XII, 15.
sîda hotaḥ sva u loke XI, 35.
sîrâ yuñjanti XII, 67.
sîsena tantram manasâ XIX, 80.
sugavyaṃ no vâjî XXV, 45.
sugâ vo devâḥ VIII, 18.
sujâto jyotishâ saha XI, 40.
sutrâmâṇam pṛithivîm XXI, 6.
sunâvam âruheyam XXI, 7.
suparṇaṃ vaste mṛigo XXIX, 48.
suparṇaḥ pârjanya âtir XXIV, 34.
suparṇo 'si garutmâñs XII, 4.
suparṇo 'si garutmân XVII, 72.
suprajâḥ prajâḥ VII, 18.
subarhir agniḥ pûshaṇvânt XXI, 15.
subhûḥ svayambhûḥ XXIII, 63.
sumitriyâ na âpa oshadhayaḥ VI, 22. XX, 19. XXXV, 12. XXXVI, 23. XXXVIII, 23.
surâvantam barhishadaṁ XIX, 32.
suvîro vîrân VII, 13.
sushârathir açvân iva XXXIV, 6.
sushumṇaḥ sûryaraçmiç XVIII, 40.
sushṭutiṁ sumatîvṛidho XXII, 12.
susaṃdṛiçaṃ tvâ vayam III, 52.
susamiddhâya çocishe III, 2.
sûpasthâ adya devo vanaspatir XXI, 60.
sûrya ekâkî carati XXIII, 10. 46.
sûryatvacasa stha X, 4.
sûryaraçmir harikeçaḥ XVII, 58.
sûryasya caxur ârohâ IV, 32.
so agnir yo vasur gṛiṇe XV, 42.
(prohyamâṇaḥ) soma âgato VIII, 56.
somaṁ râjânam avase IX, 26.
somaḥ pavate VII, 21.
somam adbhyo vyapibac XIX, 74.
soma râjan viçvâs VI, 26.
somasya tvâ dyumnenâ X, 17.
somasya tvishir asi X, 5. 15.
somasya rûpaṃ kṛitasya XIX, 15.
somânaṁ svaraṇam III, 28.
somâya kuluṇgas XXIV, 32.
somâya labân XXIV, 24.
somâya haṁsân XXIV, 22.
somo dhenuṁ somo arvantam XXXIV, 21.
somo râjâ 'mṛitaṁ sutas XIX, 72.
saurî balâkâ XXIV, 33.
stîrṇam barhiḥ sushṭarîmâ XXIX, 4.
stokânâm indum prati XX, 46.
sthiro bhava vîḍvaṇgas XI, 44.
syonâ pṛithivi no bhavâ XXXV, 21. XXXVI, 13.
syonâ 'si sushadâ 'si X, 26.
srucaç ca me camasâç ca XVIII, 21.
svagâ tvâ devebhyaḥ prajâpataye XXII, 4.
svatavâñç ca praghâsî ca XVII, 85.
svayambhûr asi çreshṭho II, 26.
svayaṃ vâjiñs tanvaṃ XXIII, 15.
svarâḍ asi sapatnahâ V, 24.
svarâḍ asy udîcî diñg marutas te XV, 13.
svar ṇa gharmaḥ svâhâ XVIII, 50.
svar yanto nâ'pexante XVII, 68.
svasti na indro vṛiddhaçravâḥ XXV, 19.
svâṃkṛito 'si VII, 3. 6.
svâdishṭhayâ madishṭhayâ XXVI, 25.
svâdushaṁsadaḥ pitaro XXIX, 46.

svâdvîṃ tvâ svâdunâ XIX, 1.
svâhâ pûshṇe çarase XXXVIII, 15.
svâhâ prâṇebhyaḥ sâdhipatikebhyaḥ XXXIX, 1.
svâhâ marudbhiḥ pariçrîyasva XXXVII, 13.
svâhâ yajnam manasaḥ IV, 6.
svâhâ yajnaṃ varuṇaḥ XXI, 22.
svâhâ rudrâya rudrabhûtaye XXXVIII, 16.
svair daxair daxapiteha XIV, 3.
haṅsaḥ çucishad X, 24. XII, 14.
harayo dhûmaketavo XXXIII, 2.
havirdhânaṃ yad açvinâ XIX, 18.
havishmatîr imâ âpo VI, 23.
hasta âdhâya savitâ XI, 11.
hiṃkârâya svâhâ XXII, 7.
himasya tvâ jarâyuṇâ XVII, 5.
hiraṇmayena pâtreṇa XL, 17.
hiraṇyagarbhaḥ samavartatâ'gre XIII, 4. XXIII, 1. XXV, 10.
hiraṇyapâṇiḥ savitâ XXXIV, 25.
hiraṇyapâṇim ûtaye XXII, 10.
hiraṇyarûpâ ushaso X, 16.
hiraṇyaçṛiṅgo 'yo asya XXIX, 20.
hiraṇyahasto asuraḥ XXXIV, 26.
bṛide tvâ manase tvâ VI, 25. XXXVII, 19.
hemantena ṛitunâ XXI, 27.
hotâ 'dhvaryur âvayâ XXV, 28.
h. y. tanûnapâtam udbhi° XXVIII, 25.
h. y. tanûnapâtam ûtibhir XXVIII, 2.
hotâ yaxat tanûnapât XXI, 30.
h. y. tisro devîr XXI, 37. XXVIII, 8.
h. y. tvashṭâram indraṃ XXVIII, 9.
h. y. peçasvatîs tisro XXVIII, 31.
h. y. pracetasâ devânâm XXVIII, 30.
h. y. prajâpatiṁ somasya XXIII, 64.
h. y. samidhâ 'gnim XXI, 29.
h. y. samidhânaṃ mahad yaçaḥ XXVIII, 24.
h. y. samidhendram iḍas XXVIII, 1.
h. y. sarasvatîṃ meshasya XXI, 44.
h. y. supeçasâ suçilpe XXVIII, 29.
h. y. supeçasoshe XXI, 35.
h. y. subarhisham pûshaṇvantam XXVIII, 27.
h. y. suretasam XXI, 38.
h. y. suretasaṃ tvashṭâraṃ XXVIII, 32.
h. y. svâhâkṛitîr agnim XXVIII, 34.
h. yaxad agniṁ svâhâjyasya XXI, 40.
h. y. agniṁ svishṭakṛitam XXI, 47.
h. y. açvinau châgasya vapâyâ XXI, 41.
h. y. açvinau ch. havisha âttâm XXI, 43.
h. y. açvinau sarasvatîm XXI, 42.
h. y. iḍâbhir indram îḍitam XXVIII, 3.
h. y. iḍeḍitas XXI, 32.
h. y. îḍenyam îḍitam XXVIII, 26.
h. y. indraṁ svâhâjyasya XXVIII, 11.
h. y. indram ṛishabhasya XXI, 45.
h. y. ushe indrasya dhenû XXVIII, 6.
h. y. ojo na vîryaṁ saho XXVIII, 5.
h. y. duro diçaḥ XXI, 34.
h. y. daivyâ hotârâ XXI, 36. XXVIII, 7.
h. y. barhir ûrṇamradâs XXI, 33.
h. y. barhishîndram XXVIII, 4.
h. y. vanaspatiṁ XXI, 39. XXVIII, 10. 33.
h. y. vanaspatim abhi hi XXI, 46.
h. y. vyacasvatîḥ suprâyaṇâs XXVIII, 28.
h. yaxan narâçaṅsaṃ XXI, 31.

Berlin February 1852.

॥ ओम् ॥

श्रीगणेशाय नमः (1.) । प्रणम्य लक्ष्मीं नृहरिं गणेशं भाष्यंविलोक्यौवट-माधवीयं (2.)। यजुर्मनूनां विलिखामि चार्थं परोपकाराय निडीक्षणाय ॥ १ ॥ दूरा-दसूयां निर्धूय कृपां कृत्वा ममोपरि विलोक्यो वेददीपोऽयं बुद्धिमद्भिर्द्विजोत्तमैः ॥ २ ॥ तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन्मनुष्यान्विचिन्त्य त-त्कृपया चतुर्धा व्यस्य (3.) ऋग्यजुःसामाथर्वाख्यांश्चतुरो वेदान्पैलवैशम्पायनजैमि-निसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः । एवं परम्परया सहस्रशाखो वेदो ज्ञातः । तत्र व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदम-ध्यापयत् । तत्र दैवात्केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति । स योगसामर्थ्यान्मूर्ता (4.) विद्यां विधायोद्ववाम । वान्तानि यजूंषि गृह्णीतेति गुदुक्ता अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन् । तानि यजूंषि बुद्धिमालिन्यात्कृष्णानि ज्ञातानि । ततो दुःखितो याज्ञवल्क्यः सूर्य-माराधान्यानि शुक्लानि यजूंषि प्राप्तवान् । तानि च जावालगौधेयकाण्वमाध्य-न्दिनादिभ्यः पंचदश शिष्येभ्यः पाठितवान् । तथा च श्रुतिः [बृहदारण्य° माध्य° ५.५. ३३] आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्त इति । अस्यार्थः । आदित्यादधीतान्यादित्यानि शुक्लानि शुद्धानि । वाजस्यान्नस्य सनिर्दानं यस्य स वाजसनिस्तदपत्यं (5.) वाजसनेयस्तेन याज्ञवल्क्येन शिष्येभ्य आख्यायन्ते कथ्यन्त इत्यर्थः । तत्र मध्यन्दिनेन महर्षिणा लब्धो यजुर्वेदशाखाविशेषो माध्य-न्दिनः यद्यपि याज्ञवल्क्येन ब्रह्मभ्यः शिष्येभ्य उपदिष्टः तथापीश्वरकृपया मध्यन्दि-नसम्बन्धितया लोके प्राख्यायते । तं माध्यन्दिनं (6.) वेदं येऽधीयते विदन्ति वा शिष्यपरम्परया वर्तमानास्तेऽपि माध्यन्दिना उच्यन्ते ॥

अत एव स्वाध्यायोऽध्येतव्य इति [शं° ब्रं° ११. ५. ६. ७.] स्वशाखाध्ययनं विहितं तच्चाध्ययनं प्रतिमन्त्रमृषिछन्दोदेवताविनियोगार्थज्ञानपूर्वकं विधेयमन्यथा दोषश्रवणात् । एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तराश्वगर्तं वापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवतीति कात्यायनोक्तेः [अनुक्रमं° १.१.] । ऋष्यादिज्ञाने फलश्रवणाच्च । अथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति ज्ञपित्वा हुत्वेष्ट्वा तत्फलेन युज्यत इत्युक्तेश्च [अनु° १. १.] तस्माद्विदमन्त्राणामृष्यादिज्ञानमर्थज्ञानं चावश्यकमन्यथा वैकल्यात् । तत्र (7.) यजुर्वेदमन्त्रेषु कानिचिद्यजूंषि काश्चन ऋचः । तत्र ऋचां नियताक्षरपादावसानानामावश्यकं (8.) छन्दः कात्यायनेनोक्तम् । यजुषां षडुत्तरशताक्षरावसानानामेकाक्षरादीनां पिङ्गलेन दैव्येकमित्यादिनोक्तं छन्दो बोध्यम् । तदधिकानां तु होता यक्षद्वनस्पतिमभि क्रीत्यादीनां [अध्या° २१. ४६.] नास्ति छन्दःकल्पना ॥

तत्राद्याध्याये द्वितीयाध्यायाष्टाविंशतिकण्डिकाश्चेति दर्शपूर्णमासमन्त्राः । तेषां परमेष्ठी प्राजापत्य ऋषिर्देवा वा प्राजापत्याः । द्वितीयाध्यायान्त्यकण्डिकाषट्कं पितृयज्ञमन्त्रास्तेषां प्रजापतिर्ऋषिः ॥ आद्येऽध्याये सर्वाणि यजूंषि एका पुरा क्रूरस्येति [१. २८.] ऋक् । यजुषां पिङ्गलोक्तं छन्दो बोध्यं (9.) विस्तरभयान्नोच्यते । ऋचां तु छन्दांसि व्यक्तान्येवेति (10.) । तत्राद्यायां कण्डिकायां पञ्च मन्त्राः । द्वौ त्र्यक्षरौ । तृतीयश्चतुरक्षरः । चतुर्थो द्विषष्यक्षरः । पञ्चमो नवाक्षरः ॥

तत्र प्रकृतित्वादादौ दर्शपूर्णमासमन्त्राः । यत्र कृत्स्नाङ्गानामुपदेशः क्रियते सा प्रकृतिः । यत्र विशेषाङ्गमात्रमुपदिश्यतेऽङ्गान्तराणि तु प्रकृतेरतिदिश्यन्ते सा विकृतिः । तत्र प्रकृतिस्त्रिविधा । अग्निहोत्रमिष्टिः सोमश्चेति । तत्र यद्यपि कृताधानस्यैव दर्शपूर्णमासयोरधिकारादादौ आधानमन्त्रा वक्तुमुचितास्तथाप्याधाने पवमानेष्टयो विधेयास्ता अकृताधानस्यैवासिद्धेः । पवमानेष्टीनां च दर्शपूर्णमासविकृतित्वात्सोमेऽपि दीक्षणीयाप्रायणीयादिषु दर्शपूर्णमाससंपिक्तत्वादादौ दर्शपूर्णमासमन्त्राः पठितुं युक्ताः । ते च इषेत्वादयः ॥

I. a. इषे त्वा । b. ऊर्जे त्वा । c. वायव स्थ । d. देवो वः सविता प्रार्प-

यतु श्रेष्ठतमाय कर्मणऽआप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अ-
यक्ष्मा मा व स्तेन ईशत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीः ।
e. यजमानस्य पशून्पाहि ॥१॥

तत्रेषे त्वेति द्विपदस्त्र्यक्षरो मन्त्रः तत्र दैव्यनुष्टुप्छन्दः । शाखा देवता । पलाशशा-
खाछिदने विनियोगः । शाखादीनामचेतनत्वेऽपि तदभिमानिनीनां देवतानां सत्वा-
देवतात्वं । अभिमानिव्यपदेशस्त्विति व्याससूत्रोक्तेः । मृदब्रवीदापोऽब्रुवन्निति श्रु-
तेश्च । तस्माच्छाखोलपयःस्रुक्प्रभृतीनामपि देवतात्वम् । तत्र प्रतिपदि (11.)
दर्शयागं चिकीर्षुरमावास्यायां प्रातरग्निहोत्रं हुत्वा दर्शयागार्थं ममाग्ने वर्च इति
[कात्या° २.१.३.] मन्त्रेणाग्निषु समिदाधानङ्गपमन्वाधानं (12.) कृत्वा वत्सापाकरणं
कुर्यात् ॥ दर्शयागे त्रीणि हवींषि सन्ति । आग्नेयोऽष्टाकपाल ऐन्द्रं दध्यैन्द्रं पय
इति तत्र प्रतिपदि दधि क्षोतुं दध्नो निष्पत्त्यै रात्रावामावास्यायां गावो दोग्धव्याः ।
तद्दोहनार्थं प्रातर्लौकिकदोहतादूर्ध्वं स्वमातृभिः सह चरन्तो वत्साः स्वमातृभ्यः
पलाशशाखयापाकरणीयाः । तदर्थं पलाशशाखाछिदनम् । गायत्र्या पक्षिरूपं वि-
धाय यदा दिवः सोमवद्ग्याहृता तदा तत्यत्रं (13.) भूमावुप्तं ततः पलाशोऽभव-
दिति श्रुत्या [श° ब्रा° १.७.१.१: ८.२.१०.] पलाशस्य प्राशस्त्यं ब्रह्मत्वं चोक्तं
तस्मात्पलाशशाखाछिदनम् ॥

अथ मन्त्रार्थः क्रियापदाध्याहारेण । हे शाखे इषे वृष्टये त्वा त्वां छिनद्मि ।
इष्यते वाञ्छ्यते सर्वैर्व्रीह्यादिधान्यनिष्पत्तये सा इट् । श्रुत्या वृष्टिर्व्याख्याता ।
कर्मणि क्विप् । वृष्ट्यै तदाह यदाक्षेषे त्वेति श्रुतेः [१.७.१.२.] । पर्णशाखां छिन-
त्ति शामीलीं वेषे त्वेत्यूर्जे त्वेति वा छिनद्मीति वोभयोः साकांक्षत्वात्संनमयामीति
वोत्तरऽइति कात्यायनोक्तेः [कात्या°४.२.१-३.] छिनद्मीति क्रियापदमध्याहर्तव्यम् ।
कात्यायनसूत्रस्यायमर्थः । पलाशशाखा शमीशाखा वात्र विकल्पिता । तच्छेदने
इषे त्वोर्जे त्वेति द्वौ मन्त्रौ विकल्पितौ । तयोः क्रियापदाकांक्षत्वादर्थावबोधाय
(14.) छिनद्मीति पदमध्याहर्तव्यमित्येकः पक्षः । इषे त्वेति छेदनार्थो मन्त्रः । ऊर्जे
त्वेति संनमनार्थः । संनमनमृजूकरणं । शाखामलधूल्याद्यपनयन(15.)ऽइदं पक्षा-

त्रमित्यर्थः । ऊर्जे त्वा । शाखैव देवता । हे शाखे त्वां संनहयामि ऋजूकरोमि । किमर्थमूर्जे । ऊर्ज बलप्राणनयोः । ऊर्जयति सर्वान्मनुष्यपश्वादीन्बलयति पानादिना दृढशरीरान्करोति । यद्वा प्राणयति प्रकर्षेण चेष्टयतीति व्युत्पत्तिद्वयेन वृष्टिगतो जलात्मको रस ऊर्क्शब्देनोच्यते । तस्मै रसाय त्वामनुमार्ष्मि । यो वृष्टाद्वूर्यसो जायते तस्मै तदाहेति श्रुतिः [१.७.१.२.] । एतन्मन्त्रद्वयपाठेनाधर्युरिष्यमाणमन्नं बलकरमाज्यक्षीरादिरसं च यजमाने संपादयत्येव । इषे त्वोर्जे त्वेत्याहेषमेवोर्जं यजमाने दधातीति तित्तिरिवचनात् ॥ कात्या° [४.२.७.] मातृभिर्वत्सांस्त्रूस्त्र्य वत्सꣳ शाखयोपस्पृशति वायव स्थेति । वायुर्देवता । वा गतिगन्धनयोः । वाति गच्छति वायवः गन्तारः । हे वत्साः यूयं वायवः स्थ मातृभ्यः सकाशादन्यत्र गन्तारो भवत । मातृभिः सङ्गमने सति सायं दोह्यो न लभ्यतऽइत्यभिप्रायः । यद्वा वायुसादृश्याद्वत्सानां वायुत्वम् । यथा वायुः पादप्रक्षालननिष्ठीवनादिभिरुपस्कृतां भूमिं शोषयित्वा पुनाति एवं वत्सा अप्यनुलेपनहेतुभूतगोमयादिदानेन भूमिं पुनन्ति तस्माद्वायुसादृश्यम् । अथ वा नृणां यथा स्वनिवासाय गृहनिर्माणसामर्थ्यमस्ति एवं पशूनां तदभावान्निरावरणेऽन्तरिक्षे संचरणादन्तरिक्षमेव पशूनां देवता । तस्यान्तरिक्षस्य वायुरधिपतिः स च वायुः स्वावयवानिव पशून्पालयतीति पशूनां वायुरूपत्वं । तथा पालनाय पशून्वायवे समर्पयितुं वायुरूपत्वमापाद्य वायव स्थेति मन्त्रः प्रवर्तते । तदुक्तं तित्तिरिणा । वायव स्थेत्याह वायुर्वाऽअन्तरिक्षस्याध्यक्षोऽन्तरिक्षदेवत्याः खलु पशवो वायवऽएवैतान्परिददातीति । यद्वा तृणभक्षणायाहनि तत्र तत्रारण्ये चरित्वा सायंकाले वायुवेगेन यजमानगृहे समागमनाय पशून्प्रवर्तयितुं वायुरूपत्वमुच्यते ॥ का° [४.२.१.१०.] देवो व इति मातृणामेकां व्याकृत्येन्द्रं भवति माहेन्द्रं वेति । अस्यार्थः । पूर्वसूत्राद्वाखयोपस्पृशतीति पदद्वयमनुवर्तते । वत्सानां मातरो या गावः सन्ति तासां मध्ये एकां गां व्याकृत्य पृथक्कृत्य देवो व इति मन्त्रेण शाखयोपस्पृशेत् । तथा सति गोसंबन्धिदधिरूपं हविरैन्द्रं माहेन्द्रं वा भवतीति ॥ देवो व इति मन्त्रस्येन्द्रो देवता । षू प्रेरणे । सुवति स्वस्वव्यापारे प्रेरयतीति सविता । देवः द्योतमानः परमेश्वरः हे गावो वो युष्मान्प्रार्पयतु प्रभूततृणोपेतं वनं गमयतु । किमर्थं श्रेष्ठतमाय कर्मणे । चतु-

र्विधं कर्म, अप्रशस्तं प्रशस्तं श्रेष्ठं श्रेष्ठतमं चेति । लोकविरुद्धं बधबन्धचौर्यादि-कमप्रशस्तम् ॥१॥ लोकैः श्लाघनीयं बन्धुवर्गपोषणादिकं (16.) प्रशस्तम् ॥२॥ स्मृत्युक्तं वापीकूपतडागादिकं श्रेष्ठम् ॥३॥ वेदोक्तं यज्ञरूपं श्रेष्ठतममिति तल्लक्षणं ॥४॥ यज्ञो वै श्रेष्ठतमं कर्मेति श्रुतेः [१.७.१.५.] । हे अघ्न्याः गावः गोबधस्यो-पपातकरूपत्वाद्धन्तुमयोग्या अघ्न्या इत्युच्यन्ते । तथाविधा यूयमिन्द्राय भागमिन्द्रमु-द्दिश्य संपादयिष्यमाणाऽविर्हेतुरूपं (17.) क्षीरमाप्यायध्वं समन्ताद्वर्धयध्वम् । सर्वास्व-पि गोषु क्षीरं कुरुत । ओप्यायी वृद्धौ [धा° १४.१७.] । वो युष्मानपहर्तुं स्तेन-श्चौरो मा ईशत ईश्वरः समर्थो मा भूत् । अघशंसः अघेन पापेन तीव्रेण (18.) भक्षणादिना शंसो घातको (19.) व्याघ्रादिरपि मा ईशत वो हिंसको मा भूत् । कीदृशीर्युष्मान् । प्रज्ञावतीः बह्वपत्याः । अनमीवाः अमीवा व्याधिः स नास्ति यासां ता अनमीवाः कृमिदुष्टत्वादिस्वल्परोगरहिताः । अयक्ष्माः यक्ष्मा रोगराजः प्रबलरोगरहिताः । किं च यूयं गोपतौ गवां युष्माकं पत्यावस्मिन्यज्ञमाने ध्रुवाः शाश्वतिकीः बह्वीर्बहुविधाः स्यात भवत ॥ का° [४.२.११.] यज्ञमानस्यपशूनि-त्यग्न्यागारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहतीति । हे पलाशशाखे त्वमुन्नतप्रदेशे स्थित्वा प्रतीक्षमाणा सती यज्ञमानस्य पशूनरण्ये संचरतश्चोरव्याघ्रादिभयात्पाहि रक्ष । शाखया रक्षिता गावो निरुपद्रवाः सत्यः सायं पुनरागच्छन्तीत्याशयः । य-द्यप्यचेतना शाखा तथापि तदभिमानिनीं देवतामुद्दिश्यैवमुक्तं । यथा शास्त्रज्ञा अचेतनेऽपि शालग्रामे शास्त्रदृष्ट्या विष्णुसंनिधिमभिप्रेत्य विष्णुं संबोध्य षोडशोप-चारान्विदधतेऽइत्युक्तं प्राक् ॥

अथ व्याकरणप्रक्रिया (20.) ॥ इषे ॥ इषेरिच्छार्थस्य कर्मणि क्विप् । किच्चाद्-पधागुणाभावः । तस्माच्चतुर्थ्येकवचनं । इषशब्दगत इकारो धातुस्वरेण प्रातिपदि-कस्वरेण चोदात्तः । स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् [पा° क° ६.१.२२३ परि° १.] । चतुर्थ्येकवचनस्य प्रत्ययत्वादाद्युदात्तत्वे प्राप्ते अनुदात्तौ सुप्पितावितिं [पा° ३.१.४.] तदपवादेनानुदात्तत्वे प्राप्तेऽपि सावेकाचस्तृतीयादिर्विभक्तिरित्युदात्तत्वम् [पा° ६.१.१६८.] । तस्मिन्सत्यनुदात्तं पदमेकवर्जमितीकारोऽनुदात्तः [पा° ६.१.१५८.] । यद्यप्येकशब्देन द्वयोरुदात्तयोरन्यतरो यः कोऽपि वक्तुं शक्यते तथापि सति शि-

ष्टस्वरो बलीयानिति (21.) न्यायेन [पा° क° ६.१.१५८. वा° १] विभक्तिगत उदात्त एव प्रबलः । तथा सत्यनुदात्तादिकमुदात्तान्तमिदं पदं संपन्नम् ॥ त्वा ॥ युष्मदस्मदर्थस्य युष्यसिभ्यां मदिगिति [उ° १.१३७.] मदिक्प्रत्ययान्तस्य युष्मच्छब्दस्य द्वितीयायां वेति रूपं । तस्य प्रातिपदिकस्वरेण यद्यप्युदात्तः प्राप्तस्तथाप्यनुदात्तं सर्वमपादादावित्यस्य सूत्रस्यानुवृत्तौ सत्यां [पा° ८.१.१८.] त्वामौ द्वितीयाया इति [पा° ८.१.२३.] त्वादेशविधानादयं शब्दोऽनुदात्तः ॥ ऊर्जे ॥ ऊर्ज बलप्राणनयोरस्मात्क्विप् । ऊर्जति बलवन्तं प्राणवन्तं वा करोतीत्यूर्क् अन्ननामोर्जयतीति सत इति यास्कः [निरु° १.२७.] (22.) । स्वर इषेवत् (23.) । संहितायां उदात्तादनुदात्तस्य स्वरित इति [पा° ८.४.६६.] त्वाशब्दस्य स्वरितत्वम् । मत्वद्वयस्य संहितायामूर्ज्ऽइत्यूकारस्य स्वरितात्संहितायामनुदात्तानामिति [पा° १.२.३१.] प्रचयाभिधायामेकश्रुतौ प्राप्तायां तदपवादत्वेनोदात्तस्वरितपरस्य संनतर इत्यत्यलनीचोऽनुदात्तो भवति [पा° १.२.४०.] ॥ अग्रिमस्य त्वाशब्दस्य स्वरितत्वम् ॥ एवमुत्तरपदेषु संहितास्वरा ऊह्यनीयाः ॥ वायवः ॥ वातिर्गत्यर्थात् कृवापाजिमिस्वदिसाध्यशूभ्य ऊणित्युण् [उ° १.१.] । सति शिष्टप्रत्ययस्वरेणान्तोदात्तो वायुशब्दः । जसः सुत्वादनुदात्तत्वम् । जसि चेति [पा° ७.३.१०९.] गुणेऽवादेशे च स्थानेऽन्तरतम इति [पा° १.१.५०.] परिभाषया उदात्तऽएव जाते वायव इति मध्योदात्तं पदम् । जसः स्वरितत्वं पूर्ववत् ॥ स्थ ॥ अस्तेर्लटि शपो लुकि श्नसोरल्लोप इत्यकारलोपः [पा° ६.४.१११.] । तिङुतिङ इति [पा° ८.१.२८.] निघातः ॥ देवः ॥ पचादिभ्यादच् [पा° ३.१.१३४.] । चित इत्यन्तोदात्तः [पा° ६.१.१६३.] ॥ वः ॥ ब्रूङवचनस्य वस्त्वसावित्यनुदात्तो वसादेशः [पा° ८.१.२१.] ॥ सविता ॥ षू प्रेरणे । एवुल्तृचाविति तृच् [पा° ३.१.१३३.] । इडागमः । चित्त्वादन्तोदात्तः ॥ प्र ॥ उपसर्गाश्चाभिवर्जमित्याद्युदात्तः [फि° ४.१२.] ॥ अर्पयतु ॥ ऋ गतौ । हेतुमति चेति णिच् [पा° ३.१.२६.] । अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुण्णाविति [पा° ७.३.३६.] पुक् । पुगन्तेति [पा° ७.३.८६.] गुणः । निघातश्च ॥ श्रेष्ठतमाय ॥ प्रशस्यशब्दादतिशायने तमबिष्ठनाविती ष्ठन् [पा° ५.३.५५.] । प्रशस्यस्य श्र [पा° ५.३.६०.] इति श्रादेशः । ज्ञित्यादिर्नित्यमित्याद्युदात्तत्वम् [पा° ६.१.११७.] । ततः पुनस्तमप् तस्य पित्वा-

दनुदात्तत्वम् । स्वरितप्रचयाः पूर्ववत् ॥ कर्मणि ॥ कर्तेर्मनिन् नित्वादाद्युदात्तः ॥ आ ॥ उदात्तः (24.) ॥ प्यायध्वम् ॥ ओप्यायी वृद्धौ ॥ क्तेतुमति च [पा° ३.१.२६.] (25.) । तस्य छन्दस्युभयथेत्यार्धधातुकत्वात् [पा° ३.४.११७.] णेरनिटीति णिलोपः [६.४.५१.] । निघातः ॥ अघ्याः ॥ अघ्या अकृन्तव्या भवत्यघघ्नीति वेति यास्कः [निरु° ११.४३.] । अघे नञि (26.) वोपपदे कृत्तद्ध्यादयश्चेति [ङ° ४.११३.] यगन्तो निपातः । संबुद्धित्वादामंत्रितस्य चेति [पा° ६.१.१९८.] आष्टमिको निघातः ॥ इन्द्राय ॥ इदि परमैश्वर्ये इन्धी दीप्तौ वा । इन्दति इध्यते वा तेजोभिरितीन्द्रः । ऋन्निन्द्रेत्यादिना [ङ° २.२१.] रन्प्रत्ययान्तो निपातः । नित्वादाद्युदात्तः । स्वरितप्रचयौ च ॥ भागं ॥ भज भागसेवनयोः । अकर्तरि च कारके संज्ञायामिति घञ् [पा° ३.३.१९.] । ञित्वादाद्युदात्ते प्राप्ते कर्षात्वतो घञोऽन्त उदात्त इत्यन्तोदात्तत्वम् [पा° ६.१.१५९.] । तस्यामि पूर्व इत्यमा [पा° ६.१.१०७.] सहैकादेश एकादेश (27.) उदात्तेनोदात्त इत्युदात्त एव [पा° ८.२.५.] ॥ प्रज्ञावतीः ॥ उपसर्गे च संज्ञायामिति [पा° ३.२.९९.] डनिर्डप्रत्ययः । ततष्टाप् । तेन सहैकादेशेऽप्युदात्तान्तः प्रज्ञाशब्दः । तस्मात्तदस्यास्त्यस्मिन्निति मतुप् [पा° ५.२.९४.] मादुपधायाश्च मतोर्वोऽयवादिभ्य [पा° ८.२.९.] इति मस्य वः । उगितश्चेति ङीप् [पा° ४.१.६.] । मतुपूङीपोरनुदात्तत्वात्प्रज्ञाशब्दस्वर एव । वा छन्दसीति [पा°-६.१.१०६.] पूर्वसवर्णादीर्घत्वम् ॥ अनमीवाः ॥ अम रोगे । अमिरीव इति ईवप्रत्ययः । यद्वा शेवायह्वाजिह्वायीवाद्यामीवा [ङ° १.१५३.] इत्यमेर्वन्प्रत्ययान्तो निपातः । तस्य नञा बहुव्रीहौ [पा° २.२.६.] समासस्य चेत्यन्तोदात्ते प्राप्ते [पा° ६.१.२२३ः २.१६२.] । तदपवादेन बहुव्रीहौ प्रकृत्या पूर्वपदमिति [पा° ६.२.१.] पूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादेन नञ्सुभ्यामित्यन्तोदात्तत्वम् [पा° ६.२.१७२.] ॥ अयक्ष्माः ॥ तद्धितस्वरः ॥ मा ॥ निपाता आद्युदात्ताः ॥ स्तेनः ॥ स्तेन चौर्ये स्तेनयति चोरयतीति स्तेनः । पचाद्यच् । चित्वादन्तोदात्तः ॥ ईशत ॥ ईश ऐश्वर्ये । छन्दसि लुङ्लङ्लिट इति लङ् [पा° ३.४.६.] । व्यत्ययो बहुलमिति [पा° ३.१.८५.] बहुवचनं न माङ्योग इत्यडभावः [पा° ६.४.७४.] । निघातश्च ॥ अघशंसः ॥ अघ पापकरणे । पचाद्यजन्तोऽघशब्दोऽन्तोदात्तः । अघं शंसतीत्यघशंसः । शंसि इच्छायाम् । अच् । तत्पुरुषे तुल्यार्थेत्यादिना [पा° ६.२.२.] पूर्वपदप्रकृ-

तिस्वरत्वम् ॥ ध्रुवाः ॥ ध्रुव स्थैर्ये । इगुपधज्ञाप्रीकिरः क इति कः (28.) [पा° ३. १.१३५.] । प्रत्ययस्वरेणान्तोदात्तो ध्रुवशब्दः ॥ अस्मिन् ॥ इणो दमुगिति एतेर्दमुक् । अन्तोदात्त इदंशब्दः तस्मात् ङेरस्मिन् । तस्य ऊडिदंपदाद्यप्पुभ्रेगुभ्य [पा° ६.१.१७१.] इत्युदात्तत्वम् ॥ गोपतौ ॥ गमेर्डोरिति [उ° २. ६६.] गोशब्दः प्रत्ययस्वरेणोदात्तः । गवां पतिरिति तत्पुरुषे (29.) पत्यावैश्वर्यऽइति पूर्वपदप्रकृतिस्वरत्वम् [पा° ६.२.१८.] ॥ स्यात ॥ अस्तेः प्रार्थनायां लिङ् तस्यस्यमिपां (30.) [पा° ३.४.१०१.] । यासुट् सलोपोऽल्लोपश्च (31.) । तिङ्तिङः ॥ वह्नीः ॥ बह्वशब्दात् वोतो गुणवचनादिति [पा° ४.१.४४.] ङीष् । वा छन्दसीति [६.१.१०६.] ङसः पूर्वसवर्णत्वम् । प्रत्ययस्वरेणान्तोदात्तः ॥ यज्ञमानस्य ॥ पूज्यजोः शानन्निति [पा° ३.२.१२८.] यजतेः शानन् । नित्वादाद्युदात्तः ॥ पशून् ॥ पश्यन्ति गन्धेनेति पशवः । अर्जिदृशिकमीत्यादिना [उ° १.२७.] दृशेः कुप्रत्ययः पशादिशश्च । प्रत्ययस्वरेणान्तोदात्तः ॥ पाहि ॥ पा रक्षणे । लोट् । तिङ्तिङः ॥ एवमग्रे पदस्वरप्रक्रियोक्तनीया विस्तरभयान्नोच्यते ॥ १ ॥

II. a. वसोः पवित्रमसि । b. द्यौरसि पृथिव्यसि । c. मातरिश्वनो घर्मोऽसि विश्वधा असि. परमेण धाम्ना दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥ २ ॥

का° [४.२.१५.१६.] वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशौ त्रिवृद्वेति ॥ वासयति वृष्ट्यादिद्वारा स्थापयति विश्वमिति वसुर्यज्ञः । यज्ञो वै वसुर्यज्ञस्य पवित्रमसीति श्रुतेः [१.७.१.६.] । यज्ञशब्देन तदीयकविर्द्रव्यरूपं क्षीरं लक्ष्यते । हे दर्भमय पवित्र वसोः इन्द्रदेवताया निवासहेतोः पयसः शोधकं पवित्रं त्वमसि । अनेन मन्त्रेण पवित्रं कृत्वा पर्णशाखायां बध्नीयात् । द्वौ कुशौ कुशत्रयं वा पवित्रमुच्यते ॥ का° [४.२.१६.] द्यौरसीति स्थाल्यादानमिति ॥ यस्यां स्थाल्यां क्षीरं प्रक्षेप्तव्यं तद्ग्रहणार्थोऽयंमन्त्रः । हे स्थालि मृज्जलाभ्यां निष्पन्ना त्वं द्यौरसि । जलहेतुवृष्टिप्रदद्युलोकरूपासि । द्युसंबन्धात्तद्रूपत्वमस्यामुपचर्यते । तथा पृथिव्यसि । पृथिव्याः सकाशाद्धृतया (32.) मृदा निष्पन्नत्वात्पृथिवीरूपत्वम् ॥ का° [४.२.२०.] मातरिश्वन इत्यधिश्रयतीति । गार्हपत्याद्उदीचोऽङ्गारान्निरूह्य तेषूखा-

मधिश्रयति । हे उखे त्वं वायोर्घर्मः दीपकोऽन्तरिक्षलोकोऽसि । मातर्यन्तरिक्षे श्व-सिति निश्वासवच्चेष्टां करोतीति मातरिश्वा वायुः ॥ घर्मः ॥ घृ क्षरणदीप्त्योः । घर्मो दीपकः । संचारस्थानप्रदानेन वायोर्दीपकोऽभिव्यञ्जकोऽन्तरिक्षलोकः । हे स्थालि तवोदरेऽप्यन्तरिक्षरूपस्यावकाशस्य वायुसंचारस्य सद्भावात्त्वमपि वायोर्घ-र्मरूपासि ॥ द्यौरसि पृथिव्यसीति पूर्वमन्त्रे लोकद्वयरूपत्वमुखाया उक्तम् । अत्र मातरिश्वनो घर्मोऽसीत्यन्तरिक्षलोकरूपत्वमुच्यते । तस्मादिषां त्रयाणां लोकानां धारणात् विश्वधा असि । विश्वं दधातीति विश्वधाः । विश्वधारणसमर्थासि लोक-त्रयरूपत्वात् । किं च । परमेण धाम्ना उत्तमेन बहुनोरधारणसामर्थ्यरूपेण तेजसा हे उखे त्वं दृंहस्व दृढा भव वन्निष्ठस्य क्षीरस्य गलनं वारयितुम् । अन्यथा भ-ग्नायास्तव छिद्रेण क्षीरं गलेत् । दृहि वृहि वृद्धाविति [धा° १७. ८४.] धातुर्यद्य-पि वृद्ध्यर्थस्तथापि दार्ढ्ये सति भङ्गाभावेन चिरमवस्थानाद्दार्ढ्यं नाम कालवृद्धिरेव भवति । किं च हे उखे मा क्ष्वाः कुटिला मा भव । क्ष्वे कौटिल्ये । यद्युखा कु-टिला भवेत्तदानीमवाङ्मुखायां (33.) सत्यां तत्स्थं क्षीरं गलेत् । अतः क्षीरधा-रणाय दार्ढ्यमकौटिल्यं चार्थ्यते । किं च । ते यज्ञपतिस्त्वत्सम्बन्धी यजमानो मा क्ष्वार्षीत् कुटिलो मा भूत् । वन्निष्ठक्षीरस्कन्दनेनानुष्ठानविघ्न एव यजमानस्य कौ-टिल्यं तच्च त्वदीयेन दार्ढ्येन कौटिल्याभावेन च न भविष्यतीति प्रार्थ्यते ॥ २ ॥

a. वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । b. देव-स्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा । c. कामधुक्षः ॥ ३ ॥

का° [8. २. २१.] वसोः पवित्रमिति पवित्रमस्यां करोत्युदग्वेति । अस्यामुखा-यां स्थापनीयस्य पवित्रस्य प्रागग्रत्वं सामान्यतः प्राप्तमिति सिद्धवत्कृत्योदग्गत्वं (34.) विकल्प्यते ॥ हे शाखापवित्र वसोरिन्द्रदेवतानिवासहेतोः पयसः शोधकं पवित्रं त्वमसि । पवित्रेण व्यवधानि सति क्षीरेण सह स्थाल्यां पततां तृणपर्णा-दीनां प्रतिबध्यमानत्वात्पवित्रस्य क्षीरशोधकत्वम् । किंभूतं पवित्रम् । शतधारम् । शतसंख्या धारा यस्मिन् । तथा सहस्रधारम् । सूक्ष्मैः पवित्रछिद्रैः स्थाल्यां पत-न्तीनां क्षीरधाराणां शतसहस्रसंख्याकानां सद्भावाच्छोदकत्वमार्कुतम् । वसोः पवि-

त्रमिति द्विरुक्तिः । अभ्यासे भूयांसमर्थं मन्यंते [निरु० १०.४२.] ॥ का० [४.२.२३.] देवस्त्वेत्यासिच्यमाने ब्रूपतीति । पयो देवता । दोहनादूर्ध्वं स्थाल्यां सिच्यमान हे क्षीर सविता प्रेरको देवः पूर्वोक्तरीत्या शतधारेण वस्त्रेः पवित्रेण त्वा वां पुनातु शोधयतु । सुष्वेति पवित्रविशेषणं सुष्ठु पुनातीति सुपु तेन सुष्वा । का० कामधुक्ष इति प्रश्न इति [४.२.२४.] एकस्यां गवि दुग्धायां दोग्धारं प्रत्यध्वर्युः पृच्छेत् । हे दोग्धः विद्यमानानां गवां मध्ये कामधुक्षः दुग्धवानसि ॥३॥

a. सा विश्वायुः । b. सा विश्वकर्मा । c. सा विश्वधायाः । d. इन्द्रस्य त्वा भागꣳसोमेनातनच्मि । e. विष्णो हव्यꣳरक्ष ॥४॥

का० [४.२.२५.] प्रोक्ते सा विश्वायुरित्याहेति ॥ पूर्वोक्तप्रश्नस्योत्तरे अमूं गामिति दोग्ध्रा प्रोक्ते सति सा विश्वायुरिति मन्त्रेण दोग्धारं प्रत्यध्वर्युर्ब्रूयात् । या गौस्त्वया दुग्धा मया च पृष्टा सा विश्वायुःशब्देनाभिधेया । विश्वमायुर्यस्याः सा विश्वायुः यज्ञमानस्य सम्पूर्णमायुः प्रयच्छतीत्यर्थः ॥ का० [४.२.२६.] एवमितरे उत्तराभ्यामिति । यथा प्रथमा गौः पृष्टा एवमितरे द्वितीयतृतीये गावौ तदोहनादूर्ध्वं कामधुक्ष इति मन्त्रेण प्रष्टव्ये । दोग्धा तूत्तरेऽमूमिति प्रोक्ते सा विश्वकर्मा सा विश्वधाया इति मन्त्राभ्यां क्रमेण तयोरशिषं ब्रूयात् । या द्वितीया गौस्त्वया पृष्टा सा विश्वकर्मा या तृतीया गौस्त्वया पृष्टा सा विश्वधायाः । डुधाञ् धारणपोषणयोः । विश्वान्सर्वान्देवान्दधाति क्षीरदध्यादिरूपविर्दानेन पुष्णातीति विश्वधायाः । असुन्प्रत्ययो णिच्च । णिच्चादातो युक्चिण्कृतोरिति [पा० ७.३.३३.] युक् । यद्वा । धेट् पाने । विश्वानिन्द्रादिदेवान्क्षीरादिरूपं धापयति पाययतीति विश्वधायाः ॥ का० [४.२.३३.] उद्धास्यातनक्ति प्राग्घुतशेषिणेन्द्रस्य त्वेति ॥ क्वथितं क्षीरमग्नेरुद्धास्य मन्दोष्णं (35.) तत्र प्रातःकालीनसोमावशिष्टेन दध्ना दधिनिष्पत्तये आतञ्चनं कुर्यात् । हे क्षीर इन्द्रस्य भागं त्वां सोमेन सोमवल्क्षीरसेनातनच्मि । दध्यर्थं कठिनीकरोमि । तञ्चतिः कठिनीकरणार्थः । यद्यप्यत्रातञ्चनकेतुर्दधिशेषस्तथापि भावनया तस्य सोमत्वं संपद्यते । यथा कश्चित्पुमान्बन्धुत्वेन भावितो बन्धुर्भवति प्रातिकूल्येन भावितः शत्रुश्च । तदुक्तं वसिष्ठेन । बन्धुत्वे भावितो बन्धुः परत्वे भा-

वितः परः । विषामृतदृशैवेह (36.) स्थितिर्भावनिबन्धनीति ॥ भोज्यं वा विषत्वेन भावितं वान्तिं करोति अमृतत्वेन भावितं जीर्णं सद्बलहेतुर्भवति । तथात्र दधिशेषस्य (37.) भावनया सोमत्वम् ॥ का° [४. २. ३४.] सोदकेनापिदधात्यमृन्मयेन विष्णो हव्यमितीति ॥ हे विष्णो इदं हव्यं क्षीरं रक्ष । सर्वत्र सृष्टौ पालने संहरि च ब्रह्मविष्णुमहेश्वरा अभिमानिन्यो देवताः । अतो विष्णुं सम्बोध्य हविषो रक्षा प्रार्थ्यते ॥४॥

III. a. अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । b. इदमहमनृतात्सत्यमुपैमि ॥५॥

का° [२. १. ११.] अपरेणाहवनीयं प्राङ्मिश्रमग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैत्यग्ने व्रतपत इदमहमिति वेति ॥ हे व्रतपते व्रतस्यानुष्ठेयस्य कर्मणः पते पालक हे अग्ने त्वदनुज्ञया व्रतं चरिष्यामि कर्मानुष्ठास्यामि । तत् शकेयम् तत्कर्मानुष्ठातुं शक्तो भूयासं । त्वत्प्रसादात् । तन्मे राध्यतां मदीयं तत्कर्म निर्विघ्नं सत् फलपर्यन्तं सिध्यतु । शकिराशीर्लिङ्यासुट् । लिङ्याशिष्यङ् [पा° ३. १. ८६.] । अतो येयः [पा° ७. २. ८०.] गुणः शकेयम् । अग्निर्वै देवानां व्रतपतिरिति श्रुतिः [१. १. १. २.] ॥ इदमहं ॥ अहं यजमानोऽस्मादनृतान्मनुष्यजन्मन उद्गत्य सत्यं देवताशरीरं उपैमि प्राप्नोमि । सत्यमनुष्ठीयमानकर्मरूपेण प्रत्यक्षमिति मन्वान इदमिति विशिनष्टि । अनृतं मनुष्यजन्म शीघ्रविनाशित्वात् । यथा स्वप्नगन्धर्वादयो बोधमात्रेण शीघ्रं निवर्तमाना अनृता उच्यन्ते । सत्यं देवजन्म बहुकालस्थायित्वात् यथा जागरणगन्धर्वादयः । श्रुतिरपि [१. १. १. ४.] । इदमहमनृतात्सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपावर्तत इति । यद्वा लोकप्रसिद्धे एव सत्यानृते ग्राह्ये । नानृतं वदेदिति कर्मण्यनृतनिषेधात् । अनृतवदनादुद्गत्याहमिदं सत्यवदनमुपैमि । अत इदं सत्यवदनं कर्माङ्गत्वात्कर्मकाले पालनीयम् ॥५॥

a. कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।
b. कर्मणे वां वेषाय वाम् ॥६॥

एवं व्रतमुपेत्य ब्रह्माणं वृत्वापां प्रणयनं कुर्यात् । का° [२.३.२.३.] ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेत्याह्वानुज्ञात उत्तरेणाहवनीयꣳ संप्रति निदधाति कस्त्वा युनक्तीति ॥ अत्र मन्त्रं प्रयुञ्जानोऽध्वर्युर्यज्ञारम्भकर्मणयात्मनः कर्तृत्वमपनीय प्रजापतेर्यज्ञकर्तृत्वं प्रश्नोत्तररूपाभ्यां मन्त्रवाक्याभ्यां प्रतिपादयति । प्रणीतानामपां धारक हे पात्र त्वां कः पुरुषो युनक्ति आहवनीयस्योत्तरभागे स्थापयतीति प्रश्नः । तक्वन्दः प्रसिद्धार्थवाची । सर्वेषु वेदेषु जगन्निर्वाहकत्वेन प्रसिद्धो यः प्रजापतिरस्ति स एव परमेश्वरः हे पात्र त्वां युनक्तीत्युत्तरं । पुनरपि कस्मै प्रयोजनाय त्वां युनक्तीति प्रश्नः तस्मै प्रजापतये तत्प्रीत्यर्थं वा युनक्तीत्युत्तरम् । सर्वकर्माणि परमेश्वरप्रीत्यर्थमनुष्ठेयानीति भगवद्गीतास्वर्जुनं प्रति भगवतोक्तम् । भ° गी° १८. ५६. । ९. २७. इति च । ४. २४. नेतिच ॥ परिस्तीर्य द्वन्द्वशः पात्राण्यासाद्य शूर्पं चाग्निहोत्रहवणीं चादत्ते । का° [२.३.१०.] कर्मणे वामिति शूर्पाग्निहोत्रहवण्यादत्त इति (38.) ॥ कर्मणे ॥ हे अग्निहोत्रहवणि हे शूर्प युवां कर्मार्थमहमाददे इति शेषः । वेषाय च । विषॢ व्याप्तौ । घञ् वेषो व्याप्तिः । सूचितकर्मसु व्याप्त्यर्थं च वां युवामहमाददे । शकटेऽवस्थितानां व्रीहीणां हविरर्थं पृथक्करणं प्रोक्षणार्थोदकधारणमित्यादयोऽग्निहोत्रहवणीव्यापाराः । व्रीहिनिर्वापधारणमुलूखले व्रीहिप्रक्षेपः पुनरुद्धरणं चेत्यादयः शूर्पव्यापाराः ॥ ६॥

a. प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ।

b. निष्टप्तꣳ रक्षो निष्टप्ता अरातयः ।

c. ऊर्वन्तरिक्षमन्वेमि ॥७॥

का° [२.३.११.] प्रतपनं प्रत्युष्टं निष्टप्तमिति वेति । रक्षः राक्षसजातिः । प्रत्युष्टं प्रत्येकं दग्धं । उष दाहे । अनेनाग्निहोत्रहवणीशूर्पयोः प्रतपनेनात्रस्थिता राक्षसा दग्धा इत्यर्थः । अरातयोऽपि प्रत्युष्टाः प्रत्येकं दग्धाः । रा दाने । हविषो दक्षिणाया वा दानं रातिः । रातिः प्रतिबन्धका अरातयस्तेऽपि दग्धा अन्यथा (35.) न यज्ञसाधनमित्यर्थः । शूर्पादौ निगूढं रक्षो निष्टप्तं निःशेषेण तप्तं संतप्तम् । तप संतापे । अरातयश्च निष्टप्ताः । अनयोर्मन्त्रयोर्विकल्पः ॥ का° गृह्णत्युर्वन्तरिक्षमि-

तीति । उरु विस्तीर्णमन्तरिक्षमवकाशमन्वेमि अनुसृत्य गच्छामि । गच्छतः पुरुषस्य पार्श्वयोरिव स्थितं रक्षोऽनेन मन्त्रेण निराक्रियते इत्याशयः ॥७॥

a. धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः ।
b. देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥८॥

का° [२.३.१२.१३.] अपणास्य पश्चादनस्तिष्ठत्समङ्क्ति धूरसीति धुरभिमर्शनमिति । अस्यायमर्थः अपणास्य पुरोडाशपाकहेतोर्गार्हपत्यस्य पश्चादनः शकटं व्रीहियुक्तं तिष्ठति । तच्च समङ्क्ति सम्यगङ्गानि यस्य तत् सर्वाङ्गोपेतं तस्य धुरं बलीवर्दवहनयोग्यं युगप्रदेशं धूरसीति मन्त्रेण स्पृशेदिति ॥ अथ मन्त्रार्थः । व्रीहिद्रुपहविर्धारकशकटसम्बन्धिनो युगस्य बलीवर्दवहनप्रदेशे कश्चिद्धिंसकोऽग्निः शास्त्रदृष्टोऽस्ति तं प्रार्थयते । अग्निर्वाऽएष धुर्यस्तमितदत्येष्यन्भवतीति श्रुतेः [१.१.२.१०.] । हे वह्ने त्वं धूरसि हिंसकोऽसि । तुर्वीधुर्वीडुर्वीधुर्वी हिंसार्थाः धुर्वतेः क्विप् । यतो धूरसि अतो धूर्वन्तं हिंसन्तं पाप्मानं धूर्व विनाशय । किंच यो राक्षसादिर्यागविघ्नेनास्मान्धूर्वति हिंसितुमुद्युक्तस्तमपि धूर्व विनाशय यं च वयं धूर्वामस्तमपि धूर्व यमालस्यादिदूषं वैरिणं वयमनुष्ठातारो धूर्वामो हिंसितुमुद्यतास्तमपि धूर्व विनाशय । शकटस्थिताग्न्यतिक्रमणनिमित्तमपराधमपङ्क्तोतुमग्न्याधारभूता शकटस्य धूरनेन मन्त्रेण स्पृश्यते ॥ का° [२.३.१४.] देवानामित्युपस्तम्भनस्य पश्चादीषामिति । शकटस्य दीर्घं काष्ठमीषा तदग्रस्य भूमिस्पर्शो मा भूदिति तदाधारत्वेन स्थापितं काष्ठमुपस्तम्भनं तस्य पश्चाद्भागे तामीषां स्पृशेत् । देवानामसि । हे शकट त्वं देवानां सम्बन्धि भवसि । किम्भूतं वह्नितमं वह प्रापणे वहतीति वह्निः । अतिशयेन वह्निं वह्नितमम् । व्रीहिद्रुपस्य हविषोऽतिशयेन प्रापकम् । तथा सस्नितमम् ष्णा शौचे अतिशयेन शुद्धम् आदृगमित्यादिना [पा° ३.२.१७१.] किप्रत्ययः । यद्वा स्ना वेष्टने । दार्ढ्याय चर्मादिभिरतिशयेन वेष्टितम् । पप्रितमम् प्रा पूरणे व्रीहिभिरतिशयेन पूरितम् । जुष्टतमम् जुषी प्रीतिसेवनयोः । देवानामतिशयेन प्रियम् । देवहूतमम् ह्वेञ् स्पर्धायां शब्दे च देवानामतिशयेनाह्वातृ व्रीहिपूर्णं शकटं दृष्ट्वा देवा आहूता इव शीघ्रमागच्छन्ति ॥८॥

अक्रुतमसि कविर्धानं दृꣳहस्व मा क्वार्मा ते यज्ञपतिर्क्वार्षीत् । c. विष्णुस्त्वा क्रमताम् । d. उरु वाताय । e. अपकृतꣳ रक्षः । f. यꣳस्ताम्पद्भ्यां ॥ १ ॥

अक्रुतमसि । कृ कौटिल्ये क्तप्रत्ययः । कुक्वोश्छन्दसीति [पा° ७.२.३५.] निष्ठायां कु आदेशः । अक्रुतमकुटिलमसि । आरोहणेऽपि भङ्गभीतिर्नास्तीत्यर्थः । कविर्धानम् डुधाञ् धारणपोषणयोः । कविषो व्रीहिरूपस्य धारकं पोषकं भवसि । अतो दृꣳहस्व मा क्वार्मा ते यज्ञपतिर्क्वार्षीदिति पूर्ववद्व्याख्येयम् ॥ का° [२.३.१५.] विष्णुस्त्वेत्यारोहणमिति । हे शकट विष्णुर्व्यापको यज्ञः त्वा त्वां क्रमतां पादिनाक्रम्यारोहतु नाहं समर्थ इति भावः ॥ का° [२.३.१६.] प्रेक्षत उरु वाताय इति कविष्यानिति । हे शकट वाताय उरु भवेति शेषः । त्वदन्तर्वर्तिव्रीहिषु वायुसंचाराय विस्तीर्णं भव । शकटस्य व्रीहीणां तृणाद्याच्छादितत्वात्संकोचे वायुप्रवेशाभावादाच्छादनमपनीय यथा वायुः प्रविशति तथा संकोचं परित्यजेत्यर्थः । वायुरूपप्राणप्रवेशाद्धविः सप्राणं क्रियते मन्त्रेण । किं च वायुप्रवेशरहितं सर्वं वस्तु वरुणदैवत्यं भवति । वरुणश्च बन्धकारित्वाद्यज्ञनिरोधकस्तन्निवृत्त्यर्थमयं (37.) मन्त्रः । यद्वै किं च वातो (38.) नाभिभवति तत्सर्वं वरुणदैवत्यमुरु वानयेत्याह वारुणमेवैतत्करोतीति तित्तिरिवचनात् ॥ का° [२.३.११.१८.] अपकृतमिति निरस्यत्यन्यद्विद्यमानेऽभिमृशेदिति । व्रीहिभ्योऽन्यत्तृणादि यदि तत्र भवेत्तदनेन निरस्येत्तृणाद्यभावे व्रीहीनभिमृशेदिति (39.) सूत्रार्थः । अथ मन्त्रार्थः । रक्षो यज्ञविघातकमपकृतं निराकृतं तृणादिकमेव रक्ष उच्यते ॥ का° [२.३.१९.] यꣳस्तामित्यालभत इति । पञ्चसंख्याका अङ्गुलयो व्रीहिरूपं कविर्यꣳस्तां नियꣳस्तु । अनेन पञ्चाङ्गुलियुक्तेन मुष्टिना व्रीहीन्गृह्णीयादित्यर्थ उक्तो भवति ॥ १ ॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. अग्नये जुष्टं गृह्णामि ।

c. अग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ १० ॥

का° [२.३.२०-२२.] देवस्य त्वेति गृह्णात्यग्नेयं चतुरो मुष्टीनिवमग्नीषोमीयं यथादेवतमन्यदिति । हे कविः सवितुः देवस्य प्रसवे प्रेरणे सति तेन प्रेरितोऽहमग्नये जुष्टं प्रियं त्वा गृह्णामि । अग्नीषोमाभ्यां व्यासक्तदेवाभ्यां च जुष्टं त्वा गृह्णामि । काभ्यामश्विनोर्बाहुभ्यां पूष्नो हस्ताभ्यां च । अंसमणिबन्धयोर्मध्यभागो दीर्घदण्डाकारो बाहुः । पश्चाङ्गुलियुक्तोऽग्रभागो हस्तः । अश्विनौ हि देवानामध्वर्यू । पूषा हि देवानां भागधुक् । अतो ग्रहणसाधनयोः स्ववाक्कोरश्विबाहुभावना कार्या । हस्तयोस्तु पूषहस्तभावनेति भावः । सर्वात्मकस्याग्नेर्हविस्तादृशं मनुष्येण कथं ग्रहीतुं शक्यमिति सवित्रानुज्ञातोऽश्विबाहुभ्यां पूष्नो हस्ताभ्यां गृह्णामीत्यर्थः । किं च सत्यं देवा अनृतं मनुष्या इति श्रुतेः [१.१.२.१७.] देवानां सत्यरूपत्वात्तदनुस्मृतिपूर्वकं हविर्ग्रहणं फलपर्यवसायित्वात्सत्यं भवति । देवतास्मृत्यभावे तु मनुष्याणामनृतरूपत्वात्तत्कृतमनुष्ठानं निःफलत्वादनृतं भवतीति देवतास्मरणमित्यभिप्रायः । हविर्गृह्णन्तमध्वर्युं देवताः सेवन्ते मम नाम ग्रहीष्यतीति । अनामग्रहं हविषि गृहीते तासां मिथः कलहो भवेदिदं मदर्थं गृहीतमिति । तत्कलहनिवृत्त्यर्थमग्नये जुष्टमग्नीषोमाभ्यां जुष्टमिति देवतानिर्देशपूर्वकं हविर्ग्रहणमित्यभिप्रायः ॥ १० ॥

a. भूताय त्वा नारातये । b. स्वरभिविख्येषम् ।

c. दृꣳहन्तां दुर्याः पृथिव्याम् ।

d. उर्वन्तरिक्षमन्वेमि ।

e. पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यꣳरक्ष ॥ ११ ॥

का° [२.३.२३.] भूताय त्वेति शेषाभिमर्शनमिति । हे व्रीहिशेष शकटावस्थित भूताय भवनाय यागान्तराणां ब्राह्मणभोजनस्य च पुनरपि सद्भावाय त्वा संपरिशेषयामीति शेषः । न अरातये अदानाय शेषयामि ॥ का° [२.३.२४.] स्वरिति प्राङीक्षत इति । अहं स्वरभिविख्येषं यज्ञं पश्येयं यज्ञो वै स्वरुर्देवाः सूर्य इति श्रुतेः [१.१.२.२३.] यज्ञदिवसदेवसूर्याः स्वःशब्देनोच्यन्ते । स्वर्गहेतुत्वादपि स्वःशब्देन यज्ञः । ख्या प्रकथने अभिविख्येषमभितो विशेषेण ख्यापयेयं पश्येयमित्यर्थः ।

अनेन मन्त्रेण प्राङ्मुखो यज्ञभूमिं वीक्षते ॥ का° [२.३.२५.] दृꣳहन्तामित्यवरोहतीति । पृथिव्यां वर्तमाना दुर्या गृहा दृꣳहन्तां दृढा भवन्तु । अनेन मन्त्रेण शकटाद्वरोहेत् । दुरो द्वाराण्यर्हन्तीति दुर्या गृहाः । हविर्गृहीत्वोत्तरतोऽध्वर्योर्भरिणा गृहस्थोभः सम्भाव्यते सोऽनेन मन्त्रेण वार्यते ॥ का° [२.३.२६.] गहत्युर्वन्तरिक्षमिति व्याख्यातम् ॥ का° [२.३.२७.] अपणस्य पश्चात्सादयति पृथिव्यास्त्वेति । हे हविः पृथिव्या नाभौ मध्ये त्वां सादयामि स्थापयामि । तस्यैव व्याख्यानम् । अदित्या उपस्थ इति । (40.a.) उपस्थेऽङ्के यथा सुप्तं बालं पुत्रं माता स्वाङ्के स्थापयति । एवमिदं हविरदित्या उपस्थे भूम्या अङ्के सादयामि । हे अग्ने तव समीपे स्थापितमिदं हव्यं त्वं रक्ष । सुप्तं पुत्रमिव बाधकेभ्यः (40.) पालय ॥ ११ ॥

IV. a. पवित्रे स्थो वैष्णव्यौ ।

b. सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।

c. देवीरापोऽग्रेगुवोऽग्रेपुवोऽग्रऽइममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम् ॥ १२ ॥

का° [२.३.३२.] कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति पवित्रे स्थ इति त्रीन्वेति । वैष्णवे इति प्राप्ते व्यत्ययो बहुलमिति [पा° ३.१.८५.] स्त्रीत्वम् । हे पवित्रे शोधके कुशद्वयरूपे युवां वैष्णवे यज्ञसम्बन्धिनी स्थः भवथः । यज्ञो वै विष्णुर्यज्ञिये स्थ इति श्रुतेः [१.१.३.१.] ॥ का° [२.३.३३.] हविर्ग्रहणयोग्यमपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इतीति । सवितुः प्रेरकस्य प्रसवे प्रेरणे सति हे आपो वो युष्मानुत्पुनामि केन अच्छिद्रेण पवित्रेण छिद्रहीनेन शोधकेन वायुरूपेण । यो वा अग्नं पवत एषोऽच्छिद्रं पवित्रमिति श्रुतेः [१.१.३.६.] । सूर्यस्य रश्मिभिः शुद्धिहेतुभिरुत्पुनामीति सम्बन्धः । वायोः सूर्यरश्मीनां च पादप्रक्षालनाद्युपकृतभूमिशुद्धिहेतुत्वं प्रसिद्धम् ॥ का° [२.३.३५.] सव्ये कृत्वा दक्षिणोनोदिङ्गयति देवीराप इतीति । उत्पूताभिरद्भिः पूरितामग्निहोत्रहवणीं सव्यहस्ते स्थापयित्वा मन्त्रमुच्चारयन्दक्षिणहस्तेनोर्द्धं चालयेदिति सूत्रार्थः । मन्त्रार्थस्तु हे देवीः आपः द्योतनात्मिका आपो यूयमद्यास्मिन्दिने इममिदानीं प्रवर्तमानं यज्ञमग्रे नयत पुरतः प्र-

वर्तयत निर्विघ्नं समापयत । किम्भूता आपः । अग्रेगुवः अग्रे गच्छन्तीत्यग्रेगुवः पुरतो निम्नदेशं प्रति गमनशीलाः । तथा अग्रेपुवः अग्रे पुनन्त्यग्रेपुवः अग्रे यस्मिन्पूर्वभागे गच्छन्ति तस्मिन्नपङ्क्तिनिवारणेन शोधनशीलाः । यद्वाग्रे पिबन्तीत्यग्रेपुवः प्रथमं सोमरसस्य पानकर्त्र्यः । गमेः क्विप्प्रत्यये गमः क्वावित्यनुनासिकलोपे [पा° ६.४.४०.] पुनातेः पिबतेर्वा क्वौ ऊङ् गमादीनामित्यूकारः [पा° क° ६.४.४०. वा° २.] । किं च यज्ञपतिं यजमानमग्रे नयतेत्यनुवर्तते फलभोगाय प्रेरयत कथम्भूतम् सुधातुम् सुष्ठु दक्षिणादिना दधाति यज्ञं पुष्णातीति सुधातुस्तं यज्ञस्य पतिं पालयितारम् । एको यज्ञपतिशब्दो योगेन व्याख्येय एको रूढ्या । तथा देवयुवम् । यु मिश्रणे । देवान्यौति यज्ञादिना मिश्रीकरोति देवयुस्तं । क्विप् । अनित्यमागमशासनमिति तुगभावः । यद्वा देवान्कामयते इति देवयुस्तं । इदम्युरिदं कामयमान इति यास्कोक्तिः [निरु° ६.३१.] सुप आत्मनः क्यङिति क्यच् [पा°३.१.८.] क्यचि चेतीत्वे [पा° ७.४.३३.] प्राप्ते न छन्दस्यपुत्रस्येति [पा° ७.४.३५.] ईत्वाभावः । अश्वाघस्यादिति [पा° ७.४.३७.] अश्वाघयोरेवात्वविधानादकृत्सार्वधातुकयोरिति [पा° ७.४.२५.] प्राप्तो दीर्घो न भवति । ततः क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः । देवयुशब्दस्यामि परेऽमि पूर्व इति [पा° ६.१.१०७.] प्राप्तस्य पूर्वरूपस्य वा छन्दसीति [पा° ६.१.१०६.] विकल्पेन तन्वादीनां वा इयङ्उवङावित्युवङ् [पा° क° ६.४.६८. वा° १.] ॥१२॥

युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये । d. प्रोक्षिता स्थ । e. अग्नये त्वा जुष्टं प्रोक्षामि । f. अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि । g. दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥१३॥

हे आपः इन्द्रो देवः वृत्रतूर्ये तूर्यतिर्बधकर्मा (41.) । वृत्रबधे निमित्तभूते सति युष्माः युष्मानवृणीत आकारश्छान्दसः । सकारित्वेन प्रार्थितवान्यूयमपि वृत्रतूर्ये निमित्ते तमिन्द्रमवृणीध्वं वृतवत्यः सकारित्वेन ॥ का° [२.३.३६.] प्रोक्षिता स्थेति तासां प्रोक्षणमिति । हे आपो यूयं प्रोक्षिता भवथ । असंस्कृता अन्यसं-

स्कारक्षमा न भवतीति ॥ का° [२. ३. ३७. ३८.] हविश्चाग्नये त्वाग्नीषोमाभ्यां त्वेति यथादेवतमन्यदिति । अन्यदपि हविस्तद्देवतोच्चरिण (42.) प्रोक्षणीयम् । अग्नये त्वा जुष्टं प्रोक्षामि । अग्नीषोमाभ्यां जुष्टं त्वा प्रोक्षामि ॥ का° [२. ३. ३१.] पात्राणि दैव्यायेति । कृष्णाजिनोलूखलादीनि प्रोक्षेत् । हे यज्ञपात्राणि यूयं शुन्धध्वं शुद्धानि भवत । किमर्थम् दैव्याय कर्मणे अग्न्यादिदेवतासम्बन्धिने कर्मणे । तदेव कर्म विशिष्यते । देवयज्यायै देवसम्बन्धिन्यै यागक्रियायै दर्शादिकायै । किं च । अशुद्धाः नीचजातयस्तद्धादयो वो युष्माकं सम्बन्धि यदङ्गं पराजघ्नुः पराहतं कृतवन्तः । छेदनतक्षणादिकाले स्वकीयहस्तस्पर्शदूषणमशुचित्वं चक्रुः । तदिदं वो युष्माकमङ्गं शुन्धामि प्रोक्षणेन शुद्धं करोमि ॥ १३ ॥

V. a. शर्मासि । b. अवधूतꣳ रक्षोऽवधूता अरातयः ।

c. अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ।

d. अद्रिरसि वानस्पत्यः ।

e. ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥ १४ ॥

का° [२. ४. १.] शर्मासीति कृष्णाजिनादानमिति । हे कृष्णाजिन त्वमुलूखलस्य धारणार्थं शर्म सुखहेतुरसि । अजिनस्य चर्मेति मानुषं नाम शर्मेति दैवं नाम ॥ का° [२. ४. २.] अपेत्य पात्रेभ्योऽवधूनोत्यवधूतमितीति । रक्षः कृष्णाजिने गूढमवधूतम् । कृष्णाजिनकम्पनेन भूमौ पतितम् एवमरातयोऽपि पातिताः ॥ का° [२. ४. ३.] प्रत्यग्ग्रीवमास्तृणात्यदित्यास्त्वगितीति । हे कृष्णाजिन त्वमदित्या भूमिदेवतायास्त्वग्रूपमसि ततोऽदितिर्भूमिस्त्वा त्वां प्रति वेत्तु प्रतिगृह्य मदीयेयं त्वगिति वेत्तु जानातु । पुरा यज्ञो देवेषु रुष्टः कृष्णमृगो भूत्वागमत्तदा देवा ज्ञात्वा तदीयां त्वचमुत्क्षिप्य जगृहुस्तस्माच्चर्मास्तरणमित्यभिप्रायः श्रुतावाम्नातः [१. १. ४. १.] ॥ का° [२. ४. ४. ५.] सव्याग्रन्थे निदधात्युलूखलमद्रिरसि ग्रावासीति वा प्रति वेत्युभयोरिति । विकल्पितयोर्मन्त्रयोः प्रति वेति शेषो योजनीयः । हे उलूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढत्वादद्रिरसि पाषाणोऽसि । किम्भूतः पृथुबुध्नः स्थूलमूलः । मुसलघातोपद्रवेण चाञ्चल्यराहित्याय मूलस्थूलत्वम् । हे उलूखल

तथाविधस्त्वं ग्रावासि दार्ढ्येन पाषाणसदृशोऽसि ॥ अदित्यास्त्वक् । अधस्तादास्तीर्णा कृष्णाजिनरूपा भूमिर्या त्वगस्ति सा त्वां प्रति वेत्तु स्वकीयत्वेन जानातु ॥ १४ ॥

a. अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि ।

b. बृहद्ग्रावासि वानस्पत्यः ।

c. स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व ।

d. हविष्कृदेहि हविष्कृदेहि (43.) हविष्कृदेहि ॥ १५ ॥

का° [२. ४. ६.] हविरावपत्यग्नेस्तनूरसीतीति । हे हविः त्वमग्नेराहवनीयस्य तनूः शरीरमसि । यतस्त्वन्निष्पन्नं हविरग्नीभवति । अतो हविरग्नेस्तनूः । किम्भूतं हविः । वाचो विसर्जनम् अपां प्रणयनकाले नियमिताया यजमानवाचो हविरावपनकाले विसर्गो भवति । तस्माद्दिदं हविर्वाचो विसर्जनम् । अतो देववीतये देवानां तर्पणाय त्वा त्वां गृह्णामि आवपामीत्यर्थः ॥ का° [२. ४. ११.] बृहद्ग्रावेति मुसलमादत्त इति । हे मुसल त्वं यद्यपि वानस्पत्यो दारुमयस्तथापि ग्रावासि दार्ढ्येण पाषाणसदृशोऽसि । तथा दीर्घत्वेन बृहन्महानसि ॥ का° [२. ४. १२.] स इदमित्यवदधातीतीति । हे मुसल त्वं देवेभ्योऽग्न्यादिदेवोपकारार्थमिदं हविर्व्रीहिरूपं शमीष्व शमय । भक्षणविरोधितुषापनयनेन शान्तं कुरु । तस्यैव पदस्य व्याख्यानम् । सुशमि शमीष्व सुष्ठु शान्तं यथा भवति तथा शमीष्व शमय । शमु उपशमे व्यत्ययेन शपो लुक् (44.) । तुरुस्तुशम्यमः सार्वधातुक इतीडागमः (45.) [पा° ७. ३. ९५.] । शान्तिर्द्विविधा । वाह्यतुषापनयनाद्बाह्या (46.) । सा (47.) प्रथमावघातेन स्यात् (48.) । अन्तःस्थितमान्तिन्यस्यापनयनादन्या (49.) । सा (50.) फल्गीकरणेन भवति । तं (51.) द्विविधं तण्डुलसंस्कारं कुर्वित्यर्थः । का° [२. ४. १३.] हविष्कृदेहीति त्रिराह्वयतीति । यजमानः पत्नी वान्यो वा यो व्रीहीनवहन्ति स सम्बोध्याह्वयते (52.) । हे हविष्कृत् हविः करोतीति हविष्कृत् एहि अत्रागच्छ । त्रिवारमुक्तमर्थं देवा मन्यन्त इति त्रिराह्वानम् ॥ १५ ॥

a. कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद त्वया वयꣳ संघातꣳ - संघातं जेष्म ।

b. वर्षवृद्धमसि । c. प्रति त्वा वर्षवृद्धं वेत्तु ।

d. परापूतꣳ रक्षः परापूता अरातयः ।

e. अपकृतꣳ रक्षः । f. वायुर्वो विविनक्तु ।

g. देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥ १६ ॥

का° [२.४.१५.] आकृत्यन्यो दृषदुपले कुक्कुटोऽसीति त्रिः शम्यया द्विर्दृषदं सकृदुपलामिति । हे शम्यारूप यज्ञायुधविशेष त्वं कुक्कुटोऽसि असुराणां मुधुन्नि-क्वकश्चासि देवानाम् । असुराः क्व क्वेति तान्हन्तुमिङ्न्योऽटति सर्वत्र संचरति स कुक्कुटः । यद्वा कुकं कुत्सितशब्दं कुटति तनोतीति कुक्कुटः । यद्वा कुक्कुटा-ख्यपक्षिवद्ध्वनिविशेषमसुरभीत्यर्थं तनोतीति कुक्कुट इत्युपचर्यते । मधुन्निक्व-कनामा कश्चिद्देवानां भृत्यः । मधुर्मधुरभाषिणी निक्वा यस्य । तद्रूप हे यज्ञायुध त्वमसुरान्पराभवन्यजमानस्य इषमूर्जं चावद । अन्नं रसं च यथा समागच्छति तथा शब्दं कुरु । तवशब्देनासुरेषु पराभूतिषु तदीयमन्नं रसं च यजमानः प्राप्नोति । ततस्त्वया कृत्वा वयं संघातं संघातं जेष्म असुरैः सह क्रियमाणं तं तं सङ्ग्रामं जेष्म जयेम कदाचिदपि पराजयोऽस्माकं मास्त्वित्यर्थः । सम्यक् घ्नन्त्यसुरा यत्रे-ति संघातो युद्धं । मनो राज्ञ एको वृषभ आसीत्तस्मिन्नसुरघ्नी वाक् स्थिता तस्मि-न्शब्दं कुर्वति तं श्रुत्वैवासुरा म्रियन्ते ततः किलाताकुलीनामानावसुरयाजकौ मनुं गत्वा तेनैव ऋषभेणायाजयतामृषभे हते सा वाङ्मनोजायां प्रविष्टा तौ पुनस्त-यापि मनुमयाजयतां ततः सा वाग्यज्ञपात्राणि प्रविष्टेत्यसुरपराभावाय तद्वाक्प्रक-टनार्थं शम्यया दृषदुपलहननमिति श्रुत्युक्तोऽभिप्रायः [१.१.४.१४.] ॥ का° [२.४.१६.] वर्षवृद्धमसीति शूर्पमादत्त इति । हे शूर्प त्वं वर्षवृद्धमसि वर्षेण वृद्धा तद्भूतजलेन वृद्धं वर्षवृद्धम् । वर्षवृद्धवेणुशलाकानिर्मितत्वात् शूर्पस्य वर्षवृद्धत्वम् ॥ का° [२.४.१७.] प्रति त्वेति हविरुद्वपतीति । हे हविः वर्षवृद्धं शूर्पं त्वा त्वां प्र-तिवेत्तु स्वकीयत्वेन जानातु व्रीहिशूर्पयोर्वर्षवृद्धत्वाद्भ्रातृत्वम् (53.) ॥ का° [२.४.१८.] परापूतमिति निष्पुनातीति । रक्षः परापूतं निराकृतं शूर्पेण तुषेषु परापूतेषु तद्गतं रक्षोऽपि तैः सह भूमौ पातितम् । अरातयः हविः प्रतिकूला आलस्या-

दिशत्रवश्च परापूताः निराकृताः ॥ का° [२.४.१९.] अपक्तमिति तुषान्निरस्यतीति । रक्षः अपक्तं दूरेऽपनीय मारितम् । भूमौ पतितान्दूरे निःसारयेत् ॥ का° [२.४.२०.] वायुर्व इति विविनक्तीति । हे तण्डुला वायुः शूर्पचालनोत्थो वो युष्मान्विविनक्तु सूक्ष्मकणेभ्यः पृथक्करोतु ॥ का° [२.४.२१.] देवो व इति पात्र्यामोप्याभिमन्त्रयतऽइति । हे तण्डुलाः सविता देवो वो युष्मानच्छिद्रेण पाणिना अङ्गुलिविश्लेषहीनेन स्वकृत्तेन प्रतिगृभ्णातु स्वीकरोतु कृग्रहोर्भश्छन्दसीति कृस्य भः [पा° क° ८.२.३२. वा° १.] । पात्रीप्रक्षेपसमये भूमौ पतनं मा भूदिति सवितृग्रहणं प्रार्थ्यते । किम्भूतः सविता हिरण्यपाणिः हिरण्ययुक्तावङ्गुलीयाद्याभरणयुक्तौ पाणी यस्य स हिरण्यपाणिः । यद्वा दैत्यैः प्राशित्रहरिण (54.) छिन्नौ सवितृपाणी देवैर्हिरण्मयौ कृताविति सवितुर्हिरण्यपाणित्वमिति बह्वृचश्रुतौ कथा ॥१६॥

VI. a. धृष्टिरसि ।

b. अपाग्नेऽग्निमामादं जहि निष्क्रव्यादꣳ सेध ।

c. आ देवयजं वह ।

d. ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनिं त्वा क्षत्रवनिं सजातवन्युपदधामि भ्रातृव्यस्य बधायै ॥१७॥

का° मूलतः शाखां परिवास्योपवेषं करोतीति (55.) । [२.४.२६.] धृष्टिरसीत्युपवेषमादत्तेति च (56.) । पलाशशाखाया मूलदेशे छिन्नः काष्ठभाग उपवेषस्तमादत्ते । हे उपवेष त्वं धृष्टिरसि प्रगल्भोऽसि । ञिधृषा प्रागल्भ्ये । तीव्राङ्गाराणामितस्ततश्चालने प्रभुत्वादस्य प्रागल्भ्यम् ॥ का° [२.४.२६.] अपाग्न इत्यङ्गारान्प्राचः करोतीति । तत्र त्रयोऽग्नयः सन्ति । एकः आमात् । आममपक्वमत्तीत्यामाद्लौकिकोऽग्निः । द्वितीयः क्रव्यात् शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः । तृतीयो यागयोग्यः । तथाविधांस्त्रीनङ्गारान्गार्हपत्यात्प्राग्भागे पृथक्कृत्य तेषां मध्ये यागयोग्यताहीनौ द्वावग्नी आमात्क्रव्यात्संज्ञौ त्याजयितुं गार्हपत्यं प्रत्युच्यते । हे अग्ने हे गार्हपत्य आमादमग्निमप जहि परित्यज । व्यवहिताश्चेति

[पा° १.४.८२.] क्रियापदोपसर्गयोर्व्यवधानम् । तथा क्रव्यादमग्निं निः सेध निःशेषं दूरे गमय परित्यजेत्यर्थः ॥ का° [२.४.२७.] आ देवयजमित्यङ्गारमाकृत्येति । हे गार्हपत्य देवयजं देवानां योग्यं तृतीयमङ्गारमावह समीपमानय । देवा इज्यन्ते यस्मिन्नसौ देवयाट् तं देवयजम् ॥ का° [२.४.२७.] कपालेनावहादयति ध्रुवमसीनीति । देवयजमङ्गारं कपालेनाच्छादयेत् । हे कपाल त्वं ध्रुवमसि स्थिरं भवसि । अङ्गारोपरि वर्तमानमपीतस्ततो न पतसि पृथिवीं भूमिं दृंह दृढीकुरु । पुरोडाशपाकसमये त्वत्कृतव्यवधानेन भूमिर्दाहकृतं शैथिल्यं न भविष्यतीत्यर्थः । किं च । त्वामुपदधामि अङ्गारे स्थापयामि । किमर्थं भ्रातृव्यस्य शत्रोरसुरस्य पाप्मनो वा बधाय हिंसार्थम् । व्यन् सपत्ने [पा° ४.१.१४५.] इत्याद्युदात्तत्वात् भ्रातृव्यशब्दः शत्रुवाची । किम्भूतं त्वाम् । ब्रह्मवनिं वन षन सम्भक्तौ ब्रह्मणा ब्राह्मणेन वन्यते पुरोडाशनिष्पत्त्यर्थं स्वीक्रियते इति ब्रह्मवनि । तथा क्षत्रवनिं सजातवनीति पदद्वयं योज्यम् । सजाताः समानकुले ज्ञाताः यजमानस्य ज्ञातयः तैर्वन्यत इति ॥ १७ ॥

a. अग्ने ब्रह्म गृभ्णीष्व ।

b. धरुणमस्यन्तरिक्षं दृꣳह ब्रह्मवनिं -- बधाय ।

c. धर्त्रमसि दिवं दृꣳह ब्रह्मवनिं -- बधाय ।

d. विश्वाभ्यस्त्वाशाभ्य उपदधामि ।

e. चितः स्थोर्ध्वचितः ।

f. भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥ १८ ॥

का° [२.४.३०.] सव्याङ्गुल्याग्नेयेऽङ्गारं निदधात्यग्ने ब्रह्मेतीति । हे अग्ने निधीयमानाङ्गाररूप ब्रह्म प्रौढं कर्मास्माभिः क्रियमाणं गृभ्णीष्व गृह्णीष्व । नाशकरक्षोबधेनानुगृह्णीष्व (57.) यद्वा ब्रह्म ब्राह्मणं मामनुगृह्णीष्व अङ्गुलिदानासक्तं मा दंक्षेत्यर्थः ॥ का° [२.४.३१.] धरुणमिति पश्चादिति । पूर्वस्थापितकपालस्य पश्चाद्भागे द्वितीयं निदधाति । हे द्वितीय कपाल त्वं धरुणं पुरोडाशस्य धारकमसि

अतोऽन्तरिक्षं दृंह दृढीकुरु । पुरोडाशपाकोत्पन्नज्वलयान्तरिक्षलोकोपद्रवो यथा न स्यात्तथा कुरु । यद्यप्येतत्कपालं ज्वालान्तरिक्षयोर्मध्ये व्यवधायकं नास्ति । तथाप्यन्तरिक्षदार्ढ्याय कपालदेवता प्रार्थ्यते । ब्रह्मवनीत्यादि पूर्ववत् । का° [२.४.३२.] पुरस्ताद्धर्त्रमितीति । प्रथमस्य पूर्वभागे तृतीयं स्थापयेत् । हे कपाल त्वं धर्त्रं धारकमसि । दिवं दृंह । ज्वालाग्रेण दाढ्याभावो द्युलोकस्य दार्ढ्यम् । अन्यत्पूर्ववत् । का° [२.४.३३.] विश्वाभ्य इति दक्षिणत इति । हे चतुर्थ कपाल विश्वाभ्य आशाभ्यः सर्वदिग्भ्यः सर्वदिग्दार्ढ्याय त्वामुपदधामि । एवं कपालत्रयोपधानेन यजमानो लोकत्रयं जयति चतुर्थेन दिशो जयति । तद्भृतः पुरोडाशो लोकत्रयरूपो भूत्वा देवताः प्रीणातीत्याशयः ॥ का° [२.४.३४.] समं विभज्य द्वे दक्षिणत एवमुत्तरतश्चित स्थेतीति । आग्नेयपुरोडाशस्याष्टकपालत्वाच्चतुर्णां स्थापितत्वादवशिष्टानां चतुर्णां मध्ये द्वे द्वे दक्षिणोत्तरयोर्निदध्यात् । चिञ् चयने क्विबन्तस्य चित इति वक्ष्यवचनम् । हे कपालविशेषा यूयं चितः स्थ प्रथमकपालोपचयकारिणः स्य भवथ । तथा ऊर्ध्वचितः स्थ ऊर्ध्वमुपक्षितानां द्वितीयादिकपालानामुपकारिणो भवथ ॥ का° [२.४.३८.] भृगूणामित्यङ्गिरिरभूदुक्तीति । अङ्गिरिः कपालानि छादयेत् । हे कपालानि यूयं भृगूणामङ्गिरसां भृगुनामकानामङ्गिरोनामकानां देवर्षीणां तपसा तपोरूपेणाग्निनानेन तप्तध्वं तप्तानि भवत । अस्याग्नेस्तदीयतपोरूपत्वं भावयेदित्यर्थः ॥१८॥

VII. a. शर्मासि । b. अवधूतꣳ रक्षोऽवधूता अरातयः ।

c. अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ।

d. धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु ।

e. दिव स्कम्भनीरसि ।

f. धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥११॥

का° [२.५.२.] कृष्णाजिनमादत्ते पूर्ववदिति । यथावघातार्थं कृष्णाजिनप्रयोगस्तद्वदत्रापि । शर्मासि । अवधूतम् । अदित्याः इति मन्त्रत्रयं व्याख्यातम् ॥ का° [२.५.३.] तस्मिन्दृषदं धिषणासीति । तस्मिंश्चर्मणि शिलां स्थापयेत् हे शिले ये-

पणाधारभूते त्वं पर्वती पर्वतात्मिका नदुत्यन्ना त्वं धिषणासि धियं बुद्धिं कर्म वा मनोति व्याप्नोति ददाति वा धिषणा । छस्त्वमार्षम् । पर्वतवद्धार्यस्यसि । अदित्या भूमिस्त्वक् कृष्णाजिनरूपा तादृशीं वा त्वां प्रति वेत्तु तदवस्थानमनुजानातु ॥ का° [२.५.४.] पश्चाद्भ्यामुपोत्तुदीचीं दिव इतीति । दृषदः पश्चाद्भागेऽधस्ताद्भ्यां स्थापयेत् । तां पत्न्युच्यते । हे शम्ये दिवः द्युलोकस्य स्कम्भनीः (58.) स्तम्भनकारिणी त्वमसि व्यत्ययेन द्वितीयावद्भवचनम् पतनवारणायान्तरिक्षरूपेण स्तम्भनकारित्वम् । अन्तरिक्षेण द्यौमे द्यावापृथिवी विष्टब्धे इति श्रुतिः [१.२.१.१६.] ॥ का° [२.५.५.] दृषद्युपलां धिषणासीर्तीति । हे उपले उपरितनशिले त्वं धिषणासि धिषणव्यापारधारिकासि । किम्भूता । पार्वतेयी पर्वत्या अधस्तनदृषदः पुत्री पार्वतेयी बालस्वरूपा । कनीयसी क्षेपा दुहितेव भवतीति श्रुतिः [१.२.१.१७.] । अतः पर्वती मातृसमा त्वां प्रतिवेत्तु पुत्रीं जानातु ॥ १९ ॥

a. धान्यमसि धिनुहि देवान् ।

b. प्राणाय त्वा । c. उदानाय त्वा । d. व्यानाय त्वा ।

e. दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ।

f. चक्षुषे त्वा । g. महीनां पयोऽसि ॥ २० ॥

का° [२.५.६.] धान्यमसीति तण्डुलानोप्येति । हे कृष्णित्वं धान्यमसि धिनोतीति प्रीणातीति धान्यम् । अतो देवानग्न्यादीन्धिनुहि प्रीणय ॥ का° [२.५.६.] पिनष्टि प्राणाय त्वेति प्रतिमंत्रमिति । प्रकर्षेण अनिति सर्वदा मुखे चेष्टत इति प्राणः श्वासवायुः । उदनिति ऊर्ध्वं चेष्टत इत्युदानः उत्क्रान्तिवायुः । व्यनिति व्याप्य चेष्टते इति व्यानो व्यापको बलहेतुर्वायुः । हे तण्डुल त्वा त्वां प्राणाय प्राणदानार्थं पिनष्मीति शेषः एवमुत्तरमन्त्रयोर्योज्यम् । देवानां सजीवं कृष्णिर्भवतीत्येभिर्मन्त्रैः कृष्णिषां प्राणादिदानेन सजीवत्वं क्रियत इत्यभिप्रायः ॥ का° [२.५.७.] दीर्घामिति कृष्णाजिने प्रोक्षतीति । प्रसयनं प्रसितिः । षिञ् बन्धने प्रबन्धः कर्मसंततिः । दीर्घामविच्छिन्नां प्रसितिमनु कर्मसंततिमनुलक्ष्य आयुषे यजमानस्यायुर्-

भिवृद्ध्यर्थं हे कृविः त्वां धां कृष्णाजिनेन दधामि । दधातेर्लुङि वृद्धौ हल्स्यमाङ्योगेऽपीति [पा° ६.४.७५.] अटागमाभावः । यजमानस्यायुर्वृद्धौ सत्यां कर्मसंततिः प्रवर्ततेऽइति भावः । यद्वायमर्थः । पूर्वमल्पैर्हविषः प्राणादिदानेन सजीवत्वं कृतमनेन पुनरायुर्दीयते हविषः । हे हविः दीर्घा प्रसितिं कृष्णाजिनाख्यामनु त्वां धां धारयामि कृष्णाजिनेन प्रक्षिपामीत्यर्थः । किमर्थमायुषे बहीयायुर्वृद्ध्यर्थम् । प्रसितिः प्रसयनात्तन्तुर्वा जालं वेति [निरु° ६.१२.] यास्कोक्तेरिह पिटग्राहकत्वात्प्रसितिशब्देन कृष्णाजिनमुच्यते । देवो व इत्यादिमन्त्रशेषो व्याख्यातः ॥ का° [२.५.८.] चक्षुषे त्वेतीक्षतेऽइति । हे हविः चक्षुषे यजमानस्य चक्षुरिन्द्रियपाटवाय त्वां पश्यामीति शेषः । यद्वा चक्षुषे चक्षुरादिवाक्येन्द्रियदानाय त्वामीक्षे । हविषः सजीवत्वे कृते चक्षुराद्यपेक्षा भवतीत्यनेन तत्क्रियत इति भावः ॥ का° [२.५.९.] पिष्यमाणेषु निर्वपत्यन्यो महीनामित्याज्यमिति । हे आज्य त्वं महीनां गवां पयोऽसि क्षीरमसि क्षीरोत्पन्नत्वात् घृतं पयःशब्देनोच्यते । महीति गोनाम [निघ° २.११.] ॥२०॥

VIII. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. सं वपामि ।

c. समाप ओषधीभिः समोषधयो रसेन । सꣳ रेवतीर्जगतीभिः पृच्यन्ताꣳ सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् ॥२१॥

का° [२.५.१०.] पात्र्याꣳ सपवित्रायां पिष्टान्यावपति देवस्य त्वेतीति । हस्ताभ्यामित्यन्तं व्याख्यातम् । एतानि पिष्टानि संवपामि पात्र्यां सम्यक्क्षिपामि ॥ का° [२.५.१२.१३.] उपसर्जनीरानयत्यन्यः पवित्राभ्यां प्रतिगृह्णाति समाप इतीति । पिष्टसंवपनीया (59.) आप उपसर्जन्यः । ता अग्नीदानवेदधर्युः पवित्राभ्यां गृह्णीयात् । आप उपसर्जनीभूता ओषधीभिः पिष्टभूताभिः सं पृच्यन्ताम् पृची संपर्के संगृह्यतां सम्यगिकीभवन्तु । तथा ओषधयः पिष्टाख्या रसेन उपसर्जनीभूतेनोदकेन सं पृच्यन्ताम् । आपो हि ओषधीनां रसः । तथा रेवतीः रेवत्य आपः जगतीभिः पिष्टाख्याभिः सं पृच्यन्ताम् । रेवत्य आपो जगत्य ओषधय इति श्रुतेः [१.२.२.२.] ।

मधुमतीर्माधुर्यापेता आपो मधुमतीभिः माधुर्यापेताभिः पिष्टद्रपोपधीभिः सं पृच्यन्ताम् । अपामोषधीनां [च] परस्परं प्रीतिहेतुत्वात्संपर्को भवतित्यर्थः ॥ २१ ॥

a. ज्ञानयत्यै त्वा संयौमि । b. इदमग्नेः ।

c. इदमग्नीषोमयोः । d. इषे त्वा ।

e. घर्मोऽसि विश्वायुः ।

f. उरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ।

g. अग्निष्टे त्वचं मा हिंसीत् ।

h. देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाकें ॥ २२ ॥

का° [२.५.१४.] संयौमीति ज्ञानयत्यै त्वेतीति । अपां पिष्टानां च मिश्रीकरणं संयवनम् । हे जलपिष्टद्रपपदार्थद्वय त्वां संयौमि संयग्मिश्रीकरोमि । यु मिश्रणामिश्रणयोः । किमर्थं ज्ञानयत्यै यजमानस्य प्रज्ञोत्पादनार्थं । जलपिष्टयोर्यथा मिश्रणं तथा शुक्रशोणितमिश्रणेन यजमानस्य प्रज्ञोत्पत्तिर्भवति तदर्थं त्वां संयौमि । यद्वा ज्ञानयत्यै पुरोडाशोत्पत्त्यै त्वां संयौमि ॥ का° [२.५.१५.] संविभज्यासञ्ज्हरिष्यन्नालभत (60.) इदमग्नेरिदमग्नीषोमयोरितीति । मिश्रीकृतस्य पिष्टस्यावदानाङ्गितं पिण्डद्वयं कृत्वा पुनरभिलविष्यन् इदमग्नेरग्निसम्बन्धि भवतिति प्रथमं पिण्डं स्पृशेत् । इदमग्नीषोमयोर्भवतिति द्वितीयं स्पृशेत् ॥ का° [२.५.१७.] इषे त्वेत्याज्यमधिश्रयतीति । हे आज्य इषे इष्यमाणवृष्ट्यर्थं त्वामधिश्रयामीति शेषः । आज्यप्रविलापनार्थं तत्पात्रस्याग्नौ स्थापनमधिश्रयणम् ॥ का° [२.५.११.] घर्मोऽसीति पुरोडाशमिति । हे पुरोडाश त्वं घर्मोऽसि । घृ क्षरणदीप्त्योः । घर्मशब्देन दीप्यमानः प्रवर्ग्य उच्यते । अत्यमाणतया (61.) दीप्यमानत्वात्प्रवर्ग्योऽसि । तथा विश्वायुः विश्वं कृत्स्नमायुर्यस्मात्स विश्वायुः । यस्मात्त्वन्नमानः सर्वमायुराप्नोतीति भावः ॥ का° [२.५.२०.] उरुप्रथा इति प्रथयति यावत्कपालमिति । सर्वकपालेषु संश्लेषयितुं तं प्रसारयेत् । हे पुरोडाश त्वं स्वभावतः उरुप्रथाः उरु विस्तीर्णं यथा तथा प्रथते प्रसरतीत्युरुप्रथाः । अत इदानीमपि उरु प्रथस्व प्रख्यातो भव । किं च ते यज्ञप-

तिस्तव यजमानः ऊरू विस्तीर्णौ पुत्रपश्वादिभिः प्रथतां प्रख्यातो भवतु ॥ का° [५. २.२१.] अग्निष्ट्वऽइत्यद्भिरभिमृशतीति । हे पुरोडाश अग्निः अपणाय प्रवृत्तः ते तव त्वचं त्वक्सदृशमुपरितनभागं मा हिंसीत् मा विनाशयतु । अतिदाहेन मषीभावो विनाशः स मास्त्वित्यर्थः (62.) । अवघातपेषणोत्थः अपणाऽज्ञायमानश्च कृविष उपद्रवो जलस्पर्शेन शाम्यतीति भावः ॥ का° [२.५.२३.] देवस्त्वेति अपणामिति । हे पुरोडाश सविता देवः वर्षिष्ठे अत्यन्तवृद्धे नाके द्युलोकवर्तिनि नाकनाम्नि अग्नौ त्वा त्वामधि अधिश्रित्य अपयतु पक्वं करोतु । मनुष्यस्य अपणे कर्तृत्वं मा भूदित्यभिप्रेत्य देवस्त्वेत्युच्यते । दिवि नाको नामाग्नी रूढोक्तेति तित्तिरिवचनान्नाको नाम स्वर्गस्थोऽग्निः (63.) ॥२२॥

a. मा भेर्मा संविक्थाः ।

b. अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ।

c. त्रिताय त्वा । d. द्विताय त्वा । e. एकताय त्वा ॥२३॥

का° [२.५.२४.] मा भेरित्यालभत इति । हे पुरोडाश त्वं मा भैः । भयं मा कार्षीः । मा सं विक्थाः चलनं मा कार्षीः । ओभी भये । ओविजी भयचलनयोरित्यनयोः प्रयोगौ ॥ का° [२.५.२५.] अतमेरुरिति घृतावभिवासयति भस्मना वेदेनोपवेषेण वेति । यज्ञो यागहेतुः पुरोडाशः अतमेरुर्भूयात् । तमु ग्लानौ । ताम्यतीति तमेरुः औणादिक एरुप्रत्ययः । न तमेरुः अतमेरुः । भस्माच्छादनेन ग्लानिरहितो भवतु । यजमानस्य प्रजा पुत्रपौत्रादिः अतमेरुः ग्लानिरहिता भूयात् यजमानस्य प्रजायाः कदापि दुःखं मास्त्वित्यर्थः ॥ का° [२.५.२६.] पात्र्यङ्गुलिप्रक्षालनमात्रेभ्यो निनयत्यभितप्य प्रत्यगसञ्स्यन्दमानं त्रिताय त्वेति प्रतिमन्त्रमिति । हे पात्र्यङ्गुलिप्रक्षालनोदक त्रिताय त्रितनाम्ने देवाय त्वां निनयामीति शेषः । तथा द्विताय त्वा निनयामि तथा एकताय त्वा निनयामि । पूर्वं कुतश्चिद्धेतोः भीतोऽग्निरपः प्राविशत्ततो देवास्तं ज्ञात्वा जगृह्णुस्तदाग्निना वीर्यमप्सु मुक्तं तत आप्त्या उत्पन्नास्त्रितद्वितैकतसंज्ञास्ते देवैः सह चरन्तो यज्ञे पात्रीप्रक्षालनजललक्षणं भागं लेभिरे इति श्रुतिकथानुसंधातव्या [१.२.३.१.] ॥२३॥

IX. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. आददेऽधरुक्तं दैव्येभ्यः ।

c. इन्द्रस्य वाङ्रसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ॥ २४ ॥

का° [२. ६. १३.] देवस्य त्वेति स्फ्यमादत्तेति । देवस्य त्वेति व्याख्यातम् । देवेभ्यो देवोपकारार्थं अधरुक्तं अधरं करोतीति वेदिखननादिद्वारेणेत्यधरुक्तं स्फ्यमहमाददे गृह्णामि ॥ का° [२. ६. १३.] सतृणꣳ सव्ये कृत्वा दक्षिणेनालभ्य जपतीन्द्रस्य वाङ्रसीति । हे स्फ्य त्वमिन्द्रस्य दक्षिणो वाङ्रसि । तेन वाङ्ना धृतत्वात्तत्समानवीर्योपेतत्वाद्वा स्फ्यस्य वाङ्रूपत्वोपचारः । किम्भूतः स्फ्यः सहस्रभृष्टिः भृष्टिर्भर्जनं पाको मारणमिति यावत् । सहस्रसंख्याकानां शत्रूणां भृष्टिर्यस्य स सहस्रभृष्टिः । शततेजाः शतं तेजांसि यस्य सः बहुधा दीप्यमानः । किंच वायुरसि न केवलमिन्द्रवाङ्सदृशः । किं तु वायुसदृशोऽप्यसि । अत एव तिग्मतेजाः तीक्ष्णतेजाः यथा वायुर्वह्निं प्रदीप्य तीव्रां ज्वालामुत्पादयंस्तीव्रतेजा भवति । एवं स्फ्योऽपि तम्बहिर्दहनं कर्म कुर्वंस्तीव्रतेजा उच्यते । तथा द्विषतो वधः । हतीति वधः कर्मद्वेषिणामसुरादीनां हन्तेत्यर्थः ॥ २४ ॥

a. पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषम् ।

b. व्रजं गच्छ गोष्ठानम् । c. वर्षतु ते द्यौः ।

d. वधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ २५ ॥

का° [२. ६. १५. १६.] पृथिवि देवयजनीति तृणोऽन्तर्हिते प्रहरतीति । हे पृथिवि हे देवयजनि देवा इज्यन्ते यस्यां सा देवयजनी तस्याः सम्बोधने हे देवयजनि ते तव ओषध्यास्तृणरूपाया मूलमहं मा हिंसिषम् मा विनाशयामि (64.) ॥ का° [२. ६. १७.] व्रजं गच्छेति पुरीषमादत्तेऽरणि । स्फ्यप्रहारोत्पन्ना मृत् पुरीषमुच्यते । हे पुरीष त्वं व्रजं गच्छ । व्रजन्ति गच्छन्ति स्थातुं गावो यत्र स देशो व्रजस्तं

किम्भूतम् गोष्ठानम् गवां स्थानमिदानीमवस्थितिर्यत्र तम् गोयुक्तं तदीयं स्थानं गच्छेत्यर्थः ॥ का° [२.६.१८.] वर्षतु त इति वेदिं प्रेक्षतऽइति । हे वेदे ते तुभ्यं त्वदर्थं द्यौर्द्युलोकाभिमानी देवो वर्षतु जलसेकं करोतु । वृष सेचने वर्षणेन खननजनितदुःखशान्तिरस्त्वित्यर्थः ॥ का° [२.६.१९.] वधानेत्युत्करे करोतीति । स्फ्योत्खातां मृदमुत्करे त्यजेत् । हे देव सवितः योऽस्मान्द्वेष्टि द्वेषं करोति वयं च यं शत्रुं द्विष्मस्तमुभयविधं शत्रुं परमस्यां पृथिव्यां बधान । परमा अन्तिमा पृथिवी । छान्दसः स्याडागमः । उत्करे क्षिप्तायां धूल्यां निगूढस्य शत्रोस्तत्र बन्धनं कुरु यत्र भूमेरन्तिमप्रदेशेऽन्धतामिस्रो नरकोऽस्ति । तथा च श्रुतिः [१.२.४.१६.] अन्धे तमसि बधानेति यदाह परमस्यां पृथिव्यामिति । कैर्बन्धनं कर्तव्यं तदाह शतेन पाणेः शतसंख्याकाभिर्बन्धनरज्जुभिः । किं च अस्मादन्धतामिस्रान्नरकात्तं मा मौक् कदाचिदपि मा मुञ्च ॥२५॥

a. अपाररुं पृथिव्यै देवयजनाद्बध्यासम् ।

b. c. d. व्रजं - मौक् ।

e. अररो दिवं मा पप्तः । f. द्रप्सस्ते द्यां मा स्कन् ।

g. h. i. व्रजं - मौक् ॥२६॥

का° [२.६.२१.] अपाररुमिति द्वितीयं प्रकरणीति (65.) । पृथिव्यै देवयजनात्पृथिव्याः सम्बन्धिनो देवयजनाख्याद्वेदिस्थानात् अररुमररुनामानमसुरमप बध्यासम् । अपनीय यथा कृतो भवति तथा करवाणि । अनेन मन्त्रेण द्वितीयवारं पूर्ववत्प्रकरेत् व्रजम् वर्षतु बधानेति मन्त्रत्रयस्य प्रयोगो व्याख्या च पूर्ववत् ॥ का° [२.६.२२.] अभिन्यस्यत्यग्नीदुत्करमररो दिवमितीति । हे अररो असुर दिवं द्युलोकं यागफलरूपं त्वं मा पप्तः मा गमः । स्वर्गे त्वया न गन्तव्यम् पत्लृ गतौ पतः पुमिति [पा° ७.४.११.] लुङि पुमागमे रूपम् ॥ का° [२.६.२३.] द्रप्सस्तऽइति तृतीयमिति । हे वेदिदेवते ते तव पृथिवीरूपाया यो द्रप्स उपजीव्यो रसः स द्यां द्युलोकं मा स्कन् मा स्कन्दतु मा गच्छतु स्कन्दिर्गतिशोषणयोः । व्रजं गच्छेत्यादिमन्त्रत्रयस्य प्रयोगो व्याख्या च पूर्ववत् ॥२६॥

a. गायत्रेण᳖ त्वा छन्दसा᳖ परि᳖ गृह्णामि ।

b. त्रैष्टुभेन त्वा छन्दसा᳖ परि᳖ गृह्णामि ।

c. जागतेन त्वा छन्दसा᳖ परि᳖ गृह्णामि ।

d. सुदुघा᳖ चासि᳖ शिवा᳖ चासि ।

e. स्योना᳖ चासि᳖ सुषदा᳖ चासि ।

f. ऊर्ज᳖स्वती चासि᳖ पयस्वती च ॥ २७॥

का° [२. ६. २५.] पूर्वं परियन्हं परिगृह्णाति दक्षिणातः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति प्रतिमन्त्रमिति । यस्मात्प्रदेशादरुर्निष्काशितस्तत्र वेदेरियत्तां निश्चेतुं दक्षिणादिदिक्क्रये स्फ्येन रेखात्रयकरणं पूर्वः परियन्हः । विष्णुर्देवता मन्त्रत्रयस्य । ते प्राञ्चं विष्णुं निपाद्य (66.) छन्दोभिरभितः पर्यगृह्णन्निति श्रुतेः [१. २. ५. ६.] । हे विष्णो त्वा त्वां गायत्रेण छन्दसा गायत्र्यादिछन्दस्त्रयरूपतया भावितेन स्फ्येन दिक्क्रये परि गृह्णामि । एवं त्रैष्टुभेन जागतेनेत्युत्तरमन्त्रयोः । ततः छन्दोदेवता दिक्क्रयेऽसुरेभ्यस्त्वां पालयिष्यन्ति । पूर्वस्यामाहवनीयः पालकोऽस्तीति भावः । प्रजापतिपुत्रा देवा असुराश्च पूर्वं स्पर्धां चक्रुस्तदा देवान्पराजयं प्राप्तान्मत्वा भूमिमसुरा विभेजुस्तदा देवा वामनरूपं विष्णुमग्रे कृत्वाऽसुरानागत्यास्मभ्यमपि भूम्यंशो दातव्य इति तानयाचिषुः । ततोऽसुरा असूयन्तोऽयं विष्णुर्यावति भूभागे शेते तावान्मवदीयोऽस्त्वित्यूचुस्ततो देवा बध्नेतदस्माकमित्युक्ता ते प्राञ्चं विष्णुं निपात्य (67.) गायत्रेणेत्यादिमन्त्रैर्यज्ञभूमिं जगृहुः । यज्ञो विष्णुः स यत्र तिष्ठति सैव यज्ञभूमिरिति तैर्विदितत्वाद्वेदिरिति तद्भूमेर्नामेति [१. २. ५. १-७.] श्रुतिकथामनुसंधाय वेदियन्हेण विधेयम् ॥ का° [२. ६. ३१.] उत्तरं परियन्हं परिगृह्णाति सुदुघा स्योनोर्जास्वतीति । वेदिखननात्पूर्वं क्रियमाणः पूर्वः परियन्हः पश्चात्क्रियमाण उत्तरपरियन्हः । तत्रापि पूर्ववद्दिक्क्रये स्फ्येन रेखात्रयं कार्यम् । हे वेदे त्वं सुदुघासि शिवा शान्ता (68.) चासि । दुघा भूमिः शोभना दुघा सुदुघा खननेनाश्मादिदोषनिवर्तनं भूमेः शोभनत्वम् । उग्रस्यासुरस्य निःकाशनेन शान्तत्वम् । गुणद्वयस्यान्योन्यसमुच्चयार्थौ चकारौ एकोऽयं मन्त्रः ॥ स्योना सुखरूपासि । स्योनमिति

सुखनाम [निघ° ३. ६.] । सुषदा सुष्ठु सीदन्ति देवा यस्यां सा सुषदा । सम्यगुपवेशनयोग्या चासि । चकारौ पूर्ववत् । द्वितीयोऽयं मन्त्रः ॥ ऊर्जस्वती पयस्वती चासि । ऊर्जःशब्दोऽन्नवाची । पयःशब्दस्तद्विकारदध्यादिवाची । तदुभयवती । चौ पूर्ववत् । तृतीयो मन्त्रः ॥ २७॥

a. पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् ।
यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासोऽअनुदिश्य यजन्ते ॥

b. प्रोक्षणीरासादय । c. द्विषतो वधोऽसि ॥ २८॥

का° [२. ६. ३२.] पुरा क्रूरस्येत्यनुमार्ष्टीति । अत्रेयमाख्यायिका मन्त्रेऽभिप्रेता । कदाचिद्देवानामसुरैः सह संग्राम उपस्थितस्तदा देवैर्मिथो मन्त्रितं यदस्या भूमेरुत्कृष्टं देवयजनस्थलं तच्चन्द्रे संस्थाप्य युद्धं कुर्मस्तत्र यद्यस्माकं पराजयः स्यात्तदा देवयजने यागं विधाय पुनर्दैत्यपराजयं करिष्याम इति संमन्त्र्य भूमेः सारभागं देवयजनं चन्द्रे स्थापयामासुस्तत्कृष्णवर्णमिदानीमपि (69.) दृश्यतऽइत्याख्यानमयं मन्त्रो ब्रूते [१. २. ५. १८.] ॥ पुरा क्रूरस्येति त्रिष्टुप् चन्द्रदेवत्या । विरप्शीति महन्नाम [निघ° ३. ३.] विविधं रपति (70.) वेदत्रयरूपेण शब्दं करोतीति विरप्शी । यज्ञो (71.) वेदित्रं (72.) प्राप्तो विष्णुः सम्बोध्यते । हे विरप्शिन् विष्णो परमेश्वर त्वं शृणु अनुगृह्णीयेति शेषः । क्रूरशब्दोऽत्र संग्रामवाची । संग्रामो वै क्रूरमिति श्रुतेः [१. २. ५. ११.] । विविधं सर्पन्ति योधा यस्मिन्निति विसृप् । तस्येति क्रूरविशेषणं पञ्चम्यर्थो षष्ठी । विसृपो नानायोधयुतात्क्रूरात् युद्धात् पुरार्थाद्देवाः जीवदानुं जीवं ददातीति जीवदानुस्तां जीवस्य धात्रीं सारभूतां यां पृथिवीमुदादाय ऊर्ध्वं गृहीत्वा स्वधाभिः वेदैः सह चन्द्रमसि इन्द्रौ ऐरयन् प्राक्षिपन् स्थापयामासुः धीरासः धीरा मेधाविनः तामु उ एवार्थे तामेव चन्द्रस्थां पृथिवीमनुदिश्य दर्शनेन संपाद्य सैव भूमिरस्यां वेद्यां विद्यतऽइति भावयित्वा यजन्ते यागं कुर्वन्ति । स्वधाशब्दो यद्यप्यन्नवाची तथाप्यत्रान्नहेतुभूता वेदत्रयी कथ्यते । यां चन्द्रमसि ब्रह्मणा दधुरिति श्रुतेः [१. २. ५. ११.] ब्रह्मणा वेदेन सहेत्यर्थः । अनेन मन्त्रेण खातायां वेद्यां लोष्टकृतवैषम्यनिवृत्तये समीकरणरूपं मार्जनं कुर्यात् ॥

प्रोक्षणीरासादयेति अग्नीधं प्रति प्रैषः । प्रोक्ष्यस्त्र्आभिरिति प्रोक्षण्य आपस्ता आसाद्य वेद्यां स्थापय ॥ का° [२.६.४२.] द्विषतो वध इति स्फ्यमुद्यच्छते प्रहरतीति । हे स्फ्य त्वं द्विषतः शत्रोर्वधोऽसि हिंसकोऽसि ॥२८॥

X. a. प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ।

b. निष्टप्तꣳ रक्षो निष्टप्ता अरातयः ।

c. अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि ।

d. e. = a. b.

f. अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि ॥२९॥

का° [२.६.४६.] स्रुवं प्रतप्य पूर्ववदिति । यथा शूर्पाग्निहोत्रहवण्योः प्रत्युष्टमिति प्रतपनं कृतं तथा स्रुवस्यापि कार्यमित्यर्थः । मन्त्रो व्याख्यातः ॥ का° [२.६.४६.] वेदाग्नेरुत्तरतः प्राक्संमार्ष्यनिशित इतीति । हे स्रुव त्वमनिशितोऽसि शोतनूकरणे । नितरां शितस्तीक्ष्णीकृतो निशितस्तथा न भवतीत्यनिशितः । अस्मद्विषये तीक्ष्ण उपद्रवकारी न भवसीत्यर्थः । यतः सपत्नक्षित् क्षिणु हिंसायाम् सपत्नानस्मद्भ्रून् क्षिणोति क्षिनस्तीति सपत्नक्षित् । अत एव त्वां संमार्ज्मि सम्यक् शोधयामि । मृजू (73.) शुद्धौ । किंभूतं त्वां वाजिनं वाजोऽन्नमस्यास्तीति वाजिनं यज्ञद्वारा अन्नहेतुत्वादन्नवत्तम् । यद्वा वाजो यज्ञस्तद्वत्तम् यज्ञो हि देवानामन्नमिति श्रुतिः [५.१.१.२.] । वाजं यज्ञाख्यमन्नमर्हतीति वाजिनम् । अर्हार्थे इन्प्रत्ययः । किमर्थं संमार्ज्मि । वाजेध्यायै ञिइन्धी दीप्तौ । इन्धनं इध्या दीप्तिः । वाजस्येध्या वाजेध्या तस्यै वाजेध्यायै यज्ञस्य दीप्त्यै प्रकाशनार्थम् । शोधितेन स्रुवेणाज्ये गृहीते हुते च सति अग्निर्दीप्यते । तद्दीप्याहुतिफलभूतमन्नं प्रकाशितं भवतीत्यर्थः ॥ का° [२.६.४७.४८.] प्रतप्य प्रतप्य प्रयच्छत्यनिशितेति स्रुच इति । अनिशितेति मन्त्रेण स्रुचस्तिस्रो ज्रुक्रूपभृद्ध्रुवाः संमृज्य प्रत्येकं प्रत्युष्टमिति मन्त्रेण प्रतप्य प्रतप्य वेद्यां स्थापनार्थमध्वर्यवे प्रयच्छतीति सूत्रार्थः । प्रत्युष्टमिति व्याख्यातम् । अनिशितेत्यपि व्याख्यातम् । स्रुवस्य पुंस्त्वादादौ स्रुवसंमार्जनम् । स्रुचां स्त्रीत्वात्पश्चात् । योषा वै सुग्वृषा स्रुव इत्यादिश्रुतेः [१.३.१.१.] । ज्रुक्वादीनां स्रु-

चां स्त्रीलिङ्गत्वात्तद्विशेषणयोरनिशिता वाजिनीमित्यनयोः स्त्रीत्वं विशेषः ॥ २१ ॥

a. अदित्यै रास्नासि । b. विष्णोर्विष्योऽसि । c. ऊर्जे त्वा ।

d. अदब्धेन त्वा चक्षुषावपश्यामि ।

अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्नेधाम्ने मे भव यजुषेयजुषे ॥ ३० ॥

का° [२. ७. १.] पत्नीꣳ संनह्यति प्रत्यग्दक्षिणात उपविष्टां गार्हपत्यस्य मुञ्जयोक्त्रेण त्रिवृता परिक्रत्यधीवासोऽदित्यै रास्नासीतीति । हे योक्त्र अदित्यै अदित्या भूम्यास्त्वं रास्नासि रशना भवसि ॥ का° [२. ७. २. ३.] दक्षिणं पाशमुत्तरे प्रतिमुच्योर्धमुद्यूहति विष्णोर्विष्य इति न ग्रन्थिं करोतीति । हे दक्षिण पाश त्वं विष्णोः यज्ञस्य विष्योऽसि व्यापकोऽसि । विषॢ व्याप्तौ ॥ का° [२. ७. ४.] ऊर्जे त्वेत्याज्यमुद्वास्यति । हे आज्य त्वामुद्वासयामीति शेषः । किमर्थम् । ऊर्जे उत्तमरसलाभाय । विलापितं घृतं सुस्वादु भवति ॥ का° [२. ७. ४.] पत्नीमवेक्षयत्यदब्धेनेतीति । दम्भोतिर्हिंसार्थः । हे आज्य अदब्धेन अनुपहिंसितेन चक्षुषा त्वामवपश्यामि । अवाचीनं यथा तथाधोमुखी सती पश्यामि । किं च हे आज्य त्वमग्नेर्जिह्वासि । यदाज्यमग्नौ ह्रूयते तदा जिह्वेव ज्वालोत्पद्यतेऽतस्त्वमग्नेर्जिह्वा । किम्भूतं देवेभ्योऽर्थाय सुहूः सुष्ठु ह्रूयते इति सुहूः पुंस्त्वं छान्दसम् । यद्वा जिह्वाविशेषणं सुष्ठु ह्रूयन्ते देवा आह्रूयन्तेऽनया सा सुहूर्जिह्वा । ज्वालां दृष्ट्वा आयन्तीत्यर्थः । अतो मे मम धाम्नेधाम्ने भव तथा यजुषेयजुषे च भव । धाम स्थानम् । फलेन युज्यत इति यजुःशब्दो यागवाची । धाम्नेधाम्ने तत्तद्यागफलोपभोगस्थानसिद्ध्यर्थं भव । यजुषेयजुषे तत्तद्यागसिद्धये योग्यं भवेत्यर्थः ॥ ३० ॥

a. सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।

b. सवितुर्वः प्रसवऽ - रश्मिभिः ।

c. तेजोऽसि शुक्रमस्यमृतमसि ।

d. धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ ३१ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां प्रथमोऽध्यायः ॥

का° [२. ७. ७.] सवितुस्त्वेत्याज्यमुत्पुनातीति । सवितुर्देवस्य प्रसवे आज्ञायां वर्तमानः सन्त्वामुत्पुनामि शोधयामि । व्याख्यातमन्यत् ॥ का° [२.७.८.] प्रोक्षणीश्च पूर्ववदिति । सवितुर्वः । वो युष्मानुत्पुनामीति व्याख्यातम् ॥ का° [२.७.९.] आज्यमवेक्षते तेजोऽसीतीति । हे आज्य त्वं तेजोऽसि । शरीरकान्तिहेतुत्वात्तेजस्त्वम् । शुक्रमसि दीप्तिमदसि । स्निग्धद्रव्यत्वाद्दीप्तिमत्त्वम् । अमृतमसि विनाशरहितमसि । वक्रुदिवसावस्थानेऽप्योदनादिवत्पर्युषितत्वादिदोषाभावादविनाशित्वम् ॥ का° [२. ७. ११. १२.] स्रुवेणाज्यग्रहणं चतुर्गृह्णां धाम नामेति सकृन्मन्त्र इति । हे आज्य त्वं धाम स्थानमसि धीयते स्थाप्यते चित्तवृत्तिर्देवैरत्रेति धाम । तथा नाम नामयति आत्मानं प्रति सर्वाणि भूतानीति नाम । आज्यं दृष्ट्वा सर्वेऽप्यत्तुं नमन्ति । तथा देवानां प्रियमिष्टम् अनभिभूतम् । गतसारत्वदोषेणातिरस्कृतं चरुपुरोडाशादीनि चिरस्थित्या गतसाराणि स्युरिदं न तथा । देवयजनं देवा इज्यन्तेऽनेनेति यागसाधनम् ईदृशं त्वमस्यतस्त्वां गृह्णामीति वाक्यशेषः ॥३१॥

श्रीमन्महीधरकृते मन्त्रदीपे मनोहरे ।
शाखाद्याज्यग्रहान्तोऽयमध्यायः प्रथमोऽगमत् ॥१॥

अथ काण्वशाखायां पाठविशेषः ॥ श्रीयाज्ञवल्क्याय नमः ॥

I. ॥ १ a. b. c. d - - कर्मणे ॥१॥ आप्यायध्वं - - °घशꣳसः ॥२॥ ध्रुवा - - वृद्धीः १ e. २ a. ॥३॥ ॥

II. ॥ २ b. c - - धाम्ना ॥१॥ दृꣳहस्व - - क्षार्षीत् ३ a ॥२॥ ३ b. c ॥३॥ ४ [°नक्षि] ॥४॥७॥

III. ॥ ५ ॥१॥ ६ ॥२॥ ७ ॥३॥ ८ a ॥४॥ ८ b [असि सन्नितमं वक्षितमं पं°] ॥५॥ ९ c. d. e. f. १० a ॥६॥ १० b. c. ११ a. b ॥७॥ ११ c. d. e [रक्षस्व] ॥८॥१५॥

IV. ॥ १२ a. b ॥१॥ १२ c [यज्ञं नयत सुधातुं यज्ञपतिं यज्ञपतिं] - देवायुवम् ॥२॥ १३ c. d. e. f ॥३॥ १३ g [- यद्वोऽशुद्धः पराजघानेतदिदं -] ॥४॥११॥

V. ॥ १४ a. b. c ॥१॥ १४ d. e ॥२॥ १५ a ॥३॥ १५ b [बृहन्प्रावांसि]. c [- हव्यꣳ शꣳ°] - - °ष्व हविष्कृदेहि ॥४॥ १६ a [- आवद् वयꣳ संघाति-संघाते ज्रेष्म] ॥५॥ १६ b. c. d [प्रतिपूता अरातयः] ॥६॥ १६ e. f. g [- सविता प्रतिगृह्णातु हिरण्यपाणिरेहि° -] ॥७॥२६॥

VI. ॥ १७ a. b. c ॥१॥ १७ d ॥२॥ १८ a. b. c ॥३॥ १८ d [°धामि द्विष-तो वधाय]. e. f ॥४॥३०॥

VII. ॥ ११ a. b. c ॥१॥ ११ d. e [°मन्यसि]. f ॥२॥ २० a °वान्धिनुहि य-ज्ञं धिनुहि यज्ञपतिम् ॥ धिनुहि मां यज्ञन्यम् ॥३॥ २० b-g ॥४॥ वे-दोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः ॥ तेन मह्यं वेदो भव ॥५॥३५॥

VIII. ॥ २१ [- जगतीभिः सं मधुम° -] ॥१॥ २२ a-f ॥२॥ २२ g °सीदुत्त-रितꣳ रक्षोऽन्तरिता अरातयो. h ॥३॥ २३ ॥४॥३१॥

IX. ॥ २४ ॥१॥ पृथिव्यै वर्मासि २४ a ॥२॥ २५ b. c. d ॥३॥ २६ [°रुं ब-ध्नामि पृथिव्यै देवयजनाद्व°] ॥४॥ २७ ॥५॥ २८ a [°स्तां धीरा°]. c ॥६॥४५॥

X. ॥ २९ [°मार्ग्मि] ॥१॥ ३० a °स्त्रासीन्द्राण्यै सनकानं b. c. d - श्यामि ॥२॥ अग्नेर्जिह्वासि सुभूर्देवेभ्यो धाम्नेधाम्ने भव यजुषेयजुषे ॥३॥ ३१ - जनम् ॥४॥ यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे ॥ आ-त्मन्वांत्सोम घृतवान्हि भूत्वाग्निं गच्छ स्वर्यजमानाय विन्द ॥५॥५०॥ दशानुवाकेषु पञ्चाशत् ॥ ॥

इति काण्वशाखायां संहितापाठे प्रथमोऽध्यायः ॥ ॥

I. a. कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि ।

b. वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि ।

c. बर्हिरसि सुम्यस्त्वा जुष्टं प्रोक्षामि ॥ १ ॥

का° [२.७.११.] इध्मं प्रोक्षति विस्रंस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि कृष्णोऽसीति प्रतिमन्त्रमिति ॥ इध्मं विस्रंस्य प्रोक्षेत् । वेदिं च प्रोक्षेत् । बर्हिरादाय वेद्यां पूर्वग्रन्थि कृत्वा प्रोक्षेत्क्रमान्मन्त्रत्रयेणेति सूत्रार्थः ॥ कृष्णोऽसि ॥ हे इध्म त्वं कृष्णोऽसि कृष्णमृगरूपो यज्ञोऽसि । इध्मपूलकस्य (1.) यज्ञसाधनत्वाद्यज्ञत्वोपचारः । किम्भूतः ॥ आखरेष्ठः ॥ आ समन्तात्खरे कठिने वृक्षे तिष्ठतीति आखरेष्ठः । यद्वा खं स्वर्गं राति ददातीति खरः आहवनीयस्तत्रा समन्तात्तिष्ठतीत्याखरेष्ठः । अन्तोदात्तः कृष्णशब्दो वर्णवाची अयं तु कृष्णशब्द आद्युदात्तत्वान्मृगवाची ॥ यज्ञः कदाचिद्देवेभ्योऽपक्रान्तः स्वर्गोपनाय कृष्णमृगो भूत्वा वने यज्ञियतरुमध्ये प्रविश्य कुत्रचित्कठिने वृक्षे तस्थौ । तदेतदभिप्रेत्य कृष्ण आखरेष्ठ इति द्वयमुच्यते । यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचारेत्यादिश्रुतेः [१.१.४.१.] । स्थे च भाषायामिति स्थे परपदे [पा° ६.३.२०.] भाषायां सप्तम्या अलुग्विषयाद्विदेऽलुक् । पूर्वपदादिति [पा° ८.३.१०६.] षत्वम् । अतोऽग्नये जुष्टं प्रियं त्वां प्रोक्षामि प्रोक्षार्थं जलेनेति शेषः । वेदिरसीति वेदिं प्रोक्षति । त्वं वेदिरसि । विद्यते लभ्यत इति वेदिः । विदृ लाभे । देवैरसुरेभ्यो लब्धत्वाद्वेदिः । अतो बर्हिर्जुष्टां बर्हिषो धारणोपयोगितया प्रियां त्वां प्रोक्षामि । पृथ्वीरूपाया वेदेः प्रज्ञारूपस्य बर्हिषो धारकत्वं युक्तम् ॥ बर्हिरसीति बर्हिःप्रोक्षणम् । हे दर्भ त्वं बर्हिरसि प्रभूतत्वाद्वेदिबृंहणसमर्थमसि । अतः सुम्यो जुष्टं सुचां धारणात्प्रियं त्वां प्रोक्षामि ॥ १ ॥

a. अदित्यै व्युन्दनमसि । b. विष्णो स्तुपोऽसि ।

c. ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः ।

d. भुवपतये स्वाहा । e. भुवनपतये स्वाहा ।

f. भूतानां पतये स्वाहा ॥ २ ॥

का° [२.७.२०.] शेषं मूलेषूपसिंचत्यदित्यै व्युन्दनमितीति ॥ हे प्रोक्षणशेषोदक त्वमदित्यै अदित्या भूम्याः व्युन्दनमसि विशेषेण क्लेदनमसि ॥ का° [२.७.२१.] बर्हिर्विस्रष्टस्य पुरस्तात्प्रस्तरयक्ष्णं विष्णोरितीति । हे प्रस्तर दर्भमुष्टिरूप त्वं विष्णोर्यज्ञस्य स्तुपोऽसि । ष्टुञ् स्तुञ् शब्दसंघातयोः । औणादिको डुपप्रत्ययः । दर्भसंघातरूपत्वात्केशसंघातरूपा शिखेव भवसि ॥ का° [२.७.२२.] वेदिꣳ स्तृणात्यूर्णम्रदसमितीति । हे वेदि त्वां स्तृणामि बर्हिषा छादयामि । किम्भूतां त्वाम् । ऊर्णाम्रदसमूर्णामिव मृदुतरामतिशयेन मृदुर्म्रदीयसी ईयसोपश्छान्दसः (2.) । यथा प्रभोरुपवेष्टुं भूमिः कम्बलादिनाच्छाद्यते काठिन्याभावाय तथा दर्भैराच्छादिता वेदिर्मृदुः स्यात् । पुनः किंभूतां त्वां देवेभ्यः स्वासस्थां देवोपकाराय सुखेनासितुं स्थानभूतां । सुखेन आसिनासनेन स्थीयते यस्यां सा स्वासस्था ताम् । का° (2a.) स्कन्नमभिमृशति भुवपतये स्वाहेति ॥ एतन्मन्त्रत्रयस्यात्रोत्कर्षः । भुवपत्यादयस्त्रयोऽग्नेर्भ्रातरः । स्वाहाशब्दो निपातो देवान्प्रतिदानवाची स्वाहाकारं च वषट्कारं च देवा उपजीवन्तीति श्रुतेः । हविर्यज्ञकाले परिधिभ्यो बर्हिर्यद्धविः स्कन्नं तद्भुवपत्यादिभ्योऽग्नेर्भ्रातृभ्यो दत्तमिति मन्त्रार्थः । पुराग्नेर्भ्रातरो वषट्कारभयाद्भूमिं प्राविशंस्तद्दुःखेनाग्निरपि पलाप्योदके प्राविशत्ततो देवैरानीय स्वाधिकारे स्थाप्यमान एवमवदन्यदेतैर्मद्भ्रातृभिर्मा परिधत्तैषां च यज्ञभागः कल्पतामिति । ततस्तेऽग्नेर्भ्रातरः परिधयो ज्ञातास्तेषां च स्कन्नं हविर्भागः कृत इति कथा (3.) [१.३.३.१३-१६.] ॥२॥

a. गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यज्ञमानस्य परिधिरस्यग्निरिड ईडितः ।

b. इन्द्रस्य वाङ्नरसि दक्षिणो वि° -- °डितः ।

c. मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यज्ञमानस्य परिधिरस्यग्निरिड ईडितः ॥३॥

का° [२.८.१.] परिधीन्परिदधाति मध्यमदक्षिणोत्तरान्गन्धर्व इति प्रतिमन्त्रमिति ॥ आदौ पश्चात् । हे परिधे विश्वावसुनामा गन्धर्वः त्वां परिदधातु आहवनी-

यस्य पश्चात्सर्वतः स्थापयतु । विश्वस्मिन्सर्वस्मिन्प्रदेशे वसतीति विश्वावसुः । द्युलोकस्थं सोमं रक्षितुं तत्पार्श्वे सर्वत्र गन्धर्वोऽवसदिति श्रुत्यन्तरकथा । किमर्थं स्थापयतु । विश्वस्यारिष्ट्यै । रिष हिंसायां रेषणं रिष्टिः न रिष्टिः अरिष्टिस्तस्यै । आहवनीयस्थानद्रूपस्य (4.) विश्वस्य हिंसापरिहाराय । परिध्यभावेऽसुराः प्रविश्य हिंसन्ति । किं च त्वं यजमानस्य परिधिरसि । न केवलमग्नेः परिधिः यजमानमप्यसुरेभ्यो रक्षितुं पश्चिमदिशि स्थापितोऽसि । किं च अग्निरिडः ईडितश्चासि । आहवनीयस्य प्रथमो भ्राता भुवपतिनामाग्निद्रूपस्त्वमसि । ईड्यते स्तूयते इतीड स्तुतियोग्यः । अत एव ईडितः स्तुतो होत्रादिभिः । ईड स्तुतौ ॥ दक्षिणं परिधिं परिदधाति । इन्द्रस्य बाहुरसि । हे द्वितीय परिधे त्वमिन्द्रस्य दक्षिणो बाहुरसि । रक्षणासमर्थत्वादिन्द्रबाहुत्वोपचारः (5.) । विश्वस्येत्यादि व्याख्यातम् । अत्राग्निशब्देन भुवनपतिनामा द्वितीयो भ्राता ॥ तृतीयमुत्तरं परिधिं परिदधाति ॥ मित्रावरुणौ ॥ हे तृतीय परिधे मित्रावरुणौ वायुादित्यौ ध्रुवेण स्थिरेण धर्मणा धारणेन उत्तरस्यां दिशि त्वां परिधत्तां परितः स्थापयताम् । विश्वस्येत्यादि पूर्ववत् । अत्राग्निर्भूतानां पतिस्तृतीयो भ्राता ॥३॥

वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि ।
अग्ने बृहन्तमध्वरे ॥४॥

का° [२.८.२.] प्रथमं परिधिꣳ समिधोपस्पृश्य वीतिहोत्रमित्यादधातीति । इयमृक् अग्निदेवत्या गायत्रीछन्दस्का । हे कवे क्रान्तदर्शिन् हे अग्नेऽध्वरे यागे निमित्ते त्वां वयं समिधीमहि अनेनेध्मकाष्ठेन दीपयामः । अतीतानागतदूरेवर्तिपदार्थानां यस्य युगपज्ज्ञानं स कविः । किम्भूतं त्वाम् । वीतिहोत्रम् । इण् गतौ । इतिर्गतिः व्याप्तिः पुत्रपौत्रपशुधनादिभिः समृद्धिरित्यर्थः । वीतये समृद्धै होत्रं होमो यस्य स वीतिहोत्रस्तं यत्र होमे कृते समृद्धिप्राप्तिः स्यादित्यर्थः । यद्वा वीतिरभिलाषो होत्रे होतृकर्मणि यस्य तं । तथा द्युमन्तं । द्यौः कान्तिरस्यास्तीति द्युमान् तं स्वत एव द्युत्युपेतम् । तथा बृहन्तं महान्तम् ॥४॥

a. समिर्दसि । b. सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिद्भिशस्त्यै ।

c. सवितुर्बाहू स्थः । d. ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः ।

e. आ त्वा वसवो रुद्रा आदित्याः सदन्तु ॥५॥

का° [२.८.३.] अनुपस्पृश्य द्वितीयं समिदसीतीति ॥ हे इध्मकाष्ठ त्वं समिदसि अग्नेः समिन्धनं दीपनमसि ॥ का° [२.८.४.] सूर्यस्त्वेति जपत्याहवनीयमीक्षमाण इति ॥ हे आहवनीय सूर्यः पुरस्तात्पूर्वस्यां दिशि कस्याश्चिदभिशस्त्यै सर्वस्या अभिशस्तेर्हिंसायाः सकाशात्त्वा त्वां पातु रक्षतु । चतुर्थी पञ्चम्यर्थे । या काचिद्धिंसा प्रसक्ता तां सर्वां परिरक्षत्वित्यर्थः । इतरदिक्त्रये परिधित्रयं रक्षकं पूर्वस्यां तदभावात्सूर्यः । तथा च श्रुतिः [१.३.४.८.] । गुप्त्यै वा अभितः परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्ताद्गोपारं करोतीति । का° [२.८.५.] (6.) बर्हिषस्तृणे तिरश्ची निदधाति सवितुरितीति । तृणद्वयं प्रस्तरस्थापनार्थं तिर्यग्निदध्यात् । हे तृणे युवामुभे सवितुर्देवस्य बाहू स्थः । प्रस्तरधारणेन सूर्यस्य बाहू इव भवथः ॥ का° [२.८.१०.] तयोः प्रस्तरꣳ स्तृणात्यूर्णम्रदसमितीति । ऊर्णामिव मृदुं देवेभ्यो देवानां स्वासस्थं सुखिनासनेन स्थीयते यत्र तादृशं त्वां स्तृणामि ॥ का° [२.८.११.] अभिविदधात्या त्वां वसव इतीति ॥ प्रस्तरं प्रति पाणी निदधाति । वसवो रुद्रा आदित्याः सवनत्रयाभिमानिनस्त्रयो देवाः त्वामासदन्तु आसादयन्तु सर्वतः प्रसारयन्तु ॥५॥

a. घृताच्यसि जुह्वर्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीद ।

b. घृताच्यस्युपभृन्नाम्ना - सीद ।

c. घृताच्यसि ध्रुवा नाम्ना - सीद ।

d. प्रियेण धाम्ना प्रियꣳ सद आसीद ।

e. ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि । पाहि यज्ञं । पाहि यज्ञपतिम् ।

f. पाहि मां यज्ञन्यम् ॥६॥

का° [२.८.१२.१३.] सव्याभ्यून्ये जुहूं प्रतिगृह्य निदधाति घृताचीत्येवमितरे

उत्तराभ्यां प्रतिमन्त्रमिति । हे जुहू त्वं घृताची असि । घृतमंचति प्राप्नोतीति घृताची घृतपूर्णा भवसि नाम्ना च जुहूः । हूयतेऽनयेति जुहूः । क्विपि द्युतिगमिजुहोतीनां द्वे च जुहोतेर्दीर्घश्चेति [पा° क° ३. २. १७८. प° २. ३.] द्वित्वं दीर्घश्च । सा त्वं प्रियेण धाम्ना देववल्लभेनाज्येन सह इदं प्रियं सदः प्रस्तरलक्षणमासीद् अधितिष्ठ । एतद्वै देवानां प्रियतमं धाम यदाज्यमिति श्रुतेः [१. ३. २. १७.] प्रियधामशब्देनाज्यम् । उपभृतं सादयति । उप समीपे स्थित्वा बिभर्ति आज्यं धारयतीत्युपभृत् । व्याख्यातमन्यत् । ध्रुवां सादयति । ध्रुव स्थैर्ये । यथा क्रोमार्थं जुहूपभृतोश्चलनं तद्वदस्याश्चलनाभावेन स्थिरत्वान्नाम्ना ध्रुवा । अन्यद्व्याख्यातम् ॥ का° [२. ८. ११.] प्रियेण धाम्नेति ध्रुवीऽषि वेद्यां कृतेति (7.) । हे ध्रुविः प्रियेण धाम्नाऽऽज्येन सह प्रियं सद आसीदित्येकैकं ध्रुविः सम्बोध्य वचनम् । का° [२. ८. ११.] ध्रुवा असदन्निति सर्वाण्यालभतऽइति ऋतस्यावश्यम्भाविफलोपेतत्वेन सत्यस्य यज्ञस्य योनौ स्थाने ध्रुवाणि यानि (8.) ध्रुवीषि असदन्नतिष्ठन् । हे विष्णो व्यापक यज्ञपुरुष ता तानि ध्रुवीषि पाहि रक्ष यज्ञं च पाहि यज्ञपतिं च पाहि । का° [२. ८. २०.] पाहि मामित्यात्मानमिति । यज्ञं नयतीति यज्ञनीः तं यज्ञन्यमधर्युं मां पाहि ॥ ६ ॥

II. a. अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ सम्मार्ज्मि ।

b. नमो देवेभ्यः । c. स्वधा पितृभ्यः । d. सुयमे मे भूयास्तम् ॥ ७ ॥

का° [३. १. १३.] इध्मसंनद्धनैरनुपरिधि सम्मार्ष्ट्यग्ने वाजजिदिति त्रिरिधिः परिक्राममिति (9.) । वाजमन्नं जयतीति वाजजित् । तत्सम्बुद्धौ हे वाजजित् हे अग्ने त्वामहं सम्मार्ज्मि शोधयामि । किम्भूतं त्वाम् । वाजं सरिष्यन्तमन्नमुद्दिश्य गमिष्यन्तमन्नसम्पादनोपयुक्तम् । तथा वाजजितमन्नमुद्दिश्य जयोपेतमन्नप्रतिबन्धनिवारकमित्यर्थः ॥ का° [३. १. १५.] अपरमाहवनीयादंजलिं करोति नमो देवेभ्य इतीति । ये देवा अनुष्ठानमनुगृह्णन्ति तेभ्यो नमस्करोति । का° [३. १. १५.] स्वधा पितृभ्य इति दक्षिणत उत्तानमिति । प्राङ्मुखेनादौ देवनत्यर्थमञ्जलिः कृतः इदानीं पितृनत्यर्थं दक्षिणामुख उत्तानमञ्जलिं कुर्यात् । ये पितरः पालकाः सन्ति तेभ्यः

स्वधाऽस्तु । स्वधाशब्दो निपातः पितॄनुद्दिश्य देयद्रव्यस्य दाने वर्तते । अतो यद्देयं तद्दास्याम इत्यर्थः । अनेन मन्त्रद्वयेन देवाः पितरश्चोपचर्यन्ते । का° [३.१.१६.] सुयमे म इति ध्रुक्स्रुपभृतावादायेति । हे ध्रुक्स्रुपभृतौ मे मदर्थं सुयमे सुष्ठु नियते युवां भूयास्तं भवतम् । यथा युवयोः स्थितमाज्यं न स्कन्दति तथा धारयतमित्यर्थः ॥७॥

अस्कन्नमद्य देवेभ्य आज्यꣳ सम्भ्रियासम् ।

e. अङ्घ्रिणा विष्णो मा त्वावक्रमिषम् ।

f. वसुमतीमग्ने ते छायामुपस्थेषं विष्णो स्थानमसि ।

g. इत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात् ॥८॥

तथा सति अद्यास्मिन्ननुष्ठानदिने देवेभ्यो देवोपकारायाज्यं युवयोः स्थितं घृतमस्कन्नं भूमौ यथा न स्कन्दति तथा सम्भ्रियासं सम्यक्पोषणं करोमि धारणं वा । आशीर्लिङि उत्तमे रूपम् । का° [३.१.१६.] दक्षिणातिक्रामत्यङ्घ्रिणा विष्णविति (10.) । हे विष्णो व्यापक यज्ञपुरुष अङ्घ्रिणा पादेन त्वा त्वामहं मा अवक्रमिषमवक्रमणं मा कार्षं पादेनातिक्रमणदोषो मे मा भूदित्यर्थः । का° [३.१.११.] वसुमतीमित्यवस्थायेति । हे अग्ने ते तव छायां छायावत्समीपवर्तिनीं वसुमतीं भूमिमहमुपस्थेषमुपतिष्ठेयं सेवेय । उपपूर्वस्तिष्ठतिः सेवार्थः । स एव सेवाप्रकारः कथ्यते । हे वसुमति त्वं विष्णोर्यज्ञस्य स्थानमसि । अत्र स्थित्वा यागः कर्तुं शक्यते इत्यर्थः । आहवनीयसमीपवर्तित्वादस्या भूमेर्यज्ञस्थानत्वम् । यद्वायमर्थः । हे अग्ने ते तव वसुमतीं धनवतीं धनप्राप्तिकरीं छायामाश्रयमुपस्थेषं सेवेय । छायाशब्द आश्रयवाचकः । युष्मत्पादच्छायायां वसामीतियावत् । यतस्त्वं विष्णोर्यज्ञस्य स्थानमसि ॥ का° [३.२.१.] इत इन्द्र इति ध्रुक्रोतीति । पूर्वमन्त्रे यज्ञसम्बन्धि यत्स्थानमुक्तं तदेव देवानां विजयहेतुत्वादितःशब्देन परामृश्यते । देवयजनव्यतिरिक्तभूमेरसुराधीनत्वेन तत्र देवानां पराजयेऽपि यज्ञप्रदेशः पराजयरहितः । तदेवोच्यते मन्त्रेण ॥ इत इन्द्रः ॥ इन्द्र इतोऽस्माद्देवयजनस्थानात् उद्युक्तः (11.) सन्निति शेषः । वीर्यमकृणोत् वीरस्य कर्म वीर्यं शत्रुबधरूपमकरोत् अत एवाधरो यज्ञ

ऊर्धमास्थात् । उन्नतः स्थितः । इन्द्रेण वीर्ये कृते शत्रुकृतविघ्नाभावादधस्यौन्नत्यम् ॥ ८ ॥

अग्ने वेहोत्रं वेर्दूत्यम् । अवतां त्वां द्यावापृथिवी । अव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत्स्वाहा ।

h. सं ज्योतिषा ज्योतिः ॥ १ ॥

तस्मात् हे अग्ने त्वं होत्रं वेः । होतुः कर्म विद्धि । लङि अडभावे वृपम् । दूत्यं दूतकर्म च वेः विद्धि । होतृत्वं दूतत्वं चाग्निः कर्म । तथा च श्रुतिः [१.४.५. ४.] उभयं वा एतदग्निर्देवानाꣳ होता च दूतश्चेति । ईदृशं त्वां द्यावापृथिवी अवतां पालयताम् । हे अग्ने त्वमपि द्यावापृथिवी लोकद्वयदेवते अव पालय इत्यन्योन्यपालने सति इन्द्रः आज्येन हविषास्माभिर्दत्तेन देवेभ्यो देवार्थं स्विष्टकृत् भूत् । सुष्ठु इष्टं करोतीति स्विष्टकृत् तादृशो भवतु । अडभावश्छान्दसः । यद्यदस्माभिरिज्यते तत्तदिष्टं सर्वं विकल्यरहितं करोत्वित्यर्थः । स्वाहा सुहुतमस्तु । इन्द्रं देवमुद्दिश्य इदमाज्यं दत्तमित्यर्थः । स्वाहेतिनिपातो देवोद्देशेन दाने वर्तते ॥ का° [३.२.२.] हुत्वा ध्रुवाꣳ समनक्ति सं ज्योतिषेति । गृह्णतामित्यध्याहारः । ज्योतिषा ध्रुवास्थिताज्यरूपज्योतिषा सह ज्योतिर्हुत्वासिच्यमानरूपं ज्योतिः संगृह्णताम् ॥ १ ॥

III. a. मयीदमिन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् । अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिषः ।

b. उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयताम् । अग्निराग्नीध्रात्स्वाहा ॥ १० ॥

का° [३.४.२१.] आशासानि मयीदमिति यजमानो जपतीति ॥ प्रधानयागानन्तरं पुरोडाशशेषप्राशनसमये होतरि आशिषं प्रयुञ्जाने सति यजमानो जपति । इन्द्रः परमेश्वर इदमिन्द्रियं मयि दधातु । इदं अस्मदपेक्षितं इन्द्रियं वीर्यं मयि यजमाने स्थापयतु । किं च रायो धनानि दैवमानुषभेदेन द्विविधानि मघवानः

धनवन्तश्चास्मान्यजमानान्सचन्तां (12.) सेवन्ताम् । सच सेवने । किं च अस्माकं यजमानानामाशिषोऽभीष्टार्थस्याशंसनानि सन्तु विद्यन्ताम् । किं च नोऽस्माकमाशिषः पूर्वोक्ताः सत्याः अवितथाः सन्तु । मघमिति धननाम [निघ० २.१०.] तद्विद्यते येषां ते मघवानः । अस्त्यर्थे वन्प्रत्ययः [पा० ५.२.१०९ n.] का० [३.४.१८. ११.२०.] एकैकमाहरति द्यावापृथिव्योरुपह्वानेऽग्नीधे षडवत्तं । प्राश्नात्युपहूता पृथिवीतीति ॥ यदा होता द्यावापृथिव्योरुपह्वानं करोति तदोभयोः पुरोडाशयोरेकैकमंशं (13.) षडवत्ते षडवत्ते (14.) कृत्वाग्नीधे ददाति स चोपहूतेति मन्त्रेण तत्प्राश्नातीति सूत्रार्थः ॥ उपहूता येयं पृथिवी दृश्यते सा जगतो माता निर्मात्री मयोपहूता अभ्यनुज्ञाता सा च पृथिवी माता मातृत्वेनास्माभिर्भाविता सती मामुपह्वयतामनुज्ञातातु हविःशेषभक्षणायाज्ञां ददातु । अहं चाग्नीध्रात् । अग्नीध इदं कर्माग्नीध्रं तस्माद्धितोऽग्निः सन् तं भागं प्राश्नामीति शेषः । स्वाहा सुहुतमस्तु जाठरेऽग्नौ ॥१०॥

a. उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा ।
b. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
c. प्रतिगृह्णामि । d. अग्नेष्टास्येन प्राश्नामि ॥११॥

द्वितीयं प्राश्नाति । एवं द्यौः पिता जगत्पालक उपह्वयतामित्यादि समानार्थम् । देवस्य त्वा । इतः प्रभृति ओं प्रतिष्ठेत्यन्तं [ख० १३.] ब्रह्मत्वम् । तस्याङ्गिरसो बृहस्पतिर्ऋषिः ॥ का० [२.२.१६.] देवस्य त्वेति प्रतिगृह्णातीति ॥ ब्रह्मा देवस्य त्वेति प्राशित्रं गृह्णाति । मन्त्रो व्याख्यातः । प्रतिगृह्णामि स्वीकरोमीति शेषः । का० [२.२.१८.] अग्नेष्टेति प्राश्नाति दन्तैरनुपस्पृशन्निति । हे प्राशित्र अग्नेः आस्येन वह्निदेवताया मुखेन त्वा त्वां प्राश्नामि भक्षयामि ॥११॥

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥
तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥१२॥

का० [२.२.२१.] एतं तऽइति समिदाधानमन्त्रितः प्रसौतीति । समिधमाधातुमनुज्ञा-

प्रदानाय बोधितो ब्रह्मा मन्त्रेणानुज्ञानीयात् । एतं त इत्यादिः ओम्प्रतिष्ठेत्यन्तो मन्त्रः । हे देव दातादिगुणयुक्त हे सवितः प्रसवितः । एतं यज्ञमिदानीं क्रियमाणमिमं मखं ते तुभ्यं त्वदर्थं प्राङ्क्यजमानाः कथयन्ति । अनुज्ञापयन्तीत्यर्थः । किं च त्वया प्रेरितो देवानां यज्ञे यो ब्रह्मा तस्मै ब्रह्मणे बृहस्पतये च प्राङ्कः । बृहस्पतिर्वै देवानां ब्रह्मा । तदधिष्ठित एवायं मानुषो ब्रह्मत्वं करोति । किं च । तेन हेतुना त्वदीयत्वेन यज्ञमव रक्ष । तथा तेनैव हेतुना यज्ञपतिं यजमानं चाव रक्ष । तथा तेनैव हेतुना माम्ब्रह्माणमव पालय ॥ १२ ॥

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु ।
अरिष्टं यज्ञꣳसमिमं दधातु विश्वे देवास इह मादयन्तामोꣳ३म्प्रतिष्ठ ॥ १३ ॥

किं च । मनो आज्यस्य जुषताम् । कर्मणि षष्ठी । मनः घृतं सेवताम् । हे सवितस्त्वदीयं चित्तं यज्ञसम्बन्धिन्याज्ये स्थापयेत्यर्थः । किम्भूतं मनः । जूतिः । जवतेर्गतिकर्मणो जूतिरिति क्तिन्प्रत्ययान्तो निपातः । स्त्रीत्वं छान्दसम् । अतीतानागतवर्तमानकालगतपदार्थेषु गमनशीलं हि मनः । जवते शीघ्रं गच्छतीति जूतिः । किं च बृहस्पतिरिमं यज्ञं तनोतु विस्तारयतु । ब्रह्मत्वात् । तत इमं यज्ञमरिष्टं हिंसारहितं कृत्वा संदधातु । इडामक्षणेन हि मध्ये यज्ञो विच्छिन्न इत्येवमुच्यते । किं च विश्वे देवासः सर्वे देवा इह यज्ञकर्मणि मादयन्ताम् । मद तृप्तौ चुरादिः । तृप्यन्ताम् । एवं प्रार्थितः सविता देवः ओम्प्रतिष्ठेत्यनुज्ञां प्रयच्छतु । ओमित्यङ्गीकारार्थः । तथास्तु । प्रतिष्ठ प्रयाणं कुरु । समिदाधानकाले यजमानस्याभिप्रेतं प्रयाणमवगम्य सविता देवोऽङ्गीकृत्य प्रयाणे प्रेरयतीत्यर्थः ॥ १३ ॥

a. एषा तेऽग्ने समित्तया वर्धस्व चा च प्यायस्व ॥ वर्धिषीमहि च वयमा च प्यासिषीमहि ॥

b. अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ सम्मार्ज्मि ॥ १४ ॥

का° [३.५.२.] एषा त इति स्तोतानुमन्त्रयतेऽइति । ब्रह्मत्वं समाप्तम् । अतः प्राकृतमार्षम् (15.) । इयमनुष्टब्ग्निदेवत्या । हे अग्ने एषा ते तव समित् समि-

न्धनहेतुः काष्ठविशेषः । तया समिधा त्वं वर्धस्व वृद्धिं गह्व । आ प्यायस्व च । अस्मानपि सर्वतो वृद्धिं प्रापय । तथा च सति त्वत्प्रसादाद्वयं वर्धिषीमहि वृद्धिं प्राप्नुयाम प्यासिषीमहि च । अस्मदीयपुत्रपश्वादीन्सर्वतो वृद्धान्कुर्याम ॥ का° [३.५.४.] सम्मार्ष्टि पूर्ववदपरिक्रामꣳ सकृत्सकृत्ससृवाꣳसमितीति । पूर्वमग्ने वाजञ्जिदिति [ख° ७.] मन्त्रेण यथेध्मसंनहनैरग्नेः सम्मार्गः कृतस्तथात्रापि सम्मार्ष्टि । तत्र परिक्रम्य त्रिस्त्रिः कृतः । अत्र तु परिक्रमणं विनैकैकवारमिति विशेष इति सूत्रार्थः । मन्त्रो व्याख्यातः । इयान्विशेषः । हे अग्ने त्वां सम्मार्ज्मि । किम्भूतं त्वां वाजं ससृवांसमन्नमुद्दिश्य गतवन्तमन्नं सम्पादितवन्तमित्यर्थः । अन्यत्पूर्ववत् ॥१४॥

IV. a. अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ॥

b. अग्नीषोमौ तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥

c. इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ॥

d. इन्द्राग्नी तमपनु° - - पोहामि ॥१५॥

का° [३.५.१७.१८.] जुहूपभृतौ व्यूहत्यग्नीषोमयोरितीति । तत्र जुहूं प्राचीं प्रेरयति यजमानः । व्यूहनं परस्परविपरीतत्वेनापनोदनम् । अग्नीषोमयोर्द्वितीयपुरोडाशदेवतयोरुज्जितिमनु अविघ्नेन हविःस्वीकाररूपमुत्कृष्टं जयमनुसृत्याहमुज्जेषमुत्कृष्टं जयं प्राप्तवानस्मि । वाजस्यान्नस्य पुरोडाशादेः प्रसवेनाभ्यनुज्ञया मां प्रोहामि मां यजमानं जुहूरूपधारिणं प्रोत्साहयामि । यद्यप्यूहतिधातुर्वितर्कार्थस्तथाप्युपसर्गवशादुत्साहार्थः ॥ उपभृतं प्रतीचीं प्रेरयति । यः शत्रुरसुरादिरस्मान्द्वेष्टि अस्मदीययज्ञविनाशाय द्वेषं करोति (16.) । यं च वयं द्विष्मः । यमालस्यादिरूपमस्मदीयानुष्ठानविरोधिनं शत्रुं द्विष्मः विनाशायोद्योगं कुर्मः । तमुभयविधं शत्रुमग्नीषोमौ देवावपनुदतां निराकुरुताम् । किं च । अहमप्येनं द्विविधं शत्रुमुपभृदूपं वाजस्य प्रसवेन पुरोडाशदेवताया अभ्यनुज्ञयापोहामि निराकरोमि । उत्तरौ मन्त्रौ दर्शदेवताविषयौ समानार्थौ ॥१५॥

a. वसुभ्यस्त्वा । b. रुद्रेभ्यस्त्वा । c. आदित्येभ्यस्त्वा ।

d. संज्ञानाथां द्यावापृथिवी । मित्रावरुणौ त्वा वृष्ट्यावताम् ।

e. व्यन्तु वयोऽक्तꣳ रिह्राणाः ।

f. मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह । चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ॥ १६ ॥

का° [३.५.२४.] जुह्वा परिधीनन्वक्ति यथापूर्वं वसुभ्य इति प्रतिमन्त्रमिति । हे मध्यमपरिधे वसुभ्यः वसुदेवताप्रीत्यर्थं त्वा त्वामनज्मीति शेषः । एवं दक्षिणोत्तरपरिधिमन्त्रौ व्याख्येयौ । परिधित्रयाज्जनेन सवनत्रयदेवताः प्रीयन्त इति भावः ॥ का° [३.६.३.] संज्ञानाथामिति प्रस्तरादानमिति । हे द्यावापृथिवी द्युलोकभूलोकदेव्यौ युवां संज्ञानाथां गृह्यमाणं प्रस्तरं सम्यगवगच्छतम् । किं च हे प्रस्तर मित्रावरुणौ प्राणापानवायू वृष्ट्या जलवर्षणेन त्वा त्वामवतां रक्षताम् । वायुर्वै वर्षस्येष्टे [१.८.३.१२.] इत्युक्तत्वाद्वर्षाधीशो वायुः स चाध्यात्मगतः प्राणोदानरूपो मित्रावरुणशब्दाभ्यामुच्यते । स च प्रस्तररूपं यजमानं वृष्ट्यावतु । यजमानो वै प्रस्तर इति श्रुतेः [१.८.१.४४.] ॥ का° [३.६.४-७.] अनक्त्येनं व्यन्तु वय इत्यग्रं जुह्वामुपभृति मध्यं मूलमितरस्यामिति । इतरस्यां ध्रुवायाम् ॥ वयः पक्षिणः व्यन्तु । वी गतिप्रजननकान्त्यसनखादनेषु । पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि गच्छन्तु । प्रस्तरमादायेति शेषः । किम्भूताः वयः । अक्तं रिह्राणाः । अक्तं घृतलिप्तं प्रस्तरं लिह्राना आस्वादयन्तः । रलयोरैक्यम् ॥ का° [३.६.८.] मरुतामिति नीचैर्हृत्वा तृणमादायानुप्रहरतीति । एकं तृणं प्रस्तरात्पृथक्कृत्य प्रस्तरं नीचैर्हृत्वाग्नौ प्रक्षिपेदिति सूत्रार्थः । मरुतामिति प्रस्तरदेवत्या बृहती कपिदृष्टा चतुर्थः पाद आग्नेयः । हे प्रस्तर त्वं मरुतां पृषतीर्गच्छ मरुन्नामकानां देवानां सम्बन्धिनीः पृषतीर्वाहनरूपा अश्वाश्चित्रवर्णा गच्छ प्राप्नुहि । वायुवाहनवद्वेगेन गच्छेत्यर्थः । अन्तरिक्षं गच्छेत्यर्थः । वशा पृश्निर्भूत्वा । वशा स्वाधीना पृश्निरल्पतनुर्गौर्भूत्वा दिवं गच्छ । कामधेनुवत्तृप्तिकरी भूत्वा स्वर्गं गच्छेत्यर्थः । ततः स्वर्गप्राप्तिरनन्तरं नोऽस्मदर्थं वृष्टिमावह भूलोके वृष्टिमानय । यद्वा । इयं वै वशा पृश्निर्यदिदमस्यामूलि

चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशा पृश्निरिति श्रुतेर्वशापृश्निशब्देन भूमिरुच्यते [१.८.३.१५.] । वशा पृश्निर्भूत्वा पृथिवी भूत्वा दिवं गह पृथिवीसम्बन्धिभागानादाय द्युलोकं तर्पयेत्यर्थः । हे प्रस्तर् त्वमन्तरिक्षं गत्वा तत्रस्थान्मरुतः सवाकृनान्संतर्प्य स्वर्गं गत्वा देवांश्च संतर्प्य पृथिव्यां वृष्टिं कुर्वित्याकृतिपरिणामः सूचित इति भावः ॥ का° [३.६.१५.] चक्षुष्पा इत्यात्मानमालभत इति । हे अग्ने त्वं यतश्चक्षुष्पा असि । चक्षुः पातीति चक्षुष्पाः । ज्वलयान्धकारं निवर्त्य चक्षुःपालकोऽसि । अतो मे मम चक्षुः पाहि पालय प्रस्तरप्रहरणप्रसक्तं चक्षुष उपद्रवं परिहरेत्यर्थः ॥१६॥

a. यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः ।
तं तेऽहतमनु जोषम्भराम्येष नेवदपचेतयाति ॥

b. अग्नेः प्रियं पाथोऽपीतम् ॥१७॥

का° [३.६.१७.] परिधीननुप्रहरति यं परिधिमिति प्रथममिति ॥ एकादशिनस्त्रयोऽष्टकश्च विराड्रूपः । प्रथमोऽष्टकः । यं परिधिम् । त्रिष्टुब्विराड्रूपा आग्नेयी (17.) यजुरुक्ता । अग्नेः प्रियमिति यजुः । देवलदृष्टा ॥ हे अग्ने देव आहवनीय । पणिभिरसुरैः गुह्यमानः । गुह्रू संवरणे संव्रियमाणः संरुध्यमानः सन् त्वं यं परिधिं पश्चिमदिशि पर्यधत्थाः । असुरोपद्रवनिवारणाय परिहितवानसि स्थापितवानसि । ते तव जोषं प्रियं तमेतं परिधिमनु भरामि वह्नौ प्रक्षिपामि । अनुर्भिन्नक्रमः । हृतेर्हस्य भः । एष परिधिः त्वत् त्वत्तः सकाशात् न । इत् एवार्थे नैव अपचेतयाति । मा अपचेतयतु । त्वत्तोऽपगन्तुं मा ज्ञानावित्यर्थः । त्वय्येव तिष्ठतु । चिती संज्ञाने णिजन्ताच्छेट् । तस्यात्मनेपदे प्रथमैकवचनं तात्तम् (18.) । ठित आत्मनेपदानामिति [पा° ३.४.७९.] तस्यैकारः । वैतोऽन्यत्रेति [पा° ३.४.९६.] लेऽडेकारस्य पाक्षिक ऐ । लेटोऽडाटावित्याडागमः [पा° ३.४.९४.] । गुणायादेशौ (19.) । अपपूर्वः अपचेतयाति । अपचेतयतु । एष परिधिस्त्वत्तोऽपगतचित्तो मास्त्वित्यर्थः । का° [३.६.१७.] इतरौ च युगपदग्नेः प्रियमितीति । दक्षिणोत्तरौ परिधी युगपत्प्रक्षिपेत् । हे परिधी अग्नेः प्रियं पाथः युवामपीतमपिगहतम् ।

पाथ इत्यन्ननाम (19 a.) आहवनीयस्याभिप्रेतमन्नमभिगच्छतम् । अग्नेरन्नत्वं भवद्भ्यां प्राप्यतामित्यर्थः ॥ १७ ॥

a. सꣳस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वम् ॥

b. स्वाहा वाट् ॥ १८ ॥

का° [३. ६. १८.] सꣳस्रवभागा इति सꣳस्रवान्जुहोतीति । विश्वेदेवी त्रिष्टुब्यजुरन्ता । स्वाहा वाडिति यजुः । सोमशुष्म ऋषिः । हे विश्वे देवा यूयं संस्रवभागाः स्थ । विलीनमाज्यं संस्रवः । स एवभागो येषां ते संस्रवभागाः । तथाविधा भवथ । तथा इषा संस्रवलक्षणेनान्नेन बृहन्तो महान्तः स्थ । किं च ये प्रस्तरेष्ठाः प्रस्तरे तिष्ठन्तीति प्रस्तरेष्ठाः प्रस्तरस्थायिनः । ये च परिधेयाः परिधिभवाः सन्ति । ते विश्वे देवा इमां मदीयां वाचमभि गृणन्तः सर्वत्र वर्णयन्तः । अयं यजमानः सम्यक् यजतीत्येवं सर्वेषां देवानां मध्ये कथयन्तो यूयमस्मिन्बर्हिषि यज्ञꣳआसद्योपविश्य मादयध्वं तृप्यध्वं मोदध्वं वा । स्वाहेति वाडिति च शब्दौ हविर्दानार्थौ । सर्वथा दत्तमित्यादरं दर्शयितुं शब्दद्वयप्रयोगः । यद्यपि स्वाहाकारेण वा वषट्कारेण वेति श्रुतिर्वषट्कारो दानार्थः । तथापि देवानां परोक्षप्रियत्वात्प्रत्यक्षत्वपरिहाराय वाडितिशब्दः प्रयुक्तः ॥ १८ ॥

a. घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् ।

b. यज्ञ नमश्च तꣳऽव च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥ ११ ॥

का° [३. ६. ११.] घृताची इति धुरि निदधातीति । ध्रुवेऽपभृतौ शकटधुरि निदध्यात् । हे ध्रुवेऽपभृतौ युवां घृताची स्थः । घृतमंचतः प्राप्नुतः इति घृताच्यौ । पूर्वसवर्णदीर्घः । तथाविधे युवां धुर्यावनड्वाहौ पातं रक्षतं धुरं वहतस्तौ धुर्यौ । किं च युवां सुम्ने सुखरूपे स्थः भवथः तस्मात्सुम्ने सुखे मा मां धत्तं स्थापयतम् ॥ का° [३. ६. २१.] यज्ञ नमश्च तꣳइति वेदिमालभत इति । अस्य मन्त्रस्य भूर्पं यवमान् कृषिरुद्दालवान् धानात्तर्वानिति पञ्च ऋषयः । यज्ञो देवता । हे यज्ञ ते

तुभ्यं नमः अस्तु उप उपचयो वृद्धिश्च तेऽस्तु । चकारावन्योन्यसमुच्चयार्थौ । नम-उपशब्दाभ्यां यज्ञस्य यदतिरिक्तं यच्च न्यूनं ज्ञातं तत्पूर्णं ज्ञायते । तथा च श्रुतिः । स यदतिरिच्यति तन्नमस्कारेण शमयति अथ यद्वूनं करोत्युप चेति तेन तदन्यूनं भवतीति । किं च । यज्ञस्य शिवि संतिष्ठस्व अन्यूनातिरिक्तं यज्ञं कुर्वित्यर्थः । यद्वै यज्ञस्यान्यूनातिरिक्तं तच्छिवं तेन तदुभयं शमयतीति श्रुतेः । मे मम स्विष्टे संतिष्ठस्व । साधु इष्टं स्विष्टं । शोभने यागे तिष्ठसि प्राप्तिं कुर्वित्यर्थः ॥ ११ ॥

V. a. अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः । पाहि प्रसित्यै । पाहि दुरिष्ट्यै । पाहि दुरद्मन्याऽअविषं नः पितुं कृणु । सुषदा योनौ स्वाहा वाट् ।

b. अग्नये संवेशपतये स्वाहा ।

c. सरस्वत्यै यशोभगिन्यै स्वाहा ॥ २० ॥

का° [३.७.१७.] स्रुक्स्रुवं प्रगृह्णात्यग्नेऽदब्धायविति । दभ्नोतिः हिंसाकर्मा [निघ° २.११.] । आयुरिति मनुष्यनाम [निघ° २.३.] । अदब्धोऽनुपहिंसित आयुर्मनष्यो यजमानो यस्य सोऽदब्धायुः । अश भोजने । अश्नाति भुङ्क्ते इत्यशी । यद्वा अश्नुते व्याप्नोति व्याप्नोतीत्यशी । अतिशयेनाशी अशितमः । दीर्घश्छान्दसः । हे अदब्धायो अहिंसितयजमान हे अशितम भोक्तृतम यद्वा व्यापकतम । हे अग्ने गार्हपत्य मा मां दिद्योः वज्रात्पाहि । शत्रुप्रयुक्ताद्वज्रसमादायुधान्मान्पाहि । दिद्युरिति वज्रनाम (19 b.) । प्रसित्यै प्रसितेर्बन्धनहेतुभूताज्जालान्मा पाहि । प्रसितिः प्रसयनात्तन्तुर्वा जालं वेति यास्कः [निरु° ६.१२.] । दुष्टा इष्टिर्दुरिष्टिः अशास्त्रीयो यागः । तस्मान्मां पाहि । दुरद्मनी । अदनमद्मनी । दुष्टा अद्मनी दुरद्मनी दुर्भोजनं ततो मान्पाहि । चतुर्थ्यः पञ्चम्यर्थे । भीत्रार्थानामिति [पा° १.४.२५.] पञ्चमी । किं च नोऽस्माकं पितुमन्नमविषं कृणु हविर्विषरहितं कुरु । योनिरिति गृहनाम [निघ° ३.४.] । सुष्ठु सद्यते स्थीयते यस्यां सा सुषदा । तस्यां सुषदा विभक्तेराकारः । सम्यगवस्थानयोग्ये गृहे मां स्थापयेति शेषः । यद्वा गृहे स्थितानां नोऽस्माकं पितुमविषं कुरु । स्वाहा वाडिति पदे व्याख्याते ॥ का° [३.७.१८.]

दक्षिणाग्नौ जुहोत्यग्नय इति सरस्वत्या इति चेति । स्त्रीपुंसयोरभिलापपूर्वकमेकत्रशयनं संवेशः । तस्य पतिर्योऽग्निस्तस्मै स्वाहा हविर्दत्तम् । जीवतः पुरुषस्य प्रशंसा यशः तस्य यशसो भगिनी वाग्रूपा सरस्वती तस्यै हविर्दत्तम् ॥ २० ॥

a. वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः ।
b. देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥ २१ ॥

का° [३.८.१.] पत्नी वेदं प्रमुञ्चति वेदोऽसीति ॥ हे कुशमुष्टिनिर्मित पदार्थ त्वं वेदोऽसि । ऋगाद्यात्मकोऽसि । यद्वा वेत्तीति वेदः ज्ञातासि । हे देव द्योतनात्मक वेद हे वेद येन कारणेन त्वं देवेभ्यः । षष्ठ्यर्थे चतुर्थी । देवानां वेदोऽभवः ज्ञापकोऽभूः तेन कारणेन मह्यम्मम वेदो भूयाः ज्ञापको भव ॥ का° [३.८.४.] समिष्टयजुर्जुहोति देवा गातुविद इतीति । इयं विराट्छन्दस्का वातदेवत्या मनसस्पतिदृष्टा ऋक् । अस्याः पूर्वार्धेन देवता विसृजति (20.) । गै शब्दे । गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यते इति गातुर्यज्ञः तं विदन्ति जानन्तीति गातुविदः । हे गातुविदः यज्ञवेत्तारो देवाः गातुं वित्वा विदित्वा । विद ज्ञाने । अस्मदीयो यज्ञः प्रवृत्त इति ज्ञात्वा । गातुमित यज्ञं प्रत्यागच्छत । यद्वा गातुर्गन्तव्यो मार्गः तं गच्छत । अस्मदीययज्ञेन तुष्टाः सन्तः स्वमार्गं गच्छत । एवं देवान्विसृज्य चन्द्रं प्रत्याह । हे मनसस्पते । मनोऽधिपश्चन्द्रः । यद्वा देवान्यष्टुं मनसः प्रवर्तकः परमेश्वरः । तं प्रत्युच्यते । हे मनसस्पते परमेश्वर हे देव इममनुष्ठितं यज्ञं स्वाहा तुभ्यं ते ददामि । त्वं च तं यज्ञं वाते वायुरूपे देवे धाः स्थापय । वाति हि यज्ञोऽवतिष्ठते । तदुक्तं श्रुत्या । वायुरेवाग्निस्तस्माद्यदेवाधर्युरुत्तमं कर्म करोत्यथैतमेवाप्येतीति ॥ २१ ॥

सम्बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सस्रुचेह ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहा ॥ २२ ॥

का° [३.८.५.] बर्हिः सम्बर्हिरितीति । बर्हिर्जुहोति । इयमृक् त्रिष्टुप् विरा-

ऽनूपा बर्हिर्देवत्या । इन्द्रो हविषा हविःसंस्कारयुक्तेन घृतेन बर्हिः दर्भं समङ्क्ताम् । सम्यगञ्जनोपेतं करोतु स चेन्द्रः केवलो न । किं तु आदित्यैर्वसुभिर्मरुद्भिः विश्वेदेवैर्विश्वनामकैश्च गणदेवैः सहितः समङ्क्ताम् । समित्यस्योपसर्गस्यावृत्त्या अङ्क्तामित्यस्य क्रियापदस्याप्यावृत्तिर्वोढव्या । वस्वादिसहितेनेन्द्रेण समङ्क्तां तद्बर्हिर्यद्दिव्यं नभो आदित्यलक्षणं ज्योतिः तदृक्षतु आदित्यं प्राप्नोतु । स्वाहा इदं बर्हिर्देवोद्देशेन दत्तम् । नभ इत्यादित्यनामसु [निघ० १. ४.] पठितं दिवि भवं दिव्यम् ॥ २२ ॥

a. कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति । पोषाय ॥

b. रक्षसाम्भागोऽसि ॥ २३ ॥

का० [३. ८. ६.] वेद्यां प्रणीता निनयति परीत्य कस्त्वेति । व्याख्यातो [अध्या० १. ६.] मन्त्रः प्रजापतिदेवतः तत्र यज्ञयोगे (21.) नियुक्तः अत्र तु यज्ञविमोके । पोषाय यजमानं पुत्रादिभिः पोषयितुं त्वां निनयामीति शेषः । यज्ञं प्रयुज्याविमोके यजमानस्याप्रतिष्ठापत्तेर्विमोकः कार्यः । यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवतीति श्रुत्यन्तरवचनात् । का० [३. ८. ७.] पुरोडाशकपालेन कणानपास्यत्यधः कृष्णाजिनञ्च रक्षसामितीति । हे कणसमूह त्वं रक्षसां भागोऽसि तेषां नीचजातित्वान्निकृष्टकणरूपो भागो युक्तः ॥ २३ ॥

VI. सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ २४ ॥

त्वष्टृदेवत्या त्रिष्टुप् । इतः परं यजमानम् । का० [३. ८. ८-१०.] पूर्णपात्रं निनयति परीत्य संततं यजमानोऽञ्जलिना प्रतिगृह्णाति सं वर्चसेति मुखं विमृष्ट इति ॥ समित्युपसर्गो (22.) ऽगन्महीत्यनेन सम्बद्धः (23.) प्रत्येकम् । वर्चसा ब्रह्मवर्चसेन वयं समगन्महि संगता भवामः । पयसा क्षीरादिरसेन समगन्महि । तनूभिरनुष्ठानक्षमैः शरीरावयवैः यद्वा तनूभिर्भार्यापुत्रादिभिः समगन्महि । शिवेन शा-

तेन कर्मश्रद्धायुक्तेन मनसा समगन्महि । यज्ञमुपगच्छतो नरस्य वर्चसाप्यपेति तदनेन पुनराप्याययति । किं च सुदत्रः शोभनदानः त्वष्टा रायो धनानि विदधातु करोतु । तन्वः शरीरस्य मदीयस्य यत् विलिष्टं विशेषेण न्यूनमङ्गं तदनुमार्ष्टु । न्यूनत्वपरिहरिणानुकूलं कृत्वा शोधयतु । धनस्य शरीरस्य पुष्टिं करोत्वित्यर्थः । सुष्ठु ददातीति सुदत्रः । सुपूर्वाद्ददातेः ष्ट्रन् । सर्वधातुभ्य इति [उ° ४.१६०.] ष्ट्रन् । बाहुलकत्वाड्ड्स्वः ॥ २४ ॥

a. दिवि विष्णुर्व्यक्रमीत्स्तु जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।

b. अन्तरिक्षे विष्णुर्व्यक्रमीत्स्तु त्रैष्टुभेन छ° - - °भ्मः ।

c. पृथिव्यां विष्णुर्व्यक्रमीत्स्तु गायत्रेण छ° - - °भ्मः ।

d. अस्मादन्नात् । e. अस्यै प्रतिष्ठायै ।

f. अगन्म स्वः । g. सं ज्योतिषाभूम ॥ २५ ॥

का° [३.८.११.] विष्णुक्रमान्क्रमते दिवि विष्णुरिति प्रतिमन्त्रमिति । विष्णुपादबुद्ध्या स्वपादस्य भूमौ प्रक्षेपा विष्णुक्रमाः । विष्णुर्यज्ञपुरुषः । जागतेन छन्दसा जगतीछन्दोरूपेण स्वकीयपादेन दिवि द्युलोके व्यक्रमीत्स्तु विशेषेण क्रमणं कृतवान् । तथा सति ततो द्युलोकात् निर्भक्तो भागरहितः कृत्वा निःसारितः । कः । यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः । योऽस्मान्दृष्ट्वा न प्रीयते यं च दृष्ट्वा वयं न प्रीयामहे स द्विविधोऽपि शत्रुर्दिवो निःसारितः । एवमुत्तरावपि विष्णुक्रममन्त्रौ व्याख्येयौ ॥ का° [३.८.१३.] अस्मादन्नादिति भागमवेक्षत इति । योऽयम्भागोऽवेक्ष्यते अस्मादन्नाद्यजमानभागान्निर्भक्त इति वाक्यशेषोऽनुवर्तनीयः ॥ का° [३.८.१४.] अस्यै प्रतिष्ठाया इति भूमिमिति ॥ अवेक्षत इति चतुर्षु मन्त्रविनियोगेष्वनुवर्तते । अस्यै अस्याः पुरतो दृश्यमानायाः प्रतिष्ठाहेतोर्यज्ञियभूमिः निर्भक्त इत्यादि पूर्ववत् ॥ का° [३.८.१५.] अगन्म स्वरिति प्रागिति । पूर्वस्यां दिशि स्थितं स्वः स्वर्गं सूर्यं वा वयमगन्म प्राप्ताः । यज्ञानुष्ठानेन ॥ का° [३.८.१६.] सं ज्योतिषेत्याहवनीयमिति । ज्योतिषाहवनीयलक्षणेन वयं समभूम संगता अभूम ॥ २५ ॥

a. स्वयम्भूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि ।

b. सूर्यस्यावृतमन्वावर्ते ॥ २६ ॥

का° [३.८.१७.] स्वयम्भूरिति सूर्यमिति । हे सूर्य त्वं स्वयम्भूरकृतकः स्वयंसिद्धोऽसि । श्रेष्ठो प्रशस्यतमो रश्मिः मण्डलशरीराभिमानी हिरण्यगर्भाख्योऽसि । सूर्यस्य सप्त रश्मयः सन्ति । चतुर्दिक्षु चत्वारः । एक ऊर्ध्वेकोऽधस्तात् सप्तमो मण्डलाभिमानी हिरण्यगर्भः पुरुषः स श्रेष्ठः स त्वमसि । यतस्त्वं वर्चोदा असि तेजसो दातासि अतो मे वर्चः ब्रह्मवर्चसं देहि ॥ का° [३.८.१९.] सूर्यस्येत्यावर्तते प्रदक्षिणमिति । आवर्तनमावृत् । सूर्यस्य सम्बन्धिनीमावृतमावर्तनमनुसृत्याहमपि आवर्ते प्रादक्षिण्येनावर्तनं करोमि ॥ २६ ॥

a. अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयासꣳ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः । अस्थूरि णौ गार्हपत्यानि सन्तु शतꣳ हिमाः ।

b. सूर्यस्यावृतमन्वावर्ते ॥ २७ ॥

का° [३.८.२१.] गार्हपत्यमुपतिष्ठतेऽग्ने गृहपतेऽइति । हे गृहपतेऽस्मदीयगृहस्य पालक हे अग्ने त्वया गृहपतिना गृहपालकेन कृत्वा त्वत्प्रसादेनेत्यर्थः । अहं सुगृहपतिः शोभनो गृहपतिः भूयासं भवेयम् । तथा हे अग्ने त्वमपि मया गृहपतिना मदीयसेवयेत्यर्थः । सुगृहपतिः शोभनो गृहपालको भूयाः भव । अग्नेपदस्यावृत्तिरादरार्था । एवं सति नौ आवयोर्गार्हपत्यानि गृहपतिभ्यां स्त्रीपुरुषाभ्यां निष्पाद्यानि कर्माणि शतं हिमाः वर्षाणि शतवर्षपर्यन्तमस्थूरीव सन्तु । निरन्तरमव्यवहितानि प्रवर्तन्ताम् । एकपार्श्वे बलीवर्दयुक्तं शकटं स्थूरि न स्थूरि अस्थूरि । लुप्तोपमानम् । बलीवर्दद्वययुक्तं शकटं यथा निरन्तरं अव्यवहितं प्रसरति । तथास्माकं गार्हपत्यानि सन्तु । गृहपतिना सम्युक्ते ञ्य [पा° ४.४.१०.] इति ञ्यप्रत्ययः ॥ का° [३.८.२३.] सूर्यस्येत्यावर्तते प्रदक्षिणमिति । व्याख्यातम् ॥ २७ ॥

a. अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि ।

b. इदमहं य एवास्मि सोऽस्मि ॥ २८ ॥

का° [३.८.२१.] व्रतं विसृजते येनोपयादिति । व्रतग्रहणे मन्त्रद्वयमुक्तं तयोर्मध्ये येन व्रतादानं कृतं प्रथमेन द्वितीयेन वा । अत्रापि तदनुसारेण व्रतं विसृजेत् । हे अग्ने हे व्रतपते कर्मपालक अहं व्रतमचारिषं कर्मानुष्ठितवानस्मि तदशकं शकितवान् । त्वत्प्रसादात्तत्कर्मशक्तोऽभूवम् । त्वया च तन्मे मदीयं कर्म अराधि साधितम् । द्वितीयो मन्त्रः । हे अग्ने इदं कर्म समाप्य योऽहं कर्मणः पुरा अस्मि स एव मनुष्योऽस्मि ॥ २८ ॥

इति दर्शपूर्णमासेष्टिमन्त्राः समाप्ताः ॥

अतः परं पिण्डपितृयज्ञमन्त्रास्तेषां प्रजापतिर्ऋषिः ॥

VII. a. अग्नये कव्यवाहनाय स्वाहा ।

b. सोमाय पितृमते स्वाहा ।

c. अपहता असुरा रक्षाꣳसि वेदिषदः ॥ २९ ॥

का° [४.१.७.] सारतण्डुलमपूर्णꣳ श्रपयित्वाभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नय इति सोमायेति च ॥ कवयः क्रान्तदर्शिनः पितरस्तेषां सम्बन्धि कव्यं हविः । तद्वोढुमधिकारो यस्यास्ति स कव्यवाहनः । तस्मै अग्नये स्वाहा हविर्दत्तं । पितृमान्पितृसम्युक्तः तस्मै सोमनामकाय देवाय स्वाहा हविर्दत्तं । स्वाहाकारेण वषट्कारेण वा देवेभ्योऽन्नदानश्रुतेर्देवाविमौ मन्त्रौ । का° [४.१.८.] दक्षिणेनोल्लिखत्यपहता इतीति । वेद्यां सीदन्ति वेदिषदः तादृशा असुराः अपहता वेदिसकाशादपगताः । तथा रक्षांसि वेद्या अपकृतानि । असुरत्वं रक्षस्त्वं चेति जातिविशेषौ देवविरोधिनौ ॥ २९ ॥

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।

परापुरो निपुरो ये भरन्त्यग्निष्टाꣳल्लोकात्प्रणुदात्यस्मात् ॥ ३० ॥

का° [४.१.९.] उल्मुकं परस्तात्करोति ये रूपाणीति । इयं त्रिष्टुप् कव्यवाह-

नाग्निदेवत्या । स्वधया पैतृकान्नेन निमित्तेन पितृणामन्नमस्माभिर्भक्षणीयमिति हेतोः स्वीयरूपाणि प्रतिमुञ्चमानाः पितृसमानरूपाणि स्वीकुर्वन्तः सन्तो ये असुरा देवविरोधिनश्चरन्ति पितृयज्ञस्थाने प्रसरन्ति । तथा ये असुराः परापुरः निपुरश्च भरन्ति । पराक्रान्ताः पुरः परापुरः स्थूलदेहान् । निकृष्टाः पुरः निपुरः सूक्ष्मदेहान्ये धारयन्ति । स्वमसुरत्वं प्रह्लादयितुं ये स्थूलसूक्ष्मशरीराणि बिभ्रति । अग्निरुल्मुकरूपः । अस्माल्लोकात्पितृयज्ञस्थानात्तानसुरान्प्रणुदाति प्रणुदतु प्रेरयतु प्रकर्षेणापसारयत्वित्यर्थः ॥ ३० ॥

a. अत्र पितरो मादयध्वं यथाभागमावृषायधम् ।

b. अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ३१ ॥

का° [४.१.१३.१४.] अत्र पितर इत्युक्तोदङ्मुखस्तूष्णीमा तमनादावृत्यामीमदन्तेति जपतीति । आ तमनात् श्वासनिरोधेन ग्लानिपर्यन्तमुदङ्मुख आस्तूष्णीमिति सूत्रार्थः । हे पितरो यूयमत्रास्मिन्बर्हिषि मादयध्वं हृष्टा भवत । ततो हविषि यथाभागं स्वं स्वं भागमनतिक्रम्य आवृषायधं समन्ताद्वृषवदाचरत । यथा वृषः स्वाभीष्टं घासं प्राप्य तृप्तिपर्यन्तं स्वीकरोति तद्वत्स्वीकुरुत । 'आङ्पूर्वाद्वृषशब्दात्कर्तुः क्यङ् सलोपश्चेति [पा° ३.१.११.] क्यङ् ततो लोट् । पितरः अमीमदन्त । यान्पितॄत्प्रति मादयध्वमित्युक्तं ते पितरोऽमीमदन्त हृष्टाः यथाभागमावृषायिषत स्वं भागमनतिक्रम्य वृषवत्स्वीचक्रुः । लुङि रूपम् । यथाभागमाशिषुरित्येवैतदाहेति श्रुतिः [२.४.२.२२.] । भागं स्वं जग्मुरित्यर्थः ॥ ३१ ॥

a. नमो वः पितरो रसाय । b. नमो वः पितरः शोषाय ।

c. नमो वः पितरो जीवाय । d. नमो वः पितरः स्वधायै ।

e. नमो वः पितरो घोराय ।

f. नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः ।

g. गृहान्नः पितरो दत्त सतो वः पितरो देष्म ।

h. एतद्वः पितरो वास आधत्त ॥ ३२ ॥

का° [४.१.१५.] नमो व इत्यञ्जलिं करोतीति । षट्कृत्वो नमस्करोति । षड्वा ऋतवः पितर इति श्रुते रसादिशब्देन वसन्तादिषड्ऋतव उच्यन्ते । ते च पितॄणां स्वरूपभूता अतस्तेभ्यो नमस्करोति । हे पितरो वो युष्माकं रसाय रसभूताय वसन्ताय नमः । यतो मधाद्यो रसा वृक्षेषु जायन्तेऽतो रसशब्देन वसन्तः । युष्मद्रूपाय वसन्ताय नम इत्यर्थः । एवमग्रेतना मन्त्रा व्याख्येयाः ॥ शोषाय ॥ शुष्यन्त्योषधयो यत्रेति शोषो ग्रीष्मः ॥ जीवाय ॥ जीवनहेतुभूताय जलाय वर्षर्तवे ॥ स्वधायै ॥ शरदे । स्वधा वै शरत्स्वधा वै पितॄणामन्नमिति श्रुतेः । शरदि हि प्रायशोऽन्नानि भवन्ति ॥ घोराय ॥ विषमाय हेमन्ताय । हेमन्तः शीतप्रचुरत्वेन दुःखदत्वात् घोरः ॥ मन्यवे ॥ मन्युः क्रोधः । तद्रूपाय शिशिराय । शिशिरस्तु इवौषधीर्दहति । हे पितर एवंविधऋतुरूपेभ्यो वो युष्मभ्यं नमः हे पितरो वो नम इत्यभ्यास आदरातिशयार्थः । हे पितरो नोऽस्मभ्यं गृहान्दत्त । भार्यापुत्रपौत्रादयो गृहाः । हे पितरो वो युष्मभ्यं सतः विद्यमानात् देष्म ददामः । सतो धनाद्युष्मभ्यमस्माभिर्दातव्यम् । ददतामस्माकं कदाचिद्द्रव्यक्षयो मास्वित्यर्थः । का° [४.७.१६-१८.] एतद्व इत्युपास्यति सूत्राणि प्रतिपिण्डमूर्णा दशा वा वयस्युत्तरे यज्ञमानलोमानि वेति । हे पितरः वो युष्मभ्यमेतद्वासः सूत्रमेव परिधानमस्तु ॥३२॥.

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥३३॥

का° [४.१.२२.] आधत्तेति मध्यमं पिण्डं पत्नी प्राश्नाति पुत्रकामेति ॥ हे पितरो यथा इहास्मिन्नेव ऋतौ पुरुषः असत् येन प्रकारेणेह पुरुषः देवपितृमनुष्याणामपेक्षितार्थस्य पूरयिता भूयात् तथा कुमारं गर्भं पुत्ररूपं गर्भं यूयमाधत्त सम्पादयत । किम्भूतं कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ । अश्विनौ । अश्विनीकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । यत्तुल्यः कुमारः पुष्करस्रक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरं च पुत्रमाधत्तेति सूचितम् ॥३३॥

ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ॥ ३४ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां द्वितीयोऽध्यायः ॥ २ ॥

का° [४. १. १९.] ऊर्ज्जमित्यपो निषिञ्चतीति । अब्देवत्या विराट् । हे आपः यूयं स्वधा स्थ पित्र्यरूपिःस्वरूपा भवथ अतो मे पितॄंस्तर्पयत । कथम्भूता आपः । परिस्रुतं वहन्तीः । पुष्पेभ्यो निःसृतं सारं वहन्त्यः । तच्च सारं त्रिविधम् ऊर्जशब्देन घृतशब्देन पयःशब्देन चाभिधेयम् । तत्रोर्जशब्दोऽन्नगतं स्वाद्वत्वमभिधत्ते । घृतपयसी प्रसिद्धे । तच्च त्रिविधमपि कीदृशममृतं सर्वरोगविनाशकं मृत्युनाशकं च । नास्ति मृतं यस्मात्तत् । पुनः कीदृशं कीलालम् कील बन्धने । कीलनं कीलो बन्धः । तमलति वारयतीति कीलालम् । अलञ् वारणपर्याप्त्योरिति धातुः [धा° १५. ८.] सर्वबन्धनिवर्तकम् । ईदृशस्य त्रिविधस्य सारस्य वहनादपां पितृतर्पकत्वमुपपन्नम् ॥ ३४ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
इध्मप्रोक्षादिपित्र्यान्तो द्वितीयोऽध्याय ईरितः ॥ २ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ ॥ १ ॥ २ a. b. c ॥ २ ॥ २ d [भूपते°]. e. f. ३ a - °रिष्ये ॥ ३ ॥ ३ a यजमानस्य - °रिल ईलितः ३ b. c ॥ ४ ॥ ४ ॥ ५ ॥ ५ a. b. c ॥ ६ ॥ ५ d. e ॥ ७ ॥ ६ a. b. c. d [- नाम - प्रिये सदसि सीद -] ॥ ८ ॥ ६ e. f ॥ ९ ॥

II. ॥ ७ ॥ १ ॥ ८ d [°मघाद्यं देवेभ्यः सम्भ्रि°]. e ॥ २ ॥ ८ f. g ॥ ३ ॥ ९ अग्ने - वा - वं द्यावापृथिवी ॥ ४ ॥ ९ स्विष्टकृ° - ज्योतिः ॥ ५ ॥ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ६ ॥ १० b ॥ ७ ॥ ११ a ॥ ८ ॥ १० a. १४ b ॥ ९ ॥ १८ ॥

III. ॥ देव सवितरेतं वां वृणते बृहस्पतिं ब्रह्माणम् ॥ तदहं मनसे प्रब्रू-

वीमि ॥१॥ मनो गायत्र्यै गायत्री त्रिष्टुभै त्रिष्टुब्जागत्यै जागत्यनुष्टुभै ॥ अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥२॥ बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ॥ भूर्भुवःस्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥३॥ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्नो हस्ताभ्याम् ॥ प्रतिगृह्णामि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्नो हस्ताभ्याम् ॥४॥ आददेऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन ॥ या अप्स्वन्तर्देवतास्ता इदꣳ शमयतु ॥५॥ स्वाहाकृतं जठरमिन्द्रस्य गह ॥ घसिनां मे मा संपृक्था ऊर्ध्वं मे नाभेः सीद ॥६॥ इन्द्रस्य त्वा जठरे सादयामि ॥ प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वान् ॥७॥ प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ॥ ऊर्गस्यूर्जं मयि धेह्यन्नितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंल्लोकेऽहं च ॥८॥ १४ a ॥१॥ १२ ॥१०॥ १३ [मनो ज्योतिर्जु॰ - मोम् -] ॥११॥२१॥

IV. ॥ १५ ॥१॥ १६ a. b. c. d ॥२॥ १६ e [॰ वयो रिसो रि॰]. f [॰ षतो ग॰] - आवह ॥३॥ चक्षुष्पा असि चक्षुर्मे पाहि। १७ a - द्यमानः ॥४॥ १७ a तं तꣳ - र्यति। b. ॥५॥ १८ [॰रिधयश्च दे॰]. १९ a ॥६॥३५॥

V. ॥ २० a ॥१॥ २० b. c। उलूखले मुसले यश्च मूर्पेऽआशिश्लेष दृषदि यत्कपाले ॥२॥ उत्पूषो (उत्पुषो?) विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा। आप्यायतां ध्रुवा हविषा घृतेन यज्ञंयज्ञं प्रति देवयन्त्यः। सूर्याया ऊधोऽअदित्या उपस्थेऽऊर्धारा पृथिवी यज्ञेऽअस्मिन् ॥३॥ २१ b [- गातुमित्वा गा॰] ॥४॥ २२ ॥५॥ २३ ॥६॥ वेषोऽस्युपवेषो द्विषतो ग्रीवा उप वेविष्टि। वेशोऽग्ने सुभग धारयेह ॥७॥ श्रद्धाः कर्म-

एया अनपायिनो यथासन् । जुहोमि वा सुभग सौभगाय पुरूदृतम पुरुहूत श्रवस्यन् ॥ ८ ॥ ४३ ॥

VI. ॥ २४ ॥ १ ॥ यज्ञ शं च तऽउप च । शिवे मे संतिष्ठस्वारिष्टे मे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥ २ ॥ २५ a. b. c ॥ ३ ॥ २५ d-g ॥ ४ ॥ २६ ॥ ५ ॥ अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् । सुगृहपतिस्त्वं मया गृहपत्या भूयाः ॥ ६ ॥ अस्थूरि (अस्थुरि जटापाठे) णो गार्हपत्यानि सन्तु शतꣳ हिमास्तिग्मेन नस्तेजसा सꣳशिशाधि सूर्यस्यावृतमन्वावर्ते ॥ ७ ॥ उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर [= ५. ३८.] ॥ ८ ॥ ततोऽसि तनूरस्यनु मा तनुहि । अस्मिन्यज्ञेऽस्याꣳ साधुकृत्यायामस्मिन्नन्नेऽस्मिंल्लोके ॥ ९ ॥ इदं मे कर्मेदं वीर्यं पुत्रोऽनुसंतनोतु । २८ [° एवास्मि स एवास्मि] ॥ १० ॥ ५३ ॥

VII. ॥ २९ ॥ १ ॥ ३० ॥ २ ॥ ३१ ॥ ३ ॥ नमो वः पितरः शुष्माय - ऽस्तपसे - ऽरो यज्जीवं तस्मै - ऽरो रसाय - रो घोराय मन्यवे स्वधायै वः पितरो नमः । एतद्वः पितरो वासो गृहान्नः पितरो दत्त ॥ ४ ॥ उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः । उदस्थाममृताꣳ अनु ॥ ५ ॥ ३३ ॥ ६ ॥ ३४ ॥ ७ ॥ ६० ॥ सप्तानुवाकेषु षष्टिः ॥ ॥

इति काण्वशाखायां संहितापाठे द्वितीयोऽध्यायः ॥ ॥

I. समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
आस्मिन्हव्या जुहोतन ॥ १ ॥

अध्यायद्वये दर्शपौर्णमासेष्टिविषया मन्त्रा उक्ताः । अथाधानमन्त्रा उच्यन्ते प्राग्नेर्ज्योतिरित्यन्तेभ्यः [ख° १.] । देवानां प्रजापतेरग्नेर्गन्धर्वाणां वार्षे । आग्नेयश्चतस्रो गायत्र्यः । तत्र कात्यायनः [४. ७. १.] अमावास्यायामग्न्याधेयमित्यादिना काल-

विशेषादीनि ब्रह्मौदनपाकपर्यन्तानि कार्याण्युक्त्वा पश्चादिदमाह । [४.८.४.५.] तं चातुष्प्राश्यं पचत्युद्वास्यसिचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति प्रत्यृचमिति ॥ अस्यार्थः । चतुर्भिर्ऋत्विग्भिः प्राशितुं योग्यमोदनं पक्त्वा बर्हिरुद्वास्य तस्यौदनस्य मध्ये घृतासिचनाय निम्नं स्थानं कृत्वा तत्सर्पिषापूर्य तिस्रः समिधस्तास्मिंत्सर्पिष्यभ्यज्य तिसृभिर्ऋग्भिरग्नावभ्यादधातीति ॥ समिधाग्निम् । हे ऋत्विजः यूयं समिधा कृत्वा अग्निं दुवस्यत परिचरत । दुवस्यतिः परिचरणार्थः । सम्यगिध्यते दीप्यते वह्निर्यया काष्ठरूपया सा समित्तया । घृतैः क्षोप्यमाणैः पूर्णाहुतिसम्बन्धिभिरतिथिमातिथ्यकर्मणा पूजनीयमग्निं बोधयत प्रज्वलयत अस्मिन्प्रज्वलितेऽग्नौ कृत्या नानाविधानि कर्वीषि आ जुहोतन सर्वतो जुहुत । तप्तनप्तनथनाश्चेति [पा° ७.१.४५.] तनबादेशः ॥ १ ॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे ॥ २ ॥

हे ऋत्विजः अग्नये यूयं घृतेन जुहोतन जुहुत । जुहोतेः परस्य लोट् मध्यमबहुवचनस्य तस्य तप्तनप्तनथनाश्चेति [पा° ७.१.४५.] तनबादेशे गुणे जुहोतनेति रूपम् । किम्भूतायाग्नये । सुसमिद्धाय शोभनतया सम्यग्दीप्ताय । अत एव शोचिषे शोचिष्मते दीप्तिमते ज्वलिताय । ज्ञातं वेत्ति वेदयति वा ज्ञातवेदास्तस्मै । ज्ञातप्रज्ञानाय वा । किम्भूतं घृतं तीव्रं स्वादुतमं समग्रं वा पटुतरं वा । यत्कणोद्वासनाधिश्रयणावित्तणादिभिः संस्कृतमित्यर्थः ॥ २ ॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठ्य ॥ ३ ॥

हे अङ्गिरः अङ्गतिर्गत्यर्थः । अङ्गिर्गतिरस्यास्तीति अङ्गिराः । रस्प्रत्ययो मत्वर्थीयः । तत्तत्स्थानेषु गमनवन्नग्ने । अङ्गिरा उ क्त्यग्निरिति श्रुतेः [१.४.१.२५.] । तं य उक्तगुणस्तथाविधं त्वा त्वां समिद्भिर्यज्ञसम्बन्धिकाष्ठैर्घृतेन संस्कृताज्येन च वर्धयामसि वर्धयामः । प्रवृद्धं कुर्मः । इदन्तो मसीति [पा° ७.१.४६.] इकारश्छान्दसः । हे यविष्ठ्य युवतम कदाचिदपि स्थविरत्वरहित इत्यर्थः तथाविधाग्ने बृहत् महत्

प्रवृद्धं यथा तथा शोचा दीप्यस्व । ह्रचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः । अतिशयेन युवा यविष्ठ । इष्ठनि परे स्थूलदूरयुवेत्यादिना [पा° ६.४.१५६.] वादिलोपे गुणे च ङूपम् । यविष्ठ एव यविष्ठ्यः । स्वार्थे तद्धितयकारः ॥३॥

उप॑ त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत ।
जुषस्व॑ समिधो॒ मम ॥४॥

का° [४.८.६.] उप त्वेति जपतीति । हे अग्ने हविष्मतीर्हविष्मत्यः हविर्युक्ता घृताचीः घृताच्यो घृताक्ता एताः समिधस्त्वा त्वामुपयन्तु । प्रत्युपगच्छन्तु । हे हर्यत प्रेप्सावन् (1.) । हर्यतः आचक इति कान्तिकर्मसु पठितत्वात् [निघ° २.६. (1a.)] । तथाविध हे अग्ने मम मदीयाः समिधः त्वं जुषस्व सेवस्व त्वामुपयतीरङ्गीकुर्वित्यर्थः । छन्दसि परेऽपि व्यवहिताश्चेति [पा° १.४.८१.८२.] उपयन्तु इत्युपसर्गक्रियापदयोर्व्यवहितत्वम् । हविष्मतीरित्यादौ वा छन्दसीति [पा° ६.१.१०६.] पूर्वसवर्णदीर्घत्वम् ॥४॥

II. a. भूर्भुवः स्वः ।

b. द्यौरि॑व भूम्ना पृथि॒वीव॑ वरि॒म्णा ॥ तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥५॥

का° [४.१.१.] दारुभिर्वलत्तमादधाति भूर्भुव इति सम्भारेष्विति । [४.१.१६.] भूर्भुवः स्वरिति पूर्ववदिति चेति । अस्यार्थः । आपो हिरण्यमूषाखूत्करः शर्करेति पञ्च सम्भारान्सम्पाद्य स्फ्येनोल्लिखितायां शुद्धायां भूमौ, तान्सम्भारानवस्थाप्य तेषु शुष्ककाष्ठैर्वलत्तमग्निं भूर्भुव इत्यक्षरत्रयमुच्चारयन्नादध्यात् । इदमाहवनीयाधानम् । एवमष्टाक्षरत्वादग्नेर्गायत्रत्वं श्रुत्योक्तम् । गायत्रीसंहितस्याग्नेः प्रजापतिमुखादुत्पन्नत्वात् ॥ अथ मन्त्रार्थः । एतेष्वाधानमन्त्रेषु भूरिति प्रथमा व्याकृतिः । भुव इति द्वितीया । सुवरिति तृतीया । एतास्तिस्रो व्याकृतयः पृथिव्यादिलोकत्रयनामानि । एतदुच्चारणपूर्वकं प्रजापतिना लोकत्रयस्य सृष्टत्वात् । अत एवाभिः स्था-

पयन् लोकत्रयमनेन स्मरेत् । एतासां व्याहृतीनां महिमा भूयादिति । भूर्भुवः-स्वःशब्देन ब्रह्मक्षत्रविशो वा आत्मप्रजापशवो वा । सर्वे मद्वशगा भूयासुरिति प्रार्थयन्नग्नीनाद्ध्यादित्यर्थः ॥ का° [४. १. १७.] इध्मपूर्वार्धं गृहीत्वा द्यौरिव भूम्नेत्या-हेति । देवा इज्यन्ते यस्यां पृथिव्यां सा देवयजनी तथाविधे हे पृथिवि तस्यास्ते तव पृष्ठे देवयजनयोग्यायास्तवोपरि । अन्नादमन्नस्य कृतस्यात्तारमग्निं गार्हपत्या-दिरूपमाद्धे स्थापयामि । किमर्थमन्नाद्याय । अन्नं च तदाद्यं च तस्मै आद्यस्यान्न-स्यात्तुं योग्यस्यान्नस्य सिद्ध्यर्थम् । आहिताग्न्यादित्वात्परनिपातः [पा° २. २. ३७.] । यद्वान्नस्याद्याय भक्षणाय । यस्याः पृष्ठेऽग्निमाधाय भूम्ना द्यौरिव भूयासमिति शेषः । बहोर्भावो भूमा तेन । यथा द्यौर्नक्षत्रबहुत्वेन बह्वी । एवं पुत्रपश्वादिभिर्बहुर्भू-यासम् । वरिम्णा पृथिवीव भूयासम् । उरोर्भावो वरिमा तेन । यथा पृथिवी उरुत्वेन सर्वप्राणिनामाश्रयभूतो भूयासम् । यद्वा पूर्वार्धस्यायमर्थः । किम्भूतमग्निं भूम्ना द्यौरिव वर्तमानम् । यथा द्यौर्नक्षत्रादिबहुत्वेन युक्ता तथा ज्वालाबहुत्वेन युक्तं । किं च । वरिम्णा पृथिवीव स्थितम् । यथा पृथिवी सर्वप्राण्याश्रयत्वरूपेण श्रेष्ठत्वेनोपेता । तथा सर्ववस्तुशोधकत्वरूपेण श्रेष्ठत्वेनोपेतम् । अत एव क्वचि-द्विधिवाक्ये अग्नये पावकवित्याम्नातम् ॥५॥ Q124:4X3,1

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥६॥

L2

108995

का° [४. १. १८. १९.] आयं गौरिति चोपतिष्ठते सार्पराज्ञीभिर्दक्षिणाग्निमाद्धातीति । आयं गौरित्यादीनां तिसृणामृचां सार्पराज्ञीति नामधेयम् । सर्पराज्ञी कद्रूः पृथिव्यभिमानिनी । तया दृष्टत्वात् ताभिर्ऋग्भिराहवनीयमुपतिष्ठते ततो दक्षिणा-ग्निमाद्ध्यादिति सूत्रार्थः । गायत्रस्तृचः । अग्निः परावररूपेण स्तूयते । अयं दृश्य-मानोऽग्निः आ अक्रमीत् सर्वत आहवनीयगार्हपत्यदक्षिणाग्निस्थानेषु सर्वतः क्र-मणं पादविक्षेपं कृतवान् । किम्भूतोऽग्निः । गच्छतीति गौः । यज्ञनिष्पत्तये तत्त-द्यजमानगृहेषु गन्ता । गमेर्डोप्रत्ययः [उ° २. ६६.] । तथा पृश्निः चित्रवर्णः । लो-हितशुक्लादिबहुविधज्वालोपेतः । आक्रमणमेवाह । पुरः प्राच्यां दिशि मातरं

पृथिवीमसदत् आसीदत् । आहवनीयरूपेण प्राप्तवान् । तथा स्वः प्रयन् आदित्यरूपेण स्वर्गे संचरन् पितरं च द्युलोकमपि असदत्प्राप्तवात् । स्वःशब्देन सूर्यः [निघ° १.४.] । द्युलोकभूलोकयोर्मातापितृत्वमन्यत्रापि श्रूयते । द्यौः पिता पृथिवी मातेति ॥ ६॥

अन्तश्चरति रोचनास्य प्राणादपानती ।
व्यख्यन्महिषो दिवम् ॥ ७॥

एवमादित्यरूपेणाग्निं स्तुत्वा वायुरूपेण स्तौति । अस्याग्नि रोचना रुच दीप्तौ दीप्तिः काचिच्छक्तिः वायाख्या अन्तश्चरति द्यावापृथिव्योर्मध्ये शरीरमध्ये चरति । अन्तरिक्षेऽयं तिर्यङ्वायुः पवत इति श्रुतिः । किं कुर्वती । प्राणादपानती सर्वशरीरेषु प्राणव्यापारादनन्तरमपानव्यापारं कुर्वती । अपानादनन्तरं प्राणतीत्यप्यर्थो लभ्यते सामर्थ्यात् प्राणापानयोर्वायुविशेषयोः प्रेरकित्यर्थः । सति हि जठराग्नौ जीवनहेतोरौष्ण्यस्य शरीरे सद्भावात्प्राणापानौ प्रवर्तेते । तस्मादग्निः प्राणापानरूप इत्यर्थः । एवं वायवादित्याभ्यां स्वशक्तिभूताभ्यामिदं जगदनुगृह्य य एनमुपतिष्ठते तस्य किं करोतीत्याह । व्यख्यदिति । महिषोऽग्निः दिवं व्यख्यत् । द्युलोकं भोगस्थानमनुष्ठातृभ्यो विशेषेण प्रकाशितवान्प्रकाशयति च । महि माहात्म्यं यागकर्तृस्वरूपं सनोति ददाति स महिषः । अग्निर्वै महिषः स इदं ज्ञातो महानिति श्रुतेः । व्यख्यत् विपूर्वस्य ख्या प्रकथन इत्यस्यास्यतिवक्तिख्यातिभ्योऽङिति [पा° ३.१.५२.] च्लेरङ् । आत्मेपः । छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] सर्वकालेषु लङ् । अपान इवाचरतीत्यपानती ब्राह्मणादपानशब्दाच्छतृप्रत्ययः । ऊङितश्चेति [पा° ४.१.६.] ङीप् ॥ ७॥

त्रिंशद्धाम विराजति वाक्पतङ्गाय धीयते ।
प्रति वस्तोरह द्युभिः ॥ ८॥

सुपां सुलुगित्यादिना [पा° ७.१.३९.] त्रिंशच्छब्दाद्धामशब्दाच्च सुपो लुक् । धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति [निरु° १.२८.२१.] । अत्र धामशब्देन स्थानमुच्यते । अहोरात्रस्य त्रिंशन्मुहूर्ता धामशब्देनाभिप्रेताः । त्रिंश-

त्सु धामसु मुहूर्ताख्येषु स्थानेषु या वाक् विराजति शोभयते स्तूयमाना सा वाक् पतङ्गाय धीयते अग्न्यर्थमुच्चार्यते । पतन् गच्छति पतङ्गः । अग्निः । स ह्यरण्योः पतन् गार्हपत्यभावं गच्छति गार्हपत्यात्पतन्नाहवनीयतामित्यादि । सर्वदेवसम्बन्धिनीभिः स्तुतिभिरग्निरेव सर्वात्मत्वात्स्तूयते इत्यर्थः । न केवलं त्रिंशत्सु धामसु या वाग्विराजति सैव पतङ्गाय धीयते किं तर्हि प्रति वस्तोः प्रत्यहं या स्तुतिलक्षणा वाक् या च द्युभिः अहोभिः यागपारायणाद्युत्सवभूतैः स्तुतिलक्षणा वाग्विराजति सा पतङ्गायैव धीयते । नान्यस्यै देवतायै । वस्तोः द्युः भानुरित्यहर्नामसु पठितम् [निघ° १. ९.] । अहेति निपातो विनिग्रहे । सर्वकालं सर्वा स्तुतिवागग्न्यर्थैवेत्यर्थः ॥ यद्वास्या ऋचोऽयमर्थः । धाम स्थानं तच्चत्रिंशत् त्रिंशत्संख्याकं मासगतदिनभेदेन । तद्विराजति विशेषेण दीप्यते । आलस्यरहितानां यजमानानामनुष्ठानेनाहवनीयाद्यग्नीनां स्थानं मासगतेषु त्रिंशत्संख्याकेषु दिनेषु विशेषेण शोभत इत्यर्थः । वाक् स्तुतिरूपा पतङ्गायाग्नये धीयते उच्चार्यते । पतङ्गः पक्षी । तत्सदृशत्वादग्निः पतङ्गः । यथा कश्चित्पक्षी एकस्मात्स्थानात्स्थानान्तरं गच्छति तद्वदग्निरपि गार्हपत्यस्थानादाहवनीयस्थानं गच्छतीत्यग्नेः पक्षिसादृश्यम् । अहेति निपातः पूर्वोक्तनिषेधार्थः ॥ अस्या ऋचः पूर्वार्द्धेऽग्निमाहात्म्यज्ञापकं वाक्यद्वयेनार्थद्वयं पदुक्तं तावदेव न भवति किंचन्यदप्युच्यत इत्यर्थः । वस्तोरित्यहर्नामसु पठितम् । प्रति वस्तोः प्रत्यहं द्युभिः द्योतनैरयमग्निः स्तूयत इत्यध्याहारः । द्युर्द्योतनं दीप्यतेः प्रयोगः ॥ ८ ॥

इत्यग्न्याधेयमन्त्राः ।

III. a. अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ।

b. सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।

c. अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा ।

d. सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।

e. ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ १ ॥

अथाग्निहोत्रहोममन्त्राः । अग्निर्ज्योतिरित्यारभ्य उपप्रयन्त [ख° ११.] इत्यतः

प्राक् । तन्मन्त्राणां प्रजापतिर्ऋषिः सामान्यतः । यत्र ऋषिविशेषोऽभिधीयतेऽनुक्रमणीकारैस्तत्र द्वावप्यृषी ॥ यथाग्निर्वर्चो दे तद्वापश्यत्परां ज्योतिः सूर्यो ज्योतिः एते दे एकपदे गायत्र्यौ तद्वा मुनिरपश्यत् । परां ज्योतिः सूर्यः इमां चेलकस्य पुत्रो जीवल ऋषिरपश्यदित्यर्थः ॥ अथ का° [४.१४.१४.] प्रदीप्तामभि जुहोत्यग्निर्ज्योतिरितीति । या समित्प्रदीप्ता तामभिलक्ष्य जुहुयात् । अग्निर्ज्योतिषमिति [अध्या° ३.२.१.] काण्वशाखोक्तमन्त्रेण समित्प्रक्षेपः ॥ मन्त्रार्थस्तु । योऽयमग्निर्देवः स एव ज्योतिर्दृश्यमानज्योतिःस्वरूपम् । यच्चेदं दृश्यमानं ज्योतिः तदेवाग्निर्देवः । देवस्य ज्योतिषश्च कदाचिदप्यवियोगादैक्येन प्रतिपादनम् । स्वाहा ज्योतीरूपायाग्नये हविः प्रदत्तम् । अयं सायंकालीनोऽग्निहोत्रहोममन्त्रः ॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्होममन्त्रः सायंहोममन्त्रवद्व्याख्येयः । सूर्यसम्बन्धि तेजो रात्रावग्निं प्रविशतीति सायमग्निर्ज्योतिरिति मन्त्रो युक्तः । उदयकालेऽग्निसम्बन्धि ज्योतिः सूर्यं प्रविशति । तस्मात्प्रातः सूर्यो ज्योतिरिति मन्त्रः । अग्निमादित्यः सायं प्रविशति तस्मादग्निर्दूरात्तकं ददृशे । उभे हि तेजसी सम्पद्येते उद्यन्तं वादित्यमग्निरनु समारोहति । तस्माद्धूम एवाग्निर्दिवा ददृश इति तित्तिरिश्रुतेः ॥ का° [४.१४.१५.] अग्निर्वर्च इति ब्रह्मवर्चसकामस्येति । ब्रह्मवर्चसकामस्तु अग्निर्वर्चः सूर्यो वर्च इति सायं प्रातश्च जुहुयात् । योऽग्निर्वर्चोऽनन्यभूतः । यस्य तज्ज्योतिर्वर्चोऽनन्यभूतम् । तस्मै सुकृतमस्तु । एवं सूर्यो वर्च इति ॥ का° [४.१५.११.] ज्योतिः सूर्य इति वा प्रातरिति । प्रातर्होममन्त्रः ज्योतिः सूर्य इति । यत् ज्योतिः स सूर्य एव । यः सूर्यः स ज्योतिरेव । तस्मै स्वाहा ॥१॥

a. सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या । जुषाणोऽअग्निर्वेतु स्वाहा ॥

b. सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा ॥१०॥

का° [४.१४.१.] सजूरिति वेति । जुहोतीत्यनुवर्तते । पूर्वोक्तमन्त्रैः सह सजूरित्यादिमन्त्रद्वयं विकल्पितम् । सजूर्देवेन । अग्निर्वेतु । अस्मदीयं कर्म प्राप्नोतु । यद्वा वेतु आकृतिमभक्षयतु । वी प्रजननकान्त्यसनखादनेष्विति धातोः [धा° २४.

३१.] प्रयोगः । किम्भूतोऽग्निः सवित्रा देवेन प्रेरकेण परमेश्वरेण सह सजूः । जुषी प्रीतिसेवनयोः । जोषणं जूः समाना जूः प्रीतिर्यस्यासौ सजूः । तथा इन्द्रवत्या रात्र्या इन्द्रेण देवेनोपेतया रात्रिदेवतया सजूः समानप्रीतिः । तथा जुषाणो ऽस्मासु प्रीतियुक्तः । य उक्तगुणवानग्निर्देवस्तस्मै स्वाहा ह्रूयमानमिदं द्रव्यं दत्तम् । प्रातः सूर्य उच्यते । अग्निमल्लवदयं सूर्यमल्लो व्याख्येयः । पूर्वार्धे रात्रिदेवतायाः स्थाने उषोदेवता योजनीया ॥ १० ॥

IV. उपप्रयन्तोऽअधरं मन्त्रं वोचेमाग्नये ।

आरेऽअस्मे च शृण्वते ॥ ११ ॥

का° [४. १२. १-३.] साग्नमाङ्कृत्याꣳ क्रुतायां यज्ञयानोऽग्नी उपतिष्ठते वात्सप्रेण न वा तिस्रस्त्रिरुपप्रयन्तो [११.] ऽस्य प्रत्नां [१६.] परि ते [३६.] चित्रावसविति [१८ b.] चेति । आहवनीयगार्हपत्यावग्नी उपप्रयन्तो अधरमित्यारभ्य सुपोषः पोषैरित्यन्तं [३७ a.] बृहदुपस्थानं देवदृष्टं । तत्राद्ये द्वे आग्नेय्यौ गायत्र्यौ क्रमेण गोतमविरूपाभ्यामपि दृष्टे ॥ आहवनीयोपस्थानमन्त्रा आदौ । वयमनुष्ठातारोऽग्नये ऽग्न्यर्थं मन्त्रं मननेन त्राणकरं शब्दसमूहं वोचेम । उच्याम । किम्भूता वयम् । अधरं यज्ञमुपप्रयन्तः उपगच्छन्तः । किम्भूतायाग्नये आरे दूरे अस्मे अस्माकं समीपे इति शेषः शृण्वते दूरे समीपे चास्मदीयं वाक्यं श्रोतुमुद्युक्ताय ॥ वोचेमेति वक्तेराशीर्लिङि परस्मैपदोत्तमबहुवचने परे लिङ्याशिष्यङिति [पा° ३. १. ८६.] अङ् । यासुट् अतो येयः [पा° ७. २. ८०.] वच उम् [पा° ७. ४. २०.] छन्दस्युभयथेति [पा° ३. ४. ११७.] सार्वधातुकत्वाच्छिङः सलोपोऽनन्त्यस्येति [पा° ७. २. ७१.] सलोपः । यलोपः । वोचेम ॥ अस्मे सुपां सुलुगिति [पा° ७. १. ३९.] शेआदेश आप्तः ॥ ११ ॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाꣳ रेताꣳसि जिन्वति ॥ १२ ॥

अयमग्निः अपां रेतांसि जिन्वति द्युलोकादृष्टिद्वारेण पतन्तीनामपां रेतांसि सामानि व्रीह्यादिद्वारेण परिणतानि जिन्वति । जिन्वतिः प्रीतिकर्मा प्रीणय-

ति वर्धयतीत्यर्थः । यद्वा अपां रेतांसि कारणानि जिन्वति पुष्णाति । आकृतिपरिणामेन वृष्टिं जनयतीत्यर्थः । ते वा एते आकृती उत्क्रामत इत्यादिश्रुतेः । किम्भूतोऽग्निः । दिवो मूर्धा द्युलोकस्य शिरःसमानः । यथा शिरः शरीरस्योपरि वर्तते तथायमग्निरहनि स्वतेजसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलोकस्योपरि वर्तते । तथा ककुत् । ककुच्छब्दो गोपृष्ठोन्नतावयववाची तद्वदादित्यरूपेण सर्वोपरिस्थत्वात्ककुत्सदृशः । यद्वा ककुदमिति महन्नाम [निघ० ३.३ (2.)] तस्यात्तलोप आर्षः । महत् जगत्कारणमित्यर्थः । तथा पृथिव्याः पतिः पालकः । दाहपाकप्रकाशैर्भूलोकस्थानामुपकारकत्वात् ॥ १२ ॥

उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै ।
उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥ १३ ॥

भरद्वाजदृष्टा ऐन्द्राग्नीत्रिष्टुप् धूना । इन्द्रशब्देनात्राहवनीयः । तस्य यज्ञसाधकत्वरूपैश्वर्ययुक्तत्वात् । अग्निशब्देन गार्हपत्यः । अग्रे नीयत इत्यग्निरिति यास्कव्युत्पत्तेः । स हि प्रथममाधीयते । हे इन्द्राग्नी वां युवामुभा आहुवध्यै आह्वातुमिहामीति शेषः । ह्वयतेस्तुमर्थे कध्यैप्रत्ययः । किं घ राधसः धनाद्विर्लक्षणात् सह मादयध्यै युगपदेककर्मणि उभौ युवां मादयितुं हर्षयितुं वा इहामीति शेषः । मदी हर्षे मद तृप्ताविति धातोर्वा णिजन्तात्तुमर्थे शध्यैप्रत्ययः । गुणः । यत उभौ युवामिषामन्नानां रयीणां धनानां दातारौ अत उभौ वां युवां वाजस्यान्नस्य सातये दानाय हुवे आह्वयामि ॥ उभा उभशब्दस्य विभक्तेराकारः ॥ सातये षणु दानि अस्य धातोरूतियूतीति [पा० ३.३.९७.] क्तिन्नन्तो (3.) निपातः ॥ हुवे बहुलं छन्दसीति [पा० ६.१.३४.] ह्वयतेः शपि सम्प्रसारणे उवङ् ॥ १३ ॥

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तं जानन्नग्नऽआरोहाथा नो वर्धया रयिम् ॥ १४ ॥

तिस्र आग्नेयः । आद्यानुष्टुप् देवश्रवोदेववातदृष्टा । हे अग्ने आहवनीय ते तवायं गार्हपत्यो योनिः उत्पत्तिस्थानम् । किम्भूतः ऋत्वियः । उत्पादनयोग्यः काल ऋतुरुच्यते । ऋतुः प्राप्तोऽस्येति ऋत्वियः । छन्दसि घसिति [पा० ५.१.१०६.]

ऋतुशब्दात्तदस्य प्राप्तमित्यर्थे घस् । तस्य इयादेशः । सायंप्रातःकाले उत्पादनयोग्यो योनिः । यतो यस्मादृतुकालोपितादाहवनीयाज्जात उत्पन्नस्त्वमरोचथाः कर्मकाले दीप्तोऽभूः । हे अग्ने तं गार्हपत्यं ज्ञानन् स्वज्ञानकमवगच्छन् आरोह । पुनरुद्धरणाय कर्मेति प्रविश । अथानन्तरं नोऽस्मदर्थं रयिं धनं वर्धया पुनर्यागाय समृद्धं कुरु । अन्येषामपि दृश्यत इति [पा° ६.३.१३७.] संहितायां वर्धयेति दीर्घः ॥ १४ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ १५ ॥

जगती वामदेवदृष्टा । द्वादशाक्षराश्चत्वारः पादा जगत्याः । द्वितीयोऽत्र व्यूहेनैकादशः चतुर्थो व्यूहेन द्वादशकस्तेनैकोना जगती । अयमाहवनीय इह कर्मानुष्ठानस्थाने प्रथमो मुख्यः सन् धातृभिर्धायि । अधायि आधानकर्तृभिराहितोऽभूत् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] । दक्षिणाग्न्यपेक्षं प्राथम्यम् । किम्भूतः । होता देवानामाह्वाता । यजिष्ठः अतिशयेन यष्टा । अतिशायने तमबिष्ठनावितीष्ठनि परे [पा° ५.३.५५.] तुरिष्ठेमेयःस्विति [पा° ६.४.१५४.] तृचो लोपः । तथा अध्वरेषु सोमयागादिषु ईड्यः ऋत्विग्भिः स्तुत्यः । अप्नवानो भृगवो विशेविशे यमाहवनीयं वनेषु विरुरुचुः । अन्तर्भूतो णिच् रोचयामासुः दीपितवन्तः । अप्नशब्दोऽपत्यनामसु पठितः [निघ° २.२.] अप्नवानः पुत्रवन्तो भृगुवंशोत्पन्ना मुनयः । यद्वा अप्नवानृषिः अप्नवानस्तत्प्रभृतयो (4.) भृगवश्च मुनयः । विशेविशे विडिति मनुष्यनाम [निघ° २.३.] यजमानरूपाय तस्मै तस्मै मनुष्याय तदुपकाराय । वनेषु ग्रामाद्बहिर्यज्ञनाख्येष्वरण्यप्रदेशेषु (5.) यमग्निं विरुरुचुः दीपयन्ति स्म । किम्भूतं यम् । चित्रं विविधकर्मोपयोगित्वेन आश्चर्यकारिणम् । अत एव विभ्वं विभुं विभूत्वशक्तियुतं यणादेशः ॥ १५ ॥

अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रेऽअह्र्यः ।
पयः सहस्रसामृषिम् ॥ १६ ॥

गायत्र्यवत्सारदृष्टा गोऽग्निपयोदेवत्या । अस्याग्नेः प्रत्नां चिरंतनकालभवां

घृतमनु दीप्तिमनुसृत्य । अक्ष्यः नास्ति क्षीर्येषामीदृशा लज्जारहिता दोग्धारः ऋषिं गां शुक्रं शुद्धं पयो डुडुक्षे डुडुक्षिरे । डुक्षेर्लिटि इरयो रे इति [पा° ६.४.७६.] रेआदेशे रूपम् । ऋष गतौ । अर्षति दोहनस्थाने गच्छतीति ऋषिर्गौः । तां क्षीमार्थं दुग्धवन्तः । सायंदोहनकालेऽग्निप्रकाशाभावे दुह्यमानं पयो भूमौ पतिष्यतीति शंकया दोग्धृणां लज्जा भवति । सत्यामग्निदीप्तौ स्कन्दशंकानुदयाल्लज्जाभावादक्ष्यो दोग्धारः । किम्भूतामृषिं सक्षसाम् । षोऽन्तकर्मणि । सक्षसंख्याकानि कर्माणि स्यति समापयति क्षीरदध्याज्यदधिप्रदानेनेति सक्षसा ताम् । स्यतेः क्विप् ॥ यद्वास्या ऋचोऽर्थान्तरम् । गाम्प्रकृत्याग्निहोत्रब्राह्मणे श्रूयते [२.२.४.१५.] । तामु हाग्निरभिदध्यौ मिथुन्येऽनया स्यामिति ताꣳसम्बभूव तस्याꣳ रेतः प्रासिञ्चत्तत्पयोऽभवदित्यादि । तदभिप्रायमेषा ऋग्वदति । अक्ष्यः गावः नास्ति क्षीर्लज्जा यासां ता अक्ष्यः अलज्जा उज्ज्वलाः प्रशस्या इत्यर्थः । मलिनो हि लज्जति । अक्ष्यो गावोऽस्याग्नेः प्रत्नां चिरंतनीमात्मानुषक्तां घृतं दीप्रिं शुक्रं शुक्ररूपापन्नां घृतमिव पयो दुग्धं डुडुक्षे डुक्षन्ति क्षरन्ति । अग्निना शुक्ररूपेण सिक्तां स्वकान्तिमिव गावो दुग्धरूपेण क्षरन्तीत्यर्थः । सक्षसामृषिं इति विशेषणद्वयं पयसः । सक्षं सनोति सक्षसात्तम् । चातुर्मास्यपशुसोमानां सम्भक्तारम् । पुंस्त्वमार्षम् । जनसनखनक्रमगमो विडिति [पा° ३.२.६७.] विट्प्रत्यये विड्वनोरनुनासिकस्यादित्याकारे [पा° ६.४.४१.] वेर्लोपे [पा° ६.१.३७.] सक्षसा इति रूपम् । तथा ऋषिं द्रष्टारम् । गवि वर्तमानं द्रष्टृत्वं पयस्युपचर्यते । सा हैनानुदीक्ष्य किंचकारेत्युपक्रम्य ते देवा विदांचक्रुरेष साम्नो किंकार इत्यादिना ग्रन्थेन गोभिर्किंकारो दृष्ट इति प्रत्यपादि । यद्वा सक्षसामृषिमिति विभक्तिलिङ्गवचनव्यत्ययेन अक्ष्य इत्यस्य विशेषणद्वयम् । किम्भूता अक्ष्यः सक्षसाः ऋषयः । पूर्ववदर्थो वा ॥१६॥

a. तनूपा अग्नेऽसि तन्वं मे पाहि ।
b. आयुर्दा अग्नेऽस्यायुर्मे देहि ।
c. वर्चोदा अग्नेऽसि वर्चो मे देहि ।

d. अग्ने यन्मे तन्वा ऊनं तन्मेऽआपृण ॥ १७॥

अथ यजूंषि चत्वार्यग्निर्देवत्यानि । हे अग्ने त्वं स्वभावत एव तनूपा असि । अग्निहोत्रिशरीराणां पालकोऽसि । तनूं पाति पालयतीति तनूपाः । उदराग्नौ सत्यन्ने (6.) जीर्णे शरीरपालनमतो मे मम तन्वं शरीरं पाहि पालय । तन्वम् वा छन्दसीत्यमि [पा° ६. १. १०६. १०७.] पूर्वरूपाभावे यणादेश इत्युक्तम् ॥ हे अग्ने त्वमायुर्दा असि आयुषो दाता भवसि । अतो मे ममायुर्देहि । अपमृत्युपरिहारेण । यावत्कालं वपुष्युदराग्निरौष्ण्यमुपलभ्यते तावन्न म्रियत इति प्रसिद्धम् ॥ हे अग्ने त्वं वर्चोदा असि वर्चसो दातासि । अतो मे वर्चो देहि । वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः । यद्दर्शनादिव महानयं ब्राह्मणो विद्वांस्तपसाग्निरिव ज्वलतीति बुद्धिर्नृणाम्भवति ॥ किं च हे अग्ने मे मम तन्वा मदीयशरीरस्य यदङ्गं चक्षुरादिरूपमूनं दृष्टिपाटवादिरहितं तदङ्गं मे आपृण सर्वतः पूरय ॥ १७॥

a. इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि । वयस्वन्तो वयस्कृतꣳ सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम् ।

b. चित्रावसो स्वस्ति ते पारमशीय ॥ १८॥

अग्निर्देवत्या महापङ्क्तिः । यस्याः षट् पादा अष्टाक्षरा सा महापङ्क्तिः । अत्र षष्ठः समाक्षरः ॥ हे अग्ने शतं हिमाः शतं वर्षाणि अस्मदायुषि वर्तमानान्शतं संवत्सरान्त्वां समिधीमहि नैरुक्तर्येण वयं दीपयामः । किम्भूता वयम् । इन्धानाः त्वदनुग्रहेण दीप्यमानाः तथा वयस्वन्तः । वय इति अन्ननाम [निघ° २. ७.] अन्नवन्तः । सहस्वन्तः बलवन्तः । सह इति बलनाम [निघ° २. ९.] । अदब्धासः अदब्धाः अनुपहिंसिताः केनापि । दभ्नोतिर्हिंसाकर्मा । आज्जसेरसुगिति [पा° ७. १. ५०.] असुक् । किम्भूतं त्वां द्युमन्तं दीप्तिमन्तं । वयस्कृतं वयोऽन्नं करोतीति वयस्कृत् तम् । सहस्कृतं सहो बलं करोतीति सहस्कृत् तम् । सपत्नदम्भनं सपत्नानां शत्रूणां हिंसितारम् । अदाभ्यम् केनापि हिंसितुमयोग्यम् ॥ चित्रावसो । रात्रिर्देवत्यं यजुर्ऋषिदृष्टम् । रात्रिर्वै चित्रावसुः सा हीयꣳ संगृह्येव चित्राणि वसतीति [२. ३. ४. २२.] श्रुतिश्चित्रावसुशब्देन रात्रिः । चित्राणि विविधानि चन्द्रनक्ष-

त्रान्धकारद्रूपाणि वसन्ति यस्यां रात्रौ सा चित्रावसुः । हे चित्रावसो रात्रि स्वस्ति क्षेमं यथा तथा ते तव पारं समाप्तिमशीय व्याप्नवानि । अश्नुतिर्वक्ष्यति छन्दसीति [पा° ३.१.८३.] शपो लुकि लिङ्युत्तमैकवचने द्रूपम् । यथा लोके मनुष्येषु सुप्तेषु चौरा गृहे प्रविशन्ति तद्वदत्र देवयजने रक्षांसि प्रविशन्तीति शङ्कया तन्निवारणाय रात्रिप्रार्थनम् ॥ १८ ॥

सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाꣳ स्तुतेन ।
सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सꣳ रायस्पोषेण गमिषीय ॥ १९ ॥

का° [४.१२.४.] सं त्वमित्युपविश्येति ॥ उपप्रयन्त इत्यादिभिश्चित्रावसो इत्यन्तैर्मन्त्रैरुत्थायोपस्थानमत्र उपविश्येति विशेषः । हे अग्ने त्वं सूर्यस्य वर्चसा तेजसा समगथाः रात्रौ संगतोऽसि । तद्यदस्तंयन्नादित्य आहवनीयं प्रविशति तेनैतदाहेति श्रुतिः [२.३.४.२४.] । ऋषीणां मन्त्राणां स्तुतेन स्तोत्रेण समगथाः । वक्वो मन्त्रा अग्निं स्तुवन्ति । तद्यदुपतिष्ठते तेनैतदाहेति [२.३.४.२४.] श्रुतिः । प्रियेण धाम्ना प्रियाभिराकृतिभिः समगथाः । आकृतयो वा अस्य प्रियं धामेति श्रुतिः [२.३.४.२४.] । यथा त्वमेतैस्त्रिभिः संगतः । एवमहमपि त्वत्प्रसादादायुषा अपमृत्युदोषरहितेन संग्मिषीय संगतो भूयासम् । तथा वर्चसा विद्यैश्वर्यादिप्रयुक्ततेजसा संग्मिषीय । तथा प्रजया पुत्रादिकया संग्मिषीय । तथा रायस्पोषेण धनस्य पुष्ट्या संग्मिषीय । आयुरादीनि मम सन्त्वित्यर्थः । समगथाः गमेः समो गम्यृच्छीत्यादिना [पा° १.३.२९.] तङ्मध्यमैकवचने लुङि सिचि गमश्चेति [पा° १.२.१३.] सिचः कित्त्वेऽनुदात्तोपदेशेत्यादिना [पा° ६.४.३७.] मलोपे झल्वादङ्गादिति [पा° ८.२.२७.] सिचो लोपे द्रूपम् ॥ ग्मिषीय । गमेराशीर्लिङि उत्तमैकवचने इटोऽदित्यकारे [पा° ३.४.१०६.] परे सीयुटि कृते छान्दसे इडागमे गमहनेत्युपधालोपे [पा° ६.४.९८.] द्रूपम् ॥ ११ ॥

अन्धꣳ स्थान्धो वो भक्षीय महꣳ स्थ महो वो भक्षीयोर्जꣳ स्थोर्जं वो भक्षीय रायस्पोषꣳ स्थ रायस्पोषं वो भक्षीय ॥ २० ॥

का° [8. १२. ५.] गां गच्छत्यन्ध स्थेति । अन्ध स्थ रेवती रमधमिति यजुर्द्वयेन गां गच्छति । गौर्देवता । हे गावो यूयमन्ध स्थ अन्नरूपाः स्थ । क्षीराज्यादिरूपस्यान्नस्य जनकत्वादन्नत्वोपचारः । अतो भवत्प्रसादाद्वो युष्मत्सम्बन्धि अन्धः क्षीराज्यादिरूपमन्नमहं भक्षीय । सेविय । भज सेवायामित्यस्याशीर्लिङुत्तमैकवचने रूपम् ॥ तथा यूयं मह स्थ पूज्यरूपाः स्थ । मह पूजायाम् । अतो वो युष्माकं पूज्यानां प्रसादादहमपि महो भक्षीय । पूज्यत्वं सेविय । गौर्न पदा स्प्रष्टव्येत्यादिस्मृतिर्गवां पूज्यत्वप्रसिद्धिः । यद्वा महःशब्देन दश वीर्याण्युच्यन्ते तानि । यथा गौर्वै प्रतिधुक् तस्यै घृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनमिति श्रुत्युक्तानि । प्रतिधुक् तत्कालदुग्धम् । घृतमुष्णं तत् । शरो दुग्धमंडः । मस्तु दधिरसः । आतञ्चनं दधिपिण्डः । आमिक्षा स्फुटितं दुग्धम् । वाजिनमामिक्षाजलमिति (7.) श्रुत्यर्थः ॥ एतद्दशवीर्यरूपा यूयं स्थ । अतो वो महो वीर्यमहं सेवेयेत्यर्थः ॥ तथा यूयमूर्ज स्थ बलरूपाः स्थ गोक्षीरदेर्बलहेतुत्वात् बलरूपत्वोपचारः । ऊर्ज बलप्राणनयोः । वो युष्माकं प्रसादादूर्जं भक्षीय बलं सेविय ॥ तथा रायस्पोष स्थ धनपुष्टिरूपाः स्थ । वैश्या हि क्षीराज्यादिविक्रयेण धनं पुष्णन्ति । अतो धनपुष्टित्वोपचारः । वो युष्माकं प्रसादाद्रायस्पोषं धनपुष्टिं भक्षीय सेविय । अन्ध स्थेत्यादौ खर्परे शरीति [पा° क° ८. ३. ३६. वा° १.] विसर्गलोपः ॥ २० ॥

रेवती रमधमस्मिन्योनावस्मिन्गोष्ठेऽस्मिंल्लोकेऽस्मित्क्षये ॥ इहैव स्त मापगात ॥ २१ ॥

हे रेवतीः रेवत्यः धनवत्यो गावः । धनहेतुत्वेन धनवत्त्वं गवाम् । रयिर्विद्यते यासां ता रेवत्यः । रयिशब्दात् मतुप् । रयेर्मतौ बहुलमिति [पा° क° ६. १. ३७. वा° 8.] रयेर्मतौ परे संप्रसारणम् । संप्रसारणाच्चेति [पा° ६. १. १०८.] पररूपमाद्गुणः [पा° ६. १. ८७.] । पशवो वै रेवत इति श्रुतेः [२. ३. 8. २६.] । हे रेवत्यः (8.) अस्मिन्योनौ दृश्यमानेऽग्निहोत्रहविर्दोहनस्थाने यूयं रमधं क्रीडत दोहनदूर्धमस्मिन्गोष्ठे यजमानसम्बन्धिगोवाटे (9.) रमधम् । गोष्ठशब्देन गृह्यद्वहि-

र्विश्रम्भेण (10.) संचारप्रदेशः । सर्वदास्मिन्लोके । लोक दर्शने । यजमानदृष्टिविषये रमध्वम् । रात्रौ अस्मिन्क्षये यजमानगृहे रमध्वम् । क्षयो निवास [पा° ६.१.२०१.] ऽइत्याद्युदात्तः क्षयशब्दो निवासवाची । किं च । इहैव स्त यजमानगृहे एव भवत । मा अपगात अन्यत्र मा गहत । इणो गा लुङीति [पा° २.४.४५.] एतिर्लुङि गादिशे रूपम् ॥२१॥

a. सꣳहितासि विश्वरूप्यूर्जा मा विश गौपत्येन ।

b. उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥२२॥

का° [8.१२.६.] सꣳहितेत्यालभनऽइति । गामित्यनुवर्तते । हे गौः त्वं संहितासि क्षीराज्यरूपहविर्दानाय यज्ञकर्मभिः संयुक्तासि । किम्भूता विश्वरूपी विश्वं रूपं यस्याः सा । शुक्लकृष्णादिवर्णरूपैर्युक्ता । सा त्वमूर्जा क्षीरादिरसेन गौपत्येन गोस्वामित्वेन मा मामाविश सर्वतः प्रविश । त्वत्प्रसादान्मम बहुविधो रसो बहुविधं गोस्वामित्वं च सम्पद्यतामित्यर्थः ॥ का° [8.१२.७.] गार्हपत्यं गत्वोपतिष्ठतऽउप त्वेतीति ॥ उप त्वा ॥ तिस्रो गायत्र्य अग्नेय्यो मधुछन्दोदृष्टाः । हे दोषावस्तः हे अग्ने दोषा रात्रिस्तस्यामपि वसतिं अजस्रं धार्यमाणत्वान्नोपशाम्यतीति दोषावस्ता । यद्वा अग्नौ हृ देवा इत्युपक्रम्य तैः संगृह्य रात्रिं प्रविविशेतीतिहासेन अग्ने रात्रौ प्रवेश उक्तस्तमयं मन्त्र आह । हे दोषावस्तः रात्रौ वसनशील गार्हपत्य दिवेदिवे प्रतिदिनं वयं यजमानाः त्वा त्वामुप एमसि त्वां प्रत्यागच्छामः । इदन्तो मसि । किम्भूता वयम् । धिया श्रद्धायुक्तया बुद्ध्या नमो भरन्तः नमस्कारं संपादयन्तः । यद्वा नम इत्यन्ननाम [निघ° २.७.] अन्नं हविर्बिभ्रतः ॥२२॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।

वर्धमाणꣳ स्वे दमे ॥२३॥

क्रियापदमनुवर्तते । वयमीदृशमग्निमुपैमः । कीदृशं राजन्तं दीप्यमानमध्वराणां गोपां गोपायतीति गोपास्तम् । यज्ञानां गोप्तारम् । ऋतस्य सत्यवचनलक्षणस्य व्रतस्य दीदिविं दीपयितारम् । अग्निसमीपे व्रतं गृहीत्वा सत्यं वदतीत्याशयः । स्वे दमे अस्मदीये गृहे वर्धमाणं चातुर्मास्यसोमपश्वादिभिरभिवृद्धिं गच्छन्तम् । दा-

म्यन्ति गृह्यन्ते यत्रेति दमो गृहम् ॥ दिवेः किप्रत्ययो बाहुलकात् । लिङ्वद्भावाद्द्वित्वम् । तुजादीनां दीर्घोऽभ्यासस्येति [पाः ६.१.७.] अभ्यासदीर्घः । देवयतीति दीदिविः ॥२३॥

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥२४॥

हे अग्ने गार्हपत्य स पूर्वोक्तगुणयुक्तस्त्वं नोऽस्माकं सूपायनो भव । सुखिनोपेतुं शक्यः सूपायनः । सुद्रूपप्रापणे (11.) शक्यो भव । तत्र दृष्टान्तः । सूनवे पितेव यथा पुत्रायं पिता भयं विना सुखेन प्राप्तुं शक्यः । किं च नोऽस्माकं स्वस्तये क्षेमाय सचस्वानेन कर्मणा समवेतो भव । षच समवाये इति धातुः [धा° ११.६: २३.२८.] यद्वा सचस्व सेवस्व । षच सेवने [धा° ६.२.] ॥२४॥

a. अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः ।
b. वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥२५॥

चतस्रो द्विपदा विराज अग्नेय्यः । दशार्णपादा विराट् (12.) । बन्धादिदृष्टाः । हे अग्ने गार्हपत्य त्वं नोऽस्माकमन्तमः अन्तिकतमः सर्वदा समीपवर्ती भव । अम् गतौ भजने शब्दे अमति समीपं प्राप्नोतीत्यम् क्विप् अतिशयितोऽम् अंतमः अमशब्दात्तमप् । यद्वान्तिकशब्दात्तमपि पृषोदरादित्वेन [पा° ६.३.१०९.] साधुः । उतापि च त्राता पालयिता । शिवः शान्तः । वरूथ्यः वरूथाय हितो वरूथ्यः तादृशश्च भव । पुत्रादिसमूहो वरूथः । यद्वा वरूथं गृहम् [निघ° ३.४.] । तस्मै हितो भव । किम्भूतः त्वं वसुः वासयतीति वसुः । ज्ञानानां वासयिता । तथा अग्निः । अङ्क्तीत्यग्निः । अगि गतौ । आहवनीयादिरूपेण गमनशीलः । तथा वसुश्रवाः वसुना धनेन श्रवः कीर्तिर्यस्यासौ वसुश्रवाः । धनप्रदोऽयमिति यस्य कीर्तिरित्यर्थः । किं च हे अग्ने त्वमच्छा नक्षि । अभिव्याप्नुहि अस्मान् । अच्छाभिव्याप्तुमिति शाकपूणिः [निरु° ५.२८.] । नक्षिर्व्याप्नोतिकर्मा । यद्वा क्षेऽच्छ निर्मलस्वभाव अग्ने नक्षि अस्मद्धोमस्थानं गच्छ । नक्ष गतौ । यदा यदा वयं जुहुयामस्तदा तदागच्छि-

त्यर्थः । किं च युमत्तमं रयिं दाः अतिदीप्तियुक्तं रयिं धनं देहि । ददातिर्लुडि रूपम् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] ॥२५॥

a. तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।

b. स नो बोधि श्रुधी हवमुरुष्या णोऽघायतः समस्मात् ॥२६॥

हे शोचिष्ठ दीप्तिमत्तम हे दीदिवः सर्वस्य दीपयितः तं पूर्वोक्तगुणयुक्तं त्वा त्वां सखिभ्योऽर्थाय सुम्नाय द्वितीयार्थे चतुर्थी सुम्नं सुखं नूनं निश्चयेन ईमहे याचामहे । यद्वा सुम्नाय सुखार्थं सखिभ्योऽस्मत्सखीनामुपकाराय च त्वामीमहे । स त्वं नोऽस्मान्मत्सेवकान्बोधि बुध्यस्व हवमस्मदीयमाह्वानं श्रुधी शृणु । समस्मात्सर्वस्मात् अघायतः शत्रोर्नोऽस्मानुरुष्य रक्ष । समशब्दः सर्वपर्यायः ॥ शोचिरिति ज्वालानाम [निघ° १.१७.] शोचिरस्यास्तीति शोचिष्मान् मतुप् । अतिशयेन शोचिष्मान्शोचिष्ठः । अतिशायने तमबिष्ठनौ [पा° ५.३.५५.] विन्मतोर्लुगितीष्ठनि [पा° ५.३.६५.] मतुपो लुक् ॥ दीदिवः दिवेर्ज्वलनार्थस्य लिडदिशब्दसत्तस्य रूपम् । मतुवसो रुः सम्बुद्धौ छन्दसीति [पा° ८.३.१.] रुत्वम् ॥ बोधि ॥ बुध ज्ञाने लोएमध्यमैकवचने सेर्ह्यपिच्चेति [पा° ३.४.८७.] हिः । बहुलं छन्दसीति शपो लुक् । [पा° २.४.७३.] झलो झल्भ्यो हेर्धिः [पा° ६.४.१०१.] । संहितायामन्येषामपि दृश्यतऽइति दीर्घः [पा° ६.३.१३७.] ॥ उरुष्य ॥ उरुष्यती रक्षणकर्मा । ऋचि तुनुघेत्यादिना [पा° ६.३.१३३.] दीर्घः । नश्च धातुस्थोरुषुभ्य इति [पा° ८.४.२७.] न इत्यस्य णत्वम् ॥ अघायतः । अघं परस्येहति अघायति । सुप आत्मनः क्यजित्यत्र [पा° ३.१.८.] छन्दसि परेच्छायामपि वक्तव्यमिति क्यच् । अश्वाघस्यादित्याकारः [पा° ७.४.३७.] अघायतीत्यघायन् । तस्मात् । अघायतेः शतृप्रत्यये रूपम् ॥२६॥

a. इडऽएह्यदितऽएहि ॥

b. काम्या एत । मयि वः कामधरणं भूयात् ॥२७॥

का° [४.१२.८.] गां गच्छतीडऽएहीति । द्वे यजुषी गव्ये । हे इडे एहि । हे अदिते एहि आगच्छ होमस्थानम् । इडा मनोर्दुहिता । अदितिर्देवमाता । इडा मनुमिवास्मानेहि । अदितिरादित्यानिवास्मानेहि । तस्मिंस्तच्छब्दस्तद्वदतिदे-

शार्थः (13.) ॥ का° [8.१२.१.] काम्या एतित्यालभतऽइति । गामालभते । मनुष्याणां क्षेत्रासु कामाः प्रविष्टा इति काम्याः । हे काम्याः सर्वैः कामयितव्याः यूयमेत आ इत आगच्छत । वो युष्माकं कामधरणं कामानां धरणं अपेक्षितफलधारकत्वं यदस्ति तत् मयि अनुष्ठातरि भूयात् युष्मत्प्रसादादहमभीष्टफलस्य धारयिता भूयासमित्यर्थः । अहं वः प्रियो भूयासमिति श्रुतिर्व्याचष्टे [२.३.४.३४.] ॥ २७ ॥

सोमान᳖ स्वर᳖णं कृणुहि ब्रह्मणस्पते
कक्षीव᳖न्तं य औ᳖शिजः ॥ २८ ॥

का° [8.१२.१०.] सोमानमित्यनुदकं व्रतोपायनवत् । व्रतेत्यपरेणाहवनीयं प्राङ्मिष्टन्नवर्च जपतीति सूत्रार्थः ॥ सोमानं स्वरणं तृचो गायत्रो ब्रह्मणस्पतिदेवत्यस्तेनैव दृष्टः । अग्निमीन्धमाणस्य यजमानस्य जपे विनियुक्तः । हे ब्रह्मणस्पते वेदस्य पालक सोमानं सोमानामभिषोतारं । स्वरणं स्वृ शब्दोपतापयोः शब्दयितारम् । कृणुहि कुरु । मामिति शेषः । सुनोतीति सोमा तम् । अन्येभ्योऽपि दृश्यतऽइति [पा° ३.२.७५.] मनिन् (14.) । स्वरतीति स्वरणः नन्द्यादित्वात् [पा° ३.१.१३४.] ल्युः । सोमयागकर्तारं स्तुतिब्रह्मशब्दयुक्तं च धनप्रदानेनां कुर्वित्यर्थः तत्रोपमानमुच्यते । कक्षीवन्तं कक्षीवन्नामकमृषिं दीर्घतमःपुत्रं यथा सोमयागयुक्तं स्तुतियुक्तं च कृतवानसि तथा मां कुरु । उपमानद्योतक इवशब्दोऽत्र लुप्तो द्रष्टव्यः । कोऽसौ कक्षीवान् । य औशिजः उशिजः पुत्रः उशिक् कक्षीवतो माता ॥ २८ ॥

यो रे᳖वान्यो᳖ऽमीव᳖हा व᳖सुवित्पुष्टि᳖वर्धनः ।
स नः᳖ सिषक्तु यस्तु᳖रः ॥ २९ ॥

यो ब्रह्मणस्पतिः रेवान् धनवान् । यश्चामीवहा अमीवस्य रोगस्य हन्ता । अम रोगे । अमेरीवः । वसुवित् वसु धनं वेत्तीति यश्च पुष्टिवर्धनः पोषणस्य वर्धयिता यश्च तुरः तुर वेगे इगुपधेति [पा° ३.१.१३५.] कः वेगवान् अविलम्बेन (15.) कारी । स ब्रह्मणस्पतिर्नोऽस्मान्सिषक्तु सेवताम् सिषक्ति सचत (16.)

ऽइति सेवमानस्य [निरु° ३.२१.] । यद्वानयर्चा पुत्रः प्रार्थ्यते । यः पुत्रो रेवान्धनवान् यश्च व्याधिर्कर्त्ता जपादिना यो धनस्य लब्धा पुष्टेश्च वर्धयिता यः तुरः शीघ्रकारी तादृशः पुत्रोऽग्नेः प्रसादान्नोऽस्मान्सिषक्तु सेवताम् ॥ २१ ॥

मा नः शꣳसोऽअररुषो धूर्तिः प्रणङ्मर्त्यस्य
रक्षा णो ब्रह्मणस्पते ॥ ३० ॥

रा दाने इति धातोः क्वसुनन्तस्य षष्ठ्येकवचने ररुष इति रूपम् । ररौ इति ररिवांस्तस्य ररुषः । दानं कृतवत इत्यर्थः । तस्य निषेधादररुष इति । कदाचिदपि हविर्दानमकृतवत इत्यर्थः । तादृशस्य मर्त्यस्य मनुष्यस्य शंसो धूर्तिश्च नोऽस्मान्मा प्रणाक् प्रकर्षेण व्याप्नोतु । नशिर्व्याप्त्यर्थः । यद्वा नश अदर्शने । मा प्रणाक् प्रकर्षेण मा नाशयतु । शंसनं शंसोऽनिष्टचिन्तनम् । धूर्तिर्हिंसा । धरति धूर्वतीति वधकर्मसु पठितत्वात् [निघ° २.१९.] । शत्रुकृतमनिष्टचिन्तनं शत्रुकृता हिंसा चास्मान्मा व्याप्नोवित्यर्थः । किं च हे ब्रह्मणस्पते वेदस्य पालकाग्ने नोऽस्मान्रक्ष । ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः । णावं पूर्ववत् ॥ ३० ॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।
दुराधर्षं वरुणस्य ॥ ३१ ॥

सत्यधृतिदृष्टं आदित्यदेवत्यस्तृचो गायत्रो जपे वितियुक्तः पथि जप्त उपद्रवनाशकश्च । मित्रस्यार्यम्णो वरुणस्येति त्रीणां त्रयाणां देवानां सम्बन्धि अवः पालनमस्तु । किम्भूतमवः । महि महत् तथा द्युक्षं द्युमन्ति सुवर्णादिद्रव्याणि क्षियन्ति निवसन्ति यस्मिन्पालने तथाविधम् । दुराधर्षं तिरस्कर्तुमशक्यम् । त्रीणां त्रिशब्दस्यामि छन्दसि त्रयादेशो वेति [पा° ७.१.५३.] वाच्यम् ॥ ३१ ॥

नहि तेषाममा चन नाधसु वारणेषु ।
ईशे रिपुरघशꣳसः ॥ ३२ ॥

अमाशब्दो गृहनामसु पठितः [निघ° ३.४.] । चनशब्दोऽप्यर्थे । अमा चन गृ-

ह्ऽपि वर्तमानानां तेषां तथा वारणेषु चोरव्याघ्रादयो यत्र स्थिता निवारयन्ति पथिकान्ते वारणास्तेषु चोरव्याघ्रभयाढ्येषु अध्वसु मार्गेषु वा वर्तमानानां तेषां मित्रार्यमवरुणैस्त्रिभिर्देवैः पालितातां यज्ञमानानाम् उपद्रवयेति शेषः । अघशंसः सर्वदा पापस्य प्रशंसको रिपुः शत्रुः नहि ईशे । समर्थो न भवति । लोपस्त आत्मनेपदेष्विति [पा° ७.१.४१.] तलोपः । अधीगर्थदयेशां कर्मणीति [पा° २.३.५२.] इति तेषामिति षष्ठी । मित्रादिभिः पालितानामस्माकं गृहेऽरणे वा नास्ति शत्रुबाध इत्यर्थः ॥३२॥

ते हि पुत्रासोऽअदितेः प्र जीवसे मर्त्याय ।
ज्योतिर्यच्छन्त्यजस्रम् ॥३३॥

कथं तद्रक्षितानां शत्रुभयाभावस्तदाह । हि यतस्ते अदितेः अखण्डितशक्तेर्देवमातुः पुत्रासः पुत्राः पूर्वोक्ता मित्रार्यमवरुणा मर्त्याय मनुष्याय यज्ञमानायाजस्रं निरन्तरमनुपक्षीणं ज्योतिः तेजः प्रयच्छन्ति किमर्थं जीवसे जीवितुं यथा चिरं जीवनं भवति तथा तदुपायज्ञानं प्रयच्छन्तीत्यर्थः ॥३३॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥३४॥

ऐन्द्री पथ्या बृहती मधुच्छन्दोदृष्टा ज्ञये विनियुक्ता । यस्यास्तृतीयः पादो द्वादशाक्षरोऽन्ये त्रयोऽष्टाक्षराः सा पथ्या बृहती । हे इन्द्र परमैश्वर्ययुक्त कदा चन कदापि त्वं स्तरीर्नासि । स्तृञ् हिंसायाम् स्तृणातीति स्तरीः हिंसको नासि किं तर्हि दाशुषे सश्चसि । द्वितीयार्थे चतुर्थी । दाश्वांसं हविर्दत्तवन्तं यज्ञमानं सेवसे । सश्चतिः सेवनकर्मा । किं च । हे मघवन्धनवन् देवस्य प्रकाशमानस्य ते तव भूय इत् बहुतरमेव दानं नु इत् क्षिप्रमेव दाश्वांसमुपपृच्यते । पृची सम्पर्के यज्ञमानेन सह सम्पर्कं प्राप्नोति । प्रसमुपोदः पादपूरणे [पा° ८.१.६.] ज्इत्येक उपशब्दः पादपूरणे । इत्शब्दावेवार्थे । नु क्षिप्रार्थः । न कदाचिद्यज्ञमानं प्रति क्रुध्यसि सेवसे च तं (17.) त्वदीयं भूयो धनं (18.) दाश्वांसमुपपृच्यतऽइति भावः ॥३४॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥३५॥

विश्वामित्रदृष्टा सावित्री गायत्री जपे वि° (19.) । तदिति पदार्थे तस्य देवस्य द्योतनात्मकस्य सवितुः प्रेरकस्यान्तर्यामिणो विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाधावच्छिन्नस्य वा आदित्यान्तरपुरुषस्य वा ब्रह्मणो वरेण्यं वरणीयं सर्वैः प्रार्थनीयं भर्गो सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्यज्ञानादिवेदान्तप्रतिपाद्यं वयं धीमहि ध्यायामः । छान्दसं संप्रसारणम् । यद्वा मण्डलं पुरुषो दृश्यत इति त्रयं भर्गःशब्दवाच्यम् । भर्गो वीर्यं वा । वरुणाद्व वा अभिपिपिचानाद्भर्गोऽपचक्राम वीर्यं वै भर्ग इति श्रुतेः [५.४.५.१.] । तस्य कस्य । यः सविता नोऽस्माकं धियः बुद्धीः कर्माणि वा प्रचोदयात्प्रकर्षेण चोदयति प्रेरयति सत्कर्मानुष्ठानाय ॥ यद्वा वाक्यभेदेन योजना । सवितुर्देवस्य तत् वरेण्यं भर्गो ध्यायामः । यश्च नो बुद्धीः प्रेरयति तं च ध्यायामः । स च सवितैव । लिङ्गव्यत्ययेन वा योजना । सवितुर्देवस्य तत् भर्गो धीमहि यो यत् भर्गो नो बुद्धीः प्रेरयति ॥३५॥

परि ते दूडभो रथोऽस्माँ२॥ऽअश्नोतु विश्वतः ।
येन रक्षसि दाश्वुषः ॥३६॥

आग्नेयी गायत्री वामदेवदृष्टा जपे वि° । हे अग्ने ते तव रथोऽस्मान्यजमानान्विश्वतः सर्वासु दिक्षु पर्यश्नोतु परितो व्याप्नोतु अस्मद्रक्षणाय सर्वतस्तिष्ठतु । किम्भूतो रथः दूडभः दभ्नोतिर्बधकर्मा । दुःखेन दभ्यते दुर्दभः । केनापि सहसा हिंसितुमशक्यः । उकारं इर्दे ऽइति प्रातिशाख्यसूत्रेण [प्रा° का° ३.३.४.] इरो रेफस्य उकारः अग्निमदस्य डः [पा° क° ६.३.१०९. वा° ६.] । येन रथेन त्वं दाश्वुषो यजमानान् रक्षसि । पालयसि । यजमाना वै दाश्वांस इति श्रुतेः [२.३.४.३८.] ॥ बृहदुपस्थानं समाप्तम् ॥३६॥

V. a. भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याꣳ सुवीरो वीरैः सुपोषः पोषैः ।
b. नर्य प्रजां मे पाहि । c. शꣳस्य पशून्मे पाहि ।

d. अर्थर्य पितुं मे पाहि ॥ ३७ ॥

अथ क्षुल्लकोपस्थानमासुरिदृष्टम् ॥ का° [8. १२. १२.] भूर्भुवः स्वरिति वोभाविति । वाशब्दो विकल्पार्थः । पूर्वोक्तेनोपप्रयन्त इत्यादिना वक्ष्यमाणेन भूर्भुवः स्वरित्यादिना वोभावग्नी उपतिष्ठितोभयोपस्थानं कुर्यादिति सूत्रार्थः । हे अग्ने भूर्भुवः स्वः त्वं व्याहृत्यादित्रयात्मकः (20.) तदर्थभूतलोकत्रयात्मको वा । अतस्त्वत्प्रसादादहं प्रजाभिः बन्धुभृत्यादिरूपाभिः कृत्वा सुप्रजाः स्यामनुकूलत्वेन शोभनाः प्रजा यस्य तादृशो भवेयम् तथा वीरैः पुत्रैः सुवीरः स्यां शास्त्रीयमार्गवर्तिशोभनपुत्रयुक्तो भवेयम् तथा पोषैः हिरण्यादिपोषणैः सुपोषः स्यां बहुमूल्यार्हहिरण्यादियुक्तो भवेयम् ॥ ॥

प्रवत्स्यदुपस्थानमागतोपस्थानं चादित्यदृष्टम् ॥

का° [8. १२. १३.] प्रवत्स्यन्त्सर्वान्नेर्येति प्रतिमन्त्रमिति । यदा यजमानो ग्रामान्तरं गन्तुमिच्छति तदानीं सर्वानग्नीन्नेर्येत्यादिमन्त्रैरुपतिष्ठेत । अथ मन्त्रार्थः । नर्य नरेभ्यो हित गार्हपत्य मे प्रजां पाहि ॥ आहवनीयमुपतिष्ठते । हे शंस्य अनुष्ठातृभिः शंसितुं योग्याहवनीय मे मम प्रजां पाहि रक्ष ॥ दक्षिणाग्निमुपतिष्ठते । हे अर्थर्य दक्षिणाग्ने मे पितुमन्नं पाहि । अतनवानर्थर्यः । अत सातत्यगमने । सततं गार्हपत्यात्स्वस्थानं दक्षिणाग्निर्गच्छति (21.) । तेनार्थर्यः । निपातोऽयम् ॥ ३७ ॥

आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् ।
अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्व ॥ ३८ ॥

का° [8. १२. १८.] समित्पाणिरनुपेत्य कंचिदुपतिष्ठतऽआहवनीयगार्हपत्यदक्षिणाग्नीनागन्मेति प्रतिमन्त्रमिति । समिधं हस्ते आदाय कंचिदपि जनमगत्वैव प्रथममेवाग्न्यागारं प्राप्यागन्मेत्यादिमन्त्रत्रयेणाहवनीयादीनुपतिष्ठतऽइति सूत्रार्थः । अनुष्टुबाहवनीयदेवत्या । हे अग्ने सम्राट् । सम्यक् राजते दीप्यते सम्राट् तथाविधाग्ने आहवनीय वयं त्वामागन्म त्वामुद्दिश्य ग्रामान्तरात्प्रत्यागताः । किम्भूतं त्वाम् । विश्ववेदसं विश्वं वेत्ति वेदयतीति वा विश्ववेदास्तम् विश्वं वेदो धनं यस्येति वा । सर्वज्ञं सर्वधनं वा । पुनः किम्भूतम् । अस्मभ्यं वसुवित्तममस्मदर्थम-

तिशयेन वसुनो धनस्य वेदितारं लब्धारम् । किं च । हे अग्ने द्युम्नं सहश्च अस्मभ्यमभि आयहस्व । दाण् दाने । पाघ्रेत्यादिना [पा° ७.३.१८.] यहादेशः । यशो बलं चास्मभ्यं देहि । द्युम्नं द्योततेर्यशो वान्नं वा [निरु° ५.५.] । सह इति बलनाम [निघ° २.९.] । यहस्वेति यमे रूपं वा । आयहस्व आगमय । यहतिः स्थापनार्थो वा । अस्मासु यशो बलं च स्थापय ॥३८॥

अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ।
अग्ने गृहपतेऽभि द्युम्नमभि सह आयहस्व ॥३९॥

गार्हपत्यमुपतिष्ठते । न्यङ्कुसारिणी बृहती । यस्या द्वितीयः पादो द्वादशाक्षरोऽन्ये त्रयोऽष्टाक्षराः सा न्यङ्कुसारिणी । अत्र तृतीयो नवार्णस्तेनैकाधिका । अयं पुरोऽवस्थितो गार्हपत्य एतन्नामकोऽग्निर्गृहस्य पतिः पालकः । प्रजायाः पुत्रपौत्रादिकायाः अनुग्रहार्थं वसुवित्तमः अतिशयेन धनस्य लब्धा । हे अग्ने स त्वं द्युम्नं सहश्चाभ्यायहस्व देहि ॥३९॥

अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः ।
अग्ने पुरीष्याभि द्युम्नमभि सह आयहस्व ॥४०॥

दक्षिणाग्निमुपतिष्ठते । अनुष्टुप् । योऽयमग्निः पुरीष्यः पशव्यः । पशवो वै पुरीषमिति श्रुतेः । रयिमान्धनवान्पुष्टिवर्धनः पोषस्य वर्धयिता । तं याचे । हे अग्ने पुरीष्य पशुकित द्युम्नं सहश्चाभ्यायहस्व देहि ॥४०॥

VI. गृहा मा बिभीत मा वेपधमूर्जं बिभ्रत एमसि ।
ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥४१॥

का° [४.१२.२२.] गृहा मा बिभीतेति गृहानुपैतीति । ग्रामान्तरादागतो गृहा मेत्यादिमन्त्रत्रयेण गृहं प्राप्नुयात् । तिस्रोऽपि वास्तुदेवत्याः शम्युदृष्टाः (22.) । त्रिष्टुब्विराड्रूपा । यस्या एकादशार्णास्त्रयः पादा एकोऽष्टार्णः सा विराड्रूपा । अत्र प्रथमो दशार्णस्तेनैकोना । हे गृहा यूयं मा बिभीत । पालको यजमानो गत इति भयं मा कुरुत । मा च वेपधम् । कोऽपि शत्रुरागत्य विनाशयिष्यती-

ति बुद्ध्या कम्पं मा कार्ष्ट । यतो वयमूर्ज्जं विभ्रतो धारयमाणानद्वीणान्नानिव युष्मानेमसि । आ इमः आगताः स्मः । यथा यूयमूर्ज्जं विभ्रतः तथाहमपि ऊर्ज्जं विभ्रत् धारयन् सुमनाः शोभनमनस्कः सुमेधाः शोभनधारणाप्रज्ञोपेतः मनसा दुःखरहितेन मोदमानः कृण्वन् वो युष्मान्गृहानेमि आगच्छामि । एमः ऐमीत्यात्मनि विकल्पेन वक्तृवचनमस्मदो द्वयोश्चेत्युक्तेः [पा° १.२.५९.] ॥४१॥

येषामध्येति प्रवसन्येषु सौमनसो बहुः ।
गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥४२॥

अनुष्टुप् । प्रवसन्देशान्तरं गच्छन्यजमानो येषामध्येति । इक् स्मरणे । यान्गृहान्स्मरति । अधीगर्थदयेशां कर्मणीति [पा° २.३.५२.] षष्ठी । गृहविषयं क्षेमं सदा चिन्तयतीत्यर्थः । तथा येषु गृहेषु यजमानस्य बहुः सौमनसो सुमनसो भावः प्रीत्यतिशयः । वयं तान्गृहानुपह्वयामहे आह्वयामः । गृहाभिमानी देवोऽस्मत्समीपमागच्छत्वित्यर्थः । तेन गृहदेवा आकृताः सन्तः जानतः उपकाराभिज्ञान्नोऽस्मान्जानन्तु । एते कृतघ्ना न भवन्तीत्यवगच्छन्तु ॥४२॥

उपह्वता इह गाव उपह्वता अजावयः ।
अथोऽअन्नस्य कीलाल उपह्वतो गृहेषु नः ।
क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳ शग्मꣳ शम्योः शम्योः ॥४३॥

त्र्यवसाना महापङ्क्तिः । यस्या अष्टार्णाः षट् पादाः सा महापङ्क्तिः । पञ्चमो नवार्णस्तेनैकाधिका । इह गृहेषु गाव उपह्वताः धेनवो बलीवर्दाश्च सुखेन तिष्ठन्त्वित्येवमनुज्ञाताः । तथा इह गृहेषु अजावयः उपह्वताः । अजावाविवजातिद्वययुक्ताः पशवः उपह्वताः सुखेन वर्तन्तामित्यस्माभिरनुज्ञाताः । अथो अपि च अन्नस्य कीलालः अन्नसम्बन्धी (23.) रसविशेषो नोऽस्मदीयेषु गृहेषु उपह्वतः समृद्धो भवत्वित्येवमस्माभिरनुज्ञातः ॥ का° [8.१२.२३.] क्षेमाय व इति प्रविशतीति । हे गृहा वो युष्मान्प्रपद्ये प्राप्नोमि । किमर्थम् । क्षेमाय विद्यमानस्य वसुनो रक्षणं क्षेमस्तदर्थम् । शान्त्यै मम सर्वानिष्टशमनाय । शम्योः शमिति सुखनाम [निघ° ३.६.] तत्कामयते इति शम्युः । इदम्युरिदं कामयमान इति [निरु°

६. ३१.] यास्कोक्तत्वात् तादृशस्य मम शिवं शग्ममिति द्वे सुखनामनी [निघ० ३. ६.] । तत्राद्यमैहिकं द्वितीयमामुष्मिकम् । उभयविधं सुखं भूयादिति शेषः । शम्यो-रित्यभ्यासोऽत्यादरार्थः ॥ ॥

इत्युपस्थानमन्त्राः समाप्ताः ॥ ॥४३॥

VII. प्रघासिनो हवामहे मरुतश्च रिशादसः ।

करम्भेण सजोषसः ॥४४॥

अथ चातुर्मास्यमन्त्राः । प्रजापतिदृष्टाः । चातुर्मास्याख्यो यागः । स पर्वचतुष्ट-यात्मकः । वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि । तत्र वरुणप्रघासाख्ये द्वितीये पर्वणि दक्षिणोत्तरयोर्द्वयोर्वेद्योर्हविःधासादितेषु प्रति-प्रस्थाता पत्नीमुदानयंस्तदीयं जारं पृच्छेत् केन चरसीति । सापि तं ब्रूयात् ॥ का० [५. ५. १०.] आख्याते प्रघासिन इत्येनां वाचयति नयन्निति । पत्न्या जारे कथिते सति एनां पत्नीं नयन्प्रतिप्रस्थाता प्रघासिन इति मन्त्रं वाचयति ॥ मारुती गा-यत्री । वयं मरुतो हवामहे । चकारेण तदीयपरिचारकाः समुच्चीयन्ते । किम्भू-तान्मरुतः प्रघासिनः घसॢ अदने प्रकर्षेण घस्यन्ते भक्ष्यन्ते इति प्रघासो हविर्वि-शेषः । स एषामस्तीति तान्प्रघासिनः । एतन्नामकान् । शुक्रज्योतिरित्यादयः सप्त सप्तका मारुता गणाः । तत्र स्वतवांश्च प्रघासी चेति पठ्यते [अध्या० १७. ८५.] । प्रघास्युपलक्षितान्मरुतः आह्वयामः । पुनः किम्भूतान् । रिशादसः रिशतिर्हिं-सार्थः । रिशां वैरिकृतां हिंसां दस्यन्ति उपक्षयन्तीति रिशादसः । दसु उपक्षये क्विप् । यद्वा रिशन्ति हिंसन्तीति रिशाः इगुपधेति कः [पा० ३. १. १३५.] । रिशा-न्हिंसकान्दस्यन्तीति रिशादसः । यद्वा रिशन्ति रिशन्तः शतरि दीर्घश्छान्दसः । रि-शतोऽस्यन्ति क्षिपन्ति ते रिशादसः । असेर्विच् । तथा करम्भेण सजोषसः यव-मयो हविर्विशेषः करम्भः । तेन सजोषसः समानप्रीतयस्तान् । तथाविधान्मरुतो हवामहे ॥४४॥

यद्ग्नौ यदरण्ये यत्सभायां यदिन्द्रिये ।

यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥४५॥

मारुत्यनुष्टुप् । का° [५.५.११.] कर्म्भपात्राणि जुहोति पूर्णेण मूर्धनि कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखी जायापती वा दक्षिणेनाकृत्य तीर्थेन पूर्वेण वेदिमपरेण वा यद्रामऽइतीति । यवपिष्टेन निर्मितानि संतानपरिमितान्येकाधिकानि वर्तुलादिरूपाणि (24.) कर्म्भपात्राणि । तानि पूर्णेण पत्नी दक्षिणाग्नौ जुहुयादित्येकः पक्षः दम्पती द्वौ वा जुहुयातामित्यपरः पक्षः । तौ च दक्षिणेन मार्गेण तानि पात्राण्याकृत्य वेदेः पूर्वदिशि पश्चिमदिशि वा स्थित्वा जुहुयाताम् । अथ मन्त्रार्थः । ग्रामे वसन्तो वयं यदेनः पापं ग्रामोपद्रवरूपं चकृम कृतवन्तः । तथाऽरण्ये वसन्तो यदेनो मृगोपद्रवरूपं चकृम । तथा सभायां स्थिता यदेनो महाजनतिरस्कारादिकं चकृम । तथेन्द्रिये जिह्वोपस्थरूपे प्रीतिमन्तो वयं यदेनः कलञ्जभक्षणपरस्त्रीगमनादिकं चकृम । तथान्यत्रापि भृत्यस्वाम्यादौ यदेनः ताडनावज्ञादिकं चकृम तदिदं सर्वं पापमवयजामहे विनाशयामः । अवपूर्वो यजिर्नाशनार्थः । स्वाहा एतद्धविर्देवतायै पापविनाशिन्यै दत्तम् ॥४५॥

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चित्यस्य मीळुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥४६॥

ऐन्द्रमरुद्दैवत्या विराट् । यस्या दशाक्षराश्चत्वारः पादाः सा विराट् । चतुर्थ एकाधिकोऽत्र (25.) । का° [५.५.१२.] मो षू ण इति यजमानो जपतीति । पृत्स्विति संग्रामनाम [निघ° २.११.] हे इन्द्र अत्र पृत्सु एषु संग्रामेषु वर्तमानः देवैस्त्वया सह सख्यं प्राप्तैर्मरुन्नामकैर्देवैः सहितस्त्वं नोऽस्मान्मो विनाशयेति शेषः । मोशब्दो निषेधार्थः सुशब्दो विनाशाभावस्य सौष्ठवं ब्रूते । तथा सति विनाशलेशो मा भूदित्यर्थः संपद्यते । क उपकार इति चेत् । शुष्मिति बलनाम [२.१. (26.)] । हे शुष्मिन् बलवन्निन्द्र ते तव अवयाः अवयुतो यागः पृथग्भागोऽस्ति हि स्म विद्यतऽएव खलु । अवपूर्वस्य यजतेरेतद्रूपम् । मिह सेचने धातुः । मीळुषो वृष्टिप्रदत्वेन सेक्तुः । हविष्मतो हविर्योग्यस्य तव यव्या यवमयैः कर्म्भपात्रैर्निष्पन्ना होमक्रिया महश्चित्पूजा खलु । तस्य यथोक्तपूजोपेतस्य तवास्मासु कृपालुत्वं युक्तमिति भावः । किं च गीरस्मदीया स्तुतिरूपा वाक् मरुतो

भवतः सखीन्वन्दते नमस्करोति । नमो मरुद्भ्य इत्येवमाकारायाः स्तुतेर्नमस्कारस्वरूपत्वात् । मरुद्विषयनमस्कारेणापि तुष्टस्य तव कृपैव युक्तेत्यर्थः । मो सु न अत्र सुञ इति [पा° ८.३.१०७.] षत्वम् । अन्येषामपि दृश्यतेऽइति [पा° ६.३.१३७.] दीर्घः । नश्च धातुस्थोरुषुभ्य इति [पा° ८.४.२७.] न इत्यस्य णः । स्म इत्यस्यापि पूर्वपदादिति [पा° ८.३.१०६.] षत्वम् । अवयाः श्वेतवाः पुरोडाश्वेति [पा° ८.२.६७.] विज्ञत्तो (27.) निपातः । मीढुषः । दाश्वान्साह्वान्मीढ्वांश्चेति [पा° ६.१.१२.] क्वसत्तो निपातः ॥४६॥

अक्रन्कर्म कर्मकृतः सह वाचा मयोभुवा ।
देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ॥४७॥

आग्नेय्यनुष्टुप् । का° [५.५.१३.] अक्रन्कर्मेत्येनां वाचयतीति । कर्मकृतः वरुणप्रघासाख्यकर्मकारिणः ऋत्विजः वाचा स्तुतिरूपया सह कर्म वरुणप्रघासानुष्ठानरूपमक्रन् कृतवन्तः । कथम्भूतया वाचा । मयोभुवा मय इति सुखनाम [निघ° ३.६.] मयो भवति यया सा मयोभूः तया मन्त्ररूपस्तुत्येत्यर्थः । हे सचाभुवः सचेति सहार्थेऽव्ययं सहभवनशीलाः परस्परं यजमानेन पत्न्या वास्मिन्कर्मणि सहावस्थिता हे ऋत्विजः देवेभ्यो देवार्थं कर्म कृत्वा वरुणप्रघासनामकं कर्मानुष्ठायास्तं प्रेत गृहान्गच्छत । अस्तमिति गृहनाम [निघ° ३.४.] ॥४७॥

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं ।
पुरुराव्णो देव रिषस्पाहि ॥४८॥

यज्ञदेवतं यजुः । का° [५.५.३०.] मज्जयत्यवभृथेति । अत्र विनियोगश्चित्य इति (28.) । वरुणप्रघासस्य कर्मणोऽन्ते तदङ्गभूतं यदवभृथाख्यं कर्म जलसमीपे क्रियतेऽत्रानेन मन्त्रेण दम्पतीभ्यां जले स्नानं कर्तव्यम् । हे अवभृथ अवाचीनानि पात्राणि जलमध्ये भ्रियन्ते यस्मिन्यज्ञविशेषे सोऽयमवभृथः । तत्सम्बोधनम् हे अवभृथ यज्ञ हे निचुम्पुण चुप मन्दायां गतौ [धा° ११.१.] नितरां चोपति

मन्दं गच्छति निचुम्पुणः । उणप्रत्ययो मुमागमश्च । यद्वा नीचैरस्मिन्क्वणन्ति नीचशब्देन कर्म कुर्वन्त्यवभृथो निचुम्पुणः । वीणास्थूणात्रणाभ्रूणित्यादिना (29.) नीचैःशब्दोपपदात्क्वणतेः णक्प्रत्ययान्तो निपातः धातोः पुम्भाव उपपदस्य निचुंभावश्च निपातितः । तथाविधावभृथ यद्यपि त्वं निचेरुरसि नितरां चरतीति निचेरुः । नितरां गमनशीलोऽसि तथाप्यत्र निचुम्पुणो भव मन्दगमनो भव । किम्प्रयोजनमिति चेत् उच्यते । देवैर्योतनात्मकैरस्मदीयैरिन्द्रियैर्देवकृतं क्रविःस्वामिषु देवेषु कृतमिनः पापं यदस्ति तदवायासिषमस्मिन्जले ऽक्रमवनीतवानस्मि । तथा मर्त्यैः मनुष्यैरस्मत्सकाशभूतैर्ऋत्विग्भिर्मर्त्यकृतं मर्त्येषु यज्ञदर्शनार्थमागतेषु कृतमवज्ञारूपं यदेनोऽस्ति तदप्यक्रमवायासिषमित्यनुवर्तते । इदमस्मत्त्यक्तं (30.) पापं यथा त्वां न व्याप्नोति तथा मन्दं गच्छेति भावः । किं च हे देवावभृथाख्य यज्ञ रिषो बधात्याहि पालय । रिषतेर्हिंसार्थस्य क्विबन्तस्य पञ्चम्यां रूपम् । किम्भूताद्विषः । पुरुरावणः । रा दाने । पुरु बहु विरुद्धं फलं ददातीति पुरुरावा तस्मात् । आतो मनिन्नित्यादिना [पा° ३.२.७४.] वनिप् । विरुद्धफलदायी बधस्त्वत्प्रसादादस्माकं मा भूदित्यर्थः ॥४८॥

VIII. पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतो ॥४९॥

द्वे ऐन्द्र्यावनुष्टुभौ । साकमेधगतं कर्म किंचिदुच्यते ॥ का° [५.६.३४.] स्थाल्या दर्व्यादत्ते पूर्णा दर्वीति । दर्व्या स्थालीत ओदनग्रहणं करोति प्रथमया द्वितीयया तं जुहोति । हे दर्वि अन्नप्रदानसाधनभूते काष्ठादिनिर्मिते त्वं पूर्णा स्थाल्याः सकाशादन्नं गृहीत्वा पूर्णा भूत्वा परा पूर्णात्वादेवोत्कृष्टा सती पत इन्द्रं प्रति गच्छ । सुपूर्णा कर्मफलेन सुष्ठु पूर्णा सती पुनरापत भूयोऽस्मान्प्रत्यागच्छ । एवं दर्वीमुक्त्वा इन्द्रमाह । हे शतक्रतो बहुकर्मन् इन्द्र त्वं चाहं चोभौ वस्नेव वस्नशब्देन मूल्यं तृतीयायाः पूर्वसवर्णः मूल्येनैव । इषमभीष्टं क्रविःस्वरूपमन्नमूर्जं क्रविर्दानफलरूपं रसविशेषं च विक्रीणावहै परस्परं द्रव्यविनिमयरूपं विक्रयं करवावहै । अहं तुभ्यं क्रविर्ददामि त्वं मह्यं फलं देहीत्यर्थः ॥४९॥

देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥५०॥

का° [५. ६. ३८.] देहि मऽइति जुहोतीति । इन्द्रो वदति । हे यजमान त्वं मे मह्यमिन्द्राय देहि । हविः प्रथमं प्रयच्छ । ते तुभ्यं यजमानाय ददामि । अपेक्षितं पश्चात्प्रयच्छामि । एवं प्रथमपादोक्त एवार्थो द्वितीयपादेनादरार्थं पुनरुच्यते । मे मह्यमिन्द्राय निधेहि प्रथमं त्वं हविर्नितरां संपादय ते तुभ्यं यजमानाय निदधे अपेक्षितं फलं नितरां संपादयामि । एवमिन्द्रवाक्यं श्रुत्वोत्तरार्धेन यजमान आह । नितरां (31.) ह्रियत इति निहारो मूल्येन क्रेतव्यं पदार्थं ब्रूते । निहारं मूल्येन क्रेतव्यवस्तुरूपं फलं मे मह्यं यजमानाय हरासि प्रयच्छ । लेटोऽडाटावित्याडागमः [पा° ३. ४. ९४.] । उत्तरो निहारो मूल्यवाची । निहारं मूल्यभूतं हविः ते तुभ्यमिन्द्राय निहराणि नितरां समर्पयामि । स्वाहाशब्दो हविर्दानार्थः । पूर्वार्धे पाददयेनादरेणेन्द्रेण द्विवारं प्रोक्तमर्थमुत्तरार्धेन यजमानः सम्यगङ्गीकरोतीत्यर्थः ॥५०॥

IX. अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥५१॥

ऐन्द्रीभ्यां पङ्क्तिभ्यां साकमेधगतपितृयज्ञाख्यकर्मणि आहवनीयोपस्थानम् । यस्या अष्टाक्षराः पञ्च पादाः सा पङ्क्तिः । का° [५. १. २१.] यज्ञोपवीतिनः सर्वे निष्क्रम्योदङ्मोऽक्षन्नमीमदन्तेत्याहवनीयमुपतिष्ठन्ते द्वाभ्यामिति । पितृयज्ञाख्ये कर्मणि ये पितरः सन्ति तेऽस्माभिर्दत्तं हविःस्वरूपमन्नमक्षन् भक्षितवन्तः । कथमेतदवगम्यते । हि यस्मादमीमदन्त हर्षं प्राप्ताः अस्मदीयां भक्तिमवगम्य प्रियाः प्रीतियुक्ताः सन्तः अधूषत स्वकीयं शिरः कम्पितवन्तः । यद्वा प्रियास्तनूरवाधूषत । किं च स्वभानवः स्वयं दीप्तियुक्ताः विप्राः मेधाविनः सन्तः नविष्ठया नवतमया मती मत्या बुद्ध्या युक्ताः अस्तोषत स्तुतिं कृतवन्तः । अहो स्वाद्वन्नं बहु दत्तमहो भक्तिरित्याद्यभिधानं स्तुतिः अतो हे इन्द्र नु क्षिप्रं ते तव हरी एतन्नामकौ हरितवर्णावश्वौ योजा गमनाय रथे योजय । तवाभीष्टायाः पितृतृप्तेः संपन्नत्वात्तैः पितृभिः सह त्वया गन्तव्यमित्यर्थः । अक्षन् । अदेर्लुङि लुङ्सनोर्घस्लृ इति [पा° २.

४.३७.] घस्लादेशः (32.) । मल्ले घसेत्यादिना [पा° २.४.८०.] लेर्लुक् । गमहनेत्युपधालोपः [पा° ६.४.९८.] । खरि चेति [पा° ८.४.५५.] चर्त्वम् । शासि वसीति [पा° ८.३.६०.] षत्वम् । अडागमः ॥ अमीमदन्त मद तृप्तियोगे चुरादिरात्मनेपदी लुङि णिलोपादौ ढ्रपम् ॥ अधूषत धूञ् कम्पने लुङि सिचि व्यत्ययेन गुणाभावः ॥ मती सुपां सुलुगिति [पा° ७.१.३९.] तृतीयायाः पूर्वसवर्णदीर्घः ॥ योज्ञ युजिरू योगे ण्यन्ताल्लोटि ह्रन्दस्युभयथेति [पा° ३.४.११७.] शप आर्धधातुकत्वाण्णिर्निटीति [पा° ६.४.५१.] णिलोपः । ब्रचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः ॥५१॥

सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।
प्र नूनं पूर्णबन्धुर स्तुतो यासि वशाँ२॥ऽअनु योजा न्विन्द्र ते हरी ॥५२॥

हे मघवन्वयं त्वा त्वां वन्दिषीमहि (33.) स्तुतिकर्तारो भूयास्मेत्याशास्यते (34.) । किम्भूतं त्वाम् । सुसंदृशं सुष्ठु सम्यक्पश्यति सुसंदृक् तं शोभनदर्शनम् । अनुग्रहदृष्ट्या सर्वस्य द्रष्टारम् । इत्थमस्माभिः स्तुतः त्वं वशान्कामयमानान्यज्ञमाननु लक्षीकृत्य नूनं प्रयासि अवश्यं गच्छसि किम्भूतः पूर्णबन्धुरः बन्धुरशब्दो रथनीडवाची । स्तोतृभ्यो देयैर्धनैः सम्पूर्णरथनीडोपेतो भूत्वा गच्छसि । हे इन्द्र स त्वं ते हरी योजेति पूर्ववत् ॥५२॥

मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन ।
पितॄणां च मन्मभिः ॥५३॥

तिस्र ऋचो मनोदेवत्या गायत्र्यो बन्धुदृष्टाः । का° [५.१.२२.] मनो न्वाह्वामहऽइति गार्हपत्यं तिसृभिरिति । उपतिष्ठन्तऽइत्यनुवर्तते ॥ नु क्षिप्रं मन आह्वामहे पितृयज्ञानुष्ठानेन चित्तं पितृलोकं गतमिवासीत् अत आह्वयते । यद्वा मनः मनोऽभिमानि दैवतमाह्वामहे आह्वयामः । केन साधनेन स्तोमेन स्तोत्रेण कथम्भूतेन नाराशंसेन । शंसः प्रशंसनं नराणां मनुष्याणां योग्यः शंसो नराशंसः तत्सम्बन्धी नाराशंसस्तेन । स्तोत्रं द्विविधं दैवं मानुषं च यत्र देवाः स्तूयन्ते तद्दैवं यत्र च मनुष्याः प्रशस्यन्ते तन्मानुषं तथाविधेन स्तोत्रेणेत्युक्तं भवति । किं च पि-

तृणां च मन्मभिः पितरो यैः स्तोत्रैर्मन्यते ते मन्मानस्तैः तादृशैः स्तोत्रैराह्वयामः ॥५३॥

आ नं एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक्च सूर्यं दृशे ॥५४॥

नोऽस्माकं मनः पूर्वोक्तं चित्तं पुनर्भूयः आ एतु आगच्छतु किमर्थं क्रत्वे क्रतवे संकल्पाय यज्ञं संकल्पयितुं दक्षाय कर्मण्युत्साहाय । तथा च श्रुतिः । यदेव मनसा कामयतऽइदं मे स्यादिदं कुर्वीयेति स एवक्रतुरथ यदस्मै तत्समृद्ध्यते स दक्ष इति । ज्योगिति निपातश्चिरवचनः । ज्योग्जीवसे चिरं जीवितुं सूर्यं दृशे च चिरकालं सूर्यमवलोकयितुं च । एतेषां संकल्पादीनां सिद्धये मनः पुनरागच्छतु ॥ क्रत्वे । गुणाभावाद्यणादेशः ॥ जीवसे तुमर्थे असेप्रत्ययः ॥ दृशे । दृशे विख्ये चेति [पा° ३.४.११.] साधुः ॥५४॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातꣳ सचेमहि ॥५५॥

हे पितरो भवदनुज्ञया दैव्यो जनो देवसम्बन्धी पुरुषः नोऽस्मभ्यं मनः पूर्वोक्तं चित्तं पुनर्भूयो ददातु प्रयच्छतु प्रेरयवित्यर्थः । तथा सत्यनुष्ठानं कृत्वा भवत्प्रसादाज्जीवं जीवनवन्तं व्रातं पुत्रपश्वादिकं गणं वयं सचेमहि सेवेमहि । सचतिः सेवनार्थः ॥५५॥

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ॥५६॥

सोमदेवत्या गायत्री जपे विनियुक्ता । अत्र पितृयज्ञे सोमनामको देवोऽस्ति । सोमाय पितृमते इत्येवं ऋविषो विहितत्वात् । हे सोम वयं यजमानाः तव व्रते कर्मणि वर्तमानाः तनूषु भवच्छरीरेषु मनो बिभ्रतः अस्मदीयं चित्तं धारयन्तः त्वत्कारुण्यात्प्रजावन्तः पुत्रपौत्रादिसम्पन्नाः सन्तः सचेमहि सेवेमहि सेवितव्यानि वस्तूनीति शेषः । यद्वा षच् सम्बन्धे सर्वदा त्वत्सम्बद्धा भवेम ॥५६॥

X. a. एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा ।

b. एष ते रुद्र भाग आखुस्ते पशुः ॥५७॥

द्वे रौद्रे यजुषी विंशत्यक्षरद्वादशाक्षरे ॥ ॥ साकमेधगतत्र्यम्बकहविर्विषया मन्त्रा उच्यन्ते । प्रथमस्य यजुषोऽवदानहोमे विनियोगः । तथा च का° [५.१०.१२.] एष तऽइति जुहोतीति । रोदयति विरोधिनां शतमिति रुद्रः । हे रुद्र ते तव स्वस्रा भगिन्या अम्बिकया अम्बिकानाम्न्या सह एषोऽस्माभिर्दीयमानः पुरोडाशः भागः भजनीयः स्वीकर्तुं योग्यः । तं तथाविधं पुरोडाशं त्वं जुषस्व सेवस्व स्वाहा इदं हविर्दत्तं सुकृतमस्तु । अम्बिकाया रुद्रभगिनीत्वं श्रुत्योक्तम् [२.६.२.१.] । अम्बिका ह वै नामास्य स्वसा तयास्यैष सह भाग इति । योऽयं रुद्राख्यः क्रूरो देवस्तस्य विरोधिनं कर्तुमिच्छा भवति तदानया भगिन्या क्रूरदेवतया साधनभूतया तं हिनस्ति । सा चाम्बिका शरद्रूपं प्राप्य ज्वरादिकमुत्पाद्य तं विरोधिनं कर्त्ति । रुद्राम्बिकयोस्तयोरुग्रत्वमनेन हविषा शान्तं भवति । तथा च तित्तिरिः । एष ते रुद्र भागः सह स्वस्राम्बिकयेत्याह शरद्वाऽअस्याम्बिका सा भियाऽएषा (?) (35.) हिनस्ति यꣳ हिनस्ति (36.) तयैवैनꣳ सह शमयतीमि ॥ का° [५.१०.१३.] अतिरिक्तमाखूत्करऽउपकिरत्येष तऽइतीति (37.) । यज्ञमानस्य यावन्तः पुत्रभृत्यादयः पुरुषाः सन्ति तान्गणयित्वा प्रतिपुरुषमेकैकः पुरोडाश इत्येतावतः पुरोडाशान्निरूप्य ततोऽप्यधिकमेकं पुरोडाशं निर्वपेत् सोऽयमतिरिक्त उच्यते । त्रैयम्बकान्निर्वपति रौद्रानेककपालान्यावत्तो यजमानगृह्या एकाधिकानिति कात्यायनोक्तेः [५.१०.१.२.] । तत्र योऽयमतिरिक्तस्तं न जुहुयात्किंतु मूषकोत्खाते एष तऽइति मन्त्रेणोपकिरेत् । अथ मन्त्रार्थः । हे रुद्र एषोऽस्माभिरुपकीर्यमाणोऽतिरिक्तः पुरोडाशः ते भागः त्वया भजनीयः तथा ते तवाखुः पशुः मूषकः पशुत्वेन समर्पितः । आखुदानेन तुष्टो रुद्रस्तयाम्बिकया यजमानपशून्न मारयतीत्यर्थः ॥५७॥

अवे रुद्रमदीमह्यवे देवं त्र्यम्बकम् ।

यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥५८॥

द्वे रौद्र्यौ पङ्क्तिककुभौ । यस्या द्वितीयः पादः द्वादशाक्षरः प्रथमतृतीयावष्टाक्षरौ सा ककुप् । द्वयोर्जपे विनियोगः । तथा का° [५.१०.१४.] आगम्याव रुद्रमदीमहीति जपतीति । रुद्रमव । असौ रुद्र इति मनसा तमवगत्यादीमहि त्वदनुग्रहादन्नं भक्षयेम । तथा त्र्यम्बकं त्रीण्यम्बकानि नेत्राणि यस्य तादृशं देवमव त्रिनेत्रोऽयं देव इति मनसावगत्यादीमहीत्यनुवर्तते । यद्वा अदीमहीत्यत्र णिचो लोपश्छान्दसः । अवयुत्यान्यदेवताभ्यः पृथक्कृत्य रुद्रमदीमहि आदयामो भोजयामः । अवगम्य ज्ञात्वा त्र्यम्बकमादयाम इति । यथा येन प्रकारेण नोऽस्मान्वस्यसः करत् वस्तृतरान्वसनशीलानसौ कुर्यात् । यथा च नोऽस्मान्श्रेयसः करत् ज्ञातिषु प्रशस्यतरान्कुर्यात् । यथा चास्मान्व्यवसाययात् सर्वेषु कार्येषु निश्चययुक्तान्कुर्यात् । तथैनं जपाम (38.) इत्यर्थः । आशीरियम् ॥ अदीमहि छन्दस्युभयथेत्यार्धधातुकत्वाच्छिडि णिचो लोपः [पा° ३.४.११७.] ॥ वस्यसः वसतीति वस्ता तृन् अतिशयेन वस्ता वसीयान् । तुश्छन्दसीति [पा° ५.३.५९.] ईयसुनि कृते तुरिष्ठेमेयःस्विति [पा° ६.४.१५४.] तृनो लोपः । वसीयस इति प्राप्ते ईलोपश्छान्दसः ॥ करत् छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] लङ् विकरणाव्यत्ययेन शपि गुणः । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] ॥ व्यवसाययात् लेटि आडागमे इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.९७.] इलोपे यूपं विपूर्वस्य णयन्तस्य स्यतेः ॥५८॥

भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् ।
सुखं मेषाय मेष्यै ॥५९॥

हे रुद्र त्वं भेषजमसि औषधवत्सर्वोपद्रवनिवारकोऽसि । अतोऽस्मदीयेभ्यो गवे अश्वाय पुरुषाय च भेषजं सर्वव्याधिनिवारकमौषधं देहि । मेषाय मेष्यै च सुखं देहि । सुष्ठितं खेभ्यः प्राणिभ्य इति सुखम् । अनेन मन्त्रेण गृह्यपशूनां क्षेमप्राप्तिर्भवति ॥५९॥

a. त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

b. त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥ ६० ॥

द्वे अनुष्टुभौ । का° [५. १०. १५. १६.] अग्निं त्रिः परियन्ति पितृवत्सव्योढ्वनाघ्रानास्त्र्यम्बकमिति देववच्चैतेनैव दक्षिणानाघ्राना इति । यथा पितृमेधे पुत्रादयः पुरुषाः स्वकीयान्वामोढ्वंस्ताडयन्तस्त्रिवारमप्रदक्षिणं परियन्ति । यथा च देवतासेवायां दक्षिणोढ्वंस्ताडयन्तस्त्रिः प्रदक्षिणं परियन्ति । एवमत्र पुरुषाः प्रथमेनैव त्र्यम्बकमन्त्रेणाग्निमप्रदक्षिणत्रयेण प्रदक्षिणत्रयेण च परियन्तीति सूत्रार्थः ॥ मन्त्रार्थस्तु ॥ सुगन्धिं दिव्यगन्धोपेतं मर्त्यधर्मरहितं पुष्टिवर्धनं धनधान्यादिपुष्टेर्वर्धयितारं त्र्यम्बकं नेत्रत्रयोपेतं रुद्रं यजामहे पूजयामः । ततो रुद्रप्रसादान्मृत्योर्मुक्षीय अपमृत्योः संसारमृत्योश्च मुक्तो भूयासम् अमृतान्मा मुक्षीय स्वर्गरूपान्मुक्तिरूपाच्चामृतान्मा मुक्षीय मुक्तो मा भूयासम् । एकवचनं बन्धुवर्गे । मुक्ता मा भूयास्मेत्यर्थः । अभ्युदयनिःश्रेयसरूपात्फलद्वयान्मम भ्रंशो मा भूदित्यर्थः । मृत्योर्मोचने दृष्टान्तः । उर्वारुकमिव बन्धनादिति यथोर्वारुकं कर्कन्धदिः (39.) फलमत्यन्तपक्वं सत् बन्धनात्स्वस्य वृन्तात्प्रमुच्यते तद्वत् ॥ का° [५. १०. १७.] कुमार्यश्चोत्तरेणेति । यजमानसम्बन्धिन्यः कुमार्योऽपि पूर्वोक्तपुरुषवदुत्तरेण त्र्यम्बकमन्त्रेणाग्निं त्रिः परियन्ति । त्र्यम्बकं यजामहे कीदृशं पतिवेदनं पतिं वेदयतीति तं भर्तुर्लम्भयितारं वि लाभे । अन्यत्पूर्ववत् । इतो मुक्षीय इतो मातृपितृभ्रातृवर्गान्मुक्षीय मुक्ता भूयासममुतो मा मुक्षीय विवाहादूर्ध्वं भविष्यतः पत्युर्मुक्ता मा भूयासं जनकस्य गोत्रं गृहं च परित्यज्य पत्युर्गोत्रं गृहं च सर्वदा त्र्यम्बकप्रसादाद्वसामीत्यर्थः । सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाहेति [२. ६. २. १४.] श्रुतेरितोऽमुतःशब्दाभ्यां पितृपतिवर्गौ ग्राह्यौ ॥ ६० ॥

एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा अहिंसन्नः शिवोऽतीहि ॥ ६१ ॥

रौद्र्यास्तारपङ्क्तिः । यस्या अन्त्यौ द्वादशाक्षरावाद्यावष्टाक्षरौ पादौ सास्तारपङ्क्तिः ॥ का° [५. १०. २१.] मूतयोः कृत्वा वेणुयष्ट्यां वा (40.) कुपे वासस्योभयतः

स्थाणुवृक्षवञ्शवल्मीकानामन्यतमस्मिन्नुत्क्षेपणावदासज्जत्येतत्तञ्ज्ञतीति । व्रीव्रियवादीन्बद्ध्वा वक्तनार्थं (41.) तृणवंशादिनिर्मितः पात्रविशेषो मूतमित्युच्यते । तयोरुभयोर्मूतयोस्त्र्यम्बकान्कविःशेषान्प्रक्षिप्य स्वकीयेनांसेन वोढुं शक्यायां वंशयष्यामग्रद्वये तन्मूतद्वयमवासज्योन्नते (42.) स्थाणौ वृक्षे वंशे वल्मीके वा मूतद्वययुतां वंशयष्टिं संसृजति । ततो गोभिराघ्रातुमशक्यत्वाद्गावो रोगं न प्राप्नुवन्तीत्यर्थः ॥ अथ मन्त्रार्थः । मूञ्जवान्नाम कश्चित्पर्वतो रुद्रस्य वासस्थानम् । अवसशब्देन देशान्तरं गच्छतो मार्गमध्ये तटाकादिसमीपे भोक्तव्य ओदनविशेष उच्यते । हे रुद्र एतत्ते तव अवसं कविःशेषाख्यं भोज्यम् तेन सहितस्त्वं मूञ्जवतः पर्वतात्परः परभागवर्ती सन्नतीहि अतिक्रम्य गच्छ । कीदृशस्त्वम् । अवततधन्वा अवरोपितधनुष्कः । अस्मद्विरोधिनां त्वया निवारितत्वादित ऊर्ध्वं धनुषि ज्यासमारोपणस्य प्रयोजनाभावाद्वरोपणमेवेदानीं युक्तम् । तथा पिनाकावसः पिनाकाख्यं त्वदीयं धनुरावस्ति सर्वत आच्छाद्यतीति पिनाकावसः । यथा धनुर्दृष्ट्वा प्राणिनो न बिभ्यति तथा त्वदीयं धनुर्वस्त्रादिना प्रच्छाद्य गच्छेत्यर्थः ॥ का° [५. १०. २२. २३.] कृत्तिवासा इत्यनवक्षेमित्योपस्पृशत्यप (43.) इति । उन्नते वृक्षादौ मूतद्वयेऽवसज्य प्रत्यावर्तमाना मूतद्वयस्यावेक्षणमकृत्वा वेदिसमीपे समागत्योदकं स्पृशेयुरिति सूत्रार्थः । मन्त्रार्थस्तु हे रुद्र त्वं कृत्तिवासाः चर्माम्बरो नोऽस्मानहिंसन्हिंसामकुर्वन्शिवोऽस्मदीयपूजया संतुष्टः कोपरहितो भूत्वा अतीहि पर्वतमतिक्रम्य गच्छ ॥ ६१ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥ ६२ ॥

आशीर्देवतोष्णिक् । यस्याश्चत्वारः पादाः सप्ताक्षराः सोष्णिक् । का° [५. २. १६.] त्र्यायुषमिति यजमानो जपतीति । सोऽयं जपो वपनकालीनः । जमदग्नेः मुनेर्यत्र्यायुषं त्रयाणां बाल्ययौवनस्थाविराणामायुषां समाहारस्त्र्यायुषं तथा कश्यपस्यैतन्नामकस्य प्रजापतेः सम्बन्धि यत्त्र्यायुषं तथा देवेषु इन्द्रादिषु यत्त्र्यायुषमस्ति तत्सर्वं त्र्यायुषं नोऽस्माकं यजमानानामस्तु । जमदग्न्यादीनां बाल्यादिषु यादृशं चरितं तादृशं नो भूयादित्यर्थः ॥ ६२ ॥

a. शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिꣳसीः ।

b. निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ६३ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां तृतीयोऽध्यायः ॥ ३ ॥

क्षुरदेवतं यजुः । काण [५. २. १७.] शिवो नामेति लोकक्षुरमादायेति । हे क्षुर त्वं नाम नाम्ना शिवः शान्तोऽसि स्वधितिः वज्रं ते तव पिता । ते तुभ्यं नमोऽस्तु मां मा हिंसीः । काण [५. २. १७.] निवर्तयामीति वपतीति । यजमानदेवतं यजुः । निपूर्वो वृतिर्मुण्डनार्थः । हे यजमान त्वां निवर्तयामि मुण्डयामि किमर्थमायुषे जीवनाय अन्नाद्यायान्नभक्षणाय प्रजननाय संतानाय रायो धनस्य पोषाय पुष्ट्यै सुप्रजास्त्वाय शोभनापत्यतायै सुवीर्याय शोभनसामर्थ्याय ॥ ६३ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
अग्न्याधानादिपित्र्यान्तस्तृतीयोऽध्याय ईरितः ॥ ३ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

I. ॥ १ ॥ १ ॥ २ ॥ २ ॥ ३ ॥ ३ ॥ ४ ॥ ४ ॥ ५ [-भूम्ना भूमिरिव वरिम्णा-] ॥ ५ ॥ ६ ॥ ६ ॥ ७ ॥ ७ ॥ ८ ॥ ८ ॥

II. ॥ अग्निर्ज्योतिषं त्वा वायुमतीं प्राणवतीम् ॥ स्वर्ग्यꣳ स्वर्गायोपदधामि भास्वतीम् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ १ ॥ सूर्यर्ज्योतिषं त्वा वायुमतीं प्राणवतीम् ॥ स्वर्ग्यꣳ स्वर्गायोपदधामि भास्वतीम् ॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ २ ॥ १० a ॥ ३ ॥ १० b ॥ ४ ॥ इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः ॥ अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा ॥ अग्नयेऽन्नादायान्नपतये स्वाहा ॥ ५ ॥ अनमित्रं मेऽअधरादनमित्रमुदक्कृधि ॥ इन्द्रानमित्रं पश्चान्मेऽनमित्रं पुरस्कृधि ॥ ६ ॥ इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रोऽअस्मांऽअभि यातु विश्वतः ॥ इन्द्रो निघाꣳसतां मनाꣳसि

विषूचीना व्यस्यतात् ॥७॥ समिदसि समिद्धो मेऽअग्ने दीदिहि ॥ समिद्धा तेऽअग्ने दीयासम् ॥८॥१६॥

III. ॥ ११ ॥१॥ १२ ॥२॥ १३ [- दातारोऽइषाꣳ -] ॥३॥ १४ ॥४॥ १५ ॥५॥ १६ ॥६॥ १७ a. b. c ॥७॥ १७ d. १८ a - °धीमहि ॥८॥ १८ a वयस्वन्तो - - अदाभ्यम् ॥९॥ १८ b. १९ - स्तुतेन ॥१०॥ १९ सं प्रियेण - - ग्मिषीय । २० - - महो वो भक्षीय ॥११॥ २० ऊर्ज स्थो° - - °र्वो भक्षीय । रेवती रमध्वमस्मिन्योनाऽअस्मिन्गोष्ठेऽस्मिन्क्षये ऽस्मिंल्लोके ॥१२॥ इडैव स्तेतो मापगात । २२ a ॥१३॥ २२ b ॥१४॥ २३ ॥१५॥ २४ ॥१६॥ २५ ॥१७॥ २६ ॥१८॥ इलऽएह्यदितऽएहि । मयि वः कामधरणं भूयात् ॥१९॥ २८ ॥२०॥ २९ ॥२१॥ ३० ॥२२॥ ३१ ॥२३॥ ३२ ॥२४॥ ३३ ॥२५॥ ३४ ॥२६॥ ३५ ॥२७॥ ३६ [- दुलभो रथोऽस्मां ऽअश्नो°] । समिद्धो मा समर्धय प्रजया च धनेन च ॥२८॥४४॥

IV. ॥ ३७ a [°जाः प्रजया भूयासꣳ सु°] ॥१॥ ३७ b. c. ३८ - °वित्तमम् ॥२॥ ३८ अग्ने सम्राळभि - - °स्व । ३९ - °त्यः प्रजावान्वसुवित्तमः ॥३॥ ३९ अग्ने - - °स्व । ४१ - एमसि ॥४॥ ४१ ऊर्ज - मानः । ४२ - बृहः ॥५॥ ४२ गृहानु - °नतः । ४३ - °जावयः ॥६॥ ४३ अथो - शम्योः ॥७॥५१॥

V. ॥ ४४ ॥१॥ ४५ ॥२॥ ४६ [- मीलुषो -] ॥३॥ ४७ ॥४॥ ४८ ॥५॥५६॥

VI. ॥ ४९ ॥१॥ ५० [- दधौ । निहारं निहरामि ते निहारं निहरासि मे स्वाहा] ॥२॥५८॥

VII. ॥ ५१ ॥१॥ ५२ ॥२॥ ५३ [- न्वाङ्वामहे -] ॥३॥ ५४ ॥४॥ ५५ ॥५॥ ५६ ॥६॥६४॥

VIII. ॥ ५७ ॥१॥ ५८ ॥२॥ ५९ [-सुगं मेषाय -] ॥३॥ ६० a ॥४॥ ६० b

॥५॥ ६१ [एतेन रुद्रावसेन परो मू॰ - शिवः शान्तोऽतीहि] ॥६॥ ७०॥

IX. ॥ वाजिनां वाजोऽवतु भक्षोऽअस्मान्रेतः सिक्तममृतं वलाय । विश्वे देवा अभि यत्सम्बभूवुस्तन्मा धिनोतु प्रजया धनेन ॥१॥ वाज्यक्षं वाजिन-स्योपक्षत उपक्षतस्य भक्षयामि । वाजे वाजी भूयासम् ॥२॥ सवित्रा प्रसूता दैव्य आपऽउन्दन्तु [उन्दन्तु?] ते तन्वम् [तनूम् जठापाठे] ॥ दीर्घा-युत्वाय वर्चसे ॥३॥ कश्यपस्य त्र्यायुषं त्र्यायुषं जमदग्नेः । यद्देवानां त्रा-युषं तन्मेऽअस्तु त्र्यायुषम् ॥४॥ येन धाता वृहस्पतेरिन्द्रस्य चायुषेऽव-पत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥५॥ दीर्घायुत्वाय बलाय वर्चसे । सुप्रजास्त्वाय चासा [च । असौ जठापाठे]ऽअथो जीव श-रदः शतम् ॥६॥७६॥ नवानुवाकेषु षट्सप्ततिः ॥ ॥

इति काण्वशाखायां संहितापाठे तृतीयोऽध्यायः ॥ ॥

I. a. एदमगन्म देवयजनं पृथिव्या यत्र देवासोऽअजुषन्त विश्वे ।

b. ऋक्सामाभ्यां संतरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ।

c. इमा आपः शमु मे सन्तु देवीः ।

d. ओषधे त्रायस्व । e. स्वधिते मैनꣳ हिꣳसीः ॥१॥

लक्ष्मीं नरहरिं वन्दे नीलकण्ठं त्रिलोचनम् ।
यो वेदार्थं स्मृतौ भक्तं वेदयेत्करुणाकरः ॥(1.)॥

आधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यमन्त्रास्तृतीयाध्याये [कं॰ १-८. १-१०. ११-४३. ४४-६३] प्रोक्ताः । चतुर्थाध्यायमारभ्याष्टमस्य द्वात्रिंशत्कण्डिकापर्यन्तमग्निष्टोम-मन्त्रा उच्यन्ते । तेषां प्रजापतिर्ऋषिः । तत्र चतुर्थे यजमानसंस्कारपूर्वकं सोमक्रय-मन्त्राः प्राधान्येनोच्यन्ते तत्रादौ यजमानः षोडशर्त्विजो वृत्वारण्योरग्नी समारोप्य शालां गच्छेत् ॥ तथा च का॰ [७.१.३६.] समारोह्याग्नी शालास्तम्भं पूर्वार्द्धे गृही-त्वारणिपाणिरद्भिदमगन्मेति । द्वे अत्यष्टी अवसाने । तयोः कण्डिकयोः सप्त

मन्त्राः । आद्यावर्धचौ देवयजनदेवत्यौ ॥ आ इदमगन्मेति पदानि । व्यवहिताश्चेति [पा° १. ४. ८२.] उपसर्गक्रियापदयोर्व्यवधानम् । इदमिति हस्तेन प्रदर्श्यते । वयमिदं पृथिव्याः सम्बन्धि देवयजनं देवा इज्यन्ते यस्मिन्तद्देवयजनं स्थानमा अगन्म आगताः स्मः । गङ्तेर्लङुत्तमबहुवचने व्यत्ययेन शपो लुकि मो नो धातोरिति [पा° ८. २. ६४.] मस्य नः । अडागमश्च । इदं किम् । यत्र देवयजने विश्वे देवासः सर्वे देवाः अजुषन्ताप्रीयन्त प्रीत्या स्थिता इत्यर्थः । किं च । वयं रायो धनस्य पोषेण पुष्ट्या इषा इष्यमाणेनान्नेन च समदेम मदी हर्षे । व्यत्ययेन शप् । हृष्टा भवेम । धनैरन्नैश्च तृप्येम किं कुर्वन्तः । ऋक्सामाभ्यामृक्सु साम च ऋक्सामे अचतुरिति [पा° ५. ४. ७७.] सूत्रेणाञ्चतो निपातः । ताभ्यां यजुर्भिश्च वेदत्रयगतमन्त्रैः संतरन्तः समुद्रवद्गम्भीरं सोमयागं समापयन्त इत्यर्थः ॥ का° [७. २. १.] दक्षिणां गोदानं वितार्योनत्तीमा आप इति । इमा आपः । आपो देवताः । इमा आपः शिरःस्नानोदाय सिच्यमाना एता आपो मे मम यज्ञमानस्य शमु । उ एवार्थे । शं सुखार्थमव्ययम् । शं सुखकारिण्य एव सन्तु भवन्तु । किम्भूता आपः । देवीः देव्यः दीव्यन्ति ताः देव्यः । द्योतना निर्मला इत्यर्थः ॥ का° [७. २. १०. ११.] यूपवत्कुशतरुणं क्षुरेण चाभिनिधाय क्षिणत्वेति । यथा पश्वर्थयूपस्य छेदे मन्त्रः एवमत्रापि तृणान्तर्धानं क्षुरस्थापनं च मन्त्रद्वयेन कर्तव्यमिति सूत्रार्थः । ओषधे । कुशतरुणं देवता । हे ओषधे कुशतरुण त्वं यजमानं त्रायस्व क्षुराद्रक्ष । स्वधिते । क्षुरो देवता हे स्वधिते क्षुर एनं यजमानं मा हिंसीः ॥ १ ॥

a. आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वꣳ हि रिप्रं प्रवहन्ति देवीः ।

b. उदिदाभ्यः शुचिरा पूत एमि ।

c. दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मां परिदधे भद्रं वर्ण पुष्यन् ॥ २ ॥

का° [७. २. १५.] आपोऽअस्मानिति स्नावेति । मातरः मिमते ता मातरो जगन्निर्माञ्यो मातृवत्पालयित्र्यो वा आपः अस्मान् कृतदीक्षान्यजमानान् शुन्धयन्तु

शुन्ध शुद्धौ शोधयतु द्यौरर्कमनिर्मितामपक्तिं निवारयन्वित्यर्थः । किं च घृतप्रुषः घृ क्षरणे ञिधर्ति क्षरति घृतं तेन क्षरितजलेन पुनन्तीति घृतप्रुषः जलदेवतास्ताश्च घृतेन क्षरितजलेन नोऽस्मान्पुनन्तु शुद्धान्कुर्वन्तु । किं च । देवीः द्योतमाना आपो विश्वं हि हि एवार्थः सर्वमेव रिप्रं पापं प्रवहन्ति प्रकर्षेणापनयन्तु । रपो रिप्रमिति पापनामनी भवत इति यास्कः [निरु° ४.२१.] ॥ का° [७.२.१५.] उदिदाभ्य इत्युत्क्रामत्युत्तरपूर्वार्धमिति । अद्भ्योऽध्यः उदेमि इत् इदेवार्थे उद्गृह्णाम्येव । जलान्निर्गृह्णामीत्यर्थः । किम्भूतोऽहं शुचिः शुद्धः स्नानेन । तथा आपूतः (1a.) समन्ताद्भावेनान्तरपि शुद्ध आचमनेन । शुचिरापूत इति शब्दाभ्यां स्नानाचमनाभ्यां बहिरन्तश्च शुद्धिरुक्ता ॥ का° [७.२.१६-१९.] क्षौमं वस्ते निष्पिटवै ब्रूयादक्षतं चेदद्भिरभ्युक्ष्य स्नातवस्त्रं वाऽमौत्रधौतं विचितकेशं (2.) प्रसारितदशं दीक्षातपसोरिति ॥ दीक्षातपसोः । वासो देवता । हे क्षौम वस्त्र त्वं दीक्षातपसोस्तनूरसि दीक्षा दीक्षणीयेष्टिः तप उपसदिष्टिः । दीक्षाभिमानिदेवतायास्तपोऽभिमानिदेवतायाश्च त्वं शरीरवत्प्रियमसि । तां दीक्षातपसोस्तनूं तद्देवताद्वयशरीरभूतां त्वामहं परिदधे धारयामि । किम्भूतां त्वां शिवां शग्मां द्वयोरपि शब्दयोः सुखवाचकत्वादत्यन्तसुखरूपां कोमलत्वात् । किम्भूतोऽहम् । भद्रं वर्ण पुष्यन् त्वत्परिधानेन कल्याणीं कान्तिं पुष्यन् ॥२॥

II. a. मह्नीनां पयोऽसि वर्चोदा असि वर्चो मे देहि ।

b. वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि ॥३॥

का° [७.२.३३.] शालां पूर्वेण तिष्ठन्नभ्यङ्क्ते कुशेषु नवनीतेन शीर्ष्णोऽध्यनुलोमꣳ सपादको मह्नीनां पयोऽसीति । प्राचीनशालापूर्वभागेषु कुशेषु स्थित्वा नवनीतं गृहीत्वा शिरस आरभ्य पादान्तं शरीराभ्यङ्गं कुर्यादिति सूत्रार्थः । मह्नीनां पयः । नवनीतमुच्यते हे नवनीत त्वं मह्नीनां गवां पयोऽसि । मह्नीति गोनामसु पठितम् [निघ° २.११.] । नवनीतस्य क्षीरजन्यत्वात्पयस्त्वोपचारः । वर्चोदा असि । वर्चो ददातीति वर्चोदाः । अतिस्निग्धत्वेन कान्तिप्रदमसि पुंस्त्वमार्षमतो मे मह्यं यजमानाय वर्चो देहि कान्तिं प्रयच्छ ॥ का° [७.२.३४.] वृत्रस्येत्यक्षावनक्ति

त्रिककुदाञ्जनिनाभविऽन्यदिति । त्रिककुत्पर्वताडुत्पन्नाञ्जनं लभ्यते चेत्तिनाद्विद्वयमङ्ग्यात्तद्भविऽन्यदप्यञ्जनं ग्राह्यमिति सूत्रार्थः । वृत्रस्य । अञ्जनं देवता । हे अञ्जन त्वं वृत्रस्यासुरस्य कनीनकोऽसि नेत्रमध्यगतकृष्णमण्डलरूपोऽसि । यत्र वाऽइन्द्रो वृत्रमहंस्तस्य यद्दध्यासीदित्यादिश्रुतिः [३.१.२.१२.] । तथा च तित्तिरिः । इन्द्रो वृत्रमहन् (3.) तस्य कनीनिका परापतत्तदेवाञ्जनमभवदिति । चक्षुर्दा असि कनीनिकारूपत्वात्त्वं दृष्टिप्रदोऽसि अतो मे मह्यं चक्षुर्देहि सम्यग्दृष्टिपाटवं प्रयच्छ ॥३॥

a. चित्पतिर्मा पुनातु । b. वाक्पतिर्मा पुनातु ।

c. देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥४॥

का° [७.३.१.] कुशपवित्रैः चित्पतिर्मेति पावयति सप्तभिः सप्तभिः प्रतिमन्त्रमच्छिद्रेणेति सर्वत्रेति । अच्छिद्रेणेति शेषस्त्रिष्वपि मन्त्रेष्वनुषज्यते । चित्पतिर्मा । चितां ज्ञानानां पतिश्चित्पतिर्मनोऽभिमानी देवो मा मां यजमानं पुनातु शोधयतु मनो वै चित्पतिरिति तित्तिरिवाक्यात् । यद्वा चित्पतिः प्रजापतिः प्रजापतिर्वै चित्पतिरिति श्रुतेः [३.१.२.२२.] । किं चाच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः किरणैः । वायुरच्छिद्रं पवित्रं शुद्धिहेतुत्वात् छिद्ररहितत्वाच्च यद्वादित्यमण्डलमच्छिद्रं पवित्रम् । असौ वाऽआदित्योऽच्छिद्रं पवित्रमिति श्रुतेः । हे पवित्रपते पवित्रान्शुद्धान्पाति पवित्रपतिस्तत्सम्बुद्धौ हे पवित्रपते शुद्धपालक ते पवित्रपूतस्य तव पवित्रेण पूर्वोक्तेन शुद्धस्य तस्य यजमानस्याभीष्टं भूयादिति शेषः । तदेव स्पष्टयति । यत्कामोऽहं पुने तत् शकेयम् यः कामो यस्य यत्कामः यद्वा यस्मिन्कामो यस्य स यत्कामः सोमयागानुष्ठाने कामवानहं पुने आत्मानं शोधयामि तत्सोमयागानुष्ठानं शक्तो भूयासम् । यज्ञानुष्ठानसामर्थ्यं मेऽस्त्वित्यर्थः ॥ वाक्पतिः वाचां पतिर्बृहस्पतिर्मा मां पुनातु ॥ सविता देवोऽन्तर्यामी मा मां पुनातु । एतन्मन्त्रद्वयं पूर्ववद्व्याख्येयम् ॥४॥

आ वो देवास ईमहे वामं प्रयत्यध्वरे ।
आ वो देवास आशिषो यज्ञियासो हवामहे ॥५॥

का° [७.३.६.] आ वो देवास इति वाचयतीति । अध्वर्युर्यजमानं वाचयति । दैवी अनुष्टुप् आशीः । हे देवासः देवाः वयं वो युष्मान्वामं वननीयं यज्ञफलमा ईमहे साकल्येन याचामहे । वन्यते भज्यतेऽसौ वामम् । वन सम्भक्तौ । मप्रत्ययः । ईमहे याचतिकर्मसु पठितः द्विकर्मकः [निघ° ३.१९.] । ह्वा सति अध्वरे अस्मदीये यज्ञे प्रयति प्रवर्तमाने सति प्रैतीति प्रयन् तस्मिन् प्रपूर्वादिणः शतरि रूपम् । किं च हे देवासो देवा वो युष्मान्वयं हवामहे आह्वयामः । किं कर्तुं यज्ञियासः । यज्ञस्येमा यज्ञिया यज्ञसम्बन्धिनीराशिषः फलानि आ आनेतुं समानेतुमित्यर्थः । उपसर्गेण धातुरर्थान्तर्तव्यः । यज्ञफलं प्राप्तुं युष्मानाह्वयाम इत्यर्थः ॥५॥

a. स्वाहा॑ यज्ञं॑ मनसः । b. स्वाहो॒रोर॒न्तरि॑क्षात् ।

c. स्वाहा॒ द्यावा॑पृथि॒वीभ्या॑म् । d. स्वाहा॑ वाता॒दार॑भे स्वाहा॑ ॥६॥

का° [७.३.७-१०.] स्वाहा यज्ञमित्यङ्गुलीरचते नानाहस्तयोरिवꣳ शेषं प्रतिमल्लं मुष्टी कृत्वा स्वाहेत्युक्त्वा वाग्यतोऽङ्गुष्ठौ तत्सहिते चोत्सृजतीति ॥ आद्यमल्लेण हस्तद्वयकनिष्ठिकाद्वयं संकोचयति एवमन्यत्रयेणान्याः । स्वाहा वातादारभेऽइत्युत्तमेन मुष्टिद्वयं कुर्यादिति सूत्रार्थः ॥ स्वाहा यज्ञम् । चतुर्णां यजुषां यज्ञो देवता । स्वाहाशब्दस्य निपातत्वेनानेकार्थत्वादुचिता अर्था ब्राह्मणानुसारेण ग्राह्याः । तथा हि । स्वाहा यज्ञं मनसः । मनस इति पञ्चमी तृतीयार्थे मनसा यज्ञं स्वाहा चित्तेन यज्ञमभिगच्छामि अत्र स्वाहाशब्दोऽभिगमनार्थः ॥ स्वाहोरोरन्तरिक्षात् । पञ्चमी सप्तम्यर्थे उरौ विस्तीर्णेऽन्तरिक्षे स्वाहा यज्ञ आश्रितः । स्वाहाशब्दो यज्ञार्थोऽतः प्रभृति ॥ स्वाहा द्यावापृथिवीभ्याम् । द्यावापृथिव्योः स्वाहा यज्ञः श्रितः (4.) । लोकत्रयव्यापी यज्ञ इत्यर्थः ॥ स्वाहा वातादारभे । वाताद्वायुप्रसादात्स्वाहा यज्ञमारभे प्रवर्तयामि । वायोः सर्वकर्मप्रवर्तकत्वात् ॥ स्वाहा यज्ञ एवं सिद्ध इति शेषः ॥६॥

III. a. आकू॑त्यै प्रयु॒जेऽग्नये॑ स्वाहा॑ । b. मे॒धायै॑ मन॑सेऽग्नये॑ स्वाहा॑ ।

c. दी॒क्षायै॒ तप॑सेऽग्नये॑ स्वाहा॑ । d. सर॑स्वत्यै पू॒ष्णेऽग्नये॑ स्वाहा॑ ।

e. आपो॑ देवीर्बृहतीर्विश्वशम्भुवो॒ द्यावा॑पृथिवीऽउरोऽअन्तरिक्ष ।

बृहस्पतये हविषा विधेम स्वाहा ॥७॥

अतः परं षडौद्भभणाहोममन्त्राः । चतुर्णामग्निर्देवता । का० [७.३.१६.] औद्भभणानि जुहोति स्थाल्याः स्रुवेणाकूत्याऽइति प्रतिमन्त्रमिति ॥ आकूत्यै प्रयुजेऽग्नये स्वाहा । अग्नये वह्निदेवाय स्वाहा सुहुतमिदमस्तु । किम्भूतायाग्नये आकूत्यै प्रयुजे । यज्ञं करिष्यामीत्येवंविधो मानसः संकल्प आकूतिः तस्यै तत्संपूर्त्यै प्रयुजे प्रयुङ्क्तेऽसौ प्रयुक् तस्मै । संकल्पसिद्धौ निर्विघ्नं प्रेरयते इत्यर्थः । इति प्रथमो मन्त्रः ॥ मेधायै मनसेऽग्नये स्वाहा । श्रुतयोर्मन्त्रतन्त्रयोर्धारणाशक्तिर्मेधा तत्सिद्ध्यर्थं मनसे मदीयमनोऽभिमानिनेऽग्नये स्वाहा सुहुतमस्तु । विद्याधारणाशक्तिर्हि मनसः स्वास्थ्ये सत्येव भवति । इति द्वितीयः ॥ जपति । दीक्षायै तपसेऽग्नये स्वाहा । व्रतनियमो दीक्षा तत्सिद्ध्यर्थं मदीयशारीरतपोऽभिमानिनेऽग्नये स्वाहा । नियमसंरक्षणं तपसैव भवति । ततस्तपोदात्रे इत्यर्थः । इति तृतीयः ॥ सरस्वत्यै पूष्णेऽग्नये स्वाहा । मन्त्रोच्चारणशक्तिः सरस्वती तत्सिद्ध्यर्थं पूष्णे पुष्णातीति पूषा तस्मै वागिन्द्रियपोषकायाग्नये हुतमस्तु । इति चतुर्थः ॥ आपो देवीः । लिङ्गोक्तदेवता विराट् यस्या एकादशाक्षरास्त्रयः पादाः सा विराट् । दशकास्त्रयो विराडेकादशका वेत्युक्तेः । अत्र प्रथमो द्वादशार्णस्तेनैकाधिका । हे आपः हे द्यावापृथिवी द्यावापृथिव्यौ हे उरो विस्तीर्ण अन्तरिक्ष युष्मभ्यं बृहस्पतये च हविषा विधेम हविर्दद्मः । द्वितीयार्थे तृतीया । विधतिर्दानकर्मा । स्वाहा सुहुतमस्तु । किम्भूता आपः । देवीः देव्यो द्योतमानाः बृहतीः बृहत्यः प्रभूताः उभयत्र पूर्वसवर्णः । विश्वशम्भुवः विश्वस्य जगतः शं सुखं भावयन्ति जनयन्ति वा विश्वशम्भुवः । इति पञ्चमो मन्त्रः ॥७॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥८॥

अथ षष्ठः । सवितृदेवत्यानुष्टुप् स्वस्त्यात्रेयदृषा । विश्वो मर्तः सर्वो मनुष्यो नेतुः फलप्रापकस्य देवस्य दानादिगुणयुक्तस्य सवितुः सख्यं सखिभावं वुरीत वृणुते प्रार्थयते । वृञ् वरणेऽस्माल्लिङि तङि प्रथमैकवचने (5.) व्यत्ययेन शपो

लुकि उदोष्यपूर्वस्येति [पा° ७. १. १०२.] ऋत उदादेशः । किं च विश्वः सर्वो जनो रायि धनाय इषुध्यति सवितारं प्रार्थयते । इषुध्यतिर्याच्ञाकर्मसु पठितः [निघ° ३. १९.] किं च द्युम्नं द्योततेर्यशो वान्नं वा तच्च वृणीत प्रार्थयते । किमर्थं पुष्यसे पोषाय स्वप्रजापालनाय । पुषिस्तुमर्थे असिप्रत्ययः । यः इत्थम्भूतः सविता तस्मै स्वाहा । इति षष्ठ-औद्भभणमन्त्रः । समाप्तास्ति ॥ ८ ॥

IV. a. ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः ।

b. शर्मासि शर्म मे यच्छ नमस्तेऽअस्तु मा मा हिꣳसीः ॥ १ ॥

का° [७. ३. २३.] कृष्णाजिनयोः संधिमालभत (6.) ऋक्सामयोरितीति ॥ कृष्णाजिने देवते । हे कृष्णाजिनगते शुक्लकृष्णरेखे युवामृक्सामयोः शिल्पे स्थः ऋगभिमानिसामाभिमानिदेवतयोः सम्बन्धिनी शिल्पे चातुर्ये तद्रूपे भवतः । यद्वै प्रतिरूपं तच्छिल्पमिति श्रुतेः [३. २. १. ५.] । ते वां तथाविधे युवामारभे अहं स्पृशामि ते मा पातं तथाविधे युवां मा मां पालयतम् । कियन्तं कालमिति चेत्तदाह । अस्य यज्ञस्य आ उदृचः उत्तमा चरमा ऋगुदक् तस्या उदृचः आ तत्पर्यन्तं पञ्चम्यपाङ्परिभिव्यि [पा° २. ३. १०.] पञ्चमी । एतद्यज्ञसमाप्तिपर्यन्तमित्यर्थः । ऋक्सामाभिमानिन्यौ देवते देवानां यज्ञार्थं स्थिते सत्यौ केनापि निमित्तेन कृष्णमृगरूपं कृत्वा देवेभ्यः पलाय्य दूरे कुत्राप्यतिष्ठतां तन्मृगचर्मणि यद्शुक्लं तदृचो रूपं यत्कृष्णं तत्साम्नो रूपम् । तदुक्तं तित्तिरिणा [६. १. ३.] । ऋक्सामे वै देवेभ्यो यज्ञार्थं तिष्ठमाने (6a.) कृष्णमृगरूपं कृत्वापक्रम्यातिष्ठतामेष वाऽऋचो वर्णो यच्छुक्लं कृष्णाजिनमस्यै साम्नो यत्कृष्णमिति ॥ का° [७. ३. २४.] दक्षिणजानुनारोहति शर्मासीति । हे कृष्णाजिन त्वं शर्म शरणमसि । अतो मे मह्यं शर्म शरणं यच्छ देहि । स्वकीयत्वेन स्वीकुर्वित्यर्थः । ते तुभ्यं कृष्णाजिनाय नमोऽस्तु मा मां यजमानं मा हिंसीः मा जहि ॥ १ ॥

a. ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि ।

b. सोमस्य नीविरसि । c. विष्णोः शर्मासि शर्म यजमानस्य ।

d. इन्द्रस्य योनिरसि । e. सुसस्याः कृषीस्कृधि ।

f. ऊर्ध्वस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योदृचः ॥ १० ॥

का° [७. ३. २६.] मेखलां बध्नीते वेणिं त्रिवृतꣳ शणमुञ्जमिश्रामन्तरां वाससꣳ ऊर्गसीति ॥ अङ्गिरोभिर्दृष्टं मेखलं (7.) यजुः । हे मेखले त्वमाङ्गिरसी अङ्गिरोनामकानामृषीणां सम्बन्धिनी ऊर्क् अन्नरसरूपासि किम्भूता ऊर्णाम्रदाः ऊर्णेव म्रदीयसी (8.) कम्बलवन्मृदुरसि । तथाविधा त्वमूर्जमन्नरसं मयि धेहि स्थापय । अङ्गिरसः स्वर्गं लोकं गच्छतोऽन्नरसं व्यभजन्त विभज्यमानेऽवशिष्टोऽन्नरसो भूमौ पतितः शणमुञ्जनामकतृणरूपेणाविर्भूतस्तस्माच्छणमुञ्जमयी मेखला अत एव मेखलाया आङ्गिरसत्वमिति तित्तिरिणा प्रत्यपादि ॥ का° [७. ३. २७.] नीविं कुरुते सोमस्य नीविरिति । हे मेखले त्वं सोमस्य नीविरसि सोमदेवतायाः प्रियभूता ग्रन्थिरसि । मूलाग्रयोरेकीकरणेन ग्रन्थिविशेषो नीविरुच्यते । अदीक्षितस्य पितृदेवत्या नीविरुक्ता दीक्षितस्य तु सोमयागाय (9.) नीविः सोमेन व्यपदिश्यते । का° [७. ३. २८.] शिरः प्रोर्णुते विष्णोः शर्मेति । हे वस्त्र त्वं विष्णोः व्यापकस्य यज्ञस्य शर्मासि सुखहेतुर्भवसि अतो यजमानस्य शर्म सुखं कुर्विति शेषः ॥ का° [७. ३. २९-३१.] कृष्णविषाणां त्रिवलिं पञ्चवलिं (10.) वोत्तानां दशायां वधीते तया कण्डूयनमुपस्पृशत्येनया दक्षिणास्या भ्रुव उपरीन्द्रस्य योनिरितीति । हे कृष्णविषाणे त्वं यथा पूर्वमिन्द्रस्य योनिरसि तथेदानीं यजमानस्य स्थानं भवेति शेषः । पुरा कदाचिद्यज्ञपुरुषो दक्षिणां देवीं समभवत्तस्मात्सम्भावनादिन्द्रोऽजायत तदानीमन्यान्योत्पत्तिर्मा भूदिति विचार्येन्द्रः स्वां योनिं दक्षिणाया आक्षिप्य मृगेषु न्यदधात् निक्षिप्ता सा योनिः कृष्णविषाणाभूदिति तित्तिरिश्रुतौ यज्ञो दक्षिणामभ्यधादित्याख्याने कथा तस्मात्कृष्णविषाणाया इन्द्रयोनित्वम् ॥ का° [७. ३. ३२.] भूमौ चोल्लिखति सुसस्या इतीति । हे कृष्णविषाणे त्वं कृषीः सुसस्याः कृधि । कुरु करोतेः शपि लुप्ते श्रुशृणुपृकृत्यादिना [पा° ६. ४. १०२.] हेर्धिः । शोभनं सस्यं यासु ताः सुसस्याः सस्यं व्रीह्यियवादि । तदर्थो भूम्युल्लेखः कृषिः यजमानानां कृषयः सन्ति ताः सर्वाः शोभनधान्याः कर्वित्यर्थः ॥ का° [७. ४. १. २.] मुखसंमितमौडुम्बरं दण्डं प्रयच्छत्युज्झयस्वेत्येनमुज्झयतीति । दण्डो देवता । हे वनस्पते वृक्षावयव दण्ड उज्झयस्व उन्नतो भव । ऊर्ध्वो भूत्वा अंहसः पापात् मा मां पाहि रक्ष तत्र कालावधिरुच्यते । अस्यानुष्ठीयमानस्य यज्ञस्य उदृचः उक्तमायाः समाप्तिगतायाः ऋचः आ तदुत्कर्षपर्यन्तमित्यर्थः॥१०॥

V. a. व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ।

b. दैवीं धियं मनामहे सुमृडीकामभिष्टये
वर्चोधां यज्ञवाहसꣳ सुतीर्था नोऽअसद्वशे ।

c. ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः
स्वाहा ॥ ११ ॥

का° [७.४.१५.] व्रतं कृणुतेति वाग्विसर्जनं त्रिरुक्तेति । मौनोपस्थितस्य (11.) यजमानस्यैतन्मन्त्रोच्चारणं वाग्विसर्जनसाधनम् । हे परिचारका व्रतं कृणुत दोहनादिना क्षीरं संपादयत । दीक्षितस्य भोजनाय यन्त्रियतं पयस्तद्व्रतमित्युच्यते । वाक्यावृत्तिरादरार्था ॥ का° [७.४.१५.] अग्निर्ब्रह्मेति च सकृदिति । एतमपि मन्त्रं सकृत्पठेत् । अग्निर्ब्रह्म ब्रह्मशब्देन वेदत्रयमभिधीयते तस्य वेदत्रयस्याग्नित्वमुपचर्यते । आधानेन निष्पन्नस्य वैदिकस्याग्नेर्वेदव्यतिरेकेणासम्भवात् । तस्मादयं श्रौतोऽग्निर्ब्रह्मैव वेदरूप एव ॥ अयमग्निर्यज्ञः तस्य अग्नेर्यज्ञसाधनत्वाद्यज्ञत्वमुपचर्यतेऽग्निर्यज्ञ एवेति ॥ वनस्पतिः । यज्ञियः यज्ञयोग्यो यो वनस्पतिः खादिरादिः सोऽपि यज्ञ इत्यनुवर्तते वनस्पतेर्यज्ञसाधनत्वाद्यज्ञत्वम् । तथा च श्रुतिः [३.२.२.९.] । न हि मनुष्या यज्ञियन्यग्रोधनस्पतयो न स्युरिति ॥ का° [७.४.३२.] दैवीं धियमिति व्रतायोपस्पर्शनꣳ स्वासनऽइति । शक्वरी अतिशक्वरी वा । पूर्वार्धेनाचमनम् । वयं धियं मनामहे यज्ञानुष्ठानविषयां बुद्धिं याचामहे । मनामहऽइति याज्ञाकर्ममु पठितः [निघ° ३.११.] । किमर्थमभिष्टये अभि समन्ताद्यजनमभिष्टिः । अभिपूर्वस्य यजतेः क्तिनि आदिर्लोपः । अभिमुखत्वेन प्राप्तस्य यज्ञस्य सिद्ध्यर्थम् । किम्भूतां धियं दैवीं देवसम्बन्धिनीं देवतोद्देशेन प्रवृत्तामित्यर्थः । तथा सुमृडीकाम् सुष्ठु मृडयति सुमृडीका ताम् शोभनसुखहेतुम् । तथा वर्चोधां वर्चो दधाति वर्चोधास्तां तेजसो धारयित्रीम् । तथा यज्ञवाहसम् यज्ञं वहति यज्ञवाहास्तां यज्ञनिर्वाहकर्त्रीम् । तथाविधा धीः सुतीर्था सुखेन तरीतुं प्राप्तुं शक्या सुतीर्था यद्वा सुष्ठु तीर्थमवतरणमार्गो यस्यां सा । एवंविधा सती नो वशे असत् अस्माकमधीनत्वे भवतु ॥ का° [७.४.३३.] ये देवा इति व्रतयत्यमृन्मयऽइति । ये देवा ईदृशाः दीव्यन्ति

द्योतन्ते तऽइति देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः । वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वे देवा इति [३.२.२.१३.] श्रुत्युक्ताः । किम्भूताः मनोज्ञाताः दर्शनश्रवणादीक्षारूपान्मनस उत्पन्नाः इक्षोत्पत्तौ तेषां प्रवर्तमानत्वात् । तथा मनोयुज्ञः रूपादिदर्शनकालेऽपि मनसा युक्ता एव वर्तन्ते । अन्यमनस्कस्य रूपादिप्रतिभासाभावात् । यद्वा स्वप्नावस्थायां मनसा युज्यन्ते ते मनोयुज्ञः । तथा दक्षक्रतवः दक्षाः कुशलाः क्रतवः संकल्पाः येषां ते संकल्पितार्थकारिण इत्यर्थः । ते देवा नोऽस्मानवन्तु यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु तेभ्यः प्राणरूपेभ्यः देवेभ्यः स्वाहा इदं क्षीरं हुतमस्तु ॥११॥

श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः ।
ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ॥१२॥

का° [७.४.३५.] श्वात्राः पीता इति नाभिमालभतऽइति । अष्टेवत्या जगती । हे आपः क्षीररूपा यूयं मया पीताः सत्यः श्वात्राः क्षिप्रपरिणामाः शीघ्रं जीर्णा भवत । श्वात्रमिति क्षिप्रनामाशु अतनं भवतीति यास्कः [निरु° ५.३.] । किं च अस्माकं पीतवतामन्तरुदरे जलपाकस्थाने सुशेवाः शोभनसुखाः भवतेत्यनुवर्तते । सुष्ठु शेवं याभ्यस्ताः । शेवमिति सुखनाम [निघ° ३.६.] । किं च । तास्तथाविधा आप अस्मभ्यमस्मदुपकारार्थं स्वदन्तु स्वादुत्वयुक्ता भवन्तु किम्भूतास्ताः । अयक्ष्माः प्रबलरोगराजरहिताः । अनमीवाः सामान्यरोगनिवर्तिकाः । नास्त्यमीवा याभ्यः । अनागसः नास्त्यागो याभ्यः अपराधहारिण्यः । ऋतावृधः ऋतं वर्धयन्ति ऋतवृधः संहितायां ऋतस्य दीर्घः । यज्ञवृद्धिहेतवः । देवीः देव्यो द्योतमानाः । अमृताः नास्ति मृतं याभ्यः मरणनिवर्तिकाः ॥ यद्वायमर्थः । ता इति द्वितीयाबहुवचनं । अमृताः अमरणधर्मिणो देवाः पूर्वोक्ताः प्राणा वागादयस्ता अपः स्वदन्तु आस्वादयन्तु । कीदृशीः अस्मभ्यमयक्ष्माः अस्मदर्थमस्माकं वा यक्ष्मनाशिनीः । शेषं पूर्ववत् ॥१२॥

a. इयं ते यज्ञिया तनूः ।
b. अपो मुञ्चामि न प्रजाम् । अऽश्लोमुचः स्वाहाकृताः पृथिवीमाविशत ।

c. पृथिव्या सम्भव ॥ १३ ॥

का° [७.४.३६.] मेक्ष्यन्कृष्णविषाणया लोष्टं किंचिद्गादत्तञ्ज्ञेयं तञ्ज्ञेति । मूत्रं करिष्यन्मृङ्गेण लोष्टं किंचित्तृणादिकं वा गृह्णातीति सूत्रार्थः । हे यज्ञपुरुष इयं पृथिवी ते तव यज्ञिया तनूः यज्ञयोग्यो देशः । अतोऽस्या मूत्रोपहतिपरिहाराय व्यवधानं कर्तुं लोष्टं तृणं वा स्वीकरोमीति भावः । यद्वा पृथिवीं प्रत्युच्यते । हे पृथिवि इयं लोष्टरूपा ते तव यज्ञार्हा तनूस्तामाददञ्ज्ञेति शेषः ॥ का° [७.४.३७.] अपो मुञ्चामीति मेक्षतीति । अपो मूत्ररूपा अहं मुञ्चामि न प्रजां प्रजोत्पत्तिनिमित्तं रेतो न मुञ्चामि । अतो हे आपो मूत्राख्या यूयं पृथिवीमाविशत प्रविशत । किम्भूताः । अंहोमुचः अंहसः पापान्मुञ्चन्ति पुरुषं पृथक्कुर्वन्तीत्यर्थः । तथा स्वाहाकृताः पूर्वं क्षीरपानकाले स्वाहेति मन्त्रेण स्वीकृताः । यद्वा स्वाहाकृताः सत्यो (12.) भूमिमाविशत । का° [७.४.३८.] पृथिव्या सम्भवेत्याह निदधातीति । गृहीतलोष्टादिकं मूत्रस्थाने क्षिपेत् । हे लोष्टादिक पृथिव्या सह त्वं सम्भव एकीभव ॥ १३ ॥

अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि ।
रक्षा णोऽअप्रयुछन्प्रबुधे नः पुनस्कृधि ॥ १४ ॥

का° [७.४.३९.] अग्ने त्वमित्युक्त्वा स्वपित्यधः प्राङ्दक्षिणात इति । अनुष्टुबाग्नेयी । हे अग्ने त्वं सु जागृहि सुष्ठु निद्ररहितो भव । वयं यजमानाः सु मन्दिषीमहि साधु स्वप्स्यामः । मदि मोदस्तुतिस्वप्नकान्तिगतिषु (13.) [धा° २.१२.] अत्र स्वप्नार्थः । आशीर्लिङ्युत्तमबहुवचने रूपम् । किं च । नोऽस्मान्रक्ष किं कुर्वन्नप्रयुछन् । युछ प्रमादे । अप्रमाद्यन् । व्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः । नश्च धातुस्थोरुषुभ्य इति [पा° ८.४.२७.] नेः इत्यस्य णत्वम् । नो अप्रयुछन्नित्यत्र एङः पदान्तादतीति [पा° ६.१.१०९.] पूर्वरूपे प्राप्ते प्रकृत्यान्तःपादमव्यपरञ्ज्ञेति [पा° ६.१.११५.] प्रकृतिभावः । किं च अग्ने नोऽस्मान्पुनः प्रबुधे प्रबोधाय कृधि कुरु प्रबोधनं प्रभुत्वस्थे प्रबुधे संपदादित्वाद्भावे क्विप् । स्वपतोऽग्नेः प्रार्थनं रक्षसां नाशाय । तदुक्तं तित्तिरिणा । अग्निमेवाधिपं कृत्वा स्वपिति रक्षसामपहत्याञ्ज्ञेति ॥ १४ ॥

पुनर्मनः पुनरायुर्म आगन्पुनःप्राणः पुनरात्मा म आगन्पुनश्चक्षुः पुनः श्रोत्रं म आगन् ।

वैश्वानरोऽअदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात् ॥ १५ ॥

का° [७. ४. ४०.] विबुद्धमस्वप्स्यन्तं पुनर्मन इति वाचयतीति । मे मम यज्ञमानस्य मनः पुनरागन् सुप्तिकाले विलीय पुनरिदानीं शरीरे समागतम् । गमेर्लङि शपि लुप्ते हलन्ताच्च्लेः सिच इति [पा° ६. १. ६८.] प्रत्ययलोपे मकारस्य नकारे प्रथमैकवचने आगन्निति रूपम् । किं च स्वापकाले मे मदीयमायुर्नष्टप्रायं भूत्वा पुनरागन् इदानीं पुनरुत्पन्नमिवासीत् तथा मे प्राणो वायुः पुनरागन् तथा मे आत्मा जीवः पुनरागत्तथा मे चक्षुः पुनरागत्तथा मे श्रोत्रं श्रवणेन्द्रियं पुनरागन् । सर्वे ह वाऽएते स्वपतोऽपक्रामन्तीति श्रुतेः [३. २. २. २३.] स्वापकाले मनआदीनामपक्रमो भवति । तेषां पुनर्यथास्थानमागमनं प्रार्थ्यते । एवं सर्वेन्द्रियेषु समागतेषु अयमग्निः अवद्यात् वदितुमयोग्यात् (14.) निन्दितात् दुरितात्पापात् नोऽस्मान्पातु पालयतु । यद्वा अवद्यात् दुर्यशसो दुरितात्पापाच्च पातु । किम्भूतोऽग्निः । वैश्वानरः विश्वेभ्यो नरेभ्यो हितः । सर्वपुरुषोपकारकः । नरे संज्ञायामिति [पा° ६. ३. १२१.] पूर्वपददीर्घः । अदब्धः केनाप्यहिंसितः तनूपाः तनूं पातीति अस्मदीयशरीरपालकः ॥ १५ ॥

a. त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा त्वं यज्ञेष्वीड्यः ।

b. रास्वेयत्सोमा भूर्यो भर देवो नः सविता वसोर्दाता वस्वदात् ॥ १६ ॥

का° [७. ५. १. २.] त्वमग्न इत्याह क्रुद्धाव्रत्यं वा व्याहृत्येति । दीक्षितो यदा क्रुध्यति व्रतविरुद्धं वा ब्रूते तदा त्वमग्न इत्यृचं जपेत् । गायत्र्याग्नेयी वत्सदृष्टा । व्यूहेनाक्षरपूरणम् । हे अग्ने देवो द्योतनात्मकः त्वमा मर्त्येषु मनुष्यपर्यन्तेषु सर्वप्राणिषु व्रतपा असि व्रतस्य कर्मणः पालको भवसि । तथा आ समन्ताद्यज्ञेषु त्वमीड्योऽसि । ईडिर्ध्येषणकर्मा पूजाकर्मा चेति यास्कः (15.) । याचितव्यः पूजयितव्यो वा भवसि । अतः पाह्वीति शेषः । यद्वा आकारद्वयं समुच्चयार्थं देवे इति सप्तम्यन्तं पदं हे अग्ने त्वं देवे आ देवेषु च मर्त्येषु आ मनुष्येषु च व्र-

तया असीति शेषं पूर्ववत् ॥ का° [७.५.१६.] लब्धमालम्भ्य वाचयति रास्वेयदिति । क्रतौ प्राप्तं धनं स्पृष्ट्वा मन्त्रं पठेत् । रास्व । सोमदेवत्यं यजुः । हे सोम इयद्रास्व एतावद्धनं देहि भूयः पुनरपि आभर धनं आहर । व्यत्ययोरिति [पा° ८.२.३२. वा° १.] भकारः । यतो वसोर्धनस्य दाता सविता देवो नोऽस्मभ्यं वसु अदात् पूर्वमपि धनं दत्तवान् ॥ १६ ॥

VI. a. एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव आज्यं गह ।

b. जूरसि धृता मनसा जुष्टा विष्णवे ॥ १७ ॥

का° [७.६.७.८.] शाल्माद्वाराण्यपिधाय ध्रौवं जुह्वां चतुर्विगृह्णाति बर्हिस्तृणेन हिरण्यं बद्ध्वावदधात्येषा तऽइतीति । ध्रुवास्थमाज्यं जुह्वां चतुर्गृहीत्वा तत्राज्ये दर्भतृणबद्धं स्वर्णं क्षिपेदिति सूत्रार्थः ॥ एषा ते । हिरण्याज्यदेवतम् । हे शुक्र शुक्ल दीप्यमानाग्ने ते तव एषा तनूः दृश्यमानमाज्यं शरीरम् । एतत् आज्ये प्रक्षिप्यमाणं हिरण्यं ते वर्चः त्वदीयं तेजः । तया सम्भव आज्यरूपया तन्वा एकीभव । ततो आज्यं गह आज्य दीप्तौ हिरण्यगतां दीप्तिं प्राप्नुहि । एतन्मन्त्रपाठेनाग्नेः सतेजस्त्वं सतनूत्वं च संपद्यते । तदुक्तं तित्तिरिणा । सतेजसमेवैनं सतनुं करोतीति । यद्वायमर्थः । हे शुक्र आज्य एषा हिरण्यलक्षणा ते तनूः एतत्ते वर्चश्च । समानजन्म वै पयश्च हिरण्यं चोभयं ह्यग्नेरितसमिति श्रुतेः [३.२.४.८.] । तया हिरण्यलक्षणया तन्वा सम्भव एकीभूय आज्यं सोमं गह । आज्यतेऽसौ आट् तम् । सोमो वै आडिति [३.२.४.१.] श्रुतेः । का° [७.६.१.] जूरसीति जुहोतीति । वाग्देवतम् । हे वाक् त्वं जूरसि वेगयुक्तासि । यद्वा जीव प्राणधारणे । जीवयतीतिजूः । डूप्रत्ययः । किम्भूता त्वं मनसा धृता नियमिता । तथा विष्णवे जुष्टा यज्ञो वै विष्णुः । यज्ञार्थं प्रीतियुक्ता । यद्वा षष्ठ्यर्थे चतुर्थी । यज्ञस्य रुचिता ॥ १७ ॥

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्मशीय स्वाहा ।

c. शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥ १८ ॥

सत्यं सवो यस्याः सा सत्यसवाः तस्याः सत्यसवसोऽवितयाभ्यनुज्ञायास्तस्यास्ते तथाविधायास्तव वाचः प्रसवेऽनुज्ञायां वर्तमानोऽहं तन्वः शरीरस्य यन्मं

नियमनं दार्ढ्यमशीय प्राप्नुयाम् । स्वाहा इदमाज्यं हुतमस्तु ॥ का° [७.६.१०.] शुक्रमसीति हिरण्यमुद्धृत्य वेद्यां तृणं निदधातीति । स्रुक्वां बद्ध्वा स्थापितं हिरण्यमुद्धरेत । शुक्रमसि । हिरण्यं देवता । हे हिरण्य त्वं शुक्रमसि शोचते शुक्रम् । शुच दीप्तौ । दीप्यमानमसि । तथा चन्द्रमाह्लादकमसि । चदि आह्लादने । चन्दतीति चन्द्रम् । अमृतं विनाशरहितमसि । अग्निसंयोगेऽपि हिरण्यस्य विनाशाभावः प्रसिद्धः । अग्नौ सुवर्णमक्षीणमिति याज्ञवल्क्योक्तेः । वैश्वदेवमसि । विश्वेषां देवानामिदं वैश्वदेवम् सर्वदेवसम्बन्धि । सर्वोऽपि देवो हिरण्यदानेन तुष्येत् ॥ १८ ॥

चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतःशीर्ष्णी । सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीताम्पूषाध्वनस्पात्विन्द्रायाध्यक्षाय ॥ १९ ॥

का° [७.६.१५.] चिदसीत्येनामभिमन्त्रयतऽइति । कण्डिकाद्वयेन एनां सोमक्रयणीमित्यर्थः । वाग्रूपाध्यारोपकल्पनया सोमक्रयणी गौः स्तूयते । हे वाग्देवतारूपे सोमक्रयणि त्वं चिदसि मनासि धीरसि । अन्तःकरणास्य चित्तमनोबुद्धय इति तिस्रो वृत्तयः । तल्लक्षणानि । अचेतनदेहादिसंघातस्य चेतनत्वं संपादयन्ती वाक्यवस्तुषु वा निर्विकल्परूपं सामान्यज्ञानं जनयन्ती वृत्तिश्चित्तं तदेवात्र चिदित्युच्यते । लोके कंचित्पदार्थं दृष्ट्वा एवं भवति न वेति संकल्पविकल्पौ कुर्वाणा वृत्तिर्मनः तदेवात्र मनेत्युच्यते । इदमित्थं भवत्येवेति निश्चयरूपा वृत्तिर्बुद्धिः सैवात्र धीशब्देनोच्यते । वागात्मिका सोमक्रयणी चिन्मनोधीरूपत्वेन प्रशस्यते । चिदादिरूपत्वमारोप्य स्तुतिः कृता । दक्षिणादिरूपत्वं तु विद्यमानमेव स्तूयते । हे गौः त्वं दक्षिणासि । गवां देयद्रव्यत्वेन कर्मसु दक्षिणात्वं प्रसिद्धम् । यद्वा वाग्दानस्य (16.) प्रशस्तत्वाद्दक्षिणासि । भूमिदानात्परं नास्ति विद्यादानं ततोऽधिकमिति स्मृतेः । तथा क्षत्रियासि । सोमक्रयसाधनत्वेन । तथा हि । देवेषु क्षत्रजात्यभिमानी सोमः । तदुक्तं बृहदारण्यके [माध्य° १.२.१३. काण्व° १.४.११.] यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्र इति । तेन सोमेन क्षत्रेणाभिम-

त्तव्यस्य सोमलताद्रव्यस्य क्रयहेतुत्वेन त्वं क्षत्रियासि । तद्रूपं चास्याः क्रयद्वारा तत्सम्बन्धित्वादुपचर्यते । अत एव यज्ञसम्बन्धित्वाद्यज्ञिया यज्ञार्हासि । अदितिः अखण्डिता अदीना देवमातृरूपासि । नास्ति दितिर्यस्याः सा । अदितिरदीना देवमातेति यास्कः [निरु° ४.२२.] । तथा उभयतःशीर्ष्णी । उभयतः शीर्षे यस्याः सा । ज्योतिष्टोमस्याग्नेयस्योः प्रायणीयोदयनीययोः शीर्षत्वम् । द्वे शीर्षे प्रायणीयोदयनीये ऽइति यास्कोक्तेः [निरु° १३.७.] । यद्वोभयतःशीर्ष्णी सर्वतोमुखी वायूपत्वात् । स यदेनया समानं सद्विपर्यासं वदतीति [३.२.४.१६.] श्रुतेः । सा पूर्वोक्ता चिदादिरूपा त्वं नोऽस्मदर्थे सुप्राची सुप्रतीची च एधि भव । सुष्ठु प्राङ्क्षति सुप्राची । सुष्ठु प्रत्यङ्क्षति सुप्रतीची । प्रथमं सोमस्य क्रेतारं प्रति सुष्ठु प्राङ्मुखी भूत्वा पश्चात्सोमेन सहास्मान्प्रत्यागन्तुं सुष्ठु प्रत्यङ्मुखी भवेत्यर्थः । तथा च श्रुतिः [३.२.४.१७.] । सुप्राची न एधि सोमं नोऽहेहीत्येवैतदाह सुप्रतीची न एधि सोमेन नः सह पुनरेहीत्येवैतदाहेति । किंच मित्रः सूर्यः पदि दक्षिणपादे त्वा त्वां बध्नीतां बन्धनं करोतु अप्रणाशाय । तथा पूषा पोषको देवः सूर्य एवाधनो मार्गात्पातु (17.) त्वां रक्षतु । यद्वा पूषेत्यावृत्तं स्त्रीलिङ्गं पदम् पूषा पृथिवी त्वां मार्गात्पातु (18.) इयं वै पृथिवी पूषेति [३.२.४.१९.] श्रुतेः । किमर्थमिन्द्राय इन्द्रप्रीत्यर्थं किम्भूतायेन्द्राय अधक्षाय अधि उपरि अक्षिणी यस्य सोऽधक्षस्तस्मै । द्रष्ट्रे यज्ञस्वामिने इत्यर्थः ॥ १९ ॥

अनु॑ त्वा मा॒ता म॑न्यता॒मनु॑ पि॒तानु॒ भ्रातो॒ सग॑र्भ्यो॒ऽनु॒ सखा॒ सयू॑थ्यः ॥
सा दे॑वि दे॒वमच्छे॒हीन्द्रा॑य॒ सोम॑ रु॒द्रस्त्वावर्तयतु॒ स्वस्ति॑ सो॒मसखा॒ पुन॒रेहि॑ ॥ २० ॥

किं च । सोमाहरणे प्रवृत्तां त्वां माता त्वदीया जननी अनुमन्यतामनुज्ञां ददातु । पितानुमन्यताम् । उपसर्गावृत्त्या क्रियापदावृत्तिः । सगर्भ्यः समाने गर्भे भवः सहोदरो भ्रातानुमन्यताम् । समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषिति [पा° ६.३.८४.] समानपदस्य सादेशः । सयूथ्यः समाने एकस्मिन्यूथे गोसमूहे भवः सयूथ्यः सखा वत्सोऽनुमन्यताम् ॥ हे देवि सोमक्रयणि सा त्वमिन्द्राय इन्द्रार्थं सोमं देवमच्छेहि प्राप्तुं गच्छ । अच्छेराप्तुमिति शाकपूणिः [निरु° ५.२८.] । किं च रुद्रः

त्वा त्वां वर्तयतु (18a.) सोमं गृहीत्वा स्थितां वां रुद्रो देवोऽस्मान्प्रति निवर्तयतु। यद्वा रुद्रः त्वां प्रवर्तयतु। यतो रुद्राज्ञां नातिक्रामन्ति पशवः। सोमो देवः सखा यस्याः सा सोमसखा। ईदृशी सोमसहिता सती स्वस्ति क्षेमेण पुनरेहि भूयोऽप्यागच्छ ॥२०॥

VII. वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि।
बृहस्पतिष्ट्वा सुम्ने रमणातु रुद्रो वसुभिराचक्रे ॥२१॥

का° [७.६.१६.] उदीचीं नीयमानामनुगच्छतो वस्व्यसीतीति ॥ अनुष्टुब्बृहती वा। सोमक्रयण्याः स्तुतिः। सोमक्रयणी गौर्वस्वदित्यादित्यरुद्रचन्द्ररूपेण स्तूयते वस्वीत्यादिपञ्चविशेषणैः। हे गौः त्वं वस्वी वसुरूपासि। अदितिर्देवमातासि। द्वादशादित्यरूपासि। रुद्रा एकादशरुद्ररूपासि। चन्द्ररूपा चासि। किं च बृहस्पतिः सुम्ने त्वां रमणातु रमयतु। रमतेर्व्यत्ययेन श्नाप्रत्ययः। यद्वा रमणातु संयमयतु। रमणातिः संयमनकर्मा विसर्जनकर्मा वेति यास्कः [निरु° १०.१.]। रुद्रो वसुभिः अष्टदेवैः सहितः त्वामाचक्रे रक्षितुं कामयताम्। आचक्रेऽइति चकमान इति कान्तिकर्मसु पठितः [निघ° २.६.] ॥२१॥

a. अदित्यास्त्वा मूर्धन्नाजिघर्मि देवयजने पृथिव्या इडायास्पदमसि घृतवत्स्वाहा। b. अस्मे रमस्व। c. अस्मे ते बन्धुः। d. त्वे रायः। e. मे रायः। f. मा वयं रायस्पोषेण वियौष्म। g. तोतो रायः ॥२२॥

का° [७.६.१७.१८.] षट्पदान्यतीत्य सप्तमं पर्युपविशन्ति हिरण्यमस्मिन्निधायाभिजुहोत्यदित्यास्त्वेतीति। आज्यदेवतं यजुः। अदित्याः अखण्डितायाः पृथिव्याः भुवो मूर्धन्मूर्धनि शिरोरूपे देवयजने देवानां यागयोग्यस्थाने हे आज्य त्वा त्वामाजिघर्मि आज्ञारयामि। घृ क्षरणदीप्त्योः। पृथिव्या एष मूर्धा यद्देवयजनमिति तित्तिरिश्रुतिर्देवयजनस्य पृथिवीमूर्धत्वम्। किं च हे स्थानविशेष त्वमिडायाः गोः पदमसि गोपदेनाङ्कितत्वात्तद्रूपमसि तच्च पदं घृतवत् घृतयुक्तं कर्तुं स्वाहा जुहोमि ॥ का° [७.६.१९.] स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेति। हे गोः

पद् त्वमस्मे अस्मासु रमस्व क्रीडां कुरु ॥ का॰ [७.६.२०.] समुद्धृत्य पद७ स्थाल्या-मावपत्यस्मे ते बन्धुरिति । हे सोमक्रयणीपद् ते तव अस्मे बन्धुः वयं बन्धुभूताः स्मः । सुपां सुलुगिति [पा॰ ७.१.३९.] ङसः शेआदेशे अस्मे इति रूपम् ॥ का॰ [७.६.२१.] यजमानाय पदं प्रयच्छति त्वे राय इति । हे यजमान त्वे त्वयि रायो धनानि एतत्पदरूपेण तिष्ठन्त्विति शेषः । यद्वात्र रायः पशवः । पशवो वै राय इति श्रुतेः [३.३.१.८.] । त्वयि पशवः सन्तु ॥ का॰ [७.६.२२.] मे राय इति यजमानः प्रतिगृह्णातीति । मे मयि यजमाने रायो धनानि पदरूपेण तिष्ठन्तु । पशवो मयि सन्तु । ङेः शेआदेशे मे इति रूपम् । का॰ [७.६.२३.] मा वयमित्यध्वर्युरात्मा-नञ सञस्पृशतीति । वयमध्वर्युप्रभृतयो रायस्पोषेण धनस्य पुष्ट्या मा वियौष्म वि-युक्ता मा भवाम । यौतेर्माङि लुङ्लिति [पा॰ ३.३.१७५.] लुङि उत्तमबहुवचने वियौष्मेति रूपम् ॥ का॰ [७.६.२४.२५.] कृत्वा पत्न्यै पदं प्रयच्छति नेष्टा तोत इ-त्येनां वाचयतीति । तोतःशब्दः कलत्रवाची अव्ययम् । तोतः कलत्रे रायो ध-नानि पशवो वा पदरूपेण तिष्ठन्तु । यद्वाव्ययानामनेकार्थत्वात्तोतःशब्दो युष्मत्प-र्यायः । तोतः त्वयि रायः सन्तु ॥२२॥

समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा ।
मा मऽआयुः प्रमोषीर्मोऽअहं तव । वीरं विदेय तव देवि संदृशि ॥२३॥

का॰ [७.६.२६.] सोमक्रयणा च समीद्ध्यमाणा७ समख्यऽइतीति । एनां वा-चयतीत्यनुवर्तते । आस्तारपङ्क्तिः पत्न्याशीः । यस्या आद्यावष्टाक्षरौ पादावन्त्यौ द्वादशाक्षरौ सास्तारपङ्क्तिः । अन्त्यौ चेदास्तारपङ्क्तिरिति वचनात् ॥ सोमक्रयणीतः पत्न्याशिषमाशास्ते । हे सोमक्रयणि देव्या द्योतमानया त्वया धिया बुद्ध्या सह बुद्धिपूर्वकमहं समख्ये अदक्षि दृष्टेत्यर्थः । ख्या प्रकथने इत्यस्य धातोः संपूर्वस्य लुङि तङि अस्यतिवक्तिख्यातिभ्योऽङिति [पा॰ ३.१.५२.] च्लेरङि उत्तमैकवचने कर्मणि समख्येऽइति रूपम् । एकं संपदं पादपूरणाय । किम्भूतया त्वया दक्षिण-या दक्षिणात्वयोग्यया । तथा उरुचक्षसा उरु चष्टे सोरुचक्षास्तया विस्तीर्णदर्श-नया । एवंविधा त्वं मे मम पत्न्या आयुः मा प्रमोषीः मा खण्डय । मुष स्तेये

लुङि रूपम् ॥ मो अहं तव । तव सोमक्रयणा आयुरहं पत्नी मा उ मैव प्रमोषिषमित्यध्याहारः । मार्थे मोऽइत्यव्ययं वा । अहं तवायुर्न नाशयामीत्यर्थः । किं च । वीरं विदेय तव देवि संदृशि हे देवि गौः तव संदृशि संदर्शने सति वीरं पुत्रं विदेय लभेय । संदर्शनं संदृक् भावे क्विप् । विदॢ लाभे इत्यस्य व्यत्ययेन तुदादिभ्यः श इति [पा° ३. १. ७७.] शप्रत्यये लिङि रूपम् ॥ २३ ॥

VIII. a. एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग - - एष ते जागतो भा° - - ब्रूताच्छन्दोनामानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतात् ॥

b. आस्माकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वन्तु ॥ २४ ॥

का° [७. ७. ८.] एष त ऽइति वाचयतीति । मन्त्रचतुष्टयं यजमानः पठेत् । हे अध्वर्यो सोमाय सोमाभिमानिने देवाय मे इति वचो ब्रूयाद्ब्रूहि कथय । इति किम् । हे सोम ते तव एष पुरो दृश्यमानो भागो गायत्रो गायत्रीसम्बन्धी । गायत्रीच्छन्दोऽर्थं तव क्रयो न तु बधार्थमिति यजमानाभिप्रायः । तं ममाभिप्रायं सोमाय कथयेत्यर्थः ॥ ते तव एष त्रैष्टुभः त्रिष्टुप्छन्दसः सम्बन्धी भाग इति मे ऽभिप्रायमध्वर्यो सोमाय त्वं ब्रूहि । एवमग्रे ऽपि ॥ जागतो जगतीछन्दसः सम्बन्धी । अन्यत्पूर्ववत् ॥ छन्दोनामानाम् छन्द इति नाम येषामन्येषामप्युष्णिगादीनां ताः छन्दोनामानः । तेषां साम्राज्यं गच्छ सर्वेषां छन्दसामाधिपत्यं प्राप्नुहि । इति मे वचः सोमाय ब्रूतात्कथय । यः सोमाय छन्दसामाधिपत्यं दत्त्वा क्रीणाति तं स स्वानामाधिपत्यं प्राप्नोति । तदुक्तं तित्तिरिणा । यो वै सोमꣳ राजानꣳ साम्राज्यलोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यमिति । अत एतैर्मन्त्रैः सोमस्य राज्याप्तिः सूचिता । गायत्र्यादिछन्दोदेवता यत्र तिष्ठन्ति स छन्दोलोकस्तदाधिपत्यं प्रापय्य (19.) सोमं क्रीणानः स्वाधिपत्यभाग्भवतीत्यभिप्रायः ॥ का° [७. ७. १.] प्राङुपविश्यास्माकोऽसीति सोममालभत ऽइति । हे सोम त्वं क्रयपथमागतः सन्नास्माकोऽसि । शुक्रः शुक्लसंज्ञः ते तव ग्रह्यः । ग्रह एव ग्रह्यः । शुक्रपदमैन्द्रवायवादिग्रहाणामुपलक्षणम् । शुक्रादयः सर्वे तव ग्रहा इत्यर्थः ॥ विचितः । वि-

चिन्वन्तीति विचितः विवेकेन चयनस्य कर्तारः त्वां विचिन्वन्तु विविक्तं कुर्वन्तु सारासारविवेकं कृत्वा सारभूतं समूहयन्त्वित्यर्थः ॥ २४ ॥

a. अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् ॥

ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥

b. प्रज्ञाभ्यस्त्वा ॥ c. प्रज्ञास्त्वानुप्राणन्तु प्रज्ञास्त्वमनुप्राणिहि ॥ २५ ॥

का° [७.७.१२.१३.] सोमोपनहनं द्विगुणं चतुर्गुणं वा स्तृणाति प्राग्दशमुदग्वा तस्मित्सोमं मिमीति दशकृत्वोऽभि त्यमितीति । सावित्र्यृष्टिः । त्यं तं सवितारं देवमभ्यर्चामि सर्वतः पूजयामि । किम्भूतं देवम् । ओण्योः द्यावापृथिव्योरन्तरा वर्तमानमिति शेषः । ओण्योरिति द्यावापृथिवीनामसु [निघ° ३.३०. (20.)] पठितम् । तथा कविक्रतुं कविः क्रतुः यस्य तं मेधाविकर्माणम् । सत्यसवं सत्यः सवो यस्य अवितथप्रेरणम् । तथा रत्नधाम् रत्नानि दधातीति रत्नधास्तं रत्नानां धारकं पोषकं दातारं वा । अभिप्रियं (21.) सर्वतः प्रीतिविषयम् । मतिं मन्यत ऽइति मतिस्तं मननयोग्यम् । कविं क्रान्तदर्शनम् (22.) । किं च यस्य सवितुर्भा दीप्तिः अमतिः केनापि मातुमशक्या सती ऊर्ध्वा गगनाभिमुखी सवीमन्यदिद्युतत् सवः प्रसवः प्रवृत्तिर्नक्षत्रादीनां यस्मिन्स सवीमा तस्मिन्गगनप्रदेशे सर्वाणि वस्तूनि द्योतयन्ते (23.) ॥ यद्वायमर्थः । यस्यामतिरात्ममयी भा ऊर्ध्वा गगने सर्वमदिद्युतत् । अमाशब्द आत्मवचनः आत्ममयी ततिर्मतिर्वा अमतिः । तन्यतऽइति ततिः दीप्तिः । मतिरपि प्रकाशरूपत्वाद्दीप्तिः । अमाततिशब्दस्य वा अमतिभावः (24.) । सवितृभाविशेषणम् । आत्मप्रकाशमयी ततिर्मतिर्वा यस्य भाः अदिद्युतत् । किंनिमित्तम् । सवीमनि अनुज्ञानिमित्तं सर्वान्कर्मण्यनुज्ञातुमित्यर्थः । षु प्रसवैश्वर्ययोः [धा° २२.४३.] । वृत्तृस्तुभ्य ईमनिजिति (25.) ईमनिच् । गुणावादिशौ । सवीमा (26.) प्रसवोऽनुज्ञेत्यभिधानम् ॥ स स्वरादित्यः । कृपा कल्पनं कृप् तया कृपा कल्पनया अमिमीत सोममिति शेषः । एतावान्सोम इति तदीयं

परिमाणं निश्चितवानित्यर्थः । किम्भूतः स्वः हिरण्यपाणिः हिरण्यं पाणौ यस्य सौवर्णाभरणयुक्तहस्तः । सुक्रतुः साधुसंकल्पः ॥ का° [७. ७. २०.] अन्तात्संगृह्योल्लीषेण बध्नाति प्रजाभ्यस्त्वेतीति । हे सोम प्रजाभ्यः प्रजानामुपकाराय त्वा त्वां बध्नामीति शेषः ॥ का° [७. ७. २१.] अङ्गुल्या मध्ये विवृणोति प्रजास्त्वानुप्राणन्त्वितीति । उल्लीषेण बद्धस्य सोमदेवस्य श्वासरोधो मा भूदिति विवरं कुर्यादिति सूत्रार्थः । हे सोम प्रजास्त्वामनुप्राणन्तु श्वासं कुर्वन्तं त्वामनुसृत्य सर्वाः प्रजाः श्वासं कुर्वन्तु जीवन्तु । तथा हे सोम प्रजा अनुश्वासं कुर्वतीः प्रजा अनुसृत्य प्राणिहि श्वासं कुरु । प्रजानां तव च कदाचित् श्वासरोधो मा भूत् परस्परमनुसृत्य जीवनं भवत्वित्यभिप्रायेण विवरकरणमित्यर्थः ॥ २५ ॥

IX. a. शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन ।

b. सग्मे ते गोः । c. अस्मे ते चन्द्राणि ।

d. तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुषियम् ॥ २६ ॥

का° [७. ८. १६.] शुक्रं त्वेति हिरण्यमालम्भ्य वाचयतीति । हे सोम शुक्रं दीप्यमानं त्वा त्वां शुक्रेण दीप्यमानेन हिरण्येन क्रीणामि क्रीतं करोमि । किम्भूतं त्वां चन्द्रं चदि आह्लादने फलहेतुत्वेनाह्लादकरम् । तथा अमृतं स्वादुत्वेनामृतसमानम् । किम्भूतेन शुक्रेण चन्द्रेणाह्लादकरेण तथामृतेनाग्निसंयोगादिनापि विनाशरहितेन ॥ का° [७. ८. १७.] सग्मे तऽइति सोमविक्रयिणꣳ हिरण्येनाभिकम्पयतीति । यो हिरण्यमादाय सोमं विक्रीणीते तं हिरण्येनाभिकम्पयेत् । तद्धस्ते हिरण्यं दत्त्वा दत्त्वा स्वीकुर्वस्तं निराशं कुर्यादिति (27.) सूत्रार्थः ॥ षष्ठी प्रथमार्थे । हे सोमविक्रयिन् गोः गौः सोममूल्यत्वेन तुभ्यं दत्ता सा त्वदीया गौः पुनः प्रत्यावृत्य सग्मे यजमाने तिष्ठतु । हिरण्यमेव तवास्तु गौर्मा भूदित्यर्थः ॥ यद्वा ते गौः सग्मे वर्तते । गौर्ग्मा क्षमा (28.) क्षमित्युक्तेः [निघ° १. १. (29.)] ग्मा गौः तया सह वर्तमानः सग्मस्तस्मिन् सग्मे ते गोरिति यजमाने ते गौरिति श्रुतेः [३. ३. ३. ७.] सग्मो यजमानः ॥ का° [७. ८. १८.] अस्मे तऽइति यजमानसहितं (30.) निद-

धातीति । यज्ञमानि प्रत्यर्पितं यद्गोद्रव्यं तत्पुनर्यजमानसहितं सोमविक्रयिणः पुरतो निदध्यादिति सूत्रार्थः । हे सोमविक्रयिन् ते चन्द्राणि तुभ्यं दत्तानि यानि हिरण्यानि तान्यस्मे अस्मासु प्रत्यावृत्य तिष्ठन्तु तव गौरिव सोममूल्यमस्तु हिरण्यानि मा भुवन्नित्यर्थः ॥ का° [७.८.२०.] अजां प्रत्यङ्मुखीमालम्भ्य वाचयति तपसस्तनूरितीति । अर्धे अजा देवतास्य यज्ञपोऽर्धे सोमः । हे अजे त्वं तपसः पुण्यस्य तनूरसि देहोऽसि । दिवि स्थितस्य यज्ञियस्यानयनायाजां गृहीत्वा गायत्री ज्ञगमिति तित्तिरिणा सोमाहरणोपाख्याने उक्तत्वादजायाः पुण्यशरीरत्वम् । किं च हे अजे त्वं प्रजापतेर्वर्णोऽसि वर्णो देहः । यथा प्रजापतिः सर्वदेवताप्रिय एवमजापि । तदुक्तं तित्तिरिणा । सा वाऽएषा सर्वदेवत्या यदजेति । एवमजामुक्त्वा सोमं प्रत्याह । हे सोम परमेण पशुना उत्तमेनाजालक्षणेनानेन पशुना त्वं क्रीयसे । तपसस्तनूत्वादजाया उत्तमत्वम् । अतस्तव प्रसादात्सहस्रपोषं पुत्रपश्वादिसहस्राणां पोषो यथा भवति तथा पुषियं पुष्टो भूयासम् ॥ यद्वायमर्थः । हे अजे त्वं प्रजापतेस्तपसस्तनूरसि प्रजापतितपोरूपासि तत उत्पन्नत्वात् । तदुक्तं श्रुत्या [३.३.३.८.] । तपसो ह वाऽएषा प्रजापतेः सम्भूता यदजेति । किं च प्रजापतेर्वर्णो रूपं त्वमसि । त्रिगुणत्वात्प्रजापतेस्त्रिरूपत्वम् । अजापि प्रतिसंवत्सरं त्रिवारं प्रसूते तस्मात्प्रजापतेर्वर्णत्वम् (31.) । तदुक्तं श्रुत्या [३.३.३.८.] । सा यत्त्रिः संवत्सरस्य जायते तेन प्रजापतेर्वर्ण (32.) इति । एवमजां स्तुत्वा सोममाह । परमेणोत्कृष्टेन पशुवाजया त्वं क्रीयसे ततोऽहं सहस्रपोषं सहस्रं प्राणिनां पुष्णातीति सहस्रपोषं धनं पुषियं पुष्णीयां वर्धयेयमित्यर्थः । पुष्णातेर्व्यत्ययेन शे प्रत्यये लिङि पुषियमिति रूपम् ॥२६॥

a. मित्रो न एहि सुमित्रधः ।
b. इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनम् ।
c. स्वान भ्राडङ्गारे बम्भारे हस्त सुहस्त कृशानो ।
एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥२७॥

का° [७.८.२१.] सव्येनाजां प्रयच्छन्मित्रो न इति दक्षिणेन सोममादत्ते ॥

सौम्यम् । हे सोम त्वं नोऽस्मान्प्रत्येहि आगच्छ । किम्भूतस्त्वं मित्रः सखा प्रीतियुतः यद्वा मित्रः रविर्द्रूपः । तथा सुमित्रधः शोभनानि मित्राणि दधाति पुष्यति सुमित्रधः । क्रीत्वा वाससाबद्धस्य सोमस्य वरुणदेवताकत्वेन क्रूरत्वात्तद्धान्त्यर्थो मित्रत्वेन प्रार्थ्यते । तदाह तित्तिरिः । वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एह्यि सुमित्रध इत्याह शान्त्यै इति ॥ का° [७. ८. २३.] दीक्षितोरौ दक्षिणे प्रत्युक्ष्य वासो निदधातीन्द्रस्योरुमितीति । वासः प्रत्युक्ष्य वस्त्रमुपरिस्थाप्य सोमं निदध्यादित्यर्थः ॥ यजमानरूपेण परमैश्वर्येणोपेतत्वात्त्रेन्द्रशब्देन यजमानः । तथा च श्रुतिः [३. ३. ३. १०.] । एष वाऽत्रेन्द्रो भवति यजमान इति । हे सोम त्वमिन्द्रस्य यजमानस्य दक्षिणामूरुमाविश दक्षिणे ऊरावुपविशेत्यर्थः । किम्भूतस्त्वमुशन् वश कान्तौ वष्टि उशन् शतृप्रत्ययः ऊरुं कामयमानः । तथा स्योनः सुखभूतः । किम्भूतमूरुमुशन्तं सोमं कामयमानं स्योनमुपविशे सुखकरम् । पुरा देवाः सोमं क्रीतमिन्द्रस्योरावुपविशयन्तस्मात्त्रेन्द्रशब्देन यजमानः । तदाह तित्तिरिः देवा वै सोममक्रीणांस्तमिन्द्रस्योरौ दक्षिणेऽआसादयन् स खलु वाऽएतर्हीन्द्रो यो यजते तस्मादेवमाहेति । का° [७. ८. २४.] स्वानं भ्राजेति जपति सोमविक्रयिणमीक्षमाण इति । स्वनति स्वानः । भ्राजते शोभतेऽसौ भ्राजः । अङ्गस्य पापस्यारिरङ्गारिः । बिभर्ति पुष्णाति विश्वमिति बभ्रारिः । हसति हस्तः सर्वदा हृष्टरूपः । शोभनौ हस्तौ यस्य सुहस्तः । कृशं दुर्बलमनिति जीवयतीति कृशानुः । स्वानादयः सप्त सोमरक्षका देवविशेषाः । हे स्वानादयः सप्त देवाः वो युष्माकमेते सोमक्रयणाः सोमः क्रीयते यैस्ते सोमं क्रेतुमानीता हिरण्यादिपदार्थाः पुरतः स्थापिताः । तान्पदार्थान्यूयं रक्षधमवत । वो युष्मान्मा दभन्वैरिणो मा हिंसिषत । स्वानादयो धिष्ण्याधिष्ठातारः सोमरक्षकाः । तदाह तित्तिरिः । स्वान भ्राजेत्याह ते चामुष्मिंल्लोके सोममरक्षन्निति ॥ २७ ॥

परि॑ माग्ने दु॒श्चरिताद्बाधस्वा मा सु॒चरि॑ते भज ।
उदायु॑षा स्वा॒युषोद॑स्थाममृतां॒२॥ऽअनु॑ ॥ २८ ॥

का° [७. १. १.] गृहीतसोमं परि माग्नऽइति वाचयतीति । अग्निदेवत्या पुर-

स्ताद्बृहती । यस्या आद्यो द्वादशाक्षरस्त्रयोऽष्टाक्षराः पादाः सा पुरस्ताद्बृहती । आद्यश्चेत्पुरस्ताद्बृहतीत्युक्तेः । हे अग्ने दुश्चरितात्पापान्मा मां परिबाधस्व परितो निवारय । मे पापे प्रवृत्तिर्मा भूदित्यर्थः । सुचरिते शोभने चरित्रे सदाचाररूपे पुण्ये मा मां यजमानमाभज सर्वतो भज स्थापयेत्यर्थः ॥ का° [७.१.३.] उदायुषेत्युत्थानमिति । उदायुषा उत्कृष्टेन चिरञ्जीवनलक्षणेनायुषा (32.) निमित्तेन तथा स्वायुषा यागदानादिना शोभनेनायुषा निमित्तभूतेन अमृताननु सोमादिदेवाननुसृत्य उदस्थामक्ष्मुत्थितवानस्मि । तिष्ठतेर्लुङि रूपम् ॥ २८ ॥

प्रति॒ पन्था॑मपद्महि स्वस्ति॒गाम॑ने॒हस॑म् ।
येन॒ विश्वाः॒ परि॒ द्विषो॑ वृ॒णक्ति॑ वि॒न्दते॒ वसु॑ ॥ २९ ॥

का° [७.१.४.] शीर्षन्सोमं कृत्वा पाणिमन्तर्धाय प्रति पन्थामित्यनोऽभ्येतीति । शकटमभिलक्ष्य गच्छेदित्यर्थः । अनुष्टुप्पथिदेवत्या । पन्थानं स्तौति । पन्थां पन्थानं मार्गं प्रत्यपद्महि वयं प्रत्यपद्यामहि प्रतिपन्नाः प्राप्ता अभूमित्यर्थः । पद गतावित्यस्य व्यत्ययेन शपि लुप्ते लङि रूपम् । विभक्तेः पूर्वसवर्णे पन्थामिति रूपम् । किम्भूतं पन्थानं स्वस्तिगां स्वस्ति क्षेमेण गम्यते यत्र स स्वस्तिगास्तं क्षेमेण गन्तुं योग्यम् । गमेर्विट् प्रत्यये विड्वनोरनुनासिकस्यादिति [पा° ६.४.४१.] मकारस्याकारे रूपम् । तथा अनेहसम् एहः पापन्नपश्चोरादिबाधस्तद्रहितम् । यद्वा एहं इत्यपराधनाम । यत्र गतानामपराधो नास्ति । येन यथा गच्छन्पुरुषो विश्वाः विश्वान्सर्वान्द्विषो द्वेषिणश्चोरादीन्परिवृणक्ति परितो वर्जयति । वृजी वर्जने रुधादिः । वसु विन्दते धनं च लभते तं पन्थानमिति पूर्वत्रान्वयः । विद्लृ लाभे ॥ २९ ॥

X. a. अदि॑त्यास्त्वग॑सि । b. अदि॑त्यै सद॒ आसी॑द् ।
c. अस्त॑भ्नाद्द्यां वृष॒भोऽन्तरि॑क्ष॒मम॑िमीत वरि॒माणं॑ पृथि॒व्याः ।
आसी॑दद्विश्वा॒ भुव॑नानि स॒म्राड्विश्वेत्तानि॒ वरु॑णस्य व्र॒तानि॑ ॥ ३० ॥

का° [७.१.१.] कृष्णाजिनमास्मन्नास्तृणात्यदित्यास्त्वगितीति । अस्मिन्शकटे इ-

त्यर्थः । हे कृष्णाजिन त्वमदित्यास्त्वगसि अखण्डितायाः पृथिव्याः त्वग्रूपं भवसि ॥ का° [७.१.१.] तस्मिन्त्सोमं निदधात्यदित्यै सद इतीति । हे सोम त्वमदित्यै सदः अदितेर्भूमेः सम्बन्धि स्थानमासीद सर्वतः प्राप्नुहि तत्रोपविशेत्यर्थः ॥ का° [७.१.८.] अस्तभ्नाद्द्यामिति सोममालम्भ्य वाचयतीति । द्वे वरुणदैवते त्रिष्टुभौ । क्रीतसोमस्य वरुणदैवतत्वाद्वरुणो ब्रह्मद्रूपेण स्तूयते । वृषभः श्रेष्ठो वरुणो द्यामस्तभ्नात् द्युलोको यथा न पतति तथा स्वकीययाज्ञया स्तम्भितवान् । तथान्तरिक्षमप्यस्तभ्नात् । तथा पृथिव्या वरिमाणं भूमेरुरुत्वमिमीत मिमीते । उरोर्भावो वरिमा तम् (33.) । एतावती भूरिति परिमाणं जानातीत्यर्थः । तथा सम्राट् सम्यग्राजमानो वरुणो विश्वा विश्वानि सर्वाणि भुवनानि आसीदत् लोकान्व्याप्नोति । विश्वा विश्वानि सर्वाणि इत् एवार्थे सर्वाण्येव वरुणस्य व्रतानि कर्माणि । यद्वा इदित्यव्ययमित्यमर्थे । इदित्थं तानि द्युलोकस्तम्भनादीनि वरुणस्य व्रतानि व्रतवन्नियतानि । सर्वदा तानि करोतीत्यर्थः ॥३०॥

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥३१॥

का° [७.१.१.] वनेषु व्यन्तरिक्षमिति सोमपर्याणाह्नेन परितत्येति । बन्धनहेतुना वस्त्रेण परितो वेष्टयित्वेत्यर्थः । वि उपसर्गस्तताने त्यनेन सम्बध्यते । वरुणो वनेषु वनगतवृक्षाग्रेषु अन्तरिक्षमाकाशं वितनोति । यद्यपि सर्वगतमन्तरिक्षं तथापि तत्र मूर्तद्रव्याभावादत्यन्तं विस्तारितवान् । तथार्वत्सु अश्वेषु वाजं बलं वितनोत्यनुवर्तते । यद्वार्वत्सु पुरुषेषु वाजं वीर्यं वितनोति । वीर्यं वै वाजः पुमाꣳसो ऽर्वन्त इति श्रुतेः [३.३.४.७.] । तथा उस्रियासु पयः क्षीरं वितनोति उस्रियाशब्दो गोनामसु पठितः [निघ° २.११.] । हृत्सु हृदयेषु क्रतुं संकल्पं तच्छक्तियुतं मनो वितनोति । विक्षु प्रजासु अग्निं जठराग्निम् । दिवि द्युलोके सूर्यं वितनोति । अद्रौ पर्वते सोमं वल्लीरूपमदधात्स्थापितवान् । पर्वतपाषाणसंधिषु सोमवल्ल्या उत्पद्यमानत्वादद्रौ सोमस्थापनमुक्तम् । तदाह तित्तिरिः । सोममद्रावित्याह ग्रावाणो वाऽअद्रयस्तेषु वाऽएष सोमं निदधातीति । य एवं मन्त्र-

द्वयोक्तयुलोकस्तम्भनादिसामर्थ्यवान्परब्रह्मलक्षणो वरुणस्तं वयं स्तुम इति शेषः ॥ ३१ ॥

सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनिकम् ।
यत्रेतशेभिरीयसे भ्राजमानो विपश्चिता ॥ ३२ ॥

का° [७.१.१.] कृष्णाजिनं पुरस्तादासञ्जति सूर्यस्य चक्षुरितीति । कृष्णाजिनदेवत्यानुष्टुप् । हे कृष्णाजिन त्वं सूर्यस्य चक्षुर्नेत्रं त्वमारोह (34.) । तथा अग्नेर्वक्ष्णः नेत्रस्य कनीनिकं (35.) तारकां चारोह तथोद्यैस्तराम्भव यथैताभ्यां दृश्यस ऽइत्यर्थः । यत्र यस्मिन्नेतयोर्दर्शने विपश्चिता विदुषा सर्वज्ञेन सूर्येणाग्निना च भ्राजमानः दीप्यमानः सन्नेतशेभिरेतशैरश्वैस्त्वमीयसे गच्छसि । एतश इत्यश्वनामसु [निघ° १.१४.] पठितम् । यत्र त्वमश्वैर्गच्छसि । ई गतौ दिवादिरात्मनेपदी । एतशैरिति करणतृतीया । यद्वा कर्मणि ब्रूपमेतशैरिति कर्तरि तृतीया । यत्राश्वैस्त्वं नीयसे इत्यर्थः । कृष्णाजिनस्य पुंस्त्वमार्षम् । सूर्याग्निदृष्टिविषयत्वे सति मार्गो रक्षोबाधरहितो भवति । तदुक्तं तित्तिरिणा । एष वास्य खलु रक्षोहणः पन्था यो ऽग्नेश्च सूर्यस्य चेति ॥ ३२ ॥

उक्षावितं धूर्षाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ ।
स्वस्ति यजमानस्य गृहान्गच्छतम् ॥ ३३ ॥

का° [७.१.११.] अनड्वाहौ युनक्त्युक्षावितमितीति । आनडुही ऊर्धबृहती । यस्यास्त्रयः पादा द्वादशाक्षराः सोर्धबृहती । त्रिजागतोर्धबृहतीत्युक्तेः । अत्राद्यो दशार्णः द्वितीयस्त्रयोदशार्णस्तेनैकोना । हे उक्षौ अनड्वाहौ युवामितमागतमेत्य च स्वयमेव युज्येथां रथे युक्तौ भवतम् । किम्भूतौ युवाम् धूर्षाहौ धुरं सहेते तौ धूर्षाहौ शकटधुरं वोढुं समर्थौ । तथा अनश्रू नेत्रयोरश्रुरहितौ सोत्साहावित्यर्थः । अवीरहणौ न वीरान्हन्तस्तौ । शृङ्गादिभिर्वीराणां शिश्नूनां हननमकुर्वाणौ । ब्रह्मचोदनौ ब्रह्मणो विप्रान्चोदयतस्तौ ब्राह्मणानां यज्ञं प्रति प्रेरकौ । एवं सम्बोध्य प्रयोजनमाह । तथाविधौ युवां स्वस्ति क्षेमेण यजमानस्य गृहान्प्रति गच्छतम् ॥ ३३ ॥

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि ॥
मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन् ॥
श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तत्रो सꣳस्कृतम् ॥३४॥

का० [७.१.११.] भद्रो मऽइति वाचयतीति । सौम्यं यजुः । हे सोम मे मह्यं यजमानाय मदुपकारार्थं त्वं भद्रोऽसि कल्याणरूपोऽसि । भदि कल्याणे । हे भुवः पते भूशब्दिन भूमौ स्थितानि भूतानि यजमानाधर्युप्रभृतीन्युच्यन्ते । तेषां भूतानां पालकत्वात्पतिः सोमः । तदाह तित्तिरिः । प्रच्यवस्व भुवस्पतऽइत्याह भूतानाꣳ क्षेष पतिरिति । तथाविध हे सोम विश्वानि सर्वाणि धामान्यभि स्थानानि पत्नीशालाहविर्धानप्रभृतीनि अभिलक्ष्य प्रच्यवस्व । प्रकर्षेण गच्छ । च्युङ्गतौ । प्रच्यवमानं त्वा त्वां परिपरिणो मा विदन् मा जानन्तु । सर्वतः संचरन्तस्तस्करविशेषाः परिपरिण उच्यन्ते । तथा परिपन्थिनो यागस्य प्रतिबिधकाः शत्रवस्त्वां मा विदन् । छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरीति [पा० ५.२.८१.] निपातावेतौ । तथा वृका विकर्तनशीला अरण्यश्वानो दुर्जना वा त्वां मा विदन् । किम्भूता वृकाः । अघायवः परस्याघं कर्तुमिच्छन्ति तेऽघायवः । सुप आत्मनः क्यजिति [पा० ३.१.८.] क्यचि । अश्वाघस्यादित्याकारः [पा० ७.४.३७.] । क्याच्छन्दसीति [पा० ३.२.१७०.] क्यञन्तादुप्रत्ययः । किंच श्येनो भूत्वा श्येनरूपमास्थाय श्येनाख्यपक्षिवच्छीघ्रगामी वा भूत्वा परापत उत्पत । यजमानस्य गृहान्गच्छ । तत्तत्र यजमानगृहेषु नौ आवयोः तव मम च संस्कृतं सर्वोपकरणसंयुक्तं स्थानमस्तीति शेषः ॥३४॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥३५॥

का० [७.१.२१.२२.] शालां पूर्वेण प्रतिप्रस्थाताग्नीषोमीयं पशुमादाय तिष्ठन्नि कृष्णसारङ्गं मेध्यमभावि लोहितसारङ्गं नमो मित्रस्येत्येतमालम्भ्य वाचयतीति । सौरी जगती सूर्यदृष्टा । द्वादशाक्षरचतुःपादा जगती । अत्र मन्त्रे सूर्यरूपेण सोमः स्तूयते । एवंविधाय सूर्याय नमः । किम्भूताय मित्रस्य वरुणस्य चतुर्थ्यर्थे षष्ठी

मित्राय वरुणाय मित्रवरुणदेवताद्रूपेण वर्तमानाय । जगतां हितकारिणे । वृणोति वरुणः । स्वरश्मिभिर्जगदावृणवते । चक्षसे चष्टे इति चक्षास्तस्मै । चक्षुष्मते द्रष्ट्रे इत्यर्थः ॥ यद्वायमर्थः । मित्रस्य वरुणस्य चक्षसे सर्वजगतो द्रष्ट्रे मित्रावरुणशब्देन सर्वं जगल्लक्ष्यते । तथा महो महसे तेजोरूपाय सुपां सुलुगिति [पा° ७.१.३९.] विभक्तिलोपः । देवाय द्योतमानाय । तथा दूरेदृशे दूरे वर्तमानः प्राणिभिर्दृश्यतेऽसौ दूरेदृक् तस्मै । यद्वा दूरे पश्यतीति दूरेदृक् । देवजाताय देवाद्द्योतमानात्परमात्मनो जायतेऽसौ देवजातस्तस्मै । देवानुग्रहाय ज्ञातो देवजात इति वा । ज्ञाता देवा यस्मात्स देवजात इति वा । वाक्षिताग्न्यादिष्विति [पा° २.२.३७.] ज्ञातशब्दस्य परनिपातः । केतवे प्रज्ञारूपाय विज्ञानघनाय । केतुरिति प्रज्ञानाम [निघ° ३.९.] । दिवः पुत्राय द्युलोकस्य पुत्रवत्प्रियाय । द्युलोकाद्धि सूर्यो जायते । दिवः पुरु त्रायते स इति दिवस्पुत्रः (36.) । दिवः पालकायेति वा । एवंविधाय सूर्याय तदृतं सत्यमवश्यफलप्रदज्योतिष्टोमरूपं कर्म हे ऋत्विजः यूयं सपर्यतानुष्ठानेन सपर्यां कुरुत । सपर्यतिः परिचरणकर्मा [निघ° ३.५.] । सूर्यार्थं यज्ञं कुरुतेत्यर्थः । यद्वा तदृतं सूर्यरूपं सत्यं ब्रह्म सपर्यत परिचरत । किं च शंसत शंस स्तुतौ सूर्यप्रीत्यर्थं स्तुतिं कुरुत । शस्त्राणि पठतेत्यर्थः । यागानुष्ठानं तस्यावश्यकत्वादित्यर्थः ॥३५॥

a. वरुणस्योत्तम्भनमसि । b. वरुणस्य स्कम्भसर्जनी स्थः ।

c. वरुणस्यऽऋतसदन्यसि । d. वरुणस्यऽऋतसदनमसि ।

e. वरुणस्यऽऋतसदनमासीद ॥३६॥

का° [७.१.२५.] समीपेऽन उपस्थाप्योत्तम्भनेनोपस्तभ्नाति वरुणस्योत्तम्भनमितीति । पञ्च यज्ञर्षि वारुणानि । हे काष्ठ त्वं वरुणस्योत्तम्भनमसि वस्त्रबद्धस्य सोमस्योन्नमनं भवसि न तु शकटस्येत्यर्थः । उत्तभ्यते शकटमुखाग्रमुन्नतत्वेन स्थाप्यते यस्मिन्काष्ठे तत्काष्ठमुत्तम्भनम् । का° [७.१.२६.] शम्ये (37.) चोद्वृहति वरुणस्य स्कम्भसर्जनी स्थ इतीति । शकटयुगे बद्धयोर्बलीवर्दयोर्गलबर्हिर्भागे काष्ठनिर्मिते शम्ये (37.) स्थाप्येते । ताभ्यां वृषभयोरितस्ततो गमनं निवार्यते ततस्ते

स्कम्भसर्जनीशब्देनोच्येते । हे शम्ये (37.) युवां वरुणस्य स्कम्भसर्जनी स्थः । स्कम्भ रोधने । सर्ज त्यजने [धा° ७.५०.] । स्कम्भनं स्कम्भो रोधः स सर्ज्यते क्रियते याभ्यां ते स्कम्भसर्जन्यौ । विभक्तेः पूर्वसवर्णः । व्रियते वेष्यते वस्त्रादिनेति वरुणशब्देनात्र वस्त्रबद्धः सोम उच्यते । वरुणदैवतत्वाच्च पशवस्वपि मन्त्रेषु ॥ का° [७.१.२७.२८.] औडुम्बरीमासन्दीं नाभिदघ्नामरत्निमात्रामङ्गीमुतामाहरन्ति (38.) चत्वारोऽभिमृशत्येनां वरुणास्यऽऋतसदन्यसीतीति । हे आसन्दि त्वं वरुणस्य सोमस्य सम्बन्धिनी ऋतसदन्यसि । ऋताय यज्ञाय सद्यते ऽपविश्यते यस्यां सा ऋतसदनी । करणाधिकरणयोरिति [पा° ३.३.११७.] ल्युप्रत्ययः । ऋतं यज्ञस्तन्निष्पत्त्यर्थमुपवेशनस्थानभूतासीत्यर्थः ॥ का° [७.१.२१.] कृष्णाजिनमस्यामास्तृणाति वरुणास्यऽऋतसदनमसीतीति । हे कृष्णाजिन वरुणस्य बद्धस्य सोमस्य ऋतसदनं यज्ञार्थमुपवेशनस्थानमसि ॥ का° [७.१.३०.] तस्मिन्त्सोमं निदधाति वरुणास्यऽऋतसदनमासीदितीति । हे सोम त्वं वरुणस्य वस्त्रबद्धस्य तव ऋतसदनं यज्ञार्थमुपवेशनस्थानभूतमासन्दीसंस्थितं कृष्णाजिनमासीद सुखिनोपविश ॥३६॥

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ॥
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥३७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां चतुर्थोऽध्यायः ॥ ॥

का° [७.१.३२.] या तऽइति वाचयतीति । सोमदेवत्या त्रिष्टुप् गोतमदृष्टा । हे सोम ते तव या यानि धामानि प्रातःसवनादीनि स्थानानि प्राप्येति शेषः । हविषा त्वदीयरसद्रव्येण यजन्ति ऋत्विजो यागं कुर्वन्ति । यज्ञमभिलक्ष्येति शेषः । ते तव ता तानि विश्वानि सर्वाणि स्थानानि परिभूरस्तु । परितो भवति प्राप्नोति परिभूः । भू प्राप्तौ । भवान्परितः प्राप्तवान्भवतु । ऋत्विजो येषु स्थानेषु यजन्ति तानि त्वं प्राप्नुहीत्यर्थः । यद्वा ऋत्विजो यानि धामानि प्राप्य यजन्ति तानि सर्वाणि ते तव यज्ञं परिभूरस्तु यज्ञं परितो भवितृणि यज्ञव्यापकानि सन्तु । नपुंसकबह्वचनस्थाने पुल्लिङ्गैकवचनमार्षम् । किं च हे सोम त्वं दुर्यान्गृहान्प्रचर प्राप्नुहि । दुर्या इति गृहनाम [निघ° ३.४.] । द्व्यचोऽतस्तिङ इति [पा° ६.३.१३५.]

संहितायां प्रचरेति दीर्घः । किम्भूतस्त्वम् । गयस्फानः गय इति गृहनाम [निघ° ३.४.] । स्फायी वृद्धौ । गयान् स्फाययति (39.) गयस्फानः गृहाभिवर्धकः । प्रतरणः प्रकर्षेण तरत्यापदो येन स प्रतरणः । यद्वा प्रतारयति यज्ञपारं प्रापयतीति प्रतरणः । सुवीरः शोभनास्त्वत्प्रसादल्लब्धा वीरा अस्मत्पुत्रपौत्रा यस्य तव स त्वं सुवीरः । अवीरघ्ना न वीरान्हन्तीति वीराणां परिपालक इत्यर्थः ॥३७॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । शालागमाढ्याचनात्तश्चतुर्थोऽध्याय ईरितः ॥४॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ a. b ॥१॥ १ c. d. e. २ a -- पुनन्तु ॥२॥ २ a विश्वꣳ - देवीः २ b. c ॥३॥ ॥

II. ॥ ३ a [मक्षिणां (40.)]. वृत्रस्य कनीनकासि चक्षुर्दा - देहि ॥१॥ ४ ॥२॥ ५ ॥३॥ ६ -- रमे ॥४॥७॥ ॥

III. ॥ ७ [- °वीऽउर्वन्तरिक्ष -] ॥१॥ ८ ॥२॥१॥ ॥

IV. ॥ १ a ॥१॥ १ b. १० a - ऊर्जं मे यच्छ ॥२॥ १० b. c. d. e [सुप्तस्याः] ॥३॥ १० f ॥४॥१३॥ ॥

V. ॥ ११ a [°णुत व्रतं कृणु व्रतं (41.) कृणुत ॥ अग्नि°] ॥१॥ ११ b [- सुमृलीकामभिष्टये वर्चोधां विश्वधायसꣳ सु°] ॥२॥ ११ c ॥३॥ १२ ॥४॥ १३ a [- तनुः (42.)]. b. c ॥५॥ १४ ॥६॥ १५ [- °र्मुऽआगात्पुनश्चक्षुः पुनः श्रोत्रं मऽआगात्पुनः प्राणः पुनरात्मा मऽआगात् ॥ वै° -- °ग्निर्मा पातु -] ॥७॥ १६ a ॥८॥ १६ b ॥१॥२२॥ ॥

VI. ॥ १७ ॥१॥ १८ [- तनुयन्नमशीय स्वाहा ॥ चन्द्रमसि शुक्रमस्यमृ° -] ॥२॥ १९ - सुप्रतीची भव ॥३॥ १९ मित्रस्त्वा - °क्षाय. २० - सयूथ्यः ॥४॥ २० सा देवि - °रेहि ॥५॥२७॥ ॥

VII. ॥ २१ ॥१॥ २२ a [- इलायास्पं॰ -] ॥२॥ २२ b. c. d. e [अस्मे] ॥३॥ २२ f. g. २३ [- वीरान्विदेय -] ॥४॥३१॥ ॥

VIII. ॥ २४ a [- छन्दोमानानाꣳ साम्राज्यं गच्छतादिति मे -] ॥१॥ २४ b ॥२॥ २५ a [- अतिव्युत्तꣳ -] ॥३॥ २५ b. c ॥४॥३५॥ ॥

IX. ॥ २६ a [चन्द्रं त्वा चन्द्रेण क्रीणामि शुक्रꣳ शुक्रेणामृं॰ -]. b. c ॥१॥ २६ d ॥२॥ २७ a. b ॥३॥ २७ c [- कृशानो ॥ एते -] ॥४॥ २८ ॥५॥ २९ ॥६॥४१॥ ॥

X. ॥ ३० ॥१॥ ३१ ॥२॥ ३२ [- कनीनकाम् । यं॰ -] ॥३॥ ३३ [उक्षाꣳएतं धूर्वाह्यो युं॰ -] ॥४॥ ३४ ॥५॥ ३५ ॥६॥ ३६ ॥७॥ ३७ ॥८॥४१॥ ॥ दशानुवाकेषु नवचत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे चतुर्थोऽध्यायः ॥ ॥

I. अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥

चतुर्थेऽध्याये सꣳविग्यजमानस्य शालाप्रवेशमारभ्य क्रीतसोमस्य शालाप्रवेशपर्यन्ता मन्त्रा उक्ताः ॥ अथ पञ्चमोऽध्यायस्तत्रादौ आतिथ्येष्टौ हविर्ग्रहणादिमन्त्रा उच्यन्ते ॥ ॥ का॰ [८.१.४.] निर्वपेदग्नेस्तनूरिति पञ्चकृत्वः प्रतिमन्त्रमिति ॥ पञ्च यज्ञांषि विष्णवानि ॥ हे हविः त्वमग्नेस्तनूरसि अग्निसंज्ञो यो देवः सोमस्य राज्ञो भृत्यस्तस्य गायत्रीछन्दोऽधिष्ठातुस्तनूः शरीरं भवसि तृप्तिजनकत्वात् तथाविध हे हविर्विष्णवे बहुयज्ञव्यापिने सोमाय सोमप्रीत्यर्थं त्वा त्वां निर्वपामीति शेषः ॥ सोमस्य तनूरसि । सोमसंज्ञः कश्चित्सोमस्य राज्ञो भृत्यस्त्रिष्टुप्छन्दोऽधिष्ठाता तस्य तृप्तिहेतुत्वात्तनूरसि । अन्यत्पूर्ववत् ॥ अतिथेरातिथ्यमसि । अतिथिसंज्ञः सोमराजानुचरो जगतीछन्दोऽधिष्ठाता । हे हविः त्वमतिथेरतिथिसंज्ञस्य सोमभृत्यस्य आतिथ्यमसि आतिथ्यनामकसंस्काररूपमसि । तिथिविशेषं विनैवातिक्षुधया (1.) पी-

डिते विप्रेऽतिथौ समागते तत्सत्काराय क्रियमाणः पादक्षालनभोजनसंवाहनादिसंस्कार आतिथ्यमुच्यते । अतिथेरिदमातिथ्यम् अतिथिर्ञ्य इति [पा° ५.४.२६.] ञ्यप्रत्ययः । विष्णवे त्वां निर्वपामीति पूर्ववत् ॥ श्येनाय त्वा सोमभृते । श्येनो नाम देवः सोमराजानुचरः स्वर्गात्सोमाहर्ता श्येनरूपधारिगायत्र्यधिष्ठाता तस्मै श्येनाय विष्णवे सोमाय च त्वां निर्वपामि । किम्भूताय श्येनाय सोमभृते सोमं हरति आनयतीति सोमहृत्तस्मै । हृग्रहोर्भश्छन्दसीति [पा° क° ८.२.३२. वा° १.] हरतेर्हस्य भः । सोमानयनकर्त्रे । तथा च श्रुतिः [३.४.१.१५.] । सा यद्गायत्री श्येनो भूत्वा दिवः सोममाहरदिति ॥ अग्नये त्वा रायस्पोषदे । रायस्पोषं धनपुष्टिं ददाति रायस्पोषदाः तस्मै । ह्यिप्रत्ययः । राज्ञो धनं क्रयविक्रयादिना बहुधा पोषयित्वा राज्ञेऽर्पयति स रायस्पोषदाः अग्निसंज्ञोऽपरः सोमानुचरोऽस्ति अनुक्तछन्दोऽधिष्ठाता देवः तस्मै धनपुष्टिदायिनेऽग्नये हे हविः त्वां गृह्णामि । विष्णवे त्वेति पूर्ववत् ॥ विष्णुशब्दाभिधेयस्य सोमस्य राज्ञो हविषा तदनुचराणामग्न्यादिदेवानां तद्द्वारा तत्सम्बन्धिनां गायत्र्यादिछन्दसां च तृप्तिर्भवति । तदाह तित्तिरिः । यावद्वै राजानुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराणीति ॥ १ ॥

a. अग्नेर्जनित्रमसि । b. वृषणौ स्थः । c. उर्वश्यसि । d. आयुरसि । e. पुरूरवा असि । f. गायत्रेण त्वा छन्दसा मन्थामि । g. त्रैष्टुभेन त्वा छन्दसा मन्थामि । h. जागतेन त्वा छन्दसा मन्थामि ॥ १ ॥

अथाग्निनयनमन्त्राः ॥ का° [५.१.२८.] अग्नेर्जनित्रमिति शकलमादाय वेद्यां करोतीति ॥ शकलदैवतं यजुः । हे शकल त्वमग्नेर्जनित्रं जननाधारभूतमसि । जायतेऽस्मिन्निति जनित्रम् ॥ का° [५.१.२९.] वृषणाविति कुशतरुणे तस्मिन्निति । तस्मिन् शकले करोतीत्यर्थः । मन्त्रार्थस्तु । हे दर्भौ युवां वृषणौ सेक्तारौ स्थः भवथः । वर्षत इति वृषणौ । कनिन्प्रत्ययः । यथा पुत्रजननाय स्त्रीपुरुषौ वीर्यस्य सेक्तारौ तद्वद्युवामप्यरणयोरग्निजननसामर्थ्यसंपादकावित्यर्थः ॥ का° [५.१.३०.] उर्वश्यसीत्यधरारणिं तयोरिति । शकलस्थापितयोर्दर्भयोरधरारणिं निदध्यादिति

सूत्रार्थः ॥ हे अधरारणे त्वमुर्वशी असि । यथोर्वशी पुरूरवोनृपस्य भोगायाधस्ता-
ल्लेते तद्वत्त्वमधोऽवस्थितासीत्यर्थः ॥ का° [५.१.३१.] आयुरसीत्युत्तरयाज्यस्थाली७
सꣳस्पृश्येति । उत्तरारण्याज्यस्थालीं स्पृशेदिति सूत्रार्थः ॥ हे स्थालीगताज्य त्वमा-
युरसि अरणिद्वयेन जनिष्यमाणस्याग्नेरायुप्रदं (2.) भवसि ॥ का° [५.१.३२.] पुरू-
रवा इत्यभिनिधानं तयेति । अधरारणीरभिमुखीमुत्तरारणिं निदध्यादिति सूत्रार्थः ॥
हे उत्तरारणे त्वं पुरूरवा असि यथा पुरूरवा नृप उर्वश्या अभिमुख उपरि वर्तते
तथा त्वमपीत्यर्थः । उर्वशीत्यादिमन्त्रत्रयं श्रुत्या व्याख्यातम् [३.४.१.२२.] । उर्व-
शी वाऽअप्सराः पुरूरवाः पतिरथ यत्तस्मान्मिथुनादजायत तदायुरिति ॥ का° [५.
२.२.] मन्थति गायत्रेणेति प्रतिमन्त्रं त्रिः प्रदक्षिणमिति । मन्त्रत्रयेणारण्योर्मन्थनं
कुर्यात् ॥ हे अग्ने गायत्रेण छन्दसा गायत्रीछन्दोऽभिमानिना देवेनाहं त्वा त्वां म-
न्थामि अरण्योर्मन्थनेनोत्पादयामि । एवमुत्तरावपि मन्त्रौ योज्यौ ॥२॥

भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥३॥

का° [५.२.३.] भवतं न इति प्रास्यतीति । मन्थनोत्थमग्निमाहवनीये प्रास्य-
तीत्यर्थः ॥ पङ्क्तिः । यस्याः अष्टाक्षराः पञ्च पादाः सा पङ्क्तिः । अत्र तु तृतीयः षड-
क्षरः चतुर्थो दशाक्षरः ॥ निर्मथ्याहवनीयावग्नी देवते । हे जातवेदसावुभावग्नी नो
ऽस्मदर्थं युवामीदृशौ भवतम् । किम्भूतौ युवाम् । समनसौ मनसा सहितौ । त-
था सचेतसौ समानं चेतो ययोस्तौ परस्परं समानचित्तयुक्तौ । अन्यविषयं म-
नः परिहृत्यास्मदनुग्रहाभिमुखत्वं समनस्त्वम् अनुग्रहे परस्परविप्रतिपत्तिराहित्यं
सचेतस्त्वम् । तथा अरेपसौ पापरहितौ प्रमादादस्माभिः कृतेऽपि पापे कोपाभावः
पापराहित्यम् । तदेव स्पष्टयति । यज्ञमस्मत्कर्म मा हिꣳसिष्टं मा विनाशयतं यज्ञ-
पतिं यजमानं च मा हिꣳसिष्टम् । तथा अद्यास्मिन्ननुष्ठानदिने नोऽस्मदर्थं शिवौ
शान्तौ कल्याणकारिणौ भवतं पूर्वोक्तविधिना ॥३॥

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽअभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥४॥

का° [५.२.६.] अग्नावग्निरिति जुहोति स्याल्याः सुवेणेति ॥ विराट् । दशाक्षरैश्चतुर्भिः पादैर्विराट् । अत्र द्वितीयतुर्यावेकादशाक्षौ (3.) ततो द्व्यधिका ॥ अग्निर्मध्यमानोऽग्नावाहवनीये प्रविष्टः सन् चरति हविर्भक्षयति । चर गतिभक्षणयोः । किम्भूतोऽग्निः ऋषीणां पुत्रः ऋत्विजो वेदविदः ऋषयः तैरुत्पादितत्वात्तेषां पुत्रवत्पुत्रः । तथा अभिशस्तिपावा अभिशस्तिर्वैकल्यनिमित्तोऽभिशापस्तस्मात्पाति रक्षतीत्यभिशस्तिपावा । आतो मनिन्निति [पा° ३.२.७४.] वनिप्प्रत्ययः । हे अग्ने स तथाविधस्त्वं नोऽस्मदर्थं स्योनः सुखरूपः सन् सुयज्ञा शोभनयागेन इहास्मिन् स्थाने देवेभ्यः इन्द्रादिभ्यः हव्यं सोमादिरूपं यज्ञ देहि अस्मद्दत्तं हविर्देवान्प्रापयेत्यर्थः । किं कुर्वन् । सदं सदा अप्रयुच्छन् अप्रमाद्यन् । युच्छ प्रमादे । स्वाहा इदमाज्यं तुभ्यं हुतमस्तु । यद्वा सोऽग्निर्नो हविर्देवेभ्यो यज्ञ यजतु ददात्विति पुरुषव्यत्ययेन वा योजना ॥४॥

II. a. आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय ।

b. अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमज्मसा (4.) सत्यमुपगेषꣳ स्विति मा धाः ॥५॥

का° [८.१.११.२०.] ध्रौवं व्रतप्रदानि गृह्णात्यापतयऽइति द्वाभ्यां स्याल्याः सुवेणेति । व्रतं प्रदीयते येन पात्रेण तत्र पात्रे ध्रुवास्थमाज्यं गृह्णीयादिति सूत्रार्थः ॥ वायुर्देवत्यं यजुः । आ समन्तात्पतति गच्छतीत्यापतिः सततगतिर्वायुस्तस्मै हे आज्य त्वां गृह्णामि ॥ किम्भूताय । परिपतये परितः पततीति परिपतिस्तस्मै सर्वव्यापिने ॥ तथा तनूनप्त्रे । तनोति विस्तारयति विश्वमिति तनूरात्मा तस्य नप्त्रे पौत्राय ॥ शाक्वराय शक्नुवन्ति स्थातुं भूतानि यत्र स शक्वर आकाशस्तस्यापत्यं शाक्वरस्तस्मै । तस्मादितस्माद्वाऽआत्मन आकाशः सम्भूत आकाशाद्वायुरिति श्रुतेः [तैत्ति° आरण्य° ८.१.] ॥ तथा शक्वने । शक्नोति सर्वं कर्तुमिति शक्वा तस्मै । अन्येभ्योऽपि दृश्यन्तऽइति [पा° ३.२.७५.] वनिप् ॥ ओजिष्ठाय । ओजो बलमस्यास्तीत्योजस्वी । अस्मायामेधास्रजो विनिरिति [पा° ५.२.१२१.] विनिप्रत्ययः । अतिशयेनौजस्वी ओजिष्ठस्तस्मै । अतिशायने तमबिष्ठनाविति [पा° ५.३.५५.]

इष्ठनि प्रत्यये विन्मतोर्लुगिति [पा° ५.३.६५.] विनो लोपे ठिलोपः ॥ ॥ यद्वास्य मन्त्रस्यार्थान्तरं तित्तिरिव्याख्यातम् । हे आज्य त्वामापतये प्राणदेवताप्रीतये गृह्णाम्यत्र पात्रे स्वीकरोमि । आ समन्तात्पाति देहं रक्षतीत्यापतिः प्राणः । तदाह तित्तिरिः । प्राणो वाऽआपतिः प्राणमेव प्रीणातीति ॥ इष्टप्राप्त्युपायमनिष्टपरिहारोपायं च चिन्तयित्वा परितः पाति पालयति परिपतिर्मनस्तत्प्रीत्यै गृह्णामि । तदाह तित्तिरिः । मनो वै परिपतिर्मन एव प्रीणातीति ॥ तनूनप्त्रे । तनूं शरीरं न पातयति न विनाशयतीति तनूनप्ता जाठरोऽग्निस्तस्मै जाठराग्निदेवताप्रीत्यै आज्य त्वां गृह्णामि ॥ शाक्वराय । शक्नुवन्ति शक्वरः शक्तिमान्पुरुषस्तस्येदं शाक्वरं शक्तिस्वरूपं तस्मै शक्तिस्वरूपाभिमानिदेवताप्रीत्यै त्वां गृह्णामि ॥ शक्वन ऽओजिष्ठाय । शक्वने इति चतुर्थी सप्तम्यर्थे । शक्वनि शक्तिमति पुरुषे यदोजिष्ठं सारं तस्मै । ओजोनामाष्टमो धातुस्तत्सारमोजिष्ठम् तद्वपुष्टम्भेनैव शरीरे शक्तिरवतिष्ठते । ओजःसाराभिमानिदेवताप्रीत्यै त्वां गृह्णामीत्यर्थः ॥ ॥ का° [८.१.२४-२६.] तानूनप्त्रमेतद्दक्षिणस्यां वेदिश्रोण्यां निधायावभृथ्यत्विजो यजमानश्चानाधृष्टमित्यद्रोहस्तेभ्य इति ॥ आज्यदेवतं यजुः । हे आज्य त्वमीदृशमसि । किम्भूतम् । अनाधृष्टमितः पूर्वं केनाप्यतिरस्कृतम् ॥ अनाधृष्यं न आधर्षितुं शक्यमितः परमप्यतिरस्कार्यम् ॥ देवानामग्न्यादीनामोजः सारभूतम् ॥ अनभिशस्ति नास्ति अभिशस्तिर्निन्दा यस्य तत् अभिपूर्वः शंसतिर्गर्हायां वर्तते ॥ अभिशस्तिपाः अभिशस्तिर्ऋत्विजां परस्परविरोधेन निन्दनं तस्याः पाति रक्षतीत्यभिशस्तिपाः । पुंस्त्वं छान्दसम् ॥ अनभिशस्तेन्यम् अनभिशस्ते अनिन्दिते स्वर्गादौ नयतीत्यनभिशस्तेनीः । द्वितीया प्रथमार्थे । पुंस्त्वं व्यत्ययेन ॥ यतस्त्वमीदृशमसि अतो हे तानूनप्त्राज्यास्मृत्विक् अञ्जसा ऋजुमार्गेण मानसकौटिल्यरहितेन सत्यमाज्यस्पर्शरूपं शपथमुपगोषमुपगच्छेयम् । उपपूर्वस्य गायतेर्लेलुक्तमैकवचने सिब्बहुलं लेटीति [पा° ३.१.३४.] सिपि इडागमे लेटोऽडाटावित्यडागमे [पा° ३.४.९४.] च रूपम् इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] इलोपः । किं च हे आज्य स्विते शोभनमार्गे यज्ञकर्मणि मा मां त्वं धाः धेहि स्थापय । दधातेर्लुङि मध्यमैकवचनेऽडभावे रूपम् ॥५॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्यतिः ॥ ६॥

का॰ [८. २. ४.] अग्ने व्रतपा इत्याहवनीये समिधमाधायेति ॥ आग्नेयं यजुः । यजमानोऽनेन यजुषाग्निशरीरात्मशरीरयोर्व्यत्ययं करोति । हे व्रतपाः सर्वेषां व्रतानां पालकाग्ने त्वे व्रतपाः (5.) त्वमस्मदीयस्य वर्तमानव्रतस्य पालको भवसीति शेषः । विभक्तेः शे आदेशे त्वे इति रूपम् । तव तथाविधस्य व्रतपालकस्य या तनूः शरीरमस्ति सेयं तनूर्मयि भवत्विति शेषः । यो या उ या च मम तनूः मदीयं शरीरं सैषा तनूस्त्वयि भवतु । तथा सति हे व्रतपते व्रतपालकाग्ने व्रतान्यनुष्ठेयानि कर्माणि नौ अग्नियजमानयोः सह प्रवर्तन्तामिति शेषः । यावान्व्रतेषु ममादरस्तावानेव तवापि भवत्वित्यर्थः । किं च । दीक्षापतिर्दीक्षायाः पालकः सोमो मे मम दीक्षामनुमन्यताम् । तथा तपस्पतिः उपसद्रूपस्य तपसः पालकः सोमः तपः मदीयमुपसद्रूपमनु मन्यतामित्यनुवर्तते ॥ ६॥

अꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्दुः प्यायतामा त्वमिन्दाय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय ॥
दृष्टा रायः प्रेषे भगायऋतमृतवादिभ्यो नमो गावापृथिवीभ्याम् ॥ ७॥

का॰[८. २. ६.] यजमानषष्ठाः सोममाप्याययत्यꣳशुरꣳशुरिति ॥ प्रकृतिः चतुरवसाना सोमदेवत्या । अत्योऽर्धर्चो लिङ्गोक्तदेवतः । चतुरशीत्यक्षरा प्रकृतिः । तत्र मन्त्रद्वयम् ॥ सोमवल्ल्या अवयवोऽꣳशुरुच्यते । वीप्सा सर्वसंग्रहार्था । हे सोम देव ते तवांशुरꣳशुः सर्वोऽप्यवयव इन्द्राय इन्द्रप्रीत्यर्थमाप्यायतां वर्धताम् चिरावस्थानेन (6.) यः सोमावयवो ह्लानः प्रुष्कश्च तदुभयं मन्त्रेणाप्यायितं भवति । तदाह तित्तिरिः । यद्दिवस्य प्रुष्यति यन्म्लायते तदेवास्यैतेनाप्याययतीति ॥ किम्भूतायेन्द्राय । एकधनविदे एकं मुख्यं धनं सोमरूपं विन्दते लभते स एकधनवित् यद्वा सोमकण्डनाय यैर्दलमानीयते ते कुम्भा एकधनाः एकं धनं सोमरूपं यत्रेति

तान्वेत्ति जानातीति सोमकण्डनाय जलकुम्भा आनीता इति जानातीत्यर्थः ॥ किं च हे सोम तुभ्यं त्वत्पानार्थमिन्द्र आप्यायतां वर्धताम् तथा हे सोम त्वमपि इन्द्रायेन्द्रपानायाप्यायस्व सर्वतो वृद्धो भव । अनेनोभयोरपि वृद्धिर्भवति । तदाहु तित्तिरिः । उभावेवेन्द्रं च सोमं चाप्याययतीति ॥ किं च हे सोम सखीन् सखिवत्प्रीतिविषयानस्मानृत्विजः सन्या मेधया चाप्याययं प्रवर्धय । सनिर्धनदानं मेधार्थधारणाशक्तिः । ऋत्विजो वाऽअस्य सखाय इत्युक्तेः सखिशब्देन ऋत्विजः । किं च हे सोम देव ते तव स्वस्ति नमोऽस्तु तव प्रसादादहं सुत्यां सोमाभिषवक्रियां समाप्तिदिनमशीय प्राप्नुयाम् ॥ ॥ का° [८.२.१.] प्रत्येत्य प्रस्तरे निह्नुवत ऽउत्तानहस्ता दक्षिणोत्ताना वेष्टा ग्राय इति । सर्वेऽपि ऋत्विजः प्रस्तरे निजहस्तानुत्तानान्कृत्वा दक्षिणाहस्तं वोत्तानमुपर्यवस्थाप्य निह्नुवते सोमं परिचरन्तीति सूत्रार्थः ॥ रायो धनानि एष्टाः आ समन्तादिष्टा अस्माकमपेक्षिताः । सोम त्वत्प्रसादादस्माकं रायः सन्विति भावः ॥ यद्वा रायः दक्षिणालक्षणा एष्टाः आ समन्ताद्दत्ताः यजते द्रुपम् दक्षिणा दास्यत इति भावः । किमर्थम् प्रेषे (7.) भगाय । प्रकर्षेणेष्यतेऽनेति प्रेट् । तस्मै प्रेष्यमाणाय भगायैश्वर्याय ॥ यद्वा प्रकर्षेण इषे अन्नाय भगाय च ॥ किं च ऋतवादिभ्योऽग्निहोत्रिभ्यः ऋतमवश्यंभाविफलोपेतं कर्म संपादयेति शेषः । ऋतं सत्यं वदन्तीति ऋतवादिनः ॥ यद्वा षष्ठ्यर्थे चतुर्थी ऋतवादिनामस्माकमृतं कर्मफलमस्त्विति शेषः ॥ द्यावापृथिवीभ्यां तदभिमानिदेवताभ्यां नमोऽस्तु । तयोरनुग्रहेण यजमानायाविघ्नस्थितिर्भवतीति नमस्क्रियते । तदाहु तित्तिरिः । द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिंलोके प्रतितिष्ठतीति ॥७॥

a. या तेऽग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत्स्वाहा ।

b. या तेऽग्ने रजःशया तनूर्वर्षिष्ठा -- स्वाहा ।

c. या तेऽग्ने हरिशया तनूर्वर्षिष्ठा -- स्वाहा ॥८॥

का° [८.२.३५.] उपसदं जुहोति स्रुवेण या तऽइति ॥ आग्नेयानि त्रीणि यजूंषि । अत्रेयमाख्यायिका अस्ति । देवैः पराजिता असुरास्तपस्तप्त्वा त्रैलोक्ये

त्रीणि पुराणि चक्रुर्लोहमयीं भूमौ राजतीमन्तरिक्षे हरिणीं दिवि । तदा देवैस्ता दग्धुमुपसदाग्निराराधितस्तत उपसद्देवतारूपोऽग्निर्यदा तासु पूर्षु प्रविश्य ता ददाह तदा तिस्रः पुरोऽग्नेस्तनवोऽभूवन् । तदभिप्रेत्यायं मन्त्रः ॥ हे अग्ने या ते तवायःशया तनूः । अयसि शेते इत्ययःशया लोहमयीत्यर्थः । लोहमयपुरव्यापित्वेन तद्रूपा सती (8.) ॥ वर्षिष्ठा देवानामतिशयेनाभिमतफलवर्षिणी ॥ तथा गह्वरेष्ठा गह्वरे असुराणां विषमे देशे तिष्ठतीति गह्वरेष्ठा । कृलदृत्तात्सप्तम्याः संज्ञायामिति [पा° ६. ३. १.] विभक्तेरलुक् ॥ सा ते तनूरुग्रं वचोऽपावधीत् । छिन्द्धि भिन्द्धीत्यादिकमसुरप्रोक्तं तीव्रं वचनं विनाशितवती ॥ तथा त्वेषं वचः असुरोक्तं देवाधिक्षेपरूपं प्रदीप्तं वाक्यमपावधीत् ॥ स्वाहा तथाविधोपकाराय तुभ्यमग्ने कृविर्दत्तम् । ततोऽसुरा एषु लोकेषु पुरश्चक्रिरे अयस्मयीमेवास्मिंल्लोके राजतामन्तरिक्षे हरिणीं दिवीत्यादिश्रुत्या [३. ४. ४. ३.] अयमितिहासो निदर्शितः ॥ उग्रत्वेषवचसोरर्थान्तरम् । यथा असुरैः पराजिता देवा अन्नपानेऽलभमानाः क्षुत्पिपासाभ्यां वयं पीडिता इति यदूचुस्तदुग्रं वचः । तथा किं वा वीरकृत्यादि महापातकमस्माभिः कृतमिति क्लिश्नन्तो यद्वाक्यं संतापहेतुत्वेन दीप्तमूचुस्तत्त्वेषं वचः । तदाह तित्तिरिः । अशनायापिपासे ह वाऽउग्रं वच एनश्च वै वीरकृत्यं च त्वेषं वच इति ॥ ॥ का° [८. २. ३८.] एवमितरेऽन्वह्ँ रज्ञःशयाꣳ हरिशयां चेति । यथा प्रथमदिने या तेऽग्नेऽयःशयेत्युपसदेवमितरे द्वितीयतृतीये उपसदौ द्वितीयतृतीयदिनयोरनुतिष्ठेत् । द्वितीयस्यामुपसदि रज्ञःशयेति तृतीयोपसदि हरिशयेति मन्त्रभेद इति सूत्रार्थः ॥ रज्ञःशया रजतमयी । हरिशया हिरण्मयी । अन्यत्पूर्ववत् ॥ ८॥

III. a. तनूर्नायनी मेऽसि । b. वित्तायनी मेऽसि ।

c. अवतान्मा नाथितात् । d. अवतान्मा व्यथितात् ।

e. विदद्ग्निर्नभो नाम । f. अग्नेऽङ्गिर आयुना नाम्नेहि ।

g. योऽस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वादधे ।

h. i. = e. f. । k. यो द्वितीयस्यां पृथिव्यामसि - - °दधे ।

l. m. = e. f. । n. यस्तृतीयस्यां पृथि° - - °दधे ॥ o. अनु त्वा देववीतये ॥९॥

का॰ [५.३.२०-२५.] शम्यामादाय चात्वालं मिमीते पूर्वेणोत्करꣳ संचरं परिक्राप्य शम्यामुदीचीं निदधाति पुरस्ताच्च दक्षिणतः प्राचीमुत्तरतश्च स्फ्येनात्तर्लिखति तप्तायनीति प्रतिमन्त्रमिति । उत्तरवेदिनिचयार्थं यत्र भूप्रदेशे मृदं खनति स प्रदेशश्चात्वाल उच्यते । तत्रोत्करात्पूर्वस्यां संचरपरिक्रियोदगग्रां शम्यां निधाय तत्प्रमाणां तत्पूर्वपार्श्वे स्फ्येन रेखां कुर्यात् तथा तत्पूर्वपार्श्वे तथैव शम्यां निधाय रेखां कुर्यात् अभ्यन्तरे एवं दक्षिणोत्तरयोरपि प्रागग्रां शम्यां निधाय रेखाद्वयं कुर्यादिति सूत्रार्थः ॥ अस्यां कंडिकायां चतुर्दश यजूंषि । तत्राद्यानि चत्वारि पृथिवीदेवत्यानि ॥ अत्र प्रथमं परिलिखति । हे पृथिवि त्वं मे ममानुग्रहार्थं तप्तायनी असि । तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी । यो हि दरिद्रः क्षेत्ररहितोऽकृमिति संतप्यते तं तापोपशान्त्यर्थं प्राप्नोषीत्यर्थः । यद्वा तप्तः सन्नरो यस्यामयति सा तप्तायनी ममासि ॥ द्वितीयं लिखति । वित्तार्थं नरो यस्यामितीति वित्तायनी । यद्वा वित्तार्थं निर्धनं पुरुषमयतीति वित्तायनी । पृथिव्यां हि प्राप्तायां सस्यनिष्पत्तिद्वारा महद्धनं लभते ॥ तृतीयं परिलिखति । हे पृथिवि नाथितात् याचितात् मा मां त्वं अवतात् रक्ष । तुह्योस्तातङ्गिति [पा॰ ७.१.३५.] हेस्तातङ्गादेशः । यथा कमपि न याचे तथा मां कुर्वित्यर्थः । नाथतिधातुर्याच्ञार्थः ॥ चतुर्थं परिलिखति । व्यथ भयचलनयोः । व्यथितात् भयाच्चलनात्स्थानभ्रंशाच्च मा मामवतात् रक्ष ॥ ॥ का॰ [५.३.२६.] विददग्निरिति चात्वाले प्रक्षरति स्फ्येनेति । प्रक्षरति मृत्तिकां खनेदित्यर्थः ॥ आग्नेयं यजुः । हे चात्वालगतमृत्तिके नभो नामाग्निर्नभःसंज्ञस्त्वदधिष्ठाताग्निर्विद्वां ज्ञानीयात् । मया खन्यमानां त्वां त्वदधिष्ठातानुज्ञानावित्यर्थः । अग्निनामोच्चारणपुरःसरं प्रक्षरेत् । तथा च श्रुतिः [३.५.१.३१.] । स वाऽअग्नीनामेव नामानि गृह्णन्क्षरतीति ॥ ॥ का॰ [५.३.२७.] अग्नेऽअङ्गिर इति पुरीषं प्रक्षरतीति (9.) । पुरीषं खाता मृत् ॥ हे अग्ने हे अङ्गिरः । अङ्गिर्गतिरस्यास्तीति अङ्गिराः । मत्वर्थे रप्रत्ययः । तत्सम्बोधनम् । हे अग्ने त्वमायुना नाम्नाभिहितः सन् एहि गच्छ । एति गच्छतीत्यायुरग्निर्नाम । अधिष्ठातर्यागतऽएवाधिष्ठेयमागच्छतीत्यग्नेरागमनादिकं प्रार्थ्यते ॥ ॥ का॰ [५.३.२८.] योऽस्यामिति निवपति पूर्वार्धे शङ्कुसंज्ञितमिति । उत्तरवेदिस्थानि मृदं निक्षिपेदित्यर्थः ॥ हे अग्ने यस्त्वमस्यां दृश्य-

मानायां पृथिव्यां भूमावसि । किं च ते तव यज्ञियं यज्ञयोग्यं यत् नामाग्निरिति प्रसिद्धमनाधृष्यं केनापि याज्ञिकेनातिरस्कृतं तेन त्वादधे तेन नाम्ना युक्तं त्वां स्थापयामि ॥ ॥ का° [५. ३. ३०. ३१.] एवं द्विरपरं द्वितीयस्यां तृतीयस्यामिति विशेष इति । यथा पूर्वैस्त्रिभिर्मन्त्रैः खात्वा कृत्वा मृत्प्रक्षिप्ता वेद्यर्थमेतत्त्रितयं पुनरपि द्विः कुर्यादिति मन्त्रयोः तत्रास्यामिति पदस्थाने द्वितीयस्यां तृतीयस्यामिति पाठविशेष इति सूत्रार्थः ॥ यद्यपि पृथिवीशब्देन भूमिरेव तथापि द्वितीयस्यामिति तृतीयस्यामिति विशेषणत्वाद्द्वितीया पृथिव्यन्तरिक्षं तृतीया पृथिवी द्यौः अन्यत्पूर्ववद्व्याख्येयम् ॥ ॥ का° [५. ३. ३२.] अनु त्वेति चतुर्थं यथार्थमाकृत्येति । यथा पूर्वस्मिन्यायत्रये मृदाकृत्य प्रक्षिप्ता एवं चतुर्थमपि प्रक्षेपणपर्यन्तं मृदाकरणं कुर्यादिति सूत्रार्थः ॥ देववीतये देवानां प्रीतये हे मृत्तिके त्वा त्वामनु पूर्वोक्तमाकरणत्रयमनुसृत्याकरामीति शेषः ॥ १ ॥

a. सिꣳह्यसि सपत्नसाꣳही देवेभ्यः कल्पस्व ।

b. सिꣳह्यसि सपत्नसाꣳही देवेभ्यः शुन्धस्व ।

c. सिꣳह्यसि सपत्नसाꣳही देवेभ्यः शुम्भस्व ॥ १० ॥

का° [५. ३. ३२.] सिꣳह्यसीति व्यूह्योत्तरवेदिꣳ शम्यामात्रीमिति । विशेषेण पांसुभिः समां करोति ॥ त्रयाणां वेदिर्देवता । वाक्पूर्वमसुरेभ्यः क्रुद्धा सिꣳही भूत्वा चचारेतीतिहासः [३. ५. १. ३२.] । सा वेदिर्मन्त्रेषूच्यते (10.) । हे उत्तरवेदे या त्वं सिंही सिंहसमाना भूत्वा सपत्नसाही सपत्नान् सकृतेऽभिभवतीति सपत्नसाही कर्मण्यण् शत्रूणामभिभवित्री असि भवसि । अतो देवेभ्यः देवोपकारार्थं कल्पस्व समर्था उत्तरवेदिरूपेण कॢप्ता भव ॥ ॥ का° [५. ३. ३७.] प्रोक्षत्युत्तरवेदिꣳ सिकताश्च प्रकिरति सिꣳह्यसीति प्रतिमन्त्रमिति ॥ हे उत्तरवेदे शुन्धस्व शुद्धा भव । शुन्ध शुद्धौ । अन्यत्पूर्ववत् ॥ हे उत्तरवेदे त्वं शुम्भस्व सिकताप्रक्षेपेण शोभिता भव । अन्यत्पूर्ववत् । शुभतिरलङ्कारार्थः ॥ १० ॥

IV. a. इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु । b. प्रचेतास्त्वा रुद्रैः पश्चात्पातु ।

c. मनोजवास्त्वा पितृभिर्दक्षिणतः पातु । d. विश्वकर्मा त्वादित्यैरुत्तरतः पातु ।

e. इदमहं तमं वार्बहिर्धा यज्ञान्निःसृजामि ॥ ११ ॥

का° [५. ४. ११.] वेद्यन्तरे स्थित्वोदङ्मुक्तरवेदिं प्रोक्षतीन्द्रघोष इति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गमिति ॥ चतुर्णां यजुषामुत्तरवेदिर्देवता । इन्द्र इति शब्देन घुष्यते विस्पष्टं कथ्यते यो देवः सोऽयमिन्द्रघोषः वसुभिः अष्टसंख्याकैर्गणदेवैर्युक्तः सन् हे उत्तरवेदे त्वा त्वां पुरस्तात्पूर्वस्यां दिशि पातु रक्षतु ॥ प्रचेताः प्रकृष्टप्रज्ञो वरुणो रुद्रैरेकादशसंख्यैर्गणदेवैः सहितः पश्चात्पश्चिमायां दिशि त्वां पातु ॥ मनोजवाः मनोवद्वेगयुक्तो यमो देवः पितृभिः स्वर्लोकवासिदेवविशेषैर्युक्तो दक्षिणतः दक्षिणस्यां दिशि त्वा त्वां पातु ॥ विश्वकर्मा विश्वानि कर्माणि जगदुत्पत्त्यादीनि यस्य स विश्वकर्मा आदित्यैः द्वादशसंख्यैर्गणदेवैः सहित उत्तरतः उत्तरस्यां दिशि त्वां पातु ॥ एकदा असुरा देवान्हन्तुमागतास्तदा देवसेनाधिपतय इन्द्रघोषादयश्चतसृषु दिक्षु तानसुरानपाकुर्वन् । तस्मादेतैर्मन्त्रैर्दिक्चतुष्टये रक्षा प्रार्थनीया । तदाह तित्तिरिः । असुरा वज्रमुद्यम्य देवानभ्यायत्त तानिन्द्रघोषो वसुभिः पुरस्तादपानुददित्यादि ॥ ॥ का° [५. ४. १२.] बर्हिर्वेदि शेषं निषिञ्चतीदमहं तमं वारिति ॥ असुरनिवारणाय येनोदकेन प्रोक्षणं कृतं तदुदकमुग्रत्वपत्त्वात्तमसमित्युच्यते । तमसमिदं वाः उदकं प्रोक्षणशेषभूतं यज्ञात् बर्हिर्धा यज्ञप्रदेशाद्बाह्यप्रदेशेऽहं निःसृजामि निक्षिपामि ॥ ११ ॥

a. सिञ्च्यसि स्वाहा । b. सिञ्च्यस्यादित्यवनिः स्वाहा ।

c. सिञ्च्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा ।

d. सिञ्च्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा ।

e. सिञ्च्यस्यावह देवान्यजमानाय स्वाहा । f. भूतिभ्यस्त्वा ॥ १२ ॥

का° [५. ४. १४.] नाभ्याः श्रोण्यंसेषु पञ्चगृहीतं जुहोत्यक्षण्या दक्षिणेऽंसे श्रोण्याः श्रोण्यामंसे मध्ये च हिरण्यं पश्यन्सिञ्च्यसीति । योऽयमुत्तरवेदेर्नाभ्याख्यो मध्यदेशस्तस्य श्रोण्यंसेषु आग्नेयैशकोणावंसौ वायव्यनैर्ऋतकोणौ श्रोणी तेषु चतुर्षु मध्ये च जुह्वां पञ्चवारं गृहीतेनाज्येन जुहुयात् कथम् अक्षण्या कोणसूत्रप्रदेशेन (11.) । तद्यथा । प्रथमं दक्षिणेऽंसे तत उत्तरश्रोणौ ततो दक्षिणश्रोणौ

तत उत्तरांसे ततो मध्ये । एवं पञ्चसु स्थानेषु हिरण्यं निधाय तदवलोकयन्यजुर्भिर्मन्त्रैर्जुहुयादिति सूत्रार्थः ॥ पञ्च यजुषां वाग्देवता । पुरा कदाचिदुत्तरवेदिर्देवता केनापि निमित्तेन देवेभ्योऽपक्रम्यासुरानप्राप्योभयोर्देवासुरसेनयोर्मध्ये सिंहरूपं धृत्वा तस्थौ । तदयं मन्त्र आह । तदुक्तं तित्तिरिणा । तेभ्योऽपक्रम्योत्तरवेदिः सिंहीरूपं कृत्वोभयानन्तरातिष्ठदिति । तदभिप्रेत्य सिंही उच्यते । हे उत्तरवेदे त्वं सिंह्यसि सिंहरूपा भवसि तादृश्यै तुभ्यं स्वाहा हविर्दत्तम् ॥ सिंह्यसि किम्भूता । आदित्यवनिः आदित्यान्वनुते संभजति प्रीणयतीत्यादित्यवनिः । अन्यत्पूर्ववत् ॥ सिंह्यसि ब्रह्मवनिः क्षत्रवनिः ब्रह्म क्षत्रं च वनुतेऽदिति ब्राह्मणजातिक्षत्रियजात्योः प्रीणयितृत्वमत्र विशेषः ॥ सिंह्यसि सुप्रजावनिः पुत्रपौत्रादिरूपायाः शोभनप्रजायाः संपादयित्री । रायस्पोषवनिः सुवर्णरजतादिधनपुष्टेः संपादयित्री ॥ सिंह्यसियज्ञमानाय यजमानोपकारार्थं देवानावहानयेति विशेषः ॥ ॥ का° [५.४. १५.] भूतिभ्यस्त्वेति स्रुचमुद्यच्छतीति ॥ भूतिभ्यः ज्ञायुज्ञाणडज्ञादिचतुर्विधभूतग्रामप्रीत्यर्थं हे होमविशेषाढ्ययुक्ते स्रुक्ः त्वामुद्यच्छामीति शेषः । तदाह तित्तिरिः । भूतिभ्यस्त्वेति स्रुचमुद्गृह्णाति यज्ञ एव देवा भूतास्तेषां तद्भागधेयं भवति तानेव तेन प्रीणातीति ॥ १२ ॥

a. ध्रुवोऽसि पृथिवीं दृꣳह । b. ध्रुवक्षितिरस्यन्तरिक्षं दृꣳह ।
c. अच्युतक्षितिरसि दिवं दृꣳह । d. अग्नेः पुरीषमसि ॥ १३ ॥

का° [५.४.१६.] नाभिं पैतुदारुवैः परिदधाति पूर्ववद्ध्रुवोऽसीति प्रतिमन्त्रमिति । पैतुदारुर्देवदारुः तदीयैः परिधिभिरुत्तरवेदेर्मध्यदेशरूपां नाभिं परिदध्यात् पूर्ववत् दर्शपौर्णमासिष्टौ यथा पश्चिमदक्षिणोत्तरेषु तथात्रापीति सूत्रार्थः ॥ त्रयाणां परिधयो देवताः । हे मध्यम परिधे त्वं ध्रुवः स्थिरोऽसि अतः पृथिवीं दृꣳह दृढीकुरु ॥ हे दक्षिण परिधे त्वं ध्रुवे स्थिरे यज्ञे क्षियति निवसति ध्रुवक्षितिरसि तस्मादन्तरिक्षं दृढीकुरु ॥ अच्युते विनाशरहिते यज्ञे क्षियति निवसतीत्यच्युतक्षित् हे उत्तरपरिधे त्वं तादृशोऽसि तस्मात् दिवं द्युलोकं दृꣳह ॥ ॥ का° [५.४.१७.] अग्नेः पुरीषमिति निवपति गुग्गुलुसुगन्धितिलतण्डुलवृन्ताकस्तुकाश्चोपरि (12.) शीर्षण्या

अभावेऽन्या इति । गुग्गुलुर्धूपद्रव्यम् सुगन्धितिऌनं तृणविशेषः वृक्षैः स्तुका अविरोमाणि । एतानि नाभौ प्रक्षिपेदिति सूत्रार्थः ॥ हे गुग्गुलुप्रभृतिसंभारसमूह त्वमग्नेः पुरीषं पूरकमसि । पूरयतीति पुरीषम् । अग्नेर्ह्येतत्पुरीषं यत्संभारा इति तित्तिरिः ॥ १३ ॥

V. युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥ १४ ॥

अस्ति तावत्प्राचीनवंशा शाला । तस्यामाहवनीयाग्न्यग्नित्रयमैष्टिकवेदिश्चास्ति । तस्याः शालायाः पुरतः षट्त्रिंशत्पददीर्घा सौमिकी वेदिर्विधेया । तद्वेद्या अग्रभागे पूर्वोक्तोत्तरवेदिः ततः पश्चान्मध्यभागे हविर्धानाख्यो मण्डपो विधेयः ततोऽपि पश्चात्सदोऽभिधानोदग्वंशा शाला निर्मितव्या । तस्याः स्थानि प्राचीनशालायाः पुरतो दक्षिणोत्तरभागयोर्हविर्धानसंज्ञके द्वे शकटे स्थापिते स्थः । तच्छकटद्वयं पुरतः प्रवर्त्य तदावरकत्वेन हविर्धानाख्यमण्डपो विधेयः । तच्छकटद्वयं सावित्रहोमादूर्ध्वं प्रवर्तनीयम् ॥ तदाह तित्तिरिः । सावित्र्यर्चा हुत्वा हविर्धानि प्रवर्तयतीति ॥ तं होमं विधत्ते कात्यायनः [८.३.२१.] । चतुर्गृहीतञ्च शालाद्वार्ये जुहोति युञ्जतऽइति स गार्हपत्योऽत इति । प्राचीनशालाया द्वारसमीपे पूर्वसिद्ध आहवनीयो वर्तते तस्मिन्जुहुयात्स च पूर्वमाहवनीयोऽपि सन्नुत्तरवेद्याख्येऽन्यस्मिन्नाहवनीये निष्पन्ने सति तदपेक्षया स्वयं गार्हपत्यो भवतीति सूत्रार्थः ॥ सावित्री जगती श्यावाश्वदृष्टा । विप्रस्य ब्राह्मणस्य यजमानस्य सम्बन्धिनो विप्रा ब्राह्मणा ऋत्विजो मनो युञ्जन्ति लौकिकचित्तान्मनो निवार्य यज्ञचित्तायां नियमयन्ति । उत धिय इन्द्रियाण्यपि यज्ञार्थेषु नियमयन्ति ॥ कीदृशस्य विप्रस्य । बृहतो महतः ॥ तथा विपश्चितः सर्वज्ञस्य । अधीतवेदत्वाद्बृहत्त्वमर्थाभिज्ञत्वाद्विपश्चित्त्वम् ॥ किम्भूता विप्राः । होत्रा होमकर्तारः ॥ तदिदं विप्राणां मनोनियमनादिसामर्थ्यमेक इत् एक एव विदधे ससर्ज । किम्भूत एकः । वयुनावित् वयुनं वेतेः कान्तिर्वा प्रज्ञा वेति [निरु° ५.१४.] यास्कोक्तेर्वयुनं प्रज्ञां सर्वभूतानां मनोवृत्तिं वेत्तीति वयुनवित् संहितायां दीर्घः सर्वधीसाक्षीत्यर्थः ॥ नन्वेकस्य सर्वसृ-

ष्टौ (13.) कथं सामर्थ्यम् । तत्राह । यतः सवितुः प्रेरकस्यान्तर्यामिणो देवस्य परिष्टुतिः सर्वदोक्ता (14.) स्तुतिः मही महती । तथा चाथर्वणिकाः । यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति ॥ बृहदारण्यकेऽपि [मा° ४.२.२४. का° ४.४.२१.] स एव सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं (15.) किं चेति ॥ श्वेताश्वतराश्च । परस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया (16.) चेति ॥ ॥ यद्वास्य मन्त्रस्यार्थान्तरम् । विप्रा ऋत्विजो विपश्चितो यज्ञस्य । कर्मणीति शेषः । मनो धियो वाचश्च युञ्जते प्रयुञ्जते । यज्ञो वै विपश्चिदिति श्रुतेः [३.५.३.११.] ॥ किम्भूतस्य विपश्चितः । विप्रस्य विशेषेण प्राति पूरयति फलमिति विप्रस्तस्य । फलदानं प्रति प्राप्तक्रियाशक्तेः । प्रा पूर्तौ । तथा बृहतः महतः सर्वसाधनसंपन्नस्य । होत्रा होतारः सप्त वषट्कर्तारः विदधे विदधते स्वस्वकर्मणीति शेषः । पुरुषवचनव्यत्ययः ॥ तन्मध्ये वयुनाविदेक इत् त्रिवेदज्ञानवान्ब्रह्माख्य एक एव । सवितुर्देवस्य मही महती परिष्टुतिः स्तवनम् । ब्रह्माख्या ऋत्विजो यत्कर्म कुर्वते तत्सवितुः प्रेरणेनेति सवितुर्महती स्तुतिरित्यर्थः ॥ १४ ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥ १५ ॥

का° [८.३.३१.] दक्षिणे वर्त्मनि दक्षिणस्यानसो हिरण्ये निधायाभिजुहोतीदं विष्णुरिति । दक्षिणशकटसम्बन्धिदक्षिणचक्रमार्गे हिरण्यं निधाय तत्रैष होमः ॥ विष्णुदेवत्या गायत्री मेधातिथिदृष्टा ॥ विष्णुः त्रिविक्रमावतारं कृत्वा इदं विश्वं विचक्रमे विभज्य क्रमते स्म । तदेवाह । त्रेधा पदं निदधे भूमावेकं पदमन्तरिक्षे द्वितीयं दिवि तृतीयमिति क्रमादग्निवायुसूर्यरूपेणेत्यर्थः । पांसवो भूम्यादिलोकरूपा विद्यन्ते यस्य तत्पांसुरं तस्मिन्पांसुरे अस्य विष्णोः पदे समूढं सम्यगन्तर्भूतं विश्वमिति शेषः ॥ यद्वायमर्थः । अस्य विष्णोः पदम् पद्यते ज्ञायतऽइति पदमद्वैताख्यं स्वरूपं समूढमन्तर्हितमज्ञातमकृतात्मभिः (17.) । कस्मिन्निव । पांसुरे-इव लुप्तोपमानम् पांसुले रजस्वले प्रदेशे निहितं यथा न ज्ञायते तद्वत् ॥ तदुक्तम् [अध्या° ६.५.] तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरय इति ॥ स्वाहा तस्मै विष्णवे हविर्दत्तम् ॥ १५ ॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या ।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥ १६॥

का° [८.३.३५.] सुक्स्थाल्यौ प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावतीऽइति पूर्ववदिति । यथा दक्षिणशकटदक्षिणचक्रमार्गे अधर्युर्हुतवान् तथा उत्तरशकटसंबन्ध्युत्तरचक्रमार्गे प्रतिप्रस्थाता जुहुयादिति सूत्रार्थः ॥ वैष्णवी त्रिष्टुब्व्यसिष्टदृष्टा ॥ हे रोदसी (18.) द्यावापृथिव्यौ युवामीदृश्यौ भूतं भवतम् भवतेर्लुङि मध्यमद्विवचने रूपम् अडभावश्छान्दसः ॥ किम्भूते युवाम् । इरावती इरावत्यौ अन्नवत्यौ सस्यवत्यौ । धेनुमती बहुधेनुयुक्ते । सुयवसिनी सुष्ठु यवसानि विद्यन्ते ययोस्ते सुयवसिनी । यवसशब्देनात्राभ्यवहार्याणि वस्तूनि (19.) । तथा मनवे दशस्या । मनुते जानातीति मनुर्ज्ञानवान्यज्ञमानः तस्मै दशस्या दात्र्यौ यज्ञसाधनानाम् दाश दाने दाशतस्ते दशस्या । असुन्प्रत्यये उपधाह्रस्वः और्विभक्तेर्यादेशश्च ॥ एवं द्यावापृथिव्यौ संप्रार्थ्य विष्णुमाह । हे विष्णो एते रोदसी त्वं व्यस्कभ्नाः विभज्य स्तम्भितवानसि । किं च पृथिवीं मयूखैः स्वतेजोरूपैर्नानाज्ञीर्विवराह्वान्यनिकावतारैर्वा अभितो दाधर्थ दधर्थ सर्वतो धारितवानसि । तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासदीर्घः [पा° ६.१.७.] ॥ स्वाहा तस्मै विष्णवे हविर्दत्तम् ॥ १६॥

a. देवश्रुतौ देवेष्वाघोषतम् ।
b. प्राची प्रेतमध्वरं कल्पयन्ती ऽऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ।
c. स्वं गोष्ठमावदतं देवी दुर्येऽआयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम् ।
d. अत्र रमेथां वर्ष्मन्पृथिव्याः ॥ १७॥

का° [८.३.३२.] दक्षिणया द्वारानीता पत्नी पाणिभ्याꣳ शेषं प्रतिगृह्याक्षधुरावनक्ति परान्देवश्रुताविति । प्रतिप्रस्थात्रा समानीता पत्नी होमशेषेणाज्येनाक्षस्योभावग्रभागावञ्ज्यादिति सूत्रार्थः ॥ अक्षधुरौ देवते ॥ देवेषु श्रूयेते देवश्रुतौ शृणोतेः क्विप्तुगागमश्च । हे देवश्रुतौ (20.) देवसभायां प्रसिद्धे अक्षधुरौ अक्षाग्रभागौ युवां यजमानोऽयं यक्ष्यतीति देवेषु आघोषतम् उच्चधनिना कथयतम् । घु-

षिरू शब्दे ॥ का° [८.४.३.] प्राची प्रेतमिति वाचयतीति । कृविर्धानाख्ये यदा प्रवर्तेते तदा यजमानं वाचयेदिति सूत्रार्थः ॥ त्रयाणां यजुषां कृविर्धनि देवते ॥ हे उभे शकटे युवां प्राची प्राञ्चौ प्रेतं प्रकर्षेण गच्छतम् प्राञ्चतस्ते प्राची । किम्भूते युवाम् । अधरं कल्पयन्ती इदं कर्म समर्थं कुर्वाणे ॥ किं च यज्ञमिममूर्ध्वं नयतमुपरिवर्तिदेवान्प्रति प्रापयतम् ॥ मा निक्रमतं मा कुटिले भवतम् कृ कौटिल्ये णिजन्तस्य लुङि रूपम् । यद्वा क्रमु चलने मा चलतम् ॥ ॥ का° [८.४.४.] स्वं गोष्ठमिति च खर्जतीति । प्रवर्त्यमानयोः शकटयोरुक्ते खर्जति धनिं कुर्वति सति स्वं गोष्ठमिति यजमानं वाचयेदिति सूत्रार्थः ॥ दुर्यशब्दो गृहवाची । गृहा वै दुर्या इति श्रुतिः [३.५.३.१८.] । तेन गृहसदृशे शकटे लक्ष्येते । हे देवी दुर्ये गृहसदृशशकटद्वयरूपे देवते स्वं गोष्ठं स्वकीयं गोस्थानमावदतम् सर्वतः कथयतम् योऽयमक्षशब्दस्तेन यजमानस्य गृहं बह्वृनां गवां यथा स्थानं भवति तथा कथयतमित्यर्थः । युवाभ्यामुच्चारितं तथैव स्यादिति भावः ॥ किं च आयुर्मा निर्वादिष्टम् यजमानस्य यावदायुरस्ति तावत्सर्वं मा निराकार्ष्टम् वदतेर्लुङि मध्यमद्विवचने रूपम् यद्वा निकृष्टं पशुधनादिरहितं मा उच्चारयतम् ॥ प्रजां मा निर्वादिष्टम् यजमानस्य प्रजां पुत्रादिरूपां मा निराकार्ष्टम् । अनेनाक्षशब्देनायुःप्रजयोर्निराकरणं मा भूदिति भावः । उभयबद्धो योऽक्षः स दुष्टवाक् वरुणदेवतारूपः । तदाह श्रुतिः [३.५.३.१८.] । वरुणो वाऽएष दुर्वागुभयतो बद्धो यदक्ष इति । तस्माद्धापत्यरूपदुर्वाक्यपरिहारायाशीर्वादरूपं सुवाक्यमनेन मन्त्रेण प्रार्थ्यते ॥ ॥ का° [८.४.५.] पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु सत्या वा नभ्यस्थेऽभिमन्त्रयतेऽत्र (21.) स्मेथामिति । वेदिनिकटस्थापिते उभे शकटे अभिमन्त्रयेदिति सूत्रार्थः ॥ हे शकटे पृथिव्याः वर्ष्मन् वर्ष्मणि भूमेः शरीरभूतेऽत्रास्मिन्देवयजने युवां स्मेथां क्रीडां कुरुताम् वर्ष्मणि स्तीर्णे वा (22.) । सुपां सुलुगिति [पा° ७.१.३९.] ङेर्लोपे न ङिसम्बुद्ध्योरिति [पा° ८.२.८.] नलोपाभावः ॥ देवयजनस्य भूमेः शरीरत्वं तित्तिरिणोक्तम् । वर्ष्म क्षेत्रत्पृथिव्या यद्देवयजनमिति ॥१७॥

a. विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि ।
योऽअस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥

b. विष्णवे त्वा ॥ १८॥

का° [८. ४. ६.] उत्तरेण परिक्रम्य दक्षिणमुपस्तभ्नाति विष्णोर्नु कमिति । दक्षिणशकटस्याग्रं वोढुमाधारभूतं काष्ठं स्थापयेदित्यर्थः ॥ तिस्रो वैष्णव्यस्त्रिष्टुभः आद्ये यजुरन्ते । विष्णवे त्वेति यजुः ॥ नुकमित्यव्ययमवधारणार्थम् । विष्णोरेव वीर्याणि कर्माण्यहं प्रवोचं प्रब्रवीमि । प्रपूर्वस्य वचेर्लुङि रूपम् वचेरुम् अडभावः ॥ कानि कर्माणीत्याह । यो विष्णुः पार्थिवानि रजांसि पृथिव्यन्तरिक्षद्युलोकस्थानानि विममे । लोका रजांस्युच्यन्तऽइति यास्कोक्तेः [निरु° ४. १९.] रजःशब्दो लोकवाचकः । यद्वा यः पार्थिवानि रजांसि पार्थिवपरमाणून्विममे परिगणितवान् । यश्च विष्णुरुत्तरमुपरितनं सधस्थं देवानां सहवासस्थानं द्युलोकरूपमस्कभायत् यथाधो न पतति तथा स्तम्भितवान् । सह देवा तिष्ठन्ति यस्मिन् तत्सधस्थम् सध मादस्थयोश्छन्दसीति [पा° ६. ३. १६.] सहस्य सधादेशः ॥ स्कम्भ रोधने । क्र्यादिभ्यः श्ना । हलः श्नः शानज्झाविति [पा° ३. १. ८३.] हेरनुवृत्तौ छन्दसि शायजपीति [पा° ३. १. ८४.] यद्यपि ह्नौ परे श्नाप्रत्ययस्य शायजादेशो विहितस्तथाप्यत्र व्यत्ययो बहुलमिति [पा° ३. १. ८५.] लञ्यपि श्नः शायजादेशे अस्कभायदिति रूपम् ॥ कीदृशो विष्णुः । त्रेधा विचक्रमाणस्त्रिषु लोकेष्वग्निवायुसूर्यरूपेण पदत्रयं निदधानः । विपूर्वस्य क्रमतेर्लिटः कानञ्वेति [पा° ३. २. १०६.] कानचि रूपम् । तथा उरुगायः उरुर्गायो गमनं यस्य उरुभिर्महात्मभिर्गीयत (23.) ऽइति वा ॥ ॥ का° [८. ४. ७.] दक्षिणतः स्थूणामुपनिकृन्ति विष्णवे त्वेति ॥ हे स्थूणे काष्ठ विष्णवे हविर्धानशकटाभिमानिविष्णुप्रीत्यर्थं त्वां निकृन्मि निखनामीति शेषः ॥ १८॥

a. दिवो वा विष्णऽउत वा पृथिव्या महो वा विष्णऽउरोरन्तरिक्षात् ।
हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्यात् ॥

b. विष्णवे त्वा ॥ १९॥

का° [८. ४. ८. १.] दिवो वेत्युत्तरं प्रतिप्रस्थातोत्तरस्थूणं (24.) पूर्ववदिति । यथाधर्युर्दक्षिणशकटं मन्त्रेणोपस्पृश्य विष्णवे त्वेति स्थूणां निखातवानेवं प्रतिप्रस्थातोत्तरशकटे कुर्यादिति सूत्रार्थः ॥ हे विष्णो दिवो द्युलोकादुत अपि च पृथि-

व्याः भूलोकात् वापि च मह्नो महतः उरोर्विस्तीर्णादन्तरिक्षलोकाद्वा समानीतेन वसुना द्रव्येण उभा हि हस्ता उभावपि स्वकीयौ हस्तौ पृणस्व पूरयस्व । ततो धनपूर्णाद्दक्षिणाद्उत सव्याद्वामाद्वस्तात् आ प्रयच्छ बहुकृत्व आवृत्य (25.) प्रकृष्टं मणिमुक्तादिधनमस्मभ्यं देहि ॥ ॥ विष्णवे त्वेत्ययं मन्त्रः पूर्ववत् ॥ ११ ॥

प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २० ॥

का° [८. ४. १३.] प्र तद्विष्णुरिति वाचयति मध्यमं हृदिरालम्भ्येति ॥ तत् स प्रसिद्धो विष्णुः वीर्येणासाधारणवीरकर्मणा प्रस्तवते प्रस्तूयते सर्वैरिति शेषः । तदिति लिङ्गव्यत्ययः । प्रस्तवते इत्यत्र व्यत्ययेन यकः स्थाने शप्रत्ययः ॥ किम्भूतो विष्णुः । मृङ्ष्व शुद्धौ मार्ष्टि शोधयतीति मृगः ॥ नोऽनर्थकः पादपूरणः ॥ भीमः बिभित्यस्मादसौ भीमः । भीमादयोऽपादानऽइति [पा° ३. ४. ७४.] मप्रत्ययः ॥ कुचरः कौ पृथिव्यां मत्स्यादिरूपेण चरतीति ॥ गिरिष्ठाः गिरि वेदवाण्यां गिरौ देहे वा तत्तर्यामिरूपेण तिष्ठतीति गिरिष्ठाः ॥ अथवा न इवार्थः । गिरिष्ठाः पर्वतस्थितः कुचरः कुत्सितचारी प्राणिबधजीवनो भीमः भयंकरो मृगो न सिंह-इव स यथा वीर्येण स्तूयते तद्वत् ॥ स को विष्णुरित्याह । यस्य विष्णोरुरुषु प्रभूतेषु त्रिषु विक्रमणेषु पादप्रक्षेपणास्पदेषु लोकेषु विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अधिक्षियन्ति अधिनिवसन्ति । स स्तूयतऽइत्यर्थः ॥ २० ॥

a. विष्णो रराटमसि । b. विष्णोः श्नप्त्रे स्थः । c. विष्णोः स्यूरसि ।
d. विष्णोर्ध्रुवोऽसि । e. वैष्णवमसि विष्णवे त्वा ॥ २१ ॥

का° [८. ४. १५.] विष्णो रराटमिति रराट्यमिति । वाचयतीत्यनुवर्तते ॥ हविर्धानाख्ये द्वे शकटे दक्षिणोत्तरभागयोः स्थापयित्वा तदावरकत्वेन परितो हविर्धानाख्यं मण्डपं कुर्यात् स च मण्डपो विष्णुदेवताकत्वाद्विष्णुरित्युपचर्यते । विष्णोश्च मूर्तिधरस्य सर्वावयवसद्भावाल्ललाटाख्योऽवयवोऽस्ति । तद्वद्धविर्धानमण्डपस्यापि पूर्वद्वारवर्तिस्तम्भयोर्मध्ये काचिद्दर्भमाला ग्रथ्यते । तां मालां तद्बन्धनाधारतिर्यग्वंशं वा संबोध्य पुरुषललाटत्वेनोपचर्यते । हे दर्भमयमालाधार वंश त्वं

विष्णोः विष्णुमूर्तित्वेनोपचरितस्य कृविर्धानमण्डपस्य रराटमसि ललाटस्थानीयो ऽसि ॥ ॥ का° [८.४.१६.] विष्णोः श्नप्त्रे स्थ इत्युङ्ख्याविति । उङ्ख्यौ रराटीप्रान्तावुपस्पृश्य वाचयेदित्यर्थः । हे रराट्यौ युवां विष्णोः विष्णुनामकस्य कृविर्धानमण्डपस्य श्नप्त्रे स्थः ओष्ठसंधिरूपे (26.) भवथः ॥ ॥ का° [८.४.१८.] द्वार्याः परिषीव्यति लस्पूञ्जनिप्रतिकृतया रज्ज्वा विष्णोः स्यूरसीति । वेकृत्सूचिसमर्पितया रज्ज्वा द्वारशाखाः सीव्यतीति सूत्रार्थः ॥ हे लस्पूञ्जनि त्वं विष्णोर्कविर्धानस्य स्यूरसि । सीव्यत्यनेनेति स्यूः सूचिः । षिवु तन्तुसंताने । क्विपि च्क्वोः शूडनुनासिके चेति [पा° ६.४.११.] वस्योऽदेशः ॥ ॥ का° [८.४.११.] विष्णोर्ध्रुवोऽसीति ग्रन्थिं करोतीति ॥ हे रज्जुग्रन्थे त्वं विष्णोः कृविर्धानस्य ध्रुवोऽसि ग्रन्थिर्भवसि ॥ ॥ का° [८.४.२१.] प्राग्वंशं कृविर्धानं निष्ठाप्य वैष्णवमसीत्यालभतऽइति । प्राग्ग्रैर्वंशैर्मण्डपं निर्मायानेन मन्त्रेण स्पृशेदिति सूत्रार्थः ॥ हे कृविर्धान त्वं वैष्णवमसि विष्णुदेवताकत्वेन तत्सम्बन्धि भवसि । तस्माद्विष्णवे विष्णुप्रीत्यर्थं त्वा त्वां स्पृशामीति शेषः ॥ २१ ॥

VI. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. आददे नार्यसि । c. इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामि ।

d. बृहन्नसि बृहद्वा बृहतीमिन्द्राय वाचं वद ॥ २२ ॥

इत उत्तरमुपरवमन्त्रा देवस्य त्वेत्यस्मात् [का° २६.] प्राक् ॥ का° [८.४.२५:५.१.] दक्षिणस्यानसोऽधः प्रऽगं खनत्युपरवानश्यादिकरोत्यवटवदिति । यथा यूपस्यावटः क्रियते तथात्राप्युपरवनामकांश्चतुरो गर्तानश्रिस्वीकारमारभ्य परिलेखनपूर्वकं कुर्यादित्यर्थः । अवटार्थमश्रिस्वीकारमेवाह का° [६.२.८.] देवस्य त्वेत्यश्रिमादायेति । अश्रिशब्देन काष्ठनिर्मितं खननसाधनमुच्यते ॥ अश्रिर्देवता । हे अश्रे सवितुर्देवस्य प्रसवे वर्तमानः सन्नश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वामाददे स्वीकरोमि ॥ त्वं तु नार्यसि खननसाधनत्वेन कर्मोपयोगित्वान्नराणां पुरुषाणामनुष्ठातॄणां संबन्धिनी भवसि ॥ ॥ का° [६.२.८.] यूपावटं परिलिखतीदमिति ॥ यदहं चतुरोऽवटान्परिलिखामि । इदमिति विभक्तिव्यत्ययः अनेन परिलेखनेन

रक्षसां यज्ञघ्नानां ग्रीवा अपिकृन्तामि कण्ठप्रदेशान् छिनद्मि ॥ ॥ का° [८.५.७.] बृहन्नसीति यथापरिलिखितं खनतीति । आग्नेयीं विदिशमारभ्य चतसृषु विदिक्षु चतुर उपरवान्खातुं भूमिः परिलिखिता । तेन परिलेखनक्रमेणावटान्खनेदिति सूत्रार्थः ॥ हे उपरवाख्य गर्त त्वं बृहन्नसि महान्भवसि वर्तुलस्य गर्तस्य प्रादेशपरिमाणेन विस्तृतत्वाद्बाहुपरिमाणेन खातत्वाच्च (27.) महत्त्वम् ॥ तथा त्वं बृहद्रवाः बृहन्महान्रवो धनिर्यस्य सः । सकारान्तो रवसूशब्दः । खातुं भूमौ प्रकरि महान्धनिर्भवतीत्यर्थः । तस्मात्वमिन्द्रायेन्द्रप्रीत्यर्थं बृहतीं वाचं वद प्रौढधनियुक्तं वाक्यं वद ॥ २२ ॥

रक्षोहणं वलगहनं वैष्णवीम् ।

e. इदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यमात्यो निचखान ।

f. इदमहं तं वलगमुत्किरामि यं मे समानो यमसमानो निचखान ।

g. इदमहं तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखान ।

h. इदमहं तं वलगमुत्किरामि यं मे सज्ञातो यमसज्ञातो निचखान ।

i. उत्कृत्यां किरामि ॥ २३ ॥

किम्भूतां वाचम् रक्षोहणं रक्षांसि हन्तीति रक्षोहा ताम् रक्षोबधविषयाम् ॥ तथा वलगहनम् वलगान्हन्तीति वलगहा ताम् बहुलं छन्दसीति [पा° ३.२.७८.] क्विप् । पराजयं प्राप्य पलायमानै रक्षसैरिन्द्रादिबधार्थमभिचारद्रव्येण भूमौ निखाता अस्थिकेशनखादिपदार्थाः कृत्याविशेषा वलगाः । वलगो वृणोतेरिति यास्कः [निरु° ६.२. (28.)] । यस्य बधार्थं क्रियते तं वृणवन्नाछादयन् गच्छतीति वलगः । ते वलगा बाहुमात्रे खातास्ततस्तद्बहिरार्थमुपरवस्य तावन्मात्रखननम् । तान्बाहुमात्रान्खनेदिति श्रुतिः [३.५.४.१.] । तदाह तित्तिरिः । असुरा वै निर्यन्तो देवानां प्राणेषु वलगान्व्यखनन् (29.) तान्बाहुमात्रे व्यविन्दन् तस्माद्बाहुमात्राः खायत्तऽइति ॥ तथा वैष्णवीम् यज्ञरक्षकस्य विष्णोः संबन्धिनीम् । ईदृशीं वाचमिन्द्राय वदेति संबन्धः ॥ ॥ का° [८.५.८.] इदमहमित्युत्किरति यथाखातं प्रतिमल्लमिति । येन क्रमेण चत्वारो गर्ताः खातास्तेन क्रमेण चतुर्भ्यो गर्तेभ्यः खातं

मृत्तृणादिकं चतुर्भिर्मन्त्रैरुत्किरेदिति सूत्रार्थः ॥ ष्ठ्यै स्त्यै शब्दसंघातयोः नितरां स्त्यायति संघातरूपेण सह वर्ततऽइति निष्ठ्यः यद्वा निर्गत्य शरीरात्स्त्यायति विस्तीर्णो भवतीति निष्ठ्यः पुत्रादिः यद्वा निर्गतो वर्णाश्रमेभ्यो निष्ठ्यः चण्डालादिः निसो गतऽइति [पा° ४. २. १०४. वा° ४.] वार्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम् । अमाशब्दो गृहार्थः सहार्थो वा अमा गृहे सह वा भवो ऽमात्यः अव्ययात्त्यबिति [पा° ४. २. १०४.] भवार्थे त्यप् धनिकस्य स्वामिनो धनगृहादिनिर्वाहको ऽमात्यः । केनापि निमित्तेन कुपितः पुत्रो ऽमात्यो वा मे मह्यं मद्वधार्थं यं वलगं निचखान निखातवान् तं वलगमहमुत्किरामि उद्धरामि उद्धृत्यान्यत्र परित्यजामि । इदंशब्दः क्रियाविशेषणम् इदं प्रत्यक्षं यथा भवति तथोद्धरामीत्यर्थः ॥ द्वितीयमुत्किरति समानो धनकुलादिभिः सदृशः असमानो न्यूनो ऽधिको वा अन्यत्पूर्ववत् ॥ तृतीयमुत्किरति सबन्धुः कुलशीलादिभिः समानो मातुलपैतृष्वसेयादिः तद्विपरीतो ऽसबन्धुः अन्यत्पूर्ववत् ॥ चतुर्थमुत्किरति सजातः समानजन्मा भ्राता तद्विपरीतो ऽसजातः अन्यत्पूर्ववत् ॥ का° [८. ५. १.] उत्कृत्यां किरामीति पश्चात्सर्वेभ्य इति । असाधारणैर्मन्त्रैः पूर्वोक्तक्रमेणोत्किरणं कृत्वा पश्चात्साधारणेन मन्त्रेण चतुर्भ्यो गर्तेभ्य उत्किरेदिति सूत्रार्थः ॥ येयं कृत्या शत्रुभिरभिचरद्भिः संपादिता वलगरूपा तामुत्किरामि उद्धृत्य दूरे क्षिपामि ॥ २३ ॥

a. स्वराडसि सपत्नहा । b. सत्रराडस्यभिमातिहा ।
c. जनराडसि रक्षोहा । d. सर्वराडस्यमित्रहा ॥ २४ ॥

का° [८. ५. १३.] स्वराडित्यभिमर्शयति (30.) यथाख्यातं प्रतिमन्त्रमिति । खननक्रमेण चतुर्षु गर्तेषु यजमानहस्तस्य स्पर्शं चतुर्भिर्मन्त्रैः कारयेदिति सूत्रार्थः ॥ चत्वारि यजूंषि औपरवाणि । तत्र प्रथमम् हे प्रथम गर्त त्वं स्वराडसि स्वेनैव राजतऽइति स्वराट् स्वयमेव राजमानो भवसि अतः सपत्नहा शत्रुघाती भवेति शेषः ॥ अथ द्वितीयम् सत्रराट् सत्रेषु द्वादशाहादिषु राजतऽइति सत्रराट् अभिमातिहा शत्रुघाती ॥ अथ तृतीयम् जनेषु यजमानेषु राजतऽइति जनराट् रक्षोहा यज्ञविनाशकराक्षसघाती ॥ अथ चतुर्थम् अमित्रहा शत्रुघाती ॥ २४ ॥

a. रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान् । b. रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान् । c. रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान् । d. रक्षोहणो वां वलगहनाऽउपदधामि वैष्णवी । e. रक्षोहणो वां वलगहनौ पर्यूहामि वैष्णवी । f. वैष्णवमसि । g. वैष्णवा स्थ ॥ २५ ॥

का° [८.५.२२.२३.] प्रोक्षत्येनान्रक्षोहण इति भेदे मन्त्रावृत्तिरिति । चतुरो गर्तान्मन्त्रेण प्रोक्षेत् तस्य मन्त्रस्य गर्तभेदे सत्यावृत्तिः कर्तव्येति सूत्रार्थः ॥ सप्त यज्ञर्षि वैष्णवानि ॥ वैष्णवान्विष्णुदेवताकान्गर्तान्वो युष्मान्प्रोक्षामि कीदृशान् रक्षोहणो राक्षसक्षत्रून्वलगहनः अभिचारसाधनक्षत्रून् ॥ का° [८.५.२४.] अवनयनेऽवस्तरणे चावटवद्रक्षोहणो रक्षोहण इति । गर्तेषु प्रोक्षणशेषोदकसेचनमवनयनम् दर्भैराछादन संस्तरणम् तयोर्द्वयोरपि क्रिययोर्गर्तभेदात्तन्मन्त्रावृत्तिर्द्रष्टव्येति सूत्रार्थः ॥ तत्रावनयनमन्त्रः अवनयामि सिञ्चयामि अन्यत्पूर्ववत् । अथावस्तरणमन्त्रः अवस्तृणामि दर्भैराछादयामि अन्यत्पूर्ववत् ॥ का° [८.५.२५.] तनूनुपरि (31.) कुशान्कृत्वाधिषवणे फलके (32.) अङ्गुलान्तरे प्रक्षालिते प्राचीऽअरत्निमात्रे संतृणे वोपदधाति पर्यूहति च रक्षोहणौ रक्षोहणाविति । ययोः फलकयोरुपरि सोमोऽभिषूयते ते द्वे अधिषवणफलके तयोरुभयोर्मध्ये अङ्गुलव्यवहिते अरत्निप्रमाणे संतृणे ईषद्बन्धनोपेते चतुर्णां गर्तानामुपरि स्थापयेत् तयोः परितो मृदा छिद्रापिधानं कुर्यादित्यर्थः ॥ तत्रोपधानमन्त्रः यावधिषवणफलकविशेषौ रक्षोहणौ रक्षसां नाशकौ वलगहनौ कृत्याविनाशकौ वैष्णवी वैष्णवौ विष्णुदेवताकौ लिङ्गव्यत्ययः तौ वां युवामहमुपदधामि द्वयोर्गर्तयोरुपरि एकैकं फलकं स्थापयामि । अथ पर्यूहणमन्त्रः पर्यूहामि मृदा परितश्छादयामि अन्यत्पूर्ववत् ॥ का° [८.५.२६.] तयोश्चर्माधिषवणं परिकृत्तञ्च सर्वरोहितं निदधाति वैष्णवमसीति । यस्मिंश्चर्मणि सोमोऽभिषूयते तच्चर्माधिषवणाख्यम् अग्रभागे छिन्नं सर्वमपि लोहितवर्णं तयोः फलकयोरुपरि स्थापयेदिति सूत्रार्थः । हे चर्म त्वं वैष्णवमसि यज्ञरक्षकविष्णुसंबन्धि भवसि ॥ का° [८.५.२७.] तस्मिन्ग्रावाणः पञ्च वैष्णवा स्थेति ।

निदधातीत्यनुवर्तते तस्मिंश्चर्मणि सोमाभिषवकेतून्पञ्च पाषाणान् स्थापयेदिति सूत्रार्थः ॥ हे ग्रावाणो यूयं वैष्णवा स्थ यज्ञरक्षकविष्णुसंबन्धिनो भवथ ॥ २५ ॥

VII. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । b. आददे नार्यसि । c. इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामि । d. यवोऽसि यवयास्मद्द्वेषो यवयारातीः । e. दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा । f. शुन्धन्तां लोकाः पितृषदनाः । g. पितृषदनमसि ॥ २६ ॥

इत उत्तरमौदुम्बरीमन्त्राः ॥ का° [८.५.३०-३२.] औदुम्बरीं मिनोति यजमानमात्रीं यूपवल्कैतिऽश्रादि करोत्यावस्तरणादिति । उदुम्बरवृक्षादुत्पन्नां कांचिच्छाखां यजमानदेहमितां सदोमण्डपमध्ये निखनेत् सा च शाखा निखननात्पूर्वं यूपवद्भूमौ शयित्वा वर्तते यूपावटखननवदग्निस्वीकारमारभ्य दर्भोपस्तरणपर्यन्तान्यदार्थान्मन्त्रैरेव कुर्यादिति सूत्रार्थः ॥ यूपावटप्रदेशे का° [६.२.८.] देवस्य त्वेत्यग्निमादायेति । व्याख्यातं यजुः ॥ का° [६.२.८.] यूपावटं परिलिखतीदमहमिति । एतदपि व्याख्यातम् ॥ का° [६.२.१५.] यवोऽसीत्यप्सु यवानोप्येति । यवदैवत्यम् हे धान्यविशेष त्वं यवोऽसि यौति पृथक्करोतीति यवः यस्मात् द्वेषो द्वेष्टॄन् शत्रून्द्वेषो दौर्भाग्यं वा अस्मत् अस्मत्तो यवय पृथक्कुरु तथा अरातीः अदानानि च यवय पृथक्कुरु । अनेन सौभाग्यं धनं च प्रार्थ्यतऽइति भावः ॥ का° [६.२.१५.१६.] प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमन्त्रं प्रोक्षामीति सर्वत्र साकाङ्क्षत्वादिति ॥ तत्र प्रथमो मन्त्रः हे औदुम्बर्ययग्रभाग दिवे द्युलोकप्रीत्यर्थं त्वा त्वां प्रोक्षामीति शेषः ॥ द्वितीयः हे मध्यभाग अन्तरिक्षायान्तरिक्षलोकप्रीत्यै त्वां प्रोक्षामि ॥ अथ तृतीयः हे मूलभाग पृथिवीप्रीत्यै त्वां प्रोक्षामि ॥ का° [६.२.१७.] अवटे शेषमासिञ्चति शुन्धन्तामिति ॥ हे यजुषी पित्र्ये पितरः सीदन्ति येषु लोकेषु ते पितृषदनाः लोकाः शुन्धन्तामनेनोदकसेचनेन शुद्धा भवन्तु । खननेनोत्पन्नस्य क्रौर्यस्य शान्त्यर्थमिदमुदकसेचनम् । तदाह तित्तिरिः । क्रूरमिव वाऽएतत्करोति यत्खनति यत्पयोऽवनयति शान्त्यै तदिति ॥ का° [६.२.१८.] बर्हींषि प्राच्युदञ्चि च प्रास्यति पितृषदनमसीति । तस्मिन्नवटे प्रागग्रानुदगग्रांश्च दर्भानास्तृणातीति सू-

चार्थः ॥ पितरः सीदन्त्युपविशन्ति यस्मिन् तत्पितृषदनम् । हे बर्हिः त्वं पितृषदनमसि ॥ २६ ॥

a. उद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्याम् । b. द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा । ब्रह्मवनिं त्वा क्षत्रवनिं रायस्पोषवनिं पर्यूहामि । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥ २७ ॥

का° [८.५.३३.] उद्दिवमित्युद्गृह्यतीति । उद्गृहणमूर्ध्वाग्रत्वेन स्थापनम् ॥ पञ्च यजूꣳष्यौदुम्बरीदेवत्यानि ॥ हे औदुम्बरि त्वं दिवं द्युलोकमुत्तभान स्तम्भय ऊर्ध्वः सन्यथा न पतति तथा कुर्वित्यर्थः । अन्तरिक्षं पृण (33.) पूरय । पृथिव्यां दृꣳहस्व दृढा भव यद्वा पृथिव्यामिति सप्तमी द्वितीयार्थे पृथिवीं दृढीकुरु ॥ का° [८.५.३४.] द्युतान इति मिनोतीति । शाखां गर्ते प्रक्षिपतीति सूत्रार्थः ॥ हे औदुम्बरि द्युतानः दीप्यमानो मारुतो वायुः ध्रुवेण स्थिरेण धर्मणा धारणेन त्वां मिनोतु गर्ते प्रक्षिपतु डुमिञ् प्रक्षेपे स्वादिः । तथा मित्रावरुणौ देवौ ध्रुवेण धर्मणा त्वां प्रक्षिपतामिति शेषः ॥ का° [८.५.३५.] पर्यूहणाद्यौपसेचनात्कृत्वेति । पर्यूहणमारभ्योपसेचनपर्यन्तं यथा यूपे कृतं तथात्रापि कुर्यादित्यर्थः । तत्र यूपस्थाने का° [६.३.१०.] ब्रह्मवनिं त्वेति पाꣳसुभिः पर्यूहतीति ॥ हे औदुम्बरि त्वा त्वां पर्यूहामि परितो मृत्तिकां क्षिपामि किम्भूतां त्वाम् ब्रह्मवनिं ब्रह्म ब्राह्मणजातिं वनति संभजतऽइति ब्रह्मवनिः क्षत्रं क्षत्रियजातिं वनतीति क्षत्रवनिः (34.) रायो धनस्य पोषं पुष्टिं वनतीति रायस्पोषवनिः सर्वत्र सुपां सुलुगिति [पा° ७.१.३९.] विभक्तेर्लुक् ॥ का° [६.३.११.] ब्रह्म दृꣳहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यूहतीति । परितो दृढीकुर्यादिति सूत्रार्थः ॥ हे औदुम्बरि ब्रह्म ब्राह्मणजातिं क्षत्रं क्षत्रियजातिमायुः जीवनं प्रजां पुत्रादिरूपां च दृꣳह दृढीकुरु ॥ २७ ॥

a. ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
b. घृतेन द्यावापृथिवी पूर्येथाम् । c. इन्द्रस्य हृदिरसि विश्वजनस्य छाया ॥ २८ ॥

का° [८.५.३५.] ध्रुवासीति वाचयत्यौडुम्बरीमालम्भ्येति । आलम्भनं स्पर्शनम् ॥ हे औडुम्बरि त्वं ध्रुवासि स्थिरा भवसि त्वमिवायं यजमानोऽस्मिन्नायतने स्वकीये गृहे ध्रुवो भूयात्प्रजया पुत्रादिकया पशुभिः गवादिभिश्च सह स्थिरोऽस्तु ॥ का° [८.५.३७.] स्रुवेण विशाखे जुहोति घृतेनेति । औडुम्बर्या विशाखे यस्मिन्प्रदेशे द्विधा शाखोत्पत्तिस्तत्र जुहुयादिति सूत्रार्थः ॥ हूयमानेनानेन (35.) घृतेन द्यावापृथिवी द्यावापृथिव्यौ पूर्येथां पूरिते भवताम् ॥ का° [८.६.१०.] इन्द्रस्य हृदिरिति मध्यमं हृदिरारोप्येति । औडुम्बरीनिखननाद्ऊर्ध्वं सदोनामकं मण्डपं निर्माय तस्योपरि प्रावरणाय मध्यं कठमारोपयेदिति सूत्रार्थः ॥ हृदिःशब्देन तृणनिर्मितः कठ उच्यते । हे तृणमय कठ त्वमिन्द्रस्य हृदिरसि इन्द्रसंबन्धी कठो भवसि अतस्त्वं विश्वजनस्य छाया भवेति शेषः । सदोमध्यवर्तिनः सर्वजनस्य यजमानऽर्ब्बिग्रूपस्य प्राणिनः प्रावरणाय छाया भवेत्यर्थः । सदस इन्द्रदेवताकत्वेन तदीयहृदिष इन्द्रसंबन्धित्वम् ॥ २८ ॥

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑ ।
वृ॒द्धायु॑मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥ २९ ॥

का° [८.६.१२.] परि त्वेति परिवार्येति । परितः कुल्यवदावरणं (36.) कृत्वेति सूत्रार्थः ॥ ऐन्द्र्यनुष्टुबनिरुक्ता मधुछन्दोदृष्टा । गीर्भिः स्तुतिभिर्वननीयो भजनीयो गिर्वणा इन्द्रः सदोऽभिमानी । हे गिर्वण इन्द्र स्तोत्रशस्त्ररूपा गिरः त्वा त्वां विश्वतः सर्वतः कठरूपेण परि भवन्तु परिगृह्णन्तु किम्भूतं त्वाम् वृद्धायुम् वृद्धा आयवो मनुष्या यजमानाद्यो मरुतो वा यस्य तम् यद्वा वृद्धः श्रेष्ठश्चासावायुश्च तं महामनुष्यम् । किम्भूताः गिरः अनुवृद्धयः (37.) अनु सवनक्रमेण वृद्धिर्यासां ताः शनैः प्रातःसवनं तत उच्चैर्माध्यन्दिनं सवनं तानस्वरेण (38.) तृतीयं सवनमिति क्रमः । किं च जुष्टयोऽस्मत्सेवास्तव जुष्टाः प्रियाः भवन्तु जुषी प्रीतिसेवनयोः जोषणं जुष्टिः ॥ २९ ॥

a. इन्द्र॑स्य॒ स्यूर॑सि । b. इन्द्र॑स्य ध्रु॒वोऽ॑सि । c. ऐन्द्र॑मसि ।
d. वैश्व॑देव॒मसि ॥ ३० ॥

का° [८. ६. १२.] परिषीवणाग्न्यभिमर्शनान्यैन्द्रैरिति । इन्द्रदेवताकैस्त्रिभिर्मन्त्रैः परिषीवणादित्रयं कुर्यादिति सूत्रार्थः ॥ तत्र प्रथमः हे रज्जो त्वमिन्द्रस्य सदोऽभिमानिद्रव्यस्य संबन्धिनी स्यूः सीवनमसि सीव्यतेऽनया सा स्यूः क्विप् ङ्योः सूडनुनासिके चेति [पा° ६. ४. १९.] ऊडादेशः ॥ द्वितीयः हे यज्ञे त्वमिन्द्रसंबन्धी भूत्वा ध्रुवः स्थिरो भवसि ॥ अथ तृतीयः हे सदः त्वमिन्द्रसंबन्धि भवसि ॥ का° [८. ६. १३. १४.] हविर्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यगारद्वारमन्तर्वेद्यर्धं भूयः सर्वं वा निष्ठाप्य वैश्वदेवमसीत्यालभतऽइति । हविर्धानमण्डपस्यापरान्तो वायव्यकोणस्तस्योत्तरभागे किंचिदाग्नीध्रनामकमग्निस्थानं कृत्वा तस्य स्पर्शं कुर्यादिति सूत्रार्थः ॥ हे आग्नीध्र त्वं सर्वदेवसंबन्धि भवसि ॥ ३० ॥

VIII. a. विभूरसि प्रवाहणः । b. वह्निरसि हव्यवाहनः । c. श्वात्रोऽसि प्रचेताः । d. तुथोऽसि विश्ववेदाः ॥ ३१ ॥

इत ऊर्ध्वं षोडश धिष्ण्यमन्त्राः ॥ तदाह का° [८. ६. १५.] धिष्ण्यान्निवपत्युद्धतावोक्षिते (39.) पुरीषं निवपति स्फ्येनान्वारब्ध उदङ् उपविश्य विभूरसीति प्रतिमन्त्रमिति । अग्नीनामाश्रयभूता मृदा निर्मिताः स्वल्पवेदिका धिष्ण्यान्युच्यन्ते ॥ का° [८. ६. १६.] आग्नीध्रीयं पूर्वमिति ॥ विभूशब्दप्रवाहणशब्दावाग्नीध्रीयधिष्ण्यस्य नामनी । ते वै द्विनामानो भवन्तीति श्रुतिः [३. ६. २. २४.] अष्टयजुषां धिष्ण्या अग्नयो देवताः । हे आग्नीध्रीय धिष्ण्य त्वं विभूः प्रवाहणश्चासि विविधं भवतीति विभूः एतस्मादेव धिष्ण्यादितरधिष्ण्येष्वग्निविहरणादेतस्य विभूत्वम् प्रवाह्यतीति प्रवाहणः तस्य हि दक्षिणोत्तरत ऋत्विजो गच्छन्ति हविषः प्रवाहयितृत्वाद्वा प्रवाहणत्वम् । धिष्ण्यगतानग्नीन्प्रत्यन्ये देवा ऊचुः प्रत्येकं स्वं नामधेयं संपादयतेति । तदाह तित्तिरिः । तान्देवा अब्रुवन्द्वे द्वे नामनी कुरुतेति ॥ मैत्रावरुणहोतृब्राह्मणाच्छंसिपोतृनेष्टृहावाकानां धिष्ण्यान् सदसि कुर्यात् । तदाह का° [८. ६. १८-२१.] षट् सदसि प्रत्यङ्मुखो द्वारमपरेण होतुर्दक्षिणपूर्वेणौडुम्बरीं मैत्रावरुणस्य होतृधिष्ण्यमुत्तरेण चतुरः समान्तरान्ब्राह्मणाच्छंसिपोतृनेष्टृहावाकानामिति ॥ होतुर्धिष्ण्यम् हे होतृधिष्ण्य वह्निर्हव्यवाहनश्चासि वहति यज्ञकर्म निर्वह-

तीति वह्निः हव्यं वहति देवान्प्रति प्रापयतीति हव्यवाहनः । यथाग्नीध्रीयधिष्ण्यस्य नामद्वयमुक्तम् तथा होत्रादिधिष्ण्यानामपि बोध्यम् ॥ मैत्रावरुणधिष्ण्यम् हे मैत्रावरुणधिष्ण्य त्वं श्वात्रः प्रचेताश्चासि श्वु क्षिप्रमततीति श्वात्रो मित्रः (40.) प्रकृष्टं चेतो ज्ञानं यस्य स प्रचेताः वरुणः तद्रूपोऽसि ॥ ब्राह्मणाछंसिनः हे ब्राह्मणाछंसिधिष्ण्य त्वं तुथो विश्ववेदाश्चासि । ब्रह्म वै तुथ इति श्रुतेः [8.३.8.१५.] ब्रह्मरूपोऽसि । विश्वं वेत्ति विश्ववेदाः सर्वज्ञः । यद्वा तुथशब्देन देवान्प्रति दक्षिणानां विभागकर्ता पुरुष उच्यते तदाह तित्तिरिः तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा विभजतीति ॥३१॥

a. उशिगसि कविः । b. अङ्गारिरसि बम्भारिः । c. अवस्यूरसि दुवस्वान् । d. शुन्ध्यूरसि मार्जालीयः । e. सम्राडसि कृशानुः । f. परिपन्थोऽसि पवमानः । g. नभोऽसि प्रतक्वा । h. मृष्टोऽसि हव्यसूदनः । i. ऋतधामासि स्वर्ज्योतिः ॥३२॥

पोतुः । हे पोतृधिष्ण्य त्वमुशिक् कामनीयः कविः विद्वांश्चासि ॥ नेष्टुः । अङ्ग स्यांहसः पापस्यारिरङ्गारिः बिभर्तीति बम्भारिः त्वं तद्रूपोऽसि हे नेष्टृधिष्ण्य । दिवि सोमरक्षको द्वावङ्गारिबम्भारी तथा च सोमरक्षकमन्त्रे स्वान धाजाङ्गरि बम्भार ऽइत्याम्नातम् [अध्या° 8.२७.] ॥ अच्छावाकस्य । हे अच्छावाकधिष्ण्य त्वमवस्यूः दुवस्वान् चासि अवोऽन्नमिच्छतीत्यवस्युः सुप आत्मनः क्यच् [पा° ३.१.८.] क्याच्छन्दसीति [पा° ३.२.१७०.] क्यङलोपे दुप्रत्ययः दीर्घश्छान्दसः औणादिक ऊप्रत्ययो वा । दुवोऽस्यास्तीति दुवस्वान् हविष्मान् दुव इति हविर्नाम अच्छावाको हि पुरोडाशभागं लभते ॥ एवं होत्रादिधिष्ण्यान् सदसि निर्माय वेदेर्दक्षिणभागे मार्जालीयं निर्माति । तदाह का° [८.६.२२.] आग्नीध्राद्दक्षिणꣳ संप्रति वेद्यक्ते दक्षिणामुखो मार्जालीयमिति । शुन्धयतीति शुन्ध्यूः मार्ष्टीति मार्जालीयः तत्र हि पात्राणि प्रक्षाल्यन्ते ॥ का° [८.६.२३.] सदोद्वारं पूर्वेण तिष्ठन्नुदिशत्याहवनीयवह्निष्यमानदेशचात्वालशामित्रौदुम्बरीब्रह्मासनशालाद्वार्यप्राज्ञहितान् सम्राडसीति प्रतिमन्त्रमिति । सदोद्वारस्य पूर्वभागेऽवस्थायाहवनीयादीन् सम्राडसीत्याद्य-

ष्टमन्त्रैः क्रमेण निर्दिशतीति सूत्रार्थः ॥ तत्रादावाहवनीयम् हे उत्तरवेदिगताहवनीय त्वं सम्राट् कृशानुश्चासि बहुविधाकृत्याधारत्वेन सम्यग्राजतऽइति सम्राट् पयोव्रतादिभिः कृशं क्षीणं यजमानमनु गच्छतीति कृशानुः ॥ बर्हिष्यवमानदेशम् हे बर्हिष्यवमानदेश त्वं परिष्यः पवमानश्चासि स्तोतुं समेता ऋत्विजः परिषत् तत्योग्यः परिष्यः अत एव शुद्धत्वात्पवमानः ॥ चात्वालम् हे चात्वाल त्वं नभोऽसि खनने छिद्ररूपत्वादाकाशः न भातीति वा । तथा प्रतक्वा प्रदक्षिणं तकन्ति गच्छन्ति ऋत्विजो यत्र स प्रतक्वा तकतिर्गत्यर्थः अन्येभ्योऽपि दृश्यन्तऽइति [पा० ३.२.७५.] वनिप् ॥ शामित्रम् पशुविशसनप्रदेशः शामित्रशब्देनोच्यते हे शामित्र त्वं मृष्टोऽसि पशुविशसनस्य विकृतित्वेनाशुद्धिकृतुत्वाभावात्सत्यपि विशसने शुद्धोऽसि यद्वा मृष्टः घृतवान्मिष्टः पक्वं हविर्मृष्टं भवति । तथा हव्यस्य हृदयनिष्क्रादिरूपस्य हविषः सूदनः पाककृतुश्चासि ॥ औदुम्बरीम् हे औदुम्बरि त्वमृतधामा ऋतं सामगानं धामोपवेशनस्थानं यस्याः सा । औदुम्बरीश्च स्रष्टोद्गायतीत्युक्तेः (41.) । स्वर्ज्योतिः उन्नतत्वेन स्वर्गे प्रकाशकः यद्वा सूर्यज्योतिः ॥ ३२ ॥

a. समुद्रोऽसि विश्वव्यचाः । b. अजोऽस्येकपात् । c. अहिरसि बुध्न्यः । d. वाग्स्येन्द्रमसि सदोऽसि । e. ऋतस्य द्वारौ मा मा संताप्तम् । f. अर्धनामधपते प्र मा तिर स्वस्ति मेऽस्मिन्पथि देवयाने भूयात् ॥ ३३ ॥

ब्रह्मासनम् हे ब्रह्मासन त्वं समुद्रः विश्वव्यचाश्चासि सर्वे देवाः सम्यगुत्कर्षेण द्रवन्त्यत्रेति समुद्रः समुद्र-इवागाधो ज्ञानेन ब्रह्मा यत्र तिष्ठतीति वा । विश्वं सर्वं यज्ञं व्यचति गच्छति कृताकृतप्रत्यवेक्षणायेति विश्वव्यचाः ॥ शालाद्वारम् हे प्राचीनवंशशालाद्वारवर्तिन्नग्ने त्वमजोऽसि अजति आहवनीयरूपेण यज्ञप्रदेशं गच्छतीत्यजः यद्वा परब्रह्मत्वमुपचर्यते न जायतऽइत्यजः । एकः पातीत्येकपात् यद्वा एकः पादः सर्वाणि भूतानि यस्येत्येकपात् पादोऽस्य विश्वा भूतानीति श्रुतेः ॥ प्राज्ञक्षितम् पत्नीशालापश्चिमभागवर्ती पुरातनो गार्हपत्योऽग्निः प्राज्ञ-

क्षित (42.) उच्यते हे प्राज्ञक्षित त्वमक्षिरसि न क्षीयतऽइत्यक्षिः शालाद्वारीये नूतने गार्हपत्ये उत्पन्नेऽपि अयमग्निः स्वरूपेण न क्षीयते । बुध्नो मूलं तत्र भवो बुध्न्यः आधानकाले प्रथममाक्षितत्वान्मूलभावित्वम् स हि प्रथमं मथ्यते ॥ नामभिरेवात्र धिष्ण्यानां स्तुतिः । उक्तं च । स्तुतिः स्वनाम्ना कर्मणा वाथ रूपैरिति ॥ का° [१. ८. २२.] वागसीति सदोऽभिमर्शनमिति ॥ हे सदः त्वं वागसि वाचास्मिन्कर्म कुर्वन्तीति वाक्शब्देनाभिदोपचारेण सद उच्यते । ऐन्द्रमिन्द्रदेवताकं चासि । सीदन्त्यस्मिन्निति सदः ॥ का° [१. ८. २३.] ऋतस्य द्वाराविति द्वार्येऽइति । द्वार्ये सदोद्वारशाखेऽभिमृशतीति सूत्रार्थः ॥ हे ऋतस्य यज्ञस्य द्वारौ द्वारदेशस्थापिन्यौ शाखे युवां मा मां मा संतासं मा संतापयतं प्रवेशनिःक्रमणे स्खलनादिना तपतेर्लुङि मध्यमैकवचने कलो कालीति [पा° ८. २. २६.] सिज्लोपे रूपम् ॥ का° [१. ८. २४. २५.] अभिमन्त्रणमुत्तरैरधनामधपतऽइति सूर्यम् । उत्तरैस्त्रिभिर्मन्त्रैस्त्रयाणामभिमन्त्रणं दर्शनमित्यर्थः तत्राधनामिति सूर्यमभिमन्त्रयतऽइति सूत्रार्थः ॥ अधपते मार्गपालक रवे अधनां मार्गाणां मध्ये वर्तमानं मा मां त्वं प्रतिर प्रवर्धय तिरतिर्वृद्ध्यर्थः । किं च अस्मिन्देवयाने देवयानप्रापके पथि यज्ञमार्गे मे मम स्वस्ति कल्याणं भूयात् ॥३३॥

a. मित्रस्य मा चक्षुषेक्षध्वम् । b. अग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन पात मांग्नयः पिपृत मांग्नयो गोपायत मा नमो वोऽस्तु मा मा हिꣳसिष्ट ॥३४॥

का° [१. ८. २६.] मित्रस्येत्यृत्विज इति । अभिमन्त्रयतऽइति शेषः ॥ हे ऋत्विजः मित्रस्यादित्यस्य चक्षुषा नेत्रेण मा मामीक्षध्वं पश्यत सख्युर्नेत्रेण वा सखा यथा सखायं हितचक्षुषा पश्यति तथा मां पश्यधमित्यर्थः ॥ का° [१. ८. २७.] अग्नयः सगरा इति धिष्ण्यानिति । अभिमन्त्रयतऽइति शेषः ॥ हे अग्नयः सगराः गृ स्तुतौ गरेण स्तुत्या सहिताः सगराः यूयं सगरेण नाम्ना स्तुतिसहितेन नाम्ना धिष्ण्या इति नाम्ना व्यवह्रियमाणत्वात्सगराः स्थ समानस्तुतयो भवथ समानो गरो येषां ते सगराः । हे अग्नयः ते यूयं रौद्रेणानीकेन शत्रुविनाशकत्वाद्रुद्रेण भवदीयेन सैन्येन मा मां पात रक्षत यद्वा रुद्रदेवत्येन मुखेन मां पात अनीकं मुखं सैन्यं

च । हे अग्नयः मा मां पिपृत धनादिभिः पूरयत । मा मां गोपायत रक्षत । अभ्यासे भूयांसमर्थं मन्यत्तऽइति यास्कोक्तेः [निरु° १०. ४२.] निरन्तरं रक्षेत्यर्थः । वो युष्मभ्यं नमोऽस्तु मा मां मा हिंसिष्ट मा वधिष्ट निर्विघ्नं यज्ञं कारयतेत्यर्थः ॥ ३४ ॥

IX. a. ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समित् । b. त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहा । c. जुषाणोऽअ-ग्नुराज्यस्य वेतु स्वाहा ॥ ३५ ॥

का° [५. ४. २६.] ध्रुवायाः पुरस्तात्पृषदाज्यमाज्यं दधिमिश्रं पञ्चगृहीतं ज्योतिरसीति समिदक्तेनेति ॥ हे आज्य त्वं ज्योतिरसि किम्भूतम् विश्वरूपं सर्वरूपं वङ्घाङ्कृतिषूपयुक्तत्वाद्विश्वरूपत्वम् आज्यत्वाद्वा दीप्यमानत्वाद्वा ज्योतिष्ट्वम् । विश्वेषां सर्वाणां देवानां समित्समिन्धनं सम्यग्दीपकम् देवा ह्याज्यं भुक्त्वा दीप्यन्ते ॥ का° [८. ७. १.] प्रद्दीप्तमिध्मं त्वꣳ सोमेति प्रचरण्यामिजुहोतीति । जुहूरिव होमसाधना काचित्स्रुक् प्रचरणीत्युच्यते ॥ अवसानरहिता सोमदेवत्या गायत्री भृगुसुतक्रतुदृष्टा । तनूं शरीरं कृन्तन्ति छिन्दन्तीति तनूकृतो राक्षसाः कृती छेदने (43.) । द्विषन्तीति द्वेषांसि दौर्भाग्यानि । अन्यैरस्मद्विरोधिभिः कृतानि प्रेरितान्यन्यकृतानि । हे सोम त्वं तेभ्यो यन्ता नियन्तासि यछतीति यन्ता यम उपरमे तृच् (44.) यथा तादृशा अस्मान्मा (45.) बाधन्ते तथास्मान्सुरक्षितप्रदेशे संस्थाप्य पालयसीत्यर्थः । तस्मात्त्वमेवास्माकमुरु प्रभूतं वरूथं बलमसि तस्मै तुभ्यमिदं हुतमस्तु सोमं नेतुं तमुद्दिश्यासावाज्याहुतिर्हुतेति भावः ॥ का° [८. ७. २.] जुषाणोऽनुरिति द्वितीयामिति । जुहोतीत्यनुवर्तते ॥ अनुदेवत्यैकपदा विराट् यजुरन्ता विराजो दश इत्युक्तेर्दशाक्षरत्वाद्विराट् । अनुश्चात्र सोमः आप्नोति पीतः सन् शरीरमित्याहुः आपू व्याप्तौ (46.) आप्नोतेर्ह्रस्वश्चेति [उणा° १. ७४.] तुप्रत्ययो धातोर्ह्रस्वश्च । जुषाणः प्रीयमाणोऽनुः सोम आज्यस्य वेतु आज्यं पिबतु कर्मण्यपीति केचित् (47.) स्वाहा तस्मै सुहुतमस्तु ॥ ३५ ॥

अग्ने नय सुपथा रायऽअस्मान्विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥३६॥

का॰ [८.७.६.] अग्ने नयेति वाचयतीति ॥ आग्नेयी त्रिष्टुबगस्त्यदृष्टा । हे अग्ने हे देव विश्वानि सर्वाणि वयुनानि मार्गान् ज्ञानानि वा विद्वान् ज्ञानानस्त्वमस्माननुष्ठातॄन्राये धनाय यज्ञफलाय सुपथा शोभनमार्गेण नय प्रापय । किं च अस्मदस्मत्तोऽनुष्ठातृभ्यः एनः पापं युयोधि पृथक्कुरु यु मिश्रणामिश्रणयोः यौतिः शपः श्लुः वा छन्दसीति [पा॰ ३.४.८८.] हेः पित्त्वपक्षे अङितश्चेति [पा॰ ६.४.१०३.] हेर्धिः पित्त्वाद्गुणः । किम्भूतमेनः जुहुराणम् कुर्हा कौटिल्ये अस्मात् कुर्हेतेः (48.) सनो लुक् हलोपश्चेति [उणा॰ २.८८.] औणादिकसूत्रेणानच्प्रत्यये ह्रूपम् कुर्हितुं कुटिलीकर्तुमिच्छतीति जुहुराणम् अभिलषितक्रियाप्रतिबन्धकमित्यर्थः । किं च ते तव भूयिष्ठां बहुलतमां नमऽउक्तिं हविषां वचनं याज्यापुरोऽनुवाक्यालक्षणां विधेम करवाम नम इत्यन्ननाम [निघ॰ २.७.] यद्वा नमस्कारविषयामुक्तिं संपादयाम ॥३६॥

अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजान्जयतु वाजसातावयꣳ शत्रून्जयतु जर्हृषाणः स्वाहा ॥३७॥

का॰ [८.७.७-९.] उत्तरेण सदो हत्वाग्नीध्रेऽग्निं निदधाति यावद्द्रोणकलशसोमपात्राणि चायं न इति जुहोत्यस्मिन्निति । शालामुखीयमग्निं यावादीनि च सदस उत्तरभागे नीत्वाग्नीध्रमण्डपे निधाय तत्रत्यधिष्ण्यगतेऽग्नौ घृतेन जुहुयादिति सूत्रार्थः ॥ आग्नेयी त्रिष्टुब्यजुरन्ता । अयमग्निर्नोऽस्माकं वरिवः धनं कृणोतु करोतु अयमेवाग्निर्मृधः संग्रामान्प्रभिन्दन्विदारयन्सन्पुर एतु अग्रतो यातु अयमेवाग्निर्वाजसातौ वाजानामन्नानां सम्भजने निमित्ते वाजान् शत्रुसंबन्धीन्यन्नानि अस्मभ्यं दातुं जयतु ततोऽयमेवाग्निर्जर्हृषाणोऽत्यर्थं हृष्यन् शत्रून् जयतु स्वाहा तुभ्यं सुहुतमस्तु (49.) ॥३७॥

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाहा ॥३८॥

का॰ [८.७.१५.] उरु विष्णविति जुहोतीति । पूर्वमन्त्रेणाग्नीध्रीये होमोऽनेन

त्याहवनीयऽइति सूत्रार्थः ॥ वैष्णव्यनुष्टुब्यनुरुक्ता । हे विष्णो व्यापिन् आहवनीय उरु विक्रमस्व शत्रुषु वङ्कुलं पराक्रमं कुरु किं च क्षयाय ब्रह्मगृहनिवासाय नोऽस्मानुरु वङ्कु यथा तथा (50.) कृधि कुरु । हे घृतयोने अग्ने घृतं पिव क्ष्यमानमिदमाज्यं भक्षय । अग्निर्यस्मै योनेरसृज्यत तस्मै घृतमुल्वमासीदिति श्रुतिर्घृतयोनित्वम् किं च यज्ञपतिं यजमानं प्रतिर अतिशयेन वर्धय प्रसमुपोदः पादपूरणऽइति [पा° ८. १. ६.] प्रशब्दस्य द्वित्वम् स्वाहा तस्मै तुभ्यं सुकृतमस्तु (51.) ॥३८॥

a. देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ।

b. एतत्त्वं देव सोम देवो देवाँ२॥ऽउपागा इदमहं मनुष्यात्सह रायस्पोषेण ।

c. स्वाहा निर्वरुणस्य पाशान्मुच्ये ॥ ३९ ॥

का° [८. ७. १७.] दक्षिणेऽनसि कृष्णाजिनमास्तीर्य तस्मिन्सोमं निदधाति देव सवितरिति । अनसि शकटे ॥ सावित्रं यजुः हे सवितः सर्वस्य प्रेरक देव एष सोमस्ते तवार्पितः तं तादृशं सोमं त्वं रक्षस्व पालय मा त्वा दभन् सोमस्य रक्षितारं त्वामसुरा मा विहिंसिषुः (52.) ॥ का° [८. ७. १८.] एतत्त्वमिति विसृज्योपतिष्ठतऽइति । कृष्णाजिने स्थापितं बद्धं सोमं विस्रस्योपस्थानं कुर्यादिति सूत्रार्थः ॥ सौम्यं यजुः हे सोम देव त्वं देवः सन्भवदीयान्देवानितदिदानीमुपागाः प्राप्तोऽसि अहं मनुष्यो यजमानो मदीयान्मनुष्यानिदमिदानीं रायः पोषेण सह पश्वादिधनेन सार्धमुपागतोऽस्मीत्यनुषङ्गः ॥ का° [८. ७. १९.] स्वाहा निरिति निष्क्रम्येति । हविर्धानमण्डपान्निर्गत्येति सूत्रार्थः ॥ हानं हा न हा अहा स्वस्याहा स्वाहा स्वात्यागः सोमेनात्मानं (53.) निःक्रीयात्मीयोऽहमस्मीत्यर्थः यद्वा स्वाहा सोमरूपमन्नं देवेभ्यो दत्तमस्तु अनेन सोमप्रदानेनाहं वरुणपाशान्निर्मुच्ये निर्मुक्तोऽस्मि ॥ ३९ ॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरयꣳ सेदुषी सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः ॥ ४० ॥

का° [८. २. ४.] अग्ने व्रतपा इत्याहवनीये समिधमाधायेति ॥ आग्नेयं यजुः यज-

मानोऽग्निशरीरेणात्मशरीरस्य कृतव्यत्ययोऽधस्तनं कर्मकलापं कृत्वाय यथा स्वशरीरं कुर्वाण आह हे अग्ने व्रतपाः स्वभावतः सर्वेषां व्रतानां पालकोऽसि (54.) तस्मात्कारणादिदानीमपि त्वे त्वं व्रतपाः मदीयव्रतस्य पालको भवेति शेषः हे अग्ने व्रतप्रार्थनकाले तव संबन्धिनी या तनूर्मयि अभूदवस्थिता सा एषा तनूः त्वयि भवत्विति शेषः यो या ऽ या च मम तनूस्त्वय्यभूत्सा इयं मयि भवतु । हे व्रतपते व्रतपालकाग्ने नौ आवयोर्व्रतानि कर्माणि यथायथं यथास्त्वं स्वसंबन्धमनतिक्रम्य सन्त्विति शेषः अनुष्ठानरूपं व्रतं ममास्तु तत्पालनरूपं व्रतं तवास्त्वित्यर्थः किं च दीक्षापतिः दीक्षायाः पालकोऽग्निः मे दीक्षां मदीयदीक्षार्थं नियममन्वमंस्त अनुमतवानङ्गीकृतवानित्यर्थः तपस्पतिः तपसः पालकोऽग्निस्तपो मदीयामुपसदमन्वमंस्तानुमतवान् ॥४०॥

X. ऽरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाहा ॥४१॥

इदानीं यूपसंपादनमन्त्राः ॥ का° [६.१.३.४.] गृह्येषु यूपाकृतिं जुहोति चतुर्गृहीताꣳ सुवेण वोरु विष्णवितीति । चतुर्गृहीतमाज्यमाहवनीये जुहोति यूपं क्षेत्तुं गमिष्यन् सा यूपाकृतिरिति सूत्रार्थः ॥ व्याख्याता ॥४१॥

a. अत्यन्याँ२॥ऽअगां नान्याँ२॥ऽउपागामर्वाक्षा परेभ्योऽविंद परोऽवरेभ्यः । तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा । b. ओषधे त्रायस्व । c. स्वधिते मैनꣳ हिꣳसीः ॥४२॥

का° [६.१.५-७.] आज्यशेषमादाय सतक्षा गच्छति यूपमभिमृशत्यत्यन्यानिति प्राङ् तिष्ठन्नभिमन्त्रयते वेति । यूपाकृतिशेषाज्ययुतो यूपतक्षणार्थं वनं गत्वा यूपमभिमृशेदभिमन्त्रयेद्वेति सूत्रार्थः ॥ वनस्पतिर्देवत्यम् । वृक्षा द्विविधाः यूप्या अयूप्याश्च पलाशखदिरबिल्वादयो यूप्याः निम्बाम्बीरादयस्त्वयूप्याः । हे पुरोवर्ति यूपवृक्ष त्वत्तोऽन्यान्कांश्चिद्यूप्यानपि समप्रदेशजन्मादिलक्षणरहितानत्यगाम् अतिक्रान्तवा-

नास्मि अन्यांश्चायूंष्यान्नोपागाम् किं च परेभ्यो वृक्षेभ्यो दूरवर्तिभ्योऽर्वाक् निकटं त्वा त्वामविदं लब्धवानस्मि अवरेभ्यो निकटेभ्यः परः परस्तादविदं विदू लाभे पुग्रादीत्यङ् [पा° ३.१.५५.] लुङि द्रूपम् किं च हे वनस्पते वनस्य पालक हे देव दीप्यमान वृक्ष देवयज्यायै देवयागार्थं तं तादृशं त्वां वयं जुषामहे सेवामहे देवा अपि देवयज्यायै त्वा जुषन्तां सेवन्ताम् ॥ का° [६.१.११.] स्रुवेणोपस्पृशति विष्णवे त्वेति ॥ हे यूपवृक्ष त्वा त्वां विष्णवे यज्ञाय उपस्पृशामीति शेषः यज्ञो वै विष्णुरिति श्रुतेः ॥ का° [६.१.१२.] ओषधऽइति कुशतरुणं तिरस्कृत्येति । यूपवृक्षस्य कुशमन्तर्धानं कुर्यादिति सूत्रार्थः ॥ हे ओषधे त्वं त्रायस्व स्वधितिभयान्मा रक्ष ॥ का° [६.१.१२.] स्वधितऽइति परशुना प्रहरतीति ॥ हे स्वधिते परशो एनं यूपं मा हिंसीः मा वधीः ॥४२॥

a. द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भव । अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय । b. अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम ॥४३॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां पञ्चमोऽध्यायः ॥ ॥

का° [६.१.१६.] द्यां मा लेखीरिति पतन्तमभिमन्त्रयतऽइति ॥ हे यूपवृक्ष द्यां द्युलोकं त्वं मा लेखीः मा हिंसीः लिख अक्षरविन्यासे इह तु हिंसार्थः अन्तरिक्षं च मा हिंसीः पृथिव्या सह संभव संगतो भव यूपस्य वज्रद्रूपत्वाल्लोकानां शान्तिराशास्यतऽइति भावः ॥ का° [६.१.१८.१९.] अयꣳ हि त्वेति शोधनमभिमन्त्रणाशेषो वाविशेषोपदेशादिति ॥ हि यस्मात् हे छिन्न वृक्ष तेतिजानोऽतितीक्ष्णोऽयं स्वधितिः कुठारो महते सौभगाय सौभाग्याय दर्शनीयत्वाय यद्वा सुभगो यज्ञः स एव सौभगः स्वार्थेऽण् यज्ञाय त्वां प्रणिनाय प्रणयति यूपत्वं प्रापयति छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] वर्तमाने लिट् । तिज निशाने अस्माद्यङ्लुगन्ताद्बहुलवचि तेतिजान इति द्रूपम् । अतस्त्वया छेदान्न भेतव्यमिति भावः ॥ का° [६.१.२०.२१.] अतस्त्वमित्यावृश्चने जुहोति यूपे वेति ॥ हे देव वनस्पते अतोऽस्मात्स्था-

णोः त्वं शतवल्शः बल्बुजुरः सन्विरोह विशेषेण जायस्व वयं च सहस्रवल्शाः पुत्रपौत्रादिभिर्बुजुशाखोपेता विरुहेम प्रजायेमहि ॥४३॥

श्रीमन्महीधरकृते वेददीपे मनोरमे । आतिथ्यात्स्थाणुहोमान्तः पञ्चमोऽध्याय ईरितः ॥५॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १॥१॥ २॥२॥ ३ [°तसाऽग्रे°] ॥३॥ ४ [अग्नाऽग्नि°] ॥४॥ ॥

II. ॥ ५ a - [वा गृह्णामि परिपतये वा गृ°] - शकमन्नोर्जिष्ठाय ॥१॥ ५ b - °शस्तेन्यम् ॥२॥ ऋज्रसा सत्यमुपगेषꣳ सुविते मा धा अग्ने व्रतपास्वे व्रतपाः ॥३॥ ६ या तवं - [या मम] - °स्पतिः ॥४॥ ७ - °प्यायस्व ॥५॥ ७ आप्यायया° - सुत्यामुदृचमशीय ॥६॥ ७ एष्टा - °दिभ्यो नमो दिवे नमः पृथिव्यै ॥७॥ ८ [हरीशया] ॥८॥१२॥ ॥

III. ॥ ९ a. b. c [व्यथितम्]. d [नाथितम्] ॥१॥ ९ e-o [विदेरग्नेर्नभो]. १० ॥२॥१४॥ ॥

IV. ॥ ११ a-d ॥१॥ ११ e. १२ a. b ॥२॥ १२ c-f ॥३॥ १३ [°हाग्नेर्भस्मास्यग्नेः पुरी°] ॥४॥१८॥ ॥

V. ॥ १४ - °ष्टुतिः ॥१॥ १५ [समूल्हम°] ॥२॥ १६ [विष्णऽएते] ॥३॥ १७ a. b ॥४॥ १७ c. d ॥५॥ १८ ॥६॥ १९ ॥७॥ २० ॥८॥ २१ ॥९॥२७॥ ॥

VI. ॥ २२ [रक्षसो]. रक्षोहणं वलगहनं वैष्णवीम् ॥१॥ २३ e-i [नः instead of मे । °मुद्वपामि instead of °मुत्किरामि] ॥२॥ २४ [°राल°] ॥३॥ २५ a. b. c [°णां वल°] ॥४॥ २५ d. e [°णां वल°]. f. g ॥५॥३२॥ ॥

VII. ॥ २६ a-e [रक्षसो] ॥१॥ २६ f. g. २७ a ॥२॥ २७ b - यूंहामि ॥३॥ २७ b ब्रह्म - °जां दृꣳह । ध्रुवासि ध्रुवोऽस्मिन्यजमान आयतने भूयात् । २८ b. c ॥४॥ २९ ॥५॥ ३० ॥६॥३८॥ ॥

VIII. ॥ ३१ ॥ १ ॥ ३२ a-d ॥ २ ॥ ३२ i. ३३ a. b. c ॥ ३ ॥ ३२ e [°रालं°] - h ॥ ४ ॥ समूह्योऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा । ३४ b - पितृत मांग्रयो नमो वोऽस्तु मा मा हिꣳसिष्ट ॥ ५ ॥ ४३ ॥ ॥

IX. ॥ ३५ ॥ १ ॥ ३६ ॥ २ ॥ ३७ [°साताऽग्र°] ॥ ३ ॥ ३८ ॥ ४ ॥ ३९ a. b - पांगाः ॥ ५ ॥ ३९ इदम° - °मुच्येऽग्ने व्रतपास्त्वे व्रतपाः ॥ ६ ॥ ४० या तवं [या मम] - °स्पतिः ॥ ७ ॥ ५० ॥ ॥

X. ॥ ४१ ॥ १ ॥ ४२ a - परेभ्यः परोऽवरेभ्यः ॥ २ ॥ ४२ a तं वो - °ज्ञवे वा ॥ ३ ॥ ४२ b. c. ४३ a - संभव ॥ ४ ॥ ४३ a अयꣳ - °गाय । b ॥ ५ ॥ ५५ ॥

॥ दशानुवाकेषु पञ्चपञ्चाशत् ॥ ॥

इति काण्वशाखायां संहितापाठे पञ्चमोऽध्यायः ॥ ॥

I. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । b. आददे नार्यसि । c. इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामि । d. यवोऽसि यवयास्मद्द्वेषो यवयारातीः । e. दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा । f. शुन्धन्तां लोकाः पितृषदनाः । g. पितृषदनमसि ॥ १ ॥

सौमिकवेदिप्रधाने पञ्चमाध्याये आतिथ्यमारभ्य यूपनिर्माणपर्यन्ता मन्त्रा उक्ताः अग्नीषोमीयपशुप्रधाने षष्ठेऽध्याये यूपसंस्कारमारभ्य सोमाभिषवोलूखलोगपर्यन्ता मन्त्रा उच्यन्ते ॥ का° [६. २. ८.] देवस्य त्वेत्यश्विभ्यामादाय यूपावटं परिलिखतीदमहमिति । [१५-१८.] यवोऽसीत्यप्सु यवानोप्य प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमन्त्रं प्रोक्षामीति सर्वत्र साकाङ्क्षत्वादवटे शेषमासिञ्चति शुन्धन्तामिति बर्हीꣳषि प्राच्युदञ्चि च (1.) प्रास्यति पितृषदनमसीति ॥ एतानि षड्मन्त्रेषु औदुम्बरीविषये [५. २६.] व्याख्यातानि ॥ १ ॥

a. अग्रेणीरसि स्वावेश उन्नेतृणामितस्त्वं वित्तादधि त्वा स्थास्यति ।

b. देवस्त्वा सविता मध्वानक्तु । c. सुपिप्पलाभ्यस्त्वौषधीभ्यः ।

d. द्यामग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीः ॥ २॥

का° [६.२.१९.] प्रथमशकलं चाग्रेणीरसीति । यूपावटे प्रथमशकलं निक्षिपेदिति सूत्रार्थः ॥ हे यूपशकल त्वमग्रेणीरसि अग्रे प्रथमं यूपस्य क्रियमानस्य नीयतेऽपनीयतऽइत्यग्रेणीः यूपस्य प्रथमावयवभूतो भवसीत्यर्थः यद्वा अग्रे प्रथमं यूपमवटं प्रति नयतीत्यग्रेणीः पुरःसरः । किम्भूतस्त्वम् उन्नेतॄणामुन्नयनकर्तॄणामध्वर्यूणां स्वावेशः सुखेनावेशयितुं शक्यः ते क्षेत्रं यूपावटे सुखेनावेशयन्ति लघुत्वात् । स त्वमेतस्य कर्मणो वित्तात्कर्मणि षष्ठी एतत्कर्म विद्धि ज्ञानीहि किं तत्कर्म यत् यूपः त्वामधि स्थास्यति त्वदुपर्यवस्थानं (1.) करिष्यति तत्त्वया वोढव्यमित्यर्थः ॥ का° [६.३.२.] देवस्य त्वेत्यनक्तीति । यूपमिति शेषः ॥ यूपदेवत्यम् हे यूप सविता देवः मधा मधुना मधुरेणाज्येन त्वा त्वामनक्तु । मधा अनित्यमागमशासनमिति नुमभावः ॥ का° [६.३.३.४.] चषालमुभयतोऽक्तं प्रतिमुञ्चति सुपिप्पलाभ्य इति । अध ऊपरि चाज्येन लिप्तं चषालं यूपाग्रे स्थापयेदिति सूत्रार्थः ॥ हे चषाल त्वां यूपस्याग्रे प्रतिमुञ्चामीति शेषः किमर्थमोषधीभ्यः व्रीह्याद्योषधिनिष्पत्त्यर्थम् किम्भूताभ्य ओषधीभ्यः सुपिप्पलाभ्यः शोभनफलयुक्ताभ्य इत्यर्थः ॥ का° [६.३.७.] द्यामग्रेणेत्युच्यतीति । उन्नतं कुर्यादित्यर्थः ॥ यूपदेवत्यम् यूपस्य महिमोच्यते हे यूप त्वमग्रेणाग्रभागेन द्यां दिवमस्पृक्षः स्पृष्टवानसि स्पृशतेर्लुङि शल इगुपधादनिटः क्स [पा° ३.१.४५.] इतिक्सप्रत्ययः । मध्येन मध्यभागेनान्तरिक्षमा अप्राः आपूरितवानसि प्रा पूरणे । उपरेणाधोभागेन अनिष्टप्रदेशेन (2.) पृथिवीं भूमिमदृंहीः दृढीकृतवानसि ॥ २॥

a. या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि ॥

b. व्रह्मवनिं त्वा क्षत्रवनिं रायस्पोषवनिं पर्यूहामि ।

c. व्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह ॥ ३॥

का° [६.३.८.] या तऽइति मिनोतीति । अवटे यूपं प्रक्षिपेदित्यर्थः ॥ यूपदेवत्या त्रिष्टुप् दीर्घतमोदृष्टा । हे यूप या यानि ते तव धामानि स्थानानि गमध्यै

गन्तुं वयमुश्मसि उश्मः कामयामहे तुमर्थे सेऽसेत्यादिना [पा° ३.४.९.] गहेतेस्तुमर्थे कध्यैन्प्रत्ययः निच्चादाद्युदात्तः । उश्मसि वश कान्तौ लटि उत्तमबहुवचने शपो लोपे संप्रसारणे इदन्तो मसीति [पा° ७.१.४६.] इकारः । यानि तव स्थानानि गन्तुं वयमिच्छाम इत्यर्थः । किं च यत्र येषु तव स्थानेषु गावो रश्मयः अयासः अयन्तीति अयाः अय गतौ गन्तारो वर्तन्ते सर्वे किरणा येषु स्थानेषु गता इत्यर्थः किम्भूता गावः भूरिशृङ्गाः भूरि बहु शृङ्गं दीप्तिर्येषां ते भूरिशृङ्गाः प्रज्वलन्नामसु [निघ° १.१७.] शृङ्गाणीति पठितम् । अस्मेत्येवार्थे विष्णोः व्यापकस्य ब्रह्मणः तत्परममुत्कृष्टं पदं भूरि महत् आदित्यमण्डललक्षणमत्रैव अवभारि अवभाति तकारस्थाने (3.) छान्दसो रेफः । यद्वा भूरि बहुप्रकारं यथा तथा अत्र अस्मिन्नेव एषेव स्थानेषु अवभाति शोभते । किम्भूतस्य विष्णोः उरुगायस्य गाङ् गतौ गानं गायः उरुर्गायो गतिर्यस्य महागतेरित्यर्थः यद्वा उरुभिर्महात्मभिर्गीयते स्तूयतेऽसावुरुगायस्तस्य । तादृशस्यानप्राप्तिहेतुभूतकर्मणि हे यूप त्वमत्रावटे तिष्ठेत्याशयः ॥ का° [६.३.१०.११.] ब्रह्मवनि त्वेति पाञ्चभिः । ब्रह्म दृढमिति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यूषतीति ॥ द्वे यजुषी औडुम्बरीविषये [५.२७.] व्याख्याते ॥३॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥४॥

का° [६.३.१२.] विष्णोः कर्माणीति वाचयति यूपमन्वारब्धमिति । यूपं स्पृष्टवन्तं यजमानं वाचयेदिति सूत्रार्थः ॥ द्वे वैष्णव्यौ गायत्र्यौ मेधातिथिदृष्टे । हे ऋत्विजः विष्णोः यज्ञाधिष्ठातुः कर्माणि सृष्टिसंहारादिचरितानि यूयं पश्यत यतो यैः कर्मभिः व्रतानि भवदीयानि लौकिकवैदिककर्माणि पस्पशे बद्धवान्निर्मितवानित्यर्थः स्पश बन्धने । स विष्णुरिन्द्रस्य युज्यः वृत्रबधादिकर्मसु योज्योऽनुरूपः सखा मित्रम् ॥ यद्वा विष्णोः यज्ञस्य कर्माणि वीर्याणि पश्यत यतो यैर्वीर्यैर्व्रतानि आधानपशुसोमादीनि कर्माणि पस्पशे आत्मनि बद्धवान् यद्वा यैर्वीर्यैर्व्रतानि कर्माणि अग्निवायुसूर्याणां स्वानि स्वानि एतान्यप्रमत्ताः कुरुतेत्येवं पस्पशे निबद्धवान् शिष्टं समानम् ॥४॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् ॥५॥

का° [६.३.१३.] तद्विष्णोरिति चषालमीक्षमाणमिति । यूपकटकं प्रेक्षमाणं यजमानं वाचयेदिति सूत्रार्थः ॥ सूरयः विद्वांसो वेदान्तपारगा विष्णोः तत्परमं पदं स्वरूपं सदा पश्यन्ति कीदृशम् दिवि आकाशे निरावरणे चक्षुरिवाततं व्याप्तम् यद्वा यत् दिवि आकाशे चक्षुरादित्यमण्डलमाततं विस्तारितम् इवोऽनर्थकः चक्षुःशब्देनान्यत्रापि मण्डलमुच्यते चक्षुर्मित्रस्य वरुणस्य [७.४२.] तच्चक्षुर्देवहितम् [३६.२४.] ॥५॥

a. परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यज्ञमानꣳ रायो मनुष्याणाम् । b. दिवः सूनुरसि । c. एष ते पृथिव्यां लोक आरण्यस्ते पशुः ॥६॥

का° [६.३.१५.] त्रिगुणा त्रिव्यामा कौशी रशना तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति । त्रिभिर्गुणैरवयवैरुपेता त्रिव्याममिता कुशसंबन्धिनी या रशना रज्जुस्तया नाभिप्रमाणे यूपप्रदेशे आवृत्तित्रयं यथा भवति तथा यूपमाविष्टयेदिति सूत्रार्थः ॥ यूपदेवत्यं यजुः हे यूप त्वं परिवीरसि परितो रशनया वीतो-वेष्टितोऽसि यद्वास्माभिः परिवारितोऽसि व्येञ् संवरणे इत्यस्य क्तप्रत्ययार्थे क्विपि संप्रसारणम् किं च दैवीर्विशः देवसंबन्धिन्यः (4.) प्रजाः मरुद्गणादयः त्वा त्वां परि व्ययन्तां परितो वेष्टयन्तु यद्वा दैवीर्विशः पशवः त्वा परिव्ययन्ताम् दैव्यो वा ऽएता विशो यत्पशव इति श्रुतेः । किं च मनुष्याणां संबन्धिन्यो रायो धनानि इमं यजमानं परि व्ययन्तां वेष्टयन्तु यद्वा मनुष्याणामिति निर्धारणे षष्ठी मनुष्याणां मध्ये रायो धनानि इमं यजमानमेव परि व्ययन्ताम् ॥ का° [६.३.१७.] यूपशकलमस्यामवगूह्योत्तरेणाग्निष्ठां दिवः सूनुरसीति । अष्टास्रे यूपस्य यास्यग्निसमीपे स्थिता साग्निष्ठा तस्या उत्तरभागे रशनायां स्वरुनामकं शकलमवसन्नेदिति सूत्रार्थः ॥ हे स्वरो त्वं दिवः द्युलोकस्य सूनुः पुत्रोऽसि द्युलोकाद्वर्षति ततो यूपो जायते यूपात्स्वरुरिति प्रणालिकया दिवः सूनुः स्वरुः ॥ का° [८.८.२३.] वर्षिष्ठादक्षिणं वितष्टं द्वादशं निदधात्येष तऽइति । यूपैकादशिनीपत्ने

वर्षिष्ठाग्रूपाद्दक्षिणभागे वितष्टमतष्टास्रिं द्वादशं यूपं निदधाति स्थापयति न तु निखनतीति सूत्रार्थः ॥ यूपदेवत्यम् हे यूप पृथिव्यामिष ते तव लोकः आश्रयस्थानमित्यर्थः । ननु पशवो वै यूपमुक्ष्यन्तीति श्रुतिः [३.७.३.४.] यूपे पशुना भवितव्यमित्यत आह ते तव आरण्योऽरण्ये भवोऽरण्यसंबन्धी पशुः वने वर्तमानः पशुस्तवैवेत्यर्थः ॥ ६॥

II. a. उपावीरसि । b. उप देवान्दैवीर्विशः प्रागुरुशिजो वक्रिंतमान् । देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥ ७॥

का° [६.३.११.] उपावीरसीति तृणमादायेति ॥ हे तृणविशेष त्वमुपावीरसि उप समीपमवति गच्छतीत्युपावीः यद्वा उप समीपेऽवस्थितोऽवति रक्षतीत्युपावीः पशोर्द्वितीयः सखा त्वमसीत्यर्थः ॥ का° [६.३.११.] तेन पशुमुपस्पृशत्युप देवानिति । गृहीतेन तृणेन पुरस्तात्प्रत्यञ्चं स्थितं पशुं स्पृशेदिति सूत्रार्थः ॥ दैवीर्विशः पशवो देवानग्नीषोमादीनुप प्रागुः उपगच्छन्तु दैव्यो वाऽएता विशो यत्पशव इति श्रुतिः । इण् गताविति्यस्माच्छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] कालमात्रे लुङ् इणो गा लुङीति [पा° २.४.४५.] गादेशः । किम्भूतान्देवान् उशिजो मेधाविनः यद्वा हवींषि कामयमानान् वक्तीति वक्रयः अतिवक्रयो वक्रिंतमास्तान् यजमानं स्वर्गं प्रति प्रापयतां देवानां मध्ये श्रेष्ठतमानित्यर्थः । एवं पशून्प्रार्थ्य त्वष्टारमाह हे देव हे त्वष्टः त्वं वसु पशुलक्षणं धनं रम रमयः छन्दस्युभयथेति [पा° ३.४.११७.] शपोऽप्यार्धधातुकसंज्ञत्वाण्णिचो लोपः । एवं त्वष्टारमुक्त्वा पुनः पशुमाह हे पशो ते तव हव्या हवींषि स्वदन्ताम् स्वद स्वादऽआस्वादने स्वादूनि भवन्तु यद्वा हवींषि स्वदन्तामास्वादयन्तु देवा इति शेषः पूर्ववर्णिचो लोपः ॥ ७॥

रेवती रमध्वं बृहस्पते धारया वसूनि ।

c. ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः ॥ ८॥

रयिर्धनं क्षीरादि यासां ता रेवत्यः लिङ्गवचनव्यत्ययः रेवन्तः रेवन्तो हि पशव इति श्रुतिः [३.७.३.१३.] हे रेवन्तः क्षीरादिधनवन्तः पशवो यूयं यजमानगृहे

रमधं संक्रीडधम् । एवं पशुमुक्त्वा बृहस्पतिमाह हे बृहस्पते हे ब्रह्मन् वसूनि पशुलक्षणानि धारया निश्चलीकुरु ब्रह्म वै बृहस्पतिः पशवो वस्विति श्रुतेः [३. ७. ३. १३.] ॥ का° [६. ३. २६.] द्विगुणरशनया द्विव्यामया कौश्या पाशं कृत्वान्तरा शृङ्गमभिदक्षिणं बध्नात्यृतस्य वेति । अवयवद्वयोपेतया व्यामद्वयपरिमितया कुशकृतया रज्ज्वा नागपाशं कृत्वा शृङ्गयोरन्तराले पशुं बध्नाति कथमभिदक्षिणम् दक्षिणशृङ्गमभिमुखं पाशं प्रतिमुञ्चेदिति सूत्रार्थः ॥ हे देवहविः देवानां हवीरूप पशो ऋतस्यावश्यंभाविफलोपेतत्वात्सत्यस्य यज्ञस्य पाशेन त्वा त्वां प्रतिमुञ्चामि बध्नामि प्रतिपूर्वे मुञ्चतिर्बन्धने वर्तते । एवं पशुं संबोध्य शमित्रे समर्पयति मानुषो धर्षा जिधृषा प्रागल्भ्ये विकरणपुरुषव्यत्ययः मानुषः शमिता धृष्णोतु शमयितुं शक्नोतु पाशेन बद्धत्वादिति भावः । संहितायां ह्रचोऽतस्तिङ इति [पा° ६. ३. १३५.] सूत्रेण धर्षेत्यत्र दीर्घः ॥ ८ ॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । b. अग्नीषोमाभ्यां जुष्टं नियुनज्मि । c. अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ १ ॥

का° [६. ३. २७.] देवस्य त्वेति यूपेऽङ्क्त इति । यूपे पशुं बध्नातीति शेष इति सूत्रार्थः ॥ अग्नीषोमदेवताभ्यां जुष्टमभिरुचितं पशुं नियुनज्मि निबध्नामि व्याख्यातमन्यत् ॥ का° [६. ३. ३०.] अद्भ्यस्त्वेति पशुं प्रोक्षणीभिः प्रोक्षतीति ॥ हे पशो अद्भ्यः ओषधीभ्यः अत्र विभक्तिव्यत्ययः अद्भिरोषधिभिश्च त्वा त्वां प्रोक्षामि मेध्यं करोमि किम्भूतं त्वाम् अग्नीषोमाभ्यां जुष्टं प्रीतम् दर्भैरपामुत्पूतत्वादोषधीनामपि प्रोक्षणसाधनत्वमस्त्येव । स्वमातृभक्षिताभ्यां तृणोदकाभ्यां पशोरुत्पन्नत्वात्तेनोभयेन प्रोक्षणं युक्तम् । तदाह तित्तिरिः अद्भ्यस्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत्पशुरिति । किं च हे पशो एवं प्रोक्षितं त्वां माता भूमिरनुमन्यतां तथा पिता द्यौरनुमन्यताम् सगर्भ्यो समानगर्भे उदरे भवः सोदरो भ्राता अनुमन्यताम् सयूथ्यः समानयूथे भवः सखा सुहृत् अनुमन्यताम् ॥ १ ॥

a. अपां पेरुरसि । b. आपो देवीः स्वदन्तु स्वात्तं चित्सदेवकविः ।

c. सं ते प्राणो वातेन गछताꣳ समङ्गानि यजत्रैः सं यज्ञपतिराशिषा ॥१०॥

का° [६.३.३१.] अपां पेरुरित्यास्यऽउपगृह्णातीति । पशोर्मुखे प्रोक्षणीर्धारयेदिति सूत्रार्थः ॥ पशुदेवतम् हे पशो त्वमपां जलानां पेरुः पानशीलोऽसि पिबतीति पेरुः औणादिक एरुप्रत्ययः उदकपानशीलो भवसि तत इदं पिबेत्यर्थः ॥ का° [६.३.३२.] आपो देवीरित्यधस्ताडुपोक्षतीति । पशोरधोभागे क्षुदि प्रोक्षेदिति सूत्रार्थः ॥ हे पशो आपो देवीः अब्रूपा देव्यः स्वदन्तु त्वामास्वादयन्तु भक्षयन्तु यद्वा आपो देव्यः स्वदन्तु पशुं भक्षयन्तु । को गुण इति चेत् स्वात्तं चित् चिदित्यव्ययं क्षेरर्थे हि यतो देवकविः देवानां कविः पशुलक्षणं स्वात्तमास्वादितं सत् शोभनं देवयोग्यं भूयादिति शेषः । अङ्गस्त्वित्यादिमन्त्रत्रयेणोपरिष्टान्मुखेऽधोभागे पशोः प्रोक्षणेन सर्वं मेध्यं करोतीति तित्तिरिणा प्रतिपादितम् तदाह उपरिष्टात्प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्तरत एवैनं मेध्यं करोत्यधस्ताडुपोक्षति सर्वमेवैनं मेध्यं करोतीति ॥ का° [६.४.२.] उत्तरमाधारमाधार्य पशुं पूर्वꣳ समनक्ति ललाटꣳसश्रोणिषु सं तऽइति प्रतिमन्त्रमिति । उत्तराधारहोमानन्तरं ध्रुवासमञ्जनादर्वागेव भाले अंसयोः श्रोण्योश्च स्रुक्केव पशुं समनक्ति सं त ऽइति त्रिभिः प्रतिमन्त्रमिति सूत्रार्थः ॥ पशुदेवतयजूंषि ॥ ललाटाञ्जनमन्त्रः हे पशो ते तव प्राणो वाक्येन वातेन संगछताम् । अथांसयोर्मन्त्रावृत्तिः अङ्गानि अंसादीनि यजत्रैः यागैः सं गछन्ताम् इज्यन्तऽइति यजत्राः । अथ श्रोण्योः यज्ञपतिर्यजमान आशिषा यज्ञफलेन संगछताम् ॥१०॥

a. घृतेनाक्तौ पशूꣳस्त्रायेथाम् । b. रेवति यजमाने प्रियं धा आविश ।

उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज सꣳस्य तन्वा भव ।

c. वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः । d. स्वाहा देवेभ्यः । e. देवेभ्यः स्वाहा ॥११॥

का° [६.४.१२.] स्वरुमादायाक्तौ स्रुक्केव ताभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविति । विशसित्रा दत्तं शासं गृहीत्वा स्वयमेव यूपात्स्वरुमादाय तावसि-

स्वद्रू जुह्वये घृतेनाक्ता ताभ्यामसिस्वरुभ्यां पशोर्ललाटं स्पृशेदिति सूत्रार्थः ॥ स्वरुशासदेवतम् हे स्वरुशासौ युवां घृतेनाक्तौ सन्तौ पशून्बह्वचनं पूजार्थम् एतं पशुं त्रयिथाम् पालयेथाम् ॥ का° [६.५.११.] रेवति यजमानञ्इति वाचयतीति । यजमानं वाचयेदित्यर्थः । वाग्देवतम् वाग्वै रेवतीति श्रुतेः [३.८.१.१२.] हे रेवति धनवति वाग्देवते यजमानेऽस्मिन्प्रियमभिप्रेतं धाः धेहि बह्वलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] । आविश ज्ञानप्रदानेन यजमानं प्रविश (5.) । किं च हे रेवति वातिन देवेन सन्नूः समानप्रीतिर्भूत्वा उरोर्विस्तीर्णादन्तरिक्षाद्यजमानं गोपायेति शेषः । किं चास्य पशुलक्षणस्य हविषस्तन्वा आत्मना यज्ञ मक्लेष्टाद्यादिरात्मन इति [पा° ६.४.१४१.] आकारलोपः । किं चास्य पशोस्तन्वा शरीरेण संभव एकीभव हे रेवति यजमानरूपेण पशुरूपेण चात्मना भूत्वात्मना च यजेति तात्पर्यार्थः ॥ का° [६.५.१५.] पश्चात्तृणमुपास्यति वर्षो वर्षीयसीति । शामित्रस्य पश्चात्प्राग्ग्रं तृणमुपास्यति हस्तस्थतृणद्वयमध्ये एकं क्षिपति विशसनीयस्य पशोर्भूमिस्पर्शपरिहारार्थमिति सूत्रार्थः ॥ तृणदेवतम् हे वर्षो वर्षाडुत्पन्न वर्षु तत्संबोधनं वर्षो वर्षप्रसव हे तृण यद्वा वर्षो विस्तीर्ण वर्षीयसि विस्तीर्णतरे यज्ञे यज्ञपतिं यजमानं धाः धेहि ॥ का° [६.५.२४.] देवेभ्यः स्वाहेति जुहोतीति । मन्त्रयोरर्थैक्येऽपि पाठभेदतात्पर्यं तित्तिरिराह । पुरस्तात्स्वाहाकृतयोऽन्ये देवा उपरिष्टात्स्वाहाकृतयोऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेति ॥११॥

III. a. माहिर्भूर्मा पृदाकुः । b. नमस्तऽआतानानर्वा प्रेहि । घृतस्य कुल्या उप ऋतस्य पथ्या अनु ॥१२॥

का° [६.५.२६.] वपाश्रपणीभ्यां नियोजनीं चात्वाले प्रास्यति माहिर्भूरिति । वपा श्रप्यते याभ्यां ते वपाश्रपण्यौ काष्ठविशेषौ ताभ्यां कृत्वा नियोजनीं पशुबन्धनरज्जुं द्विगुणां चात्वाले क्षिपेदिति सूत्रार्थः ॥ रज्जुदेवतम् हे रज्जो त्वमहिः सर्पाकारा मा भूः मा भूया पृदाकुः अजगराकारापि मा भूः ॥ का° [६.६.१.] पात्रेजनहस्तां वाचयति नयन्नमस्तऽआतानेति । पादौ निज्येते क्षाल्येते येन स पात्रेजनः पादनेजनार्थ उदककलशः पादग्रहणमन्यावयवोपलक्षणम् पात्रेजनो मुखाद्यवय-

वशोधनार्थो जलकलशो हस्ते यस्याः सा पात्रेजनहस्ता तां पत्नीं नयन्गार्हपत्य-समीपात्पशुशोधनाय नयन्सन्प्रतिप्रस्थातामुं मन्त्रं तां वाचयेदिति सूत्रार्थः ॥ यज्ञदेवतम् आ समन्तात्तन्यते विस्तार्यतेऽत्यातानो यज्ञः यज्ञो वाऽआतानो यज्ञ॰ हि तन्वतऽइति श्रुतेः [३.८.२.२.] हे आतान यज्ञ ते तुभ्यं नमः त्वमनर्वा शत्रु-रहितः सन्प्रेहि समाप्तिपर्यन्तं प्रकर्षेण गच्छ । इयर्ति बधार्थमित्यर्वा नास्त्यर्वा यस्यासावनर्वा अनर्वा प्रेहीत्यसपत्नेन प्रेहीति श्रुतेः (6.) अनर्वा प्रेहीत्याह भ्रातृव्यो वाऽअर्वा भ्रातृव्यापनुत्त्यै (7.) इति तित्तिरिवाक्यात् । किं च ऋतस्य यज्ञस्य पथ्याः पथि भवाः घृतस्य कुल्याः घृतनदीः अनुलक्ष्य उप प्रेहि गच्छ सांनाय्यपृषदाज्यकुल्योपलक्षणार्थं घृतकुल्याग्रहणम् अत्र यज्ञे बहु घृतमाहुतमित्यभिप्रायः ॥ १२ ॥

देवीरापः शुद्धा वो॑ढ्वꣳ सुपरिविष्टा देवेषु । सुपरिविष्टा वयं परिविष्टारो भूयास्म ॥ १३ ॥

एवं यज्ञं स्तुवेदानीमापः स्तूयन्ते । अर्धमर्धदेवत्यमर्धमाशीर्देवतम् हे आपो देव्यः यूयं देवेषु वोढ्वं पशुमिति शेषः एनं पशुं देवान्प्रति वहत प्रापयत वह प्रापणे अस्य लुडि तडि मध्यमबहुवचने अडभावे हूपम् किम्भूता यूयम् शुद्धाः स्वभावतः तथा सुपरिविष्टाः साधु परितः सर्वतो निविष्टाः पात्रेजनीपात्रे । किं च वयमपि सुपरिविष्टाः देवेष्विति पदमिहाप्यनुवर्तते वयमपि देवेषु मध्येऽवस्थितास्तैरेव देवैः सुपरिविष्टाः तर्पिताः सन्तस्तेषामेव देवानां परिविष्टारः परिवेषणकर्तारो भूयास्मेत्याशीः ॥ १३ ॥

a. वाचं ते शुन्धामि । b. प्राणं ते शुन्धामि । c. चक्षुस्ते शुन्धामि ।
d. श्रोत्रं ते शुन्धामि । e. नाभिं ते शुन्धामि । f. मेढ्रं ते शुन्धामि ।
g. पायुं ते शुन्धामि । h. चरित्राꣳस्ते शुन्धामि ॥ १४ ॥

का॰ [६.६.२.३.] पशोः प्राणांकुन्धति पत्नी मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान्त्सꣳस्कृत्य वाचं ते शुन्धामीति प्रतिमन्त्रमिति । पत्नी पशुसमीप

ऽउपविश्य मृतस्य पशोः प्राणान्मुखादीन्यष्टौ प्राणायतनानि प्रतिमन्त्रं शुन्धति शोधयति अद्भिः स्पृशतीति सूत्रार्थः ॥ पशुदेवतानि । हे पशो अक्तं ते तव वाचं वागिन्द्रियं शुन्धामि शोधयामि । एवमग्रेऽपि प्राणं प्राणवायुं प्राणेन्द्रियम् चक्षुरिन्द्रियम् श्रोत्रेन्द्रियम् नाभिं नाभिछिद्रम् मेढ्रं लिङ्गम् पायुं गुदम् चरन्ति गच्छन्त्येभिरिति चरित्राः पादाः एवं ब्रह्मीयानि सर्वेन्द्रियाणि शुन्धामि ॥ १४ ॥

a. मनस्तऽआप्यायताम् । b. वाक्तऽआप्यायताम् । c. प्राणास्तऽआप्यायताम् । d. चक्षुस्तऽआप्यायताम् । e. श्रोत्रं तऽआप्यायताम् । f. यत्ते क्रूरं यदास्थितं तत्तऽआप्यायतां निष्ट्यायतां तत्ते शुध्यतु । g. शमक्तोभ्यः । h. ओषधे त्रायस्व । i. स्वधिते मैनꣳ हिꣳसीः ॥ १५ ॥

का° [६. ६. ४. ५.] शेषेण यजमानश्च शिरःप्रभृत्यनुषिञ्चतो मनस्तऽइति शिर इति । पात्रेऽनशेषेण यजमानः चकारादध्वर्युश्च पशोः शिरआद्यङ्गान्यनुषिञ्चतः तत्र शिरसो मन्त्रमाह मनस्तऽइति शिर इति सूत्रार्थः ॥ पशुदेवतानि । हे पशो ते तव मनः आप्यायतां शाम्यतु । विलिङ्गत्वादस्य विनियोग उक्तः वाक्तऽआप्यायतामित्यादिमन्त्राणां लिङ्गादेव विनियोगः सिद्ध इति सूत्रकृता नोक्तः । वाक्तऽइति मुखम् प्राणास्तऽइति नासिके चक्षुस्तऽइति चक्षुषी श्रोत्रं तऽइति कर्णौ एतानि मुखादीनि तव शाम्यन्तु ॥ का° [६. ६. ६.] यत्ते क्रूरमित्यङ्गानीति । सर्वाङ्गान्यवशिष्टान्यनुषिञ्चत इत्यर्थः ॥ हे पशो यत्ते तव क्रूरं बन्धननिरोधादिकं क्रूरमस्माभिः कृतं यच्च आस्थितं छेदादिकं कर्तुमुपस्थितं शमित्रा तत्सर्वं ते तवाप्यायतां शाम्यतु । किं च तत्सर्वं निष्ट्यायतां संहतं भवतु ष्ट्यै संघाते अनुत्नं भवत्वित्यर्थः तत्सर्वं तव शुध्यतु शुद्धं भवतु ॥ का° [६. ६. ७.] शमक्तोभ्य इति पश्चात्पशोर्निषिञ्चत इति । पशोर्ज्ञपनदेशे पात्रेऽनशेषमुभावपि निषिञ्चतामिति सूत्रार्थः ॥ अक्तोभ्यः दिवसादिकालविशेषेभ्यः शं सुखमस्माकं पशोर्वा भूयादिति शेषः ॥ का° [६. ६. ८.] उत्तानं पशुं कृत्वाग्रेण नाभिं तृणं निदधात्योषधऽइति । नाभेरग्रेऽङ्गुलचतुष्टये तृणं निदध्यादिति सूत्रार्थः ॥ मन्त्रो व्याख्यातः [8. १.] ॥ का° [६. ६. १.] स्वधितऽइति प्रज्ञातयाभिनिधाय छिन्नेति । प्रज्ञातया प्रस्तुतया कृतचिह्नया

घृताक्तयासिधारयाभिनिधाय तूष्णीं सतृणामुदस्यं छिन्द्यादिति सूत्रार्थः ॥ एनं पशुं स्वधिते मा हिंसीः ॥१५॥

a. रक्षसां भागोऽसि । b. निरस्तꣳ रक्षः । c. इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाधऽइदमहꣳ रक्षोऽधमं तमो नयामि । d. घृतेन द्यावापृथिवी प्रोर्णुवाथाम् । e. वायो वे स्तोकानाम् । f. अग्निराज्यस्य वेतु स्वाहा । g. स्वाहाकृतेऽऊर्धनभसं मारुतं गच्छतम् ॥१६॥

का° [६. ६. १.] अग्रꣳ सव्ये कृत्वा दक्षिणेन मूलमुभयतोऽनक्ति लोहितेन रक्षसामिति । यत्तृणं नाभ्यग्रे स्थापितं तस्य छिन्नस्य तृणस्याग्रं वामहस्तेन धृत्वा दक्षिणहस्तेन मूलं धृत्वा तद्द्विगुणीकृत्याग्रे मूले च पशुच्छेदननिष्पन्नेन रक्तेनाङ्क्त्यादिति सूत्रार्थः ॥ रक्षोदेवत्यम् हे लोहितार्क्त तृण त्वं रक्षसां भागोऽसि ॥ का° [६. ६. १०.] निरस्तमित्यपास्यतीति । लोहितार्क्तं तृणमुत्करे त्यजेदिति सूत्रार्थः ॥ यज्ञविघातकं रक्षोऽस्ति तन्निरस्तं परित्यक्तम् ॥ का° [६. ६. ११.] इदमहꣳमित्यभितिष्ठति यजमान इति । उत्करे क्षिप्तं रुधिरार्क्तं तृणं यजमानोऽभितिष्ठतीति सूत्रार्थः ॥ यत्तृणरूपं रक्षोऽध्वर्युणा निरस्तं तदिदं रक्षोऽहं यजमानोऽभितिष्ठामि अभितः पादिनोत्क्रम्य तिष्ठामि । न केवलमभितिष्ठामि किं तु अहमिदं रक्षोऽवबाधे अवाचीनं यथा भवति तथा नाशयामि किं च अहमिदं रक्षोऽधममत्यन्तनिकृष्टं तमो नरकं नयामि प्रापयामि ॥ का° [६. ६. १२.] वपामुत्खिद्य वपाश्रपणौ प्रोर्णोतीति घृतेन द्यावापृथिवीऽइति । पशूदराद्वपां निष्काश्य तया वपया वपाश्रपणावाच्छादयेदिति सूत्रार्थः ॥ वपाश्रपणयोर्द्यावापृथिव्यावध्यस्ते उच्येते हे द्यावापृथिवी युवां घृतेनोदकेनात्मानं प्रोर्णुवाथामाच्छादयेथां परस्परम् ऊर्णुञ् आच्छादने । आकृतिपरिणामाभिप्रायमेतत् तथा चोक्तम् ते वाऽएतेऽआकृती कृतेऽउत्क्रामत इत्युपक्रम्याकृतिपरिणाममिदं जगदिति ॥ का° [६. ६. १५.] तृणाग्रं चाधर्युर्वायो वेरिति । वामहस्तधृतं तृणाग्रमाहवनीये क्षिपेदिति सूत्रार्थः ॥ वायुदेवतम् हे वायो त्वं स्तोकानां वपासंबन्धिनां विप्रुषां वेः कर्मणि षष्ठी स्तोकान्विद्धि जानीहि ज्ञात्वा च पिबेत्यर्थः ते द्यत्र तिष्ठन्ति । विदि ज्ञाने इत्यस्य तुदि

मध्यमैकवचने दश्चेति [पा° ८. २. ७५.] दस्य रुत्वे कृते वूपम् अडभाव आर्षः वेः विद्धि ॥ का° [६. ६. १७.] वपाञ्च स्रुवेणाभिघारयत्यग्निराज्यस्येति ॥ अग्निराहवनीयः आज्यस्य वेतु आज्यं पिबतु स्वाहा सुकृतमस्तु ॥ का° [६. ६. २८.] कृत्वा वपाश्रपणावनुप्रास्यति प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृतेऽइति । वपां कृत्वोत्तरत उपविश्य वपाश्रपणावाहवनीयऽएव क्षिपेत् तत्प्रकारः विशाखां द्विशृङ्गां प्रागग्रां क्षिपेत् इतरामेकशृङ्गां प्रत्यगग्रामिति सूत्रार्थः ॥ स्वाहाकारिणाकृतिभावमुपगते सत्यौ युवां मारुतं गच्छतं वायुं प्राप्नुतां वायुर्हि प्रतिष्ठा यज्ञस्य । किम्भूतम् ऊर्धनभसमूर्ध्वं नभ आकाशो यस्य स ऊधनभाः तम् नभोमध्ये वर्तमानमित्यर्थः ॥ १६ ॥

इदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणाम् । आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥ १७ ॥

का° [६. ६. २९.] चात्वाले मार्ष्टयन्ते सपत्नीका इदमापः प्रवहतेति । सर्वे ऋत्विजः चात्वालसमीपेऽद्भिरात्मानमभ्युक्षन्तीति सूत्रार्थः ॥ अब्देवत्या ऋवसाना महापङ्क्तिः पावमानश्चात्र्यः पादः यस्याः षट् पादा अष्टाक्षराः सा महापङ्क्तिः । हे आपः इदं पशुसंज्ञपननिमित्तं पापं प्रवहत किं च यच्चावद्यमवदनीयमभिशापादि यच्च मलं शरीरलग्नं प्रसिद्धं तच्च प्रवहत अपनयत । किं च यदहमनृतमसत्यमुक्त्वाभिदुद्रोह दुग्धवानस्मि दुह जिघांसायाम् यच्चाहमभीरुणां बिभेतीति भीरुरभीरुस्तमभीरुणमनपराधिनमपराधी हि बिभेति एवंविधं शेपे शपितवानस्मि अनपराधिनं प्रति यन्मयाभिशापो दत्तः आपः तस्मादेनसः पापात् मा मां मुञ्चतु पृथक्कुर्वन्तु पवमानश्च सोमो वायुर्वा तस्मात्पापान्मां मुञ्चतु ॥ १७ ॥

IV. a. सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् । b. रेऽस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन्वातस्य त्वा ध्राज्यै पूष्णो रश्म्योऽऊष्मणो व्यियिषत् । c. प्रयुतं द्वेषः ॥ १८ ॥

का° [६. ८. ६.] सं ते मन इति हृदयमभिघार्य सर्वमिति । शुक्स्थेन पृषदाज्येन पूर्वं हृदयमभिघार्य तूष्णीं सर्वं पशुमभिघारयेदिति सूत्रार्थः ॥ हृदयदेवतम् हे हृ-

दय ते तव पशोर्मनः देवानां मनसा सं गछताम् पृषदाज्येनाभिघारितं सत् । ते तव प्राणोऽपि देवानां प्राणेन सं गछतां संगतोऽस्तु अभिघारितः ॥ का° [६. ८. १२.] रेडसीति वसां गृह्णीयेति । मांसपाकभाण्डे स्थितः स्नेहात्मको द्रवविशेषो वसा तां गृह्णीयादिति सूत्रार्थः ॥ वसादेवतम् हे वसे त्वं रेट् असि रिषतिर्हिंसार्थः कर्मणि विच् रिष्टासि हिंसितेवाभासि अल्पत्वात् यूष्णोऽल्पत्वं श्रुत्योक्तम् [३. ८. ३. २०.] रेडसीति लेलयेव हि यूरिति लेलयाशब्दश्चाल्पवाचकः । अग्निः त्वा त्वां श्रीणातु श्री पाके क्र्यादिः अपक्वन्भूयसीं करोति यद्वाग्निराहवनीयस्त्वां श्रीणातु स्वीकरोतु । किं च आपः त्वा त्वां समरिणान् री बधे गतौ क्र्यादिः अत्र रिणातिर्बिभर्त्यर्थे समभरन्नपुञ्जन् यद्वा आपः त्वां समरिणान् सम्यक् प्राप्नुवन्तु तव शोषो मा भूदित्यर्थः आपो हि पच्यमानेभ्यः पशुङ्गेभ्यो यं रसमुत्पादयन्ति सा वसेत्युच्यते तां त्वा गृह्णामीति शेषः किमर्थं वातस्य ध्राज्यै गत्यै वातस्यान्तरिक्षे गतिर्भवतीति तथा पूष्णो रंह्यै आदित्यस्य गत्यै रंहतिर्गत्यर्थः आदित्यस्य द्युलोके गतिर्भवतीति वायुादित्ययोरप्रतिहतगमनसिद्ध्यर्थं त्वां गृह्णामीत्यर्थः । किं च ऊष्मणो व्यथिषत् ऊष्मान्तरिक्षं तद्धि ब्रह्मण ऊष्मेव ऊष्माणमन्तरिक्षं वसा व्यथयतु कर्मणि षष्ठी यद्वा व्यत्ययेन प्रथमार्थे षष्ठी ऊष्मा व्यथिषत् व्यथताम् वसां पीत्वा तृष्णाधिक्येन यथा सीदंति वसारूपं हविस्तथाविधं भवतीत्यर्थः अन्तरिक्षार्थं हि वसा गृह्यते सोममन्त्रे [११.] अन्तरिक्षस्य हविरसीति लिङ्गात् इयं वसान्तरिक्षस्य तृप्तिं कृत्वातिरिक्ता भवतीत्यर्थः अन्तरिक्षे च तृप्ते तत्प्रभवत्वाद्वायुसूर्ययोरपि स्वकर्मक्षमता भवति तस्मादुच्यते वातस्य ते ध्राज्याऽइत्यादि । व्यथ भयचलनयोः अस्य लिङर्थे लेडिति [पा° ३. ४. ७.] लेटि सिब्बहुलं लेटीति [पा° ३. १. ३४.] सिप्प्रत्यये इतश्च लोपः परस्मैपदेघिति [पा° ३. ४. १७.] तिप इकारलोपे लेटोऽडाटाविति [पा° ३. ४. १४.] अडागमे व्यथिषदिति रूपम् ॥ का° [६. ८. १२.] द्विरभिघार्य प्रयुतमिति पार्श्वेन सऽसृज्यसिना वेति । वसां द्विरभिघार्य पार्श्वेनासिना वाज्यं वसां च मिश्रयेदिति सूत्रार्थः ॥ द्वेषो दौर्भाग्यं प्रयुतं पृथग्भूतं वसायाः सकाशात् घृतमिश्रणेन ॥ १८ ॥

a. घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविर्-

सि॒ स्वाहा॑ । b. दि॒शः । c. प्र॒दि॒शः । d. आ॒दि॒शः । e. वि॒दि॒शः ।
f. उ॒द्दि॒शः । g. दि॒ग्भ्यः स्वाहा॑ ॥ ११ ॥

का॰ [६. ८. १७.] वसैकदेशं जुहोति घृतं घृतपावान इति । वसाहोमकृवन्या वसाया एकदेशं जुहुयादिति सूत्रार्थः ॥ वैश्वदेवं यजुः । वसाया द्विरभिधारितत्वाद्घृतमस्ति तत्र अत एवमाह । हे घृतपावानः घृतं पिबन्तीति घृतपावानः पा पानि आतो मनिन्नित्यादिना [पा॰ ३. २. ७४.] वनिप् घृतस्य पातारो देवा यूयं घृतं पिबत । हे वसापावानः वसायाः पातारो देवा यूयं वसां पिबत । एवं देवानुक्त्वा वसामाह हे वसे त्वमन्तरिक्षस्य हविरसि स्वाहा सुहुतमस्तु ॥ का॰ [६. ८. २१.] दिशो व्याघारयति वसाशेषेण वाजिनवदिति । यथा वाजिनशेषेण दिग्व्याघारणमुक्तं तथेत्यर्थः तद्यथा [का॰ ४. ४. १६. १७.] दिशो व्याघारयति दिश इति प्रतिमन्त्रं प्रदक्षिणं पुरस्तात्प्रथममुत्तमाभ्यां मध्ये पूर्वार्धे चेति ॥ षट् दिग्देवतानि अत्र स्वाहाकारः सर्वत्र साकाङ्क्षत्वादिति [का॰ ४. ४. १८.] वचनात्स्वाहा सर्वत्र युज्यते दिग्भ्यः स्वाहा प्रदिग्भ्यः स्वाहा आदिग्भ्यः स्वाहा विदिग्भ्यः स्वाहा उद्दिग्भ्यः स्वाहा सर्वाभ्यः दिग्भ्यः सुहुतमस्त्वित्यर्थः ॥ ११ ॥

a. ऐ॒न्द्रः प्रा॒णो॑ऽअङ्गै॑-ऽअङ्गै॒ नि॒दी॒ध्य॒दै॒न्द्र उ॑दा॒नो॑ऽअङ्गै॑-ऽअङ्गै॑ नि॒धी॒तः ।
b. दे॒व त्व॑ष्टर्भू॒रि ते॒ स॒ꣳ-सम॑तु सल॑क्ष्मा॒ यद्वि॑षु॒रूपं॑ भवा॑ति । दे॒व॒त्रा य॒न्त॒मव॑से॒ सखा॑योऽनु॑ त्वा॒ माता॑ पि॒तरो॑ मदन्तु ॥ २० ॥

का॰ [६. १. १.] ऐन्द्रः प्राण इति पशुꣳ संमृशतीति । पशुहृदयं हविः स्पृशेदिति सूत्रार्थः ॥ इन्द्र आत्मा तत्संबन्धी प्राणः प्राणवायुरस्य पशोरङ्गे-अङ्गे सर्वेष्वङ्गेषु निदीध्यत् निहितः दिधीङ् दीप्तिदेवनयोः अस्य धातोर्दधात्यर्थे वर्तमानात्कर्मणि लेट् परस्मैपदं व्यत्ययेन लिटोऽडाटावित्यट् [पा॰ ३. ४. १४.] । तथा ऐन्द्रः इन्द्रसंबन्धी उदानवायुः पशोः सर्वेष्वङ्गेषु निधीतः निहितः धीङ् आधारानादरयोः (8.) । अङ्गेऽइत्यादौ चेत्यङ्गशब्दस्य [पा॰ ६. १. ११६.] एङ् अति प्रकृत्या ॥ एवमनेन यजुषा पश्वङ्गेषु प्राणान्दत्त्वा त्वष्टारमाह । त्वाष्ट्री त्रिष्टुप् हे त्वष्टः त्वष्टृनामक देव यत्पश्वङ्गजातं सलक्ष्मा समानलक्षणं सत् ह्येदनेन विषुरूपं नानारूपं

भवाति भवति तत्सर्वं ते तवानुग्रहेण भूरि बहुलमत्यन्तं सं-समितु सम्यगेकीभवतु प्रसमुपोदः पादपूरणऽइति [पा° ८. १. ६.] समित्यस्य द्वित्वम् । पुनः पशुमाह हे पशो एवं प्राणैः स्वाङ्गैश्चानेन मन्त्रेण दृढीकृतं देवत्रा यत्तं देवान्प्रति गच्छन्तं त्वा त्वां सखायो मित्रभूता इतरे पशवो माता पितरश्च अनुमदन्तु अभ्यनुजानन्तु बहुवचनं पूजार्थम् अवसे अवितुं प्रीणयितुम् तुमर्थे असेप्रत्ययः यद्वा अवितुं त्वन्मुखेन स्वर्गप्राप्त्या स्वकुलं सर्वमवितुमित्यर्थः ॥ २० ॥

V. a. समुद्रं गच्छ स्वाहा । b. अन्तरिक्षं गच्छ स्वाहा । c. देवꣳ सवितारं गच्छ स्वाहा । d. मित्रावरुणौ गच्छ स्वाहा । e. अहोरात्रे गच्छ स्वाहा । f. छन्दाꣳसि गच्छ स्वाहा । g. द्यावापृथिवी गच्छ स्वाहा । h. यज्ञं गच्छ स्वाहा । i. सोमं गच्छ स्वाहा । k. दिव्यं नभो गच्छ स्वाहा । l. अग्निं वैश्वानरं गच्छ स्वाहा । m. मनो मे हार्दि यच्छ । n. दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ॥ २१ ॥

का° [६. १. १०.] प्रतिप्रस्थातोपयजति गुडतृतीयस्य प्रहृद्मनुयाजेषु समुद्रं गच्छेति प्रतिमन्त्रमिति । अनुयाजेषु हूयमानेषु प्रतिप्रस्थाता पूर्वं स्थापितं गुदतृतीयभागमिकादशधा तिर्यक् प्रहृत्य प्रतिमन्त्रं जुहोतीति सूत्रार्थः ॥ हे हविर्गुदावयवरूप त्वं समुद्रादिनामकान्देवान्गच्छ प्राप्नुहि तर्पणायेति शेषः स्वाहा सुहुतमस्तु ॥ का° [६. १. ११.] प्रतिवषट्कारꣳ हुत्वा मनो मऽइति मुखोपस्पर्शनमिति । प्रतिवषट्कारमेकैकं गुदकाण्डं हुत्वा सर्वान्ते मुखं स्पृशेदिति सूत्रार्थः । हे समुद्रादिदेवतास्मूह हार्दि हृदयसंबन्धि मे मनो यच्छ निबध्नीहि निबद्धं मनो हि स्वादायतनान्न च्यवते ॥ का° [६. १. १२.] अनुयाज्यान्ते स्वरुं जुहोति दिवं ते धूम इति ॥ स्वरुर्देवतम् हे स्वरो ते तव धूमः दिवं द्युलोकं गच्छतु वृष्ट्यै । तव ज्योतिः ज्वाला स्वः आदित्यं गच्छतु स्वःशब्देनादित्योऽभिधीयतेऽन्तरिक्षं वा । भस्मना पृथिवीमापृण समन्तात्पूरय । स्वाहा सुहुतमस्तु ॥ २१ ॥

a. मापो मौषधीर्हिꣳसीः । b. धान्ये-धान्ये राजँस्ततो वरुण नो मुञ्च ।

c. यदाकूरध्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।

d. सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियस्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २२ ॥

का° [६.१०.३.] अभ्यवेत्य शुष्कार्द्रसंधौ हृदयशूलमुपगूहति शुगसि तमभिशोच योऽस्मान्द्वेष्टि यं च वयं द्विष्मो मापो मौषधीरिति चेति । जले प्रविश्य आलब्धस्य पशोर्हृदयस्थं मांसं यस्मिन् श्रितं (9.) स हृदयशूलस्तं शुष्कार्द्रभूप्रदेशयोः संधौ निगूहेत् भूमावधोमुखं क्षिपेत् शुगसि माप इति मन्त्राभ्यामिति सूत्रार्थः ॥ हृदयशूलदैवतं यजुः । हे हृदयशूल त्वमपो जलानि ओषधीः च मा हिंसीः ॥ का° [६.१०.५.] धाम्नो-धाम्नः सुमित्रिया न इत्युपस्पृशत्यप इति । सर्वे ऋत्विग्यजमाना मन्त्राभ्यां (10.) जलं स्पृशन्तीति सूत्रार्थः ॥ वरुणदैवतं यजुः हे राजन् वरुण धाम्नो-धाम्नः यस्माद्यस्मात्त्वदीयपाशसमन्वितात् स्थानात् (11.) वयं बिभीमस्तस्मात्तस्मात्स्थानात् नोऽस्मान्मुञ्च मोचय ॥ यदाकूः ॥ वरुणदैवत्या गायत्री अवसानहीना । अघ्या इति गोनाम [निघ° २.११.] प्रकरणादिकानूबन्ध्याविषयम् । बकुवचनमनूबन्ध्याबकुत्वेऽर्थवत् एकानूबन्ध्यापक्षे तु पूजार्थम् । अघ्या इति यदाकूः वेदस्मृतिलोकवाक्यानि अघ्या अकर्तव्या अवध्याः पूजनीया इति वदन्ति । इतिकरणेन (12.) वाक्यस्यार्थमभिनयेन दर्शयति । हे वरुण वयं तु इति शपामहे इतिकरणं (12.) प्रदर्शनार्थम् शपतिर्हिंसार्थः इति एवमनेन विधिना अघ्या हिंस्मः अत एव त्वां याचामहे हे वरुण ततस्तस्मादघ्यावधजातादेनसो नोऽस्मान्मुञ्च मोचय ॥ सुमित्रियाः । आपः ओषधयश्च नोऽस्माकं सुमित्रियाः साधुमित्रत्वेनावस्थिताः सन्तु । यः शत्रुरस्मान्द्वेष्टि वयं च यं शत्रुं द्विष्मः द्वेषं कुर्मः तस्मै उभयात्मकाय शत्रवे आप ओषधयश्च दुर्मित्रियाः अमित्रत्वेनावस्थिताः सन्तु ॥ धाम्नो-धाम्न इति मन्त्रः शूलोपगूहनमन्त्रस्य शेषो वा ॥ सुमित्रिया इति मन्त्रोऽपामभिमन्त्रणे वा ॥ २२ ॥ एवमग्नीषोमीयः पशुः समाप्तः ॥ ॥

VI. हविष्मतीरिमा आपो हविष्माँ२॥ऽआविवासति ।

हविष्मान्देवोऽअध्वरो हविष्माँ२॥ऽअस्तु सूर्यः ॥ २३ ॥

अथ सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञानामपां ग्रहणमभिधीयते ॥ ॥ का° [८. १. ७-१०.] अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरीग्रहणꣳ स्यन्दमानानामनस्तमितेऽस्तमितश्चेन्निनाक्ष्यात्पुरेज्ञानश्चेदनीज्ञानोऽन्यस्यापि समीपावसितस्य पुरेज्ञानस्योभयाभावऽउल्कुपीꣳ हिरण्यं वोपर्युपरि धारयन्हविष्मतीरिति । अग्नीषोमीयस्य पशोर्वपामार्जनपर्यन्ते कर्मणि कृते अनस्तं गते रवौ वकृत्तीनामपामिकदेशाद्वसतीवरीसंज्ञानां सोमार्थानामपां ग्रहणं कार्यं हविष्मतीरिति मन्त्रेण । यदि रविरस्तंगतो यजमानश्च पुरा ईज्ञानः सोमयाजी तदा गृहे एव निनाक्ष्यन्मणिकाद्वसतीवरीग्रहणम् निनक्ष्नीयो निखननीयो निनाक्ष्यः । यदि च यजमानः पुरा न सोमयाजी तर्हि समीपस्थितस्य यजुः मणिकाद्वहणम् । स्वस्य अन्यस्य च यज्ञकर्तृत्वाभावे उल्कां कनकं वा वकृत्तीनामपां समीपे धारयन्वकृत्तीभ्यो वसतीवरीर्गृह्णीयादिति सूत्रार्थः ॥ अनुष्टुविन्द्रोक्तदेवता । हविष्मान्हविषा संयुक्तो यजमानः हविष्मतीः हविषा संयुक्ता इमा आपः अपः आविवासति वसतीवरीः परिचरति विवासतिः परिचर्यायाम् यत्र वै यज्ञस्य शिरोऽछिद्यत तस्य रसो द्रुवापः (13.) प्रविवेशेति [३. १. २. १.] श्रुतेरपां हविष्मत्त्वम् ततो देवो द्योतमानोऽधरो यागोऽपि स्वशरीरनिष्पत्तये हविष्मानस्तु आभिरद्भिरित्यर्थः ॥ किं च सूर्योऽपि देवो यजमानस्य फलदानाय तृप्त्यर्थं च (14.) हविष्मान्हविःसंपन्नोऽस्तु भवतु । एतस्मै वै गृह्णाति य एष तपतीति [३. १. २. १२.] श्रुतेर्वसतीवरीभिः सूर्यस्य हविष्मत्त्वम् ॥ २३ ॥

a. अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि । b. इन्द्राग्न्योर्भागधेयी स्थ ।
c. मित्रावरुणयोर्भागधेयी स्थ । d. विश्वेषां देवानां भागधेयी स्थ ।
e. अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वत्वध्वरम् ॥ २४ ॥

का° [८. १. ११.] अग्नेर्व इति निदधाति शालाद्वार्यमपरेणेति । नूतनगार्हपत्यात्पश्चिमभागे ता वसतीवरीरासादयतीति सूत्रार्थः ॥ चत्वारि यजूंष्यद्वैवत्यानि । हे वसतीवर्यः वो युष्मान् अग्नेः शालाद्वार्यस्य सदसि सीदन्त्यस्मिन्निति सदो निकटस्थाने तत्र सादयामि स्थापयामि । किम्भूतस्याग्नेः अपन्नगृहस्य न पन्नं पतितं

गृहं यस्य तस्य अविनश्वरगृहस्येत्यर्थः ॥ का° [८. १. १८.] दक्षिणेन निर्कृत्य दक्षिणस्यामुत्तरवेदिश्रोणौ निदधातीन्द्राग्न्योरिति । शालाद्वारसमीपस्था वसतीवरीरादाय शालादक्षिणद्वारेण नीत्वोत्तरवेदेर्दक्षिणश्रोणौ निदध्यादिति सूत्रार्थः ॥ हे वसतीवर्यो यूयमिन्द्राग्न्योः इन्द्राग्निदेवतयोर्भागधेयीः स्थ भागधेय्यो भागरूपा भवथ । भागा एव भागधेय्यः । नामरूपभागेभ्यः स्वार्थे धेयप्रत्ययः [पा° ५. ४. ३६. वा° २.] । केवलमामकेत्यादिना [पा° ४. १. ३०.] ङीप् ॥ का° [८. १. २१. २२.] उत्तरस्यां पूर्ववन्मित्रावरुणयोरिति वेति । पूर्ववदिन्द्राग्न्योरिति मन्त्रेणैव मित्रावरुणयोरिति मन्त्रेण वोत्तरवेदेरुत्तरश्रोणौ वसतीवरीर्निदध्यादिति सूत्रार्थः ॥ हे वसतीवरीसंज्ञका आपो यूयं मित्रावरुणयोर्देवतयोर्भागरूपा भवथ ॥ का° [८. १. २३.] विश्वेषां देवानामित्याग्नीध्रऽइति । उत्तरवेदिश्रोणेः सकाशाद्वसतीवरीरादायाग्नीध्रीयस्य पश्चान्निदध्यादिति सूत्रार्थः ॥ हे वसतीवर्यो यूयं सर्वेषां देवानां भागरूपा भवथ ॥ इदानीमभिनयेन दर्शयन्नाह । अमूर्याः । ऋक् अग्निदेवत्या गायत्री । याः प्रसिद्धा अमूरादृश्यो वसतीवर्याख्या आपः उपसूर्ये (15.) सूर्यसमीपे स्थिताः विभक्तिव्यत्ययः याभिर्वा वाशब्दः समुच्चये याभिश्राद्धिः सह सूर्यो याति ता आपो नो ऽस्माकमधरं यज्ञं हिन्वन्तु तर्पयन्तु हिन्वतिः तर्पणार्थः ॥ २४ ॥

VII. हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वमिममधरं दिवि देवेषु होत्रा यछ ॥ २५ ॥

का° [१. १. ५.] आज्यासादनात्कृत्वेषान्तरेणार्धसोममद्रिषु संमुखेषु निदधाति हृदे त्वेति । आज्यासादनपर्यन्तं कर्म कृत्वा सोममादाय हविर्धाने गत्वा सोमं (16.) विस्रस्य तदर्धं दक्षिणशकटेषान्तरालेन संमुखेष्वभिषवार्थपाषाणेषु निदध्यात् अश्मनां स्थूलो भागो मुखमिति सूत्रार्थः ॥ सोमदेवत्यानुष्टुप् हे सोम हृदे बुद्धै निश्चयात्मिकायै एतन्मम स्यादिति कामरूपायै वा त्वामुपावहरामीति शेषः । मनसे संकल्पविकल्पात्मकाय त्वामुपावहरामि । वाशब्दानामावृत्त्या क्रियावृत्तिर्बोध्या । दिवे द्युलोकप्राप्तये त्वामुपावहरामि । सूर्याय सूर्यमुखेभ्यो देवेभ्यस्तत्तृप्तये त्वामुपावहरामि ॥ यद्वायमर्थः हे सोम हृदे हृदयवद्भ्यो मनुष्येभ्यः । मनसे मनस्विभ्यः

पितृभ्यः दिवे द्युलोकवासिभ्यो देवेभ्यो विशेषतः सूर्याय च त्वामुपावक्षरामीति शेषः । एतदर्थं तित्तिरिः । स वाऽअधर्युः सोममुपावक्षरन्त्सर्वाभ्यो देवताभ्य उपावक्षरेदिति क्षुद्रं वेत्याह मनुष्येभ्य एवैतेन करोति मनसे वेत्याह पितृभ्य एवैतेन करोति दिवे वा सूर्याय वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावक्षरतीति ॥ किं च एवमुपावक्षतोऽभिषुतश्च त्वमिममधरं मदीयं यज्ञमूर्ध्वमुत्कृष्टं कृत्वा दिवि द्युलोकवर्तमानेषु देवेषु क्षोत्राः वषट्कारवादिनः सप्त क्षोतृकान्यङ्ग निबध्नीहि ॥ २५ ॥

a. सोम राजन्विश्वास्त्वं प्रजा उपावरोह ।

b. विश्वास्त्वां प्रजा उपावरोहन्तु ।

c. शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः । श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा ॥ २६ ॥

किं च । हे सोम राजन्विश्वाः सर्वाः प्रजा उपावरोह आधिपत्यं प्रजानां कुर्वित्यर्थः ॥ का° [१. १. ६.] विश्वास्त्वामिति विसृज्योपतिष्ठतऽइति । ग्रावसु स्थापितं सोमं विमुच्योपस्थापनं कुर्यादिति सूत्रार्थः ॥ हे सोम विश्वाः सर्वाः प्रजाः त्वामुपावरोहन्तु प्रत्युत्थानाभिवादनादिभिः प्राप्नुवन्तु ॥ का° [१. २. २४. ३. १.] अभूदुषा रुशत्पशुरित्युच्यमाने चतुर्गृहीतं प्रचरण्या जुहोति शृणोत्वग्निरिति । अभूदिति मन्त्रे क्षोत्रा शस्यमाने चतुर्गृहीतमाज्यं प्रचरणीसंज्ञया स्रुचाधर्युरतिप्रणीते (17.) जुहोतीति सूत्रार्थः ॥ त्रिष्टुब्बृहतीकृतदेवता । अग्निः समिधा समित्पूर्विकया आहुत्या मे हवं मदीयमाह्वानं शृणोतु आपो ममाह्वानं शृण्वन्तु । चकारः समुच्चयार्थः धिषणा देवीः वाचो देव्यश्च मे हवं शृण्वन्तु । धिषणा धीसादिन्यो वा धीसानिन्यो वेति (18.) यास्कः [निरु° ८. ४.] धियं सन्वन्ति ददति धिषणाः षनु दाने तनादिः । तृतीयः पादः प्रत्यक्षकृतो मध्यमपुरुषयोगात् हे ग्रावाणोऽभिषवार्थमिहोपस्थिता यूयं मम हवं श्रोत शृणुत तप्तनप्तनथनाश्चेति [पा° ७. १. ४५.] लोण्मध्यमपुरुषबहुवचनस्य तबादेशे गुणे विकरणव्यत्यये च श्रोतेति रूपम् संहितायां तु दीर्घः । विदुषो न न इवार्थे विभक्तिव्यत्ययः विद्वांसो यज्ञमिव यथा

विद्वांसः प्रत्यक्षतो जानन्तो यज्ञं शृण्वन्ति तथा यूयं हवं शृणुत तथा सविता देवः मे मम हवं शृणोतु स्वाहा सुहुतमस्तु स्वा वागाहेति वा ॥ २६॥

देवीरापोऽअपां नपाद्यो वऽऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमः ।
तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा ॥ २७॥

का° [१.३.७.] अपो गत्वा देवीराप इत्यप्सु जुहोतीति । यच्चतुर्गृहीतमाज्यं सकृन्नीतं तज्जलं प्रति गत्वा जुहोतीति सूत्रार्थः ॥ अब्देवत्या पङ्क्तिः पञ्चपदा चत्वारिंशद्वर्णा पङ्क्तिः अत्र द्वितीयः सप्ताक्षरः तुर्यपञ्चमौ नवार्णौ तेनैकाधिका स्वाहेति यजुः । हे आपो देवीः देव्यः वो युष्माकमपां नपात् अपत्यरूपो (19.) वो ऽयमूर्मिरप्संघातः कल्लोलोऽस्ति देवत्रा देवान्प्रति यायिनं तमूर्मिं देवेभ्यो दत्त प्रयच्छत येषां देवानां यूयं भागः स्थ भागरूपा भवथ । किम्भूत ऊर्मिः हविष्यः तथा इन्द्रियावान् इन्द्रियं वीर्यमस्यास्तीति इन्द्रियावान् दीर्घश्छान्दसः पीतः सन्निन्द्रियवीर्यवृद्धिकारी । तथा मदिन्तमः मद्यतीति मदी अतिशयेन मदी मदिन्तमः पीयमानोऽत्यन्तहर्षकारी तर्पयितृतमः नाहस्येति [पा° ८.२.१७.] तमपि नुमागमः किम्भूतेभ्यो देवेभ्यः शुक्रपेभ्यः शुक्र इत्युपलक्षणम् शुक्रादीन्सोमग्रहान्पिबन्तीति शुक्रपाः तेभ्यः यद्वा शुक्रं दीप्तं सोमं पिबन्तीति । स्वाहा इदमाज्यं युष्मभ्यं हुतमस्तु । ग्रहीष्यमाणानामपां मूल्यवेनेयमाकृतिरित्युक्तं तित्तिरिणा । देवीरापोऽअपां नपादित्याहाकृत्या वै निष्क्रीय गृह्णातीति ॥ २७॥

a. कार्षिरसि । b. समुद्रस्य त्वाक्षित्याऽउन्नयामि ।
c. समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥ २८॥

का° [१.३.८.] कार्षिरसीति मैत्रावरुणचमसेनाज्यमपोक्षतीति । अप्सु हुतमाज्यं मैत्रावरुणचमसेन दूरीकरोतीति सूत्रार्थः ॥ कार्षिरसीत्यादिमन्त्रत्रयं मिलित्वानुष्टुप्छन्दः आद्यस्याज्यं देवता । हे आज्यपदार्थ त्वं कार्षिराकृष्टोऽसि (20.) देवतया भक्षितोऽसीत्यर्थः यद्वा कर्षतीत्येवंशीलः कार्षिः अन्तर्गतशमलापनेतासि । तदाह तित्तिरिः । कार्षिरसीत्याह शमलमेवासामपप्लावयतीति ॥ का° [१.३.९.] समुद्रस्य त्वेति तेन गृह्णातीति । मैत्रावरुणचमसेन तडागादिस्था अपो गृह्णातीति

सूत्रार्थः ॥ द्वे यजुषी आपे (21.)। आपो वै समुद्र इति [३.१.३.२७.] श्रुतेर्वसतीवरीलक्षणस्य समुद्रस्याद्रित्वे अक्षीणत्वाय हे जल त्वा त्वामुन्नयामि गृह्णामि। वसतीवरीणां वृद्ध्यै जलमेतदृच्यते ॥ का° [१.३.१२.] प्रत्येत्य चात्वालस्योपरि मैत्रावरुणचमसं वसतीवरीश्च सञ्स्पर्शयति समाप इति। जलाशयात्प्रत्यागत्य चात्वालोपरि मैत्रावरुणचमसस्था अपो वसतीवरीभिः संयोजयतीति सूत्रार्थः ॥ आपो मैत्रावरुणचमसस्था अद्भिः वसतीवरीभिः समग्मत संगच्छन्ताम् गमेर्लुङि तङि प्रथमबहुवचने शपि लुप्ते गमहनेत्युपधालोपे [पा° ६.४.९८.] समग्मतेति रूपम्। तथा ओषधीः ओषधयः मुद्गमसूरादिका ओषधीभिर्व्रीहियवादिभिः संगच्छन्ताम् अपां कारणभूतत्वादोषधीनामपि योगोऽस्तु ॥२८॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः स्वाहा ॥२९॥

का° [१.३.१६.] प्रचरणीसञ्स्रवमग्निष्टोमे जुहोत्यभावे चतुर्गृहीतं यमग्ऽइति। अग्निष्टोमसंस्थे क्रतौ प्रचरणीपात्रलिप्तमाज्यशेषं जुहुयात् शेषाज्यस्य होमपर्याप्त्यभावे चतुर्गृहीतमादाय जुहोतीति सूत्रार्थः ॥ आग्नेयी गायत्री मधुछन्दोदृष्टा हे अग्ने पृत्सु संग्रामेषु यं मर्त्यं मनुष्यं त्वमवाः अवसि रक्षसि अवतेः इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.९७.] सिप इकारलोपे लेटोऽडाटावित्याडागमेऽवा इति रूपम्। किं च वाजेषु वाज इत्यन्ननाम [निघ° २.७.] हविर्लक्षणेष्वन्नेषु अन्ननिमित्तं यं पुरुषं त्वं जुनाः गच्छसि हवींषि ग्रहीतुं यस्य सकाशं गच्छसीत्यर्थः। जु गतौ श्नाप्रत्ययः इतश्च लोप इतीकारलोपे [पा° ३.४.९७.] रूपं जुना इति। स मर्त्यस्त्वदनुग्रहेण शश्वतीरिषः नित्यान्यन्नानि धनरूपाणि यन्ता नियंस्यति प्राप्स्यतीत्यर्थः लुट् स्वाहा सुहुतमस्तु ॥ उक्थसंस्थे यमग्ने इति मन्त्रेणाग्नं परिधिं स्पृशेत् षोडशिसंस्थे रराटीं स्पृशेत् अतिरात्रे हृदिः स्पृशेत् अन्यसंस्थासु हविर्धानं प्रविशेत् ॥२९॥

VIII. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

b. आददे रावासि गभीरमिममंधरं कुधीन्द्राय सुषूतमम्। उत्तमेन पविनोर्ज्स्वन्तं मधुमन्तं पयस्वन्तम्।

८. नियाभ्या स्थ देवश्रुतस्तर्पयत मा ॥३०॥

का° [१.४.५.६.] देवस्य त्वेत्यद्रिमादाय वाचं यच्छति प्राग्धिंकारात्स उपाꣳशु-सवन इति । सोमाभिषवहेतुमश्मानं गृहीत्वा हिंकारात्प्राक् मौनी स्यात् सो ऽश्मोपांशुसवनसंज्ञः उपांशुग्रहाय सोमः सूयते येनेति सूत्रार्थः ॥ देवस्य त्वेति व्याख्यातम् ॥ हे अभिषवसाधन पाषाण त्वं रावासि रा दाने रातीति रावा वनिप् आकृतीनां दक्षिणानां च दाता भवसि । तत इममधरं मदीयं यागं गभीरं गम्भीरं महान्तं कृधि कुरु शृणुपृकृवृभ्यश्छन्दसीति [पा° ६.४.१०२.] हेर्धिः उत्तमेनोत्कृष्टेन पविना वज्रसदृशेन त्वयाहं सोममीदृशं करोमि किम्भूतम् इन्द्रायेन्द्रार्थं सुषूतमं सुष्ठु सूयतऽइति सुसुतः अतिशयेन सुसुतः सुसुततमः तं सुष्ठु अभिषुततमम् निष्टातकारलोपो दीर्घश्च छान्दसः तथा ऊर्जस्वन्तं रसवन्तम् मधुमन्तं मधुस्वादेन रसेनोपेतम् पयस्वन्तं पयःस्वादुना रसेनोपेतम् एवंविधं सोमं त्वयाहं करोमीत्यर्थः ॥ का° [१.४.७.] नियाभ्यासु वाचयत्युरस्येना निगृह्य नियाभ्या स्थेति । अभिषोतव्यस्य सोमस्य सेवनीया आपो नियाभ्या उच्यन्ते तासु गृह्यमाणासु वाचयेत् यजमानञ्च स्वोरसि नियाभ्या निगृह्यालभ्य च मह्यं वक्तीति सूत्रार्थः ॥ हे आपो यूयं नियाभ्या नियाह्या अस्माभिर्नितरां ग्रहीतव्या स्थ भवथ यस्मादिन्द्रियोरसि यूयं गृहीतास्ततो नियाभ्याः ह्यग्रहोर्भः । देवश्रुतः देवैः श्रूयन्ते ताः देवेषु प्रख्याताः ततो बहुमानान्विता (22.) यूयं मा मां तर्पयत प्रीतिं कुरुत ॥३०॥

मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥३१॥

एवं समासेनोक्त्वा व्यासेनाह मे मम मनः वाचं प्राणं चक्षुः श्रोत्रं तर्पयत मदीयानि मनःप्रभृतीनीन्द्रियाणि तर्पयतित्यर्थः । एवं व्यासेनोक्त्वा पुनः समासेनाह । आत्मानं शरीरं प्रजां पुत्रादिसंपत्तिं पशून्गवादीन्गणान्मनुष्यसंघांश्च तर्पयत मे मदीया गणा मनुष्यसंघा मा वितृषन् मया द्रव्यदानेन पूरिता अपि सन्तो वि-

गततृष्णा मा भवन्तु अनुरक्तगणोऽहं भवेयमिति यजमान आशास्तऽइत्यर्थः ॥३१॥

a. इन्द्राय त्वा वसुमते रुद्रवते । b. इन्द्राय त्वादित्यवते । c. इन्द्राय त्वाभिमातिघ्ने । d. श्येनाय त्वा सोमभृते । e. अग्नये त्वा रायस्पोषदे ॥३२॥

का° [१.४.८.] उपाꣳशुसवने सोमं मिमीतऽइन्द्राय त्वा वसुमते रुद्रवतऽइति पञ्चकृत्वः प्रतिमन्त्रमिति । उपांशुसवनं पूर्वोक्तमश्मानमधिषवणचर्मणि निधाय तदुपरि पञ्च मन्त्रैः पञ्चवारमभिषोतव्यसोममुष्टिं प्रक्षिपतीति सूत्रार्थः ॥ पञ्च यजूꣳषि सौम्यानि । तत्राद्यम् हे सोम इन्द्रायेन्द्रार्थं त्वा त्वां मिमे इति शेषः किम्भूतायेन्द्राय वसुमते वसवोऽस्य सन्तीति वसुमान् तस्मै वसुसंज्ञकप्रातःसवनदेवतायुक्तायेत्यर्थः । रुद्रवते रुद्राः सन्त्यस्येति रुद्रवान् तस्मै रुद्रनामकमाध्यन्दिनसवनदेवतायुक्ताय । अथ द्वितीयम् आदित्यवते तृतीयसवनदेवतायुक्तायेन्द्राय हे सोम त्वा त्वां मिमे । अथ तृतीयम् अभिमातीन् शत्रून्हन्तीत्यभिमातिहा तस्मै अभिमातिघ्ने शत्रुहन्त्रे इन्द्राय सोम त्वां मिमे सपत्नो वाऽअभिमातिरिति [३.१.४.१.] श्रुतेः । अथ चतुर्थम् सोमं करतीति सोमकृत् तस्मै कृग्रुकोर्भश्छन्दसीति [पा° ८.२.३२. वा° १.] हस्य भः सोमाहरणकर्त्रे श्येनाय श्येनपक्षिरूपायै गायत्र्यै हे सोम त्वां मिमे । गायत्री श्येनो भूत्वा दिवः सोममाहरदिति [३.१.४.१०.] श्रुतेः । अथ पञ्चमम् रायस्पोषदे रा (23.) धनं तस्य पोषो वृद्धिः तं ददातीति रायस्पोषदास्तस्मै धनपुष्टिदात्रेऽग्नये हे सोम त्वां मिमे ॥३२॥

यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु रायि कृधि दात्रे वोचः ॥३३॥

का° [१.४.१.] यत्तऽइति मितालम्भनमिति । मितस्योपांशुसवने पञ्चवारं प्रक्षिप्तस्य सोमस्य स्पर्शं कुर्यादिति सूत्रार्थः ॥ सोमदेवत्या विपरीता बृहती आद्यतृतीयावष्टार्णौ द्वितीयतुर्यौ द्वादशार्णौ पादौ सा विपरीता बृहती व्यूहेन द्वादशत्वम् । अस्य मन्त्रस्य श्रुतौ [३.१.४.१२.] निदानमुक्तम् यदा सोमो देवानां क्र-

विरभूत्तदा तिस्रः स्वतनूरेषु लोकेषु न्यदधादिति । तासां तनूनामनेन मन्त्रेण प्राप्तिः क्रियते । हे सोम दिवि द्युलोके ते तव यज्ज्योतिस्तेजः यच्च पृथिव्यां ज्योतिः उरो विस्तीर्णेऽन्तरिक्षे यत् ज्योतिः शरीरलक्षणम् तेन तन्वाख्येन ज्योतिषा अस्मै यजमानाय विभक्तिव्यत्ययः अस्य यजमानस्य यज्ञे उरु विस्तीर्णं स्वशरीरं कृधि कुरु रायि धनाय ऋत्विजां दक्षिणाप्राप्तये च उरु शरीरं कृधि । किं च दात्रे अधि वोचः अधिकं ब्रूहि यजमानाय कृत्स्नशरीरोऽहमागत इति वदेत्यर्थः वचेर्लुङि वचिरूमिति [पा° ७. ४. २०. (24.)] ऊमागमेऽऽडभावे च वोच इति मध्यमैकवचने रूपम् ॥ यद्वास्य मन्त्रस्य व्याख्यान्तरम् हे सोम त्रिषु लोकेषु यद्वदीयं ज्योतिरस्ति तेन ज्योतिषास्मै यजमानाय रयि चतुर्थ्यर्थे तृतीया रायां धनेन समृद्धमुरु विस्तीर्णं स्थानं कृधि किं च दात्रे फलदायेन्द्राय इति वोचः ब्रूहि यत् अधि अधिकोऽयं यजमानो भवत्विति ॥ ३३ ॥

श्यात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिवत ॥ ३४ ॥

का° [१. ४. १२.] श्यात्रा स्थेत्यासिञ्चति नियाभ्या इति । सोमस्योपरि क्रोतृचमसेनैव नियाभ्या आसिञ्चतीति सूत्रार्थः ॥ पथ्या बृहती तृतीयो द्वादशार्णोऽन्ये त्रयोऽष्टार्णाः पादा यस्याः सा पथ्या बृहती इयं व्यधिका ॥ हे आपो यूयमेवंविधाः स्थ भवथ किम्भूताः श्यात्राः श्यात्रमिति क्षिप्रनाम [निरु° ५. ३.] क्षिप्रकार्यकारिण्यः शिवा वा । वृत्रतुरः तूर्वतिर्वधकर्मा वृत्रं दैत्यं तूर्वन्ति हिंसन्ति ता वृत्रतुरः क्विपि राल्लोप इति [पा° ६. ४. २१.] वलोपः । राधोगूर्ताः राधो धनं गुरन्ते उद्यच्छन्ति ददति ता राधोगूर्ताः गुरी उद्यमे अस्मात् नसत्तनिषत्तेत्यादिना [पा° ८. २. ६१.] कर्तरि क्तो नत्वाभावश्च निपात्यते । अमृतस्य सोमस्य पत्नीः पालयित्र्यः । हे देवीः देव्यः तास्तथाविधा यूयमिमं यज्ञं देवत्रा देवान्प्रति नयत प्रापयत उपहूताः अनुज्ञाताः सत्यो यूयं सोमस्य सोमं पिबत कर्मणि षष्ठी ॥ ३४ ॥

मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम् ।
पाप्मा कृतो न सोमः ॥ ३५ ॥

का॰ [१.४.१५.] मा भेरिति प्रहरतीति । उपांशुसवनेनाश्मना सोमे प्रहरेदिति सूत्रार्थः ॥ अर्धं सौम्यमर्धं द्यावापृथिव्यम् हे सोम त्वं मा भेः मा भैषीः शपो लुकि लडि रूपम् मा संविक्थाः कम्पनं मा कृथाः ओविजी भयचलनयोः लुडि रूपम् यतो देवतर्पणायाहं त्वामभिषुणोमि अत ऊर्जं धत्स्व रसं धेहि । एवं सोमं संबोध्य द्यावापृथिव्यौ संबोधयति हे धिषणे हे द्यावापृथिव्यौ युवां वीड्वी सती वीडयेथाम् वीडुशब्दो दृढवचनः दृढे सत्यावात्मानं दृढं कुरुतम् अस्माद्गृणताद्ग्रावणः । किं च ऊर्जं दधाथां रसं धत्तमस्मिन्सोमे । अनेन तु वज्रसंस्तुतेन ग्रावणा यजमानस्य पाप्मा कृतो न तु सोमः ॥३५॥

प्रागपागुदग्धराक्सर्वतस्त्वा दिश आधावन्तु । अम्ब निष्पर समरीर्विदाम् ॥३६॥

का॰ [१.४.२०.] प्रतिवर्गं निग्राभं वाचयति स्रुतृचमसेऽल्पानभ्यूनवधाय (25.) प्रागपागिति । प्रतिप्रहारवर्गं स्रुतृचमसमध्ये स्तोकान्सोमांश्रुत्रिधाय प्रागपागिति मन्त्रद्वयं निग्राभसंज्ञं यजमानं वाचयेदिति सूत्रार्थः ॥ सोमदेवत्योष्णिक् ॥ सोमो दिग्भिर्मिथुनमिच्छत्तच्च देवाः संपादितवन्तस्तदेतदृचाभ्युक्तम् । हे सोम प्राक्प्रागञ्चनाः अपाक् अपागञ्चनाः दक्षिणाः पश्चिमाश्च उदक् उदगञ्चना उत्तराः अधराक् अधराञ्चनाः एवं प्रागादयः सर्वा दिशः सर्वतः स्वस्वप्रदेशात् त्वा त्वामाधावन्तु आभिमुख्येन गच्छन्तु परस्परं किं भाषमाणास्त्वामभिधावन्तिति तदाह हे अम्ब हे मातः निष्पर स्वैर्भागैः सोमं पूरय पॄ पालनपूरणयोः विकरणव्यत्यये लोटि रूपम् किं प्रयोजनमिति चेत् अरीः अर्यः प्रजाः संविदां संविदताम् प्रज्ञा वाऽअरीरिति [३.१.४.२१.] श्रुतिः अस्माकं सोमसमागमं नानादिग्वासिनो जना जानन्त्वित्यर्थः । इति भाषमाणास्त्वामागच्छन्तु । विद ज्ञाने अस्माल्लोटि तडि प्रथमबहुवचने आत्मनेपदेष्वनत इति [पा॰ ७.१.५.] झस्यादादेशे लोपस्त आत्मनेपदेष्विति [पा॰ ७.१.४१.] तकारलोपे सवर्णदीर्घे विदामिति रूपम् समो गमीत्यादिना [पा॰ १.३.२९.] तङ् ॥३६॥

त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥३७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां षष्ठोऽध्यायः ॥ ॥

इन्द्रदेवत्या पथ्या बृहती गोतमदृष्टा । अङ्गेति क्षिप्रनाम [निरु° ५. १७.] हे शविष्ठ अतिशयेन बलवन् इन्द्र देवः दीप्यमानस्त्वं मर्त्यं मनुष्यं यजमानं प्रशंसिषः प्रशंससि स्तौषि समीचीनोऽयं यजमानो होता श्रद्धावानित्यादिस्तुतिं करोषीत्यर्थः । शंसु हिंसास्तुत्योः लिङर्थे लेट् मध्यमैकवचने सिबदिशः सिब्बहुलं लेटीति [पा° ३. १. ३४.] सिप्प्रत्ययः तस्यार्धधातुकस्येड्वलादेरिति [पा° ७. २. ३५.] इडागमः लेटोऽडाटाविति [पा° ३. ४. ९४.] सिपोऽडागमः इतश्च लोपः परस्मैपदेषिति [पा° ३. ४. ९७.] सिप इकारलोपः तस्य रुत्वविसर्गौ षत्वम् प्रशंसिषः इति रूपम् तिङ्तिङ इति [पा° ८. १. २८.] सर्वानुदात्तत्वम् । किं च हे मघवन् हे धनवन् इन्द्र मर्डिता मृड सुखकरणे मृडतीति मर्डिता यजमानस्य सुखयिता त्वदन्यो नास्ति न विद्यते अतो हे इन्द्र ते तव वचः त्वमेव सुखयितेत्येवंरूपं त्वदीयं वचनमहं ब्रवीमि वदामि ॥ ३७ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । अश्वादानाद्वाचनान्तः षष्ठोऽध्यायः समीरितः ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ [रत्नसो] ॥ १ ॥ २ [दिवमग्रेणा°] ॥ २ ॥ ३ a ॥ ३ ॥ ३ b. c ॥ ४ ॥ ४ ॥ ५ ॥ ५ ॥ ६ ॥ ६ ॥ ७ ॥

II. ॥ ७ ॥ १ ॥ ८ [धर्षान्मानुषः]. १ a ॥ २ ॥ १ b [°ग्नि]. c [°धीभ्यः प्रोक्षाम्यनु] ॥ ३ ॥ १० a. b [संदत्तु] ॥ ४ ॥ १० c [यजमान आशिषा] ॥ ५ ॥ ११ a [पशुत्रा°]. b - आविंश ॥ ६ ॥ ११ b उरोर्° - भव ॥ ७ ॥ ११ c. d. e. १२ a ॥ ८ ॥ १५ ॥

III. ॥ १२ b [पथ्या उर्प] ॥ १ ॥ १३ ॥ २ ॥ १४ ॥ ३ ॥ १५ a-g ॥ ४ ॥ १५ h. १६ a. b ॥ ५ ॥ १६ c ॥ ६ ॥ १६ d [प्रोर्णवाथाम्]. e. f [जुषाणोऽग्नि°]. g ॥ ७ ॥ २२ ॥

IV. ॥ १८ a. b [रत्नस्य°] - °णान् ॥ १ ॥ १८ b वातस्य - °षत् । c ॥ २ ॥

११ a ॥३॥ ११ b-g. २० a [निधीत ऐन्द्र - निदोंचे] ॥४॥ २० b ॥५॥२७॥

V. ॥ २१ a. c. b. d-g. i. h. k [नमो दिव्यं गच्छ]. l. m [कार्ष्मह (26.)] ॥१॥ २१ n [गच्छत्वन्तरिक्षं ज्यो°] ॥२॥ २२ a. b. c ॥३॥ २२ d ॥४॥ इदमापः प्रवहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेपऽउतानृतम् ॥५॥३२॥

VI. ॥ २३ ॥१॥ २४ a-d ॥२॥ २४ e ॥३॥३५॥

VII. ॥ २५ [ऊर्धोऽअधरं] ॥१॥ २६ a. b ॥२॥ २६ c ॥३॥ २७ - मदिन्तमः ॥४॥ २७ तं दे° - स्वाहा ॥५॥ २८ ॥६॥ २९ ॥७॥४२॥

VIII. ॥ ३० ॥१॥ ३१ ॥२॥ ३२ ॥३॥ ३३ [उराऽअन्तरिक्षं] ॥४॥ ३४ ॥५॥ ३५ [वीलयेथामू°] ॥६॥ ३६ ॥७॥ ३७ ॥८॥५०॥ ॥ अष्टानुवाकेषु पञ्चाशत् ॥ ॥

इति काण्वशाखायां संहितापाठे षष्ठोऽध्यायः ॥ ॥

I. वाचस्पतये पवस्व वृष्णोऽअꣳशुभ्यां गभस्तिपूतः । देवो देवेभ्यः पवस्व येषां भागोऽसि ॥१॥

षष्ठेऽ(1.)ध्याये यूपसंस्कारादिसोमाभिषवपर्यन्ता मन्त्रा उक्ताः । सप्तमे ग्रहयज्ञमन्त्रा उच्यन्ते ॥ का° [१.४.२३.] उपाꣳशुं च गृह्णाति वाचस्पतये देवो देवेभ्यो मधुमतीरिति । मन्त्रत्रयस्य प्रतीकोपादानात्तत्रैकैकेन मन्त्रेणोपांशुग्रहमेकैकवारं गृह्णीयात् उपयामगृहीतोऽसीति मन्त्रत्रयस्यादौ योज्यम् ॥ प्राणदेवत्या विराट् नववैराजत्रयोदशैर्नष्टद्रूपेति लक्षणान्नष्टद्रूपा विराट् प्रथमोऽष्टार्णस्तेनैकोना ॥ पूर्वोत्तरार्धयोरुपांशुग्रहस्य प्रथमद्वितीयग्रहणे क्रमेण विनियोगः । हे सोम त्वं वाचस्पतये प्राणाय पवस्व गच्छ । पव गतौ । प्राणो वै वाचस्पतिरिति श्रुतेः [8. १.१.१.] । यद्वा पतये पालकदेवार्थं वाचः वाचा विभक्तिव्यत्ययः मन्त्रेण वाचः संबन्धिना मन्त्रेण वा पवस्व शुद्धो भव । किम्भूतस्त्वम् वृष्णः वर्षितुस्तव संब-

न्धिभ्यामंशुभ्यां (2.) तौ हि तत्र क्षिप्येते । तथा गभस्तिपूतः पाणौ वै गभस्ती ऽइति [8.१.१.१.] श्रुतेरर्धर्गभस्तिभ्यां पाणिभ्यां च पूतः । समासगतः पूतशब्दो विक्षिप्यांशुभ्यामित्यनेनापि योज्यः ॥ द्वितीयं गृह्णाति । हे सोम देवः सन्देवेभ्यो ऽर्थाय पवस्व प्रवृत्तिं कुरु न क्यदेवो देवांस्तर्पयितुमलम् केभ्यो देवेभ्यः येषां देवानां त्वं भागोऽसि तान्प्रति गच्छेत्यर्थः ॥१॥

a. मधुमतीर्न इषस्कृधि । b. यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा । c. स्वाहा । d. उर्वन्तरिक्षमन्वेमि ॥२॥

तृतीयं गृह्णाति । लिङ्गोक्तदेवतम् हे सोम त्वं नोऽस्माकमिषोऽन्नानि मधुमतीः मधुररसोपेताः कृधि कुरु ॥ का° [१.४.२८.] यत्तऽइत्यात्तात्सोमे निदधातीति । स्वीकृतानंशून्सोमे स्थापयेत् ॥ सौम्यम् । हे सोम ते तव अदाभ्यमहिंस्यम् दभ्नोतिर्हिंसार्थः जागृवि जागरणशीलं यन्नामास्ति सोमेति हे सोम तस्मै तन्नामवते तुभ्यं सोमाय स्वाहा दत्तमस्तु ॥ का° [१.४.३४.] स्वाकृत्युक्त्वोर्वन्तरिक्षमिति निःक्रमणमिति । स्वाकृत्यक्षरद्वयमुक्त्वा निःक्रमेत् ॥ उरु विस्तीर्णमन्तरिक्षमन्वेमि अनुगच्छामि ॥२॥

a. स्वांकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय । b. दिवेभ्यस्त्वा मरीचिपेभ्यः । c. देवाऽशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भक्षेन कृतोऽसौ फट् । d. प्राणाय त्वा । e. व्यानाय त्वा ॥३॥

का° [१.४.३७.] स्वांकृत इति जुत्वा पात्रमुन्माष्टीति । उपांशुग्रहं जुत्वा पात्रमार्जनं कुर्यात् ॥ ग्रहदेवतम् प्राणो वाऽअस्येषं ग्रहः स स्वयमेव कृतः स्वयं जात इति [8.१.१.२२.] श्रुतेरुपांशुग्रहः प्राणः । हे प्राणरूपोपांशुग्रह त्वं स्वांकृतो भवसि स्वयं स्वेनैव कृतो भवसि छान्दसो यलोपः स्वयमुत्पन्नोऽसि । केभ्यः । विश्वेभ्यः सर्वेभ्यः इन्द्रियेभ्यः सकाशात् दिव्येभ्यः दिवि भवा दिव्या देवास्तेभ्यश्च सकाशात् पार्थिवेभ्यः पृथिवीभवेभ्यो द्विपदचतुष्पदेभ्यः सकाशात् स्वय-

मुत्पन्न इत्यनुवर्तते । यस्त्वमेवमकृतकः स्वतन्त्रस्तं त्वां मनः प्रजापतिरङ्गु व्याप्नोतु अंशूङ् (3.) व्याप्तौ पदविकरणव्यत्ययः । प्रजापतिर्वै मनः प्रजापतिष्ट्वाꣳशुतामिति [8.१.१.२२.] श्रुतिः ॥ शोभनो भव उत्पत्तिर्यस्य तत्संबोधनं हे सुभव उत्तमजन्मन्यरुह सूर्याय सूर्यार्थं त्वा त्वां स्वाहाकारेण जुहोमि ॥ यद्वास्य होममन्त्रस्यायमर्थः हे प्राणरूप ग्रह त्वं स्वांकृतोऽसि मया स्वीकृतोऽसि किमर्थम् दिव्येभ्यः देवजन्मनि स्थितेभ्यः पार्थिवेभ्यः मनुष्यजन्मनि स्थितेभ्यः सर्वेभ्य इन्द्रियेभ्यः इन्द्रियाणां हितायित्यर्थः । मनश्च तेषामिन्द्रियाणामधीशं त्वामङ्गु व्याप्नोतु हे सुभव प्राणरूपोपांशुग्रह तादृग्रूपं त्वां बहिःप्राणरूपाय सूर्याय स्वाहाकारेण जुहोमि आदित्यो ह वै बाह्यः प्राण उदयत्येष क्षेनं चाक्षुषं प्राणमनुगृह्णीतऽइत्याथर्वणिकश्रुतिः सूर्यस्य बहिःप्राणत्वम् । स्वांकृतशब्देन प्राणरूपग्रहस्य स्वाधीनत्वं दिव्यपार्थिवशब्दाभ्यां च जन्मद्वयं विवक्षितमिति तित्तिरिणोक्तम् स्वांकृतोऽसीत्याह प्राणमिव समकृत (4.) विश्वेभ्य इन्द्रियेभ्यः दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान्दधातीति ॥ का° [१.४.३८.] प्रथमे परिधाऽउत्तानं पाणिं प्रागुपमार्ष्टि देवेभ्यस्त्वेति । पश्चिमस्थे परिधौ सोमलिप्तमूर्धाभिमुखं हस्तं कृत्वा प्रागभिमुखं यथा तथा मार्जनं कुर्यात् ॥ दैवं यज्ञः हे लेप मरीचिपेभ्यः मरीचिपालकेभ्यो देवेभ्योऽर्थाय त्वा त्वां परिधौ मार्ष्मि इति शेषः ॥ का° [१.४.३९.] वासऽरोबाङ्कुषु श्लिष्टमꣳशुमभिचरन्जुहुयादेवाꣳशविति । वस्त्रादिषु श्लिष्टो यः सोमांशुस्तमभिचारार्थं जुहुयात् ॥ आभिचारिकं सोमांशुदेवतं यज्ञुः । हे देव दीप्यमान हे अंशो सोमांशो यस्मै बधाय त्वामीडे प्रार्थयामि ईडिरध्येषणकर्मा तत् बधकर्म सत्यमस्त्विति शेषः । उपरि प्रवते प्रवतिर्गत्यर्थः गच्छतीत्युपरिप्रुत् तेनोपरि आगतेन भङ्गेनामर्देनासाविति देवदत्तादिनामनिर्देशः असौ द्वेष्यो हतो निहतः सन् फट् विशीर्णो भवतु जिफला विशरणे अस्य ह्रिबन्तस्यैतद्रूपम् फलतीति फट् डलयोरैक्यम् स्वाहाकारस्थाने फडित्यभिचारे प्रयुज्यते ॥ का° [१.४.४१.] प्राणाय त्वेति पात्रासादनम् । यस्मिन्प्रदेशे पूर्वमुपांशुपात्रं स्थापितं तत्रैव स्थापयेत् ॥ हे उपांशुपात्र प्राणदेवतासंतोषार्थं त्वाम् आसादयामीति शेषः ॥ का° [१.४.४२.] उपाꣳशुसवनं पाणिना प्रमृज्योदक्वं व्यानाय त्वेति सꣳस्पृष्टमिति । ये-

नाश्मना सोमोऽभिषुतः स उपांशुसवनस्तं हस्तेन प्रमृज्योद्गभिमुखग्रहसंलग्नं सादयेत् ॥ हे उपांशुसवन व्यानदेवताप्रीत्यर्थं त्वामासादयामि ॥३॥

II. उपयामगृहीतोऽस्यन्तर्यह्व मघवन्पाहि सोमम् । उरुष्य राय एषो यजस्व ॥४॥

का° [१.६.१.] उदितेऽन्तर्यामग्रहणमुपयामगृहीत इति । सूर्योदयानन्तरमन्तर्यामग्रहं गृह्णीयात् ॥ उपयामयतीत्युपयामो ग्रहस्तेन गृह्यतऽइत्युपयामगृहीतः पचाद्यच् चित्वादन्तोदात्तः यमोऽपरिविषणऽइति [धा° ११,७१.३२,८१.] परिविषणादन्यत्र मित्वाभावाद्वृद्धिः तत्पुरुषे तुल्यार्थेति [पा° ६.२.२.] पूर्वपदस्वरं वाधित्वा थाथघञ्क्रिति [पा° ६.२.१४४.] अञ्जन्तस्यान्तोदात्तत्वम् पुनस्तृतीयासमासे तत्पुरुषे तुल्यार्थेत्यादिना [पा° ६.२.२.] तृतीयान्तस्य प्रकृतिस्वरत्वेन तदेव स्थितम् । हे सोमरस त्वं तादृशोऽसि । हे मघवन् धनवन्निन्द्र त्वं तादृशं रसमन्तर्यहपात्रमध्ये यह्व निगृह्णीष्व यद्वा शत्रुभ्योऽन्तर्धानं व्यवधानं यथा तथा नियमय ततः सोमं पाहि पालय तथा रायो धनानि उरुष्य रक्ष उरुष्यती रक्षणाकर्मा यद्वा पशवो राय इति [४.१.२.१५.] श्रुतेः पशून्रक्ष । आ इषो यजस्व इषोऽन्नानि आयजस्व समन्ताद्देहि यद्वान्नप्रभवत्वादिषो लक्षणया प्रज्ञाः प्रज्ञा वाऽइष इति [४.१.२.१५.] श्रुतेः ता यजस्व यायजूकाः कुरु श्रुत्यैवं व्याख्यातत्वात् ॥४॥

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्व ॥५॥

मघवद्देवत्या त्रिष्टुप् अन्तर्यामग्रहणऽएव विनियोगः । हे मघवन् ते तवानुग्रहात् द्यावापृथिवी अन्तर्दधामि व्यवधायिके करोमि यद्वा हे अन्तर्याम प्राणरूपापन्नस्य तवान्तः शरीरमध्ये द्यावापृथिव्यौ दधामि स्थापयामि किं च उरु विस्तीर्णमन्तरिक्षमन्तर्मध्ये च दधामि द्यावापृथिव्योर्मध्ये स्थापयामि । हे मघवन्धनवन्निन्द्र अवरैः पृथिवीस्थानैः देवैर्मिर्देवैः परैः द्युस्थानैश्च देवैः सजूः समानजोषणः समानप्रीतियुक्तः सन्नन्तर्यामे ग्रहे मादयस्व हर्षयस्वात्मानम् यद्वा तृप्यस्व मद तृप्तौ चुरादिरात्मनेपदी । देवेभिरित्यत्र बहुलं छन्दसीति [पा° ७.१.१०.] ऐसोऽभावे बहुवचने ल्ये्देति [पा° ७.३.१०३.] एकारः ॥५॥

a. b = ३ a. b । c. उदानाय त्वा ॥ ६॥

का° (5.) स्वांकृत इति निःशेषस्यैव होमस्तिष्ठतः ॥ व्याख्यातः ॥ का° (5.) प्रथमे च न्युब्जेन पाणिना प्रत्यगिति । प्रथमे परिधावधोमुखहस्तेन प्रत्यक्संस्थं मार्ष्टि देवेभ्यस्त्वेति मन्त्रेण ॥ व्याख्यातः ॥ का° [१. ६. ४.] उदानाय त्वेति पात्रासादनम् ॥ हे ग्रह उदानसंतोषार्थं त्वां सादयामि ॥ ६॥

III. a. आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो ते ऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् । b. वायवे त्वा ॥ ७॥

का° [१. ६. ५.] ऐन्द्रवायवं गृह्णात्या वायविति ॥ वायुदेवत्या त्रिष्टुप् वसिष्ठदृष्टा वायवे त्वेति यजुरुक्ता । हे वायो हे शुचिपाः शुचिं पवित्रं प्रथमं वषट्कृतमप्राप्तमन्यदेवैः ईदृशं सोमं पिबतीति शुचिपाः पवित्रसोमपानः (6.) । त्वं नो ऽस्माकमुप समीपे आ भूष आक्रमस्वागच्छेत्यर्थः भूष अलंकार ऽइह गत्यर्थः । केनाहं आक्रमे इति चेत् सहस्रं ते नियुतो विश्ववार । विश्वं सर्वं वृणोति व्याप्नोति विश्वैर्वा व्रियते प्रार्थ्यते इति विश्ववारस्तत्संबोधनम् हे विश्ववार सर्वव्यापक ते तव सहस्रं नियुतः सन्ति । नियुतो वायोरित्युक्तेः [निघ° १. १५.] नियुद्भिर्वायुवाहनभूता मृगा उच्यन्ते तवासंख्याता वाहनभूता मृगास्तिष्ठन्तीत्यर्थः । किं च मद्यं मदनीयं तृप्तिजनकमन्धः सोमलक्षणमन्नं ते तव उप समीपे एव अयामि गमयामि सोमं ते समर्पयामीत्यर्थः । हे देव दीप्यमान वायो यस्य सोमस्य पूर्वपेयं प्रथमवषट्कारलक्षणं पूर्वपानं त्वं दधिषे धारयसि दधातेर्लिटि रूपम् ॥ एवं वायुं प्रार्थ्य सोममाह हे सोमरस वायवे वायुदेवतार्थं त्वां गृह्णामीति शेषः ॥ ७॥

a. इन्द्रवायू ऽइमे सुता उप प्रयोभिरागतम् । इन्द्रवो वामुशन्ति हि ।

b. उपयामगृहीतो ऽसि वायवे ऽइन्द्रवायुभ्यां त्वा । c. एष ते योनिः ।

d. सजोषोभ्यां त्वा ॥ ८॥

का° [१. ६. ६.] अपगृह्य पुनरिन्द्रवायू ऽइतीति । एकवारमर्धमादाय पृथक्कृत्य पुनरैन्द्रवायवं गृह्णाति ॥ ऐन्द्रवायवी गायत्री मधुछन्दोदृष्टा उपयामेतियजुःसहि-

तो मन्त्रः । हे इन्द्रवायू युष्मदर्थमिमे सोमाः सुता अभिषुताः । प्रय इत्यन्ननाम [निघ° २. ७. (7.)] प्रयोभिः एतैः सोमरसरूपैरन्नैर्निर्मितैरुप समीपे युवामागतमागच्छतम् यद्वा प्रयःशब्द इण् गताविति धातोः शतृप्रत्ययान्तस्य रूपम् प्रेतीति प्रयन् इणो यण् तस्य भिसि परे तकारस्य छान्दसः सकारः तस्य रुत्वादि प्रयोभिरिति सिध्यति प्रयोभिः प्रयद्भिः शीघ्रैश्चैरागच्छतम् । हि यस्मादिन्दवो सोमा वां युवामुशन्ति कामयन्ते तस्मादागच्छतमित्यर्थः ॥ सोममाह हे सोमरस त्वमुपयामेन पात्रेण गृहीतोऽसि वायवे वायुदेवतार्थं इन्द्रवायुभ्यां इन्द्रवायुदेवतार्थं च त्वां गृह्णामीति शेषः ॥ का° [१. ५. २५.] दशापवित्रेण परिमृज्यैष ते योनिरिति ग्रहसादनमिति । दशापवित्रेण गृहीतं ग्रहं परिमृज्य पात्राद्बहिर्निर्गतं सोमं मार्जयित्वा एष ते योनिरिति मन्त्रेण ग्रहस्य सादनं करोति । वीप्सा सर्वग्रहार्था इति सूत्रार्थः ॥ हे पात्र एष खरस्यैकदेशः ते योनिः तव स्थानम् अतोऽत्र सज्जोषोभ्यां समानप्रीतिभ्यामिन्द्रवायुभ्यामर्थं त्वां सादयामीति शेषः ॥ ८ ॥

IV. a. अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् । b. उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा ॥ १ ॥

का° [१. ६. ७.] मैत्रावरुणमयं वामिति । मैत्रावरुणं ग्रहं गृह्णीयात् ॥ मित्रावरुणदेवत्या गायत्री गृत्समददृष्टा यजुरुक्ता । हे मित्रावरुणौ विभक्तिराकारः हे ऋतावृधा ऋतं यज्ञं सत्यं वा वर्धयत इति ऋतवृधौ ऋतस्य वर्धयितारौ वां युवयोरर्थायायं सोमः सुतः अभिषुतः तस्मादिहास्मिन्यज्ञे ममेत् इत् एवार्थम् ममैव यजमानानां मध्ये ममैव हवमाह्वानं श्रुतं युवां शृणुतम् हे सोमरस त्वमुपयामेन मैत्रावरुणग्रहपात्रेण गृहीतोऽसि । मित्रावरुणाभ्यामर्थं त्वा त्वां गृह्णामीति शेषः ॥ १ ॥

a. राया वयꣳ सस्वाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् । b. एष ते योनिर्ऋतायुभ्यां त्वा ॥ १० ॥

का° [१. ६. ८.] पयसा श्रीणात्येनं कुशावन्तर्धाय राया वयमिति । मैत्रावरुण-

पात्रे कुशद्वयं व्यवधाय तत्र स्वं सोमरसं क्षीरेण मिश्रीकुर्यात् ॥ मित्रावरुणादेवत्या त्रिष्टुप्तृसदस्युदृष्टा । उत्तरार्धे तामिति तदः श्रवणादिह यदोऽध्याहारः । मल्लदृक्कामडुघां प्रार्थयते । यया धेन्वा गृहे सत्या वयं राया धनेन ससवांसः वन षण संभक्तौ इत्यस्य क्वसौ रूपम् धनेन संभक्ताः संपन्नाः सन्तो मदेम हृष्टाः स्याम । कथमिव । कव्येनेव यया कविषा संभक्ता देवा कृण्वन्ति यथा च यवसेन घासेन गवाङ्गिकादिना (8.) गावो कृण्वन्ति हे मित्रावरुणौ युवं युवां तां धेनुं नोऽस्मभ्यं विश्वाहा सर्वदा धत्तं दत्तम् किम्भूतां धेनुम् अनपस्फुरन्तीं स्फुरतिर्गत्यर्थः अपस्फुरति पुरुषान्तरं गच्छतीत्यपस्फुरन्ती न अपस्फुरन्ती ताम् अनन्यगामिनीम् दत्तामित्यर्थः ॥ एष तऽइति सादनम् । हे ग्रह एष ते योनिः स्थानम् ऋतायुभ्यां मित्रावरुणाभ्यामर्थे त्वां सादयामीति शेषः । ब्रह्म वाऽऋतं ब्रह्म हि मित्रो ब्रह्मो क्षत्रं वरुण एवायुरिति श्रुतिः [8.१.8.१०.] ऋतशब्देन मित्रः आयुशब्देन वरुणः इति श्रुतिव्याख्या पदकारस्तु ऋतयुभ्यामिति पदं कृतवान् तेन ऋतं सत्यं यज्ञं वा कामयेते तौ ऋत्यू ताभ्यामृतयुभ्याम् संहितायां दीर्घः यज्ञमिच्छद्भ्यां मित्रावरुणाभ्यामित्यर्थः पदकारस्य ॥१०॥

V. a. या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
b. उपयामगृहीतोऽस्यश्विभ्यां त्वा । c. एष ते योनिर्माधीभ्यां त्वा ॥११॥

का° [१.७.८.] आश्विनं गृह्णात्यन्वारब्धे वा या वामिति । यजमानेऽन्वारब्धे वाश्विनं ग्रहं गृह्णाति ॥ आश्विनी गायत्री मेधातिथिदृष्टा यजुरुक्ता । हे अश्विना अश्विदेवौ वां युवयोर्या कशा कशेति वाङ्नामसु [निघ° १.११.] पठितम् काशयति प्रकाशयति वाङ्नाम इति (9.) कशा वाक् किम्भूता मधुमती मधु ब्रह्म तद्वती मधुब्राह्मणोपनिषत्प्रशंसायुता तथा सूनृतावती प्रियं सत्यं वचः सूनृतम् तद्वती सत्यप्रियवचनोपेता । हे अश्विनौ तया वाचास्मदीयं यज्ञं मिमिक्षतं मिक्ष सेचने सन्-अन्तः सेक्तुमिच्छतम् निष्पादयतमित्यर्थः ॥ हे ग्रह त्वमुपयामेन गृहीतोऽसि अश्विभ्यामर्थे त्वां गृह्णामीति शेषः ॥ का° (10.) सादयत्येष ते ॥ हे ग्रह एष ते योनिः स्थानम् माधीभ्यां मधुब्राह्मणाध्येतृभ्यामश्विभ्यामर्थे त्वां सादयामीति शेषः ।

मधुब्राह्मणं यावधीयाते तौ माध्यौ ताभ्याम् तद्धित ईप्रत्ययः । दध्यङ् ह वाऽऽभ्यामाथर्वणो मधु नाम ब्राह्मणमुवाचेति श्रुतेः [४.१.५.१८.] ॥ ११ ॥

VI. a. तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषद्ꣳ स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे ॥
b. उपयामगृहीतोऽसि शण्डाय त्वा । c. एष ते योनिर्वीर्यं पाहि ।
d. अपमृष्टः शण्डः । e. देवास्त्वा शुक्रपाः प्रणयन्तु । f. अनाधृष्टासि ॥ १२ ॥

का° [१.६.१०.] शुक्रं वैल्वेन वा तं प्रत्नथेति । विल्वपात्रेण वैकङ्कतेन वा शुक्रं ग्रहं गृह्णाति ॥ जगती वैश्वदेवी काश्यपावत्सारदृष्टा (11.) द्वादशार्णाचतुःपादा जगती उपयामेत्यस्ते यजुः । हे इन्द्र त्वं यासु यज्ञक्रियासु अनु वर्धसे पुनःपुनः सोमपानेन वृद्धिं प्राप्नोषि तासु । वृजनमिति बलनाम [निघ° २.९.] बलं बलवद्यज्ञफलं दोहसे क्षारयसि ददासीत्यर्थः यजमानायेति शेषः कथं दोहसे तत्र दृष्टान्तमाह । प्रत्नथा प्रत्नपूर्वेत्यादिना [पा° ५.३.१११.] थाल्प्रत्ययः उपमार्थीयः प्रत्नशब्दः पुराणवचनः [निघ° ३.२७.] चिरंतनानां भृग्वादीनामिव फलं दोहसे । पूर्वथा पूर्वेषामिव ऋषीणां साध्यादीनामिव । विश्वथा विश्वेषां सर्वेषामृषिपुत्राणामिव । इमथा इदानींतनानां यजमानानामिवास्य फलं दोहसे तं त्वा स्तुम इति शेषः । किम्भूतं तम् ज्येष्ठतातिम् तननं (12.) तातिः विस्तारः ज्येष्ठा उत्कृष्टा तातिर्विस्तारो यस्य तम् यद्वा वृकज्येष्ठाभ्यामित्यादिना [पा° ५.४.४१.] प्रशंसायां तातिल्प्रत्ययः प्रशस्तो ज्येष्ठो ज्येष्ठेषु शस्यो वा ज्येष्ठतातिः । तथा बर्हिषदम् यज्ञेषु बर्हिषि सीदतीति बर्हिषदस्तम् । स्वर्विदम् स्वः द्युलोकं वेत्ति जानातीति स्वर्वित्तम् तत्र हि तस्य निवासः प्रतीचीनमात्मनोऽभिमुखम् धुनिं धुञ कम्पने कम्पितारं शत्रूणाम् आशुं शीघ्रम् जयन्तं जेतव्यानि वस्तूनि ॥ यद्वास्या ऋचोऽर्थान्तरम् हे इन्द्र यस्त्वं प्रतीचीनं प्रतिगमनमस्मत्प्रतिकूलम् वृजनं वर्जनीयमालस्याश्रद्धादिकं दोहसे रिक्तीकरोषि विनाशयसि डुदृ प्रपूरणे प्रपूरणं रिक्तीकरणमिति क्षीरस्वामी । किं च यासु क्रियासु धुनिं त्वदनुग्रहाच्छत्रून्कम्पयन्तमाशुं क्षिप्रकारिणं

ज्ञयस्तं सम्यगनुष्ठानेन यज्ञमानान्तराण्यतिशयानंमेनं यज्ञमानमनु सोमपानेन स्तुत्या च यः त्वं वर्धसे तासु क्रियासु तं त्वां स्तुमः इति शेषः कथमिव प्रत्नथा थाप्रत्यय उपमार्थः प्रत्नाः पुरातना भृग्वादयो यथा त्वामस्तुवन् पूर्वथा पूर्वे पित्राद्यइव विश्वथा अतीताः सर्वे यज्ञमाना-इव इमथा इदानींतना वर्तमाना (13.) यज्ञमाना-इव वयं त्वां स्तुम इत्यर्थः कीदृशं त्वाम् ज्येष्ठतातिं स्वार्थे तातिः ज्येष्ठमित्यर्थः बर्हिषदं यागे संनिहितत्वेन तिष्ठन्तम् स्वर्विदं यज्ञमानाय दातव्यं स्वर्गं वित्तीति स्वर्वित् ॥ एवमिन्द्रमुक्त्वा सोममाह । हे शुक्रग्रह त्वमुपयामेन गृहीतोऽसि शण्डाय शुक्रपुत्राय शण्डनाम्नेऽसुराय वा त्वां गृह्णामीति शेषः ॥ सादयत्येष ते । हे ग्रह एष खरप्रदेशस्तव स्थानम् त्वं यज्ञमानस्य वीरतां वीरत्वं शूरत्वं पाहि पालय ॥ का° [१.१०.१-५.] शुक्रामन्थिभ्यां चरतः शुक्रेणाधर्युर्मन्थिना प्रतिप्रस्थाता प्रोक्षिताप्रोक्षितौ यूपशकलावादायापिधानं प्रोक्षिताभ्यामपमार्जनमप्रोक्षिताभ्यामपमृष्टः शण्ड इत्यधर्युरिति । अधर्युप्रतिप्रस्थातारौ शुक्रामन्थिग्रहाभ्यां यथाक्रममनुष्ठितम् । तत्प्रकारः । प्रोक्षिताभ्यां द्वाभ्यां यूपशकलाभ्यां सहाप्रोक्षितौ द्वौ यूपशकलावादाय प्रोक्षिताभ्यां तयोर्ग्रहयोः क्रमेणाच्छादनं कृत्वाप्रोक्षिताभ्यां ग्रहावपमृज्यात् तत्र प्रोक्षितेन शकलेन ग्रहं पिधायाप्रोक्षितेनाधर्युः शुक्रग्रहमपमार्ष्टि इति सूत्रार्थः ॥ आभिचारिकं यजुः । शण्डनामकोऽसुरपुरोहितः शुक्रपुत्रोऽपमृष्टः अपमार्जनीकृतः ॥ का° [१.१०.६.] देवास्त्वेति निष्क्रामतो यथालिङ्गमिति । अधर्युप्रतिप्रस्थातारौ यथाक्रमेण शुक्रमन्थीत्येतत्पदद्वयवाचकमल्लिङ्गमनतिक्रम्य हविर्धानमध्यान्निर्गच्छताम् तत्र शुक्रलिङ्गेनाधर्युर्निष्क्रामति ॥ शुक्रदैवतम् । शुक्रनामकग्रहस्थं सोमं पिबन्ति शुक्रपा देवाः हे शुक्रग्रह त्वां प्रणयन्तु यज्ञतिस्थानं प्रापयन्तु ॥ का° [१.१०.७.] अपरेणोत्तरवेदिमरत्नी संधायोत्तरवेदिश्रोणयोर्निधत्तोऽविसृजन्तौ दक्षिणास्यामधर्युरुत्तरस्यां प्रतिप्रस्थातानाधृष्टासीति । अधर्युप्रतिप्रस्थातारौ वेदिपश्चाद्भागेऽरत्नी संयोज्य ग्रहयोर्विसर्गमकुर्वन्तौ उत्तरवेदिश्रोणयोर्ग्रहौ सादयतः दक्षिणश्रोणावधर्युः शुक्रम् उत्तरवेदिश्रोणौ प्रतिप्रस्थाता मन्थिनं सादयति ॥ वेदिश्रोणिदैवतम् हे उत्तरवेदिश्रोणे त्वमनाधृष्टानुपहिंसितासि ॥ १२ ॥

a. सुवीरो वीरान्प्रजनयन्परीह्यभि रायस्पोषेण यजमानम् ।

b. संजग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा ।

c. निरस्तः शण्डः । d. शुक्रस्याधिष्ठानमसि ॥ १३ ॥

का° [१. १०. ८.] सुवीर इति दक्षिणं यूपदेशं गच्छत्यध्वर्युरिति ॥ शुक्रदैवतम् । हे शुक्रग्रह त्वं सुवीरः शोभनशौर्योपेतः सन्वीरान्यजमानस्य शौर्योपेतान्भृत्यादीन्प्रजनयन् उत्पादयन् रायः पोषेण धनस्य पुष्ट्या यजमानमभिलक्ष्य परीहि परितो गच्छ ॥ का° [१. १०. १०.] अपरेण यूपमग्नी संधत्तः संजग्मान इति यथालिङ्गमिति । अध्वर्युप्रतिप्रस्थातारौ यूपपश्चिमभागे तत्तद्ग्रहवाचकपदलिङ्गमनतिक्रम्याग्न्योः संधानं कुर्याताम् शुक्रलिङ्गेनाध्वर्युः ॥ शुक्रो ग्रहः शुक्रशोचिषा शुद्धदीप्त्या कृत्वा यूयं बिभर्तीति शेषः किम्भूतः शुक्रः दिवा द्युलोकेन पृथिव्या भूलोकेन च संजग्मानः संगच्छमानः ॥ का° [१. १०. १२.] अप्रोक्षितौ निरस्यति निरस्तः शण्ड इत्यध्वर्युरिति । अध्वर्युरप्रोक्षितं यूपशकलं निरस्येत् ॥ आभिचारिकम् शण्डनामकः शुक्रपुत्रोऽसुरपुरोहितो निरस्तः यज्ञाद्बहिर्निक्षिप्तः ॥ का° [१. १०. १३.] आहवनीये प्रोक्षितौ प्रास्यतः शुक्रस्याधिष्ठानमित्यध्वर्युरिति । अध्वर्युराहवनीये प्रोक्षितं यूपशकलं क्षिपेत् ॥ शकलदैवतम् हे यूपशकल त्वं शुक्रग्रहस्याधिष्ठानमधिकरणमसि ॥ १३ ॥

a. अक्षिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।

b. सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽग्निः ॥ १४ ॥

का° [१. १०. १४.] अक्षिन्नस्येति जपतीति । यजमानो जपति ॥ सौम्यम् हे देव दीप्यमान सोम अक्षिन्नस्य अनवखण्डितस्य संततस्य सुवीर्यस्य कल्याणप्रभावस्य ते तव ददितारः दातारः वयं स्याम भवेम रायः पोषस्य धनपोषस्य च दातारः स्याम भूयो-भूयो (14.) यज्ञकरणमाशास्यते । यद्वा ते तव प्रसादात् रायः पोषस्य ददितारः स्याम । अक्षिन्नस्येति विशेषणद्वयं धनपोषस्यैव ॥ का° [१. ११. १.] उभयतो यूपं प्रत्यङ्मुखौ जुह्वतः सा प्रथमेत्यध्वर्युः प्रथमं तमनु प्रतिप्रस्थातेति । अध्वर्युप्रतिप्रस्थातारौ यूपोभयपार्श्वयोः स्थित्वा पश्चिमाभिमुखौ सन्तौ जुह्वयाताम् अध्वर्यु-

रादौ शुक्रं प्रतिप्रस्थाता ततो मन्थिनं जुहोति ॥ इन्द्रदेवत्या त्रिष्टुप् सा प्रथमा मुख्या संस्कृतिः सोमसंस्कारो यस्येन्द्रस्य क्रियते इन्द्रार्थं क्रियतऽइत्यर्थः सोमक्रये सा देवि देवमहिहीन्द्राय सोममित्युक्तत्वात् [अध्या° ४. २०.] । किम्भूता संस्कृतिः विश्ववारा विश्वैः सर्वैर्ऋत्विग्भिरनृत्विग्भिश्च व्रियते यत्र सोमः सा विश्ववारा यद्वा विश्वं वृणोति क्रियमाणः सोमो यत्रेति विश्ववारा जगदुत्पत्तिवीजत्वात्सोमस्य वरुणो मित्र अग्निश्च स प्रसिद्धो यस्य प्रथमो मुख्यो भूत्य इति शेषः वरुणमित्राग्नयोऽन्येषामप्युपलक्षकाः देवगणानां यः प्रभुरित्यर्थः ॥ १४ ॥

स प्रथमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहा ॥
c. तृम्पन्तु होत्रा मधो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहा ।
d. अयाडग्नीत् ॥ १५ ॥

स प्रसिद्धः चिकित्वान् चेतनावानुत्कृष्टधीः बृहस्पतिः यस्येन्द्रस्य प्रथमो मुख्यो मन्त्री इति शेषः ॥ यद्वा संस्कृतिः समीचीना कृतिर्विश्वदेवैर्वरणीया सा प्रथमा देवानां मध्ये मुख्या यस्येन्द्रस्य वरुणमित्राग्नयोऽपि स प्रथम इन्द्र एव चिकित्वान्बृहस्पतिरपि स इन्द्र एव हे ऋत्विजः तस्मै तादृशायेन्द्राय सुतमभिषुतं सोमं स्वाहेति स्वाहाकारेणाजुहोत आभिमुख्येन जुहुत स्वाहाकारेण होमं कुरुत ॥ का° [१. ११. १.] तृम्पन्त्विति जपतीति ॥ होत्रादैवतम् । ताः होत्राः छन्दोऽभिमानिन्यो देवताः तृम्पन्तु तृप्ता भवन्तु तृम्प प्रीतौ । होत्राशब्देन याज्याछन्दांस्यभिधीयन्ते । ताः काः याः मधो मधुनो मधुस्वादस्य सोमस्य स्विष्टाः साधु इष्टाः तद्धोमे नियुक्तत्वात् याश्च होत्राः सुष्ठु प्रीताः कथं ज्ञायन्ते (15.) यद्यस्मात् स्वाहाकारेण सुहुताः साधु हुता होमार्थं नियुक्ता इत्यर्थः ॥ का° [१. ११. १०.] होतारं प्रत्यङ्ङुपसीदत्यथाडग्नीदिति । अध्वर्युर्होतृसमीपे प्रत्यङ्मुखस्तिष्ठेत् ॥ होतृदैवतम् । अग्निरयाट् अयाक्षीत् अग्नीधा यागः कृत इति होतुः कथयति ॥ १५ ॥

VII. a. अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥

b. उपयामगृहीतोऽसि मर्काय त्वा ॥ १६ ॥

का° [१.६.१२.] मन्थिनमयं वेन इति । मन्थियग्रहं गृह्णीयात् ॥ त्रिष्टुप् अनयाधिदैवमधियज्ञं चावस्थितः सोमः स्तूयते ॥ अधिदैवं चन्द्रात्मना स्तूयते । वेनो वेनतेः कान्तिकर्मण इति यास्कः [निरु° १०.३८.] विनि (16.) कान्तावित्यस्य रूपम् अयं वेनः कान्तश्चन्द्रो रजसो विमाने उदकं रज उच्यते उदकस्य निर्माणकाले ग्रीष्मान्ते प्राप्ते पृश्निगर्भा अपः चोदयत् चोदयति प्रेरयति वर्षतीत्यर्थः पृश्निरादित्यो द्युलोको वा गर्भोऽवस्थानं यासां ताः द्युलोकस्था रविस्था वा अपो वर्षति । किम्भूतो वेनः ज्योतिर्जरायुः ज्योतिर्विद्युच्छब्दाणं जरायुवद्वेष्टनं यस्य स ज्योतिर्जरायुः ॥ इदानीमधियज्ञं लतात्मना सोमः स्तूयते विप्रा मेधाविनो ब्राह्मणा इमं सोमं शिशुं न शिशुमिव बालमिव मतिभिः मतिपूर्वाभिर्वाग्भिः रिहन्ति स्तुवन्ति । बालं यथा कश्चिल्लालयति तद्वत्यं सोमं स्तोत्रशस्त्ररूपाभिर्वाग्भिः स्तुवन्ति रिहतिर्र्चनकर्मसु पठितः [निघ° ३.१४.] अर्चनं स्तवनमेव । किम्भूतमिमम् सूर्यस्यापां च संगमे गृहीताभिरद्भिरभिषुतमिति शेषः सोमाभिषवार्थं वसतीवर्य आपो अपां सूर्यस्य च संगमे गृह्णन्ति ता वै वह्नीना७ (17.) स्यन्दमानानां गृह्णीयाद्दिवा गृह्णीयादिति श्रुतेः । यद्वायमर्थः अपां सूर्यस्य संगमे निमित्ते उदकसूर्यसमागमनिमित्तं वृष्टिगर्भनिष्पत्त्यर्थं विप्रा इमं सोमं स्तुवन्ति यथा बालं कस्यचिद्वस्तुनो लाभाय यथा कश्चित्स्तौति । ईदृश हे सोम त्वमुपयामेन ग्रहपात्रेण गृहीतोऽसि मर्कः शुक्रपुत्रोऽसुरपुरोहितस्तस्मै त्वां गृह्णामीति शेषः ॥ १६ ॥

a. मनो न येषु हवनेषु तिग्मं विपः शचा वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णोऽअस्याश्रीणीतादिशं गभस्तौ ॥

b. एष ते योनिः प्रजाः पाहि । c. अपमृष्टो मर्कः । d. देवास्त्वा मन्थिपाः प्रणयन्तु । e. अनाधृष्टासि ॥ १७ ॥

का° [१.६.१३.] सक्तुभिः श्रीणात्येनं मनो न येषिति । एनं मन्थियग्रहं यवपिष्टैर्मिश्रीकुर्यात् ॥ त्रिष्टुप् सोमस्तुतिः । विपः विपश्चितौ मेधाविनौ अध्वर्युप्रतिप्रस्थातारौ विप इत्यत्र छान्दसः प्रातिपदिकैकादेशलोपः येषु हवनेषु सोमहोमेषु

शच्या कर्मणा कृत्वा शचीति कर्मनाम [निघ° २.१.] मनो न मन-इव तिग्मम् तिग्मं तेजतिरुत्साकृकर्मण इति यास्कः [निरु° १०.६.] मनोवदुत्साकृयुक्तं यथा तथा वनुथः प्रथमपुरुषस्थानि मध्यमपुरुषश्छान्दसः वनुतः व्याप्नुतः युगपत् शुक्रामन्थिग्रहाविति शेषः शच्येति निमित्ततृतीया वा कर्मनिमित्तं व्याप्नुत इत्यर्थः । किम्भूतौ विपश्चितौ द्रवन्तौ द्रवन्तौ गच्छन्तौ कवनेषु तेष्वेव कर्तव्येषु होमेषु प्रचरन्तौ । यो ऽध्वर्युः शर्याभिः अङ्गुलीभिर्गृभस्तौ पाणौ स्थितस्यास्य मन्थिग्रहस्य कर्मणि षष्ठी इमं मन्थिनमादिशं प्रतिदिशमा अश्रीणीत समन्तात् श्रीणीति सक्तुभिर्मिश्रयति किम्भूतो यः तुविनृम्णाः तुवि नृम्णं यस्य वङ्कधनः महादक्षिणाः तुवीति वङ्कनाम [निघ° ३.१.] नृम्णमिति धननाम [निघ° २.१०.] । यद्यप्यत्राध्वर्युप्रतिप्रस्थातारौ समानकर्माणौ तथापि यः सक्तुभिः अपणं करोति स एव प्रधान इत्याशयः ॥ एष तऽइति सादयति । हे मन्थिग्रह ते तव एष योनिः प्रदेशः त्वं प्रजाः यजमानसंबन्धिनीः पाहि पालय ॥ का° [१.१०.५.] अपमृष्टो मर्क इति प्रतिप्रस्थातेति । प्रतिप्रस्थाता प्रोक्षितेन यूपशकलेन मन्थिनमाक्षाव्याप्रोक्षितेनापमार्ष्टि ॥ अपमार्जनीकृतो मर्को नामासुरपुरोहितः ॥ का° [१.१०.६.] देवास्त्वेति निष्क्रामतो यथालिङ्गमिति । प्रतिप्रस्थाता कविधानान्निष्क्रामेत् ॥ मन्थिदैवतम् हे मन्थिग्रह मन्थिनं ग्रहं पिबन्तीति मन्थिपाः देवाः त्वा प्रणयन्तु यजमानस्थानं प्रापयन्तु ॥ अनाधृष्टासीति मन्त्रो विनियोगसहितः पूर्वं [का° १२.] व्याख्यातः ॥१७॥

a. सुप्रजाः प्रजाः प्रजनयन्परीह्यभि रायस्पोषेण यजमानम् ।
b. संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा ।
c. निरस्तो मर्कः । d. मन्थिनोऽधिष्ठानमसि ॥१८॥

का° [१.१०.१.] सुप्रजा इति प्रतिप्रस्थातोत्तरमिति । प्रतिप्रस्थातोत्तरं यूपदेशं गच्छति ॥ मन्थिदैवतम् हे मन्थिग्रह शोभना प्रजा यस्य स सुप्रजास्त्वं यजमानसंबन्धिनीः प्रजाः प्रजनयन् उत्पादयन् सन् रायस्पोषेण धनस्य पुष्ट्या सह यजमानमभि यजमानसंमुखं परीहि परिगच्छ आगच्छ ॥ का° [१.१०.१०.] अपरेण यूपमरणी संधत्तः संजग्मान इति । प्रतिप्रस्थातारणिं संधत्तऽइत्युक्तम् ॥ मन्थी नाम

ग्रहो दिवा पृथिव्या द्युलोकभूलोकाभ्यां संजग्मानः संगच्छमानः सन् मन्थिशोचिषा मन्थिनः स्वस्यैव दीप्त्या यूपं बिभर्तीति शेषः ॥ का° [१. १०. ११.] निरस्तो मर्क इति प्रतिप्रस्थातेति । प्रतिप्रस्थाता अप्रोक्षितं यूपशकलं निरस्येत् ॥ आभिचारिकम् मर्कनामासुरपुरोहितो निरस्तो निराकृतः ॥ का° [१. १०. १३.] मन्थिन इति प्रतिप्रस्थातेति । प्रतिप्रस्थाता प्रोक्षितं यूपशकलमाहवनीये प्रक्षिपेत् ॥ शकलदैवतम् हे यूपशकल त्वं मन्थिग्रहस्याधिष्ठानमधिकरणमसि ॥ १८ ॥

VIII. ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ १९ ॥

का° [१. ६. १४.] आग्रयणं द्वयोर्धारयोर्ये देवास इति । धाराद्वये क्षरति सत्याग्रयणं ग्रहं गृह्णीयात् ॥ वैश्वदेवी त्रिष्टुप् परुच्छेपदृष्टा । हे देवासः देवाः ये यूयं दिवि द्युलोके एकादश स्थ एकादशसंख्याका भवथ केन महिना महिम्ना स्वस्वमहिम्ना स्वस्वमाहात्म्येन महिनेति पदं त्रिष्वपि स्थानेषु संबध्यते सर्वत्र महाभाग्याविशेषात् तथा पृथिव्यामधि पृथिव्युपरि एकादश स्थ तथा ये यूयमप्सुक्षितः अन्तरिक्षनिवासिन एकादश स्थ भवथ । अप्स्विति अन्तरिक्षनामसु [निघ° १. ३. (18.)] पठितम् क्षियतिर्निवासार्थः अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीत्यर्थः हे देवासः देवास्ते त्रिविधा यूयमिमं यज्ञं यजनीयमाग्रयणाग्रहं जुषध्वं सेवध्वम् ॥ १९ ॥

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ॥ २० ॥

आग्रयणदेवतं यजुराग्रयणाग्रहणाऽएव विनियुक्तम् हे आग्रयणाग्रह त्वमुपयामेन पात्रेण स्वीकृतोऽसि । आग्रयणोऽसि आग्रयणनामा भवसि किम्भूतस्त्वम् स्वाग्रयणः अग्रस्य भावः आग्रम् सुष्ठु आग्रं स्वाग्रं श्रैष्ठ्यम् अयति प्रापयतीति स्वाग्रयणः अग्रशब्दस्यायतौ परे टिलोपः । तादृशस्त्वं यज्ञं पाहि रक्ष यज्ञपतिं यजमानं च पाहि । विष्णुः यज्ञाधिष्ठाता देव इन्द्रियेण स्वसामर्थ्येन त्वां पातु त्वमपि तादृशं विष्णुं पाहि रक्ष । सवनानि प्रातरादीनि अभि पाहि सर्वतो रक्ष ॥ २० ॥

a. सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवतऽइषऽऊर्ज्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्यः । b. एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ २१ ॥

का° [१. ६. १५.] त्रिर्हिंकृत्य सोमः पवतऽइति । हिंकारत्रयं कृत्वा जपेदिति शेषः ॥ वैश्वदेवम् । सोमः पवते पवतिर्गत्यर्थः सोमो गच्छति ग्रहपात्रेषु स्वकीये कर्मणि प्रवर्ततऽइत्यर्थः । द्विरुक्तिरादरार्था । किमर्थम् अस्मै ब्रह्मणे ब्राह्मणजातिप्रीत्यर्थम् अस्मै क्षत्राय एतत्क्षत्रियजातिप्रीत्यर्थम् अस्मै सुन्वते सोमाभिषवं कुर्वते यजमानाय कामप्राप्त्यर्थं पवते । इषेऽन्नाय ऊर्ज्जे तदुपसेचनाय क्षीरादये पवते निष्पत्त्यर्थमित्यर्थः । अद्भ्यो वृष्टिभ्यः ओषधीभ्यो व्रीह्यियवादिभ्यस्तत्सिद्ध्यर्थं पवते । द्यावापृथिवीभ्यां लोकद्वयप्रीणनाय पवते । किं वा बहुनोक्तेन सुभूताय सर्वेषां साधुभवनाय पवते । हे आग्रयणग्रह तादृशं वा त्वां विश्वेभ्यो देवेभ्यः सर्वदेवताप्रीत्यर्थं गृह्णामीति शेषः ॥ एष तऽइति सादयति । हे ग्रह एष ते योनिः स्थानं विश्वेभ्यः सर्वेभ्यो देवेभ्योऽर्थे त्वां सादयामीति शेषः ॥ २१ ॥

IX. a. उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽउक्थाव्यं गृह्णामि । यत्तऽइन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वा ।

b. एष ते योनिरुक्थेभ्यस्त्वा ।

c. देवेभ्यस्त्वा देवाव्यं गृह्णामि यज्ञस्यायुषे गृह्णामि ॥ २२ ॥

का° [१. ६. २०.] उक्थ्यमुपयामगृहीत इति । उक्थ्यं ग्रहं गृह्णीयात् ॥ उपयामग्रहदेवतानि यजूंषि हे सोम त्वमुपयामेन पात्रेण गृहीतोऽसि हे उक्थ्यग्रह त्वा त्वामिन्द्रार्थं गृह्णामि स्वीकरोमि । किम्भूतायेन्द्राय बृहद्वते बृहत्साम तद्वते बृहत्सामप्रियायेत्यर्थः तथा वयस्वते वयः सोमद्रप्यमन्नं तद्वते यद्वा वयो यौवनलक्षणं वीर्यसमेतम् (19.) सदा तद्वते । किम्भूतं त्वाम् उक्थाव्यम् उक्थानि मित्रावरुणब्राह्मणाहंस्यहावाकसंबन्धीनि शस्त्राणि अवति रक्षतीत्युक्थावीः तम्

तत्र व्यस्य विनियोगः ॥ किं च एवं सोममुक्ता इन्द्रमाह हे इन्द्र यत्ते तव बृहत् महत् वयोऽन्नं सोमद्रूपमस्ति तस्मै तत्पानार्थं त्वां प्रार्थये इति शेषः । हे सोम विष्णवे विष्णुदेवतार्थं त्वां गृह्णामि । यद्वा हे इन्द्र यत्ते तव बृहत् महत् ऊर्जितम् वयः यौवनलक्षणं तस्मै सोम त्वां गृह्णामि । अत्र च ते इन्द्रेति युष्मदामन्त्रिताभ्यां प्रत्यक्ष इन्द्र उच्यते त्वेति युष्मदा सोम उच्यते प्रत्यक्षः तयोः सामर्थ्यं नास्ति ततस्ते इत्यस्य पदस्य अस्येत्यनेन व्यत्ययः इन्द्रेत्यस्येन्द्रस्येत्यनेन पदेन व्यत्ययः ततश्चायमर्थः हे सोम यदस्येन्द्रस्य बृहद्वयो तस्मै त्वा गृह्णामि विष्णवे यज्ञाय च त्वां गृह्णामि ॥ एष तऽइति सादनम् । हे यज्ञ एष ते तव योनिः स्थानमुक्थेभ्योऽर्थाय त्वां सादयामीति शेषः ॥ का° [१. १४. ८.] उक्थ्यं विगृह्णाति त्रैधं देवेभ्यस्त्वेति सर्वेभ्य इति । उक्थ्यस्थालीस्थं सोमं त्रेधा विभज्य गृह्णाति । सर्वेभ्यः प्रशास्तृब्राह्मणाछंस्यबाह्वाकेभ्यस्तत्कृतयागार्थमित्यर्थः ॥ हे सोम देवेभ्योऽर्थाय त्वां गृह्णामि किम्भूतं त्वाम् देवाव्यम् देवानवति तर्पयतीति देवावीस्तम् किमर्थम् यज्ञस्यायुषे अनवछिन्ना कर्मैकदोषरहिता (20.) परिसमाप्तिर्यज्ञस्यायुस्तस्मै यज्ञसमाप्तये फलपर्यन्तमवस्थानाय च गृह्णामि । यद्वा यज्ञो यजमानस्य शरीरमिति यजमानस्यायुषे गृह्णामि ॥ २२ ॥

a. मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि । b. इन्द्राय त्वा दे° । c. इन्द्राग्निभ्यां त्वा दे° । d. इन्द्रावरुणाभ्यां त्वा दे° । e. इन्द्राबृहस्पतिभ्यां त्वा दे° । f. इन्द्राविष्णुभ्यां त्वा दे° ॥ २३ ॥

का° [१. १४. १.] मित्रावरुणाभ्यां त्वेति वा प्रशास्त्रऽइति । मैत्रावरुणायोक्थ्यविग्रहे मन्त्रविकल्पः ॥ मित्रावरुणाभ्यामर्थे देवाव्यं देवतर्पकं त्वां यज्ञस्यायुषे गृह्णामि ॥ का° [१. १४. १५.] एवं प्रतिप्रस्थातोत्तराभ्यामिन्द्राय त्वेति ब्राह्मणाछंसिनऽइन्द्राग्निभ्यां त्वेत्यछावाकायेति । ब्राह्मणाछंस्यछावाकाभ्यां मन्त्रविकल्पावेवम् ॥ इन्द्राय त्वां गृह्णामि इन्द्राग्निभ्यामर्थे त्वां गृह्णामि शेषं पूर्ववत् ॥ का° [१०. ७. ११.] उत्तरेष्विन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामिति । उक्थ्यादिसोमसंस्थेषु मैत्रावरुणादीनां तृतीयसवने उक्थ्यविग्रहमन्त्राः ॥ इन्द्रावरुणयोरर्थे त्वां देवा-

व्यं यज्ञस्यायुषे गृह्णामि । एवमिन्द्राबृहस्पतिभ्यामर्थे त्वां गृह्णामि । इन्द्राविष्णुभ्यामर्थे त्वां गृह्णामि ॥ मित्रावरुणाभ्यामित्यादौ देवताद्वन्द्वे चेति [पा° ६.३.२६.] पूर्वपदात्तस्य दीर्घः ॥ २३ ॥

X. मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ २४ ॥

का° [१.६.२१.] ध्रुवं मूर्धानं दिव इति । ध्रुवसंज्ञं ग्रहं गृह्णीयात् ॥ वैश्वानरदेवत्या त्रिष्टुब्भरद्वाजदृष्टा वैश्वानरश्चात्र सर्वात्मना स्तूयते । देवा ईदृशमग्निं जनयन्त उत्पादितवन्तः अडागमाभाव आर्षः । किम्भूतमग्निम् दिवो मूर्धानं द्युलोकस्य शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय भासकम् । तथा पृथिव्या अरतिम् रतिरुपरतिस्तद्रहितम् नहि पृथिव्या उपरि कदाचिदग्निरुपरमते किंतु दाहपाकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्तत एव यद्वा पृथिवीशब्देनान्तरिक्षमुच्यते आकाशमापः पृथिवीत्यन्तरिक्षनामसु [निघ° १.३.] पठितत्वात् पृथिव्या अन्तरिक्षस्यारतिमलमतिं पर्याप्तमतिं (24.) पूरकमित्यर्थः तत्र स्थितोऽसौ यथाकालं वृष्ट्या भूतानि पुष्णाति । तथा वैश्वानरं विश्वेभ्यः सर्वेभ्यो नरेभ्यो नरेभ्यो हितो वैश्वानरस्तम् जठराग्निरूपेणान्नपाचकत्वात् । तथा ऋते यज्ञे यज्ञनिमित्तमाजातम् (22.) उत्पन्नमरणिद्वयात् । तथा कविं क्रान्तदर्शनं स्वभक्ताननुग्रहीतुमभिज्ञमित्यर्थः । तथा सम्राजं सम्यग्दीप्यमानमैश्वर्येण युक्तमित्यर्थः । तथा जनानां यजमानानामतिथिं ऋत्विर्भिः सत्कारयोग्यम् विज्ञायते हि अग्निरतिथिरूपेण गृहान्प्रविशति तस्मात्तस्योदकमाहरन्ति । आसन् आपात्रम् आस्यशब्दस्य सप्तम्येकवचने पदन्न इति [पा° ६.१.६३.] सूत्रेणासन्आदेशः सुपां सुलुगिति [पा° ७.१.३९.] सप्तमीलोपः आसन् आसनि आस्ये मुखे आपात्रम् (23.) आभिमुख्येन पीयतेऽनेनेत्यापात्रम् विज्ञायते हि चमसो देवपान इति चमसेन ह वाऽएतेन भूतेन देवा भक्षयन्तीति [१.४.२.१४.] श्रुतेः ॥ ईदृशमग्निं देवा इन्द्रादयोऽजनयन्तेत्यर्थः ॥ २४ ॥

a. उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः । b. एष ते योनिर्वैश्वानराय त्वा । c. ध्रुवं ध्रुवेण म-

नसा वाचा सोममवनयामि । अथा न इन्द्र इद्दिशोऽसपत्नाः समनसस्करत् ॥ २५ ॥

ध्रुवदैवतं यजुः ध्रुवग्रहणेऽव विनियुक्तम् हे सोम त्वमुपयामिन पात्रेण गृहीतोऽसि ध्रुवोऽसि ध्रुवनामकोऽसि कीदृशस्त्वम् ध्रुवा स्थिरा क्षितिर्निवासो यस्य स ध्रुवक्षितिः क्षितिर्वासगत्योः स्थिरनिवासः आ वैश्वदेवीशंसनप्रस्थानात् (24.) तथा ध्रुवाणामादित्यस्थाल्यादीनां मध्ये ध्रुवतमः अतिशयेन स्थिरः तथा अच्युतानां च्युतिरहितानां क्षरणशून्यानां मध्ये अच्युतक्षित्तमः अच्युते च्युतिरहिते पात्रे क्षियति निवसतीति अच्युतक्षित् अतिशयेनाच्युतक्षित् अच्युतक्षित्तमः ॥ एष तऽइति सादनम् । हे ग्रह एष ते योनिः स्थानं वैश्वानरायाग्नये त्वा त्वां सादयामि ॥ काऽ (25.) ध्रुवꣳ होतृचमसेऽवनयति ध्रुवं ध्रुवेणेति । ध्रुवपात्रस्थं सर्वं सोमं होतृचमसे सिञ्चेत् ॥ बृहती पूर्वोऽर्धर्चो ध्रुवदैवतः उत्तर ऐन्द्रः । प्रथमतृतीयावष्टाक्षरौ पादौ द्वितीयचतुर्थौ दशाक्षरौ सा बृहती वैराजौ गायत्रौ चेति पिङ्गलोक्तेः । ध्रुवेणेत्यग्रेण मनसा वाचा तन्मन्त्रोच्चारणप्रवणया ध्रुवं ध्रुवग्रहेऽवस्थितं सोममवनयामि होतृचमसेऽवसिञ्चामि यद्वा ध्रुवं ग्रहं सोमं होतृचमसस्थं प्रत्यवनयामि ॥ अथा अनन्तरमिन्द्र इत् इदेवार्थे इन्द्र एव नोऽस्माकं विशः प्रजाः ईदृशीः करत् इतश्च लोपः परस्मैपदेष्वितीलोपः [पाऽ ३. ४. १७.] लेटोऽडाटावित्यडागमः [पाऽ ३. ४. १४.] । कीदृशीर्विशः असपत्नाः नास्ति सपत्नो यासां ताः सपत्नरहिताः शत्रुशून्याः तथा समनसः समानं मनो यासां ताः स्थिरमनस्का धृतियुक्ता इत्यर्थः ॥ २५ ॥

XI. a. यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशुर्ग्रावच्युतो धिषणायोरुपस्थात् । अध्वर्यो वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतꣳ स्वाहा ।

b. देवानामुत्क्रमणमसि ॥ २६ ॥

काऽ [१. ६. २८.] यस्तऽइति विप्रुषꣳ होमं जुहुतीति । अभिषवे ग्रहणे च पतितानां सोमबिन्दूनां ग्रहणाशक्यत्वात्तत्प्रत्यवायपरिहाराय घृतहोमस्य विप्रुड्होम इति संज्ञा तमध्वर्यादयो जुह्वति ॥ सौमी त्रिष्टुप्स्वाहेति यजुरन्ता देवश्रवो-

दृष्टा । हे सोम ते तव यो द्रप्सः रसैकदेशः स्कन्दति भूमावन्यत्र वा पतति यश्च ते तवांशुः खण्डः ग्रावच्युतः ग्रावणः सकाशात्पतितः यश्च धिषणायोः अधिषवणफलकयोरुपस्थादुत्सङ्गात् स्कन्दति वाथवा य अंशुरध्वर्योः सकाशात्स्कन्दति वाथवा य अंशुः पवित्रात्परि स्कन्दति यतः कुतश्चित्परि स्कन्दतीति भावः हे सोम ते तव तं द्रप्समंशुं च स्वाहाकारेण जुहोमि । किम्भूतं तम् मनसा वषट्कृतं संकल्पितं वषट्कारेण च स्वाहाकारेण च जुहोमीत्यर्थः ॥ का° [१. ६. ३२.] अन्यतरत्तृणं चात्वाले प्रास्यतीति । अध्वर्युणा वेदर्ये तृणे गृहीते तयोरेकं चात्वाले क्षिपेत् ॥ चात्वालदैवतम् हे चात्वाल त्वं देवानामुत्क्रमणमसि उत्क्रामन्ति गच्छन्ति स्वर्गं यस्मात्तदुत्क्रमणं देवास्त्वत्तः स्वर्गं गच्छन्ति अतो हि देवाः स्वर्गमुपोदक्रामन्निति [४. २. ५. ५.] श्रुतिः ॥ २६ ॥

XII. a. प्राणाय मे वर्चोदा वर्चसे पवस्व । b. व्यानाय मे वः । c. उदानाय मे वः । d. वाचे मे वः । e. क्रतूदक्षाभ्यां मे वः । f. श्रोत्राय मे वः । g. चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥ २७ ॥

का° [१. ७. १.] ग्रहानविक्षयति यथागृहीतमवकाशान्वाचयन्प्राणाय मऽइति प्रतिमन्त्रमिति । प्राणायेत्यादयो मन्त्रा अवकाशसंज्ञास्तान्वाचयेत् ग्रहणक्रमेण ग्रहान्यजमानं दर्शयति ॥ लिङ्गोक्तदेवतान्येकादश । यज्ञस्यैते प्राणास्तान्प्राणरूपेण दर्शयति हे उपांशो यस्त्वं स्वभावत एव वर्चोदाः तेजसो दाता सः त्वं मे मम प्राणाय हृदयस्थितवायोर्वर्चसे पवस्व प्रवर्तस्व ॥ उपांशुसवनम् व्यानाय मे सर्वशरीरगतवायवे पवस्व अन्यत्पूर्ववत् ॥ अन्तर्यामम् कण्ठदेशस्थो वायुरुदानः ॥ ऐन्द्रवायवम् वागिन्द्रियाय ॥ मैत्रावरुणम् क्रतुः कामः दक्षस्तस्य समृद्धिः तद्धेतुसाधनरूपाय वर्चसे प्रवर्तस्व ॥ आश्विनम् श्रोत्राय श्रोत्रेन्द्रियाय ॥ शुक्रामन्थिनौ युगपत् हे शुक्रामन्थिनौ मे मम चक्षुषोः पाटवाय तद्रूपाय वर्चसे युवां पवेथां प्रवर्तेथाम् ॥ २७ ॥

a. आत्मने मे वर्चोदा वर्चसे पवस्व । b. ओजसे मे वः । c. आयुषे मे वः । d. विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ॥ २८ ॥

आग्रयणम् । ममात्मने जीवस्य स्वास्थ्याय वर्चसे पवस्व ॥ उक्थ्यम् श्रोत्रः सर्वेन्द्रियपाटवं शारीरं बलं वा तद्रूपाय वर्चसे पवस्व ॥ ध्रुवम् आयुर्निर्दुष्टजीवनं (26.) तद्रूपाय वर्चसे पवस्व ॥ पूतभृदाधवनीयौ युगपदवेक्षते । हे पूतभृदाधवनीयौ सर्वाभ्यो मम प्रजाभ्यः प्रजार्थं यद्वर्चस्तेजस्तदर्थं युवां पवेथाम् किम्भूतौ युवाम् वर्चोदसौ वर्चो दत्तस्तौ वर्चोदसौ सर्वत्र ददातिरसुन्प्रत्ययः । यद्वात्र प्राणायेत्यादिचतुर्थीनां षष्ठ्या विपरिणामः प्राणव्यानादीनां यद्वर्चस्तदर्थं पवस्वेत्यर्थः यद्वा यस्त्वं प्राणाय वर्चोदाः स मे वर्चसे ब्रह्मवर्चसाय पवस्व एवं सर्वत्र ॥ २८ ॥

a. कोऽसि कतमोऽसि कस्यासि को नामासि । यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम । b. भूर्भुवःस्वः सुप्रजाः प्रजाभिः स्याꣳ सुवीरो वीरैः सुपोषः पोषैः ॥ २९ ॥

का° [१. ७. १४.] कोऽसीति द्रोणकलशमिति । द्रोणकलशमवेक्षते ॥ प्राजापत्या वर्धमानोष्णिक् । यस्याः प्रथमः पादः षडक्षरो द्वितीयः सप्ताक्षरस्तृतीयोऽष्टार्णश्चतुर्थी नवाक्षरः सा त्रिंशदर्णा वर्धमानोष्णिक् । अध्यस्तप्रजापतिं द्रोणकलशमाह हे द्रोणकलश त्वं कः प्रजापतिरसि कतमोऽतिशयेन प्रजापतिरसि तथा कस्य प्रजापतेरसि को नाम प्रजापतिनामासि प्रजापतिरनन्यभूतोऽसीत्यर्थः । किं च वयं यस्य ते तव नाम अमन्महि विजानीमः, मन ज्ञानि च पुनर्यं द्रोणकलशरूपं त्वां वयं सोमेन अतीतृपाम तर्पितवन्तः स त्वमस्मान्विदितनाम्नः कुरु तर्पय च कामैरिति शेषः ॥ का° [१. ७. १५.] भूर्भुवः स्वरिति जपतीति ॥ हे भूर्भुवः स्वः अग्निवायुसूर्याः प्रजाभिः अहं सुप्रजाः शोभनप्रजायुक्तः स्यां भवेयम् वीरैः पुत्रैः सुवीरः स्यां पोषैः धनादिपुष्टिभिः सुपोषः शोभनपोषो भवेयम् ॥ २९ ॥

XIII. a. उपयामगृहीतोऽसि मधवे त्वा । b. उपयामगृहीतोऽसि माधवाय त्वा । c. उꣳ शुक्राय त्वा । d. उꣳ शुचये त्वा । e. उꣳ नभसे त्वा । f. उꣳ नभस्याय त्वा । g. उꣳ ऽसीषे त्वा । h. उꣳ ऽस्यूर्जे त्वा ।

i. उ॰ सꣳसे त्वा । k. उ॰ सꣳस्याय त्वा । l. उ॰ तपसे त्वा ।
m. उ॰ तपस्याय त्वा । n. उ॰ ऽस्यꣳहसस्पतये त्वा ॥ ३० ॥

का॰ [१.१३.१-४.] ऋतुग्रहैश्चरतो द्रोणकलशादुपयामगृहीतोऽसि मधवे त्वेति द्वादश प्रतिमन्त्रमधर्योः पूर्वः पूर्वो मन्त्र उत्तर उत्तरः प्रतिप्रस्थातुरिति । अध्वर्युप्रतिप्रस्थातारावृतुग्रहैर्द्वादशभिरनुतिष्ठतः उपयामेत्यादयो द्वादश मन्त्राः तत्र षट्सु मन्त्रयुग्मेषु पूर्वः पूर्वो मन्त्रोऽध्वर्योः उत्तर उत्तरः प्रतिप्रस्थातुरिति मन्त्रविवेकः ॥ द्वादश लिङ्गोक्तानि । हे ऋतुग्रह त्वमुपयामेन गृहीतोऽसि मधवे मधुनाम्ने चैत्रमासाय त्वां गृह्णामीति शेषः । माधवाय वैशाखाय त्वां गृह्णामि । मधुमाधवौ वासन्तौ मधुप्रमुखमन्नं वसन्ते प्रपद्यते ॥ शुक्राय ज्यैष्ठाय त्वां गृह्णामि । शुचये आषाढमासाभिमानिदेवार्थं त्वां गृह्णामि । शुक्रशुची ग्रीष्ममासौ शुच शोषणऽइत्यस्य धातोः ॥ नभसे श्रावणमासाय सोम त्वां गृह्णामि । नभस्याय भाद्रपदमासाभिमानिने त्वां गृह्णामि । नभोनभस्यौ वार्षिकौ मासौ मेघबाहुल्यान्न भात्यत्र सूर्य इति नभा नभस्यश्च ॥ इष आश्विनमासाय त्वां गृह्णामि ऊर्जे कार्तिकमासाय त्वां गृह्णामि इषमन्नम् ऊर्ज तदुपसेचनं दध्यादि (27.) तदत्र प्रचुरं भवति मतुपो लोपाद्भेदोपचाराद्वा ऊर्क्शब्देन (28.) शारदौ मासावुच्येते ॥ सꣳसे मार्गशीर्षमासाय । सꣳस्याय पुष्यमासाय सꣳसꣳस्यौ हैमन्तिकौ मासौ सꣳसतेः प्रसꣳसनार्थस्य प्रयोगः प्रसꣳसनमभिभवनम् यतो हेमन्तः शीतेन नरानभिभवति ॥ तपसे माघमासाय । तपस्याय फाल्गुनाय तपस्तपस्यौ शैशिरौ मासौ तपति सूर्यो यत्रात्यन्तं स तपास्तपस्यश्च ॥ का॰ [१.१३.१८.] त्रयोदशं गृह्णीयादिꣳहसस्पतयुपयामगृहीतोऽस्यꣳहसस्पतये त्वेति । इꣳहसस्पतिर्मासत्रयोदशमृतुग्रहं गृह्णीयात् ऐहिको विकल्पः ॥ हे ग्रह त्वमुपयामेन पात्रेण गृहीतोऽसि तादृशं त्वामꣳहसः पतयेऽधिकमासाधिष्ठात्रे गृह्णामीति शेषः । अꣳहः पापं तस्य पतिः । मलमासत्वादयं द्वादशस्वपि पतति यद्वाꣳहतेर्गतिकर्मणोऽसुन्प्रत्ययान्तस्य रूपमꣳह इति अꣳहनमꣳहो गतिस्तस्य पतिः त्रयोदशो मासः आदित्यगतिवशेन ज्ञायते ॥ ३० ॥

XIV. a. इन्द्राग्नीऽआगतꣳसुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥

b. उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वा । c. एष ते योनिरिन्द्राग्निभ्यां त्वा ॥ ३१ ॥

का° [१. १३. २०.] ऐन्द्राग्नं गृह्णाति । प्रतिप्रस्थातेन्द्राग्निदेवताकं ग्रहं गृह्णीयात् ॥ ऐन्द्राग्नी गायत्री विश्वामित्रदृष्टा । हे इन्द्राग्नी युवां सुतमभिषुतं सोमं प्रति आगतमागच्छतम् गच्छतेर्व्यत्ययेन शपो लुक् अनुदात्तेति [पा° ६. ४. ३७.] मलोपश्च । किम्भूतं सोमम् गीर्भिर्नभो वरेण्यम् गीर्भिः त्रयीलक्षणाभिर्वाग्भिः नभ इवादित्य इव वरेण्यो वरणीयः प्रार्थनीयस्तम् नभ आदित्यो भवति नेता भासां ज्योतिषां प्रभवोऽपीति [निरु° २. २२. (१४.)] यास्कोक्तेर्नभ आदित्यः लुप्तोपमानम् यद्वा गीर्भिः स्तुतिरूपाभिर्वाग्भिः युतमिति शेषः नभो नभःस्थितैः स्वर्गस्थैर्देवैर्वरेण्यं प्रार्थनीयम् नभःशब्देन लक्षणया नभःस्था देवा उच्यन्ते । किं च हे इन्द्राग्नी युवामस्य सोमस्य संबन्धिनं स्वमंशं पातं पिबतम् पिबादेशाभावश्छान्दसः । किम्भूतौ युवां धियेषिता धिया यजमानबुद्ध्या इषितौ प्रेषितौ प्रार्थितौ ॥ एवं देवावुक्त्वा सोममाह हे सोम उपयामेन ग्रहेण गृहीतोऽसि हे ग्रह इन्द्राग्निभ्यामर्थे त्वां गृह्णामीति शेषः ॥ एष तऽइति सादनम् । एष तव योनिः स्थानम् इन्द्राग्निभ्यामर्थे त्वां सादयामि ॥ ३१ ॥

XV. a. आ घा येऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा । b. उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वा । c. एष ते योनिरग्नीन्द्राभ्यां त्वा ॥ ३२ ॥

अग्नीन्द्रदेवत्या गायत्री त्रिशोकदृष्टा अस्या विनियोगः कात्यायनेन नोक्तः ऐन्द्राग्नग्रहे एव विकल्पः शाखान्तरे ॥ ये यजमाना अग्निमा इन्धते आदीपयन्ति इष्टिपशुसोमचातुर्मास्यैर्यजन्तीत्यर्थः घेत्यनर्थको निपातः तस्य संहितायामृचि तुनुघेत्यादिना [पा° ६. ३. १३३.] दीर्घः । ये चानुषक् आनुपूर्व्येण क्रमेण बर्हिः स्तृणन्ति आच्छादयन्ति अनुषज्यते अनु क्रमेणासज्यते स्तीर्यतऽइत्यनुषक् कर्मणि क्विप् अकारस्य संहितायां दीर्घः आनुषगिति नामानुपूर्वस्यानुषक्तं भवतीति [निरु° ६. १४.] यास्कोक्तेरानुषक्शब्देनानुपूर्व्यमुच्यते । किं च येषां यज्वनां युवा जरामृत्यु-

रक्षित इन्द्रः सखा मित्रवदुपकारकः ॥ हे सोम तेषां यज्ञे उपयामेन ग्रहेण त्वं स्वीकृतोऽसि अग्नीन्द्रदेवार्थं त्वां गृह्णामि ॥ सादयति हे सोम एष ते योनिः अग्नीन्द्राभ्यामर्थे त्वां सादयामि ॥३२॥

XVI. a. ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वाꣳसो दाशुषः सुतम् ।

b. उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः ।

c. एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३३॥

का° [१.१४.१.] वैश्वदेवं गृह्णाति शुक्रपात्रेण द्रोणकलशादन्वारब्धे वौमास इति । अधर्वा यज्वना स्पृष्टेऽस्पृष्टे वा सति द्रोणकलशाच्छुक्रपात्रेण वैश्वदेवं ग्रहं गृह्णीयात् ॥ वैश्वदेवी गायत्री मधुच्छन्दोदृष्टा । हे विश्वे देवासः विश्वे देवा यूयमागत आगच्छत किम्भूता यूयम् ओमासः ओमाः अवन्तीत्योमा रक्षितारः अवितारो वावनीया (29.) वेति [निरु° १२.४०.] यास्कोक्तेः तर्पयितारस्तर्पणीया वा अवतेर्मकप्रत्ययः संप्रसारणं च । तथा चर्षणीधृतः चर्षणयो मनुष्यास्तान्धरन्ति पुष्णन्ति तैर्वा ध्रियन्ते ते चर्षणीधृतः चर्षणिशब्दस्य संहितायां दीर्घः अनिष्टनिरसनं रक्षणम् इष्टप्रापणं पोषणमित्यवनधरणयोर्भेदः । तथा सुतमभिषुतं सोमं दाशुषः दत्तवतो यजमानस्य दाश्वांसः फलं दत्तवन्तः कामान्पूरयन्त इत्यर्थः । यद्वा सुतं सोमं पातुमिति शेषः दाश्वानित्यादिना [पा° ६.१.१२.] निपातः ॥ हे सोम त्वमुपयामेन स्वीकृतोऽसि विश्वेभ्यो देवेभ्योऽर्थाय त्वां गृह्णामीति शेषः ॥ सादयति एष ते योनिः विश्वेभ्यो देवेभ्योऽर्थाय त्वां सादयामि ॥३३॥

XVII. a. विश्वे देवास आगत शृणुता मऽइमꣳ हवम् । एदं बर्हिर्निषीदत ।

b. उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः ।

c. एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३४॥

वैश्वदेवी गायत्री गृत्समददृष्टा वैश्वदेवग्रहग्रहणऽएव विकल्पेनाम्नाता । हे विश्वे देवासो यूयमागत अस्मद्यज्ञं प्रत्यागच्छत आगत्य च मे ममेमं हवमाह्वानं शृणुत श्रुत्वा इदं मदीयं बर्हिः आनिषीदत बर्हिष उपर्युपविशत ॥ उपयामेति पूर्ववत् ॥३४॥

XVIII. a. इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः ॥
b. उप॰ ऽसीन्द्राय त्वा मरुत्वते ।
c. एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३५॥

एते प्रातःसवनग्रहाः पूर्णाः अथ माध्यन्दिनसवनग्रहा उच्यन्ते । माध्यन्दिने सवने मरुत्वतीया गृह्यन्त ऽइति तित्तिरिवचनात् । तत्र त्रयो मरुत्वतीयास्तत्र प्रथममाह का॰ [१०.१.१४.] मरुत्वतीयमृतुपात्रेणेन्द्र मरुत्व इति । ऋतुपात्रेण मरुत्वतीयं ग्रहं गृह्णीयात् ऐन्द्रामरुतीश्चतस्रस्त्रिष्टुभो विश्वामित्रदृष्टाः । मरुतो देवा विद्यन्ते यस्य स मरुत्वान् तस्य संबोधनं हे मरुत्वः मतुवसो रु संबुद्धौ छन्दसीति [पा॰ ८.३.१.] रुत्वम् । मरुद्भिः सहित हे इन्द्र इहास्मदीये यज्ञे सोमं पाहि पिब । कथं पातव्यस्त्वत्राह यथा शार्याते शर्यातिर्नाम कश्चिद्राजा तस्य संबन्धिनि यज्ञे सुतस्याभिषुतस्य सोमस्यांशमपिबः पीतवानसि तद्वदिह पिब शर्यातो ह वा ऽइदं मानवो ग्रामेण चचारेति श्रुतिः [४.१.५.२.] । किं च हे शूर वीर तव प्रणीती प्रणीत्या प्रणयनेनानुज्ञया सुयज्ञाः कल्याणयज्ञाः कवयः क्रान्तदर्शनास्तव शर्मन् सुखनिमित्ते (30) शर्मणि यज्ञगृहे वा आविवासन्ति त्वां परिचरन्ति विवासतिः परिचर्यार्थः ॥ उपयामेन सोम त्वं गृहीतोऽसि मरुत्वत ऽइन्द्राय त्वां गृह्णामि ॥ सादयति एष ते योनिः मरुत्वते इन्द्राय त्वां सादयामि ॥३५॥

XIX. a. मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥
b. उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वते । c. एष ते योनिरिन्द्राय त्वा मरुत्वते । d. उपयामगृहीतोऽसि मरुतां त्वौजसे ॥३६॥

द्वितीयं मरुत्वतीयमाह । का॰ [१०.३.६.] वशिना मरुत्वतीयग्रहणं मरुत्वत्तमिति । रिक्तेन पात्रेण सशस्त्रमरुत्वतीयग्रहणम् । इहास्मिन्नस्मदीये यज्ञे तमिन्द्रं वयं हुवेम आह्वयामः ह्वेञः शपि व्यत्ययेन संप्रसारणम् । किम्भूतमिन्द्रं मरुत्वन्तं

मरुद्गणोपेतं । वृषभं जलस्य वर्षितारं । वावृधानं संहितायां दीर्घः वर्धति कामान्वर्धयति वा ववृधानस्तम् बहुलं छन्दसीति [पा° २.४.७६.] वर्धतेः शानचि जुहोत्यादिर्वेन श्नुः श्नाविति [पा° ६.१.१०.] द्वित्वम् । अकवारिम् कुत्सिता अरयो यस्य स कवारिः न कवारिरकवारिस्तम् यस्य शत्रवोऽप्यकुत्सिता वृत्रादयः यद्वा अकुत्सितमियर्ति ऐश्वर्यं प्राप्नोतीत्यकवारिस्तम् उत्कृष्टैश्वर्यम् । दिव्यं दिवि भवं द्युलोकस्थम् । शासं शास्तीति शासः पचाद्यच् शासितारं दुष्टानां यद्वा शासनं शासस्तद्वन्तम् अर्शआदित्वादच् प्रशासनवन्तम् । विश्वासाहम् विश्वं पालयितुं सहते स विश्वसाट् तम् अनलसमित्यर्थः भञ्जसहवहामिति (31.) विण् यद्वा सहतिरभिभवार्थः स्वधर्मच्युतस्य विश्वस्य सर्वस्याभिभवितारम् । नूतनाय अवसे नवीनाय पालनाय इदानींतनयज्ञमानरक्षणाय उग्रमुदूर्णवज्रम् । सहोदाम् सहो बलं ददाति सहोदास्तम् क्विप् बलप्रदम् ॥ उपयाम एष ते एतद्यजुर्व्याख्यातम् ॥ तृतीयं मरुत्वतीयमाह । का° [१०.३.३.] ऋतुपात्रेण मरुत्वतीयग्रहणमुपयामगृहीतोऽसि मरुतां त्वौजसऽइति । कुण्ठमरुत्वतीयोऽयम् (32.) ॥ मरुत्वद्दैवत्यं यजुः । हे मरुत्वतीय ग्रह मरुतां देवानामोजसे बलाय त्वा त्वां गृह्णामीति शेषः । ओज इति बलनाम [निघ°] स त्वमुपयामेन गृहीतोऽसि स्वबलं निधायेन्द्रं प्रत्यागता मरुतोऽनेन ग्रहेण गृहीतेन सबला ज्ञाता इति भावः ॥३६॥

XX. a. सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँ२॥ऽरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥
b. उ° सीन्द्राय त्वा मरुत्वते । c. एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३७॥

सजोषा इन्द्रेति [३७.] मरुत्वां इन्द्रेति [३८.] ऋग्द्वयस्य सोपयामस्य मरुत्वतीयग्रहण एव विनियोगः वाचःस्तोमे वाचस्तोमाश्चत्वार इति कात्यायनोक्तेः [२२.६.२४.] मरुत्वां इन्द्रेति मरुत्वतीयमित्याश्वलायनोक्तेश्च ॥ हे इन्द्र हे शूर वीर त्वं सोमं पिब किम्भूतस्त्वं सजोषाः जुषी प्रीतिसेवनयोः जोषणं जोषः प्रीतिः असुन्प्रत्ययः तेन सह वर्तमानः संतुष्टः मरुद्भिः कृत्वा सगणः सपरिवारः मरुद्गणसहित इत्यर्थः । वृत्रहा वृत्रं दैत्यं हतीति अनेन सोमपानेन वृत्रं हनिष्यसीत्य-

र्थः । विद्वानितमर्थं जानानः ततः सोमं पीत्वा शत्रून्वृत्रादीन् जहि मारय किं च मृधः संग्रामान् अपनुदस्व नुद प्रेरणे युद्धं निवर्तयेत्यर्थः दीर्घादटि समानपदऽइति [पा° ८. ३. १.] शत्रूनिति नस्य रुत्वम् पूर्वस्य सानुनासिकत्वम् (33.) ॥ यद्वा मृधः इति पञ्चम्येकवचनं मृधः संग्रामात् अपनुदस्व शत्रूनित्यस्यानुषङ्गः; ये कृतावशिष्टाः शत्रवस्तान्संग्रामात्पालयनार्थं प्रेरयस्व प्राणदानं कुर्वित्यर्थः । एवं रिपुनाशं कृत्वाथानन्तरं नोऽस्माकं विश्वतः सर्वतः अभयं कृणुहि कुरु कृञ् करणे स्वादिः ॥ उपयामेति व्याख्याते ॥ शत्रूनपेत्यत्र दीर्घादटि समानपदऽइति [पा° ८. ३. १.] नस्य रुत्वम् अत्रानुनासिकः पूर्वस्य तु (34.) वेति [पा° ८. ३. २.] तत्पूर्वस्य ऊकारस्यानुनासिकत्वम् ॥ ३७ ॥

XXI. a. मरुत्वाँ२॥ऽइन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मधऽ ऊर्मिं त्वऽ राजासि प्रतिपत्सुतानाम् ॥

b. उ॰ ऽसीन्द्राय त्वा मरुत्वते ।

c. एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ३८ ॥

हे इन्द्र त्वं सोमं पिव ब्रूचोऽतस्तिङ इति [पा° ६. ३. १३५.] संहितायां दीर्घः किमर्थं मदाय तृप्तये रणाय संग्रामाय च मदे सतीन्द्रो योद्धा भवति । किम्भूतस्त्वम् मरुत्वान् मरुतोऽस्य सन्तीति मरुद्गणसंयुक्तः । वृषभः वर्षिता जलानाम् । किम्भूतं सोमम् अनुष्वधम् अनु पश्चात्स्वधा तानि पुरोडाशधानामन्यदधिपयस्यालक्षणानि यस्य सोऽनुष्वधस्तम् पूर्वपदादिति [पा° ८. ३. १०६.] षत्वम् कथं पिबेत्यत्राह मधः मधुनो मधुस्वादोपेतस्य ऊर्मिं कल्लोलं जठरे उदरे आसिञ्चस्व अनित्यमागमशासनमिति मध इत्यत्र नुमभावः । सोमपाने हेतुमाह हे इन्द्र त्वं प्रतिपत्सुतानाम् (35.) प्रतिपत्प्रभृतिषु तिथिषु अभिषुतानां सोमानां राजासि ईश्वरोऽसि किमुत चतुर्दश्यन्तेऽभिषुतानाम् त्वदर्थमेव सर्वासु तिथिषु सोमोऽभिषूयतऽइत्यभिप्रायः । छन्दोगानां सवने प्रतिपद्विद्येत इति प्रतिपद्ग्रहणम् ॥ उपयाम एष ते इति व्याख्याते ॥ ३८ ॥

XXII. a. महाँ२॥ऽइन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।

अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥
b. ऊं॰ महेन्द्राय त्वा । c. एष ते योनिर्महेन्द्राय त्वा ॥३१॥

का॰ [१०.३.१०.] माहेन्द्रं गृह्णाति वैश्वदेववन्महां इन्द्र इति । यथा वैश्वदेवग्रहः स्रुक्रपात्रेण गृहीतस्तथा माहेन्द्रं ग्रहं तेनैव गृह्णीयात् ॥ माहेन्द्री त्रिष्टुप् भरद्वाजदृष्टा तृतीयपादो नवाक्षरः । इन्द्रो वीर्याय वीरकर्मणे वावृधे ववृधे वर्धते छन्दसि लुङ्लङ्लिट इति [पा॰ ३.४.६.] वर्तमाने लिट् संहितायामभ्यासदीर्घः । किम्भूत इन्द्रः महान्महाप्रभवः तथापि नृवत् मनुष्यवत् आ ह्वयमान आगच्छति यद्वा नृवत् मनुष्यवत् आचर्षणिप्राः (36.) आ समन्ताच्चर्षणीन्मनुष्यान्प्राति अभीष्टकामैः पूरयतीत्याचर्षणिप्राः प्रा पूरणे क्विप् यथा राजा अमात्यादिर्मनुष्यः (37.) सेवकानभीष्टकामैः पूरयति तद्वत् । उतापि च द्विबर्हाः बृहि वृद्धौ बर्हणं बर्हः वृद्धिः असुन्प्रत्ययः द्वयोः प्रकृतिविकृतिरूपयोः सोमयागयोर्बर्हो यस्य स द्विबर्हाः यद्वा द्वयोः स्थानयोर्बर्हाः वृद्धः परिवृढः प्रभुः मध्यमे स्थानि उत्तमे च । तथा सहोभिः बलैः अमिनः अमितः उपमारहितः अतोल्लितबल इत्यर्थः अमिनोऽमितमात्रो महान्भवत्यस्यमितो वेति यास्कोक्तेः [निरु॰ ६.१६.] यद्वा सहोभिः शतबलैरमितः अप्रक्षिप्तो अनुपहिंसित इत्यर्थः डुमिञ् प्रक्षेपे मिञ् (38.) हिंसायाम् इत्यस्य वा प्रयोगः पूर्वपक्षे माङ् माने सर्वत्र निष्ठानत्वमार्षम् । तथा अस्मद्र्यक् अस्मान्प्रत्यञ्चतीत्यस्मद्र्यक् अस्मदभिमुखः अस्मच्छब्दे उपपदेऽञ्चतेः क्विप् विश्वग्देवयोश्चेत्यादिना [पा॰ ६.३.९२.] क्विबन्तेऽञ्चतौ परेऽस्मच्छब्दस्य टेरद्यादेशः उगिदचामिति [पा॰ ७.१.७०.] प्राप्तस्य नुमोऽभावश्छान्दसः । स वर्धमान इन्द्र ईदृशो भूत् भवतु लोडर्थे लुङ् अडभावश्छान्दसः । कीदृशः उरुः यशसा विपुलः पृथुः बलेन विस्तृतः कर्तृभिर्यजमानैः सुकृतः साधुकृतः सत्कृतः पूजित इत्यर्थः ॥ हे ग्रह त्वमुपयामेन गृहीतोऽसि महेन्द्राय त्वां गृह्णामि ॥ सादयति एष ते योनिः महेन्द्राय त्वा सादयामि ॥३१॥

XXIII. a. महाँ२॥ऽइन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ२॥ऽइव । स्तोमैर्वत्सस्य वावृधे । b. ऊं॰ महेन्द्राय त्वा । c. एष ते योनिर्महेन्द्राय त्वा ॥४०॥

माहेन्द्री गायत्री वत्सदृष्टा माहेन्द्रयक्ष्णऽएव विकल्पेन विनियुक्ता। य इन्द्रः वत्सस्य वसनशीलस्य वत्सस्थानीयस्य वा यजमानस्य स्तोमैः स्तोत्रैर्वावृधे ववृधे वर्धते। कीदृश इन्द्रः ओजसा तेजसा महान् क इव वृष्टिमान्वृष्टियुक्तः पर्जन्य इव यथा वर्षन्मेघो धाराबलेन महान्वर्धते॥ उपयाम एष ते इति व्याख्यातं॥४०॥

XXIV. उद्वयं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यꣳ स्वाहा॥४१॥

का॰ [१०.२.४.५.] शालाद्वार्ये दाक्षिणाहोमो वासःप्रवद्धꣳ हिरण्यꣳ हवन्यामवधाय चतुर्गृहीतमुद्वयमिति। वस्त्रबद्धं स्वर्णं स्रुक्वां निधाय शालाद्वार्येऽग्नौ चतुर्गृहीताज्येन दाक्षिणसंज्ञो होमः कार्यः॥ सौरी गायत्री प्रस्कण्वदृष्टा तृतीयः पादः सप्तार्णः। उ निपातः पादपूरणः त्यमिति त्यच्छब्दश्छान्दसः तच्छब्दार्थे। केतवो रश्मयः त्यं तं प्रसिद्धं सूर्यं देवमुद्वहन्ति देवो दानाद्द्योतनाद्वेति यास्कः [निरु॰ ७.२०.(39.)]। किम्भूतं सूर्यं जातवेदसम् जातं वेदो ज्ञानं धनं वा यस्मात्तम् किमर्थमुद्वहन्ति विश्वाय दृशे षष्ठ्यर्थे चतुर्थी विश्वस्य दर्शनाय जगद्द्रष्टुमित्यर्थः। दृशे विख्ये चेति [पा॰ ३.४.११.] तुमर्थे निपातः। तस्मै स्वाहा सुहुतमस्तु॥४१॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा॥४२॥

का॰ [१०.२.६.] चित्रं देवानामिति द्वितायामिति। चतुर्गृहीतेन शालाद्वार्ये द्वितीयामाकृतिं जुहोति॥ सौरी त्रिष्टुप्कुत्सदृष्टा। परापरत्वेन स्थितः सूर्योऽत्र स्तूयते सूर्यः चित्रमाश्चर्यं यथा तथा उदगात् उदयं प्राप्तः उद्गच्छति वा लडर्थे लुङ् उदयन्नेव स्वतेजसा नैशं तमो हन्ति अन्येषां ज्योतींष्यादत्तऽइत्याश्चर्यम्। किम्भूतः सूर्यः देवानाम् दीव्यन्ति द्योतन्ते इति देवाः किरणास्तेषामनीकं मुखमाश्रय इत्यर्थः यद्वानीकं समूहः किरणपुञ्ज इत्यर्थः। तथा मित्रस्य वरुणस्य अग्नेः चक्षुः नेत्रवत्प्रकाश इत्यर्थः मित्रादय उपलक्षकाः सर्वस्य सदेवमनुष्यस्य विश्वस्य रूपाणि सूर्योदयेऽभिव्यज्यन्ते अतो मित्रादीनां चक्षुः स सूर्य उद्गतः सन्द्यावापृथिवी दिवं भूमिं चान्तरिक्षं चाप्राः आपूरितवान् आपूरयति वा स्वतेजसेति शेषः। ए-

त्वमपरूपेण स्तुत्वा परूपेण स्तौति । किम्भूतः सूर्यः जगतो जङ्गमस्य तस्थुषः स्थावरस्य च जगत आत्मान्तर्यामी । यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद्ब्रह्मेति श्रुतेः सूर्योऽद्वैतमनेनोच्यते (40.) इति भावः तस्मै स्वाहा सुकृतमस्तु ॥४२॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒योऽअ॒स्मान्वि॒श्वानि॑ देव व॒युना॑नि वि॒द्वान् ।
यु॒यो॒ध्य॒स्मज्जु॑हु॒राण॑मेनो॒ भूयि॑ष्ठां ते॒ नम॑ऽउक्तिं॒ विधेम॒ स्वाहा॑ ॥४३॥
अ॒यं नो॑ऽअ॒ग्निर्वरि॑वस्कृणोत्व॒यं मृधः॑ पु॒र ए॑तु प्रभि॒न्दन् ।
अ॒यं वाजा॑ञ्जयतु॒ वाज॑साताव॒यꣳ श॒त्रूञ्ज॑यतु॒ जर्हृ॑षाणः॒ स्वाहा॑ ॥४४॥

का॰ [१०.२.७.] आग्नीध्रीयेऽग्ने नयेति । आग्नीध्रीयेऽग्नौ सकृद्गृहीतमाज्यं जुहोति ॥ का॰ [१०.२.८.] अयं न इत्यपरामिति । द्वितीयामाकृतिमाग्नीध्रीये जुहोति ॥ इमे द्वे ऋचौ पञ्चमेऽध्याये [३६.३७.] व्याख्याते ॥४३॥४४॥

a. रूपेणा वो रूपमभ्यागं॑ तुथो वो॑ विश्ववेदा॒ विभ॑जतु । b. ऋतस्य॑ प॒था प्रेत॑ च॒न्द्रद॑क्षिणाः । c. वि स्वः॑ पश्य॒ व्यन्तरि॑क्षम् । d. यत॑स्व सद॒स्यैः ॥४५॥

का॰ [१०.२.१०.] सक्थिरण्यो यजमानः शालां पूर्वेण तिष्ठन्नभिमन्त्रयते दक्षिणा बर्हिर्वेदि तिष्ठन्तीर्दक्षिणतो रूपेण वे इति । दक्षिणा गाः अभिमन्त्रयते ॥ नष्टरूपानुष्टुप् दक्षिणादिवत्या नववैराजत्रयोदशैर्नष्टरूपेति लक्षणात् अत्र द्वितीय एकादशार्णस्तृतीयो द्वादशार्णस्तेन पूर्णैव (41.) । पूर्वं पशवः स्वदानमसहमाना रूपान्तराणि जगृहुः देवाः स्वै रूपैस्तानुपागतास्ततस्ते स्वै (42.) रूपैराजग्मुरिति [४.३.४.१४.] मन्त्रस्य निदानम् । हे दक्षिणारूपा गाः रूपेण मूर्त्या वो युष्माकं रूपमहमभ्यागमभ्यागतोऽस्मि अतो भवतीभिरागन्तव्यं सर्वे हि स्वरूपमागच्छन्तीति भावः । किं च तुथो ब्रह्मरूपः प्रजापतिर्वो युष्मान्विभजतु यथायोग्यमृत्विग्भ्यो विभज्य ददातु ब्रह्म वै तुथ इति [४.३.४.१५.] श्रुतेः । किम्भूतस्तुथः विश्ववेदाः विदं॑ वेदो ज्ञानं॑ विश्वं॑ सर्वं॑ वेदो यस्य स विश्ववेदाः सर्वज्ञः । किं च यूयमेतज्ज्ञात्वा

ऋतस्य यज्ञस्य पथा मार्गेण प्रेत प्रगच्छत । किम्भूता यूयं चन्द्रदक्षिणाः चन्द्रमिति हिरण्यनाम [निघ० १.२.] चन्द्रं सुवर्णं यजमानकृस्तस्थं द्वितीयं दक्षिणा यासां ताश्चन्द्रद्वितीयदक्षिणा इति प्राप्ते शाकपार्थिवादित्वाद्द्वितीयपदलोपः [पा० २.१.६१. वा० १.] ॥ का० [१०.२.१७.] सदो गच्छति वि स्वरिति ॥ दक्षिणादैवत्यम् । हे दक्षिणाः अहं स्वः स्वर्गं देवयानमार्गं विपश्य विपश्यामि विलोकयामि अक्तरिन्नं पितृयानमार्गं च विपश्यामि भवतीभिः सोपानभूताभिरिति भावः व्यत्ययो बक्रुलमिति [पा० ६.१.८५.] उत्तमपुरुषस्थाने पश्येति मध्यमः पुरुषः श्रुत्या तथा व्याख्यातत्वात् ॥ का० [१०.२.१८.] प्रेक्षते यतस्व सदस्यानिति सदस्यान् । यजमान ऋत्विजः प्रेक्षते । दक्षिणादैवतम् । हे दक्षिणे त्वं यतस्व यत्नं कुरु यथा सदस्यैः ऋत्विग्भिः पूरितैरप्यतिरिच्यसऽइति शेषः । तथा त्वया यतितव्यं यथा ऋत्विजो धनैः संपूर्णाधिका भवेति भावः ॥४५॥

a. ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणाम् ।

b. अस्मद्दाता देवत्रा गच्छत प्रदातारमाविशत ॥४६॥

का० [१०.२.१९.] ब्राह्मणमद्येत्याग्नीध्रगमनमिति । आग्नीध्रमृत्विजं स्वस्थानस्थं प्रति यजमानो गच्छति ॥ ब्राह्मणदैवत्यम् । अद्यास्मिन्दिने ईदृशं ब्राह्मणं विदेयं लभेय विदॢ लाभे । किम्भूतं पितृमन्तम् प्रशस्तः पितास्यास्तीति पितृमान् तम् पित्रा विना न कश्चिज्जायतेऽतोऽत्र प्राशस्त्यार्थे मतुप् विशिष्टजनकोत्पन्नमित्यर्थः । तथा पैतृमत्यम् पितुरिमे पैतराः तद्धितप्रत्ययलोपेऽपि छान्दसी वृद्धिः मता एव मत्याः स्वार्थे यत् पैतराः पितामहादयो मताः संमता जगन्मान्या यस्य स पैतृमत्यस्तम् यद्वा पितरः पूर्वजाः मताः संमताः श्रोत्रिया यस्य सपितृमतः पितृमत एव पैतृमत्यः यद्वा प्रशस्तजनकोत्पन्नः पितृमान् इत्युक्तं तदपत्यं पैतृमत्यः सर्वथा यस्य पितामहादयः श्रोत्रियाः स पैतृमत्य इत्यर्थः । तथा ऋषिं मन्त्राणां व्याख्यातारम् । तथा आर्षेयम् ऋषिषु विख्यात आर्षेयस्तम् ज्ञात्वा प्रवरैर्ज्ञानेन सुज्ञातमित्यर्थः । तथा सुधातुदक्षिणम् शोभनो धातुः सुवर्णं दक्षिणा यस्य स सुधातुस्तम् ॥ का० [१०.२.२०.] उपविश्य हिरण्यमस्मै ददात्यस्मद्दाता इति । अस्मै

आग्नीध्राय ॥ दक्षिणादिवत्यम् । हे दक्षिणा यूयमस्मद्राताः रा दानि अस्माभिः राता दत्ताः सत्यो देवत्रा देवान्प्रति गच्छत । तानित्य तेषां तृप्तिं कृत्वा ततः दातारं प्राविशत (43.) यज्ञफलं साधयत्यो यजमानं प्राविशतित्यर्थः ॥ ४६ ॥

a. अग्नये त्वा मक्ष्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्रऽएधि मयो मक्ष्यं प्रतिग्रहीत्रे । b. रुद्राय त्वा — ऽशीय प्राणो दात्रऽएधि वयो मक्ष्यं प्रतिग्रहीत्रे । c. बृहस्पतये त्वा — ऽशीय त्वग्दात्रऽएधि मयो मक्ष्यं प्रतिग्रहीत्रे । d. यमाय त्वा — ऽशीय क्रयो दात्रऽएधि वयो मक्ष्यं प्रतिग्रहीत्रे ॥ ४७ ॥

का° [१०.२.२८.] अग्नये वेति हिरण्यं प्रतिगृह्णीत इति । अध्वर्युप्रतिस्थाताराविति शेषः ॥ हिरण्यदैवतम् । हे हिरण्य वरुणोऽग्नयेऽग्निरूपायान्नाय मक्ष्यं त्वा त्वां ददातु पूर्वं वरुणेन कनकाद्यग्न्यादिभ्यो दत्तमतस्तेन तेनात्मना प्रतिगृह्णानो विप्रो न नश्यतीति देवतादेशः । अनेन विधिना गृह्णानः सोऽहममृतत्वमारोग्यमशीय व्याप्नुयाम् हे हिरण्य त्वं दात्रे आयुर्जीवनमेधि भव प्रतिग्रहीत्रे प्रतिग्रहकर्त्रे मक्ष्यं मयः सुखमेधि दातायुष्मान्भवतु अहं सुखी स्यामिति भावः ॥ का° [१०.२.२९.] रुद्राय वेति गामिति । गां प्रतिगृह्णीतः ॥ गोदैवत्यम् । हे गौः रुद्ररूपाय मक्ष्यं वरुणः त्वा ददातु सोऽहममृतत्वं प्राप्नुयाम् हे गौः त्वं दात्रे यजमानाय प्राणः प्राणरूपा एधि मक्ष्यं प्रतिग्रहीत्रे वयोऽन्नं पशुर्वा भव । दुग्धदध्यादिरूपेणान्नं संततिद्वारा पशुश्च भवेत्यर्थः ॥ का° [१०.२.३०.] बृहस्पतये वेति वास इति । वस्त्रं गृह्णीतः ॥ वासोदैवत्यम् । हे वासो बृहस्पतिरूपाय मक्ष्यं वरुणः त्वां ददातु सोऽहममृतत्वमशीय त्वं च दात्रे त्वगेधि त्वगिन्द्रियसुखकारी भव प्रतिग्रहीत्रे मक्ष्यं मयः सुखं च भव ॥ का° [१०.२.३१.] यमाय त्वेत्यश्वमिति । क्रयं गृह्णीतः ॥ अश्वदैवतम् । हे अश्व यमरूपाय मक्ष्यं वरुणः त्वां ददातु स यमरूपोऽहमश्वं गृह्णानोऽमृतत्वं व्याप्नुयाम् हे अश्व त्वं दात्रे क्रयोऽश्वो भव मक्ष्यं प्रतिग्रहीत्रे वयोऽन्नं तद्दाता पशुर्वा संततिद्वारा भव ॥ ४७ ॥

कोऽदात्कस्मा अदात्कामो दात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥४८॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां सप्तमोऽध्यायः ॥ ॥

का° [१०.२.३२.] कोऽदादित्यन्यदिति । अन्यन्मन्थौदनतिलादि गृह्णीतः ॥ कामदैवत्यम् । दातुर्दानाभिमानाभावाय स्वस्य च प्रतिग्रहजदोषाभावाय च देहेन्द्रियात्मसंघाते (44.) कामं विविनक्ति । को नरोऽदादत्तवान् कस्मै नरायादात् । प्रश्नद्वयस्योत्तरमाह । कामोऽदात्कामायैवादात् न त्वं दाताहं प्रतिग्रहीता त्वत्कामाभिमानी देवो मत्कामाभिमानिनेऽदात् । एवं च काम एव दाता काम एव प्रतिग्रहीता नान्यः । हे काम एतद्द्रव्यं ते तव दातृप्रतिग्रहीतृत्वात् ॥४८॥
श्रीमन्महीधरकृते वेददीपे मनोहरे । उपांश्वादिप्रदानान्तः सप्तमोऽध्याय ईरितः ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १. २ a ॥१॥ २ b. c. d. ३ a - पार्थिवेभ्यः ॥२॥ ३ a मन° - त्वा सुभवः सूर्याय । ३ b. c [°वेत्ति . प्रुतां] d. e ॥३॥

II. ॥ ४ - रायोऽवेषां यजस्व ॥१॥ ५ स्वाहोर्वन्तरिक्षमन्वेमि ६ a [स्वभवः]. b. c ॥२॥५॥

III. ॥ ७ ॥१॥ ८ ॥२॥७॥ IV ॥ ९ ॥१॥ १० ॥२॥९॥ V. ॥ ११ ॥१॥१०॥

VI. ॥ १२ a. b - षण्ढाय त्व ॥१॥ १२ c. d [षण्ढः]. e. f. १३ [षण्ढः] ॥२॥ १४ ॥३॥ १५ - क्षोत्रा धो यत्स्वेष्टं यत्सुभूतं यत्स्वाहा ॥४॥१४॥

VII. ॥ १६ ॥१॥ १७ a ॥ ॥ १७ b-e. १८ ॥३॥ १४ ॥४॥ १५ - - क्षोत्रा मधो यत्स्वेष्टं यत्सुभूतं यत्स्वाहा ॥५॥११॥

VIII. ॥ ११ ॥१॥ २० - - क्षपतिम् ॥२॥ २० विष्णु° - - नानि पाहि सोमः पवते सोमः पवते ॥३॥ २१ a अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सु° - - सुभूताय पवते ब्र ह्मवर्चसाय पवते विश्वेभ्यस्त्वा देवेभ्यः । b ॥४॥२३॥

IX. ॥ २२ a [उक्थायुवं गृ°]. b ॥१॥ देविभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा देवायुवं गृ° - षऽइन्द्राय त्वा देवायुवं गृ° - षऽइन्द्राग्निभ्यां त्वा देवायुवं गृ° - षऽइन्द्राय त्वा देवायुवं गृ° - षऽइन्द्रावरुणाभ्यां त्वा देवायुवं गृ° - षऽइन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृ° - षऽइन्द्राविष्णुभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ॥२॥२५॥

X. ॥ २४ ॥१॥ २५ a. b ॥२॥ २५ c ॥३॥२८॥

XI. ॥ २६ ॥१॥२९॥ XII. ॥ ३० ॥१॥३०॥

XIII. ॥ ३१ ॥१॥३१॥ XIV. ॥ ३२ ॥१॥३२॥

XV. ॥ ३३ ॥१॥३३॥ XVI. ॥ ३४ ॥१॥३४॥

XVII. ॥ ३५ ॥१॥३५॥ XVIII. ॥ ३६ a. b. c ॥१॥३६॥

XIX. ॥ ३६ d ॥१॥३७॥ XX. ॥ ३७ ॥१॥३८॥

XXI. ॥ ३९ ॥१॥३९॥ XXII. ॥ ४० ॥१॥४०॥

द्वाविंशत्यनुवाकेषु चत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे सप्तमोऽध्यायः ॥ ॥

I. a. उपयामगृहीतोऽसि । b. आदित्येभ्यस्त्वा ।

c. विष्णोऽरुगयिष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ॥१॥

सप्तमेऽध्याये उपांशुग्रहादिसवनद्वयगता मन्त्रा दक्षिणादानान्ता उक्ताः अष्टमे तृतीयसवनगता आदित्यग्रहादिमन्त्रा उच्यन्ते ॥ तत्र का° [१.१.१५.] प्रतिप्रस्थातादित्यपात्रेण द्रोणकलशादुपयामगृहीतोऽसीति गृहीत्वा द्विदेवत्याननु ब्रुहोत्युत्तरार्धऽइति । द्विदेवत्यैः सह सोमाय प्रतिप्रस्थातादित्यग्रहपात्रेण द्रोणकलशात्सोमं गृह्णाति ॥ सोमदेवत्यम् । हे सोम उपयामेन पात्रेण त्वं गृहीतोऽसि मया ॥ का° [१.१.२०.] शेषꣳ-शेषमादित्यस्थाल्यामासिञ्चत्यादित्येभ्यस्त्वेति । द्विदेवत्याननु ब्रुवा ब्रुतशेषमादित्यस्थाल्यां क्षिपेत् ॥ सोमदेवत्यम् । हे सोम आदि-

त्येभ्योऽर्थाय त्वा त्वां सिञ्चामीति शेषः ॥ का० [१.१.२१.] समासिच्य तेनापिदधाति विष्ण उरुगायेति । संस्रवमासिच्य तेनादित्यपात्रेण स्थालीं पिदधाति ॥ विष्णुदैवतम् । हे विष्णो यज्ञपुरुष हे उरुगाय उरुभिर्बहुभिर्गीयते स्तूयत इत्युरुगायस्तत्संबोधनम् एष सोमस्ते तवार्पितः तं सोमं रक्षस्व गोपाय आत्मनेपदमार्षम् सोम रक्षणे प्रवृत्तं त्वा त्वां मा दभन् मा दभ्नुयुः मा हन्युः रक्षांसीति शेषः दभ्नोतिर्हिंसाकर्मा ॥१॥

a. कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ b. आदित्येभ्यस्त्वा ॥२॥

का० [१०.४.४.] आदित्यग्रहं गृह्णाति सꣳस्रवेभ्यः कदा चनेति । होमशेषाः संस्रवास्तेभ्यः सकाशात् ॥ आदित्यदेवत्ये बृहत्यौ यजुरुक्ते आदित्येभ्यस्त्वेति यजुः तृतीयो द्वादशार्णस्त्रयोऽन्येऽष्टार्णाः । सा बृहती तृतीयेऽध्याये बृहदुपस्थानमध्ये [३.३४.] इन्द्रदेवत्या प्रथमोक्ता व्याख्याता च इह त्वादित्यदेवत्या यजुरुक्ता चेति विशेषः । हे इन्द्र त्वं कदा चन कदाचिदपि स्तरीर्हिंसको नासि किंतु दाशुषे षष्ठ्यर्थे चतुर्थी हविर्दत्तवतो यजमानस्य हविः सश्चसि सेवसे । कुत्र उप उप इत् नु यजमानस्यात्यन्तसमीपऽएव हे मघवन्धनवन्निन्द्र भूय इत् नु पुनरेव च देवस्य ते तव दानं दीयतऽइति दानम् तव देयं हविः पृच्यते त्वया संबध्यते । यजमानेन दत्तं हविस्त्वयाङ्गीक्रियतऽइत्यर्थः ॥ हे ग्रह आदित्येभ्योऽर्थाय त्वां गृह्णामीति शेषः ॥ अत्रेन्द्रनामभिरप्यादित्य एव स्तूयते ॥२॥

a. कदा चन प्रयुच्छस्युभे निपासि जन्मनी । तुरीयादित्य सवनं तऽइन्द्रियमा तस्थावमृतं दिवि । b. आदित्येभ्यस्त्वा ॥३॥

का० [१०.४.५.] अपगृह्य पुनः कदा चनेति । धारातो विच्छिद्य पूतभृतः सकाशादात्मसमीपं नीत्वा तथैव पुनरादित्यग्रहं (1.) गृह्णीयात् ॥ कदाशब्दः कालवाची चनेतिनिपातः पुनरर्थे हे आदित्य त्वं कदा चन प्रयुच्छसि कस्मिन्काले पुनः प्रमाद्यसि युच् प्रमादे न प्रमाद्यसीति काकुः । उदयतापपाकप्रकाशैः प्राणिनोऽनुगृह्णन्न कदाचिदालस्यं करोषीति भावः । यद्वा कदा च नेति पदत्रयम् चकारोऽप्यर्थे

कदापि न प्रयुक्षसि स्वकर्मणि । किं च उभे जन्मनी देवमनुष्यसंबन्धिनी निपासि नितरां पालयसि । किं च तुरीय सुपां सुलुगिति [पा० ७.१.३९.] विभक्तिलोपः ते तव तुरीयं चतुर्थं मायातीतं (2.) शुद्धं सवनं सुवति स्वकार्ये जगत्प्रेरयति सवनं नन्द्यादिब्राह्म्युप्रत्ययः जगत्प्रवर्तकम् अमृतमनश्वरं विज्ञानानन्दस्वभावं यदिन्द्रियं वीर्यं तद्दिवि द्युलोके मण्डलान्तरे आतस्थौ आभिमुख्येन स्थितम् तदुक्तं पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि । एवमादित्यः परापररूपेणास्यामृचि स्तुतः ॥ यद्वास्या ऋचोऽर्थान्तरम् प्रशब्दो निषेधे चनशब्दोऽप्यर्थे हे आदित्य त्वं कदा चन कदापि प्रयुक्षसि न प्रमाद्यसि किंतु उभे वर्तमानभाविनी जन्मनी निपासि रक्षसि । तृतीयमित्यर्थे व्यत्ययेन तुरीयशब्दः प्रयुक्तः हे आदित्य ते तव यत्तृतीयं सवनं तस्मिन्द्दिवि द्युलोकसमाने सवने इन्द्रियमिन्द्रियवृद्धिकरणममृतं सुधासमं हविः आतस्थौ समन्तात्स्थितम् ॥ हे आदित्यग्रह आदित्येभ्योऽर्थाय त्वां गृह्णामीति शेषः ॥३॥

a. यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्ववृत्याद्दंहोश्चिद्या वरिवोवित्तरासत् । b. आदित्येभ्यस्त्वा ॥४॥

का० [१०.४.६.] दध्ना श्रीणात्येनं पश्चिमेऽन्ते मध्ये वा यज्ञो देवानामिति । एनमादित्यग्रहं दध्ना मिश्रीकुर्यात् ॥ आदित्यदेवत्या यजुरुक्ता त्रिष्टुप्छुत्सदृष्टा आदित्येभ्यस्त्वेति यजुः । यज्ञो देवानामादित्यानां सुम्नं सुखं कर्तुं प्रत्येति प्रत्यागच्छति अतो हे आदित्यासः आदित्याः यूयं मृडयन्तः सुखयन्तः सुखकर्तारोऽस्माकं भवत अन्येषामपि दृश्यतेऽइति [पा० ६.३.१३७.] संहितायां दीर्घः । किं च वो युष्माकं या सुमतिः शोभनबुद्धिर्भक्तानुग्रहपरा सा अर्वाची अस्मदभिमुखी आववृत्यात् आवर्तताम् बहुलं छन्दसीति [पा० २.४.७६.] वर्ततेर्लिङि शुहोत्यादिब्राह्म्यः शुद्धिर्वं च । किं च अंहोश्चित् अंहुः पापकारी चित् अप्यर्थे अंहोर्हननशीलस्य पापिनोऽपि या सुमतिर्वरिवोवित्तरा वरिवो धनं विन्दति लभतेऽइति वरिवोवित् अत्यन्तं वरिवोवित् वरिवोवित्तमः पापिनो या सुमतिर्धनलब्ध्री असत् भवेत् सा सुमतिरस्मदभिमुखी आववृत्यादिति संबन्धः । हे सोम आदित्येभ्यो देवेभ्यस्त्वां दध्ना मिश्रयामीति शेषः ॥४॥

a. विवस्वन्नादित्येप ते सोमपीथस्तस्मिन्मत्स्व ।

b. अदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वामभिश्नुतः ।
पुमान्पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥५॥

का° [१०.४.७.] उपाꣳशुसवनेन मिश्रयति विवस्वन्नादित्येति । पाषाणेन दधि सोमं च मिश्रयेत् ॥ आदित्यदेवत्यम् । तमांसि विवासयति नाशयति विवस्वान् यद्वा विशिष्टं वसु धनमस्येति विवस्वान् मतौ ठिलोपश्छान्दसः तत्संबोधनं हे विवस्वन् हे आदित्य एष पात्रस्थस्ते तव सोमपीथः पातुं योग्यः पीथः पीथश्चासौ सोमश्च सोमपीथः पातव्यः सोमः आहिताग्न्यादित्वात्पीथशब्दस्य परत्वम् [पा° २.२.३७.] । तस्मिन्पातव्ये सोमे त्वं मत्स्व मद तृप्तौ तृप्तिं कुरु बहुलं छन्दसीत्यदादित्वाच्छपो लुक् [पा° २.४.७३.] ॥ का° [१०.५.४.] अदस्मै नर इत्येनमवेक्षते पत्नीति । पत्न्येनं पूतभृतं पश्येत् ॥ आशीर्देवत्या जगती नरदेवत्या वा द्वादशाक्षरचतुःपादा जगती । पत्नी वदति । हे नरो नेतारः ऋत्विग्यजमानाः आशीर्दा आशिषो ददति ते आशीर्दाः सुब्लोपश्छान्दसः (3.) आशिषां दातारो यूयमस्मै वचसे आशीर्वचनाय अदधातन अदिति सत्यनामसु [निघ° ३.१०.] पठितम् तप्तनप्तनथनाश्चेति [पा° ७.१.४५.] मध्यमबहुवचनस्य तनादेशः श्रद्धां कुरुत आस्तिक्यबुद्धिं कुरुतेत्यर्थः मदुक्तमाशीर्वचनं भवद्भिः श्रद्धया धारितं तथैव स्यादिति भावः । किं तदाशीर्वचनमत आह यत् दम्पती जायापती पत्नीयजमानौ वामं वननीयं संभजनीयं यज्ञफलमश्नुतः प्राप्नुतः । किं च इहैव पुमान्पुंस्त्वधर्मसंपन्नः पुत्रः जायते किं च स च पुत्रो वसु धनं विन्दते लभते । अध अथेत्यर्थः निपातस्य चेति [पा° ६.३.१३६.] संहितायां दीर्घः अथानन्तरं विश्वाहा विश्वानि च तान्यहानि च विश्वाहा कालाधनोरत्यन्तसंयोगऽइति [पा° २.३.५.] द्वितीया राजाहःसखिभ्यष्टजिति [पा° ५.४.९१.] प्राप्तस्य टच्प्रत्ययस्य वैकल्पिकत्वाच्छान्दसो वाभावः । अनन्तरं धने लब्धे सति विश्वाहा सर्वदा अरपः पापरहितः सन्गृहे स्वसदने एधते वर्धते नास्ति रपो यस्यासावरपः रपो रिप्रमिति पापनामनी भवत इति यास्कः [निरु° ४.२१.] ॥ आशीर्दा आशिषां दातारौ इति दम्पतिविशेषणं

त्रा विभर्तीराकारः दम्पती यज्ञफलं प्राप्नुताम् तयोः पुत्रो जायताम् स च धनं लब्धा निःपापः स्वगृहे वर्धतामिति आशीर्वचने श्रद्धां कुरुतेति सर्वार्थः ॥५॥

II. वाममद्य सवितर्वाममु श्वो दिवे-दिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥

का° [१०.५.१३.] भक्षयित्वेडामुपाꣳश्वर्तयामपात्रयोरन्यतरेण सावित्रग्रहणं वाममद्येति । सवनीयपुरोडाशेडां भक्षयित्वा सवनीयसंबन्धि कर्म समाप्य उपांश्वर्तयामयोरन्यतरेण सावित्रं गृह्णाति ॥ कण्डिकाद्वयात्मको मन्त्रः । सवितृदेवत्या त्रिष्टुब्गर्भजगती । हे सवितः सर्वस्य प्रेरयितर्देव अद्यास्मिन्दिने अस्मभ्यमस्मदर्थं वामं वननीयं कर्मफलं सावीः प्रेरय देहीत्यर्थः षू प्रेरणे लुङ् अडभावश्छान्दसः । वाममु श्वः उ अप्यर्थे श्वोऽपि समनन्तरदिनेऽपि वामं सावीः । दिवे-दिवे तत ऊर्ध्वं दिने-दिनेऽस्मभ्यं वामं सावीः । हि यस्मादयानया नलोपश्छान्दसः धिया श्रद्धायुक्तया बुद्ध्या वयं वामभाजः स्याम भवेम वामं वननीयं यज्ञकर्म भजन्ति वामभाजः यज्ञानुष्ठातारो भवेम । किमर्थम् वामस्य संभजनीयस्य भूरेः विस्तीर्णस्य बहुकालीनस्य क्षयस्य स्वर्गनिवासस्य सिद्ध्यऽइति शेषः क्षयो निवासऽइत्यादुदात्तत्वात् [पा° ६.१.२०१.] क्षयशब्दो निवासार्थः । दिवे-दिवे इत्यङ्को नामसु [निघ° १.१.] पठितम् । यद्वोत्तरार्धस्यायमर्थः हे देव वामस्य वननीयस्य भूरेः धनपूर्णस्य क्षयस्य निवासस्य दाता भवेति शेषः । धीरिति कर्मनाम [निघ° २.१.] अनया धिया सोमाख्येन कर्मणा वयं वामभाजोऽभिलषितभागिनो भवेम ॥६॥

उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा असि चनो मयि धेहि ।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥७॥

सावित्रम् । हे सोम त्वमुपयामेन ग्रहेण गृहीतोऽसि हे ग्रह त्वं सावित्रः सवितृदेवत्योऽसि चन इत्यन्ननाम [निरु° ६.१६.(5.)] चनोऽन्नं धत्तऽइति चनोधाः अन्नस्य धारयिता । अभ्यासे भूयांसमर्थं मन्यत्तऽइति यास्कोक्तेः [निरु° १०.४२.] यतस्त्वमत्यन्तं चनोधा असि अतश्चनोऽन्नं मयि धेहि स्थापय । किं च यज्ञं जिन्व प्रीणय जिन्वतिः प्रीतिकर्मा यज्ञपतिं यजमानं च जिन्व तर्पय भगाय ऐश्वर्यादिगु-

णयुक्ताय सवित्रे सर्वप्राणिनां प्रसवादिकर्त्रे देवाय त्वां गृह्णामीति शेषः भगमस्यास्तीति भगः अर्शआदित्वादच् (4.) ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणेति ॥ ७॥

III. a. उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहद्उक्षाय नमः । विश्वेभ्यस्त्वा देवेभ्यः । b. एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ८॥

का° [१०. ६. २.] अभक्षितेन महाविश्वदेवग्रहणमुपयामगृहीतोऽसि सुशर्मासीति । अभक्षितेनैव सावित्रग्रहपात्रेण पूतभृतः सकाशान्महाविश्वदेवग्रहस्य ग्रहणं करोत्यध्वर्युः ॥ वैश्वदेवम् । हे वैश्वदेव ग्रह त्वमुपयामेन गृहीतोऽसि यतः सुशर्मासि शोभनं शर्म सुखमाश्रयो वा यस्य स सुशर्मा । तथा सुप्रतिष्ठानः सुष्ठु प्रतिष्ठानं पात्रे स्थितिर्यस्य तादृशोऽसि । विशेषणद्वयेन प्राणभृदोऽसीत्यर्थः प्राणो वै सुशर्मा सुप्रतिष्ठान इति श्रुतेः [8. 8. १. १४.] ग्रहस्यान्नभृत्वाद्अन्नस्य च प्राणहेतुत्वाद्ग्रहस्य प्राणत्वम् । यस्मादीदृशोऽसि तस्माद्बृहद्उक्षाय बृहन्महांश्चासौ उक्षा सेक्ता च बृहद्उक्षः तस्मै महते मेक्त्रे जगदुत्पादयित्रे प्रजापतये नमोऽन्नं भवितुमर्हसीति शेषः नम इत्यन्ननाम [निघ° २. ७.] । प्रजापतिर्वै बृहद्उक्ष इति श्रुतेः [8. 8. १. १४.]- बृहद्उक्षशब्देन प्रजापतिः ॥ विश्वेभ्यो देवेभ्योऽर्थाय त्वां गृह्णामि ॥ सादयति एष ते व्याख्यातम् ॥ ८॥

IV. a. उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्नीवतो ग्रहाँ२॥ऽअध्यासम् ।

b. अग्रꣳ पुरस्तादुरुमवस्ताद्यदन्तरिक्षं तद्उ मे पिताभूत् ।
अग्रꣳ सूर्यमुभयतो ददर्शाग्रꣳ देवानां परमं गुहा यत् ॥ ९॥

का° [१०. ६. १६.] उपयामगृहीतोऽसि बृहस्पतिसुतस्येति प्रतिप्रस्थाता पात्नीवतं गृह्णातीति । उपांशुयामपात्रयोरेकतरेण प्रतिप्रस्थाता पात्नीवतं ग्रहं गृह्णाति ॥ सोमदेवतम् हे देव दीप्यमान हे सोम त्वमुपयामेन पात्रेण गृहीतोऽसि अतस्ते तव संबन्धिनोऽन्यान्ग्रहानुपांशुप्रभृतीनहमध्यासं समर्धयेयम् । किम्भूतस्य

ते बृहस्पतिसुतस्य बृहतो मरुतो यज्ञकर्मणः पतिर्बृहस्पतिर्यजमानस्तेन सुतस्याभिषुतस्य यद्वा बृहस्पतयो ब्राह्मणा ऋत्विजस्तैरभिषुतस्य । तथा इन्दोः उन्दी क्लेदे उनत्तीतीन्दुस्तस्य क्लेदनरूपस्य रसरूपस्येत्यर्थः । तथा इन्द्रियावतः इन्द्रियं वीर्यमस्यास्तीतीन्द्रियवान् तस्य संहितायां दीर्घः । तथा पत्नीवतः पत्नीसंयुक्तस्य ॥ का° [१०.६.१७.] प्रचरणीशिषेण श्रीणात्येनमहं परस्तादिति । प्रचरणीशिष्टेनाज्येन पात्नीवतग्रहं मिश्रयेत् ॥ प्रजापतिरूपात्मदेवत्या त्रिष्टुप् अत्र मन्त्रद्रष्टा स्वस्य सर्वगतपरमात्मरूपत्वमभिप्रेत्य वदति । अहं परमात्मरूपः सन्परस्तात् उपरि द्युलोकादौ तथाहमवस्तात् अधस्तनभूलोकादौ च तिष्ठामीति शेषः । यदन्तरिक्षं मध्यवर्तिलोकरूपमस्ति तदु तदेव मे देहं धारिणो मम पितामूत् पितृवत्पालकं भवति । अहं परमात्मरूपः सन्नुभयतः उपरिष्टादधस्ताच्च स्थित्वा सूर्यं ददर्श पश्यामि । देवानामिन्द्रादीनां यत्परमं गुह्या अत्यन्तं गोप्ये हृदयेऽस्ति तदेवाहमस्मि ॥९॥

a. अग्ना३इ (6.) पत्नीवंत्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ।

b. प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि प्रजापतिस्ते वृष्णो रेतोधसो रेतोधामशीय ॥१०॥

का° [१०.६.१९.] अग्ना३इ पत्नीवन्नित्युत्तरार्धे जुहोतीति । पात्नीवतं ग्रहमग्नेरुत्तरभागे जुहोति ॥ अग्निदेवत्यम् । एचोऽप्रगृह्यस्येत्यादिना [पा° ८.२.१०७.] अग्नेशब्दगतस्य एकारस्य आ इ इत्यादेशौ आकारस्य प्लुतत्वम् हे अग्ने हे पत्नीवन् पत्नीयुक्त त्वष्ट्रा देवेन सजूः समानप्रीतिः सन् त्वं सोमं पिब स्वाहा सुहुतमस्तु ॥ का° [१०.७.३.] पत्नीꣳ सदः प्रवेश्यापरेणोत्तरत उपविष्टामुद्गात्रा समीक्षयति प्रजापतिर्वृषासीति । नेष्टा पश्चिमद्वारेण पत्नीं सदः प्रवेश्योद्गातुरुत्तरत स्थितामुद्गातारं पश्येति प्रेषयेत् सा च तं पश्येत् ॥ हे उद्गातः प्रजापतिः प्रजानां पालकस्त्वं वृषासि सेक्ता भवसि रेतोधा रेतसो वीर्यस्य धारयिता चासि । एवंभूतस्त्वं रेतो वीर्यं मयि धेहि स्थापय ततो वृष्णो वीर्यसेक्तुः रेतोधसो वीर्यस्य धारयितुः प्रजापतेस्ते तवानुग्रहात् रेतोधां रेतसो धारयितारं प्रजोत्पादनसमर्थं पुत्रमशीय प्राप्नुयाम् अश्नोतेर्व्यत्ययेनादादित्वं लिङ्युत्तमैकवचने ॥१०॥

V. a. उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा ।

b. हर्यौधाना स्थ सहसोमा इन्द्राय ॥ ११ ॥

का° [१०. ८. १.] द्रोणकलशे हारियोजनग्रहणमुपयामगृहीतोऽसि हरिरसीति । आग्रयणादिति शेषः ॥ ऋक्सामदेवत्यम् हे ग्रह त्वं हरिर्हरितवर्णोऽसि हरी रश्मिर्हरिः सोमो हरिर्हरितवर्णवानित्यभिधानात् उपयामेन गृहीतश्चासि किम्भूतस्त्वम् हारियोजनः हरी इन्द्राश्वौ योजयतीति हरियोजन इन्द्रस्तस्यायं हारियोजन इन्द्रसंबन्धी तं त्वा त्वां हरिभ्यामृक्साममन्त्राभ्यां गृह्णामीति शेषः । ऋक्सामे वै हरीऽऋक्सामाभ्याꣳ खेनं गृह्णातीति श्रुतेः [8. 8. 3. 6.] ॥ का° [१०. ८. २.] धानाश्चावपति हर्यौधाना इति । हारियोजने अष्टयवान्निदध्यात् ॥ धानादेवत्यम् सहसोमाः सोमेन सहिता धाना अष्टयवा यूयमिन्द्राय इन्द्रस्य हर्योः हरितवर्णयोरश्वयोः स्थ भवथ इन्द्राश्वसंबन्धिनो यूयमित्यर्थः ॥ ११ ॥

यस्तेऽअश्वसनिर्भक्षो यो गोसनिस्तस्य तऽइष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि ॥ १२ ॥

का° [१०. ८. ५.] यस्तेऽअश्वसनिरिति प्राणभक्षं भक्षयित्वोत्तरवेदौ निवपतीति । सर्वत्रिज्जो धाना आदाय मन्त्रेणावघायोत्तरवेदौ क्षिपति ॥ भक्षद्रव्यदेवत्यम् हे धानासहित सोम भक्षद्रव्य यस्ते तव भक्षो भक्षणमश्वसनिः षणु दाने अश्वान्सनोतीत्यश्वसनिः अश्वानां दाता यश्च ते भक्षो गाः सनोति गवां दाता तस्य तादृशस्य ते तव तादृशं भक्षमुपहूतोऽनुज्ञातोऽहं भक्षयामि । कीदृशस्य ते इष्टयजुषः इष्टानि यजूंषि यस्य स इष्टयजुस्तस्य । तथा स्तुतस्तोमस्य उद्गातृभिः स्तुताः स्तोमाः स्तोत्राणि यस्य स स्तुतस्तोमस्तस्य । तथा शस्तोक्थस्य होतृभिः शस्तानि उक्थानि शस्त्राणि यस्य स शस्तोक्थस्तस्य । तथा उपहूतस्याभ्यनुज्ञातस्य तदेतानि भवन्तीत्यर्थः (7.) ॥ १२ ॥

a. देवकृतस्यैनसोऽवयजनमसि । b. मनुष्यकृतस्यैनसोऽवयजनमसि ।

c. पितृकृतस्यैनसोऽवयजनमसि । d. आत्मकृतस्यैनसोऽवयजनमसि ।

e. एनस-एनसोऽवयजनमसि । f. यच्चाहमेनो विद्वांश्चकार यच्चाविद्वांस्तस्य सर्वस्यैनसोऽवयजनमसि ॥ १३ ॥

का° [१०. ८. ६.] शाकलाधानं देवकृतस्येति प्रतिमन्त्रमिति । षट् षड्यूपशकलानि सर्वेऽग्नौ निदध्युः ॥ षड्यूंष्यग्निदेवत्यानि हे शकल त्वं देवकृतस्य देवविषये विहितस्य एनसो यजनाभावादिलक्षणस्य पापस्य त्वमवयजनमसि नाशकं भवसि अवपूर्वो यजिर्नाशनार्थः अवयजतीत्यवयजनम् ॥ मनुष्यकृतस्य मनुष्येषु कृतस्य द्रोहनिन्दादेरेनसोऽवयजनमसि ॥ पितृकृतस्य पितृषु कृतस्यैनसः श्राद्धाकरणादेर्नाशनमसि ॥ आत्मविषये कृतस्य पापस्यात्मनिन्दादेर्नाशनमसि ॥ एनस-एनसः यावन्ति पापानि तावतां सर्वेषां नाशनमसि ॥ किं च विद्वान् ज्ञानानो ज्ञानपूर्वकं यदेनः पापमहं चकार कृतवान् अविद्वान् अज्ञानपूर्वं च यदहमेनश्चकार तस्य सर्वस्यैनसः ज्ञानाज्ञानपूर्वस्य पापस्य त्वमवयजनं नाशनमसि ॥१३॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ १४ ॥

का° [१०. ८. ७.] अपरेण चात्वालं यथास्वं चमसान्पूर्णपात्रानवमृशति हरितकुशानवधाय सं वर्चसेति । पूर्णपात्रानुदकपूर्णानित्यर्थः ॥ त्वाष्ट्री त्रिष्टुप् व्याख्यातापि [२. २४.] व्याख्यायते । वर्चसा ब्रह्मवर्चसेन वयं समगन्महि संगता भवाम गच्छतेर्लङि अदादित्वाच्छपो लुकि उत्तमबहुवचने मो नो धातोरिति [पा° ८. २. ६४.] मस्य नकारः । पयसा क्षीरादिरसेन समगन्महीत्यनुवर्तते । तनूभिरनुष्ठानक्षमैः शरीरावयवैः समगन्महि । शिवेन समीचीनेन कर्मश्रद्धायुक्तेन मनसा समगन्महि । किं च सुदत्रः शोभनदानः त्वष्टा देवो रायो धनानि विदधातु । तन्वः शरीरस्यास्मदीयस्य यद्विलिष्टं विश्लिष्टम् लिश अल्पीभावे निष्ठान्तः विशेषेण न्यूनमङ्गं तदनुमार्ष्टु न्यूनत्वपरिहारेणानुकूलं कृत्वा शोधयतु ॥ १४ ॥

V. समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवत्सꣳ स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥१५॥

का° [१०.८.११.] समिन्द्र णो इति नव समिष्टयजूंषि जुहोति प्रतिमन्त्रमिति । नवभिर्मन्त्रैः समिष्टयजुःसंज्ञा नवाकृतीर्जुहुयात् ॥ तत्राद्यः । विश्वेदेवदेवता त्रिष्टुप् अत्रिदृष्टा । समित्युपसर्गो नेषीत्यनेन संबध्यते न इत्यस्य णत्वम् हे मघवन्धनवन् हे इन्द्र मनसानुग्रहयुक्तेन नोऽस्मान् त्वं सं नेषि संनयसि संयोजयसि । गोभिः वाग्भिर्गवादिपशुभिर्वा संनेषि व्यत्ययेन शपो लुकि लटि मध्यमैकवचने नेषीति रूपम् सूरिभिः पण्डितैर्मैत्रादिभिः संयोजयसि स्वस्त्या क्षेमेण च संनेषि । ब्रह्मणार्थज्ञानसहितेन वेदेन सं नेषि । देवकृतं देवार्थं कृतं कर्म यदस्ति यज्ञाख्यं देवैः कृतं दृष्टं वा यत्कर्म तेन सं नेषि । तथा यज्ञियानां यज्ञसंबन्धिनां देवानां सुमतौ सुमत्यानुग्रहबुद्ध्या संयोजयसि सुपां सुपो भवन्तीति [पा° ७.१.३९. वा° १.] तृतीयार्थे सप्तमी । यस्त्वमस्मानेवं मनआदिभिः संयोजयसि तस्मै स्वाहा एतद्धविः सुहुतमस्तु ॥ १५ ॥ १४ ॥ १६ ॥

अथ द्वितीयः । त्वाष्ट्री त्रिष्टुप् प्रजापतिदृष्टा । व्याख्याता [१४] ॥ १६ ॥

धाता रातिः सविता प्रजापतिर्निधिपा देवोऽग्निः ।
त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणं दधात् स्वाहा ॥ १७ ॥

अथ तृतीयः । धातृसवितृप्रजापतिदेवाग्नित्वष्टृविष्णुदेवत्या त्रिष्टुप् । धाता सविता प्रजापतिः अग्निः त्वष्टा विष्णुः एते षड् देवा इदमस्मद्धविः समिष्टयजुर्लक्षणं जुषन्तां सेवन्ताम् । किम्भूतो धाता रातिः राति प्रयच्छतीति रातिः दानशीलः क्तिच्क्तौ च संज्ञायामिति [पा° ३.३.१७४.] कर्तरि क्तिच्प्रत्ययः चित्त्वादन्तोदात्तः । किम्भूतः प्रजापतिः निधिपाः निधीन्पातीति निधिपाः महापद्मशङ्खपद्मादिनिधीनां नवानां पालयिता । किम्भूतोऽग्निः देवः दीप्यमानः । किं च ते एते देवाः प्रजया यजमानसंबन्धिन्या संततत्या सह संरराणाः सम्यग्रममाणाः सन्तः यजमानाय द्रविणं धनं दधात दधतु ददतु व्यत्ययेन प्रथमपुरुषस्थाने मध्यमः पुरुषः तप्तनप्तनथनाश्चेति [पा° ७.१.४५.] तबादेशः तस्य तेनालोपाभावः । स्वाहा एतेभ्यः सुहुतमस्तु ॥ १७ ॥

सुगा वो देवाः सदना अकर्म यꣳ आजगन्नदꣳ सवनं जुषाणाः ।

भरमाणा वहमाना हविष्मस्मे धत्त वसवो वसूनि स्वाहा ॥ १८॥

अथ चतुर्थः । देवदेवत्या त्रिष्टुप् तुर्यः पादो दशार्णः । हे देवा ये यूयमिदं सवनं यज्ञं जुषाणाः सेवमानाः सन्तः आजग्म आगताः गमेर्लिटि मध्यमबहुवचनम् तेषां वो युष्माकं सदना सदनानि स्थानानि सुगा सुगानि सुखेन गम्यते येषु तानि सुगानि सुगमनीयानि वयमकर्म अकार्ष्म कृतवन्तः । सुडनोरधिकरणे ऽइति [पा० ३.२.४८. वा० ३.] सुउपसर्गे गमेर्डप्रत्यये सुगेति रूपं विभक्तेराकारः । करोतेश्चिलोपे लुङि उत्तमबहुवचने अकर्मेति रूपम् । किं च हे वसवः वासयन्तीति वसवो वासयितारो निवासहेतवो देवाः अस्मे अस्मासु यूयं वसूनि धनानि धत्त स्थापयत । किम्भूता यूयं यज्ञसमाप्तौ हविंषि भरमाणा ये रथिनस्ते तु रथेषु बिभ्रतः रथहीना वहमानाः स्कन्धेषु हविंषि वहन्तः यद्वा भरमाणाः पुष्णन्तः वहमानाः रथादिभिर्नयन्तः तेभ्यो युष्मभ्यं स्वाहा सुहुतमस्तु ॥ १८॥

यौ२॥ऽआवह उशतो देव देवांस्तान्प्रेरय स्वेऽअग्ने सधस्थे ।

जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु स्वाहा ॥ १९॥

अथ पञ्चमो मन्त्रः । आग्नेयी त्रिष्टुप् इदानीं देवान्विसृजति । हे अग्ने हे देव दीप्यमान उशतो हविंषि कामयमानान्यान्देवान् त्वमावहः आहूतवानसि तान्देवान् स्वे स्वकीये सधस्थे सहनिवासस्थाने प्रेरय प्रस्थापय सह तिष्ठन्ति यस्मिन् तत्सधस्थम् सध मादस्थयोश्छन्दसीति [पा० ६.३.९६.] स्थे परे सहस्य सधादेशः । किमुक्ता प्रेरयामीति चेत् अत आह हे देवाः विश्वे सर्वे यूयं जक्षिवांसः घसॢ अदने क्वसुश्चेति [पा० ३.२.१०७.] क्वसुः वस्वेकाजाद्घसामिति [पा० ७.२.६७.] इतीट् सवनीयपशुपुरोडाशान्भक्षितवन्तः । तथा पपिवांसः सोमपानं कृतवन्तश्चेदानीं यज्ञसमाप्तौ असुं हिरण्यगर्भप्राणलक्षणं वायुं वायुमण्डलमित्यर्थः घर्ममादित्यमण्डलं वा स्वः द्युलोकं वा अन्वातिष्ठत आश्रयत यस्य यस्य यत्र गृहाः सन्ति तांस्तानन्वातिष्ठतेत्यर्थः छन्दसि परेऽपीति [पा० १.४.८१.] अनोः क्रियापदात्परत्वम् स्वाहा सुहुतमस्तु हविः ॥ १९॥

वयꣳ हि वां प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह ।

ऋधंगया ऋधंगुताशंमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्त्स्वाहा ॥ २० ॥

अथ षष्ठः । आग्नेयी त्रिष्टुप् इदानीमग्निं विसृजति । हे अग्ने हि यस्मात्कारणादिहास्मिन्दिने स्थाने वा अस्मिन्यज्ञे प्रयति प्रवर्तमाने सति होतारं देवानामाह्वातारं होमनिष्पादकं वा त्वा त्वां वयमवृणीमहि वृतवन्तः अग्निर्वै देव्यो होतेति श्रुतेः तस्मात्कारणाद्धृतस्त्वमृधक् समृद्धं यथा भवति तथा अयाः यद्वा ऋध्नोतीति ऋधक् ऋध्नुवन्यज्ञं समर्धयन्सन् अयाः अयाक्षीः इष्टवानसि यज्ञं कारितवानसीत्यर्थः यजतेश्छिलोपे जकारस्य छान्दसं रुवम् । उतापि च ऋधक् ऋध्नुवन्नेव अशमिष्ठाः यज्ञप्रायश्चित्तं शमितवानसि विघ्नशान्तिं वा अकार्षीः स त्वमिदानीं यज्ञं प्रजानन्यज्ञं समाप्तमवगच्छन् उपयाहि स्वगृहं गच्छ किम्भूतस्त्वं विद्वान्यण्डितः स्वाधिकारं ज्ञानन्नित्यर्थः स्वाहा तुभ्यं सुकृतमस्तु ॥ २० ॥

देवा गातुविदो गातुं वित्वा गातुमित ।
मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धाः ॥ २१ ॥

अथ सप्तमः । वातदेवत्या विराट् मनसस्पतिदृष्टा । व्याख्यातापि [२.२१.] उच्यते । कै गै शब्दे गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यतऽइति गातुर्यज्ञस्तं विदन्ति जानन्तीति गातुविदः तादृशा हे देवाः गातुं वित्वा अस्मदीयो यज्ञः प्रवृत्त इति विदित्वा गातुमित यज्ञं गच्छत यद्वा गातुं वित्वा यज्ञं समाप्तं विदित्वा गातुमित गाङ् गतौ गायते गम्यते यत्र स गातुर्मार्गस्तं गच्छत यज्ञं समाप्तं मत्वा यज्ञेन तुष्टाः सन्तः स्वकीयं मार्गं गच्छत । एवं देवानुक्त्वा प्रजापतिमाह हे मनसस्पते अस्मदीयस्य मनसो यष्टुं प्रेरणेन पालक परमेश्वर हे देव इममनुष्ठितं यज्ञं स्वाहा त्वदस्ते दधामि त्वं च वाते धाः वायुरूपे देवे यज्ञं धेहि स्थापय ॥ २१ ॥

a. यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
b. एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तञ्जुषस्व स्वाहा ॥ २२ ॥

अथाष्टमः । यज्ञदेवतं यजुः । यज्ञं विसृजति । हे यज्ञ त्वं यज्ञं गच्छ स्वप्रतिष्ठार्थं यज्ञनामकं विष्णुं गच्छ यज्ञपतिं यजमानं गच्छ फलप्रदानेन यजमानं प्राप्नुही-

त्यर्थः स्वां योनिं गच्छ स्वनिष्पत्त्यर्थं स्वां योनिं स्वकारणभूतां वायोः क्रियाशक्तिं गच्छ द्रव्यं देवता च यज्ञस्य योनिः सर्वात्मा त्वमिति भावः स्वाहा सुकृतमस्तु ॥ अथ नवमः समिष्टयजुर्मन्त्रः । यज्ञपतिर्देवतम् हे यज्ञपते यजमान एषोऽनुष्ठीयमानो यज्ञस्ते तव त्वदीयोऽस्ति । कीदृशः सहसूक्तवाकः सूक्तवाकैः स्तोत्रैः सहितः । तथा सर्ववीरः सर्वे वीरा यस्मिन्स तथा सोमः पशुः सवनीयचरुपुरोडाशा वीरा उच्यन्ते तैः सहितः य ईदृशस्तं यज्ञं जुषस्व फलभोगेन सेवस्व स्वाहा सुकृतमस्तु ॥ २२ ॥

VII. a. माऽहिर्भूर्मा पृदाकुः । b. उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ।
c. नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥ २३ ॥

का° [१०. ८. १३.] कृष्णविषाणामेखले चात्वाले प्रास्यति माऽहिर्भूरिति । यजमानहस्तस्थं मृगशृङ्गं मध्ये बद्ध्वा मेखला चेत्युभे विस्रंस्य चात्वाले क्षिपेत् ॥ रज्जुर्देवतम् हे रज्जो त्वमहिः सर्पो मा भूः पृदाकुः अजगरः सर्पविशेषः सोऽपि मा भूः ॥ का° [१०. ८. १५.] उरुꣳ हीति वाचयतीति । अवभृथाय निर्गमिष्युरध्वर्युश्चात्वालसमीपस्थं प्राङ्मुखं यजमानं वाचयेत् ॥ वरुणदेवत्या त्रिष्टुप् पुनःशेपदृष्टा । उशब्दोऽवधारणे वरुण एव राजा सूर्याय अन्वेतवे षष्ठ्यर्थे चतुर्थी सूर्यस्यान्वेतुमनुक्रमेणान्वङ्गं गन्तुं हि यस्मात् उरुं विस्तीर्णं पन्थां पन्थानं मार्गं चकार क्व अपदे नास्ति पदं यस्मिन्यत्र दत्तं पदं प्रतिमुद्रितं न भवति तस्मिन्नन्तरिक्षे मार्गं कृतवानित्यर्थः । तस्मादस्माकमपि अपदेऽन्तरिक्षे पादा प्रतिधातवे पादौ निक्षेतुं विभक्तेराकारः मार्गं कः करोतु स्वर्गगमनाय मार्गं करोत्वित्यर्थः करोतेरदादित्वेन लङि शपो लुक् अडभाव (8.) आर्षः । किं च यो वरुणः उतापि च हृदयाविधश्चिदपवक्ता हृदयं विध्यति मर्मोच्चारणेन पीडयति हृदयवित् नक्षिवृतिवृषीत्यादिना [पा° ६. ३. ११६.] क्विबन्ते व्यधौ परे हृदयस्य दीर्घः तस्य हृदयाविधः पिशुनस्यापि अपवदिता चित्शब्दोऽप्यर्थे निन्दकस्यापि तिरस्कर्ता किमुतान्येषां पापकारिणामित्यर्थः । ईदृशो वरुणोऽवभृथाय मार्गं ददात्वित्यर्थः । अन्वेतवे प्रतिधा-

तवे अनुपूर्वादिणः प्रतिपूर्वाद्धातेश्च तुमर्थे सेसेनित्यादिना [पा° ३. ४. ९.] क्रमात्तवैतवेप्रत्ययौ ॥ का° [१०. ८. २१.] नमो वरुणायेति वाचयत्यपोऽवक्रमयन्निति । अवभृथस्नानार्थमपः प्रवेशयन्यजमानं वाचयेत् ॥ वारुणं यजुः वरुणस्य पाशोऽभिष्टितः आक्रान्तस्तस्मान्न बन्धनक्षमस्तस्मै वरुणाय नमो नमस्कारोऽस्त्विति शेषः ॥ २३ ॥

अग्नेरनीकमप आविवेशापां नपात्प्रतिरन्नसुर्यम् ।
दमे-दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत्स्वाहा ॥ २४ ॥

का° [१०. ८. २२.] प्रास्य समिधं चतुर्गृहीतेनाभिजुहोति अग्नेरनीकमिति । अप्सु समिधं प्रक्षिप्य चतुर्गृहीतेनाज्येन तदुपरि जुहुयात् ॥ अग्निर्देवत्या त्रिष्टुप् अग्नेरनीकमिति परोऽक्षलिङ्गं समिधं यक्ष्यग्ऽइति प्रत्यक्षलिङ्गमेकस्मिन्वाक्ये व्यत्ययेन संगतमतो यङ्शब्दाध्याहारेण योज्यम् । हे अग्ने यस्य तवाग्नेः अङ्गनशीलस्य सतोऽपांनपात्संज्ञमनीकं मुखमप उदकान्याविवेश आभिमुख्येन प्रविविश हे अग्ने स त्वं दमे-दमे तत्तद्यज्ञगृहे असुर्यमसुरैः कृतं यज्ञविघ्नं प्रतिरन्निवर्तयन्सन् समिधं समिन्धनसाधनं घृतं यक्षि यज्ञ संगतं कुरु यजतिः संगतीकरणार्थः शपो लुकि लटि रूपम् घृतमात्मसंगतं कुर्वित्यर्थः ततोऽनन्तरं ते तव जिह्वा ज्वाला घृतं प्रति उच्चरण्यत् उच्चरतु उच्युक्तास्तु स्वाहा सुहुतमस्तु । दमे-दमे इति वीप्साश्वमेधविषया तत्र हि नानावभृथान्यहानि भवन्ति । उत्पूर्वाच्चरतेर्लोडर्थेऽन्यत्प्रत्यय औणादिकः ॥ २४ ॥

समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहा ॥ २५ ॥

का° [१०. ९. १.] समुद्रे तऽइति ऋज्रीषकुम्भं प्लावयतीति । गतसारः सोम ऋज्रीषस्तेन पूर्णं कुम्भमप्सु क्षिपेत् ॥ सोमदेवत्या विराट् दशाक्षरचतुःपादा । अन्ते वर्तमानो यक्ष्यद्यो हृदयेन संबध्यते हे सोम यत्ते तव हृदयं समुद्रे अप्सु समुद्रसमानासु अप्सु बहुलोदकेषु अन्तर्मध्ये तिष्ठते वर्ततऽइति वा शेषः तत्र त्वां गमयामीति शेषः तत्रस्थं त्वा त्वामोषधीरोषधयः संविशन्तु उत अपि च आपो ज-

लानि त्वां संविशन्तु । किं च हे यज्ञपते यज्ञस्य पात्नंक सोम यज्ञस्य सूक्तोक्तौ शोभनवचनोच्चारणे नमोवाके नमसो वाके नमस्कारवचने च त्वा त्वां विधेम स्थापयामः विधतिः स्थापनार्थः स्वाहा सुहुतमस्तु ॥ २५ ॥

देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत ।
देव सोमैष ते लोकस्तस्मिञ्छं च वह्व परि च वह्व ॥ २६ ॥

का° [१०.१.२.] देवीराप इति विसृज्योपतिष्ठतऽइति । ऋजीषकुम्भं मुक्त्वोपस्थानं कुर्यात् ॥ अष्टत्रिंशदक्षरत्वात्पङ्क्तिर्बृहती वा पूर्वार्धमब्दैवतमुत्तरार्धं सोमदैवतम् हे देवीर्देव्यः हे आपो वो युष्माकमेष सोमो गर्भस्थानीयः तं तादृशं सोमं यूयं बिभृत धारयत । किम्भूतं तं सुप्रीतं शोभनप्रीतियुक्तं साधुतर्पितं वा तथा सुभृतं सुपुष्टम् । इदानीं सोमं वदति हे सोम हे देव दीप्यमान ते तव एष जललक्षणो लोकः स्थानं तस्मिन्नवस्थितः सन् त्वं शं वह्व वह शं सुखं प्रतिप्रापय परिवह्व च परिवह निवर्तय अस्मत्तः सर्वा आर्त्तीरिति शेषः तस्मिन्नः शं चैधि सर्वाभ्यश्च न आर्त्तिभ्यो गोपायेति श्रुतिः [४.४.५.२१.] वहतेर्लोट् मध्यमैकवचने तडि शपि लुप्ते वृपं वह्वेति ॥ २६ ॥

a. अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽया-
सिष मव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥ b. देवानाꣳ समि-
दसि ॥ २७ ॥

का° [१०.१.३.] अवभृथेति मज्जयतीति । ऋजीषकुम्भं जले प्रवेशयेत् ॥ यज्ञदैवतम् । अवाचीनानि पात्राणि जलमध्ये भ्रियन्ते यस्मिन्यज्ञविशेषे सोऽवभृथः तत्संबोधनं हे अवभृथ त्वं निचुम्पुण नितरां मन्दं गह्व चुपि मन्दायां गताविति धातोः । यद्यपि त्वं निचेरुरसि नितरां चरणशीलोऽसि तथाप्यत्र निचुम्पुण (9.) नितरां मन्दं गह्व । किं प्रयोजनमिति चेत् उच्यते देवैर्द्योतनात्मकैरस्मदीयैरिन्द्रियैर्देवकृतं देवेषु हविःस्वामिषु कृतमेनः पापं यदस्ति तदवयासिषं जलेऽवनीतवानस्मि । देवः सुरे धने राज्ञि देवमाख्यातमिन्द्रियमित्यभिधानात् । तथा म-

र्त्यैर्मनुष्यैरस्मत्सहायभूतैर्ऋत्विग्भिर्मर्त्यकृतं मर्त्येषु यज्ञदर्शनार्थमागतेषु कृतमवज्ञारूपं यदेनोऽस्ति तदप्यहमवायासिषमित्यनुवर्तते इदमस्माभिः परित्यक्तमेनो यथा त्वां न प्राप्नोति तथा हे यज्ञ मन्दं गच्छेति भावः । किं च हे देवावभृथाख्य यज्ञ रिषः बधात् पाहि अस्मान्पालय रिष बधे क्विप् किम्भूताद्रिषः पुरुरावणः पुरु बहु विरुद्धं फलं राति ददातीति पुरुरावा रा दाने आतो मनिन्नित्यादिना [पा° ३. २. ७४.] वनिप् विरुद्धफलदायी बधस्त्वत्प्रसादादस्माकं मा भूदित्यर्थः ॥ का° [५. ५. ३५.] आहवनीये समिदाधानं देवानाꣳ समिदसीति । स्नानानन्तरमाहवनीयमेत्य तस्मिन्समिधं दध्यात् ॥ अग्निर्देवता यजुः । देवानां संबन्धिनी समित् इन्धनमसि यद्वा देवभूतानामस्माकं समिन्धनं भवसि ॥ २७ ॥

VIII. एजतु दशमास्यो गर्भो जरायुणा सह । यथायं वायुरेजति यथा समुद्र एजति । एवायं दशमास्योऽअसज्जरायुणा सह ॥ २८ ॥

इतः परमनूबन्ध्यायां गर्भिण्यां प्रायश्चित्तं कथ्यते ॥ ॥

का° [२५. १०. ७.] निरुच्यमाणमभिमन्त्रयतऽएजतु दशमास्य इति । यद्यनूबन्ध्या वशा गर्भिणी स्यात्तदा विशसने मातुः सकाशात्पृथक्क्रियमाणं गर्भमभिमन्त्रयेत ॥ अवसानत्रययुक्ता गर्भदेवत्या महापङ्क्तिः अष्टाक्षराः षट् पादा यस्याः सा महापङ्क्तिः । गर्भः जरायुणा सह एजतु एजृ कम्पने जरायुर्गर्भवेष्टनं तेन सह कम्पतां चलतु । किम्भूतो गर्भः दशमास्यः दश मासा ज्ञाता यस्य सः दशमासकालावच्छिन्न इव चलत्वित्यर्थः । कथं चलतु तत्राह यथा येन प्रकारेणायं वायुरेजति चलति यथा च समुद्र एजति एतौ हि सदा कम्पनशीलौ । एवेति निपात एवमर्थे एवमयं दशमास्यः संपूर्णावयवो गर्भो जरायुणा सह असत् स्रंसताम् निर्गच्छतु यद्यप्ययं गर्भो दशमास्यो नास्ति तथापि संपूर्णस्येव निर्गमनमाशास्यते तमेतद्प्यदशमास्यं सन्तं ब्रह्मणैव यजुषा दशमास्यं करोतीति श्रुतिः [४. ५. २. ४.] । स्रंस अधःपतने व्यत्ययेन परस्मैपदे शपो लुकि च कृते कृल्ङ्याब्भ्य इति [पा° ६. १. ६८.] तिपि लुप्ते वावसानऽइति [पा° ८. ४. ५६.] सस्य दत्वे अनिदितामिति [पा° ६. ४. २४.] नलोपे अडागमे च असदिति रूपम् ॥ २८ ॥

यस्यै ते यज्ञियो गर्भो यस्यै योनिर्हिरण्ययी ।
अङ्गान्यङ्कृता यस्य तं मात्रा समङ्गीगम्ँ स्वाहा ॥ २९ ॥

काण्° [२५.१०.११.] अवदानान्यनुजुहोति यस्यै तऽइति । वशावदानानि कृत्वा गर्भरक्तं जुहुयात् ॥ वशादिवत्यानुष्टुप् के वशे यस्यास्ते तव गर्भो यज्ञियः यज्ञार्हः यस्यै यस्याश्च तव योनिर्हिरण्ययी सुवर्णमयी ऋत्येत्यादिना [पा° ६.४.१७५.] इति निपातः सुवर्णमयी मत्प्रेषेण क्रियतऽइत्यर्थः तादृशीं त्वां गर्भेण संगमयामीति शेषः । यस्य गर्भस्याङ्गान्यङ्कृता कृ कौटिल्ये कुङ कृरेश्छन्दसीति [पा° ७.२.३१.] कुरादेशो निष्ठायामकुटिलानि अखण्डितानि तं गर्भं मात्रा जनन्यानूबन्ध्यालक्षणाया समङ्गीगमं संगमयामि गमेर्ण्यन्तस्य लुङि चङि रूपम् स्वाहेति होमार्थः ॥२९॥

पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः ।
एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ता स्वाहा ॥३०॥

काण्° [२५.१०.१९.] स्विष्टकृतमनुजुहोति पुरुदस्म इति । प्रचरण्यां स्रुचि प्रतिप्रस्थाता सर्वं गर्भरसमवदायाधर्युणा (10.) स्विष्टकृद्धोमे कृते सति जुहुयात् ॥ गर्भदैवत्यं यजुः इन्दुरूपेण गर्भः स्तूयते इन्दुः क्लोदनरूपः सोमसदृशो (11.) गर्भो महिमानं महत्त्वमानञ्ज व्यक्तीकरोतु अञ्जतेर्व्यक्तीकरणार्थस्य लिटि रूपम् तस्मान्नुड्द्वहल इति [पा° ७.४.७१.] इति नुडागमः । विशेषणैर्महिमानमाह कीदृश इन्दुः पुरुदस्मः पुरु दस्म यस्य बहुदानयुक्तः विषुरूपः बहुरूपः अन्तरुदरे स्थितः धीरो मेधावी एवंभूतं महिमानमानञ्जित्यर्थः । एवं महिमवतो गर्भस्य मातरमनूबन्ध्यां भुवना भुवनानि भूतजातानि अनु प्रथन्तां प्रख्यातां कुर्वन्तु । विशेषणैः प्रख्यातिमाह कीदृशीम् एकपदीमेकं पदं यस्यास्तां वपयैकपदयुताम् (12.) द्विपदीं वपया अङ्गैश्च द्विपदयुताम् त्रिपदीं त्रीणि पदानि यस्यास्तामुपयङ्गोमैस्त्रिपदीम् चतुष्पदीं पत्नीसंयाजैश्चतुर्भिः पादैर्वा चतुःपादयुताम् अष्टापदीं स्वपदैर्गर्भपदैश्चाष्टपादयुताम् एवंभूतां वशां गणयित्वा भूतान्यनुप्रथन्तामिति संबन्धः । स्वाहा सुहुतमस्तु ॥३०॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥३१॥

का° [२५.१०.१८.] समिष्टयजुरन्ते शामित्रऽएव जुहुयात्तिष्ठन्मरुत इत्यस्वाहाकृत्येति । समिष्टयजुर्होमान्ते शामित्राग्नावेव स्वाहान्तेन मन्त्रेणोल्लीषवेष्टितं गर्भं जुहोति मन्त्रान्ते स्वाहाकारमनुच्चार्य जुहुयादित्यर्थः ॥ मरुद्देवत्या गायत्री गोतमदृष्टा (13.) । हे दिवो विमरुसः विशिष्टं मरुतो येषां ते द्युलोकसंबन्धिना विशिष्टेन मरुसा तेजसा युक्ताः यद्वा विशिष्टं मरुन्ति पूजयन्ति ते विमरुसः द्युलोकस्य पूजयितारो हे मरुतो यस्य यजमानस्य क्षये यज्ञगृहे यूयं पाथ सोमपानं कुरुथ पा पाने शपो लुक् पिबादिशाभावश्च छान्दसः संहितायां दीर्घः ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] सूत्रेण । हि निश्चितं स जनः यजमानाख्यः सुगोपातमः गोपायतीति गोपा रक्षकः अत्यन्तं शोभनो गोपा यस्य स सुगोपातमः युष्मदुक्तानां भयं नास्तीत्यर्थः ॥३१॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥३२॥

का° [२५.१०.१८.] मही द्यौरित्यङ्गारैरभ्यूहतीति । शामित्रे क्षिप्तं गर्भमङ्गारैरुल्लादयेत् ॥ द्यावापृथिवीदेवत्या गायत्री मेधातिथिदृष्टा ॥ मही महती द्यौः द्युलोकः पृथिवी भूलोकश्च नोऽस्माकमिमं यज्ञं मिमिक्षतां मिह सेचने सन्नन्तः सेक्तुमिच्छतां स्वैः-स्वैर्भागैः पूरयतामित्यर्थः । भरीमभिः भरणैर्हिरण्यपशुधान्यादिभिः स्वैः-स्वैर्भागैर्नोऽस्मदीयं गृहं पिपृतां पूरयताम् ॥३२॥ ॥ इत्यग्निष्टोममन्त्राः समाप्ताः ॥ ॥

IX. a. आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥
b. उपयामगृहीतोऽसीन्द्राय त्वा षोडशिने ।
c. एष ते योनिरिन्द्राय त्वा षोडशिने ॥३३॥

अथ षोडशी अग्ने पवस्वेत्यस्मात्प्राक् [३७.] ॥ ॥ का° [१२.५.२.] प्रातःसवनेऽतिग्राह्यान्गृहीत्वा षोडशिनं खादिरेण चतुःस्रक्तिनातिष्ठ युक्त्वा हरीति वेति । प्रातःसवने आग्रयणग्रहणानन्तरमाग्नेयमतिग्राह्यमादाय चतुःकोणेन खादिरोलूखलेनातिष्ठ युक्त्वा हरीति मन्त्रयोरन्यतरेण सोपयामेन षोडशिग्रहं गृह्णीयात् ॥

इन्द्रदेवत्यानुष्टुब्गोतमदृष्टा (13.)। हे वृत्रहन्निन्द्र ते तव हरी हरितवर्णावश्वौ ब्रह्मणा त्रयीलक्षणेन इन्द्रागच्छित्यादिमन्त्रेण युक्ता रथे संयुक्तौ अतस्त्वं रथमातिष्ठ आरोह। इन्द्राह्वानं श्रुत्वास्मन्नियोजनकालः (14.) प्राप्त इति मत्वाश्वौ स्वयमेव रथे युञ्जाति इति युक्ता इत्युक्तम्। किं च ग्रावा सोमाभिषवपाषाणः ते तव रथाद्ऊ॒ऊस्य मनोऽर्वाचीनमस्मद्यज्ञाभिमुखं सु कृणोतु सुतरां करोतु केन वग्नुना वग्नुरिति वाङ्नामसु [निघ० १. ११.] पठितं वाचा श्रवणीयेन सोमाभिषवशब्देन॥ हे सोम त्वमुपयामेन गृहीतोऽसि षोडशिने षोडशं स्तोत्रमस्यास्तीति षोडशी तस्मै इन्द्राय त्वा त्वां गृह्णामीति शेषः॥ सादयति हे ग्रह एष ते योनिः स्थानं षोडशिनऽइन्द्राय त्वां सादयामीति शेषः॥३३॥

X. a. यु॒ङ्क्ष्वा हि के॒शिना॒ हरी॒ वृष॑णा कक्ष्य॒प्रा।

अथा॑ न इन्द्र सोमपा गि॒रामुप॑श्रुतिं च॒र॥ b. c. = ३३ b. c. ॥३४॥

द्वितीयो ग्रहणमन्त्रः। इन्द्रदेवत्यानुष्टुब्मधुच्छन्दोदृष्टा। हे इन्द्र हि निश्चितं हरी हरितवर्णौ त्वदीयावश्वौ युङ्क्ष्वा रथेन संयोजय कीदृशौ हरी केशिना प्रलम्बकेसरौ तथा वृषणा वृष सेचने वृषणौ वर्षितारौ सेक्तारौ तरुणौ वा षपूर्वस्य निगमऽइति [पा० ६. ४. २.] दीर्घाभावः तथा कक्ष्यप्रा कक्षे भवः कक्ष्यः अश्वसंनाहरज्जुः कक्ष्यं मध्यबन्धनं प्रातः पूरयतस्तौ कक्ष्यप्रौ स्थूलावयवावित्यर्थः। अथानन्तरं रथारोहणानन्तरं हे इन्द्र सोमपाः सोमपानं कुर्वन्नोऽस्मदीयानां गिरामृग्यजुःसामलक्षणानां वाचामुपश्रुतिमुपश्रवणं चर गच्छ प्राप्नुहि अस्मद्गिरः शृणिवित्यर्थः वाचं श्रुत्वास्मद्गृहमागच्छित्यर्थः॥ उपयाम एष ते एते व्याख्याते। अथेत्यत्र संहितायां दीर्घः॥३४॥

XI. a. इन्द्र॒मिद्धरी॑ वह॒तोऽप्र॑तिधृष्टशवसम्।

ऋषी॑णां च स्तु॒तीरुप॑ य॒ज्ञं च॒ मानु॑षाणाम्॥ b. c. = ३३ b. c. ॥३५॥

षोडशिग्रहे तृतीयो मन्त्रविकल्पः आग्रयणाद्इन्द्रमिद्धरीऽइति गृह्यैवेति कठसूत्रोक्तेः। इन्द्रदेवत्यानुष्टुब्गोतमदृष्टा। इत् एवार्थे हरी हरितवर्णावश्वौ ऋषीणां स्तुतीरुप वसिष्ठादीनां मुनीनां स्तुतिसमीप इन्द्रमित् इन्द्रमेव वहतः प्राप-

यतः । च पुनः मानुष्राणां यज्ञमानानां यज्ञमुप यज्ञसमीपे च हरी इन्द्रं वक्तः । किम्भूतमिन्द्रम् अप्रतिधृष्टशवसम् प्रतिधर्षयितुं पराभवितुं शक्यं प्रतिधृष्टं न प्रतिधृष्टमप्रतिधृष्टं शवो बलं यस्य सोऽप्रतिधृष्टशवास्तम् ॥ उपयाम एष ते इति व्याख्यातं ॥ ३५ ॥

XII. यस्मान्न जातः परोऽन्योऽअस्ति य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥ ३६ ॥

का° [१२. ५. १९.] उपस्थायैनं यस्मान्न जात इति । षोडशिग्रहमुपतिष्ठेत् ॥ इन्द्रदेवत्या त्रिष्टुप् विवस्वद्दृष्टा । परब्रह्मरूपेण षोडशी स्तूयते यस्मात्पुरुषादन्यः व्यतिरिक्तः परः उत्कृष्टो देवादिर्जातः संभूतो नास्ति न विद्यते यश्च विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि आविवेश अन्तर्यामिरूपेण प्रविष्टवान् सः प्रजापतिः स्वोत्पन्नप्रजापालकस्त्रीणि ज्योतींषि अग्निवायुसूर्यलक्षणानि तेजांसि विषयज्ञापकानि सचते सेवते स्वतेजसा तज्ज्योतिषामुज्जीवनं करोतीत्यर्थः येन सूर्यस्तपति तेजसेद्ध इत्यादिश्रुतेः यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति स्मृतेश्च [भग° गी° १५. १२.] । किम्भूतः प्रजापतिः प्रजया संरराणः प्रजारूपेण सम्यग्रममाणः । तथा षोडशी षोडशकलात्मकलिङ्गशरीरोपहितः स एव सर्वव्यवहाराश्रय इत्यर्थः यः सर्वेषु भूतेषु तिष्ठन्नित्यादिश्रुतेः ॥ ३६ ॥

a. इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् । तवेदमन्नु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु । b. सह प्राणेन स्वाहा ॥ ३७ ॥

का° (15.) इन्द्रश्च सम्राडिति भक्षणमिति । षोडशिग्रहं भक्षयेत् ॥ इन्द्रवरुणदेवत्या षोडशिदेवत्या वा त्रिष्टुब्यजुरुक्ता अन्त्यपादौ द्वादशार्णौ सह प्राणेनेति यजुः विवस्वद्दृष्टा । हे षोडशिग्रह तौ देवौ इन्द्रावरुणौ ते तव एतं सोममग्रे प्रथमं भक्षं चक्रतुः । तौ कौ इन्द्रो वरुणश्च चकारौ समुच्चये किम्भूत इन्द्रः सम्राट् परमैश्वर्ययुक्तः वाजपेययाजीत्यर्थः किम्भूतो वरुणः राजा राजसूययाजी राजा

वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेनेति श्रुतेः [५.१.१.१३.] । तयोरिन्द्रावरुणयोः संबन्धिनं भक्षमनु पश्चात् अहं भक्षयामि सोमं पिबामि । जुषाणा मदीयेन भक्षेण सेवमाना वाग्देवी सरस्वती प्राणेन प्राणदेवतया सह सोमस्य तृप्यतु सोमेन तृप्ता भवतु तृप्त्यर्थानां करणे षष्ठी वेति (16.) सोमशब्दात्षष्ठी । स्वाहा सुहुतमस्तु ॥३७॥ ॥ इति षोडशियागः संपूर्णः ॥ ॥

XIII. a. अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे व॑र्चः॒ सुवी॑र्यम् । दधद्र॒यिं मयि॒ पोष॑म् ॥
b. उ॒पया॑मगृहीतोऽस्य॒ग्नये॒ त्वा॒ वर्च॑से । c. ए॒ष ते॒ योनि॑र॒ग्नये॒ त्वा॒ वर्च॑से । d. अग्ने॑ वर्चस्विन्व॒र्चस्वां॑स्त्वं दे॒वेष्व॑सि॒ वर्च॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥३८॥

अथ द्वादशाहमन्त्राः ॥ ॥ का॰ [१२.३.१.२.] पृष्ठ्यः षडहस्तत्रातिग्राह्यग्रहणं ऋचे पूर्वेऽग्ने पवस्वोत्तिष्ठन्नदृश्रमित्यन्वहमेकैकम् [६.] अग्ने वर्चस्विन्निन्द्रौजिष्ठ सूर्य भ्राजिष्ठेति भक्षणं यजमानैरिति । अस्ति कश्चित्पृष्ठ्यः षडहाख्यः क्रतुः स तु षड्भिरहोभिर्निष्पाद्यः तत्र पूर्वस्मिन्नहस्त्रये क्रमेणाग्ने पवस्वेत्यादिभिर्मन्त्रैरतिग्राह्यान्ग्रहान्गृह्णीयात्तथैवाग्ने वर्चस्विन्नित्यादिभिर्मन्त्रैस्तत्तद्ग्रहशेषं भक्षयेत् ॥ तत्र प्रथमो यथा अग्ने पवस्व । अग्निदेवत्या गायत्री वैखानसदृष्टा आद्यौ सप्तार्णौ पादौ एषा यजुरुक्ता उपयाम एष तऽइति द्वे यजुषी । हे अग्ने त्वमस्मे अस्मासु सुवीर्यं शोभनं वीर्यं यस्मिंस्तादृशं शोभनसामर्थ्योपेतं वर्चो ब्रह्मवर्चसं पवस्व पव (17.) गत्यर्थः अन्तर्भूतण्यर्थः गमय प्रापय । सुपां सुलुगिति [पा॰ ७.१.३९.] विभक्तेः शेआदेशे अस्मे इति रूपम् । किम्भूतस्त्वम् स्वपाः अप इति कर्मनाम [निघ॰ २.१.] शोभनान्यपांसि यस्य स स्वपाः सुकर्मा । एवम्भूतस्त्वम्भिः सह संप्रार्थ्य स्वयं याचते मयि यजमाने रयिं धनं दधत् धारयन्स्थापयन्सन् पोषं पुष्टिं पुत्रपश्वादिवृद्धिं पवस्व प्रवर्तयेति संबन्धः ॥ उपयामयतीत्युपयामो ग्रहः हे सोम तेन त्वं गृहीतोऽसि हे ग्रह वर्चसे वर्चस्विने तेजस्विनेऽग्नये त्वां गृह्णामीति शेषः । सादयति एष खरप्रदेशस्तव योनिः स्थानं वर्चस्विनेऽग्नये त्वां सादयामीति शेषः ॥ भक्षणमन्त्रः । हे वर्चस्विन्विशिष्टतेजोयुक्त हे अग्ने त्वं देवेषु इन्द्रादिषु मध्ये वर्च-

स्वानतिदीप्तिमानसि अतस्त्वत्प्रसादादहमपि मनुष्येषु मध्ये वर्चस्वान्ब्रह्मवर्चससंपन्नो भूयासं भवेयम् ॥ ३८ ॥

XIV. a. उत्तिष्ठन्नोजसा सह पीत्वी शिप्रेऽवेपयः । सोममिन्द्र चमू सुतम् ।
b. उपयामगृहीतोऽसीन्द्राय त्वौजसे । c. एष ते योनिरिन्द्राय त्वौजसे ।
d. इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वसोजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ३९ ॥

द्वितीयोऽतिग्राह्यग्रहणमन्त्रः । इन्द्रदेवत्या गायत्री कुरुस्तुतिदृष्टा (18.) यजुरुक्ता । हे इन्द्र त्वमोजसा बलेन सह उत्तिष्ठन्नुत्सङ्गाडुद्गच्छन् शिप्रे हनू नासिके वा अवेपयः टुवेपृ कम्पने कम्पितवानसि किं कृत्वा सोमं पीत्वी पीत्वा स्नात्व्यादयश्चेति [पा° ७. १. ४९.] निपातः । किम्भूतं सोमं चमूसुतं (19.) चम्वामधिषवणचर्मणि सुतमभिषुतम् सोमपानं कृत्वातिहर्षवशान्नासि कम्पितवानित्यर्थः ॥ हे ग्रह त्वमुपयामगृहीतोऽसि ओजसे बलवते इन्द्राय त्वां गृह्णामि । सादयति एष ते योनिः ओजसऽइन्द्राय त्वां सादयामि ॥ भक्षणमन्त्रः । हे इन्द्र हे ओजिष्ठ ओजो बलमस्यास्तीत्योजस्वी अस्मायित्यादिना [पा° ५. २. १२१.] विनिप्रत्ययः अत्यन्तमोजस्वी ओजिष्ठः अतिशायने तमबिष्ठनाविति [पा° ५. ३. ५५.] इष्ठन्प्रत्ययः विन्मतोर्लुगिति [पा° ५. ३. ६५.] इष्ठनि परे विनिलोपः ठिलोपश्च तत्संबोधनमोजिष्ठ अतिबलयुक्त त्वं यथा देवेष्वोजिष्ठोऽसि एवं मनुष्येषु मध्येऽहमोजिष्ठोऽतिबलो भूयासम् ॥ ३९ ॥

XV. a. अदृश्रमस्य केतवो वि रश्मयो जनाँ२॥ऽअनु । भ्राजन्तोऽअग्नयो यथा
(20.) । b. उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायं । c. एष ते योनिः सूर्याय त्वा भ्राजायं । d. सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ४० ॥

तृतीयोऽतिग्राह्यमन्त्रः । सूर्यदेवत्या गायत्री प्रस्कण्वदृष्टा यजुरुक्ता । दृशेर्लुङि इरितो वेति [पा° ३. १. ५७.] च्लेरङादेशे ऋदृशोऽङि गुण इति [पा° २. ४. १६.] उत्तमैकवचने अदर्शमिति प्राप्ते शीङो रुडुत्तरविभाषा वक्तव्या छन्दसीति [पा° ७. १.

६-८.] दृशेरुत्तरस्य मिबादेशस्यामो (21.) रुडागमो धातोर्गुणाभावश्छान्दसः अदृश्रमिति रूपम् कर्मणि लङि प्रथमपुरुषबहुवचनस्थाने द्रष्टव्यमदृश्यन्तेत्यर्थे । वीत्युपसर्गोऽदृश्रमित्यनेन संबध्यते केतुरिति प्रज्ञानामसु [निघ० ३. ९.] पठितम् अस्य सूर्यस्य केतवः प्रज्ञाकेतवः सर्वपदार्थज्ञानकृतो रश्मयः किरणा जनाननु सर्वप्राणिनोऽनुगता वि अदृश्रम् विशेषेणादृश्यन्त सूर्यकराः सर्वजनानुगता व्यापका दृश्यन्तऽइत्यर्थः तत्र दृष्टान्तः भ्राजन्तो ज्वलन्तोऽग्नयो वक्रयो यथा जनानुगता दृश्यन्ते तद्वत् ॥ हे ग्रह त्वमुपयामेन गृहीतोऽसि भ्राजते दीप्यतेऽसौ भ्राजस्तस्मै सूर्याय त्वा गृह्णामि । सादयति एष तव योनिः भ्राजाय दीप्ताय सूर्याय त्वां सादयामि ॥ तृतीयातिग्राह्यभक्षणमन्त्रः । अत्यन्तं भ्राजो भ्राजिष्ठः हे भ्राजिष्ठ अतिदीप्त हे सूर्य त्वं यथा देवेषु भ्राजिष्ठोऽसि तथाहमपि मनुष्येषु भ्राजिष्ठोऽतिदीप्तिमान्भूयासम् ॥ ४० ॥ ॥ इति द्वादशाङ्कः संपूर्णः ॥ ॥

XVI. a. उद्वु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥

b. c. = ४० b. c. ॥ ४१ ॥

का० [१३. २. ११.] उद्वु त्यमिति ग्रहग्रहणमिति । गवामयनाख्यस्य संवत्सरसत्रस्य विषुवन्नामके मध्यमेऽहनि सौर्यपशूपालम्भादूर्ध्वमतिग्राह्यग्रहणं कार्यम् ॥ सौरी गायत्री देवदृष्टा पुनर्व्याख्यायते [७. ४१.] । त्यं तं प्रसिद्धं जातवेदसं जातानां प्रज्ञानां ज्ञातारं जातप्रज्ञं वा देवं देवनशीलं (22.) सूर्यं केतवः प्रज्ञाकेतवः किरणा उ आशु उद्वहन्ति उदयाचलादुद्गमयन्ति । किमर्थं विश्वाय षष्ठ्यर्थे चतुर्थी विश्वस्य दृशे दर्शनाय सर्वं जगद्द्रष्टुमित्यर्थः ॥ उपयाम एष ते व्याख्याते ॥ ४१ ॥

XVII. आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥ ४२ ॥

का० [१३. ४. १९.] हविर्धानाग्नीध्रयोरन्तरे (23.) द्रोणकलशमेनामाघ्रापयत्याजिघ्रेति । गर्गत्रिरात्रादावहीने त्रिसुत्ये गोसहस्रं दक्षिणास्ति तत्र सहस्रसंख्यापूरणी रोहिणी धेनुस्तां हविर्धानाग्नीध्रयोर्मध्यस्थां (24.) द्रोणकलशमाघ्रापयेत् ॥ गोदेवत्या महापङ्क्तिः कुसुरुबिन्दुदृष्टा अष्टार्णषट्पदा । महीति गोनाम [निघ०

२.११.] हे महि हे धेनो त्वं कलशं द्रोणकलशाख्यं पात्रमाजिघ्र आभिमुख्येन घ्राणं कुरु किं च हे धेनो इन्दवः सोमाः त्वा त्वामाविशन्तु द्रोणकलशस्थाः सोमास्त्वां प्रविशन्तु । किं च ऊर्जा विशिष्टरसेन पयोभूतेन सह पुनः अस्मान्प्रति निवर्तस्व । या त्वमेवं मया स्तुता सा त्वं नोऽस्माकं सहस्रं धुक्ष्व सहस्रसंख्यं धनं देहि यद्वा गवां सहस्रं यदस्माभिर्दत्तं तन्नोऽस्मभ्यं धुक्ष्व पुनर्देहि दुरुक्तिर्दानार्थः । किं च त्वत्प्रसादादुरुधारा बहुपयोयुक्ता पयस्वती धेनुर्मा मां पुनराविशतादागच्छत्वित्यर्थः तथा रयिः धनमपि मा मामाविशतात् ॥४२॥

इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता तेऽघ्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ॥४३॥

का° [१३.४.२०.] इडे रन्तऽइति दक्षिणेऽस्याः कर्णे यजमानो जपतीति । पूर्वोक्ताया धेनोर्दक्षिणकर्णे यजमानो जपेत् ॥ गोदेवत्या प्रस्तारपङ्क्तिः कुसुरुविन्दुदृष्टा यस्या आद्यौ पादौ द्वादशार्णौ अन्त्यावष्टार्णौ सा प्रस्तारपङ्क्तिः । इड्यते स्तूयते इति इडा मनोऽहिता तत्तुल्या । रमयतीति रन्ता । हूयते यदुग्धं यज्ञेष्विति हव्या हूयते आह्वयते सर्वैरिति वा हव्या । काम्यतऽइति काम्या मनुष्याणाꣳ क्षेतासु कामाः प्रविष्टा इति श्रुतेः । चन्दयत्याह्लादयतीति चन्द्रा । द्युत दीप्तौ द्योतयति प्रकाशयतीति ज्योता दकारस्य जः । अदितिरदीनानवखण्डिता । सरस्वती सरतीति सरः क्षीरं तद्वती सर इत्युदकनाम सर्तेरिति [निरु° १.२६.] यास्कोक्तेः उदकशब्देनात्र क्षीरमुच्यते । मही महती । विविधं श्रूयते स्तूयतऽइति विश्रुतिः । न हन्तुं योग्या अघ्या अहन्तव्या । तासां संबोधनानि हे धेनो एवम्भूते ते तव एता एतानि (25.) अतिशयगुणयुक्तानि नामानि एतैर्नामभिरभिहिता सती देवेभ्यः सुकृतं सुष्ठु करोतीति सुकृत् तं सुकृतं शोभनकर्मकारिणं मां त्वं ब्रूतात् ब्रूहि वद अयं यजमानः पुण्यकर्तेति देवेभ्यो वदेत्यर्थः ॥४३॥

XVIII. a. वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । योऽअस्माँ२ॅऽअभिदासत्यधरं गमया तमः ॥ b. डयायमगृह्णतोऽसीन्द्राय त्वा विमृधे ।
c. एष ते योनिरिन्द्राय त्वा विमृधे ॥४४॥

का° [१३.२.१७.] ग्रहं गृह्णाति वि न इन्द्र वाचस्पतिं विश्वकर्मन्निति वेति । गवामयनस्योपान्त्ये महाव्रतेऽहनि प्राजापत्यपशूपालम्भाद्ऊर्ध्वमैन्द्रग्रहग्रहणे मन्त्रत्रयम् ॥ तत्राद्यः । इन्द्रदेवत्यानुष्टुप् शासदृष्टा (26.) । हे इन्द्र नोऽस्माकं मृधः शत्रून्संग्रामान्वा विजहि विशेषेण नाशय । किं च पृतन्यतः नीचा यच्छ पृतनां संग्रामं सेनां वा इच्छन्ति ते पृतन्यन्ति पृतन्यन्तीति पृतन्यन्तस्तान् सुप आत्मनः क्यजिति [पा° ३.१.८.] पृतनाशब्दात्क्यचि प्रत्यये कव्यध्वरपृतनस्यर्चि लोप इति [पा° ७.४.३९.] टिलोपे शतृप्रत्यये च रूपम् पृतन्यतः सेनामिच्छतः शत्रून्नीचा न्यग्भूतान्यच्छ निगृह्णीष्व युद्धादुपरतान्कुर्वित्यर्थः । किं च यश्चान्योऽस्मानभिदासति दसु उपक्षये उपक्षयति तं शत्रुमधरं निकृष्टं तमो नरकं गमय प्रापय संहितायां दीर्घः ॥ हे ग्रह त्वमुपयामेन गृहीतोऽसि विशिष्टो मृत् संग्रामो यस्य तस्मै विमृधे विशिष्टसंग्रामवते इन्द्राय त्वां गृह्णामि । सादयति एष तव योनिः विमृद्धविशिष्टायेन्द्राय त्वां सादयामि ॥४४॥

XIX. a. वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥
b. उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणे ।
c. एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥४५॥

अथ द्वितीयः । विश्वकर्मदेवता त्रिष्टुप् शासदृष्टा (27.) ईदृशमिन्द्रं वाजे महाव्रतीयलक्षणान्नविषये अद्यास्मिन्दिने वयं हुवेम आह्वयाम किमर्थमूतये अवनाय रक्षणाय । किम्भूतं विश्वकर्माणं विश्वानि समस्तानि जगदुत्पत्त्यादीनि कर्माणि यस्य तम् । तथा वाचस्पतिं वाचां पालयितारं वाचोऽधिपतिं तस्मादाहुरिन्द्रो वागिति श्रुतेः । तथा मनोजुवं जूरिति जवनाम मनसो जूरिव जव इव जवो यस्य स मनोजूस्तम् । स ईदृश इन्द्रो नोऽस्माकं विश्वानि सर्वाणि हवनानि आह्वानानि अवसेऽन्नायान्नसमृद्धये रक्षणाय वा जोषत् जुषताम् अस्मदाह्वानं साधु-साधिति सेवताम् लेटोऽडाटावित्यडागमे [पा° ३.४.९४.] इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] तिप इलोपे जोषदिति रूपम् । किम्भूतः सः

विश्वशम्भूः विश्वस्य शं सुखं भवत्यस्मादिति विश्वशम्भूः साधुकर्मा शोभनकर्मकर्ता ॥ हे ग्रह उपयामगृहीतोऽसि विश्वकर्मणे सर्वकर्त्रे इन्द्राय त्वां गृह्णामि । सादयति एष ते योनिः विश्वकर्मणे इन्द्राय त्वां सादयामि ॥४५॥

XX. a. विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः
समनमन्त पूर्वीर्यमुग्रो विहव्यो यथासत् । b. c. = ४५ b. c. ॥४६॥

तृतीयो मन्त्रविकल्पः । इन्द्रविश्वकर्मदेवत्या त्रिष्टुप् शासदृष्टा । हे विश्वकर्मन्वर्धनेन वर्धमानेन वर्धयित्रा वा हविषा त्वमिन्द्रं त्रातारं जगतो रक्षकमवध्यं हन्तुमशक्यमप्रतिभटं चाकृणोः कृतवानसि । तस्मै तादृशायेन्द्राय पूर्वीर्विशः प्रजाः पूर्वे वसिष्ठाद्यो मनुष्याः समनमन्त सम्यग्नताः यथा यस्मात्यर्थे यात्प्रत्ययः यथा यतः कारणात् अयमिन्द्रः उग्र ऊर्णावद्भ्रो विहव्यो विविधेषु कार्येषु आहूयतऽइति विहव्यश्च असदभूत् तस्माद्विशस्तस्मै नता इत्यर्थः । विश्वकर्मन् त्वद्धविःसामर्थ्यादिन्द्रस्यायं प्रभाव इति भावः ॥ उपयाम एष ते इति व्याख्याते ॥४६॥

XXI. a. उपयामगृहीतोऽस्यग्नये त्वा गायत्रछन्दसे गृह्णामि । b. इन्द्राय त्वा
त्रिष्टुप्छन्दसे गृह्णामि । c. विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसे गृह्णामि ।
d. अनुष्टुभेऽभिगरः ॥४७॥

का° [१२.५.१३-१५.] अदाभ्यं गृह्णात्यासिच्य नियाभ्याः पात्रे तस्मिंस्तूष्णीं त्रीन्ऽथूनवधायाग्नये त्वा गायत्रछन्दसमिति प्रतिमन्त्रमुपयामः सर्वत्राविशेषादिति । यस्मिन्नौदुम्बरे पात्रे अंशुर्गृहीतस्तस्मिन्होतृचमससस्था नियाभ्यासंज्ञा अप आनीय तस्मिंस्तिस्रः सोमलताः प्रक्षिप्याग्नये त्वेत्यादित्रिभिर्मन्त्रैः क्रमेणादाभ्यं ग्रहं गृह्णाति मन्त्रैः सोमलताप्रक्षेपो वेति केचित् उपयामगृहीतोऽसीत्येतत्त्रिष्वपि मन्त्रेष्वादावनुषञ्जनीयं सर्वशेषत्वादाम्नानस्येति सूत्रार्थः ॥ तत्र प्रथमो मन्त्रः । अदाभ्यदेवत्यानि त्रीणि यजूंषि देवदृष्टानि । हे सोम त्वमुपयामेन ग्रहेण गृहीतोऽसि हे ग्रह गायत्री छन्दो यस्य ग्रहस्य तं गायत्रीछन्दसं त्वामग्नयेऽग्निप्रीत्यर्थं गृह्णामि ॥ द्वितीयो मन्त्रः उपयामेन गृहीतोऽसि हे ग्रह त्रिष्टुप् छन्दो यस्य तादृशं त्वामिन्द्राय गृह्णामि ॥ तृतीयो मन्त्रः उपयाम° जगती छन्दो यस्य तादृशं त्वां हे ग्रह विश्वेभ्यो दे-

वेभ्योऽर्थाय गृह्णामि । एवं सवनदेवताभ्यो वारत्रयं ग्रहणम् ॥ का° [१२.५.१७.] अनुष्टुप्सऽइत्युक्तेति । एनं मन्त्रं पठेत् ॥ अद्भ्यदेवत्यं देवदृष्टम् एवं स्वछन्दसं सोमं गृहीत्वाथ तमाह हे सोम अनुष्टुप् छन्दस्ते तवाभिगरः अभिष्टव इत्यर्थः गृ स्तुतौ यद्वाऽऊर्ध्वं सवनेभ्यस्तदानुष्टुभमिति श्रुतेः [११.५.१.७.] ॥ ४७ ॥

त्रेशीनां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि भन्दनानां त्वा पत्मन्नाधूनोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि मधुमत्तमानां (28.) त्वा पत्मन्नाधूनोमि शुक्रं त्वा शुक्रऽआधूनोम्यङ्को ट्वे सूर्यस्य रश्मिषु ॥ ४८ ॥

का° [१२.५.१७.] धूनोत्यद्भिर्त्रेशीनां त्वेति गार्हपत्याहवनीयमिति । आहवनीयसमीपं गार्हपत्यमद्भिरदाभ्यग्रहस्थानि जलानि चालयेत् ॥ एतदादीनि विश्वेषां देवानामित्यन्तानि [५०.] सोमदेवत्यानि देवदृष्टानि । हे सोम त्रेशीनाम् त्रसतो मेघस्योदरे शेरते ता त्रेश्यो मेघोदरस्था आपस्तासां पत्मन्पतने निमित्ते वृष्टिनिष्पत्त्यर्थं त्वा त्वामाधूनोमि कम्पयामि । कुकूननानाम् कुङ् शब्दे अत्यर्थं कुवन्त्यः शब्दं कुर्वाणा नमन्ति प्रह्वीभवन्तीति कुकूनना मेघस्था आपस्तासां पतने त्वां कम्पयामि । भन्दनानाम् भदि कल्याणे सुखे च भन्दन्तीति भन्दनाः कल्याणकारिण्यः सुखयित्र्यो वा मेघा आपः अन्यत्पूर्ववत् । मदिन्तमानाम् मादयन्तीति मदिन्यः अत्यर्थं मदिन्यो मदिन्तमाः तमपि पुंवद्भावः नलोपः प्रातिपदिकान्तस्येति [पा° ८.२.७.] नलोपः नाद्घस्येति [पा° ८.२.१७.] छान्दसो नुडागमः अत्यन्तं तर्पयन्त्यो (29.) मेघा आपः । मधुमत्तमानाम् अत्यन्तं मधुस्वादोपेता मधुमत्तमाः एवंविधानामपां पतने त्वां धूनोमि । किं च शुक्रं शुद्धमक्लिष्टकर्माणं त्वां शुक्रे शुद्धे अक्लिष्टकर्मणि निग्राम्यालक्षणे जले त्वामाधूनोमि । किं च अङ्को दिवसस्य ट्वे सूर्यस्य रश्मिषु हे सोम त्वामाधूनोमि ॥ ४८ ॥

a. कुकुभ ट्वे वृषभस्य रोचते बृहद्भुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः । यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि ॥ b. तस्मै ते सोम सोमाय स्वाहा ॥ ४९ ॥

हे सोम वृषभस्य श्रेष्ठस्य तव ककुभं महत् आदित्यलक्षणं रूपं रोचते दीप्यते ककुभमिति नक्षत्रनामसु (30.) पठितम् बृहत् महान् (31.) शुक्रः शुद्ध आदित्यः शुक्रस्य शुद्धस्य सोमस्य तव पुरोगाः पुरोगामी । सोम एव सोमस्य पुरोगाः पुरोगामी भवितुमर्हति । हे सोम ते त्वदीयमदाभ्यमनुपहिंसितं जागृवि जागरणशीलं यन्नामास्ति तस्मै नाम्ने त्वां गृह्णामि ॥ का° [१२.५.१७.] तस्मै तऽइति जुहोतीति । अदाभ्यं जुहोति ॥ सौम्यम् हे सोम तस्मै तादृशाय ते तुभ्यं स्वाहा सुहुतमस्तु तत्सोममेवैतत्सोमाय जुहोतीति श्रुतेः [११.५.६.११.] ॥४१॥

a. उशिक्कं देव सोमाग्नेः प्रियं पाथोऽपीहि ।

b. वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीहि ।

c. अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ॥५०॥

का° [१२.५.१८.] अथ शून्सोमे निदधात्युशिक्कमिति प्रतिमल्लमिति । मल्लत्रयेणोलूखलस्थानंशून्सोमे क्षिपेत् ॥ तत्राद्यः हे देव दीप्यमान हे सोम उशिक्कामयमानस्त्वमग्नेः प्रियं पाथोऽन्नमपीहि अपिगच्छ ॥ द्वितीयः हे देव सोम वशी कान्तस्त्वमिन्द्रस्य प्रियमन्नं प्राप्नुहि ॥ अथ तृतीयो मल्लः हे देव सोम अस्मत्सखा अस्माकं मित्रभूतस्त्वं विश्वेषां देवानां प्रियमभिरुचितमन्नं प्राप्नुहि अग्निर्वै प्रातःसवनमिन्द्रो माध्यन्दिनꣳ सवनं विश्वे देवास्तृतीयꣳ सवनमिति श्रुतेः सवनदेवेभ्योऽर्पणम् ॥५०॥

XXII. a. इह रतिरिह रमधमिह धृतिरिह स्वधृतिः स्वाहा ।

b. उपसृजन्धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत्स्वाहा ॥५१॥

अथ सत्रोत्थानमन्त्रा देवदृष्टाः ॥ ॥ का° [१२.४.१०.] शालाद्वार्येऽन्वारब्धेषिह रतिरिति जुहोतीति । सर्वेषु दीक्षितेषधर्युस्पृष्टेषिदानींतनगार्हपत्ये घृतं जुहुयात् ॥ पशुदेवतं यजुः हे गावो युष्मदीया रतिः रमणमिह यजमानेषस्तु इहैव यूयं रमध्वं युष्माकमिह यजमानेषु धृतिः संतोषोऽस्तु स्वधृतिः स्वकीयानामपि धृ-

तिरिक्तेवास्तु स्वाहा सुकृतमस्तु ॥ का° [१२.४.११.] अपरामुपसृजन्निति । शालाद्वार्ये एव द्वितीयाकृतिः ॥ उष्णिक् आद्यावष्टाक्षरौ तृतीयो द्वादशार्णः सोष्णिक् । धारयतीति धरुणोऽग्निरस्मासु रायस्पोषं रायो धनस्य पशुपुत्रसुवर्णादेः पुष्टिं दीधरत् धारयतु धारयतेर्लुङि ट्रूपमडभाव आर्षः । किम्भूतो धरुणः मात्रे धरुणं षष्ठ्यर्थे चतुर्थी मातुः पृथिव्या धारयितारमग्निमुपसृजन्समीपं प्रापयन् तथा मातरं पृथिवीं धयन् पिबन् तत्रोत्पन्नं हविर्भक्षयन्नित्यर्थः । स्वाहेति होमार्थः ॥५१॥

सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृता अभूम ।
दिवं पृथिव्या अध्यारुहामाविदाम देवाँत्स्वर्ज्योतिः ॥५२॥

का° [१२.४.१२.] सत्रस्यऽर्द्धिं गायन्ति सत्रस्य ऋद्धिरिति । सर्वे दीक्षिता उत्तरहविर्धानापरकूवरीमालम्ब्य सत्रर्धिसंज्ञकं साम गायन्ति ॥ बृहती यजमानानामात्मस्तुतिः (32.) सप्तैकादशनवार्णपादा । हे साम सत्रस्य ऋद्धिः समृद्धिस्त्वमसि अतो वयं यजमाना ज्योतिरादित्यलक्षणमगन्म प्राप्ताः ततः अमृता अमरणधर्मा अभूम भूताः पृथिव्याः सकाशाद्दिवं द्युलोकमध्यारुहाम अध्यारूढाः द्युलोकारूढाः ततो देवानिन्द्रादीनविदाम जानीमः पश्याम इत्यर्थः वेत्तेर्व्यत्ययेन तुदादित्वे लङि ट्रूपम् ज्योतिर्ज्योतीरूपं स्वः स्वर्गं चाविदाम ॥५२॥

a. युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं-तमिद्धतं वज्रेण तं-तमिद्धतम् । दूरे चत्ताय छत्सदछनं यदिनक्षत् । अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ b. भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः ॥५३॥

का° [१२.४.१४.] युवं तमिति दक्षिणास्याधोऽक्षं प्राञ्चो निःक्रामन्तीति । सर्वे यजमाना दक्षिणाहविर्धानाद्वाधोमार्गेण प्राङ्मुखाः निःसरन्ति ॥ इन्द्रदेवत्यात्यष्टिरवसानत्रयोपेता षट्षष्यक्षरत्वात् द्यूना आद्योऽर्धर्च इन्द्रपर्वतदेवत्यः । हे पुरोयुधा पुरोयुधौ पुरोऽग्रे युध्येते तौ पुरोयुधौ इगुपधेति [पा° ३.१.१३५.] कप्रत्ययः शत्रूणां पुरतो युद्धस्य कर्तारौ हे इन्द्रापर्वता हे इन्द्रपर्वतौ युवं युवां तं शत्रु-

मपकृतं विनाशयतम् आदरे वीप्सा तं-तम् इदेवार्थे तं-तमेव शत्रुमपकृतं तत्तत्समानमेव सर्वमपि शत्रुं विनाशयतम् तत्रापि विशेष्यते वज्रेण वज्राख्येनायुधेन तं-तमित् तं-तमेव शत्रुं विनाशयतम् । तदो वीप्साश्रवणाच्चदोऽपि वीप्सा यो यः शत्रुर्नोऽस्मान्यूतन्यात् पृतनां सेनां कुर्यात् योधयेदित्यर्थः ॥ इदानीमिन्द्रः प्रत्यक्षो वज्रस्य कर्तृत्वं चोच्यते हे शूर इन्द्र त्वदीयो वज्रो यद्यदा गहनमत्यन्तगम्भीरं वनं जलं वा प्रति दूरे चत्ताय चततिर्गतिकर्मा वनेऽतिदूरगताय शत्रवे हृत्सत् हृन्दतिः कामनार्थः शत्रुं प्राप्तुं कामयते तदा तमपि दूरगतमिनक्षत् प्राप्नुयात् इनक्षतिर्व्याप्तिकर्मा वने दूरगतमपि इहन्गृह्णात्येवेत्यर्थः । ततो दर्मा दारयतीति दर्मा द विदारे अन्येभ्योऽपि दृश्यन्तऽइति [पा° ३.२.७५.] मनिप्रत्ययः विदारणशीलो वज्रः अस्माकमस्मदीयान्विश्वतः सर्वतः स्थितान्विश्वतः सर्वान् शत्रून्परि दर्षीष्ट परितो विदारयतु दीर्यतेराशीर्लिङि तडि रूपम् ॥ का° [१२.४.२८.] पृथक्कामेषु भूर्भुव इति । नानाकामेषु यजमानेषु सर्वे वाग्विसर्जनं कुर्युः ॥ हे भूर्भुवः स्वः अग्निवायुसूर्याः वयं प्रजाभिः सुप्रजाः स्याम वीरैः पुत्रैः सुवीराः स्याम पोषैः पुष्टिभिः सुपोषाः स्याम भवेम । एकवचनान्तोऽयं व्याख्यातः [३.३७.७.२१.] अत्र तु बहुवचनान्तो मन्त्रः ॥५३॥ सत्रोत्थानं समाप्तम् ॥ ॥

XXIII. a. परमेष्ठ्यभिधीतः । b. प्रजापतिर्वाचि व्याकृतायाम् । c. अन्धो ऽअहेतः । d. सविता सन्याम् । e. विश्वकर्मा दीक्षायाम् । f. पूषा सोमक्रयणयाम् ॥५४॥

का° [२५.६.१-६.] परमेष्ठ्यादींश्चतुस्त्रिंशतं जुहोति घर्मदुग्घाले चादोहे चोदीच्या दोहस्थानेऽन्यस्याः शालाया वा पुरस्तात्प्राच्याः पुरुकाण्डाद्दक्षिणेऽस्थनि कृत्वा दोहयेत्पृषदाज्यस्कन्दने चैकऽइति । मृन्मयघर्मपात्रभेदे भिन्नमभिमृश्य परमेष्ठिने स्वाहा प्रजापतये स्वाहेत्यादीन्सालिलाय स्वाहेत्यन्तांश्चतुस्त्रिंशदाहोमान् जुहोति घर्मदुहो गोमरणे तत्स्थानि उदक्शुल्याः स्थितायाः पत्नीशालापूर्वभागे प्राक्शुल्या वा पुरुषाद्दक्षिणेऽस्थनि (33.) परमेष्ठिने स्वाहेति चतुस्त्रिंशतमाज्याहुतीर्हुत्वा तां दोहयेत् स्यालीस्थस्य सुक्स्थस्य वा पृषदाज्यस्य वा भ्रंशे एके आचार्याः

परमेष्ठादीन्जुहोतीति सूत्रार्थः ॥ परमेष्ठादयो देवा यज्ञस्य शरीराणि तस्मात्तत्तद्-वस्थायां होमे यज्ञश्चिकित्सितः प्रतिसंहितो भवति । तथा च श्रुतिः [१२.५.१.१.२.] सोमो वै राज्ञा यज्ञः प्रजापतिस्तस्यैतास्तन्वो या एता देवता या एता आकृतीर्जुहोति स यद्यज्ञस्यार्ध्यां तत्प्रति देवतां मन्येत तामनुसमीक्ष्य जुहुयाद्यदि दीक्षोपसत्स्वाहवनीये यदि प्रसुतऽआग्नीध्रे विवाऽएतद्यज्ञस्य पर्व स्रंसते यद्वलति सा वैव तर्हि तत्र देवता भवति तयैवैतद्देवतया यज्ञं भिषज्यति तया देवतया यज्ञं प्रतिसंदधातीति ॥ अथ मन्त्रार्थः । आध्यायाद्वसिष्ठ ऋषिः । यदा सोमो यजमानेनाभिधीतः संकल्पितो (34.) भवति मनसाभिध्यातस्तदा परमेष्ठी भवति । अयमर्थः मनसा ध्यातः सोमो यदि नोपनमेत् तदा परमेष्ठिने स्वाहेति जुहुयादिति तथा च श्रुतिः [१२.५.१.३.] स यद्येनं मनसाभिध्यातो यज्ञो नोपनमेत्परमेष्ठिने स्वाहेति जुहुयात्परमेष्ठी हि स तर्हि भवत्यप पाप्मानꣳ हतऽएनं यज्ञो नमतीति ॥ वाचि व्याकृतायां सोमेन यक्ष्ये इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति तदा प्रायश्चित्तापत्तौ प्रजापतये स्वाहेति जुहुयादित्यर्थः ॥ यदा सोमः अह्नाभिमुख्येन इतः प्राप्तस्तदा अन्धो भवति । सोमं प्रति गतौ किंचिन्निमित्तं चेत्तदा अन्धसे स्वाहेति जुहुयात् ॥ सन्यां सोमस्य संभक्तौ सत्यां सोमः सवितृनामको भवति तदा प्रायश्चित्तापत्तौ सवित्रे स्वाहेति जुहुयात् अथ यदि सातः (35.) किंचिदापद्येत सवित्रे स्वाहेति जुहुयादिति श्रुतेः [१२.५.१.६.] ॥ दीक्षायां सत्यां सोमो विश्वकर्मेत्युच्यते तदा विश्वकर्मणे स्वाहेति जुहुयात् ॥ सोमः क्रीयतेऽनया सा सोमक्रयणी गौस्तस्यामानीतायां सत्यां सोमः पूषा भवति । तदा निमित्ते पूष्ण स्वाहेति जुहुयात् ॥५४॥

a. इन्द्रश्च मरुतश्च क्रायायोपोत्थितः । b. असुरः पण्यमानः ।
c. मित्रः क्रीतः । d. विष्णुः शिपिविष्टऽऊरावासन्नः ।
e. विष्णुर्नरन्धिषः प्रोक्ष्यमाणः (36.) ॥५५॥

क्रयाय द्रव्यदानेनात्मसात्करणायोपोत्थितः उपस्थापितः सोम इन्द्रो मरुन्नामकश्च भवति तदा इन्द्राय मरुद्भ्यश्च स्वाहेति जु° ॥ क्रीयमाणः सोमोऽसुरो भ-

वति असुराय स्वाहेति तदा जुं ॥ यजमानेन क्रीतः सोमो मित्रो भवति तदा मित्राय स्वाहेति जुं ॥ ऊरौ यजमानोत्सङ्गे आसन्नः स्थितः सोमः शिपिविष्टो विष्णुर्भवति शिपिषु प्राणिषु यज्ञेषु वा विष्टः प्रविष्ट एतद्गुणको विष्णुरित्यर्थः तदा प्रायश्चित्तापत्तौ विष्णवे शिपिविष्टाय स्वाहेति जुं ॥ प्रोक्ष्यमाणः शकटेनोक्ष्यमानः सोमो विष्णुर्नरन्धिषो भवति नरो धीयन्ते आरोप्यन्ते यस्मिन्स नरन्धिः संसारः तं स्यति नाशयति नरन्धिषः जगत्संहर्तृविशिष्टो विष्णुः यद्वा रध हिंसायाम् रध्यति हिनस्ति रन्धिषः कृत्वा न रन्धिषो नरन्धिषः जगत्पालको वा विष्णुः । तदा विष्णवे (37.) नरन्धिषाय स्वाहेति जुहुयात् ॥५५॥

a. सोम आगतः । b. वरुण आसन्न्यामासन्नः । c. अग्निराग्नीध्रे ।
d. इन्द्रो हविर्धाने । e. अथर्वोपावक्रियमाणः ॥५६॥

शकटादागतोऽवटुटः सोमनामको भवति तदा सोमाय स्वाहेति जुहुयात् ॥ आसन्न्यां मञ्चिकायामुपविष्टः सोमो वरुणो भवति तदा वरुणाय स्वाहेति जुं ॥ आग्नीध्रे वर्तमानः सोमोऽग्निर्भवति तदाग्नये स्वाहेति जुं ॥ हविर्धाने वर्तमानः सोम इन्द्रो भवति तदिन्द्राय स्वाहेति जुं ॥ हृदे वा मनसे वेति मन्त्रेण [३७. १९.] कण्डनार्थमुपावक्रियमाणः आनीयमानः सोमोऽथर्वनामको भवति तदाथर्वणे स्वाहेति जुं ॥५६॥

a. विश्वे देवा अꣳशुषु न्युप्तः । b. विष्णुराप्रीतपा आप्याय्यमानः ।
c. यमः सूयमानः । d. विष्णुः सम्भ्रियमाणः । e. वायुः पूयमानः ।
f. शुक्रः पूतः । g. शुक्रः ग्रहीः । h. मन्थी शंतुग्र्यीः ॥५७॥

अꣳशुषु सोमखण्डेषु न्युप्तः कण्डनं कृत्वारोपितः सोमो विश्वेदेवनामको भवति तदा विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयात् ॥ अꣳशुरꣳशुष्टऽइत्यादिमन्त्रेण [५.७.] आप्याय्यमानः वर्ध्यमानः सोम आप्रीतपा विष्णुर्भवति आ समन्तात्प्रीतान्स्वस्मिन्प्रीतिमतो भक्तान्याति रक्षतीत्याप्रीतपाः तद्गुणविशिष्टः तदा विष्णवऽआप्रीतपाय स्वाहेति जुं ॥ अभिषूयमाणः सोमो यमो भवति तदा यमाय स्वा॰ ॥ सम्य-

ग्रियमाणः पुष्यमाणः सोमो विष्णुर्भवति तदा विष्णवे स्वा° ॥ दशापवित्रेण पूयमानः सोमो वायुर्भवति तदा वायवे स्वा° ॥ पूतः सोमः शुक्रो भवति तदा शुक्राय स्वा° ॥ क्षीरेण दुग्धेन श्रीयते मिश्रीक्रियतऽइति क्षीरश्रीः तदा शुक्र एव सोमो भवति तदापि शुक्राय स्वा° ॥ सक्तुभिर्मिश्रितः सोमो मन्थी भवति तदा मन्थिने स्वा° ॥५७॥

a. विश्वे देवाश्चमसेषून्नीतः । b. असुर्क्षोमायोद्यतः । c. रुद्रो क्रूयमानः । d. वातोऽभ्यावृत्तः । e. नृचक्षाः प्रतिख्यातः । f. भक्षो भक्ष्यमाणः । g. पितरो नाराशंसाः सन्नः (38.) ॥५८॥

चमसेषु ग्रहपात्रेषून्नीतो गृहीतः सोमो विश्वदेवसंज्ञो भवति तदा विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयात् ॥ क्षोमार्थमुद्यतः सोमोऽसुसंज्ञो भवति तदा असवे स्वा° ॥ क्रूयमानः सोमो रुद्रो भवति तदा रुद्राय स्वा° ॥ अभ्यावृत्तः क्षोमशेषीभूतः सदः प्रति भक्षणार्थमानीतः सोमो वातो भवति तदा वाताय स्वा° ॥ प्रतिख्यातः ब्रह्मन्नुपक्रियस्वेत्यादिना भक्षणार्थं (39.) पृष्टः सोमो नृचक्षा भवति नृन्मनुष्यान् चष्टे शुभाशुभकारिणः पश्यतीति नृचक्षाः तदा नृचक्षसे स्वा° ॥ भक्ष्यमाणः पीयमानः सोमो भक्षो भवति तदा भक्षाय स्वा° ॥ भक्षयित्वा सन्नः स्वखरेषु सादितः सोमो नाराशंसाः पितरो भवन्ति नरा अस्मिन्नासीना शंसन्तीति नराशंसो यज्ञस्तत्र हिता योग्या वा नाराशंसा नाराशंसगुणविशिष्टाः पितरः तदा निमित्तापत्तौ पितृभ्यो नाराशंसेभ्यः स्वा° ॥५८॥

a. सिन्धुरवभृथायोद्यतः । b. समुद्रोऽभ्यवक्रियमाणः ।

c. सलिलः प्रप्लुतः ।

d. ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वरिमा शविष्ठा ।
या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहूतौ ॥५९॥

अवभृथार्थमुद्यतः सोमः सिन्धुर्भवति तदा सिन्धवे स्वाहेति जुहुयात् ॥ जलमभिमुखं नीयमानः सोमः समुद्रो भवति तदा समुद्राय स्वा° ॥ प्रप्लुतोऽप्सु नि-

मग्रः सोमः सलिलो भवति तदा प्रायश्चित्तापत्तौ सलिलाय स्वा° ॥ एताभिर्यज्ञाकृतिभिर्यज्ञः चिकित्सितः प्रतिसंस्कृतश्च भवतीत्यर्थः । तथा च श्रुतिः [१२.५.१.३७.] ता वाऽएताश्चतुस्त्रिंशतमाज्याकृतीर्जुहोति त्रयस्त्रिंशद्वै देवाः प्रजापतिश्चतुस्त्रिंश एतद् सर्वैर्देवैर्यज्ञं भिषज्यति सर्वैर्देवैर्यज्ञं प्रतिसंदधातीति ॥ ॥ का° [२५.२.१.] ययोरोजसेति चोदकेनोपसिञ्चेदिति । अभिमर्शनेन विकल्पः स्कन्नं रसन्नपं सोमं जलेन सिञ्चेत् कालाकृतिहोमं वाचनं च कृत्वेति ज्ञेयम् ॥ विष्णुवरुणदेवत्या त्रिष्टुप् । पूर्वार्धे यद्यद्दोपादानात्तद्यद्याहारः तौ विष्णू तौ वरुणा वरुणौ । एकत्र विष्णुशब्दस्यैकशेषोऽन्यत्र वरुणशब्दस्य । तुल्यकार्यत्वाद्उभावपि विष्णू उभावपि वरुणौ कर्मभूतौ प्रति अगन् गतं स्कन्नं यज्ञसाधनमिति शेषः । कदा पूर्वहूतौ पूर्वस्मिन्नाह्वाने यावत्प्रधानं हूयते तावदेव विष्णुं वरुणं च प्रति स्कन्नं हविर्गतमित्यर्थः । विशेषणं वा पूर्वं हूयेते तौ पूर्वहूतौ विष्णुवरुणौ प्रति हविरगन्निति संबन्धः । तौ कौ ययोर्विष्णुवरुणयोरोजसा बलेन रजांसि लोकाः स्कभिता स्तम्भितानि लोका रजांस्युच्यन्तऽइति यास्कः [निरु° ४.१९.] स्कभ्नोतिः स्तम्भनार्थः । किं च या यौ विष्णुवरुणौ पत्येते ईशाते ऐश्वर्यं कुर्वाते जगतामीश्वरावित्यर्थः पत ऐश्वर्ये दिवादिरात्मनेपदी यद्वा पत्येते परसैन्येषु श्येनाविव पततः । किम्भूतौ वीर्येभिर्वीर्यैर्बलैर्वीरितमा अत्यन्तं वीरौ । तथा शविष्ठा शव इति बलनाम [निघ° २.९.] अत्यन्तं बलवन्तौ अतिशवस्विनौ शविष्ठौ विन्मतोर्लुगिति [पा° ५.३.६५.] विनिलोपे इष्ठनि ठिलोपे शविष्ठाविति रूपम् । तथा सहोभिर्बलैरप्रतीता अप्रतिगतौ न केनापि संमुखं गन्तुं शक्यौ अनन्ययोध्याविन्त्यर्थः न प्रतीयेते तावप्रतीतौ । एवंविधौ विष्णुवरुणौ प्रति स्कन्नं हविर्गतमित्यर्थः ॥५१॥

देवान्दिवंमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रं° पितॄंपृथिवीमगन्यज्ञं °मष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥६०॥

का° [२५.२.८.] देवान्दिवमिति सोमे । सोमे स्कन्ने देवान्दिवमित्यभिमर्श-

नम् ॥ अत्यष्टिर्यज्ञदेवत्या यजमानाशीः । अयं यज्ञो देवान्वायवादीन्प्राप्य दिवं द्युलोकमगन् अगच्छत् ततो द्युलोकस्थाद्यज्ञात् द्रविणं विशिष्टभोगसाधनरूपं धनं यज्ञफलभूतं मा मामद्य व्याप्नोतु अश्नोतेः पदविकरणयोर्व्यत्ययः । अनेन सुकृतिनामारोहक्रममभिधायेदानीमवरोहक्रममाह ततो द्युलोकादवरोहणकाले यज्ञो मनुष्यान्मनुष्यलोकमागच्छन् अन्तरिक्षलोकमगन् गतः तत्र स्थिताद्यज्ञाद्द्रविणं यज्ञफलं मामद्य व्याप्नोतु । दक्षिणायने गमनागमनमाह अयं यज्ञो धूमादिमार्गेण पितॄन्प्राप्य पृथिवीं भूलोकमगन् तत्र स्थिताद्यज्ञाद्द्रविणं मामद्य व्याप्नोतु । किं बहुना यं कं च यं कमपि लोकं यज्ञोऽगन्गतस्तस्माद्यज्ञात् मे मम भद्रं कल्याणमभूद्भूयादिति यजमानेनाशास्यते ॥ ६० ॥

चतुस्त्रिꣳशत्तन्तवो ये वितन्निरे यज्ञमिमं यज्ञꣳ स्वधया ददन्ति ।
तेषाꣳ छिन्नꣳ सम्वेतद्दधामि स्वाहा घर्मोऽअप्येतु देवान् ॥ ६१ ॥

घर्मदेवत्या पङ्क्तिस्त्रिष्टुबन्ता द्वाचत्वारिंशदक्षरत्वात् । कात्यायनेनास्या विनियोगो नोक्तः । महावीरभेदे घृतहोमः शाखान्तरे । तन्वन्ति प्रायश्चित्तशमनेन यज्ञं विस्तारयन्तीति तन्तवो देवाश्चतुस्त्रिंशत्संख्याका ये परमेष्ठ्यादय इमं यज्ञं वितन्निरे वितेनिरे वितन्वन्ति तनोतेर्लिटि तङि प्रथमबहुवचने लिटि धातोरनभ्यासस्येति [पा° ६.१.८.] द्वित्वे तनिपत्योश्छन्दसीत्युपधालोपे [पा° ६.४.११.] तन्निरे इति रूपम् ये चेमं यज्ञं स्वधयान्नेन ददन्ति धारयन्ति दद दानधारणयोः तेषां यज्ञं वितन्वतां देवानां यत् छिन्नं तदेतत् अहं संदधामि डकारः पादपूरणः स्वाहा सुकृतमस्तु अनेन घृतहोमेन महावीरः संहितो भवत्वित्यर्थः । घर्मो महावीरः संहितः सन्देवानप्येतु देवान्प्रति गच्छतु ॥ ६१ ॥

यज्ञस्य दोहो विततः पुरुत्रा सोऽअष्टधा दिवमन्वाततान ।
स यज्ञ धुक्ष्व महि मे प्रजायाꣳ रायस्पोषं विश्वमायुरशीय स्वाहा ॥ ६२ ॥

का° [२५.६.७.] सोमेऽप्येवमेवैकैकां यथाकालꣳ कृत्वा यज्ञस्य दोह इति वाचयतीति । सोमयागे यज्ञाङ्गविनाशे परमेष्ठ्यादिचतुस्त्रिंशदाकृतीनां मध्ये यथाकालमथ यदि पशुमान इत्यादिश्रुत्युक्ते [१२.५.१.१०.] काले एकैकामाकृतिं कृ-

वा यजमानं वाचयेत् ॥ यज्ञदेवत्या त्रिष्टुप् पूर्वार्धः परोऽक्षो द्वितीयः प्रत्यक्षोऽतो यङ्ब्दाध्याहरि सा योजना । हे यज्ञ स त्वं मे मम प्रजायां संततौ महि महिमानं धुक्ष्व क्षर देहीत्यर्थः यद्वा महि महान्तं पूर्वोक्तं दोहं धुक्ष्व अहं च त्वत्प्रसादाद्रायो धनस्य पोषं पुष्टिं विश्वं सर्वमायुश्चाशीय व्याप्नुयाम् । स कः यस्य यज्ञस्य यजनीयस्य तव दोह आकृतिपरिणामः स प्रसिद्धो यज्ञफलरूपः पुरुत्रा बहुधा विततः प्रसृतः सन्दिग्भेदिनाष्टधा भिद्यमानो द्युलोकमन्वाततान व्याप भूमिमन्तरिक्षं च व्याप्य स्वर्गं व्यापेत्यर्थः । ब्रह्मादिस्तम्बपर्यन्तो भूतग्रामो यज्ञपरिणाम इति भावः ॥ ६२ ॥

आपवस्व हिरण्यवद्अश्ववत्सोम वीरवत् । वाजं गोमन्तमाभर स्वाहा ॥ ६३ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामष्टमोऽध्यायः ॥ ८ ॥

का° [२५. ६. १.] आपवस्व हिरण्यवदित्युद्गातृहोमो धाङ्कारोहणो यूपस्येति । पशौ सोमे च यूपस्य काकारोहणो उद्गात्रा होमः कार्यः ॥ सोमदेवत्या गायत्री कश्यपदृष्टा । हे सोम त्वमापवस्व आगच्छ तत्र क्रियाविशेषणानि कथं हिरण्यवत् कनकयुक्तमश्ववदश्वयुक्तं वीरवद्वीरयुक्तं यथा तथा पाहीत्यर्थः स्वर्णाश्ववीरान्मह्यं देहीत्यर्थः किं च हे सोम गोमन्तं धेनुयुक्तं वाजमन्नमाभर आहर अन्नं धेनूंश्च देहीत्यर्थः स्वाहा सुहुतमस्तु हव्यहोर्भश्छन्दसीति [पा° ८. २. ३२. वा° १.] भकारः ॥ ६३ ॥ प्रायश्चित्तानि समाप्तानि ॥ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे यज्ञयज्ञनिमित्तान्तोऽष्टमोऽध्यायः समीरितः (40.) ॥ ८ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १. २ ॥ १ ॥ ३ [- तुर्यादित्य - आतस्था अमृतं -] ॥ २ ॥ ४ [मृलयन्तः] ५ a [विवस्वां आदि°] ॥ ३ ॥

II. ॥ ५ b ॥ १ । ४ ॥ III. ॥ ६ ॥ १ ॥ ५ ॥

IV. ॥ ७ [चनोधा तो मयि] - भगाय सवित्रे त्वा ॥ १ ॥ ६ ॥ V. ॥ ८ ॥ १ ॥ ७ ॥

VI. ॥ १ a [इन्द्र इन्द्रि°] ॥१॥ १ b [पितासे] ॥२॥ १० a [अग्ने वाक्पत्नि सनू°] ॥३॥ १० b ॥४॥११॥

VII. ॥ ११ ॥१॥ १२ [यस्ते देव सोमाश्व° - °क्यस्योपहूत उपहूतस्य भक्ष°] ॥२॥१३॥

VIII. ॥ ३४ [षोलशि°] ॥१॥१४॥ IX. ॥ ३३ [षोलशि°] ॥१॥१५॥

X. ॥ ३५ [षोलशि°] ॥१॥१६॥ XI. ॥ ३६ [षोलशी] ॥१॥३७॥२॥१८॥

XII. ॥ अग्नऽआयूंषि पवसऽआसुवोर्जमिषं च नः । आरे बाधस्व दुछुनाम् [१९.३८.] ॥ उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥ अग्ने वर्चस्वन्वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासम् ॥१॥१९॥

XIII. ॥ ३८ [वर्चस्वन्वर्च°] ॥१॥२०॥

XIV. ॥ ३९ a. b. c । इन्द्रौजस्वन्नोजस्वाँस्त्वं देवेष्वोजस्वानहं मनुष्येषु भूयासम् ॥१॥२१॥

XV. ॥ ४० a. b. c [त्वा भ्राजे] । सूर्य भ्राजस्वन्भ्राजस्वाँस्त्वं देवेष्वसि भ्राजस्वानहं मनुष्येषु भूयासम् ॥१॥२२॥

XVI. ॥ ४१ a. b. c [त्वा भ्राजे] । सूर्य भ्राजस्वन्भ्रा° - - °यासम् ॥१॥२३॥

XVII. ॥ ७. ४२ - तस्युषश्च । ८. ४० b. c [त्वा भ्राजे] । सूर्य भ्राजस्वन्भ्रा° - - °यासम् ॥१॥२४॥

XVIII. ॥ ४४ ॥१॥२५॥ XIX. ॥ ४५ ॥१॥२६॥

XX. ॥ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् । मुह्यन्त्वन्येऽभितः सपत्ना इहास्माकं मघवा सूरिरस्तु [१७.२२.] ॥ ८. ४५ b. c ॥१॥२७॥

XXI. ॥ ४६ [°णोरयुध्यम्] ॥१॥२८॥

XXII. ॥ ४७ ॥१॥ ४८ [भन्दनानां वा पत्मन्नाधूनोमि मधंत्तमानां वा प°] ॥२॥ ४९ [ककुद्भ रूपं - बृहन्सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पु°] ॥३॥ ५० ॥४॥३२॥ ॥ द्वाविंशत्यरनुवाकेषु द्वात्रिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठेऽष्टमोऽध्यायः ॥ ॥

I. ॥ ७. २७ a-d ॥१॥ e-g ॥२॥ २८ ॥३॥ २९ a ॥४॥ २९ b [प्रजया भूयासꣳ सुवी°] ॥५॥

II. ॥ ७. ४१ - सूर्यम् ॥१॥ ४२ - °स्युषश्च ॥२॥ ४३ - विधेम ॥३॥ ४४ - ज्ञर्ह्षाणः ॥४॥ ४५ a. b ॥५॥ ४५ c. d. ४६ a [विदेय] ॥६॥ ४६ b [गंह्ष - °विंश] । ४७ a - °त्वंमश्यात् ॥७॥ ४७ a आयुर्दा° - क्षीत्रे । b [°त्वंमश्यात्प्रा° मयो म°]. c [°त्वंमश्यात्व° मयो म°]. d [°त्वंमश्याद्वयो दा° मयो म°] ॥८॥ ४८ तवं काम सुता भुंनज्ञामह्षे ॥१॥१४॥

III. ॥ ८. १५ - °थानाम् ॥१॥ १६ ॥२॥ १७ [सꣳरराणो य°] - दधातु ॥३॥ १८ - वसूनि ॥४॥ १९ - °ष्टतानु ॥५॥ २० - विद्वान् ॥६॥ २१ [गातुमित्वा] ॥७॥ २२ ॥८॥२२॥

IV. ॥ २३ ॥१॥ २४ ॥२॥ २५ ॥३॥ २६ - लोकः परि च वक्षि शं च वक्षि । २७ ॥४॥२६॥

V. ॥ २८ ॥१॥ २९ [यस्यास्ति - यस्या यो°] ॥२॥ ३० ॥३॥ ३१ ॥४॥ ३२ ॥५॥३१॥

VI. ॥ ४२ ॥१॥ ४३ क्व्ये काम्यऽइले रत्ते चन्द्रे - अग्नेये नामानि देवेषु मा -] ॥२॥ ५१ ॥३॥ ५२ अगन्म - ज्योतिः ॥४॥ ५३ a ॥५॥ ५३ b - प्रजया भूयासꣳ सुवीरो वीरैः सुपोषः पोषैः ॥६॥३७॥

VII. ॥ ५४ ॥१॥ ५५ a-c ॥२॥ ५५ d [ऊराऽआसन्नः]. e. ५६ a. b ॥३॥ ५६ c. d. e. ५७ a - °शुषु न्युप्यमानेषु ॥४॥ ५७ b-f ॥५॥ ५७ g. h. ५८ a. b ॥६॥ ५८ c. d. e. । भद्धः पीतः पितरो नाराशꣳसाः साद्यमानः । ५९ a. b. c ॥७॥ ५९ d ॥८॥ ६० ॥९॥४६॥ ॥ सप्तानुवाकेषु षट्चत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे नवमोऽध्यायः ॥ ॥

I. देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा ॥१॥

चतुर्थाध्यायमारभ्याष्टमान्तमध्यायपञ्चके अग्निष्टोममन्त्रास्तदीयप्रासङ्गिका मन्त्राश्चोक्ताः नवमेऽध्याये वाजपेयमन्त्रा उच्यन्ते चतुस्त्रिंशत्कण्डिकापर्यन्तं । तेषां बृहस्पतीन्द्रावृषी ॥ तत्र का° [१४. १. ११.] देव सवितरिति जुहोति यजत्यादिधिति । वाजपेयाङ्गभूतानां यजतीनां दीक्षणीयाप्रायणीयादीनामादिषु सकृदृहीतमाज्यं जुहोति ॥ सवितृदेवत्या त्रिष्टुप् । हे सवितः सर्वस्य प्रेरकान्तर्यामिन् हे देव दीप्यमान यज्ञं वाजपेयलक्षणं यागं प्रसुव अभ्यनुज्ञानीहि प्रवर्तयित्यर्थः । यज्ञपतिं यजमानं भगाय भजनीयायानुष्ठानरूपायैश्वर्याय (1.) प्रसुव प्रेरय । एवं मण्डलाधिष्ठातारं पुरुषमुक्त्वेदानीं मण्डलं प्रत्याह त्वत्प्रसादाद्दिवि भवो दिव्यो गन्धर्वो गवां रश्मीनां धारयिता केतपूः केतशब्देनान्नमुच्यते केतमन्नं पुनातीति केतपूः अन्नस्य पावयिता सूर्यमण्डलरूपो देवो नोऽस्माकं केतमन्नं पुनातु शोधयतु । किं च त्वत्प्रसादाद्वाचस्पतिः प्रजापतिर्नोऽस्माकं वाजमन्नं हविर्लक्षणं स्वदतु आस्वादयतु स्वाहा सुहुतमस्तु ॥१॥

a. ध्रुवसदं त्वा नृषदं मनःसदम् । b. उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णामि । c. एष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ d. अप्सुषदं त्वा घृतसदं व्योमसदम् । e. f = b. c. ॥ g. पृथिविसदं त्वान्तरिक्षसदं दिविसदं देवसदं नाकसदम् । h. i = b. c. ॥२॥

का॰ [१४.१.२६:२.१.] प्रातःसवनेऽतिग्राह्यान्गृहीत्वा षोडशिनं पञ्च चैन्द्रान्ध्रुवसदमिति प्रतिमन्त्रमिति । प्रातःसवनऽआग्रयणानन्तरं त्रीनतिग्राह्यानादाय षोडशिनं चादाय पञ्चैन्द्रदेवत्यान्यक्रान्गृह्णीयात् ॥ त्रीणि यजूंषीन्द्रदेवत्यानि के सोम त्वम् उपयामयतीत्युपयामो ग्रहस्तेन गृहीतोऽसि । इन्द्राय जुष्टं प्रियं त्वा त्वां गृह्णामि किम्भूतं त्वां ध्रुवसदं ध्रुवे स्थिरेऽस्मिन् लोके सीदतीति ध्रुवसत्तम् नृषु मनुष्येषु सीदतीति नृषत्तम् मनसि सीदतीति मनःसत्तम् । सोमाकृतिपरिणामभूतो रस एषु लोकेष्वावर्तमानः सोमाध्यस्त उच्यते ॥ सादयति के यक्ष एष खरप्रदेशस्तव स्थानम् । इन्द्राय प्रियतमं त्वां सादयामीति शेषः ॥ अथ द्वितीयम् अप्सुषदमुदकसदं घृते सीदतीति व्योम्नि अन्तरिक्षे सीदतीति । शेषो व्याख्यातः ॥ अथ तृतीयम् पृथिव्यामन्तरिक्षे दिवि स्वर्गे देवेषु नास्ति अकं दुःखं यस्मिन् तस्मिन्नाके सुखान्विते स्वर्गविशेषे सीदतीति तादृशम् शेषमूह्यं ॥२॥

a. अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् ।
अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ॥ b. c = २ b. c. ॥३॥

अथ चतुर्थम् रसदेवत्यानुष्टुप् सूर्ये समाहितं समारोपितं स्थापितं सन्तमपामुदकानां रसं सारं वायुमहं गृह्णामि एष वाऽअपाꣳ रसो योऽयं पवतऽइति श्रुतेः [५.१.२.६.] । किम्भूतं रसमुद्वयसमुद्गतं वयोऽन्नं यस्माद्वायोः स उद्वयास्तम् वायुनैव धान्यानि निष्पद्यन्ते । किं च अपां रसस्य वायोर्यो रसः सारः प्रजापतिर्हिरण्यगर्भः स हि यज्ञलोककालाग्निवायुसूर्यर्ग्यजुःसामादिवपुः के देवा वो युष्मदर्थं तं प्रजापतिमहं गृह्णामि किम्भूतमुत्तममुत्कृष्टतमम् वःशब्दोऽनर्थको वा सोमरूपेण वायुं तदभिमानिनं प्रजापतिं च गृह्णामीत्यर्थः ॥ उपयामेति व्याख्यातम् एष त ऽइति सादनम् ॥३॥

a. यक्षो ऊर्जाकृतयो व्यन्तो विप्राय मतिम् ।
तेषां विशिप्रियाणां वोऽक्ष्मिषमूर्जꣳ समग्रभम् ॥
b. c = २ b. c. । d. सम्पृचौ स्थः सं मा भद्रेण पृङ्क्तम् ।

e. विपृचौ स्थो वि मा पाप्मना पृङ्क्तम् ॥४॥

अथ पञ्चमम् ग्रहदेवत्यानुष्टुप् हे ग्रहास्तेषां वो युष्माकं सम्बन्धिनमिषमन्नमूर्जं रसं चाहं समग्रभं समग्रहं सम्यग्गृह्णामि किम्भूतानां विशिप्रियाणाम् शिप्रे हनू नासिके वा इह तु हनू शिप्रयोर्हन्वोः कर्म शिप्रियं हनुचलनम् विगतं शिप्रियं येषु ग्रहेषु ते विशिप्रियाः सम्यगभिषुताः सुपूताश्च तत्र हि हन्वोर्व्यापारो नास्ति सुपेयत्वात् । तेषां केषां ये यूयमूर्जाकृतयः ऊर्जमन्नरसमाकृयन्ति ये यैर्वा ते ऊर्जाकृतयः । तथा विप्राय मेधाविने इन्द्राय मतिं विशिष्टबुद्धिं व्यक्तः ज्ञानन्तो गमयन्तो वा वीत्यस्य गतिकर्मणो धातोः शतृप्रत्यये द्रूपम् ॥ उपयामः एष ते इति व्याख्याते ॥ काः [१४.२.७.] ऊर्पर्युपर्यक्षमधर्युर्धारयत्यधोऽधो नेष्टा सम्पृचाविति । अधर्युः सोमग्रहमक्षोपरि धारयति नेष्टा सुराग्रहमक्षाधस्तात् सकृदेव धारणं मन्त्रपाठश्च ॥ ग्रहदेवते यजुषी । हे सोमसुराग्रहौ यौ युवां सम्पृचौ स्थः सम्पृक्तौ भवथः पृची सम्पर्के क्विप् तौ युवां मा मां भद्रेण भन्द्रनीयेन कल्याणेन सम्पृङ्क्तं संसृजतं संयोजयतम् ॥ काः [१४.२.८.] विपृचावित्याहरत इति । अधर्युनेष्टारौ स्वं-स्वं ग्रहं स्वसमीपमानयतः ॥ हे ग्रहौ यतो युवां विपृचौ वियुक्तौ स्थः ततो मा मां पाप्मना विपृङ्क्तं वियोजयतम् ॥४॥

II. a. इन्द्रस्य वज्रोऽसि वाजसास्त्वयायं वाजोऽ सेत् ।

b. वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥५॥

काः [१४.३.१.] मरुत्वतीयात्तऽइन्द्रस्य वज्र इति रथावहरणमिति ॥ महामरुत्वतीयात्ते माहेन्द्रात्पूर्वं रथवाहनाह्वकटाद्रथमवतारयति ॥ रथदेवत्यं यजुः हे रथ त्वमिन्द्रस्य वज्रोऽसि इन्द्रेण यदा वृत्राय वज्रं प्रहृतं तत्त्रिधा ज्ञातं (2.) तस्यैको भागो रथ इतीन्द्रो ह यत्र वृत्राय वज्रं प्रजहारित्यादिश्रुत्या [१.२.४.१.] उक्तम् । किम्भूतस्त्वं वाजसाः वाजमन्नं सनोति ददातीति वाजसाः षणु दानि विट्प्रत्ययः विड्वनोरनुनासिकस्यादित्याकारः [पा° ६.४.४१.] । किं च अयं यजमानस्त्वया वज्रीभूतेन सकृयेन वाजमन्नं सेत् सनोतेः सिनोतेर्वा द्रूपम् अन्नं सनुयात्सम्भजेत् यद्वा

सिनुयाद्वधीयात् बह्वन्नवान्भूयादित्यर्थः ॥ का° [१४.३.२.] चात्वालमावर्तयति वाजस्येति धूर्गृहीतमिति । अवतारितं रथं धुरि गृहीत्वा चात्वालाद्दक्षिणेनानीय वेद्यां स्थापयेत् ॥ पृथिवीदेवत्यातिजगती अन्त्यः पादः सवितृदेवत्यः । नु एवार्थे वाजस्यान्नस्य प्रसवेऽनुज्ञायामिव वर्तमाना वयं यां भूमिं नाम प्रसिद्धं यथा तथा वचसा वेदवाक्येन एवंविधामनुकूलां कृतवन्तः कुर्महे वा करोतिः शपि रूपम् । किम्भूतां भूमिं मातरं जगन्निर्मात्रीं महीं महतीं महनीयां वा अदितिमदीनामखण्डितां वा । किं च इदं विश्वं भुवनं सर्वं भूतजातं यस्यां भूमावाविवेश आविष्टम् । सविता देवस्तस्यां भूमाविव नोऽस्माकं धर्म धारणमवस्थानं साविषत् प्रसुवतां प्रेरयतु षू प्रेरणे इति धातोर्णिजन्तस्य लेटि साविषदिति रूपम् सिब्बहुलं लेटि [पा° ३.१.३४.] लेटोऽडाटौ [पा° ३.४.९४.] इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] सूत्रैः ॥५॥

a. अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिनः ।

b. देवीरापो यो व ऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वाजꣳ सेत् ॥६॥

का° [१४.३.३-५.] अश्वान्प्रोक्षत्यपोऽवनीयमानान् स्नातान्वागतानप्स्वन्तरिति देवीराप इति वा समुच्चयो वेति । स्नानार्थमपो नीयमानान् स्नात्वागतान्वाश्वानप्स्वन्तरिति देवीराप इति मन्त्रेण वोभाभ्यां वा प्रोक्षेत् ॥ अश्वदेवत्यावसानरहिता पुरऽष्णिक् अस्याः पाद आद्यो द्वादशाक्षरो द्वावष्टाक्षरौ । अप्सु उदकेषु अन्तर्मध्ये अमृतमवस्थितमप्सु भेषजमारोग्यपुष्टिकरमौषधं चावस्थितम् हे अश्वा यूयं तत्रामृतभेषजयुतास्वप्सु वाजिनोऽन्नवन्तो भवत उतापि च अपां प्रशस्तिषु प्रशस्तेषु भागेषु यूयं भवत ॥ द्वितीयः प्रोक्षणमन्त्रः अब्देवत्यं यजुः हे देवीः देव्यो दीप्यमाना आपो वो युष्माकं य ऊर्मिः कल्लोलस्तेन सिक्तोऽयमश्वो वाजमन्नं सेत् सनुयाद्वधीयाद्वा । किम्भूत ऊर्मिः प्रतूर्तिः प्रकृष्टा तूर्तिर्वेगो यस्य प्रवरणशीलः । तथा ककुन्मान् ककुच्छब्देन वृषभस्कन्धे उन्नतप्रदेश उच्यते सादृश्ये मतुप् तत्सामान्याद्बुदकनिचयैः संयुक्तो बहुलोदकसंघातवान् ककुन्मानित्युच्यते । तथा वाजसाः अन्नस्य दाता ॥६॥

वातो॑ वा॒ मनो॑ वा गन्ध॒र्वाः स॒प्तवि॑ꣳशतिः ।

ते॑ऽअ॒ग्रेऽश्व॑मयुञ्जँ॒स्तेऽअ॒स्मिन्ज॒वमा॑दधुः ॥७॥

का॰ [१४.३.६.] दक्षिणं युनक्ति वातो वेति । दक्षिणमश्वं रथे योजयेत् ॥ अश्वदेवत्या उष्णिक् । वाशब्दौ समुच्चयार्थौ । वातो वायुर्मन इन्द्रियं सप्तविंशतिर्नक्षत्राणि गन्धर्वा गोर्भूमेर्धर्तारः ते वातादयोऽग्रे पूर्वमश्वमयुञ्जन् रथे योजितवन्तः ते च वातादयोऽस्मिन्नश्वे जवं वेगमादधुः स्थापितवन्तः ॥७॥

वात॑रꣳहा भव वाजिन्यु॒ज्यमा॑न इन्द्र॒स्येव॑ दक्षि॒णः श्रि॒यैधि॑ ।

यु॒ञ्जन्तु॑ त्वा म॒रुतो॑ विश्ववे॒दस॒ आ ते॒ त्वष्टा॑ पत्सु ज॒वं द॑धातु ॥८॥

का॰ [१४.३.७.] उत्तरं वातरꣳहा इति । उत्तरमश्वं युनक्ति ॥ अश्वदेवत्या त्रिष्टुप् । हे वाजिन्वेगवन्नश्व युज्यमानः सन् त्वं वातरꣳहा वातवद्वेगयुक्तो भव वातस्येव रꣳहो यस्य । किं च दक्षिणो दक्षिणभागे स्थितस्त्वमिन्द्रस्याश्व-इव श्रिया शोभया युक्त एधि भव किं च विश्ववेदसः सर्वज्ञाः सर्वधना वा मरुतो हे अश्व त्वां युञ्जन्तु रथे नियोजयन्तु । किं च त्वष्टा देवः हे अश्व ते तव पत्सु पादेषु जवं वेगमादधातु स्थापयतु ॥८॥

a. ज॒वो यस्ते॑ वाजिन्नि॒हितो॒ गुहा॒ यः श्ये॒ने प॑रि॒त्तोऽअ॑चरच्च॒ वाते॑ ।

तेन॑ नो वाजिन्ब॒लवा॒न्ब॒लेन॑ वाज॒जिच्च॑ भव स॒मने॑ च पारयि॒ष्णुः ॥

b. वाजि॑नो वाज॒जितो॒ वाꣳ स॒रिष्य॑न्तो बृहस्प॒तेर्भा॒गमव॑जिघ्रत ॥९॥

का॰ [१४.३.८.] दक्षिणाप्रष्टिं जवो यस्तऽइति । दक्षिणायां धुरि प्रकृष्टं देशमश्नुतऽइति दक्षिणाप्रष्टिस्तादृशं तृतीयमश्वं युनक्ति ॥ अश्वदेवत्या जगती । हे वाजिन्नश्व यस्ते तव जवो वेगः गुहा गुहायां हृदयप्रदेशे निहितोऽवस्थापितः सुपां सुलुगिति [पा॰ ७.१.३९.] गुहाशब्दात् ङेर्लुक् । श्येने श्येनाख्ये पक्षिणि यो जवः परीत्तः त्वयैव परिदत्तः सन् अचरत् चरति प्रवर्तते यश्च ते जवः परिदत्तः सन्वाते अचरत् वायौ चरति । परिपूर्वाद्दातेर्निष्ठायामच उपसर्गात्त इति [पा॰ ७.४.४७.] तादेशे दस्तीति [पा॰ ६.३.१२४.] दादेशे (3.) तकारे परे इगन्तोपसर्ग-

स्य दीर्घं परीत्त इति । हे वाजिन् तेन त्रिविधेन (4.) बलेन वेगलक्षणेन बलवान्वेगवान्सन्नोऽस्माकं वाजजित् अन्नस्य जेता भव । च पुनः सनने संग्रामे पारयिष्णुः पारयिता च भव पारप्रापको भव पार् तीर् कर्मसमाप्तावित्यस्माच्चुरादिणिजन्तात् णेश्छन्दसीति [पा° ३.२.१३७.] इष्णुप्रत्ययः ॥ का° [१४.३.१०.] बार्हस्पत्यमेनानाघ्रापयति वाजिन इति । बार्हस्पत्यं चरुमश्वानाघ्रापयेत् ॥ अश्वदेवत्यं यजुः । वाजजितोऽन्नस्य जेतारो वाजमन्नं प्रति सरिष्यन्तो गमिष्यन्तो हे वाजिनोऽश्वा यूयं बृहस्पतेर्भागं चरुमवजिघ्रत आघ्राणं कुरुत ॥ १ ॥

III. a. देवस्याहꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेयम् ।

b. देवस्याहꣳ सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकꣳ रुहेयम् ।

c. देव॰ सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहम् ।

d. देव॰ सत्यप्रसवस इन्द्रस्योत्तमं नाकमरुहम् ॥ १० ॥

का° [१४.३.१२.] देवस्याहमिति ब्रह्मा रथचक्रमारोहत्युत्करे नाभिमात्रे स्थाणौ स्थितमिति । उत्करप्रदेशे निखातस्य नाभिमात्रकाष्ठस्याग्रे स्थितं रथचक्रं ब्रह्मारोहेत् ॥ ब्राह्मणकर्तृके वाजपेये लिङ्गोक्तदेवतम् । सत्यसवसः सत्याभ्यनुज्ञस्य सवितुर्देवस्य सवेऽनुज्ञायां वर्तमानोऽहं बृहस्पतेः संबन्धिनमुत्तममुत्कृष्टं नाकं स्वर्गं रुहेयमारोहानि । क्षत्रियवाजपेये चक्रारोहमन्त्रः तत्र इन्द्रस्य नाकं रुहेयमिति विशेषः ॥ का° [१४.४.८.] आगतेषु ब्रह्मावरोहति देवस्याहमिति । यजमानादीनां सप्तदशरथेषु सप्तदशशरप्रक्षेपप्रदेशे निखातामौडुम्बरीं शाखां प्रदक्षिणीकृत्य देवयजनदेशमागतेषु सत्सु ब्रह्मा रथचक्रादवरोहति विप्रयज्ञे पूर्वमन्त्रेण क्षत्रे उत्तरेण ॥ सत्यं प्रकृष्टं च सवो यस्येति सत्यप्रसवाः अत्र प्रशब्दः प्रकर्षद्योतकः । अरुहमिति भूतकालः नाकमारूढवानस्मीत्यर्थः शेषं पूर्ववत् ॥ १० ॥

a. बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयत ।

b. इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयत ॥ ११ ॥

का° [१४.३.१५.] बृहस्पते वाजमित्येकं दुन्दुभिमाहन्ति तूष्णीमितरानिति ।

अनुविद्युङ्क्तिस्थाणावारोपितसप्तदशडुन्दुभीनां मध्ये एकं मन्त्रेणावहन्ति षोडश तूष्णीम् ॥ यजुः विप्रयज्ञे मन्त्रः हे डुन्दुभयो यूयं बृहस्पतये इति वाचं वदत किम् यत् (5.) हे बृहस्पते त्वं वाजमन्नं जय । किं च हे डुन्दुभयो यूयमेव बृहस्पतिं वाजमन्नं जापयत बृहस्पतिनान्नजयं कारयतेत्यर्थः जि जये इत्यस्य हेतुमणिचि क्रीङ्जीनां णाविति [पा° ६.१.४८.] धातोराकारे कृते अर्तिह्वीब्लीरीक्नूयीक्ष्माय्यातां पुण्णाविति [पा° ७.३.३६.] पुगागमे लोणमध्यमबङ्गवचने जापयतेति रूपम् ॥ क्षत्रयज्ञे डुन्दुभिवादनमन्त्रः हे डुन्दुभयो यूयमिन्द्रायेति वाचं वदत यत् हे इन्द्र त्वं वाजं जय । इन्द्रं वाजं यूयं जापयतेति पूर्ववत् ॥११॥

a. एषा वः सा सत्या संवागभूत्यया बृहस्पतिं वाजमजीजपताजीजपत बृहस्पतिं वाजं वनस्पतयो विमुच्यध्वम् ।

b. एषा - ऽयेन्द्रं वाजमजीजपताजीजपतेन्द्रं वाजं वः वि° ॥१२॥

का° [१४.४.१.१०.] एषा व इति मन्त्राहुतमवहरते तूष्णीमितरानिति । सप्तदशडुन्दुभीनां मध्ये मन्त्रवादितं मन्त्रेणावतारयति षोडश तूष्णीं स्थाणुभ्यः ॥ पूर्वो मन्त्रो विप्रयज्ञे उत्तरः क्षात्रे । हे डुन्दुभयो वो युष्माकमेषा वाक् सत्या समभूत् (6.) तथ्या ज्ञाता यया वाचा बृहस्पतिं वाजमजीजपत । पुनर्बृहस्पतिं वाजमजीजपत अभ्यासे भूयांसमर्थं मन्यत्त इति [निरु° १०.४२.] यास्कोक्तेर्भूयानर्थो ग्राह्यः अत्यन्तं बृहस्पतिमन्नजयं कारितवन्तो यूयं यया वाचा सा सत्या ज्ञातेत्यर्थः जयतेर्णिजन्तस्य लुङि मध्यमबङ्गवचनेऽजीजपतेति रूपम् । हे वनस्पतयो वनस्पतिविकारा डुन्दुभयो यूयं विमुच्यध्वं कृतकृत्याः सन्तो विमोचनं कुरुत ॥ क्षात्रे यज्ञे उत्तरो मन्त्रः । यया वाचा इन्द्रं वाजमजीजपत सा सत्याभूदतो यूयं विमुच्यध्वं तुल्यम् ॥१२॥

a. देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् ।

b. वाजिनो वाजजितोऽध्वन स्कम्नुवन्तो योजना मिमानाः काष्ठा गच्छत ॥१३॥

का॰ [१४.३.१८.] देवस्याहमिति यजुर्युक्तमारोहति यजमानः । मन्त्रयुक्तं रथं यजमान आरोहेत् ॥ सत्यप्रसवसः सत्याभ्यनुज्ञस्य सवितुर्देवस्य सवेऽनुज्ञायां वर्तमानोऽहं वाजजितोऽन्नजितुर्बृहस्पतेः सम्बन्धिनं वाजमन्नं जेषं जयेयं जयतेर्लेटि उत्तमैकवचने लेटोऽडाटावित्यडागमे [पा॰ ३.४.९४.] सिब्बहुलं लेटीति [पा॰ ३.१.३४.] सिप्रत्ययऽइतश्च लोपः परस्मैपदेघिति [पा॰ ३.४.९७.] सिप इकारलोपे गुणे च जेषमिति रूपम् यद्वा लुङि अडि (7.) उत्तमैकवचनेऽडभावि ॥ का॰ [१४.३.२२.] वाजिन इति वाचयतीति ॥ हे वाजिनोऽश्वा यूयं काष्ठां गच्छत आज्यन्तं प्राप्नुत उत्कर्षं गच्छतेत्यर्थः । आज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवतीति [निरु॰ २.१८.] यास्कोक्तेः काष्ठोत्कर्षे स्थितौ दिशीत्यभिधानाच्च [अमर॰ ३.३.४६.] । किम्भूता यूयं वाजजितः अन्नस्य जेतारः । तथा अधनो मार्गान्स्कन्नुवन्तः रुन्धन्तः क्षोभयन्तः स ह्यश्वस्वभावः । तथा योजना योजनानि मिमानाः अतिशीघ्रतया परिक्षिन्दन्तः ॥ १३ ॥

एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षेऽआसनि ।
क्रतुं दधिक्रा अनु संऽसनिष्यदत्पथामङ्काँऽअन्वापनीफणत्सहोर्जा ॥ १४ ॥

का॰ [१४.४.३.४.] एष स्य इति प्रत्यृचं जुहोत्यनुमन्त्रयते वेति । ऋग्द्वयेनाज्यं जुहोत्यश्वाननुमन्त्रयते वा ॥ द्वे अश्वदेवत्ये जगत्यौ दधिक्रावदृष्टे । त्यत्शब्दस्तत्शब्दपर्यायश्छान्दसः स्यः एष वाजी सोऽयमश्वः क्षिपणिं क्षिप्यते प्रेर्यतेऽनया सा क्षिपणिस्तां कशां कशाघातमनु तुरण्यति तूर्णमधानमश्नुते यद्वा क्षिपणिं तुरण्यति कशां त्वरयति कशायास्त्वरया शीघ्रं धावतीत्यर्थः । किम्भूतोऽश्वः ग्रीवायामपिकक्षे आसनि आस्ये च बद्धः तत्तद्उचितरज्जुविशेषैः । पद्दन्न इत्यादिना [पा॰ ६.१.६३.] आस्यशब्दस्यासन्आदेशः सप्तम्याम् । ग्रीवायामुरोबध्नेण (8.) बद्धः । कक्षयोः समीपे अपिकक्षं पर्याणदेशस्तत्र संनाह्यरज्ज्वा बद्धः (9.) । आस्ये मुखे कविकया बद्धः । तथा दधिक्राः दधाति अश्ववारमिति दधिः आदृगमेति [पा॰ ३.२.१७१.] किप्रत्ययः दधिः सन्क्रामतेऽधानमिति दधिक्राः विट्ठि क्रामतेराकारः यद्वा दधीन्धारकान्मार्गावरोधानद्रिपाषाणगर्तकण्टकादीनप्यतिक्रामतीति दधिक्राः । तथा क्रतुं सादिनोऽभिप्रायमनु संसनिष्यदत् सम्यगनु संदधानः (10.) सादिसंकल्पा-

नुसारेण गच्छन् दाधर्तिर्दर्धर्तीत्यादिना [पा॰ ७.४.६५.] स्यन्दतेर्यङ्लुकि निपातोऽयम्। तथा पथां मार्गाणामङ्कांसि लक्षणानि कुटिलानि निम्नोन्नतानि अन्वापनिफणत् अतिशीघ्रं प्राप्नुवन्समवमापादयन्नित्यर्थः अन्वाङ्पूर्वस्य फणतेर्गत्यर्थस्य यङ्लुकि निपातः पूर्ववत्। एवंविधोऽश्वस्तुरण्यतीति सम्बन्धः। स्वाहा सुहुतमस्तु ॥१४॥

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः।
श्येनस्येव ध्रजतोऽङ्कसं परि दधिक्रावाणः सहोर्जा तरित्रतः स्वाहा ॥१५॥

उत स्म अपि च अस्याश्वस्य अङ्कसं शृङ्गारचिह्नं वस्त्रचामरादिकं परि सर्वस्मिन्नपि देहे वर्तमानं सत् अनुवाति गच्छत्यश्वमनु उत्क्षिप्तत्वेन दृश्यमानं गच्छति। कस्य किमिव वेः पक्षिणः पर्णं न पक्ष-इव यथा त्वरया गच्छतः पक्षिणः पक्ष उत्क्षिप्तो गच्छन्नवलोक्यते तथा धावतोऽश्वस्याङ्कसरूपं वस्त्रचामरादिकं विस्पष्टमवलोक्यतऽइत्यर्थः। किम्भूतस्याश्वस्य द्रवतो गच्छतः तथा तुरण्यतस्त्वरयतः प्रगर्धिनः प्रगृध्यतीति प्रगर्धी अवधिं प्राप्तुं काङ्क्षतः। पक्षिमात्रस्य पर्णमङ्कसदृष्टान्तत्वेनाभिहितम् शीघ्रधावने श्येनदृष्टान्त उच्यते श्येनस्येव ध्रजतो गच्छतो वेगेन ध्रज गतौ दधिक्रावाणः दधीन्क्रमते दधिक्रावा धारकपर्वताद्यतिक्रामिणः अन्येभ्योऽपि दृश्यन्तऽइति [पा॰ ३.२.७५.] क्रमतेर्वनिपि विड्वनोरिति [पा॰ ६.४.४१.] आकारः। ऊर्जा बलेन सह तरित्रतः मार्गं भृशं तरतः यङ्लुकि निपातोऽयम् स्वाहा सुहुतमस्तु ॥१५॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥१६॥

का॰ [१४.४.५.] उत्तरेण तृचेन चेति (11.)। शं न इति ऋक्त्रयेणाऽऽग्नेयो ऽश्वाभिमर्शने वा ॥ अश्वदेवत्या विराड्त्रिष्टुप्दृष्टा दशाक्षरचतुःपादा। देवानां कर्म देवताता सर्वदेवात्तातिलिति [पा॰ ४.४.१४२.] देवशब्दात्कर्मणि (12.) तातिल्प्रत्ययः लितीति [पा॰ ६.१.१९३.] प्रत्ययात्पूर्वस्य वकारस्योदात्तत्वम् तस्य सप्तम्यां सुपां सुलुगित्यादिना [पा॰ ७.१.३९.] ङेराकारः देवताता देवतातौ यज्ञे हु-

वेषु आह्वानेषु सत्सु वाजिनोऽश्वा नोऽस्माकं शं सुखकरा भवन्तु । किम्भूताः मितद्रवः मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवः क्विपि तुगभाव आर्षः । स्वर्काः शोभनोऽर्को येषां ते सुरुचः स्वच्छना वा । तथा अहिं सर्पं वृकमरण्यश्वानं रक्षांसि राक्षसान् च जम्भयन्तो नाशयन्तः । किं च तेऽश्वा अस्मत्सकाशात्सनेमि क्षिप्रममीवा व्याधीन्युयवन्पृथक्कुर्वन्तु यु पृथग्भावे अस्य क्वाद्विवे लडि रूपम् गुणाऽभावावार्षौ । सनेमीति पुराणनाम [निघ° ३. २७.] इह तु क्षिप्रवाचकः ॥ १६ ॥

ते नोऽअर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धनꣳ समिथेषु जभ्रिरे ॥ १७ ॥

अश्वदेवत्या जगती नाभानेदिष्ठदृष्टा । विश्वे सर्वे ते वाजिनोऽश्वा नोऽस्माकं हवमाह्वानं शृण्वन्तु । किम्भूताः अर्वन्तः इयृति (13.) कुटिलं गच्छन्तीत्यर्वन्तः ऋ गतावित्यस्माद्वनिप् अर्वणस्त्रसावनञ इति [पा° ६. ४. १२७.] इति त्रसादेशे रूपम् । हवनश्रुतः हवनमाह्वानं शृण्वन्तीति हवनश्रुतः । मितद्रवः यजमाने चित्तानुकूल्येन परिमितगामिनः । सहस्रसाः सहस्रस्यानेकजनतृप्तिहेतोरन्नराशेः सनितारो दातारः । मेधसाता सनिष्यवः मेधो यज्ञः सन्यते सम्भज्यते यत्र सा मेधसातिर्यज्ञशाला डेर्डाकारः तस्यां सनिष्यवः सम्भक्तारः पूरयितारः । ते के ये ऽश्वाः समिथेषु संग्रामेषु महः महत्पूज्यं वा धनं जभ्रिरे जह्रिरे आहृतवन्तः ॥ १७ ॥

वाजे-वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ १८ ॥

अश्वदेवत्या त्रिष्टुब्व्यसिष्ठदृष्टा । हे वाजिनोऽश्वा वाजे-वाजे सर्वस्मिन्नन्ने उपस्थिते सति धनेषु चोपस्थितेषु सत्सु नोऽस्मानवत पालयत । किम्भूता यूयम् विप्रा मेधाविनः परिदृष्टकारिणः अमृता अमरणधर्माणः ऋतज्ञाः सत्यज्ञाः यज्ञज्ञा वा । किं च अस्य मध्वः पिबत कर्मणि षष्ठी इदं मधु धावनात्पूर्वं पश्चाच्चावघायमाणं नैवारचरुलक्षणं मधुरं हविः पिबत पीत्वा च मादयध्वं तृप्ता भवत ततस्तृप्ताः सन्तो देवयानैर्देवाधिष्ठितैः पथिभिर्मार्गैर्यात गच्छत ॥ १८ ॥

a. आ मा वाजस्य प्रसवो जगम्यादिमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात् ॥

b. वाजिनो वाजजितो वाजꣳ ससृवाꣳसो बृहस्पतेर्भागमवजिघ्रत निमृ-
ज्जानाः ॥ ११ ॥

का° [१४.४.११.] अवरुह्य नैवारमालभते तीर्थे स्थितमा मा वाजस्येति । यजमानो रथाद्वतीर्य चावालोत्करान्तरे स्थितं नैवारं चरुं स्पृशति ॥ प्रजापतिर्देवत्या त्रिष्टुब्वसिष्ठदृष्टा । वाजस्यान्नस्य प्रसव उत्पत्तिर्मा मामाजगम्यात् आगच्छतु गच्छतेर्व्यत्ययेन च्छादिर्ब्बे लिङि रूपम् । आ इमे विश्वरूपे सर्वरूपात्मिके इमे द्यावापृथिव्यौ मां प्रत्यागच्छताम् । पितरा मातरा पितरामातरा च छन्दसीति [पा° ६.३.३३.] द्विरूपैकशेषो निपात्यते अस्मदीयः पिता माता च मा मां प्रति आगन्तामागच्छताम् व्यत्ययेनादादिर्ब्बे लोटि रूपम् । सोमश्चामृतत्वेन सहितो मा मामागम्यात् चतुर्थ्यर्थे तृतीया अमृतत्वाय मम देवत्वजन्मने सोमो मां प्रत्यागच्छेत् लिङि रूपम् ॥ का° [१४.४.१२.] यजुर्युक्तानाघ्रापयति वाजिन इति । मन्त्रेण युक्तानश्वान्नैवारचरुमाघ्रापयेत् ॥ अश्वदेवत्यं यजुः । हे वाजिनोऽश्वा यूयं बृहस्पतेः सम्बन्धिनं भागं चरुमवजिघ्रत आघ्राणं कुरुत । किम्भूताः वाजजितः वाजस्यान्नस्य जेतारः । वाजमन्नं जेतुं ससृवांसः सृतवन्तो (14.) गतवन्तः सर्तेः क्वसुप्रत्यये रूपम् । निमृज्जानाः मृजूष शुद्धौ शानच्प्रत्ययः शोधयन्तः चरुमेनं यजमानं वा पुनन्त इत्यर्थः ॥ ११ ॥

IV. a. आपये स्वाहा । b. स्वापये स्वाहा । c. अपिजाय स्वाहा ।
d. क्रतवे स्वाहा । e. वसवे स्वाहा । f. अक्रूपतये स्वाहा ।
g. अक्लेम्नुधाय स्वाहा । h. मुधाय वैनꣳशिनाय स्वाहा ।
i. विनꣳशिनेऽआत्मयुनाय स्वाहा । k. अत्याय भौवनाय स्वाहा ।
l. भुवनस्य पतये स्वाहा । m. अधिपतये स्वाहा ॥ २० ॥

का° [१४.५.१.] द्वादश स्रुवाङ्कृतीर्जुहोत्यापये स्वाहेति प्रतिमन्त्रं वाचयति वे-

ति ॥ प्राजापत्यानि द्वादश यजूंषि । संवत्सराभिमानी प्रजापतिः स्तूयते तस्यैवैतानि नामानि । आप्नोतीत्यापिस्तस्मै सुकृतमस्तु । शोभनमाप्नोतीति स्वापिः तस्मै । अपि जायते पुनः-पुनरुत्पद्यतऽइत्यपिजस्तस्मै स्वाहा । क्रतुः संकल्पो भोगादिविषयो यज्ञो वा तस्मै । वसवे निवासहेतवे । अङ्गां दिवसानां पतिरर्द्धपतिस्तस्मै । अतश्चत्वारि नामान्युभयविशेषणविशिष्टानि मुह्व वैचित्त्ये (15.) मुह्यतीति मुग्धस्तस्मै अङ्गे दिवसाय । विनश्यन्तीति विनंशिनः विनाशशीलाः पदार्थाः मस्जिनशोर्झलीति [पा° ७.१.६०.] ह्रान्दसत्वादकाल्यपि (16.) नुमागमः विनंशिषु भवो वैनंशिनस्तस्मै मुग्धाय मोहकाय स्वाहा । अत्ते भवमत्यमत्यं च तदयनं च अत्यायनमत्यस्थानं तत्र भव आत्यायनस्तस्मै विनंशिने विनाशशीलाय स्वाहा । अत्ते भवोऽत्यः भुवने भवो भौवनस्तदुभयविशिष्टाय स्वाहा । भुवनस्य पतये जगतः पालयित्रे । अधिपतये सर्वलोकानां स्वामिने स्वाहा सुकृतमस्तु ॥२०॥

a. आयुर्यज्ञेन कल्पताम् । b. प्राणो यः । c. चक्षुर्यः । d. श्रोत्रं यः । e. पृष्ठं यः । f. यज्ञो यः । g. प्रजापतेः प्रजा अभूम । h. स्वर्देवा अगन्म । i. अमृता अभूम ॥२१॥

का° [१४.५.२.] षट्चोत्तराः । षट् आयुर्यज्ञेनित्याद्याश्चशब्दाऽऽजुहोति वाचयति वा ॥ प्राजापत्यानि षडजूंषि । मदीयमायुर्यज्ञेन वाजपेयाख्येन कल्पतां क्लृप्तं भवतु । मुखनासिकाप्रभवः पञ्चवृत्तिकः प्राणवायुरप्येनेन यज्ञेन क्लृप्तो भवतु । चक्षुरिन्द्रियं यज्ञेन क्लृप्तं भवतु । श्रोत्रेन्द्रियं यज्ञेन क्लृप्तमस्तु । पृष्ठं रथन्तरादिकं शरीरस्य पृष्ठं वा यज्ञेन कल्पताम् । यज्ञेन मदीयेन वाजपेयाख्येन यज्ञो यज्ञाधिष्ठाता विष्णुः कल्पताम् ॥ का° [१४.५.६.] प्रजापतेरित्यारोहत इति । पत्नीयजमानौ निश्रेण्या (17.) यूपमारोहतः ॥ यजमानदेवत्यानि त्रीणि यजूंषि । वयं प्रजापतेः सम्बन्धिन्यः प्रजा अभूम अपत्यानि जातानि ॥ का° [१४.५.७.] स्वरिति गौधूममालभतऽइति । गोधूमपिष्टनिर्मितं चषालं यजमानः स्पृशेत् ॥ हे देवा वयं स्वः स्वर्गमगन्म प्राप्ताः ॥ का° [१४.५.८.] शिरसा यूपमुज्जिहीतेऽमृता (18.)

इति । यूपादुर्ध्वं शिरः करोति ॥ वयममृता मरणधर्मरहिता अभूम सम्भूताः ॥२१॥

a. अस्मे वोऽअस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चाꣳसि सन्तु वः ।

b. नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्यै । c. इयं ते राट् ।

d. यन्तासि यमनो ध्रुवोऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥ २२ ॥

का° [१४.५.१.] अस्मे व इति दिशो वीक्षतऽइति । यूपारूढ एव यजमानो दिशः पश्यति ॥ दिग्देवत्यम् हे दिशो वो युष्मत्सम्बन्धि इन्द्रियं वीर्यमस्मे अस्मास्वस्तु नृम्णं धनं युष्मत्सम्बन्धि अस्मे अस्मास्वस्तु । उत अपि च क्रतुः कर्म युष्मत्सम्बन्धि अस्मास्वस्तु । वो युष्माकं वर्चांसि तेजांसि अस्मे अस्मासु सन्तु भवन्तु । अस्माकं सम्बन्धि (19.) युष्मत्सामर्थ्यमस्तिति भावः ॥ का° [१४.५.१२.] नमो मात्र ऽइति भूमिमवेक्षतऽइति । यूपारूढ एव यजमानो भूमिं पश्यति ॥ पृथिवीदेवत्यम् मात्रे मातृरूपायै पृथिव्यै नमो नमस्कारोऽस्तु अभ्यासे भूयांसमर्थं मन्यत्तऽइति [निरु° १०.४२.] द्विरुक्तिः ॥ का° [१४.५.१३.] उत्तरवेदिमपरेणौदुम्बरीमासन्दीं वस्तचर्मणास्तृणातीयं तऽइति ॥ आसन्दीदेवत्यम् हे आसन्दि ते तव इयं राट् इदं राज्यं राजनं राट् सम्पदादित्वाद्भावे स्त्रियां क्तिप् अभिषिक्तासि त्वमिति भावः॥ का° [१४.५.१४.] सुन्वत्तमस्यामुपवेशयति यन्तासीति । आसन्द्यां यजमानमुपवेशयेत् ॥ यजमानदेवत्यम् । हे यजमान त्वं यन्ता सर्वस्य नियन्तासि यमनः स्वयं संयमनकर्ता भवसि अनवच्छिन्नं तव यमनमिति भावः । तथा ध्रुवः स्थिरोऽसि धरुणो धारकोऽसि । कृष्यै कर्षणाय कृषिसिद्ध्यर्थं त्वा त्वामुपवेशयामीति सर्वत्र शेषः । क्षेमाय लब्धपरिपालनाय त्वामुप° । रय्यै धनाय त्वामुप° । पोषाय पशुपुत्रादिपुष्ट्यै त्वामुप° ॥ २२ ॥

V. वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु ।

ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३॥

का° [१४.५.२१.] स्रुवेण सम्भृताञ्जुहोति वाजस्येममिति प्रतिमन्त्रमिति । औदुम्बरपात्रे एकीकृतादुग्धव्रीह्यादिधान्यात्स्रुवेणाहवनीये सप्त मन्त्रैर्जुहोति ॥ ति-

स्रस्त्रिष्टुभः प्रजापतिदेवत्याः । प्रसुतिश्चौ प्रसवः पचादित्वादच् वाजस्यान्नस्य प्रसव उत्पादकः प्रजापतिः अग्रे सृष्ट्यादौ ओषधीषु अप्सु च वर्तमानमिमं सोमं वल्लीरूपं राजानं दीप्तिमन्तं पदार्थं सुषुवे उत्पादयामास ता इत्थम्भूताः सोमस्य जनयित्र्य ओषधय आपश्चास्मभ्यमस्मदर्थं मधुमतीर्मधुमत्यो रसवत्यो माधुर्योपेता भवन्तु भोगयोग्या भवन्तु वयं च ताभिरभिषिक्ता राष्ट्रे स्वकीये देशे जागृयाम अप्रमत्ता भवाम । पुरोहिताः यागानुष्ठानादौ पुरोगामिनः प्रधाना इत्यर्थः स्वाहा सुकृतमस्तु ॥२३॥

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिं सर्ववीरं नियच्छतु स्वाहा ॥२४॥

वाजस्यान्नस्य प्रसव उत्पादक ईश्वर इमां पृथिवीं दिवं द्युलोकं च इमा इमानि विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि च शिश्रिये आश्रितवान् स च सम्राट् सर्वेषां भुवनानां राजा भूत्वा अदित्सन्तं कृविर्दातुमनिच्छन्तं मां प्रजानन् अवगच्छन्मदीयबुद्धिप्रेरणेन कृविर्दापयति ततो नोऽस्मभ्यं सर्ववीरं सर्वैः पुत्रभृत्यादिभिर्युक्तं रयिं धनं नियच्छतु नियमनेन ददातु दाण् दानि पाघ्राध्मित्यादिना [पा० ७.३.७८.] यच्छादेशः स्वाहा सुकृतमस्तु ॥२४॥

वाजस्य नु प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परियाति विद्वान्प्रजां पुष्टिं वर्धयमानोऽअस्मे स्वाहा ॥२५॥

नु इति विस्मये वाजस्य प्रसवः प्रजापतिः इमा इमानि विश्वा विश्वानि सर्वाणि भुवनानि भूतानि सर्वतोऽवस्थितानि हिरण्यगर्भादिस्तम्बपर्यन्तानि आबभूव सम्भावितवानुत्पादितवानित्यर्थः सनेमीति पुराणनाम [निघ० ३.२७.] सनेमि चिरंतनो राजा दीप्तः सन्परियाति सर्वतः स्वेच्छया गच्छति । किम्भूतः विद्वान् स्वाधिकारं जानन् तथा अस्मे अस्मासु प्रजां पुत्रादिसंततिं पुष्टिं धनपोषं च वर्धयमानः वर्धयन् स्वाहा सुकृतमस्तु ॥२५॥

सोमꣳ राजानमवसेऽग्निमन्वारभामहे ।

आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥ २६॥

तिस्रोऽनुष्टुभस्तापसदृष्टाः प्रथमा सोमाग्न्यादित्यविष्णुसूर्यबृहस्पतिदेवत्या । अवसे रक्षणार्थं तर्पणाय वा सोमं राजानमग्निं वैश्वानरमादित्यान्द्वादश विष्णुं सूर्यं ब्रह्माणं बृहस्पतिं चान्वारभामहे अन्वारम्भणमाह्वानं कुर्महे स्वाहा सुकृतमस्तु ॥ २६॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा ॥ २७॥

अर्यमबृहस्पतीन्द्रवाग्विष्णुसरस्वतीसवितृदेवत्या । हे ईश्वर त्वमर्यमादीन्देवान्दानाय धनप्रदानार्थं चोदय प्रेरय बृहस्पतिमिन्द्रं देवेशं वाचं वागधिष्ठात्रीं सरस्वतीं विष्णुं सवितारं सर्वस्य प्रसवकर्तारं सूर्यम् । वाजिनमन्नवन्तमिति सर्वेषां विशेषणं वाजिनं देवाश्वं वा । स्वाहा सुकृतमस्तु ॥ २७॥

अग्ने अक्षावदक्ष नः प्रति नः सुमना भव ।
प्र नो यच्छ सहस्रजित्वꣳ हि धनदा असि स्वाहा ॥ २८॥

अग्निदेवत्या । हे अग्ने इहास्मिन्कर्मणि नोऽस्माकमक्षवद् आभिमुख्येन ब्रूहि क्षितमिति शेषः निपातस्य (20.) चेति [पा० ६.३.१३६.] संहितायां दीर्घोऽक्षशब्दस्य । किं च नोऽस्मान्प्रति सुमनाः करुणार्द्रचित्तो भव हे सहस्रजित् सहस्रस्य बहुनो वसुनो जेतः सहस्राणां योधानां वा जेतः हि यस्मात्त्वं स्वभावतो धनदा धनस्य दातासि अतस्त्वं नोऽस्मभ्यं प्रयच्छ धनं देहि स्वाहा ॥ २८॥

प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः । प्र वाग्देवी ददातु नः स्वाहा ॥२९॥

गायत्री अर्यमपूषबृहस्पतिवाग्देवत्या । अर्यमा सूर्यविशेषो नोऽस्मभ्यं प्रयच्छतु अभीष्टं ददातु पूषा प्र यच्छतु उपसर्गावृत्त्या क्रियापदावृत्तिः बृहस्पतिः प्र यच्छतु देवी दीप्यमाना वाक् नोऽस्मभ्यं ददातु स्वाहा ॥ २९॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. सरस्वत्यै वाचो यन्तुर्यन्त्रियं दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥३०॥

का° [१४.५.२२.] शेषेणाभिषिञ्चति यजमानं देवस्य त्वेति । क्रोमद्रव्यशेषेण यजमानं शिरसि सिञ्चेत् ॥ यजमानदेवत्यम् सवितुर्देवस्य प्रसवे वर्तमानोऽश्विनोर्बाहुभ्यां पूष्नो हस्ताभ्यां त्वा त्वां वाचो वाण्या यन्तुर्यन्त्र्याः पुंस्त्वमार्षम् नियमनकर्त्र्याः सरस्वत्यै षष्ठ्यर्थे चतुर्थी सरस्वत्याः यन्त्रिये नियमने ऐश्वर्ये दधामि स्थापयामि । किं च बृहस्पतेः साम्राज्येन सम्राड्भावेन त्वा त्वामभिषिञ्चामि असाविति तन्नामग्रहणम् ॥३०॥

VI. a. अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषम् । b. अश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषम् । c. विष्णुस्त्र्यक्षरेण त्रींल्लोकानुदजयत्तानुज्जेषम् । d. सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥३१॥

का° [१४.५.२६.] अग्निरेकाक्षरेणेत्यनुवाकं द्वादशवत्कृत्वेति । चतुःकण्डिकात्मकमनुवाकं द्वादशवत् द्वादश स्रुवाहुतीर्जुहोत्यापये स्वाहेति प्रतिमन्त्रं वाचयति वेति यत्पूर्वमुक्तं [१४.५.१.] तद्वत्कृत्वेत्यर्थः तेनैतैर्मन्त्रैर्जुहोति सप्तदश मन्त्रान्वाचयति वेत्यर्थः ॥ एते मन्त्रा उज्जितिसंज्ञाः । सप्तदश यजूंषि लिङ्गोक्तदेवतानि । ओ श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहेऽइति पञ्चाक्षरं व्यक्षरो वषट्कारः एष सप्तदशाक्षरात्मकः (21.) प्रजापतिरधियज्ञं समासव्यासाभ्यामुज्जीयते ॥ अग्निरेकाक्षरेण छन्दसा प्राणं पञ्चवृत्तिकमुदजयत् उत्कृष्टं जितवान् तथाहमपि तादृशं तं प्राणमुज्जेषमुत्कृष्टं जयेयं वशीकुर्यामित्यर्थः ॥ अश्विनौ देवौ द्व्यक्षरेण अक्षरद्वयात्मकेन छन्दसा द्विपदः पादद्वयोपेतान्मनुष्यानुदजयतां जितवन्तौ तथाहमपि तेनैव द्व्यक्षरेण छन्दसा तान् तादृशान्मनुष्यानुज्जेषमधिकं जयेयम् ॥ विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा त्रीन्भूरादीन् लोकानुदजयत् अहमपि तान् लोकानुज्जेषम् ॥ सोमोऽक्षरचतुष्टयात्मकेन छन्दसा चतुःपदः पादचतुष्टयोपेतान्पशूनुदजयत् अहमपि तेन तान्पशूनुज्जेषम् ॥३१॥

a. पूषा पञ्चाक्षरेण पञ्च दिश उदजयत्ता उज्जेषम् । b. सविता षडक्षरेण षड्ऋतूनुदजयत्तानुज्जेषम् । c. मरुतः सप्ताक्षरेण सप्त ग्राम्यान्पशूनुदजयँस्तानुज्जेषम् । d. बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥ ३२ ॥

पूषा देवः पञ्चाक्षरेण छन्दसा पञ्चसंख्याः पूर्वाद्याश्चतस्रोऽवान्तरदिशं (22.) चेति पञ्च दिश उदजयत् अहमपि ता दिशो जयेयम् ॥ सविता सर्वस्य प्रेरको देवः षडक्षरेण छन्दसा षट्संख्यानृतूनुदजयत् तानृतूनहमुज्जेषम् ॥ मरुतो देवाः सप्ताक्षरेण छन्दसा सप्तसंख्यान्ग्राम्यान्पशून्गवादीनुदजयन् अहं तान्ग्राम्यान्पशून् जयेयम् ॥ बृहस्पतिरष्टाक्षरात्मकेन छन्दसा गायत्रीछन्दोऽभिमानिनीं देवतामुदजयत् तां तादृशीं गायत्रीं जयेयम् ॥ ३२ ॥

a. मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषम् । b. वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम् । c. इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषम् । d. विश्वे देवा द्वादशाक्षरेण जगतीमुदजयँस्तामुज्जेषम् ॥ ३३ ॥

मित्रो देवो नवाक्षरेण छन्दसा त्रिवृतं स्तोममुदजयत्तं तादृशं स्तोममहं जयेयम् ॥ वरुणो देवो दशाक्षरेण छन्दसा विराजम् दशाक्षरा विराडिति श्रुतिप्रसिद्धां तदभिमानिनीं देवतामुदजयत्तां विराजमहमप्युज्जेषम् ॥ इन्द्रो देव एकादशाक्षरेण छन्दसा त्रिष्टुप्छन्दोऽभिमानिनीं देवतामजयत् तां त्रिष्टुभमहमुज्जेषम् ॥ विश्वे देवा द्वादशाक्षरेण छन्दसा जगत्यभिमानिदेवतामुदजयन् अहमपि तां जगतीं जयेयम् ॥ ३३ ॥

a. वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयँस्तमुज्जेषम् ।

b. रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयँस्तमुज्जेषम् ।

c. आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयँस्तमुज्जेषम् ।

d. अदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम् ।

e. प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥ ३४ ॥

वसवस्त्रयोदशाक्षरेण छन्दसा त्रयोदशं स्तोममुदजयन् तं स्तोमं जयेयम् ॥ रुद्रा देवाश्चतुर्दशाक्षरेण छन्दसा चतुर्दशं स्तोममजयन् तं स्तोममहमपि जयेयम् ॥ आदित्या देवाः पञ्चदशाक्षरेण छन्दसा पञ्चदशं स्तोममजयन् तं स्तोमं जयेयम् ॥ अदितिर्देवमाता षोडशाक्षरेण छन्दसा षोडशं स्तोममजयत् तेनाहमपि तं स्तोममुज्जेषम् ॥ प्रजापतिः सप्तदशाक्षरेण छन्दसा सप्तदशाख्यं स्तोममजयत् तं स्तोमं तेन छन्दसाहमपि जयेयम् ॥ एतान्मन्त्रान् जपेदेतैर्जुहुयाद्वा ॥ ३४ ॥ इति वाजपेयमन्त्राः समाप्ताः ॥ ॥

VII. a. एष ते निर्ऋते भागस्तं जुषस्व स्वाहा । b. अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा । c. यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा । d. विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा । e. मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा । f. सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो ध्रुवस्वद्भ्यः स्वाहा ॥ ३५ ॥

अथ राजसूयमन्त्राः । तेषां वरुण ऋषिः ॥ ॥ का° [१५.१.१.१०.] अष्टाकपालो ऽनुमत्यै शम्यायाः पश्चाद्विष्यशन्नꣳ स्रुवे कृत्वा दक्षिणाग्न्युल्मुकमादाय दक्षिणा गत्वा स्वयंप्रदीर्णꣳ इरिणे वाग्नौ जुहोत्येष ते निर्ऋतꣳ इति । फाल्गुनाद्यदशम्यामनुमत्यै अष्टाकपालः पुरोडाशो भवति तदर्थं गृहीतहविषः पेषणकाले दृषद्धस्तान्निहितशम्यापश्चाद्भागे शस्त्रं पतितं यद्धविस्तण्डुलपिष्टरूपं तत्स्रुवे निधाय दक्षिणाग्नेरुल्मुकमादाय दक्षिणस्यां दिशि गत्वा स्वयंस्फुटिते भूभागे ऊषरे वोल्मुकाग्निं संस्थाप्य तद्धविर्जुहोतीति सूत्रार्थः ॥ पृथिवीदेवत्यम् । निर्ऋतिरत्र पृथिवी हे निर्ऋते पृथिवि एष पिष्टरूपस्ते तव भागः तं भागं त्वं जुषस्व सेवस्व स्वाहा सुहुतमस्तु ॥ का° [१५.१.२०.] पञ्चवातीयमाहवनीयं प्रतिदिशं व्युह्य मध्ये च स्रुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमन्त्रमिति । एवं वर्षमिष्टीः कृत्वा पञ्चवा-

तीयाख्यं कर्म विधेयम् तत्राहवनीयं प्रागादिदिक्षु कृत्वा मध्ये चावशिष्य स्रुवेणाज्यं पञ्चस्वग्निषु यथालिङ्गं जुहोति ॥ अध्यायसमाप्तिपर्यन्तं देवा ऋषयः । दश यजूंषि देवदेवत्यानि । अग्निर्नेता येषां ते अग्निनेत्रास्तेभ्यः । पुरः पुरस्तात्पूर्वस्यां दिशि सीदन्तीति पुरःसदस्तेभ्यो देवेभ्यः स्वाहा सुकृतमस्तु ॥ अथ दक्षिणे जुहोति । यमनेत्रेभ्यः यमो नेता येषां तेभ्यः । दक्षिणास्यां सीदन्तीति दक्षिणासदस्तेभ्यो देवेभ्यः स्वाहा ॥ अथ पश्चाज्जुहोति । विश्वदेवनेत्रेभ्यः विश्वे देवा नेतारो येषां तेभ्यः । पश्चात्सीदन्तीति पश्चात्सदस्तेभ्यः स्वाहा ॥ अथोत्तरार्धे जुहोति । मित्रावरुणनेत्रेभ्यः मित्रावरुणौ नेतारौ येषां ते मित्रावरुणनेत्राः । वा यद्वा मरुतो नेतारो येषां ते मरुन्नेत्राः । उत्तरस्यां सीदन्तीत्युत्तरासद उत्तरभागार्थास्तेभ्यो देवेभ्यः स्वाहा । अत्र मित्रावरुणनेत्रेभ्यो देवेभ्य उत्तरासद्भ्यः मरुन्नेत्रेभ्यो देवेभ्य उत्तरासद्भ्य इति मन्त्रयोर्विकल्पः ॥ मध्ये जुहोति । सोमनेत्रेभ्यः सोमो नेता येषां तेभ्यः । उपरि सीदन्ति तिष्ठन्तीत्युपरिसदस्ते । द्रुवस्वद्भ्यः परिचर्यावद्भ्यः (23.) यद्वात्र द्रुवःशब्देन कृव्यं तन्नेषामस्ति ते द्रुवस्वन्तस्तेभ्यो देवेभ्यः स्वाहा ॥३५॥

a. ये देवा अग्निनेत्रा पुरःसदस्तेभ्यः स्वाहा । b. ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा । c. ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा । d. ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा । e. ये देवाः सोमनेत्रा उपरिसदो द्रुवस्वन्तस्तेभ्यः स्वाहा ॥३६॥

का° [१५.१.२१.]. उत्तराः समस्य ये देवा इति प्रतिमन्त्रमिति । पञ्चधा विभक्तमाहवनीयमेकीकृत्य ये देवा इति पञ्च मन्त्रैः प्रत्येकं जुहुयादिति शेषः ॥ ये देवा अग्निनेत्राः पुरःसदस्तेभ्यो देवेभ्यः स्वाहा । ये देवा यमनेत्राः पूर्ववद्व्याख्या । ये देवा विश्वदेवनेत्राः पश्चात्सदः । ये देवा मित्रावरुणनेत्राः ये देवा मरुन्नेत्रा इति मन्त्रयोर्विकल्पः । ये देवा सोमनेत्राः उपरिसदः उपरि स्थिता द्रुवस्वन्तो कृव्यवन्तस्तेभ्यः स्वाहा ॥३६॥

अग्ने सहस्व पृतना अभिमातीरपास्य ।
दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ॥३७॥

का° [१५.२.५.] अग्ने सहस्वेत्युल्मुकादानमिति । अपामार्गतण्डुलहोमार्थं दक्षिणाग्नेरुल्मुकमादद्यात् ॥ अग्निर्देवत्यानुष्टुब्देवश्रवोदेववातदृष्टा । हे अग्ने त्वं पृतनाः शत्रुसेनाः सहस्व अभिभव । तथा अभिमातीः सपत्नोऽभिमातिरुच्यते स्त्रीत्वमार्षम् अभिमातीन् शत्रून् अपास्य अपक्षिप निवर्तय अस्मु क्षेपणे अस्य लोटि रूपम् । किं च यज्ञं वहतीति यज्ञवाहास्तस्मिन्यज्ञवाहसि यज्ञनिर्वाहके यजमाने वर्चोऽन्नं धाः धेहि दधातेर्लुङि रूपम् बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] । किम्भूतस्त्वं दुष्टरः दुस्तरः केनापि तर्तुमशक्यः अशक्यप्रतिक्रियो दुर्निवार इत्यर्थः । अरातीः शत्रून् तरन् तिरस्कुर्वन्विनाशयन्नित्यर्थः ॥३७॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. उपाꣳशोर्वीर्येण जुहोमि हुतꣳ रक्षः स्वाहा ।

c. रक्षसां त्वा बधाय । d. अबधिष्म रक्षोऽबधिष्मामुमसौ हतः ॥३८॥

का° [१५.२.६.] देवस्य त्वेति जुहोतीति । प्रागुदग्वा गत्वा गृहीतमुल्मुकं संस्थाप्य स्रुवेणापामार्गतण्डुलान् जुहुयात् ॥ देवस्य त्वा व्याख्यातम् ॥ उपांशोः । त्रीणि यजूंषि रक्षोघ्नदेवत्यानि । उपांशुर्नाम प्रथमो ग्रहस्तस्य वीर्येण सामर्थ्येनाहं जुहोमि अत एव रक्षो राक्षसजातिर्हतं निहतम् स्वाहा सुहुतं हविरस्तु ॥ का° [१५.२.७.] रक्षसां त्वेति स्रुवमस्यति तां दिशं यस्यां जुहोतीति । यस्यां दिशि होमं कुर्यात्तां दिशं प्रति स्रुवं प्रक्षिपेत् ॥ रक्षसां राक्षसानां बधाय नाशार्थं त्वां प्रास्यामीति शेषः ॥ का° [१५.२.७.] अवधिष्म इत्यायत्यनपेक्षमिमि । अध्वर्युादयः पश्चादनवलोकयन्तो देवयजनं प्रत्यागच्छन्ति ॥ रक्षो राक्षसजातिं वयमबधिष्म हतवन्तः जातावेकवचनम् । अमुमिति शत्रुनामग्रहणम् असाविति च अमुं देवदत्तं वयमबधिष्म असौ देवदत्तो हतो मारितोऽस्माभिः ॥३८॥

VIII. सविता त्वा सवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाम् । बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥३९॥

का॰ [१५.४.१३-१५.] उक्तमेव चरित्वा सविता वेत्याह यजमानबाहुं दक्षिणं गृहीत्वा नामास्य गृह्णाति मन्त्रे यथास्थानं मातापित्रोश्च यस्याश्च ज्ञाति राजा भवतीति । अष्टौ देवसूक्तवीषि तत्रान्तिमेन वरुणाय धर्मपतय॰ इति वारुणेन चरुणा चरित्वा यजमानान्तिके गत्वा स्रुचौ सव्ये पाणौ कृत्वा दक्षिणं तद्बाहुमादाय सविता वेति कण्डिकाद्वयरूपं मन्त्रमाह मन्त्रे यथास्थानं यजमानस्य तन्मातापित्रोर्यस्या ज्ञनपदज्ञाति राजा भवति तस्याश्च नामानि गृह्णातीति सूत्रार्थः ॥ अतिजगती यजमानदेवत्या । सविता सवानां प्रसवानामाज्ञानामाधिपत्ये हे यजमान त्वा त्वां सुवतां प्रेरयतु सर्वेषामाज्ञादानेऽधिकारी भवेत्यर्थः । अग्निर्गृहपतीनां गृहस्थानामाधिपत्ये त्वां सुवताम् । सोमो वनस्पतीनां वृक्षाणामाधिपत्ये त्वां सुवतां वृक्षाः सर्वे तवोपकारका भवन्त्वित्यर्थः । बृहस्पतिर्वागर्थं त्वां सुवतां पाणिड्त्याय प्रेरयतु यद्वा षष्ठ्यर्थे चतुर्थी वाच आधिपत्ये सुवताम् । इन्द्रो देवो ज्यैष्ठ्याय ज्येष्ठभावाय त्वां सुवताम् । रुद्रः पशुभ्यः पश्वर्थं पश्वाधिपत्ये वा त्वां सुवताम् । मित्रो देवः सत्यः सुपां सुलुगित्यादिना [पा॰ ७.१.३९.] चतुर्थ्याः सुआदेशः सत्याय सत्यवाक्याय सत्यं वदितुं त्वां सुवताम् । वरुणो धर्मपतीनां धर्मेश्वराणां धर्मशीलानामाधिपत्ये त्वां सुवताम् । सवित्रादयो ऽष्टौ देवसूक्तविषां देवतास्त्वां नानाधिपत्यानि ददतिति वाक्यार्थः ॥३१॥

इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।

इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥४०॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां नवमोऽध्यायः ॥९॥

अत्यष्टिर्यजमानदेवत्या हे देवाः सवित्रादयः इममुकसंज्ञं यजमानमसपत्नं सपत्नरहितं कृत्वा सुवध्वं प्रेरयध्वं किमर्थं महते क्षत्राय महत्यै क्षत्रपदव्यै । महते ज्यैष्ठ्याय ज्येष्ठभावाय । महते जानराज्याय जनानामिदं जानं जानं च तद्राज्यं च जानराज्यं जनानामाधिपत्यायेत्यर्थः । इन्द्रस्यात्मन इन्द्रियाय वीर्याय आत्मज्ञान-

सामर्थ्याय इमं यजमानं सुवधमित्यर्थः (24.) । किम्भूतमिमम् अमुष्य पुत्रम् अमुष्येति षष्ठ्यन्तं यजमानपितुर्नाम ग्राह्यम् तथा अमुष्यै षष्ठ्यर्थे चतुर्थी अमुष्याः देव्याः पुत्रम् अमुष्याऽइति यजमानमातुर्नामग्रहः । अस्यै विशे अस्याः कौरव्याः विशः प्रजाया अधिपतिमिति शेषः अस्यै इति षष्ठ्यन्तं ज्ञातिनाम ग्राह्यम् । अमी इति प्रथमान्तं देशनाम ग्राह्यम् अमी हे कुरवः पञ्चालाः वो युष्माकमेष खदिरवर्मा राजास्तु । अस्माकं ब्राह्मणानां तु सोमश्चन्द्रो वल्लीद्रुपो वा सोमो राजा प्रभुरस्तु ॥४०॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । वाजपेयो राजसूयारम्भान्तो नवमोऽगमत् ॥१॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ देव सवितः प्रसुव यज्ञं प्रसुवेमं भगाय । दिव्यो गन्धर्वः केतपाः केतं नः पुनातु वाचस्पतिर्नोऽअस्य वाजꣳ स्वदतु ॥१॥ २ a. b. c ॥२॥ २ d-i ॥३॥ ३ ॥४॥ ४ a. b. c ॥५॥ सम्पृच स्थ सं मा भद्रेण पृङ्क्त विपृच स्थ वि मा पापेन पृङ्क्त ॥६॥

II. ॥ ५ [- साविषक्] ॥१॥ ६ b [°रापोऽअपांनपाद्यो व ऊ°] ॥२॥ ६ a [प्रशस्तिभिरश्वा भ°] ॥३॥ ७ [वातो वा वो मनो वा] ॥४॥ ८ ॥५॥ ९ a [परीतो - °ज्जिघ्रेधि स°] ॥६॥ ९ b ॥७॥१३॥ ॥

III. ॥ देवस्य वयꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेमेन्द्रस्योत्तमं नाकꣳ रुहेम ॥ देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकमरुहमिन्द्रस्योत्तमं नाकमरुहाम ॥१॥ ११ a ॥२॥ ११ b ॥३॥ १२ a ॥४॥ देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेर्वाजजितो वाजं जेष्म ॥५॥ वाजिनो वाजं जयताधन स्कभ्नुतः । योजना मिमानाः काष्ठां गच्छत ॥६॥ १४ [संतवीवित्य°] ॥७॥ १५ ॥८॥ १६ ॥९॥ १७ [°धसाताऽइव त्मना महो ये] ॥१०॥ १८

॥ ११ ॥ १९ a - गन्तं पितरा मातरा युवमा मा सोमोऽअमृतत्वाय गम्यात् ॥ १२ ॥ १९ b ॥ १३ ॥ २६ ॥ ॥

IV. ॥ २० ॥ १ ॥ २१ a-f ॥ २ ॥ जायऽएहि स्वो रोहाव । २१ g. h. i ॥ ३ ॥ २२ a ॥ ४ ॥ २२ b. c. d - °रुणाः कृष्यै क्षेमाय रय्यै पोषाय ॥ ५ ॥ ३१ ॥ ॥

V. ॥ २३ - °हिताः ॥ १ ॥ २५ [वाजस्येदं प्र° - °द्वान्रयिं पु° -] ॥ २ ॥ २४ - °क्तु ॥ ३ ॥ २८ - असि ॥ ४ ॥ २६ [- आदित्यं वि°] - °स्पतिम् ॥ ५ ॥ २९ [- °षा प्र सरस्वती ।] - नः ॥ ६ ॥ २७ ॥ ७ ॥ ३० a । सरस्वत्यै वाचो यन् तुर्यै तुर्यै दधामि । बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि ॥ ८ ॥ ३१ ॥ ॥

VI. ॥ ३१ a. b. c [त्रीनिमांल्लो°]. d ॥ १ ॥ ३२ a [पञ्चऽऋतून्नुद°]. b [षळृक्षरेण षळृतून्नुद°]. c. d ॥ २ ॥ ३३ ॥ ३ ॥ ३४ a. b. c. d [षोळशाक्षरेण षोळशꣳ स्तो°]. e ॥ ४ ॥ ४३ ॥ ॥ षळनुवाकेषु त्रिचत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे दशमोऽध्यायः ॥ १० ॥

I. अपो देवा मधुमतीरगृभ्णन्नूर्ज्स्वती राजस्वश्चितानाः ।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १ ॥

नवमेऽध्याये वाजपेयो राजसूयसम्बन्धि कियदपि कर्मोक्तं दशमेऽभिषेकार्थजलादानादिराजसूयशेषश्चरकसौत्रामणी चोच्यते ॥ तत्र का° [१५. ४. २०-२२.] इडान्तेऽपो गृह्णाति यूपमुत्तरेण नैमित्तिकीरसम्भवाद्धवेतराः पृथक् पात्रेष्वौदुम्बरेषु [१५. ४. ३३.] सारस्वतीर्गृह्णात्यपो देवा इति । इडाग्रहणं कार्यशेषोपलक्षणम् देवसूरुविषाँ भागपरिहरणान्ते कृते अभिषेकार्था वक्ष्यमाणा अपो वक्ष्यमाणप्रकारेणौदुम्बरवृक्षपात्रेषु पृथग्गृह्णाति तत्र विशेषः निमित्तवशात्प्राप्या नैमित्ति-

क्यः यथान्तरिक्षात्प्रतिगृह्यातपवर्षाः प्रुषाः गोरुल्व्या इत्याद्याः ता राजसूयारम्भात्प्रागेव सम्पाद्य तदानीं यूपमुत्तरेण गृह्णीयात् कुतः असम्भवात् तदानीमातपवर्षणादिर्निमित्तस्याभावात् (1.) इतरा अनैमित्तिकीरपो गत्वा तदानीमिव गृह्णीयात् तत्र मन्त्रानाह अपो देवा इति सरस्वतीनदीसम्बन्धिनीरप आदौ गृह्णाति ॥ चरकसौत्रामण्याः प्राग्वरुणा ऋषिः । अब्देवत्या त्रिष्टुप् । देवा इन्द्राद्यो या अपोऽगृभ्णन्गृहीतवन्तः । किम्भूता अपः मधुमतीः मधुरस्वादोपेताः । तथा ऊर्जस्वतीः ऊर्जो विद्यते यासु विशिष्टान्नरसवतीः । राजस्वः राज्ञः सूयन्ते जनयन्तीति राजस्वः नृपोत्पादिकाः । चितानाः चेतयमानाः सदैवतत्वात्परिदृष्टकारिणीः । पुनस्ता एव विशिनष्टि याभिरद्भिर्देवा मित्रावरुणौ अभ्यषिञ्चन् मित्रावरुणयोरभिषेकं कृतवन्तः । याभिरद्भिर्देवा इन्द्रं देवमरातीः शत्रून् अत्यनयन् अतीत्य नीतवन्तः इन्द्रं शत्रूनत्यक्रामयन्नित्यर्थः छन्दसि परेऽपीति [पा° १.४.८१.] अतेरुपसर्गस्य क्रियापदात्परत्वम् । ता अपो गृह्णामीति शेषः ॥१॥

a. वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा । b. वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । c. वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा । d. वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥

का° [१५.४.३४.] जुहोत्युत्तरासु चतुर्गृहीतं वृष्णऊर्म्यादिभिः स्वाहाकारान्तैः पूर्वैः-पूर्वैः प्रतिमन्त्रमुत्तरैरुत्तरैर्गृह्णाति [१५.४.२३.] अवगूहात्यशोः पुरुषाद्वा पूर्वापराऽऊर्मीऽइति । सारस्वतीरादायोत्तरासु षोडशस्वप्सु वृष्ण ऊर्मिरित्यादिभिः स्वाहान्तैः पूर्वपूर्वमन्त्रैश्चतुर्गृहीताज्यानि गृह्यमाणासु जुहुयात् उत्तरैः स्वाहाकारैर्मन्त्रैस्ताः क्रमेण गृह्णाति उत्तरमन्त्रेषु अमुष्मै इति पदस्थाने चतुर्थ्यन्तं यजमाननाम ग्राह्यम् वृष्ण ऊर्मिरित्यादयो विश्वभृत स्थेत्यन्ता मन्त्राः संहितायां द्विशः पठितास्तेषां पूर्वः-पूर्वः स्वाहान्तस्तेनाऽभ्यक्तोऽनः उत्तरोत्तरः स्वाहाकारहीनस्तेनापामादानम् तत्र गत्वा जले प्रविष्टात्पशोर्नराद्वा यौ पूर्वापरौ कल्लोलौ तौ क्रुत्वा गृह्णातीति सूत्रार्थः ॥ वृष्ण ऊर्मिरसीत्यादीनि आपः स्वराज इत्यन्तानि यजूंषि लिङ्गोक्तदेवतानि । हे कल्लोल त्वं वृष्णो वर्षितुः सेतुः पशोर्नरस्य वा सम्बन्धी

ऊर्मिः कल्लोलोऽसि । राष्ट्रदाः राष्ट्रं जनपदं ददातीति राष्ट्रदाः स्वभावत एव देशप्रदो भवसि अतो राष्ट्रं मे मह्यं देहि स्वाहा हविर्दत्तमस्तु । एवं कृत्वाथ गृह्णाति वृष्ण ऊर्मिरसि राष्ट्रदा अतोऽमुष्मै यजमानाय राष्ट्रं जनपदं देहि अमुष्मै इति चतुर्थ्यन्तं यजमाननाम ग्राह्यम् । एवमुपरिनना अपि मन्त्रा व्याख्येयाः ॥ अपरोर्मिं गृह्णाति वृषसेनोऽसि वृषा सेचनसमर्था सेना जलराशिरूपा (2.) यस्य स वृषसेनः व्याख्यातमन्यत् ॥ २ ॥

a. अर्वेतं स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा । b. अर्वेतं स्थ राष्ट्रदा राष्ट्रमुष्मै दत्त । c. d. ओजस्वती स्थ रा° दत्त । e. f. आपः परिवाहिणी स्थ रा° - दत्त । g. h. अपां पतिरसि रा° - देहि । i. k. अपां गर्भोऽसि रा° - देहि ॥ ३ ॥

का° [१५.४.२४.] स्यन्दमाना इति । नद्यादिप्रवाहस्था अपो गृह्णाति ॥ अर्वेतः अर्वं प्रयोजनमुद्दिश्य नद्यादेः सकाशाद्यज्ञदेशं यन्ति गच्छन्तीत्यर्वेतः इणः क्विपि तुगागमः तथाविधा यूयं राष्ट्रदा देशदात्र्यः स्थ भवथ मे राष्ट्रं दत्त यच्छत दत्तेति बहुवचनम् अन्यद्व्याख्यातम् ॥ का° [१५.४.२५.] प्रतिलोमाः । वक्रतीनां याः (3.) प्रतिगच्छन्ति तासु क्रोमादानि ॥ हे आपो यूयमोजस्वतीः ओजसा बलेन युक्ता भवथ ॥ का° [१५.४.२६.] अपयतीरिति । वक्रतीनामपां मध्याद्वा मार्गान्तरेण गत्वा पुनस्तत्र मिलन्ति ता अपयत्यस्तासु क्रोमादानि ॥ हे आपो यूयं परिवाहिणीः स्थ परि सर्वतो वक्रतीति परिवाहिण्यः सर्वतो वक्रनशीला भवथ उक्तमन्यत् ॥ का° [१५.४.२७.] नदीपतिमिति । समुद्रस्यापां क्रोमादाने ॥ अपां जलानां पतिः स्वामी पालकोऽसि ॥ का° [१५.४.२१.] निवेष्या इति । निविष्य आवर्तस्तद्वत्या निवेष्याः नद्यादौ यत्राम्भोभ्रमस्तत्र क्रोमादाने ॥ हे जलभ्रम त्वमपां गर्भो मध्यवर्ती भवसि ॥ ३ ॥

a. b. सूर्यवचस स्थ रा° । c. d. सूर्यवर्चस स्थ रा° । e. f. मान्दा स्थ रा° । g. h. व्रजक्षित स्थ रा° । i. k. वाशा स्थ रा° । l. m. श-

विष्ठा स्थ रा॰ । n./o. शक्वरी स्थ रा॰ । p. q. जनभृत स्थ रा॰ । r. s. विश्वभृत स्थ रा॰ । t. आपः स्वराज स्थ राष्ट्रदा राष्ट्रमुष्मै दत्त । u. मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाः । v. अनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ॥ ४ ॥

का॰ [१५. ४. ३०.] स्यन्दमानानाꣳ स्थावराः प्रत्यातापऽइति । वक्ष्यमाणानां मध्ये याः स्थिराः सदा घर्मे (4.) वर्तमानास्तासु क्षोमादानि ॥ हे आपो यूयं सूर्यत्वचसो भवथ सूर्यस्येव त्वचस्त्वक् यासां ताः सूर्यत्वचसः सदातपि वर्तमानत्वात् त्वचःशब्दः सान्तस्त्वग्वाची ॥ का॰ [१५. ४. ३१.] अन्तरिक्षात्प्रतिगृह्यातपवर्ष्या इति । आतपे वर्षति सति गगनादप आदायादौ सम्पादिताः सन्ति यूयमुत्तरेण तासु क्षोमादानि ॥ सूर्यस्येव वर्चस्तेजो यासां ताः सूर्यवर्चसः तादृश्यो भवथ ॥ का॰ [१५. ४. ३२.] सरस्या इति । तडागभवास्वप्सु क्षोमादानि ॥ हे आपो यूयं मान्दाः स्थ मन्दतेर्मोदनार्थस्य रूपं मन्दन्ते मोदन्ते भूतानि यत्र बहूदकत्वात्ता मान्दाः भवथ ॥ का॰ [१५. ४. ३२.] कूप्या इति । कूपे भवाः कूप्यास्तत्र क्षोमादानि ॥ हे आपो यूयं व्रजक्षितो भवथ व्रज इति मेघनामसु [निघ॰ १. १०.] पठितम् अत्र तूदकधारणसामर्थ्यात्कूप उच्यते व्रजे कूपे क्षियन्ति निवसन्ति व्रजक्षितः ॥ का॰ [१५. ४. ३२.] प्रुषा इति । प्रुष सेचने प्रुष्णन्ति ओषधीः सिञ्चन्तीति प्रुषाः अवश्यायरूपाः तृणाग्रेषु स्थितास्तासु वस्त्रक्षेपेण ता आत्ताः सन्ति ता यूपमुत्तरेण कृत्वा याच्याः ॥ वाशाः स्थ वश कान्तौ उश्यन्ते जनैः काम्यन्तेऽन्ननिष्पत्तिहेतुत्वाद्वाशा यूयं भवथ ॥ का॰ [१५. ४. ३२.] मधिति । मधुनि क्षोमादाने ॥ हे मधुरूपा आपो यूयं शविष्ठाः शव इति बलनाम [निघ॰ २. ९.] बलिष्ठा बलदात्र्यो भवथ त्रिदोषबलशमनत्वाद्बलकरं मधु ॥ का॰ [१५. ४. ३२.] गोरुल्व्या इति । उल्वं गर्भवेष्टनं तत्र भवा उल्व्याः प्रसूयमानधेनुगर्भवेष्टनोत्थजलं पूर्वं गृहीतमस्ति यूपमुत्तरेण तत्र क्षोमादानि ॥ शक्वरीः शक्लृ शक्तौ अन्येभ्योऽपि दृश्यन्तऽइति [पा॰ ३. २. ७५.] वनिप्रत्ययः वनो र चेति [पा॰ ४. १. ७.] ङीप् रेफश्च शक्नुवन्ति वाक्क्षोदक्षादिभिर्जगद्धर्तुमिति शक्वर्यो गावस्तत्सम्बन्धिन्यो यूयं भवथ ॥ का॰ [१५. ४. ३२.] पय इति ।

दुग्धस्य होमपूर्वं ग्रहणम् ॥ हे आपो यूयं जनभृतो भवथ बालभावे जनान् जन्तून् बिभ्रति पुष्णन्तीति जनभृतः ॥ का° [१५.४.३२.] घृतमिति । घृति होमादाने ॥ हे घृतरूपा आपो यूयं विश्वभृतः विश्वं सर्वं जगद्देवादिकं बिभ्रति विश्वभृतो भवथ राष्ट्रदाः ॥ एवं सारस्वत्यादयो घृतान्ताः सप्तदशाप उक्ताः ॥ का° [१५.४.३५.] आपः स्वराज इति मरीचीर्गृहीत्वा-गृहीत्वाञ्जलिना सर्वासु सꣳसृजतीति । रविकरतप्ता आपो मरीचयस्ता अञ्जलिनादाय पूर्वगृहीतास्वप्सु योजयेत् प्रतिग्रहणमन्त्रः संसर्गस्तूष्णीम् ॥ नात्र होमः षोडशाङ्कतीर्जुहोति द्वयीषु न जुहोति सारस्वतीषु च मरीचिषु चेति श्रुतेः [५.३.४.२३.] । हे आपो मरीचिरूपा यूयं स्वराजः स्थ स्वेनैव राजन्ते ताः स्वराजः अनन्याश्रितराज्या भवथ राष्ट्रदाः अतो ऽमुष्मै यजमानाय राष्ट्रं देशं दत्त ॥ का° [१५.४.३६.] औदुम्बरे पात्रे समासिञ्चत्येना मधुमतीरिति । एनाः सारस्वत्याद्या अप उदुम्बरकाष्ठपात्रे एकीकरोति मन्त्रावृत्तिः ॥ अब्देवत्यं यजुः । मधुमतीः मधुरसवत्य एता आपो मधुमतीभिर्मधुरस्वादोपेताभिरद्भिः पृच्यन्तां संसृज्यन्ताम् । किम्भूता एताः महि महत्क्षत्रं बलं क्षत्रियाय राज्ञे यजमानाय वन्वानाः सम्भजमानाः ददत्य इत्यर्थः वनोतिः सम्भजनार्थः ॥ का° [१५.४.३७.] मैत्रावरुणाधिष्ण्यस्य पुरस्ताज्जिदधात्यनाधृष्टा सीदतेति । औदुम्बरे पात्रे एकीकृतास्ता अपो मैत्रावरुणाधिष्ण्याग्रे सदसि सादयति ॥ अब्देवत्यम् । हे आपो यूयं सीदत तिष्ठत । किम्भूता यूयम् अनाधृष्टाः अपराभूता रक्षोभिः । सहौजसः ओजसा सहिताः बलयुक्ताः । तथा महि महत् क्षत्रं बलं क्षत्रियाय राज्ञे दधतीः दधत्यः स्थापयन्त्यः ॥४॥

II. a. सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् । b. अग्नये स्वाहा ।
c. सोमाय स्वाहा । d. सवित्रे स्वाहा । e. सरस्वत्यै स्वाहा ।
f. पूष्णे स्वाहा । g. बृहस्पतये स्वाहा । h. इन्द्राय स्वाहा ।
i. घोषाय स्वाहा । k. श्लोकाय स्वाहा । l. अꣳशाय स्वाहा ।
m. भगाय स्वाहा । n. अर्यम्णे स्वाहा ॥५॥

का° [१५.५.१.] व्याघ्रचर्मास्तृणाति सोमस्य त्विषिरिति । मैत्रावरुणाधिष्ण्याग्रा-

सादितपालाशादिपात्रचतुष्टयस्य पुरस्ताद्व्याघ्रचर्मास्तृणाति ॥ चर्मदेवत्यम् । हे चर्म त्वं सोमस्य विषिर्दीप्तिरसि भवसि अतस्त्वमेव वत्सदृशी मे मम विषिः कान्तिर्भूयात् यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्तेन सोमस्य विषिरिति श्रुतेः [५.३.५.३.] ॥ का° [१५.५.३.] पार्थानामग्नये स्वाहेति षट् जुहोति प्रतिमन्त्रम् [१५.५.३४.] पार्थानामिन्द्राय स्वाहेति षट् जुहोति प्रतिमन्त्रमिति । पार्थसंज्ञानां द्वादश मन्त्राणां मध्ये अग्नयऽइत्यादीनि षट् पार्थान्यभिषेकादौ जुहोति इन्द्रायेत्यादि षट् अभिषेकान्ते सकृदुच्चारणीयैः ॥ लिङ्गोक्तानि द्वादश यजूंषि । अङ्क्तीत्यग्निः । सुनोति सोमः । सूते सुवति प्रेरयति वा सविता । सरः शब्दप्रवाहो यस्याः सा सरस्वती । पुष्णाति पूषा । बृहतां साम्नां पतिर्बृहस्पतिः । इन्दति ईष्टे इन्द्रः । घुष्यति शब्दं करोति घोषः । श्लोक्यते कीर्त्यते जनैरिति श्लोकः । अंशयति विभाजयति पुण्यपापे तत्फलदानेनेति अंशः अंश विभाज धातुः । भज्यते सेव्यते स भगः । इयर्ति व्याप्नोति विश्वमित्यर्यमा ॥ एतेभ्यः सुब्लुक्तमस्तु ॥५॥

a. पवित्रे स्थो वैष्णव्यौ । b. सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । c. अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥६॥

का° [१५.५.४.] पवित्रे कृत्वा हिरण्यमेनयोः प्रवयतीति । प्रकृतिवत् पवित्रे स्थ इति पवित्रे कृत्वा तयोः स्वर्णं बध्नाति ॥ पवित्रे स्थः व्याख्यातम् [१.१२.] ॥ का° [१५.५.५.] ताभ्यामुत्पुनात्यपः सवितुर्व इति । सहिरण्याभ्यां दर्भपवित्राभ्यां मैत्रावरुणाधिष्ण्याग्रासादिता औडुम्बरपात्रस्थाः अभिषेकार्था अप उत्पुनाति सवितुरित्यादिना राजस्व इत्यन्तेन मन्त्रेण ॥ अब्देवत्यम् । सवितुः सर्वप्रेरकस्य परमेश्वरस्य प्रसवेऽनुज्ञायां स्थितोऽहम् अच्छिद्रेण छिद्ररहितेन समीचीनेन पवित्रेण सूर्यस्य किरणैश्चोत्पुनामि हे आपो वो युष्मान् उत्पवनं करोमि ॥ अनिभृष्टमसि । आपोऽत्राभिधेयाः अतोऽत्रैकवचनान्ता मन्त्रावयवाः श्रुत्या बहुवचनान्ता व्याख्याताः अतः श्रुत्यनुसारेण व्याख्यायते हे आपो यूयमनिभृष्टाः स्थ अस्रज पाके

अयं धातुर्धृष्यर्थे व्याख्यातः अनिधृष्टाः न नितरां धृष्टाः अपराभूता रक्षोभिः । वाचो बन्धुः वाण्या बन्धुभूताः यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदतीति श्रुतेः [५. ३.५.१६.] आपोमयी वागिति सामश्रुतेश्च । तथा तपोजाः तपःशब्देनात्राग्निरुच्यते तपसोऽग्नेर्जातास्तपोजाः अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वाऽएता जायन्ते तस्मादाहु तपोजा इति श्रुतेः [५.३.५.१७.] वायोरग्निरग्नेरापः इति श्रुत्यन्तरात् [तैत्तिरी॰ आरण्य॰ ८.१.] । सोमस्य दात्रमसि सोमस्य दात्र्यो दानकर्त्र्यो भवथ यदा वाऽएनमेताभिरभिषुण्वन्त्यथाऽऽहुतिर्भवतीति श्रुतेः [५.३.५.१८.] सोमदात्र्य आपः । स्वाहा राजस्वः स्वाहाकारेण पूताः सत्यः राजस्वो जनस्य (ऽ) राजानं सुवते जनयन्तीति राजस्वो राजजनिका भवथ ॥ ६॥

सधमादो द्युम्निनीरापऽएता अनाधृष्टा अपस्यो वसानाः ।
पत्स्यासु चक्रे वरुणः सधस्थमपाꣳ शिश्रुर्मातृतमासु वृत्तः ॥ ७॥

का॰ [१५.५.६.] अभिषेचनीयेषिना व्यानयति सधमाद इति ॥ ऽत्पूता अभिषेकार्था अपोऽभिषेकार्थेषु पालाशौडुम्बरवाटाश्वत्थेषु पात्रेषु पूर्वासादितेषु चतुर्धा विभज्य निनयति ॥ वरुणदेवत्या त्रिष्टुप् । या एता आपो वर्तन्ति कीदृश्यः सधमादः सह एकस्मिन्पात्रे माद्यन्ति हृष्यन्ति मादयन्ति प्रीणन्ति वा ताः सधमादः सहपूर्वान्मादयतेः क्विप् सध मादस्थयोश्छन्दसीति [पा॰ ६.३.९६.] सहस्य सधादेशः । द्युम्निनीः द्युम्नं वीर्यमस्ति यासां ता द्युम्निन्यः पूर्वसवर्णदीर्घः द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः [निरु॰ ५.५.] । अनाधृष्टाः रक्षोभिरनभिभूताः । अपस्यः अप इति कर्मनाम [निघ॰ २.१.] अपसि कर्मणि साध्व्यः अपस्याः तत्र साधुरिति [पा॰ ४.४.९८.] यत् सुपां सुलुगिति [पा॰ ७.१.३९.] जसः सुरादेशः । वसानाः वस आच्छादने वसते आच्छादयन्ति पात्राणीति वसानाः । या एवंविधा आपस्तासु अन्तर्मध्ये वरुणो देवः सधस्थं सहस्थानं चक्रे कृतवान् सह स्थीयते यस्मिन् तत्सधस्थम् । किम्भूतो वरुणः अपां शिश्रुः बालकः अपां वाऽएष शिश्रुर्भवति यो राजसूयेन यजतऽइति श्रुतेः [५.३.५.११.] वरुणो राजसूययाजित्वादपां शिश्रुः । किम्भूतास्वप्सु पत्स्यासु पत्स्यमिति गृहनामसु [निघ॰ ३.४.] पठितं गृहवृपासु सर्वेषामाधारत्वात् तथा मातृतमासु अतिशयेन जगन्निर्मात्रीषु ॥ ७॥

a. क्षत्रस्योल्वमसि । b. क्षत्रस्य जरायुसि । c. क्षत्रस्य योनिरसि । d. क्षत्रस्य नाभिरसि । e. इन्द्रस्य वार्त्रघ्नमसि । f. मित्रस्यासि वरुणास्यासि । g. त्वयायं वृत्रं वधेत् । h. दृवासि । i. रुजासि । k. नुमासि । l. पतिनं प्राञ्चम् । m. पतिनं प्रत्यञ्चम् । n. पतिनं तिर्यञ्चं दिग्भ्यः पात ॥ ८॥

का° [१५.५.१५.] तार्प्यप्रभृतीनि क्षत्रस्येति प्रतिमन्त्रम् [१५.५.७.] तार्प्यं परिधापयतीति । तार्प्यपाण्ड्वाधीवासोष्णीषाणि क्रमेण चतुर्भिर्यजुर्भिः परिधत्ते तार्प्यं क्षौमं वल्कलं घृतात्तवस्त्रं वा ॥ तार्प्यदैवतम् हे तार्प्य त्वं क्षत्रस्य यजमानस्य ऊल्वं गर्भाधारभूतमुदकमसि । यजमानो गर्भस्थानीयः ॥ का° [१५.५.१२.] पाण्ड्वं निवस्तऽइति । रक्तकम्बलं परिधत्ते ॥ पाण्ड्वदैवतम् क्षत्रस्य गर्भस्थानीयस्य यजमानस्य जरायु गर्भवेष्टनचर्म हे पाण्ड्व त्वमसि ॥ का° [१५.५.१३.] अधीवासं प्रतिमुञ्चेति । कञ्चुकं गले बध्नाति ॥ अधीवासदैवतम् । हे अधीवास त्वं क्षत्रस्य योनिरसि गर्भसंभवस्थानं योनिः ॥ का° [१५.५.१३.१४.] उष्णीषꣳ संवेष्य निर्वीतेऽवगूहते नाभिदेशे परिकरते वेति । शिरोवेष्टनं शिरसि संवेष्य तत्प्रान्तौ परिक्षितवासोनीव्यां गोपयति (6.) नाभिदेशे वेष्टयति वा ॥ उष्णीषदैवतम् । हे उष्णीष त्वं क्षत्रस्य नाभिर्गर्भबन्धनस्थानमसि नाभ्या संनद्धा गर्भा जायन्तऽइत्याङ्गः [निरु° ४.२१.] ॥ का° [१५.५.१७.] इन्द्रस्य वार्त्रघ्नमिति धनुरातनोतीति । अधर्युर्धनुरधिज्यं करोति ॥ धनुर्दैवतम् । हे धनुस्त्वमिन्द्रस्य सम्बन्धि वार्त्रघ्नं वृत्रोऽनेन हन्यतऽइति वार्त्रघ्नं वृत्रनाशकं धनुरसि तदातनोमीति शेषः ॥ का° [१५.५.१८.] मित्रस्य वरुणास्येत्यस्य बाहू विमार्ष्टीति । मित्रस्य वरुणास्येति मन्त्राभ्यामस्य धनुषो बाहू प्रान्तौ करेण प्रत्येकं विमार्ष्टि ॥ बाहुदैवते यजुषी । हे दक्षिणकोटे त्वं मित्रसम्बन्धी भवसि हे वामबाहो त्वं वरुणसम्बन्धी भवसि ॥ का° [१५.५.११.] धनुः प्रयच्छति त्वयायमिति । यजमानाय धनुर्ददाति ॥ धनुर्दैवतम् । हे धनुः अयं यजमानस्त्वया धनुषा कृत्वा वृत्रं शत्रुं वधेत् हन्यात् ॥ का° [१५.५.२०.] दृवासीति प्रतिमन्त्रमादाय तिस्र इषूः प्रयच्छति पतिनमिति प्रतिमन्त्रमिति । दृवा-

सीत्यादिमन्त्रत्रयेण बाणत्रयमादाय पतिनमित्यादिमन्त्रत्रयेण प्रत्येकं यजमानाय ददाति ॥ षडङ्गूंषि इषुदेवत्यानि । हे इषो त्वं दृंहासि दृ विदारणे दृणाति शत्रून्विदारयति दृंहा । हे इषो त्वं रुजासि रुजो भङ्गे रुजति शत्रून्भनक्ति रुजा । हे इषो त्वं ज्रुमासि ज्रुमायी विधूनने ज्रुमायति शत्रून्कम्पयति ज्रुमा ॥ यजमानाय ददाति । हे इषवः प्राञ्चं प्रागञ्चनं पूर्वदिश्यवस्थितमेनं यजमानं यूयं पात पालयत । प्रत्यञ्चं प्रत्यगञ्चनं पश्चिमदिश्यवस्थितमेनं यजमानं पात । तिर्यञ्चं तिर्यगञ्चनमितस्ततोऽवस्थितमेनं यजमानं पात । दिग्भ्योऽन्याभ्योऽपि दिग्भ्यः सकाशादेनं पात रक्षत ॥ ८॥

a. आविर्मर्याः । b. आवित्तोऽग्निर्गृहपतिः । c. आवित्त इन्द्रो वृद्धश्रवाः । d. आवित्तौ मित्रावरुणौ धृतव्रतौ । e. आवित्तः पूषा विश्ववेदाः । f. आवित्ते द्यावापृथिवी विश्वशम्भुवौ । g. आवित्तादितिरुरुशर्मा ॥ १॥

का° [१५.५.२१.] आविर्मर्या इति वाचयतीति । इषुसमर्पणानन्तरमाविर्मर्या इत्यादीन्सप्त मन्त्रानावित्संज्ञान्यजमानं वाचयति ॥ प्रजापतिर्देवतम् । मर्या इति मनुष्यनामसु [निघ° २.३.] पठितम् हे मर्या मनुष्या ऋत्विजो यूयमाविः प्रकटा भवतेति शेषः सम्यक्कर्मानुतिष्ठतेत्यर्थः यद्वा हे मर्या ऋत्विजोऽयं यजमानः आविः प्रकटो युष्मत्समक्षं कथ्यतऽइति शेषः ॥ आवित्तोऽग्निर्गृहपतिः । श्रुत्युक्तैर्विभक्तिव्यत्ययैर्व्याख्यायते [५.३.५.३१-३७.] । गृहपालकायाग्नेयेऽयं यजमानः आवित्तः आवेदितः ज्ञापितः । प्रथमान्तं पदद्वयं प्रतिमन्त्रं चतुर्थ्यर्थे ॥ वृद्धं श्रवो धनं कीर्तिर्वा यस्य स वृद्धश्रवाः तस्मै इन्द्रायायं यजमान आवित्तः ॥ व्रतमिति कर्मनाम [निघ° २.१.] धृतं व्रतं कर्म याभ्यां तौ धृतव्रतौ ताभ्यां धारितकर्मभ्यां मित्रावरुणाभ्यायावित्तौ आवित्तः आवेदितः ॥ विश्ववेदसे सर्वज्ञाय पूष्णेऽयमावित्तः ॥ विश्वस्य सर्वस्य शं सुखं भवति याभ्यां ते विश्वशम्भुवौ ताभ्यां द्यावापृथिवीभ्यामावित्ते वचनलिङ्गव्यत्ययः आवित्तः ॥ उरु महत् शर्म शरणं सुखं वा यस्याः सा उरुशर्मा तस्यै अदितये आवित्ता आवित्तोऽयं यजमानः ॥ यद्वा यथाश्रुतमे-

व व्याख्या गृह्यतिरग्निरावित्त आविदितो यजमानमिति शेषः एवमग्रेऽपि ॥ १ ॥

III. a. अवेष्टा दन्दशूकाः । b. प्राचीमारोह गायत्री त्वावतु रथन्तर७ साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥ १० ॥

का° [१५. ५. २२.] अवेष्टा इति लोकायतमाविध्यति केशवास्ये सदोऽन्तऽउपविष्टायेति । सदःसमीपोपविष्टस्य दीर्घकेशनरस्य मुखे तान्त्रं क्षिपति ॥ मृत्युनाशनं यजुः । अवपूर्वो यज्निर्नाशनार्थः दन्दशूका अत्यर्थं दशनशीला मृत्युकेतवः सर्पसदृशा यज्ञविघ्नकारिणो राक्षसादयोऽवेष्टा नाशिता भवन्त्विति शेषः तथो मृत्युर्यो बधस्तमेवैतदतिनयतीति श्रुतिः [५. ४. १. १.] ॥ का° [१५. ५. २३.] सुन्वन्तमाक्रमयन्दिशः प्राचीमारोहेति वाचयति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गमिति । यजमानं यथालिङ्गं प्रतिमन्त्रं प्रतिदिशं दिश आक्रमयन्वाचयति ॥ पञ्च यजूंषि यजमानदेवत्यानि । हे यजमान त्वं प्राचीं दिशमारोह आक्रमस्व तथाविधं त्वां छन्दसां मध्ये गायत्री छन्दोऽवतु रक्षतु । साम्नां मध्ये अभि त्वा शूर नोनुम इत्यस्यामृच्युत्पन्नं रथन्तरं साम [ह्° संहि° १. ३. १. ५. १. - २. १. १. ११. १.] त्वां रक्षतु । स्तोमानां मध्ये त्रिवृत्स्तोमोऽवतु । ऋतूनां मध्ये वसन्त ऋतुरवतु । ब्रह्म ब्राह्मणजातिस्त्वदीयं द्रविणं धनं रक्षतु यद्वा धनरूपा ब्राह्मणजातिस्त्वामवतु ब्राह्मणादीनां धनसाधनत्वाद्धनत्वमुच्यते । त्रिवृत्स्तोमस्य स्वरूपं सामब्राह्मणे [पञ्चविंशब्रा° २. १.] आम्नातम् तिसृभ्यो ह्रिंकरोति स प्रथमया तिसृभ्यो ह्रिंकरोति स मध्यमया तिसृभ्यो ह्रिंकरोति स उत्तमयोद्यती त्रिवृतो विष्टुतिरिति । अस्यायमर्थः । उपास्मै गायतेत्यादीनि तृचात्मकानि त्रीणि सूक्तानि सन्ति.[ऋ° संहि° अष्ट° ६. ७. ३६. म° १. १. ५.] तेषु तिसृभिर्ऋग्भिर्गायेत् । काभिस्तिसृभिः । प्रथमया । त्रिष्वपि सूक्तेषु या प्रथमा तया स उद्गाता (7.) गायेत् तथा सति तिसृभिर्गीतं भवति सोऽयं प्रथमपर्यायः । द्वितीये पर्याये सूक्तत्रयगतयोत्तमया गायेत् । अनेन प्रकारेण त्रिवृत्स्तोमसम्बन्धिनी विशिष्टा स्तुतिः सम्पद्यते सेयं स्तुतिरुच्यतीति नाम्ना सम्पद्यत इत्यर्थः ॥ १० ॥

दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥ ११ ॥

अथ द्वितीयो मन्त्रः । हे यजमान त्वं दक्षिणां दिशमाक्रम । त्रिष्टुप्छन्दः । त्वामिद्धि हवामहऽइत्यस्यामृच्युत्पन्नं बृहत्साम [ह्वः संहि° १.३.१.५.२-२.२.१.१२.१.] । पञ्चदश स्तोमः । ग्रीष्म ऋतुः । द्रविणरूपं क्षत्रं क्षत्रियजातिः एते त्वामवन्तु क्षत्रं तव द्रविणमवत्विति वा । पञ्चदशस्तोमस्त्वेवमाम्नातः [पञ्चविं° ब्रा° २.४.] पञ्चभ्यो हिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिंकरोति स एकया स तिसृभिः स एकया पञ्चभ्यो हिंकरोति स एकया स एकया स तिसृभिः पञ्चपञ्चिनी पञ्चदशस्य विष्टुतिरिति । पूर्वोक्तस्त्रिवृत्स्तोम एक एव (8.) सूक्तत्रयनिष्पाद्यः अन्ये तु स्तोमा एकेनैव तृचात्मकेन सूक्तेन निष्पाद्यन्ते । तत्रायं क्रमः । प्रथमपर्यायेऽ आवृत्तिः पञ्चभिस्तत्रादौ तिसृभिर्ऋग्भिर्गायेत् इतरे द्वे सकृत्सकृद्गायेत् । द्वितीयपर्यायेऽ प्रथमां सकृत् मध्यमां तिसृभिः तृतीयां सकृत् । तृतीयपर्यायेऽ आद्ये द्वे सकृत् तृतीयां तिसृभिरिति पञ्चदशस्तोमसम्बन्धिनी विष्टुतिः पञ्चपञ्चिनीत्यभिधीयतऽइत्यर्थः ॥ ११ ॥

प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड्द्रविणम् ॥ १२ ॥

अथ तृतीयो मन्त्रः हे यजमान त्वं प्रतीचीं दिशमारोह । जगती छन्दः त्वामवतु । यद्ग्याव इन्द्र ते शतमित्यस्यामृच्युत्पन्नं वैरूपं साम [ह्वः संहि° १.३.२.४.६.-२.२.२.११.१.] । सप्तदश स्तोमः । वर्षा ऋतुः । विट् वैश्यजातिलक्षणं द्रविणम् एते त्वामवन्तु यद्वा वैश्यजातिस्ते द्रविणमवतु ॥ सप्तदशस्तोमस्त्वेवमाम्नातः [पञ्चविं° ब्राह्म° २.७.] पञ्चभ्यो हिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिंकरोति स एकया स तिसृभिः स एकया सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिर्दशसप्ता सप्तदशस्य विष्टुतिरिति । प्रथमपर्यायेऽ प्रथमां त्रिर्गायेत् मध्यमोत्तमे सकृत् द्वितीयपर्यायेऽ प्रथमोत्तमे सकृन्मध्यमां त्रिर्गायेत् तृतीयपर्यायेऽ प्र-

थमां सकृद्गायेन्मध्यमोत्तमे त्रिरिति सप्तदशस्तोमस्य विविधा स्तुतिर्दशसप्तेत्यभिधीयतऽइत्यर्थः ॥ १२ ॥

उदीचीमारोहानुष्टुप्त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम् ॥ १३ ॥

अथ चतुर्थी मन्त्रः । हे यजमान त्वमुदीचीं दिशमारोह । अनुष्टुप्छन्दः । पिबा सोममिन्द्र मन्दतु त्वा एतस्यामृच्युत्पन्नं वैराजं साम [ह्वः संहि० १.५.१.१.८.] । एकविंश स्तोमः । शरदृतुः । फलं यज्ञफललक्षणं द्रविणं धनम् एते त्वामवन्तु ॥ एकविंशस्तोमस्त्वेवमाम्नातः [पञ्चविं० ब्रा० २.१४.] सप्तभ्यो हिंकरोति स तिसृभिः स तिसृभिः स एकया सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिः सप्तभ्यो हिंकरोति स तिसृभिः स एकया स तिसृभिः सप्तसप्तिन्येकविंशस्य विष्टुतिरिति । प्रथमपर्याये प्रथममध्यमे त्रिर्गायेदुत्तमां सकृत् द्वितीयपर्याये प्रथमां सकृद्गायेन्मध्यमोत्तमे त्रिः तृतीयपर्याये मध्यमां सकृद्गायेत्प्रथमोत्तमे त्रिरित्येकविंशस्तोमस्य विष्टुतिः सप्तसप्तिनीत्युच्यतऽइत्यर्थः ॥ १३ ॥

a. ऊर्धामारोह पङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशिशिरावृतू वर्चो द्रविणम् । b. प्रत्यस्तं नमुचेः शिरः ॥ १४ ॥

अथ पञ्चमो मन्त्रः । हे यजमान ऊर्धां दिशमारोह । पङ्क्तिः छन्दः । प्रो षस्मै पुरोरथमित्येतस्यामृच्युत्पन्नं शाक्वरं साम [ह्वः संहि० २.१.१.१४.१.] रेवतीर्नः सधमाद इत्येतस्यामृच्युत्पन्नं साम रैवतम् [ह्वः संहि० १.२.२.१.१.-२.४.१.१४.१.] । त्रिणवत्रयस्त्रिंशौ स्तोमौ । हेमन्तशिशिरावृतू । वर्चस्तेजो ब्रह्मवर्चसं वा द्रविणम् एते त्वामवन्तु यद्वा वर्चस्तेजोऽभिमानी देवस्ते धनं रक्षतु ॥ त्रिणव स्तोम एवमाम्नातः [पं० ब्रा० ३.१.] नवभ्यो हिंकरोति स तिसृभिः स पञ्चभिः स एकया नवभ्यो हिंकरोति स एकया स तिसृभिः स पञ्चभिर्नवभ्यो हिंकरोति स पञ्चभिः स एकया स तिसृभिर्वज्रो वै त्रिणव इति । प्रथमपर्याये प्रथमां त्रिर्गायेन्मध्यमां पञ्चकृत्वः उत्तमां सकृत् द्वितीयपर्याये प्रथमां सकृद्गायेन्मध्यमां त्रिरुत्तमां पञ्चकृत्वः तृतीयपर्याये प्रथमां पञ्चकृत्वो मध्यमां सकृदुत्तमां त्रिर्गायेत् सोऽयं त्रिरावृत्तनवसं-

ख्योपेतत्वात्त्रिणवनामको वज्रसमानः स्तोमः ॥ त्रयस्त्रिंशस्तोम एवमाम्नातः [पं० ब्रा० ३. ३.] एकादशभ्यो ह्रिंकरोति स तिसृभिः स सप्तभिः स एकयैकादशभ्यो ह्रिंकरोति स एकया स तिसृभिः स सप्तभिरेकादशभ्यो ह्रिंकरोति स सप्तभिः स एकया स तिसृभिरुत्तो वै त्रयस्त्रिंश इति । प्रथमपर्याये प्रथमां त्रिर्गायेन्मध्यमां सप्तकृत्व उत्तमां सकृत् द्वितीयपर्याये प्रथमां सकृन्मध्यमां त्रिरुत्तमां सप्तकृत्वः तृतीयपर्याये प्रथमां सप्तकृत्वो मध्यमां सकृदुत्तमां त्रिर्गायेत् सोऽयं त्रयस्त्रिंश स्तोमः सर्वेषां स्तोमानामन्तः ॥ ॥ का० [१५. ५. २४.] आक्रम्य पादेन सीसं निरस्यति प्रत्यस्तमिति । व्याघ्रचर्मपश्चाद्भागे निक्षिप्तं सीसमाक्रम्य पादेन क्षिपेत् ॥ असुरदेवत्यम् । नमुचेरसुरस्य शिरो मस्तकं प्रत्यस्तम् असु क्षेपणे प्रतिगृह्य क्षिप्तं सीसरूपेण ॥ १४ ॥

a. सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् । b. मृत्योः पाहि ।

c. ओजोऽसि सहोऽस्यमृतमसि ॥ १५ ॥

का० [१५. ५. २५.] व्याघ्रचर्मारोहयति सोमस्य त्विषिरिति । अभिषेकार्थं राजानं व्याघ्रचर्मणि स्थापयेत् ॥ चर्मदेवत्यम् व्याख्यातम् [क० ५.] ॥ का० [१५. ५. २६.] रुक्मधःपदं कुरुते मृत्योरिति । पादतले हिरण्यं कुर्यात् ॥ रुक्मदेवतम् । हे सुवर्ण मृत्योः सकाशान्मां पाहि पालय ॥ का० [१५. ५. २७.] शिरसि च नवतर्न्ह शततर्न्ह वौजोऽसीति । नवच्छिद्रं शतच्छिद्रं वा सौवर्णमण्डलं यजमानशिरसि कुर्यात् ॥ रुक्मदेवतम् । हे हिरण्य त्वमोजोऽसि अमुं जेष्यामीति मनोवृत्तिरोजः तद्रूपं त्वमसि । शारीरं बल सहस्तद्रूपमसि । अमृतं विनाशरहितं त्वमसि ॥ १५ ॥

a. हिरण्यवर्णाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्यश्च ।

आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च ॥

b. मित्रोऽसि वरुणोऽसि ॥ १६ ॥

का० [१५. ५. २८.] बाहूऽउदृह्यति हिरण्यवर्णाऽइति । यजमानबाहू ऊर्ध्वौ करोति ॥ मित्रावरुणदेवत्या त्रिष्टुप् यजुरुक्ता मित्रोऽसीति यजुः । हे वरुण शत्रुनिवारक दक्षिणबाहो हे मित्र सखिवत्पालक वामबाहो तौ युवां गर्तं पुरुष-

मारोहतमारोहणं कुरुतम् बाहू वै मित्रावरुणौ पुरुषो गर्त इति [५.४.१.१५.] श्रुतिरध्यात्मविषयं व्याचष्टे । पुरुषारोहणानन्तरमदितिमखण्डितां स्वसेनां दितिं खण्डितां परसेनां चक्षाथां क्रमेणानुग्रहनिग्रहदृष्ट्या समीक्षेथाम् तौ कौ यौ युवामुभौ द्वौ उषसो विरोके रात्रेः समाप्तौ उदियः उदयं कुरुथः एतेर्लटि मध्यमद्विवचने इथ इति रूपम् सूर्योदयानन्तरं स्वस्वव्यापारे प्रवर्तेथे इत्यर्थः सूर्यश्च उदेति ययोर्युवयोः कार्यसम्पादनायेत्यर्थः । किम्भूतौ युवां हिरण्यरूपौ हिरण्यवद्रूपं ययोस्तौ सुवर्णखचितकटकाद्यलंकारेण हिरण्यवद्भासमानौ । तथा इन्द्रौ सामर्थ्योपेतौ ॥ एवमध्यात्ममर्थः अधिदैवं वयमर्थः ॥ हे वरुण हे मित्र मित्रावरुणौ देवविशेषौ युवां गर्तं रथोपरिभागं गर्तसदृशमारोहतम् परवाणेभ्यो रक्षितुं चर्मकीलकादिभिराच्छादितो रथस्योपरिभागो गर्तसदृशो भवति रथोऽपि गर्त उच्यते गृणाति स्तुतिकर्मण इति [निरु० ३.५.] यास्कोक्तेर्गर्तो रथः । यौ युवामुषसो विरोके उषःकालानन्तरम् उदियः उद्गच्छथः सूर्यश्चेत्तदा (8.) उदेति । किम्भूतौ हिरण्यरूपौ अतितेजस्विनौ । इन्द्रौ परमेश्वरौ । ततो रथारोहणानन्तरमदितिं दितिं च युवां चक्षाथाम् अदितिमदीनं विहितानुष्ठातारं दितिं दीनं नास्तिकवृत्तं च पश्यतम् अयं पापी अयं पुण्यवानिति युवां पश्यतमित्यर्थः अमुमर्थं श्रुतिराह [५.४.१.१५.] ततः पश्यतश्च स्वं चारणं चेत्येवैतदाहेति ॥ का० [१५.५.२१.] मित्रोऽसि वरुणोऽसीति वा । अनेन मन्त्रेण वा बाहू उद्गृह्णाति ॥ हे वामबाहो मित्रोऽसि हे दक्षिणबाहो त्वं वरुणोऽसि ॥१६॥

IV. सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण ।
क्षत्राणां क्षत्रपतिरेध्यति द्युमून्पाहि ॥१७॥ १.४०. ॥१८॥

का० [१५.५.३०-३३.] स्थितं प्राञ्चमभिषिञ्चति पुरोहितोऽधर्युर्वा पुरस्तात्पालाशेन प्रथमं पश्चादितरे द्वितीयेन स्वस्तृतीयेन मित्रो राजन्यो वैश्यश्चतुर्थेन सोमस्य त्वा द्युम्नेनेति प्रतिमन्त्रमभिषिञ्चामीति सर्वत्र साकाङ्क्षत्वात्क्षत्राणां क्षत्रपतिरेधीति चेममुष्येति च प्रथमो देवसूवदिति । अस्यार्थः । रुक्मसहितव्याघ्रचर्मणि प्राङ्मुखमवस्थितं राजानं पुरोहितादयः पुरस्ताद्वस्थायाभिषिञ्चेयुः । पालाशौ-

डुम्बरन्यग्रोधाश्वत्थानि चतुर्विधान्यभिषेकजलपात्राणि स्थापितानि । तत्र पालाशपात्रेण पुरोहिताध्वर्योरन्यतरः प्रथममभिषिञ्चेत् इतरे स्वादयः पश्चादवस्थिता अभिषिञ्चेयुः तानेवाह । स्वो राज्ञो भ्राता द्वितीयेनौडुम्बरपात्रेण मित्रभूतः कश्चित्क्षत्रियस्तृतीयेन वटपात्रेण वैश्यश्चतुर्थेनाश्वत्थपात्रेणाभिषिञ्चति । चतुर्णामभिषेक्तॄणां क्रमेण सोमस्याग्नेः सूर्यस्येन्द्रस्येते चत्वारो मन्त्राः । अभिषिञ्चामीति पदमग्रिमेषु त्रिषु मन्त्रेष्वनुवर्तते । क्षत्राणामित्यवयवोऽपि प्रथमादिमन्त्रेषु योज्यः । इममसुष्येति मन्त्रं प्रथमः पुरोहितोऽध्वर्युर्वा देवसूदविःक्षिव नामयज्ञेनयुक्तं पठति । प्रथमयज्ञेनादन्येषामिममसुष्येति मन्त्रशेषो न भवति ब्राह्मणानाꣳ राजेति मन्त्रलिङ्गादिति सूत्रार्थः ॥ चतुर्णां मन्त्राणां यजमानो देवता । हे यजमान सोमस्य द्युम्नेन चन्द्रस्य यशसा त्वा त्वामभिषिञ्चामि तेनाभिषिक्तः सन् क्षत्राणां क्षत्रपतिरेधि क्षत्रियाणां सर्वेषां मध्ये क्षत्रपतिः क्षत्रियेश्वरः एधि भव अति दिव्यून्पाहि दो अवखण्डने व्यत्ति खण्डयन्ति दिव्यवो बाणाः इषवो वै दिव्यव इषुबधमेवैनमेतदतिनयतीति श्रुतेः [५. ४. २. २.] तानतिक्रम्य शत्रुप्रयुक्तानिषादीनपसार्य इमं यजमानं हे सोम त्वं पाहि पालय ॥ इमं देवाः । व्याख्यातापि व्याख्यायते । हे देवाः सोमादयो दशरथस्य पुत्रं कौशल्यायाः पुत्रं कोशलायै विशे प्रजायै तिष्ठत्तमिमं राममसपत्नं शत्रुरहितं कृत्वा मरुते क्षत्राय मरुते ज्येष्ठत्वाय मरुते ज्ञानराज्यायेन्द्रस्यैश्वर्याय यूयं सुवर्धं प्रेरयध्वम् हे अमी कोशला एष रामो वो युष्माकं राजा अस्माकं ब्राह्मणानां तु सोमो राजा । एतावन्तं मन्त्रं पठित्वा पुरोहितोऽध्वर्युर्वाभिषिञ्चेत् ॥ ॥ राजभ्रातुर्मन्त्रमाह । अग्नेर्भ्राजसाभिषिञ्चामि क्षत्राणामित्यादि इन्द्रस्येन्द्रियायेत्यन्तो मन्त्रः । हे यजमान अग्नेर्वैश्वानरस्य भ्राजसा तेजसा त्वामभिषिञ्चामि क्षत्राणामित्यादिः पूर्ववद्व्याख्या ॥ ॥ राजमित्रमन्त्रमाह । सूर्यस्य वर्चसाभिषिञ्चामि क्षत्राणामित्यादि पूर्ववत् । हे यजमान सूर्यस्य तेजसा त्वामभिषिञ्चामि । अन्यत्पूर्ववत् ॥ ॥ वैश्यमन्त्रमाह । इन्द्रस्येन्द्रियेणाभिषिञ्चामि क्षत्राणामित्यादि पूर्ववत् । हे यजमान इन्द्रस्य वीर्येण त्वामभिषिञ्चामि क्षत्राणामित्यादि पूर्ववत् ॥ श्रुत्या तु द्युम्नादिशब्दैर्वीर्याण्येव व्याख्यातानि ॥ १७ ॥ १८ ॥

a. प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिचं इयानाः ।

ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः ॥

b. विष्णोर्विक्रमणमसि । c. विष्णोर्विक्रान्तमसि ।

d. विष्णोः क्रान्तमसि ॥ ११ ॥

का° [१५.६.८.] कण्डूयन्याभिषेकेण प्रतिलिम्पते प्र पर्वतस्येति । यजमानः कृष्णविषाणया कृत्वाभिषेकोदकेन स्वाङ्गलग्नेन स्वाङ्गं लिम्पति ॥ अब्देवत्या त्रिष्टुप् । प्रेत्युपसर्गश्चरतीति पदेन सम्बध्यते नावः प्रचरन्ति । नूयन्ते स्तूयन्ते स्तोत्रशस्त्रमन्त्रैरिति नावः यद्वा नुदन्ति प्रेरयन्ति फलप्राप्त्यै ता नावः आकृतिपरिणामभूता आपः प्रचरन्ति गच्छन्ति आदित्यमण्डलं प्रति ग्लानुदिभ्यां डौरिति [उणा° २.६४.] नुदतेर्डौप्रत्ययः । किं कृत्वा वृषभस्य वर्षितुरग्नेः पृष्ठात्पृष्ठप्रदेशात् उत्थायेति शेषः । किम्भूतस्य वृषभस्य पर्वतस्य पर्वाणि पौर्णमास्यमावास्याचातुर्मास्यादीनि विद्यन्ते यस्य स पर्वतस्तस्य पर्वमरुह्यां त इति (10.) तप्रत्ययः । किम्भूता नावः स्वसिचः स्वेनैवात्मनैव सिञ्चन्ति विश्वमभिषिञ्चन्ति स्वसिचः । तथा इयानाः यन्तीत्येवंशीलाः इयानाः एतेस्ताच्छील्यवयोवचनशक्तिषु चानशिति [पा° ३.२.१२९.] चानश्प्रत्ययः चित्वादन्तोदात्तं पदम् गमनशीलाः ता हि आदित्यमण्डलं प्राप्य मध्यस्थानमागच्छन्ति मध्यस्थानात्पृथिवीम् तदुक्तम् अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति । ता आकृतिपरिणामभूता आप आदित्यमण्डलं प्राप्याधराक् आववृत्रन् अधस्तादावर्तन्ते वृतेर्णिजन्ताच्छुङि रगागमश्छान्दसः । किम्भूतास्ताः उदक्ताः ऊर्ध्वमक्ताः अञ्चु गतिपूजनयोः ऊर्ध्वं गताः सत्यः अहिं मेघमनु रीयमाणाः मेघमनुसरन्त्यः रीयतिर्गत्यर्थः । किम्भूतमहिं बुध्न्यं बुध्नमन्तरिक्षं तत्र भवो बुध्न्यः अन्तरिक्षे वर्तमानम् ॥ ॥ यद्वायमर्थः । पर्वतशब्देनादित्य उच्यते वृषभस्य वर्षितुः पर्वतस्यादित्यस्य पृष्ठादियानाः निर्गच्छन्त्यो नावः स्तुत्या आपः प्रचरन्ति सर्वतो गच्छन्ति किम्भूताः स्वसिचः स्वयं सेक्त्र्यः आदित्योपरिष्टादापो नाव्या उच्यन्ते तथा च श्रुतिः [१०.५.६.१४.] नाव्या आप एव यन्नुष्मत्य इष्टका इत्युपक्रम्य षष्टिश्च वै त्रीणि च शतान्यादित्यं नाव्या अभिक्षरन्तीत्याह । ता उदक्ता व्यक्ताः सत्यः बुध्न्यमन्तरिक्षस्थमहिं मेघमनुरीयमाणा अनुप्रविश्य गच्छन्त्यः सत्यः प्रावृट्काले अधराक् अधस्ताद्भूमिं प्रति आववृत्रन् आवर्तन्ते आग-

ह्नन्ति ॥ ॥ यद्वायमर्थ ऋचोऽस्याः । वृषभस्य वर्षणासमर्थस्य पर्वतस्य हिमवद्विन्ध्यादेः पृष्ठादियाना गन्त्र्यो वन्त्र्यो नावो नौतार्या महानद्यो गङ्गाद्याः प्रचरन्ति स्वसिचः स्वमात्मीयं यजमानक्षेत्रं सिञ्चन्ति ताः ता एव नावोऽधराक् अधस्तात् आववृत्रन् राजसूययाजिनोऽर्थायावर्तन्ते । किम्भूताः उदक्ताः अभिषिकपात्रेषु उत्क्षिप्ताः प्रक्षिप्ताः । तथा बुध्न्यं बुध्नशब्देन मूलमुच्यते तत्रभवं बुध्न्यं प्रधानमित्यर्थः अहिमन्त्रारं शत्रूणां यजमानमनु रीयमाणाः यजमानं प्रति सिच्यमानाः ॥ का° [१५. ६. १.] चर्मणि त्रिर्विक्रमयति विष्णोरिति प्रतिमन्त्रमिति । अध्वर्युर्यजमानेन व्याघ्रचर्मणि त्रिभिर्मन्त्रैस्त्रिवारं पादप्रक्षेपं कारयेत् ॥ त्रीणि यजूंषि यजमानदेवत्यानि । हे मदीय प्रथम प्रक्रम त्वं विष्णोर्व्यापनशीलस्य यज्ञपुरुषस्य जगदीश्वरस्य त्रिविक्रमावतारस्य विक्रमणं प्रथमपादप्रक्षेपेण जितो भूलोकोऽसि । हे द्वितीय प्रक्रम त्वं विष्णोः विक्रान्तं द्वितीयपादप्रक्षेपेण जितमन्तरिक्षमसि । हे तृतीय प्रक्रम त्वं विष्णोः क्रान्तं तृतीयपादप्रक्षेपेण जितं त्रिविष्टपमसि । इदं मन्त्रत्रयं लोकत्रयजये हेतुभूतं तित्तिरिराह विष्णुक्रमान्क्रमते विष्णुरिव भूत्वेमांल्लोकानभिजयतीति । इमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तमिति श्रुतिः [५. ४. २. ६.] ॥ ११ ॥

a. प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु । b. अयमुष्य पितासावस्य पिता । a. वयꣳ स्याम पतयो रयीणाꣳ स्वाहा । c. रुद्र यत्ते क्रिवि परं नाम तस्मिन्नुतमस्यमेष्टमसि स्वाहा ॥ २० ॥

का° [१५. ६. ११.] शालाद्वार्ये जुहोति पुत्रेऽन्वारब्धे प्रजापतऽइति । ततः सदसः शालायामागत्य पुत्रेऽन्वारब्धे शालाद्वार्येऽग्नौ जुहोति ॥ प्रजापतिर्देवत्या त्रिष्टुब्यजुर्मध्या तृतीयचतुर्थपादमध्येऽयमुष्येतियजुर्युक्ता । हे प्रजापते त्वत्तः अन्यो देवताविशेषः तानि एतानि विश्वा विश्वानि सर्वाणि रूपाणि नानाजातीयानि वर्तमानभूतभविष्यत्कालविषयाणि न परिबभूव परिभवितुं समर्थो नाभूत् परिभवः सृष्टेरप्युपलक्षणम् त्वदन्यो देव एतानि भूतानि स्रष्टुं संहर्तुं चाप्यशक्त

इत्यर्थः अतो वयं यत्कामास्ते जुहुमः यः कामो येषां ते यत्कामाः येन कामेन त्वां जुहुमः तत्कामरूपं फलं नोऽस्माकमस्तु ॥ यजुर्व्याख्यायते । अयममुष्य पितेति पुत्रं पित्रीकृत्य तयोर्नाम गृह्णाति अयं रामोऽमुष्य दशरथस्य पिता । असावस्य पितेति यथायथमेव नामग्रहः यथा असौ दशरथोऽस्य रामस्य पितेति ॥ सर्वथा सपुत्रा वयं रयीणां धनानां पतयः स्याम भवेम ॥ का° [१५.६.१२.] आग्नीध्रीये पालाशेन शेषान् जुहोति रुद्र यत्तऽइत्युत्तरार्धऽइति । पालाशेनाभिषेकपात्रेणाभिषेकोदकशेषानाग्नीध्रीयाग्नेरुत्तरभागे जुहोति ॥ रुद्रदेवत्यम् । हे रुद्र यत्ते तव क्रिवि कर्तृ हिंसितृ वा परमुत्कृष्टं नामास्ति क्रिवि हिंसाकरणयोः [धा° १५.८१.] इप्रत्ययः । एवं रुद्रं सम्बोध्य होमद्रव्यमाह हे हविः तस्मिन्रुद्रनाम्नि त्वं हुतमसि अमेष्टं चासि अमाशब्दो गृहवाची [निघ° ३.४.] मदीये गृहे इष्टं दत्तमसि स्वाहा सुहुतमस्तु ॥२०॥

V. a. इन्द्रस्य वज्रोऽसि । b. मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि ।
c. अव्यथायै त्वा स्वधायै त्वारिष्टोऽअर्जुनः । d. मरुतां प्रसवेन जय ।
e. आपाम मनसा । f. समिन्द्रियेण ॥२१॥

का° [१५.६.१५.] वाजपेयवद्रथमवकृत्य दक्षिणास्यां वेदिश्रोणौ युनक्ति पूर्ववन्मित्रावरुणयोरिति चतुर्भिरिति । वाजपेये-इव रथवाहनाद्रथमिन्द्रस्य वज्रोऽसीति मन्त्रेण भूमाववतार्य मित्रावरुणयोरिति मन्त्रेण चतुर्भिरश्वैर्वाजपेयवदेव युनक्ति प्रत्यृचं मन्त्रः इन्द्रस्य वज्रोऽसीत्येव मन्त्रो न वाजपेयसम्बन्धी सर्वः तावन्मात्रस्यैवात्र पाठात् पूर्ववदिति धूर्गृहीतं दक्षिणश्रोणिदेशे वेद्यामानीय युनक्ति पूर्वं दक्षिणं तत उत्तरं ततो दक्षिणाप्रष्टिं ततः सव्याप्रष्टिम् अनिर्देशात्त्रयाणां योजने प्राप्ते चतुर्भिरित्युक्तमिति सूत्रार्थः ॥ रथदेवत्यम् । हे रथ त्वमिन्द्रस्य वज्रोऽसि ॥ युनक्ति । रथदेवत्यम् । प्रशास्त्रोः मित्रावरुणयोः देवयोः प्रशिषा प्रशासनेन हे रथ त्वां युनज्मि योजयामि ॥ का° [१५.६.१७.] अव्यथायै त्वेति सुन्वन्नारोहतीति । यजमानश्चात्वालदेशस्थः रथमारोहति ॥ रथदेवत्यम् । अरिष्टोऽनुपहिंसितः अर्जुनोऽर्जुनतुल्य इन्द्र इत्यर्थः अर्जुनो ह वै नामेन्द्र इति श्रुतेः [५.४.३.७.] एव-

भूतोऽहं के रथ वा वामव्यथायै व्यथ भयचलनयोः अभयाय अचलनाय वा स्वधायै अन्नरसाय च वामधितिष्ठामि ॥ का° [१५. ६. १८.] मरुतामिति दक्षिणधुर्यं प्राजतीति । यजमानेन सकाद्दूतो यत्ता दक्षिणाश्वं कशया प्रेरयेत् ॥ धुर्यदेवतम् । हे धुर्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेषः ॥ का° [१५. ६. १९.] गवां मध्ये स्थापयत्यापामेति । पूर्वमिवाहवनीयोत्तरतः स्थापितानां गवां मध्ये तं रथं स्थापयेत् ॥ यजमानदेवत्यम् वयं मनसा सह आपाम प्राप्तवन्तो यदुपक्रान्तं तत्कर्म ॥ का° [१५. ६. २०.] धनुरार्ल्यापस्पृशति गां यजमानः समिन्द्रियेणेति । धनुःकोट्या गां स्पृशेत् ॥ यजमानदेवत्यम् वयमिन्द्रियेण वीर्येण संगताः स्म ॥ २१ ॥

मा तꣳइन्द्र ते वयं तुराषाडयुक्तासोऽअब्रह्मता विदꣳसाम ।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ॥ २२ ॥

का° [१५. ६. २२.] तावद्भूयो वा गोस्वामिने दत्त्वा पूर्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयति मा तꣳइति । स्थापितगवां पतये स्वभ्रात्रे तावत् शतमधिकं वान्यदत्त्वा यूपात्पूर्वदिशि परीत्यान्तःपात्यदेशे रथं स्थापयेत् ॥ इन्द्रदेवत्या त्रिष्टुप् संवरणादृष्टा । हे वज्रहस्त वज्रं हस्ते यस्य तत्सम्बुद्धिः हे देव दीप्यमान त्वं यं रथमधि तिष्ठ लडर्थे लोट् अधितिष्ठसि व्यचोऽतस्तिङ इति [पा° ६. ३. १३५.] दीर्घः यस्य च रश्मीन्प्रग्रहानायमसे आयच्छसि किम्भूतान्रश्मीत् स्वश्वान् शोभना अश्वा येषु तान् । हे तुराषाट् तूर्णं सहते शत्रूनभिभवतीति तुराषाट् हे इन्द्र ऐश्वर्ययुक्त ते त्वदीया वयं ते तव तस्मिन्रथे अयुक्ताः तस्माद्भिन्नाः सन्तो मा विदसाम दस उपक्षये विविधमुपक्षीणा मा भवाम तत्र दृष्टान्तः अब्रह्मता लुप्तोपमानम् अब्रह्मतेव ब्रह्म विज्ञानानन्दस्वभावमनश्वरम् तस्य भावो ब्रह्मता न ब्रह्मता अब्रह्मता यथा ब्रह्मभावादन्यद्वस्तु विदस्येदेवं वयं मा विदस्येमक्षीत्यर्थः ॥ २२ ॥

a. अग्नये गृहपतये स्वाहा । b. सोमाय वनस्पतये स्वाहा ।
c. मरुतामोजसे स्वाहा । d. इन्द्रस्येन्द्रियाय स्वाहा ।
e. पृथिवि मातर्मा मा हिꣳसीर्मोऽअहं त्वाम् ॥ २३ ॥

का° [१५. ६. २३.] अग्नये गृहपतयऽइति चत्वारि रथविमोचनीयानि जुहोति प्रतिमन्त्रमिति । रथविमोचनीयसंज्ञाश्चतस्र आहुतीर्जुहोति ॥ चत्वारि यजूंषि लिङ्गोक्तदेवत्यानि । गृहाश्रमपालकायाग्नये स्वाहा सुकृतमस्तु । वनस्पतिद्वारेण सोमाय हविर्दत्तमस्तु । इन्द्रस्येन्द्रसम्बन्धिने इन्द्रियाय वीर्याय स्वाहा । मरुतां सम्बन्धिने ओजसे बलाय हविर्दत्तमस्तु ॥ का° [१५. ६. २४.] भूमिमविक्षति पृथिवि मातरिति । रथस्थ एव यजमानो भूमिं पश्येत् ॥ भूमिदेवत्यम् हे मातर्जगन्निर्मात्रि हे पृथिवि भूमे त्वं मा मां मा हिंसीः हिंसां मा कार्षीः अहमपि त्वां पृथिवीं मो मा ऽ (11.) हिंसिषम् ॥ २३ ॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २४ ॥

का° [१५. ६. २५.] अवरोहति हꣳसः शुचिषदिति । यजमानो रथादवरोहति ॥ सप्रपञ्चपरब्रह्माभिधायिनी सूर्यदेवत्यातिजगती वामदेवदृष्टा । हꣳसोऽहंकारमिति हंसो भगवानादित्य एवंविधः तं प्रत्यवतरामीति वाक्यशेषः । किम्भूतो हंसः शुचिषत् शुचौ दीप्तौ सीदतीति शुचिषत् आदित्यरूपेण । तथा वसुर्वासयिता नराणां प्रवर्तकः अन्तरिक्षे सीदतीत्यन्तरिक्षसत् वायुरूपेण । होता आह्वाता देवानाम् वेदौ सीदतीति वेदिषत् अग्निरूपेण । अतिथिः सर्वेषां पूज्यः दुरोणे यज्ञगृहे सीदतीति दुरोणसत् आहवनीयादिरूपेण । नृषु मनुष्येषु प्राणभावेन सीदतीति नृषत् । वरेषु उत्कृष्टेषु स्थानेषु सीदति वरसत् । ऋते यज्ञे सीदतीति ऋतसत् । व्योम्नि आकाशे मण्डलरूपेण सीदतीति व्योमसत् । एवं सर्वत्रस्थितत्वेन स्तुत्वा सर्वत्रोत्पत्तिद्वारेण स्तौति यः अब्जाः अप्सु उदकेषु जायते मत्स्यादिरूपेणेत्यब्जाः । गवि पृथिव्यां जायते चतुर्विधभूतग्रामरूपेणेति गोजाः । ऋते सत्ये जायते ऋतजाः । अद्रौ पाषाणे अग्निरूपेण जायतऽइत्यद्रिजाः अद्रिर्मेघो वा अद्रौ मेघे जलरूपेण जायतऽइति वा । ऋतम् ऋ गतौ सर्वत्र गतम् बृहत् महत्परिवृढमपर्यन्तम् परब्रह्मरूपो यो हंसस्तं प्रति रथादवतरामीति भावः ॥ यद्वा हंसशब्देन रथ उच्यते हन्ति पृथिवीमिति हंसः रथः बृहत् महत्प्रौढमृतं यज्ञं सम्पादयतीति

शेषः । किम्भूतो हंसः शुचिषत् शुचौ देवयजने रथवाहने वा सीदतीति । वसुः स्वस्योपरि यजमानं वासयतीति । अन्तरिक्षसत् वृक्षगुल्माद्यनवरुद्धेऽन्तरिक्षे सीदतीति । होता होतृसमानः तदेव कथमित्यत आह वेदिषत् वेद्यां सीदतीति । अतिथिः अतिथिवत्पूज्यः दुरोणसत् दुरोणे यज्ञगृहे सीदतीति । नृषत् नृषु वाहकत्वेन सीदतीति । वरसत् वरे श्रेष्ठे राजगृहे सीदतीति । ऋतसत् ऋते यज्ञे वाजपेयादौ सीदतीति । व्योमसत् सूर्यं वोढुं व्योमन्याकाशे सीदतीति । अब्जाः अप्सुयोनिर्वाऽश्व इति श्रुतेरब्धो जातैरश्वैरुपेतत्वादब्जाः । गोजाः गोशब्दवाच्याद्ब्राह्मणाज्जायत इति गोजाः इन्द्रो वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्तस्य स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयमिति तैत्तिरीयश्रुतेः । ऋतजाः ऋतं यज्ञमुद्दिश्य जातत्वादृतजाः । अद्रिजाः अद्रिभ्यः पाषाणसदृशकाष्ठेभ्यो जातत्वादद्रिजाः ॥ २४ ॥

a. इयदस्यायुरस्यायुर्मयि धेहि युङ्क्ष्वि वर्चोऽसि वर्चो मयि धेहि ।

b. ऊर्गस्यूर्ज मयि धेहि । c. इन्द्रस्य वां वीर्यकृतो बाहूऽन्वारभे ॥ २५ ॥

का° [१५. ६. २१.] उपस्पृशति शतमानावियदसीति । शालादक्षिणभागे स्थापितस्य रथवाहनस्य दक्षिणचक्रे बद्धौ शतमानौ शतरक्तिकानिर्मितौ सौवर्णौ मणी यजमानः स्पृशति ॥ द्वे द्वादशारे यजुषी शतमानदेवत्ये । हे रुक्म त्वमियदसि एतावत्परिमाणं शतरक्तिकापरिमितमसि आयुरसि जीवनमसि तस्मादायुः शताब्दपरिमितं मयि धेहि यो हि यदात्मकः स तद्दातुमुत्सहते यतस्त्वं शतमानमसि ततः शताब्दपरिमितमायुर्मयि रोपय । युङ्क्ष्वि युनक्ति यज्ञं सम्भारनिचयेन दक्षिणादानेन वेति युड् वर्चस्तेजस्वी भवसि अतो मे (12.) मम वर्चः तेजो धेहि ॥ का° [१५. ६. ३०.] तौ ब्रह्मणे दत्त्वोर्गसीति शाखामुपस्पृशतीति । तौ शतमानौ ब्रह्मणे दत्त्वा पूर्वोक्तरथवाहने एवोपगूहितामौडुम्बरीं शाखामुपस्पृशेत् ॥ शाखादित्यम् हे औडुम्बरि शाखे त्वमूर्गसि अन्नरूपा भवसि तत ऊर्जमन्नं मयि धेहि स्थापय ॥ का° [१५. ६. ३१.] इन्द्रस्य वामित्यवकृते बाहू पयस्यायां व्याघ्रचर्मदेशे स्थितायामिति । अध्वर्युर्यजमानबाहू व्याघ्रचर्मस्थापितायां मैत्रावरुण्यां पयस्यायां

नीचौ करोति ॥ बाहुदेवत्यम् । वीर्यकृतौ वीर्यकारिणः इन्द्रस्य परमैश्वर्ययुक्तस्य यजमानस्य सम्बन्धिनौ हे बाहू अहं वां युवामुपावहरामि (13.) मैत्रावरुणी-पयस्यां प्रति नीचौ करोमि ॥ २५ ॥

VI. a. स्योनासि सुषदासि । b. क्षत्रस्य योनिरसि ।

c. स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥ २६ ॥

का° [१५. ६. ३३ः ७. १.] प्राक् स्विष्टकृतः खादिरीमासन्दीं रज्जूनां व्याघ्रचर्मदेशे निदधाति स्योनासीतीति । पयस्यायाः स्विष्टकृद्धोमात्प्राक् रज्जुभिर्व्युतां खादिरीं मञ्चिकां व्याघ्रचर्मदेशे मैत्रावरुणाधिष्ण्यस्य पुरो निदधाति ॥ आसन्दीदेवत्यम् । हे आसन्दि त्वं स्योना सुखरूपासि सुखकारी भवसि । सुषदासि सुखेन सीदन्ति यस्यां सा सुषदा सुखेनोपविष्टुं योग्यासि ॥ का° [१५. ७. २.] अधीवाससमस्यामास्तृणाति क्षत्रस्य योनिरिति । आसन्द्यां वस्त्रमाच्छादयति ॥ अधीवासदेवतम् । हे अधीवास त्वं क्षत्रस्य क्षत्रियस्य योनिर्मातृवद्धारकत्वेन कारणमसि ॥ का° [१५. ७. ३.] सुन्वत्तमस्यामुपवेशयति स्योनामासीदेति । आसन्द्यां यजमानं स्थापयेत् ॥ यजमानदेवत्यम् । हे यजमान स्योनां सुखकरीमासन्दीमासीद आरोह सुषदां सुखोपवेशनयोग्यामासन्दीमासीद क्षत्रस्य योनिं स्थानमासन्दीमासीद ॥ २६ ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ २७ ॥

का° [१७. ७. ४.] निषसादित्युरोऽस्यालभतऽइति । अध्वर्युर्यजमानहृदयं स्पृशति ॥ वरुणदेवत्या गायत्री शुनःशेपदृष्टा अष्टषट्सप्तवर्णापादत्वाद्वर्धमाना गायत्री । असौ यजमानः पस्त्यासु विक्षु प्रजासु आ निषसाद विशो वै पस्त्या इति श्रुतेः [५. ४. ४. ५.] आधिपत्येनोपविविश यदासन्द्यां निषण्णः स प्रजास्वेव निषण्ण इत्यर्थः । व्यवहिताश्चेति [पा° १. ४. ८२.] आङ उपसर्गस्य क्रियापदेन व्यवस्थानम् । किम्भूतो यजमानः धृतव्रतः धृतं व्रतं यज्ञलक्षणं कर्म येन स्वीकृतयज्ञः । वरुणः वारयत्यनिष्टमिति वरुणः । तथा सुक्रतुः शोभनसंकल्पः शोभनप्रज्ञो वा । किमर्थं निषसाद साम्राज्याय सम्राजो भावः साम्राज्यम् सम्राड्भावाय राज्यायेति श्रुतेः [५. ४. ४. ५.] ॥ २७ ॥

a. अभिभूरस्येतास्ति पञ्च दिशः कल्पन्ताम् । b. ब्रह्मंस्त्वं ब्रह्मासि सवितासि सत्यप्रसवः । c. वरुणोऽसि सत्यौजाः । d. इन्द्रोऽसि विशौजाः । e. रुद्रोऽसि सुशेवः । f. वर्डुकार श्रेयस्कर भूयस्कर । g. इन्द्रस्य वज्रोऽसि तेन मे रध्य ॥ २८ ॥

का° [१५.७.५.] अभिभूरित्यस्मै पञ्चाक्षान्पाणावाधायेति । यजमानकृत्ते घृतसाधनभूतान्पञ्चाक्षान्सौवर्णकपर्दान्निदध्यात् ॥ अक्षा यजमानो वा देवता । चतुर्णामक्षाणां कृतसंज्ञा पञ्चमस्य कलिरिति यदा पञ्चाप्यक्षा एकरूपा पतन्ति उत्ताना अवाञ्चो वा तदा देवितुर्जयः तत्र कलिः सर्वानक्षानभिभवति तं प्रत्युच्यते तत्सम्बन्धेन यजमानं प्रति वा । हे अक्ष यद्वा हे यजमान त्वमभिभूरसि अभिभविता अभितो व्याप्तासि । एताः कपर्दिकोपलक्षिताः पञ्च दिशः पूर्वादयश्चतस्र ऊर्ध्वा चेति पञ्च दिशः ते त्वदर्थं कल्पन्तां त्वत्प्रयोजनसमर्था भवन्तु । कलेः सर्वाक्षाभिभावकत्वात्सुन्वतोऽपि जयापेक्षित्वात्पञ्चाक्षव्यापकत्वमिति भावः ॥ का° [१५.७.७-१.] वरं वृत्वा ब्रह्मन्नित्यामन्त्रयते पञ्चकृत्वः प्रत्याह व्यत्यासꣳ सविता वरुण इन्द्रो रुद्र इति त्वं ब्रह्मासीत्यादिभिरादिनैवान्त्यमिति । यजमानो राज्यं मेऽस्त्वित्यादि द्रव्यं सम्प्रार्थ्य पञ्चवारं ब्रह्मन्निति मन्त्रेण ब्रह्माणमामन्त्रयते एवमामन्त्रितो ब्रह्मा त्वं ब्रह्मासीत्यादिभिः सवितासि वरुणोऽसि इन्द्रोऽसि रुद्रोऽसीत्येतैर्मन्त्रैर्व्यत्यासं यजमानं प्रत्याह तेन चतुर्णामपि मन्त्राणामादौ त्वं ब्रह्मासीति प्रयोगः । व्यत्यासमित्यादौ यजमानो ब्रह्मन्नित्यामन्त्रयते ब्रह्मा त्वं ब्रह्मासि सवितासि सत्यप्रसव इति प्रत्याह । पुनर्यजमानो ब्रह्मन्निति ब्रह्माणमामन्त्रयते ब्रह्मा त्वं ब्रह्मासि वरुणोऽसि सत्यौजा इति प्रत्याह । पुनर्यजमानो ब्रह्मन्निति ब्रह्माणमामन्त्रयते ब्रह्मा त्वं ब्रह्मासि इन्द्रोऽसि विशौजा इत्याह । पु° यते ब्रह्मा त्वं ब्रह्मासि रुद्रोऽसि सुशेव इत्याह । अन्त्यं च पञ्चमं प्रतिवचनमादिनैव त्वं ब्रह्मासीत्येतावतैव कार्यं ब्रह्मणेति सूत्रार्थः ॥ ॥ ब्रह्मन् । ब्रह्मदैवतम् । यजमानः प्रथमं ब्रह्माणमामन्त्रयते हे ब्रह्मन् ऋत्विक् त्वामामन्त्रयऽइति शेषः ॥ त्वं ब्रह्मासि । पञ्च यज्ञर्षि यजमानदेवत्यानि । ब्रह्मामन्त्रितो यजमानं प्रत्याह हे य-

ज्ञमान त्वं ब्रह्मासि महान्भवसि सविता प्रेरकश्चासि सत्यप्रसवः सत्यः प्रसवो ऽनुज्ञा यस्य ॥ द्वितीयं प्रत्याह त्वं ब्रह्मासि वरुणोऽनिष्टनिवारकोऽसि सत्यौजाः सत्यमोजो यस्य अमोघवीर्योऽसि सत्ये वा ओजो यस्य ॥ तृतीयं प्रत्याह त्वं ब्रह्मासि इन्द्रोऽसि ऐश्वर्यवानसि विशौजाः विन्तु प्रजास्वोजस्तेजो यस्य विडोजा इति प्राप्ते विशौजा इति छान्दसमत एव पदकारो नावग्रहं चकार (14.) ॥ चतुर्थं प्रत्याह त्वं ब्रह्मासि रुद्रोऽसि हे राजन् त्वं रुद्ररूपोऽसि शत्रूणां रोदनाद्रावणाच्च । सुशेवः शेव इति सुखनाम [निघ० ३. ६.] शोभनं शेवः सुखं यस्मात् शोभनं सुखयिता ॥ त्वं ब्रह्मासीत्येतावदेव पञ्चमं प्रतिवचनम् ॥ का० [१५. ७. १०.] बक्रुकारेति च ह्वयत्येवंनामानमिति । यजमानं बक्रुकारित्यादिसुमङ्गलनामानं नरमाकारयति (15.) ॥ लिङ्गोक्तदेवतम् हे बक्रुकार बक्रु कार्यं करोति बक्रुकारः श्रेयः करोति श्रेयस्करः भूयो बक्रुतरं करोति भूयस्करः तेषां सम्बोधनानि हे बक्रुकारित्यादिकल्याणनामन् त्वामाह्वयऽइति शेषः ॥ का० [१५. ७. ११.] स्फ्यमस्मै प्रयच्छति पुरोहितोऽध्वर्युर्वेन्द्रस्य वज्र इति । अस्मै यजमानाय स्फ्यं ददाति द्यूतभूमिकरणाय ॥ स्फ्यदेवतम् । हे स्फ्य इन्द्रस्य वज्रस्त्वमसि इन्द्रो ह यत्र वृत्राय वज्रं प्रजह्रित्यादि तस्य स्फ्यस्तृतीयमिति श्रुतिः [१. २. ४. १.] । तेन हेतुना मे मम यजमानं रध्य रध्यतिर्वशगमने वशवर्तिनं कुरु यो वै राजा ब्राह्मणाद्बलीयानमित्रेभ्यो वै स बलीयान्भवतीति श्रुतिः [५. ४. ४. १५.] । यद्वा तेन मे रध्य यस्मात्त्वं वज्ररूपस्तेन कारणेन मम रध्य द्यूतभूमौ परिलेखनरूपं कार्यं साधय ॥ २८ ॥

a. अग्निः पृथुर्धर्मणस्पतिर्जुषाणोऽअग्निः पृथुर्धर्मणस्पतिराज्यस्य वेतु स्वाहा।
b. स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्याय ॥ २९ ॥

का० [१५. ७. १५.] द्यूतभूमौ हिरण्यं निधायाभिजुहोति चतुर्गृहीतेनाग्निः पृथुरिति । एवं कृतायां द्यूतभूमौ कनकं निधाय तदुपरि चतुर्गृहीताज्यं जुहुयात् ॥ अग्निर्देवत्यम् अग्निः आज्यस्य वेतु कर्मणि षष्ठी घृतं पिबतु स्वाहा सुहुतमस्तु । किम्भूतोऽग्निः पृथुः देवानां प्रथमत्वाद्विशालः । तथा धर्मणः पतिः धारणं धर्म जगतो धारणस्य धर्मस्य वा स्वामी । जुषाणः प्रीयमाणः हूयमानं हविः सेवमानो

वा । अग्निः पृथुर्धर्मणास्पतिरिति पुनःपाठ आदरार्थः ॥ का° [१५.७.१६.] अक्षान्निवपति स्वाहाकृता इति । पूर्वोक्तपश्चाद्भान्यूतभूमौ क्षिपति ॥ अक्षदेवत्यम् । हे अक्षा यूयं स्वाहाकृताः स्वाहाकारपूर्विकयाहुत्या तर्पिताः सन्तः सूर्यस्य रश्मिभिः किरणैर्यतध्वं स्पर्धां कुरुत सजातानां समानजन्मनां भ्रातॄणां क्षत्रियाणां मध्यमेष्ठ्याय मध्यमप्रदेशे यजमानावस्थानाय च यतध्वं यत्नं कुरुत यजमानं सर्वक्षत्रियश्रेष्ठं कुरुतेत्यर्थः मध्ये भवो मध्यमः मध्यमे प्रदेशे तिष्ठतीति मध्यमेष्ठः तस्य भावो मध्यमेष्ठ्यं तस्मै ॥२१॥

VII. सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्ना पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामि ॥३०॥

का° [१५.८.१५.१६.] पितामहदशगणꣳ सोमयानाꣳ संख्याय सर्पणꣳ सवित्रेति वानुवाकमुक्त्वेति । पित्रादयः पूर्वजाः पितामहशब्देनोच्यन्ते । ऋत्विजोऽन्ये विप्राश्च मिलिताः शतसंख्याः सन्तो दशपेययागे सौत्येऽह्नि प्रतिसवनं सर्पणात्प्राक् स्वं-स्वं सोमयाजिनां पित्रादीनां दशानां गणं गणयित्वा अमुकः प्रथमः सोमपः असौ द्वितीयोऽसौ तृतीय इत्यादिदशमपर्यन्तान्सोमयाजिनो गणयित्वा विभूरसीत्यादिसर्पणं [५.३१] धिष्ण्योपस्थानं कुर्वन्ति सर्पणं भक्षणकाले सदःप्रवेशो वा । पक्षान्तरमाह सवित्रेति यद्वा सवित्रा प्रसवित्रेत्येककण्डिकात्मकमनुवाकं पठित्वा शतं विप्राः सर्पणं कुर्वन्ति । दशानां सोमयाजिनामसम्भवादयमेव पक्षः श्रेयानिति सूत्रार्थः ॥ सवित्रादिदेवत्यात्यष्टिः । एताभिर्दशभिर्देवताभिः प्रसूत आज्ञप्तोऽहं प्रसर्पामि सर्पणं करोमि । प्रत्येकपाठादेकवचनं सर्पामीति । काभिर्दशभिः प्रसूत इत्यत आह प्रसवित्रा अभ्यनुज्ञानकारिणा सवित्रा सूर्येण । वाचा वाग्रूपया सरस्वत्या । रूपै रूपलक्षितेन त्वष्ट्रा देवेन त्वष्टा रूपाणामधिपतिरित्युक्तेः । पशुभिरुपलक्षितेन पूष्ना देवेन । अस्मे अनेन इन्द्रेण विभक्तेः शे-आदेशः [पा° ७.१.३९.] । ब्रह्मणा देवयागे ब्रह्मत्वकर्त्रा बृहस्पतिना । ओजसा ओजस्विना वरुणेन । तेजसा तेजस्विना अग्निना । राज्ञा ओषधिविप्राधिपेन दीप्यमानेन वा सो-

मेन चन्द्रेण । दशम्या दशसंख्यापूरिकया विष्णुना देवतया यज्ञांधिष्ठात्रा विष्णुरूपेण देवेन । एतैरांज्ञप्तः प्रसर्पामीत्यर्थः ॥३०॥ इति राजसूयः समाप्तः ॥ ॥

VIII. a. अश्विभ्यां पच्यस्व । b. सरस्वत्यै पच्यस्व । c. इन्द्राय सुत्राम्णे पच्यस्व । d. वायुः पूतः पवित्रेण प्रत्यङ्सोमोऽअतिस्रुतः । इन्द्रस्य युज्यः सखा ॥३१॥

अथ राजसूयगतचरकसौत्रामणीमन्त्रा उच्यन्ते ॥ राजसूयप्रान्ते विहिता सौत्रामणी चरकसौत्रामणीत्युच्यते तन्मन्त्राणामश्विनावृषी ॥ ॥ का° [१५.१.२५.] पक्वौदनं विदूढौश्वूर्णीकृत्याश्विभ्यां पच्यस्वेति सऽसृजतीति । विदूढा ज्ञाताङ्कुरा अज्ञाताङ्कुराश्च व्रीहयः सौमे बर्हाः सन्ति तन्मध्ये अज्ञाताङ्कुराणां व्रीहीणामोदनं पक्वा विदूढान्व्रीहींश्वूर्णीकृत्यौदनेन मिश्रयति ॥ त्रीणि यजूंषि सुरादेवत्यानि । हे सुरे त्वमश्विभ्यां पच्यस्व अश्विनोरर्थाय पाकं कुरु पाको नाम विपरिणामश्रेष्ठता । सरस्वत्यै देव्यै पच्यस्व । सुष्ठु त्रायतऽइति सुत्रामा तस्मै सुत्राम्णे शोभनत्राणकर्त्रे सुत्रातव्याय वा इन्द्राय पच्यस्व यतः सौत्रामण्येन्द्रस्य भेषज्यं कर्तव्यमस्ति ॥ का° [१५.१०.१०.] वपामार्जनान्ते कुशैः परिस्रुतं पुनाति वायुः पूत इति । पशूनां वपामार्जनान्ते कर्मणि कृते दर्भैः सुरां कस्मिंश्चित्पात्रे पुनाति ॥ सोमदेवत्या गायत्री । वायुः सुपां सुलुगित्यादिना [पा° ७.१.३९.] तृतीयैकवचनस्य सु आदेशः सोमो वायुः वायुना पूतः शोधितः पवित्रेण कुशमयेन पूतः सन् प्रत्यङ् नीचैरधोमुखः सन् अतिस्रुतः अतिक्रम्य गतः । किम्भूतः इन्द्रस्य युज्यो योगार्हः सखा सखिभूतः । सोमः पूर्वं पूतिगन्धोऽभूत्ततो देवैर्वायुरुक्तस्त्वं सोमꣳ सुगन्धं कुर्विति ततो वायुना सोमो दुर्गन्धमपकृत्य सुगन्धः कृत इति [१२.७.३.] श्रुत्योक्तम् तदयं मन्त्रो वदतीत्यर्थः ॥३१॥

a. कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ॥

b. उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥३२॥

का॰ [१५.१०.१२.] ग्रहं गृह्णाति कुविदङ्गेति त्रीन्वा प्रतिदेवतमेतयैवेति । पूतायां सुरायां बदरीफलचूर्णं प्रक्षिप्य कुविदङ्गेत्येकं ग्रहं वैकङ्कतपात्रेण गृह्णाति यद्वा कुविदङ्गेत्यृचैव त्रीन्यहान्प्रतिदेवतं गृह्णाति । यथा । कुविदङ्ग॰ उपयामगृहीतोऽस्यश्विभ्यां त्वेति प्रथमम् कुविदङ्ग॰ उपयामगृहीतोऽसि सरस्वत्यै त्वेति द्वितीयम् कुविदङ्ग॰ उपयामगृहीतोऽसीन्द्राय त्वा सुत्राम्णऽइति तृतीयम् ॥ तृचं काक्षीवतसुकीर्तिर्दृष्टम् आद्या सोमदेवत्या त्रिष्टुप् । कुविदिति बहुनाम [निघ॰ ३.१.] अङ्गेति क्षिप्रनाम [निरु॰ ५.१७.] चिदिति वितर्के । हे सोम यथा यवमन्तः यवा विद्यन्ते येषां ते यवमन्तः मादुपधायाश्च मतोर्वोऽयवादिभ्य इति [पा॰ ८.२.१.] यवादीनां निषेधान्मतोर्मकारस्य वकाराभावः बहुयवसम्पन्नाः कृषीवलाः कुवित् बहुलं यवं सर्वं यवमयं सस्यं चिद्विचार्य अनुपूर्वमानुपूर्व्येण विभज्य पृथक्कृत्य अङ्ग क्षिप्रं दात्ति लुनाति दाप् लवने लट् । तथा एषां यजमानानां सम्बन्धीनि भोजनानि भोज्यानि वस्तूनि इह-इह अस्मिन्नेव यजमाने कृणुहि कुरु । एषां केषाम् ये यजमाना बर्हिष उपरि स्थिता नमउक्तिं यजन्ति नम इत्यन्ननाम [निघ॰ २.७.] उक्तिर्वचनं हविर्लक्षणमन्त्रमादाय उक्तिं याज्यामभिधाय यजन्ति यागं कुर्वन्ति ॥ हे सोम त्वमुपयामेन गृहीतोऽसि अश्विभ्यां त्वा त्वां गृह्णामि सरस्वत्यै त्वां गृह्णामि सुत्राम्णे रुद्रकायेन्द्राय त्वां गृह्णामि ॥३२॥

युवꣳ सु॒रामम॑श्विना॒ नमु॑चावासु॒रे सचा॑ ।
विपि॑पाना॒ शुभ॑स्पती॒ इन्द्रं॒ कर्म॑स्वावतम् ॥३३॥

का॰ (16.) ग्रहाणां युवꣳ सुरामं पुत्रमिवेति । युवं सुरामं पुत्रमिवेति द्वे ऋचौ सुराग्रहाणां याज्यानुवाक्ये प्रथमानुवाक्या पुत्रमिवेति याज्या ॥ अनुष्टुप् अश्विसरस्वतीन्द्रदेवत्या । हे अश्विना अश्विनौ युवं युवां कर्मसु निमित्तेषु इन्द्रमावतमपालयतं स्वकर्मक्षममकुरुतमित्यर्थः अवतेर्लङि मध्यमद्विवचनम् । किम्भूतौ युवाम् असुर एव आसुरस्तस्मिन्नमुचौ ननुचिसंज्ञे आसुरे असुरे दैत्ये स्थितं सुरामं सुष्ठु रमयतीति सुरामं सुष्ठु रमणीयं सोमं सचा सह एकीभूय विपिपाना विपिपानौ विविधं पिबन्तौ विविधं पिवतस्तौ विपिपानौ पिबतेर्व्यत्ययेन द्वादित्वे

शानच्प्रत्यये रूपम् तदर्थे श्रुताविति[1]हासः [१२.३.४.१.] नमुचिर्नामासुर इन्द्रस्य सखासीत् स विश्वस्तस्येन्द्रस्य वीर्यं सुरया सोमेन सह पपौ तत इन्द्रोऽश्विनौ सरस्वतीं चोवाचाहं नमुचिना पीतवीर्योऽस्मि ततोऽश्विनौ सरस्वती चापां फेनरूपं वज्रमिन्द्राय ददुः तेनेन्द्रो नमुचेः शिरश्चिच्छेद ततो लोहितमिश्रः ससुरः सोमस्तदुदरादश्विभ्यां पीत्वा शुद्ध इन्द्रायार्पित इति तदर्पणेनेन्द्रमश्विनावरक्षतामित्यर्थः । पुनः कीदृशौ शुभः पती शोभनं शुप् शुभ दीप्तावित्यस्मात्सम्पदादित्वाद्भावे क्विप् तस्य शुभः शोभनस्य कर्मणः पती पालकौ षष्ठ्याः पतिपुत्रेत्यादिना [पा° ८.३.४३.] पतिशब्दे परे विसर्गस्य सकारः ॥३३॥

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥३४॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां दशमोऽध्यायः ॥ ॥

त्रिष्टुप् अश्विसरस्वतीन्द्रदेवत्या हे इन्द्रोभा अश्विना उभौ अश्विनौ त्वामावथुः अवतेर्लिटि मध्यमद्विवचनं पुरुषव्यत्ययः आवतुः पालितवन्तौ । कैः काव्यैः कवीनां मन्त्रद्रष्टृणां सम्बन्धिभिर्मन्त्रैः कवीनामिमे काव्यास्तैः । तथा दंसनाभिः दंस इति कर्मनाम [निघ° २.१.] दंसतः करणं दंसना तत्करोति तदाचष्टेऽ इति [पा° ३.१.२६. वा° १.२.] णिचि ज्ञाति एयासश्रन्थो युडिति [पा° ३.३.१०७.] युच्प्रत्यये दंसनेति रूपम् । दृष्टान्तमाह पुत्रमिव पितरौ यथा मातापितरौ पुत्रं पालयतस्तथाश्विनौ त्वामावतुः अश्विनाविन्द्रस्य रक्षणं कृतवन्ताविति कथमवगम्यते तत्राह यदिति यद्यस्मात्कारणात् हे इन्द्र त्वं शचीभिः कर्मभिर्नमुचिबधादिकर्माणि कृत्वेत्यर्थः सुरामं सुष्ठु रमणीयं सोमं व्यपिबः विशेषेण पीतवानसि पिबतेर्लङि मध्यमैकवचने (17.) रूपम् हे मघवन्धनवन्निन्द्र यस्माच्च सरस्वती देवी त्वा त्वामभिष्णक् उपसेवते त्वत्कृतसोमपानेन सरस्वतीकृतत्वत्सेवनेन च अश्विनौ त्वामावतुरिति ज्ञायतेऽ इत्यर्थः भिष्णज् उपसेवायां कण्ड्वादिः अस्माच्छतरि कण्ड्वादिभ्यो यगिति [पा° ३.१.२७.] प्राप्तस्य यको व्यत्ययेन लुक् क्लमुज्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति [पा° ६.१.६८.] तिपो लुक् लुङ्लङ्लृङ्क्ष्वडुदात्त इति [पा° ६.४.७१.] अडा-

गमः वावसानऽइति [पा° ८.४.५६.] ञकारस्य ककारः अभिष्ठगिति रूपम् ॥३४॥
श्रीमन्महीधरकृते वेददीपे मनोहरे । अगमद्दशमोऽध्यायो राजसूयान्त-
वर्णनः (18.) ॥१०॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १. ३५ [उत्तरसद्भ्यः - उपरिषद्भ्यो] ॥१॥ १. ३६ [उत्तरसदस्ते° - उपरि-
षदो] ॥२॥ १. ३७. ३८ a ॥३॥ १. ३८ b. c । अर्बधिष्म रक्षोऽमुष्य
त्वा वधायामुमवधिष्म । जुषाणोऽध्वर्यस्य वेतु स्वाहा ॥४॥ ॥

II. ॥ १०. १ [°णाऽअभ्य°] ॥१॥ २ ॥२॥ ३. ४ cd. ab [सूर्यत्वच स्थ]. gh.
ik. ef. no. pq. rs । शैङ्गा [प्रौघा?] स्थ - दत्त । t [स्वाराज्ञी (19.)] ॥३॥
४ u [सं मधुम°]. v [सहौजसा] ॥४॥८॥ ॥

III. ॥ १. ३१ [प्रसवाणाञ्च - पशूनां मित्रः सत्याय -] ॥१॥ इमं देवा असप-
त्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय । इमममुमुष्य पुत्रममुष्याः
पुत्रमस्यै विशे ॥२॥ एष वः कुरवो राजेष वः पञ्चाला राजा । सोमो
ऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥११॥ ॥

IV. ॥ सोमस्य त्विषिरसि । १०. ५ b-g ॥१॥ h. l. k. i. m. n । ६ b. c ॥२॥
७ ॥३॥ ८ a. b. d. c. e. g [बध्यात्]. f ॥४॥ रुजासि दुवासि जुषा-
सि । ८ l. m. n ॥५॥ ९ a. b. c. e. d. f [°शम्भू]. g ॥६॥१७॥ ॥

V. ॥ १० ॥१॥ ११ ॥२॥ १२ ॥३॥ १३ ॥४॥ १४ [°शिराऽऋतू]
॥५॥ १५ ॥६॥ १६ [उभाऽइन्द्राऽउदितः] ॥७॥२४॥ ॥

VI. ॥ १७ [°येण मरुतामोजसा क्ष°] ॥१॥ इमं देवा असपत्नꣳ सुवध्वं मरु-
ते क्षत्राय मरुते ज्यैष्ठ्याय मरुते जानराज्याय । इमममुमुष्य पुत्रममुष्याः
पुत्रमस्यै विशे ॥२॥ एष वः कुरवो राजेष वः पञ्चाला राजा । सोमो

ऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥ ११ [°धरागुदक् ता अर्हि] ॥४॥ २० a - रयीणाम् ॥५॥ २० c [क्रवि - तस्मै] ॥६॥३०॥ ॥

VII. ॥ २१ a. b [युनग्मि]. c [°रिष्टः फल्गुनः]. d. e. f ॥१॥ २२ [°षाल्लयुं° - युवसे स्वश्वान्] ॥२॥ २३ a. b. d. c. e ॥३॥ २४ [ड्डरोण°] ॥४॥ २५ a [मे धेहि]. b [मे धेहि]. c वां बाहू वीर्यकृताऽउपा° ॥५॥३५॥ ॥

VIII. ॥ २६ ॥१॥ २७ ॥२॥ अभिभूरस्ययानामेतास्ते पञ्च दिशः कल्पन्तां ब्रह्मँस्त्वं ब्रह्मासि ॥३॥ सवितासि सत्यप्रसवः । २८ c. d. e ॥४॥ प्रियंकर श्रेयस्कर भूयस्कर । २८ g ॥५॥ २९ a [°ड्यस्य कविषो वेतु]. b ॥६॥४१॥ ॥

IX. ॥ ३० - °रिन्द्रेणास्मै ॥१॥ ३० बृहस्प° - विष्णुना देवतया दशम्यमं यज्ञं विष्णुमाप्रवानि ॥२॥४३॥ ॥

X. ॥ ३१ [वायोः] ॥१॥ ३२ a [नमऽउक्तिं न जग्मुः] । b ॥२॥ ३३ [नमुचाऽआ°] ॥३॥ ३४ [पितराऽश्विनोभेन्द्रावधुः का°] ॥४॥४७॥ ॥ दशानुवाकेषु सप्तचत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे एकादशमोऽध्यायः ॥ ॥

I. युञ्जानः प्रथमं मनस्तत्वाय सविता धियम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥१॥

रमाकान्तं (1.) नमस्कृत्य गणेशं शारदां गुरुम् । संहितैकादशाध्याये मन्त्रदीपो वितन्यते ॥ ॥ एकादशमारभ्याष्टादशाध्यायपर्यन्तमग्निचयनमन्त्राः ॥ तेषां प्रजापतिर्ऋषिः साध्या ऋषयो वा ॥ सोऽग्निः पञ्चचितियुक्तः प्रथमचितिमन्त्राणां प्रजापतिर्ऋषिः द्वितीयचितेर्देवा ऋषयः तृतीयचितेरिन्द्राग्निविश्वकर्माण ऋषयः चतुर्थचितेर्ऋतवय एवर्षयः पञ्चमचितिमन्त्राणां परमेष्ठी ऋषिः । तथा च श्रुतिः [६.२.३.१०.]

प्रजापतिः प्रथमां चितिमपश्यत्प्रजापतिरिव तस्या आर्षेयं देवा द्वितीयां चितिमपश्यन्देवा एव तस्या आर्षेयमिन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यंस्तऽएव तस्या आर्षेयमृषयश्चतुर्थीं चितिमपश्यन्नृषय एव तस्या आर्षेयं परमेष्ठी पञ्चमीं चितिमपश्यत्परमेष्ठ्येव तस्या आर्षेयमिति ॥ चयनं कर्तुमिच्छन्फाल्गुनकृष्णप्रतिपदि पौर्णमासेष्टिं कृत्वा पुरुषाश्वगोऽव्यजानालभ्याजेन यागं कृत्वा पञ्चानां शिरांसि घृताक्तानि प्रथमचितावुपधानार्थं क्वचित्संस्थाप्य तेषां कबन्धान्यङ्गशेषं च मृण्मुक्ति तडागादिजले प्रास्येत् उखार्थमिष्टकार्थं च मृदं जलं च तत एवादियम् ततः फाल्गुनकृष्णाष्टम्यामुखासंभरणम् तदर्थमाहवनीयदक्षिणाग्नीऽउद्धृत्याहवनीयात्प्राक् कृते चतुष्कोणे गर्ते ततस्तडागान्मृत्पिण्डमानीय भूसमं स्थापयेत् पिण्डाहवनीयान्तराले सच्छिद्रां वल्मीकमृदं निदध्यात् आहवनीयादक्षिणदिशेऽश्वगर्दभाजाः प्राङ्मुखाः प्रागपरा मुञ्जरसनाबद्धाः स्थाप्याः आहवनीयोत्तरे वैणव्युभयतस्तीक्ष्णा कल्माषी क्षिण्मयी वाग्निः स्थाप्या ततः कर्माह का° [१६.२.७.] अष्टागृहीतं जुहोति संततमुदङ्मन्युज्ञान इति । अस्यार्थः । गार्हपत्ये घृतं संस्कृत्य जुहूं स्रुवं च संमृज्य स्रुच्यष्टागृहीतमाज्यमाहवनीये परिस्तरणसमिदाधानपूर्वकं संततमविच्छिन्नधारया स्रुचमूर्ध्वां कुर्वन्नधर्युर्जुहोति युञ्जान इत्याद्यष्टकण्डिकाभिः सांतत्यं चाष्टर्चान्ते स्वाहाकारपर्यन्तम् ॥ आद्यानुष्टुप् तृतीयः सप्ताक्षरः । अष्टानां सवितापि ऋषिः देवोऽपि सविता । अथ मन्त्रार्थः । सविता सर्वस्य प्रेरकः प्रजापतिः अग्नेर्ज्योतिः चीयमानस्य वह्नेः सम्बन्धि तेजः निचाय्य पञ्चपशुषु प्रविष्टं निश्चित्योपलभ्य यद्वा सफलानां कर्मणां साधनभूतं निश्चित्य । पृथिव्याः पशुशरीरान्विताया भूमेः सकाशाद्ध्याभरत् अध्याहृतवान् इष्टकाः (2.) कृत्वाग्निं चितवानित्यर्थः । सवितृशब्देन श्रुतौ प्रजापतिरुक्तः प्रजापतिर्वै युञ्जान इति [६.३.१.१२.] श्रुतेः । किम्भूतः प्रथममग्न्यारम्भे मनो युञ्जानः समादधानः युङ्क्तेऽसौ युञ्जानः किं कृत्वा धियो बुद्धीरिष्टकादिविषयाणि ज्ञानानि तत्राय तनित्वा विस्तार्य मनसा पर्यालोच्य बुद्ध्यावधार्येत्यर्थः तनु विस्तारे समानकर्तृकयोः पूर्वकाल इति [पा° ६.४.२१.] क्त्वाप्रत्ययः अनित्यमागमशासनमितीडागमाभावः अनुदात्तोपदेशेत्यादिना [पा° ६.४.३७.] नलोपः क्त्वो यगिति [पा° ७.१.४७.] क्त्वाप्रत्ययान्तस्य यगागमः ॥ १ ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे । स्वर्ग्याय शक्त्या ॥२॥

गायत्री तृतीयः पादः पञ्चार्णस्तेन शङ्कुमती तदुक्तं पिङ्गलेन एकस्मिन्पञ्चके छन्दः शङ्कुमतीति । सवितुर्देवस्य प्रजापतेः सवे प्रसवे आज्ञायां वर्तमाना वयं यजमाना युक्तेनेन्द्रियेभ्यो नियमितेनैकाग्रेण मनसा स्वर्ग्याय स्वर्गसाधकाय कर्मणे शक्त्या स्वसामर्थ्येन प्रयत्नं कुर्म इति शेषः ॥२॥

युक्ताय सविता देवान्त्स्वर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥

अनुष्टुप् द्वितीयः सप्तार्णस्तेनैकोना सविता तान्प्रसिद्धान्देवान्प्रसुवति (3.) षू प्रेरणे तुदादिः लेटोऽडाटावित्यडागमः (3.) प्रसौति अभ्यनुजानाति प्रेरयतीत्यर्थः । किं कृत्वा युक्ताय युक्ता क्तो यक् अग्निकर्मणि संयोज्य । किम्भूतान्देवान् धिया बुद्ध्या कर्मणा वा अन्येन दिवं द्योतयति प्रकाशतऽइति दिवम् इगुपधेति [पा° ३.१.१३५.] कप्रत्ययः द्योतनं स्वः स्वर्गं यतो गच्छतः इणः शत्रन्तस्य यत इति रूपम् । पुनः कीदृशान् बृहत् महत् ज्योतिः आदित्यलक्षणमात्मत्वेन करिष्यतः संस्कुर्वतः । कीदृशः सविता सविता प्रेरयिता अन्येन कर्मणा स्वर्गं गच्छतो देवानग्निकर्मणि सविता प्रेरयिता सविता प्रजापतिः तान्देवानिन्द्रियविशेषान्युक्ता विषयेभ्यो नियम्य प्रसुवति (4.) प्रकर्षेणाग्निकर्मणि प्रेरयति कीदृशान् स्वर्यतः स्वर्गप्राप्त्यै उद्यतान् तथा बृहत् प्रौढं ज्योतिः चीयमानस्याग्नेस्तेजः धिया दिवं करिष्यतः तत्तदिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुमुद्यतान् ॥३॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥४॥

जगती व्याख्यातापि [५.१४.] विशेषतो व्याख्यायते विप्रस्य ब्राह्मणस्य यजमानस्य विशेषेण प्राति पूरयति दक्षिणान्नदानादिनेति विप्रस्तस्य सम्बन्धिनो विप्रा ऋत्विजो मनो युञ्जते प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समाहितं कुर्वते । उत अपि च धिय इष्टकादिविषयाणि ज्ञानानि युञ्जते सम्पादयन्ति । की-

दृशस्य विप्रस्य बृहतः प्रभोः अग्निचयनोद्योगेनाभिवृद्धस्य । तथा विपश्चितः विदुषः प्रयोगाभिज्ञस्य । विप्राः कीदृशाः होत्राः होमशीलाः जुह्वतीति होत्राः ऋत्यवः कर्मण्यालस्यरहिता इत्यर्थः । नन्विदमृत्विग्यजमानादिकं कुतो ज्ञातं तत्राह एक इत् एक एव सविता विदधे सर्वमिदं निर्मितवान् कीदृशः वयुनावित् वयुनानि प्रज्ञानानि वेत्तीति वयुनवित् अन्येषामपि दृश्यतऽइति [पा० ६.३.१३७.] दीर्घः विपश्चित् ऋत्विग्यजमानाभिप्रायज्ञः । कथमेक एव सर्वमिदं कृतवानित्यत आह यतः सवितुर्देवस्य परिष्टुतिर्महो परितः सर्ववेदेषु श्रूयमाणा स्तुतिर्महती अचिन्त्यः सवितुर्महिमेत्यर्थः ॥४॥

युञ्जे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वेऽअमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥५॥

त्रिष्टुप् आद्यद्वितीयतुर्याणां व्यूहेन पूरणम् । पत्नीयजमानौ वामिति पदैरुच्येते । हे पत्नीयजमानौ वां युवयोरर्थे नमोभिरन्नैः इदानीं हविर्भिः सहितं पूर्व्यं पुरातनैर्महर्षिभिरनुष्ठितं ब्रह्म परिवृढमग्निचयनाख्यं कर्माहं युञ्जे युनज्मि सम्पादयामि व्यत्ययेन तुदादिवाहः यद्वा ब्रह्मशब्देन प्राणाः सप्त ऋषयो ब्राह्मणाश्चोच्यन्ते वामर्थे पूर्व्यं पुरातनं ब्रह्म ब्राह्मणजातिं नमोभिरन्नैर्युञ्जे योजयामि अन्नैर्विप्रांस्तर्पयामीत्यर्थः । किमर्थमिति चेत् सूरेः पण्डितस्य यजमानस्य श्लोकः कीर्तिर्द्यावापृथिवी विविधं गच्छतु लोकद्वयं व्याप्नोतु व्यवहिताश्चेति [पा० १.४.८२.] वि एतु अनयोर्व्यवधानम् तत्र दृष्टान्तः पथ्या-इव पथोऽनपेता पथ्या यज्ञमार्गप्रवृत्ता आकृतिर्यथा लोकद्वयं व्याप्नोति एवं यजमानस्य श्लोक उभयलोकसंचारी भवतिति भावः । किं च अमृतस्य मरणधर्मरहितस्य प्रजापतेः पुत्रा विश्वे सर्वे देवा यजमानस्य श्लोकं शृण्वन्तु । के । ये दिव्यानि दिवि भवानि धामानि स्थानानि आतस्थुः अधिष्ठितवन्तः ते सर्वेऽस्य कीर्तिं शृण्वन्त्वित्यर्थः ॥५॥

यस्य प्रयाणमन्वन्यऽइद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना ॥६॥

सावित्री जगती प्रथमस्य व्यूहेन पूरणम् । अन्ये देवा यस्य सवितुः प्रयाणं

प्रवृत्तिमनुययुरित् अवश्यमनुगच्छन्त्येव यत्प्रवृत्तिमनुवर्तन्तऽइत्यर्थः अन्ये देवा यस्य देवस्य महिमानं महत्त्वं च ओजसा बलेनानुययुः यश्च सविता पार्थिवानि रजांसि विममे पृथिवीप्रभृतींस्त्रीन् लोकान्मिमीते लोका रजांस्युच्यन्तऽइति यास्कः [निरु° ४. ११.] स देवः महित्वना स्वकीयेन महाभाग्येन एतशः एतऽइगन्तव्यं स्थावरजङ्गमं प्राणभाविन शेते व्याप्नोतीत्येतशः महेर्मकतो भावो महित्वं तेन । भावि छान्दसस्त्वन्प्रत्ययः । यद्वा एतश इत्यश्वनामसु [निघ° १. १४.] पठितम् स देव एतशः अश्वरूपेण सर्वं जगदवष्टभ्य स्थितः उषा वाऽअश्वस्य मेध्यस्य शिर इति श्रुतिः [१०. ६. ४. १.] सूरादश्वं वसवो निरतष्टेति वक्ष्यमाणत्वाच्च [२१. १३.] ॥ ६ ॥

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ७ ॥

त्रिष्टुप् व्याख्यातापि [१. १.] कथ्यते । हे देव सवितः यज्ञं प्रसुव प्रकर्षेण प्रेरय यज्ञपतिं यजमानं च भगाय सौभाग्याय प्रसुव । किं च दिव्यो दिवि भवः स्वर्गस्थः केतपूः केतं परचित्ते वर्तमानं ज्ञानं पुनाति शोधयतीति केतपूः ईदृशो गन्धर्वः गां वाचं धारयतीति गन्धर्वः सविता नोऽस्माकं केतं चित्तवर्ति ज्ञानं पुनातु ब्रह्मविवर्तनेन शोधयतु । वाचः वाण्याः पतिः सविता नोऽस्मदीयां वाचं स्वदतु स्वादयतु अस्मदुक्ता वाक्तस्मै रोचतामित्यर्थः ॥ ७ ॥

a. इमं नो देव सवितर्यज्ञं प्रणाय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितम् । b. ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥ ८ ॥

अवसानपर्यन्तं यजुः तस्य प्राजापत्या जगती छन्दः । हे सवितर्देव नोऽस्माकमिमं यज्ञं प्रणाय प्रापय । कीदृशं यज्ञं देवाव्यं देवा अव्यन्ते तर्प्यन्ते यस्मिन्नसौ देवावीः तम् अव प्रीणनादौ अस्मादौणादिक ईप्रत्ययः । तथा सखिविदं सखायं स्वनिष्पादकं यजमानं वेत्तीति तम् विद ज्ञाने सखीनविजो विन्दते प्राप्नोतीति वा सखिवित्तम् विदॢ लाभे सखायो विद्यन्ते यस्मिन्निति वा विद सत्तायाम् । स-

त्राजितं सत्राणि द्वादशाद्यहादीनि जयति वशीकरोतीति सत्रजित्तम् तानि हि चीयमानमग्निमपेक्षन्ते यद्वा सत्राशब्दः सत्यवाची सत्रा सत्यं ब्रह्म जयतीति । धनजितं धनं गवादिफलरूपेण यो जयति सम्पादयतीति धनजित् । स्वर्जितं स्वः स्वर्गं जयति फलत्वेन सम्पादयति स स्वर्जित्तम् ॥ किं च ऋचा स्तोमम् गायत्री अवसानरक्षिता यजुरक्षा स्वाहेति यजुः हे सवितः ऋचा स्तोत्रहेतुसामाधारभूतया ऋचा सह स्तोमं त्रिवृदादिकं समर्धय समृद्धं कुरु गायत्रेण साम्ना सह रथन्तरं साम समर्धय बृहत् साम च समर्धय कीदृशं बृहत् गायत्रवर्तनि गायत्रं सामैव वर्तनिर्मार्गो यस्य तत् बृहत्साम्नो गायत्रं साम वर्त्मभूतमित्यर्थः ॥ ८ ॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. आददे गायत्रेण छन्दसाङ्गिरस्वत्पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर त्रैष्टुभेन छन्दसाङ्गिरस्वत् ॥ ९ ॥

का° [१६. २. ८.] देवस्य त्वेत्यग्निमादाय हस्तेऽआधायेत्येनामभिमन्त्रयते । अस्यार्थः देवस्य त्वेति कण्डिकाद्वयात्मकमन्त्रेण वैणवीमग्निमादाय हस्तेऽआधायेति ऋचा [क° ११.] एनामग्निमभिमन्त्रयते ॥ देवस्य त्वा प्रजापतिः साध्या वा ऋषयः सावित्रं यजुः व्याख्यातम् ॥ आददे अग्निर्देवता अतिधृतिश्छन्दः । हे अग्ने सवितुर्देवस्य प्रसवे प्रेरणे सति अश्विनोः सम्बन्धिभ्यां मणिबन्धपर्यन्ताभ्यां बाहुभ्यां पूष्णः सम्बन्धिभ्यां साङ्गुलिभ्यां हस्ताभ्यां साधनभूताभ्यां गायत्रेण छन्दसा सहायभूतेन युक्तः सन् त्वा त्वामाददे गृह्णामि तत्र दृष्टान्तः अङ्गिरस्वत् अङ्गिरोभिस्तुल्यमङ्गिरोवदिति प्राप्ते अयस्मयादीनि छन्दसीति [पा° १. ४. २०.] भसंज्ञायामङ्गिरस्वदिति रुत्वाभावः अङ्गिरस ऋषयः पूर्वं यथा त्वामगृह्णन् तद्वत् । हे अग्ने त्वं गृहीता सती पृथिव्याः सधस्थात् सहस्थानाद्उत्सङ्गात् अग्निमाभर आहर हृयहोर्भश्छन्दसीति [पा° ८. २. ३२. वा° १.] हस्य भः । त्रैष्टुभेन छन्दसा कृत्वा अङ्गिरस्वत् अङ्गिरसो यथाग्निमाजह्रुः पुनरङ्गिरस्वदिति दृष्टान्तोऽर्थातिशयार्थः अभ्यासे भूयांसमर्थं मन्यन्तऽइति यास्कोक्तेः [निरु° १०. ४२.] । किम्भूतमग्निं पुरीष्यं पशवो वै पुरीषमिति श्रुतेः [६. ३. १. ३८.] पुरीषेभ्यः पशुभ्यो हितः पुरीष्यस्तं प-

शव्यम् यद्वा पुरीषशब्देन पांसुरूपा शुष्का मृदुच्यते तदर्हतीति पुरीष्योऽग्निः मृदमादायोखां कृत्वा तस्यामग्निः स्थाप्यते यतोऽतो मृदग्न्योरभेदोपचारेण मृदाकरणमेवाग्न्याकरणमित्यभिप्रायेण पुरीष्यमग्निमाहरेत्युच्यते अयं चोपचारोऽग्निचयनप्रकरणे सर्वत्रानुवर्तिष्यते ॥ १ ॥

अश्विरसि नार्यसि त्वया वयमग्निꣳ शक्मन खनितुꣳ सधस्थ्यꣳआ जागतेन छन्दसाङ्गिरस्वत् ॥ १० ॥

त्वमश्विरसि. उखां निर्मातुं मृत्खननहेतुभूतकाष्ठविशेषोऽसि नारी असि स्त्रीरूपा चासि यद्वा न विद्यते अरिः शत्रुर्यस्याः सा नारी ईप् छान्दसः खननकाले ऽश्मादिना तव कुण्ठीभावो नास्तीत्यर्थः किं च त्वया युक्ता वयं सधस्थे पृथिव्या उत्सङ्गे वर्तमानमग्निं जागतेन छन्दसा खनितुं शक्मन शक्ता भवेम शक्नोतेर्व्यत्ययेन शप् अङ्गिरस्वदिति दृष्टान्तः पूर्ववत् ॥ १० ॥

a. हस्तꣳआधाय सविता बिभ्रदग्निꣳ हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥
b. आनुष्टुभेन छन्दसाङ्गिरस्वत् ॥ ११ ॥

अनुष्टुब्यजुरस्ता आनुष्टुभेनेत्यादि यजुः तस्य यजुषस्त्रिष्टुप्छन्दः । तृतीयतुर्यपादयोर्व्यूहेन पूर्तिः । अग्निर्देवत्या । सविता प्रेरकः प्रजापतिर्हस्ते हिरण्ययीं स्वर्णरूपामग्निमाधाय स्थापयित्वा बिभ्रत् तामेव धारयन् सन् अग्नेः सम्बन्धि ज्योतिर्निश्चाय्य निश्चित्य दृष्ट्वा पृथिव्या अधि भूमेः सकाशात् आनुष्टुभेन छन्दसा आभरत् आहृतवान् अङ्गिरस्वदिति पूर्ववत् ॥ ११ ॥

II. प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु सम्वर्तम् ।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥ १२ ॥

का° [१६.२.१०.] अश्वप्रभृतींश्च प्रत्यृचं प्रतूर्तं युञ्जाथां योगे-योगऽइति । ऋक्त्रयेण प्रत्यृचमश्वगर्दभाजानभिमन्त्रयतेऽश्विहस्त उपविष्ट एव ॥ अश्वदेवत्या आस्तारपङ्क्तिः नाभानेदिष्ठदृष्टा यस्या अन्त्यौ द्वादशकावाद्यावष्टकौ सास्तारपङ्क्तिः ।

वन सम्भक्तौ संवन्यते सम्यग्भज्यते मृद्भक्षणार्थं सेव्यतऽइति सम्वत् सम्पूर्वस्य वनतेः क्विप्येतद्रूपम् मृत्खननयोग्या भूमिः सम्वत् सा च पाषाणाद्यभावेनातिप्रशस्तत्वाद्वरिष्ठेत्युच्यते । हे वाजिन् शीघ्रगामिन्नश्व वरिष्ठामुत्कृष्टां सम्वतं भूमिमनुलक्ष्य प्रतूर्तं शीघ्रमाद्रव आगच्छ नसत्तनिषत्तेत्यादिना [पा० ८.२.६१.] क्तान्तो निपातस्त्वरतेः । ते तवाश्वस्य दिवि द्युलोके परममुत्कृष्टं जन्मादित्यरूपेण भविष्यति आगतस्य सतः यद्वा ते जन्म दिवि रोहितादिदेवाश्वरूपेण प्रसिद्धम् । अन्तरिक्षे तव नाभिः उदरम् यद्वा नियुन्नामकवायुश्वा अन्तरिक्षे संचरन्ति तद्रूपेणास्यान्तरिक्षवर्तित्वम् नाभिशब्देन प्रकृष्टं शरीरमुपलक्ष्यते । पृथिव्या अधि उपरि तव योनिः स्थानमित् एव पादाविवेत्यर्थः भूमौ ते निवासस्थानं प्रत्यक्षं दृश्यते । विराड्रूपेणाश्वः स्तूयते एवंमहिमा त्वं शीघ्रमागच्छेत्यर्थः ॥ १२ ॥

युञ्जाथा॰ रासभं युवमस्मिन्यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् ॥ १३ ॥

गर्दभदेवत्या गायत्री कुश्रिदृष्टा (5.) । गर्दभं मन्त्रयते । अध्वर्युयजमानावुच्येते । वृषा सेक्ता गर्दभो वसु धनं ययोस्तौ वृषण्वसू वर्षतीति वृषा कनिन्यु इत्यादिना [उणा० १.१५९.] वर्षतेरौणादिकः कनिन्प्रत्ययः यद्वा यागनिष्पादनद्वारा वृष फलाभिवर्षुकं वसु धनं ययोस्तौ नलोपाभाव आर्षः तयोः सम्बोधनं हे वृषण्वसू अध्वर्युयजमानौ यजमानदम्पती वा युवं युवां रासभं गर्दभं युञ्जाथां बध्नीतम् युजिर्लोटि आत्मनेपदे मध्यमद्विवचनं युञ्जाथामिति । क्व अस्मिन्यामे अस्मिन्नग्निकर्मणि यद्वा यामो मृद्भक्षनरूपो नियमविशेषस्तास्मिन्निमित्तभूते सति । कीदृशं रासभम् अग्निं भरन्त वोढुं समर्थमित्यर्थः तथा अस्मयुमस्मान्कामयमानमस्मद्धितैषिणमित्यर्थः इदम्युरिदं कामयमान इति यास्कः [निरु० ६.३१.] अस्मानिच्छतीत्यस्मयुः सुप आत्मनः क्यजिति [पा० ३.१.८.] क्यच्प्रत्ययः अस्मदष्टेरत्वं छान्दसम् क्याच्छन्दसीति [पा० ३.२.१७०.] उप्रत्ययः ॥ १३ ॥

योगे॑-योगे त॒वस्त॑रं॒ वाजे॑-वाजे हवामहे । सखा॑य॒ इन्द्र॑मू॒तये॑ ॥ १४ ॥

अजदेवत्या गायत्री प्रजापतिर्ऋषिः । अजं मन्त्रयते । सखायः परस्परसख्यं प्राप्ता ऋत्विग्यजमाना वयमिन्द्रमिन्द्रियवन्तं वीर्यवन्तमिन्द्रियप्रदं वा अजमूतये अवनाय

रक्षणाय हवामहे आह्वयामः ह्वः शपि सम्प्रसारणम् । क्व सति वाजे-वाजे तत्तदन्ने मनुष्याणां देवानां च दातव्ये सति तत्तदन्नप्राप्तिनिमित्तं वा । किम्भूतमजं योगे-योगे तवस्तरं युज्यतेऽनुष्ठीयतऽइति योगः कर्म तस्मिन् तत्तत्कर्मणि तवस्तरं बलवत्तरमुत्साहवन्तम् तव इति बलनाम [निघ० २. ९.] तवो बलमस्यास्तीति तवस्वी अस्मायेत्यादिना [पा० ५. २. १२१.] विन् अत्यन्तं तवस्वी तवस्तरस्तम् अतिशये तरप् विन्मतोर्लुगिति [पा० ५. ३. ६५.] तरपि विनो लुक् ॥१४॥

a. प्रतूर्वन्निक्यवक्रामन्नशस्तो रुद्रस्य गाणपत्यं मयोभूरिहि । b. उर्वन्तरिक्षं वीहि । a. स्वस्तिगव्यूतिरभयानि कृण्वन्पूष्णा सयुजा सह ॥१५॥

का० [१६. २. ११.] अनुपस्पृशन्नुत्क्रामयत्येनान्प्राचः (6.) प्रतिमल्लं प्रतूर्वन्नुर्वन्तरिक्षं पृथिव्याः सधस्थादिति । स्पर्शमकुर्वन्नश्वादीन्भयं दर्शयन्प्राचो गमयति ॥ विराड्रूपा त्रिष्टुप् यजुर्मध्या उर्वन्तरिक्षं वीहीत्येतावद्यजुः त्रय एकादशाक्षराश्चतुर्थोऽष्टाक्षरः पादो यस्याः सा विराड्रूपा अत्र द्वितीयो द्वादशार्णस्तेनैकाधिका । ऋचो मध्ये यजुः । अस्याः पूर्वार्धस्याश्वो देवता । हे अश्व त्वमिहि आगच्छ किं कुर्वन्प्रतूर्वन् तूर्वतिर्बधकर्मा शत्रून्हिंसन् । अशस्तीः भ्रातृव्यैः क्रियमाणा अपकीर्तीरवक्रामन्यदिरवष्टम्भयन्निवारयन्नित्यर्थः । आगमने को गुण इति चेत् मयोभूः मयः सुखं भावयतीति मयोभूः अस्माकं सुखं भावयन्सन् रुद्रस्य क्रूरदेवस्य गणावतो गाणपत्यं गणपतित्वमिहि आ समन्तात्प्राप्नुहि अत्रागमने गणपतित्वं लप्स्यसऽइति भावः ॥ उर्वन्तरिक्षम् यजुःसहितोत्तरार्धस्य रासभोत्क्रमणे विनियोगः हे गर्दभ अभयानि कृण्वन् ऋत्विग्यजमानानां व्याघ्रादिभ्यो भयपरिहारं कुर्वन् सयुजा समानयोगिन्या पूष्णा पृथिव्या सह उरु विस्तीर्णमन्तरिक्षं वीहि विशेषेण प्राप्नुहि इयं वै पृथिवी (7.) पूषेति श्रुतेः [६. ३. २. ८.] सह युङ्क्ते सा सयुक् तया । किम्भूतस्त्वं स्वस्तिगव्यूतिः स्वस्तीत्यविनाशनाम [निरु० ३. २१.] स्वस्ति विनाशरहितो गव्यूतिर्मार्गो यस्य । भयवर्जितप्रभूतयवसोदकमार्गः सन्नागच्छेत्यर्थः । नैको ऽध्वानं प्रपद्येतेति न्यायात्पूष्णा सहेत्युक्तिः ॥१५॥

a. पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर ।

b. अग्निं पुरीष्यमङ्गिरस्वदच्छेमः । c. अग्निं पुरीष्यमङ्गिरस्वद्धरिष्यामः ॥१६॥

अनोत्क्रमणे विनियोगः । यजुः । आसुरी गायत्री आग्नेयी । हे अग्ने (8.) पृथिव्याः भूमेः सधस्थात्सहस्थानात्पुरीष्यं पशव्यमग्निमङ्गिरस्वदङ्गिरस-इवाभर आहर ॥ का° [१६.३.१२.] अग्निषु प्रज्वलत्सु पिण्ड गृह्णत्यग्निं पुरीष्यमिति । त्रिषु अग्निषु दीप्यमानेषु ब्रह्मयजमानाधर्यवश्चतुष्कोणश्चभ्रस्थं मृत्तिकापिण्डं प्रति गृह्णत्यश्वगर्दभाजा अपीति सूत्रार्थः ॥ सामगायत्री छन्दः । पुरीष्यं पशव्यमग्निमङ्गिरस-इव वयमच्छेमः अच्छ अभिमुखमिमः गच्छामः अच्छिरासुमिति शाकपूणिरिति यास्कः [निरु° ५.२८.] ॥ का° [१६.२.१४.] अनड्वापुरुषमीक्षते देवपितृमनुष्यानर्थकमग्निं पुरीष्यमिति । देवपितृमनुष्याणां निष्प्रयोजनोऽनड्वापुरुषस्तं पश्यतीति सूत्रार्थः ॥ आग्नेयं यजुः आसुर्यनुष्टुप् । पशव्यमग्निमङ्गिरस-इव वयं भरिष्यामः सम्पादयिष्यामः ॥१६॥

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥१७॥

का° [१६.२.१५.] वल्मीकवपामादाय छिद्रेण पिण्डमीक्षतेऽन्वग्निरिति । वल्मीकस्य योऽवयव उन्नतत्वेनाभिवृद्धः सा वल्मीकवपा पिण्डाहवनीयात्तराले स्थापितास्ति तां गृहीत्वा तत्स्थाने स्थित्वा तच्छिद्रेण पिण्डं पश्यतीति सूत्रार्थः ॥ अग्निर्देवत्या त्रिष्टुप्पुरोधोदृष्टा प्रथमस्य व्यूहनम् । अग्निरुषामुषःकालानामग्रमुपक्रममन्वख्यत् अनुक्रमेण प्रकाशितवान् । ज्ञातं ज्ञातं वेत्ति वेदयति वा ज्ञातवेदाः अयमग्निः प्रथमः मुख्यः सन् अहानि दिनानि अन्वख्यत् किं च सूर्यस्य रश्मीन्किरणान्पुरुत्रा बहुधा अन्वख्यत् । किं च द्यावापृथिवी उभे अपि अनु क्रमेण आततन्थ आतेनिथ आततान सर्वतो व्याप्तवान् व्यत्ययो बहुलमिति [पा° ३.१.८५.] पुरुषव्यत्ययः बभूथाततन्थेत्यादिना [पा° ७.२.६४.] निपातः । सर्वप्रकाशको लोकस्रष्टा योऽग्निस्तं पश्याम इति शेषः ॥१७॥

आगत्य वाज्यध्वानꣳ सर्वा मृधो विधूनुते
अग्निꣳ सधस्थे महति चक्षुषा निचिकीषते ॥१८॥

का° [१६. २. १७.] आगत्येत्यभिमन्त्रयतेऽश्वमिति । मृत्पिण्डान्ते तिष्ठन्नश्वमभिमन्त्रयते ॥ अश्वदेवत्यानुष्टुब्भयोभूदृष्टा । वाजी वेगवानयमश्वः अध्वानं मार्गमागत्य प्राप्य सर्वा मृधः सर्वान्संग्रामान्याप्मनः श्रमान्विधूनुते विविधं कम्पयति अपनयतीत्यर्थः ततो विगतश्रमः सन् महति उत्कृष्टे सधस्थे सहस्थाने पृथिव्यां वर्तमानमग्निमग्निहेतुं मृदं चक्षुषा निचिकीषते पश्यति पश्यत्यर्थश्छान्दसोऽयं धातुः ॥ १८ ॥

आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् ।
भूम्या वृत्राय नो ब्रूहि यतः खनेम तं वयम् ॥ ११ ॥

का° [१६. २. १८.] आक्रम्येत्येतेन मृत्पिण्डमधिष्ठापयतीति (9.) । एतेनाश्वेन गर्तस्थं मृत्पिण्डमधिष्ठापयति क्रमयति मृत्पिण्डोपर्यश्वस्य सव्यं पदं स्थापयतीत्यर्थः सूत्रस्य ॥ अश्वदेवत्यानुष्टुप् हे वाजिन् अश्व पृथिवीं भूमिमाक्रम्याधिष्ठाय पादस्पर्शेन परीक्ष्य रुचा दीप्त्या कृत्वा त्वमग्निमिच्छ अग्नेरन्वेषणं कुरु अग्निहेतुं मृदं निश्चिन्वित्यर्थः । किं च भूम्या वृत्राय वृतु वर्तने क्त्राप्रत्ययः क्तो यक् अत्र स्पर्शनार्थः धातूनामनेकार्थत्वात् भूमेः प्रदेशं स्पृष्ट्वा नोऽस्माकं त्वं ब्रूहि अयं प्रदेशोऽग्निहेतुमृद्योग्य इति कथय यतो यस्मात्प्रदेशाद्वयं तमग्निं खनेम खननेन सम्पादयाम यद्वा यतः प्रदेशात्तादृशी मृत्प्राप्यते तं प्रदेशं वयं खनेम विदारयाम ॥ ११ ॥

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ॥ २० ॥

का° [१६. २. १९.] द्यौस्तऽइति पृष्ठस्योपरि पाणिं धारयन्ननुपस्पृशन्निति । पिण्डोपरि पदं दधतमश्वमस्पृशंस्तिष्ठन्नधर्युर्दक्षिणकरमश्वपृष्ठे धारयन्मन्त्रं पठतीति सूत्रार्थः ॥ आर्षी बृहती अश्वदेवत्या । हे अश्व द्यौः द्युलोकस्ते तव पृष्ठं पृथिवी भूलोकस्तव सधस्थं सहस्थानं पादौ अन्तरिक्षमन्तरिक्षलोकस्तवात्मा शरीरान्तर्वर्ती जीवात्मा समुद्र उदकं तव योनिः उत्पत्तिस्थानमप्सुयोनिर्वाऽअश्व इति श्रुतेः । एवं स्तूयमानस्त्वं चक्षुषा विख्याय उखायोग्यां मृदं विलोक्य पृतन्यतः संग्रामं कर्तुमिच्छतः शत्रून्राक्षसादींस्तस्यां मृदि गूढं स्थितानभितिष्ठ पादैराक्रम्य वि-

नाशय पृतनामिच्छति पृतन्यति सुप आत्मनः क्यच् [पा° ३.१.८.] कव्यध्वरपृतनस्यर्चि लोप इति [पा° ७.४.३९.] क्यचि परे पृतनाशब्दस्यान्तलोपः ततः शतृप्रत्ययः ॥ २० ॥

उत्क्रामं महते सौभगायास्मादास्थानाद्द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थेऽअस्याः ॥ २१ ॥

का° [१६.२.१९.] उत्क्रामेत्युत्क्रमयतीति । मृत्पिण्डादश्वमुत्तारयतीत्यर्थः ॥ विराडश्वदेवत्या दशार्णाचतुष्पादा विराट् पङ्क्तिः द्वितीय एकादशस्तेनैकाधिका । हे वाजिन्महते सौभगाय महाभाग्याभिवृद्धये (10.) ऽस्मात् आस्थानात् खननप्रदेशाद्यत्र त्वं तिष्ठसि तस्मादुत्क्राम भगशब्द ऐश्वर्यवाची शोभनं भगमैश्वर्यं यस्य स सुभगस्तस्य भावः सौभगं तस्मै । कीदृशस्त्वं द्रविणोदाः द्रविणो धनं ददातीति द्रविणस्शब्दः सान्तः त्वयि उत्क्रान्ते वयं पृथिव्याः भूमेः सुमतौ शोभनमतौ सानुग्रहे चित्ते स्याम भवेम कीदृशा वयम् अस्याः पृथिव्या उपस्थे उत्सङ्गे उपरिभागे अग्निमग्न्यर्थं मृत्पिण्डं खनन्तः खनितुमुद्योगं कुर्वन्तः ॥ २१ ॥

उदक्रमीद्द्रविणोदा वाज्यर्वाकः सु लोकꣳ सुकृतं पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥ २२ ॥

का° [१६.२.२०.] उदक्रमीदित्यभिमन्त्रयते । पिण्डादुत्तारिताश्वं मन्त्रयते ॥ आश्वी त्रिष्टुप् । अर्वा अरणशीलः चञ्चलो द्रविणोदाः धनदाता वाजी अश्वः यत्प्रदेशादुदक्रमीत् उत्क्रान्तवान् पृथिव्यां तं सुलोकं (11.) शोभनं लोकं प्रदेशं सुकृतं पुण्यवत्तमकः कृतवान् करोतेर्लङि बहुलं छन्दसीति [पा° २.४.७३.] शपो लुकि गुणे तिलोपे ह्रूपम् । ततः प्रदेशाद्वयमग्निमग्निहेतुं मृदं खनेम कीदृशमग्निं सुप्रतीकं शोभनं प्रतीकं मुखं यस्य तं कीदृशा वयं स्वः स्वर्गमधिरुहाणा अधिरोहन्तः अधिरोहणकामा एतत्कर्म कुर्म इति भावः अधीत्युपरिभावे ऐश्वर्ये वा किम्भूतं स्वः नाकं नास्त्यकं यत्र तं कं सुखमकं दुःखं तद्रहितं तथा उत्तममुत्कृष्टम् ॥ २२ ॥

आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ २३ ॥

का° [१६.२.२२.] उपविश्य मृदमभिजुहोत्या त्वा जिघर्मीति व्यतिषक्ताभ्यामृग्भ्यामाहुती सुवेणाश्वपदे । अस्यार्थः आज्यं संस्कृत्य पिण्डसमीपे उपविश्य मृदमभि अश्वपदे मृत्पिण्डोपरिस्थिताश्वपदमुद्दायामा त्वा आ विश्वत इति ऋग्भ्यां व्यतिषक्ताभ्यां सुवेणाहुती द्वे जुहोति व्यतिषङ्गश्चैवम् आ त्वा जिघर्मीति पूर्वस्याः पूर्वार्धं मर्यश्रीरित्युत्तरस्या उत्तरार्धं पठित्वैकाहुतिः आ विश्वत इत्युत्तरस्याः पूर्वार्धं पृथुं तिरश्चेति पूर्वस्या उत्तरार्धं च पठित्वा द्वितीयाहुतिरिति ॥ गृत्समदर्षिः अग्निर्देवता द्वे त्रिष्टुभौ । हे अग्ने मनसा श्रद्धायुक्तेन चित्तेन घृतेनाज्येन कृत्वा त्वामाजिघर्मि आसिञ्चामि दीपयामि वा घृ क्षरणदीप्त्योः क्र्यादिः । कीदृशं त्वां विश्वानि भुवनानि प्रतिक्षियन्तं सर्वाणि भूतानि प्रत्येकं निवसन्तं क्षि निवासगत्योः तुदादिकादस्माच्छतृप्रत्ययः । तिरश्चा पृथुं तिरोऽञ्चतीति तिर्यक् तेन तिर्यगञ्चनेन ज्योतिषा पृथुं विस्तीर्णं वयसा धूमेन बृहन्तं महान्तम् इतो वाऽयमूर्ध्वं रेतः सिञ्चति धूमो सामुत्रा वृष्टिर्भवतीति श्रुतेः यद्वा तिरश्चा तिर्यक्प्रमाणेन पृथुं विस्तृतमिति बहुदेशव्याप्तिः वयसा वयऽपलक्षितेन कालेन बृहन्तमिति बहुकालव्याप्तिः देशकालानवच्छिन्नमित्यर्थः । तथा व्यचिष्ठं व्यचनं व्यचोऽवकाशः सोऽस्यास्तीति व्यचवान् अतिशयेन व्यचवान्व्यचिष्ठः अतिशायने तमबिष्ठनाविति [पा° ५.३.५५.] इष्ठन् विन्मतोर्लुगिति [पा° ५.३.६५.] इष्ठनि परे मतुपो लुक् । अन्नैः रभसं रभ राभस्ये घृताद्यन्नैः सोत्साहम् अनेकान्नैर्हृतैरप्यस्य शक्तिक्षयो नास्तीति भावः । तथा दृशानं दर्शनीयं दृश्यमानं वा अन्ये देवा अदृश्या अयं तु दृश्यत ऽइति भावः दृशः शानन्प्रत्ययः ॥ २३ ॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्री स्पृहयद्वर्णोऽअग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ २४ ॥

अहमग्निमाजिघर्मि समन्तात्सिञ्चामि दीपयामि च किम्भूतं विश्वतः प्रत्यञ्चं सर्वतः प्रत्यगात्मतया प्रतीयमानम् । सोऽग्निररक्षसा क्रौर्यरहितेन अक्रुध्यमानेन

प्रसन्नेन मनसा चित्तेन तत् घृतं जुषित जुषतां सेवतां प्रार्थनायां लिङ् । कीदृशोऽग्निः मर्यश्रीः मर्यैर्मनुष्यैः श्रीयते आश्रीयते सेव्यते इति मर्यश्रीः मनुष्यैराश्रयणीयः । स्पृहयद्वर्णः स्पृहयन् स्पृहणीयो वर्णो रूपं यस्य यजमानैः स्पृहणीयरूप इत्यर्थः । अभिमृश्यतऽइत्यभिमृट् न अभिमृश्यते नाभिमृट् (12.) तस्मै नाभिमृशे चतुर्थी तृतीयार्थे तनोर्विशेषणं नाभिमृशा अभिमर्शनं कर्तुमयोग्यया दारुकत्वात् ईदृश्या तन्वा शरीरेण ज्वालालक्षणेन जर्भुराणः जृम्भतऽइति जर्भुराणः जृभी गात्रविनामे इतस्ततश्च गच्छन् जृभेरौणादिक ऽराणप्रत्ययः । ईदृशमग्निमाज्यिघर्मीति योज्यम् ॥२४॥

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥२५॥

का° [१६.२.२३.] अभ्रा पिण्डं त्रिः परिलिखति परि वाजपतिरिति बर्हिर्बर्हिरुत्तरयोत्तरयेति । अस्यार्थः अभ्रा वारत्रय मृत्पिण्डं परिलिखति परया-परया बर्हिर्बर्हिःप्रदेशे यथा तथा । परि वाजपतिरिति प्रथमं लिखति परि त्वेति तद्बर्हिर्द्वितीयं त्वमग्नऽइति तद्बर्हिस्तृतीयमित्यर्थः ॥ आग्नेयी गायत्री सोमकदृष्टा । अयमग्निर्हव्यानि नानादेवत्यानि हवींषि पर्यक्रमीत्परिक्रान्तवान् परिक्रमणं भक्षणार्थं स्वीकरणमित्यर्थः । कीदृशोऽग्निः वाजपतिः वाजस्यान्नस्य पतिः पालयिता कविः क्रान्तदर्शनः । किं कुर्वन्हव्यानि पर्यक्रमीत् दाशुषे हवींषि दत्तवते यजमानाय रत्नानि रमणीयानि धनानि दधत् प्रयच्छन् दाशृ दाने अस्य धातोर्दाश्वान्साह्वानित्यादिना [पा°. ६.१.१२.] क्वसुप्रत्ययान्तो निपातः दाशति स्म दत्ते स्म इति दाश्वान् तस्मै दाशुषे । दधाति दत्तऽइति दधत् धाधातुर्दानेऽपि दुधाञ् विधारणे पुष्टौ दानऽइति कल्पद्रुमोक्तेः (13.) ॥२५॥

परि त्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि ।
धृषद्वर्णं दिवे-दिवे हन्तारं भङ्गुरावताम् ॥२६॥

आग्नेयनुष्टुप्पायुदृष्टा । परीत्युपसर्गस्य धीमहीत्यनेन सम्बन्धः । सहस्य सहसि बले भवः सहस्यः बलेन मथ्यमानस्य ज्वायमानत्वात् तत्सम्बोधनं हे सहस्य हे अग्ने वयं त्वा त्वां परिधीमहि सर्वतो ध्यायामः ध्यायतेः सम्प्रसारणं छान्दसमि-

त्युक्तम् । कीदृशं त्वां पुरं पुरीदृपेण स्थितम् आग्नेय्यादिपुराणां (14.) रत्नकत्वात् यद्वा पिपर्त्ति पालयतीति पूस्तम् पॄ पालनपूरणयोः द्विम् उदोष्ठ्यपूर्वस्येति [पा० ७.१.१०२.] उदृदिशे पूरिति दृपम् । तया विप्रं मेधाविनं ब्राह्मणजातिं वा । धृषद्वर्णं जिघृषा प्रागल्भ्ये अतो व्यत्ययेन तौदादिकाच्छ्नूप्रत्ययः धृष्णोति धृषन् प्रगल्भो वर्णो यस्य तम् असह्यरूपमित्यर्थः । दिवे-दिवे प्रतिदिनं भङ्गुरावतां हन्तारं भङ्गुरं भञ्जनीयं पापं तद्येषामस्ति ते भङ्गुरवन्तो विघातका राक्षसादयः यद्वा भङ्गुरमनवस्थितं मनो येषां ते भङ्गुरवन्तोऽनवस्थितचित्तवृत्तयस्तेषां विनाशयितारम् भङ्गुरावतामिति संहितायां दीर्घः (15.) ॥ २६ ॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ २७ ॥

आग्नेयी त्रिष्टुब्गृत्समददृष्टा प्रथमाल्यावेकादशार्णौ द्वितीयतृतीयौ दशार्णौ पादौ यदा तदा पङ्क्तिरेव तृतीयचतुर्थौ दशार्णौ यदा तदा विराड्स्थाना त्रिष्टुप् द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराड्स्थानेत्युक्तेः । अथ मन्त्रार्थः हे नृपते नृणां पालक हे अग्ने त्वं द्युभिरहोभिर्निमित्तभूतैर्मथ्यमानो जायसे प्रतिदिनं मथ्यसेऽहरित्यर्थः यद्वा द्युभिः स्वर्गैः निमित्तभूतैस्तत्र-तत्र यागशालासु जायसे त्वमाशुशुक्षणिः आर्द्रां भूमिं शीघ्रमेव शोषयित्वा यद्वा आशु क्षिप्रं शुचा दीप्त्या क्षणोति हन्ति तमः सनोति सम्भजते वा आशुशुक्षणिः । त्वमद्भ्यो वर्षधाराभ्यो विद्युदात्मना जायसे त्वमश्मनः परि पाषाणस्योपरि पाषाणान्तरसंघट्टनेन जायसे त्वं वनस्पतिभ्योऽरणिकाष्ठेभ्यो जायसे त्वमोषधिभ्यो वंशादिभ्यो जायसे वंशद्वयसंघर्षणेन त्वं नृणां मनुष्याणामग्निहोत्रिणां गृहे जायसे पुत्रो क्षेप सत्स पुनः पिता भवतीति श्रुतेः । किम्भूतस्त्वं शुचिः शुद्धिहेतुः पुनःपाकान्मलीमसमिति स्मृतेः ॥ २७ ॥

III. a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । b. पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामि । ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् । शिवं प्रजाभ्योऽहिंसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामः ॥ २८ ॥

का° [१६. २. २३.] अभ्रा पिण्डं खनति देवस्य त्वेति । अभ्रा कृत्वा पिण्डं परितः खनति कण्डिकया ॥ देवस्य त्वा व्याख्यातम् पृथिव्याः अग्नेयं यजुः अत्यष्टिश्छन्दः । अरुं पृथिव्याः सधस्थादुपरिप्रदेशात्पुरीष्यं पशव्यमग्निमङ्गिरस-इव खनामि कीदृशमग्निं ज्योतिष्मन्तं ज्वालायुक्तम् । हे अग्ने ईदृशं त्वां पृथिव्याः सकृत्स्थानात् अङ्गिरस-इव वयं खनामः । कीदृशं सुप्रतीकं सुमुखम् । अजस्रेणानुपक्षीणेन निरन्तरं वर्तमानेन भानुना रश्मिना दीप्यतं दीप्यमानं छान्दसो धातुः । प्रजाभ्यः प्रजोपकारार्थं शिवं शान्तमत एवाहिंसन्तं हिंसामकुर्वन्तम् पुनरुक्तिरादरार्था ॥ २८ ॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२॥ऽआ च पुष्करे दिवो मात्रया वरिमणा प्रथस्व ॥ २९ ॥

का° [६. २. २४.] कृष्णाजिनमास्तीर्योत्तरतस्तस्मिन्पुष्करपर्णमपां पृष्ठमिति । अस्यार्थः मृत्पिण्डोत्तरभागे प्राग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तत्रापां पृष्ठमिति पादत्रयात्मकमन्त्रेण कमलिनीपत्रमास्तृणाति ॥ पुष्करपर्णदित्या स्वराट्पङ्क्तिः आद्यौ दशकावित्यावेकादशकाविति द्व्यक्षराधिका पङ्क्तिः स्वराट्पङ्क्तिः द्वाभ्यां विराडित्युक्तिः । अथ मन्त्रार्थः हे पुष्करपर्ण त्वमपां जलानां पृष्ठमसि उपर्यवस्थानात् अग्नेः अग्न्यर्थस्य पिण्डस्य योनिः कारणमसि समुद्रमभितः उदकस्य परितः पिन्वमानं प्रीतिकरं यद्वा पिन्वमानमिति समुद्रविशेषणम् पिन्वमानं सिञ्चन्तं समुद्रमुदकमभितः वर्धमानं सत् महत्प्रभूतं भवेति शेषः वर्धमानो महानिति लिङ्व्यत्ययश्छान्दसः पुष्करे जले आ सीद च यद्वा पुष्करे आ समन्तात् महत्प्रभूतं सत् वर्धमानं वृद्धियुक्तं त्वमसि ॥ का° [१६. २. २५.] विमार्ष्ट्यनद्वि इति । एनत्पुष्करपर्णं विपुलं करोति ॥ हे पुष्करपर्ण दिवो मात्रया द्युलोकस्य परिमाणेन वरिम्णा उरुत्वेन त्वं प्रथस्व विस्तृतं भव उरोर्भावो वरिमा तेन प्रस्थस्फेत्यादिना [पा° ६. ४. १५७.] उरोर्वरादेश इमनि ॥ २९ ॥

शर्म च स्थो वर्म च स्थोऽछिद्रे बहुले उभे ।
व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् ॥ ३० ॥

का° [१६.२.२६.] आलभतऽउभे शर्म च स्थ इति । ऋग्द्वयेन कृष्णाजिनपुष्करपर्णे सकृदेव स्पृशेदिति सूत्रार्थः ॥ कृष्णाजिनपुष्करपर्णदेवत्ये द्वे अनुष्टुभौ । हे कृष्णाजिनपुष्करपर्णे उभे युवां शं च स्थः अग्नेः सुखकारिण्यौ अपि भवथः वर्म च स्थः कवचवद्रक्षके अपि भवथः चौ समुच्चये । कीदृशे युवामछिद्रे छिद्ररहिते सकले बर्हले विस्तीर्णे व्यचस्वती व्यचनं व्यचः असुन्प्रत्ययः तद्वती अवकाशवती । तथाविधे युवां पुरीष्यं पशव्यमग्निं संवसाथां सम्यगाछादयतम् वस आछादने अदादिः आछाद्य चाग्निं भृतं बिभृतं धारयतं बिभर्तेः बर्हलं छन्दसीति [पा° २.४.७३.] शपो लुक् ॥३०॥

संवसाथाꣳ स्वर्विदा समीचीऽउरसा त्मना ।
अग्निमत्तर्भरिष्यन्ती ज्योतिष्मत्तमꣳ रमित् ॥३१॥

हे कृष्णाजिनपुष्करपर्णे ज्योतिष्मत्तं तेजस्विनमꣳ रमित् निरन्तरमेवाग्निमत्तरुदरे भरिष्यन्ती धारयिष्यन्ती युवामुरसा त्मना उरोरूपेण भवदीयशरीरेणाग्निं संवसाथां सम्यगाछादयतम् कीदृशे युवाम् स्वर्विदा विभक्तेराकारः स्वर्वित्त इति स्वर्विदौ यज्ञसूर्यदेवाकर्वाची स्वःशब्दः स्वर्गलाभसाधनेऽऽत्यर्थः तथा समीची सम्यगञ्चने संगतेऽऽकचित्तेऽऽत्यर्थः ॥३१॥

a. पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने ।
b. त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥३२॥

का° [१६.२.२७.] पिण्डं पुरीष्योऽसीति ॥ प्रतिष्ठागायत्री अष्टौ सप्त षट् चेति प्रतिष्ठेति पिङ्गलोक्तेः । अग्निदेवत्या । हे अग्ने त्वं पुरीष्यः पशव्योऽसि विश्वभरा असि विश्वं सर्वं जगद्बिभर्ति धारयति पुष्णाति वा विश्वभराः असुन्प्रत्ययः । हे अग्ने प्रथमः इतरेभ्यः पूर्वभावी अथर्वाख्य ऋषिः प्राणो वा त्वा त्वां निरमन्थत् निःशेषेण मथितवान् ॥ का° [१६.२.२८.३.१.] पाणिभ्यां परिगृह्णात्येनं दक्षिणोत्ताभ्यां दक्षिणः साग्निस्त्वामग्नऽइति षड्भिः सर्वꣳ सकृदृचा पुष्करपर्णे निदधातीति । दक्षिणेनाग्निं धृत्वोभाभ्यां कराभ्यां सर्वं पिण्डं त्वामग्नऽइति षड्ऋचेन सकृदृक्षीवा पुष्करपर्णे स्थापयतीति सूत्रार्थः ॥ अग्निदेवत्यास्तिस्रो गायत्र्यो भरद्वाज-

दृष्टाः । हे अग्ने अथर्वा प्राणः पुष्कराद्धि उदकात्सकाशात्त्वां निरमन्थत निःशेषेण मथितवान् आपो वै पुष्करं प्राणोऽथर्वेति श्रुतेः [६.४.२.२.] । वाघत इति ऋत्विङ्नामसु [निघ० ३.१८.] पठितं विश्वस्य सर्वस्य जगतः सम्बन्धिनो वाघतः ऋत्विजस्त्वां मूर्ध्नोऽथादरणेः शिरसो निरमन्थतेति व्यत्ययः यद्वा विश्वस्येति षष्ठ्येकवचनं प्रथमाबहुवचनार्थे विश्वे सर्वे वाघत इत्यर्थः ॥ यद्वा ऋचोऽयमर्थः हे अग्ने अथर्वाख्य ऋषिः पुष्कराद्धि पद्मपत्रस्योपरि त्वां निरमन्थत कीदृशात्पुष्करात् मूर्ध्नः उत्तमाङ्गवत्प्रशस्तात् विश्वस्य वाघतः सर्वजगतो वाहकात् पुष्करपर्णमग्निमन्थनयज्ञनिष्पादनद्वारेण सर्वं जगन्निर्वहति ॥३२॥

तमु त्वा दध्यङ्ङृषिः पुत्र ईधेऽथर्वणः । वृत्रहणं पुरंदरम् ॥३३॥

हे अग्ने अथर्वणः ऋषेः पुत्रः दध्यङ्नामक ऋषिः तमु त्वा उ एवार्थे तमेव त्वाम् ईधे प्रज्वालितवान् कीदृशं त्वां वृत्रहणं वृत्रस्य पाप्मनो हन्तारं ब्रह्महभ्रूणवृत्रेषु क्रन् इति [पा० ३.२.८७.] क्विप् पुरंदरं रुद्रदृषेणासुरसम्बन्धिनां त्रयाणां पुराणां विदारयितारम् वाचंयमपुरंदरौ चेति [पा० ६.३.६१.] खशि निपातः ॥३३॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयꣳ रणे-रणे ॥३४॥

पथि वर्तमानः पाथ्यः सन्मार्गवर्ती यद्वा पाथसि अन्तरिक्षे हृदयाकाशे भवः पाथ्यः पाथोनदीभ्यां ढ्यञिति-[पा० ४.४.१११.] पाथःशब्दात् ढ्यञ्प्रत्ययः ढिलोपः । वृषा सेक्ता मनः हे अग्ने त्वा त्वां समीधे संदीपयति मनसा हि ब्रह्मपन्था उपलभ्यते (16.) अतः पाथ्यः । मनसैवानुद्रष्टव्यमिति श्रुतेः मनसैवाभिलष्य स्त्रियाꣳ रेतः सिञ्चतीति वृषा हि मनः । मनो वै पाथ्यो वृषेति श्रुतेः [६.४.२.४.] । कीदृशं त्वां दस्युहन्तमम् दस्यून्हन्तीतिदस्युहा अतिशयेन दस्युहा दस्युहन्तमस्तम् नलोपः प्रातिपदिकान्तस्येति [पा० ८.२.७.] नलोपे दस्युहतम इति प्राप्ते नाद्घस्येति [पा० ८.२.१७.] तमपो नुडागमः अतिशयेन शत्रूणां हन्तारम् रणे-रणे धनंजयं तेषु तेषु संग्रामेषु धनस्य जेतारम् ॥३४॥

सीद होतः स्वऽउ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥३५॥

अग्नेयी त्रिष्टुप् देवश्रवोदेववाताभ्यां दृष्टा । हे होतः देवानामाह्वातः हे अग्ने स्वे उ लोके उ एवार्वे स्वकीये एव स्थाने कृष्णाजिनाख्ये त्वं सीद उपविश कीदृशस्त्वं चिकित्वान् चेतनवान् स्वाधिकारं जानन् किं च सुकृतस्य साधुकृतस्य कर्मणो यज्ञस्य योनौ स्थाने कृष्णाजिने यज्ञं सादय स्थापय अन्येषामपि दृश्यत ऽइति [पा° ६.३.१३७.] संहितायां क्रियापदस्य दीर्घः यज्ञे क्रियमाणेऽवघातपेषणसोमनिधानादीनि कृष्णाजिनऽएव भवन्तीति कृष्णाजिनं सुकृतस्य योनिः कृष्णाजिनं वै सुकृतस्य योनिरिति श्रुतिः [६.४.२.६.] । हे अग्ने यतो देवावीः देवानवति प्रीणातीति देवावीः त्वं हविषा हव्येन कृत्वा देवान्यज्ञासि यजसि लेटो ऽडाटावित्याडागमः [पा° ३.४.९४.] पूजयसि अतो यजमाने बृहन्महद्वय आयुरन्नं वा धाः धेहि दधातेर्लुङि मध्यमैकवचने अधा इति प्राप्ते बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६.४.७५.] ॥३५॥

नि होता होतृषदने विदानस्त्विषो दीदिवाँ२॥ऽअसदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वोऽअग्निः ॥३६॥

अग्नेयी त्रिष्टुप् गृत्समदऋषिः । नीत्युपसर्गोऽसदित्यनेन सम्बध्यते । अग्निः होतृषदने न्यसीदत् होता यस्मिन्सीदति तद्धोतृषदनम् होमनिष्पादकयोग्यस्थाने उत्तरवेदिरूपे सम्यगुपविष्टवान् । कीदृशोऽग्निः होता देवानामाह्वाता । विदानः स्वाधिकारं जानन् । त्विषः त्विष दीप्तौ पचाद्यच् त्विषतीति त्विषः दीप्तिमान् । दीदिवान् दीव्यतीति दीदिवान् दिवु क्रीडादौ अस्मात्क्वसुः तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६.१.७.] अभ्यासदीर्घः लोपो व्योर्वलीति [पा° ६.१.६६.] वलोपः होतृधिष्ण्यादौ गमनवान् । सुदक्षः साधु कुशलः क्षिप्रकारी । अदब्धव्रतप्रमतिः दम्भु वधे अदब्धमनुपहतं व्रतं कर्म यस्य सोऽदब्धव्रतः प्रकृष्टा मतिर्बुद्धिर्यस्य स प्रमतिः अदब्धव्रतश्चासौ प्रमतिश्चेति सः । तया वसिष्ठः वसति स्वस्थानऽइति वस्ता अत्यन्तं वस्ता वसिष्ठः वस्तृतमः तुरिष्ठेमेयःस्विति [पा° ६.४.१५४.] इष्ठनि परे तृचो लोपः । सहस्रम्भरः सहस्रं सर्वजनं बिभर्ति पुष्णाति सहस्रम्भरः । शुचिजिह्वः शुचिः शुद्धा होमयोग्या जिह्वा ज्वाला यस्य सः नानादेवत्यानि हवींष्यभ्यवहरन्नप्युच्छिष्टं न करोतीति भावः ॥३६॥

सꣳसीदस्व महाँ२॥ऽअसि शोचस्व देववीतमः ।
वि धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥३७॥

आग्नेयी बृहती प्रस्कण्वदृष्टा तृतीयो द्वादशार्णोऽन्येऽष्टार्णाः । मेध्यशब्दस्य छान्दसो विप्रकर्षः हे मियेध्य हे मेध्य यज्ञिय यज्ञार्ह हे प्रशस्त उत्कृष्ट हे अग्ने त्वं संसीदस्व पुष्करपर्णे सम्यगुपविश । यस्त्वं महानसि अनेकक्रतुहेतुत्वात् स त्वं शोचस्व शुच दीप्तौ दीप्यस्व । कीदृशस्त्वं देववीतमः देवान्वेति तर्पयति देववीः वी काल्यादौ क्विप् अतिशयेन देववीः देववीतमः । किं च दर्शतं दर्शनीयमरुषमरोचनं धूमं विसृज विमुञ्च वीत्युपसर्गः सृजेत्यनेन सम्बध्यते इतो वा ऽअयमूर्ध्व (17.) रेतः सिञ्चति धूमꣳ सामुत्र वृष्टिर्भवतीति श्रुतिः ॥३७॥

अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥३८॥

का° [१६.३.२.] अपः श्वभ्रेऽवनयत्यपो देवीरिति । मृत्पिण्डगर्ते जलं सिञ्चति ॥ अब्देवत्या न्यङ्कुसारिणी सिन्धुद्वीपदृष्टा द्वितीयो द्वादशार्णोऽन्ये त्रयोऽष्टार्णा यस्याः सा न्यङ्कुसारिणी। पूर्वर्चो (18.) ऽग्ने इति सम्बोधनमध्याह्रियते द्यौरर्धर्युर्वा सम्बोध्यते हे अग्ने यद्वा हे द्यौः यद्वा हे अर्धर्यो देवीः देवनशीला अपः उपसृज अस्मिन्खननप्रदेशे आसिञ्च । कीदृशीरपः मधुमतीः रसवतीः आरोग्यदात्रीः (19.) किमर्थं प्रजाभ्यः अयक्ष्माय पञ्चमी षष्ठ्यर्थे यक्ष्मणोऽभावोऽयक्ष्मं तस्मै प्रजानामारोग्याय । तासां सिक्तानामपां स्थानात्सुक्षेत्ररूपादस्मात्खननप्रदेशात् ओषधयः आ समन्ताडुज्जिहतामुद्गच्छन्तु । कीदृश्य ओषधयः सुपिप्पलाः शोभनं पिप्पलं फलं यासां ताः ॥३८॥

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥३९॥

का° [१६.३.३.] सं तऽइति वातमपक्षिपति । पिण्डगर्ते वायुं प्रेरयति ॥ त्रिष्टुप् अर्धं पृथिवीदेवत्यमर्धं वायुदेवत्यम् । हे पृथिवि उत्तानायाः ऊर्ध्वाभिमुखेना-

वस्थितायास्ते तव यद्धृदयं हृदयसदृशं खननस्थानं विकस्तं पिण्डावटरूपेण विकसितम् इडभाव आर्षः [पा° ७.२.३४.] तत्स्थानं वायुः संदधातु पूर्वोक्तेन जलप्रक्षेपेण तृणादिपूरणेन च वायुर्यथा पूर्वं तथा सम्यक्करोतु । कीदृशो वायुः मातरिश्वा मातर्यन्तरिक्षे सर्वप्राणिनामवहेदकारिणि श्वयति गच्छति मातरिश्वा । एवं पृथिवीमुक्त्वा वायुमाह हे देव द्योतनादिगुणयुक्त वायो यस्त्वं देवानामग्न्यादीनां प्राणथेन प्राणभावेन चरसि प्राणानां भावः प्राणथम् भावे छान्दसस्थल्प्रत्ययः कस्मै प्रजापतिरूपाय तुभ्यमियं पृथिवी वषडस्तु वषट्कृता भवतु नो कैतावत्यन्याकृतिरस्ति यथैषेति [६.४.३.४.] श्रुतेः ॥३१॥

सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः ।
वासोऽअग्ने विश्वरूपꣳ संव्ययस्व विभावसो ॥४०॥

का° [१६.३.५.] आस्तीर्णयोरुत्तानुदृल्लाति सुजात इति । अस्यार्थः आस्तीर्णयोः कृष्णाजिनपुष्करपर्णयोः प्रान्तानूर्ध्वमादत्तऽइति ॥ अग्निर्देवत्यानुष्टुप् द्वितीयो नवार्णः । सुजातः सुष्ठूत्पन्नोऽयमग्निः ज्योतिषा स्वकीयेन तेजसा सह शर्म सुखं यथा भवति तथा स्वः स्वर्गसदृशं वरूथं वरणीयं गृहं कृष्णाजिननिर्मितमासदत् आसीदतु प्राप्नोतु ॥ का° [१६.३.६.] त्रिवृता सुज्रयोक्त्रेणोपनह्यति वासोऽअग्नऽइति । उद्गृहीतान्कृष्णाजिनपुष्करपर्णयोरुत्तान्सुज्रयोक्त्रेण बध्नात्युत्तरार्धेनेति सूत्रार्थः । हे विभावसो विभा दीप्तिरेव वसु धनं यस्य स विभावसुः तत्सम्बोधनं हे विभावसो हे अग्ने विश्वरूपं बहुप्रकाररूपं विचित्रं वासः वस्त्रं कृष्णाजिनरूपं संव्ययस्व सम्यक् परिधत्स्व व्येञ् संवरणे अस्य रूपम् ॥४०॥

उद्बु तिष्ठ स्वधरावो नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिरग्ने याहि सुशस्तिभिः ॥४१॥

का° [१६.३.७.] उत्तिष्ठति पिण्डमादायोद्बु तिष्ठेति । तं पिण्डं गृहीत्वोत्तिष्ठेदिति सूत्रार्थः ॥ अग्निर्देवत्या पथ्या बृहती विश्वमनोदृष्टा तृतीयो द्वादशार्णः अन्ये अष्टार्णाः । हे स्वधर शोभनोऽधरो यज्ञो येन सुष्ठु यागनिर्वाहक हे अग्ने उत्तिष्ठ उ उत्तिष्ठैव उत्थाय च देव्या देवनस्वभावया धिया क्रीडापरया बुद्ध्या नोऽस्मा-

नव पालय ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः । किं च हे अग्ने सुशस्तिभिः शोभनकीर्तिभिः सह यद्वा साधुशिष्टैरर्थैः कृत्वा आयाहि आगच्छ किं कर्तुम् वृहता भासा प्रौढेन तेजसा दृशे सर्वान्प्राणिनो द्रष्टुम् दृशे विख्ये चे- [पा° ३.४.११.] पश्यतेस्तुमर्थो निपातः कीदृशस्त्वं सुशुक्रनिः साधु शुचो रश्मीन्व- नति सम्भजति सुशुक्रनिः रश्मिप्रसारक इत्यर्थः । आ अग्ने याहीति पदच्छेदः ॥४१॥

ऊर्ध्व ऊ षु णो ऽतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥४२॥

का° [१६.३.८.] ऊर्ध्वबाहुः प्राचं प्रगृह्णात्यूर्ध्व ऊ षु ण इति । प्रसारितबाहुः प्राचं पिण्डं गृह्णाति ॥ अग्निर्देवत्योपरिष्टाद्बृहती कण्वदृष्टा चतुर्थः पादो द्वादशा- र्णोऽन्ये त्रयोऽष्टार्णाः सोपरिष्टाद्बृहती । हे अग्ने नोऽस्माकमूतये रक्षणाय. ऊर्ध्व ऊ सु तिष्ठ ऊर्ध्व एव सुतरामवस्थितो भव ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] दीर्घस्तिष्ठा इत्यत्र नश्च धातुस्थोरुषुभ्य इति [पा° ८.४.२७.] न इत्यस्य णात्वम् । क-इव देवो न सविता न इवार्थे सविता देव-इव यथा सविता देव ऊर्ध्वः सन्नस्मानवति तद्वत् स त्वमूर्ध्वः सन्वाजस्य सनिता अन्नस्य दाता भवेति शेषः षणु दाने यस्मात्कारणात् अञ्जिभिर्मक्षाभिव्यञ्जकैर्वाघद्भिः हव्यवाहकैर्ऋत्विग्भिः सह त्वा विह्वयामहे विविधमाह्वयामः तस्मादूर्ध्व एव तिष्ठेति पूर्वत्रान्वयः अञ्जन्ति व्य- क्तीकुर्वन्तीत्यञ्जिनस्तैः यद्वा अञ्जिभिः द्रव्याणां व्यञ्जकैः रश्मिभिः सहितं त्वां वि- ह्वयामहे कीदृशैरञ्जिभिः वाघद्भिः हविषां वोढृभिः ॥४२॥

स जातो गर्भोऽअसि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमाँस्यक्तून्प्र मातृभ्योऽअधि कनिक्रदद्गाः ॥४३॥

का° [१६.३.९.] अवह्वत्योपरिनाभि धारयन्नश्वप्रभृतीनभिमन्त्रयते स जात स्थि- रो भव शिवो भवेति । पिण्डं नीचैरवतार्य नाभ्युपरि हस्ताभ्यां धारयन्नश्वगर्दभा- ज्जान्स जात इत्यावृत्क्रमेण प्रतिमन्त्रं मन्त्रयते एकैकं पश्यन्नेकैकं मन्त्रं जपतीति सूत्रार्थः ॥ अश्वदेवत्या त्रिष्टुप् त्रितदृष्टा । अश्वमग्नीकृत्य स्तौति हे अग्ने स त्वं रो- दस्योः द्यावापृथिव्योर्गर्भः सन्निदानीं जातोऽसि । कीदृशस्त्वं चारुः शोभनः पूज्यः ।

ओषधीषु पुरोडाशादिलक्षणासु दातव्यासु विभृतः विकृतः । चित्रः नानावर्णाभिर्ज्वालाभिर्विचित्ररूपः । इदानीमुत्पन्नत्वात् शिशुः शंसनीयो वा । अक्तूनिति लिङ्गव्यत्ययः अक्तूनि तमांसि रात्र्युपलक्षितानि अन्धकाराणि परि परिहरन् मातृभ्योऽधि ओषधिवनस्पतिभ्यः सकाशात् कनिक्रदत् अत्यन्तं शब्दं कुर्वन् प्रगाः प्रकर्षेण गच्छ इणो गा लुङीति [पा° २.४.४५.] गादेशः अडभावश्छान्दसः छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] सर्वकाले लुङ् प्रेत्युपसर्गो गा इत्यनेन सम्बध्यते । दाधर्तिदर्धर्तीत्यादिना [पा° ७.४.६५.] कनिक्रददिति यङ्लुगन्तो निपातः ॥४३॥

स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्निः पुरीषवाहणः ॥४४॥

रासभदेवत्यानुष्टुबुत्तिग्वा । इयर्ति प्रति पदार्थं गच्छतीत्यर्वा रासभः हे अर्वन् गमनकुशल स्थिरः चलनरहितः सन् त्वं वीड्वङ्गः दृढकायो भव वीडुशब्दो दृढार्थः वीडून्यङ्गानि यस्य सः । आशुः वेगवान्सन्वाजी अन्नहेतुर्भव । पृथुः विस्तीर्णः सन् अग्निः सुषदः सुखासनः स्वास्थ्येयो भव सुखेन सद्यते स्थीयते यस्मिन्स सुषदः । कीदृशस्त्वं पुरीषवाहणः पुरीषशब्देन पांशुरूपा मृदुच्यते तां वहतीति पुरीषं पशव्यं यवसं वहतीति वा पुरीषवाहणः कव्यपुरीषपुरीष्येषु ण्युडिति [पा° ३.२.६५.] ण्युट्प्रत्ययः ॥४४॥

शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवीऽभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ॥४५॥

अजदेवत्या पथ्या बृहती । अङ्गिरोभिर्ऋषिभिः पूर्वं सम्पादितत्वात् अङ्गसौष्ठववाद्वा अङ्गिरा अग्निः तत्सम्बोधनं हे अङ्गिरः अग्निरूप अज मानुषीभ्यः मनोः सम्बन्धिभ्यः प्रजाभ्योऽर्थे त्वं शिवः शान्तो भव अङ्गिरा वाऽग्निराग्नेयोऽज इति श्रुतेः [६.४.४.४.] । किं च द्यावापृथिवी मा अभिशोचीः मा संतापय तथान्तरिक्षं माभिशोचीः तथा वनस्पतीन्माभिशोचीः ॥४५॥

a. प्रेतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्या-

युषः पुरा । वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् ॥ b. अग्नऽआया-
हि वीतये ॥४६॥

का° [१६.३.१०.] धारयत्येषामुपरि पिण्डमनुपस्पृशन्प्रैतु वाजी वृषाग्निमित्यश्व-
खरयोरिति । अश्वादीनामुपरि पिण्डं धारयति तानस्पृशन् प्रैतु वाजीत्यश्वोपरि
वृषाग्निमिति खरोपरीति सूत्रार्थः ॥ महापङ्क्तिस्त्र्यवसाना अष्टार्णषट्पादा महाप-
ङ्क्तिः आद्यावर्धर्चावश्वदेवत्यौ तृतीयोऽर्धर्चो रासभदेवत्यः तृतीयतुर्यौ पादौ व्यू-
ह्यौ । वाजी अश्वः प्रैतु प्रकर्षेण गच्छतु किं कुर्वन् कनिक्रदत् अत्यर्थं क्वेषितशब्दं
कुर्वन् यङ्लुगन्तम् रासभश्च प्रैतु यवसवाहनार्थम् किं कुर्वन् नानदत् सोपहास-
मुच्यते गर्दभरूपेण सर्वा दिशो नादयन् यङ्लुगन्तम् कीदृशो रासभः पत्वा पत-
नशीलः पत्लृ गतावित्यस्मादन्येभ्योऽपि दृश्यन्तऽइति [पा° ३.२.७५.] क्वनिप् ।
अश्वमल्ले रासभोपादानं रासभोपहासार्थम् तथा च श्रुतिः [६.४.४.७.] यदश्वस्य य-
ज्ञुषि रासभं निराह तद्रासभे शुचं दधातीति । किं च अयमश्वः पुरीष्यं पशव्यमग्निं
भरन्धारयन् (20.) आयुषः पुरा कर्मणः पूर्वं मा पादि मा विनश्यतु कर्मसमाप्ति-
पर्यन्तं जीवत्वित्यर्थः आयुःशब्देन श्रुत्या कर्मोक्तम् यज्ञसम्बन्धेनैवाश्वादीनां स्तुतिः
क्रियते ॥ अथ रासभमल्लः वृषा सेक्ता रासभः अग्निं भरन्धारयन्सन् प्रैतु इति शे-
षः । कीदृशमग्निम् वृषणं सेक्तारं फलाभिवर्षणसमर्थम् आकृतिपरिणामेनेति भा-
वः । अपां गर्भन् जलमध्येऽवस्थानादिवमुच्यते मेघस्थानां जलानां मध्ये विद्युद्रूपं
वा । समुद्रियं समुद्रे वडवाग्निरूपेणोत्पन्नं यद्वा समुद्रे अग्निचयने भवः समुद्रियः
तम् त्रयो ह वै समुद्रा अग्नेर्यजुषां महाव्रतꣳ साम्नां महदुक्थमृचामिति श्रुतेः ॥
का° [१६.३.११.] अग्नऽआयाहीत्याकृत्य खराच्छागस्यऽर्तꣳ सत्यमित्या निधानात् ।
अग्नऽइति मन्त्रेण रासभात्पिण्डमाकृत्य ऋतं सत्यमिति मन्त्रेणाजस्योपरि पिण्डं
धारयेत् परिवृते निधानपर्यन्तमिति सूत्रार्थः ॥ एकपदा गायत्री अग्निदेवत्या । हे
अग्ने वीतये हविर्भक्षणाय आयाहि आगच्छ ॥४६॥

a. ऋतꣳ सत्यमृतꣳ सत्यम् । b. अग्निं पुरीष्यमङ्गिरस्वद्भरामः ।
c. ओषधयः प्रतिमोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः ।

व्यस्यन्विश्वा अनिरा अमीवा निषीदन्नोऽअप दुर्मतिं जहि ॥४७॥

अग्निर्देवत्यं यजुः प्राजापत्या गायत्री । ऋतसत्यशब्दाभ्यामादित्याग्नी विवक्षितौ ऋतमादित्यः सत्यमग्निः तादृगुभयरूपमग्निमध्याहरामीति शेषः ऋतं सत्यमिति पुनर्वचनमादरार्थम् ॥ का० [१६.३.१३.] अनड्वापुरुषमीक्षते. पूर्ववदग्निं पुरीष्यमिति । देवपितृकार्यविमुखोऽनड्वापुरुषस्तमधर्युरीक्षते अग्निषु ज्वलत्स्वाहवनीयादिषु स्थित इति पूर्ववत्पदेन लभ्यतऽइति सूत्रार्थः ॥ आग्नेयं यजुः सामगायत्री । पशव्यमग्निमङ्गिरसो मुनय-इव भरामः हरामः ॥ का० [१६.३.१४.] उत्तरत आहवनीयस्योद्धतावोक्षिते सिकतोपकीर्णे परिवृते प्राग्द्वारे पिण्डं निदधात्योषधय इति । उखासम्भरणार्थमुद्धृतस्याहवनीयस्योत्तरे पूर्वमिव कृते परिवृते आक्षादितप्रदेशे ओषधय इति मन्त्राभ्यां पिण्डं स्थापयति कीदृशे परिवृते उद्धते कृतोल्लेखने अवोक्षिते सिक्ते प्राग्दिशि द्वारं यस्य तादृशे सिकताव्याप्ते एतादृशे इति सूत्रार्थः ॥ त्रिष्टुबनुष्टुभावोषधिदेवत्ये व्यस्यन्नित्यर्धर्चोऽग्निदेवतः । हे ओषधयः यूयमेतमग्निं प्रति मोद्धमभ्युत्थानादिभिः प्रतिहर्षयत । कीदृशमग्निं शिवं शान्तम् । अत्रास्मिन्प्रदेशे स्थिताः युष्माः युष्मानभिमुखीकृत्य आयन्तमागच्छन्तम् । एवमर्धर्चेनौषधीरुक्त्वाथाग्निमाह हे अग्ने त्वमत्र निषीदन्निविशमानः सन्नोऽस्माकं दुर्मतिं दुर्बुद्धिं नास्ति दत्तं नास्ति कृतमित्येवमादिकामपजहि अपनय किं कुर्वन् विश्वाः सर्वा अनिरा ईतीः अमीवा व्याधींश्च व्यस्यन्निरस्यन् नास्ति ईरा अन्नं याभिस्ता अनिराः ईरेत्यन्ननाम [निघ० २.७.] अतिवृष्ट्याद्याः ॥४७॥

ओषधयः प्रतिगृभ्णीत पुष्यवतीः सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥४८॥

हे ओषधयः एतमग्निं प्रतिगृभ्णीत गृह्णीत स्वीकुरुत । यूयं कीदृश्यः पुष्यवतीः वा छन्दसीति [पा० ६.१.१०६.] पूर्वसवर्णदीर्घः पुष्यवत्यः प्रशस्तपुष्योपेताः । सुपिप्पलाः शोभनं पिप्पलं फलं यासां ताः । किं च ऋत्वियः ऋतव्यः ऋतुः प्राप्तोऽस्य छन्दसि घस् इति [पा० ५.१.१०६.] कालप्राप्तौ घस्प्रत्ययः ऋतुकालीनः

प्राप्तकालः वो युष्माकं गर्भो भूत्वायमग्निः प्रत्नं पुरातनं सधस्थं सहस्थानं गर्भयोग्यस्थानमासदत् आसीदिति ॥४८॥

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसोऽमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥४९॥

का° [१६.३.१५.] वि पाजसेति प्रमुच्यैनमजलोमान्यादाय प्रागुदीचः पशूनुत्सृजति । वि पाजसेति मन्त्रेणैनं पिण्डं कृष्णाजिनबद्धं विस्रंस्य छागरोमाणि गृहीत्वाश्वादीनिशानीं दिशं प्रत्युत्सृजतीति सूत्रार्थः ॥ अग्निर्देवत्या त्रिष्टुबुत्कीलदृष्टा वीत्युपसर्गो बाधस्वेत्यनेन सम्बध्यते हे अग्ने द्विषः शत्रून् रक्षसः राक्षसान् अमीवाः व्याधींश्च त्वं विबाधस्व विशेषेण निवर्तय । कीदृशस्त्वं पृथुना विस्तीर्णेन पाजसा बलेन शोशुचानः अत्यर्थं दीप्यमानः पाज इति बलनाम [निघ° २.९.] शोचतेर्यङ्लुगन्ताच्छानच्प्रत्ययः । एवं प्रत्यक्षमुक्त्वा परोक्षमाह अग्नेः प्रणीतौ प्रणयने अभ्यनुज्ञायां परिचर्यायां सत्यामहं शर्मणि शरणे सुखे वा स्यां भवेयं सुखं प्राप्नुयामित्यर्थः । कीदृशस्याग्नेः सुशर्मणः साधुशरणस्य शोभनं शर्म सुखं यस्मात्स सुशर्मा तस्य । बृहतः प्रौढस्य । सुहवस्य सुखेनाह्वातुं शक्यस्य । अस्तेर्लिङि उत्तमैकवचने स्यामिति रूपम् ॥४९॥

V: आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥५०॥

का° [१६.३.१७.] आपो हि ष्ठेति पर्णकषायपक्वामुदकमासिञ्चति पिण्डे । पलाशवल्कक्वाथितं जलं पिण्डे सक्तुपिण्डेन द्विपेदिति सूत्रार्थः ॥ अब्देवतास्तिस्रो गायत्र्यः सिन्धुद्वीपदृष्टाः । हिशब्द एवार्थः प्रसिद्ध्यर्थो यस्मादर्थो वा । हे आपो या यूयमेव मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ मयः सुखं भावयन्ति प्रापयन्ति ता मयोभुवः यस्मात्कारणान्मयोभुवः स्थेति वा स्नानपानादिहेतुत्वेन सुखोत्पादकत्वमपां प्रसिद्धम् तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत तप्तनप्तनथनाश्चेति [पा° ७.१.४५.] लोण्मध्यमबहुवचनस्य तनबादेशे दधातनेति रूपम् यथा वयं सर्वस्य भोग्यस्य रसस्य भोक्तारो भवेम तथास्मान्कुरुतेति भावः । किं च महे महते रणाय रमणीयाय चक्षसे दर्शनाय चास्मान्दधातनेत्य-

नुवर्तते महद्गमणीयं दर्शनं ब्रह्मसाक्षात्कारलक्षणं तदस्माकं कुरुत अस्मान्ब्रह्मसाक्षात्कारयोग्यान्कुरुतेति भावः ऐहिकपारलौकिकसुखं ददतीत्यृचो भावः । मह पूजायां मह्यते पूज्यतऽइति मह् क्विप्प्रत्ययः तस्मै महे । रण शब्दे रण्यते स्तूयते सर्वैरिति रणम् तस्मै रणाय । चष्टे पश्यति सर्वं येन इति चक्षः चक्षतेरसुन्प्रत्ययः तस्मै चक्षसे । यस्मिन् ज्ञाते सर्वं विज्ञातं स्यादिति छान्दोग्यश्रुतिः ॥५०॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥५१॥

हे आपो वो युष्माकं यः शिवतमः शान्ततमः सुखैकहेतू रसोऽस्ति इहास्मिन्कर्मणि इह लोके वा स्थितान्नोऽस्मान् तस्य रसस्य भाजयत भागिनः कुरुत तं रसं प्रापयतेति भावः कर्मणि षष्ठी । तत्र दृष्टान्तः उशतीर्मातर-इव उशन्ति ता उशत्यः वा छन्दसीति [पा° ६.१.१०६.] दीर्घः वश कान्तौ इत्यस्माच्छतृप्रत्ययान्ताङ्गितश्चेति [पा° ४.१.६.] ङीप् उशत्यः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयस्तन्यरसं बालं पाययन्ति तद्वत् ॥५१॥

तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥५२॥

अलमिति प्राप्ते लकारस्य रेफश्छान्दसः । हे आपो वो युष्मत्सम्बन्धिनस्तस्य पर्याप्तिं वयं गमाम गच्छेम पर्याप्तिर्नाम रसविषये वैतृष्ण्यं सदातृप्तिर्वा तस्मै इति चतुर्थी षष्ठ्यर्थे । यस्य क्षयाय जिन्वथ क्षयो निवासऽइत्यायुदात्तत्वात् [पा° ६.१.२०१.] क्षयशब्देन निवासः क्षयायेति चतुर्थी षष्ठ्यर्थे यस्येत्यनेन सामानाधिकरण्यात् क्षयस्य निवासस्य जगतामाधारभूतस्य यस्याकृतिपरिणामभूतस्य रसस्यैकदेशेन यूयं ब्रह्मादिस्तम्बपर्यन्तं जगत् जिन्वथ तर्पयथ जिन्वतिः प्रीतिकर्मा पञ्चाकृतिपरिणामक्रमेणेति भावः । किं च हे आपः नोऽस्मान् तत्र भोक्तृत्वेन जनयथ उत्पादयत आशिषि लेट् तद्रसभोक्तॄनस्मान्कुरुतेत्याज्ञानदेवत्वमाशास्यते इति भावः अन्येषामपि दृश्यतऽइति [पा° ६.३.१३७.] संहितायां दीर्घः ॥ यद्वास्या ऋचोऽयमर्थः यस्य क्षयाय क्षयेण निवासेन यूयं जिन्वथ प्रीता भवथ तस्मै रसाप्तये वो युष्मानरमत्यर्थं वयं गमाम प्राप्नुमः किं च हे आपो यूयं नोऽस्मान् जनयथ प्रजोत्पादनसमर्थान्कुरुथ गच्छतेर्लुङि उत्तमबहुवचनेऽगमामेति रूपम् अ-

उभाव आर्षः बहुलं छन्दसीति [पा° २. ४. ७३.] शपो लुकि लोपि वा रूपम् ॥५२॥

मित्रः सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह ।
सुजातं ज्ञातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥५३॥

का° [१६. ३. १८.] अजलोमभिः सꣳसृजति मित्रः सꣳसृज्येति । आजाख्यानि पूर्वं लोमानि (21.) गृहीतानि तैः पिण्डं मिश्रयतीति सूत्रार्थः ॥ मित्रदेवत्योपरिष्टाद्बृहती त्रयोऽष्टार्णाश्चतुर्थी द्वादशार्णाः । मित्रः आदित्यो देवः पृथिवीं द्युलोकं भूमिं चेमां मृत्पिण्डरूपां ज्योतिषाजलोमभिः सह संसृज्य एकीकृत्य मह्यमधर्यवे प्रयच्छतिति शेषः । पृथिवीशब्दो द्युलोकान्तरिक्षवाची इह द्युलोकवाची गृह्यते अजस्याग्नेयत्वाज्ज्योतिःशब्देनाजलोमान्युच्यन्ते । अहमपि सुजातं शोभनोत्पन्नं ज्ञातवेदसं ज्ञातप्रज्ञानमजलोमाख्यमग्निं त्वा त्वां संसृजामि पिण्डेन योजयामि किमर्थं प्रजाभ्यः चतुर्थी षष्ठ्यर्थे प्रजानामयक्ष्माय यक्ष्मणो रोगस्याभावोऽयक्ष्मं तस्मै रोगाभावाय ॥५३॥

रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे ।
तेषां भानुरजस्र इद्बुक्रो देवेषु रोचते ॥५४॥

का° [१६. ३. १९.] शर्करायोरसाश्मचूर्णैश्च रुद्राः सꣳसृज्येति । सूक्ष्मसिकतालोहकिट्टपाषाणचूर्णैः पिण्डं मिश्रयतीति सूत्रार्थः ॥ रुद्रदेवत्यानुष्टुप् ये रुद्राः पृथिवीं पार्थिवं पिण्डं संसृज्य शर्करायोरसाश्मचूर्णैः संयोज्य बृहज्ज्योतिः प्रौढमग्निं समीधिरे सम्यक् दीपितवन्तः ऊखास्थमग्निं सम्यक् पालितवन्तः । तेषां फलमाह तेषां रुद्राणां शुक्रः शुद्धो देदीप्यमानोऽजस्रः अनुपक्षीण एव देवेषु मध्ये भानुः दीप्तिः रोचते प्रकाशते इत् एवार्थः ॥५४॥

सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥५५॥

का° [१६. ३. २०.] सꣳसृष्टामिति संयौति । ऋक्त्रयेण मृत्पिण्डे सम्यक् मिश्रय-

ति ॥ द्वे सिनीवालीदेवत्ये तृतीयादितिदेवत्या तिस्रोऽनुष्टुभः । सिनीवाली चन्द्रकलायुक्तामावास्याभिमानिनी देवता मृदं हस्ताभ्यां मृद्वीं कोमलां कृत्वा पुनस्तां मृदं कर्मण्यामुखाकर्मयोग्यां कृणोतु कर्म सम्पद्यते यया सा कर्मण्या ताम् कीदृशीं मृदं धीरैः बुद्धिमद्भिर्विबुधैः रुद्रैश्च संसृष्टां सेवितां शर्करादिभिः संयोजितां वा धीरस्ति येषां ते धीराः मत्वर्थे रः ॥५५॥

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मख्योखां दधातु हस्तयोः ॥५६॥

अदितिरदीना देवमातेति यास्कः [निरु॰ 8.२३.] हे अदिते अदीते देवमातः हे मखि मखति सा पूर्वमन्त्रोक्ता सिनीवाली तुभ्यं तव हस्तयोः उखामादधातु स्थापयतु । कीदृशी सा सुकपर्दा कपर्दोऽत्र स्त्रीणामुचितः केशबन्धविशेषः शोभनः कपर्दो यस्याः सा सुकपर्दा । सुकुरीरा स्त्रीभिः शृङ्गारार्थं शिरसि धार्यमाणं कनकाभरणं कुरीरः शोभनः कुरीरो यस्याः सा सुकुरीरा सुमुकुटा । स्वौपशा सम्यक् उपशेते शयनं कुरुते यैरवयवविशेषैस्ते सर्वेऽप्युपशाः तेषां समूहः औपशः शोभनः शयनविदग्धो विलासचतुर औपशोऽवयवसमूहः यस्याः सा ॥५६॥

a. उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥ b. मखस्य शिरोऽसि ॥५७॥

अदितिः शक्त्या सामर्थ्येन धिया बुद्ध्या च बाहुभ्यां हस्ताभ्यामुखां कृणोतु करोतु सा उखा कृता सती गर्भे मध्यभागे आ समन्तात् अग्निं बिभर्तु धारयतु तत्र दृष्टान्तः यथा माता जननी उपस्थे उत्सङ्गे पुत्रं बिभर्ति तद्वत् ॥ का॰ [१६.३.२३.] यजमान उखां करोति मृदमादाय मखस्य शिर इति । यजमानपत्न्या तत्पिण्डान्मृदमादाय द्वादशाङ्गुलित्रिस्थानलिखिताषाढसंज्ञकेष्टकायां कृतायां यजमानः पिण्डान्मृदमादाय स्वयमेवोखां करोति एकपशुपक्षे प्रादेशायामविस्तारोर्धा चतुरस्रां पञ्चपशुपक्षे त्रिभागोनत्रयोविंशत्यङ्गुलायामविस्तारामूर्धां प्रादेशेनेवेति सूत्रार्थः ॥ मृत्पिण्डदेवत्यं यजुः यजुर्गायत्रीछन्दः । हे मृत्पिण्ड त्वं यज्ञस्य (22.) शिरोऽसि आहवनीयो यज्ञस्य शिरस्तद्रक्षणादिहापि लक्षणया शिरःशब्दः ॥५७॥

a. वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वद्ध्रुवासि पृथिव्यसि । धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानाय ॥ b. रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसि । धारयाꣳ ॥ c. आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वद्ध्रुवासि द्यौरसि । धारयाꣳ ॥ d. विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद्ध्रुवासि दिशोऽसि । धारयाꣳ ॥५८॥

का° [१६.३.२६.] वसवस्त्वेति प्रथयति । यजमान आत्तां मृदमुखातलाय प्रादेशमात्रविपुलां करोतीति सूत्रार्थः ॥ उखादेवत्यम् ब्राह्मी अनुष्टुप् । हे उखे वसवः देवविशेषाः गायत्रेण छन्दसा कृत्वा अङ्गिरस्वत् अङ्गिरस-इव त्वा त्वां कृण्वन्तु कुर्वन्तु ययाङ्गिरोभिर्मुनिभिः कृता तद्वत् यतस्त्वं कृता सती ध्रुवा स्थिरासि पृथिवी चासि अतस्त्वां वच्मि । यजमानायेति चतुर्थी सप्तम्यर्थे मयीति सामानाधिकरण्यात् हे उखे मयि यजमानि प्रजां पुत्रादिकां धारय स्थापय रायः पोषं धनस्य पुष्टिं च धारय गौपत्यं गोपतित्वं धनस्वामित्वं मयि धारय सुवीर्यं शोभनं वीर्यं वीरकर्म मयि स्थापय सजातान् समानोदरोत्पन्नान्भ्रातॄन्मयि धारय ॥ का° [१६.३.२७.] अक्तानुन्नीय सर्वतः प्रथमं धातुमादधाति रुद्रास्त्वेति । प्रथनानन्तरं प्रथिततलस्य प्रान्तान्सर्वानूर्ध्वं नीत्वा प्रथमां पिण्डिकामन्तैः संयोजयतीति सूत्रार्थः ॥ उखादेवत्यम् आर्ष्यनुष्टुप् हे उखे रुद्राः त्रैष्टुभेन छन्दसा त्वां कुर्वन्तु त्वमन्तरिक्षवदुपासीति विशेषः शेषं पूर्ववत् ॥ का° [१६.३.२८.] संलिप्य श्लक्ष्णां (23.) कृत्वोत्तरमादित्यास्त्वेति । तामुखां शिथिलमृदा लिप्त्वा वारिणा मृदुं कृत्वोत्तरं धातुं द्वितीयपिण्डिकां पूर्वापरि योजयतीति सूत्रार्थः ॥ उखादेवत्यम् ब्राह्मी अनुष्टुप् । आदित्याः देवा जागतेन छन्दसा त्वां कुर्वन्तु त्वं द्यौरुपासीति विशेषः शेषा व्याख्या प्राची ॥ का° [१६.३.२९.] विश्वे त्वेति समीकरोति । पूर्वोक्तमानां करोतीति सूत्रार्थः ॥ औखम् ब्राह्मी बृहती । विश्वैर्नरैर्नीयन्ते विश्वान्नरान्नयन्ति वा विश्वेषां नराणां सम्बन्धिनो वा विश्वेभ्यो नरेभ्यो हिता वा वैश्वानराः एवम्भूता

विश्वे देवाः हे उखे त्वां कुर्वन्तु आनुष्टुभेन छन्दसा कृत्वा त्वं च दिशो दिग्रूपासि शेषं पूर्वतुल्यम् ॥५८॥

a. अदित्यै रास्नासि । b. अदितिष्टे बिलं गृह्णातु । c. कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । पुत्रेभ्यः प्रायछददितिः अपयानिति ॥५९॥

का° [१६.३.३०.] वितृतीयऽउत्तरे वर्तिष्ठ सर्वतः करोत्यदित्यै रास्नेति । उखोर्ध्वमानं त्रेधा विभज्योपरि तृतीयभागे सर्वत्र मृन्मयीं मेखलां करोति तलान्मेखलान्तमपि प्रतिदिशं चतुर्वृत्तीरये स्तनयुक्ताः कुर्यादिति सूत्रार्थः ॥ रास्नादिवत्यम् यजुर्गायत्री । हे रेखे त्वमदित्यै अदितिरूपाया उखाया रास्ना काञ्चीगुणस्थानीयासि ॥ का° [१६.४.३.] बिलं गृह्णात्यदितिष्ट (24.)ऽइति । उखाया मुखमालभते ॥ उखादिवत्यम् यजुर्वृकती । हे उखे अदितिः देवमाता ते तव बिलं मध्यं गृह्णातु गृह्णातु ॥ का° [१६.४.४.] कृत्वायेति निदधाति । एवमुखां निष्पाद्य भूमौ स्थापयतीति सूत्रार्थः ॥ अदितिदेवत्या उष्णिगनुष्टुब्बृहती उष्णिक्पङ्क्ति तृतीयपादश्चतुर्दशार्णस्तेन बृधिका अनुष्टुप्पङ्क्ति तृतीयः षडर्णो व्यूह्यः । सा पूर्वोक्ता अदितिः उखां कृत्वाय क्को यक् कृत्वा निष्पाद्य पुत्रेभ्यो देवेभ्यः इति वदन्ती-प्रायछत् इति किम् अपयान् अपयन्तु आ पाके णिजन्तः हे पुत्राः इमामुखां भवन्तः अपयन्तु पचन्तु इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] अन्तीत्यस्येकारलोपे संयोगात्तलोपे च लेटोऽडाटावित्यडागमे [पा° ३.४.९४.] अपयानिति रूपम् । कीदृशीमुखां महीं महतीं विशालां मृन्मयीं मृत्कार्यभूताम् अग्नये अग्न्यर्थमग्नेर्वा योनिं स्थानभूताम् ॥५९॥

a. वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत् । b. रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छ° । c. आदित्यास्त्वा धूपयन्तु जागतेन छ° । d. विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छ° । e. इन्द्रस्त्वा धूपयतु । f. वरुणास्त्वा धूपयतु । g. विष्णुस्त्वा धूपयतु ॥६०॥

का° [१६.४.८.] सप्तभिरश्वशकृद्भिरुखां धूपयति दक्षिणाग्न्यादीनिरेकैकेन वस-

वस्त्रेति प्रतिमन्त्रम् । दक्षिणाग्नौ प्रदीप्तैः सप्तभिरश्वलण्डैरुखां (25.) प्रतिमन्त्रं धूपयत्यधर्युः धूमायमानमेकैकमश्वलण्डमादायैकैकेन (25.) मन्त्रेणोखायां मध्ये वह्निश्च भ्रामयेदिति सूत्रार्थः ॥ सप्त यजूंष्युखादेवत्यानि त्रीणि ऋग्गायत्र्यः तुर्य सामगायत्री पञ्चमसप्तमे यजुरुष्णिहौ षष्ठं यजुरनुष्टुप् । हे उखे अष्टौ वसवः गायत्रेण छन्दसा अङ्गिरस-इव त्वां धूपयन्तु अश्वशकृज्जन्येन धूमेन संस्कुर्वन्तु । रुद्राः एकादश त्रैष्टुभेन छन्दसा अङ्गिरस-इव त्वां धू° । आदित्या जागतेन छन्दसा । वैश्वानराः सर्वहिता विश्वे देवाः आनुष्टुभेन छन्दसा । इन्द्रस्त्वां धूपयतु वरुणो विष्णुश्च शेषं पूर्ववत्सुगमम् ॥ ६० ॥

VI. a. अदितिष्ट्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थेऽअङ्गिरस्वत्खनत्ववट । b. देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्धरूखे । c. धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्भिन्धतामुखे । d. वह्नेस्त्वोष्ट्वा देवीर्विश्वदे° - °रस्वद्ध्रियन्तूखे । e. ग्नास्त्वा देवीर्विश्वदे° - °रस्वत्पचन्तूखे । f. जनयस्त्वाह्निनपत्ना देवीर्विश्वदे° - °रस्वत्पचन्तूखे ॥ ६१ ॥

का° [१६. ४. १.] अभ्रा अभ्रं चतुरस्रं खनत्यदितिष्ट्वेति । अषाढोखाविश्वज्योतिषां पाकाय चतुरस्रं गर्तमभ्रा खनतीति सूत्रार्थः ॥ अवटदेवत्यम् प्राजापत्या त्रिष्टुप् । हे अवट गर्त अदितिर्देवी पृथिव्याः सधस्थे सहस्थाने उपरिभागे त्वा त्वां खनतु अङ्गिरस-इव यथाङ्गिरोभिस्त्वं खातस्तद्वत् । कीदृश्यदितिः विश्वदेव्यावती विश्वषां देवानां समूहो विश्वदेव्यम् तद्विद्यते यस्याः सा विश्वदेव्यवती मत्वे सोमाश्वित्यादिना [पा° ६. ३. १३१.] दीर्घः सर्वैर्देवैः सहिता । विश्वेषु देवेषु साधवो विश्वदेव्याः तेऽस्यां सन्तीति वा ॥ का° [१६. ४. ११.] देवानां त्वेत्युखां न्युब्जाम् । अधोमुखामुखामपाठोत्तरतो गर्ते स्थापयतीति सूत्रार्थः ॥ पञ्च यजूंष्युखादेवत्यानि द्वे प्राजापत्ये त्रिष्टुभौ । विश्वदेव्यवतीः विश्वैः देवैः सहिताः देवानां पत्नीः देवीः देवपत्न्यो देव्यो दीप्यमाना ओषधयः पृथिव्याः सधस्थे उपरि अङ्गिरस-इव हे उखे त्वा त्वां दधतु स्थापयन्तु देवपत्नीशब्देनौषधयः श्रुत्योक्ताः तथा च

श्रुतिः ओषधयो वै देवानां पत्न्य इति [६.५.४.४.] ॥ का° [१६.४.१२.] अपणी-नावहाय दक्षिणाग्न्यग्निना दीपयति धिषणास्त्वेति । उखास्थापनानन्तरं विश्वज्यो-तिषस्तूष्णीं श्वभ्रेऽवधाय अपणीः सर्वमाहाय दक्षिणाग्नेरानीतेन वह्निनोखां दीप-यतीति सूत्रार्थः ॥ विश्वदेवयुक्ता धिषणाः वागभिमानिन्यो देव्यः पृथिव्याः उपरि अङ्गिरस-इव हे उखे त्वामभीन्धतां समन्तादीपयन्तु ॥ का° [१६.४.१४.] वनूत्रीर्द्वे-तीक्ष्णमाणो जपति । सामर्थ्याद्उखोपरिस्थश्रपणे छिद्रं कृत्वा तेनोखां पश्यन् त्रीणि यजूंषि जपतीति सूत्रार्थः ॥ ऋग्वृत्तौ । विश्वदेवयुता वनूत्रयो देव्योऽहोरात्राभि-मानिन्यो देवताः पृथिव्या उपरि अङ्गिरस-इव हे उखे त्वां श्रपयन्तु पच्यमानतां सम्पादयन्तु अहोरात्राणि वै वनूत्रयोऽहोरात्रैरेवैनं सर्वं वृतमिति [६.५.४.६.] श्रुतेर्वनूत्रिशब्देनाहोरात्राणि ॥ ग्नास्त्वा । सामजगती । छन्दाꣳसि ह (26.) वै ग्रा-श्छन्दोभिर्हि स्वर्गं लोकं गच्छन्तीति [६.५.४.७.] श्रुतेर्ग्राशब्देन छन्दांसि । विश्वदे-वयुता ग्रा देव्यश्छन्दोऽभिमानिन्यो देवताः पृथिव्या उपरि हे उखे अङ्गिरस-इव त्वां पचन्तु ॥ जनयस्त्वा । ऋक्यङ्गिः । नक्षत्राणि वै जनय इति [६.५.४.८.] श्रु-तेर्जनयो नक्षत्राभिमानिन्यो देवताः हे उखे त्वां पचन्तु कीदृश्यो जनयः अक्षिन्न-पत्राः अक्षिन्नं पत्रं पतनं यासां ताः संततयायिन्यः । शिष्टं स्पष्टम् ॥ ६१ ॥

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ६२ ॥

का° [१६.४.१५.] आचरति मित्रस्येति । पाकान्तं श्रपणं क्षिपतीति सूत्रार्थः ॥ मित्रदेवत्या गायत्री विश्वामित्रदृष्टा । मित्रस्यादित्यस्य अवो रक्षणं द्युम्नं यशो ऽन्नं वा वयं स्तुम इति शेषः याचेमहीति वा । कीदृशस्य मित्रस्य चर्षणीधृतः चर्षणयो मनुष्यास्तान्धरतीति चर्षणिधृत् तस्य संहितायां दीर्घः मनुष्याणां धार-यितुः । देवस्य दीप्यमानस्य । कीदृशमवः सानसि सनातनं सानसीति पुराणना-म [निघ° ३.२७.(27.)] फलदानशीलं वा षणु दानऽइत्य अस्य प्रयोगः । कीदृशं द्युम्नं चित्रश्रवस्तमं चित्रं विचित्रमनेकैः श्रूयते तच्चित्रश्रवः श्रु श्रवणेऽस्मात्कर्म-ण्यसुन् अतिशयेन चित्रश्रव इति चित्रश्रवस्तममत्यन्तं श्रवणीयं यशः प्रार्थयामि-ति भावः ॥ ६२ ॥

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या ।
अव्यथमाना पृथिव्यामाशा दिश आपृण ॥ ६३ ॥

का° [१६. ४. १८. ११.] उद्वपति अपणं देवस्त्वेति । भस्मीभूतं अपणमुखायाः पराकरोतीति सूत्रार्थः ॥ सवितृदेवत्या बृहती । हे उखे सविता देवः शक्त्या स्वसामर्थ्येन उतं अपि बुद्ध्या च त्वा त्वामुद्वपतु अपणाच्छादनात्प्रकाशीकरोतु उतशब्दाद्बुद्धिरध्याहार्या । कीदृशः सविता सुपाणिः शोभनौ पाणी हस्तौ यस्य स सुपाणिः । स्वङ्गुरिः शोभना अङ्गुलयः करस्था यस्य स स्वङ्गुलिः लकारस्य रेफश्छान्दसः । सुबाहुः शोभनौ बाहू भुजौ यस्य स सुबाहुः मणिबन्धादुपरिभागो बाहुः अधोभागः पाणिः ॥ का° [१६. ४. १९. २०.] उखामुत्तानां करोत्यव्यथमानेति । अपणमपाकृत्याषाढां बर्हिर्निष्काश्योखामुत्तानामूर्ध्वमुखीं करोतीति सूत्रार्थः ॥ हे उखे सवित्रा उद्वृता सती अव्यथमाना अचलन्ती व्यथामनाप्नुवन्ती पृथिव्यां स्थिता सती त्वमाशाः प्राच्यादिदिशः दिश आग्नेय्यादिविदिशश्च आपृण आपूरय आकृतिरसेनेति शेषः ॥ ६३ ॥

उत्थाय बृहती भवोद्ध तिष्ठ ध्रुवा त्वम् ।
मित्रैतां त ऽउखां परिददाम्यभित्त्या ऽएषा मा भेदि ॥ ६४ ॥

का° [१६. ४. २१. २२.] उच्चैरुत्युत्थायेति परिगृह्य । हस्ताभ्यामुखामादाय पाकादूर्ध्वं (27.) निष्काशयतीति सूत्रार्थः ॥ बृहती पूर्वोऽर्धर्चः उखादेवत्यः उत्तरार्धो मित्रदेवत्यः । हे उखे त्वमुत्थायैतस्मादवटाद्बर्हिरागत्य बृहती महती भव तत उत्तिष्ठ स्वकर्मणि प्रवर्तस्व यतस्त्वं ध्रुवा स्थिरासि स्वभावतः । उकारः पादपूरणः ॥ का° [१६. ४. २२.] पात्रे करोति मित्रैतां त ऽइति । हस्तगृहीतामुखामुत्तरतः पूर्वस्थापिते कस्मिंश्चित्पात्रे स्थापयतीति सूत्रार्थः ॥ ततो विश्वज्योतिषां तूष्णीमुद्वपनम् । हे मित्र सर्वप्राणिहितकारिन्देव एतामुखां ते तव परिददामि परित्राणाय प्रयच्छामि किमर्थमभित्त्यै भेदनं भित्तिः न भित्तिरभित्तिस्तस्यै अभेदनाय । एषा चोखा त्वया गृहीता सती मा भेदि मा भिद्यतां विदीर्णा मास्तु ॥ ६४ ॥

a. वसवस्त्वाछन्दस्तु गायत्रेण छन्दसाङ्गिरस्वत् । b. रुद्रास्त्वाछन्दस्तु त्रै-

त्रैष्टुभेन छन्दसाङ्गिरस्वत् । c. आदित्यास्त्वाछन्दसु जागतेन छ° । d. विश्वे त्वा देवा वैश्वानरा आछन्दस्त्वानुष्टुभेन छ° ॥ ६५ ॥

का° [१६. ४. २३.] अज्ञापयसावसिञ्चति वसवस्त्वेति प्रतिमन्त्रमिति । चतुर्मन्त्रैश्चतुर्वारमज्ञाडुम्बमुखायामवनयतीति सूत्रार्थः ॥ उखादेवत्यानि चत्वारि आद्या ऋग्गायत्री । हे उखे वसवः गायत्रेण छन्दसाङ्गिरस-इव त्वा त्वामाछन्दसु समन्तात्सिञ्चन्तु उक्षूदिर् दीप्तिदेवनयोः रुधादिः अत्र सेचनार्थः ॥ रुद्राः । प्राजापत्यानुष्टुप् । रुद्रास्त्वा छन्दसा त्रैष्टुभेन आछन्दसु ॥ आदित्याः । ऋग्गायत्री । आदित्याः जगतीछन्दसा त्वां छन्दसु ॥ विश्वे । सामजगती । वैश्वानरा सर्वहिता विश्वे देवा अनुष्टुप्छन्दसा त्वां छन्दसु । शेषं स्पष्टम् ॥ ६५ ॥

VII. a. आकूतिमग्निं प्रयुजꣳ स्वाहा । b. मनो मेधामग्निं प्रयुजꣳ स्वाहा । c. चित्तं विज्ञातमग्निं प्र° । d. वाचो विधृतिमग्निं प्र° । e. प्रजापतये मनवे स्वाहा । f. अग्नये वैश्वानराय स्वाहा ॥ ६६ ॥

का° [१६. ४. ३०.] प्राकृतान्यौद्भरणानि कृत्वा सप्ताग्निकान्याकूतिमिति प्रतिमन्त्रम् । एवमुखासम्भरणं समाप्यान्या अपीष्टकाः कृत्वा फाल्गुनामावास्यायां दीक्षां कृत्वौद्भरणाख्होमकाले प्राकृतानि सोमयागे कर्तव्यानि आकूत्यै प्रयुजेऽग्नये स्वाहेत्यादीनि [४. ७.] पञ्चौद्भरणानि कृत्वाग्निचयनसम्बन्धीनि सप्तौद्भरणानि प्रतिमन्त्रं जुहोतीति सूत्रार्थः ॥ सप्तौद्भरणसंज्ञानि लिङ्गोक्तदेवत्यानि । आकूत्यै यजुःपङ्क्तिः । आकूतिरस्मदीयः संकल्पोऽग्निचयनानुष्ठानविषयः तां प्रति प्रयुङ्क्ते प्रेरयतीति प्रयुक् तं संकल्पप्रेरकमग्निमुद्दिश्य स्वाहा सुकृतमस्तु आकूतिरेवाग्निरिति सामानाधिकरण्यं वा ॥ मनः । यजुस्त्रिष्टुप् । अनुष्ठेयस्मरणसाधनं मनः श्रुतयोर्मन्त्रतन्त्रयोर्धारणशक्तिर्मेधा तदुभयं प्रति प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहा ॥ चित्तम् । यजुर्जगती । अविज्ञातस्यानुष्ठानस्य ज्ञानसाधनं चित्तं तेन चित्तेनावगतमनुष्ठानं विज्ञातम् तदुभयं प्रति प्रेरकमग्निमुद्दिश्य सुकृतमस्तु ॥ वाचः । यजुर्जगती । वाचो मन्त्रपाठरूपाया विधृतिं विधारणं प्रति प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहा सुकृतमिदमस्तु ॥ प्रजापतये । यजुःपङ्क्ती । मनवे मन्वन्तरकारिणे प्रजापतये प्रजानां पा-

लकाय स्वाहा ॥ विश्वेषां नराणामनुयाह्वकाय विश्वानरपुत्राय वाग्नये स्वाहा सुकृतमस्तु ॥ ६६॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ ६७॥

ऋष्याद्युक्तं व्याख्याता च [8.८.] । विश्वो मर्तो सर्वो मनुष्यो नेतुः फलप्रापकस्य देवस्य दानादिगुणयुक्तस्य सवितुः सख्यं सखिभावं वुरीत वृणुते प्रार्थयते । विश्वः सर्वो जनः रायेे धनाय इषुध्यति देवं प्रार्थयते याज्याकर्मसु [निघ° ३.११.] पठितः (28.) । किं च पुष्यसे पोष्टुं पोषणाय द्युम्नं यशोऽन्नं वा वृणीत सर्वो जनः प्रार्थयते स्वाहा तस्मै प्रेरकाय सुकृतमस्तु ॥ ६७॥

मा सु भित्था मा सु रिषोऽम्बे धृष्णु वीर्यस्व सु । अग्निश्चेदं करिष्यथः ॥ ६८॥

का° [१६.४.३१.] दण्डोक्ष्यणान्तं कृत्वाधर्युर्यजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति मुञ्जकुलायशणकुलायावस्तीर्णामन्तरेशणां (29.) मा सु भित्था इति तिष्ठन्नुदङ् प्राङ् । औद्गभणकोमानन्तरं दीक्षणीयाशिषं समाप्य कृष्णाजिनदीक्षादिदण्डोक्ष्यणान्तं प्राकृतं कर्म कृत्वाधर्युर्यजमानो वेशानाभिमुखः प्राग्वा तिष्ठन्नृग्द्वयेन समिद्धे आहवनीये उखामारोपयति कीदृशीमुखां मुञ्जतृणनिर्मितं पक्षिनीडं मुञ्जकुलायः शणनिर्मितं तल्पकुलायस्ताभ्यां मध्ये छादितामादौ शणकुलायेन ततोऽन्येनेति सूत्रार्थः ॥ उखादेवत्ये द्वे गायत्रीत्रिष्टुभौ प्रथमायास्तृतीयपादोऽग्निदेवतः । हे अम्ब मातः उखे त्वं सुतरां मा भित्थाः भिन्ना विदीर्णा मा भव इदमभिन्नत्वं सुष्ठु विधेयम् तथा मा सुतरां रिषः रिषतिर्हिंसाकर्मा मा हिंसिता भव मा विनश्यस्व इदमस्फुटनं सुष्ठु विधेयम् सर्वात्मना द्वैधीभावो भेदः लेशस्य पृथग्भावः स्फुटनं तदुभयं तव मा भूदित्यर्थः । किं च हे उखे धृष्णु प्रगल्भं यथा सुतरां वीर्यस्व अग्निधारणलक्षणं वीरकर्म कुरु । किं च अग्निश्चकाराद्वं चेदमस्मदीयं कर्म आसमाप्तेः करिष्यथः ॥ ६८॥

दृꣳहस्व देवि पृथिवि स्वस्तयेऽआसुरी माया स्वधया कृतासि ।

जुष्टं॑ दे॒वेभ्य॑ इ॒दम॑स्तु ह॒व्यमरि॑ष्टा॒ त्वमुदि॑हि य॒ज्ञेऽ॒स्मिन् ॥ ६१ ॥

कार्ये कारणोपचारो वर्णनार्थः । हे पृथिवि देवि मृत्कार्यत्वात्पृथिवीत्वं मल्लैर्निष्पादितत्वाद्देवतात्वम् तथाविधे हे उखे स्वस्तये यजमानस्य क्षेमाय दृंहस्व दृढा भव । कस्मात्त्वमिदमुच्यसे स्वधयान्नेन निमित्तेन त्वमासुरी माया प्राणसम्बन्धिनी प्रज्ञा कृतासि असूनां प्राणानामियमासुरी यद्वा असुरसम्बन्धिनी माया अचिन्त्यरचनारूपं चित्रं वस्तु भूत्वा यद्वत्प्रतिभाति तद्वत्त्वमपि स्तनरचनायुक्ता निष्पन्नासीत्यर्थः । किं च हे उखे इदं हव्यमुख्येऽग्नौ होष्यमाणं देवेभ्यो जुष्टं प्रियमस्तु त्वत्प्रसादाद्देवेभ्यो रोचतामित्यर्थः । त्वमपि अरिष्टा अनवखण्डिता सती अस्मिन्यज्ञे वर्तमानि उदिहि उद्गच्छ उद्गता भव ॥ ६१ ॥

द्वन्न॑ सर्पि॒रासु॑तिः प्र॒त्नो होता॒ वरे॑ण्यः । सह॑स॒स्पुत्रो॑ऽअ॒द्भुतः ॥ ७० ॥

का॰ [१६. ४. ३३.] अग्नावाग्नेये त्रयोदशास्यां प्रादेशमात्रीः समिध आदधाति । [३५.] घृतोन्नां कार्मुकीं द्वन्न इति । अभितापादुखायां वक्नौ जाते प्रादेशमितास्त्रयोदशसंख्याकाः समिधो जुहोति ताः क्रमेणाह घृतक्लिन्नां कृमुकसमिधमादौ कृमुको धमनः इति सूत्रार्थः ॥ अग्निदेवत्या गायत्री सोमाहुतिदृष्टां । ईदृशोऽग्निः कार्मुकीं समिधं भक्षयत्विति शेषः । कीदृशः द्वन्नः पलाशिद्रुद्रुमागमा इति [अमर॰ २. ४. ५.] कोशोक्तेर्द्रवो वृक्षा एवान्नमदनीयं यस्य स द्वन्नः । सर्पिरासुतिः सर्पिर्घृतमासुतिरासवस्थानीयं मादकं यस्य सः यद्वा सर्पिराहारत्वेन सूयते प्रक्षिप्यते यस्मिन्सर्पिरासुतिः । प्रत्नः पुरातनः । होता देवानामाह्वाता । वरेण्यः वरणीयः । सहसो बलस्य पुत्रः मन्थनहेतुना बलेनोत्पद्यमानत्वात् । अद्भुतः आश्चर्यरूपः अनन्यसदृश इत्यर्थः ॥ ७० ॥

पर॑स्या॒ अधि॑ सं॒वतोऽव॑रा२॑ऽउ॒दात॑र । यत्रा॒हमस्मि॒ ताँ२॑ऽउ॒व ॥ ७१ ॥

का॰ [१६. ४. ३६.] वैकङ्कतीं परस्या इति । विकङ्कततरुसमिधं जुहोतीति सूत्रार्थः ॥ अग्नेयी गायत्री विश्वपदृष्टा । इत अध्यायान्तमाग्नेय्यः । संवत् इति संग्रामनामसु [निघ॰ २. १७.] पठितं संपूर्वस्य वनुतेर्गत्यर्थस्य क्विप् संवन्वते संगच्छन्ते योधा यत्र सा संवत् परस्याः शत्रुसम्बन्धिन्याः संवतः संग्रामात् अवरानस्मदीयान्

जनानभ्यातर अभिमुखमागह्व हुःखात्तारयेत्यर्थः । किं च यत्र जनपदे अहमस्मि भवामि तानव पाह्यय तर्पय वा ॥७१॥

परमस्याः परावतो रोहिदश्व इहागहि ।
पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥७२॥

का° [१६.४.३७.] औडुम्बरीं परमस्या इति । उडुम्बरतरुसमिधं तृतीयामाद्धातीति सूत्रार्थः ॥ अनुष्टुब्वारुणिदृष्टा । हे अग्ने परमस्याः परावतोऽत्यन्तदूरदेशादिहास्मिन्कर्मणि त्वमागहि आगह्व गह्वतेः शपि लुप्ते अनुदात्तोपदेश मलोपे आगह्वीति रूपम् । परावत इति दूरनामसु [निघ° ३.२६.] पठितम् परमाशब्दस्य सर्वनामत्वमार्षम् परमा उत्कृष्टातिशयिता या परावत् अतिदूरमित्यर्थः । आगत्य च मृधः संग्रामान् तर अतिलङ्घय शत्रून्विनाशयेत्यर्थः ह्वयोऽतस्तिङ इति [पा° ६.३.१३५.] दीर्घः । कीदृशस्त्वं रोहिदश्वः रोहितोऽग्नेर्हरित आदित्यस्येति निघण्टूक्ते [१.१५.] रोहितोऽग्नेरश्वाः रोहितः तत्संज्ञा अश्वा यस्य स रोहिदश्वः । पुरीष्यः पशव्यः पुरुप्रियः पुरूणां बहूनां प्रियो वल्लभः ॥७२॥

यदग्ने कानि-कानि चिदा ते दारूणि दध्मसि ।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ ॥७३॥

का° [१६.४.३८.] अपरस्रुवृक्णां यदग्नऽइति । कुठारं विना छिन्नां वातादिना भग्नां यज्ञियतरुसमिधं चतुर्थीमाद्धातीति सूत्रार्थः ॥ द्वे अनुष्टुभौ जमदग्निदृष्टे । अतिशयेन युवा यविष्ठः यविष्ठ एव यविष्ठः स्वार्थे यत्प्रत्ययः हे यविष्ठ हे युवतम हे अग्ने कानि-कानि चित् यानि कानि दारूणि काष्ठानि ते तव सप्तम्यर्थे षष्ठी त्वयि यत् आदध्मसि आदध्मः आरोपयामः इदन्तो मसि तत्सर्वं काष्ठजातं ते त्वदर्थं घृतं घृतवत्प्रियमस्तु तद्दारुजातं त्वं जुषस्व सेवस्व ॥७३॥

यदत्त्युपजिह्विका यद्वम्रोऽअतिसर्पति ।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ ॥७४॥

का° [१६.४.३९.] अधःशयां यदत्तीति । अधो नीचे देशे शेते तां भूलग्नां स-

मिधं पञ्चमीमादधाति ॥ उपजिह्विका उपदीपिका पिपीलिकासदृशः क्षुद्रजीवः यद्दारु अत्ति भक्षयति अधःशयत्वादेव । वभ्रो वल्मीकश्च यद्दारु अतिसर्पति अतिव्याप्नोति अतीत्यानुवर्तते तत्सर्वं ते घृतमस्तु इति पूर्ववत् ॥७४॥

अक्रंरक्रप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥७५॥

का° [१६.४.४०.] पालाशीः प्रत्यृचमक्रंरक्रंरिति । अष्टर्ग्भिः (30.) प्रत्यृचमष्टौ पालाशीः प्रादेशमिताः समिध उख्येऽग्नावादधातीति सूत्रार्थः ॥ द्वे त्रिष्टुभौ नाभानेदिष्ठदृष्टे । हे अग्ने तव प्रतिवेशाः प्रातिवेशिकाः प्रत्यासन्नास्त्वदाश्रयाः सन्तो वयं मा रिषाम मा हिंसनं प्राप्नुमः मा विनश्येमेत्यर्थः । किं कुर्वन्तः अक्रंरक्रंः प्रत्यहं संततमप्रयावमप्रमत्तं यथा तथा अस्मै अग्नये घासं समिद्रूपं भक्ष्यं भरन्तः सम्पादयन्तः प्रयवणं प्रयावः यु मिश्रणे घञ्प्रत्ययः नास्ति प्रयावः प्रमादो यस्यां क्रियायाम् । तत्र दृष्टान्तः अश्वायेव तिष्ठते वाजिशालायामवस्थितायाश्वाय यथा प्रत्यहमप्रमादेन घासं यच्छन्ति तद्वत् । पुनः किं कुर्वन्तः रायः पोषेण धनस्य पुष्ट्या दक्षिणालक्षणेन इषा अन्नेन च संमदन्तः हर्षं कुर्वन्तः त्वामुत्साहयन्त इत्यर्थः ॥७५॥

नाभा पृथिव्याः समिधानेऽग्नौ रायस्पोषाय बृहते हवामहे ।
इरंमदं बृहद्उक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥७६॥

एषा ह नाभिः पृथिव्यै यत्रैष एतत्समिध्यतेऽइति [६.६.३.१.] श्रुतेः पृथिव्या नाभा नाभौ विभक्तेराकारः पृथिवीरूपाया उखाया मध्ये समिधानि दीप्यमाने अग्नौ आहवनीयाख्ये अग्निं तदभिमानिनं देवं वयं हवामहे आह्वयामः किमर्थं बृहते रायः पोषाय प्रौढाय धनपोषणाय । कीदृशमग्निम् इरंमदम् इरया अन्नेन माद्यति तृप्यति तुष्यतीति इरंमदस्तम् उग्रम्पश्येत्यादिना [पा° ३.३.३७.] खशि निपातः । बृहदुक्थं बृहन्ति महान्ति उक्थानि शस्त्राणि यस्य तम् । यजत्रं यजनीयम् । पृतनासु संग्रामेषु जेतारं जयशीलम् । सासहिं सहतेऽभिभवतीति सासहिस्तं सोढारमस्मदृत्विजामभिभवितारम् । अग्नावित्याहवनीयविषयोऽग्निशब्दः जेतारमग्निमित्यधिष्ठात्रग्निविषयः ॥७६॥

याः सेना अभीवरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्तांस्ते ऽग्नेऽपिदधाम्यास्ये ॥ ७७ ॥

षडनुष्टुभः । याः काश्चित्परकीयाः सेनाः अभीवरीरभीवर्यः अभियायिन्यः अस्मदाभिमुख्येनागमनशीलाः अभियन्ति ता अभीवर्यः इणनशजिसर्तिभ्यः क्वरिति [पा° ३.२.१६३.] क्वरप् क्ङित्स्वस्य पितीति [पा° ६.१.७१.] तुक् ढिढ्राणञ्द्वयसञ्जित्यादिना [पा° ४.१.१५.] ङीप् । उतशब्दोऽप्यर्थे उतापि च याः सेनाः आव्याधिनीः आ समन्ताद्विध्यन्ति ताः सर्वतोऽस्मांस्ताडयन्त्यः । उगणाः उद्गूर्णगणाः पृषोदरादिपाठान्मध्यमपदलोपः उद्यतायुधगणोपेताः वद्धस्तोमा इत्यर्थः । ये च स्तेनाः गुप्तचराः ये च तस्कराः प्रकटचोराः तस्करस्तत्करोति यत्पापकमिनि निरुक्ताः [निरु° ३.१४.] । हे अग्ने तान्पूर्वोक्तान् सेनादीन् ते तव आस्ये मुखे अपिदधामि प्रक्षिपामि भक्षणाय दुष्टान्सर्वान्भक्षयेत्यर्थः ॥ ७७ ॥

दंष्ट्राभ्यां मलिम्लून्जम्भ्यैस्तस्करा२॥ऽउत ।
हनुभ्याꣳ स्तेनान्भगवस्ताँस्त्वं खाद सुखादितान् ॥ ७८ ॥

गुप्ताः प्रकटाश्चेति द्विविधाश्चोराः प्रकटा अपि पुनर्द्विविधाः अरण्ये मार्गे च प्रकृत्या प्रत्यक्षमेव पलायमानाः प्रकटाः ततोऽप्यतिप्रकटा निर्भया ग्रामेष्वेवागत्य वन्दीकाराः ते अत्र मलिम्लुच उच्यन्ते मलं पापाधिक्यमेषामस्तीति मलिनः तथाविधा भूत्वा म्लोचन्ति जने वने वा अदृश्या भवन्तीति मलिम्लुचः (31.)। दन्तपङ्क्तिमध्ये याभ्यां तीक्ष्णदन्ताभ्यां क्रमुकादिकं भक्ष्यते ते दंष्ट्रे राक्षसीसंज्ञे । ततः पुरोवर्तिनो बहिर्दृश्यमाना दन्ता जम्भ्याः जम्भावर्तिमाश्रिता जम्भ्याः । दन्तलीने तु हनू । दंष्ट्राभ्यां मलिम्लून्पीडयित्वा जम्भ्यैस्तस्करानपि पीडयित्वा हनुभ्यां स्तेनान्पीडयित्वा हे भगवः भगवन्महदैश्वर्ययुक्त पूजनीय तान्सर्वान्पूर्वोक्तान्सुखादितान् सुष्ठु खादितान्भक्षितान् पुनर्जीवनरहिता यथा भवन्ति तथा खाद भक्षय । सुखादितानपेतान्कृत्वेति वा ॥ ७८ ॥

ये जनेषु मलिम्लव स्तेनासस्तस्करा वने ।
ये कक्षेघधायवस्ताँस्ते दधामि जम्भयोः ॥ ७९ ॥

जनेषु ग्रामवर्तिषु ये मलिम्लुचः (31.) पूर्वोक्ता वन्दीकाराः ये च वने स्तेनासः स्तेनाः आज्जसेरसुक् [पा° ७.१.५०.] गुप्तचोराः तस्कराः प्रकटचोराः ये च कक्षेषु नदीपर्वतगह्वरेषु अघायवः परेषां पापाभिलाषुकाः हे अग्ने तान् चतुर्विधान् ते तव जम्भयोः दंष्ट्रयोर्दधामि स्थापयामि भक्षणायेत्यर्थः । अघं परस्येच्छन्ति ते अघायवः छन्दसि परेच्छायामिति वक्तव्यमिति अघशब्दात्क्यच् क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः ॥७९॥

योऽअस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्योऽअस्मान्धिप्साच्च सर्वं तं भस्मसा (32.) कुरु ॥८०॥

पूर्वं चोरभेदा दर्शिताः इदानीं शत्रुभेदा उच्यन्ते ते चतुर्विधाः अरातयो द्वेषिणो निन्दका जिघांसवश्चेति तत्र दातव्येन प्राप्तं धनं यो न ददाति सोऽरातिः कार्यविघातं यः करोति सो द्वेषी वाग्दौर्जन्यमात्रं यः करोति स निन्दकः हन्तुकामश्चतुर्थः तानग्नये समर्पयति । यो नरः अस्मभ्यमस्मदर्थे अरातीयात् अरातीयति अरातिरिवाचरति अरातित्वमिच्छति आचारे इच्छायां वा क्यच्प्रत्ययः । यश्च जनो नोऽस्मान्द्वेषते कार्यनाशेनाप्रीतिमुत्पादयति द्विष अप्रीतौ वङ्लं छन्दसीति [पा° २.४.७३.] शपो लुगभावः । योऽप्यन्योऽस्मान्निन्दात् निन्दति वाचा दुःखं ददाति । यश्चापरोऽस्मान्धिप्सात् धिप्सति दम्भितुमिच्छति जिघांसति दम्भेः सनन्तस्य दम्भ इच्चेति [पा° ७.४.५६.] अभ्यासलोप इकारश्च । इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] इकारलोपः लेटोऽडाटावित्ति [पा° ३.४.९४.] आडागमोऽरातीयादित्यादिषु त्रिष्वपि । हे अग्ने तं सर्वं जनं चतुर्विधं भस्मसा कुरु चूर्णीकुरु चर्वित्वा भक्षयेत्यर्थः भस्मसाशब्दो डाजन्तो निपातः चर्वणजन्यशब्दानुकरणवाची ॥८०॥

सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् ।
सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥८१॥

का° [१६.४.४१.४२.] उपोत्तमां क्षत्रियस्येच्छत्युत्तमां पुरोहितस्य । क्षत्रिययजमानस्य द्वादशीं संशितमित्येतामिष्ट्या दधाति पुरोहितयजमानस्यात्यामुदेषामित्ये-

तामिक्ष्या दधाति एकादश नित्याः सर्वासामूचामन्ते स्वाहाकारश्चेति सूत्रार्थः ॥ मे मदीयं ब्रह्म ब्राह्मणं संशितं सम्यक् तीक्ष्णीकृतं शास्त्रीयमार्गवर्ति कृतमित्यर्थः शो तनूकरणे क्तान्तः । वीर्यमिन्द्रियशक्तिः बलं शरीरशक्तिः तदुभयं संशितं स्वकार्यक्षमं कृतम् । तथा यस्य क्षत्रस्याहं पुरोहितोऽस्मि भवामि तन्मदीयं क्षत्रं क्षत्रजातं जिष्णु जयनशीलं यथा भवति तथा संशितं तीव्रं कृतम् ॥८१॥

उदेषां बाहूऽअतिरमुद्वर्चोऽअथो बलम् ।
क्षिणोमि ब्रह्मणामित्रान्नुन्नयामि स्वाँ२॥ऽअहम् ॥८२॥

एषां स्वकीयानां राजब्राह्मणादीनां मध्ये एकैकस्य बाहू भुजौ उदतिरमुत्कर्षेण वर्धितवानस्मि तिरतिर्वृद्ध्यर्थः लौकिकोक्तिरियं लोके हि योऽन्यस्माद्उत्कृष्टो भवति जना एवं वदन्ति अयं स्वहस्तमुपरि कृतवानिति । वर्चः कान्तिः तामप्युदतिरम् अथो अपि च बलं शरीरशक्तिमुदतिरम् । ब्रह्मणा-मन्त्रसामर्थ्येन अमित्रान् शत्रून्क्षिणोमि क्षीणान्करोमि । स्वान् स्वकीयान्पुरुषान्पुत्रपौत्रादीनहमुन्नयामि उत्कर्षं प्रापयामि ॥ एवं त्रयोदश समिन्मन्त्रा उक्ताः ॥८२॥

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र-प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥८३॥
इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकादशोऽध्यायः ॥११॥

का° [१६. ६. ८.] न्यज्य समिधं व्रते प्रत्ते-प्रत्तेऽन्नपतऽइत्याधानम् । अध्वर्युणा व्रतपयसि दत्ते तत्र समिधमभ्यज्य दीक्षितऽउखेऽग्नावाद्ध्यात् प्रत्ते इति वीप्सा प्रतिव्रतं समिदाधानप्रास्त्यर्था इति सूत्रार्थः ॥ आग्नेयी उपरिष्टाद्बृहती अष्टार्णात्रिपादा चतुर्थी द्वादशार्णः । हे अन्नपते अन्नस्य पालक अग्ने नोऽस्मभ्यमन्नस्य देहि कर्मणि षष्ठी अन्नं प्रयच्छ यद्वान्नस्य स्वमंशं देहि । कीदृशस्यान्नस्य अनमीवस्य नास्ति अमीवा व्याधिर्येन तदनमीवम् तस्य । शुष्मिणः शुष्ममिति [निघ° २. ९.] बलनाम शुष्मं बलं विद्यते यस्मात्तत् शुष्मि तस्य । रोगनाशकं बलकेवलं प्रयच्छेत्यर्थः । किं च दातारं प्रतारिषः अन्नस्य दातारं प्रकर्षेण वर्धय प्रसमुपोदः पा-

दपूरणाऽइति [पा° ८. १. ६.] पादपूर्त्ये प्रोपसर्गस्य द्वित्वम् अतिशयार्थे वोपसर्गाभ्यासः अभ्यासे भूयांसमर्थं मन्यन्तऽइति याकोतोः [निरु° १०. ४२.] । तॄ प्लवनतरणयोः लेटो मध्यमैकवचनं सिब्बहुलं लेटीति [पा° ३. १. ३४.] सिप्प्रत्ययः आर्धधातुकस्येतीट् [पा° ७. २. ३५.] छान्दसी धातोर्वृद्धिः लेटोऽडाटाविति [पा° ३. ४. ९४.] अडागमः इतश्च लोप इति [पा° ३. ४. ९७.] लेट इकारलोपे रुत्वविसर्गौ तारिष इति रूपम् । किं च नोऽस्माकं द्विपदे मनुष्ये पुत्रादौ चतुष्पदे गवादौ च ऊर्जमन्नं धेहि धारय यद्वा द्वौ पादौ यस्य स द्विपात्तस्मै द्विपदे चत्वारः पादा यस्य स चतुष्पात् तस्मै पादः पत् [पा° ६. ४. १३०.] पादस्य लोपोऽह्स्त्यादिभ्य इति [पा° ५. ४. १३८.] अन्तलोपे पदादेशः द्विपदे मनुष्याय चतुष्पदे गवादये अन्नं धेहि देहि जातावेकवचनम् सर्वेभ्यो नरपशुभ्योऽन्नं देहीत्यर्थः ॥ ८३ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । ऊखादिसमिदाध्यन्तोऽध्याय एकादशोऽगमत् ॥ ११ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ [धिर्यः] ॥ १ ॥ २ [स्वर्गेयाय] ॥ २ ॥ ३-११ ॥ ३-११ ॥ ॥

II. ॥ १२-२५ ॥ १-१४ ॥ २६ [भित्तारं भ°] ॥ १५ ॥ २७ ॥ १६ ॥ २७ ॥ ॥

III. ॥ २८-३७ ॥ १-१० ॥ ३७ ॥ ॥

IV. ॥ ३८ ॥ १ ॥ ३९ [वर्षलस्तु] ॥ २ ॥ ४०-४५ ॥ ३-८ ॥ ४६ प्रेतु — [°भस्पत्वा] - पुरा ॥ १ ॥ ४६ वृषाग्निं — वीतये । ४७ a. b ॥ १० ॥ ४७ c ॥ ११ ॥ ४८ ॥ १२ ॥ ४९ ॥ १३ ॥ ५० ॥ ॥

V. ॥ ५०-५७ a ॥ १-८ ॥ ५७ b. ५८ ॥ १ ॥ ५९ ॥ १० ॥ ६० ॥ ११ ॥ ६१ ॥ ॥

VI. ॥ ६१ a ॥ १ ॥ ६१ b-f ॥ २ ॥ ६२ ॥ ३ ॥ ६३ ॥ ४ ॥ ६४. ६५ ॥ ५ ॥ ६६ ॥ ॥

VII. ॥ ६६-७८ ॥ १-१३ ॥ ७९ ॥ १४ ॥ ८०-८२ ॥ १५-१७ ॥ ८३. । वि-

श्वकर्मणे स्वाहा ॥ १८ ॥ १२. ४४ [पुनस्त्वादित्या — कामाः स्वाहा]
॥ ११ ॥ ८५ ॥ ॥ सप्तानुवाकेषु पञ्चाशीतिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां द्वादशोऽध्यायः ॥ १२ ॥

I. दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ १ ॥

एकादशाध्याये (I.) उखासम्भरणादिमन्त्रा उक्ताः द्वादशेऽध्यायऽउखाधारणादिमन्त्रा उच्यन्ते । तत्र का° [१६.५.१.] यजमानः कण्ठे रुक्मं प्रतिमुञ्चते परिमण्डलमेकविंशतिपिण्डं कृष्णाजिननिष्यूतं लोमसु शुक्लकृष्णेषु शणसूत्रे त्रिवृत्योतमुपरिनाभि बहिष्पिण्डं दृशानो रुक्म इति । समिदाधानान्ते ऐशान्यां तिष्ठन्यजमानो ग्रीवायां रुक्मं स्वर्णनिर्मितं फलकाकारमाभरणविशेषं बध्नाति । कीदृशं वर्तुलम् एकविंशतिः पिण्डा यत्र । शणकदलतुल्याः स्वद्रूपाद्बहिर्भूता उन्नतविन्दवः पिण्डा उच्यन्ते । कृष्णाजिनखण्डे श्वेतकृष्णरोमस्थाने स्यूतम् त्रिगुणशणसूत्रे प्रोतम् नाभेरूर्ध्वं वर्तमानम् पिण्डा बहिर्भवन्ति तथा धार्यमिति सूत्रार्थः ॥ रुक्मदेवत्या त्रिष्टुप् वत्सप्रीदृष्टा आदित्याध्यासिन रुक्मः स्तूयते । रुक्म आभरणविशेषः उर्व्या महत्या दीप्त्या व्यद्यौत् विद्योतते द्युत द्योतने व्यत्ययेन शपि लुप्ते वृद्धौ लङि रूपम् । कीदृशो रुक्मः दृशानो दृश्यमानः शानचि शपो लुक् प्रत्यक्षमुपलभ्यमानः । श्रिये जनेभ्यः श्रियं दातुम् । दुर्मर्ष दुर्मर्षणमनवखण्डितं केनाप्यतिरस्कार्यं वा आयुः जीवनं रुचानः रोचतऽइति रुचानो वाऽछन् रोचतेः शानचि बहुलं छन्दसीति [पा° २.४.७३.] शपो लुक् । सोऽयमग्निर्वयोभिरन्नैः पशुपुरोडाशप्रभृतिभिरमृतोऽमरणधर्मा अभवत् । यद्यस्मात्कारणात् द्यौर्द्युलोकवासी देवगण एनमग्निमजनयत् जनितवती । कीदृशी द्यौः सुरेताः शोभनं रेतोऽग्निरूपं यस्याः सा तस्मादमृतत्वं युक्तम् ॥ १ ॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मोऽअन्तर्विभाति देवा अग्निं धारयन्द्रविणोदाः ॥ २ ॥

का° [१६.५.३.] परिमण्डलाभ्यामिण्डाभ्यामुखां परिगृह्णाति नक्तोषासेति । वर्तुलाभ्यामुखाधारणसाधनरूपाभ्यामिण्डाभ्यामुखां गृह्णातीति सूत्रार्थः ॥ अग्निर्दिवत्या त्रिष्टुप्कुत्सदृष्टा अर्धमुखाग्रहणे विनियुक्तम् । नक्तोषासा नक्तं च उषाश्च नक्तोषसौ विभक्तेराकारः संहितायां दीर्घः नक्तं रात्रिः उषा अहः नक्तोषसौ रात्रिदिवसौ एकमग्निं धापयेते पाययेते सायंप्रातरग्निहोत्रादिकर्मभिः तर्पयेतेऽित्यर्थः । तत्र लुप्तोपमानम् शिशुं बालं मातापितराविव । धेट् पाने हेतुमति चेति [पा° ३.१.२६.] णिच् आदेच उपदेशेऽशितीति [पा° ६.१.४५.] आकारे अर्तिह्वीत्यादिना [पा° ७.३.३६.] पुक् । कीदृश्यौ नक्तोषसौ (2.) समनसा समनसौ समानं मनो ययोस्ते एकमनस्के परमैकमत्ययुक्तेऽित्यर्थः । विरूपे विलक्षणं रूपं ययोस्ते विरूपे कृष्णा रात्रिः शुक्लमहः । समीची सम्यगञ्चतस्ते समीच्यौ सम्यगञ्चने समन्विते संश्लिष्टे वा पूर्वसवर्णो विभक्तेः । ये इत्थम्भूते रात्र्यहनी ताभ्यामिण्डारूपाभ्यामुखां गृह्णामीति शेषः ॥ का° [१६.५.४.] ह्वरति द्यावाक्षामेति । आह्वनीयोपरिस्थामुखामेवमिण्डाभ्यामादाय द्यावेति पादेनासन्दीं प्रति तां ह्वरतीति सूत्रार्थः ॥ द्यावाक्षामा द्यौश्च क्षामा पृथिवी च द्यावाक्षामा दिवो द्यावादिशः विभक्तेर्लोपः द्यावापृथिव्योरन्तर्मध्ये अन्तरिक्षे च यो रुक्मः रोचमानोऽग्निर्विभाति प्रकाशते तं ह्वरामीति शेषः ॥ का° [१६.५.५.] आह्वनीयस्य पुरस्ताद्वत्रासन्दीवदासन्द्यां चतुरस्राज्याꣳ शिक्यवत्यामादधाति देवा अग्निमिति । आह्वनीयात्पूर्वदिशि भूमौ स्थापितायामासन्द्यामुखां निदधाति देवा इति पादेन उद्वत्रासन्दीवदिति प्रादेशमात्रपाद्यामौडुम्बर्यामरत्निमात्राज्यां मुञ्जरज्ज्वा व्युतायामिति लभ्यते तथा चतुरस्राज्यां चतुरस्राणि चतुष्कोणानि अङ्गानीषोपलपादरूपाणि यस्यास्तस्यां सशिक्यायां चेति सूत्रार्थः ॥ देवाः दीव्यन्ति व्यवहरन्तीति देवाः प्राणा यजमानस्य एतमग्निं धारयन् अधारयन् अडभाव आर्षः । कीदृशा देवाः द्रविणोदाः यागद्वारेण द्रविणं धनरूपं फलं ददति प्रयच्छन्ति ते । तमहं धारयामीति शेषः । अग्निं धारयन्द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा इति तैत्तिरीयश्रुतेर्देवशब्देन प्राणा उच्यन्ते ॥२॥

विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।

वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥३॥

का॰ [१६.५.६.] शिक्यपाशं प्रतिमुञ्चते षडुद्यामं विश्वा रूपाणीति । उत् ऊर्ध्वं यम्यते नियम्यते यैस्ते उद्यामा रज्जवः षडुद्यामा रज्जव ऊर्ध्वाकर्षणहेतवो यस्येदृशमासन्दीस्थं शिक्यपाशं यजमानः कण्ठे बध्नातीति सूत्रार्थः ॥ सवितृदेवत्या जगती श्यावाश्वदृष्टा । कविः विद्वान्क्रान्तदर्शनः । वरेण्यः श्रेष्ठः सविता सर्वस्य प्रसविता सूर्यः विश्वा विश्वानि सर्वाणि रूपाणि प्रतिमुञ्चते द्रव्येषु प्रतिबध्नाति रात्रितमोऽपकृत्य रूपाणि प्रकाशयतीत्यर्थः । यश्च द्विपदे चतुष्पदे द्विपाद्भ्यश्चतुष्पाद्भ्यो मनुष्यपश्वादिभ्यो भद्रं कल्याणं स्वस्वव्यवहारप्रकाशनरूपं श्रेयः प्रासावीत् प्रसौति प्रेरयति । यश्च नाकं स्वर्गं व्यख्यत् विख्याति प्रकाशयति अस्यतिवक्तिख्यातिभ्योऽङ् इति [पा॰ ३.१.५२.] चेरङ् । यश्च उषसः उषःकालस्य प्रयाणं गमनमनु पश्चात् उषःकाले व्यतीते सति विराजति विशेषेण दीप्यते । उषाः सवितुः पुरोगामिनीति सवितुः स्तुतिः । ईदृशः सविता शिक्यं प्रतिमुञ्चत्विति शेषः ॥३॥

सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ।
स्तोम आत्मा छन्दाꣳस्यङ्गानि यजूꣳषि नाम ।
साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ।
सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ॥४॥

का॰ [१६.५.७.] सशिक्यं प्राचं प्रगृह्णाति सुपर्णोऽसीति पिण्डवत् । शिक्यसहितमुख्याग्निं प्राच्यामूर्ध्वं धारयति पिण्डवदित्यूर्ध्वबाहुः अनेनोख्याग्नेरभिमन्त्रणमप्युक्तं कैश्चिदिति सूत्रार्थः ॥ गरुत्मद्देवत्या विषमछन्दा चतुरवसाना कृतिः । हे अग्ने त्वं सुपर्णः शोभनं पर्ण पतनं यस्य स पक्षिरूपोऽसि पक्ष्याकारेण चितत्वात् तत्र दृष्टान्तः गरुत्मान्गरुडो यथा पक्षिराजस्तद्वत् । तस्यावयवाः कथ्यन्ते त्रिवृत्ते तव शिरः त्रिवृत्स्तोमस्तव शिरःस्थानीयः । गायत्रं चक्षुः यद्गायत्राख्यं साम तत्तव चक्षुः नेत्रस्थानीयम् । बृहद्रथन्तरे पक्षौ बृहद्रथन्तराख्ये सामनी तव पक्षस्थानीये । स्तोम आत्मा पञ्चदश स्तोमस्तवात्मा अन्तःकरणस्थानीयः । छन्दांसि

अङ्गानि गायत्र्यादीनि एकविंशतिछन्दांसि तव हृदयाद्यङ्गस्थानीयानि । यज्ञूंषि नाम इषे त्वेत्यादीनि यज्ञूंषि तव नामस्थानीयानि । वामदेव्यं साम ते तव तनूः शरीरस्थानीयम् । यज्ञायज्ञियाख्यं साम तव पुच्छं पुच्छस्थानीयम् । धिष्ण्याः शफाः होत्रादिधिष्ण्यस्थिता अग्नयस्तव शफाः खुरस्थानीयाः । हे अग्ने एवम्भूतस्त्वं यतो गरुत्मान् गरुड-इव सुपर्णः पक्षिरूपोऽसि अतो दिवमाकाशं प्रति गच्छ तत्रापि स्वः पत स्वः स्वर्गलोकं प्राप्नुहि ॥४॥

a. विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आरोह पृथिवीमनु विक्रमस्व ।

b. विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आरोहान्तरिक्षमनु विक्रमस्व ।

c. विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आरोह दिवमनु विक्रमस्व ।

d. विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह दिशोऽनु विक्रमस्व ॥५॥

का° [१६.५.११.] विष्णुक्रमान्क्रमते विष्णोरिति प्रतिमन्त्रमग्न्युद्धरणं च तस्मिँस्तस्मिन् (3.) । विष्णुक्रमसंज्ञान्पादन्यासान्करोति तस्मिंस्तस्मिन्क्रमणे (4.) उख्यस्याग्नेरूर्ध्वं ग्रहणं (5.) कार्यमिति सूत्रार्थः ॥ चत्वारि यज्ञूंष्युख्याग्नेर्देवत्यानि ऋग्बृहतीछन्दस्कानि त्रीणि चतुर्थं प्राजापत्या बृहती । विष्णुशब्देनाग्निरुच्यते स यः स विष्णुर्यज्ञः सः स यः स यज्ञोऽयमेव स योऽयमग्निरुखायामिति श्रुतेः [६.७.२.११.] । हे प्रथम पादविन्यास त्वं विष्णोः यज्ञस्याग्नेः क्रमोऽसि सपत्नहा सपत्नान् शत्रून् हन्तीति शत्रुघातकश्च अतो गायत्रं छन्दः आरोह अनुग्राहकत्वेन स्वीकुरु ततः पृथिवीमनु विक्रमस्व भूदेवतारूपमिमं प्रदेशं विशेषेण प्राप्नुहि । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् । हे द्वितीय पादन्यास त्वं विष्णोः क्रमोऽसि अभिमातिहा अभिमातिर्घातकः पाप्मा वा तं हन्तीति त्रैष्टुभं छन्दः स्वीकुरु अन्तरिक्षं प्रदेशं व्याप्नुहि । हे तृतीय पादन्यास विष्णोः क्रमोऽसि अरातीयतो हन्ता रातिर्दानं न रातिररातिर्दानाभावस्तमात्मन इच्छतीत्यरातीयन् तस्य हन्ता विनाशकः जागतं छन्दः आरोह दिवं द्युलोकमनु विक्रमस्व द्युलोकं व्याप्नुहि । हे चतुर्थ पादन्यास त्वं विष्णोः क्रमोऽसि शत्रूयतो हन्ता शत्रुत्वं हन्तृत्वमिच्छति शत्रूयति शत्रूयतीति

शत्रूयन् क्यङन्ताच्छतृप्रत्यय उभयत्र तस्य कृत्वा आनुष्टुभं छन्द आरोह । अत्र चतुर्ष्वपि पादन्यासेषु यजमान आत्मानं विष्णुरूपेण भावयेत् चतुर्णां प्रक्रमाणां प्रदेशान्पृथिव्यादिलोकरूपत्वेन भावयेत् ॥ का० [१६.५.१३.] दिशो वीक्षते दिशोऽनु विक्रमस्वेति । सर्वा दिशः पश्यतीत्यर्थः ॥ यजुरुल्लिक् । हे अग्ने त्वं दिशोऽनु विक्रमस्व प्राच्यादिदिशो व्याप्नुहि ॥५॥

अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धोऽअख्यदा रोदसी भानुना भात्यन्तः ॥६॥

का० [१६.५.१४.] पिण्डवत्प्रागुदञ्चं प्रगृह्णात्यक्रन्ददग्निरिति । ऊर्धबाहुः प्राग्ग्रीवमग्निं गृह्णातीति सूत्रार्थः ॥ अग्निर्देवत्या त्रिष्टुब्व्रत्सप्रीदृष्टा । अग्निरक्रन्दत् छन्दसि लुङ्लिङ्लिटः [पा० ३.४.६.] क्रन्दति विस्फूर्जति । कीदृशः द्यौरिव स्तनयन् द्यौशब्दोनात्र पर्जन्य उक्तः द्यौर्मेघ-इव स्तनयन्गर्जयन् शब्दं कुर्वाणः स्तन गद् देव शब्दे चुरादिरदन्तः । मेघसाधर्म्यमाह क्षामा रेरिहत् सुपां सुलुगिति [पा० ७.१.३९.] विभक्तिलोपः क्षामिति पृथिवीनामसु [निघ० १.१.(७.)] पठितं क्षामां पृथिवीं रेरिहत् लिह आस्वादने यङ्लुगन्ताच्छतृप्रत्ययः रेफश्छान्दसः अत्यन्तं लेढीति लेलिहत् नाभ्यस्ताच्छतुरिति [पा० ७.१.७८.] नुमभावः भूमिमिति आस्वादयन्व्याप्नुवन् यथा मेघो जलभावं गच्छन्नत्यर्थं भूमिं लेढि । वीरुधः समञ्जन् स्वकीयज्वालासमूहेन ओषधीर्व्याप्नुवन् । अन्यदप्युच्यते हि यस्मात् जज्ञानः उत्पद्यमानः (७.) सन् सद्यः तदानीमेव इद्धः दीप्तश्च सन् व्यख्यत् विख्याति अन्तर्भूतणिजन्तो ज्ञेयः श्रुत्या तथा व्याख्यानत्वात् विख्यापयति इदं सर्वं विविधं प्रकाशयति । अन्यच्च योऽग्निः रोदसी द्यावापृथिव्योः अन्तर्मध्ये भानुना रश्मिना स्वयमाभाति समन्तात्प्रकाशते यथा पर्जन्यो भानुना विद्युद्रूपेण द्यावापृथिव्योरन्तर्भाति एवमग्निः पर्जन्यवत्स्तूयते । ईम् निपातः पादपूरणे ॥६॥

अग्नेऽभ्यावर्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन ।
सन्या मेधया रय्या पोषेण ॥७॥

का० [१६.५.१५.] अवक्रत्यग्नेऽभ्यावर्तिन्निति । ऋक्चतुष्टयेन चतुर्वारमुख्याग्नि-

मात्मसमीपमानयतीति सूत्रार्थः ॥ अग्निर्देवत्योर्ध्ववृक्तौ द्वादशार्णात्रिपादा । अभि आभिमुख्येनावर्तितुं शीलमस्यास्तीत्यभ्यावर्ती तत्सम्बोधनम् अस्मदभिमुखागमनशील आयुरादिभिः सह मा मामभि मां प्रति निवर्तस्व शीघ्रमागच्छ आयुषा जीवनेन वर्चसा ब्रह्मवर्चसेन प्रजया पुत्रादिकया धनेन वसुना सत्या इष्टलाभिन मेधया धारणावत्या बुद्ध्या रय्या सुवर्णालंकारैः पोषेण आयुरादीनां पुष्ट्या ॥७॥

अग्नेऽअङ्गिरः शतं ते सन्त्वावृतः सहस्रं तऽउपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥८॥

अग्नेयी महावृक्तौ एकः पादो द्वादशार्णश्चत्वारोऽष्टार्णाः । हे अङ्गिरः अङ्गिनां रसभूत अङ्गसौष्ठवयुक्त हे अग्ने ते तव शतमावृतः सन्तु शतसंख्याका आवृत्तिशक्तयः सन्तु । तथा ते तव सहस्रमुपावृतः सन्तु सहस्रसंख्याका उपावृत्तिशक्तयः सन्तु स्वस्यैवावर्तनमावृत् तत्समीपवर्तिनां पुरुषाणां द्रव्यविशेषाणां चावर्तनमुपावृत्तिः अस्मासु स्नेहातिशयेन त्वमपि पुनः-पुनरावर्तस्व वर्धयाः पुरुषास्त्वदीयानि च द्रव्याणि पुनःपुनरावर्तयेत्यर्थः । अधेत्यव्ययमथार्थम् निपातस्य चेति [पा० ६.३.१३६.] संहितायां दीर्घः अथापि शतसहस्रसंख्यानामावृत्त्युपावृत्तिशक्तीनां यः पोषः समृद्धिस्तस्यापि पोषस्यान्यः पोषोऽयुतलक्षादिसंख्याकाभिवृद्धिस्तादृशेन पोषेण नोऽस्मदीयं नष्टं धनं पुनर्भूयोऽपि आकृधि आवृत्तं कुरु आगमय पुनः भूयोऽपि नोऽस्मदीयं पूर्वमसम्पादितं धनमाकृधि (8.) सर्वतः सम्पादितं कुरु करोतिर्गतिकर्मा शृणुपृकृवृभ्यश्छन्दसीति [पा० ६.४.१०२.] हेर्धिः व्यत्यये शपोलुक् ॥८॥

पुनर्ब्रह्मा निवर्तस्व पुनरग्नऽइषायुषा । पुनर्नः पाह्यꣳहसः ॥९॥

आग्नेय्यौ द्वे गायत्र्यौ । हे अग्ने त्वमूर्जा क्षीरादिरसेन सह निवर्तस्व पुनरत्रागच्छ इषा अन्नेन आयुषा जीवेन च सह पुनरागच्छ आगतस्त्वं नोऽस्मान्पुनः कृतादंहसः पापात्पाहि रक्ष ॥९॥

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥१०॥

हे अग्ने रय्या धनेन सह निवर्तस्व किं च धारया जलधारया वृष्टिरूपया विश्वतः परि सर्वेषां तृणधान्यलतापादपानामुपरि पिन्वस्व सिञ्च पिन्वतिः सेचनार्थः । कीदृश्या धारया विश्वपस्न्या पस्ा भक्षणे विश्वैः पस्यते भक्ष्यते पीयत इति विश्वपस्नी तया यद्वा विश्वपस्न्या सर्वजनोपभोग्यया धारया धनधारया सर्वतः परि सर्वतोऽधिगतैरर्थैः पूर्यमाणया पिन्वस्व सिञ्च अनवच्छिन्नधनदानेन पुनः-पुनराप्यायस्वेत्यर्थः ॥१०॥

आ त्वाकार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥११॥

का० [१६.५.१६.] उपरिनाभि धारयन्ना त्वाकार्षमित्यभिमन्त्रयते । नाभिरुपर्युष्याग्निं धारयंस्तमभिमन्त्रयत इति सूत्रार्थः ॥ आग्नेय्यनुष्टुब्ध्रुवदृष्टा । हे अग्ने अहं त्वामाकार्षमाकृतनानास्मि आङ्पूर्वस्य कृतेर्लङि उत्तमैकवचनम् त्वं च अन्तरभूः उखामध्येऽवस्थितोऽसि । अविचाचलिरत्यन्तं चलनरहितो ध्रुवः स्थिरः सन् तिष्ठ विचलतीति विचाचलिः यङन्तादिन् । किं च सर्वा विशः प्रजाः त्वा त्वां वाञ्छन्तु यद्वा सर्वा विशः सर्वाण्यन्नानि त्वां वाञ्छन्तु अन्नानि तवोपतिष्ठन्तु अन्नं वै विश इति श्रुतिः [६.७.३.७.] । इदं राष्ट्रं त्वत् त्वत्तः सकाशान्मा अधि भ्रशत् अयं जनपदस्त्वत्तो मापभ्रश्यतु भ्रून्यो मा भूत् अस्मिन्राज्ये स्थित्वा सर्वाः प्रजाः पाहीत्यर्थः । यद्वा श्रीर्वै राष्ट्रं मा त्वच्छ्रीरधिभ्रशदिति श्रुतिः [६.७.३.७.] श्रीः त्वत्तो मा भ्रश्यतु भ्रंशु अधःपतने पुषादित्वाच्चेरङ् न माङ्योगऽइति [पा० ६.४.७४.] अडभावः ॥११॥

उद्वत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥१२॥

का० [१६.५.१७.] पाशाऽउन्मुच्योद्वत्तममिति । रुक्मपाशशिक्यपाशौ गलादूर्ध्वमार्गेण निष्काशयतीति सूत्रार्थः ॥ वरुणदेवत्या त्रिष्टुप् शुनःशेपदृष्टा । उदित्युपसर्गोऽव वि एतावपि श्रथयेत्यनेन सम्बध्यते । हे वरुण उत्तममुत्तमाङ्गे शिरसि स्थापितं त्वदीयं पाशमस्मत् अस्मत्तः सकाशात् उत् श्रथय उत्कृष्य विनाशय अधममधमाङ्गे पादप्रदेशे स्थापितं त्वत्पाशमवश्रथय अवकृष्यास्मत्तो विनाशय म-

ध्यमं मध्यमप्रदेशे स्थितं पाशं विश्रथय विच्छिंद्य अथ बंधे मित्वाणिचि ह्रस्वः लोटि मध्यमैकवचने ह्रूपम् अथायेति संहितायां दीर्घश्छान्दसः यद्वा अथ क्र्यादिः लोटि मध्यमैकवचने छन्दसि शायजपीति [पा° ३.१.८४.] श्नाप्रत्ययस्य शायजादिशे अथायेति ह्रूपम् । अथ पाशत्रयविनाशानन्तरं हे आदित्य अदितिपुत्र वरुण अनागसः अनपराधा निष्पापास्तव व्रते कर्मणि वर्तमानाः सन्तो वयमदितये अदीनतायै स्याम अखण्डितत्वाय योग्या भवेम । निपातस्य चेति [पा° ६.३.१३६.] दीर्घः अथा इत्यत्र ॥ १२ ॥

अग्ने॑ बृहन्नुषसामू॒र्ध्वो अ॑स्यान्नि॒र्जगन्वान्तमसो॒ ज्योति॒षागा॑त् ।
अग्निर्भा॑नुना॒ रुश॑ता॒ स्वङ्ग॒ आ जा॒तो विश्वा॒ सद्मा॒न्यप्राः ॥ १३ ॥

का° [१६.५.१७.] पिण्डवत्प्राग्दक्षिणा प्रगृह्णात्यग्ने बृहन्निति । पूर्वमन्त्रेण पाशावुन्मुच्योर्ध्वबाहुराग्नेयीं दिशं प्रत्युच्याग्निमूर्ध्वं धारयतीति सूत्रार्थः ॥ अग्निर्देवत्या त्रिष्टुप् त्रितदृष्टा । आदित्यात्मनाग्नेः स्तुतिः क्रियते । बृहन्प्रभावान्महानयमग्निरुषसामग्रे प्रातःकालानां मुखे ऊर्ध्वोऽस्यात् ऊर्ध्वः स्थितः यद्वाग्निहोत्रादौ वोध्यमान उत्तिष्ठति ऊर्ध्वोऽस्यादित्यत्र प्रकृत्यान्तःपादमव्यपरेऽइति [पा° ६.१.११५.] एङः पदान्तादतीति [पा° ६.१.१०९.] सूत्रप्राप्तसंध्यभावः । यश्च तमसो रात्रिलक्षणान्निर्जगन्वान्निर्गतः सन् ज्योतिषाऽर्कलक्षणेन सह आ अगात् इहागतः सोऽग्निर्जात उत्पन्नमात्र एव विश्वा विश्वानि सर्वाणि सद्मानि स्थानानि सर्वान् लोकानाप्राः स्वतेजसा सर्वत्र पूरितवान् प्रा पूरणे लङ् पुरुषव्यत्ययः इमे वै लोका विश्वा सद्मानीति श्रुतिः [६.७.३.१०.] । कीदृशः रुशता रुश हिंसायाम् रुशतीति रुशन् तेन रुशता तमो हिंसता भानुना रश्मिना स्वङ्गः शोभनान्यङ्गानि यस्य शोभनशरीरः ॥ १३ ॥

a. हꣳसः शु॑चिष॒द्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत् । नृ॒षद्व॑र॒सदृ॑तसद्व्यो॒मसदब्जा गो॒जा ऋ॑तजा॒ अद्रि॑जा ऋ॒तम् । b. बृ॒हत् ॥ १४ ॥

का° [१६.५.१८.] अवरुरति हꣳसः शुचिषदिति । उच्याग्निमवतारयति ॥ जगती अग्निप्रोक्षणे इयमुक्ता यजुरुक्ता । राजसूयप्रकरणे इयमतिजगत्युक्ता इह तु ज-

गती अन्ते बृहदिति यजुः तद्विनियोगमाह का॰ [१६.५.१९.] आसन्द्यां करोति बृहदिति । बृहदिति यजुषा उख्याग्निमासन्द्यां स्थापयतीति सूत्रार्थः ॥ हंस इति मन्त्रस्तु व्याख्यातः [१०.२४.] ॥१४॥

सीद॑ त्वं मातु॒रस्या॑ उ॒पस्थे॒ विश्वा॑न्यग्ने॒ वयु॑नानि वि॒द्वान् ।
मैना॑ तपसा॒ मार्चि॑षाभिशोचीर॒न्तर॑स्याꣳ शु॒क्रज्यो॑तिर्वि॒भाहि॑ ॥१५॥

का॰ [१६.५.२०.] उपतिष्ठते सीद त्वमिति । आसन्दीनिधानानन्तरमुख्याग्निमुपतिष्ठते ऋचां त्रयेणेति सूत्रार्थः ॥ अग्निर्देवत्या त्रिष्टुप् । हे अग्ने त्वं मातुः मातृसमाया अस्या उखाया उपस्थे उत्सङ्गे सीद उपविश । कीदृशस्त्वं विश्वानि वयुनानि सर्वान् ज्ञानोपायान्विद्वान् जानन् सर्वपदार्थतत्त्ववेदी सन्नित्यर्थः । किं च एनामुखां तपसा संतापेन माभिशोचीः मा संतापय अर्चिषा ज्वालया च माभिशोचीर्मा दीपय तपः कार्यमर्चिः कारणं कार्येण भूयांस्तापो भवति कारणेन त्वीषत् तदुभयं मा कुर्वित्यर्थः अस्यामुखायामन्तर्मध्ये शुक्रज्योतिः निर्मलप्रकाशः सन् विभाहि विशेषेण दीप्यस्व ॥१५॥

अ॒न्तर॑ग्ने रु॒चा त्वमु॒खाया॒ सद॑ने॒ स्वे ।
तस्या॒स्त्वꣳ क॒र॑सा तप॒न्जात॑वेदः शि॒वो भ॑व ॥१६॥

अग्निर्देवत्ये द्वे अनुष्टुभौ । हे अग्ने त्वमुखाया अन्तः मध्ये स्वे सदने स्वकीये स्थाने रुचा दीप्त्या युक्तः सन् सीदेति शेषः । किं च जातं-जातं विन्दतीति जातवेदाः तस्य सम्बोधनं हे जातवेदः सर्वज्ञ जातं वेदो ज्ञानं यस्येति वा जातविज्ञान तस्या उखायाः शिवः कल्याणकारी शान्तो भव किं कुर्वन् करसा ज्योतिषा तपन्प्रतपन् सन् ॥१६॥

शि॒वो भू॒त्वा मह्यम॑ग्ऽए॒धो सीद शि॒वस्त्वम् ।
शि॒वाः कृ॒त्वा दिश॒ः सर्वा॒ः स्वं योनिं॒मि॒हास॑दः ॥१७॥

हे अग्ने मह्यं मदर्थं शिवः शान्तो भूत्वा अधो अनन्तरं शिवः सीद सर्वात्मना शान्तः सन्नुपविश । सर्वा दिशः शिवाः शान्ताः कृत्वा इहास्यामुखायां स्वं योनिं

स्वकीयं स्थानमासदः आसीद् आगत्योपविश छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] लोडर्थे लुङ् ॥१७॥

II. दिवस्परि प्रथमं जज्ञेऽअग्निरस्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥१८॥

का° [१६.५.३१.२२.] वात्सप्रेण च दिवस्परीत्येकादशभिरनुवाकैनैके । दिवस्परीत्येकादशर्चेन वात्सप्रेणोख्यमग्निमुपतिष्ठते एके आचार्या अनुवाकेन द्वादशर्चेन वदन्तीति सूत्रार्थः ॥ अग्निदेवत्या द्वादश त्रिष्टुभो भलन्दनपुत्रवत्सप्रीदृष्टाः । अग्निः प्रथमं दिवः परि दिवः सकाशात् जज्ञे जातः प्राणो वै दिवः प्राणाद्ध वा ऽएष प्रथममजायतेति श्रुतिः [६.७.४.३.] । जातवेदाः अग्निः द्वितीयं द्वितीयवारमस्मत्परि अस्मत्तः सकाशात् ब्रह्मणो जज्ञे जातः यदेनमदो द्वितीयं पुरुषविधो ऽजनयदिति श्रुतिः [६.७.४.३.] स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजतेति च श्रुतिः स पुरुषविध इत्यर्थः । नृषु मनो यस्य स नृमणा पूर्वपदाच्चेति [पा° ८.१.३.(9.)। णत्वम् नृमणाः प्रजापतिः अजस्रमनुपक्षीणमग्निमप्सु जलेषत्तर्व्यवस्थितं तृतीयं तृतीयवारमजनयत् यदेनमदस्तृतीयमद्भ्योऽजनयत् । अथ-यो गर्भोऽत्तरासीत्सोऽग्निरसृज्यत । प्रजापतिर्वै नृमणा अजस्रोऽग्निरित्यादिश्रुतयः [६.७.४.३.] । एवं बहुजन्माग्निः स्वाधीः शोभना आहिता धीर्बुद्धिर्यस्य स यजमान एनं बहुजन्मानमग्निमिन्धानो दीपयन् जरते जनयति धातोरर्थान्तरे वृत्तिः ॥ यद्वायमर्थः अग्निः प्रथमं दिवः परि द्युलोकस्योपरि जज्ञे सूर्यरूपेणोत्पन्नः । अस्मत्परि अस्मदीयमनुष्यलोकस्योपरि ज्ञातवेदाः द्वितीयं जज्ञे प्रसिद्धवह्निरूपेण द्वितीयं जन्म प्राप्तवान् । अप्सु समुद्रे तृतीयं जज्ञे वडवानलरूपेण तृतीयवारमुत्पन्नः । अजस्रं त्रिष्वपि जन्मसु नृमणा नृषु मनो यस्य यजमानेधनुग्रहबुद्धियुक्तः एनमीदृशमग्निमिन्धानः पुरोडाशादिना दीपयन् स्वाधीः स्वायत्तचित्तो यजमानो जरते जीर्यति जरापर्यन्तं परिचरतीत्यर्थः ॥१८॥

विद्मा तेऽअग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥११॥

हे अग्ने यानि पूर्वस्मिन्मन्त्रे दिवस्परीत्यादिना त्रेधा स्वरूपाण्युक्तानि आदित्याग्निवडवानलरूपाणि तानि त्रयाणि त्रिसंख्याकानि ते तव सम्बन्धीनि रूपाणि वयं विद्म जानीमः (10.) द्व्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः विदो लटो वेति [पा° ३.४.८३.] मसो मादेशः । यद्वा त्रेधा विभक्तानि त्रयाणि त्रीणि ते तव रूपाणि अग्निवायुसूर्याख्यानि वयं विद्म । किं च ते तव सम्बन्धीनि पुरुत्रा बहुषु प्रदेशेषु गार्हपत्याहवनीयान्वाहार्यपचनाग्नीध्रीयरूपेषु विभृता विहृतानि धाम धामानि स्थानानि अपि वयं विद्म विभृतेति विभक्तेराकारः धामेत्यत्र विभक्तिलोपः । किं च ते तव परममुत्कृष्टं गुह्या सप्तमीलोपः गुह्यायां यद्यवस्थितं गोप्यं यविष्ठ इत्यादि मन्त्रप्रसिद्धं नाम यदस्ति तदपि विद्म । किं च यत उत्सात् अब्रूपात्स्थानाद्यमाजगन्थ वैद्युतरूपेणागतोऽसि तमुत्समुत्स्यन्दनं जलरूपं स्थानं वयं विद्म । गमेर्लिट् ॥ ११ ॥

समुद्रे वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवोऽअग्नऽऊधन् ।
तृतीये वा रजसि तस्थिवाꣳसमपामुपस्थे महिषा अवर्धन् ॥ २० ॥

हे अग्ने नृषु मनो यस्यासौ नृमणाः प्रजापतिः समुद्रे वडवानलरूपेण तस्थिवांसं वर्तमानं वा त्वामीधे दीपयांचकार इन्धिभवतिभ्यां चेति [पा° १.२.६.] किन्वान्नलोपः । नृचक्षाः नृषु पठत्सु (11.) पुरुषेषु चष्टे महान्विस्पष्टं वक्तीति नृचक्षाः प्रजापतिः अप्सु वृष्टिरूपासु अन्तर्मध्ये विद्युद्रूपेण स्थितं त्वामीधे दीपितवान् । तथा दिवः द्युलोकस्य ऊधन् ऊर्ध्वस्थानीये तृतीये समुद्रवृष्ट्यपेक्षया तृतीयस्थानि रजसि रञ्जनात्मके तेजोमण्डले आदित्यात्मना तस्थिवांसं त्वां नृचक्षा एव ईधे । किं च महिषाः महान्तः प्राणा अपामुपस्थे उत्सङ्गे नाव्यानामपां मध्ये स्थितं त्वामवर्धन् अवर्धयन् छन्दस्युभयथेति [पा° ३.४.११७.] शप आर्धधातुकत्वाण्णिलोपः । प्राणा वै महिषा इति [६.७.४.५.] श्रुतिः ॥ २० ॥

अक्रन्ददग्नि स्तनन° - ॥ २१ ॥

व्याख्याता [६.] ॥ २१ ॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।

वसुः सूनुः सहसोऽप्सु राजा विभात्यग्रऽउषसामिधानः ॥ २२ ॥

एवंविधोऽग्निर्विभाति विशेषेण भासते कीदृशः श्रीणां गवाश्वादिसम्पदामुदारः अत्यर्थं दाता उदारो दातृन्कृतोरिति कोशः [मेदिनी॰ रान्तव॰ ११८.] । रयीणां धनानां धरुणो धारयिता मनीषाणां मनसा इषितानामभिलषितानां प्रार्पणः प्रकर्षेणार्पयिता । सोमगोपाः सोमं गोपायतीति यजमानकर्तृकसोमयागस्य रक्षिता । वसुः सर्वस्य निवासहेतुः वासयतीति वसुः यद्वा वसुः धनरूपः यथान्यानि शयनासनरथादिधनान्युपकुर्वन्ति तथायमपि तापपाकप्रकाशैर्जनानामुपकर्तातो वसुः । सहसः सूनुः बलस्य मन्थनवेगरूपस्य पुत्रः यतो मथ्यमानो जायतेऽत एवमुच्यते । अप्सु राजा जलेऽवस्थितो वरुणात्मना राजा यद्वा अप्सु वृष्टिरूपासु राजा विद्युद्रूपेण दीप्यमानः । उषसामग्रे प्रातःकाले इधानः आदित्यात्मना दीप्यमानः उषःकालेऽग्निहोत्रहोमायाग्रयः प्राङुच्यन्ते तदभिप्रायेणोच्यते प्रातर्दीप्यमान इति ॥ २२ ॥

विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसीऽअपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥ २३ ॥

सोऽग्निर्जायमानः उत्पद्यमानः सूर्यात्मना प्रकटीभवन् रोदसी द्यावापृथिव्यौ आ अपृणात् सर्वतस्तेजसा पूरयति । कीदृशः विश्वस्य केतुः प्राणिजातस्य विज्ञानभूतोऽन्यात्मना । भुवनस्य गर्भः भूतजातस्य गर्भवदन्तरवस्थितो वायुात्मना स हि प्राणभावेन भूतानामन्तः संचरति । किं च यः परायन् इन्दुरूपेण परा परतो गच्छन् वीडुं चित् वीडुशब्दो दृढार्थः चिदप्यर्थः दृढमपि अद्रिमदारयितव्यं मेघमभिनत् भिनत्ति विदारयति । यत् विभक्तिलोपः यमग्निं पञ्च जना अयजन्त यजन्ते विप्राद्याश्चत्वारो निषादश्चेति पञ्च यद्वा चत्वारो मरुत्विजो यजमानश्च ॥ २३ ॥

उशिक्पावकोऽअरतिः सुमेधा मर्त्येष्वग्निरमृतो निधायि ।
इयर्ति धूममरुषं भरिभ्रदुक्षुक्रेण शोचिषा द्यामिनक्षन् ॥ २४ ॥

योऽग्निर्मर्त्येषु मरणधर्मेषु मनुष्येषु निधायि निहितः दैवैरिति शेषः वक्ष्यं

छन्दस्यमाङ्योगेऽपीत्यडभावः [पा° ६. ४. ७५.] । स ऋषभरोषं चक्षुराद्युपद्रवरहितमरोचनं वा धूममुद्यिर्ति उद्गमयति व्यवहिताश्चेति [पा° १. ४. ८२.] उपसर्गक्रिययोर्व्यवधानम् इतो वाऽयमूर्ध्वꣳ रेतः सिञ्चति धूमा सामुत्रा वृष्टिर्भवतीति श्रुतेः । कीदृशोऽग्निः उशिक् उश्यते कामयते लोकैरित्युशिक् कान्तः वशेरौणादिक इक्प्रत्ययः । पावकः पावयिता पुनातीति । अरतिः प्रलमतिः पर्याप्तमतिः यद्वा दुष्टेष्वरतिः प्रीतिरहितः । सुमेधाः शोभना सेवकाभिप्रायधारणासमर्था मेधा बुद्धिर्यस्य शोभनो मेधो यज्ञो यस्येति वा । अमृतोऽमरणधर्मा । भरिभ्रत् बिभ्रत् जगद्धारयन् दाधर्तीत्यादिना [पा° ७. ४. ६५.] निपातः । शुक्रेण शोचिषा निर्मलेन तेजसा प्रभारूपेण द्यामाकाशमिनक्षन् व्याप्नुवन् नक्षत्रग्रहतारासस्बन्धितेजसा द्युलोकं व्याप्नुवन्नित्यर्थः इतः प्रदानाद्धि देवा उपजीवन्तीति श्रुतेः ॥ २४ ॥

दृशानो रुक्म उ° ॥ २५ ॥

व्याख्याता [१.] ॥ २५ ॥

यस्तेऽअग्न कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्योऽअच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ २६ ॥

भद्रा कल्याणकारिणी शोचिर्दीप्तिर्यस्य तत्सम्बोधने हे भद्रशोचे हे देव अग्ने अग्न प्रतिपदि यः पुमान् ते तव अपूपं पुरोडाशं घृतवन्तं घृतयुक्तमुपस्तरणाभिघारणोपेतं कृणवत् कृणोति करोति कृञ् करणे स्वादिः इतश्च लोपः परस्मैपदेष्विति [पा° ३. ४. १७.] तिप इकारलोपे लेटोऽडाटाविति [पा° ३. ४. १४.] अडागमे नोर्गुणे कृणवदिति रूपम् स आज्यस्योपस्तीर्य द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयतीत्येतत्कृत्यभिप्रायम् [१. ७. २. १०.] । हे यविष्ठ युवतम यद्वा मिश्रयितृतम तं यजमानं प्रतरमतिशयेन प्रकृष्टं प्रतरम् अमु च छन्दसीति [पा° ५. ४. १२.] अव्ययात्परात् घादमुप्रत्ययः प्रकृष्टतरम् वस्यः स्थानमुत्तमलोकं प्र नय प्रापय । अच्छाभिमुख्येन सुम्नं सुखं चाभि नय सर्वतः प्रापय कीदृशं सुम्नम् देवभक्तं देवैः भक्तं सेवितं देवयोग्यं सुखं प्रापयेत्यर्थः । वसति यत्र तद्वस्तु तृन्प्रत्ययः अतिशयेन वस्तृ वसीयः तुश्छन्दसीति [पा° ५. ३. ५९.] ईयसुन् तुरिष्टेमेयः-

स्विति [पा° ६.४.१५४.] तृचो लोपः छान्दसे ईलोपे वस्य इति सिध्यति स लोकमागच्छत्यशोकमक्षितं तस्मिन्वसति शाश्वतीः समा इति [बृहदारण्य° मा° ४.१५.] श्रुतेः । प्रकृत्यान्तःपादम्व्यपरेऽइति [पा° ६.१.११५.] वस्योऽअङ्हित्यत्र संध्यभावः ॥ २६ ॥

आ तं भज सौश्रवसेषूग्रऽउक्थऽउक्थऽआभज शस्यमाने ।
प्रियः सूर्ये प्रियोऽअग्ना भवात्युज्जातेन भिनदुज्जनित्वैः ॥ २७ ॥

शोभनं श्रवः कीर्तिः सुश्रवः सुश्रवसः सम्बन्धीनि कीर्तिहेतुभूतानि कर्माणि सौश्रवसानि तेषु यज्ञकर्मसु हे अग्ने त्वं तं यजमानमाभज सेवस्व निरन्तरं कर्मानुष्ठायिनं कुर्वित्यर्थः । उक्थे-उक्थे निष्केवल्यप्रगाथादिरूपे (12.) च शस्यमाने तत्तच्छस्त्रे सति तमाभज सर्वतः सेवस्व कर्मणि शस्त्रे च प्रेरयेत्यर्थः । एवं त्वया सेवितोऽयं यजमानः सूर्ये सूर्यस्य प्रियो भवाति भवतु लिङर्थे लेट् लेटोऽडाटौ [पा° ३.४.९४.] । अग्ना अग्नेश्च प्रियोऽस्तु ङसो डादेशः । तथा जातिनोत्पन्नेन पुत्रेण जनित्वैः जनिष्यमाणैश्च पौत्रादिभिरुज्जिनदत् जनिष्यते ते जनित्वाः तैः भविष्यदर्थे श्रीणादिक इत्वप्रत्ययः ॥ २७ ॥

त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ॥ २८ ॥

हे अग्ने यजमानास्त्वामनु वर्तमानाः त्वां सेवमानाः सन्तः द्यून् द्युशब्दो दिनवाची कालाधनोरिति [पा° २.३.५.] द्वितीया दिनेषु सर्वदा वार्याणि वरणीयानि प्रार्थ्यानि विश्वा विश्वानि सर्वाणि वसु वसूनि धनानि गोभूहिरण्यादीनि दधिरे धारयन्ति यथेष्टं धनं प्राप्नुवन्तीत्यर्थः । वसु अत्र सुब्लोपः । किं च त्वया सह स्थिताः त्वां भजन्तस्ते यजमाना द्रविणं यज्ञफलमिच्छमाना इच्छन्तः उशिजः मेधाविनो ज्ञानकर्मसमुच्चयकारिणः सन्तो गोमन्तं गावो रश्मयोऽत्र सन्तीति गोमान् तं रविमण्डलमध्यगं व्रजं व्रजत्यनेन सुकृतिन इति व्रजस्तं देवयानमार्गं

विवव्रुः विभिदुः रविमण्डले मार्गं कृतवन्त इत्यर्थः तदुक्तम् ते यज्ञ एवमेतद्विदुरित्युपक्रम्य देवलोकादादित्यमिति ॥ २८ ॥

अस्तोव्यग्निर्नराꣳ सुशेवो वैश्वानरऽऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥ २९ ॥

ऋषिभिः यज्ञमानऽर्त्विग्भिः अग्निरस्तावि स्तुतः कर्मणि चिण् । कीदृशोऽग्निः नरां नराणां सुशेवः शोभनं सुखयिता नुडागमाभावि गुणे च नरामिति ह्रस्वम् शोभनं शेवः सुखं यस्मात् । वैश्वानरः विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितः जठराग्निरूपेण । सोमं गोपायतीति सोमगोपाः सोमस्य रक्षिता । अद्वेषे पादौ लिङ्गोक्तदेवौ । यतोऽग्निः स्तुतः अतोऽद्वेषे द्वेषरहिते द्यावापृथिवी रोदसी वयं (13.) हुवेम आह्वयामः तदाश्रितकर्मार्थम् । हे देवा अग्न्यादयः अस्मे अस्मासु सुवीरं शोभनपुत्रयुतं रयिं धनं यूयं धत्त स्थापयत ॥ २९ ॥

III. समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ ३० ॥

अथ वनीवाहनम् ॥ का° [१६. ६. १५.] प्रागनः कृत्वोख्यस्योत्तरतः समिदाधानꣳ समिधाग्निमिति । उख्याग्नेरुत्तरदिशि प्रागीषं शकटं संस्थाप्य यजमान उख्येऽग्नौ वनीवाहने समिधमाधत्तऽइति सूत्रार्थः ॥ विहृपाक्षदृष्टाग्नेयी गायत्री व्याख्याताप्युच्यते [३. १.] । हे ऋत्विग्यजमानाः समिधा कृत्वाग्निं दुवस्यत परिचरत अतिथिमिनमग्निं (14.) बोधयत । अस्मिन्नग्नौ हव्या हवींषि आजुहोतन साकल्येन जुहुत ॥ ३० ॥

उद्दु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥ ३१ ॥

का° [१६. ६. १६.] सासन्दीकमुख्यस्योद्धरेति दक्षिणतोऽनसि करोति । समिदाधानानन्तरमुद्धरेति मन्त्रेणासन्दीसहितमुख्याग्निमूर्ध्वं कृत्वा दक्षिणे स्थितो यजमानः शकटे तं स्थापयतीति सूत्रार्थः ॥ तापसदृष्टाग्नेय्यनुष्टुप् । हे अग्ने विश्वे सर्वे देवाः प्राणरूपाः चित्तिभिः ज्वलनप्रवीणाभिर्धीवृत्तिभिः त्वा त्वामुद्धरन्तु ऊर्ध्वं धा-

रयन्तु भृज्ञः शप् ऊ पादपूरणः हे अग्ने स ऊह्यमाणस्त्वं नोऽस्माकं शिवः कल्याणकृद्भव । किम्भूतः सुप्रतीकः शोभनं प्रतीकं मुखं यस्य । विभा दीप्तिरेव वसु धनं यस्य सः ॥३१॥

प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिष्टम् ।
बृहद्भिर्भानुभिर्भासन्मा हिंऽसीस्तन्वा प्रजाः ॥३२॥

का° [१६.६.१८.] अनड्वाहौ युक्ता प्रेदग्ऽइति प्राङ् यात्वा यथार्थम् । शकटे तूष्णीं वृषौ संयोज्य प्रेदिति मन्त्रेण प्राचीं गत्वा यथार्थं प्रयोजनवन्तं देशं गच्छेदित्यर्थः ॥ अग्निर्देवत्यानुष्टुप् । हे अग्ने शिवेभिरर्चिभिः शान्ताभिर्ज्वालाभिर्ज्योतिष्मान्प्रकाशयुक्तस्त्वं प्रयाहि गच्छ इत्पादपूरणः । किं च बृहद्भिर्भानुभिः प्रौढैः रश्मिभिः भासन्भासयन् जगदवभासयन् तन्वा स्वकीयेन दाहकेन शरीरेण प्रजाः पुत्रादिका मा हिंसीः मा नाशय ॥३२॥

अक्रन्ददग्नि स्तन° ॥३३॥

का° [१६.६.२०.] अन्ने खर्जत्यक्रन्ददग्निरिति जपति । अन्ने शब्दं कुर्वति जपेत् ॥ व्याख्याता [६.] ॥३३॥

प्र-प्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्योऽअतिथिः शिवो नः ॥३४॥

का° [१६.६.२१.] वासेऽवरुरत्युद्धतावोक्षितऽउत्तरतः समिदाधानं प्र-प्रेति । वासि स्थितौ क्रियमाणे उत्तरदिशि उद्धतावोक्षिते प्रदेशेऽग्निमवरुरत्युत्तारयति ततोऽग्नौ समिदाधानम् ॥ वसिष्ठदृष्टाग्नेयी त्रिष्टुप् । प्रसमुपोदः पादपूरणऽइति [पा° ८.१.६.] प्रोपसर्गस्य द्वित्वम् अयमग्निः बिभर्ति हवींषि भरतस्तस्य भरतस्य यजमानस्य शृण्वे शृणुते आह्वानमिति शेषः यजमानकृतमाह्वानं शृणोतीत्यर्थः पुरुषव्यत्ययः । यत् योऽग्निः सूर्यो न सूर्य-इव भाः (15.) भासतऽइति भाः सूर्यवद्भासमानः सन् बृहद्यथा तथा रोचते अत्यन्तं दीप्यते । योऽग्निः पृतनासु संग्रामेषु पूरुं राक्षसमभितस्थौ संमुखं तिष्ठति । दैव्यो देवसम्बन्धी अतिथिः नोऽस्माकं

शिवः मङ्गलरूपः सोऽग्निर्दीदाय दीप्यते दीङ् क्षये धातूनामनेकार्थत्वादत्र दीप्त्यर्थः लिटि रूपम् तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६. १. ७.] अभ्यासदीर्घः छन्दसि लुङ्लङ्लिटः इति [पा° ३. ४. ६.] वर्तमाने लिट् ॥३४॥

आपो॑ दे॒वीः प्रति॑गृभ्णीत॒ भस्मै॑तत्स्यो॒ने कृ॑णुधꣳ सुर॒भाऽउ॑ लो॒के ।
तस्मै॑ नमन्तां ज॒नयः॑ सुपत्नी॒र्मात॑व॒ पुत्रं॑ बिभृताप्स्वे॑नत् ॥३५॥

का° [१६. ६. २६.] पलाशपुटेनापो देवीरित्येकया । वनीवाहनानन्तरं तडागादिजलस्थानं गत्वा वटादिपत्रपुटेन सायं प्रातरुखायाः सकाशाद्धृतं यद्वस्मास्ति तदेकया ऋचा जले क्षिपेदिति सूत्रार्थः ॥ अब्देवत्या त्रिष्टुप् । हे आपो देवीः देव्यः दीप्यमानाः भस्म यूयं प्रतिगृभ्णीत स्वागतादिभिः प्रतिगृह्णीत । किं च स्योने सुखावहे सुरभौ पुष्पधूपादिभिः शोभनगन्धयुते लोके स्थाने एतद्भस्म कृणुधं कुरुधं कृञ् कृतौ स्वादिः उ पादपूरणः । किं च शोभनः पतिर्वरुणो यासां ताः सुपत्न्यः आपो वरुणस्य पत्नय आसन्निति श्रुत्यन्तरात् । जनयत्यग्निमुत्पादयन्ति वृद्ध्योत्पत्त्यादिद्वारेति जनयः सुपत्नीर्जनयो भवत्यस्तस्मै भस्मरूपायाग्नये नमन्तां प्रह्वा भवन्तु । किं च हे आपः एनत् भस्म अप्सु स्वात्मनि यूयं बिभृत धारयत माता पुत्रमिव यथा माता पुत्रं स्वात्मनि धारयति तद्वत्पालयत ॥३५॥

अ॒प्स्वग्ने॒ सधि॑ष्टव॒ सौष॑धीर॒नु रु॑ध्यसे । गर्भे॑ स॒न्जाय॑से॒ पुनः॑ ॥३६॥

का° [१६. ६. २७.] ततो द्वाभ्याम् । ततोऽनन्तरं पठिताभ्यां द्वाभ्यामप्स्वग्ने गर्भोऽसीत्येताभ्यामृग्भ्यां पत्रपुटेन द्वितीयवारमुख्याग्निभस्माप्सु प्रास्यति ॥ विराट्पदृष्टाग्नेयी गायत्री । पूर्वमन्त्रेण भस्मातिथिवेन संस्तुत्य द्वाभ्यामग्नेः सर्वव्यापकत्वं वदन्भस्माभ्यवहरणमपकुर्ते । हे अग्ने अप्सु जलेषु तव सधिः स्थानं स त्वमोषधीः यवाद्या अनु रुध्यसे ओषधिपरिणाममनु विपरिणमसे सोऽचि लोपे चेत्पादपूरणमिति [पा° ६. १. १३४.] स इत्यस्य विसर्गलोपे संधिः यद्वा ओषधीः स्वीकरोषि जठराग्निरूपेण । किं च गर्भे अरण्योर्मध्ये स्थितः सन्पुनः-पुनर्जायसे ॥३६॥

गर्भो॑ऽअ॒स्योष॑धीनां॒ गर्भो॒ वन॒स्पती॑नाम् ।
गर्भो॒ विश्व॑स्य भू॒तस्याग्ने॒ गर्भो॑ऽअ॒पामसि ॥३७॥

तिस्रोऽनुष्टुभोऽग्निदेवत्याः । हे अग्ने त्वमोषधीनां गर्भोऽसि भेषजद्रव्यैरोषधिविशेषैरुत्पद्यमानत्वात् हे अग्ने त्वं वनस्पतीनां तद्रूपाणां गर्भोऽसि अरणिभ्यो जायमानत्वात् विश्वस्य भूतस्य सर्वस्य प्राणिजातस्य गर्भोऽसि जठराग्निरूपेण विद्यमानत्वात् अपां गर्भोऽसि वाडवविद्युतादिरूपत्वात् ॥३७॥

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने ।
सꣳसृज्य मातृभिर्द्युतिष्मान्पुनरासदः ॥३८॥

का० [१६.६.२१.] अनामिकया प्रास्तादादत्ते प्रसद्येति । अप्सु क्षिप्ताद्भस्मनः सकाशादनामिकया भस्म गृह्णाति प्रसद्येति चतुर्ऋग्भिः ॥ हे अग्ने त्वं भस्मना कृत्वा योनिं कारणभूतां पृथिवीं योनिभूता अपश्च प्रसह्य प्राप्य मातृभिरद्भिः संसृज्यैकीभूय द्युतिष्मान् तेजस्वी सम्पन्नः सन् पुनरासदः स्वस्थानमुखामासीद् ॥३८॥

पुनरासद्य सदनमपश्च पृथिवीमग्ने ।
शेषे मातुर्यथोपस्येऽन्तरस्याꣳ शिवतमः ॥३९॥

हे अग्ने अपश्च पृथिवीं च सदनमासद्य जलभूमिरूपं स्थानं प्राप्य पुनरपि अस्यामुखायामन्तर्मध्ये त्वं शेषे स्वपिषि मातुरुपस्थे उत्सङ्गे यथा शिशुः शेते किम्भूतस्त्वं शिवतमः कल्याणतमः ॥३९॥

पुनर्ऊर्जा निवꣳ ॥४०॥ सह रय्या निवꣳ ॥४१॥

द्वे व्याख्याते [९.] ॥४०॥ [१०.] ॥४१॥

बोधा मेऽस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वोऽअनु त्वो गृणाति वन्दारुस्ते तन्वं वन्देऽअग्ने ॥४२॥

का० [१६.६.३०.] प्रास्योखायामुपतिष्ठते बोधा मऽइति (16.) । तडागादागत्यानामिकया गृहीतं भस्म तूष्णीमुखायां प्रास्य बोधा मऽइति (17.) ध्रुवेनोख्याग्निमुपतिष्ठते ॥ दीर्घतमोदृष्टाग्नेयी त्रिष्टुप् । स्वधान्नमस्यास्तीति स्वधावान् तत्सम्बोधने स्वधावः मतुवसो रुः (18.) सम्बुद्धौ ह्रस्वः सीति [पा० ८.३.१.] रुवम् हे अन्नवन् हे यविष्ठ युवतम अग्ने मे मम वचसो बोध बुध्यस्व अभिप्रायमिति शे-

षः यद्वा कर्मणि षष्ठी मद्वचनं ज्ञानीहीत्यर्थः । किम्भूतस्य वचसः मंहिष्ठस्य भूयिष्ठस्य अतिशयेन बहु मंहिष्ठं तस्य । तथा प्रभृतस्य प्रकृतस्य श्रोत्रपथं प्रापितस्य आदरोक्तस्येत्यर्थः । किं च त्वशब्द एकशब्दार्थः सर्वादिः पीयतिराक्रोशतिकर्मा हे अग्ने त्वः एकः पुरुषः पीयति आक्रोशति निन्दति त्वः एकः त्वामनुगृणाति त्वां स्तौति कश्चित्स्तौति कश्चिन्निन्दतीति लोकस्वभावः । एवं सति हे अग्ने अहं तु ते तव तन्वं तनूं शरीरं वन्दे स्तौमि नमामि च वदि अभिवादनस्तुत्योः । कीदृशोऽहम् वन्दारुः वन्दनशीलः शृवन्द्योरारुरिति [पा° ३.२.१७३.] आरुप्रत्ययः शीलार्थः ॥ ४२ ॥

a. स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद्द्वेषाꣳसि ॥

b. विश्वकर्मणे स्वाहा ॥ ४३ ॥

सोमाकृतिदृष्टाग्नेयी यजुरुत्ता गायत्री । विश्वकर्मणे स्वाहेति यजुः । हे वसुपते धनपते हे वसुदावन् वसु ददातीति वसुदावा आतो मनिन्निति [पा° ३.२.७४.] क्वनिप् तत्सम्बुद्धौ हे वसुदावन् धनस्य दातः स त्वं बोधि अस्मदभिप्रायं बुध्यस्व बुध्यतेः शपि लुप्ते झकलभ्यो हेर्धिरिति [पा° ६.४.१०१.] धिः गुणाभ्यलोपौ छान्दसौ । कीदृशस्त्वं सूरिः विद्वान् मघवा धनवान् मघं धनमस्यास्तीति। संतुष्टः सन्द्वेषांसि दौर्भाग्यानि अस्मद्युयोधि अस्मत्तः पृथक्कुरु । का° [१६.७.१.] प्रायश्चित्तꣳ समिधोऽपकृत्याज्यं विश्वकर्मणऽइति जुहोति । स्रुवस्थानीयया समिधा घृतमादायोल्वेऽग्नौ जुहोति तत्कर्मणः प्रायश्चित्तिरिति संज्ञेति सूत्रार्थः ॥ यजुः । जगत्सृष्टिस्थित्यादिकर्मकर्त्रे तुभ्यं स्वाहा सुकृतमस्तु ॥ ४३ ॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ ४४ ॥

का° [१६.७.२.] उत्थायाद्धाति समिधं पुनस्त्वेति । घृतहोमानन्तरमुत्थाय तामेव समिधमुल्वेऽग्नावाद्धाति ॥ आग्नेयी त्रिष्टुप् आद्यपादश्चतुर्दशाक्षरस्तृतीयो दशकस्तेन बाधिका । हे अग्ने आदित्याः रुद्राः वसवश्च त्वा त्वां पुनः समिन्धतामुपशान्तं दीपयन्तु । हे वसुनीथ वसु धनं तन्निमित्ता नीथा स्तुतिर्यस्य यद्वा वसूनि

नयतीति वसुनीथः तत्सम्बुद्धौ हे धननेतः ब्रह्माणः ब्राह्मणा (19.) ऋत्विग्यज-मानाः यज्ञैः कृत्वा त्वां पुनः समिन्धतां त्वं च तन्वं स्वशरीरं घृतेनास्मद्दत्तेन वर्ध-यस्व त्वयि वृद्धे सति यजमानस्य कामाः सत्याः सन्तु ॥४४॥

IV. अपेत॑ वीत॒ वि च॑ सर्पतातो॒ यऽ॒त्र स्थ पु॒राणा॒ ये च॒ नू॒तना॑ः ।
अद॑ाग्नमो॒ऽवसा॑नं पृथि॒व्या अक्रं॑न्नि॒मं पि॒तरो॑ लो॒कम॑स्मै ॥४५॥

अथ गार्हपत्यचयनमुच्यते ॥ ॥ का॰ [१७.१.३.] पलाशशाखया गार्हपत्यं व्यु-दूह्त्यपेत वीतेति पङ्क्तिः प्रतिदिशं पुरस्तात्प्रथमम्। अत्र भाविन्यावृत्त्या शालाद्वार्यो गार्हपत्यशब्देनोच्यते तदर्था चितिश्चितेः स्थानमपि गार्हपत्य एव । पलाशशा-खया गार्हपत्यचितेः स्थानं व्युदूह्यति ऊह्यिरत्र प्रेरणे तत्र पतितं तृणादिकं स्था-नाद्बहिः क्षिपतीत्यर्थः अपेत वीति ऋचः पङ्क्तिः पादैः प्रतिदिशमादौ प्राच्यामपेत वीति यऽत्र स्थेति दक्षिणे अदादिति पश्चादक्रन्नित्युत्तरे इति सूत्रार्थः ॥ लिङ्गोक्त-बर्हिर्देवत्या त्रिष्टुप् अर्धर्चेन तत्स्थानसर्पिणा (20.) उच्यन्ते पादेन यमः पादेन पितरः । यमस्य सर्वभूम्यधिपतित्वात्तद्भृत्याः सर्वत्र चरन्ति तान्प्रत्युच्यते । हे यम-भृत्याः ये पुराणाः चिरंतना ये च नूतनाः इदानींतना यूयमत्र स्थाने स्थ भवथ ते सर्वे यूयमतः स्थानादपेत अपगच्छत वीत विगच्छत अतिदूरं गच्छत विसर्पत च अतः स्थानादपेत्य संघातं विहाय विविधं गच्छत । कस्माद्वयमपसर्पामित्यत आह अवस्यति स्थापयत्यस्मिन्निति अवसानं पृथिव्या अवसानं स्थानमिदं यमो देवो ऽस्मै यजमानायादात् दत्तवान् । पितरश्चेमं लोकं स्थानमस्मै यजमानायाक्रन् कृ-तवन्तः करोतेः शपि लुपि लङि द्रूपम् यमेन पितृभिश्च एतच्चयनस्थानस्य यजमा-नाय दत्तत्वाद्यूयमपसर्पतेत्यर्थः ॥४५॥

a. संज्ञान॑मसि । b. कामधर॑णम् । c. मयि॑ ते कामधर॑णं भूयात् ।
d. अग्नेर्भस्मा॑स्यग्नेः पुरी॑षमसि । e. चित॑ स्थ परि॒चित॑ ऊर्ध्व॒चित॑ः श्रय-धम् ॥४६॥

का॰ [१७.१.४.] उदीचीः शाखामुदस्योषान्निवपति संज्ञानमिति । यया व्युदू-

कृतं तां शाखामुदक् क्षिप्त्वा गार्हपत्यचितिस्थाने क्षारमूदो निदधाति ॥ ऊषदेवत्यं यजुः हे ऊषस्वरूप त्वं संज्ञानमसि पशूनां सम्यक् ज्ञानसाधनमसि पशवो हि ऊषदेशं घ्रात्वा लिक्षन्ति । तथा कामधरणम् कामान्मनोरथान्धरति सम्पादयतीति कामधरणं यज्ञद्वारा कामसम्पादकत्वात् । अतस्ते तव कामधरणं कामसम्पादनसामर्थ्यं मयि भूयात् अस्तु । यद्वा श्रुत्यनुसारेण व्याख्यानं ते तव कामधरणं पशवः मयि भूयात् भूयासुः यतस्त्वं कामधरणं पशुरूपं संज्ञानं सम्यक् ज्ञापकमसि उल्वसम्भवात् पशवो वाऽऊषाः पशवः कामधरणं मयि ते पशवो (21.) भूयासुरिति [७.१.१.८.] श्रुतेः उल्वाभिप्रायमेकवचनमुल्वस्योषोत्पन्नत्वात् ॥ का° [१७.१.६.] सिकताश्चाग्नेर्भस्मेत्यूषवत् । ऊषवत्सिकता निवपति ॥ सिकतादेवत्यं यजुः हे सिकतास्वरूप त्वमग्नेर्भस्म भासकमसि सिकतास्थोऽग्निरत्युग्रो भवति । अग्नेश्च पुरीषं पूरणमसि पूरयतीति पुरीषं पिपर्तेरीषकप्रत्यये ऋणादिके उदोष्ठ्यपूर्वस्येति [पा° ७.१.१०२.] उदादेशः । भस्माभिप्रायमेकवचनम् । न वाऽग्निः स्वं भस्मातिदहति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता इति च [७.१.१.१:१०.] श्रुतिः ॥ का° [१७.१.७.] परिश्रिद्भिः परिश्रयति पूर्ववदेकविंशत्या चित स्थेति । एकविंशतिपरिश्रिद्भिर्गार्हपत्यस्थानं वेष्टयति पूर्ववदिति प्रदक्षिणमूर्ध्वास्ताः खननीया इति ॥ परिश्रिद्देवत्यं यजुः हे परिश्रितः शर्करा यूयं चितः स्थ चीयन्ते भूमौ प्रक्षिप्यन्ते इति चितः भूमौ क्षिप्ता भवथ परिचितः स्थ परितः सर्वतः स्थापिता भवथ ऊर्ध्वं चीयध्वमिति ऊर्ध्वचितः ऊर्ध्वं स्थापिताः सत्यो यूयं श्रयध्वमिदं गार्हपत्यायतनं सेवध्वम् ॥४६॥

अयꣳ सोऽअग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ॥४७॥

का° [१७.१.८.] मध्येऽर्धबृहतीश्चतस्रो दक्षिणोत्तराः प्राचीरुपदधाति दक्षिणत उदङ्मुखꣳ सोऽअग्निरिति प्रत्यृचम् । ततोऽर्धर्युर्मण्डलाद्दक्षिणे उदङ्मुख उपविश्य मध्ये चतस्रोऽर्धबृहतीसंज्ञा इष्टकाः प्राचीः प्राग्लक्षणा दक्षिणोत्तरपङ्क्त्योत्तरमारभ्योपदधाति अभ्यात्मं चयनमित्युक्तेः । ऋक्चतुष्केणैकैकाम् । ह्रस्वदीर्घास्तदर्धाया-

माः पञ्चा लोकद्वयव्यापिन्य इष्टका अर्धबृहत्य उच्यन्तऽइति सूत्रार्थः ॥ पञ्च ऋचो विश्वामित्रदृष्टा आग्नेय्यस्त्रिष्टुभश्चतुर्थ्यनुष्टुप् । इष्टकोपधानं कुर्वन्नभिनयेन दर्शयति अयं गार्हपत्यः सः अग्निरिष्टकाभिश्चीयतऽइति शेषः । यस्मिन्नग्नौ चिते सति इन्द्रः सुतमभिषुतं सोमं जठरे स्वोदरे दधे धारयति वर्तमाने लिट् । किम्भूत इन्द्रः वावशानः वष्टीति वावशानः बहुलं छन्दसीति [पा° २. ४. ७६.] शपः श्लौ सति द्वित्वेऽभ्यासदीर्घे शानचि रूपम् कामयमानः । कीदृशं सोमं सहस्रियं सहस्रार्हम् । वाजमन्नं वहन्तीं तृप्तिकरमित्यर्थः । अत्यं न नकारः सम्प्रत्यर्थः (22.) भक्षणादेव मदकरम् । सप्तिं सरणं तृप्तिकरम् । अग्नौ चिते न केवलमिन्द्र एव सोमं जठरे धत्ते किं तु हे जातवेदः जातं वेदो धनं यस्मात् हे अग्ने त्वमपि ससवान् हवींषि सम्भजमानः सन् ऋत्विग्यजमानैः स्तूयसे षण सम्भक्तौ क्वसुप्रत्ययः । उत्तरार्धस्यायं वार्थः हे जातवेदः सप्तिं सरणं गमनकुशलमत्यं न अश्वमिव सहस्रियं सहस्रसंख्याकेन धनेन संमितं वाजमन्नं ससवान् दत्तवान् सन् यजमानैस्त्वं स्तूयसे सहस्रेण संमितौ घ इति [पा° ४. ४. १३५.] घप्रत्ययः षणु दाने क्वसुः ससवान् ॥४७॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥४८॥

हे आयजत्र (23.) मर्यादया यजनीय हे अग्ने ते तव यत् दिवि द्युलोके वर्चो दीप्तिरर्करूपं वर्तति यच्च पृथिव्यामग्निरूपं यच्च ओषधीष्वन्तः स्थितं यच्चाप्सु जलेषु अन्तः स्थितं यच्च वर्चसा ऊरु विस्तीर्णमन्तरिक्षमाततन्थ आतनोषि विस्तारयसि बभूथाततन्थेति [पा° ७. २. ६४.] इडभावः । स भानुः दीप्तिः त्वेषः त्विषयति प्रकाशयति सकलं विश्वमिति त्वेषः त्विष दीप्तौ पचाद्यचि अर्णवः अर्णांसि उदकानि सन्ति यत्रेत्यर्थः अर्णसो वः सलोपश्च यद्वा अरणवान्गमनवान्प्रसरणशीलः । नृचक्षाः नॄन् चष्टऽइति नृणां शुभाशुभकर्मद्रष्टा । ईदृशो यस्ते भानुस्तमेवेष्टकारूपमुपदधामीति शेषः । अनेन त्रिस्थानोऽग्निः स्तुतः ॥४८॥

अग्ने दिवोऽअर्णमछाजिगास्यछा देवाँ२॥ऽऊचिषे धिषण्या ये ।
या रोचने परस्तात्सूर्यस्य याश्चावस्ताडुपतिष्ठन्तऽआपः ॥४९॥

हे अग्ने दिवो द्युलोकस्य सम्बन्धि अर्णमुदकं त्वमहर्निगासि आभिमुख्येन गह्यसि गा स्तुतिगत्योर्ह्वादिः अभ्यासेत्वं छान्दसम् अह्नभिरासुमिति शाकपूणिः [निरु० ५.३१.] निपातस्य चेति [पा० ६.३.१३६.] अह्नित्यस्य संहितायां दीर्घः आपो वा ऽअस्य दिवोऽर्णस्ता एष धूमेनाह्नितीति [७.१.१.२४.] श्रुतिः । किं च ये देवा धिष्ण्या ऊचिषे ऊचिरे उच्यन्ते धियो बुद्धीरिन्द्रियाणि इच्छन्ति प्रेरयन्ति धिष्ण्याः प्राणरूपा देवास्तान्देवांश्च त्वमहर्निगासि अभिगह्यसि । ऊचिषे वृञः कर्मणि लिट् पुरुषवचनयोर्व्यत्ययः । प्राणा वै देवा धिष्ण्यास्ते हि सर्वा धिय इच्छन्तीति [७.१.१.२४.] श्रुतिः । किं च रोचने दीप्तिरूपे मण्डले वर्तमानस्य सूर्यस्य परस्ताडुपरिष्टाच्चा आप उपतिष्ठन्ते अवस्ताद्भवेरधस्ताच्च या आप उपतिष्ठन्ते ता अपश्च (24.) त्वमभिनिगासीत्यन्वयः त्वमेवैते रूपैः परिणमसीति भावः ॥४९॥

पुरीष्यासोऽअग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥५०॥

अनुष्टुप् । बहुवचनमिष्टकापेक्षम् अग्नयः एते इष्टकारूपा यज्ञमस्मदीयमिमं यागं जुषन्तां सेवन्ताम् अनमीवा नास्ति अमीवा व्याधिरशनायाबुभुक्षारूपो यासिस्ता अनमीवा क्षुधातृष्णानिवर्तिकाः महीः महतीः बहुला इषः अन्नभक्षीश्चाग्नयो जुषन्ताम् । कीदृशा अग्नयः पुरीष्यासः पुरीषेभ्यः पशुभ्यो हिताः पुरीष्याः आज्ञसेरसुक् । तथा प्रवणेभिः प्रवणैः प्रकर्षेण वनन्ति सम्भजन्ति विषयानिति प्रवणानि मनांसि तैः सजोषसः समानप्रीतयः मनसा प्रीतियुक्ता इत्यर्थः अन्येषामपि दृश्यतऽइति [पा० ६.३.१३७.] संहितायां प्रावणेति दीर्घः बहुलं छन्दसीत्येत्वम् (25.) । तथा अद्रुहः न द्रुह्यन्तीत्यद्रुहः अहिंसितारः परस्परं प्रीतियुताः ॥५०॥

इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५१॥

का० [१७.१.११.] इडामग्नऽइति पश्चिमे प्रतिमन्त्रमुत्तरतः । इडामग्नऽइति ऋग्द्वयेन प्रतिमन्त्रं पश्चिमे द्वे पादमात्र्यौ पद्ये तिरश्च्यौ उदग्लक्षणे उपदध्यात् उत्तरतोऽवस्थितो दक्षिणामुखः इडामिति दक्षिणाम् अयं तऽइत्युत्तरामिति सूत्रार्थः ॥

द्वे आग्नेय्यौ त्रिष्टुबनुष्टुभौ । हे अग्ने हवमानाय यजमानाय इडामन्नं साध साधय सम्पादय छन्दस्युभयथेति [पा° ३.४.११७.] शप आर्धधातुकष्टिलोपः ह्वयति आह्वयति देवान्जुहोति वा हवमानः तस्मै । यत्तु श्रुत्योक्तं पशवो वाऽइडेति [७.१.१.२७.] तद्बलीवर्दैरन्नस्योत्पाद्यमानत्वात् किम्भूतामिडां पुरुदंसं दंस इति कर्मनामसु [निघ° २.१.] पठितं पुद्गणि बह्वनि दंसांसि कर्माणि यया सा पुरुदंसाः तां पुरुदंससमिति प्राप्ते टिलोपश्छान्दसः । बह्वकर्मसाधनभूतमन्नं देहीत्यर्थः । तथा शश्वत्तममत्यन्तमविच्छेदेन वर्तमानमनपायिनं गोः सनिं धेनुसम्बन्धि दानं पयोदधिघृतादिकं सर्वदा देहीत्यर्थः । किं च नोऽस्माकं यजमानानां सूनुः पुत्रः स्यादस्तु । कीदृशः सूनुः तनयः औरसः पुत्रस्य सूनुशब्देनोक्तत्वादत्तपुत्रादिव्यावृत्त्यै तनयशब्दः यद्वा तनोत्यग्निहोत्रादिकर्माणीति तनयः । तथा विज्ञावा विविधं जायते पुत्रादिद्वारेति विज्ञावा प्रजावान् विड्वनोरनुनासिकस्यादिति [पा° ६.४.४१.] धातोराकारः । हे अग्ने ते तव सान्नगोपुत्रदानविषया सुमतिः शोभना बुद्धिरनुग्रहेणास्मे अस्मासु भूतु भवतु यजमानेभ्यस्त्वयान्नादि देयमिति भावः व्यत्ययेन शपो लुक् अस्मे विभक्तेः शेआदेशे त्यदाद्यत्वम् ॥५१॥

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तं जानन्नग्नऽआरोहाथा नो वर्धया रयिम् ॥५२॥

व्याख्याता [३.१४.] ॥५२॥

a. चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद ।
b. परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५३॥

का° [१७.१.१२.] चिदसीति पूर्वे दक्षिणतः प्रतिमन्त्रम् । तदुत्तरतोऽपरमार्गेण दक्षिणां गत्वा चिदसीति प्रतिमन्त्रं पूर्वे तिरश्चौ उदग्लक्षणे दक्षिणे स्थित उदङ्मुख उपदधाति चिदसीत्युत्तरां परिचिदसीति दक्षिणाम् ॥ इष्टकादेवत्ये द्वे यजुषी । चीयतऽइति चित् । हे इष्टके त्वं चिता स्थापितासि यद्वा चिनोति भोगान्सम्पादयतीति चित् त्वं भोगसम्पादिकासि । तया प्रसिद्धया देवतया वायूपया सादिता सती अङ्गिरस्वत्प्राणवत् प्राणा यथा सर्वाङ्गेषु स्थितास्तथा ध्रुवा स्थिरा

सती त्वं सीद निविशस्व तया देवतयेति वाग्वै सा देवताङ्गिरस्वदिति प्राणो वाऽअङ्गिरा इति श्रुतिः ॥ द्वितीयामुपदधाति । परिचित् परितः सर्वतः चीयते परितो भोगांश्चिनोतीति वा त्वं परिचिदसि । तया देवतयेति व्याख्यातम् ॥५३॥

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् ॥५४॥

का° [१७.१.१७.] तिसृषु लोकम्पृणासु मन्त्रो दशसु च द्वयोर्वा दशस्वेकस्यां च । आदौ तिसृषु लोकम्पृणेष्टकासु तूष्णीमुपदधातासु लोकं पृणेत्यभिमन्त्रणम् ततो दशसु मन्त्रः यद्वादौ द्वयोर्लोकम्पृणयोर्मन्त्रस्ततो दशसु तत एकस्याम् एवमेकविंशतीष्टका गार्हपत्ये स्युरिति सूत्रार्थः ॥ लोकम्पृणादेवत्यानुष्टुप् । हे लोकम्पृणेष्टके त्वं लोकं पृण गार्हपत्यचयनदेशे पूर्वेष्टकाभिरनाक्रान्तं स्थानं पूरय । तथा छिद्रं पृण किंचिदपि छिद्रं यथा न दृश्यते तथा संश्लिष्टा भवेत्यर्थः पृण तृप्तौ तुदादिः । अथो अपि च ध्रुवा दृढा सती त्वं सीद तिष्ठ । किं च इन्द्राग्नी बृहस्पतिश्चैते देवा अस्मिन्योनौ स्थाने त्वा त्वामसीषदन् सादितवन्तः सदेश्चङ् न हि मानुषोऽर्धर्युस्तां सादयितुं शक्य इति भावः ॥५४॥

ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥५५॥

का° [१६.७.१४.] नित्ये सादनसूददोहसाऽऽधानाद्उत्तरे तया देवतया ता अस्येति । तया देवतयेति सादनम् ता अस्येति सूददोहसाधिवदनम् एते नित्ये सर्वत्रेति सूत्रार्थः ॥ इन्द्रपुत्रप्रियमेधदृष्टाद्देवत्यानुष्टुप् । दिवो द्युलोकसम्बन्धिनो दिवश्च्युता वा सूददोहसः सूदाश्च दोहसश्च ते सूददोहसः सूदेन जलेन सहिता दोहसोऽन्नानि अन्नयुक्ता आपः ताः प्रसिद्धा अस्य विशो यज्ञस्य सम्बन्धिनं सोममाश्रीणन्ति सम्यग्मिश्रयन्ति पक्वं कुर्वन्ति वा श्री पाके क्र्यादिः आपो वै सूददोऽन्नं दोहः [८.७.३.२१.] यज्ञो वै विश इति च [८.७.३.२१.] श्रुतिः । कीदृशाः सूददोहसः पृश्नयः नानाविधाः यद्वा अन्नं वै पृश्नीति [८.७.३.२१.] श्रुतेरन्नरूपाः अत्रागत्य व्रीह्यादिधान्यनिष्पादका इत्यर्थः । कदा श्रीणन्ति देवानां जन्मन्

जन्मनि संवत्सरे संवत्सरो वै देवानां जन्मेति [८.७.३.२१.] श्रुतेः । संवत्सरे-संवत्सरे सोमयागस्तदभिप्रायमेतत् । सवनानि वै त्रीणि रोचनानीति [८.७.३.२१.] श्रुतिः (26.) । यज्ञपरिणामभूता अन्नोत्पादिका आपो दिवः सकाशादस्मिन् लोके पतित्वौषधिवनस्पत्यन्नभूताः सत्यः सोमस्योपस्कुर्वन्तीति भावः ॥५५॥

इन्द्रं विश्वा अवीवृधत्समुद्रव्यचसं गिरः ।
रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥५६॥

का° [१७.१.१८.] चात्वालदेशात्पुरीषं निवपतीन्द्रं विश्वा इति । चात्वालस्थानान्मृदमानीय गार्हपत्यचितेरुपरि क्षिपति ॥ इन्द्रदेवत्या मधुछन्दःसुतजेतृदृष्टानुष्टुप् । विश्वाः सर्वा गिरः स्तुतयः ऋग्यजुःसामरूपा इन्द्रमवीवृधन् वर्धयन्ति । कीदृशमिन्द्रं समुद्रव्यचसं समुद्रवद्व्यचो व्याप्तिर्यस्य तं समुद्रवद्व्यापकं विविधाञ्चनं नानागतिमित्यर्थः अक्षोभ्यगतिं वा । रथीनां रथयुक्तानां सर्वेषां मध्ये रथीतममत्यन्तं रथयुतं रथयुङ्मे लब्धातिशयमित्यर्थः ईद्रथिन इति [पा° ८.२.१७. वा° १.] घे परे रथिन ईदादेशः । तथा वाजानामन्नानां पतिं स्वामिनं सत्पतिं सधर्मवर्तिनां च प्रतिपालकम् ॥५६॥

समितꣳ संकल्पेथाꣳ सम्प्रियौ रोचिष्णू सुमनस्यमानौ ।
इषमूर्जमभि संवसानौ ॥५७॥

का° [१७.१.११.] समंविलां कृत्वोख्यं निवपति समितमिति । समं विलं यस्याः सा समंविला विभक्त्यलुक् छान्दसः गार्हपत्यचितिं मृत्पूरणेन परिश्रित्समां कृत्वा तन्मध्ये नीचैरुख्याग्निं स्थापयति चतुर्मन्त्रैः ॥ चतस्रो ह्यग्निदेवत्याः । समितम् उक्तिगेकाधिका अनियताक्षरपादत्वेऽप्यष्टाविंशत्यक्षरत्वात् । हे चित्योख्याग्नी युवां समितं संगच्छतम् इण् गतौ संगतौ भवतम् संकल्पेथां च एकसंकल्पौ भवतम् यद्वा संकल्पनं यज्ञनिष्पादनं कुरुतम् । कीदृशौ युवाम् सम्प्रियौ सम्प्रीणीतस्तौ इगुपधेति [पा° ३.१.१३५.] कः सम्यक् परस्परं प्रीतियुक्तौ । रोचिष्णू दीप्यमानौ अर्तिकृञ्जित्यादिना [पा° ३.२.१३६.] इष्णुच् । सुमनस्यमानौ शोभनं मनः कुरुतस्तौ सुमनस्येते सुमनस्येते तौ सुमनस्यमानौ सुब्धातु क्यङुक्ताच्छानच् परस्परं शोभनं

चित्तवन्तौ । इषमन्नमूर्जमुपसेचनं घृतादि चाभिसंवसानौ अभ्यवहरन्तौ भुञ्जानौ अभितः सम्यक् सम्पादयन्तौ वा वस्तेरर्थान्तरे वृत्तिः ॥५७॥

सं वां मनाꣳसि सं व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥५८॥

उपरिष्टाद्बृहती अष्टसप्तनवत्रयोदशाक्षरपादत्वादेकाधिका । हे पूर्वोक्तावग्नी वां युवयोर्मनांसि बहुवचनत्वान्मनोबुद्ध्यहंकारानहं समाकरं सर्वतः संगतान्करोमि करोतेर्लङ्युत्तमबहुवचने शपि अकरमिति रूपम् । तथा व्रता व्रतानि कर्माणि समाकरम् व्रतमिति [निघ० २.१.] कर्मनाम । तथा चित्तानि च मनोगतसंस्कारान्समाकरम् उकारः समुच्चयार्थः । एवं मनःकर्मसंस्कारैरेकीकृतैरेकीभूतमग्निं प्रार्थये हे पुरीष्य पशव्य हे अग्ने त्वं नोऽस्माकम् अधिपातीति अधिपाः पालको भव इषमन्नमूर्जं तदुपसेचनं दध्यादि च यजमानाय धेहि देहि ॥५८॥

अग्ने त्वं पुरीष्यो रयिमान्पुष्टिमाँ२॥ऽअसि ।
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥५९॥

उष्ण्यग्निर्देवत्योष्णिक् आर्ष्येकाधिका अनियताक्षरपादत्वात् हे अग्ने त्वं पुरीष्यः पशव्योऽसि रयिमान्धनवान् पुष्टिमान्पोषयुक्तश्चासि अतः सर्वाः दिशः शिवाः शान्ताः कृत्वा इहास्मिंश्चयने स्वं योनिं स्वकीयं स्थानमासदः प्राप्नुहि ॥५९॥

भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥६०॥

आर्षी पङ्क्तिः अनियताक्षरपादत्वात् द्व्यग्निर्देवत्या । पुनर्व्याख्यायते [५.३.] । हे जातवेदसौ अग्नी यज्ञमस्मदीयं कर्म युवां मा हिंसिष्टं मा विनाशयतम् यज्ञपतिं यजमानं च मा हिंसिष्टम् अद्यास्मिन्कर्मदिने नोऽस्मभ्यं शिवौ शान्तौ युवां भवतम् । किं च युवां नोऽस्मदर्थं समनसौ सचेतसौ अरेपसौ च भवतम् । मनसा सहितौ । समानचित्तौ । अन्यविषयं मनो हित्वास्मदनुग्रहाभिमुखत्वं समनस्त्वम् अस्मदनुग्रहेऽन्योन्यविप्रतिपत्तिराहित्यं सचेतस्त्वम् । अरेपसौ निष्पापौ अस्माकं

प्रामादिकापराधसत्त्वे कोपाभावो निष्पापत्वम् ईदृशावस्मभ्यं भवतामित्यर्थः ॥ ६० ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु ॥ ६१ ॥

का° [१७.१.२१.] सिकताभिः समंवित्तां कृत्वा मातेव पुत्रमिति शिक्याद्विमुच्याग्निवन्निधायासिञ्चति पक्वोमध्ये तूष्णीम् । शून्यामुखां सिकताभिः सम्पूर्य मातेवेति मन्त्रेण शिक्यात्पृथक्कृत्वाग्निवदिति स्थापिताग्नेरुत्तरेऽरत्निमात्रे गार्हपत्यचितेरुपर्येवोखां निधाय तन्मध्ये तूष्णीं दुग्धं सिञ्चेदिति सूत्रार्थः ॥ उखादेवत्या त्रिष्टुप् तृतीयो नवकः चतुर्थो द्वादशकः । पृथिवी भूरूपा मृन्मयी या उखा पुरीष्यं पशव्यमग्निं स्वे योनौ स्वकीयगर्भस्थाने अभाः अभार्षीत् धृतवती भृञो लुङि वङ्गुलं छन्दसीति [पा° ७.३.९७.] ईडागमाभावे सिचो विसर्गे तिपि लुप्ति रूपम् । माता पुत्रमिव यथा माता पुत्रमुत्सङ्गे बिभर्ति । प्रजापतिः कृतकृत्यां तामुखां विमुञ्चतु शिक्यपाशाद्विमुक्तां करोतु । कीदृशः प्रजापतिः विश्वैर्देवैर्ऋतुभिश्च संविदानः संवित्तेऽइति ऐकमत्यं गतः अस्मो मत्कर्मोखया कृतमिति संवादं कुर्वन् । विश्वकर्मा विश्वं सृष्टिरूपं कर्म यस्यासौ विश्वकर्मा ॥ ६१ ॥

V. असुन्वन्तमयजमानमिह स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तेऽइत्या नमो देवि निर्ऋति तुभ्यमस्तु ॥ ६२ ॥

का° [१७.१.२३.२.१.] निर्ऋतीः कृष्णास्तुषपक्वास्तिस्रोऽलक्षणाः पादमात्रीर्हविष्यशन्नहोमवद्देशे दक्षिणोत्तराः कृत्वा दक्षिणामुखोऽनुपस्पृशन्नसुन्वन्तमिति प्रत्यृचं पराचीः । ततोऽधर्युः राजसूये हविष्यशन्नहोमे यादृशो देशस्तादृशे स्वयंप्रदीर्णे इरिणे वा असुन्वन्तमिति प्रत्यृचं तिस्रो नैर्ऋतीसंज्ञा इष्टका दक्षिणोत्तराः कृत्वा ततस्ता अस्पृशन्नुपदधाति । कीदृशीः पाकेन कृष्णवर्णाः तुषैरेव पक्वाः लक्षणहीनाः पक्वाः पराचीः अनात्ममुखीः । स्वयं दक्षिणामुखः पूर्वमुत्तरां निधाय ततो दक्षिणे द्वेऽइति सूत्रार्थः ॥ तिस्रो निर्ऋतिदेवत्यास्त्रिष्टुभः । हे निर्ऋते असुन्वन्तं सोमयागमकुर्वाणम् अयजमानमन्यैर्हविर्यज्ञैर्यजनमकुर्वाणं च त्वमिह प्रतिगृह्य तं गृह्णाणेत्यर्थः । किं च स्तेनो गुप्तचोरः तस्करः प्रकटचोरः तयोरित्यां ग-

तिमन्विहि अनुगच्छ पृष्ठतो गत्वा तावपि गृह्णीत्यर्थः । सर्वथा सोमं सुन्वद्भ्यो हविर्यज्ञैश्च यजद्भ्योऽस्मदन्यमिच्छ न वस्मान्निच्छ । सा दुष्टशिक्षा (27.) ते तवेत्या गतिर्यया हे देवि निर्ऋते एवम्भूतायै तुभ्यं नमोऽस्तु ॥ ६२ ॥

नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाकेऽअधिरोहयैनम् ॥ ६३ ॥

निर्ऋतिः कृच्छ्रापत्तिः स्यादलक्ष्मीस्तु निर्ऋतिरित्यभिधानात्, [अमर० १. २. १३.] भूमिर्वा निर्ऋतिर्दिग्गभिमानिनी देवता वा अलक्ष्म्यां दिक्पतौ चापि निर्ऋतिर्निरुपद्रवे इति [हेम० नाना० ३. २७२.] कोशात् । तिग्मं तीक्ष्णं दुःसहं तेजो यस्याः सा तिग्मतेजाः तस्याः सम्बोधने हे तिग्मतेजः हे निर्ऋते ते तुभ्यं सु स्तुतरां नमोऽस्तु । अयस्मयमयोमयम् अयस्मयादीनि छन्दसीति [पा० १. ४. २०.] सत्वम् लोहपाशवद्दृढमेतं बन्धं जीववेन जन्ममृतिद्रूपमज्ञानं त्वं विचृत विच्छिन्द्धि नाशय चृती ग्रन्थे तुदादिः ब्वचोऽतस्तिङ इति [पा० ६. ३. १३५.] संहितायां दीर्घः । किं च यमेन अग्निना यम्या पृथिव्या च संविदाना ऐकमत्यं गता सती उत्तमे उत्कृष्टे नाके सर्वसुखोपेते दुःखमात्रहीने स्वर्गे एनं यजमानमधिरोहय स्थापय ॥ ६३ ॥

यस्यास्ते घोरऽआसन्जुहोम्येषां बन्धानामवसर्जनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥ ६४ ॥

हे घोरे विषमशीले क्रूररूपे निर्ऋतिदेवि यस्याः ते तव आसन् आस्ये मुखे अहं जुहोमि आकृतिवदिष्टकामुपदधामि । किमर्थम् एषां बन्धानां यजमानस्य स्वर्गाप्तिप्रतिबन्धकानां पापानामवसर्जनाय । किं च जनो जन्तुमात्रो यां त्वा त्वां भूमिरिति प्रमन्दते स्तौति शास्त्रानभिज्ञत्वात् मदिङ् स्वपने जाड्ये मदे मोदे स्तुतौ गताविति धातुः । त्वं तु निर्ऋतिः । अहं तु शास्त्रज्ञतया तादृशीं त्वा त्वां विश्वतः सर्वथापि निर्ऋतिमेव परिवेद सम्यग्जानामि । निर्ऋतिशब्दस्यायमर्थः सर्वदेवसाधारणादिवयजनान्निष्कृष्य (28.) स्वतन्त्रदेशे विदीर्णादौ ऋतिः प्राप्तिर्यस्याः सा निर्ऋतिरिति । इदं प्रकारद्वयं वेदेति विश्वत इत्युक्तम् ॥ ६४ ॥

a. यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।

तं ते विष्यामि पितुमद्धि प्रसूतः ॥

b. नमो भूत्यै येदं चकार ॥ ६५ ॥

का° [१७. २. ४.] शिक्यरुक्मपाशेएडासन्दीः परेणास्यति यं तꣳइति । शिक्यं रुक्मपाशं द्वे इएडे आसन्दीं च नैर्ऋतीष्टकातः पश्चात्क्षिपति ॥ यज्ञमानदेवत्या त्रिष्टुप् यज्ञमानं प्रत्युच्यते हे यज्ञमान निर्ऋतिर्देवी ते तव ग्रीवासु कण्ठावयवेषु यं पाशं शिक्यरूपमाबबन्ध आ समन्ताद्बद्धवती कीदृशं पाशमविचृत्यं चृती छेदने अछेद्यं दृढं तं ग्रीवस्थं ते तव पाशमनेन मन्त्रेणाहं विष्यामि विमुञ्चामि स्यतिरुपस्पृष्टो (29.) विमोचनार्थः । कस्मात्स्थानाद्विमुञ्चामि आयुषोऽग्रेमध्याद्गार्हपत्यचितिस्थानात् न सम्प्रति इदानीमेव पाशं दूरीकरोमीत्यर्थः नकारः सम्प्रत्यर्थः अग्निर्वाऽआयुस्तस्यैतन्मध्यं यच्चितो गार्हपत्यो भवत्यचित आहवनीय इति [७. २. १. १५.] श्रुतेरायुःशब्देनात्राग्निरुच्यते । अथ पाशविमोकानन्तरं प्रसूतः निर्ऋत्यानुज्ञातः सन् अग्निरूपमाश्रित्य हे यज्ञमान एतं पितुमन्नमद्धि भक्षय ॥ का° [१७. २. ४.] उदपात्रं निषिच्यान्तरात्मेष्टकमुत्तिष्ठन्ति नमो भूत्याऽइति । शिक्यादिनिरसनानन्तरमात्मनो नैर्ऋतीष्टकानां च मध्ये जलपूर्णं चमसं तूष्णीं निनीय ब्रह्मयज्ञमानाधर्यवो नम इति मन्त्रेणोत्तिष्ठन्ति नैर्ऋतीसमीपादिति सूत्रार्थः ॥ भूतिर्देवत्येकपदा विराट् । या देवी इदमग्निलक्षणं कर्म चकार कृतवती तस्मै भूत्यै श्रीरूपिण्यै देव्यै नमो नमस्कारोऽस्तु ॥ ६५ ॥

निवेशनः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः ।

देव-ईव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ ६६ ॥

का° [१७. २. ६.] अनपेक्षमेत्य शालाद्वार्योपस्थानं निवेशन इति । ब्रह्मयज्ञमानाधर्यवो नैर्ऋत्युपधानदेशात्पश्चादपश्यन्तः शालां गच्छन्ति अधर्युरित्य शालाद्वारि भवं गार्हपत्यचितिरूपमग्निमुपतिष्ठते ॥ विश्वावसुगन्धर्वदृष्टेन्द्रदेवत्या त्रिष्टुप् । अयमग्निः विश्वा विश्वानि रूपा रूपाणि अभिचष्टे पश्यति आहवनीयातिप्रणीताग्नीध्रधिष्ण्यादीनि सर्वाणि रूपाणि सर्वतः पश्यति । कीदृशानि रूपाणि शचीभिः स्वैः-स्वैः कर्मभिर्युक्तानीति शेषः । कीदृशोऽग्निः निवेशनः निवेशयति यज्ञमानं स्वगृ-

हे स्थापयतीति निवेशनः । तथा वसूनां धनानां संगमनः संगमयति प्रापयतीति संगमनः प्रजापशुरूपधनप्रापकः । सत्यधर्मा सत्योऽवश्यम्भाविफलोपितो धर्मोऽग्निहोत्रादिलक्षणो यस्यासौ सत्यधर्मा । क-इव सविता देव-इव यथा सविता सूर्यो देवः सर्वाणि रूपाणि अभिचष्टे । यश्चाग्निः पथीनां विभक्तिव्यत्ययः पथिभिः परिपन्थिभिः सह समरे संग्रामे इन्द्रो न इन्द्र-इव तस्थौ स्थितवान् यथेन्द्रो युद्धे तिष्ठति तद्वत् तं वयं स्तुम इति शेषः । पथिन्शब्दस्य परिपन्थिवाचकत्वाद्वस्य ठेरिति [पा° ७. १. ८८.] ठिलोपाभावे छान्दसे दीर्घे पथीनामिति रूपम् ॥ ६६॥

सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥ ६७॥

का° [१७. २. ११.] दक्षिणाग्निश्रोणिमपरेण तिष्ठन्युज्यमानमभिमन्त्रयते सीरा युञ्जन्तीति । चितेर्दक्षिणश्रोणेः पश्चिमे तिष्ठन्नध्वर्युः प्रतिप्रस्थात्रोत्तरांसपूर्वे षड्भिर्वा दशभिश्चतुर्विंशत्या वा वृषैर्युज्यमानमौडुम्बरं हलं द्वाभ्यामभिमन्त्रयते ॥ सीरा देवत्ये सोमपुत्रबुधदृष्टे द्वे गायत्रीत्रिष्टुभौ । धीराः धीमन्तोऽग्निक्षेत्रविदः कवयः कृषिकर्माभिज्ञाः सीरा सीराणि हलानि युञ्जन्ति वृषैर्योजयन्ति युगा युगानि पृथक् नाना वितन्वते विस्तारयन्ति । किं कर्तुम् देवेषु सुम्नया (30.) सुम्नमिति सुखनाम [निघ° ३. ६.] ततो द्वितीयैकवचनस्य सुपां सुलुगिति [पा° ७. १. ३९.] यादेशः सुम्नं सुखं कर्तुमिति शेषः । देवानां सुम्नं कर्तुं युञ्जन्तीत्यर्थः चतुर्थ्या यादिशो वा देवानां सुम्नाय युञ्जन्ति । सीरकविपदयोर्बहुत्वं पूजार्थं तयोरेकत्वात् युगानि बहूनि सन्ति ॥ ६७॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥ ६८॥

हे कर्षकाः सीरा सीराणि हलानि युनक्त युङ्क्त (31.) योजयत तप्तनप्तनथनाश्चेति [पा° ७. १. ४५.] थस्य तबादेशे श्नसोरल्लोपाभावे [पा° ६. ४. १११.] युनक्तेति रूपम् । युगा युगानि वितनुध्वं शम्यायोक्त्रादिभिर्विस्तारयत । ततः कृते कर्षणेन संस्कृते इह अस्मिन्योनौ स्थाने बीजं व्रीह्यादिकं यूयं वपत । कया । गिरा या ओषधीरित्यादिकया [क° ७५.] वेदमन्त्रवाचा चकाराच्चमसेन च । किं च वाग्वै

गीरन्नꣳ. शुष्टिरिति [७.२.२.५.] शुतिः शुष्टिः अन्नजातिर्व्रीह्यादिका सभरा असत् भरणं भरः पुष्टिः भृञोऽसुन्प्रत्ययः भरसा फलपुष्पा सह वर्तमाना सभराः पुष्टा अस्तु इतश्च लोपः परस्मैपदेषिति [पा° ३.४.१७.] इकारलोपेऽडागमेऽसदिति रूपम् । पक्वं धान्यं नेदीय इत् अतिशयेनान्तिकं नेदीयः अन्तिकवाढयोर्नेदसाधाविति [पा° ५.३.६३.] अन्तिकस्येयसुनि प्रत्यये नेदादेशः इत् एवार्थे नेदीय इत् अन्तिकतममेवात्यल्पकालमेव पक्वं धान्यं सृण्यः सृण्या सृणिशब्दोऽत्र दात्रार्थः सृण्या लवनसाधनेन दात्रेण लूनमिति शेषः दात्रेण छिन्नं सत् नः अस्मान्प्रति आ इयात् आगच्छतु अल्पकालेन पक्वमस्मदुच्छमागच्छत्वित्यर्थः ॥ ६८ ॥

शुनꣳ सु फाला वि कृषन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तनास्मे ॥ ६९ ॥

का° [१७.२.१२.] आत्मनि कृषत्यनुपरिश्रिङ्क्तुनꣳ सु फाला इति प्रत्यृचम् । चितिस्थानि परिश्रित्समीपे चतुर्ष्वग्निर्दक्षिणपश्चिमोत्तरपूर्वेषु चतस्रः सीताः कृषति ॥ कुमारहारितदृष्टाः सीतादित्यास्चतस्रः द्वे त्रिष्टुभौ तृतीया पङ्क्तिः चतुर्थ्यनुष्टुप् । सु शोभनाः फालाः सीराग्रस्था लोहविशेषाः शुनं सुखं यथा तथा भूमिं विकृषन्तु विलिखन्तु शुनमिति सुखनाम [निघ° ३.६.] फालः सीरोपकरणोत्पवयोः फालमंशुके इति कोशः । कीनाशा हलिनः शुनं सुखेन वाहैः वृषभैः सह अभियन्तु अभिगच्छतु । हे शुनासीरा शुनासीरौ हे वाय्वादित्यौ अस्मे अस्माकमोषधीः व्रीह्यादिकाः सुपिप्पलाः शोभनफलाः युवां कर्तन कुरुत कुरुतमिति वचनव्यत्ययः थस्य तनबादेशे शपि लुप्ते गुणे कृते कर्तनेति रूपम् । कीनाशः कर्षके नुद्रे कृतान्तोपांशुघातिनोरिति कोशः । शुनश्च सीरश्च शुनासीरौ देवताद्वन्द्वे चेति [पा° ६.३.२६.] पूर्वपददीर्घः शुनो वायुः सीर् आदित्यः । शुनो वायुः शु एत्यन्तरिक्षे सीर आदित्य सरणादिति यास्कोक्तेः [निरु° १.४०.] । कीदृशौ शुनासीरौ हविषा जलेन तोशमाना तोशतिर्वधकर्मा भूमिं घ्नन्तौ जलेन भूमिं सिञ्चन्तौ सन्तावोषधीः सफलाः कुरुतमिति भावः पिप्पलं फलम् ॥ ६९ ॥

घृतेन॒ सीता॒ मधु॑ना॒ समज्यतां॒ विश्वै॑र्दे॒वैरनु॑मता म॒रुद्भिः॑ ।
ऊर्ज॑स्वती॒ पय॑सा॒ पिन्व॑माना॒स्मान्त्सी॑ते॒ पय॑साभ्याववृत्स्व ॥७०॥

सीता लाङ्गलपद्धतिर्मधुना मधुरेण घृतेनोदकेन समज्यतां संसिच्यतां सिक्ता भवतु । कीदृशी सीता विश्वैर्देवैर्मरुद्भिश्चानुमता अनुज्ञाता अङ्गीकृता वा । एवं परोऽन्नमुक्ता प्रत्यक्षमाह हे सीते ऊर्जस्वती अन्नवती सा त्वं पयसा पयोदधिघृतादिभिः पिन्वमाना दिशः पूरयन्ती सती पयसा दुग्धादिभिः सह अभ्याववृत्स्व अस्मदभिमुखमावृत्ता भव अस्माकमनुकूला भवेत्यर्थः । वृतेर्बहुलं छन्दसीति [पा॰ २.४.७६.] शपः श्लौ सति लोटि ववृत्स्वेति रूपम् ॥७०॥

लाङ्ग॑लं॒ पवी॑रवत्सु॒शेव॑ꣳ सोम॒पित्स॑रु ।
तदु॑द्व॒पति॒ गामवि॑ं॒ प्रफ॒र्व्यं॑ च॒ पीव॑रीं॒ प्रस्था॑व॒द्रथ॑वाह॒नम् ॥७१॥

तत्पूर्वोक्तं लाङ्गलं हलं गां धेनुमविं छागविशेषं रथवाहनं रथवाहकमश्वादिकं च उद्वपति उप्तमयति प्रापयति । रथं वाहयति प्रापयतीति रथवाहनम् । कृषिसमृद्धावेव गवादिकं यजमानस्य सुलभमिति भावः अत एव लाङ्गलं गवादिप्रापकम् । कीदृशं लाङ्गलं पवीरवत् पविर्धारास्यास्तीति (32.) पवीरं फालः रो मत्वर्थः पवीरमस्यास्तीति पवीरवत् फालसंयुक्तम् । तथा सुशेवं शेवमिति सुखनाम [निघ॰ ३. ६.] शोभनसुखकरं शोभनं शेवं यस्मात् । तथा सोमपित्सरु सोमं पिबतीति सोमपा यजमानः तस्मिन्सोमपि यजमाननिमित्तं त्सरति भूमिं खनतीति सोमपित्सरु यद्वा सोमपि यजमाने त्सरति नाशयति पापमिति सोमपित्सरु त्सर छद्मगताविति धातोरुप्रत्ययः शीलार्थः हलदन्तात्सप्तम्या इति [पा॰ ६.३.१.] विभक्तेरलुक् आतो धातोरिति [पा॰ ६.४.१४०.] आलोपे हलन्तत्वात् यद्वा सोमः पीयतेऽनेनेति सोमपिश्चमसः तस्य त्सरु निष्पादकं न हि लाङ्गलकर्म विना सोमचमसाः स्युः । ईदृशं लाङ्गलं गवादि गमयतीत्यर्थः । कीदृशीं गामविं च प्रफर्व्यं फर्वतिर्गतिकर्मा प्रकर्षेण फर्वति गच्छति प्रफर्वी तां प्रफर्व्यं वा छन्दसीति [पा॰ ६.१.१०६.] अमि पूर्वरूपाभावे यणादेशः युवतित्वादतिवेगवतीमित्यर्थः । तथा पीवरीं स्थूलां पुष्टाङ्गीम् । कीदृशं रथवाहनं प्रस्थावत्

प्रस्था प्रस्थानं गतिरस्यास्तीति प्रस्थावत् प्रयाणसमर्थमुत्कृष्टजवोपेतमित्यर्थः ॥७१॥

कामं कामदुघे धुक्ष्व मित्राय वरुणाय च ।
इन्द्वायाश्विभ्यां पूष्णि प्रजाभ्य ओषधीभ्यः ॥७२॥

कामान्मनोरथान्दुग्धे पूरयति कामदुघा डुकृञः कब्घश्चेति [पा° ३.२.७०.] कप्प्रत्ययो घात्तादेशश्च तस्याः सम्बुद्धौ हे कामदुघे लाङ्गलपद्धते मित्रादिपूषान्तदेवानामर्थे प्रजार्थमोषधिनिष्पत्त्यर्थं च काममपेक्षितं भोगं धुक्ष्व सम्पादय ॥७२॥

विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य । ज्योतिरापाम ॥७३॥

का° [१७.२.२०.२१.] अनड्वाहो विमुच्य विमुच्यध्वमिति पशुवदुत्सृज्य दक्षिणाकालेऽधर्यवे ददाति । वृषान्कृत्वाद्वियोज्य पशुवदित्यैशानीदिशं प्रति विसृज्यत्यधर्युः यजमानश्च सुत्यायां ससीरांस्तानधर्यवे ददातीति सूत्रार्थः । विमोचने मन्त्रः वृषदेवत्यार्षी गायत्री पादानियमात् । हे देवयानाः देवतार्थकर्मकारिणः देवार्थं यानं कृष्याद्युद्यमो येषां ते यद्वा देवयानमार्गहेतुभूताः कर्मद्वारा तत्प्रापकाः । हे अघ्न्या अहन्तव्या गावो बलीवर्दा यूयं विमुच्यध्वम् मुचेः कर्मकर्तरि यक् लोटि जगत्स्थितिहेतुं कृषिमेवं निष्पाद्य कृतकृत्याः सन्तो युगात्पृथग्भवतेत्यर्थः अस्य तमसः क्षुत्पिपासाद्युद्भूतस्य दुःखस्य पारं समाप्तिं वयमगन्म प्राप्ताः गम्लृतेर्लुङि शपि लुपि वृपम् तदुक्तं [बृहदार° मा° ३.२.१.] योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति । दुःखपारमेव स्पष्टयति वयं ज्योतिरापाम परमात्मलक्षणं यज्ञरूपं वा तेजः प्राप्ता आप्नोतेर्लुङि पुषादीत्यादिना [पा° ३.१.५५.] अङ्प्रत्ययः ॥७३॥

सञ्जूरृब्दोऽअयवोभिः सञ्जूरुषा अरुणीभिः सञ्जोषसावश्विना दꣳसोभिः सञ्जूः सूर एतशेन सञ्जूर्विश्वान्नर इडया घृतेन स्वाहा ॥७४॥

का° [१७.३.३.] पञ्चगृहीतेनोद्गृह्याभिजुहोति सञ्जूरृब्द इति । तदानीं संस्कृतेन स्रुक्वा पञ्चगृहीतेनाज्येन कृष्टात्ममध्यस्थापितकुशस्तम्बे स्रुचमूर्ध्वां कुर्वन्जुहोति ॥ लिङ्गोक्तदेवतं यजुर्ब्राह्म्यनुष्टुप्छन्दस्कम् । अब्दः अपो जलानि ददातीत्यब्दः संवत्सरः उषाः प्रातरधिष्ठात्री देवता अश्विना अश्विनौ देवभिषजौ सूरः सूर्यः वै-

श्वानरः अग्निश्च एभ्योऽद्भादिदेवेभ्यो घृतेन स्वाहा इदं घृतं तेभ्यः सुहुतमस्तु । तेषां प्रत्येकं विशेषणानि । कीदृशोऽद्भः अयवोभिः सजूः यवाश्चायवाश्चार्धमासा मासाश्चोच्यन्ते जोषणं जुट् प्रीतिः सह जुषा वर्तते समाना जुट् वा यस्य सजूः जुषतेः सम्पदादित्वाद्भावे क्विप् मासार्धमासैः प्रीतियुक्त इत्यर्थः । कीदृश्युषाः अरुणीभिः अरुणवर्णाभिः गोभिः सजूः प्रीतियुता । कीदृशावश्विनौ दंसोभिः कर्मभिश्चिकित्सादिभिः सजोषसौ प्रीतौ । कीदृशः सूरः एतशेनाश्वेन सजूः तुष्टः । कीदृशोऽग्निः इडया पृथिव्या सजूः प्रीतः तदधिष्ठातृत्वात् आग्नेयी हि पृथिवी इडाशब्देन गौर्वागन्न चोच्यते ॥७४॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहꣳ शतं धामानि सप्त च ॥७५॥

का° [१७. ३. ८.] या ओषधीरिति तृचैर्वपत्युदपात्रवत् । पञ्चभिस्तृचैश्चमसेन सर्वौषधं वपति उदपात्रवदिति चतुश्चतुःसीतासु यथा कृष्टम् ॥ अथर्वपुत्रभिषग्दृष्टा ओषधिदेवत्या योऽस्मानभिदासतीत्यन्ताः [१०१.] सप्तविंशतिरनुष्टुभः मुञ्चतु मेत्याद्या [१०.] द्वादश बन्धुदृष्टाः कुत्रापि कर्मण्यनियुक्ताः । पादानां न्यूनाधिको व्यूहाधिक्ये कार्ये । युगशब्दः कालवाची त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च । पुरा सृष्ट्यादौ या ओषधीः ओषधयः पूर्वाः प्रथमा भाविनीभ्य ओषधीभ्यः आद्याः जाता उत्पन्नाः । किमर्थं देवेभ्यः ऋतुभ्यः ऋतवो वै देवा इति [७. २. ४. २६.] श्रुतेः ऋतव ओषधियुताः कर्तव्या (33.) एतदर्थम् । बभ्रूणां जगज्जनभरणसमर्थानां (34.) पाकेन पिङ्गलवर्णानां वा तासामोषधीनां शतं सप्त च धामानि अहं मनै नु मन्य एव ज्ञाने मन्यतेर्लटि आत्मनेपदे उत्तमैकवचने शपि एत ऐ इति [पा° ३. ४. १३.] ऊपम् । संवत्सरोपलक्षितमेकैकं स्थानं शतायुर्वै पुरुष इति श्रुतेः शतं धामानि वर्षात्मकानि शिरःस्थानि मुखदृङ्नासाकर्णाख्यानि सप्त स्थानानि च यऽएवेमे सप्त शीर्षन् प्राणास्तानेतदाहेति [७. २. ४. २६.] श्रुतेः नराणां शतवर्षपर्यन्तमिन्द्रियाणामोषधिभिस्तर्प्यमाणत्वादोषधीनां तत्स्थानत्वम् यद्वा शतं धामानि स्थानभेदान्जातिभेदानसंख्यान्विशेषतश्च सप्त भेदान्ग्राम्यानारण्यांश्च व्रीह्यादीन्नीवारादींश्चाहं जानि ॥७५॥

शतं वोऽम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मेऽअगदं कृत ॥७६॥

हे अम्ब मातृस्थाना ओषधयः वो युष्माकं धामानि जातिभेदाः क्षेत्राणि वा जन्मानि वा शतं सन्ति उत अपि च वो युष्माकं रुहः रोहन्तीति रुहः प्ररोहा अङ्कुराः सहस्रं सन्ति शतसहस्रपदाभ्यामपरिमितत्वमुच्यते । अध अथ निपातस्य चेति [पा° ६.३.१३६.] संहितायां दीर्घः शतं क्रतवः कर्माणि यासिस्ता शतक्रतवः असि चेति [पा° ७.३.१०९.] प्राप्तगुणस्याभावे छान्दसो यणादेशः अथैवं सति हे शतक्रत्वो यूयं मे मम इमं यजमानमगदं क्षुत्पिपासादिषड्भिरोगरहितं कृत कुरुत करोतेः शपो लुक् ॥७६॥

ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा-इव सजित्वरीर्वीरुधः पारयिष्णवः ॥७७॥

हे ओषधीः हे ओषधयः यूयं प्रतिमोदध्वं हृष्टा भवत । कीदृश्यो यूयं पुष्पवतीः पुष्पैरुपेताः । प्रसूवरीः फलप्रसववत्यः प्रसुवते जनयन्ति फलानीति प्रसूवरीः अन्येभ्योऽपि दृश्यन्तेऽइति [पा° ३.२.७५.] सूतेर्वनिपि प्रत्यये वनो र चेति ङीप् [पा° ४.१.७.] रान्तादेशश्च । अश्वा-इव सजित्वरीः सह जयन्ति तच्छीलाः इणनशजीति [पा° ३.२.१६३.] क्वरप् टिड्ढाणञ्चिति [पा° ४.१.१५.] ङीप् यथाश्वाः संग्रामे जयशीलाः तद्वत्फलपर्यन्तत्वाज्जयशीलाः । वा छन्दसीति [पा° ६.१.१०६.] सर्वत्र पूर्वसवर्णदीर्घः । वीरुधः विविधं रुन्धन्ति निवारयन्ति व्याधिमिति वीरुधः नह्विवृतिवृधीत्यादिना [पा° ६.३.११६.(35.)] उपसर्गदीर्घः यद्वा विविधं रोहन्ति प्ररोहन्ति वीरुधः विरुहः ह्वो धात्वादेशो वेर्दीर्घ इति (36.) धात्वादेश उपसर्गदीर्घश्च । पारयिष्णवः पार तीर कर्मसमाप्तौ चुरादिरदन्तो धातुः पारयन्ति फलपाकान्तं परित्यज्य बह्वकालं कर्मपरायणशीलाः पारयिष्णवः णेश्छन्दसीति [पा° ३.२.१३७.] शीलार्थे इष्णुच्प्रत्ययः ॥७७॥

ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।

सनेयमश्वं गां वासं आत्मानं तव पूरुष ॥ ७८ ॥

हे ओषधीः ओषधयः हे मातरः जगन्निर्माञ्यः भोजनदानव्याध्यपगमादिभिरुपकर्त्र्यः हे देवीः देव्यः वो युष्मान्प्रति इति अमुना वक्ष्यमाणविधिना तत्प्रसिद्धं मदभीष्टमुपब्रुवे वच्मि प्रार्थयामि । इति किम् तदाह हे पुरुष यज्ञपुरुष तव प्रसादादश्वं हयं गां धेनुं वासो वस्त्रमात्मानं शरीरमहं सनेयं सम्भजेयम् वन षन सम्भक्तौ लिङ् यज्ञपुरुषं प्रति मया यदश्वादिकं प्रार्थ्यते तदोषधिभिरनुमन्तव्यमित्योषधिप्रार्थनमिति भावः ॥ ७८ ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ७९ ॥

हे ओषधयः वो युष्माकमश्वत्थे आश्वत्थ्यामुपभृति स्रुचि निषदनं स्थानं भवति हविषां तत्र स्थापनात् किं च वो युष्माकं पर्णे पलाशे पर्णमय्यां स्रुक्वां वसतिः स्थितिः कृता अध्वर्युणा क्रोमार्थं स्रुक्वां स्थापनात् अश्वत्थपर्णशब्दाभ्यां तद्धितप्रत्ययलोपश्छान्दसः अथापि तद्धितेन कृत्स्नवन्निगमा भवन्तीति यास्कोक्तेः [निरु° २.५.(37.)] । हविर्भूता ओषधयः प्रार्थ्यन्ते किलेति विद्याप्रकर्षे इत् एवार्थे हे हविर्भूता ओषधयो यूयमग्नौ हुताः सत्यो गोभाजः असथ भवथ गामादित्यं भजन्तीति गोभाजः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठतऽइति स्मृतेः ॥ यद्वा अश्वत्थे वो निषदनमश्वत्थे फलिते सर्वौषधीनां फलवत्त्वात् पर्णे वो वसतिः कृता पलाशे च फलिते व्रीह्यादीनां फलितत्वात् अत एव यूयमुताः सत्यो गोभाजो भूमिभाज एव किलासथ भवथ । गौर्नादित्ये बलीवर्दे मखभेदऽर्षिभेदयोः । स्त्रियां स्यादिशि भारत्यां भूमौ च सुरभावपीति कोशात् । किमर्थमिदमित्यत आह यत् यस्मात्कारणात् पुरुषं यजमानं यूयं सनवथ सेवधमन्नदानेन पोषयथ तस्मादश्वत्थादिस्थानमित्यर्थः अश्वत्थे पलाशे च वः स्थानम् देवाधिष्ठानादश्वत्थो लोके नतिप्रदक्षिणादिना पूज्यते पलाशश्चैध्मादिरूपेण एवमश्वत्थादिरूपेण यूयं भूभाजः स्थ शेषं पूर्ववत् । अस्तेः शपि असथेति रूपं लटि सनवतिः (38.) परिचर्यार्थः ॥ ७९ ॥

यत्रौषधीः समग्मत राजानः समितावि॑व ।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥ ८० ॥

हे ओषधीः ओषधयः यत्र विप्रे भैषज्यकर्तरि ब्राह्मणे यूयं समग्मत संगच्छत रोगं जेतुम् के-इव राजान-इव यथा राजानः समितौ युद्धे शत्रून्जेतुं समागच्छन्ति । गमेर्लुङि मध्यमबहुवचने पुषादीत्यङि [पा० ३. १. ५५.] गमहनेति [पा० ६. ४. १८.] उपधालोपे छान्दसेऽग्मतेति रूपम् । स भवदाश्रितो विप्रः भिषग्वैद्य उच्यते कथ्यते । कीदृशो विप्रः रक्षोहा रक्षांसि हन्तीति रक्षोघ्नं पुरोडाशं कृत्वा रक्षसां हन्ता रक्षःकृतोपद्रवनाशकः । तथा अमीवचातनः अमीवान्रोगान् चातयति नाशयति अमीवचातनः औषधदानेन रोगनाशकः । चातयतिर्नाशनार्थः धातूनामनेकार्थत्वात् ॥ ८० ॥

अश्वावतीꣳ सोमावतीमूर्जयन्तीमुदोजसम् ।
आविꣳसि सर्वा ओषधीरस्माऽअरिष्टतातये ॥ ८१ ॥

अस्मै अस्य यजमानस्य अरिष्टतातये रिषतिर्विनाशार्थः रेषणं रिष्टम् भावे क्तः न रिष्टमरिष्टमनाशो मङ्गलमित्यर्थः तस्य करणमरिष्टतातिः शिवशमरिष्टस्य करऽइति [पा० ४. ४. १४३.] तातिप्रत्ययः यद्वा तननं तातिर्विस्तारः तस्मै यजमानस्य शुभकरणाय सर्वा ओषधीरहमा अवित्सि समन्ताद्वेद्मि जानामि वित्तेर्लुङि आत्मनेपदे उत्तमैकवचने इडभावे अवित्सीति रूपम् । अस्मै यजमानार्थं वेद्मीति वा । तद्विशेषणम् अरिष्टं शुभं करोति तनोति वारिष्टतातिस्तस्मै । सर्वाः का इत्यत आह अश्वावतीमश्वा अस्यां सन्तीत्यश्वावती ताम् अश्वसम्पादिनीं कांचित् ओषधिसमृद्धौ सत्यां धनद्वारेणाश्वलाभात् । अन्यां सोमवतीं सोमयोगोऽस्यामस्तीति सोमवती तां सोमसम्पादिनीं मत्वे सोमाश्वेत्यादिना [पा० ६. ३. १३१.] अश्वसोमयोर्दीर्घः । ऊर्जयन्तीमूर्ज बलप्राणनयोः बलसम्पादिनीं जीवयन्तीं वा ऊर्जयतीति । उदोजसमुद्गतमोजो यस्याः सा उदोजास्तां तेजःसम्पादिनीम् । एवं नानाकार्यकारिणीः सर्वा ओषधीः जानामीत्यर्थः यद्वा अश्वावतीमित्यादीनि बहुवचनान्तानि कार्याणि ओषधीरित्यस्य विशेषणत्वात् ॥ ८१ ॥

उरुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनꣳ सनिष्यन्तीनामात्मानं तवं पूरुष ॥ ८२ ॥

हे पुरुष यज्ञपुरुष तवात्मानं त्वदीयं शरीरं प्रति धनं सनिष्यन्तीनाम् पशु दाने कुर्वीद्रूपं धनं दातुमिच्छन्तीनामोषधीनां शुष्मा बलानि सामर्थ्यानि उदीरते उद्गच्छन्ति प्रकाशीभवन्ति गावो गोष्ठादिव यथा गोष्ठात्स्वस्थानाद्गावोऽरण्यदेशं प्रति उद्गच्छन्ति तद्वत् ईर कम्पे अदादिः ॥ ८२ ॥

इष्कृतिर्नाम वो मातार्था यूयꣳ स्थ निष्कृतीः ।
सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥ ८३ ॥

हे ओषधयो वो युष्माकमिष्कृतिर्नाम निष्कृतिनाम्नी माता जननी निष्करोति व्याधिं नाशयति निष्कृतिः निशब्दो बहुलमिति [३.१.१७.] प्रातिशाख्यसूत्रेणोपसर्गैकदेशनकारलोपः अथो अपि च यूयमपि निष्कृतीः निष्कृतयः स्थ व्याधिनिष्क्रमणकारिण्यो भवथ निष्कृतिमातृकत्वात् । किं च सीराः सह इरया अन्नेन वर्तन्तऽइति सीराः सहस्य सादेशे टिलोप इकारदीर्घश्च छान्दसः यद्वा सीराः क्षुधादीनामपसारयित्र्यः यद्वा सीरं क्षयं निष्पादकत्वेन यासु ताः सीराः । पतत्रिणीः पतत्रं पतनं गमनं विद्यते यासां ताः पतत्रिणयः प्रसरणशीलाश्च स्थन भवथ वा छन्दसीति [पा° ६.१.१०६.] दीर्घः तप्तनबित्यादिना [पा° ७.१.४५.] थस्य थनादेशः । यत् यस्मात् आमयति अम रोगे चुरादिः शत्रन्तः रुजति आमयाविनि (39.) नरे स्थितं रोगं निष्कृथ नाशयथ यद्वा यत् आमयति यत् क्षुधादिकं रोगवद्बाधते तद्यूयं निष्कृथ करोतेः शपि लुप्ते लटि द्रूपम् ॥ ८३ ॥

अति विश्वाः परिष्ठा स्तेन-इव व्रजमक्रमुः ।
ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥ ८४ ॥

परि सर्वतो रोगानधिष्ठाय तिष्ठन्तीति परिष्ठाः रोगनाशिका विश्वाः सर्वाः ओषधीः ओषधयो यद्वा अत्यक्रमुः आक्रमन्ते भक्षिताः सत्यो देहं व्याप्नुवन्ति क्रमतेर्लङि अन उश् छान्दसः । तत्र दृष्टान्तः स्तेन-इव व्रजम् यथा रात्रौ स्तेनश्चो-

रो गोष्ठमाक्रमते गोशालायां गामपकर्तुं सर्वत्र गच्छति तद्वत् यदौषधयो रोगमपकर्तुं देहमाक्रमन्ते तदा तन्वः शरीरस्य यत्किं च यत्किमपि रपः पापं शिरोव्यथागुल्मातिसारादिरूपं पापफलं यत्किंचिदस्ति तत्सर्वं प्राचुच्यवुः प्रच्यावयन्ति नाशयन्ति च्यु गतौ लुङि णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति [पा° ३.१.४८.] चङ्प्रत्यये रूपम् । रपो रिप्रमिति पापनामनी भवत इति यास्कः [निरु° ४.२१.] ॥८४॥

यदिमा वाजयन्नुरुमोषधीर्हस्तेऽआदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा (40.) ॥८५॥

यत् यदा इमा ओषधीः वाजयन्पूजयन्मानयन्सन् अहं हस्ते स्वकरे आदधे स्थापयामि तदैव यक्ष्मस्य व्याधेरात्मा स्वरूपं पुरा भक्षणात्प्रागेव नश्यति किं पुनर्भक्षणेनेति भावः । तत्र दृष्टान्तः जीवगृभो यथा जीवन्सन्नेव यो हिंसार्थं गृह्यते आघातस्थानं नीयते स जीवगृभ् तस्य जीवगृभो वधात्प्रागेवातिविषादात् मृतोऽहमिति मन्यमानस्य मनुष्यस्यात्मा यथा नश्यति नष्टप्रायो भवति तथौषधौ हस्ते धृतायां व्याधेरात्मा नश्यतीत्यर्थः ॥८५॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मं विबाधध्वेऽउग्रो मध्यमशीरिव ॥८६॥

हे ओषधीः ओषधयो यस्य रोगिणः अङ्गमङ्गं प्रत्यङ्गं सर्वाण्यङ्गानि परुष्परुः परुःशब्दः पर्ववचनः प्रतिपरुः सर्वाणि पर्वाणि ग्रन्थीन्यूयं प्रसर्पथ प्रगृह्य व्याप्नुथ ततोऽङ्गपर्वसमुदायात् यक्ष्मं रोगं यूयं विबाधध्वे निवर्तयथ व्याधिनाशं कुरुध्वे । तत्र दृष्टान्तः उग्रो मध्यमशीरिव मध्ये देहमध्ये भवं मध्यमं मर्मभागं शृणाति हिनस्ति मध्यमशीः शॄ हिंसायां क्विप् ऋत इद्धातोरिति [पा° ७.१.१००.] इदादेशः उरण् रपर इति [पा° १.१.५१.] रेफः मर्मघातक उग्र उत्कृष्टो बह्वंगोधाङ्गुलित्राण उद्गूर्णशस्त्रः क्षत्रियो यथा शत्रुं बाधते यद्वा उग्रो रुद्रो मध्यमेन त्रिशूलमध्यभागेन शृणातीति मध्यमशीः यथा युगान्ते जगद्बाधते तद्वयूयमपि रोगिणो देहं प्रविष्टा व्याधिं विबाधध्वेऽइत्यर्थः ॥८६॥

साकं यक्ष्म प्रपत चाषेण किकिदीविना ।

साकं वातस्य ध्राज्या साकं नश्य निह्राकया ॥ ८७॥

हे यक्ष्म रोग त्वं चाषेण पक्षिणा साकं सह प्रपत-प्रकर्षेण गच्छ किम्भूतेन चाषेण किकिदीविना किकीति शब्दानुकरणं किकीतिशब्देन दीव्यति क्रीडतीति किकिदीविस्तेन । चाषस्तवोचितः (41.) सार्थः । वातस्य ध्राज्या गत्या साकं प्रपत वातगतिवत्पलायस्वेत्यर्थः । किं च निह्राकया साकं नश्य नष्टो भव निह्रन्ति कायमिति निह्राका निर्ऋतिः कृच्छ्रापत्तिस्तया सह नश्य यद्वा शब्दानुकरणमिदं ह्रा कष्टं कया ओषध्या निह्रतोऽहमिति शब्दं कुर्वन् हे यक्ष्म त्वं नश्य ॥ अर्थान्तरं वा कफावरुद्धकण्ठोत्थध्वनेरनुकरणार्थः किकिशब्दः किकिना कण्ठध्वनिना दीव्यतीति किकिदीविः श्लेष्मरोगः । चष बधे चषति व्याकुलं कृत्वा हन्ति चाषः पित्तरोगः । वातस्य ध्राजिर्वातरोगः । हे यक्ष्म रोगराज त्वं कफपित्तवातरोगैः सह प्रपत गच्छ । यया पीडया कया रुजा निह्रतोऽस्मि ह्रा कष्टमिति शब्दं करोति सा निह्राका सर्वाङ्गवेदना तया साकं हे यक्ष्म त्वं नश्य ॥ ८७॥

अन्या वोऽअन्यामवत्वन्यान्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ ८८॥

हे ओषधयो वो युष्माकं मध्ये अन्या काचिदोषधिव्यक्तिरन्यामोषधिव्यक्तिमवतु तथा रक्षिता अन्यापि अन्यस्या रक्षिकाया उपावत उपावतु उप समीपमागत्य पालयतु पुरुषवचनव्यत्ययः अन्यान्यस्याः प्रभावमवतु वा । ताः सर्वास्तथाविधा ओषधयो यूयं संविदानाः परस्परैकमत्यं गताः सत्यो मे ममेदं वचो वाक्यं प्रार्थनारूपं प्रावत प्रकर्षेण रक्षत ॥ ८८॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ ८९॥

या ओषधयः फलिनीः फलिन्यः फलयुक्ताः याश्चाफलाः फलरहिताः याश्चापुष्पाः पुष्परहिताः याश्च पुष्पिणीः पुष्पिण्यः पुष्पयुक्ताः ताः सर्वा ओषधयो बृहस्पतिप्रसूताः बृहस्पतिप्रेरिताः सत्यो नोऽस्मानंहसः पापाद्रोगरूपात् मुञ्चतु पृथक्कुर्वन्तु ॥ ८९॥

मुञ्चन्तु मा शपथ्याद्यो वरुण्यादुत ।
अथो यमस्य पड्वीशात्सर्वस्माद्देव किल्बिषात् ॥ १० ॥

एवमोषधिवापार्थानि पञ्च तृचानि समाप्तानि । अथानारभ्याधीताः ॥ शपथनिमित्तात्किल्बिषात्पापादोषधयो मा मां मुञ्चन्तु पृथक्कुर्वन्तु अथो अपि च वरुण्यात् वरुणे भवं वरुण्यं तस्माद्वरुणापराधनिमित्तात्पापान्मां मुञ्चन्तु उतापि च यमस्य सम्बन्धिनः पड्वीशात् पड्वीशशब्दो बन्धनवाची यमबन्धननिमित्तात्पापान्मां मुञ्चन्तु अथो अपि च सर्वस्माद्देवकिल्बिषाद्देवापराधनिमित्तात्पापान्मां मुञ्चन्तु ॥ १० ॥

अवपतन्तीरवदन्दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ ११ ॥

दिवः परि द्युलोकात्सकाशादवपतन्तीरवपतन्त्योऽधस्ताद्भूमौ गच्छन्त्यः ओषधय अवदन् परस्परं वदनमुक्तवत्यः । किम् तदाह जीवतीति जीवस्तं यं जीवमनुत्क्रान्तप्राणं पुरुषं वयमश्नवामहै अश्नूङ् व्याप्तौ लोट् व्याप्नुमः स पुरुषो न रिष्यति न नश्यति रिष्यतीत्यत्र लेटोऽडाटाविति [पा° ३.४.९४.] आडागमः पूरुष इति छान्दसो दीर्घः सर्वत्र ॥ ११ ॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमारं कामाय शꣳ हृदे ॥ १२ ॥

सोमो राजा यासां ताः सोमराज्यः बह्वीः बहूव्योऽनन्ताः शतविचक्षणाः शतमसंख्यं विचक्षणाश्चतुराः बहुवीर्या वा शतं विचक्षणाः स्तोतारो यासामिति वा एवम्भूता या ओषधीः ओषधयः सन्ति तासामोषधीनां मध्ये हे ओषधे त्वमुत्तमा उत्कृष्टा यतोऽसि भवसि अतः कामायेप्सिताय अरमलं पर्याप्ता भव हृदे हृदयाय शं सुखकारिणी भव ॥ १२ ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै संदत्त वीर्यम् ॥ १३ ॥

सोमराज्ञो या ओषधयः पृथिवीमनु विष्ठिताः विविधं स्थिताः वृहस्पतिप्रसूताः वृहस्पतिना प्रेरिताः ता ओषधयोऽस्यै ओषध्यै मद्गृहीतायै वीर्यं संदत्त सामर्थ्यं प्रयच्छत इयं वद्भवीर्या भवत्विति भावः ॥ १३ ॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः संगत्य वीरुधोऽस्यै संदत्त वीर्यम् ॥ १४ ॥

या ओषधय इदं मद्वचनं प्रार्थनारूपमुप समीपस्थाः (42.) शृण्वन्ति याश्चान्याः दूरं परागताः दूरे व्यवस्थिता व्यवहिताः सत्यः ईषत् शृण्वन्ति हे वीरुधः विविधरोहणा ओषधयः ताः सर्वाः समीपदूरस्थाः संगत्य संगता भूत्वा अस्यै ओषध्यै यूयं वीर्यं संदत्त प्रयच्छत ॥ १४ ॥

मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।
द्विपाच्चतुष्पादस्माकꣳ सर्वमस्त्वनातुरम् ॥ १५ ॥

हे ओषधयः वो युष्माकं खनिता चिकित्सायै युष्मन्मूलं ग्रहीतुं खननकर्ता मा रिषत् मा विनश्यतु यस्मै च रुग्णाय चिकित्सार्थं वो युष्मानहं खनामि युष्मन्मूलमादातुं खननं करोमि स च मा रिषत् । किम्बहुनास्माकं सम्बन्धि द्विपात् स्त्रीपुंसं चतुष्पाद्गवादि प्राणिजातं सर्वमनातुरं रोगरहितमस्तु। द्वौ पादौ यस्य चत्वारः पादा यस्य संख्यासुपूर्वस्येति [पा° ५. ४. १४०.] पादशब्दस्यान्तलोपः ॥ १५ ॥

ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥ १६ ॥

राज्ञा स्वस्वामिना सोमेन सह ओषधयः देवताः समवदन्त संवादं कृतवत्यः । कथं संवादस्तमाह ब्राह्मणो यस्मै रुग्णाय कृणोति अस्मन्मूलादिना चिकित्सां करोति कृ कृतौ स्वादिः हे राजन्स्वामिन्सोम तं रुग्णं नरं वयं पारयामसि पारयामः इदन्तो मसि सोमसंवादो व्याधिनाशदार्ढ्यार्थः ॥ १६ ॥

नाशयित्री वलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥ १७ ॥

हे ओषधे त्वं बलासस्य क्षयव्याधेर्नाशयित्री नाशनकर्त्री असि भवसि बलमस्यति क्षिपति बलासः (43.) क्षयः । अर्शसो गुदव्याधिश्च नाशिकासि । उपचिताम् उपचिन्वन्ति शरीरं वर्धयन्तीत्युपचिताः क्विप् श्वयथुगुडश्लीपदादयः (44.) तेषां च नाशिकासि । अथो अपि च शतस्य यक्ष्माणां बहूनां व्याधीनां पाकारोः मुखपाकक्षतादेश्च नाशनी नाशकर्त्री त्वं भवसि पाको मुखपाकः अरुः क्षतमुच्यते पाकेनारुः पाकारुस्तस्य यद्वा पाकोऽन्नपाकस्तस्यारुर्व्यथा मन्दाग्नित्वं तस्य नाशनी त्वमसि ॥ १७ ॥

त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥ १८ ॥

हे ओषधयः गन्धर्वाः देवविशेषास्त्वामखनन् स्वेष्टकार्यसिद्ध्यर्थं खननमकुर्वन् इन्द्रश्च त्वामखनत् बृहस्पतिश्च त्वामखनत् हे ओषधे सोमो राजा त्वां च विद्वान् त्वत्सामर्थ्यं जानन्सन् त्वामुपयुज्य यक्ष्मात् महाव्याधेरमुच्यत मुक्तोऽभवत् ॥ १८ ॥

सहस्व मेऽरातीः सहस्व पृतनायतः ।
सहस्व सर्वं पाप्मानꣳ सहमानास्योषधे ॥ १९ ॥

हे ओषधे यतस्त्वं सहमानासि शत्रूनभिभवन्ती भवसि अतो मे अरातीः अदानशीलाः शत्रुसेनाः सहस्व अभिभव नास्ति रातिर्दानं यासां ता अरातयस्ताः । पृतनायतः संग्रामकामांश्च सहस्व पृतनां संग्रामं कामयन्ते ते पृतनायन्तस्तान् सुप आत्मनः क्यजिति [पा° ३. १. ८.] क्यजन्ताक्तृप्रत्ययः किं च सर्वं पाप्मानमशुभं सहस्व सहतिरभिभवार्थः ॥ १९ ॥

दीर्घायुस्तेऽओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ १०० ॥

हे ओषधे ते तव खनिता खननकर्ता दीर्घायुर्भूयादिति शेषः यस्मै चातुराय नराय त्वा खनामि सोऽपि दीर्घायुरस्तु अथो अपि च त्वं दीर्घायुरखण्डितजीवना भूत्वा शतवल्शा बह्वङ्कुरा सती विरोहताद्विरोह बह्वङ्कुरोत्पन्नस्य तुल्यो-

स्तातङ् इति [पा° ७.१.३५.] तातङ् । वल्शशब्दोऽङ्कुरवाची शतं वल्शाः यस्याः सा शतवल्शा ॥ १०० ॥

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकं योऽस्माँ२॥ऽअभिदासति ॥ १०१ ॥

हे ओषधे त्वमुत्तमा उत्कृष्टासि भवसि वृक्षा शालतालतमालाद्यस्तवोपस्तयः सन्तु स्तये शब्दसंघातयोः उपस्त्यायन्ति उपकारायोपद्रवनिराकरणाय च समीपे संकृतास्तिष्ठन्तीत्युपस्तयः वृक्षाः त्वां सेवन्तामित्यर्थः । किं च यो नरोऽस्मानभिदासति अभिकृन्ति स नरोऽस्माकमुपस्तिः समीपस्थ उपासकोऽस्तु दासतिर्हिंसाकर्मा ॥ १०१ ॥ अनारभ्याधीताः समाप्ताः ॥ ॥

VII. मा मा हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥ १०२ ॥

का° [१७.३.११.] लोगेष्टकाः स्फ्येनाकृत्य बर्हिर्वेदेरनूकासूपदधाति तिष्ठन्मा मा हिꣳसीदिति प्रत्यृचं प्रतिदिशं (45.) पुरस्तात्प्रथमम् । ततोऽधर्युः स्फ्येन वेदिबर्हिःप्रदेशाल्लोगेष्टकाश्चतुरो मृत्खण्डान्पञ्चप्रमाणानानीयात्मनो दक्षिणोत्तरपूर्वापरमध्यसूत्रप्रान्तेषु पूर्वादि तिष्ठन्मन्त्रचतुष्टयेनोपदध्यादिति सूत्रार्थः ॥ हिरण्यगर्भदृष्टा कादेवत्या त्रिष्टुप् । यः प्रजापतिः पृथिव्या भूमेर्जनिता जनयिता उत्पादकः जनिता मन्त्रꣳइति [पा° ६.४.५३.] णिचो लोपः । वा चार्थे यो वा यश्च दिवं व्यानट् द्युलोकमसृजत् व्यानट् इति व्याप्तिकर्मा [निघ° २.१८.(46.)] श्रुतौ तु सृजतेरर्थे व्याख्यातः यो वा दिवꣳ सत्यधर्मासृजतेति श्रुतेः [७.३.१.२०.] । यश्च चन्द्राः आह्लादिका जगत्कारणभूता अपो जलानि प्रथमः आदिभूतः सन्जजानोत्पादितवान् तद्द्वारा मनुष्यानुत्पादितवानित्यर्थः यतः श्रुतौ आपश्चन्द्रा इति मनुष्या व्याख्याताः मनुष्या एव हि यज्ञेनाप्नुवन्ति चन्द्रलोकं पितृमार्गानुसारिणः मनुष्या वाऽआपश्चन्द्रा इति श्रुतेः [७.३.१.२०.] कारणे कार्योपचारात् । कीदृशः प्रथमः शरीरी सत्यधर्मा सत्यं धरतीति सत्यस्य धारयिता स प्रजापतिर्मा मा हिंसीत् मा कृत्तु यतः कस्मै काय प्रजापतये कृविषा कृविः वयं विधेम दद्मः । कृवि-

दानान्मा कृतु । कशब्दस्य सर्वनामत्वाभावात्स्मै-आदेशः छान्दसः । कृविषा इति विभक्तिव्यत्ययः । विधतिर्धातुर्दानार्थः ॥ १०२ ॥

अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह ।
वपां तेऽअग्निरिषितोऽअरोहतु ॥ १०३ ॥

अग्निदेवत्या उष्णिक् । हे पृथिवि यज्ञेनास्मच्चिकीर्षितेन पयसा तत्फलभूतेन दुग्धादिभोगेन च सह अभ्यावर्तस्व आभिमुख्येनागच्छ । कथमागन्तव्यमत आह इषितः प्रजापतिप्रेषितोऽग्निः ते तव वपां त्वयि पृष्ठं वपासदृशमिमं प्रदेशमरोहतु आरोहतु । अनयर्चा दक्षिणे लोगेष्टकोपधानम् (47.) ॥ १०३ ॥

अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ॥ १०४ ॥

अग्निदेवत्या गायत्री पश्चाल्लोगेष्टकोपधाने विनियुक्ता । हे अग्ने यत्ते तवाङ्गं शुक्रं शुक्लं शुद्धं दीप्तिमत् यच्चान्यदङ्गं चन्द्रमाह्लादकरं यदन्यत्पूतं पवित्रं यच्चान्यदङ्गं यज्ञियं यज्ञार्हं तत्सर्वं श्लाघ्यरूपं देवेभ्यो देवानामर्थे भरामसि भरामः सम्पादयामः ॥ १०४ ॥

इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशतु तनूषु जह्मामि सेदिमनिराममीवाम् ॥ १०५ ॥

आशोर्दैवी (48.) त्रिष्टुप् पादत्रयस्योत्तरतो लोगेष्टकोपधाने विनियोगः । इषमन्नमूर्जं तदुपसेचनं दधिपयोघृतादिकमृतस्य सत्यस्य योनिं स्थानं विद्यात्रयम् महिषस्य महत इच्छावतोऽग्नेर्धारां धारणामाकृतिं वा इतोऽस्मात्प्रदेशादुदीच्या दिशः सकाशादहमादमद्मि भक्षयामि स्वीकरोमीत्यर्थः अद भक्षणे लङ् । किं च एतत्सर्वमिडादिकं मा मामाविशतु आगत्य प्रविशतु तनूषु मदीयपुत्रादिशरीरेषु गोषुमदीयधेन्वादिपशुषु चाविशतु ॥ का° [१७. ३. १३.] उत्तरस्याः सिकताः प्रमार्ष्टि जह्मामि सेदिमिति । उत्तरलोगेष्टकातः सिकताः पातयति ॥ नास्ति इरान्नं यस्यां तामनिरामन्नरहिताममीवां व्याधियुतां सेदिमवसादमहं जह्मामि त्यजामि अन्नाभावरोगदुःखानि मे मा सन्वित्यर्थः ॥ १०५ ॥

अग्ने॒ तव॒ श्रवो॒ वयो॒ महि॑ भ्राजन्ते॑ऽअ॒र्चयो॑ विभावसो ।
बृह॑द्भानो॒ शव॑सा वाज॒मुक्थ्यं॑ दधासि दा॒शुषे॑ कवे ॥ १०६॥

का॰ [१७. ३. १५.] अग्ने तवेति सिकता न्युप्य ह्लादयत्यात्मानम् । षड्चेनोत्तरवेदौ सिकताः प्रक्षिप्य ताभिः पुरुषपक्षं विनात्मानं ह्लादयेत् ॥ पावकाग्निदृष्टं षड्चमग्निदेवत्यम् । आद्ये द्वे विष्टारपङ्क्ती (49.) यस्या द्वितीयतृतीयपादौ द्वादशार्णौ आद्यतुर्यावष्टकौ सा विष्टारपङ्क्तिः । हे अग्ने हे विभावसो विभा दीप्तिरेव वसु धनं यस्य तत्सम्बोधनं हे कान्तिधन तव वयो धूमः अर्चयो दीप्तयश्च भ्राजन्ते दीप्यन्ते वीयते भक्ष्यते प्राणिभिरिति वयोऽन्नम् वी कान्त्यसनस्वादनव्याप्तिषु धूमस्याङ्गतिपरिणामद्वारेणान्नहेतुत्वाद्वयोऽत्र धूम उच्यते । कीदृशं वयः श्रवः श्रावयति द्युलोके कृतं कर्मेति श्रवः धूमदर्शनाद्देवानां कर्मज्ञानम् । तथा महि महत् नभोगामित्वात् धूमो वाऽस्य श्रवो वयः स द्यौनममुष्मिंल्लोके श्रावयतीति श्रुतेः [७. ३. १. २१.] । किं च बृहतो महान्तो भानवो रश्मयो यस्य तत्सम्बुद्धौ हे बृहद्भानो हे कवे क्रान्तदर्शिन् विद्वन् यजमानाभिप्रायज्ञ दाशुषे हविर्दत्तवते यजमानाय शवसा बलेन सह वाजमन्नं त्वं दधासि ददासि । कीदृशं वाजम् उक्थ्यम् उक्थः शस्त्राद्युपेतो यज्ञस्तद्योग्यं यज्ञपर्याप्तमन्नं (50.) ददासीत्यर्थः ॥ १०६॥

पाव॑कवर्चाः शु॒क्रव॑र्चा॒ अनू॑नवर्चा॒ उदि॑यर्षि भा॒नुना॑ ।
पु॒त्रो मा॒तरा॑ वि॒चर॒न्नुपा॑वसि पृ॒णक्षि॒ रोद॑सीऽ॒उभे ॥ १०७॥

हे अग्ने त्वं भानुना दीप्त्या उदियर्षि उद्गच्छसि उत्कर्षं प्राप्नोषीत्यर्थः कीदृशस्त्वं पावकवर्चाः पावकं शोधकं वर्चो दीप्तिशक्तिर्यस्य सः । शुक्रवर्चाः शुक्रं शुक्लं निर्मलं वर्चो यस्य । अनूनवर्चाः अनूनमहीनं वर्चो यस्य पूर्णशक्तिः । किं च हे अग्ने त्वं विचरन् सर्वतः प्रचरन्सन् उपावसि उप संगम्य पालयसि सदेवमनुष्यं जगद्रक्षसि । तत्र दृष्टान्तः पुत्रो मातरा यथा पुत्रश्चरमे वयसि मातरा मातापितरौ उपावति तद्वत् पितरामातरा च छन्दसीति [पा॰ ६. ३. ३३.] निपातः । किं च उभे रोदसी द्यावापृथिव्यौ पृणक्षि पूरयसि हविषा द्यां वृष्ट्या भूमिं पूरयसीत्यर्थः इमे

वै द्यावापृथिवी रोदसी तेऽएष उभे पृणक्ति धूमेनामू वृष्येमामिति [७. ३. १. ३०.] श्रुतेः । तं त्वां स्तुम इति वाक्यशेषः ॥ १०७ ॥

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वेऽइषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ १०८ ॥

तिस्रः सतोबृहत्यः यस्या आद्यतृतीयौ द्वादशकौ द्वितीयतुर्यावष्टकौ सा सतोबृहती । ऊर्क् जलं नपात्पौत्रः हे ऊर्जो नपादपां पौत्र अद्य ओषधिवनस्पतयो जायन्ते तेभ्योऽग्निर्जायतऽइत्यपां पौत्रत्वमग्नेः । यद्वा ऊर्जोऽन्नस्य नपात् न पातयति नाशयति नपात् पतेर्णिजन्तात्क्विप् हे अन्नस्याविनाशक । हे जातवेदः जातप्रज्ञान धीतिभिः कर्मभिर्निमित्तभूतैर्हितः स्थापितः सन् सुशस्तिभिः शोभनाभिः शस्तिभिः स्तुतिभिः कृत्वा त्वं मन्दस्व मोदस्व हृष्टो भव मदिङ् स्वप्ने जाड्ये मदे मोदे स्तुतौ गताविति धातुः । किमिति हर्षः कार्यस्तत्राह यजमानाः त्वे त्वयि इषो हविर्लक्षणान्यन्नानि संदधुः जुह्वुवुः हविःप्राप्त्या हर्षः कार्य इत्यर्थः । कीदृशा यजमानाः भूरिवर्पसः वर्प इति रूपनाम [निघ० ३. ७.] भूरीणि वर्पांसि येषां ते नानारूपाः । चित्रोतयः चित्रा विचित्रा नानाविधा ऊतयो रक्षा अवनानि अन्नानि तर्पणानि वा त्वत्कृतानि येषां ते त्वया तर्पिता इत्यर्थः । वामजाताः वामं वननीयं सम्भजनीयं जातं जन्म येषां ते विशिष्टदेशजातिकुलोत्पन्ना इत्यर्थः ॥ १०८ ॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायोऽअमर्त्य ।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं क्रतुम् ॥ १०९ ॥

हे अमरणधर्मन् हे अग्ने रायो धनानि अस्मे अस्मासु त्वं प्रथयस्व विस्तारय । कीदृशस्त्वं जन्तुभिः प्राणिभिर्हविःप्रदैरर्धर्युप्रभृतिभिः इरज्यन्दीप्यमानः । किं च यस्त्वमीदृशो धनप्रथयिता स त्वं दर्शतस्य दर्शनीयस्य वपुषः चित्याग्निरूपस्य शरीरस्य मध्ये विराजसि विशेषेण दीप्यसे विभक्तिव्यत्ययो वा दर्शतेन वपुषा ज्वालालक्षणेन शरीरेण विराजसि । सानसिं चिरंतनं क्रतुं संकल्पं पृणक्षि पूरयसि सर्वेष्टं ददासीत्यर्थः ॥ १०९ ॥

इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
रातिं वामस्य सुभगा महीमिषं दधासि सानसिꣳ रयिम् ॥११०॥

हे अग्ने अध्वरस्य यज्ञस्य इष्कर्तारं निस उपसर्गस्य नलोपः पूर्वमुक्तः [८३.] निष्कर्तारं निश्चयेन कर्तारं यज्ञनिष्पादकं प्रचेतसं प्रकृष्टचित्तयुक्तं क्षयन्तं हि निवासगत्योः विशिष्टस्थाने निवसन्तमीदृशं यजमानं प्रति वामस्य वननीयस्य महो महतो राधसो धनस्य रातिं दानं (51.) त्वं दधासि ददासि । किं च सुभगां सुष्ठु भजनीयां महीं महतीमिषमन्नं च ददासि । सानसिं पुराणं रयिं धनमस्मर्यमाणविषयं निधानलक्षणं च दधासि निधिं दर्शयसीत्यर्थः ॥११०॥

ऋतावानं महिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णीꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥१११॥

उपरिष्टाज्ज्योतिः । यस्यास्त्रयः पादा द्वादशाक्षराश्चतुर्थोऽष्टाक्षरः सोपरिष्टाज्ज्योतिः । मानुषा विभक्तिराकारः (52.) मनुष्या जना मनुष्यजातियुक्ता जन्तव (53.) ऋत्विग्यजमानाः युगा विभक्तिराकारः युगशब्दः कालवाची युगैः कालैः पौर्णमास्यमावास्यादिभिर्निमित्तैः गिरा वेदवाचा कृत्वा सुम्नाय यज्ञाय त्वा त्वामग्निं पुरोऽग्रतः पूर्वभागे आहवनीयरूपेण दधिरे स्थापितवन्तः । किम्भूतं त्वामृतवानमृतमस्यास्तीति ऋतवा तं सत्यवन्तं छान्दसो दीर्घः छन्दसीवनिपौ वाच्यौ वंश्च मतुप्चेति [पा° ५.२.१०१. वा° २.] अस्त्यर्थे वन्प्रत्ययः । महिषं महान्तं विश्वदर्शतं सर्वस्य दर्शनीयं श्रुत्कर्णं शृणुत इति श्रुतौ क्विप् श्रुतौ कर्णौ यस्य तम् यद्विज्ञाप्यते तत्सत्यमेव कर्णाभ्यां श्रुत्वा सम्पादयतीत्यर्थः । सप्रथस्तमं प्रथनं प्रथः कीर्तिः प्रथ प्रख्याने अस्मादसुन्प्रत्ययः प्रथसा सह वर्तमानः सप्रथाः अतिशयेन सप्रथाः सप्रथस्तमस्तमतिकीर्तिमन्तम् । दैव्यं देव एव दैव्यस्तं स्वार्थे यत् यद्वा देवेभ्यो हितम् ॥१११॥

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥११२॥

का° [१७.३.१६.] आप्यायस्वेति सिकतालम्भनमृग्भ्याम् । आत्मनि विस्तारिताः सिकताः स्पृशति ऋग्द्वयेन ॥ गोतमदृष्टाः सोमदेवत्यास्तिस्रो गायत्रीत्रिष्टुबु-

ष्णिक्छन्दस्काः आप्यायस्व मदिन्तमेति [११४.] तृतीयस्या विनियोगः सूत्रे नास्ति। हे सोम विश्वतः सर्वस्मात् वृष्ण्यं वीर्यं सर्वभूतोत्पत्तिकृद्बीजं ते तव समेतु समागच्छतु तेन च वीर्येण त्वमाप्यायस्व सर्वतो वर्धस्व। किं च वाजस्यान्नस्य संगथे संगमननिमित्तं भवान्नमस्मासु संगमयेत्यर्थः ॥ ११२ ॥

सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानोऽअमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ ११३ ॥

हे सोम पयांसि पातव्या रसाः ते तव संयन्तु संगच्छन्तामुत अपि च वाजा अन्नानि संयन्तु वृष्ण्यानि रेतांसि ते संयन्तु। कीदृशस्य ते अभिमातिषाहः अभिमातिं पाप्मानं सहतेऽभिभवतीत्यभिमातिसाट् (54.) तस्याभिमातिसाहः षत्वं छान्दसम्। हे सोम पयोऽन्नवृष्ण्यैराप्यायमानः वर्धमानः सन् अमृताय अमरणधर्मिण्यै प्रजात्यै पुत्रादिवृद्ध्यै यजमानस्य भवेति शेषः अमृतशब्देन श्रुत्या प्रजातिर्व्याख्याता तथा च श्रुतिः [७.३.१.४६.] प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृतेति। किं च दिवि द्युलोके उत्तमानि उत्कृष्टानि श्रवांसि अन्नानि आहुतिपरिणामजनितानि धिष्व धारय सम्पादय लोकद्वयभोगं सम्पादयेत्यर्थः धि धारणे तुदादिः विकरणव्यत्यय आत्मनेपदं च छान्दसं बहुलं छन्दसीत्युक्तेः [पा° २.४.७३.] सुधितवसुधितेति [पा° ७.४.४५.] सूत्रेण दधातिर्निपातो वा धत्स्वेत्यर्थे ॥ ११३ ॥

आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः।
भवा नः सप्रथस्तमः सखा वृधे ॥ ११४ ॥

हे मदिन्तम मदयति तर्पयतीति मदी ग्रहादिवाणिनिप्रत्ययः [पा° ३.१.१३४.] यद्वा मदस्तृप्तिरस्यास्तीति मदी अत इनिठनाविति [पा° ५.२.११५.(55.)] इन् अतिशयेन मदी मदिन्तमः नाद्घस्येति [पा° ८.२.१७.] नात्तात्परस्य तमपो नुडागमः। ईदृश हे सोम विश्वेभिर्विश्वैः सर्वैरꣳशुभिः सूक्ष्मांशैः आप्यायस्व प्रवृद्धो भव वृद्धः सन्नोऽस्माकं वृधे वर्धनाय सखा सहायो भव ऋचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः। कीदृशस्त्वं सप्रथस्तमः अत्यन्तं सप्रथाः सकीर्तिः सप्रथस्तमः ॥ ११४ ॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वाकामया गिरा ॥११५॥

का° [१७.३.२०.२१.] श्वेतेऽश्वे पुरस्तात्तिष्ठति श्वेताभावेऽश्वेतेऽश्वाभावेऽनड्वद्भ्यग्निभ्यः प्रक्रियमाणेभ्योऽनुवाचयति । श्वेतवर्णेऽश्वेऽन्यवर्णे तदभावे वृषे वा तिष्ठति सति अग्निभ्यः प्रक्रियमाणेभ्योऽनुब्रूहीति प्रेषितो होताते वत्स इति तूचमनुवक्तीति सूत्रार्थः ॥ अग्निर्देवत्यास्तिस्रो गायत्र्यः आद्यावत्सारदृष्टा द्वितीया विरूपदृष्टा तृतीया प्रजापतिदृष्टैव । हे अग्ने ते तव वत्सः पयोव्रतत्वाद्वत्ससमस्त्वत्प्रियो यजमानः परमाच्चित् चिदप्यर्थे उत्कृष्टादपि सधस्थात्सहस्थानात् द्युलोकात् मन आकृत्येति शेषः आयमत् आयच्छति गृह्णाति मनोनिग्रहं करोतीत्यर्थः इतश्च लोप इति [पा° ३.४.९७.] इकारलोपे यमदिति ट्वपम् इषुगमियमां छ इति [पा° ७.३.७७.] छत्वाभावश्छान्दसः । कया गिरा वेदवाचा मन आकृत्येत्यर्थः । कीदृश्या गिरा त्वांकामया त्वां कामयते स्तोतुमिच्छतीति त्वांकामा तया अलुक् । देवैः सह तिष्ठति (56.) यस्मिन्नग्निः तत्सधस्थं द्युलोकः सध माद् इति [पा° ६.३.९६.] सहस्य सधादेशः ॥११५॥

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥११६॥

हे अङ्गिरस्तम अन्यते जीव्यते येनेत्यन् अन्नम् अन् प्राणने क्विप् अन् अन्नं गिरति अत्तीत्यङ्गिराः अतिशयेनाङ्गिरा अङ्गिरस्तमः हे अग्ने पृथक् नानाभूताः विश्वाः सर्वाः ताः प्रसिद्धाः स्तुतयः कामायाभिलाषपूरणाय तुभ्यं त्वयि येमिरे नियम्यन्ते यजमानैरिति शेषः कर्मणि लिट् । कीदृश्यः सुक्षितयः शोभनाः क्षितयो निवासायाभ्यस्ताः स्वर्गादिशुभस्थानप्रदा इत्यर्थः । यजमाना इहकामपूर्त्यै द्युलोकाप्त्यै च मत्तस्त्वामेव स्तुवन्तीति भावः ॥११६॥

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य । सम्राडेको विराजति ॥११७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां द्वादशोऽध्यायः ॥१२॥

अग्निः प्रियेषु अभिरुचितेषु धामसु स्थानेषु धिष्ण्येषु एकोऽसहायभूतः सन्विराजति विशेषेण दीप्यते । कीदृशोऽग्निः भूतस्योत्पन्नस्य भव्यस्य भविष्यतश्च जन-

स्य कामः कामपूरकः । सम्राट् सम्यक् राजमानः शोभमानः भूतस्य भव्यस्य सम्राडीश्वर इति वा । काम्यते सर्वैर्यष्टुमिष्यतऽइति काम इति वा ॥११७॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । रुक्मादिवाचनान्तोऽयं (57.) द्वादशोऽध्याय ईरितः (58.) ॥१२॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-३ ॥१-३॥ ४-पत्नी ॥४॥ स्तोमै-शफाः ॥५॥ सुपर्णोऽसि-पत । ५ ॥६॥ ६-१४ [दुरोणसत्] ॥७-१५॥ १५-१७ ॥१६-१८॥ ॥

II. ॥ १८-२३ [वीलु] ॥१-६॥ २४-२९ ॥७-१२॥३०॥ ॥

III. ॥ ३०-४४ [कामाः स्वाहा] ॥१-१५॥४५॥ ॥

IV. ॥ ४५-५१ [इलामग्रे] ॥१-७॥ ५२-५४ [योनाऽअसीषदन्] ॥८-१०॥ ५५-६१ [योनाऽअभारुखा] ॥११-१७॥६२॥ ॥

V. ॥ ६२-६७ [सुम्नया] ॥१-६॥ ६८ ॥७॥ ६९ [कर्तमस्मि] ॥८॥ ७०-७४ [सञ्जोषसाऽश्विना-इलया-] ॥९-१३॥७५॥ ॥

VI. ॥ ७५-७७ [प्रतिगृभ्णीत] ॥१-३॥ ७८-८० [समिताऽइव] ॥४-६॥ ८१-९१ [अवयतीः समवदन्त दिव-] ॥७-१७॥ ९२-९४ ॥१८-२०॥ ९७ ॥२१॥ ९५ [द्विपच्चतुष्पदस्माँ] ॥२२॥ ९६ [संवदन्ते] ॥२३॥ ९८ ॥२४॥ १०१ ॥२५॥१००॥ ॥

VII. ॥ १०२-११७ [सम्रालिको] ॥१-१६॥११६॥ ॥ सप्तानुवाकेषु षोडशाधिकं शतम् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां त्रयोदशोऽध्यायः ॥ ॥

I. मयि गृह्णाम्यग्रेऽग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ।
मामु देवताः सचन्ताम् ॥१॥

द्वादशेऽध्याये (1.) उखाधारणागार्हपत्यचयनक्षेत्रकर्षणौषधवपनादिमन्त्रा उक्तास्त्रयोदशे पुष्करपर्णाद्युपधानमन्त्रा उच्यन्ते ॥ का॰ [१७.३.२७.] उत्तरवेदिमपरेण तिष्ठन्यजमानो मयि गृह्णामीति जपति । उत्तरवेदेः पश्चात्तिष्ठन्यजमानो जुहोति ॥ अग्निर्देवत्या ककुप् यस्या मध्यपादो द्वादशक आद्यतृतीयावष्टकौ सा ककुप् अत्र मध्यश्चतुर्दशकस्तेन बृधिका । अहं यजमानोऽग्रे प्रथमं मयि आत्मनि अग्निं गृह्णामि धारयामि ततोऽग्निं चिनोमीति शेषः । किमर्थं रायो धनस्य पोषाय पुष्ट्यर्थम् ॥ सुप्रजास्त्वाय शोभना प्रजा यस्य स सुप्रजाः सुप्रजसो भावः सुप्रजास्त्वम् तस्मै दीर्घश्छान्दसः शोभनपुत्रादिनिष्पत्त्यै । सुवीर्याय शोभनसामर्थ्याय वीर्यं शक्तिः । किं च उकारोऽप्यर्थे देवता अपि मां सचन्तां सेवन्तां संगच्छन्ताम् उ एवार्थे वा देवता मामेव सचन्ताम् ॥ १ ॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२॥ऽआ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥ २ ॥

का॰ [१७.४.१.] पुष्करपर्णमुपदधाति स्तम्बे पूर्ववत् । ततोऽर्धर्युः कुशस्तम्बोपरि कमलिनीपत्रमुपदधाति पूर्ववदित्युखासम्भरणवत् तेनापां पृष्ठमिति मन्त्रेण पुष्करऽइत्यन्तेनोपधानं दिवो मात्रयेति तस्य मार्जनमिति सूत्रार्थः ॥ व्याख्यातः [११.२१.] ॥ २ ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ३ ॥

का॰ [१७.३.२१.] तस्मिन्रुक्मधःपिण्डं ब्रह्म जज्ञानमिति । तस्मिन्पुष्करपर्णे पूर्वं कण्ठधृतं रुक्मधःपिण्डमुपदधाति ॥ आदित्यदेवत्या त्रिष्टुप् । वीत्युपसर्ग आव इति (2.) क्रियापदेन सम्बध्यते व्यवहिताश्चेति [पा॰ १.४.८२.] पाणिनिस्मरणात् ब्रह्म बृहत् रुक्मरूपोऽयमादित्यः सीमतः सीमानं मर्यादां भूगोलमध्यभागमारभ्य सुरुचः सुष्ठु रोचन्ते शोभन्ते तान्सुरोचनानिमान् लोकान्वि आवः विवृतानकरोत्स्वप्रकाशेन । कीदृशं ब्रह्म प्रथममादौ पुरस्तात्पूर्वस्यां दिशि जज्ञानं जायमानं दृश्यमानं जनेः ज्ञानचि शपः श्लौ सति जज्ञानमिति रूपम् । किं

च वेनः कामनीयो मेधावी वा स आदित्यः बुध्न्या बुध्नमन्तरिक्षं तत्र भवा बुध्न्या दिशः विवः विवृणोति । सतो विद्यमानस्य मूर्तस्य घटपटादेर्योनिं स्थानमसतोऽमूर्तस्य वाय्वादेश्च योनिं प्रभवं विवः प्रकाशयति वृणोतेः शपि लुप्ते लडि गुणे च व इति रूपमडभाव आर्षः बहुलं छन्दस्यमाङ्योगेऽपीति [पा° ६. ४. ७५.] वचनात् । कीदृशीर्बुध्न्याः उपमाः उप समीपे मान्ति भूतानि यासु ता उपमाः सावकाशा इत्यर्थः । अत एवास्य जगतो विष्ठाः विविधस्थानभूताः विविधं तिष्ठन्ति यासु ताः अम्बाम्बगोभूमीत्यादिना [पा° ८. ३. १७.] षत्वम् । आदित्य एव लोकान्दिशो भूतानि चाभिव्यनक्तीत्यर्थः ॥ ३ ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ४ ॥

का° [१७. ४. ३.] उत्तानं प्राञ्चꣳ हिरण्यपुरुषं तस्मिन्हिरण्यगर्भ इति । तस्मिन्रूपे प्राञ्चमुत्तानं हिरण्यं पुरुषाकारमृग्द्वयेनोपदधाति ॥ हिरण्यगर्भदृष्टा प्रजापतिर्देवत्या त्रिष्टुप् । हिरण्ये हिरण्यपुरुषरूपे ब्रह्माण्डे गर्भरूपेणावस्थितः प्रजापतिर्हिरण्यगर्भः भूतस्य प्राणिजातस्याग्रे समवर्तत प्राणिजातोत्पत्तेः पुरा स्वयं शरीरधारी बभूव । स च जातः उत्पन्नमात्र एक एवोत्पत्स्यमानस्य सर्वस्य जगतः पतिरीश्वर आसीत् । स एव पृथिवीमन्तरिक्षं द्यां द्युलोकमुतापि चेमां भूमिं लोकत्रयं दाधार धारयति तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६. १. ७.] अभ्यासदीर्घः । पृथिवी भूः स्वयम्भूरित्यन्तरिक्षनामसु [निघ° १. ३.] पठितत्वात्पृथिवीशब्देनान्तरिक्षलोकोऽत्रोच्यते । कस्मै काय प्रजापतये देवाय वयं हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः ॥ ४ ॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ ५ ॥

देवश्रवोदृष्टादित्यदेवत्या त्रिष्टुप् । यः पूर्वः प्रथमो मुख्यो द्रप्स आदित्यः पृथिवीमन्तरिक्षमनुचस्कन्द अनुस्कन्दति गच्छति सिञ्चतीत्यर्थः मनुष्यादिधारणाय । द्यां द्युलोकं चानुसिञ्चति आकृतिपरिणामभूतेन रसेन देवादिधारणाय । य इमं

योनिं स्थानं भूलोकमनुस्कन्दति आगच्छति आकृतिग्रहणाय । एवं समानं योनिं सर्वेषां तुल्यं स्थानं लोकत्रयमनु संचरन्तं द्रप्समादित्यं सप्त स्रोत्रा अनु जुहोमि विभक्तिव्यत्ययः सप्तसु स्रोत्रासु दिक्षु स्थापयामि हिरण्यपुरुषरूपेण सर्वदिक्षु सूर्यमेव स्थापयामीत्यर्थः असौ वाऽआदित्यो द्रप्सो दिशः सप्त स्रोत्रा अमुमादित्यं दिक्षु प्रतिष्ठापयतीति [७.४.१.२०.] श्रुतेः पूर्वादि चतस्रो दिशः अध एका उपर्येका मध्ये चैकेति सप्त दिशो ज्ञेयाः ॥५॥

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥६॥

का० [१७.४.६.] उपतिष्ठते यजमानो नमोऽस्त्विति । यजमानो हिरण्यपुरुषं पश्यन्नृक्त्रयं पठेत् ॥ सर्पदेवत्यास्तिस्रोऽनुष्टुभः । ये के च ये केचित् सर्पन्ति सर्पा लोकाः पृथिवीमनु गताः तेभ्यः सर्पेभ्यो नमोऽस्तु नमस्कारो भवतु । अन्तरिक्षे लोके ये वर्तमानाः सर्पाः ये च दिवि द्युलोके ये वर्तमानाः सर्पास्तेभ्यः सर्पेभ्यो नमोऽस्तु इमे वै लोकाः सर्पा इति [७.४.१.२५.] श्रुतेः सर्पशब्देन लोका उच्यन्ते ॥६॥

या इषवो यातुधानानां ये वा वनस्पतीँरनु ।
ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥७॥

यातुं यातनां दुःखं दधति ते यातुधाना रक्षःप्रभृतयस्तेषां याः सर्पजातय इषवो बाणरूपेण वर्तन्ते ये वान्ये वनस्पतीन् चन्दनादिवृक्षाननुवेष्य स्थिताः ये वा ये चान्ये अवटेषु बिलेषु शेरते स्वपन्ति तेभ्यः सर्पेभ्यो नमोऽस्तु ॥७॥

ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥८॥

दिवो द्युलोकस्य रोचने दीप्तस्थाने ये वामी सर्पा अस्माभिरदृश्यमानाः सन्ति रोचनो ह नामैष लोको यत्रैष एतत्तपतीति श्रुतिः । तथा सूर्यस्य रश्मिषु किरणेषु ये च सर्पा वसन्ति । येषां सर्पाणामप्सु जलेषु सदः स्थानं कृतं तेभ्यः सर्पेभ्यो नमोऽस्तु ॥८॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२॥ऽइभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥

का° [१७. ४. ७.] उपविश्य पञ्चगृहीतं जुहोति पुरुषे कृणुष्व पाज इति प्रत्यृचं प्रतिदिशं परिसर्पम् । आज्यं संस्कृत्य पञ्चगृहीतमादायात्मानमारुह्य पुरुषान्तिके उपविश्य प्रतिदिशं परिसृप्य-परिसृप्य पुरुषोपरि पञ्चऽग्निर्जुहोतीति सूत्रार्थः ॥ वामदेवदृष्टा राक्षोघ्नाः प्रतिसराः अग्निदेवत्याः पञ्च त्रिष्टुभः । हे अग्ने पाजः बलं कृणुष्व कुरुष्व पाज इति बलनामसु [निघ° २. १.] पठितम् । तत्र दृष्टान्तः पृथ्वीं विशालां प्रसितिं न प्रसितिमिव प्रसितिर्जालं प्रसितिः प्रसयनात्तन्तुर्वा जालं वेति [निरु° ६. १२.] यास्कोक्तेः षिञ् बन्धने प्रकर्षेण सीयन्ते बध्यन्ते पक्षिणो यया सा प्रसितिः ताम् नकार इवार्थः पक्षिग्रहणाय प्रसारितं जालमिव शत्रुग्रहणाय बलं प्रसारयेत्यर्थः । ततो राजेव नृप इवामवान्सहायवानिभेन गजेन याहि शत्रून्प्रति गच्छ अम् गतौ भजने शब्दे अमन्ति भजन्ति स्वामिनऽइत्यमाः सेवकास्तेऽस्य सन्तीत्यमवान् पचाद्यजन्तादमशब्दान्मतुप्प्रत्ययः । हे अग्ने अस्ता शत्रूणां क्षेप्तासि अतो रक्षसः राक्षसान्विध्य ताडय व्यध ताडने दिवादिर्ब्राह्मन् ग्रहादित्वात्सम्प्रसारणम् कैः तपिष्ठैः तापकतमैरायुधैः तपन्ति संतापयन्तीति तपूंषि अतितपूंषि तपिष्ठानि तैः तुरिष्ठेमेयःस्विति [पा° ६. ४. १५४.] इष्ठनि परे तृचो लोपः । कीदृशस्त्वं तृष्वीं प्रसितिं विभक्तिव्यत्ययः तृष्ण्या क्षिप्रया प्रसित्या जालेन अनु द्रूणानः शत्रून्मारयन् द्रू हिंसायां क्र्यादिः शानच्प्रत्ययः द्रूणीतिऽसौ द्रूणानः ॥ १ ॥

तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो विसृज विष्वगुल्काः ॥ १० ॥

हे अग्ने तव ये भ्रमासः भ्रमा वातोद्भूता ज्वालासमूहाः पतन्ति इतस्ततो गच्छन्ति कीदृशा भ्रमाः आशुया आशवः शीघ्रगमनाः आशुशब्दात्परस्य जसः सुपां सुलुगित्यादिना यादेशः । तैर्भ्रमैः तपूंषि तपन्ति संतापयन्ति तानि तपूंषि तापयितॄणि रक्षांसि पतङ्गान् पतन्तः सन्तो गच्छन्तीति पतङ्गाः पिशाचास्तांश्चानुस्पृश ज्वालाभिस्तान्दहेत्यर्थः । कीदृशस्त्वं धृषता धृष्णोतीति धृषन् तेन धृषता प्रगल्भेन

धृष्टिन ज्वालौघेन शोशुचानः दीदीप्यमानः अत्यन्तं शोचते शोशुच्यतऽइति शोशुचानः शुच दीप्तावित्यस्माद्यङ्लुगन्ताच्छानच्प्रत्ययः । तथा जुह्वा स्रुचा ह्रूयमान इति शेषः । असंदितः अखण्डितः । ईदृशः सन्विधक् सर्वत्र (3.) तिर्यगूर्ध्वमधश्च ऊल्काः ज्वाला विसृज रक्षोघाताय मुञ्चेत्यर्थः ॥ १० ॥

प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽअस्या अदब्धः ।
यो नो दूरेऽअघशंसो योऽअन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥ ११ ॥

नोऽस्माकं दूरे योऽघशंसः अघं पापं शंसतीत्यति अघशंसः अस्मद्द्वेष्टा यो दूरे वसति यश्चान्ति समीपे अघशंसः हे अग्ने तं प्रति स्पशः स्पश बन्धने स्पशयन्ति बध्नन्तीति स्पशो बन्धनकृतः प्रणिधीन्विसृज प्रेरय । अस्या अस्मदीयायाः विशः प्रजायाः पायुः पातीति पायुः पालको भव । कीदृशस्त्वं तूर्णितमः तूर्णं वेगोऽस्यास्तीति तूर्णी अत्यन्तं तूर्णी तूर्णितमः वेगवत्तरः । अदब्धः अनुपहिंसितः । हे अग्ने एवमनुग्रहं प्रवृत्तस्य ते तव मा किः मा कश्चित् व्यथिः व्यथयतीति व्यथिः व्यथकः शत्रुरादधर्षीत् धार्ष्ट्यं मा करोतु । दूरसमीपस्थानस्मद्वैरिणः प्रति त्वरतो बन्धकान्प्रेरय केनाप्यहिंसितोऽस्मत्प्रजापालको भव राक्षसाश्च त्वां प्रति धृष्टा मा सन्त्वित्यर्थः । धृषो धातोर्लुङि द्वित्वमडभावश्च मायोगात् ॥ ११ ॥

उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२॥ ओषतात्तिग्महेते ।
यो नोऽअरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ १२ ॥

हे अग्ने त्वमुत्तिष्ठ ततः प्रत्यातनुष्व ज्वाला विस्तारय तिग्मा हेतयो यस्य स तिग्महेतिः तिग्मं तेजतिरुत्साहकर्मणः तत्सम्बोधनं हे तिग्महेते उत्साहवदायुध अमित्राञ्छत्रून् त्वं न्योषतात् नितरां दह उष दाहे तुह्योस्तातङ्गिति [पा० ७.१.३५.] तातङादेशः । हे समिधान समिन्धे दीप्यतेऽसौ समिधानः तत्सम्बुद्धौ हे समिधान दीप्यमान नोऽस्माकं योऽरातिं चक्रे करोति दानं प्रतिषेधति तं नीचा नीचैः कृत्वा धक्षि दह दह भस्मीकरणे बहुलं छन्दसीति [पा० २.४.७३.] शपि लुप्ते लटि मध्यमैकवचने धक्षीति रूपम् । तत्र दृष्टान्तः शुष्कमतसं न न इवार्थः अतसो वृक्षः शुष्कं वृक्षमिवादातारं निर्दहेत्यर्थः ॥ १२ ॥

a. ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥

b. अग्नेष्ट्वा तेजसा सादयामि ॥ १३ ॥

हे अग्ने ऊर्ध्वो भव उद्युक्तो भव अस्मदधि अस्माकमुपरि वर्तमानान् शत्रून्प्रतिविध्य प्रतिताडय । दैव्यानि देवसम्बन्धीनि कर्माणि आविः कृणुष्व प्रकटय । किं च यातुजूनां यातुधानानां स्थिरा स्थिराणि धनूंषि अवतनुहि अवतारय । किं च जाम्यजामिशब्दौ पुनरुक्तापुनरुक्तवचनौ जामिमजामिं पुनरुक्तमपुनरुक्तं कृत्वा पुनः पुनस्ताडितमताडितं वा शत्रून् प्रमृणीहि मृणातिर्मारणार्थः रिपून्मारय ॥ का° [१७. ४. १२.] घृतपूर्णामग्नेष्ट्वेति । कार्ष्मर्यमयीं पादमात्रदीर्घां षडङ्गुलविपुलां घृतपूर्णां प्रागग्रां स्रुचमग्नेष्ट्वेति यजुषाग्निर्मूर्धेति ऋचा चोपदधाति ॥ अग्नेयं यजुः । हे स्रुक् अग्नेः सम्बन्धिना तेजसा त्वा त्वां सादयामि ॥ १३ ॥

a. अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥

b. इन्द्रस्य त्वौजसा सादयामि ॥ १४ ॥

अग्निर्मूर्धेति व्याख्याता [३. १२.] ॥ का° [१७. ४. १३.] एवमौडुम्बरीमुत्तरतो दधिपूर्णामिन्द्रस्य त्वेति । एवंविधमेवौडुम्बरीं दधिपूर्णां स्रुचमुत्तरे उपदधाति ॥ इन्द्रस्य त्वेति यजुषा भुव इति ऋचा च ॥ इन्द्रदेवत्यं यजुः । हे स्रुक् इन्द्रस्यौजसा तेजसा त्वां सादयामि स्थापयामि ॥ १४ ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चक्रिषे हव्यवाहम् ॥ १५ ॥

त्रिशिरोदृष्टाग्निदेवत्या त्रिष्टुप् । हे अग्ने त्वं यदा हव्यवाहं हव्यं वहतीति हव्यवाट् तां हविषो वोढ्रीं जिह्वां ज्वालां चक्रिषे करोषि लडर्थे लिट् । तदा यज्ञस्य द्रव्यदेवतात्यागात्मनो नेता भुवः भवसि रजसः यज्ञपरिणामद्रपोदकस्य च नेता भवसि जगद्रक्षार्थम् भवतेर्लेटि मध्यमैकवचने सिपि इतश्च लोप इति [पा° ३. ४. १७.] इकारलोपे लेटोऽडाटावित्यडागमे [पा° ३. ४. १४.] अचि श्नुधातुभ्रुवामिति

[पा° ६. ४. ७७.] उवङादेशे च कृते भुव इति रूपम् । कुत्र नेता भवसीत्यत आह यत्र यस्मिन्स्थाने शिवाभिर्मङ्गलरूपाभिर्नियुद्भिरश्वाभिः त्वं सचसे सम्बन्धं प्राप्नोषि । नियुतो वायोरित्युक्तेर्नियुतो नाम वायोरश्वाः ताभिर्वायुर्लक्ष्यते वायुना चान्तरिक्षं लक्ष्यते । यत्र च दिवि मूर्धानमादित्यं दधिषे धारयसि लिङर्थे । किम्भूतं मूर्धानं स्वर्षां स्वः स्वर्गं सनोति ददाति स्वर्षाः षणु दाने विट्प्रत्ययः विड्वनोरनुनासिकस्येदिति [पा° ६. ४. ४१.] नकारस्याकारः यद्वा स्वः स्वर्गे स्यति तिष्ठतीति स्वर्षाः तम् षोऽन्तकर्मणि क्विप् । अन्तरिक्षे द्युलोके च यज्ञस्य रजसश्च नेता भवसीत्यर्थः । यत्रेत्यस्य संहितायां निपातस्य चेति [पा° ६. ३. १३६.] दीर्घः यस्य तवैतत्कर्म तं त्वां स्रुग्रूपेण सादयामीति शेषः ॥ १ ॥

II. ध्रुवासि धरुणास्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह ॥ १६ ॥

का° [१७. ४. १५.] स्वयमातृणां पुरुषे शर्करां छिद्रां ध्रुवासीति । पुरुषोपरि ध्रुवेत्यादिकण्डिकाचतुष्टयेन स्वयमातृणामुपदधाति कीदृशीं शर्करां पाषाणमयीं छिद्रां स्वाभाविकछिद्रयुतां सछिद्राश्ममयोष्टकैव स्वयमातृणोच्यतऽइति सूत्रार्थः ॥ ऊर्धबृहती द्वादशाक्षरत्रिपादोर्धबृहती अत्र प्रथमस्त्रयोदशार्णस्तृतीयो दशार्णः । हे स्वयमातृणे त्वं ध्रुवा स्थिरासि । कीदृशी त्वं धरुणा भूमिरूपेण विश्वस्य धारयित्री । विश्वं करोतीतिविश्वकर्मा तेन सर्वस्य कर्त्रा प्रजापतिना आस्तृता उपहिता । समुद्रो रुक्मः त्वा त्वां मा उद्वधीत् मा हन्तु । सुपर्णः पुरुषश्च त्वां मोद्वधीत् रुक्मो वै समुद्रः पुरुषः सुपर्ण इति [७. ४. २. ५.] श्रुतेः समुद्रसुपर्णशब्दाभ्यां रुक्मपुरुषावुच्येते । त्वं चाव्यथमाना अचलन्ती सती पृथिवीं दृꣳह भूमिं दृढीकुरु ॥ १६ ॥

प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् ।
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥ १७ ॥

अनुष्टुप् । हे स्वयमातृणे प्रजापतिः त्वा त्वां सादयतु स्थापयतु क्व अपां जलानां पृष्ठे उपरि । समुद्रस्य जलसंघातस्य एमन् एमनि अवस्थाने सादयतु इणो

धातोर्मनिन्प्रत्यये एमन्नितीति नूपम् सुपां सुलुगिति [पा° ७. १. ३९.] सप्तम्या लुक् । किम्भूतां त्वां व्यचस्वतीं व्यचनं व्यचस्तदस्या अस्तीति व्यचस्वती तामभिव्याप्तियुतां । प्रथस्वतीं प्रथनं प्रथः पृथुत्वं तदस्या अस्तीति प्रथस्वती तां विस्तारयुक्ताम् । त्वमपि प्रजापतिसादिता सती प्रथस्व अस्याश्चितिः प्रथनं कुरु यतस्त्वं पृथिव्यसि पृथिव्युत्पन्नत्वात् ॥ १७ ॥

भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः ॥ १८ ॥

प्रस्तारपङ्क्तिः आद्यौ चेत्प्रस्तारपङ्क्तिरित्युक्तेर्यत्राद्यौ द्वादशकावल्यावष्टकौ सा प्रस्तारपङ्क्तिः अत्र त्वाद्य एकादशको द्वितीयस्त्रयोदशकस्तृतीयतुर्यौ पञ्चकौ पञ्चमः षडक्षरः एवं पञ्च पादाः । हे स्वयमातृण्णे त्वं भूः सुखानां भावयित्र्यसि । भूमिः पृथिव्यसि भूम्यभिमानिनी देवतासीत्यर्थः । अदितिर्देवमातासि । विश्वधायाः विश्वं दधाति पुष्णातीति विश्वधायाः विश्वं निहितमस्यामिति वा । विश्वस्य भुवनस्य सर्वस्य भूतग्रामस्य धर्त्री धारयित्री तादृशी त्वं पृथिवीं यच्छ नियतां कुरु पृथिवीं दृंह दृढीकुरु पृथिवीं मा हिंसीः पृथिव्या हिंसां मा कुरु ॥ १८ ॥

विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्या स्वस्त्या ह्रदिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा
सीद ॥ १९ ॥

यजुः एकाधिकार्ष्यनुष्टुप् । हे स्वयमातृण्णे विश्वस्मै सर्वस्मै प्राणायापानाय व्यानायोदानाय प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय प्रतिष्ठायै कीर्त्यै चरित्राय शास्त्रीयाचरणाय च । प्राणिनामेतत्सर्वसिद्ध्यर्थं त्वां सादयामीति शेषः । किं च मह्या महत्या स्वस्त्या योगक्षेमसम्पत्त्या शंतमेनात्यन्तं सुखकारिणा ह्रदिषा गृहेण चाग्निस्त्वा त्वामभिपातु सर्वतो रक्षतु । तया देवतयानुगृहीता त्वं ध्रुवा स्थिरा सती सीदोपविश अङ्गिरस्वदङ्गिरसां चयनानुष्ठाने यथा त्वं स्थिरस्थिता तद्वदिहोपविश ॥ १९ ॥

काण्डात्काण्डात्प्ररोहन्ती परुषः-परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥२०॥

का° [१७.४.१८.] मूलाग्रवर्तीं दूर्वां तस्यां पुरस्ताद्भूमिप्राप्तां काण्डात्काण्डादिति । तस्यां स्वयमातृण्णायां काण्डादिति ऋग्द्वयेन पुरस्ताद्भूमिगताग्रं मूलाग्रयुतां दूर्वामुपदधाति ॥ अग्निर्दृष्टे दूर्वेष्टकादेवत्ये द्वे अनुष्टुभौ । मूलैर्भूसम्बद्धं पर्व काण्डं भूम्यसम्बद्धं परुः । हे दूर्वे दूर्वेष्टके काण्डात्काण्डात्प्रतिकाण्डं परुषः-परुषः प्रतिपरुः भूमिसम्बद्धासम्बद्धेभ्यः सर्वपर्वभ्यः सकाशाद्यथा त्वं परि समन्तात्प्ररोहन्ती अङ्कुरवती वर्तसे नित्यवीप्सयोरिति [पा° ८.१.४.] वीप्सार्थे काण्डपरुषोर्द्वित्वम् । एवेत्यव्ययमेवमित्यर्थे निपातस्य चेति [पा° ६.३.१३६.] संहितायां दीर्घः हे दूर्वे एवं स्वाङ्कुरविस्तारवत् सहस्रेण शतेन च सहस्रशतशब्दावसंख्याथौ असंख्यैः पुत्रपौत्रनप्त्रादिभिर्नोऽस्मान्प्रतनु विस्तारय ॥२०॥

या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥२१॥

हे देवि दीप्यमाने हे इष्टके या त्वं शतेन काण्डानां प्रतनोषि विस्तारयसि सहस्रेण चाङ्कुराणां विरोहसि विविधं प्ररूढा भवसि वयं हविषा सह ते स्थानं विधेम परिचरेम ॥२१॥

यास्तेऽग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नोऽद्य सर्वाभी रुचे जनाय नस्कृधि ॥२२॥

का° [१७.४.२०.] यास्तेऽइति द्वियजुषं द्वितीये । दूर्वेष्टकापुरस्ताद्द्वितीये पञ्चालोके यास्तेऽइति ऋग्द्वयेन द्वियजुःसंज्ञां पञ्चेष्टकामुपदधातीति सूत्रार्थः ॥ इन्द्राग्निर्दृष्टे अग्निर्देवत्ये द्वे अनुष्टुभौ । हे अग्ने याः ते तव रुचः दीप्तयः सूर्ये सूर्यमण्डले वर्तमानाः सत्यः दिवं द्युलोकमातन्वन्ति प्रकाशयन्ति रश्मिभिः स्वद्रूपभूतैः किरणैः । ताभिः सर्वाभिः रुग्भिः नोऽस्मान्रुचे रोचनाय शोभायै अद्यास्मिन्यज्ञे कृधि कुरु । जनाय पुत्रपौत्रादिकाय च कुरु । द्युलोकप्रकाशिकाः सर्वाः कान्तीः

पुत्रांश्चास्मभ्यं देहीत्यर्थः । यद्वा विभक्तिव्यत्ययः नोऽस्माकं जनाय जनं पुत्रादिकं ताभिः रुग्भिः रुचे शोभायै कुरु जगत्प्रसिद्धं पुत्रादिकं देहीत्यर्थः ॥ २२ ॥

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥ २३ ॥

हे देवाः हे इन्द्राग्नी हे बृहस्पते वो युष्माकं सम्बन्धिन्यो या रुचः दीप्तयः सूर्ये सूर्यमण्डले सन्ति गोषु धेनुषु अश्वेषु तुरगेषु च या युष्माकं रुचः सन्ति ताभिः सर्वाभिः रुग्भिः कृत्वा नोऽस्मभ्यं रुचं धत्त दत्त तत्सदृशप्रभानस्मान्कुरुतेत्यर्थः ॥ २३ ॥

a. विराड्ज्योतिरधारयत् ॥ b. स्वराड्ज्योतिरधारयत् ॥ c. प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ अग्निष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥ २४ ॥

का° [१७.४.२२.] विराट् स्वराडिति रेतःसिचौ प्रतिमन्त्रम् । द्वियजुषः पूर्वे अव्यवहिते रेतःसिचौ द्वे पञ्चेष्टके प्राग्लक्षणे अनूकमभितो विराट् स्वराडिति प्रतिमन्त्रमुपदधाति विराडित्युत्तरां स्वराडिति दक्षिणामिति सूत्रार्थः ॥ द्वे यजुषी इदंलोकादोलोकदेवत्ये क्रमात् यजुरनुष्टुभौ । विशेषेण राजतऽइति विराट् अयं लोको ज्योतिरग्निलक्षणमधारयत् धारयति । स्वेनैव राजतऽइति स्वराट् असौ लोको ज्योतिरादित्यलक्षणमधारयत् धारयति । विराडयं लोकः स इममग्निं ज्योतिर्धारयत्यसौ वै लोकः स्वराट् सोऽमुमादित्यं ज्योतिर्धारयतीति [७.४.२.२३.] श्रुतेः ॥ का° [१७.४.२३.] प्रजापतिरिति विश्वज्योतिषम् । रेतःसिग्भ्यां पुरो यज्ञमानकृतां प्रथमां विश्वज्योतिःसंज्ञामिष्टकां पञ्चां प्राग्लक्षणामुदङ्मुखोऽनूके उपदधाति ॥ विश्वज्योतिर्देवतं यजुः शक्वरीछन्दस्कम् । पृथिव्याः पृष्ठे उपरि ज्योतिष्मतीं ज्योतिषोपेतां त्वा त्वामिष्टकां प्रजापतिः सादयतु स्थापयतु किमर्थं विश्वस्मै सर्वस्मै प्राणायापानाय व्यानाय प्राणादिसम्पत्त्यर्थम् किं च हे इष्टके त्वं विश्वं सर्वं ज्योतिर्यच्छ निगृह्णीष्व देहि वा अग्निश्च ते तवाधिपतिः स्वामी तया देवत-

याग्निलक्षणया ध्रुवा स्थिरा सती सीद उपविश अङ्गिरस्वदङ्गिरसां चयने यथा स्थिरासीदः तद्वदत्रापीत्यर्थः ॥ २४ ॥

मधुश्च माधवश्च वासन्तिकावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । ये अग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे वासन्तिकावृतूऽअभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥ २५ ॥

का° [१७.४.२४.] ऋतव्ये मधुश्च माधवश्चेति । विश्वज्योतिषः पुरो द्वे पक्षे प्राग्लक्षणे ऋतव्येष्टके अनूकमभित उदक्शुख उपदधाति ॥ ऋतुदेवतं यजुः अष्टोत्तरशताक्षरत्वाच्छन्दो नास्ति । मधुश्चैत्रो मासः माधवो वैशाखः तावुभौ वासन्तिकौ वसन्तसम्बन्धिनौ ऋतू अवयवौ यद्वा मधुमाधवौ वसन्त एव वासन्तिक ऋतुः द्विवचनमेकवचनार्थम् हे तादृश वसन्ताख्य ऋतो त्वं चीयमानस्याग्नेरन्तःश्लेषोऽसि अन्तर्मध्ये व्यवस्थितः सन् श्लेषकोऽसि यथा कुड्यस्यान्तर्दार्ढ्याय काष्ठपाषाणादयः श्लिष्यन्ति तद्वत् । ममाग्निं चिन्वतो यजमानस्य ज्यैष्ठ्याय ज्येष्ठत्वायोत्कर्षाय इमे द्यावापृथिवी द्यावापृथिव्यौ कल्पन्तां स्वोचितमुपकारं सम्पादयतां यद्वा ममेति तवस्थाने व्यत्ययः द्यावाभूमी तवोत्कर्षाय कल्पन्ताम् आपश्चौषधयश्च तव ज्येष्ठत्वाय कल्पन्ताम् समानं व्रतं कर्म येषां ते सव्रताः एकस्मिन् चयनाख्यकर्मण्यवस्थिताः पृथक् नानाभूताः अग्नयः स्वयमातृण्णाख्या इष्टकाः तव ज्यैष्ठ्याय कल्पन्ताम् अग्नयो ह्येते पृथग्यदेता इष्टका इति श्रुतेरग्निशब्देनेष्टका उच्यन्ते । किं च इमे द्यावापृथिवी अन्तरा अनयोर्द्यावापृथिव्योर्मध्ये वर्तमानाः समनसः एकमनस्का ये अग्नयः अन्यैरपि चिताः तेऽपि वासन्तिकावृतू वसन्तमृतुमभिकल्पमाना सम्पादयन्तः सन्त अभिसंविशन्तु एतत्कर्माश्रयन्तु । तत्र दृष्टान्तः इन्द्रमिव देवाः यथा देवा इन्द्रं परिचरणायाभिसंविशन्ति एवमन्येष्टका वसन्तं परिचरणायाभिसंविशन्तु ॥ सादयति तया देवतया सादिते हे ऋतव्येष्टके युवामङ्गिरसां कर्मणीव ध्रुवे स्थिरे सत्यौ सीदतमुपविशतम् ॥ २५ ॥

अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः ।

सहस्रवीर्यासि सा मा जिन्व ॥२६॥

का० [१७.४.२५.] अषाढासीत्यषाढाम् । अषाढासंज्ञकामिष्टकां पत्नीकृतां पञ्चां प्राग्लक्षणामृतव्याभ्यां पूर्वां संलग्नामनूके उपदधाति ॥ सवितृदृष्टेष्टकादिवत्या विराडनुष्टुप् । हे इष्टके त्वमषाढासि शत्रून्न सहते (4.) इत्यषाढा तथा च श्रुतिः [७.४.२.३३.] ते देवा एतामिष्टकामपश्यन्नषाढामिमामेव तामुपादधत तामुपधायासुरात्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहत तस्मादषाढेति । कीदृशी त्वं सहमाना सहतऽइति सहमाना अभिभवनशीला स्वभावतः अतोऽरातीः अदानशीलाः प्रजाः सहस्वाभिभव । पृतनां संग्राममिच्छन्ति ते पृतनायन्ति पृतनायन्तीति पृतनायन्तः क्यङलाक्षतृप्रत्ययः तान्पृतनायतः संग्रामेच्छून् शत्रून्सहस्व । किं च त्वं सहस्रवीर्या बहुसामर्थ्या यासि सा मा मां जिन्व प्रीणीहि ॥२६॥

III. मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥२७॥

का० [१७.४.२७.] कूर्मं दधिमधुघृतैरनक्ति मधु वाता इति । मिश्रितैर्दधिमधुघृतैर्मन्त्रलक्षणेन कल्पमनक्ति ॥ गोतमदृष्टा विश्वेदेवदेवत्यास्तिस्रो गायत्र्यः ऋतं यज्ञमिच्छतीति ऋतयन् तस्मै ऋतयते यजमानाय वाता वायवो मधु मधुमन्तो रसवन्तो वान्त्विति शेषः । ऋतयतीत्यत्र क्यचि चेति [पा० ७.४.३३.] प्राप्तस्येत्वस्य न छन्दस्यपुत्रस्येति [पा० ७.४.३५.] अभावः अश्वाघस्यादिति [पा० ७.४.३७.] अश्वाघयोरिव क्यच्यात्वविधानादकृत्सार्वधातुकयोः [पा० ७.४.२५.] इत्यात्वमपि न । संहितायां तु छान्दसो दीर्घः । मधु मधुमानित्यग्रे [२८.] मतुप्प्रत्ययदर्शनात् सर्वत्र मधुशब्दाग्रे मतुब्ज्ञेयः । सिन्धवः स्यन्दमाना नद्यः समुद्रा वा मधु मधुमत् रसवत् उदकं क्षरन्ति स्रवन्त्वित्यर्थः तिङां तिङ इति [पा० ७.१.३९. वा० ३.] लोटो लडादिशः । ओषधीः ओषधयः नोऽस्माकं माध्वीः मधुररसोपेताः सन्तु ॥२७॥

मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥२८॥

नक्तं रात्रिर्नोऽस्माकं मधु मधुमत् मधुररसोपेतमानन्दकरमस्तु । उतापि च उषसो दिवसा अपि मधुमन्तः सन्तु । पार्थिवं रजः पृथिवीलोको मातृभूतो मधुमत् मधुररसोपेतमस्तु । पिता पितृभूतो द्यौः द्युलोको मधु मधुमान्मधुररसोपेतोऽस्तु ॥२८॥

मधुमान्नो वनस्पतिर्मधुमाँ२॥ऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥२१॥

वनस्पतिरश्वत्थादिर्नोऽस्माकं मधुमान् रसवान्यज्ञसाधनभूतोऽस्तु सूर्यो मधुमान्संतापराहित्यलक्षणमाधुर्यरसोपेतोऽस्तु गावः यज्ञसाधनभूता रश्मयः नोऽस्माकं माध्वीः मधुमत्यो रसवत्यो भवन्तु रसो वै मधिति [७.५.१.४.] श्रुतेः वातादीनि रसवन्त्यस्माकं भोग्यानि भवन्त्विति सर्वोऽर्थः ॥२१॥

अपां गम्भन्त्सीद मा त्वा सूर्योऽभितापस्त्वीन्माग्निर्वैश्वानरः ।

अक्षिन्नपत्राः प्रजा अनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥३०॥

का० [१७.४.२८.५.१.] अरत्निमात्रेऽषाढां दक्षिणेनावकासूपरिष्टाच्च पुरुषमभिमुखमपां गम्भन्निति तिसृभिः । अषाढादक्षिणदेशे हस्तमात्रे पञ्चालोकद्वयमन्तराले मुक्त्वा तृतीये पञ्चालोके पूर्वमेव स्थापितास्ववकासु शेवालेषु (5.) पुरुषसंमुखमृक्त्रयेण कूर्ममुपदधातीति सूत्रार्थः ॥ स्वराट्पङ्क्तिः दशाक्षरचतुष्पादा तृतीयो द्वादशाक्षरः कूर्मदेवत्या । कूर्मः प्रजापतिरादित्यो वा । तृतीया द्यावापृथिवीया । हे कूर्म अपां जलानां गम्भन् गम्भनि गम्भीरे स्थाने रविमण्डले त्वं सीद उपविश एतद्वापां गम्भिष्ठं यत्रैष एतत्तपतीति [७.५.१.८.] श्रुतेः । तत्रोपविष्टं त्वा त्वां सूर्यो माभितापस्त्वीत् अभितो मा संतापयतु । वैश्वानरः सर्वनरहितोऽग्निश्च मा संतापयतु । त्वं चात्र स्थितः सन् प्रजा इष्टकारूपा अनुवीक्षस्व निरन्तरं पश्य । कीदृशीः प्रजाः अक्षिन्नपत्राः अक्षिन्नान्यनवखण्डितानि पत्राणि अवयवा यासां ताः अखण्डिता इष्टकाः कुर्वित्यर्थः इमा वै सर्वाः प्रजा या इमा इष्टकास्ता अरिष्टा अनार्त्ता अनुवीक्षस्वेति [७.५.१.८.] श्रुतेः । किं च दिव्या दिवि भवा वृष्टिः त्वा त्वामनु सचतां सेवतामुदकेन नित्यं सिक्तो भवेत्यर्थः ॥३०॥

त्रीत्त्समुद्रान्त्समसृपत्स्वर्गान्पां पतिर्वृषभ इष्टकानाम् ।

पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥३१॥

का० [१७.५.२.] घटयति मध्यमयेति । तिसृणां मध्यमया त्रीत्समुद्रानिति ऋचा हस्तस्थमेव कूर्मं कम्पयतीति सूत्रार्थः । कूर्मदेवत्या त्रिष्टुप् । हे कूर्म यो भवान् त्रीन् समुद्रान् लोकान् समसृपत् सम्यक् प्राप्तो भवति सृप्लृ गतौ पुषादीत्यादि-

ना [पा° ३. १. ५९.] चेरङ् । समुद्रवन्ति (6.) स्वकारणात्समुद्रवन्तीति समुद्रा लोकास्तान् कीदृशान् स्वर्गान् भोगसाधनभूतान् । कीदृशो भवान् अपां पतिः जलेशः इष्टकानां वृषभः वर्षिता । किं च यत्र यस्मिन्स्थाने पूर्वे पुरातनाः कूर्माः अन्येद्यग्निषूपक्षितां परेताः परागताः सुकृतस्य शोभनकृतस्याग्नेस्तत्र तस्मिन् लोके स्थाने त्वं गह्व किं कुर्वन् पुरीषं कृतान्यश्नून्वसानः आच्छादयन् ॥ ३१ ॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥३२॥

व्याख्याता [८. ३२.] ॥ ३२ ॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ३३ ॥

का° [१७. ५. ३.] उलूखलमुसले स्वयमातृण्णामुत्तरेणारत्निमात्रेऽश्वौदुम्बरे प्रादेशमात्रे चतुरस्रमुलूखलं मध्यसंगृहीतमूर्ध्वं वृत्तं मुसलं दक्षिणमुलूखलाद्विष्णोः कर्माणीति । चतुष्कोणं मध्यसंकुचितं खातहीनमुदुम्बरतरुजमूर्ध्वमुलूखलम् वृत्तं मुसलम् ते उभे स्वयमातृण्णोत्तरे देशे तन्मध्याद्धस्तमात्रे तृतीये लोके विष्णोरिति मन्त्रेण सहैवोपदधातीति सूत्रार्थः ॥ व्याख्याता [६. ४.] ॥ ३३ ॥

ध्रुवासि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्योऽधि ज्ञातवेदाः ।
स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वक्षत्तु प्रजानन् ॥ ३४ ॥

का° [१७. ५. ४.] उलूखलऽउखां कृत्वोपशयां पिष्ट्वा न्युप्य पुरस्ताद्ध्रुवासीत्युखाम् । पूर्वमुलूखलोपर्युखां तूष्णीं कृत्वा तत उपशयां मृदं पिष्ट्वोखापुरस्ताद्भूमौ प्रक्षिप्य तत्रोखां मन्त्रद्वयेनोपदध्यादिति सूत्रार्थः ॥ उखादेवत्या त्रिष्टुप् हे उखे धरुणा जगतो धारयित्री त्वं ध्रुवा स्थिरासि अथाग्निजनकत्वेनोखा स्तूयते । योऽग्निरितोऽस्याः उखायाः सकाशात् प्रथममादौ ज्ञातवेदाः ज्ञातप्रज्ञानोऽग्निरधिजज्ञे तत एभ्यो योनिभ्यः स्वकारणेभ्योऽरण्यादिभ्योऽधिजज्ञे जायते । सोऽग्निः प्रजानन् स्वाधिकारं प्रकर्षेण जानानः सन् गायत्र्या त्रिष्टुभानुष्टुभेति छन्दस्त्रयेण देवेभ्यो देवार्थं हव्यमस्मद्धविर्वक्षत्तु ॥ ३४ ॥

इषे राये रमस्व सक्षणि शुम्नऽऊर्जेऽपत्याय ।

सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम् ॥३५॥

उखादिवत्या वृहती । हे उखे त्वं रमस्व अत्र क्रीडां कुरु किमर्थम् इषे अन्नार्थं रये धनार्थं सहसे बलाय युम्ने युम्नाय यशोऽर्थं युम्नं द्योततेर्यशो वान्नं वेति [निरु° ५.५.] यास्कः ऊर्जे उपसेचनाय पयोदधिघृतादिकाय अपत्याय पुत्रपौत्रादिकाय । रमस्वेति सर्वत्र सम्बन्धः । किं च सम्यग्राजतऽइति सम्राडसि स्विनैव राजतऽइति स्वराडसि । एवम्भूतां त्वां सारस्वतौ सरस्वतीसम्बन्धिनौ उत्सौ उत्स्यन्दनौ कूपौ प्रवाहौ वा त्वा त्वां प्रावतां प्रकर्षेण पालयतां । तौ चोत्सौ मनोवाचौ । शास्त्रज्ञानाय कूप-इवोत्स्यन्दतीति मनः कूपः तत्प्रतिपादनं कुर्वती वागपि कूपः मनो वै सरस्वान्वाक् सरस्वत्येतौ सारस्वतावुत्साविति [७.५.१.३१.] श्रुतेः । यद्वा सारस्वतौ उत्सौ ऋग्वेदसामवेदौ त्वां रक्षताम् तथा च तित्तिरिश्रुतिः ऋक्साम वै सारस्वतावुत्साविति ॥३५॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥३६॥

का° [१७.५.५.] अग्ने युक्ष्वा हीति प्रत्यृचꣳ स्रुवाकृती जुहोत्युखायाम् । ऋग्द्वयेनोखामध्ये द्वे आकृती जुहोति ॥ अग्निर्देवत्ये द्वे गायत्र्यौ आद्या भरद्वाजदृष्टा द्वितीया विश्वदृष्टा । हे देव दीप्यमान हे अग्ने ये साधवः दान्तास्ते तवाश्वासः कृपा अरमलमत्यर्थं मन्यवे यज्ञाय वहन्ति प्रापयन्ति देवानिति शेषः तानश्वान्युक्ष्व हि योजय । हि पादपूरणः ॥३६॥

युक्ष्वा हि देवहूतमाँ२ऽअश्वाँ२ऽअग्ने रथीरिव ।
नि होता पूर्व्यः सदः ॥३७॥

अग्ने त्वमश्वान्युक्ष्व योजय हिशब्दः प्रसिद्धौ । कीदृशान् देवहूतमान् देवानाह्वयन्तीति देवहुवः अतिशयेन देवहुवो देवहूतमाः तान् देवानामतिशयेनाह्वातॄन् ह्वयोऽन्तस्तिङ इति [पा° ६.३.१३५.] संहितायां युक्ष्वेत्यस्य दीर्घः । दृष्टान्तमाह रथीरिव रथीः रथस्वामी यथाश्वान्योजयति तद्वत् रथोऽस्यास्तीति रथीः ईर् मत्वर्थे । किं च त्वं पूर्व्यः पूर्वम्भवः पुरातनो होता मानुषाद्धोतुः प्रथमोऽग्नो भूत्वा निसदः अस्मिन्यागे होतृपदे निषीद छन्दसीति [पा° ३.४.६.] लोऽर्थे

लुङ् । देवङ्कृतमानश्चानित्यत्रातोऽठि नित्यमिति [पा° ८.३.३.] आकारस्यानुनासिकत्वम् दीर्घादटीति [पा° ८.३.९.] नस्य रुः ॥३७॥

IV. सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्येऽग्नेः ॥३८॥

का° [१७.५.७.] मुखे करोति सम्यक् स्रवन्तीति । सम्यगिति मन्त्रेण पञ्चपशूनां मुखे एकैकं हिरण्यशकलं क्षिपतीति सूत्रार्थः ॥ लिङ्गोक्तदेवता त्रिष्टुप् । हिरण्मयपुरुषोद्देशेनायं मन्त्रः । अग्नेर्मध्ये चितिमध्ये हिरण्ययो वेतसः पुरुषो यो निक्षितोऽस्ति तं प्रति धेना अन्नानि सम्यक् स्रवन्ति क्षरन्ति ह्रूयमानानि हवींषि तं प्रति गच्छन्तीत्यर्थः अन्नं वै धेना इति [७.५.२.११.] श्रुतेः, । कीदृश्यो धेनाः मनसा पूयमानाः पवित्रीक्रियमाणाः कीदृशेन मनसा अन्तर्हृदा (7.) हृदयान्तर्वर्तमानेन हृत्प्रतिष्ठितेन विषयव्यावृत्तेनाव्याकुलेनेत्यर्थः । श्रद्धायुक्तेन मनसा दत्ता इत्यर्थः अन्तर्वै हृदयेन मनसा सतान्नं पूतं य ऋत्विज इति [७.५.२.११.] श्रुतेः । तत्र दृष्टान्तः सरितो न नकार इवार्थः सरित इव यथा नद्यः समुद्रं प्रति स्रवन्ति गच्छन्ति तद्वत् । न केवलं धेनाः स्रवन्ति घृतस्य धारा अपि स्रवन्ति । ताश्च धेना घृतधाराश्च हिरण्मयं पुरुषं प्रति स्रवन्तीरहमभिचाकशीमि पश्यामि चाकशीतिः पश्यतिकर्मा यङ्लुगन्तः ॥३८॥

ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥३९॥

हिरण्यशकलदेवत्यार्षी बृहती पादार्णनियमाभावात् ॥ का° [१७.५.९.] नासिकयोर्ऋचे त्वेति । मन्त्राभ्यां पशूनां नसोः शकलप्रासनमित्यर्थः ॥ हे हिरण्यशकल ऋचे ऋग्वेदाय तदुक्तहौत्रादिसिद्धये त्वा त्वां वामनसि प्रास्यामि रुचे दीप्तये शोभाप्राप्त्यै त्वां दक्षिणनसि प्रास्यामि । शिराऽसि प्रत्यञ्चीति [का° १७.५.१३.] आदौ वामनसि ततो दक्षिणे ॥ का° [१७.५.१०.] अक्ष्योर्भासे त्वेति । भासे त्वेति मन्त्राभ्यां नेत्रयोस्तद्धिरण्यशकलप्रासनम् ॥ भासे काल्यै त्वां वामनेत्रे प्रास्यामि ज्योतिषे तेजसे तत्प्राप्त्यै त्वां दक्षनेत्रे प्रास्यामि ॥ का° [१७.५.११.] श्रोत्रयोरभूदिदमि-

ति । कर्णयोः प्रास्यति अभूदिदमग्निर्ज्योतिषेति मन्त्राभ्याम् ॥ इदं श्रोत्रं विश्वस्य सर्वस्य भुवनस्य भूतजातस्य वैश्वानरस्य विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितस्याग्नेश्च वाजिनं वाचो ज्ञातृ अभूत् सर्वप्राणिशब्दा वक्ष्यश्च शब्दोऽपि श्रोत्रेणैव ज्ञायते ऽतः श्रोत्रे हिरण्यं प्रास्यामीति शेषः । वाचमेति ज्ञानाति वाजिनं वाचूर्वादेतेरौणादिको नकप्रत्ययः छान्दसः कुत्वाभावः क्त्वां ज्ञाशोऽन्तऽइति [पा° ८.२.३१.] ज्ञश्त्वम् । अयमग्निर्वैश्वानर इत्युपक्रम्य तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोतीति श्रुत्यनुवादकोऽयं मन्त्रः । यद्वायमर्थः इदं श्रोत्रेऽस्यमानं हिरण्यं विश्वस्य भुवनस्य वैश्वानरस्याग्नेश्च वाजिनं वीर्यं तेजोऽनकमभूत् भवति अतोऽस्यामीति ॥ ३१ ॥

अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान् ।
सहस्रदा असि सहस्राय त्वा ॥ ४० ॥

हिरण्यशकलदेवत्योष्णिक् द्वौ पादावष्टार्णौ तृतीयो द्वादशको व्यूहेन । दक्षिणश्रोत्रे शकलं प्रास्यति । अयमग्निः ज्योतिषा पशुश्रोत्रस्थितहिरण्यतेजसा ज्योतिष्मान् तेजस्वी अस्तु रुक्मो रोचमानोऽग्निर्वर्चसा हिरण्यकान्त्या वर्चस्वान् कान्तिमानस्तु वाक्यप्रभा ज्योतिः शरीरगतकान्तिर्वर्च इति ज्योतिर्वर्चसोर्भेदः । यद्वा श्रोत्रमेव हिरण्यज्योतिषाग्निरिव ज्योतिष्मदस्तु हिरण्यवर्चसा च वर्चस्वदस्तु रुक्म-इव सुवर्णपुरुष-इव उभयत्रेवाध्याहरिण लिङ्गव्यत्ययेन च योजनेत्यर्थः ॥ का° [१७.५.१४.] सहस्रदा इति पुरुषशिर उद्धृत्य मध्ये । पुरुषशिर आदायोखामध्ये वक्ष्यमाणमन्त्रेणोपदधातीति सूत्रार्थः ॥ हे पुरुष त्वं सहस्रदाः सहस्रसंख्यस्य दातासि अतः सहस्राय सहस्रधनलाभाय त्वा त्वामुद्धृत्वामीति शेषः । आदौ पुरुषशिरसि शकलप्रासनं ततोऽश्वगोऽव्यजानां क्रमेण । एकपशुपक्षे मुखादिषु प्रत्येकं सप्त-सप्त पञ्चकत्व (8.) एकैकमित्यन्ये [का° १७.५.११. शतपथ° ७.५.२.१०.] ॥ ४० ॥

आदित्यं गर्भं पयसा समङ्ध्धि सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्ध्धि हरसा माभिमंष्ठाः शतायुषं कृणुहि चीयमानः ॥ ४१ ॥

का॰ [१७.५.१७.] आदित्यं गर्भमिति प्रतिमन्त्रं क्रमेण । पुरुषादीनां शिरसि पञ्चमन्त्रक्रमेणैकैकमुपदधातीत्यर्थः ॥ पञ्च ऋचोऽग्निर्देवत्यास्त्रिष्टुभः । आदौ पुरुषशिर उपदधाति मध्ये । हे पुरुषशिरः त्वमादित्यं चित्याग्निं पयसा समङ्धि संभ्रक्ष्णय अङ्गैर्लोठि मध्यमैकवचने नूपम् पयसि स्थाप्य इत्येवमुच्यते । आदत्ते पशूनादित्यवदीष्टे वा सर्वपशूनामित्यादित्यश्चित्योऽग्निः । कीदृशमादित्यं गर्भं गृह्णाति पशूनिति गर्भः पचाद्यच् कृग्रकोर्भश्छन्दसि तम् । सहस्रस्य प्रतिमां बकुधनस्य प्रतिमाभूतं बकुधनप्रदमित्यर्थः । विश्वरूपं सर्वरूपमादित्यत्वात्सर्वरूपप्रकाशकमित्यर्थः सर्वाणि रूपाणि यस्मात् । किं च हरसा सर्ववीर्यापहारकमग्नेर्ज्योतिर्हरस्तेनाग्नितिज्ञसा यजमानं परिवृङ्धि परिवर्जय वृजी वर्जने रुधादिः लोट् । मा अभिमंस्थाः यजमानं मा हिंसीः मन्यतेर्लुङ् अभिपूर्वो मन्यतिर्हिंसार्थः । किं च चीयमानः उपधीयमानः सन्यजमानं शतायुषं शताब्दजीविनं कृणुहि कुरु ॥४१॥

वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥४२॥

अश्वशिर ईशानि उपदधाति । हे अग्ने चित्याग्ने त्वमश्वमिमं मा हिंसीः ज्वालया मा दहः । कीदृशं वातस्य जूतिं जूतिर्गतिः प्रीतिर्वा वायोर्गतिस्वरूपं वायुवद्वेगगतिमित्यर्थः वायोः प्रीतिं प्रेमपात्रं वरुणस्य नाभिं जलेशस्य नाभिमिव नाभिः अन्तरं यथा नरेण स्वनाभिर्वस्त्रावरणादिना पाल्यते तद्वद्वरुणेनातिप्रियत्वात्पाल्यम् । यतः सरिरस्य सलिलस्य जलस्य मध्ये समुद्रे जज्ञानं जायमानं जन् जनने क्वादिः शानच् गमहनेत्युपधालोपः [पा॰ ६.४.९८.] अप्सुयोनिर्वाऽश्व इति श्रुत्यन्तरात् अत एव नदीनां शिशुं बालं नदीपतिः समुद्रः पितात एव नदीनां मातृत्वात्तद्धिशुम् । हरिं हरितवर्णं यद्वाद्रुढं नरं हरतीति हरिस्तम् । अद्रिबुध्नमद्रिर्गिरिः बुध्नं मूलं कारणं यासां ता अद्रिबुध्ना आपस्तज्जातमद्रिबुध्नमपत्यप्रत्ययलोपः यद्वा बुध्नपदे नकारः उपजनश्छान्दसः अद्रिबुद्नमद्रिभिर्बुद्नं ज्ञातम् पथि तत्खुरैः क्षुण्णानद्रीन्याषाणान्दृष्ट्वा नरैर्ज्ञातं यदत्राश्वो गत इति उत्कृष्टमित्यर्थः । परमे व्योमन् एषु लोकेषु निषीदत्तमिति शेषः इमे वै लोकाः परमं व्योमेति

[७.५.२.१८.] श्रुतिः यद्वा विविधमोम अवनं रक्षणम् परममुत्कृष्टं यद्योम नानोपद्रवेभ्यः पालनं तत्र स्थापितमिति शेषः ॥४२॥

अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं विराजम् ॥४३॥

गोशिर आग्नेय्यामुपदधाति अजस्रमग्निमीडे स्तौमि ईड स्तुतौ । कीदृशमजस्रमनुपक्षीणम् इन्दुमिदि परमैश्वर्ये इन्दतीतीन्दुः ऐश्वर्योपेतं यद्वा उन्दी क्लेदे उनत्ति क्लेदयति जनमनांसीतीन्दुः उन्देरिच्चादेरिति [उणा० १.१२.] कुप्रत्ययादीकारौ (9.)। अरुषं रोषरहितं यद्वा अरुर्मर्म मर्मस्थानीयं रक्षस्यम् आराध्यमित्यर्थः । पूर्वचित्तिं पूर्वैर्महर्षिभिः चित्तिं चेत्तव्यम् (10.)। नमोभिरन्नैर्भुरण्युं भर्तारं सर्वेषां पोष्टारम्। हे अग्ने एवं स्तूयमानः स त्वं गामुपधीयमानां मा हिंसीः मा जहि । कीदृशीमदितिमखण्डितामदीनां वा विराजं विविधं राजमानाम् दुग्धदानाद्वौर्विराट् तस्यै शृतं तस्यै शर इति [३.३.३.२.] दशवीर्याभिप्रायं विराट्त्वम् । कीदृशः त्वं पर्वभिः पञ्चिष्टकाभिरमावास्यादिपर्वभिर्वा ऋतुशः ऋतौ-ऋतौ कल्पमानः कर्माणि सम्पादयन् ॥४३॥

वनस्पत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥४४॥

वायव्येऽविशिर उपदधाति । हे अग्ने परमे व्योमन् उत्कृष्टे रक्षणास्थाने स्थापितामविं मा हिंसीः । कीदृशीं त्वष्टुः रूपाणां निर्मातुर्देवस्यानुग्रहाद्वनस्पत्रीं वृणोति कम्बलादिना छादयति लोकानिति वनस्पत्री ताम् । वरुणस्य नाभिं नाभिस्थानीयां नाभिवद्रक्षणीयाम् वारुणी त्वाष्ट्री चाविः । परस्माद्रजसः दिव्यूपाल्लोकाज्जायमानम् श्रोत्रं वै परमꣳ रजो दिशो वै श्रोत्रं दिशः परमꣳ रज इति [७.५.२.२०.] श्रुतेः यद्वा परस्माद्रजसः (11.) प्रजापते रजोगुणाज्जायमानाम् । महीं महतीम् । साहस्रीं सहस्रमूल्यार्हां सहस्रोपकारक्षमां वा । असुरस्य मायामसवः प्राणा विद्यन्ते यस्य सोऽसुरः मत्वर्थे रः प्राणवतो मायां प्रज्ञां मीयते ज्ञायतेऽनया माया प्रज्ञा प्राणिनां प्रज्ञाप्रदामित्यर्थः ॥४४॥

योऽअग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥४५॥

नैर्ऋत्येऽजमुपदधाति । योऽग्निरग्निरूपोऽजोऽग्नेः प्रजापतेः शोकादध्यजायत अग्निसंतापादुत्पन्नः अत्राग्निः प्रजापतिः । उत वा अपि च दिवः शोकात्पृथिव्याश्च शोकाद्योऽजः पर्यजायत उत्पन्नः अग्निपृथिवीदिवां शोकादजोत्पत्तिः श्रुत्योक्ता यद्वै प्रजापतेः शोकादजायत तद्दिवश्च पृथिव्यै च शोकादजायतेति [७.५.२.२१.] । विश्वकर्मा स एव प्रजापतिः येनाजेन वायूपेण प्रजा जजान उत्पादितवान् अजस्य वायूपत्वं ततः प्रजोत्पत्तिः श्रुत्योक्ता वाग्वाऽअजो वाचो वै प्रजा विश्वकर्मा जजानेति [७.५.२.२१.] । हे अग्ने चित्य ते तव हेडः क्रोधः तमजं परिवृणक्तु परित्यजतु त्वयाजे कोपो न कार्य इत्यर्थः ॥ माधवस्तु पृथिव्या उपरि स्थिताद्वा उत वा यद्वा दिवः परि द्युलोकोपरि स्थितात् शोकात् शुच दीप्तौ घञ्जतः दीप्तियुक्ताद्वाग्नेः प्रजापतेः सकाशाद्योऽग्निरूपोऽजोऽध्यजायत विश्वकर्मा येनाजेन प्रजाः पशून् जजान । अजस्य पशुसाधनत्वं तैत्तिरीयश्रुत्योक्तम् ततोऽजस्तूपरः समभवत्ताः स्वायै देवतायाऽआलभत ततो वै प्रजाः पशूनसृजतेति । शेषं पूर्ववत् ॥४५।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥४६॥

का० [१७.५.१८.] चित्रं देवानामित्यर्धर्चशः स्रुवाहुती मध्यमे । अर्धर्चद्वयेन पुरुषशिरस्याहुतिद्वयं जुहोतीत्यर्थः ॥ व्याख्याता [७.४२.] ॥४६॥

V. a. इमं मा हिꣳसीर्द्विपादं पशुꣳ सहस्राक्षो मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ॥
b. मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४७॥

का० [१७.५.१९.] बर्हिर्विष्युदङ्नतिष्ठन्नुपतिष्ठतऽउत्सर्गैरिमं मा हिꣳसीरिति प्रतिमन्त्रम् । अग्नेरुत्तीर्य वेदेर्बर्हिर्दक्षिणे उदङ्मुखस्तिष्ठन्निमं मेत्युत्सर्गसंज्ञैः पञ्चमन्त्रैः पुरुषादिशिरांस्युपतिष्ठतेऽधर्युः एकपशुपक्षे तमेव पञ्चभिरित्यर्थः ॥ अग्निर्देवत्याः

पञ्च त्रिष्टुभः आद्ययोरन्ते द्वे यजुषी तिसृणामन्ते त्रीणि-त्रीणि यजूंषि । हे अग्ने सहस्राक्षः सहस्रमक्षीणि यस्य सः हिरण्यशकलरूपसहस्रनेत्रो मेधाय यज्ञाय चीयमानः चयनेन संस्क्रियमाणः सन् त्वमिमं द्विपादं पशुं पुरुषरूपं मा हिंसीः मा दह हिरण्यशकलैर्वाऽएष सहस्राक्षः द्विपाद्वाऽएष पशुर्यत्पुरुष इति च [७.५.२.३१.] श्रुतेः । यदि वादनेच्छा तर्हि मेधं शुद्धं मयुं पशुं तुरङ्गवदनं किम्पुरुषं पशुं जुषस्व सेवस्व भक्षयेत्यर्थः किम्पुरुषो वै मयुरिति [७.५.२.३२.] श्रुतेः मयुं कृष्णमृगं वा जुषस्व मयुर्मृगोऽश्ववदनऽइति कोशोक्तेः । तेन मयुभक्षणेन तन्वः त्वात्मरूपास्तनूः चिन्वानः पोषयन्निह निषीद द्वितीयार्थे तन्व इति प्रथमा । इतो यजुः ते तव शुक् शोकः संतापो मयुं किंनरं मृगं वा ऋच्छतु प्राप्नोतु । किं च यं पुरुषं प्रति वयं द्विष्मः द्वेषं कुर्मः ते तव शुक् तमृच्छतु ॥४७॥

a. इमं मा हिꣳसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥
b. गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४८॥

अथाश्वस्य । हे अग्ने इममेकशफमेकाखुरं पशुमश्वं मा हिंसीः एकशफो वाऽएष पशुर्यदश्व इति [७.५.२.३३.] श्रुतेः । कीदृशं कनिक्रदमत्यन्तं क्रन्दितारं हेषमाणम् क्रन्देर्दाधर्तीत्यादिना [पा० ७.४.६५.] यङ्लुकि निपातः । वाजो वेगो विद्यते येषां ते वाजिना वेगवन्तः मत्वर्थे इनप्रत्ययः तेषु मध्ये वाजिनं वेगवन्तम् । ते तुभ्यमारण्यं वनस्थं गौरं गौरवर्णं मृगं दिशामि ददामि तेन तन्वः चिन्वानो निषीदेति पूर्ववत् । ते तव शुग्गौरं गच्छतु ॥४८॥

a. इमꣳ सहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन् ॥
b. गवयमारण्यमनु ते दिशामि तेन चि० । c. गवयं ते शुगृच्छ० ॥४९॥

अथ गोः । अत्र विशेषणद्वयं स्त्रीलिङ्गं शेषाणि पुंलिङ्गानि व्यत्ययेन उभाभ्यां गौरिव स्तूयते । हे अग्ने परमे व्योमन् उत्कृष्टे स्थाने स्थितमिमं गोरूपं पशुं त्वं

मा हिंसीः । कीदृशं साहस्रं सहस्रमूल्यार्हं सहस्रोपकारक्षमं वा । शतधारं शतसंख्याकक्षीरधारायुतमत एवोत्सम् उत्सः कूपः तत्सदृशम् उत्स-इवोत्सस्तं वक्ष्यमाणं स्रोतसमित्यर्थः । सरिरस्य मध्ये एषु लोकेषूक्तः व्यच्यमानं जनैर्विविधमच्यमानमुपजीव्यमानम् इमे वै लोकाः सरिरमिति [७.५.२.३४.] श्रुतेः । जनाय सर्वलोकाय घृतं दुहानां घृतकारणं क्षीरं क्षरन्तीम् । अदितिमखण्डिताम् । ते तवाग्नेयं गवयं गोसदृशं पशुविशेषमनुदिशामि । शिष्टमुक्तम् ॥४९॥

a. इमर्मूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन् ॥
b. उष्ट्रमारण्यमनु ते दि° । c. उष्ट्रं ते शुगृच्छ° ॥५०॥

अथावेः । हे अग्ने परमे व्योमन् स्थाने स्थितमिममविं मा हिंसीः । कीदृशमूर्णायुमूर्णावन्तमूर्णाया युस् । वरुणस्य नाभिं नाभिस्थानीयं प्रियमपत्यमित्यर्थः । द्विपदां नराणां चतुष्पदां गवादीनामुभयरूपाणां पशूनां त्वचम् त्वचमिव त्वचम् त्वग्वत्कं कम्बलैः छादकत्वात् मनुष्याः शीतनिवृत्त्यै कम्बलं दधते अश्वगोखराद्या अपि मार्दवाय पृष्ठे कम्बलैराच्छाद्यन्ते । तथा त्वष्टुः प्रजापतेः प्रजानां मध्ये प्रथमं जनित्रं प्रथमोत्पन्नम् एतद्ध (11.) त्वष्टा प्रथमꣳ रूपं विचकारेति [७.५.२.३५.] श्रुतेः । उष्ट्रं प्रसिद्धं ते ददामि । स्पष्टमन्यत् ॥५०॥

a. अज्ञो ह्यग्नेरजनिष्ट शोकात्सोऽअपश्यज्जनितारमग्नेः ।
तेन देवा देवतामग्रमायँस्तेन रोहमायन्नुप मेध्यासः ॥
b. शरभमारण्यमनु ते दि° । c. शरभं ते शुगृच्छ° ॥५१॥

अथाजस्य । हि पादपूरणः । योऽजोऽग्नेः प्रजापतेः शोकात्संतापादजनिष्ट उत्पन्नः शोकाद्दीप्यमानादग्नेः प्रजापतेरजनिष्टेति वा यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायतेति [७.५.२.३६.] श्रुतेः आत्मनो वपामुदखिदत्तामग्नौ प्रगृह्णात्ततोऽजस्तूपरः समभवदिति तैत्तिरीयेऽपि । स उत्पन्नोऽजोऽग्रे प्रथममुत्पन्नं नरमेव जनितारं स्वोत्पादकं प्रजापतिमपश्यद्दृष्टवान् । किं च एवं प्रशस्तोऽजस्त-

तो देवा इदानींतना अग्रं पूर्वजन्मनि तेनाजेन कर्म कृत्वेति शेषः देवतां देवभावमायन्प्राप्ताः तस्य भावस्त्वतलौ । किं च मेध्यासः मेध्या यज्ञयोग्या यजमाना रोहं रोहणीयं स्वर्गं तेनाजेनोपायन् उपगच्छन्ति छन्दसि परेऽपि [पा° १.४.८१.] । शरभोऽष्टापदो मृगविशेषः सिंहघाती । शेषमुक्तम् ॥५१॥

त्वं यविष्ठ दाशुषो नॄंः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥५२॥

का° [१७.६.१.] एत्य च त्वं यविष्ठेति चित्योपस्थानम् । बर्हिर्वेदेरागत्याग्निसमीपेऽर्धचित्यमुपतिष्ठते ॥ उशनोदृष्टानिरुक्ताग्नेयी गायत्री । हे यविष्ठ युवतम यद्वा मिश्रयितृतम गिरोऽस्मदीयाः स्तुतिवाचः शृणुधि शृणु श्रुशृणुपृकृत्यादिना [पा° ६.४.१०२.] हेर्धिः अन्येषामपि दृश्यतेऽति [पा° ६.३.१३७.] संहितायां दीर्घः । गिरः श्रुत्वा दाशुषो हविर्दत्तवतो यजमानान्नॄन्मनुष्यान्पाहि रक्ष दाशुष इति षष्ठी वा यजमानस्य नॄन् (12.) पाहीति । दाश्वान्साह्वान्मीढ्वांश्चेति [पा° ६.१.१२.] निपातः । किं च उतापि च त्मना आत्मना तोकं यजमानापत्यं रक्ष द्व्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां दीर्घः । मन्त्रेष्वाङ्यादेरात्मन इति [पा° ६.४.१४१.] आकारलोपः । तोकमपत्यमुतात्मानं च रक्षेति विभक्तिव्यत्ययो वा ॥५२॥

VI. a. अपां त्वेमन्त्सादयामि । b. अपां त्वोद्मन्त्सादयामि । c. अपां त्वा भस्मन्त्सादयामि । d. अपां त्वा ज्योतिषि सादयामि । e. अपां त्वायने सादयामि । f. अर्णवे त्वा सदने सा° । g. समुद्रे त्वा सदने सा° । h. सरिरे त्वा सदने सा° । i. अपां त्वा क्षये सा° । k. अपां त्वा सधिषि सा° । l. अपां त्वा सदने सा° । m. अपां त्वा सधस्थे सा° । n. अपां त्वा योनौ सा° । o. अपां त्वा पुरीषे सा° । p. अपां त्वा पाथसि सा° । q. गायत्रेण त्वा छन्दसा सा° । r. त्रैष्टुभेन त्वा छन्दसा सा° । s. जागतेन त्वा छन्दसा सा° । t. आनुष्टुभेन त्वा छन्दसा सा° । u. पाङ्क्तेन त्वा छन्दसा सादयामि ॥५३॥

का॰ [१७. ६. २.] अपरेण स्वयमातृण्णामित्यापस्याः पञ्च-पञ्चानूकान्तिघपां त्वेमन्निति प्रतिमन्त्रम्। तीर्थेनाग्निमारुह्य स्वयमातृण्णामपरेण पूर्वानूकान्तमेत्य चतुर्घप्यनूकान्तेघपां त्वेमन्निति प्रतिमन्त्रं पञ्च-पञ्चापस्यासंज्ञा इष्टका उपदधातीति सूत्रार्थः॥ विंशतिरिष्टकादेवत्यानि यजूंषि पञ्चदशापस्यादेवत्यानि पञ्च छन्दस्यादेवत्यानि। हे इष्टके अपस्ये अपामेमन् एमनि वायौ त्वा त्वां सादयामि स्थापयामि इण् गतौ मनिन्प्रत्ययः सप्तम्या लुक् त्वा इत्यस्य परत्वम् [पा॰ ६. १. १४. वा॰ ६.]। अत्रापामेमन्नित्यादीनां श्रुत्योक्तोऽर्थो ग्राह्यः वायुर्वाऽअपामेम (13.) वायौ त्वा॰ सादयामीति [७. ५. २. ४६.] श्रुतेः॥ अपामोद्मन् ओद्मनि ओषधिषु त्वां सादयामि उन्दी क्लेदे मन्नलोपश्च (14.) गुणः सप्तम्या लुक् ओषधयो वाऽअपामोद्म [७. ५. २. ४७. (15.)] एवमग्नेऽपि तुल्यम्॥ भस्मन् भस्मनि भस भर्त्सनदीप्त्योः मन् अग्ने अग्नं वाऽअपां भस्म [७. ५. २. ४८.]॥ अपां ज्योतिषि विद्युति विद्युद्वाऽअपां ज्योतिः [७. ५. २. ४९.]॥ अपामयने भूमौ इयं पृथिव्यपामयनम् [७. ५. २. ५०. (16.)]॥ अर्णवि सदने स्थाने प्राणरूपे सा॰ प्राणो वाऽअर्णवः [७. ५. २. ५१.]॥ समुद्रे सदने सा॰ मनो वै समुद्रः [७. ५. २. ५२.]॥ सरिरे सदने वाचि सा॰ वाग्वै सरिरम् [७. ५. २. ५३.]॥ अपां क्षये चक्षुषि त्वां सा॰ चक्षुर्वाऽअपां क्षयो [७. ५. २. ५४.] निवासः॥ अपां सधिषि श्रोत्रे त्वां सा॰ श्रोत्रं वाऽअपा॰ सधिः [७ ५. २. ५५.]॥ अपां सदने दिवि त्वां सा॰ द्यौर्वाऽअपा॰ सदनम् [७. ५. २. ५६.]॥ अपां सधस्थे अन्तरिक्षे त्वां सा॰ अन्तरिक्षं वाऽअपा॰ सधस्थम् [७. ५. २. ५७.]॥ अपां योनौ समुद्रे त्वां सा॰ समुद्रो वाऽअपां योनिः [७. ५. २. ५८.]॥ अपां पुरीषे सिकतासु त्वां सा॰ सिकता वाऽअपां पुरीषम् [७. ५. २. ५९.]॥ अपां पाथसि अन्ने त्वां सा॰ अन्नं वाऽअपां पाथः [७. ५. २. ६०.]॥ ॥ पञ्च छन्दस्या उपदधाति पञ्चयजुर्भिः। गायत्रेण गायत्र्येव गायत्रं तेन छन्दसा त्वामुपदधामि। त्रैष्टुभेन छन्दसा त्वां सा॰। जागतेन छन्दसा त्वां सा॰। आनुष्टुभेन छन्दसा त्वां सा॰। पाङ्क्तेन छन्दसा त्वां सा॰ ॥ ५३ ॥

VII. a. अर्यं पुरो भुवः। b. तस्य प्राणो भौवायनः। c. वसन्तः प्राणायनः। d. गायत्री वासन्ती। e. गायत्र्यै गायत्रम्। f. गायत्राड्-

पाऽग्नुः । g. उपाऽशोस्त्रिवृत् । h. त्रिवृतौ रथन्तरम् । i. वसिष्ठ ऋषिः । k. प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥५४॥

का° [१७. ६. ३.] व्याघारणवत्प्राणभृतः कर्णसहिता दश-दशायं (17.) पुर इति प्रतिमन्त्रम् । प्राणभृत्संज्ञका इष्टका व्याघारणवद्दक्षिणे श्रंसे उत्तरश्रोण्यां दक्षिणश्रोण्यामुत्तरे श्रंसे कर्णसहिता अक्षण्वा संलग्नाः स्वयमातृण्णांपर्यन्तं दश दशोपदधातीति सूत्रार्थः ॥ पञ्चाशत्यजूंषि प्राणभृदिष्टकादिवत्यानि प्रतिकण्डिकं दश-दश । प्रथमं दशकं दक्षिणे श्रंसे । कदाचिद्व्ययात्प्रजापतेः प्राणा देवा भूत्वोत्क्रान्ताः तदा तान्प्रजापतिरूचे किमित्युत्क्रम्यते मामुपगच्छतेति ततः प्राणास्तमूचुर्वयमन्नं विना स्थातुं न शक्नुमस्तदन्नं त्वया सृज्यते चेत्तिष्ठामस्ततः प्रजापतिनोक्तं वयमुभयेऽन्नं सृजामेति तथेत्युक्ता प्राणाः प्रजापतिश्चैतदन्नमसृजंस्तेन प्राणान्पुष्णन्तीति इष्टकानां प्राणभृत्संज्ञेत्युक्तं श्रुत्या प्रजापतेर्विस्रस्तात्प्राणा उदक्रामन्नित्यादिकया [८. १. १. ३.] । अथ मन्त्रव्याख्या । योऽयं पुरो भुवश्चाग्निर्वर्तते हे इष्टके त्वं तद्रूपासि प्राण एवाग्निर्भूत्वा पुरस्तिष्ठति अतोऽग्निरूपां त्वामुपदधामीति शेषः एवमग्नेऽपि । पुरस्तादुपधीयते प्रागुद्भ्रियेत प्राङुपचर्यतऽइति पुरोऽग्निः । भवति सर्वरूपेणेति भवत्यस्मात्सर्वमिति वा भुवोऽग्निः तद्रूपेष्टका धेयेति भावः तदुक्तं श्रुत्या [८. १. १. ४.] अयं पुरो भुव इत्यग्निर्वै पुरस्ताद्यत्तमाहु पुर इति प्राञ्चꣳ ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्भुव इत्याहाग्निर्वै भुवोऽग्नेर्ह्येदꣳ सर्वं भवति प्राणो ह्यग्निर्भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधातीति ॥ प्राणस्तस्याग्नेरपत्यमिति शेषः अत एव भौवायनः भुवस्याग्नेरपत्यं भौवायनः नडादित्वात्फक् । इष्टके प्राणरूपां त्वां सा° प्राणं तस्माद्रूपादग्नेर्निरमिमीतेति [८. १. १. ५.] श्रुतेः ॥ प्राणस्यापत्यं प्राणायनः फक् यो वसन्त ऋतुस्तद्रूपां सा° वसन्तमृतुं प्राणान्निरमिमीतेति [८. १. १. ५.] श्रुतेः ॥ वसन्तस्यापत्यं वासन्ती तस्यापत्यमिति [पा° ४. १. १२.] अण् टिड्ढाणञ्इत्यादिना [पा° ४. १. १५.] ङीप् या गायत्री छन्दस्तद्रूपां सा° गायत्रीं छन्दो वसन्तादृतोर्निरमिमीतेति [८. १. १. ५.] श्रुतेः ॥ गायत्र्यै गायत्रं चतुर्थी पञ्चम्यर्थे गायत्र्याः सकाशाद्गायत्रं सामोत्पन्नं तद्रूपां सा° गायत्र्यै छन्दसो गायत्रꣳ साम निरमिमीतेति [८. १. १. ५.] श्रुतेः ॥ गायत्रात्साम्नो य उपांशुग्रहो निर्मितस्तद्रूपां सा° गायत्रात्साम्न

ऽपाꣳशुं ग्रहं निरमिमीतेति [८.१.१.५.] श्रुतेः ॥ ऽपांशुग्रहान्निर्मितो यस्त्रिवृत्स्तोमस्तद्रूपां सा॰ ऽपाꣳशोर्ग्रहात्त्रिवृतꣳ स्तोमं निरमिमीतेति [८.१.१.५.] श्रुतेः ॥ त्रिवृतः स्तोमान्निर्मितं यद्रथन्तरं पृष्ठं तद्रूपां सा॰ त्रिवृतः स्तोमाद्रथन्तरं पृष्ठं निरमिमीतेति [८.१.१.५.] श्रुतेः ॥ वसत्यधितिष्ठति सर्वज्ञत्वनिति वस्तातिशयेन वस्ता वसिष्ठः तुरिष्ठेमेयःस्विति [पा॰ ६.४.१५४.] इष्ठनि तृचो लोपः सर्वाधार ऋषिः ज्ञाता प्राणस्तद्रूपां सा॰ प्राणो वै वसिष्ठ ऋषिर्यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद्वस्तृतमो वसति तेनोऽएव वसिष्ठ इति [८.१.१.६.] श्रुतेः ॥ प्रजापतिगृहीतया गृह्णातिः सृष्ट्यर्थः प्रजापतिना सृष्टया त्वयेष्टकया स्थापितया प्रजाभ्यः सर्वप्रजार्थं प्राणं गृह्णामि प्रजानां प्राणसिद्धये त्वामुपदधामीत्यर्थः । अयं पुर इत्यादिदशमन्त्रैः प्राणमेवैकं प्रजाभ्यः गृह्णामि । ये नानाकामाः प्राणे तांस्तद्धाति सकृत्सादयत्येकं तत्प्राणं करोतीति [८.१.१.६.] श्रुतेः ॥५४॥

a. अयं दक्षिणा विश्वकर्मा । b. तस्य मनो वैश्वकर्मणम् । c. ग्रीष्मो मानसः । d. त्रिष्टुब्ग्रैष्मी । e. त्रिष्टुभः स्वारम् । f. स्वारादन्तर्यामः । g. अन्तर्यामात्पञ्चदशः । h. पञ्चदशाद्बृहत् । i. भरद्वाज ऋषिः । k. प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥५५॥

एभिर्मन्त्रैस्तृतीयं दशकं दक्षिणाग्नेरास्योपधेयम् । विश्वं करोति सर्वं सृजतीति विश्वकर्मा वायुरयं दक्षिणा दक्षिणस्यां दिशि आर्यावर्ताद्वयो वाति तद्रूपां त्वां सा॰ अयं वै वायुर्विश्वकर्मा योऽयं पवते एष ह्येव सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणेव भूयिष्ठं वाति तद्रूपमुपदधातीति [८.१.१.७.] श्रुतेः ॥ तस्य विश्वकर्मणोऽपत्यं मनोऽत एव वैश्वकर्मणम् विश्वकर्मण इदम् तस्येदमिति [पा॰ ४.३.१२०.] अण् इन्नण्यनपत्येऽइति [पा॰ ६.४.१६४.] प्रकृत्या । मनोरूपां सा॰ मनस्तस्माद्रूपाद्वायोर्निरमिमीतेति [८.१.१.८.] श्रुतेः ॥ मनसोऽपत्यं ग्रीष्म ऋतुस्तद्रूपां सा॰ ग्रीष्मर्तुं मनसो निरमिमीतेति [८.१.१.८.] श्रुतेः ॥ ग्रीष्मस्येयं ग्रैष्मी ग्रीष्मोत्पन्ना त्रिष्टुप् छन्दस्तद्रूपां सा॰ त्रिष्टुभं छन्दो ग्रीष्मादृतोर्निरमिमीतेति [८.१.१.८.] श्रुतेः ॥ त्रिष्टुभ उत्पन्नं यत्स्वारं साम तद्रूपां सा॰ त्रिष्टुभश्छन्दसः

स्वारꣳ साम निरमिमीतेति [८.१.१.८.] श्रुतिः ॥ स्वारात्साम्न उत्पन्नो योऽर्त्यामो ग्रहस्तद्रूपां सा॰ स्वारात्साम्नोऽर्त्यामं ग्रहं निरमिमीतेति [८.१.१.८.] श्रुतिः ॥ अर्त्यामादुत्पन्नो यः पञ्चदश स्तोमस्तद्रूपां सा॰ अर्त्यामाद्बृहात्पञ्चदशꣳ स्तोमं निरमिमीतेति [८.१.१.८.] श्रुतिः ॥ पञ्चदशात्स्तोमादुत्पन्नं यद्बृहत्पृष्ठं तद्रूपां सा॰ पञ्चदशात्स्तोमाद्बृहत्पृष्ठं निर॰ ॥ भरद्वाज ऋषिः बिभर्तीति भरन् (18.) वाजमन्नं यः स भरद्वाजोऽन्नधर्ता मनः मनसि स्वस्थे अन्नादनेहोत्पत्तेः ऋषिः सचेतनो मनोरूपस्तद्रूपां सा॰ मनो वै भरद्वाज ऋषिः अन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिरिति [८.१.१.९.] श्रुतिः ॥ प्रजापतिगृहीतया धातृसृष्टया त्वयेष्टकया कृत्वा प्रजाभ्यो मनो गृह्णामि एभिर्दशमन्नैर्मन एव गृह्णामीत्यर्थः ॥५५॥

a. अयं पश्चाद्विश्वव्यचाः । b. तस्य चक्षुर्वैश्वव्यचसम् । c. वर्षाश्चाक्षुष्यः । d. जगती वार्षी । e. जगत्या ऋक्सामम् । f. ऋक्सामाच्छुक्रः । g. शुक्रात्सप्तदशः । h. सप्तदशादूपम् । i. जमदग्निर्ऋषिः । k. प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥५६॥

अयं पश्चादित्यादिमन्त्रैर्द्वितीयं दशकमुत्तरश्रोणिरारभ्योपदधाति । पश्चात् प्रतीचीं दिशमञ्चति गच्छतीति पश्चात् प्रतीचीगमनशीलो विश्वं विचति उदितः सन्प्रकाशयतीति विश्वव्यचा आदित्योऽयं प्रसिद्धस्तद्रूपां सा॰ असौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तथ्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्तीति [८.१.२.१.] श्रुतिः ॥ तस्यादित्यस्य सम्बन्धि चक्षुरत एव वैश्वव्यचसं विश्वव्यचसो रविरुत्पन्नं तद्रूपां सा॰ चक्षुस्तस्माद्रूपादादित्यान्निरमिमीतेति [८.१.२.२.] श्रुतिः ॥ चाक्षुष्यः चक्षुष उत्पन्ना वर्षा ऋतुस्तद्रूपां सा॰ गर्गादिभ्यञ् वर्षा ऋतुं चक्षुषो निरमिमीतेति [८.१.२.२.] श्रुतिः ॥ वर्षाभ्य उत्पन्नं जगतीछन्दस्तद्रूपां सा॰ जगतीं छन्दो वर्षाभ्य ऋतोर्निरमिं॰ ॥ जगतीछन्दस उत्पन्नमृक्सामसंज्ञं यत्साम तद्रूपां सा॰ जगत्यै छन्दस ऋक्सामꣳ साम निरमि॰ ॥ ऋक्सामादुत्पन्नो यः शुक्रग्रहस्तद्रूपां सा॰ ऋक्सामात्साम्नः शुक्रं ग्रहं निर्-

मि॰ ॥ शुक्राडुत्पन्नो यः सप्तदश स्तोमस्तद्रूपां त्वां सा॰ शुक्राद्वहात्सप्तदशꣳ स्तोमं निरमि॰ ॥ सप्तदशात्स्तोमाडुत्पन्नं यद्वैरूपं पृष्ठं तद्रूपां सा॰ सप्तदशात्स्तोमाद्वैरूपं पृष्ठं निरमि॰ ॥ जमदग्निर्ऋषिः जमति जगत्पश्यतीति जमन् अङ्गति सर्वत्र गच्छतीत्यग्निः ऋषति जानाति ऋषिः ईदृशं यच्चक्षुस्तद्रूपां सा॰ चक्षुर्वै जमदग्निर्ऋषिर्यदनेन जगत्पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषिरिति [८.१.२.३.] श्रुतेः ॥ प्रजापतिसृष्टया त्वयेष्टकया प्रजार्थं चक्षुर्गृह्णामि दशमत्वेश्चक्षुरेव गृह्णामि । सकृत्सादयत्येतच्चक्षुः करोतीति [८.१.२.३.] श्रुतेः ॥५६॥

a. इदमुत्तरात्स्वः । b. तस्य श्रोत्रꣳ सौवम् । c. शरद्भौत्री । d. अनुष्टुप्शारदी । e. अनुष्टुभं ऐडम् । f. ऐडान्मन्थी । g. मन्थिनं एकविꣳशः । h. एकविꣳशाद्ध्रौवम् । i. विश्वामित्र ऋषिः । k. प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥५७॥

दशमत्वेश्चतुर्थं दशकमुत्तरासादारभ्योपदधाति ॥ उत्तरस्यामुत्तरात् उत्तराधरदक्षिणादातिरिति [पा॰ ५.३.३४.] आत्प्रत्ययः सर्वस्मादुत्तरभागस्था दिशः यदिदं स्वः स्वर्गो लोकः तां दिक्स्वर्गरूपां त्वां सा॰ क्रियाव्ययविशेषणानां नपुंसकत्वमेकत्वं चेति वचनादिदमुत्तरादित्युक्तम् दिशो वाऽउत्तरात्तच्चक्षा आह्योत्तरादित्युत्तरा च्यस्मात्सर्वस्माद्दिशोऽध यत्स्वरित्याह स्वर्गो हि लोको दिशः श्रोत्रꣳ हि दिशो भूत्वोत्तरं तस्थौ (19.) तदेतद्रूपमुपदधातीति [८.१.२.४.] श्रुतेः ॥ तस्य स्वर्गस्य सम्बन्धि श्रोत्रं कीदृशं सौवम् स्वः इदं सौवं तस्येदमिति [पा॰ ४.३.१२०.] अण् द्वारादित्वादिञागमः [पा॰ ७.३.४.] अव्ययानां भमात्रे टिलोपः श्रोत्ररूपां त्वां सा॰ श्रोत्रं तस्माद्रूपाद्दिग्भो निरमिमीतेति [८.१.२.५.] श्रुतेः ॥ श्रोत्राडुत्पन्ना या शरत्तद्रूपां सा॰ शरदमृतुꣳ श्रोत्रान्निरमिमीतेति [८.१.२.५.] श्रुतेः ॥ शरद उत्पन्नं यदनुष्टुप्छन्दस्तद्रूपां सा॰ अनुष्टुभं छन्दः शरद ऋतोर्निरमि॰ ॥ अनुष्टुभ उत्पन्नं यदैडं साम तद्रूपां सा॰ अनुष्टुभश्छन्दस ऐडꣳ साम निरमि॰ ॥ ऐडात्साम्न उत्पन्नो यो मन्थी ग्रहस्तद्रूपां सा॰ ऐडात्साम्नो मन्थिनं ग्रहं निरमि॰ ॥ मन्थिग्रहादुत्पन्नो य एकविंश स्तोमस्तद्रूपां सा॰ मन्थिनो ग्रहादेकविꣳशꣳ स्तोमं निरमि॰ ॥ एकविं-

शस्तोमाडुत्पन्नं यद्वैराजं पृष्ठं तद्रूपां सा॰ एकविꣳशात्स्तोमाद्वैराजं पृष्ठं निरमि॰ ॥ विश्वामित्र ऋषिः विश्वं सर्वं मित्रं येन मित्रे चर्ष्याविति [पा॰ ६.३.१३०.] दीर्घः तादृश ऋषिः श्रोत्रं श्रद्धयान्यवाक्यश्रवणात्सर्वमित्रं (20.) भवति विश्वामित्रर्ष्यृषभं (21.) यत् श्रोत्रं तद्रूपां सा॰ श्रोत्रं वै विश्वामित्र ऋषिर्यदनेन सर्वतः शृणोत्यथो यदस्मै सर्वतो मित्रं भवति तस्माच्छ्रोत्रं विश्वामित्र ऋषिरिति [८.१.२.६.] श्रुतेः ॥ प्रजापतिसृष्टया त्वयेष्टकया प्रजाभ्यः श्रोत्रं गृह्णामीति दशमल्लैः श्रोत्रमेव सादयति ये (22.) नानाकामाः श्रोत्रे तांस्तद्दधाति सकृत्सादयत्येकं तच्छ्रोत्रं करोतीति [८.१.२.६.] श्रुतेः ॥५७॥

a. इयमुपरि मतिः । b. तस्यै वाङ्मात्या । c. हैमन्तो वाच्यः । d. पङ्क्तिर्हैमन्ती । e. पङ्क्त्यै निधनवत् । f. निधनवत आग्रयणाः । g. आग्रयणात्त्रिणवत्रयस्त्रिꣳशौ । h. त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते । i. विश्वकर्मर्षिः । k. प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः । l. लोकं पृणा॰ । m. ता अस्य॰ । n. इन्द्रं विश्वा॰ ॥५८॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां त्रयोदशोऽध्यायः ॥१३॥

दशमल्लैः पञ्चमं दशकं रेतःसिग्भ्यामुत्तरां प्रथमां कृत्वा प्रादक्षिणेयेनोपधेयम् । उपर्युपरिष्टादिति [पा॰ ५.३.३१.] निपातः उपरि ऊर्ध्वदेशस्थश्चन्द्र इयं मतिः वाक् मन्यते ज्ञायते यया सा मतिः वागेव चन्द्रो भूत्वोपरि यस्तिष्ठति तद्रूपां सा॰ चन्द्रमा वाऽउपरि तथ्यत्तमाद्योपरीत्युपरि हि चन्द्रमा अथ यन्मतिरित्याह वाग्वै मतिर्वाचा ह्येदꣳ सर्वं मनुते वाग्घ चन्द्रमा भूत्वोपरिष्टात्तस्थौ तदेव तद्रूपमुपदधातीति [८.१.१.७.] श्रुतेः ॥ तस्यै चन्द्ररूपायास्तस्या मतेरुत्पन्नात एव मात्या मतेरियं मात्या या वाक् तद्रूपां सा॰ वाचं तस्माद्रूपाच्चन्द्रमसो निरमिमीतेति [८.१.२.८.] श्रुतेः ॥ वाचोऽपत्यं वाच्यः वाच उत्पन्नो यो हैमन्तस्तद्रूपां सा॰ हैमन्तमृतुं वाचो निरमि॰ ॥ हैमन्तस्येयं हैमन्ती या पङ्क्तिश्छन्दस्तद्रूपां सा॰ पङ्क्तिं छन्दो

क्षेमत्तादृतोर्निरमि° ॥ पङ्क्तिरुत्पन्नं यन्निधनवत्संज्ञं साम तद्रूपां सा° पङ्क्त्यै चतुर्थी पञ्चम्यर्थे पङ्क्त्यै छन्दसो निधनवत्साम निरमि° ॥ निधनवतः साम्न उत्पन्नो य आग्रयणो ग्रहस्तद्रूपां सा° निधनवतः साम्न आग्रयणं ग्रहं निरमि° ॥ आग्रयणादुत्पन्नौ यौ त्रिणवत्रयस्त्रिंशौ द्वौ स्तोमौ तद्रूपां सा° आग्रयणाद्ग्रहात्त्रिणवत्रयस्त्रिंशौ स्तोमौ निरमि° ॥ त्रिणवत्रयस्त्रिंशाभ्यामुत्पन्ने ये द्वे शाक्वररैवते पृष्ठे त्वां तद्रूपां सा° त्रिणवत्रयस्त्रिंशाभ्यां स्तोमाभ्यां शाक्वररैवते पृष्ठे निरमि° ॥ विश्वकर्मा विश्वं सर्वं करोतीति विश्वकर्मा ऋषिः वागेव वाचा हि सर्वं कुरुते वाग्रूपां त्वां सा° वाग्वै विश्वकर्मऽऋषिर्वाचा (23.) हीदꣳ सर्वं कृतं तस्माद्वाग्विश्वकर्मऽऋषिरिति (23.) श्रुतेः [८. १. २. १.] ॥ प्रजापतिसृष्टया त्वयेष्टकया प्रजाभ्यः वाचं गृह्णामि एभिर्दशमल्लैर्वाचमेव गृह्णाति । सकृत्सादयत्येकां तद्वाचं करोतीति [८. १. २. १.] श्रुतिः ॥ ॥ अथ पञ्चकण्डिकासु प्राणमनश्चक्षुःश्रोत्रवाचां प्रजाभ्यो ग्रहणमित्यस्यार्थद्वयम् । प्रजाभ्य इति चतुर्थीपक्षे प्रजार्थं प्राणादीनां ग्रहणं पञ्चाशदिष्टकास्थापने प्रजानां यज्ञमानापत्यपश्वादीनां प्राणादयः पुष्टा भवन्त्वित्यर्थः । प्रजाभ्य इति पञ्चमीपक्षे प्रजाभ्यो नानालोकेभ्यः सकाशात्प्राणादीन्गृह्णामि मद्वशगान्करोमीति प्राणभृतामुपधानेन सर्वाः प्रजा मद्वशगा भवन्त्वित्यर्थः ॥ ॥ का° [१७. ६. ५.] लोकम्पृणा दक्षिणाꣳसाद्ध्या मध्यात् । आत्मनो दक्षिणाकोणादारभ्या मध्यात् अधि स्वयमातृण्णापर्यन्तं (24.) लोकम्पृणा उपदधाति तासां लोकं पृणेत्यभिमन्त्रणम् ता अस्येति सूददोहःसंज्ञमन्त्रेणाधिवदनम् स्पृष्ट्वा पठनमिति सूत्रार्थः ॥ का° [१७. ६. १.] मध्ये पुरीषं निवपति पूर्ववत् । स्वयमातृण्णोपरीन्द्रं विश्वेति (25.) मन्त्रेण मृत्तोपः ॥ तिस्रः ऋचः प्रतीकोक्ताः पूर्वमुक्तत्वात् [१२. ५४-५६.] ॥५८॥ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । पुष्कराद्यादित्यन्तो रामेन्द्रध्याय ईरितः (26.) ॥१३॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

I. ॥ १-१३ a ॥१-१३॥ १३ b. १४ ॥१४॥ १५ ॥१५॥१५॥ ॥

II. ॥ १६-२३ ॥१-८॥ २४ विरा° - ज्योतिष्मतीम् ॥१॥ २४ विश्वस्मै

सीद ॥१०॥ २५ [- वासन्तिकाऽऋतू -] ॥११॥ २६ [अषाल्हासि -] ॥१२॥२७॥ ॥

III. ॥ २७-३४ ॥१-८॥ ३५ [- सम्राळसि स्वराळसि] ॥१॥ ३६ ॥१०॥ ३७ ॥११॥३८॥ ॥

IV. ॥ ३८-४२ ॥१-५॥ ४३ [- °ग्निर्मीळे -] ॥६॥ ४४ ॥७॥ ४५ [- ऋ-ळ्हः -] ॥८॥ ४६ ॥१॥४७॥ ॥

V. ॥ ४७ [- सऽहस्राद्म मेः -] -५२ ॥१-६॥५३॥ ॥

VI. ॥ ५३ ॥१॥५४॥ ॥

VII. ॥ ५४ a-d ॥१॥ ५४ e-k ॥२॥ ५५ a-d ॥३॥ ५५ e-k ॥४॥ ५६ a-d ॥५॥ ५६ e-k ॥६॥ ५७ a-d ॥७॥ ५७ e [- ऐळम्]. f [ऐळान्म्°] -k ॥८॥ ५८ a-d ॥१॥ ५८ e-n ॥१०॥६४॥ सप्तानुवाकेषु चतुःषष्टिः ॥ ॥

इति काण्वशाखायां संहितापाठे चतुर्दशोऽध्यायः ॥१४॥ ॥

I. a. ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया । ऊर्ध्वस्य केतुं प्रथमं नुषाणा । b. अश्विनाध्वर्यू सादयतामिह त्वा ॥१॥

त्रयोदशेऽध्याये (1.) प्रथमा चितिरुक्ता सा भूर्लोकरूपा अयं वै लोकः प्रथमा चितिरिति [८.२.१.१.] श्रुतेः । चतुर्दशेऽध्याये द्वितीयादिचितित्रयं वक्ष्यते भूमेर्ऊर्ध्वमन्तरिक्षादर्वाग्भागो द्वितीया चितिः एतां द्वितीयां चितिमपश्यन्यद्ऊर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तेषामिष लोकः इति [८.२.१.२.] श्रुतेः । देवैरश्विनौ प्रार्थितौ यद्युवां भिषजौ ततो द्वितीयां चितिमुपधत्तमिति ताभ्यामुक्तं चित्युपधाने किमावयोः फलमिति देवैरुक्तं युवां चित्युपधाने देवानामध्वर्यू भविष्यथ इति ततस्ताभ्यां द्वितीया चितिरुपक्षितेति श्रुत्या तेऽश्विनावब्रुवन्नित्यादिकयोक्तम् [८.२.१.३.] । तत्रादौ पञ्चाश्विन्य इष्टकाः ॥ द्वितीयचितिमन्त्रा देवदेवत्याः ॥ का° [१७.८.१५.]

आश्विनीर्ध्रुवक्षितिरिति प्रतिमन्त्रम् । पञ्चकण्डिकाभिराश्विनीसंज्ञा इष्टका रेतःसिग्वेलायामुपदधाति प्रतीष्टकं नित्येऽइति सूत्रार्थः ॥ पञ्चाश्विनीदेवत्याः प्रथमा विराट् चतस्रस्त्रिष्टुभो यजुरन्ताः । अश्विनाधर्यू इत्यादि यजुः । आदित्यास्त्वार्षी त्रिष्टुबेकाधिका पादानियमात् । हे इष्टके यतस्त्वं ध्रुवा स्थिरासि अतो ध्रुवं स्थिरं योनिं स्थानं रेतःसिग्वेलालक्षणमासीद् अधितिष्ठ । कीदृशं साधुया साधुं श्रेष्ठं सुपां सुलुगित्यमो यादेशः । कीदृशी त्वं ध्रुवक्षितिः ध्रुवा स्थिरा क्षितिर्निवासो यस्याः सा । ध्रुवा अचला योनिः कारणं यस्याः सा । तथा ऊख्यस्याग्नेः (2.) प्रथममाद्यं केतुं स्थानं प्रथमचितिरूपं जुषाणा सेवमाना अथ वाऽअग्निरूख्यस्तस्यैष प्रथमः केतुर्यत्प्रथमा चितिस्तां जुषाणेति [८. २. १. ४.] श्रुतेः ॥ इतः परं यजुः किं च अश्विना देवानामधर्यू इह रेतःसिग्वेलायां हे इष्टके त्वा त्वां सादयतामुपधत्ताम् । केचिदिदं यजुश्चतुर्थपादेन परिकल्प्य त्रिष्टुभं वदन्ति ॥ १॥

a. कुलायिनी घृतवती पुरंधिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगाय ॥

b. अश्विनाधर्यू सादयतामिह त्वा ॥ २॥

हे इष्टके पृथिव्याः सदने प्रथमचितिरूपे स्थाने स्योने सुखरूपे त्वं सीद तिष्ठ पृथिवी वै प्रथमा चितिस्तस्यै शिवे स्योने सीद सदनऽइति [८. २. १. ५.] श्रुतेः । कीदृशी त्वं कुलायिनी कुलायो नीडमस्त्रियाम् कुलायो नीडं गृहमस्या अस्तीति गृहाकारा । रेतःसिग्वेलायामिष्टकोपचिता सा गृहाकारा भवति कुलायमिव वै द्वितीया चितिरिति [८. २. १. ५.] श्रुतेः अत्र सादृश्यार्थ इनिः । तथा घृतवती क्षोष्यमाणाज्ययुता वसोर्धारा क्वत्र क्षोष्यन्ते । पुरंधिः पुरं बभ्रु इष्टकाजातं दधातीति पुरु बभ्रुधा धीयते स्थाप्यतऽइति वा । किं च रुद्रा वसवश्चोपलक्षणं सर्वे देवाः त्वा त्वामभिगृणन्तु स्तुवन्तु । किं च सौभगाय ऐश्वर्याय इमा इमानि ब्रह्म ब्रह्माणि मन्त्रान्पीपिहि आप्यायस्व मन्त्रान्प्रापुहि अस्मन्मन्त्रोपहिता सौभाग्याय भवेति भावः । इमेति सुप आकारः । ब्रह्मेति सुपो लोपः । पि गतौ तुदादिः बहुलं छन्दसीति [पा° २. ४. ७६.] शपः श्लुः श्लाविति [पा° ६. १. १०.] द्वित्वं तुजा-

दीनां दीर्घोऽभ्यासस्येति [पा° ६.१.७.] अभ्यासदीर्घः ॥ अश्विनेत्यादि पूर्ववत् ॥२॥

a. स्वैर्दक्षैर्दक्षपितरिह सीद देवानाꣳ सुम्ने वृक्तबर्हिषे रणाय ।
पितेवैधि सूनवऽआ सुशेवा स्वावेशा तन्वा संविशस्व ॥
b. अश्विनाध्वर्यू सादयतामिह त्वा ॥३॥

हे इष्टके त्वमिह द्वितीयायां चितौ सीद तिष्ठ स्वैर्दक्षैः वीर्यैः सामर्थ्यैः सह दक्षशब्दोऽत्र वीर्यार्थः स्वेन वीर्येणेह सीदेति [तै.२.१.६.(3.)] श्रुतेः । कीदृशी दक्षपिता दक्षं वीर्यं पातीति वीर्यस्य पालयित्री । किमर्थं स्थातव्यं तत्राह रणाय रमणीयाय वृक्तबर्हिषे मरुते सुम्ने सुम्नाय सुखाय सप्तमी चतुर्थ्यर्थे देवानाꣳ सुम्नाय मरुते रणायेति [तै.२.१.६.] श्रुतेः देवाः सुखिनो भवन्त्विति तिष्ठेत्यर्थः । किं च आ समन्ताद्भावेन सुशेवा शोभनं शेवं सुखं यस्यास्तादृशी सर्वदा सुखयित्री एधि भव घ्वसोरेद्भावेति [पा° ६.४.११९.] एकारः । तत्र दृष्टान्तः पिता सूनवऽइव यथा पिता जनकः सूनवे पुत्राय सुशेवः सुखयिता भवति तद्वत् । किं च स्वावेशा सुखेनाविशति स्वावेशा प्रथमा तृतीयार्थे स्वावेशया सुखप्रवेशवत्या तन्वा शरीरेण संविशस्व अवस्थानं कुरु स्वावेशेनात्मना संविशश्चेति [तै.२.१.६.] श्रुतेः ॥ अश्विनेत्युक्तम् ॥३॥

a. पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वेऽअभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥
b. अश्विनाध्वर्यू सादयतामिह त्वा ॥४॥

हे इष्टके त्वं पृथिव्याः प्रथमचितेः पुरीषं पूरकं वस्त्वसि पृथिवी वै प्रथमा चितिस्तस्या एतत्पुरीषमिव यद्द्वितीयेति [तै.२.१.७.] श्रुतेः पृणाति पूरयति पुरीषम् शॄपॄभ्यां किदिति [उणा° ४.२७.] पृणातेरीषन्प्रत्ययः किच्च किन्वाडुदोष्ठ्यपूर्वस्येति [पा° ७.१.१०२.] उदादेशो रपरत्वं च निन्वादाद्युदात्तः । अपः सनोति ददातीत्यप्सो नामापां कारणीभूतो रसश्च त्वमसि । तां तादृशीं प्रथमचितिपूरिकां जलदरसभूतां त्वा त्वां विश्वे सर्वे देवा अभिगृणन्तु सर्वतः स्तुवन्तु । किं च स्तो-

मपृष्ठाः स्तोमास्त्रिवृदाद्याः पृष्ठानि रथन्तरादीनि पठिष्यमाणानि यस्यां सा तादृशी स्तोमपृष्ठवती । घृतवती क्षोष्यमाणाज्ययुता सतीह द्वितीयचितौ सीद तिष्ठ । ततः प्रजावत्पुत्रपौत्रादिप्रजायुक्तं द्रविणा द्रविणं धनमस्मे अस्मभ्यमायजस्व समन्तादेहि यजतिरिह दानार्थः । अस्मे इति सुपां सुलुगिति विभक्तेः शेआदेशः ॥ व्याख्यातमन्यत् ॥४॥

a. अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानां ऊर्मिर्द्रप्सोऽअपामसि विश्वकर्मा तऽऋषिः । b = १b. ॥५॥

हे इष्टके अदित्याः प्रथमचितिरूपायाः पृथिव्याः पृष्ठ उपरि त्वा त्वां सादयामि स्थापयामि । किम्भूतां त्वां अन्तरिक्षस्य भुवर्लोकस्य धर्त्रीं धारयित्रीम् । दिशां पूर्वादीनां विष्टम्भनीं संस्तम्भनकर्त्रीं भुवनानां भूतजातानामधिपत्नीं स्वामिनीम् । किं च त्वमपां द्रप्सो रस ऊर्मिरसि रसरूपः कल्लोलस्त्वमसि । विश्वकर्मा प्रजापतिस्ते तव ऋषिः द्रष्टा ॥ तं त्वामश्विनौ सादयतामित्युक्तम् ॥५॥

शुक्रश्च शुचिश्च ग्रैष्मावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे ग्रैष्मावृतूऽअभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥६॥

का° [१७.८.१६.] शुक्रश्च शुचिश्चेत्यृतव्ये पूर्वयोरुपरि । प्रथमचित्युपक्षितयोर्ऋतव्ययोरुपरि द्वे ऋतव्ये पक्षे प्राग्लक्षणे अनूकमभित उदक्शुख उपदधाति शुक्रश्च शुचिश्चेति प्रत्येकमुपधाय । ग्रैष्मावृतू इति मन्त्रशेषो (5.) द्वे अप्यालभ्य पक्ष इति सूत्रार्थः ॥ उत्कृतिश्छन्दः । शुक्रो ज्येष्ठमासः (6.) शुचिरषाढः तौ ग्रैष्मावृतू ग्रीष्मसम्बन्धिनौ ऋतवयवौ । अन्यद्व्याख्यातम् [१३.२५.] ॥६॥

II. a. सञ्जूर्ऋतुभिः सञ्जूर्विधाभिः सञ्जूर्देवैः सञ्जूर्देववयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥

b. सꣳजूर्ऋतुभिः सꣳजूर्विधाभिः सꣳजूर्वसुभिः सꣳजूर्देवैर्वयो॰ ॥

c. सꣳजूर्ऋतुभिः सꣳजूर्विधाभिः सꣳजू रुद्रैः सꣳजूर्दे॰ ॥

d. सꣳजूर्ऋतुभिः सꣳजूर्विधाभिः सꣳजूरादित्यैः सꣳजूर्दे॰ ॥

e. सꣳजूर्ऋतुभिः सꣳजूर्विधाभिः सꣳजूर्विश्वैर्देवैः सꣳजूर्दे॰ ॥ ७॥

का॰ [१७. ८. १६.] वैश्वदेवीः सꣳजूर्ऋतुभिरिति प्रतिमन्त्रम् । पञ्च मन्त्रैः पञ्च वैश्वदेवीसंज्ञा इष्टकाः पूर्वादिषूपदधातीत्यर्थः ॥ विश्वदेवदृष्टानि विश्वदेवदेवत्यानि पञ्च यजूंषि । हे इष्टके देवानामधर्यू अश्विना अश्विनौ तां त्वा त्वामिह स्थाने द्वितीयचितौ सादयताम् किमर्थं वैश्वानराय विश्वेभ्यः सर्वेभ्यो नरेभ्यो हिताय्याग्नये ऽग्नितृप्तये अग्नये वेति त्वाशब्दो या इति प्रथमार्थे प्रातिपदिकसुपोर्व्यत्ययः (7.) तां कां या त्वमृतुभिः सꣳजूः जोषणं जुट् प्रीतिः जुषी प्रीतिसेवनयोः सम्पदादित्वाद्भावे क्विप् समाना जूः प्रीतिर्यस्याः सा सजूः समानस्य (8.) छन्दस्यमूर्धेति [पा॰ ६. ३. ८४.] समानस्य सादेशः वसन्तादिभिर्या त्वं प्रीतिमती । तथा विधाभिः या त्वं सꣳजूः असि विदधति सृजन्ति जगदिति विधा आपस्ताभिः आपो वै विधा अद्भिर्हीदꣳ सर्वं विहितमिति श्रुतेः [८. २. २. ८.] अप एव ससर्जादाविति स्मृतेश्च । तथा देवैरिन्द्रादिभिश्च सꣳजूः । तथा वयो बाल्यादि नह्यन्ति बध्नन्ति ते वयोनाधाः (9.) प्राणा देवा दीप्यमानास्तैश्च सꣳजूः प्राणा वै वयोनाधाः (9.) प्राणैर्हीदꣳ सर्वं वयुनं नद्धमिति [८. २. २. ८.] श्रुतेः (10.) । यद्वा वयोनाधैर्देवैश्छन्दोभिः सꣳजूः अथो छन्दाꣳसि वै देवा वयोनाधाश्छन्दोभिर्हीदꣳ सर्वं (11.) वयुनं नद्धमिति [८. २. २. ८.] श्रुतेः एवमुत्तरमन्त्रेष्वपि । यद्वा ऋतुदेवप्राणान् जनयित्वा (12.) तैः सꣳजूः सयुग्भूत्वा प्रजापतिर्यथा त्वामुपदधितवानेवमहमप्यग्नये त्वामुपदधामीति शेषः अश्विनौ चेह त्वां सादयताम् तदतून्प्राजनयदृतुभिर्वै सयुग्भूत्वेति [८. २. २. ८.] श्रुतेः ॥ उत्तरचतुर्मन्त्रेषु वसुभिः रुद्रैः आदित्यैर्विश्वैर्देवैः सꣳजूरिति विशेषः शेषं पूर्वतुल्यम् ॥ ७॥

a. प्राणं मे पाहि । b. अपानं मे पाहि । c. व्यानं मे पाहि ।

d. चक्षुर्मऽउर्व्या विभाहि । e. श्रोत्रं मे श्लोकय । f. अपः पिन्व ।

g. ओषधीर्जिन्व । h. द्विपादव । i. चतुष्पात्पाहि । k. दिवो वृष्टिमेरय ॥ ८॥

का° [१७. ८. २०.] प्राणभृतः प्राणं मञ्जति । पञ्चयजुर्भिः प्राणभृत्संज्ञका इष्टकाः पूर्वादिषूपदधाति ॥ पञ्च वायुदेवत्यानि यजूंषि । प्राणो वै वायुर्वायुमेवास्मिन्नितद्दधातीति [८. २. ३. २.] श्रुतेः ॥ हे इष्टके त्वं मे मम प्राणं प्राणाख्यं वायुं पाहि पालय । एवमपानं मम पाहि । व्यानं वायुं च मे मम पाहि । ऊर्ध्वा विस्तीर्णया दृष्ट्या मे चक्षुर्विभाहि विशेषेण प्रकाशय दर्शनसमर्थं (13.) कुर्वित्यर्थः । मम श्रोत्रं कर्णेन्द्रियं श्लोकय संघाते शक्तं कुरु श्लोकृ संघाते [धातु° ४. ३.] बकुशब्दश्रवणासमर्थं (14.) कुर्वित्यर्थः ॥ का° [१७. ८. २१.] अपः पिन्वेत्यपस्याः । पञ्चमल्लैरपस्यासंज्ञा इष्टका उपदधाति ॥ अब्देवत्यानि पञ्च यजूंषि । हे इष्टके त्वमपो जलानि पिन्व सिञ्च पिन्वतिः सेचनार्थः । ओषधीर्जिन्व प्रीणय जिन्वतिः प्रीतिकर्मा । द्विपान्मनुष्यशरीरमव रक्ष । चतुष्पात्पशुशरीरं पाहि पालय । दिवो द्युलोकाद्वृष्टिमेरय आ समन्तात्प्रवर्तय ॥ ८॥

III. a. मूर्धा वयः प्रजापतिश्छन्दः । b. क्षत्रं वयो मयन्दं छन्दः । c. विष्टम्भो वयोऽधिपतिश्छन्दः । d. विश्वकर्मा वयः परमेष्ठी छन्दः । e. वस्तो वयो विवलं छन्दः । f. वृष्णिर्वयो विशालं छन्दः । g. पुरुषो वयस्तन्द्रं छन्दः । h. व्याघ्रो वयोऽनाधृष्टं छन्दः । i. सिंह्रो वयश्छदिश्छन्दः । k. पष्ठवाड्वयो बृहती छन्दः । l. उक्षा वयः ककुप्छन्दः । m. ऋषभो वयः सतोबृहती छन्दः ॥ १॥

का° [१७. ८. २२.] वयस्याः पञ्च-पञ्चानूकान्तेषु मूर्धा वय इति प्रतिमल्लं चतस्रः पुरस्तात् (15.) । दक्षिणोत्तरपश्चिमेधनूकान्तेषु पञ्च-पञ्च पूर्वे तु चतस्रो वयस्यासंज्ञका इष्टका उपदधात्येकोनविंशतिमल्लैरित्यर्थः ॥ एकोनविंशतिर्यजूंषि लिङ्गोक्तदेवतानि । वयःशब्दोपेतमल्लैरुपधेया इष्टकाः । अत्र श्रुत्युक्तं निदानम् पुरा सृष्टवतः प्रजापतेर्व्याकुलात्सकाशात्सृष्टाः पशवश्छन्दोरूपमास्थाय निरगच्छन् ततः

प्रजापतिरपि गायत्र्यादिछन्दोरूपं स्वीकृत्य पशुसम्बन्धिन्या तत्तद्वयोऽवस्थया तान्यशूनाप्नोत् तदभिधायका मन्त्र प्रजापतेर्विस्रस्तात्पशव उदक्रामँश्छन्दाꣳसि भूत्वा तान्गायत्री छन्दो भूत्वा वयसाप्नोदिति [८. २. ३. १.] श्रुतेः । तत्रादौ चतुर्भिर्मन्त्रैः प्रजापतेरष्टावयवात्मकं गायत्रीरूपं परिकल्प्यते । मूर्धा प्रधानः प्रजापतिश्छन्दो गायत्रीरूपो भूत्वा वयः विभक्तिव्यत्ययः वयसा कृत्वा पशूनाप्नोदिति शेषः । तद्रूपां त्वामिष्टके ऽपदधामीति सर्वत्र शेषः । अनेन मन्त्रेण प्रजापतेर्द्वाववयवौ कल्पितौ । प्रजापतिर्वै मूर्धा स वयोऽभवत्प्रजापतिश्छन्द इति प्रजापतिरेव छन्दोऽभवदिति श्रुतेः [८. २. ३. १०.] ॥ क्षताक्षायतऽइति क्षत्रं तादृशं वयः शरीरावस्था प्रजापतिरभवत् मयं सुखं ददातीति मयंदमनिरुक्तं छन्दोऽभवत् क्षत्रं वय इति प्रजापतिर्वै क्षत्रꣳ स वयोऽभवन्मयंदं छन्द इति यद्वाऽअनिरुक्तं तन्मयंदमनिरुक्तो वै प्रजापतिः प्रजापतिरेव छन्दोऽभवदिति श्रुतेः [८. २. ३. ११.] ॥ अधिपतिः अधिकं पालकः विष्टभ्नोति जगत्तस्तम्भयतीति विष्टम्भः ईदृशः प्रजापतिः वयस्तत्पशुवयोऽवस्थावान् छन्दश्चाभवत् प्रजापतिर्वै विष्टम्भः स वयोऽभवदधिपतिश्छन्द इति प्रजापतिर्वाऽअधिपतिः प्रजापतिरेव छन्दोऽभवदिति श्रुतेः [१२.] ॥ परमे पदे तिष्ठतीति परमेष्ठी विश्वकर्मा सर्वस्रष्टा प्रजापतिर्वयश्छन्दश्चाभवत् प्रजापतिर्वै विश्वकर्मा स वयोऽभवत्परमेष्ठी छन्द इत्यापो वै प्रजापतिः परमेष्ठी ता हि परमे स्थाने तिष्ठन्ति प्रजापतिरेव परमेष्ठी छन्दोऽभवदिति श्रुतेः [१३.] ॥ एवं प्रतिमन्त्रं द्वौ-द्वावववयवावित्यष्टावयवः प्रजापतिर्गायत्रीरूपः परिकल्पितः तथा चाष्टसंख्योपेतत्वात्सर्वछन्दःप्रकृतिभूतं गायत्री छन्दो भूत्वा वयसा तृतीयाया लुक् वयोऽवस्थया वक्ष्यमाणान्पञ्चदश पशून्प्रजापतिरगृह्णात् तानि वाऽएतानि चत्वारि वयाꣳसि चत्वारि छन्दाꣳसि तदष्टावष्टाक्षरा गायत्र्येषा वै सा गायत्री या तद्रूपा प्रजापतिरेतान्पशून्वयसाप्नोदिति श्रुतेः [८. २. ३. १४.] ॥ वस्त अजः । द्वितीयैकवचनस्य (16.) सुपां स्विति सु-आदेशः । वय इति तृतीयालुक् । विवत्सं विविधं वरमुत्कृष्टं छन्दः एकपदाख्यं छन्दो भूत्वोत्क्रान्तं वस्तं पशुं वयसा तत्तद्वयोऽवस्थया जग्राह । एवमुत्तरमन्त्रेष्वपि विभक्तिपरिणामं कृत्वा तत्तच्छन्दोरूपमास्थाय प्रजापतिस्तत्तद्वयसा तं-तं पशुं गृहीतवानिति योज्यम् विशेषस्तु वक्ष्यते ।

वस्तो वय इति वस्तं वयसाप्नोद्विवलं छन्द इत्येकपदा विवलं छन्द एकपदा कृ भूत्वाजा उच्चक्रमुरिति श्रुतेः [८.२.४.१.] ॥ विशालं द्विपदागायत्रीरूपं छन्दो भूत्वा वृष्णिं सेचनसमर्थं मेषं वयसा जग्राह । वृष्णिं वयसाप्नोद्विशालं छन्दः इति द्विपदा वै विशालं छन्दो द्विपदा कृ भूत्वावय उच्चक्रमुरिति श्रुतेः [८.२.४.२.] ॥ तन्द्रं पङ्क्तिछन्दो भूत्वोत्क्रान्तं पुरुषं पशुं वयसाप्नोत् । पुरुषं वयसाप्नोत्तन्द्रं छन्द इति पङ्क्तिर्वै तन्द्रं छन्दः पङ्क्तिर्हृ भूत्वा पुरुषा उच्चक्रमुरिति श्रुतेः [८.२.४.३.] ॥ अनाधृष्टं विराट्छन्दो भूत्वोत्क्रान्तं व्याघ्रं पशुं वयसाग्रहीत् । व्याघ्रं वयसाप्नोदनाधृष्टं छन्द इति विराड्वाऽअनाधृष्टं छन्दोऽन्नं वै विराडन्नमनाधृष्टं विराड्भूत्वा व्याघ्रा उच्च° [४.] ॥ ह्रादयतीति ह्रदिरतिछन्दाः छन्दो भूत्वोत्क्रान्तं सिंहं पशुं वयसाग्रहीत् । सिꣳहं वयसाप्नोच्छदिश्छन्द इत्यतिछन्दा वै छदिश्छन्दः सा हि सर्वाणि छन्दाꣳसि ह्रादयत्यतिछन्दा कृ भूत्वा सिꣳहा उच्च° [५.] ॥ अथातो निरुक्तानिव पशून्निरुक्तानि छन्दाꣳस्युपदधातीति [५.] श्रुतेः स्पष्टानि छन्दांसि दर्शोच्यन्ते । पष्ठे पृष्ठभागे वंक्रतीति पष्ठवाट् पञ्चवर्षः पशुः बृहती छन्दो भूत्वोत्क्रान्तं पष्ठवाहं पशुं वयसाग्रहीत् । पष्ठवाहं वयसाप्नोद्बृहती छन्द इति बृहती कृ भूत्वा पष्ठवाह उच्च° [६.] ॥ उक्षा सेचनसमर्थः पशुः आद्यक्तावष्टाक्षरौ पादौ मध्यमो द्वादशाक्षरः सा ककुप् ककुप्छन्दो भूत्वोत्क्रान्तमुक्षाणं पशुं वयसाग्रहीत् । उक्षाणं वयसाप्नोत्ककुप्छन्द इति ककुभ भूत्वोक्षाण उच्च° [७.] ॥ ऋषभः सेचनसमर्थो ऽनड्वान् द्वादशाक्षरत्रिपादा सतोबृहती सा भूत्वोत्क्रान्तमृषभं वयसाग्रहीत् । ऋषभं वयसाप्नोत्सतोबृहती छन्द इति सतोबृहती भूत्वर्षभा उच्च° [८.] ॥१॥

a. अनड्वान्वयः पङ्क्तिश्छन्दः । b. धेनुर्वयो जगती छन्दः । c. ऋषिर्वयस्त्रिष्टुप्छन्दः । d. दित्यवाड्वयो विराट् छन्दः । e. पञ्चाविर्वयो गायत्री छन्दः । f. त्रिवत्सो वय उष्णिक् छन्दः । g. तुर्यवाड्वयोऽनुष्टुप् छन्दः । h. लोकं पृण° । i. ता अस्य° । k. इन्द्रं विश्वा° ॥१०॥

अनः शकटं वहतीत्यनड्वान्बलीवर्दः पङ्क्तिश्छन्दो भूत्वोत्क्रान्तमनड्वाहं पशुं वयसाग्रहीत् । अनड्वाहं वयसाप्नोत्पङ्क्तिश्छन्द इति पङ्क्तिर्हृ भूत्वानड्वाह उच्च° [१.] ॥

धेनुः नवप्रसूता सवत्सा गौः जगती छन्दो भूत्वोत्क्रान्तां धेनुं वयसाग्रहीत् । धेनुं वयसाग्रोज्जगती छन्द इति जगती कृ भूत्वा धेनव उच्च° [१०.] ॥ षण्मासात्मकः कालोऽविः तिस्रोऽवयोऽस्य त्र्यविः अष्टादशमासः पशुः त्रिष्टुप्छन्दो भूत्वोत्क्रान्तं त्र्यविं पशुं वयसाग्रहीत् । त्र्यविं वयसाग्रोत्त्रिष्टुप् छन्द इति त्रिष्टुब्भ भूत्वा त्रयव उच्च° [११.] ॥ दोऽवखण्डने क्तिन्प्रत्ययः दितिं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् यद्वा द्विवर्षः पशुर्दित्यवाट् विराट्छन्दो भूत्वोत्क्रान्तं दित्यवाहं पशुं वयसाग्रहीत् । दित्यवाहं वयसाग्रोद्विराट् छन्द इति विराड्भूत्वा दित्यवाह उच्च° [१२.] ॥ पञ्चाविः पञ्चावयो यस्य सः सार्धद्विवर्षः पशुः गायत्री भूत्वोत्क्रान्तं पञ्चाविं पशुमग्रहीत् (17.) । पञ्चाविं वयसाग्रोद्गायत्री छन्द इति गायत्री कृ भूत्वा पञ्चावय उच्च° [१३.] ॥ त्रिवत्सः त्रयो वत्साः वत्सतराः यस्य सः त्रिवर्षः पशुः उष्णिक् छन्दो भूत्वोत्क्रान्तं त्रिवत्सं जयाह (17.) । त्रिवत्सं वयसाग्रोदुष्णिक् छन्द इत्युष्णिग्घ भूत्वा त्रिवत्सा उच्च° [१४.] ॥ तुर्यवाट् तुर्यं चतुर्थं वर्षं वहतीति चतुर्वर्षः पशुः अनुष्टुप् छन्दो भूत्वोत्क्रान्तं तुर्यवाहं पशुं प्रजापतिर्वयसाग्रहीत् । तुर्यवाहं वयसाग्रोदनुष्टुप् छन्द इत्यनुष्टुब्भूत्वा तुर्यवाह उच्चक्रमुरिति श्रुतेः [८. २. ४. १५.] ॥ एवं श्रुत्यनुसारेण मन्त्रा व्याख्याताः (18.) ॥ का° [१७. ८. २४.] दक्षिणश्रोणेरधि लोकम्पृणाः पूर्ववत् । दक्षिणश्रोणिमारभ्य लोकम्पृणा उपदधाति पुरीषनिर्वापः सप्तऽर्चोपस्थानं चेति सूत्रार्थः ॥ ॥ इति द्वितीया चितिः सम्पूर्णा ॥ १० ॥

IV. इन्द्राग्नीऽअव्यथमानामिष्टकां दृꣳहतं युवम् ।
पृष्टिन द्यावापृथिवीऽअन्तरिक्षं च विबाधसे ॥ ११ ॥

अथ तृतीया चितिः । इन्द्राग्नी विश्वकर्मा च तन्मन्त्राणामृषिः । का° [१७. ८. २५.] तृतीयायाꣳ स्वयमातृण्णामिन्द्राग्नी इति मध्ये । तृतीयायां चितावात्मनो मध्ये स्वयमातृण्णामुपदधाति ॥ अनुष्टुप् पूर्वोऽर्धर्च इन्द्राग्निदेवत्यः उत्तरः स्वयमातृण्णादेवतः । हे इन्द्राग्नी युवं युवामव्यथमानामचलन्तीं भङ्गरहितामिष्टकां स्वयमातृण्णाख्यां दृढीकुरुतम् । एवमिन्द्राग्नी प्रत्युक्ता इष्टकामाह । हे स्वयमातृण्णे

पृष्ठेन स्वोपरिभागेन द्यावापृथिवी अन्तरिक्षं च त्वं विबाधसे अभिभवसि लोकत्रयमत्येषि ॥ ११ ॥

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः ॥ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥ वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥ १२ ॥

वायुर्देवत्यं विकृतिछन्दस्कं यजुः स्वयमातृण्णोपधाने एव विनियुक्तम्[a]। हे स्वयमातृण्णे विश्वकर्मा प्रजापतिरन्तरिक्षस्य पृष्ठे ऽपरि त्वा त्वां सादयतु स्थापयतु । किम्भूतां त्वां व्यचस्वतीमभिव्याप्तियुक्तां प्रथस्वतीं प्रथनं प्रथो विस्तारस्तद्युक्ताम् । हे इष्टके त्वमन्तरिक्षं यद्य गन्धर्वाप्सरोगणादिधारकतया नियमय । अन्तरिक्षं दृꣳह परोपद्रवाभावेन दृढीकुरु । तदन्तरिक्षं मा हिꣳसीः । किमर्थं विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय प्रतिष्ठायै स्वगृहस्थित्यै चरित्राय शास्त्रीयाचरणाय । प्राणिनामेतत्सर्वं लोकदार्ढ्यं सति भवतीति नभोनियमनादि प्रार्थ्यतऽइति भावः । किं च मह्या महत्या स्वस्त्या योगक्षेमसम्पत्त्या शंतमेनातिशुभकारिणा छर्दिषा तेजोविशेषेण च कृत्वा वायुः त्वा त्वामभिपातु सर्वतो रक्षतु । तवाधिष्ठात्री या देवता तया देवतयानुगृहीता ध्रुवा स्थिरा सती सीदोपविश अङ्गिरस्वत् अङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिता तद्वत् ॥ १२ ॥

a. राज्ञ्यसि प्राची दिक् । b. विराडसि दक्षिणा दिक् ।
c. सम्राडसि प्रतीची दिक् । d. स्वराडस्युदीची दिक् ।
e. अधिपत्न्यसि बृहती दिक् ॥ १३ ॥

का° [१७. ८. २६.] अनूकेषु पञ्च दिश्या वैश्वदेवीवद्राज्ञ्यसीति प्रतिमन्त्रम् । वैश्वदेवीवदिति प्रतिदिशं रेतःसिग्वेलायामनूकेषु पञ्च दिश्यासंज्ञका इष्टका उपदधाति पञ्चमीं दक्षिणामुत्तरेणेति सूत्रार्थः ॥ दिक्शब्दोपेतत्वान्मन्त्राणां दिश्या इष्टकाः । दिग्देवत्यानि पञ्च यजूंषि । हे इष्टके त्वं राज्ञी राजमाना सती प्राची

दिक् पूर्वा दिग्भवसि गायत्रीछन्दसि ॥ विराट् विविधं राजमाना दक्षिणा दिक् असि त्रिष्टुब्रूपासि ॥ सम्राट् सम्यग्राजमाना प्रतीची दिक् जगत्यसि ॥ स्वराट् परनिरपेक्षं स्वयमेव राजमाना सती उदीची दिगनुष्टुबसि ॥ अधिकं पातीत्यधिपत्नी बृहती प्रौढोर्ध्वा दिक् पङ्क्तिरसि ॥ दिक्छन्दोरूपां तां त्वां सादयामीति सर्वत्र शेषः छन्दाꣳसि वै दिशो गायत्री वै प्राची दिक् त्रिष्टुब्दक्षिणा जगती प्रतीच्यनुष्टुबुदीची पङ्क्तिरूर्ध्वेति श्रुतेः [८.३.१.१४.] ॥१३॥

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् ॥
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ॥
वायुष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१४॥

का° [१७.१.३.] विश्वकर्मेति विश्वज्योतिषमुपरि पूर्वस्याः । प्रथमोपक्षितायां विश्वज्योतिष उपरि विश्वज्योतिषमिष्टकामुपदधाति ॥ वायुर्देवत्यं शक्वरीछन्दस्कं यजुः । हे इष्टके ज्योतिष्मतीं वायुरूपां त्वां विश्वकर्मान्तरिक्षस्य पृष्ठे त्वां सादयतु अन्तरिक्षस्य पृष्ठे ह्ययं (19.) ज्योतिष्मान्वायुरिति [८.३.२.३.] श्रुतेः । किं च सर्वप्राणादिलाभाय त्वं सर्वं ज्योतिर्यच्छ प्रयच्छ । वायुः तवाधिपतिः तया देवतया ध्रुवा सती सीद अङ्गिरसां चितावित्र ॥१४॥

नभश्च नभस्यश्च वार्षिकावृतूऽअग्नेरन्तश्लेः ॥१५॥

का° [१७.१.४.] ऋतव्ये नभश्च नभस्यश्चेति । पूर्वऽर्तव्ययोरुपरि (20.) द्वे ऋतव्येऽउपदधाति ॥ ऋतुदेवत्यमुत्कृतिछन्दस्कं यजुः । नभः श्रावणः नभस्यो भाद्रपादः । शेषं व्याख्यातम् [१३.२५.] ॥१५॥

इषश्चोर्जश्च शारदावृतूऽअग्नेरन्तश्लेः ॥१६॥

का° [१७.१.५.] इषश्चोर्जश्चेत्यपरे । अपरे ऋतव्ये पूर्वयोरुपरि दधाति । ऋतव्यमुत्कृतियजुः । इषः आश्विनः ऊर्जः कार्त्तिकः शरदवयवौ । शिष्टं प्रोक्तम् [१३.२५.] ॥१६॥

V. a. आयुर्मे पाहि । b. प्राणं मे पाहि । c. अपानं मे पाहि ।

d. व्यानं मे पाहि । e. चक्षुर्मे पाहि । f. श्रोत्रं मे पाहि ।

g. वाचं मे पिन्व । h. मनो मे जिन्व । i. आत्मानं मे पाहि ।

k. ज्योतिर्मे यछ ॥ १७ ॥

का° [१७.१.६.] पूर्वार्धे प्राणभृतो दशायुर्मऽइति प्रतिमन्त्रम् । आत्मनः पूर्वभागे प्राणभृत्संज्ञा दशेष्टका उपदधातीति सूत्रार्थः ॥ दश यजूंषि लिङ्गोक्तदेवतानि । हे इष्टके मे ममायुः त्वं पाहि रक्ष एवं प्राणमपानं व्यानं चक्षुः श्रोत्रं मे रक्ष मे वाचं पिन्व सिञ्च कामैः पूरय मे मनो जिन्व प्रीणय ममात्मानं जीवं पाहि मह्यं ज्योतिस्तेजो यछ ॥ १७ ॥

a. मा छन्दः । b. प्रमा छन्दः । c. प्रतिमा छन्दः । d. अस्रीवयश्छन्दः । e. पङ्क्तिश्छन्दः । f. उष्णिक् छन्दः । g. बृहती छन्दः । h. अनुष्टुप्छन्दः । i. विराट् छन्दः । k. गायत्री छन्दः । l. त्रिष्टुप्छन्दः । m. जगती छन्दः ॥ १८ ॥

का° [१७.१.८.] छन्दस्या द्वादश-द्वादशाप्ययेषु मा छन्द इति । अप्ययेषु (21.) पक्षपुच्छात्मसंधिषु त्रिषु द्वादश-द्वादश (22.) छन्दस्यासंज्ञा इष्टका उपदधातीति सूत्रार्थः ॥ षट्त्रिंशद्यजूंषि लिङ्गोक्तदेवत्यानि । मीयतऽइति मा मितश्छादनाच्छन्दो (23.) ऽयं लोकः हे इष्टके त्वं तद्रूपासि अयं वै लोको मायं लोको मित इवेति [८.३.३.५.] श्रुतेः ॥ अस्माल्लोकात्प्रमीयतऽइति प्रमान्तरिक्षलोकरूपासि अन्तरिक्षलोको वै प्रमान्तरिक्षलोको ह्यस्माल्लोकात्प्रमित इवेति [८.३.३.५.] श्रुतेः ॥ प्रतिमा द्यौः सा ह्यन्तरिक्षे प्रतिमिता असौ वै लोकः प्रतिमैष ह्यन्तरिक्षलोके प्रतिमित इवेति [८.३.३.५.] श्रुतेः ॥ अस्रीवयः, अस्यते क्षिप्यतऽइत्यस्रि अस्रि पतनशीलं वयोऽन्नं यस्मात्तदस्रिवयः दीर्घश्छान्दसः अस्रीवयः लोकत्रयरूपं छादनाच्छन्दस्तद्रूपासि (24.) यदेषु लोकेष्वन्नं तदस्रीवयोऽथो यदेभ्यो लोकेभ्योऽन्नꣳ स्रवति तदस्रीवय इति [८.३.३.५.] श्रुतेः ॥ इतः स्पष्टान्येव छन्दांसि पङ्क्त्यादीन्यष्टौ अथो निरुक्तान्येव छन्दाꣳस्युपदधातीति [८.३.३.५.] श्रुतेः इ-

ष्टके त्वं पङ्क्त्युष्णिग्बृहत्यनुष्टुब्विराड्गायत्रीत्रिष्टुब्जगतीछन्दोऽनुपासीत्यर्थः ॥ १८ ॥

a. पृथिवी छन्दः । b. अन्तरिक्षं छन्दः । c. द्यौश्छन्दः । d. समाश्छन्दः । e. नक्षत्राणि छन्दः । f. वाक् छन्दः । g. मनश्छन्दः । h. कृषिश्छन्दः । i. हिरण्यं छन्दः । k. गौश्छन्दः । l. अजा छन्दः । m. अश्वश्छन्दः ॥ १९ ॥

पृथिव्यादिदेवत्यानि यानि छन्दांसि तद्रूपासि । समाः संवत्सराः । स्पष्टमन्यत् । यान्येतद्देवत्यानि छन्दाꣳसि तान्येवैतदुपदधातीति श्रुतेः [८.३.३.६.] ॥ १९ ॥

a. अग्निर्देवता । b. वातो देवता । c. सूर्यो देवता । d. चन्द्रमा देवता । e. वसवो देवता । f. रुद्रा देवता । g. आदित्या देवता । h. मरुतो देवता । i. विश्वे देवा देवता । k. बृहस्पतिर्देवता । l. इन्द्रो देवता । m. वरुणो देवता ॥ २० ॥

इष्टके त्वमग्न्यादिदेवतारूपासि तामुपदधामीति सर्वत्र शेषः । अग्न्यादीनां देवतात्वं प्रसिद्धम् । अग्निर्देवता वातो देवतेत्येता वै देवताश्छन्दाꣳसि तान्येवैतदुपदधातीति [८.३.३.६.] श्रुतेः ॥ २० ॥

मूर्धासि राड्ध्रुवासि धरुणा धर्त्र्यसि धरणी । आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥ २१ ॥

का° [१७.१.१०-१३.] वालखिल्याः सप्त पुरस्तात्प्राणभृद्भ्यो वापरा द्वादशभ्यो ऽपरास्तु मूर्धासि राडिति प्रतिमन्त्रम् । प्रागुक्तदशप्राणभृद्भ्यः पूर्वा अपरा वा सप्त वालखिल्यासंज्ञा इष्टका उपदधाति मूर्धासीत्यादिसप्तमन्त्रैः । तुर्विशेषे । अपराः सप्त वालखिल्यास्तु द्वादशछन्दस्याभ्योऽपरा एवोपधेयाः यन्नीति सप्तमन्त्रैः । वालमात्रिणापि खिला अभिन्ना इति वालखिल्याः प्राणास्ते च चतुर्दश सप्त पुरो रुस्तौ बाहू (25.) शिरो ग्रीवा नाभेरूर्धभागश्चेति ऊरू जानुनी पादौ नाभेरधोभागश्चेति सप्त पश्चादधोभागे एतेष्वङ्गेषु प्राणानां विद्यमानत्वात्तानिवोपदधाति त-

था च श्रुतिः [८,३,४,१.४.५.] प्राणा वै वालखिल्याः प्राणानेवैतदुपदधाति ता यद्वालखिल्या नाम यद्वाऽऊर्वरयोरसम्भिन्नं भवति खिल इति वै तदाचक्षते वालमात्राद्धि हैमे प्राणा असम्भिन्नास्ति यद्वालमात्रादसम्भिन्नास्तस्माद्वालखिल्याः ॥१॥ सप्त वाऽइमे पुरस्तात्प्राणाश्चत्वारि दोर्वाक्त्वाणि शिरो ग्रीवा यद्ऊर्ध्वं नभिस्तात्सप्तममङ्क्ऽङ्क्ते हि प्राणाः ॥४॥ सप्त वाऽइमे पश्चात्प्राणाश्चत्वार्यूर्वष्ठीवानि द्वे प्रतिष्ठे यद्वाङ्नभिस्तात्सप्तममङ्क्ऽङ्क्ते (26.) हि प्राणा एते वै सप्त पश्चात्प्राणास्तानस्मिन्नेतद्दधातीति ॥५॥ इति सूत्रार्थः ॥ मूर्धासि अनुष्टुप् यल्ली परोष्णिक् । ऋग्द्वये चतुर्दश यजूंषि वालखिल्यादेवत्यानि । हे इष्टके त्वं मूर्धा मूर्धवदुत्तमा राट् राजमाना चासि । हे इष्टके त्वं ध्रुवा स्थिरा धरुणा धारणहेतुश्चासि । हे इष्टके त्वं धर्त्री धारणं कुर्वती धरणी भूमिरूपा चासि । एवमिष्टकात्रयस्य त्रिलोकरूपत्वम् तदुक्तं श्रुत्या [८.३.४.८.] मूर्धासि राडितीमं लोकमरोहन् ध्रुवासि धरुणेत्यन्तरिक्षलोकं धर्त्र्यसि धरणीत्यमुं लोकमिति ॥ आयुषे त्वा आयुर्वृद्ध्यर्थं त्वामुपदधामि । वर्चसे कान्त्यर्थं त्वामुपदधामि । कृष्यै सस्यनिष्पत्तये त्वामु° । क्षेमाय सम्पादितधनरक्षणाय त्वामु° । इष्टकाचतुष्टयस्य पशुसंस्तवः (27.) आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वेति चत्वारश्चतुष्पादाः पशव इति [८.३.४.८.] श्रुतिः ॥२१॥

a. यल्ली॑ राज॒ल्यसि॒ यमनी ध्रु॒वासि॒ धरि॑त्री । इ॒षे त्वो॒र्जे त्वा॑ र॒य्यै त्वा॒ पोषा॑य त्वा । b. लो॒कं पृ॑ण° । c. ता अ॑स्य° । d. इन्द्रं॒ विश्वा॑° ॥२२॥

हे इष्टके त्वं यल्ली नियमोपेता राट् राजमाना चासि । तथा यल्ली स्वयमपि सती यमनी सर्वेषां नियमकारिण्यसि । ध्रुवा स्थिरा सती धरित्री भूमिरूपा चासि । तिसृणां त्रिलोकसंस्तवः यल्ली राडित्यमुं लोकमरोहन् यल्यसि यमनीत्यन्तरिक्षलोकं ध्रुवासि धरित्रीतीमं लोकमिति [८.३.४.१०.] श्रुतेः ॥ हे इष्टके इषेऽन्नाय त्वामुपदधामि । ऊर्जे बलाय त्वामु° । रय्यै धनाय त्वामु° । पोषाय धनपुष्टये त्वामु° । इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वेति चतस्रश्चतुष्पादाः पशव इति [८.३.४.१०.] श्रुतेश्चतसृणां पशुसंस्तवः ॥ का° [१७.१.१५.] उत्तरश्रोणेरधि लोकम्पृणाः पूर्ववत् । उत्तरश्रोणेरारभ्य प्रथमचितिवदेव लोकम्पृणा उपदधाति । ततः पुरीषनिर्वापोपस्थानि ॥२२॥ ॥ इति तृतीया चितिः ॥ ॥

a. आप्नुस्त्रिवृत् । b. भान्तः पञ्चदशः । c. व्योमा सप्तदशः । d. धरुणो एकविꣳशः । e. प्रतूर्तिरष्टादशः । f. तपो नवदशः । g. अभीवर्तः सविꣳशः । h. वर्चो द्वाविꣳशः । i. सम्भरणस्त्रयोविꣳशः । k. योनिश्चतुर्विꣳशः । l. गर्भाः पञ्चविꣳशः । m. ओजस्त्रिणवः । n. क्रतुरेकत्रिꣳशः । o. प्रतिष्ठा त्रयस्त्रिꣳशः । p. ब्रध्नस्य विष्टपं चतुस्त्रिꣳशः । q. नाकः षट्त्रिꣳशः । r. विवर्तोऽष्टाचत्वारिꣳशः । s. धर्त्र चतुष्टोमः ॥ २३ ॥

का° [१७. १०. ७.] उत्तरां पूर्वयोराप्नुस्त्रिवृदिति । पूर्वानूकान्तविकृतयोर्दक्षिणोत्तरयोर्मध्ये उत्तरां जङ्घामात्रीमुदङ्मुख उपदधातीति सूत्रार्थः ॥ अस्यां कण्डिकायामष्टादश यजूंषि चतुर्णां मृत्युमोक्ष्न्युपधाने विनियोगः प्रतूर्तिरित्यादीनां चतुर्दशार्धपञ्चोपधाने विनियोगः । हे इष्टके त्वं त्रिवृत्स्तोमरूपासि साम्नामावृत्तिविशेषाः स्तोमाः तेषां विशेषणान्याप्नुरित्यादीनि । कीदृशस्त्रिवृत् आप्नुः अप्नू व्याप्तौ अश्नुते व्याप्नोति सर्वान्स्तोमानित्याप्नुः । तद्रूपां त्वामुपदधामीति सर्वत्र शेषः । स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै ब्रह्म ब्रह्मैवैतदुपदधातीति [८. ४. १. ३.] श्रुतेः । यद्वा आप्नुः वायुः त्रिवृत् त्रिषु लोकेषु वर्तत इति त्रिवृत् क्विप् सर्वभूतव्यापकत्वादाप्नुर्वायुस्तद्रूपासि । एवं श्रुत्यनुसारेण सर्वत्र व्याख्यायते । तथा च श्रुतिः [८. ४. १. १.] स पुरस्तादुपदधात्याप्नुस्त्रिवृदिति य एव त्रिवृत्स्तोमस्तमुपदधाति तच्चत्तमाहाप्नुरित्येष हि स्तोमानामाशिष्ठोऽथो वायुर्वा अाप्नुस्त्रिवृत्स एषु त्रिषु लोकेषु वर्तते तच्चत्तमाहाप्नुरित्येष हि सर्वेषां भूतानामाशिष्ठो वायुर्ह (28.) भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधातीति ॥ का° [१७. १०. १.] दक्षिणां दक्षिणयोर्भान्तः पञ्चदश इति । दक्षिणानूकान्तविकृतयोर्दक्षिणोत्तरपञ्चयोर्मध्ये भान्त इति मन्त्रेण दक्षिणां पञ्चां प्रत्यङ्मुख उपदधातीति सूत्रार्थः ॥ भान्तः वज्ररूपो यः पञ्चदशः स्तोमः यद्वा भान्तः चन्द्रः पञ्चदशाहानि पूर्यमाणत्वात्पञ्चदशाहं क्षीयमाणत्वात्पञ्चदशः भा कान्तिरेवान्तः स्वरूपं यस्य तद्रूपासि । य एव पञ्चदश स्तोमस्तं तदुपदधाति तच्चत्तमाह भान्त इति वज्रो वै भान्तो वज्रः पञ्चदशोऽथो

चन्द्रमा वै भात्तः पञ्चदशः सः पञ्चदशाद्धान्यापूर्यते पञ्चदशापक्षीयते तद्यत्तमाह भात्त इति भाति हि चन्द्रमाश्चन्द्रमा ह्य भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधातीति [८.४.१.१०.] श्रुतेः ॥ का° [१७.१०.१०.] दक्षिणामुत्तरयोर्व्योमा सप्तदश इति । उत्तरानूकान्तविक्रितयोर्दक्षिणोत्तरपक्ष्योर्मध्ये दक्षिणां पक्ष्यां व्योमेति प्रत्यङ्मुख उपदधातीति सूत्रार्थः ॥ विविधमवतीति व्योमा प्रजापतिः सप्तदशः स्तोमः । संवत्सरो वा व्योमा सप्तदशः द्वादशमासपञ्चर्तुरूपसप्तदशावयवत्वात् (29.) तद्रूपासि । य एव सप्तदश स्तोमस्तं तदुपदधाति तद्यत्तमाह व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदशोऽथो संवत्सरो वा व्योमा सप्तदंशस्तस्य द्वादश मासाः पञ्चर्तवस्तद्यत्तमाह व्योमेति व्योमा हि संवत्सरः संवत्सरो ह्य भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधातीति [८.४.१.११.] श्रुतेः ॥ का° [१७.१०.८.] दक्षिणामपरयोर्धरुणा एकविंश इति । अपरानूकान्तविक्रितयोर्दक्षिणोत्तरयोर्मध्ये दक्षिणां जङ्घामात्रीं धरुण इति दक्षिणामुख उपदधातीति सूत्रार्थः ॥ धरुणो धारकः प्रतिष्ठाभूत एकविंशः स्तोमः यद्वा धरुण आदित्यः स एकविंशावयवत्वादेकविंशः द्वादश मासाः पञ्चर्तवः त्रयो लोका आदित्य इत्यवयवास्तद्रूपासि । य एवैकविंश स्तोमस्तं तदुपदधाति तद्यत्तमाह धरुणा इति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविंशो ऽथोऽसौ वाऽआदित्यो धरुण एकविंशस्तस्य द्वादश मासाः पञ्चर्तव इमे लोका असावेवादित्यो धरुण एकविंशस्तद्यत्तमाह धरुणा इति यदा ह्येवैषोऽस्तमेत्यथेदꣳ सर्वं ध्रियतऽआदित्यो ह्य भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधातीति [८.१.१.१२.] श्रुतेः ॥ का° [१७.१०.११.] चतुर्दश प्रतिमल्लं प्रतूर्तिरष्टादश इति । चतस्र उपधाय चतुर्दशार्धपक्ष्या उदङ्मुख उपदधाति चतुर्दशमल्लैरिति सूत्रार्थः ॥ अतः परं संवत्सररूपाण्युपदधाति । प्रकृष्टा तूर्तिस्त्वरा यस्य स प्रतूर्तिः अष्टादशः स्तोमः यद्वा संवत्सरः प्रतूर्तिरष्टादशावयवः द्वादश मासाः पञ्चर्तवः संवत्सरश्चेत्यवयवाः । य एवाष्टादश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव प्रतूर्तिरष्टादशस्तस्य द्वादश मासाः पञ्चर्तवः संवत्सर एव प्रतूर्तिरष्टादशस्तद्यत्तमाह प्रतूर्तिरिति संवत्सरो हि सर्वाणि भूतानि प्रतिरति तदेव तद्रूपमुपदधातीति श्रुतेः [८.४.१.१३.] ॥ तपोरूपो नवदशः स्तोमः यद्वा संवत्सरस्तपः शीतोष्णवर्षैस्तपतीति स

नवदशः द्वादश मासाः षडृतवः संवत्सर इति तद्रूपासि । य एव नवदश स्तोमस्तं तदुपदधात्ययो संवत्सरो वाव तपो नवदशस्तस्य द्वादश मासाः षडृतवः संवत्सर एव तपो नवदशस्तत्यत्तमाह तप इति संवत्सरो हि सर्वाणि भूतानि तपति तदेव तद्रूपमुपद° [१४.] ॥ अभिवर्त्यति आवर्त्यतऽइत्यभीवर्तः समावृत्तिरूपः सविंशः स्तोमः यद्वा अभिवर्तयत्यावर्तयति सर्वाणि भूतानीत्यभीवर्तः संवत्सरः उपसर्गस्य घञ्यमनुष्ये बहुलमिति [पा° ६.३.१२२.] दीर्घः द्वादशमाससप्तऽर्तुसंवत्सररूपविंशतिसंख्यया सहितः सविंशः । य एव सविंश स्तोमस्तं तदुपदधातीत्ययो संवत्सरो वाऽअभीवर्तः सविंशस्तस्य द्वादश मासाः (30.) सप्तऽर्तवः संवत्सर एवाभीवर्तः सविंशस्तत्यत्तमाहाभीवर्त इति संवत्सरो हि सर्वाणि भूतान्यभिवर्तति तदितद्रूप° [१५.] ॥ वर्चः बलविशेषप्रदो द्वाविंशः स्तोमः यद्वा वर्चः संवत्सरः वर्चस्वितमः द्वादश मासाः सप्तऽर्तवः द्वे अहोरात्रे संवत्सरश्चेति द्वाविंशतिसंख्योपेतत्वाद्द्वाविंशः तद्रूपासि । य एव द्वाविंश स्तोमस्तं तदुपदधात्ययो संवत्सरो वाव वर्चो द्वाविंशस्तस्य द्वादश मासाः सप्तऽर्तवो द्वेऽअहोरात्रे संवत्सर एव वर्चो द्वाविंशस्तत्यत्तमाह वर्च इति संवत्सरो हि सर्वेषां भूतानां वर्चस्वितमस्तदितद्रूप° [१६.] ॥ सम्भिर्ति सम्भरणः सम्यक् पोषकस्त्रयोविंशः स्तोमस्त्वमसि यद्वा सम्भरत्युत्पादयति संहरति विनाशयति वा सम्भरणः संवत्सरः त्रयोदश (31.) मासाः सप्तऽर्तवो द्वेऽअहोरात्रे एकः संवत्सर इति त्रयोविंशावयवः तद्रूपासि । य एव त्रयोविंश स्तोमस्तं तदुपदधात्ययो संवत्सरो वाव सम्भरणस्त्रयोविंशस्तस्य त्रयोदश मासाः सप्तऽर्तवो द्वेऽअहोरात्रे संवत्सर एव सम्भरणस्त्रयोविंशस्तत्यत्तमाह सम्भरण इति संवत्सरो हि सर्वाणि भूतानि सम्भृतस्तदेव तद्रूप° [१७.] ॥ योनिः प्रजोत्पादकश्चतुर्विंशः स्तोमोऽसि यद्वा योनिः सर्वस्थानभूतः संवत्सरश्चतुर्विंशतिपक्षात्मकस्तद्रूपासि । य एव चतुर्विंश स्तोमस्तं तदुपदधात्ययो संवत्सरो वाव योनिश्चतुर्विंशस्तस्य चतुर्विंशतिरर्धमासास्तत्यत्तमाह योनिरिति संवत्सरो हि सर्वेषां भूतानां योनिस्तदेव तद्रूप° [१८.] ॥ गर्भाः व्यत्ययेन बहुत्वं सामगर्भः पञ्चविंश स्तोमोऽसि यद्वा गर्भः संवत्सरो भूतोत्पादकत्वाच्चतुर्विंशतिः पक्षा एकः संवत्सर इति अधिकमासो भूत्वा ऋतुषु गर्भी

भवतीति वा गर्भः । य एव पञ्चविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव गर्भाः पञ्चविꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः संवत्सर एव गर्भाः पञ्चविꣳशस्तत्यत्तमाहु गर्भा इति संवत्सरो हु त्रयोदशो मासो गर्भी भूत्वऽर्तून्प्रविशति तदेव तदूप° [११.] ॥ ओजः मतुब्लोपः ओजस्वी तेजस्वी वज्रो वाऽओजः तदूपस्त्रिणवः स्तोमोऽसि यद्वा ओजः संवत्सरश्चतुर्विंशतिपक्षाहोरात्रसंवत्सरात्मकत्वात्त्रिणवः त्रिगुणा नव यत्र । य एव त्रिणव स्तोमस्तं तदुपदधाति तत्यत्तमाहौज इति वज्रो वाऽओजो वज्रस्त्रिणवोऽथो संवत्सरो वाऽओजस्त्रिणवस्तस्य चतुर्विꣳशतिरर्धमासा द्वेऽअहोरात्रे संवत्सर एवौजस्त्रिणवस्तत्यत्तमाहौज इति संवत्सरो हि सर्वेषां भूतानामोजस्वितमस्तदेव तदूप° [२०.] ॥ क्रतुर्यज्ञोपयोगी एकत्रिंशः स्तोमोऽसि यद्वा संवत्सर एव करोतीति क्रतुः पक्षऽर्तुसंवत्सरात्मकत्वादेकत्रिंशः । य एवैकत्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव क्रतुरेकत्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः षडृतवः संवत्सर एव क्रतुरेकविꣳशस्तत्यत्तमाहु क्रतुरिति संवत्सरो हि सर्वाणि भूतानि करोतीति [८. ४. १. २१.] श्रुतिः ॥ प्रतिष्ठा स्थितिहेतुस्त्रयस्त्रिꣳशः स्तोमोऽसि यद्वा संवत्सरः प्रतिष्ठा संवत्सरे सर्वस्य प्रतिष्ठितत्वात्पक्षऽर्वहोरात्रसंवत्सरात्मकत्वात्त्रयस्त्रिंशः । य एव त्रयस्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव प्रतिष्ठा त्रयस्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः षडृतवो द्वेऽअहोरात्रे संवत्सर एव प्रतिष्ठा त्रयस्त्रिꣳशस्तत्यत्तमाहु प्रतिष्ठिति संवत्सरो हि सर्वेषां भूतानां प्रतिष्ठा तदेतदूप° [२२.] ॥ ब्रध्नः सूर्यः असौ वाऽआदित्यो ब्रध्न इति श्रुतिः विष्टपं निवासस्थानं भुवनं विष्टपं लोक इति कोशात् ब्रध्नस्य विष्टपं स्वाराज्यं स्वतन्त्रत्वं तदूपस्तत्प्रदो यश्चतुस्त्रिꣳश स्तोमस्तद्रूपासि यद्वा संवत्सरो ब्रध्नस्य विष्टपं रविणैव कालनिर्माणत्वात् चतुर्विंशतिपक्षसप्तऽर्वहोरात्रसंवत्सरात्मकत्वाच्चतुस्त्रिंशः । य एव चतुस्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः सप्तऽर्तवो द्वेऽअहोरात्रे संवत्सर एव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तत्यत्तमाहु ब्रध्नस्य विष्टपमिति स्वाराज्यं वै ब्रध्नस्य विष्टपं तदेतदूप° [२३.] ॥ नाकः स्वर्गप्रदः षट्त्रिंशः स्तोमोऽसि संवत्सरो वा नाकः काम्यतऽइति कं सुखं न कमकं दुःखं तन्नास्ति यत्र स नाकः

षट्त्रिंशः पक्षमासात्मकत्वात् । य एव षट्त्रिंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव नाकः षट्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा द्वादश मासास्तद्यत्तमाह नाक इति न हि तत्र गताय कस्मै चनाकं भवत्यथो संवत्सरो वाव नाकः संवत्सरः स्वर्गो लोकस्तदेव तद्रूप° [२४.] ॥ विवर्तन्ते आवर्तन्ते सामानि यत्रेति विवर्तः अष्टाचत्वारिंशः स्तोमस्तद्रूपासि यद्वा विविधं वर्तन्ते भूतानि यत्रेति विवर्तः संवत्सरः अधिमासत्वेन षड्विंशतिः पक्षाः सप्तर्तवः त्रयोदश मासाः द्वे अहोरात्रे इत्यष्टाचत्वारिंशः । य एवाष्टाचत्वारिंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव विवर्तोऽष्टाचत्वारिंशस्तस्य षड्विंशतिरहोरात्राणि त्रयोदश मासाः सप्तर्तवो द्वेऽहोरात्रे तद्यत्तमाह विवर्त इति संवत्सराद्धि सर्वाणि भूतानि विवर्तन्ते तदेतद्रूप° [२५.] ॥ धर्त्रं धारकश्चतुरुत्तरस्तोमश्चतुष्टोमः मध्यपदलोपी समासः त्रिवृत्पञ्चदशसप्तदशैकविंशानां समूहस्तद्रूपासि । वायुर्वा धर्त्रं जगदाधारत्वात् चतुर्दिग्भिः स्तूयमानत्वाच्चतुष्टोमः । य एव चतुष्टोमस्तं तदुपदधाति तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्रं प्रतिष्ठा चतुष्टोमोऽथो वायुर्वाव धर्त्रं चतुष्टोमः स आभिश्चतसृभिर्दिग्भिः स्तुते वायुर्वै सर्वेषां भूतानां प्रतिष्ठा तदेतद्रूपमुपदधातीति [८. ४. १. २६.] श्रुतेः ॥ आदावन्ते च वायूपधानेन वायुना सर्वभूतानि वशीकरोतीति भावः तदुक्तं श्रुत्या [८. ४. १. २६.] स वै वायुमेव प्रथममुपदधाति वायुमुत्तमं वायुनैव तदेतानि सर्वाणि भूतान्युभयतः परिगृह्णातीति ॥ एतैरष्टादशभिः स्तोमवादिभिः स्तोमरूपत्वं नीता अष्टादशेष्टका उपधेया इत्यर्थः ॥ २३ ॥

VII. a. अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्तुतं त्रिवृत्स्तोमः ।

b. इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्तुतं पञ्चदशः स्तोमः ।

c. नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्तुतꣳ सप्तदशः स्तोमः ।

d. मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्तुत एकविꣳश स्तोमः ॥ २४ ॥

का° [१७. १०. १२.] दक्षिणां पूर्वयोरग्नेर्भाग इति । पूर्वानूकान्ते विकृतयोर्जङ्घात्र्योर्मध्ये दक्षिणामुपदधात्युदङ्मुखः उत्तरा पूर्वमुपकृता ॥ दश यजूंषि चतुर्भिर्मृ-

त्युमोक्तिन्युपधानं षड्भिः षट्पद्योपधानं दशेष्टकाः स्पृत्संज्ञाश्च तत्रार्थवादः श्रुत्युक्तः । उत्पन्नेन सृष्ट्यादौ प्रजापतिना सर्वाणि भूतानि स्रष्टुं गर्भे कृतानि गर्भस्थान्येव भूतानि पाप्मा मृत्युरगृह्णात् ततः प्रजापतिर्देवानुवाच युष्माभिः सह्याहमिमानि भूतानि पापवृपान्मृत्योर्मोचयामीति देवैरुक्तं तत्रास्माकं को लाभः प्रजापतिनोक्तं वृणुत तैः कैश्चिदुक्तमस्माकं भागोऽस्तु अन्यैरुक्तमस्माकमाधिपत्यमस्त्विति तथेत्युक्तेकेभ्यो भागमपरेभ्य आधिपत्यं दत्वा तैः सह भूतानि मृत्योरस्पृणोत्ततः स्पृत इष्टका इति । तथा च श्रुतिः [८,४,२,१.२.] अथ स्पृत उपदधात्येतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रतिदिते सर्वाणि भूतानि गर्भ्यभवत्तान्यस्य गर्भ एव सन्ति पाप्मा मृत्युरगृह्णात् ॥ १ ॥ स देवानब्रवीद्युष्माभिः सहेमानि सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणवानीति किं नस्ततो भविष्यतीति वृणीधमित्यब्रवीत्तं भागो नोऽस्त्वित्येकेऽब्रुवन्नाधिपत्यं नोऽस्त्वित्येके स भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्योरस्पृणोद्यदस्पृणोत्तस्मात्स्पृतस्तथैवैतद्यजमानो भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणोतीति ॥ अथ मन्त्रार्थः । हे इष्टके या त्वमग्नेर्भागो विभागोऽसि यस्यां च त्वयि दीक्षाया वाच आधिपत्यं स्वामित्वं यया च त्वया त्रिवृत्स्तोमः विभक्तिव्यत्ययः त्रिवृता स्तोमेन ब्रह्म ब्राह्मणं स्पृतं पाप्मनो मृत्योरपनीतं रक्षितं यस्यां त्वयि त्रिवृत्स्तोम इति वा तां त्वामुपदधामीति शेषः । एवं सर्वत्र व्याख्येयम् स्पृ प्रीतिरक्षाप्राणनिषु स्वादिः । वाग्वै दीक्षेति [८.४.२.३.] श्रुतेः ॥ का° [१७.१०.१५.] उत्तरामुत्तरयोरिन्द्रस्य भाग इति । उदगनूकान्तविक्षितयोर्दक्षिणोत्तरयोः पक्ष्मयोर्मध्ये उत्तरामुपदधाति दक्षिणा तूपक्षितेति सूत्रार्थः ॥ हे इष्टके त्वमिन्द्रस्य भागोऽसि यस्यां त्वयि विक्षोराधिपत्यं पञ्चदशेन स्तुत्रं क्षत्रजातिः स्पृतं मृत्योर्मोचितम् इन्द्राय भागं कृत्वा विक्षवऽआधिपत्यमकरोदिति [८.४.२.४.] श्रुतेः ॥ का° [१७.१०.१४.] उत्तरां दक्षिणयोर्नृचक्षसां भाग इति । दक्षिणानूकान्तविक्षितयोर्दक्षिणोत्तरयोः पक्ष्मयोरुत्तरां निदधाति दक्षिणोपक्षिता ॥ नॄन् शुभाशुभकर्तॄन् चक्षते जानन्ति ते नृचक्षसो देवास्तेषां भागोऽसि त्वयि धातुराधिपत्यं त्वया सप्तदशस्तोमेन ज्ञानित्रं वैश्यजातिः स्पृतम् देवा वै नृचक्षसो देवेभ्यो भागं कृत्वा धात्रऽआधिपत्यमकरोद्विट्वै

ज्ञनित्रमिति [८.४.२.५.] श्रुतेः ॥ का° [१७.१०.१३.] उत्तरामपरयोर्मित्रस्य भाग इति । अपरानूकान्तविक्षितयोर्दक्षिणोत्तरयोर्जङ्घामात्र्योर्मध्ये उत्तरां जङ्घामात्रीं दक्षिणामुख उपदधाति दक्षिणा तूपक्षितेति सूत्रार्थः ॥ हे इष्टके त्वं मित्रस्य प्राणस्य भागोऽसि त्वयि वरुणस्यापानस्याधिपत्यं यथा त्वयैकविंशेन स्तोमेन दिवः सम्बन्धिनी वृष्टिर्वातश्च स्यूतस्तां सादयामि । प्राणो वै मित्रोऽपानो वरुणः प्राणाय भागं कृत्वापानायाधिपत्यमकरोदिति [८.४.२.६.] श्रुतेः ॥ २४ ॥

a. वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात्स्यूतं चतुर्विꣳश स्तोमः ।

b. आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भा स्यूताः पञ्चविꣳश स्तोमः ।

c. अदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्यूतं त्रिणव स्तोमः ।

d. देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ समीचीर्दिशः स्यूताश्चतुष्टोम स्तोमः ॥ २५ ॥

का° [१७.१०.१६.] षट् प्रतिमन्त्रं वसूनां भाग इति । चतुर्दशभ्योऽपराः षण्मन्त्रैः षट् पद्या उपदध्यादिति सूत्रार्थः ॥ इष्टके त्वं वसूनां भागोऽसि त्वयि रुद्राणामाधिपत्यं त्वया चतुर्विंशेन स्तोमेन प्रजानां चतुष्पात् गवाश्वादिकं स्यूतं पापान्मोचितम् वसुभ्यो भागं कृत्वा रुद्रेभ्य आधिपत्यमकरोदिति [८.४.२.७.] श्रुतेः ॥ आदित्यानां या त्वं भागोऽसि त्वयि मरुतामाधिपत्यं त्वया पञ्चविंशेन स्तोमेन प्रजानां गर्भाः मृत्योः रक्षिताः आदित्येभ्यो भागं कृत्वा मरुद्भ्य आधिपत्यमकरोदिति [८.४.२.८.] श्रुतेः । त्वमदित्यै अदित्या भूमिर्भागोऽसि पूष्ण आधिपत्यं त्वयि त्वया त्रिणविन स्तोमेन प्रजानामोजः बलमष्टमो धातुर्वा स्यूतम् इयं वाऽअदितिरस्यै भागं कृत्वा पूष्ण आधिपत्य° [१.] ॥ त्वं देवस्य सवितुर्भागोऽसि त्वयि बृहस्पतेराधिपत्यं त्वया चतुष्टोमेन स्तोमेन समीचीः समीच्यः सम्यगञ्चन्ति ज्ञना (32.) यासु ता दिशः स्यूताः । देवाय सवित्रे भागं कृत्वा बृहस्पतयेऽआधिप° [१०.] ॥ २५ ॥

a. यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्यूताश्चतुश्चत्वारिꣳश स्तोमः ।

b. ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतꣳ स्यूतं त्रयस्त्रिꣳश स्तोमः ॥ २६ ॥

यवानां पूर्वपक्षाणां त्वं भागोऽसि अयवानामपरपक्षाणां त्वयाधिपत्यं चतुश्चत्वारिंशेन स्तोमेन त्वया प्रजाः स्पृताः रक्षिताः । पूर्वपक्षा वै यवा अपरपक्षा अयवास्ते ह्येद्ध सर्वं युवते चायुवते च पूर्वपक्षेभ्यो भागं कृत्वापरपक्षेभ्य आधिप° [११.] ॥ ऋभूणां देवविशेषाणां त्वं भागोऽसि त्वयि विश्वेषां देवानामाधिपत्यं त्रयस्त्रिंशेन स्तोमेन त्वया भूतं प्राणिमात्रमनुक्तं स्पृतं पाप्मनो मृत्योः रक्षितम् तथा यजमानोऽपि सर्वभूतानि मृत्योः स्पृणोति । ऋभुभ्यो भागं कृत्वा विश्वेभ्यो देवेभ्य आधिपत्यमकरोदिति [८. ४. २. १२.] श्रुतेः ॥ २६ ॥

सहश्च सहस्यश्च हैमन्तिकावृतूऽअग्नेरन्तःश्ले° ॥ २७ ॥

का° [१७. १०. १७.] ऋतव्ये सहश्च सहस्यश्चेति । अनूकमभितो द्वे पक्ष्ये उपदधाति ॥ ऋतुदेवत्यं यजुः । सहो मार्गशीर्षः सहस्यः पौषः एतौ हैमन्तिकौ हेमन्तावयवौ । शिष्टं पूर्वतुल्यम् [१३. २५.] ॥ २७ ॥

VIII. a. एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत् ।

b. तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् ।

c. पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत् ।

d. सप्तभिरस्तुवत सप्तऽऋषयोऽसृज्यन्त धाताधिपतिरासीत् ॥ २८ ॥

का° [१७. १०. १८.] रेतःसिग्वेलायां च सप्तदश सर्वतो नव दक्षिणेनानूकꣳ सृष्टीरेकयास्तुवतेति प्रतिमन्त्रम् । सर्वासु दिक्षु रेतःसिग्वेलायां सृष्टिसंज्ञाः सप्तदशेष्टका उपदधाति तन्मध्ये प्रागनूकं दक्षिणेन नव अर्धादष्टावुत्तरेणेति सूत्रार्थः ॥ सप्तदश यजूंषि सृष्टीष्टकादेवत्यानि । अत्र निदानम् प्रजापतिर्भूतानि मृत्योरेवं मुक्ता प्रजाः सृजेय प्रजायेयेति विचिन्त्य प्राणाधिष्ठातृदेवान्दिगादीनूचे युष्माभिः सह परमात्मानं स्तुवेमाः प्रजा जनयामीति देवा ऊचुः केन स्तोष्यामः स ऊचे मया युष्माभिश्चेति तथेत्युक्ता प्राणैः प्रजापतिना चास्तुवतेति । तथा च श्रुतिः [८, ४, ३, १. २.] तद्वै (33.) प्रजापतिः सर्वाणि भूतानि पाप्मनो मृत्योर्मुक्ताकामयत प्रजाः सृजेय प्रजायेयेति ॥ १ ॥ स प्राणानब्रवीद्युष्माभिः सहेमाः प्रजाः प्रजनयानीति ते

वै केन स्तोष्यामहऽइति मया चैव युष्माभिश्चेति तथेति ते प्राणैश्चैव प्रजापतिना चास्तुवतेति ॥ प्रजापतिरेकया वाचा सहात्मानमस्तुवत स्तुतवान् वचनव्यत्ययः । वाग्वाऽएका वाचैव तदस्तुवतेति [८.४.३.३.] श्रुतिः । प्रजा अधीयन्त उद्पाद्यन्त प्रजापत्यर्थमस्थाप्यन्तेति वा । सृष्टानां प्रजानां प्रजापतिरेवाधिपतिरासीत्स्वाम्यभूत् । एवं षोडश मन्त्रा व्याख्येयाः ॥ तिसृभिः प्राणोदानव्यानैरस्तौत् ब्रह्म ब्राह्मणजातिः सृष्टा ब्रह्मणस्पतिर्ब्राह्मणजातिः (34.) स्वाम्यभूत् । त्रयो वै प्राणाः प्राणोदानव्यानास्तैरिति [८.४.३.४.] श्रुतिः ॥ पञ्चभिः प्राणैरस्तुवत (35.) पञ्च भूतानि सृष्टानि भूतानां पतिर्देवस्तेषां स्वाम्यभूत् य एवमे मनःपञ्चमाः (36.) प्राणास्तैरेव तदस्तुवतेति [८.४.३.५.] श्रुतिः ॥ सप्तभिः श्रोत्रचक्षुर्नासावाग्रूपैः सप्तशीर्षण्यप्राणैरस्तुवत ततः सप्तऽऋषयो सृष्टाः धाता जगत्स्रष्टाद्यो देवः स्वाम्यभूत् । य एवमे सप्त शीर्षन्प्राणास्तैरेवेति [८.४.३.६.] श्रुतिः ॥ २८ ॥

a. नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीत् ।

b. एकादशभिरस्तुवतऽऋतवोऽसृज्यन्तार्तवा अधिपतय आसन् ।

c. त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत् ।

d. पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् ।

e. सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीत् ॥२९॥

नवभिः सप्त शिरःप्राणा द्वावध इति नवप्राणैः प्रजापतिरस्तौत् ततः पितरः अग्निष्वात्तादयः सृष्टाः अदितिः अखण्डिता प्रजापतिशक्तिः सृष्टानां पितृणामधिपत्नी स्वामिवेनाधिकं पालयित्र्यासीत् नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तैरिति [८.४.३.७.] श्रुतेः ॥ एकादशभिः दश प्राणा आत्मैकादशस्तैरस्तुवत (35.) । ऋतवः वसन्ताद्याः सृष्टाः आर्तवाः ऋतुपालका देवविशेषाः स्वामिनोऽभुवन् दश प्राणा आत्मैकादश इति [८.४.३.८.] श्रुतेः ॥ त्रयोदशभिः दश प्राणाः द्वौ पादौ एक आत्मेति तैरस्तौत् ततो मासाः चैत्रादयः सृष्टाः मासाभिमान्ययनद्वयात्मकः संवत्सरः तेषामधिपतिरासीत् । दश प्राणा द्वे प्रतिष्ठेऽआत्मा त्रयोदश इति [१.] श्रुतिः ॥ पञ्चदशभिः दश हस्ताङ्गुलयः करौ बाहू नाभेरूर्ध्वभागश्च तैरस्तुवत (35.)

ततः क्षत्रं क्षत्रियजातिः सृष्टा इन्द्रः ऐश्वर्यशाली तदभिमानी देवः स्वाम्यभूत् । दश हस्त्या अङ्गुलयश्चत्वारि दोर्बाहुवाणि यद्ऊर्ध्वं नाभेस्तत्पञ्चदशमिति [१०.] श्रुतेः ॥ सप्तदशभिः दश पादाङ्गुलयः ऊरू जानुनी पादौ नाभिरधोभागश्चेति तैरस्तौत् तदा ग्राम्याः पशवः गवादयः सृष्टाः बृहस्पतिस्तेषां स्वाम्यभूत् । दश पाद्या अङ्गुलयश्चत्वार्यूर्वष्ठीवानि द्वे प्रतिष्ठे यदवाङ्नाभेस्तत्सप्तदशमिति [११.] श्रुतेः ॥ २९ ॥

a. नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नीऽआस्ताम् ।

b. एकविꣳशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत् ।

c. त्रयोविꣳशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाधिपतिरासीत् ।

d. पञ्चविꣳशत्यास्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत् ।

e. सप्तविꣳशत्यास्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायँस्तऽएवाधिपतय आसन् ॥ ३० ॥

नवदशभिः दश हस्ताङ्गुलयः ऊर्धाधःस्थच्छिद्ररूपा नव प्राणास्तैरस्तौत् । ततः शूद्रार्यौ शूद्रवैश्यावसृज्येतां सृष्टौ अर्यः स्वामिवैश्ययोः । अहोरात्रे तयोः स्वामित्वेनास्ताम् । दश हस्त्या अङ्गुलयो नव प्राणा इति [८.४.३.१२.] श्रुतेः ॥ एकविंशत्या विंशतिः करपादाङ्गुलयः आत्मा चेति एकविंशत्यास्तौत् । ततः एकशफाः पशवोऽश्वादयः सृष्टाः एकं शफं खुरः प्रतिपादं येषां ते एकशफाः शफं (37.) क्लीवे खुरः पुमानित्यमरः [२.८.४१.] वरुणस्तेषामधिपतिरासीत् । दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳश इति [१३.] श्रुतेः ॥ त्रयोविंशत्या विंशतिः करपादाङ्गुलयः पादावात्मा चेति तैः स्तुति क्षुद्राः पशवोऽजादयः सृष्टाः तेषां पूषा स्वाम्यभूत् । दश हस्त्या अङ्गुलयो दश पाद्या द्वे प्रतिष्ठेऽआत्मा त्रयोविꣳश इति [१४.] श्रुतेः ॥ पञ्चविंशत्या विंशतिः करपादाङ्गुलयः करौ पादावात्मेति तैरस्तुवत (38.) तदारण्याः वनस्थाः पशवः कृष्णमृगादयः सृष्टास्तेषां वायुः स्वाम्यभूत् । दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गान्यात्मा पञ्चविꣳश इति [१५.] श्रुतेः ॥ सप्तविंशत्या करपादाङ्गुलयः द्वौ भूजावूरू चात्मेति तैरस्तुवत (38.) ततो

द्यावापृथिवी द्युभूलोकौ व्येतां विशेषेणागच्छतामित्यर्थः विपूर्वादिण् गताविति धातोर्लङि प्रथमद्विवचनम् वसवोऽष्टौ रुद्रा एकादश आदित्या द्वादशानुव्यायन् अन्वगच्छन् अनुगताः तऽएव स्वामिनोऽभूवन् । दश कृत्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गानि द्वे प्रतिष्ठेऽआत्मा सप्तविꣳश इति [१६.] श्रुतिः ॥ ३० ॥

a. नवविꣳशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीत् ।

b. एकत्रिꣳशतास्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसन् ।

c. त्रयस्त्रिꣳशतास्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ।

d. लोकं पृणा° । e. ता अस्य° । d. इन्द्रं विश्वा° ॥ ३१ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां चतुर्दशोऽध्यायः ॥

नवविंशत्या करपादाङ्गुलयो नव छिद्ररूपाः प्राणास्तैरस्तुवत (38.) ततो वनस्पतयोऽश्वत्थवटाद्याः सृष्टाः तेषां स्वामी सोमोऽभूत् । दश कृत्या अङ्गुलयो दश पाद्या नव प्राणा इति [८. ४. २. १७.] श्रुतिः ॥ एकत्रिंशता करपादाङ्गुलयः दशेन्द्रियाणि आत्मेति तैरस्तौत् ततः प्रजाः सृष्टाः यवाः पूर्वपक्षा अयवाः अपरपक्षास्तासां प्रजानां स्वामिनोऽभूवन् दश कृत्या अङ्गुलयो दश पाद्या दश प्राणा आत्मैकत्रिꣳश इति [१८.] श्रुतेः पूर्वपक्षापरपक्षा एवात्राधिपतय आसन्निति [१८.] च ॥ त्रयस्त्रिंशता अङ्गुलयः इन्द्रियाणि पादौ आत्मेति तैरस्तुवत स्तौति स्म प्रजापतिर्देवैः सह । ततो भूतानि अशाम्यन् सर्वे प्राणिनः शान्ताः सुखिनोऽभूवन् । परमे सत्यलोके तिष्ठतीति परमेष्ठाः प्रजापतिः प्रजापालकः सर्वेषां भूतानामधिपतिः स्वाम्यासीत् दश कृत्या अङ्गुलयो दश पाद्या दश प्राणा द्वे प्रतिष्ठेऽआत्मा त्रयस्त्रिꣳश इति [११.] श्रुतिः ॥ अत्र या-येष्टका येन मन्त्रेणोपधेया सा-सा तत्तन्मन्त्रोक्तदेवतारूपेण ध्यातव्येत्यर्थः ॥ का° [१७. १०. ११.] उत्तराꣳसादधि लोकम्पृणाः पूर्ववत् । उत्तरांसादारभ्य प्रथमचितिवल्लोकम्पृणा उपदधातीति सूत्रार्थः ॥ ततः पुरीषनिर्वापः सप्तऽर्चोपस्थानं च बोध्यम् । तन्मन्त्रप्रतीकानि लोकं पृण ता अस्य इन्द्रं विश्वा इति तास्तिस्रोऽपि व्याख्याताः [१२. १४-१६.] ॥ ३१ ॥

इति चतुर्थी चितिः पूर्णा ॥ ॥ इति श्रीमन्महीधरकृते वेददीपे मनोहरे । वेद-चन्द्रमितोऽध्यायो वर्ण्यद्वित्रिचतुश्चितिः (39.) ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-४ ॥१-४॥ ५. ६ [ग्रैष्माऽऋतू] ॥५॥५॥ ॥

II. ॥ ७ ॥१॥ ८a-e ॥२॥ ८f-k ॥३॥८॥ ॥

III. ॥ ९a-d ॥१॥ e-h ॥२॥ i-m ॥३॥ १०a-d ॥४॥ e-k ॥५॥ १३॥ ॥

IV. ॥ ११ ॥१॥ १२ ॥२॥ १३ [°रालंसि - °रालंसि - °रालस्यु°]. १४. १५ [वार्षिकाऽऋतू]. १६ [शारदाऽऋतू] ॥३॥१६॥ ॥

V. ॥ १७ ॥१॥ १८a-f ॥२॥ g-m ॥३॥ १९a-f ॥४॥ g-m ॥५॥ २०॥६॥२३॥ ॥

VI. ॥ २१ ॥१॥ २२ ॥२॥२४॥ ॥

VII. ॥ २३a-k ॥१॥ l-s ॥२॥२६॥ ॥

VIII. ॥ २४a.b ॥१॥ c.d ॥२॥ २५a.b ॥३॥ c [अदितिर्भा°] d ॥४॥ २६. २७ [°त्तिकाऽऋतू] ॥५॥३१॥ ॥

IX. ॥ २८॥१॥ २९a-d ॥२॥ २९e. ३०a [शुद्धार्याऽऋसृ°. b. c ॥३॥ ३० d.e. ३१ ॥४॥३५॥ ॥ नवानुवाकेषु पञ्चत्रिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे पञ्चदशोऽध्यायः ॥ ॥

I. अग्ने ज्ञातान्प्रणुद नः सपत्नान्प्रत्यजातानुद जातवेदः ।
अधि नो ब्रूहि सुमना अहेडँस्तव स्याम शर्मँस्त्रिवरूथऽउद्भौ ॥१॥

चतुर्दशेऽध्याये (1.) द्वितीयतृतीयचतुर्थचितिमन्त्रानुक्त्वा पञ्चदशे पञ्चमचितिमन्त्रा वाच्याः ॥ का° [१७.११.१.३.] पञ्चम्यामत्तेघाश्विनीवदसपत्ना अग्ने ज्ञातानिति

प्रतिमन्त्रम् । पञ्चम्यां चितावाश्विनीवत् असपत्नासंज्ञा इष्टका अन्तेषूपदधाति अग्ने ज्ञातान् सहसा ज्ञातान् षोडशी चतुश्चत्वारिंशः अग्नेः पुरीषम् इति पञ्चमन्त्रैः प्रत्येकमिति सूत्रार्थः ॥ पञ्चमचितिमन्त्राणां परमेष्ठी ऋषिः । तत्र द्वे अग्निदेवत्ये त्रिष्टुभौ । हे अग्ने ज्ञातान् पूर्वमुत्पन्नान्नोऽस्माकं सपत्नान् शत्रून् त्वं प्रणुद् प्रकर्षेण नाशय । किं च हे ज्ञातवेदः ज्ञातप्रज्ञान अज्ञाताननुत्पन्नांश्च शत्रून्प्रतिनुद निवर्तय उत्पत्तिप्रतिबन्धं कुर्वित्यर्थः उपसर्गव्यवधानमार्षम् । किं च नोऽस्माकमधिब्रूहि (2.) अधिवद् उपदिश यज्ञसम्बन्धिनीमितिकर्तव्यतामिति शेषः । किं कुर्वन् अहेडन् अक्रुध्यन् । सुमनाः शोभनमनस्कः सन्नुपदिशेत्यर्थः । किं च अग्ने तव त्वत्सम्बन्धिनी त्रिवन्धुरे वन्धुरं गृहं त्रयाणां वन्धुराणां समाहारे यज्ञगृहत्रये सदोहविर्धानाग्नीध्ररूपे वयं स्याम भवेम सदा यज्ञान्कुर्म इत्यर्थः । कीदृशे त्रिवन्धुरे शर्मन् शर्मणि सुखाश्रये । तथा उद्वौ द्विपच्चतुष्पद्धनधान्यादिभिरुद्भवति समृध्यत ऽइत्युद्भिः तस्मिन् भवतेर्डिप्रत्ययः ॥ अनेन मन्त्रेण पुरस्तादिष्टकामुपदधाति ॥ १॥

सहसा ज्ञातान्प्रणुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्रणुदा नः सपत्नान् ॥ २॥

अथ पश्चादुपदधाति । सहसा बलेन ज्ञातानुत्पन्नान्नोऽस्माकं सपत्नान्प्रणुद् नाशय । हे ज्ञातवेदः अज्ञातान् उत्पत्स्यमानानपि (3.) प्रतिनुदस्व आत्मनिपदमार्षम् । किं च सुमनस्यमानोऽस्मासु शुभचित्तः सन्नोऽस्मानधिब्रूहि शत्रुभ्योऽधिकान्वद । वयमपि तत्प्रसादादधिकाः स्याम भवेम । नोऽस्माकं सपत्नान्प्रणुद् पुनरुक्तिरादरार्था । शोभनं मनो यस्य सुमनाः असुमनाः सुमना भवति सुमनस्यमानः भृशादिभ्य इति [पा° ३.१.१२.] क्यङ् ततः शानच् ॥ २॥

a. षोडशी स्तोम ओजो द्रविणम् ।
b. चतुश्चत्वारिꣳश स्तोमो वर्चो द्रविणम् ।
c. अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वेऽअभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥ ३॥

अथ दक्षिणतः । इष्टकादिवत्यं यतुः । पञ्चदशकलस्य पक्षस्य भर्ता य आदित्यरूप स्तोमः षोडशावृत्त्युपेतो वा यः स्तोमः यच्च ओजो बलरूपं द्रविणं धनम् हे इष्टके त्वं तदुभयरूपासि तां त्वामुपदधामि ॥ अथोत्तरतः । इष्टकादिवत्यं यजुः । चतुश्चत्वारिंशदावृत्त्या सम्पन्नो यः स्तोमस्त्रिष्टुब्रूपो वा यच्च बलरूपं धनम् तदुभयरूपां त्वामुपदधामि ॥ अथ मध्ये पञ्चमी । त्रिष्टुप् । प्सा भक्षणे न प्साति भक्षयति विनाशयतीत्यप्सो रक्षको नाम योऽग्निस्तस्याग्निश्चन्द्ररूपस्य पञ्चदशकलस्य (4.) पुरीषमसि पूरयित्री भवसि हे इष्टके या त्वं तां त्वां विश्वे देवा अभिगृणन्तु स्तुवन्तु स्तोमैः पृष्ठैश्च युता क्षोष्यमाणघृतयुता च सती सा त्वमिह चतुर्थ्यां चितौ सीद उपविश अस्मे अस्मासु प्रजावत्पुत्रयुतं द्रविणा द्रविणं धनं यजस्व (5.) देहि ॥ ३ ॥

a. एवश्छन्दः । b. वरिवश्छन्दः । c. शम्भूश्छन्दः । d. परिभूश्छन्दः । e. आच्छच्छन्दः । f. मनश्छन्दः । g. व्यचश्छन्दः । h. सिन्धुश्छन्दः । i. समुद्रश्छन्दः । k. सरिरं छन्दः । l. ककुप्छन्दः । m. त्रिककुप्छन्दः । n. काव्यं छन्दः । o. अङ्कुपं छन्दः । p. अक्षरपङ्क्तिश्छन्दः । q. पदपङ्क्तिश्छन्दः । r. विष्टारपङ्क्तिश्छन्दः । s. क्षुरो भ्राजश्छन्दः ॥ ४ ॥

का° [१७. ११. ५.] विराजो दश-दश प्रतिदिशं पुरस्तात्प्रथममेवश्छन्द इति प्रतिमन्त्रम् । प्रतिदिशं दश-दश (6.) विराट्संज्ञा इष्टका उपदधाति ताश्चत्वारिंशत्पञ्चा एवेति सूत्रार्थः ॥ चत्वारिंशच्छतूंषि इष्टकादेवत्यानि । एति गच्छति सर्वो जन्तुसमूहोऽस्मिन्नित्येवः पृथिवीलोकः स एव छन्दोरूपेण स्थितत्वात् छादकत्वाद्वा छन्दः हे इष्टके त्वं तद्रूपासि तां त्वामुपदधामि एवमुत्तरमन्त्रेषु व्याख्या श्रुत्युक्ता (7.) ज्ञेया अयं वै लोक एवश्छन्द इति [८. ५. २. ३.] श्रुतेः ॥ वरिवः प्रभामण्डलेन (8.) व्रियतऽआव्रियतऽइति (9.) वरिवोऽन्तरिक्षं तदेव छन्दः अन्तरिक्षं वै वरिवश्छन्द इति [८. ५. २. ३.] श्रुतेः ॥ शम्भूः शं सुखं भवत्यस्मादिति शम्भूः द्युलोकः द्यौर्वै शम्भूश्छन्द इति [३.] श्रुतेः ॥ परितो भवति व्याप्य वर्ततऽइति प-

रिभूर्दिग्वाचकः शब्दः दिशो वै परिभूश्छन्द इति [३.] श्रुतिः ॥ आहृत् । आहाद-यति स्वरसेन सर्वं शरीरमित्याहृत् अन्नम् अन्नं वाऽआहृच्छन्द इति [३.] श्रुतिः ॥ मनः । प्रथमसृष्टं प्रजापत्यात्मकं यन्मनः तदेव छन्दः तद्रूपासि प्रजापतिर्वै मन-श्छन्द इति [३.] श्रुतिः ॥ व्यचः । व्यचतिर्व्याप्तिकर्मा (10.) विचति व्याप्नोति सर्वं जगदिति व्यचः आदित्यः असौ वाऽआदित्यो व्यचश्छन्द इति [३.] श्रुतिः ॥ सिन्धुः । स्यन्दति नाडीभिः शरीरं व्याप्नोति सिन्धुः प्राणवायुः प्राणो वै सिन्धुश्छन्द इति [८.५.२.४.] श्रुतेः ॥ समुद्रम् । समुद्रवत्यस्माद्विकल्पसमूहा (11.) इति स-मुद्रं मनः यद्वा समुद्रसाम्याद्वाग्भिर्येण समुद्रं मनः मनो वै समुद्र (12.) इति [४.] श्रुतेः ॥ सरिरं सलिलं रलयोरैक्यं सरति वदनगह्वरान्निर्गच्छतीति सरिरं वाक् वाग्वै सरिरं छन्द इति [४.] श्रुतेः ॥ ककुप् कं सुखं शरीरे स्कुभ्नाति धारयतीति ककुप् कं सुखं कोपयति दीपयतीति वा (13.) कुप् (14.) दीप्तौ चरादिः क्विप् पूर्ववत्पक्षे सलोपश्छान्दसः ककुप् प्राणः प्राणो वै ककुप्छन्द इति [४.] श्रुतेः ॥ त्रिककुप् त्रेधा कं पीतमुदकं (15.) स्कुभ्नातीति त्रिककुप् उदानः उदानो वै त्रि-ककुप्छन्द इति [४.] श्रुतेः ॥ काव्यम् कवेः परमात्मन इदं काव्यं वेदत्रयीरूपः शब्दः त्रयी विद्या काव्यं छन्द इति [४.] श्रुतेः ॥ अङ्कुपम् अङ्क कुटिलगतौ अङ्कैन कुटिलगत्या आप्नोतीत्यङ्कुपमुदकम् आपो वाऽअङ्कुपं छन्द इति [४.] श्रुतेः ॥ अ-क्षरपङ्क्तिः न क्षरतीत्यक्षरा नाशरहिता पङ्क्तिरावर्तिर्यस्याः (16.) साक्षरपङ्क्तिर्द्यौः असौ वै लोकोऽक्षरपङ्क्तिश्छन्द इति [४.] श्रुतेः ॥ पदपङ्क्तिः पदानां चरणन्यासा-नां पङ्क्तयो यस्मिन् सा पदपङ्क्तिर्भूर्लोकः अयं वै लोकः पदपङ्क्तिश्छन्द इति [४.] श्रुतेः ॥ विष्टारपङ्क्तिः विस्तारा विस्तार्यतेऽइति विस्तारा विस्तारिता प्रसारिता वस्तूनां पङ्क्तयो यत्रेति विष्टारपङ्क्तिर्दिक् दिशो वै विष्टारपङ्क्तिश्छन्द इति [४.] श्रुतेः ॥ क्षुरः क्षुर विलेखनखननयोः (17.) क्षुरति विलिखति व्याप्नोति सर्व-मिति क्षुरः तीव्रः । भ्राजते दीप्यतेऽइति भ्रजः ह्रस्वश्छान्दसः क्षुरो भ्रज आदित्यः असौ वा आदित्यः क्षुरो भ्रजश्छन्द इति [८.५.२.४.] श्रुतेः ॥४॥

a. आहृच्छन्दः । b. प्रहृच्छन्दः । c. संयच्छन्दः । d. विषच्छन्दः ।
e. बृहच्छन्दः । f. रथन्तरं छन्दः । g. निकायश्छन्दः । h. विवध-

ष्ठन्दः । i. गिरिष्ठन्दः । k. भ्रजष्ठन्दः । l. सꣳस्तुप्छन्दः । m. अनुष्टुप्छन्दः । n. एवष्ठन्दः । o. वरिवष्ठन्दः । p. वयष्ठन्दः । q. वयस्कृच्छन्दः । r. विष्पर्धाष्ठन्दः । s. विशालं छन्दः । t. हृदिष्ठन्दः । u. दूरोहणं छन्दः । v. तन्द्रं छन्दः । w. अङ्काङ्कं छन्दः ॥५॥

आह्रत् आह्रादयति शरीरमित्याह्रदन्नम् प्रह्रत् प्रह्रादयतीति प्रह्रदन्नम् अन्नं वा ऽआह्रच्छन्दोऽन्नं प्रह्रच्छन्द इति [४.] श्रुतेः ॥ संयत् संयच्छति व्यापारान्निवर्तयति जन्तूनिति संयत् रात्रिः रात्रिर्वै संयच्छन्द इति [८.५.२.५.] श्रुतेः ॥ वियत् विशेषेण यच्छन्ति गच्छन्ति व्यापारायेतस्ततो जना यत्रेति वियद्दिनम् अच्छर्वै वियच्छन्द इति [५.] श्रुतेः ॥ बृहत् विस्तीर्णं स्वः असौ वै लोको बृहच्छन्द इति [५.] श्रुतेः ॥ रथन्तरम् रथैः तीर्यते गम्यते यत्रेति रथन्तरं भूमण्डलम् अयं वै लोको रथन्तरं छन्द इति [५.] श्रुतेः ॥ निकायः नितरां कायति शब्दं करोति वृक्षादीनुन्मूलयन्निति निकायो वायुः कै शब्दे वायुर्वै निकायश्छन्द इति [५.] श्रुतेः ॥ विवधः विविधं वध्यन्ते हन्यन्ते पापफलानि भोद्यन्ते (18.) भूतप्रेतादिरूपेण प्राणिनो यत्रेति विवधोऽन्तरिक्षम् अन्तरिक्षं (19.) वै विवधश्छन्द इति [५.] श्रुतेः ॥ गिरः गीर्यते भक्ष्यतऽइति गिरोऽन्नम् अन्नं वै गिर (20.) इति [५.] श्रुतेः ॥ भ्रजः (21.) भ्राजते दीप्यतऽइति भ्रजोऽग्निः अग्निर्वै भ्रजश्छन्द इति [५.] श्रुतेः ॥ संस्तुप् अनुष्टुप् सम्यक् स्तुभ्यते रुध्यते वशीक्रियते अनु निरन्तरं स्तुभ्यतेऽनया सा संस्तुप् अनुष्टुप् वाक् वागेव सꣳस्तुप्छन्दो वागनुष्टुप्छन्द इति [५.] श्रुतेः ॥ एवः वरिवः इति पदद्वयं व्याख्यातम् ॥ वयः बाल्यादिवयोहेतुभूतमन्नम् अन्नं वै वयश्छन्द इति [६.] श्रुतेः ॥ वयस्कृत् वयांसि बाल्यादीनि करोतीति वयस्कृत् जठराग्निः अग्निर्वै वयस्कृच्छन्द इति [६.] श्रुतेः ॥ विष्पर्धाः विविधं स्पर्धन्ते ऐश्वर्याधिक्यदर्शनेन जना यत्रेति विष्पर्धाः स्वर्गः स्पर्ध संघर्षे असुन् (22.) असौ वै लोको विष्पर्धाश्छन्द इति [६.] श्रुतेः ॥ विशालम् विविधं शालन्ते शोभन्ते जना यत्रेति विशालं भूतलम् अयं वै लोको विशालं छन्द इति [६.] श्रुतेः ॥ हृदिः

ह्राय्यतेऽर्करश्मिभिरिति (23.) ह्रदिरन्तरिक्षम् अन्तरिक्षं वै ह्रदिश्छन्द इति [६.] श्रुतेः ॥ दूरोहणम् दुःखेन रोढुमारोहणं (24.) कर्तुं शक्यं निष्कामज्योतिष्टोमादियज्ञप्रयासज्ञातज्ञानसाध्यत्वादिति (25.) दूरोहणं रविः असौ वाऽआदित्यो दूरोहणं छन्द इति [६.] श्रुतेः ॥ तन्द्रम् तन्द्रि (26.) सादि मोहे तन्द्रति सीदति स्थानसंकोचेनेति तन्द्रं श्रेणी पङ्क्तिर्वै तन्द्रं छन्द इति [६.] श्रुतेः ॥ अङ्काङ्कम् अङ्कि स्थले (27.) अङ्कानि गर्तपाषाणादिचिह्नानि यत्रेत्यङ्काङ्कं जलम् आपो वाऽअङ्काङ्कं छन्द इति [६.] श्रुतेः ॥ अत्रेष्टकानां भूलोकादिरूपेण स्तुतिरिति भावः ॥५॥

II. a. रश्मिना सत्यायं सत्यं जिन्व । b. प्रतिना धर्मणा धर्मं जिन्व ।
c. अन्वित्या दिवा दिवं जिन्व । d. संधिनान्तरिक्षेणान्तरिक्षं जिन्व ।
e. प्रतिधिना पृथिव्या पृथिवीं जिन्व । f. विष्टम्भेन वृष्ट्या वृष्टिं जिन्व ।
g. प्रवयाङ्काङ्कं जिन्व । h. अनुया रात्र्या रात्रीं जिन्व । i. उशिजा वसुभ्यो वसून्जिन्व । k. प्रकेतनादित्येभ्य आदित्यान्जिन्व ॥ ६॥

का॰ [१७.११.१.१०.] सर्वतोऽषाढावेलायाꣳ स्तोमभागा रश्मिना सत्यायेति प्रतिमन्त्रं पञ्चदश दक्षिणेनानूकम् । अषाढावेलायां सर्वदिक्षु स्तोमभागासंज्ञा इष्टका उपदधाति रश्मिनेत्याद्येकोनत्रिंशन्मन्त्रैः तन्मध्ये पञ्चदश प्रागनूकं दक्षिणेन अर्धाच्चतुर्दश प्रागनूकमुत्तरेणोपधेया इति सूत्रार्थः ॥ एकोनत्रिंशद्यजूंषीष्टकादेवत्यानि । इमे मन्त्राः श्रुत्या त्रिधा व्याख्याताः कण्डिकाद्वयपर्यन्तममुनोपक्षिता सत्यदो जिन्वेति प्रथमः अदोऽस्यमुष्मै त्वामुपदधामीति द्वितीयः अधिपतिनोर्जोर्ज जिन्वेति तृतीयः प्रकारः । तथा च श्रुतिः [८.५.३.३.] अमुनादो जिन्वादोऽस्यमुष्मै त्वाधिपतिनोर्जोर्ज जिन्वेति त्रेधा विक्षितास्त्रेधा विक्षितꣳ ह्यन्नमिति ॥ अथ वाक्यार्थः (28.) । हे इष्टके त्वं रश्मिनान्निन सत्यायोपक्षिता सती सत्यं सत्यवचो जिन्व तर्पय तेजोवृद्धिप्रदत्वादन्नं रश्मिः रश्मिरन्नमिति [८.५.३.३.] श्रुतेः ॥ प्रकर्षेण देहे इतिर्गतिर्यस्येति प्रतिरन्नम् तेन । धर्मणा विभक्तिव्यत्ययः धर्मणे धर्मायोपक्षिता सती धर्मं जिन्व प्रीणय प्रतिरन्नमिति [६.] श्रुतेः । सर्वमन्त्रेषु द्वितीयं

(29.) पदं चतुर्थ्यन्तं कार्यम् ॥ अन्वेति देहमनुगच्छतीत्यन्वितिरन्नम् (30.) तया दिवा दिविऽर्थायोपहिता सती दिवं द्युलोकं जिन्व अन्वितिरन्नमिति [३.] श्रुतेः ॥ संधिना सम्यग्वलादिकं धीयतेऽस्मिन्निति संधिरन्नं तेन अन्तरिक्षेण अन्तरिक्षार्थमुपहितान्तरिक्षं जिन्व ॥ प्रतिधीयतेऽस्मिन्निति प्रतिधिरन्नं तेन पृथिव्यै उपहिता सती पृथिवीं जिन्व ॥ विष्टम्भेन देहं विष्टम्भयतीति विष्टम्भोऽन्नं तेन वृष्ट्यै उपहिता वृष्टिं जिन्व ॥ प्रवया प्रकर्षेण याति देहं गच्छतीति प्रवान्नम् तेनाङ्गाङ्गे उपहिताङ्गदिनं जिन्व ॥ अनुया देहान्तर्गतद्वासप्ततिनाडीभिरनुयाति आप्नोति देहमित्यनुयान्नं तया तृतीयैकवचने आतो धातोरित्यालोपः [पा° ६.४.१४०.] । रात्र्यै उपहिता रात्रीं (31.) जिन्व ॥ उशिजा वश कान्तौ उश्यते सर्वैः काम्यत ऽइत्युशिगन्नम् तेन वसुभ्योऽर्थायोपहिता वसून्जिन्व ॥ प्रकेतेन प्रकर्षेण कं सुखमीयतेऽनेनेति प्रकेतमन्नं तेनादित्येभ्योऽर्थायोपहितादित्यान्जिन्व ॥ ६ ॥

a. तन्तुना रायस्पोषेण रायस्पोषं जिन्व । b. सꣳसर्पेण श्रुताय श्रुतं जिन्व । c. ऐडेनौषधीभिरोषधीर्जिन्व । d. उत्तमेन तनूभिस्तनूर्जिन्व । e. वयोधसाधीतेनाधीतं जिन्व । f. अभिजिता तेजसा तेजो जिन्व ॥ ७ ॥

तन्तुना तन्यते विस्तार्यतऽनेन तन्तुरन्नं तेन । रायस्पोषेण धनपुष्ट्यै उपहिता रायस्पोषं जिन्व ॥ संसर्पेण सम्यक् सर्पति प्रसरति देहे इति संसर्पोऽन्नम् तेन श्रुताय शास्त्रायोपहिता श्रुतं जिन्व ॥ इडान्नम् इडैवेडम् स्वार्थेऽण् तेनौषधीभिः ओषध्यर्थमुपहिता ओषधीर्जिन्व ॥ उत्तमेन उद्गतं तमो यस्मात् यद्वोत्तमेनोत्कृष्टेनान्नेन तनूभिः शरीरार्थमुपहिता तनूः शरीराणि जिन्व ॥ वयोधसा वयो दधाति पुष्णाति वयोधा अन्नं तेनाधीतेनाध्ययनायोपहिताधीतं (32.) जिन्व ॥ अभि सर्वतो जीयते येनेत्यभिजित्सर्वजयहेतुरन्नं तेन तेजसा तेजोऽर्थमुपहिता तेजो जिन्व ॥ ७ ॥

a. प्रतिपदसि प्रतिपदे त्वा । b. अनुपदस्यनुपदे त्वा । c. सम्पदसि सम्पदे त्वा । d. तेजोऽसि तेजसे त्वा ॥ ८ ॥

अदोऽस्यमुष्मै त्वेति व्याख्यातमत्रानाह । प्रतिपद्यते जीवनमनेनेति प्रतिप-

दन्नम् हे इष्टके त्वं प्रतिपदन्नरूपासि प्रतिपदेऽन्नाय त्वामुपदधामीति शेषः एवं सर्वत्र ॥ प्रतिदिनमनुपक्षयेऽनुपदन्नमसि अनुपदेऽन्नाय त्वामुपदधामि ॥ हे इष्टके त्वं सम्पदन्नमसि सम्पदेऽर्थाय त्वामुपदधामि ॥ तेजसः कारणत्वात्तेजोऽन्नम् तेजसे त्वामुपदधामि ॥ ८ ॥

a. त्रिवृदसि त्रिवृते त्वा । b. प्रवृदसि प्रवृते त्वा । c. विवृदसि विवृते त्वा । d. सवृदसि सवृते त्वा । e. आक्रमोऽस्याक्रमाय त्वा । f. संक्रमोऽसि संक्रमाय त्वा । g. उत्क्रमोऽस्युत्क्रमाय त्वा । h. उत्क्रान्तिरस्युत्क्रान्त्यै त्वा । i. अधिपतिनोर्जोर्ज जिन्व ॥ ९ ॥

कृषिवृष्टिबीजरूपेण त्रिगुणत्वात्त्रिधा वर्ततऽइति त्रिवृदन्नम् तद्रूपां त्वां त्रिवृते उपदधामि ॥ प्रवृणोति भूतानीति प्रवृदन्नम् यतस्त्वं प्रवृदसि अतः प्रवृतेऽर्थाय त्वामुपदधामि ॥ विशेषेण वर्तते भूतेषु इति विवृदन्नम् त्वं विवृदसि विवृतेऽर्थाय त्वामुपदधामि ॥ सह वर्तते सवृदसि सवृतेऽन्नाय त्वामुप° ॥ आक्रामति पराभवति नुधामित्याक्रमोऽन्नं त्वमाक्रमोऽसि आक्रमाय त्वामुप° ॥ देहे संक्रामतीति संक्रमोऽन्नं त्वं संक्रमोऽसि संक्रमाय त्वामुप° ॥ संतानोत्पत्त्यै बीजरूपेण परिणम्योत्क्रामतीत्युत्क्रमोऽन्नं त्वं तद्रूपासि उत्क्रमाय त्वामुप° ॥ उत्कृष्टा क्रान्तिर्गमनं यस्येत्युत्क्रान्तिरन्नम् (33.) हे इष्टके त्वमुत्क्रान्तिरसि उत्क्रान्त्यै अर्थाय (34.) त्वामुपदधामि ॥ अथ तृतीयो व्याख्याभेदः । अधिकं पातीत्यधिपतिः अधिकपालकेन ऊर्जा अन्नरसेन ऊर्जमन्नरसं (35.) जिन्व तर्पय ॥ एवं मन्त्रेषभिधेयानुसारेण व्युत्पत्तिः कार्या ॥ १ ॥

III. राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु रथन्तरꣳ साम प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥ १० ॥

का° [१७.१२.१.] नाकसदोऽनूकेषु पूर्ववर्त्रमृतव्याविलायामाश्विनीवद्राज्ञ्यसीति प्रतिमन्त्रम् । पूर्वानूके स्थानाभावात्पूर्वानूकवर्त्र त्रिदिद्ध्वनूकेषु ऋतव्याविलायामनूकोपरि राज्ञीत्यादिपञ्चकणिडकाभिराश्विनीवन्नाकसत्संज्ञेष्टका उपदधातीति सूत्रार्थः ॥ पुरस्ताडुपदधाति । राज्ञसि । पञ्च यजूंषि लिङ्गोक्तदेवतानि । हे इष्टके राज्ञी राजमाना प्राची पूर्वा दिक् त्वमसि । वसवोऽष्टौ देवास्ते तवाधिपतयोऽधिकं पालयितारः । अग्निर्हेतीनामुपद्रवकारिणीनां परायुधानां प्रतिधर्ता निराकर्ता । किं च त्रिवृत्स्तोमः त्वा त्वां पृथिव्यां श्रयतु उत्थापयतु । आज्यमाज्यनामकमुक्थं शस्त्रं प्र वो देवायाग्नये इत्यादिकम् [ऐतरेयब्रा° २.४०.] अव्यथायै न व्यथा अव्यथा तस्यै चलनाभावाय त्वां स्तभ्नातु दृढीकरोतु । रथन्तरं साम अन्तरिक्षे लोके प्रतिष्ठित्यै प्रतिष्ठानाय त्वां स्तभ्नातु । प्रथमजाः प्रथमोत्पन्ना ऋषयः प्राणा देवेषु द्युलोकमध्ये दिवः आकाशस्य मात्रया परिमाणेन वरिम्णा उरुत्वेन त्वां प्रथन्तु प्रथयन्तु छन्दस्युभयथेति [पा° ३.४.११७.] शप आर्धधातुकत्वाण्णिलोपः प्राणा वाऽऋषयः प्रथमजा इति श्रुतेः [८.६.१.५.] आकाशस्य यादृशं विशालत्वं तादृग्विशालां त्वां कुर्वन्त्वित्यर्थः । विधर्ता इष्टकानिष्पादयिता च पुनरयमधिपतिरिष्टकापालकश्च त्वां प्रथयताम् यद्वा विधर्ता विशेषेण धारयिता वागभिमानी देवः अयमधिपतिः प्रधानभूतो देवो मनोऽभिमानी तौ च त्वां प्रथयताम् विधर्ता चायमधिपतिश्चेति वाङ्क तौ मनश्चतौ क्रीद्ध सर्वं विधारयत इति [८.६.१.५.] श्रुतेः । किं च ते सर्वे यथोक्ता वस्वादयः संविदानाः ऐकमत्येनावस्थिताः सन्तो नाकस्य पृष्ठे न अकं दुःखं नाकं सुखं तस्य पृष्ठे स्वरूपे सुखरूपे स्वर्गे लोके यजमानम् इष्टके चकारात्त्वां च सादयन्तु स्थापयन्तु ॥ स्तोमाः सामानि च राजसूयप्रकरणे दशमेऽध्याये प्राचीमारोहेत्यादिकणिडकासु [१०.१०-१४.] व्याख्यातानि ॥ १० ॥

विराडसि दक्षिणा दिशुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठि° — सादयन्तु ॥ ११ ॥

अथ दक्षिणतः । चतसृषु कण्डिकासु देवाः केतूनां प्रतिधर्तारः स्तोमाः उक्थानि सामानि चान्यानि समानमन्यत् । वायुरग्नेगा इति [अध्या° २७. ३१.] प्रउगं शस्त्रम् ॥ ११ ॥

सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतयो वरुणो केतूनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु वैरूपꣳ साम प्रतिष्ठि° — सादयन्तु ॥ १२ ॥

अथ पश्चात् । सम्यग्राजते सम्राट् । आ त्वा रथं यथोतये इति [ऋक्सं° म° ८. ७. ९. १.] मरुत्वतीयं शस्त्रम् ॥ १२ ॥

स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतयः सोमो केतूनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजꣳ साम प्रतिष्ठि° — सादयन्तु ॥ १३ ॥

अथोत्तरतः । स्वेनैव राजते स्वराट् । अभि त्वा शूर नोनुम इत्यादिकं [ऋक्सं° म° ७. २. १५. २२.] निष्केवल्यं शस्त्रम् ॥ १३ ॥

अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिः केतूनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतां वैश्वदेवाग्निमारुते ऽउक्थे अव्यथायै स्तभ्नीताꣳ शाक्वररैवते सामनी प्रतिष्ठि° — सादयन्तु ॥ १४ ॥

अथ मध्ये । हे इष्टके अधिकं पालयित्री बृहती प्रौढोर्ध्वा दिगसि । त्रिणवत्रयस्त्रिंशौ स्तोमौ त्वां पृथिव्यां श्रयताम् । वैश्वदेवाग्निमारुते शस्त्रे अचलनाय स्तभ्नीताम् । शाक्वररैवते सामनी चान्तरिक्षे स्थित्यै त्वां स्तभ्नीताम् । द्विवचने विशेषः । तत्सवितुर्वृणीमहे इत्यादि [ऋक्सं° म° ५. ६. १०. १.] वैश्वदेवं शस्त्रम् वैश्वानराय पृथुपाजसे इत्यादिकमाग्निमारुतं शस्त्रम् [ऋक्सं° म° ३. १. १३. १.] ॥ उक्तमन्यत् ॥ १४ ॥

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ ॥ पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १५ ॥

का० [१७. १२. २. ३.] पुरीषमोप्योपर्यय पुर इति पञ्चचूडाः प्रतिमल्लं प्रतिदिशं यथालिङ्गम् ॥ नाकसत्सु तूष्णीं चात्वालमृदं प्रक्षिप्य नाकसदामुपरि सर्वदिक्षु यथालिङ्गं लिङ्गानतिक्रमेण यच्छिङ्गको मल्लस्तद्दिशि तन्मल्लेन पञ्चचूडासंज्ञकाः पञ्चेष्टका उपदधातीति सूत्रार्थः ॥ पञ्च यजूंषि लिङ्गोक्तदेवत्यानि । योऽयं पुरोऽग्निः इष्टकारूपः पुरस्ताद्उपधीयमानत्वात्पुरोऽग्निः अग्निर्वै पुरस्तद्यत्तमाह पुर इति प्राञ्चञ्च क्याग्निमुद्धरन्ति प्राञ्चमुपचरन्तीति श्रुतेः [८. ६. १. १६.] । कीदृशः । हरिकेशः हरयो हरितवर्णाः कनकवर्णाः केशाः केशसमा ज्वाला यस्य हरिः पिङ्गे हरिद्वर्णेऽइत्यभिधानात् । सूर्यरश्मिः सूर्यस्येव रश्मयः इति [८. ६. १. १६.] श्रुतेः ॥ तस्याग्नेः रथगृत्सः रथौजाः च सेनानीग्रामण्यौ रथे गृत्सो मेधावी कुशलो रथगृत्सः गृत्सो मेधावी गृणातेः स्तुतिकर्मण इति यास्कोक्तेः [निरु० १. ५. (36.)] । सेनां (37.) नयतीति सेनानीः । चौ समुच्चयार्थौ । रथे ओजस्तेजो यस्य स रथौजाः रथयुद्धकुशल इत्यर्थः । स ग्रामं (38.) नयतीति ग्रामणीः । एतन्नामकौ सेनानीग्रामण्यौ परिचारकौ (39.) तौ च वासन्तिकावृतू इत्यर्थः वासन्तिकौ तावृतू इति [१६.] श्रुतेः ॥ तथा पुञ्जिकस्थला क्रतुस्थला चेत्यप्सरसौ दिगुपदिग्रूपे यस्य परिचारिके । पुञ्जिकस्य पुञ्जीकृतस्य (40.) रूपलावण्यसौभाग्यादिगुणसमूहस्य स्थलाधारभूता पुञ्जिकस्थला । क्रतूनां संकल्पानां रूपादिज्ञानानां स्थला स्थानभूता क्रतुस्थला । पुञ्जिकस्य क्रतूनां च स्थलं यस्यामिति बहुव्रीहिर्वा । पुञ्जिकस्थला च क्रतुस्थला चाप्सरसाविति दिक्कोपदिशा चेति ह स्माह माहित्थिरिति (41.) श्रुतेः [१६.] ॥ दङ्क्षणवो दशनशीलाः पशवः व्याघ्रादयो हेतिरायुधं वज्रः ॥ पौरुषेयः पुरुषसम्बन्धी वधः हननं वधः प्रहेतिः प्रकृष्टमायुधम् यस्मिन्नस्त्रे मुक्ते (42.) रावणसेनेव परस्परं क्षिपो घ्नन्ति स पौरुषेयो वधः यदन्योऽन्यं घ्नति स पौरु-

षेयो वधः प्रकेतिरिति [१६.] श्रुतेः ॥ यस्याग्नेरियं सामग्री कृ इष्टके (43.) त्वं तदग्निस्वरूपासीत्यर्थः । योऽयमग्निर्यो च तस्य सेनानीग्रामण्यौ ये चाप्सरसौ ये च केतिप्रकेती तेभ्यः सर्वेभ्यः सर्वदा नमो नमस्कारोऽस्तु ते सर्वे नोऽस्मान्मृडयन्तु सुखयन्तु ते नोऽस्मानवन्तु रक्षन्तु यं नरं वयं द्विष्मः यस्यानिष्टं चिन्तयामः यश्च नरो नोऽस्मान्द्वेष्टि अस्मास्वप्रीतिं करोति तं नरमेषां पूर्वोक्तानां जम्भे दंष्ट्राकराले मुखे वयं दध्मः प्रक्षिपामः जभि नाशने जम्भयति नाशयति जम्भा दंष्ट्रा यस्मिन्नस्तीति जम्भं मुखम् ॥ १५ ॥

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ ॥ मेनका च सहजन्या चाप्सरसौ यातुधाना केती रक्षाꣳसि प्रकेतिस्तेभ्यो — दध्मः ॥ १६ ॥

अथ दक्षिणतः । दक्षिणास्यां दिशीति दक्षिणा दक्षिणादाजिति [पा° ५.३.३६.] सप्तम्यन्ताद्दक्षिणशब्दादाच्प्रत्ययः दक्षिणा दक्षिणतः (44.) अयं विश्वकर्मा विश्वं सर्वं कर्म यस्य विश्वं करोतीति वा विश्वकर्मा वायुः अयं वै वायुर्विश्वकर्मा योऽयं पवतेऽएष हीदꣳ सर्वं करोति तच्चत्तमाह दक्षिणेति तस्मादेष दक्षिणेव भूयिष्ठ वातीति [८.६.१.१७.] श्रुतेः ॥ तस्य वायोः रथस्वनः सेनानीः रथे स्थितः स्वनति शब्दं करोतीति रथस्वनः । रथे स्थितः चित्र आश्चर्यकारी रथेचित्रो ग्रामणीः कलदन्तादिति [पा° ६.३.१.] सप्तम्या अलुक् तौ ग्रैष्मावृतू ग्रैष्मौ तावृतूऽइति [१७.] श्रुतेः ॥ मानयत्येनां मेनका । जनैः सर्वैः सह स्थिता सहजन्या । अप्सरसो हि सर्वसाधारणाः । एते अप्सरसौ ॥ यातुधाना रक्षसामवान्तरजातिभेदो बोध्यः केतिप्रकेती अप्यायुधविशेषौ । क्रूरा यातुधानास्तीक्ष्णकेतिरूपाः अतिक्रूराणि रक्षांस्यतितीक्ष्णप्रकेतिस्वरूपाणि ॥ हे इष्टके यस्य वायोरिदं सर्वं त्वं तद्रूपासि ॥ व्याख्यातमन्यत् ॥ १६ ॥

अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ । प्रह्लोचन्ती चानुह्लोचन्ती चाप्सरसौ व्याघ्रा केतिः सर्पा प्रकेतिस्तेभ्यो — दध्मः ॥ १७ ॥

अथ पश्चात् । अवरस्मिन्प्रदेशे इत्यर्थे पश्चादिति [पा° ५. ३. ३२.] सूत्रेण निपातः पश्चात्पश्चिमदेशेऽयं विश्वव्यचाः आदित्यः विश्वं सर्वमुदयेन विचति प्रकाशयति व्याप्नोति वा विश्वव्यचाः असुन् (45.) पश्चिमायां स्पष्टं दृश्यतऽइति पश्चात् असौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तत्तमाह पश्चादिति तस्मादितं प्रत्यक्षमेव यत्तं पश्यन्तीति [८. ६. १. १८.] श्रुतेः ॥ तस्यादित्यस्य रथे स्थितः प्रोत-इव स्थिरो रथेप्रोतः सेनानीः । असमोऽन्यै रथैरतुल्यो रथो यस्य सोऽसमरथो नाम ग्रामणीः तौ च वार्षिकावृतू वार्षिकौ तावृतूऽइति [१८.] श्रुतेः ॥ प्रह्लोचंति नरं प्रत्यात्मानं दर्शयतीति प्रह्लोचन्ती ॥ अनु वारं-वारं मुञ्चतीत्यनुमुञ्चन्त्यप्सरसौ ॥ व्याघ्राः प्रसिद्धाः यस्य केतिः सर्पाः प्रकेतिर्यस्य तद्रूपासि । उक्तमन्यत् ॥ १७॥

अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ ॥ विश्वाची च घृताची चाप्सरसावापो केतिर्वातः प्रकेतिस्तेभ्यो — दध्मः ॥ १८॥

अथोत्तरतः । उत्तरस्मिन्नित्युत्तरात् उत्तराधरेत्यादिना [पा° ५. ३. ३४.] आत्प्रत्ययः अयमुत्तरतः संयद्वसुः यज्ञः सम्यक् यन्ति गच्छन्ति वसुने धनाय ये प्रति ज्ञानाः स सम्यद्वसुः यज्ञं गतेभ्यो हि दानमावश्यकम् यज्ञस्योत्तरोपचारत्वादुत्तरात् तथा च श्रुतिः [८. ६. १. ११.] यज्ञो वाऽउत्तरात्तत्तमाहोत्तरादित्युत्तरतऽउपचारो हि यज्ञोऽथ यत्संयद्वसुरित्याह यज्ञꣳ हि संयन्तीतीदं वस्विति ॥ तीक्ष्णोऽत्तरिक्षे क्षिपति पक्षाविति तार्क्ष्यः अरिष्टानुपहिंसिता नेमिरायुधं यस्य सोऽरिष्टनेमिः एतन्नामकौ सेनानीग्रामण्यौ तौ शारदावृतू शारदौ तावृतूऽइति [११.] श्रुतेः ॥ विश्वाची घृताची चाप्सरसौ ते च दिशोपदिशे । विश्वं सर्वं प्रत्यञ्चतीति विश्वाची सर्वसाधारणत्वात् । घृतमञ्चति भुङ्क्ते घृताची घृतं ह्यप्सरसामन्नम् घृतस्य स्तोकं सकृदङ्क आश्नामीत्युर्वशीवचनात् ॥ आपोऽपां समूहो केतिः तस्य समूह इत्यण् [पा° ४. २. ३७.] वातः वायुः प्रकेतिः ॥ तेभ्य इत्याद्युक्तम् ॥ १८॥

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ ॥ उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन्केतिर्विद्युत्प्रकेतिस्तेभ्यो — दध्मः ॥ १९॥

अव मध्ये । उपरि ऊर्ध्वदेशेऽयमर्वाग्वसुः पर्जन्यः उपर्युपरिष्टादिति [पा° ५.३. ३१.] निपात ऊर्ध्वप्रदेशे इत्यर्थे अर्वागधोमुखं यद्वसु धनं जलरूपं यस्मात्सोऽर्वाग्वसुः अधो जलं प्रजाभ्यो ददातीत्यर्थः तथा च श्रुतिः [८.६.१.२०.] पर्जन्यो वा ऽउपरि तच्चत्तमाहोपरीत्युपरि हि पर्जन्योऽथ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः प्रदीयतऽइति ॥ तस्य पर्जन्यस्य सेनां जयतीति सेनजित् शोभना सेना यस्येति सुषेणः पूर्वपदादिति [पा° ८.३.१०६.] षत्वम् ततो णत्वम् तौ सेनानीग्रामण्यौ तौ कैमन्तिकावृतू कैमन्तिकौ तावृतूऽइति [२०.] श्रुतिः ॥ उरुः पृथुः कामो वशो यस्याः सोर्वशी । रूपातिशयात्पूर्वमिव पुंसां चित्तमुर्पैतीति पूर्वचित्तिः । एते दिगुपदिग्रूपे अप्सरसौ ॥ स्फुर्जा (46.) वज्रनिर्घोषे अवस्फूर्जतीत्यवस्फूर्जन् भयहेतुशब्दं कुर्वन् हेतिः । विद्युच्चपला प्रहेतिः ॥ शिष्टं व्याख्यातम् ॥ ११ ॥

V. अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥ २० ॥

का° [१७.१२.५.] छन्दस्यास्तिस्रस्तिस्रोऽनूकान्तेषु पुरस्ताद्गायत्रीरग्निर्मूर्धेति प्रत्यृचम् । वक्ष्यमाणा गायत्र्याद्याश्छन्दस्या एकैकस्मिन्स्थाने तिस्र उपदधाति तासां मध्यमा पद्यानूके तामभितो द्वेऽर्धपद्ये अत्र पूर्वदिश्यनूकान्ते तिस्रो गायत्रीरग्निर्मूर्धेति प्रत्यृचम् एवं वक्ष्यमाणा अपीति सूत्रार्थः ॥ तिस्र ऋचोऽग्निदेवत्या गायत्र्यः । आद्या व्याख्याता [३.१२.] ॥ २० ॥

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ २१ ॥

अयमग्निरादिशस्तं स्तुम इति शेषः । कीदृशः सहस्रं संख्यास्यास्तीति सहस्री तस्य । शतिनः शतसंख्यावतो वाजस्यान्नस्य पतिः स्वामी अनेकान्नप्रद इत्यर्थः । तथा रयीणां धनानां मूर्धा शिरोवदुत्तमः अग्निर्हि सर्वधनानां प्रधानधनं दृष्टादृष्टसाधनत्वात् कविः क्रान्तदर्शनः ॥ २१ ॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्धो विश्वस्य वाघतः ॥ २२ ॥

व्याख्यातैकादशे द्वात्रिंशत्तमकण्डिकायाम् ॥ २२ ॥

भुवो॑ यज्ञस्य॒ रज॑सश्च॒ नेता॑ यत्रा॑ नि॒युद्भिः॑ सच॑से शि॒वाभिः॑ ।
दि॒वि मू॒र्धानं॑ दधिषे स्व॒र्षां जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म् ॥ २३ ॥

का॰ [१७.१२.७.] पुरस्ताच्त्रिष्टुभो रेतःसिग्वेलायां भुवो यज्ञस्येति । पूर्वदिशि रेतःसिग्वेलायां त्रिष्टुप्संज्ञा इष्टका उपदधाति तृचेन तिस्रः त्रिष्टुप्छन्दस्काभिर्मृत्मभिरुपधेया इष्टकास्त्रिष्टुभः एवमग्नेऽपि ॥ तिस्रस्त्रिष्टुभ आग्नेय्यः । प्रथमा व्याख्याता त्रयोदशेऽध्याये [१३.१५.] ॥ २३ ॥

अबो॑ध्य॒ग्निः स॒मिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाय॒तीमु॒षास॑म् ।
यह्वा॑ इ॒व॒ प्र व॒यामु॒ज्जिहा॑नाः॒ प्र भा॒नव॑ः सिस्रते॒ नाक॒मच्छ॑ ॥ २४ ॥

जनानां ज्ञानश्रद्धाद्विजतर्पणसत्यादिसम्पन्नानामग्निहोत्रिणां समिधा समिन्धनेनाग्निः प्रत्यबोधि प्रतिबुध्यते कर्मणि स्वमधिकारं जानातीत्यर्थः दीपजनित्यादिना [पा॰ ३.१.६१.] लुङि कर्तरि चिण् । तत्र दृष्टान्तः आयतीमागच्छन्तीं धेनुं यथा वत्सः प्रतिबुध्यते यथा चोषसमागच्छन्तीं प्रति मनुष्याः प्रतिबुध्यन्ते ॥ दीप्तस्य तस्याग्नेर्भानवो रश्मयो नाकमच्छ स्वर्गमभितः प्रसिस्रते प्रसरन्ति अच्छाभेरापुमिति शाकपूणिः [निरु॰ ५.२८.] । दृष्टान्तमाह यह्व इति महन्नाम [निघ॰ ३.३.] यह्वाः महान्तो जातपक्षाः पक्षिणो वयां वृक्षशाखां प्रोज्जिहानाः प्रोद्गच्छन्तो (47.) नाकमाकाशं प्रति प्रसरन्ति तद्वत् ॥ ऋचोऽर्थान्तरं वा । जनानामृत्विजां सम्बन्धिन्या समिधाग्निरबोधि प्रतिबोधितः प्रज्वलितः आयतीमुषसं प्रातःकालं प्रति धेनुं यथा प्रतिबोधयन्ति उत्थापयन्ति । तस्य भानवः प्रोज्जिहाना नाकमभि प्रसिस्रते । दृष्टान्तः वयां पक्षिणां मध्ये यह्वाः महान्तः पक्षिणो यथा प्रोद्गच्छन्तः प्रसरन्ति । विः पक्षी तस्यामि (48.) छान्दसे गुणे वयामिति रूपम् एकः प्रशब्दः उज्जिहाना इत्यत्र सम्बध्यते द्वितीयः सिस्रते इत्यत्र । सृ गतौ ह्वादिः लट् । ओहाङ् गतौ शानच् जिहानाः । उषासमिति संहितायां दीर्घः ॥ २४ ॥

अवो॑चाम क॒वये॑ मे॒धाय॑ व॒चो व॒न्दारु॑ वृष॒भाय॑ वृ॒ष्णे ।
गवि॑ष्ठिरो॒ नम॑सा॒ स्तोम॑मग्नौ दि॒वीव॑ रु॒क्ममु॑रु॒व्यञ्च॑मश्रेत् ॥ २५ ॥

उद्गातारो वदन्ति । वयं कवये क्रान्तदर्शिनेऽग्नये वचोऽवोचाम स्तुतिरूपं वाक्यमुक्तवन्तः । कीदृशाय कवये मेध्याय मेधे यज्ञे योग्याय । वृषभाय श्रेष्ठाय कामानां वर्षयित्रे । वृक्ते सेक्ते यूने परिणामरक्षिताय । कीदृशं वचः वन्दारु वन्दनशीलं स्तुतितत्परम् शृवन्त्योरारुः [पा° ३.२.१७३.] । इदानीं गविष्टिरः गवि वाचि स्थिरोऽप्रच्यावो होता नमसान्विन युतं स्तोमं स्तुतिमग्नौ आहवनीये अश्नेत् । अन्तर्भूतण्यर्थः अयतिः लङ्लडर्थे छन्दसि लुङ्लङ्लिट इति [पा° ३.४.६.] वचनात् बहुलं छन्दसीति [पा° २.४.७३.] शपो लुक् गुणः । होताग्नौ स्तोममापयिष्यति आसञ्जयिष्यति याज्यानुवाक्याभिरन्नमग्निसम्बद्धं करिष्यतीत्यर्थः । तत्र दृष्टान्तः दिवीव रुक्ममुत्प्रेक्षते दिवि द्युलोके रुक्मं रोचमानमादित्यम् संध्यावन्दनसूर्योपस्थानादिषु विप्रयुक्ताः (49.) उरवो बहवो व्यञ्चाः स्तुतयो गतयो वा यस्येति (50.) तमिवेत्युत्प्रेक्षा । स्तोमः सूर्येणोपमीयते । गविषुधिभ्यां स्थिर इति [पा° ८.३.९५.] षत्वम् ॥२५॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभुं विशे-विशे ॥२६॥

पा° [१७.१२.८.] जगतीश्च पश्चादयमिहेति । तिसृभिः पश्चाद्वेतःसिग्वेलायां तिस्रो जगतीसंज्ञिष्टका दक्षिणामुख उपदधातीति सूत्रार्थः ॥ तिस्रो जगत्य आग्नेय्यः । आद्या व्याख्याता [३.१५.] ॥२६॥

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥२७॥

योऽग्निर्भरतेभ्यः ऋत्विग्भ्यः सकाशादजनिष्ट जातः तैर्मथितत्वात्तेभ्यो जात इत्युच्यते । भरता इति ऋत्विङ्नामसु पठितम् [निघ° ३.१८.] । किमर्थं जातः नव्यसे नवीयसे नवतराय सुविताय सूताय प्रसूताय (51.) कर्मणे यागाय सूतेरिडागम (52.) आर्षः अभिनवं नवीयस्तस्मै ईलोप (53.) आर्षः । सोऽग्निर्दिविस्पृशा द्युलोकस्पर्शिना बृहता ज्वालासमूहेन द्युमत्कान्तिमद्यथा तथा विभाति विविधं दीप्यते । कीदृशोऽग्निः जनस्य यजमानस्य गोपाः गोपायति रक्षतीति गोपाः

ष्विप् लोपो व्योर्वलि [पा° ६. १. ६६.] यलोपः । जागृविः जागरणशीलः कर्मणि सावधानः । सुदक्षः शोभनो दक्ष उत्साहो यस्य अतिकुशलो वा । घृतप्रतीकः घृतं प्रतीके मुखे यस्य । शुचिः शुद्धः वह्नेः हवींषि भक्षयन्नपि उच्छिष्टो न स्यात् शोधको वा ॥ २७ ॥

त्वामग्नेऽअङ्गिरसो गुहा हितमन्वविन्दञ्छ्रियाणं वने-वने ।
स जायसे मथ्यमानः सहो महत्वामाङ्गिरः सहसस्पुत्रमङ्गिरः ॥ २८ ॥

हे अग्ने अङ्गिरसः अङ्गिरोवंशोद्भवा ऋषयस्त्वामन्वविन्दन् लेभिरे अन्विष्य प्रापुरित्यर्थः । किम्भूतं त्वां गुहा गुहायां निगूढे प्रदेशे हितं स्थितमप्सु प्रविष्टमित्यर्थः अग्निर्देवेभ्य उदक्रामत्सोऽप आविशदित्यादिश्रुतेः (54.) सुपां सुलुगिति [पा° ७. १. ३९.] गुहाशब्दात्सप्तमीलोपः । हे अग्ने पुनर्नष्टं त्वां वने-वने शिंशिपायाणं नानावनस्पतिषु श्रितमङ्गिरसोऽन्वविन्दन् नित्यवीप्सयोरिति [पा° ८. १. ४.] वनेपदस्य द्वित्वम् । श्रयतेः शानचि वकुलं छन्दसीति [पा° २. ४. ७६.] शपः श्लुः द्वित्वं च । यं त्वामङ्गिरसोऽलभन्त स त्वं जायसेऽधुनाप्यरणिभ्य उत्पद्यसे । कीदृशः महत्सहः महता वह्निना सहसा बलेन मथ्यमानः महत्सहःशब्दाभ्यां तृतीयालोपः । मथ्यमानो जायसऽइत्यर्थः । हे अङ्गिरः अग्ने अत एव सहसो बलस्य पुत्रं त्वामाङ्गिरः वदन्ति मुनयः बलेन मन्थनाज्जायमानत्वाद्बलपुत्रं (55.) वदन्तीत्यर्थः ॥ २८ ॥

सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ २९ ॥

का° [१७. १२. १.] अपरास्ताभ्योऽनुष्टुभः सखायः समिति । जगतीभ्योऽपरास्तिस्रोऽनुष्टुप्संज्ञेष्टकाः प्राङ्मुख उपदधाति सखाय इत्यृक्त्रयेणेति सूत्रार्थः ॥ तिस्रोऽनुष्टुभः । ऋत्विजः प्रति यजमानो ब्रूते हे सखायः ऋत्विजः सम्यञ्चं समीचीनमिषं हविर्लक्षणमन्नं समीचीनं स्तोमं चाग्नये वः यूयं सम्पादयत अग्न्यर्थं हविः कुरुत त्रिवृत्पञ्चदशादिस्तोमं च वदतेत्यर्थः । व्यत्ययेन प्रथमास्थाने द्वितीयाबह्वचनं कृत्वा वसदिशे व इति । समित्युपसर्गस्यापेक्षितः क्रियाशेषोऽध्याहर्तव्यः । कीदृ-

शायाग्नये क्षितीनां मनुष्याणां वर्षिष्ठाय श्रेष्ठाय वृद्धतमाय प्रियस्थिरेत्यादिना [पा° ६.४.१५७.] वृद्धस्य वर्षादेश इष्ठनि । क्षियन्ति निवसन्ति भूमाविति क्षितयो नराः कर्तरि क्तिन् । सर्वपूज्यायेत्यर्थः । तथा ऊर्जो जलस्य नप्त्रे पौत्राय अद्भ्यो वनस्पतयो जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः । तथा सहस्वते बलवते सहो बलमस्यास्तीति ॥२१॥

सꣳ-समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्याभर ॥३०॥

हे वृषन् वर्षितः सेक्तः हे अग्ने अर्यः स्वामी त्वं विश्वानि सर्वाणि फलानि आ समन्तात्संयुवसे संयौषि यजमानेन संगमयसि यौतेर्विकरणपद्व्यत्ययः अर्यः स्वामिवैश्ययोरिति [पा° ३.१.१०३.] निपातः । इडः इडायाः गोः पृथिव्या वा पदे स्थाने उत्तरवेद्यां समिध्यसे कर्मार्थं दीप्यसे स ईदृशस्त्वं नोऽस्मभ्यं वसूनि धनानि आभर आहर देहीत्यर्थः हरतेर्भकारः ॥३०॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥३१॥

चित्रं नानाविधं श्रवो धनं कीर्तिर्वा यस्य स चित्रश्रवाः अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमस्तत्सम्बुद्धिः । हे पुरुप्रिय पुरूणां बहूनां यजमानानां प्रियः यद्वा पुरवः प्रिया यस्य पुरु बहु हविः प्रियं यस्येति वा हे पुरुप्रिय हे अग्ने विक्षु प्रजासु ऋत्विग्यजमानाः त्वां हवन्ते आह्वयन्ति ह्वेञ् आह्वाने ह्वः सम्प्रसारणमिति [पा° ६.१.३२.] शपि सम्प्रसारणं गुणश्च । किं कर्तुम् हव्याय वोळ्हवे विभक्तिव्यत्ययः हव्यं वोढुं प्राप्तुम् तुमर्थे सेसेनिति [पा° ३.४.९.] तुमर्थे तवेप्रत्ययः ॥३१॥

एना वोऽग्निं नमसोर्जो नपातमाहुवे ।
प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥३२॥
विश्वस्य दूतममृतं विश्वस्य दूतममृतम् ।
स योजते अरुषा विश्वभोजसा स देवद्रीचा मनसा ॥३३॥

स ड॒द्रव॒त्स्वाङ्कृ॒तः स ड॒द्रव॒त्स्वाङ्कृ॒तः ।
सु॒ब्रह्मा॑ य॒ज्ञः सु॒शमी॒ वसू॑नां दे॒व॑ꣳ राधो॒ ज॒नाना॑म् ॥३४॥

का॰ [१७.१२.१०.] अषाढावेलायाः पुरस्ताद्बृहतीरिना व इति । अषाढावेलायाः पुरस्तात्तिस्रो बृहतीष्टका एना व इति तिसृभिरुपदधातीत्यर्थः ॥ तिस्रो बृहत्यः प्रगाथः ऋग्द्वयग्रन्थनेन ऋक्त्रयसम्पादनं प्रगाथः तत्र बृहतीसतोबृहतीभ्यां तिस्रो बृहत्यः कृताः यस्यास्तृतीयो द्वादशाक्षरोऽन्ये त्रयोऽष्टार्णाः सा बृहती एना वोऽग्निं नमसोर्जो नपातमाहुवे । प्रियं चेतिष्ठमरतिꣳ स्वधरं विश्वस्य दूतममृतमिति ॥ यस्याः प्रथमद्वितीयौ द्वादशार्णौ द्वितीयतुर्यावष्टार्णौ सा सतोबृहती स योजतेऽअरुषा विश्वभोजसा स ड॒द्रव॒त्स्वाङ्कृ॒तः । सु॒ब्रह्मा॑ य॒ज्ञः सु॒शमी॒ वसू॑नां दे॒व॑ꣳ राधो॒ ज॒नाना॑मिति ॥ तत्र बृहत्यास्तुरीयं पादं द्विरावर्त्य सतोबृहत्याः पूर्वार्धेन सह द्वितीया बृहती कृता सतोबृहत्या द्वितीयपादं द्विरावर्त्य तस्या एवोत्तरार्धेन सह तृतीया बृहती कृता एवं तिस्रो बृहत्यः संहितायां पठिताः तत्रावर्तितपादानामर्थान्तराभावाद्वै ऋचौ व्याख्यायेते ॥ एना वः । विभक्तेराकारः हे ऋत्विग्यजमाना वो युष्माकं सम्बन्धिना एना एतेन नमसान्नेन हविर्लक्षणेनाग्निमहमाहुवे आह्वयामि । वो युष्माकमेनमग्निं नमसाहुवऽइति वा । कीदृशमग्निमूर्जो नपातमपां पौत्रम् प्रियं यजमानानां प्रीतिहेतुम् चेतिष्ठमतिशयेन चेतयितारम् 'तुरिष्टेमेयःस्विति [पा॰ ६.४.१५४.] इष्ठनि परे तृचो लोपः । अरतिमलमतिं पर्याप्तमतिं यद्वा रतिरुपरमस्तद्रहितम् सदोद्यमयुतमित्यर्थः । स्वधरं शोभना अधरा यज्ञा यस्य तम् । विश्वस्य दूतं सर्वस्य यजमानजनस्य सर्वस्य जगतो वा दूतवत्कार्यकारिणम् सर्वस्य हि गृहे दाहपाकादिकार्यकरत्वात् । अमृतं मरणरहितम् ॥ अथ सतोबृहती व्याख्यायते । स योजते । यमग्निमाह्वयामि सो ऽग्निः अरुषा अरुषौ रोषरहितौ साधू विश्वभोजसा विश्वं भुञ्जते तौ विश्वभोजसौ सर्वस्य भोक्तारौ द्वितीयाद्विवचनस्थाने आकारः भुञ्जेरसुन् एवंविधावश्वौ रथे योजते युनक्ति विशेषणाभ्यां विशेष्यमश्वपदं रथपदं चाध्याहार्यम् । स एवाग्निः रथारूढः सन् स्वाङ्कृतः शोभनप्रकारेणाङ्कृतः सन् ड॒द्रव॒त् द्रवति गच्छति द्रु गतौ णिश्रिद्रुस्रुभ्य इति [पा॰ ३.१.४८.] लुङि चङ् द्वित्वम् अडभावगुणाभावावार्षौ । कुत्र

गच्छतीत्यत आह सुब्रह्मेति वसूनामिति वसुशब्दो (56.) रुद्रादित्ययोरुपलक्षकः वसूनां रुद्राणामादित्यानां सवनत्रयदेवानां यत्र यज्ञः यत्र च जनानां यजमानानां देवं दीप्यमानं राधो धनं हविर्लक्षणं चास्ति तत्राग्निर्गच्छतीत्यर्थः । सुब्रह्मा ब्रह्मपदं सर्वर्त्विगुपलक्षणं शोभनो ब्रह्मा ऋत्विग्यत्र शुभर्त्विग्युक्तः । सुशमी शमीति कर्मनाम [निघ० २.१.] शोभनानि कर्माणि यत्रेति सुशमी शोभनकर्मवान् । अग्निराकृतो रथेऽश्वान्नियुज्य यज्ञे हविर्भोक्तुमाश्वागच्छतीति (57.) सर्वार्थः ॥३२॥ ३३॥३४॥ ॥

अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥३५॥

का० [१७.१२.१३.] अपरा गायत्रीभ्य उल्लिखोऽग्ने वाजस्येति । गायत्रीभ्योऽपरास्तिस्र उल्लिकसंज्ञा इष्टका अग्नय इति ऋक्त्रयेणोपदधातीति सूत्रार्थः ॥ तिस्र उल्लिखः । हे अग्ने हे सहसो यहो बलस्य पुत्र सह इति बलनाम [निघ० २.९.] यहुरिति पुत्रनाम [निघ० २.२.] मन्थनाज्जायमानत्वाद्बलस्य पुत्रत्वम् सहस्पुत्रमित्युक्तं (58.) च । हे जातवेदः उत्पन्नज्ञान अस्मे अस्मभ्यं महि महत् श्रवः धनं धेहि देहि । कीदृशस्त्वं गोमतः धेनुयुक्तस्य वाजस्यान्नस्येशानः ईश्वरः अत एव धनं गाश्च देहीत्यर्थः ॥३५॥

स इधानो वसुष्कविरग्निरीड्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥३६॥

हे पुर्वणीक पुरु बहु अनीकं मुखं यस्य तत्सम्बुद्धिः सर्वदाहुकत्वात् यतो ह्येव कुतश्चाग्नावभ्यादधाति तत एव प्रदहतीति श्रुतिः । हे बहुमुखाग्ने अस्मभ्यमस्मदर्थं रेवत् रयिमत् धनवद्यथा तथा स त्वं दीदिहि दीप्यस्व । दिवः शपः श्लुः द्विवम् तुजादीनां दीर्घोऽभ्यासस्येति [पा० ६.१.७.] अभ्यासदीर्घः लोपो व्योर्वलीति [पा० ६.१.६६.] वलोपः । रयिर्विद्यते यत्र कर्मणि रेवत् रयेर्मताविति [पा० ६.१.३७. वा० ४.] सम्प्रसारणम् । तथा त्वया (59.) हविर्ग्राह्यं यथास्माकं धनान्निर्भवतीत्यर्थः । स पूर्वोक्तः कीदृशस्त्वमिधानः दीप्यमानः । वसुः निवासहेतुः (60.) । कविः क्रान्तदर्शी । अग्निः अग्रे नयतीत्यग्रणीः प्रथमं यज्ञप्रवर्तक इत्यर्थः । गिरा त्रयीलक्षणया वाचा ईड्यः ईडितुं योग्यः स्तुत्यः औणादिक एन्यः (61.) ॥३६॥

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥३७॥

हे राजन्दीप्यमान हे तिग्मजम्भ तिग्मा तीक्ष्णा जम्भा दंष्ट्रा यस्य यद्वा तिग्ममिति वज्रनाम [निघ० २.२०.] हे वज्रदंष्ट्र अग्ने वस्तोः अह्नःसम्बन्धिन उतापि उषसः उषःकालसम्बन्धिनो रक्षसो रक्षांसि राक्षसान् स त्वं प्रतिदह प्रत्येकं भस्मीकुरु लिङ्गव्यत्ययेन रक्षःशब्दस्य पुंस्त्वम् छन्दसि परेऽपीति [पा० १.४.८१.] प्रत्युपसर्गस्य क्रियापदात्परत्वम् । कीदृशस्त्वम् त्मना उप आत्मनापि स्वभावतोऽपि क्षपः क्षपयतीति क्षपः क्षप क्षेपे चुरादिः पचाद्यच् स्वभावतो रक्षसां क्षपयिता । मन्त्रेषाङ्यादेरात्मन इति [पा० ६.४.१४१.] आत्मन आकारलोपस्तृतीयैकवचने ॥३७॥

भद्रो नोऽअग्निराहुतो भद्रा रातिः सुभग भद्रोऽअध्वरः । भद्रा उत प्रशस्तयः ॥३८॥

भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये । येना समत्सु सासहः ॥३९॥

येना समत्सु सासह्योऽव स्थिरा तनुहि भूरि शर्धताम् । वनेमा तेऽअभिष्टिभिः ॥४०॥

का० [१७.१२.११.] भद्रो न इति ककुभस्ताभ्यः । बृहतीभ्यः पुरस्तात्तिस्रः ककुबिष्टका भद्रो न इत्यृक्त्रयेणोपदधातीति सूत्रार्थः ॥ प्रगाथः ककुप्सतोबृहतीभ्यां तिस्रः ककुभः पादावृत्त्या कृताः आवृत्तस्य नार्थान्तरम् । भद्रो नोऽअग्निरा० — प्रशस्तय इति ककुप् मध्यः पादो द्वादशक आद्यतृतीयावष्टकाविति तच्छन्दसाम् । भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासह्योऽव स्थिरा तनुहि भूरि शर्धतां वनेमा तेऽअभिष्टिभिरिति सतोबृहती आद्यतृतीयौ द्वादशकौ द्वितीयतुर्यावष्टकाविति तच्छन्दसाम् ॥ तत्र ककुब्व्याख्यायते । यजमानश्चित्यमग्निं सम्बोध्य प्रार्थयते । हे सुभग शोभनभग शोभनं भगमैश्वर्यं यस्य । ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणेत्युक्तेः हे षड्विधैश्वर्ययुक्त आहुतः ऋत्विग्भिराहुतोऽग्निर्नोऽस्माकं भद्रः भन्दनीयः कल्याणो (62.) भवत्विति शेषः । किं च रातिः त्वदीयं दानं भद्रास्तु कल्याणकार्यस्तु । अध्वरः यज्ञो भद्रः श्रेयस्कार्यस्तु । उतापि च प्रशस्तयः कीर्तयो भद्रा सुखदायिन्यः सन्तु ॥ अथ द्वितीया । हे अग्ने येन मनसा समत्सु संग्रामेषु त्वं ससह्योः अभिभवसि शत्रून् षह मर्षणे छन्दस्यभि-

भवे च लङ् द्वित्वाऽभावौ छान्दसौ संहितायामभ्यासदीर्घः । तन्मनः वृत्रतूर्ये पापनाशाय भद्रं कल्याणं कुरुष्व तूर्यतिर्बधकर्मा वृत्रः पापम् पाप्मा वै वृत्र इति श्रुतेः । किं च भूरि बहु शर्धतां बलं कुर्वतां सम्बन्धीनि स्थिरा स्थिराणि धनूंषि अवतनुहि अवतारय ज्यारहितानि कुरु शर्ध इति [निघ० २.९.] बलनाम शर्ध बलं कुर्वन्ति शर्धन्ति सुपः क्विप् ततः शतृप्रत्ययः शर्धन्तोति शर्धन्तस्तेषाम् । किं च ते तवाभिष्टिभिर्मार्गैर्वयं वनेम सम्भजेम भोग्यानि वसूनि सेवेमहि । वनेमा धेनेति पदयोः संहितायां दीर्घः ॥३८॥३९॥४०॥

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आभर ॥४१॥

का० [१७.१२.१४.] अनूकान्ते दक्षिणे पङ्क्तीरग्निं तमिति । दक्षिणेऽनूकान्ते तिस्रः पङ्क्तिसंज्ञा इष्टका अग्निं तमिति तिसृभिरुपदधातीति सूत्रार्थः ॥ तिस्रः पङ्क्तयः यस्य द्वौ पादावष्टकौ द्वौ द्वादशकौ सा पङ्क्तिः । यो वसुः तापपाकप्रकाशैरुपकुर्वन् (63.) धनरूपो वसुरित्युच्यते वसुर्वासयिता वा यः तमग्निं मन्ये (64.) जानामि । धेनवो गावो यमग्निमुद्धृतं ज्ञात्वा अस्तं गृहं यन्ति गच्छन्ति दोहकालोऽस्माकं होमार्थं प्राप्त इति । आशवः शीघ्रगामिनोऽर्वन्तोऽश्वा यं दृष्ट्वास्तं यजमानगृहं यन्ति गच्छन्ति । नित्यासः नित्याः शाश्वताः सर्वकालभाविनो वाजिनो बलवन्तोऽश्वाः सैन्यवाश्वाभिप्रायेण पुनर्वचनम् यं दृष्ट्वास्तं यन्ति । यमुपास्य गवाश्वादिकं लभ्यते इत्यर्थः तादृश हे अग्ने स्तोतृभ्यः स्तुतिकारिभ्यो यजमानेभ्य इषमन्नमाभर आहर देहि ॥४१॥

सोऽअग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर ॥४२॥

योऽग्निर्वसुर्वासयिता स अग्निः विभक्तिव्यत्ययः तमग्निं गृणे स्तौमि गृ शब्दे स्वादिः लटि तङुत्तमैकवचनम् (65.) श्नादित्वाङ्स्वः [पा० ७.३.८०.] । यद्वा सोऽग्निः गृणे स्तूयतेऽस्माभिः कर्तृप्रत्ययस्य कर्मत्वं विधेयम् । धेनवो यमग्निं समायन्ति समागच्छन्ति । अर्वन्तोऽश्वा यं समायन्ति कीदृशा अर्वन्तः रघुद्रुवः रलयोरै-

क्यम् लघु क्षिप्रमरं द्रुतम् लघु शीघ्रं द्रुणन्ति (66.) गच्छन्ति लघुद्रुवः द्रू बधगत्योः स्वादिः क्र्यादिश्च क्विप् । सूरयः विद्वांसो योग्या ऋत्विजो यं समायन्ति यदुपासकं सर्वे भजन्तेऽत्यर्थः । कीदृशाः सूरयः सुज्ञातासः शोभनं ज्ञातं ज्ञन्म येषां ते सुज्ञातासः सुज्ञाताः आड्ज्ञसेरिति [पा° ७. १. ५०.] असुक् तादृश हे अग्ने त्वं स्तोतृभ्य इषमन्नमाभर ॥ ४२ ॥

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीषऽआसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पतऽइषꣳ स्तोतृभ्य आभर ॥ ४३ ॥

चन्द्रे सु (67.) शकारिणीति संहितायां चन्द्रे परे सुशब्दस्य शागमः (68.) हे सुचन्द्र चन्द्रमिति हिरण्यनाम [निघ° १. २.] शोभनं चन्द्रं हिरण्यं यस्मात् यद्वा शोभनश्चन्द्र-इव चन्द्रो धनदाता शोभने चन्द्रे धनप्राप्तिर्भवतीति ज्योतिःशास्त्रे उक्तम् यद्वा शोभनं चन्दत्याह्लादयति सुचन्द्रः हे सुचन्द्र आसनि आस्ये मुखे सर्पिषः पानायेति शेषः घृतस्य पानाय उभे दर्वी दर्व्याकारौ हस्तौ श्रीणीषे आश्रयसि सेवसे श्री पाके क्र्यादिः अत्राश्रयार्थः । उतो अपि च हे शवसः पते बलस्याधिपते उक्थ्येषु शास्त्रवत्सु यज्ञेषु नोऽस्मानुत्पुपूर्याः उत्कर्षेण पूरय धनैरिति शेषः । स्तोतृभ्यः इषमन्नमाहर ॥ ४३ ॥

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा तऽओहैः ॥ ४४ ॥

का° [१७. १२. १५.] उत्तरे पदपङ्क्तीरग्ने तमिति । उत्तरानूकान्ते तिस्रः पदपङ्क्तीष्टका अग्ने तमिति तिसृभिरुपदधातीति सूत्रार्थः ॥ तिस्रः पदपङ्क्तयः । यस्याः पञ्चाक्षराश्चत्वारः पादा एकः षडर्णः सा पदपङ्क्तिः यद्वा त्रयः पञ्चार्णाश्चतुर्थश्चतुरर्णः पञ्चमः षडर्ण इति । तत्राद्यायां चतुर्थश्चतुष्कः । हे अग्ने ते तव तं क्रतुं तावकं प्रसिद्धं यज्ञमद्यास्मिन्दिने वयमृध्याम समर्धयाम समृद्धं कुर्वामित्यर्थः आशिषि लोट् संहितायां दीर्घः । कैः स्तोमैः स्तुतिभिः सामसमूहैः । कीदृशैः स्तोमैः ओहैः वहे रूपं वहन्ति फलं प्रापयन्तीत्योहाः तैः वहन्ति प्रतिपादयन्ति त्वत्कर्मरूपनामानीति वा । तत्रैको दृष्टान्तः अश्वं न स्तोमैः न इवार्थे यथा स्तोमैः स्तुतिभिः अश्वमाश्वमेधिकं विप्राः समर्धयन्ति । द्वितीयो दृष्टान्तः क्रतुं न हृदिस्पृशं हृदि स्पृशति

कृदिस्पृक् कृलदन्तादित्यलुक् [पा° ६.३.१.] अतिप्रियं चिरं मनसि स्थितं भद्रं कल्याणं क्रतुं संकल्पं यथा समर्धयन्ति । क्रतुर्यज्ञः संकल्पश्चेति दृष्टान्तदार्ष्टान्तिकयोरस्य सम्बन्धः । चिराभिलषितं यथा सन्तः सम्पादयन्तीत्यर्थः ॥४४॥

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥४५॥

अथेत्यर्थेऽधित्यव्ययम् निपातस्य चेति [पा° ६.३.१३६.] संहितायां दीर्घः । हि पादपूरणः । हे अग्ने अथ समनन्तरमेव क्रतोः अस्मद्यज्ञस्य रथीः सारथिरिव बभूथ भव बभूथाततन्थेत्यादिना [पा° ७.२.६४.] इडभावः । रथोऽस्यास्तीति रथीः रथादीरन्नीरचावित्यस्त्यर्थे ईरच्प्रत्ययः (69.) सारथिर्यथा रथनिर्वाहं करोति तथा यज्ञनिर्वाहको भवेत्यर्थः । कीदृशस्य क्रतोः भद्रस्य कल्याणरूपस्य । दक्षस्य समृद्धस्य स्वफलदानसमर्थस्येति वा । साधोः साध्यते निष्पाद्यतेऽनेति साधुस्तस्यातिशययुक्तस्येत्यर्थः । ऋतस्य अमोघफलस्य । बृहतः महतो प्रौढस्य ॥४५॥

एभिर्नोऽअर्कैर्भवा नोऽअर्वाङ् स्वर्ण ज्योतिः ।
अग्ने विश्वेभिः सुमना अनीकैः ॥४६॥

हे अग्ने विश्वेभिः विश्वैः सर्वैरनीकैः मुखैः कृत्वा नोऽस्मान्प्रति अर्वाङ् अभिमुखो भव । अवरं समीपदेशमञ्चतीत्यर्वाङ् । अनुगृह्णीत्यर्थः । कीदृशः एभिरस्मत्पठितैरर्कैरर्चनीयैर्मन्त्रैः कृत्वा सुमनाः शोभनमनस्कः । प्रसन्नः सन्नस्मत्संमुखो भवेत्यर्थः । तत्र दृष्टान्तः स्वः न ज्योतिः स्वःशब्देन सूर्यः न इवार्थे यथा स्वरादित्यरूपं ज्योतिः अर्कैः स्तुतमुदयादारभ्य सर्वप्राणिसंमुखं भवति । ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] भवेत्यस्य दीर्घः ॥४६॥

अग्निꣳ होतारं मन्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो जातवेदसं विप्रं न जातवेदसम् ॥ य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ॥ घृतस्य विभ्राष्टिमनुवष्टि शोचिषाजुह्वानस्य सर्पिषः ॥४७॥

का° [१७.१२.१६.] पुरीषवत्याः पूर्वामतिछन्दसं प्राच्यौ पुरीषसंहिते भद्रा रातिर्वृत्रतूर्येऽवस्थिराग्निꣳ होतारमिति । अग्नेः पुरीषमसीति पुरीषशब्दवता मन्त्रे-

णोपक्षिता पञ्चम्यसपत्ना पुरीषवती [१५.३.] तस्याः पूर्वामतिछन्दसमिष्टकामुपदधाति भद्रा रातिः वृत्रतूर्ये अवस्थिरेति ककुभां [१५.३८-४०.] चतुश्चतुरक्षरसहितयाग्निꣳ होतारमित्यृचा । पुरीषवत्यतिछन्दइष्टके प्राग्लक्षणे पुरीषयुक्ते च भवतः अनयोरन्तः पुरीषावापः कार्य इति सूत्रार्थः । अतिछन्दाः अवसानत्रिकोपेता । छन्दांसि गायत्र्यादीनि सप्तातिक्रान्तातिछन्दाः । चतुःषष्यक्षरत्वादष्टिः ककुभामक्षरैः सङ्खातिधृतिः ॥ यो देवः दानादिगुणयुक्तोऽग्निर्ऊर्ध्वयोन्नतया देवाच्या देवाम्प्रत्यञ्चति गच्छति देवाची तया देवान्प्रति गतया कृपा कृप्यतऽइति कृप् तया क्लृप्तया समर्थया शोचिषा ज्वालया घृतस्य विभ्राष्टिं विभ्रंशपातमनुवष्टि अन्विच्छति । शोचिःशब्दस्य स्त्रीत्वमार्षम् । किम्भूतस्य घृतस्य आज्यमानस्य समन्ताद्भूयमानस्य सर्पिषः सर्पतीति सर्पिस्तस्य अग्न्यङ्गेषु प्रसरणशीलस्य । य एतादृशः (70.) तमग्निं मन्ये जानामि । कीदृशं होतारं देवानामाह्वातारम् दास्वन्तं दासृ दाने दातारम् वसुं वासयितारम् सहसो बलस्य सूनुं पुत्रम् बलेन मथ्यमानत्वात् जातवेदसमुत्पन्नप्रज्ञम् न इवार्थे जातवेदसं जातसर्वशास्त्रज्ञानं विप्रं ब्राह्मणमिव स्थितम् ॥४७॥

a. अग्ने त्वं नोऽअन्तम उत त्राता शिवो भव वरूथ्यः ॥

b. वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥

c. तं त्वा शोचिष्ट दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥४८॥

का° [१७.१२.१७.] अग्ने त्वमित्यनूकान्तेऽपरे द्विपदाः । अग्ने त्वम् वसुरग्निः तं त्वा इति तिसृभिरपरेऽनूकान्ते द्विपदेष्टका उपदधातीत्यर्थः ॥ तिस्रो द्विपदा आग्नेय्यः ॥ व्याख्याताः [३.२५.२६.] ॥४८॥

VI. येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निꣳ स्वराभरन्तः ।

तस्मिन्नक्षं निदधे नाकेऽग्निं यमाहुर्मनव स्तीर्णबर्हिषम् ॥४९॥

का° [१७.१२.११.] पुनश्चितिं चोपरि तद्वत्येन ऋषय इति प्रत्यृचम् । मध्योपक्षितस्याष्टिष्टकस्य गार्हपत्यस्योपरि गार्हपत्यवदेव पुनश्चितिमुपदधाति येने-

त्यष्टऽर्चेन प्रत्यृचमित्यर्थः ॥ आग्नेय्योऽष्टौ षट् त्रिष्टुभः द्वे अनुष्टुभौ । ऋषयः मुनयो येन तपसा चित्तैकाग्र्येण सत्रं यज्ञमायन्नागताः यज्ञं कर्तुमुद्यता इत्यर्थः । कीदृशाः अग्निमिन्धानाः दीपयन्तः । तथा स्वः स्वर्गलोकमाभरन्तः आहरन्तः स्वीकुर्वाणाः । मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तप इत्युक्तेः । तस्मिन् तपसि सति नाके स्वर्गलोकनिमित्तमग्निमहं निदधे स्थापयामि । मनवः मननप्रधाना विद्वांसो यमग्निं स्तीर्णबर्हिषमाहुर्वदन्ति स्तीर्णमाहादितं बर्हिर्यत्र तम् बर्हिर्यज्ञसाधनोपलक्षकम् यज्ञसाधनसहितमित्यर्थः ये विद्वाऽसस्तो मनव इति [८.६.३.१८.] श्रुतेः ॥४९॥

तं पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽधि रोचने दिवः ॥५०॥

हे देवाः दीप्यमाना ऋत्विजः पत्नीभिः कलत्रैः सह पुत्रैरुत पुत्रैरपि सह भ्रातृभिर्वा भ्रातृभिश्च हिरण्यैः सुवर्णादिद्रव्यैश्च सह तमग्निमनुगच्छेम वयमनुसरेम सेवेमित्यर्थः । कीदृशे वयम् तृतीये भूमिमारभ्य त्रिसंख्यापूरके दिवः पृष्ठे रविमण्डले नाकं दुःखहीनं स्थानमधिगृभ्णाना (71.) अधिकं सुखस्थानं स्वीकुर्वन्तः । कीदृशे दिवः पृष्ठे सुकृतस्य लोके शुभकर्मणः फलभूते रोचने दीप्यमाने एतद्ध तृतीयं पृष्ठꣳ रोचनं दिवो यत्रैष एतत्तपतीति [८.६.३.१९.] श्रुतेः ॥५०॥

आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥५१॥

अयमग्निः वाचो मध्यं चयनस्थानमारुहत् चयनोपर्यारूढः एतद्ध वाचो मध्यं यत्रैष एतच्चीयतऽइति [८.६.३.२०.] श्रुतेः । सोऽयमग्निः ये पृतन्यवः युद्धेप्सवः पाप्मानस्तानधस्पदं कृणुतां पादयोरधः करोतु पादयोरधोऽधस्पदम् कस्कादित्वात्सः [पा° ८.३.४८.] । पृतनां सेनां युद्धं वा इच्छन्ति पृतन्यन्ति सुप आत्मनः क्यच् [पा° ३.१.८.] कव्यध्वरेत्यादिना [पा° ७.४.३९.] पृतनायाष्टिलोपः ततः क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः । अधस्पदं कुरुताꣳ सर्वान्याप्मन इति [२०.] श्रुतेः । कीदृशोऽग्निः भुरण्युः जगद्भर्ता भुरण्युरिति भर्तेत्येतदिति [२०.] श्रुतेः ।

सत्पतिः सतां पालकः । चेकितानः चेतयमानः । पृथिव्याः पृष्ठे भूम्युपरि निहितः स्थापितः । द्विद्युतदत्यन्तं द्योतमानः दाधर्तीत्यादिना [पा° ७.४.६५.] यङ्लुकि शत्रन्तो निपातः ॥५१॥

अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानः सरिरस्य मध्य उप प्रयाहि दिव्यानि धाम ॥५२॥

अयमग्निर्द्योततां दीप्यतां दिव्यानि धाम धामानि स्थानानि उप प्रयाहि उपप्रयातु च स्वर्गं लोकं गच्छतु पुरुषव्यत्ययः उपप्रयाहि दिव्यानि धामेत्युपप्रयाहि स्वर्गं लोकमित्येतदिति [८.६.३.२१.] श्रुतेः । कीदृशोऽग्निः वीरतमः अतिशयित वीरः शूरः वयोधाः वयोऽन्नं हविर्लक्षणं दधातीति वयोधाः । सहस्रियः इष्टकानां सहस्रेण संमितः सहस्रेण संमितौ घ इति [पा° ४.४.१३५.] घप्रत्ययः । अप्रयुच्छन् कर्मण्यप्रमाद्यन् सरिरस्य मध्ये लोकत्रयान्तर्विभ्राजमानः दीप्यमानः इमे वै लोकाः सरिरमिति [२१.] श्रुतेः ॥५२॥

सम्प्रच्यवध्वमुप सम्प्रयाताग्निं पथो देवयानान्कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानान्वाताँसीद्वयि तन्तुमेतम् ॥५३॥

मन्त्रदृग्ऋषीनाह । हे ऋषय एनमग्निं यूयं सम्प्रच्यवध्वमग्निं प्रत्यागच्छत उप सम्प्रयात च आगत्य सम्यक् प्राप्नुत । सम्प्रच्यवध्वमुप सम्प्रयातेत्यमूनेतदृषीनाह समेनं प्रच्यवध्वमुप चैनꣳ सम्प्रयातेति [८.६.३.२२.] श्रुतेः । एवमृषीनुक्त्वाग्निमाह हे अग्ने देवयानान्पथः कृणुधं कुरु वचनव्यत्ययः । देवा यायन्ते प्राप्यन्ते यैस्ते देवयानास्तान् करणाधिकरणयोश्चेति [पा° ३.३.११७.] ल्युट् देवलोकप्राप्तिहेतून्मार्गान्कुर्वित्यर्थः । हे अग्ने यत ऋषय एतं तन्तुं यज्ञं त्वयि अन्वातांसीत् अतानिषुः अनुक्रमेण विस्तारितवन्तः वचनव्यत्ययः । कीदृशा ऋषयः पुनः भूयः पितरा वाङ्मनसे युवाना तरुणौ अयातयामावन्योऽन्यसंगतौ कृण्वानाः कुर्वाणाः । स्वादेः कृञः शानच् । विभक्तेराकारः । संयताभ्यां वाङ्मनसाभ्यामिव यज्ञसाधनात् ते संयते कुर्वाणाः जितेन्द्रिया इत्यर्थः पुनः कुर्वाणाः पितरा युवानेति वाङ्मैव मनश्च पितरा युवानेति [२२.] श्रुतेः ॥५३॥

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥५४॥

हे अग्ने त्वमुद्बुध्यस्व उद्बुद्धो भव सावधानो भव । एनं यजमानं प्रतिजागृहि प्रतिदिनं यजमानं जागरूकं सावधानं कुरु । तत इष्टापूर्ते श्रौतस्मार्ते कर्मणी संसृजेथां यजमानेन सह संसृष्टे भवतां त्वत्प्रसादात् अयं च यजमान इष्टापूर्ताभ्यां संसृज्यताम् पुरुषव्यत्ययः । किं च हे विश्वे देवाः यूयम् कृतेष्टपूर्ता निष्पापो यजमानश्च सधस्थे देवैः सहस्थितियोग्ये अस्मिन्नुत्तरस्मिन्सर्वोत्कृष्टे द्युलोके सीदत तिष्ठत अधि अधिकं चिरं तिष्ठतेत्यर्थः द्यौर्वाऽउत्तरꣳ सधस्थमिति [८.६.३.२३.] श्रुतेः । विश्वेर्देवैः सालोक्यं यजमानस्य प्रार्थ्यतऽइति भावः ॥५४॥

येन वहसि सहस्रं येनाग्ने सर्ववेदसम् ।
तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥५५॥

हे अग्ने येन सामर्थ्येन सहस्रं सहस्रदक्षिणाकं यज्ञं त्वं वहसि प्रापयसि येन च सर्ववेदसं सर्वं वेदो धनं दक्षिणा यत्र तं सर्वस्वदक्षिणाकं यज्ञं वहसि तेन सामर्थ्येन नोऽस्माकमिमं यज्ञं देवेषु गन्तवे देवान्प्रति गन्तुं स्वः स्वर्गं नय प्रापय । तुमर्थे गमेः तवेप्रत्ययः । यज्ञे स्वर्गं गतिऽस्माकमपि तत्र गमनं स्यात् । सोऽस्येष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति प्रैति [१२.] दक्षिणामन्वारभ्य यजमान इति श्रुतेः । अतो यज्ञस्य स्वर्गमनं प्रार्थ्यते ॥५५॥

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तं जानन्नग्नऽआरोहाथा नो वर्धया रयिम् ॥५६॥

इयं व्याख्याता [३,१४.१२,५२.] ॥५६॥

VII. तपश्च तपस्यश्च शैशिरावृतूऽअग्नेरन्तःश्लेष° ॥५७॥

एवं पुनश्चित्युपधानमुक्त्वा पञ्चमचितिशेषभूतेष्टकोपधाने मन्त्रा उच्यन्ते ॥ का° [१७.१२.२२.] ऋतव्ये तपश्च तपस्यश्चेति । ऋतव्ये द्वे पञ्चेष्टके उपदधाति ॥ ऋतु-

देवत्यं यजुः उत्कृतिश्छन्दः (73.) । तपो माघः तपस्यः फाल्गुनः शैशिरौ ऋतू शिशिरर्तोरवयवौ (74.) शिष्टं व्याख्यातम् [१३.२५.] ॥५७॥

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् ॥
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥
सूर्यस्तेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५८॥

का° [१७.१२.२३.] विश्वज्योतिषं परमेष्ठी त्वेति । यजमानकृतां पञ्चां विश्वज्योतिषं (75.) तृतीयोपदधातीत्युपदधातीति सूत्रार्थः ॥ सूर्यदेवत्यं यजुः शक्वरीछन्दः । परमेष्ठी त्वां दिवः पृष्ठ उपरि सादयतु । सूर्यस्ते तवाधिपतिः पालक इति विशेषः अन्यद्व्याख्यातम् [१४,१४.] ॥५८॥

लोकं पृण छिद्रं ॥५९॥ ता अस्य सूद° ॥६०॥ इन्द्रं विश्वा अव° ॥६१॥

का° [१७.१२.२४.] दक्षिणाऽसात्प्रत्यगरत्निमात्रादधि लोकम्पृणाः पूर्ववत् । आत्मनो दक्षिणादग्नेयकोणादपरस्यां दिश्यरत्निमात्रादधि पञ्चालोकद्वयं परित्यज्य तृतीयलोकादारभ्य प्रथमचितिवल्लोकम्पृणा उपदधातीति सूत्रार्थः ॥ तिस्रोऽपि द्वादशे [१२.५४-५६.] व्याख्याताः ॥६१॥

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातोऽअनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥६२॥

का° [१७.१२.२५.] प्रक्षाल्य पुरीषेण विकर्णीस्वियमातृण्णे शर्करे सऽस्पृष्टे छिद्रे प्रोथदश्व इत्युत्तरां विकर्णीम् । पञ्चमीं चितिं पुरीषेण पूर्ववत्प्रक्षाल्य शर्करामध्यौ परस्परसंलग्ने सच्छिद्रे विकर्णीस्वियमातृण्णासंज्ञे द्वे इष्टके उपदधे । तयोर्मध्ये उत्तरदिश्यनूकरेखामध्ये प्रोथदश्व इति विकर्णीष्टकामुपदधातीति सूत्रार्थः ॥ वसिष्ठदृष्टाग्नेयी त्रिष्टुप् । मथ्यमानोऽग्निः कथ्यते । यदा यस्मिन्काले महः महतः संवरणात् संव्रियतेऽस्मिन्नग्निरिति संवरणमरणिकाष्ठं तस्मात् व्यस्थात् वितिष्ठते प्रकाशो भवति तदा प्रोथत् प्रोथयति शब्दायते प्रोथतिः शब्दार्थः इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.१७.] तिप इकारलोपः । तत्र दृष्टान्तः अश्वो न न इ-

वार्थे अश्व-इव यथा यवसे अविष्यन् यवसं घासं भक्षयिष्यन्नश्वः प्रोथति । आत् अस्य अनन्तरं वह्निज्वलनशब्दानन्तरं वातो वायुरस्याग्नेरनुवाति अग्निमनुलक्ष्य प्रसरति वायुग्न्योः सख्यादिति भावः । कीदृशो वायुः शोचिः शोचयति ज्वलयति शोचिः अग्निः संदीपनः शोचिरिति ज्वलन्नामसु [निघ° १. १७.] पठितम् । यद्वास्य शोचिर्ज्वालामनुलक्ष्य वातो वाति । अधेति निपातोऽथार्थः अथ वातेनाग्नौ ज्वलिते सति ते एतस्याग्निः व्रजनम् व्रजत्यत्रेति व्रजनं गमनस्थानं कृष्णमस्ति श्यामं भवति कृष्णवर्त्मा कृताशन इत्युक्तिः । स्मेति निपातः पादपूरणः । श्रुत्या ते इति पदमेतस्येति व्याख्यातं परोऽक्षत्वान्मत्वस्य अधैतस्य व्रजनं कृष्णं भवतीति [८. ७. ३. १२.] श्रुतेः । अविष्यन्नित्यत्तिकर्मसु [(76.) निघ° २. ८.] पठितम् ॥ ६२ ॥

आयोष्टा सदने सादयाम्यवतश्छायायाꣳ समुद्रस्य हृदये ।
रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम् ॥ ६३ ॥

का° [१७. १२. २५.] आयोष्टेति स्वयमातृण्णाम् । आयोरिति कण्डिकाद्वयेन विकर्णीदक्षिणां स्वयमातृण्णामुपदधातीत्यर्थः ॥ आयोः परमेष्ठीति द्वे यजुषी स्वयमातृण्णादेवत्ये आद्यं ब्राह्म्युष्णिक् द्वितीयमाकृतिश्छन्दः । हे स्वयमातृण्णे आयोः आदित्यस्य सदने स्थाने तां त्वा त्वां सादयामि स्थापयामि । एति निरन्तरं गच्छतीत्यायुरादित्यः । कीदृशस्यायोः अवतः जगत्पालयितुः दीप्यमानस्य वा । तथा समुद्रस्य समुनत्तीति समुद्रस्तस्य आदित्यो वृष्ट्या जगदार्द्रीकुर्वन्समुद्र उच्यते । किम्भूते सदने छायायामाश्रयभूते हृदये प्रधानभूते । कीदृशीं त्वां रश्मिवतीं किरणयुतामत एव भास्वतीं शोभमानां । तां काम् या त्वं द्यां द्युलोकमाभासि प्रकाशयसि पृथिवीमाभासि उरु विस्तीर्णमन्तरिक्षं चाभासि । रश्मिपदस्य संहितायां दीर्घः ॥ ६३ ॥

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीं दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीः ॥ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥ सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥ ६४ ॥

व्याख्यातम् [१४, १२. १५, ५८.] ॥ ६४ ॥

a. सहस्रस्य प्रमासि । b. सहस्रस्य प्रतिमासि । c. सहस्रस्योन्मासि ।
d. साहस्रोऽसि । e. सहस्राय त्वा ॥ ६५ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां पञ्चदशोऽध्यायः ॥ ॥

का° [१७. १२. २७.] तिष्ठन्नग्निं प्रोक्षति हिरण्यशकलसहस्रेण शते द्वे-द्वे प्रकिरति सहस्रस्येति प्रतिमन्त्रम् । इष्टकाचितं सपत्नपुरुषमग्निं (77.) पश्चादुत्तरपूर्ववद्दक्षिणपश्चिमेषु शतद्वयं द्वयं सोदकस्तिष्ठन्प्रकिरतीत्यर्थः (78.) ॥ पञ्चाग्नेयानि यजूंषि । हे अग्ने सहस्रस्येष्टकानां प्रमा प्रमाणं त्वमसि । सहस्रस्य प्रतिमा प्रतिनिधिरसि । सहस्रस्योन्मोन्मानं तुलासि । साहस्रः सहस्रार्होऽसि । सहस्रायानन्तफलाय त्वा त्वां प्रोक्षामि ॥ ६५ ॥

श्रीमन्महीधरकृते वेददीपे मनोरमे (79.) । अस्मिन्पञ्चदशाध्याये कथिता
पञ्चमी चितिः (80.) ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ [°ज्ञातान्ज्ञातवेदो नुदस्व - अर्केलँस्त्वं -] ॥ १ ॥ २ [°ज्ञातान्नुद ज्ञातवेदः -]. ३ a [षोलशी]. b ॥ २ ॥ ३ c ॥ ३ ॥ ४ a-g ॥ ४ ॥ ४ h-o ॥ ५ ॥ ४ p-s. ५ a-d ॥ ६ ॥ ५ e-m ॥ ७ ॥ ५ n-w ॥ ८ ॥

II. ॥ ६ a-d ॥ १ ॥ ६ e-h ॥ २ ॥ ६ i.k. ७ a.b ॥ ३ ॥ ७ c [ऐलेनौ°] - f ॥ ४ ॥ ८ ॥ ५ ॥ ९ a-d ॥ ६ ॥ ९ e-i [ज्रिन्व वेषश्रीः क्षत्राय क्षत्रं ज्रिन्व] ॥ ७ ॥ १५ ॥ ॥

III. ॥ १० राज्यं° - °र्धता ॥ १ ॥ १० त्रिवृत्वा - °त्तरिक्षे ॥ २ ॥ १० ऋषयः - सादयन्तु ॥ ३ ॥ ११ विराल° - °र्धता ॥ ४ ॥ ११ पञ्चद° - °त्तरिक्षे ॥ ५ ॥ ११ ऋषयः - सादयन्तु ॥ ६ ॥ १२ सम्राल° - °र्धता ॥ ७ ॥ १२ सप्तद° - °त्तरिक्षे ॥ ८ ॥ १२ ऋषयः - सादयन्तु ॥ ९ ॥ १३ स्वराल° - °र्धता ॥ १० ॥

१३ एकवि॰ - °त्तरिक्षे ॥११॥ १३ ऋषय॰ - सादयन्तु ॥१२॥ १४ अधिपत्न्य॰ - °र्धता ॥१३॥ १४ त्रिणवत्र॰ - °त्तरिक्षे ॥१४॥ १४ ऋषय॰ - सादयन्तु ॥१५॥३०॥ ॥

IV. ॥ १५ - प्रकेतिः ॥१॥ १५ तेभ्यो नमोऽअस्तु ते नो मृलयन्तु ते नोऽवन्तु ते यं - द्ध्मः ॥२॥ १६ - प्रकेतिः ॥३॥ १६ तेभ्यो - द्ध्मः ॥४॥ १७ - प्रकेतिः ॥५॥ १७ तेभ्यो - द्ध्मः ॥६॥ १८ [°स्रसाऽ] प्रकेतिः ॥७॥ १८ तेभ्यो - द्ध्मः ॥८॥ १९ [°स्रसाऽ] - प्रकेतिः ॥९॥ १९ तेभ्यो - द्ध्मः ॥१०॥४०॥ ॥

V. ॥ २०-३० [इलस्पदे] ॥१-११॥ त्वामग्ने कविर्मन्तो देवं मर्तास ईलते । मन्ये त्वा जातवेदसꣳ स कव्या वेद्यानुषक् ॥१२॥ ३१ [वोल्हवे] - ३६ [ईलेन्यो] - ४२ [रघुद्रुचः (81.)] - ४८ ॥१३-३०॥७०॥ ॥

VI. ॥ ४९-५६ ॥१-८॥७८॥ ॥

VII. ॥ ५७ [शिशिराऽऋतू] - ५८ ॥१॥ ५९ [°न्योनाऽअसी°] - ६२ ॥२-५॥ ६३. ६४ ॥६॥ ६५ ॥७॥८५॥ ॥ सप्तानुवाकेषु पञ्चाशीतिः ॥ ॥

इति काण्वशाखायां संहितापाठे षोलशोऽध्यायः ॥ ॥

I. नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुत ते नमः ॥१॥

पञ्चदशेऽध्याये (1.) चयनमन्त्रान्समाप्य षोडशे शतरुद्रियाख्यहोममन्त्रा (2.) उच्यन्ते ॥ ॥ का॰ [१८. १. १-५.] शतरुद्रियहोम उत्तरपत्नस्यापरस्याꣳ सत्र्यां परिश्रित्स्वर्कपर्णेनार्ककाष्ठेन शातयत्संततं ज्ञर्तिलमिश्रान्गवेधुकासक्तून्नज्ञाद्धीरमेके तिष्ठन्नुदङ्मस्तऽइत्यध्यायेन ऋनुवाकान्ते स्वाहाकारो ज्ञानुमात्रे पश्चात्ते च नाभिमात्रे प्राङ्क प्रत्यवरोहेभ्यो मुखमात्रे प्रतिलोमं प्रत्यवरोहान्जुहोति प्रमाणेषु ननोऽस्त्विति प्रतिमन्त्रम् ॥ अस्यार्थः । हिरण्यशकलैरग्निप्रोक्षणानन्तरं शतरुद्रियसंज्ञो होमः । तस्याहवनीये प्राप्तावपवादमाह । उत्तरपत्नपश्चिमकोणे याः परि-

श्रितो जङ्घामात्राद्यः पूर्वं निखातास्तासु होमः । तत्र विधिः । ज्ञर्तिलैरारण्यतिलैर्मिश्रान्गवेधुकासक्तूनर्कपत्रेण जुहोति । किं कुर्वन् । अर्ककाष्ठेन संततं जारयन् परिश्रित्सु पातयन् अर्कपत्रं दक्षकरेणादायार्ककाष्ठं वामेनादाय तेन पातनीयम् । सक्तुस्थाने अज्ञाद्वुग्धमिति केचित् । उदक्मुखो नमस्तऽइत्यध्यायेन । तत्रानुवाकत्रयान्ते (3.) ऽभ्रकेभ्यश्च वो नम इत्यत्र [क° २६.] ज्ञानुमात्रे परिश्रिति स्वाहाकारो विधेयः पश्चानुवाकान्ते सुधन्वने चेत्यत्र [क° ३६.] नाभिमात्रे परिश्रिति स्वाहाकारः । नमोऽस्तु रुद्रेभ्य इति [क° ६४.] प्रत्यवरोहमन्त्राः तेभ्यः प्राक् मुखमात्रपरिश्रिति स्वाहाकारः । नमोऽस्त्विति कण्डिकात्रयेण प्रतिलोमं होमः ये दिवीति [क° ६४.] मुखमात्रे येऽन्तरिक्षमिति [क° ६५.] नाभिमात्रे ये पृथिव्यामिति [क° ६६.] ज्ञानुमात्रे । इति सूत्रार्थः ॥ नमस्ते । षोडशर्चोऽनुवाकः एकरुद्रदैवत्यः आद्या गायत्री तिस्रोऽनुष्टुभः तिस्रः पङ्क्त्यः सप्तानुष्टुभः द्वे जगत्यौ । अध्यायस्य परमेष्ठिदेवप्रजापतय ऋषयः मा न इति द्वयोः [क° १५-१६.] कुत्सोऽपि ऋषिः ॥ हे रुद्र रुत् दुःखं द्रावयति रुद्रः यद्वा रु गतौ ये गत्यर्थास्ते ज्ञानार्थाः रुवर्णं रुत् ज्ञानम् भावे क्विप् तुगागमः रुत् ज्ञानं राति ददाति रुद्रः ज्ञानप्रदः यद्वा पापिनो नरान्दुःखभोगेन रोदयति रुद्रः । हे रुद्र ते तव मन्यवे क्रोधाय नमः नमो नमस्कारोऽस्तु उतो अपि च ते तविषवे बाणाय नमः उतापि च ते तव बाहुभ्यां नमः । तव क्रोधबाणहस्ता अस्मदस्त्रिष्वेव प्रसरन्तु नास्मास्वित्यर्थः ॥ १ ॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शंतमया गिरिशन्ताभिचाकशीहि ॥ २ ॥

हे रुद्र या ते तवेदृशी तनूः शरीरं हे गिरिशन्त तया तन्वा नोऽस्मानभिचाकशीहि अभिपश्य । चाकशीतिः पश्यतिकर्मा । कीदृशी तनूः शिवा शान्ता मङ्गलरूपा । यतोऽघोरा अविषमा सौम्या अत एवापापकाशिनी पापमसुखं काशयति प्रकाशयति पापकाशिनी न पापकाशिनी अपापकाशिनी या पुण्यफलमेव ददाति न पापफलमित्यर्थः । गिरौ कैलाशे (4.) स्थितः शं सुखं प्राणिनां त-

नोति विस्तारयति गिरिशंतः गिरि वाचि स्थितः शं तनोतीति वा गिरौ मेघे स्थितो वृष्टिद्वारेण शं तनोतीति वा गिरौ शेते गिरिशः अमति गच्छति जानातीत्यंतः सर्वज्ञः अम गतौ भजने शब्दे कर्तरि क्तः 'गिरिशश्चासावंतश्च गिरिशंतस्तत्सम्बुद्धिः शकन्ध्वादित्वात्परूपम् [पा° ६.१.९४. वा° २.]। कीदृश्या तन्वा शंतमया सुखतमया ॥२॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥३॥

हे गिरिशंत त्वं यामिषुं वाणं हस्ते बिभर्षि धारयसि किं कर्तुम् अस्तवे अस्तु क्षेपणे तुमर्थे तवेप्रत्ययः अस्तितुं शत्रून् क्षेप्तुमित्यर्थः । हे गिरित्र गिरौ कैलाशे (4.) स्थितो भूतानि त्रायतेऽस्मिन्निति गिरित्रः तामिषुं शिवां कल्याणकारिणीं कुरु । किं च पुरुषं पुत्रपौत्रादिकं जगत् जङ्गममन्यदपि गवाश्वादिकं मा हिंसीः मा बधीः ॥३॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥४॥

गिरौ कैलाशे शेते गिरिशः हे गिरिश शिवेन वचसा मङ्गलेन स्तुतिरूपेण वचनेन त्वा त्वां प्राप्तुं वयं वदामसि वदामः प्रार्थयामहे अच्छाभिप्रायुमिति शाकपूणिः [निरु° ५.२८.] संहितायां निपातस्य चेति [पा° ६.३.१३६.] दीर्घः । इदन्तो मसि [पा° ७.१.४६.] । किं वदाम इत्यत आह नोऽस्माकं सर्वमित् सर्वमेव जगत् जङ्गमं नराः पश्वादि यथा येन प्रकारेण अयक्ष्मं नीरोगं सुमनाः शोभनमनस्कं च असत् भवति तथा कुर्विति शेषः सुमनःशब्दे पुंस्त्वमार्षं जगद्विशेषणत्वात् । असदित्यत्र लेटोऽडाटावित्यट् [पा° ३.४.९४.] इत्लोपः ॥४॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयत्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥५॥

रुद्रो नामध्यवोचत् अधिवक्तु मां सर्वाधिकं वदतु तेनोक्ते मम सर्वाधिक्यं भ-

वत्येवेत्यर्थः । कीदृशः अधिवक्ता अधिकवदनशीलः प्रथमः सर्वेषां मुख्यः पूज्यत्वात् । दैव्यः देवेभ्यो हितः । भिषक् रोगनाशकः स्मरणेनैव रोगनाशाद्भिषक्त्वम् । एवं परोऽक्षमुक्त्वा प्रत्यक्षमाह हे रुद्र सर्वा यातुधान्यः यातुधानी राक्षसीः त्वं परासुव पराक्षिप अस्मभ्यो दूरीकुरु । किं कुर्वन् सर्वानक्षोन्सर्पव्याघ्रादीन्जम्भयन् विनाशयन् । कीदृशीर्यातुधान्यः अधराचीः अधरेऽधोदेशेऽञ्चन्ति ता अधराच्यः ताः अधोऽधोगमनशीलाः । चौ समुच्चये सर्पनाशराक्षसीक्षेपौ सदैव कुर्वित्यर्थः ॥५॥

असौ यस्ताम्रोऽअरुण उत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥६॥

आदित्यरूपेणात्र रुद्रः स्तूयते । योऽसौ प्रत्यक्षो रुद्रो रविरूपः च पुनर्ये रुद्रा एनमभितो दिक्षु प्राच्यादिषु श्रिताः किरणरूपेण सहस्रशोऽसंख्याः एषां हेडः क्रोधमस्मदपराधजं वयमव ईमहे निवारयामः भक्त्या निराकुर्मः । हेड इति [निघ० २.१३.] क्रोधनाम । अभिसर्वतसोरिति [पा० २.३.२. वा० १.२.] द्वितीया । कीदृशोऽसौ ताम्रः उदयेऽस्तं रक्तः । अरुणः रक्तोऽस्तकाले । उतापि च बभ्रुः पिङ्गवर्णोऽन्यदा । सुमङ्गलः शोभनानि मङ्गलानि यस्य मङ्गलरूपः व्युदये सर्वमङ्गलप्रवर्तनात् ॥६॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥

योऽसावादित्यरूपोऽवसर्पति उदयास्तमयौ कुर्वन्निरन्तरं गच्छति । एनं गोपा उत गोपाला अपि वेदोक्तसंस्कारहीनाः अदृश्रन्पश्यन्ति । उदहार्यः उदकं हरन्ति ता उदहार्यः मन्थौदनेत्यादिना [पा० ६.३.६०.] उदकस्योदादेशः जलहारिण्यो योषितोऽप्येनमदृश्रन्पश्यन्ति । आगोपालाङ्गनादिप्रसिद्ध इत्यर्थः । दृशेर्लुङि इरितो वेति [पा० ३.१.५७.] च्लेरङ् रुगागमश्छान्दसः । कीदृशः नीलग्रीवः विषधारणेन नीला ग्रीवा कण्ठो यस्य अस्तमये नीलकण्ठ-इव लक्ष्यः । विलोहितः विशेषेण रक्तः । स रुद्रो दृष्टः सन्नोऽस्मान्मृडयाति सुखयतु असौ मण्डलवर्ती रुद्र एव तपतीति ज्ञातः सुखं करोत्वित्यर्थः ॥७॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८॥

नीलग्रीवाय नीलकण्ठाय रुद्राय नमोऽस्तु नमस्कारो भवतु । कीदृशाय सहस्राक्षाय सहस्रमक्षीणि यस्य इन्द्रस्वरूपिणे । मीढुषे मिमेक्तीति मीढ्वान् तस्मै मिहि सेचने दाश्वान्साह्वान्मीढ्वाँश्चेति [पा० ६.१.१२.] क्वसन्तो निपातः सेक्त्रे वृष्टिकर्त्रे पर्जन्यरूपायेत्यर्थः तरुणाय वा । अथो अपि चास्य रुद्रस्य ये सत्वानः प्राणिनो भृत्यास्तेभ्योऽहं नमो नमस्कारमकरं करोमि कृञ् कृतौ शप् लङि उत्तमैकवचनम् ॥८॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्च ते हस्तऽइषवः परा ता भगवो वप ॥९॥

हे भगवः भगं षड्विधमैश्वर्यमस्यास्तीति भगवान् मतुवसो रुः सम्बुद्धौ छन्दसीति [पा० ८.३.१.] रुत्वम् ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणेत्युक्तेः हे भगवन्धन्वनः धनुष उभयोरार्त्न्योः द्वयोः कोट्योः स्थितां ज्यां मौर्वीं त्वं प्रमुञ्च दूरीकुरु याश्च ते तव हस्ते इषवः बाणाः ता इषूः परावप पराक्षिप ॥९॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१०॥

कपर्दी जटाजूटोऽस्यास्तीति कपर्दी रुद्रस्तस्य धनुः विज्यं मौर्वीरहितमस्तु विगता ज्या यस्य तत् । उतापि बाणवान् बाणा अस्मिन्सन्तीति बाणवान् इषुधिः (5.) विशल्यो विफलोऽस्तु बाणाग्रगतो लोहभागः शल्यम् इषुधिर्निरग्रबाणोऽस्तु । अस्य रुद्रस्य या इषवः ता अनेशन् नश्यन्तु णश अदर्शने नशेरत एवम् अडि वेत्येत्वम् (6.) पुषादित्वाच्चिरड् । अस्य रुद्रस्य निषङ्गधिः निषज्यतऽइति निषङ्गः खड्गः स धीयतेऽस्मिन्निति निषङ्गधिः कोशः स आभुः रिक्तः खड्गरहितोऽस्तु । रुद्र अस्मान्प्रति न्यस्तसर्वशस्त्रोऽस्त्वित्यर्थः ॥१०॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥ ११ ॥

अतिशयेन मीढ्वान्मीढुष्टमः तमौ मत्वर्थे इति [पा° १.४.११.] भसंज्ञायां वसोः सम्प्रसारणम् [पा° ६.४.१३१.] षत्वटुत्वे हे मीढुष्टम सेक्तृतम ववर्षुक ते तव हस्ते या धनुः हेतिः धनूरूपमायुधं (7.) बभूव अस्ति एकं ते-पदं पादपूरणाय । तया धनूरूपया हेत्या विश्वतः सर्वतोऽस्मान्परिभुज परिपालय भुजेर्विकरणव्यत्यये (8.) शप्रत्ययः । कीदृश्या तया अयक्ष्मया नास्ति यक्ष्मा रोगो यस्यास्तया निरुपद्रवया दृढया अनुपद्रवकारिण्या वा ॥ ११ ॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे ऽअस्मन्निधेहि तम् ॥ १२ ॥

हे रुद्र ते तव धन्वनो हेतिः धनुःसम्बन्धि आयुधं विश्वतः सर्वतोऽस्मान्परिवृणक्तु त्यजतु मा कृत्वित्यर्थः वृङी वर्जने रुधादित्वात् श्नम् अथो अपि च यस्तव इषुधिस्तमस्मत्सकाशात् आरे दूरे निधेहि अस्मत्तो दूरे स्थापय ॥ १२ ॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥

सहस्रमक्षीणि यस्य शतमिषुधयो यस्य हे सहस्राक्ष हे शतेषुधे त्वं नोऽस्मान्प्रति शिवः शान्तः सुमनाः शोभनचित्तश्च भव अनुगृह्णाणेत्यर्थः किं कृत्वा धनुरवतत्य अपज्याकं कृत्वा शल्यानां मुखा मुखानि बाणफलाग्राणि निशीर्य शीर्णानि कृत्वा शॄ हिंसायाम् समासेऽनञ्पूर्वे क्तो त्यप् ऋत इद्धातोः [पा° ७.१.१००.] ॥ १३ ॥

नमस्तेऽआयुधायानाततायै धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥

हे रुद्र ते तवायुधाय नमोऽस्तु बाणाय नतिरस्तु कीदृशाय अनाततायै धनुष्यनारोपिताय । धृष्णवे धर्षणशीलाय धृषिः क्नुप्रत्ययः रिपून्हन्तुं प्रगल्भाय । उ-

तापि च ते तवोभाभ्यां बाहुभ्यां नमः । तव धन्वने धनुषेऽपि नमोऽस्तु तस्यापि विशेषणम् अनाततायाय अवतारितमौर्विकाय ॥ १४ ॥

मा नो महान्तमुत मा नोऽअर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥

हे रुद्र नोऽस्माकं महान्तं वृद्धं गुरुपितृव्यादिकं मा वधीः मा हिंसीः उतापि नोऽस्माकमर्भकं बालं मा वधीः नोऽस्माकमुक्षन्तं सिञ्चन्तं तरुणं मा वधीः उतापि नोऽस्माकमुक्षितं सिक्तं गर्भस्थं च मा वधीः नः पितरं जनकं मा वधीः उतापि नो मातरं जननीं मा वधीः महान्तमित्यनेन सिद्धयोर्मातापित्रोः पुनरादानमादरार्थम् । नोऽस्माकं प्रियाः वल्लभाः तन्वः तनूः शरीराणि पुत्रपौत्ररूपाणि मा रीरिषः मा हिंसीः रिषतिर्हिंसाकर्मा ॥ १५ ॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥

हे रुद्र नोऽस्माकं तोके पुत्रे तनये पौत्रे मा रीरिषः मा हिंसीः न आयुषि जीवने मा हिंसीः नो गोषु धेनुषु मा रीरिषः नोऽश्वेषु तुरगेषु मा रीरिषः विभक्तिव्यत्ययो वा तोकं तनयमायुर्गां अश्वान्मा हिंसीः भाम क्रोधे भामिनः क्रोधयुतानपि नोऽस्माकं वीरान् भृत्यान्मा वधीः । क उपकार इति चेत् हविष्मन्तः हविर्युक्ताः सदमित् सदैव त्वां वयं हवामहे यागायाह्वयामः त्वदेकशरणा वयमिति भावः ॥ १६ ॥

II. नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥ १७ ॥

नमो हिरण्यबाहवऽइत्युत्तरं द्रापे इति [क° ४७.] ऋक्पर्यन्तं सर्वाणि यजूंषि । तत्र नमो हिरण्यबाहवऽइत्यादीनां धनुष्कृद्यश्च वो नम इत्यन्तानां [क° ४६.] चत्वारिंशदधिकद्विशतसंख्याकानां यजुषां तावन्तो रुद्रा देवताः नमो वः

किरिकेभ्य इत्यादिचतुर्णां [कं० ४६.] अग्निवायुसूर्या देवताः रुद्राणां प्रधानभूताः ॥ छन्दांसि तु । चतुरक्षरं दैवी वृहती पञ्चाक्षरं दैवी पङ्क्तिः षडक्षरं यजुर्गायत्री सप्ताक्षरं यजुरुष्णिक् अष्टाक्षरं यजुरनुष्टुप् नवाक्षरं यजुर्बृहती दशाक्षरं यजुःपङ्क्तिः एकादशाक्षरं यजुस्त्रिष्टुप् द्वादशाक्षरं यजुर्जगती चतुर्दशाक्षरं सामोष्णिगेकमेव किरिकेभ्य इति (9.) । एतान्येवात्र छन्दांसि ॥ तद्वृत्तमध्ये के चनोभयतोनमस्काराः । पदद्वयात्पूर्वमेव पदोच्चारणात्पश्चाच्च नमःपदं येषां ते उभयतोनमस्काराः हिरण्यबाहवे इत्यादि श्वपतिभ्यश्च नम इत्यन्ताः [कं० २८.] । ततोऽन्यतरतोनमस्काराः अन्यतरत आदाविव यजुर्द्वयस्य नमस्कारो येषां ते नमो भवायेत्यादि [कं० २८.] प्रखिदते चेत्यन्ताः [कं० ४६.] । इषुमद्भ्य इत्यादि [कं० २२.] श्वपतिभ्यश्च इत्यन्ताः [कं० २८.] प्रत्यन्ताः व इति युष्मच्छब्दयोगात् (10.) । इषुकृद्भ्य इति [कं० ४६.] उभयतोनमस्काराः । सभाभ्य इति [कं० २४.] ज्ञातसंज्ञा रुद्राः । उभयतोनमस्काराः शान्ततमाः अन्यतरतोनमस्कारा घोरतराः ॥ तेषां (11.) मन्त्राणामर्थ उच्यते एकैकस्यां कण्डिकायामष्टावष्टौ रुद्राः (12.) । हिरण्यमाभरणत्वेन बाह्वोर्यस्य स हिरण्यबाहुः स च सेनां नयतीति सेनानीः तस्मै रुद्राय नमः ॥ दिशां पतये पालकाय रुद्राय नमः ॥ हरयो हरितवर्णाः केशाः पर्णवृक्षा येषां ते हरिकेशास्तेभ्यो वृक्षेभ्यो वृक्षवृक्षरुद्रेभ्यो नमः ॥ पशूनां जीवानां पतये पालकाय रुद्राय नमः ॥ शष्पिञ्जराय शष्पं बालतृणं तद्वत्पिञ्जराय पीतरक्तवर्णाय ठिलोपश्छान्दसः । त्विषिर्दीप्तिरस्यास्ति त्विषिमान् संहितायां त्विषिशब्दस्य दीर्घः ईदृशाय रुद्राय नमः ॥ पथीनां (13.) मार्गाणां पालकाय नमः पथिशब्दो मार्गवाची उत्तरदक्षिणतृतीया (14.) मार्गाः श्रुतावुक्ताः ॥ हरिकेशाय नीलवर्णकेशाय जरारहितायोपवीतिने मङ्गलार्थयज्ञोपवीतधारिणे रुद्राय नमः ॥ पुष्टानां गुणपूर्णानां नराणां पतये स्वामिने नमः ॥१७॥

नमो वभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥१८॥

बभ्लुशः कपिलवर्णः यद्वा बिभर्ति रुद्रमिति बभ्लुर्वृषभस्तस्मिन्शेते स बभ्लुशः । विध्यति शत्रूनिति व्याधी तस्मै रुद्राय नमः ॥ अन्नानां पालकाय नमः ॥ भवस्य संसारस्य हेत्वे आयुधाय संसारनिवर्तकाय रुद्राय नमः ॥ जगतां पालकाय रुद्राय नमः ॥ आततेन विस्तृतेन धनुषा सह एति गच्छति आततायी उद्यतायुधस्तस्मै रुद्राय नमः ॥ क्षेत्राणां देहानां पालकाय नमः ॥ न कृन्तीत्यकृन्तिस्तस्मै अकृन्ते (15.) सूताय सारथये तद्रूपाय रुद्राय नमः । सारथिर्न कृन्ति (16.) ॥ वनानां पालकाय नमः ॥ १८ ॥

नमो रोकि॑ताय स्थप॑तये वृ॒क्षाणां॑ पत॑ये॒ नमो॒ नमो॑ भुव॒न्तये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒ नमो॑ मल्लि॑ने॒ वणि॑जाय॒ कक्षा॑णां॒ पत॑ये॒ नमो॒ नम॑ उच्चै॒र्घोषायाक्र॒न्दय॑ते॒ पत्ती॑नां॒ पत॑ये॒ नम॑ः ॥ १९ ॥

रोकितो लोकितवर्णः स्थपतिर्गृहादिकर्ता विश्वकर्मरूपेण तस्मै नमः ॥ वृक्षाणां पालकाय नमः ॥ भुवं तनोतीति भुवन्तिर्भूमण्डलविस्तारकः । वरिवो धनं करोतीति वरिवस्कृत् स एव वारिवस्कृतः स्वार्थेऽण् स्थानभोग्यकराय नमः ॥ ओषधीनां ग्राम्यारण्यानां पालकाय नमः ॥ आलोचनकुशलो मल्ली वणिगिव वाणिजः व्यापारकर्ता तद्रूपाय नमः (17.) ॥ वनगता गुल्मवीरुधादयः कक्षास्तेषां पालकाय नमः ॥ उच्चैर्घोषो ध्वनिर्यस्य स उच्चैर्घोषः आक्रन्दयति रोदयतीत्याक्रन्दयन् युद्धे महाशब्दाय रिपुरोदकाय नमः ॥ पत्तीनां सेनाविशेषाणां पदातीनां वा पालकाय नमः । एको (18.) रथो गजश्चाश्वास्त्रयः पञ्च पदातयः । एष सेनाविशेषोऽयं पत्तिरित्यभिधीयतऽइति व्यासोक्तेः [महाभार° १. २८१. (19.)] ॥ १९ ॥

नम॑ः कृत्स्नायत॒या धाव॑ते स॒त्वनां॑ पत॑ये॒ नमो॒ नम॑ः सहमा॒नाय॑ निव्या॒धिनेऽआव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ नमो॑ निषङ्गि॒णे क॒कुभा॑य॒ स्तेना॑नां॒ पत॑ये॒ नमो॒ नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नम॑ः ॥ २० ॥

कृत्स्नं समग्रमायतं विस्तृतम् अर्थाद्धनुः यस्य स कृत्स्नायतस्तस्य भावः कृत्स्नायतता

तया (20.) आकर्णापूर्णधनुष्टङ्कृत्य धावते युद्धे शीघ्रं गच्छते रुद्राय नमः शीघ्रगतौ सरतेर्धावादिशः तलोपश्छान्दसः (21.) यद्वा कृत्स्नः सर्व आयो लाभो यस्य स कृत्स्नायस्तस्य भावः कृत्स्नायता तया धावते सर्वलाभप्रापकत्वेन धावते यत्र गच्छति तत्र सर्वेष्टं लाभं प्राप्नोतीत्यर्थः ॥ सत्वन्शब्दः प्राणिवाची सत्वानः (22.) सात्विकाः शरणागताः प्राणिनस्तेषां पालकाय नमः ॥ सहते ऽरीनभिभवतीति सहमानः नितरां विध्यति हन्ति शत्रूनिति निव्याधी तस्मै नमः ॥ आ समन्ताद्विध्यन्तीत्याव्याधिन्यः सूरसेनास्तासां पालकाय नमः ॥ निषङ्गः खड्गः सोऽस्यास्तीति निषङ्गी ककुभो महान् तस्मै रुद्राय नमः ककुभ इति महन्नामसु [निघ० ३. ३.] पठितम् ॥ स्तेना गुप्तचोरास्तेषां पालकाय नमः ॥ अपकारबुद्ध्या निरन्तरं चरतीति निचेरुः परित आपणवाटिकादौ हरणेच्छया चरतीति परिचरः तस्मै नमः ॥ अरण्यानां वनानां पतये नमः ॥ रुद्रो लीलया चोरादिरूपं धत्ते यद्वा रुद्रस्य जगदात्मकत्वाच्चोरादयो रुद्रा एव ध्येयाः यद्वा स्तेनादिशरीरे जीवेश्वररूपेण रुद्रो द्विधा तिष्ठति तत्र जीवरूपं स्तेनादिशब्दवाच्यं तदीश्वररुद्ररूपं लक्षयति कथा शाखायं चन्द्रस्य लक्षकम् किं बहुना लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुक्ताः ॥ २० ॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणेऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यो विकृन्तानां पतये नमः ॥ २१ ॥

वञ्चति प्रतारयति वञ्चन् परि सर्वतो वञ्चति परिवञ्चन् तस्मै नमः । स्वामिन आप्तो भूत्वा व्यवहरे कुत्रचित्तदीयं धनमपहृते तद्वञ्चनम् सर्वव्यवहरे धनापहृवः परिवञ्चनम् ॥ गुप्तचोरा द्विविधाः । रात्रौ गृहे खातादिना द्रव्यहर्तारः । स्वीया एवाहर्निशमज्ञाता हर्तारश्च । पूर्वे स्तेनाः उत्तरे स्तायवः तेषां पतये नमः ॥ निषङ्गः खड्गो बाणो वा सोऽस्यास्तीति निषङ्गी इषुर्धिर्बाणाधारोऽस्यास्तीतीषुधिमान् तदुभयरूपाय नमः ॥ तस्कराः प्रकटचोरास्तेषां पतये नमः ॥ सृक इति वज्रनाम [निघ० २. २०.] सृकेण वज्रेण सह यन्ति गच्छन्तीत्येवंशीलाः सृकायिणः अत एव शत्रून्हन्तुमिच्छन्ति जिघांसन्ति जिघांसन्तीति जिघांसन्तः हन्तेः सन्नन्ता-

क्तृप्रत्ययः तेभ्यो रुद्रेभ्यो नमः ॥ क्षेत्रादिषु धान्यापकर्तारो मुष्णन्तस्तेषां पालकाय नमः ॥ असयः खड्गाः सन्ति येषां तेऽसिमन्तः नक्तं रात्रौ चरन्ति ते नक्तंचरन्तः (23.) खड्गं धृत्वा रात्रौ वीथीनिर्गतप्राणिघातकास्तेभ्यो रुद्रेभ्यो नमः ॥ विकृन्तन्ति छिन्दन्ति ते विकृन्ताः छित्वापकृरन्तस्तेषां पतये नमः ॥ २१ ॥

III. नमं उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमं इषुमद्भ्यो धन्वा-यिभ्यश्च वो नमो नमं आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमं आ-यच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥ २२ ॥

उष्णीषं शिरोवेष्टनमस्यास्तीत्युष्णीषी उष्णीषेण शिरः प्रावृत्य ग्रामेऽपकर्तुं प्रवृत्तः गिरौ चरति गिरिचरः अधन्यानां वस्त्राद्यपकर्तुं पर्वतादिविषमस्थानचारी तदुभयरूपाय रुद्राय नमः ॥ कुं भूमिं क्षेत्रगृहादिरूपां लुञ्चन्ति कृन्ति कुलुञ्चाः कुत्सितं लुञ्चन्ति वा तेषां पालकाय नमः ॥ इषवो विद्यन्ते येषां ते इषुमन्तः जनान्भीषयितुं बाणधारिणस्तेभ्यो नमः ॥ धन्वना धनुषा सह यन्ति गच्छन्ति धन्वायिनः हे रुद्रा धनुर्धारिभ्यो वो युष्मभ्यं नमः । चकारो मन्त्रभेदज्ञापनार्थः एवमग्रेऽपि ॥ आतन्वन्त्यारोपयन्ति ज्यां धनुषीत्यातन्वानास्तद्रूपेभ्यो नमः ॥ प्रतिदधते संदधते बाणं धनुषीति संदधानास्तेभ्यो वो युष्मभ्यं नमः ॥ आयच्छन्त्याकर्षन्ति धनूंषि ते आयच्छन्तः तेभ्यो नमः ॥ अस्यन्ति क्षिपन्ति बाणानित्यस्यन्तस्तेभ्यो नमः । असु क्षेपणे दिवादिः ॥ २२ ॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥ २३ ॥

विसृजन्ति विमुञ्चन्ति बाणानरिष्विति विसृजन्तः तेभ्यो नमः ॥ विध्यन्ति ताडयन्ति शत्रूनिति विध्यन्तस्तेभ्यो वो नमः मुक्तस्य बाणस्य लक्ष्ये प्रवेशो वेधः ॥ स्वपन्ति ते स्वपन्तः स्वप्नावस्थामनुभवन्तस्तेभ्यो नमः ॥ जाग्रति ते जाग्रतः जाग्रदवस्थावन्तस्तेभ्यो वो नमः ॥ शेरते ते शयानाः सुषुप्त्यवस्थावन्तस्तेभ्यो नमः ॥

आसते ते आसीना उपविशन्तस्तेभ्यश्च वो नमः ॥ तिष्ठन्ति ते तिष्ठन्तो गतिनिवृत्तास्तेभ्यो नमः ॥ धावन्ति ते धावन्तो वेगवद्गतयस्तेभ्यो वो नमः ॥२३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृंहतीभ्यश्च वो नमः ॥२४॥

अथ ज्ञातसंज्ञा रुद्रा रुद्रलोके सन्ति ते कथ्यन्ते रुद्राद्वैतप्रतिपादनाय अथोऽएवꣳ हैतानि रुद्राणां ज्ञातानीति [१.१.१.११.] श्रुतेः । सभारूपेभ्यो रुद्रेभ्यो नमः सभादिषु रुद्रदृष्टिः कर्तव्येति तात्पर्यम् ॥ सभायाः पतिभ्यो वो नमः ॥ अश्वास्तुरगास्तेभ्यो नमः ॥ अश्वानां पतिभ्यो वो नमः ॥ आ समन्ताद्विध्यन्तीत्याव्याधिन्यो देव्यः सेना वा ताभ्यो नमः ॥ विशेषेण विध्यन्ति विविध्यन्त्यस्ताभ्यो वो नमः ॥ उत्कृष्टा गणा भृत्यसमूहा यासां ता उगणाः उपसर्गात्यलोपः पृषोदरादित्वात् [पा° ६.३.१०९.] व्राह्ण्याया मातरस्ताभ्यो नमः ॥ तृंहन्ति घ्नन्ति तृंहत्यः तृंहि हिंसायां हन्तुं समर्था दुर्गादयस्ताभ्यो वो नमः ॥२४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥२५॥

देवानुचरा भूतविशेषा गणास्तेभ्यो नमः ॥ गणानां पालका गणपतयस्तेभ्यो वो नमः ॥ व्राता नानाजातीयानां संघास्तेभ्यो नमः ॥ व्रातपालका व्रातपतयस्तेभ्यो (24.) वो नमः ॥ गृध्यन्ति वाञ्छन्ति गृत्सा विषयलम्पटाः गृत्सा मेधाविनो वा तेभ्यो नमः ॥ गृत्सपतयस्तत्पालकास्तेभ्यो वो नमः ॥ विकृतं रूपं येषां ते विरूपा नग्नमुण्डजटिलादयस्तेभ्यो नमः ॥ विश्वं सर्वं नानाविधं रूपं येषां ते विश्वरूपास्तुरङ्गवदनकण्ठग्रीवादयस्तेभ्यो वो नमः ॥२५॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽर्भकेभ्यश्च वो नमः ॥२६॥

सेनाङ्गेभ्यो नमः ॥ सेनां नयन्ति ते सेनान्यः सेनापतयस्तद्रूपेभ्यो वो नमः । ह्रस्वश्छान्दसः ॥ रथाः सन्ति येषां ते रथिनः तेभ्यो नमः ॥ नास्ति रथो येषां ते अरथास्तेभ्यो वो नमः ॥ क्षि निवासगत्योः तुदादिः क्षियन्ति निवसन्ति रथेघिति क्षत्तारः (25.) यद्वा क्षिप्रेरणे क्षिपन्ति प्रेरयन्ति सारथीनिति क्षत्तारः रथाधिष्ठातारः नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृमातृजामातृपितृदुहितृ इत्यौणादिकसूत्रेण (26.) तृच्प्रत्ययान्तो निपातः तेभ्यो नमः ॥ संगृह्णन्त्यश्वानिति संग्रहीतारः सारथयः एवुल्तृचाविति [पा° ३.१.१३३.] तृच् । तेभ्यो नमः ॥ महान्तो जातिविद्यादिभिरुत्कृष्टास्तेभ्यो नमः ॥ अर्भकाः प्रमाणादिभिरल्पाः तेभ्यो नमः ॥ २६॥

IV. नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥ २७॥

तक्षाणः शिल्पजातयस्तेभ्यो नमः ॥ रथं कुर्वन्तीति रथकाराः सूत्रधारविशेषास्तेभ्यो वो नमः ॥ कुलालाः कुम्भकारास्तेभ्यो नमः ॥ कर्मारा लोहकारास्तेभ्यो वो नमोऽस्तु ॥ निषादा गिरिचरा मांसाशिनो भिल्लास्तेभ्यो नमः ॥ पुञ्जिष्टाः (27.) पञ्जिपुञ्जघातकाः पुल्कसाद्यस्तेभ्यो वो नमः ॥ शुनो नयन्ति ते श्वन्यः श्वकण्ठवद्धरङ्गुधारकाः श्वगणिनः नयतेर्ङ्स्व आर्षः तेभ्यो नमः ॥ मृगान्कामयन्ते ते मृगयवः इदम्युरिदं कामयमान इति यास्कोक्तेः [निरु° ६.३१.] सुप आत्मनः क्यजिति [पा°-३.१.८.] क्यच् क्यचि चेति [पा° ७.४.३३.] प्राप्तस्येत्वस्य न छन्दस्यपुत्रस्येति [पा° ७.४.३५.] निषेधः । मृगयवो लुब्धकास्तेभ्यो वो नमः ॥ २७॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ २८॥

श्वानः (28.) कुर्कुरास्तद्रूपेभ्यो (29.) नमः ॥ शुना पतयः श्वपतयः श्वपालकास्तेभ्यो वो युष्मभ्यं नमः । श्वपतयः किरातविषस्य रुद्रस्यानुचराः ॥ नम इषुमद्भ्यो धन्वायिभ्य इत्यारभ्य [क° २२.] ये वः-शब्दास्ते पूजावाचका वा (30.) न युष्मदा-

देशाः ॥ इत्युभयतोनमस्कारमन्त्राः समाप्ताः अथ नमस्कारोपक्रमा नाम मन्त्रा उच्यन्ते ॥ भवन्त्युत्पद्यन्ते जन्तवोऽस्मादिति भवस्तस्मै नमः ॥ रुत् दुःखं द्रावयति नाशयति रुद्रस्तस्मै नमः ॥ शृणाति हिनस्ति पापमिति शर्वस्तस्मै नमः ॥ पशून्नश्यान्याति रक्षतीति पशुपतिस्तस्मै नमः ॥ विषभक्षणेन नीला नीलवर्णा ग्रीवा कण्ठैकदेशो यस्य स नीलग्रीवस्तस्मै नमः ॥ शितिः श्वेतः कण्ठो नीलातिरिक्तभागो यस्य शितिकण्ठस्तस्मै नमः । शिती धवलमेचकौ (31.) ॥ २८ ॥

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥ २९ ॥

कपर्दो जटा जूटोऽस्यास्तीति कपर्दी तस्मै नमः । पाशुपतादिवेषेण ॥ चकाराः सर्वे समुच्चयार्था ज्ञेयाः । व्युप्ताः मुण्डिताः केशा यस्य स व्युप्तकेशस्तस्मै नमः । यत्यादिरूपेण मुण्डितत्वम् ॥ सहस्रमक्षीणि यस्य सहस्राक्षस्तस्मै इन्द्ररूपाय नमः ॥ शतं धनूंषि यस्य शतधन्वा धनुषश्चेत्यनङ् [पा° ५. ४. १३२.] तस्मै वज्रधनुर्धारिणे नमः ॥ गिरौ कैलाशे (32.) शेतेऽसौ गिरिशयस्तस्मै नमः ॥ शिपिविष्टाय विष्णुरूपाय विष्णुः शिपिविष्ट इति श्रुतेः यद्वा शिपिषु पशुषु विष्टः प्रविष्टः पशवो वै शिपिरिति श्रुतेः सर्वप्राणिघर्त्तर्यामितया स्थित इत्यर्थः यद्वा यज्ञो वै शिपिः यज्ञेऽधिदेवतात्वेन प्रविष्टः शिपिरादित्यो वा मण्डलाधिष्ठातेत्यर्थः तस्मै नमः शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवतीति यास्कोक्तेः [निरु° ५. ८.] ॥ अतिशयेन मीढान्मेघरूपेण सेक्ता मीढुष्टमः तस्मै नमः ॥ इषवो बाणाः सन्त्यस्येतीषुमान् तस्मै नमः ॥ २९ ॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृधे च नमोऽग्र्याय च प्रथमाय च ॥ ३० ॥

रूपतो नमस्काराः ॥ ह्रस्वोऽल्पशरीरस्तस्मै नमः ॥ वामनः संकुचितावयवस्तस्मै नमः ॥ बृहन्प्रौढाङ्गस्तस्मै नमः ॥ वर्षीयानतिशयेन वृद्धः प्रस्थस्फेत्यादिना [पा° ६. ४. १५७.] वर्षादेशः तस्मै नमः ॥ वृद्धो वयसाधिकस्तस्मै नमः ॥ वर्धन्ते विद्याविनयादिगुणैस्ते वृधः पण्डिताः क्विप् तैः सह वर्तत इति सवृत् तस्मै

नमः ॥ जगतामग्रे भवोऽग्र्यस्तस्मै नमः । अग्र्यात् ॥ सर्वत्र मुख्यः प्रथमस्तस्मै नमः ॥३०॥

नमः आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥

अश्नुते जगद्व्याप्नोतीत्याशुस्तस्मै नमः ॥ अजति गच्छतीत्यजिरो गतिशीलस्तस्मै नमः ॥ शीघ्रे वेगवद्वस्तुनि भवः शीघ्रः । तत्र भव इति [पा° ४.३.५३.] यत्सर्वत्र ॥ शीभृ कत्थने शीभते कत्थते इति शीभ आत्मश्लाघी पचाद्यच् तत्र भवः शीभ्यः शीभो जलप्रवाहो वा शीभः क्षिप्रो वा तत्र भवाय नमः ॥ ऊर्मिषु कल्लोलेषु भव ऊर्म्यः (33.) तस्मै नमः ॥ अवगतः स्वनो यस्मात्तद्वस्वनं स्थिरजलम् यद्वा अव नीचैर्गतादौ स्वनोऽवस्वनस्तत्र भवाय ॥ नद्यां भवो नादेयस्तस्मै नमः । स्त्रीभ्यो ढक् [पा° ४.१.१२०.] ॥ द्वीपे जलात्तर्वर्तिनिर्बलभूमौ भवो द्वीप्यस्तस्मै नमः ॥३१॥

V. नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥३२॥

वयोऽवस्थाविशेषाभिधायकाः षट् नमस्काराः ॥ अत्यन्तं प्रशस्यो ज्येष्ठस्तस्मै नमः । ज्य चेति [पा° ५.३.६१.] प्रशस्यशब्दस्येष्ठनि ज्यादिशः ॥ अत्यन्तं युवाल्पो वा कनिष्ठस्तस्मै नमः युवाल्पयोः कनन्यतरस्यामिति [पा° ५.३.६४.] कनादिशः ॥ पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजस्तस्मै नमः ॥ अपरस्मिन्काले प्रलये कालाग्निरूपेण जातोऽपरजस्तस्मै नमः ॥ मध्ये सृष्टिसंहारान्तर्देवतिर्यगादिरूपेण भवो मध्यमस्तस्मै नमः मध्यान्मः ॥ गल्भ धार्ष्ट्ये गल्भनं गल्भो धार्ष्ट्यम् अपगतो गल्भो यस्मात्सोऽपगल्भोऽप्रगल्भोऽव्युत्पन्नेन्द्रियस्तद्रूपाय नमः । एकगर्भान्तरितोऽपगल्भो वा ॥ जघनं गवादीनां पश्चाद्भागस्तत्र भवो जघन्यस्तस्मै नमः ॥ बुध्ने वृक्षादिमूले भवो बुध्न्यस्तस्मै नमः ॥३२॥

नमः सोम्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ॥३३॥

सोभं गन्धर्वनगरं तत्र भवः सोभ्यः यद्वा उभाभ्यां पुण्यपापाभ्यां सहितः सोभो मनुष्यलोकः । पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकमित्याथर्वणश्रुतिः [प्रश्नोपनिष° २.१.] । तत्र भवः सोभ्यस्तस्मै नमः ॥ प्रतिसरो विवाहोचितं हस्तसूत्रमभिचारो वा तत्र भवः प्रतिसर्यः (34.) तस्मै नमः । आङ्गः (35.) प्रतिसरं हस्तसूत्रे माल्यस्य मण्डने । व्रणशुद्धौ चमूपृष्ठे नियोज्यारक्षकं कर्णे (36.) । मल्लभेदेऽपीति विश्वः ॥ यमे भवो याम्यः पापिनां नरकार्त्तिदाता तस्मै नमः ॥ क्षेमे कुशले भवः क्षेम्यस्तस्मै नमः ॥ श्लोका वैदिकमल्ला यशो वा तत्र भवः श्लोक्यस्तस्मै नमः ॥ अवसानं समाप्तिर्वेदान्तो (37.) वा तत्र भवोऽवसान्यस्तस्मै नमः ॥ उर्वरा सर्वसस्याढ्या भूस्तत्र धान्यरूपेण भव उर्वर्यस्तस्मै नमः ॥ खलो धान्यविवेचनदेशस्तत्र भवः खल्यस्तस्मै नमः । खलः कल्के (38.) भुवि धनि क्रूरे कर्णे ज्ञेयेऽधमे (39.) इत्युक्तेः ॥३३॥

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥३४॥

वने वृक्षादिरूपेण भवो वन्यस्तस्मै नमः । वनं वृक्षौघो जलं वा वनं प्रस्रवणं (40.) गेहे प्रवासेऽम्भसि कानने ॥ कक्षं तृणं वल्ली वा तत्र भवः कक्ष्यस्तस्मै नमः । कक्षो वीरुधि दोर्मूले कक्षे शुष्कवने (41.) तृणे ॥ श्रूयतेऽसौ श्रवः शब्दस्तद्रूपाय नमः ॥ प्रतिश्रवः प्रतिशब्दस्तद्रूपाय नमः ॥ आशुः शीघ्रा सेना यस्य स आशुषेणः तस्मै नमः ॥ आशु शीघ्रो रथो यस्यासावाशुरथस्तस्मै नमः ॥ शूराय युद्धवीराय नमः ॥ अवभिनत्ति रिपून्नीचैर्विदारयतीत्यवभेदी तस्मै नमः ॥३४॥

नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥३५॥

बिल्मं शिरस्त्राणमस्यास्ति बिल्मी तस्मै नमः ॥ पटसूतं कर्पासगर्भं देहरक्षकं कवचं तदस्यास्तीति कवची तस्मै नमः ॥ लोहमयं शरीररक्षकं वर्म तदस्यास्तीति वर्मी तस्मै नमः ॥ गजोपरिस्थो गजाकारः कोष्ठो वरूथः रथगुप्तिर्वा सो

ऽस्यास्ति वद्रूधी तस्मै नमः वद्रूधं तु तनुत्राणे रथगोपनवेश्मनोः ॥ श्रुताय प्रसिद्धाय नमः श्रुता प्रसिद्धा सेना यस्य स श्रुतसेनस्तस्मै ॥ दुन्दुभौ भेर्यां भवो दुन्दुभ्यस्तस्मै । दुन्दुभिस्तु भेर्यां दितिसुते विषे ॥ आक्रन्यते ताड्यतेऽनेनेत्याक्रननं वाद्यसाधनं दण्डादि तत्र भव आक्रनन्यस्तस्मै ॥३५॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥३६॥

धृष्णोतीत्येवंशीलो धृष्णुः प्रगल्भः तस्मै नमः ॥ प्रमृशति विचारयति प्रमृशः पण्डितस्तस्मै नमः इगुपधेति [पा° ३.१.१३५.] कः ॥ निषङ्गिणे खड्गयुताय नमः ॥ इषुधिमते तूणयुताय नमः ॥ तीक्ष्णा असक्ता इषवो बाणा यस्य सः तीक्ष्णेषुस्तस्मै नमः ॥ आयुधान्यन्यान्यपि सन्ति आयुधो तस्मै नमः ॥ शोभनमायुधं त्रिशूलं यस्य स स्वायुधस्तस्मै नमः ॥ शोभनं धनुः पिनाकं यस्य स सुधन्वा तस्मै ॥३६॥

VI. नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च ॥३७॥

स्रुतिः क्षुद्रः प्रवाहः क्षुद्रमार्गो वा तत्र भवः स्रुत्यस्तस्मै नमः ॥ पन्था रथाश्वादियोग्यो मार्गस्तत्र भवः पथ्यस्तस्मै नमः ॥ कुत्सितमटति ज्ञानो यत्रेति काटो विषममार्गस्तत्र भवः काट्यस्तस्मै नमः । काटः कुल्याप्रदेशो वा ॥ नीचैः पतन्त्यापो यत्रेति नीपो गिर्यधोभागः ऋक्पूरब्धूःपथामिति [पा° ५.४.७४.] अप्रत्ययः द्यन्तरुपसर्गेभ्योऽप ईदिति [पा° ६.३.९७.] अप्शब्दस्येकारः तत्र भवो नीप्यस्तस्मै नमः ॥ कुल्या कृत्रिमा सरित्तत्र भवः कुल्यः कुल्येषु देहेषु वार्तयामिन्द्रेण भवः कुल्यस्तस्मै । कुलं देहेऽन्वये गणे ॥ सरसि भवः सरस्यस्तस्मै नमः ॥ नद्यां भवो नाद्यस्तस्मै नदीजलरूपाय नमः ॥ वैशन्तो (42.) ऽल्पसरस्तत्र भवो वैशन्तस्तस्मै नमः ॥३७॥

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥३८॥

कूपे भवः कूप्यस्तस्मै ॥ अवटो गर्तस्तत्र भवोऽवट्यस्तस्मै नमः ॥ इन्धी दीप्तौ विशेषेण इध्रं वीध्रं निर्मलं शरद्भं तत्र भवो वीध्र्यः यद्वा विगत इध्रो दीप्तिर्यस्मात्स वीध्रो घनागमस्तत्र (42.) भवाय नमः ॥ आतपे भव आतप्यस्तस्मै ॥ मेघे भवो मेघ्यस्तस्मै ॥ विद्युति भवो विद्युत्यस्तस्मै ॥ वर्षे वृष्यां भवो वर्ष्यस्तस्मै ॥ अवर्षे वृष्टिप्रतिबन्धे भवोऽवर्ष्यस्तस्मै नमः ॥ ३८ ॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥ ३९ ॥

वाति भवो वात्यस्तस्मै ॥ रिष्यन्ते नश्यन्ति भूतान्यत्रेति रेष्मा प्रलयकालः अन्येभ्योऽपि दृश्यन्तऽइति [पा° ३. २. ७५.] मनिन् तत्र भवो रेष्म्यः प्रलयेऽपि विद्यमानायेत्यर्थः ॥ वास्तुनि गृहभुवि भवो वास्तव्यस्तस्मै वेश्मभूर्वास्तुरस्त्रियाम् ॥ वास्तुं गृहभुवं पाति वास्तुपस्तस्मै ॥ उमया सहितः सोमस्तस्मै ॥ रुत् दुःखं द्रावयति रुद्रो दुःखनाशकस्तस्मै ॥ ताम्रो रक्तवर्णः उदयद्रविरूपेण तस्मै ॥ अरुण ईषद्रक्त उदयोत्तरकालीनार्करूपेण ॥ ३९ ॥

नमः शंगवे च पशुपतये च नम उग्राय च भीमाय च नमोग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥ ४० ॥

शं सुखं गमयति प्रापयति शंगुः शं सुखरूपा गावो वाचो वेदरूपा यस्येति वा तस्मै ॥ पशूनां प्राणिनां पतिः पालकस्तस्मै ॥ उग्र ऊर्णायुधः शत्रून्हन्तुं तस्मै ॥ भीमः शत्रुभयोत्पादकः ॥ अग्रे पुरो वर्तमानो हन्तीत्यग्रेवधस्तस्मै ॥ दूरे वर्तमानो हन्तीति दूरेवधस्तस्मै ॥ हन्तीति हन्ता तस्मै लोके यो हन्ति तद्रूपेण रुद्र एव हन्तीत्यर्थः ॥ अतिशयेन हन्ता हनीयान् तस्मै तुरिष्ठेमेयःस्विति [पा° ६. ५. १५४.] तृचो लोपः प्रलये सर्वहन्तेत्यर्थः ॥ हरयो हरिताः केशाः पत्ररूपा येषां तेभ्यो वृक्षेभ्यः कल्पतरुरूपेभ्यो नमः ॥ तारयति संसारमिति तारस्तस्मै ॥ ४० ॥

VII. नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥४१॥

शं सुखं भवत्यस्मादिति शम्भवः यद्वा शं सुखरूपश्चासौ भवः संसाररूपश्च मुक्तिरूपो भवरूपश्च तस्मै नमः ॥ मयः सुखं भवत्यस्मान्मयोभवः संसारसुखप्रदस्तस्मै ॥ शं लौकिकसुखं करोति शंकरस्तस्मै ॥ मयो मोक्षसुखं करोति मयस्करस्तस्मै । स्रक्चन्दनादिरूपेण लौकिकसुखकारित्वम् शास्त्रादिरूपेण ज्ञानप्रदत्वान्मोक्षसुखकारित्वमित्यर्थः । एताभ्यां पदाभ्यां साक्षात्सुखकारित्वम् पूर्वपदाभ्यां तद्द्वारा कारयितृत्वमिति विवेकः ॥ शिवः कल्याणरूपो निष्पापस्तस्मै ॥ शिवतरोऽत्यन्तं शिवो भक्तानपि निष्पापान्करोति तस्मै नमः ॥ अस्यां कण्डिकायां षड्जनूंषि पूर्वस्यां दशोक्तिः ॥४१॥

VIII. नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥४२॥

पारे संसाराब्धेः परतीरे जीवन्मुक्तरूपेण भवः पार्यस्तस्मै ॥ अवारे अर्वाक्तीरे संसारमध्ये संसारित्वेन भवोऽवार्यस्तस्मै । पारावारे परार्वाची तीरे पात्रं यदत्तरमिति कोषः ॥ प्रकर्षेण मन्त्रजपादिना पापतरणहेतुः प्रतरणस्तस्मै ॥ उत्कृष्टेन तत्त्वज्ञानेन संसारोत्तरणहेतुरुत्तरणस्तस्मै ॥ तीर्थे प्रयागादौ भवस्तीर्थ्यस्तस्मै ॥ कूल्ये तटे भवः कूल्यस्तस्मै ॥ शष्पं बालतृणं गङ्गातीरोत्पन्नं कुशाङ्कुरादि तत्र भवः शष्प्यस्तस्मै ॥ फेने डिण्डिरे भवः फेन्यस्तस्मै ॥४२॥

नमः सिकत्याय च प्रवाह्याय च नमः किंशिलायं च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमः इरिण्याय च प्रपथ्याय च ॥४३॥

सिकतासु भवः सिकत्यस्तस्मै ॥ प्रवाहे स्रोतसि भवः प्रवाह्यस्तस्मै ॥ कुत्सिताः क्षुद्राः शिलाः शर्कारूपाः पाषाणा यत्र प्रदेशे स किंशिलस्तद्रूपाय नमः ॥ क्षियन्ति निवसन्त्यापो यत्र स क्षयणः स्थिरजलप्रदेशस्तस्मै ॥ कपर्दो जटाजूटोऽस्यास्तीति कपर्दी तस्मै ॥ पुरोऽग्रे तिष्ठति पुलस्तिः यस्य तवं छान्दसं रस्य लवं च

यद्वा पूर्षु शरीरेषु अस्तिः सत्ता यस्य स पुलस्तिः सर्वान्तर्यामी तस्मै नमः (43.) ॥ इरिणमूषरं वितृणदेशस्तत्र भव इरिण्यः तस्मै ॥ प्रकृष्टः पन्थाः प्रपन्थो वक्रसेवितो मार्गस्तत्र भवः प्रपथ्यस्तस्मै ॥४३॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृद्याय च निवेष्याय च नमः काट्याय च गह्वरेष्ठाय च ॥४४॥

व्रजे गोसमूहे भवो व्रज्यः तस्मै गोष्ठाधनिवहा (44.) व्रजाः ॥ गावस्तिष्ठन्ति यत्रेति तद्गोष्ठं तत्र भवो गोष्ठ्यस्तस्मै ॥ तल्पं शय्या तत्र भवस्तल्प्यस्तस्मै ॥ गेहे भवो गेह्यस्तस्मै ॥ हृदये भवो हृद्यो जीवस्तस्मै ॥ निविश्य आवर्तो नीहारजलं वा तत्र भवो निवेष्यस्तस्मै ॥ कुत्सितमटन्ति गच्छन्ति जना यत्र स काटो दुर्गारण्यदेशः काटः कूपो वा तत्र भवः काट्यस्तस्मै ॥ गह्वरे विषमे गिरिगुहादौ गम्भीरे जले वा तिष्ठति गह्वरेष्ठस्तस्मै ॥४४॥

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रज्स्याय च नमो लोप्याय चोल्प्याय च नम ऊर्व्याय च सूर्व्याय च ॥४५॥

शुष्के काष्ठादौ भवः शुष्क्यस्तस्मै ॥ हरिते आर्द्रे काष्ठादौ भवः हरित्यस्तस्मै ॥ पांसुषु धूलिषु भवः पांसव्यस्तस्मै । ओर्गुणः ॥ रजसि गुणे परागे वा भवो रज्स्यस्तस्मै । रजो रेणुपरागयोः स्त्रीपुष्पे गुणभेदे च ॥ लुप्यते नश्यति गमनादि यत्रेति लोपोऽगम्यप्रदेशस्तत्र भवो लोप्यस्तस्मै । लोपः संहारो वा ॥ उल्पा (45.) वल्वजादितृणविशेषास्तत्र भव उल्प्यस्तस्मै (46.) उल्पस्तु गुल्मिनीतृणभेदयोः ॥ ऊर्व्यां भूमौ भव ऊर्व्यः तस्मै दीर्घ आर्षः ऊर्वो वडवानलो वा ॥ शोभन ऊर्वः कल्यानलस्तत्र (47.) भवः सूर्व्यः तस्मै ॥४५॥

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो वमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥४६॥

तद्रूणां पत्रद्रूपाय नमः ॥ शदॢ शातने शदनं शदः शातनम् यद्वा पर्णानि शीर्यन्ते शात्यन्ते पक्वानि पतन्ति यत्र स पर्णशदः पतितपर्णास्थितिदेशस्तद्रूपाय नमः ॥ गुरी उद्यमे तुदादिभ्यः शः उद्गुरते उद्यमं करोति उद्गुरमाण उद्यमी तस्मै ॥ अभिहन्ति शत्रूनित्यभिघ्नन् तस्मै ॥ आ समन्तात्खिद्यते दैन्यं करोत्यभक्तानामित्याखिदन् तस्मै ॥ प्रकर्षेण खिद्यति पापिन इति प्रखिदन् तस्मै ॥ इषून्वाणान्कुर्वन्ति ते इषुकृतस्तेभ्यो रुद्रेभ्यो नमः ॥ धनूंषि चापानि कुर्वन्ति ते धनुष्कृतः तेभ्यो वो युष्मभ्यं नमः युष्मदादेशयोगात्प्रत्यक्षा एते रुद्राः ॥ ॥ तिस्रोऽशीतयो रुद्राणां समाम्नाताः । एवं चत्वारिंशदधिकशतद्वयमन्ते रुद्राय सर्वात्मत्वमुक्तम् ॥ ॥ अथ रुद्रेषु प्रधानभूतानामग्निवायुसूर्याणां सम्बन्धीनि चत्वारि यजूंष्युच्यन्ते । चतुर्णामादौ नमःशब्दाच्चत्वार्येव यजूंषि आद्यं चतुर्दशाक्षरं त्रीणि सप्ताक्षराणि तानि व्याकृतिसंज्ञानि ॥ नमो व इति । देवानां हृदयेभ्यो रुद्राणां हृदयवत्प्रधानभूतेभ्योऽग्निवायुसूर्येभ्यो वो युष्मभ्यं नमः । देवानां हृदयेभ्य इत्यग्निर्वायुरादित्य एतानि ह तानि देवानाꣳ हृदयानीति [१.१.१.२३.] श्रुतेः । हृदयानीव हृदयानि यथाङ्गानां हृदयं प्रधानमेवमेते रुद्राणां प्रधाना इत्यर्थः । कीदृशेभ्यस्तेभ्यः किरिकेभ्यो वृष्यादिद्वारा जगत्कुर्वन्ति किरिकास्तेभ्यः एते हीदꣳ सर्वं कुर्वन्तीति [१.१.१.२३.] श्रुतेः ॥ विचिन्वन्ति पृथक्कुर्वन्ति धर्मिष्ठं पापिष्ठं चेति विचिन्वत्कास्तेभ्योऽग्न्यादिभ्यो नमः ॥ विविधं क्षिण्वन्ति हिंसन्ति पापमिति विक्षिणत्कास्तेभ्योऽग्न्यादिभ्यो नमः ॥ आ समन्तान्निर्हता निर्गताः सर्गादौ (48.) लोकेभ्य इत्यानिर्हतास्तेभ्यो रुद्रावतारिभ्योऽग्निवायुसूर्येभ्यो नमः हृत्तिर्गत्यर्थः । तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतीꣳष्यजायन्ताग्नेर्योऽयं पवते सूर्य इति ॥४६॥

IX. द्रापेऽन्धसस्पते दरिद्र नीललोहित ।

आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किं चनाममत् ॥४७॥

सप्त ऋच एकरुद्रदेवत्याः । आद्योपरिष्टाद्बृहती सप्ताष्टदशद्वादशार्णपादा । हे द्रापे द्रा कुत्सायां द्रापयति कांत्सितां गतिं पापिनः प्रापयतीति द्रापिः । हे अन्धसः सोमस्य पते पालक अन्धसस्पतयऽइति सोमस्य पतयऽइत्येतदिति [१.१.१.२४.]

श्रुतेः । हे दरिद्र निष्परिग्रह अद्वितीयत्वादिति भावः । हे नीललोहित कण्ठे नीलोऽन्यत्र लोहितः हे शिव नोऽस्माकमासां प्रजानां पुत्रादीनामिषां पशूनां गवादीनां वं मा भैः भयं मा कुरु बहुलं छन्दसीति [पा° २.४.७३.] शपो लुक् । मा रोक् रुजो भङ्गे प्रजापशूनां भङ्गं मा कार्षीः कर्मणि षष्ठी । च पुनर्नोऽस्माकं किं चन किमपि द्विपदचतुष्पदादिकं मो मा आममत् रुग्णं मा कार्षीत् यद्वा रुग्णं मास्तु । अम् रोगे लङि धातोरमागम आर्षः ॥४७॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम् ॥४८॥

कुत्सदृष्टा जगती । वयमिमा अस्मदीया मतीः बुद्धीः रुद्राय शंकराय प्रभरामहे प्रकरामहे समर्पयामो रुद्रं स्मराम इत्यर्थः कृञ्होर्भः । कीदृशाय तवसे महते बलवते वा उभयत्र तवःशब्दः पठितः [निघ° २,९.३,३.(49.)] । कपर्दिने जटिलाय । क्षयद्वीराय क्षयन्तो निवसन्तो वीराः शूरा यत्र स क्षयद्वीरस्तस्मै शूरयुतायेत्यर्थः क्षयन्तो नश्यन्तो वीरा रिपवो यस्मादिति वा । द्विपदे पुत्राद्ये चतुष्पदे गवादिपशवे सप्तमी वा द्विपदचतुष्पदविषये यथा येन प्रकारेण शं सुखमसत् भवति अस्मिन् ग्रामे अस्मिन्वासस्थाने विश्वं सर्वं प्राणिजातं पुष्टं समृद्धमनातुरं निरुपद्रवं स्वस्थं च यथा असत् स्यात् तथा मतिं रुद्रे समर्पयाम इत्यर्थः ॥४८॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥

अनुष्टुप् । या ते तव ईदृशी तनूः शरीरं तया तन्वा नोऽस्मान्जीवसे जीवितुं मृड सुखय । कीदृशी शिवा शान्ता अघोरा । विश्वाहा विश्वानि च तान्यहानि च विश्वाहा कालाधनोरत्यन्तसंयोगेऽइति [पा° २.३.५.] द्वितीया तस्या आकारः सर्वेष्वहःसु सर्वदा शिवा कल्याणकारिणी भेषजी औषधरूपा संसारव्याधिनिवर्तिका । रुतस्य शारीरव्याधेः शिवा समीचीना भेषजी निवर्तिकौषधिः ॥४९॥

परि॑ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दु॒र्मति॑र॒घायोः॑ ।
अव॑ स्थि॒रा म॑घव॒द्भ्यस्तनुष्व मीढ्वस्तो॒काय॒ तन॑याय मृड ॥५०॥

त्रिष्टुप् । रुद्रस्य शिवस्य हेतिरायुधं नोऽस्मान्परिवृणक्तु परितो वर्जयतु अस्मान्मा हन्त्वित्यर्थः । त्वेषस्य क्रुद्धस्य अघायोः द्रोग्धुर्दुर्मतिर्दुष्टमतिर्द्रोहबुद्धिश्चास्मान्परिवृणक्तु । त्वेषति क्रोधेन ज्वलति त्वेषस्तस्य पचाद्यच् । अघं पापं परस्येहति अघायुः सुप आत्मनः क्यङित्यत्र [पा॰ ३. १. ८.] परेच्छायामपि वाच्यमिति क्यच् । क्यचि चेतीत्वे [पा॰ ७. ४. ३३.] प्राप्ते अश्वाघस्यादिति [पा॰ ७. ४. ३७.] आकारः क्याच्छन्दसीति [पा॰ ३. २. १७०.] उप्रत्ययः । मेहति सिञ्चतीति मीढ्वान् हे मीढ्वः कामाभिवर्षुक स्थिरा स्थिराणि दृढानि धनूंषि त्वमवतनुष्व अवतारय ज्यारहितानि कुरु । किमर्थं मघवद्भ्यः मघमिति धननाम मघं प्रविर्लक्षणं धनं विद्यते येषां ते मघवन्तो यजमानास्तदर्थं यजमानानां भयनिवृत्तये इत्यर्थः । किं च तोकाय पुत्राय तनयाय पौत्राय च मृड पुत्रं पौत्रं च सुखय कर्मणि चतुर्थी ॥५०॥

मीढ्ष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥५१॥

इयमेकोना यवमध्या त्रिष्टुप् तृतीय एकादशार्णः चत्वारोऽन्येऽष्टार्णाः पञ्चपादा । अतिशयेन मीढ्वान्मीढ्ष्टमः । अत्यन्तं शिवः शिवतमः । हे मीढ्ष्टम अतिशयेन कामसेक्तः हे शिवतम अत्यन्तं कल्याणकर्तः । नोऽस्मान्प्रति शिवः शान्तः सुमनाः हृष्टचित्तश्च भव । किं च परमे दूरस्थे उन्नते वा वृक्षे वटादौ आयुधं त्रिशूलादिकं निधाय संस्थाप्य कृत्तिं चर्म वसानः परिदधानः सन् आचर आगह्न तपश्चरेति वा । आगह्नपि पिनाकं धनुर्बिभ्रत् धारयन्सन् आगहि आगह्न । ज्याशरहीनं धनुर्मात्रं शोभार्थं धारयन्नागहीत्यर्थः ॥५१॥

विकिरिद विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥५२॥

द्वे अनुष्टुभौ । विविधं किरिं घातायुपद्रवं द्रावयति नाशयति विकिरिद्रः हे विकिरिद्र हे विलोहित विगतं लोहितं कल्मषं यस्मात्स विलोहितः हे शुद्धस्वरूप भगवः भगवन् ते तुभ्यं नमोऽस्तु । हे रुद्र ते तव याः सहस्रं हेतयो ऽसंख्यान्यायुधानि ता हेतयोऽस्मदन्यमस्मद्व्यतिरिक्तं निवपन्तु घ्नन्तु ॥५२॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥

हे भववः भग न् षड्गुणैश्वर्यसम्पन्न तव बाह्वोर्हस्तयोः याः सहस्राणि सहस्रशः हेतयः सन्ति तासां हेतीनां मुखा मुखानि शल्यानि पराचीना अस्मत्तः पराङ्मुखानि त्वं कृधि कुरु करोतेः शपि लुपि श्रुशृणुपृकृवृभ्यश्छन्दसीति [पा° ६.४.१०२.] हेर्धिः । कीदृशस्त्वम् ईशानः ईष्टऽइतीशानः जगन्नाथः । सहस्राणि सहस्रसंख्यानि धनुः खड्गः शूलं वर्मेत्यादिभेदेन (50.) सहस्रसंख्यत्वम् । सहस्रं-सहस्रमिति सहस्रशः संख्यैकवचनाच्च वीप्सायामिति [पा° ५.४.४३.] शस्प्रत्ययः धनुरादीनां प्रत्येकं सहस्रसंख्यत्वमित्यर्थः (51.) ॥५३॥

असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥५४॥

बहुरुद्रदेवत्या दशानुष्टुभोऽवतानसंज्ञाः । भूमिस्था रुद्रा उच्यन्ते । असंख्याता असंख्यातानि सहस्राणि अमिता ये रुद्रा भूम्यामधि भूमेरुपरि स्थिताः । तेषां रुद्राणां धन्वानि धनूंषि सहस्रयोजने सहस्रं योजनानि यस्मिंस्तादृशे पथि सहस्रयोजनव्यवहिते मार्गे वयमवतन्मसि अवतन्मः अवतारयामः अपडयानि कृत्वास्मत्तो दूरं क्षिपाम इत्यर्थः ॥५४॥

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषाꣳ स° ॥५५॥

अन्तरिक्षस्था रुद्रा उच्यन्ते अस्मिन्नन्तरिक्षे अधिश्रित्य ये भवा रुद्राः स्थिताः तेषां धन्वान्यवतन्मसीति पूर्ववत् । कीदृशेऽन्तरिक्षे महति विशाले । अर्णवि अर्णांसि जलानि विद्यन्ते यत्र तदर्णवम् मेघाधारत्वात् । अर्णसो लोपश्चेति [पा° ५.२.१०९.२.] वप्रत्ययोऽन्तलोपश्च ॥५५॥

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः । तेषाꣳ सꣳ ॥५६॥

द्युस्था रुद्रा उच्यन्ते ये रुद्रा दिवं द्युलोकमुपश्रिताः स्वर्गस्थास्तेषामिति पूर्ववत् । कीदृशाः नीलग्रीवाः नीला श्यामा ग्रीवा येषां ते । शितिः श्वेतः कण्ठो येषां ते । विषग्रासात्कियान्कण्ठभागः कृष्णः कियान्श्वेत इत्यर्थः ॥५६॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषाꣳ सꣳ ॥५७॥

पातालस्था रुद्रा उच्यन्ते । अधोभागे ये शर्वा रुद्राः क्षमाचराः क्षमायां भुवोऽधोभागे चरन्ति गच्छन्ति ते क्षमाचराः पाताले वर्तमानाः तेषामित्युक्तम् नीलग्रीवाः शितिकण्ठा इति पूर्ववद्विशेषणे ॥५७॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाꣳ सꣳ ॥५८॥

ये रुद्रा वृक्षेषु अश्वत्थादिषु स्थिताः । कीदृशाः शष्पिञ्जराः शष्पं बालतृणं तद्वत्पिञ्जरा हरितवर्णाः । नीलग्रीवा नीला ग्रीवा येषां ते कण्ठे नीलवर्णाः । तथा के चन विलोहिताः विशेषेण रक्तवर्णाः यद्वा विगतं लोहितं रुधिरं येषां ते लोहितपदं मांसादीनामुपलक्षणम् विगतलोहितादिधातवः तेजोमयशरीरा इत्यर्थः । तेषामित्याद्युक्तम् ॥५८॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सꣳ ॥५९॥

ये ईदृशा रुद्रास्तेषां धन्वानीति पूर्ववत् । कीदृशाः भूतानां देवविशेषाणामधिपतयः अन्तर्हितशरीराः सन्तो मनुष्योपद्रवकरा भूतास्तेषां पालकाः । तत्र केचिद्विशिखासः विगता शिखा येषां ते शिखाशब्दः केशोपलक्षकः मुण्डितमुण्डा इत्यर्थः अन्ये कपर्दिनः जटाजूटयुताः ॥५९॥

ये पथां पथिरक्षय ऐलबृदा आयुर्युधः । तेषाꣳ सꣳ ॥६०॥

ये चेदृशा रुद्रास्तेषामित्युक्तम् । कीदृशाः पथां लौकिकवैदिकमार्गाणामधिपतय इति पूर्वऽर्चोऽनुषङ्गः (52.) । तथा पथिरक्षयः पथो मार्गास्तानेवान्यानपि रक्षन्ति पालयन्ति ते पथिरक्षयः । ऐलबृदाः इलानामन्नानां समूह ऐलमन्नसमूहः यद्वा इला पृथ्वी तस्या इदमैलमन्नं तद्बिभ्रति ते ऐलभृतः तऽएव परोऽक्षवृ-

त्या ऐलबृदा उच्यन्ते अन्नैर्जन्तूनां पोषका इत्यर्थः । आयुर्युधः आयुषा जीवनेन युध्यन्ते ते यावज्जीवयुद्धकराः यद्वा आयुर्जीवनं पणीकृत्य युध्यन्ते ते आयुर्युधः ॥ ६० ॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳ सꣳ ॥ ६१ ॥

ये रुद्रास्तीर्थानि प्रयागकाश्यादीनि प्रचरन्ति गच्छन्ति । कीदृशाः सृकाहस्ताः सृकेत्यायुधनाम सृका आयुधानि हस्ते येषां ते । निषङ्गिणः निषङ्गाः खड्गाः विद्यन्ते येषां ते । सृकाहस्तत्वेऽपि निषङ्गित्वोक्तिः खड्गप्राधान्याय ॥ ६१ ॥

ये ऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सꣳ ॥ ६२ ॥

ये रुद्रा अन्नेषु भुज्यमानेषु स्थिताः सन्तो जनान्विविध्यन्ति विशेषेण ताडयन्ति धातुवैषम्यं कृत्वा रोगानुत्पादयन्तीत्यर्थः । तथा पात्रेषु पात्रस्थक्षीरोदकादिषु स्थिताः सन्तः पिबतो क्षीरादिपानं कुर्वतो जनान्विविध्यन्ति अन्नोदकभोक्तारो व्याधिभिः पीडनीया इति तेषामधिकार इति भावः । तेषामिति पूर्ववत् ॥ ६२ ॥

य ऽएतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सꣳ ॥ ६३ ॥

ये रुद्रा एतावन्तः एतत्प्रमाणं येषां ते अतिशयेन बहवो भूयांसः उक्तेभ्यो ऽतिबहवश्च ये रुद्रा दिशो दश वितस्थिरे आश्रिताः दश दिशो व्याप्य स्थिताः तेषां धनूंषि अवतन्म इति पूर्ववत् ॥ ६३ ॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि
तमेषाञ्जम्भे दध्मः ॥ ६४ ॥

कण्डिकात्रयात्मकानि त्रीणि यजूंषि प्रत्यवरोहसंज्ञानि धृतिछन्दस्कानि (53.) बहुरुद्रदेवत्यानि । त्रिलोकस्था रुद्रा उच्यन्ते । दिवि द्युलोके ये रुद्राः वर्तन्ते येषां च रुद्राणां वर्ष वृष्टिरेव इषवः बाणाः आयुधस्थानीया वृष्टिः अतिवृष्ट्यादीतिभिः प्राणिनो घ्नन्ति तेभ्यो रुद्रेभ्यो नमो नमस्कारोऽस्तु ॥ तेभ्यो रुद्रेभ्यो दशसं-

ख्याकाः प्राचीः प्रागभिमुखा अङ्गुलीः कुर्वे इति शेषाः प्राङ्मुखाञ्जलिकरणे प्राच्यो दशाङ्गुलयो भवन्ति । दक्षिणाः दक्षिणाभिमुखाः दशाङ्गुलीः कुर्वे । प्रतीचीः प्रत्यङ्मुखाः दशाङ्गुलीः कुर्वे । उदीचीरुदङ्मुखाः दशाङ्गुलीः कुर्वे । ऊर्ध्वाः उपरि दशाङ्गुलीः कुर्वे । अञ्जलिं बद्ध्वा सर्वदिक्षु नमस्करोमीत्यर्थः ॥ तेभ्यो रुद्रेभ्यो नमोऽस्तु अञ्जलिपूर्वं नतिरस्तु दश वाऽञ्जलेरङ्गुलयो दिशि दिश्येवैभ्य एतदञ्जलिं करोतीति [१.१.१.३१.] श्रुतिः (54.) । ते रुद्रा नोऽस्मानवन्तु रक्षन्तु ते रुद्रा नोऽस्मान्मृडयन्तु सुखयन्तु । किं च ते रुद्रा यं पुरुषं द्विषन्तीति शेषः वयं च यं द्विष्मो यस्य द्वेषं कुर्मः च पुनर्यो नरो नोऽस्मान्द्वेष्टि तं पुरुषमेषां पूर्वोक्तानां रुद्राणां जम्भे दंष्ट्राकराले मुखे दध्मः स्थापयामः अस्मद्विषमस्मद्वेष्यं च नरं रुद्राः पूर्वोक्ता भक्षयन्त्वित्यर्थः अस्मांश्चावन्तु च ॥ ६४ ॥

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ॥ तेभ्यो दश — दध्मः ॥ ६५ ॥

ये अन्तरिक्षे रुद्रा वर्तन्ते तेभ्यो रुद्रेभ्यो नमोऽस्तु । येषां रुद्राणां वात इषवः वायुरायुधस्थानीयः कुवातिनान्नं विनाश्य वातरोगं वोत्पाद्य जनान्घ्नन्ति । तेभ्यो ऽन्तरिक्षस्थेभ्यो वातेभ्यो रुद्रेभ्यो नमोऽस्तु शिष्टं व्याख्यातम् ॥ ६५ ॥

नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ॥ तेभ्यो दश — दध्मः ॥ ६६ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां षोडशोऽध्यायः ॥ १६ ॥

ये पृथिव्यां रुद्रा वर्तन्ते येषामन्नमिषवः अन्नमदनीयं वस्तु आयुधम् अयथान्नभक्षणे कदन्नभक्षणे चौर्ये वा प्रवर्त्य रोगमुत्पाद्य जनान्घ्नन्ति तेभ्यः पृथिवीस्थेभ्योऽन्नायुधेभ्यो रुद्रेभ्यो नमोऽस्तु । तेऽस्मानवन्त्वित्यादि पूर्ववत् ॥ एते प्रत्यवरोहमन्त्राः अथ प्रत्यवरोहान्जुहोतीति [१.१.१.३२.] व्यवहाराय संज्ञाकरणम् ॥ ६६ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । शतरुद्रियहोमोऽयं षोडशोऽध्याय ईरितः ॥ १६ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-६ [हेल] ॥१-६॥ ७ [अस्मद्यो - मृलयाति नः] ॥७॥ ८ [मील्हु-ष्टम]. ९. १०. ११. १२ [मील्हुष्टम]. १३-१६ ॥७-१६॥१६॥ ॥

II. ॥ १७-१९ ॥१-३॥ २० [- कृत्त्वायताय - नमः ककुभाय निषङ्गिणे स्तेनां]. २१ ॥४.५॥२१॥ ॥

III. ॥ २२-२६ ॥१-५॥२६॥ ॥

IV. ॥ २७-२९ [मील्हुष्टमाय]. ३०. ३१ ॥१-५॥३१॥ ॥

V. ॥ ३२-३६ ॥१-५॥३६॥ ॥

VI. ॥ ३७-३९ ॥१-३॥ ४० - ह्नीयसे च ॥४॥ ४० नमो वृक्षेभ्यो - स्ताराय. ४१ [शम्भवे च मयोभवे च] ॥५॥४१॥ ॥

VII. ॥ ४२. ४३ [स्तस्तिनेत्रे] - ४६ ॥१-५॥४६॥ ॥

VIII. ॥ ४७ [भेर्मा] ॥१॥ ४८ ॥२॥ ४९ [शिवञ्ऋतस्य (55.) - मूल -] ॥३॥ ५० [परि णो हेती रुद्रस्य वृज्यात्परि त्वेषस्य दुर्मतिर्महीं गात्। - मूल] ॥४॥ ५१ [मील्हुष्टम] - ६० [पथिरक्षिणे ऐ] - ६३ ॥५-१७॥ ६४ [अस्तु ते नो मृलयतु ते नोऽवतु ते वं -]. ६५. ६६ ॥१८॥६४॥ ॥ अष्टानुवाकेषु चतुःषष्टिः ॥ ॥

इति काण्वशाखायां संहितापाठे सप्तदशोऽध्यायः ॥१७॥

I. a. अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सम्भृतं पयः। तां न इषमूर्जं धत्त मरुतः सꣳरराणाः ॥ b. अश्मंस्ते क्षुत्। c. मयि तऽऊर्क्। d. वं द्विष्मस्तं ते शुगृच्छतु ॥१॥

षोडशेऽध्याये (1.) शतरुद्रियहोम उक्तः सप्तदशे चित्यपरिषेकादिमन्त्रा उच्यन्ते ॥ का° [१८.२.१.] चित्यं परिषिञ्चत्यग्नीद्दक्षिणे निकक्षेऽद्रिं कृत्वाश्मन्नूर्जमित्यद्रेरधि। पक्षस्यापरसंधिः कक्षस्तस्य समीपं निकक्षं दक्षिणपक्षापरसंधिसमीपऽआ-

त्मभागेऽश्मानं निधायोदकुम्भमादायद्विरारभ्य सपत्नपुरुषमग्निं प्रदक्षिणं जलधारया समन्तादग्नीत्सिञ्चतीत्यर्थः ॥ यजुर्मरुद्देवत्यम् आर्षी त्रिष्टुप् । हे मरुतः तां प्रसिद्धामिषमन्नमूर्जं रसं च नोऽस्मभ्यं धत्त दत्त यूयम् । किम्भूता यूयं संराणाः सम्यक् रान्ति ददति ते संराणाः सम्यग्दातारः रा दाने बहुलं छन्दसीति [पा° २. ४. ७६.] ञुक्रोत्यादिभ्यः श्नु द्वित्वं च शानचि परे । कीदृशीमिषमूर्जम् अश्मन् अश्मनि पाषाणि पर्वते विन्ध्यहिमवदादौ शिश्रियाणां श्रयतीति शिश्रियाणा ताम् श्रयतेः शानचि ञुक्रोत्यादित्वाद्द्वित्वम् । तथा ऊर्जं सारभूतां बलहेतुम् । यद्वा पर्वाणि विद्यन्ते यस्मिन्स पर्वतः पर्वमरुद्भ्यां तन्प्रत्ययः (2.) अश्नातीत्यश्मा अन्येभ्योऽपि दृश्यतऽइति [पा° ३. २. ७५.] अश्नातिर्मनिन् अशनवति पर्ववति मेघे ऊर्जं जलं शिश्रियाणामाश्रितां वृष्टिसम्पाद्यामित्यर्थः । तथा अद्भ्यः जलेभ्य ओषधिभ्यो वनादिभ्यो वनस्पतिभ्योऽश्वत्थादिभ्यः सकाशादधिसम्भृतमधिकं (3.) सम्पादितं गोद्वारेण पयो दुग्धं च शिश्रियाणाम् गौरपः पीत्वौषधिवनस्पतीन्भक्षयित्वा पयो दोग्धि । तां द्विरूपां मेघोत्थजलरूपां गोसमुत्थां पयोरूपां चेषमूर्जं दत्तेत्यर्थः मरुतो वै (4.) वर्षस्येशतऽइति [१. १. २. ५.] श्रुतेः ॥ का° [१८. २. २.] अश्मँस्ते ञुदित्यद्भी कुम्भं कृत्वा मयि तऽऊर्गित्यादायैवं द्विरपरम् । सेकान्तेऽश्मनि कुम्भमश्मँस्ते ञुदिति निधाय मयि तऽइति पुनरादाय पनुर्द्विवारं परिषिञ्चेदित्यर्थः ॥ अश्मा देवता दैवी बृहती अश्नातीत्यश्मा । हे अश्मन्सर्वभक्षक अग्ने ते तव ञुत् ञुधा अस्तु बहुरूविषां भोज्यत्वात् ॥ कुम्भमादत्ते । आशीर्देवता दैवी बृहती हे अश्मन् ते तव ऊर्क् सारभागो मयि अस्त्विति शेषः ॥ का° [१८. २. ४.] कुम्भेऽद्रिं कृत्वा दक्षिणास्यां वेदिश्रोणौ प्राङ् तिष्ठन्दक्षिणास्यति यं द्विष्म इति । तं पाषाणं कुम्भे कृत्वा दक्षिणवेदिश्रोणौ पूर्वामुखस्तिष्ठन्दक्षिणास्यां दिशि साश्मानं घटं निरस्यतीत्यर्थः ॥ यजुर्बृहती शुक् देवता । हे अग्ने ते तव शुक् शोकस्तं नरमृछतु गछतु तं कं वयं यं नरं द्विष्मः अस्मद्द्वेषविषयं तव शोको गछतु ॥ १ ॥

इमा मेऽअग्नऽइष्टका धेनवः सन्त्वेका च दश च दश च शतं च शतं च सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च प्रयुतं चार्बुदं च

न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चैता मेऽअग्नेऽइष्टका धेनवः सन्त्व-
मुत्रामुष्मिंल्लोके ॥२॥

का० [१८.२.१.] अनपेक्षमित्योदङ् प्राङ् तिष्ठन्नात्मन उपरि प्रापणान्ते जपतीमा मऽइति । कुम्भनिरसनानन्तरमपश्यन्नेत्य दक्षिणवेदिश्रोणिसमीपे ईशानाभिमुखस्तिष्ठन्नात्मन उपरि हस्तौ प्रसार्य यावत्स्प्रष्टुं शक्नोति तावत्स्पृष्ट्वेमा मऽइति कण्डिकाद्वयं स्वरेण जपतीत्यर्थः ॥ विकृतिरग्निर्देवत्या । हे अग्ने या इष्टकाः पञ्चसु चितिषूपदधितास्ता इमा इष्टकाः मे मह्यं मदर्थं धेनवोऽभिमतफलदोग्ध्र्यः सन्तु त्वत्प्रसादात् अस्मिन् लोके इति शेषः । तासां संख्यामाह एकेत्यादि अत्रैकादिपरार्धपर्यन्तैः शब्दैरुत्तरोत्तरं दशदशगुणिता संख्योच्यते । एका एकत्वसंख्याविशिष्टा सा दशगुणिता दशसंख्यामापद्यते सा दशगुणिता शतं भवति पूर्वसंख्यासहितोत्तरसंख्याग्रहणमाधिक्याय शतं दशगुणितं सहस्रं भवति सहस्रं दशगुणितमयुतं भवति अयुतं दशगुणितं नियुतं भवति नियुतं लक्षम् नियुतं दशगुणितं प्रयुतं भवति प्रयुतं लक्षदशकं प्रयुतग्रहणं कोटिरुपलक्षकम् प्रयुतं दशगुणं कोटिः कोटिर्दशगुण अर्बुदम् अर्बुदं दशगुणं न्यर्बुदम् न्यर्बुदशब्देनाब्जसंख्या ज्ञेया एतेषां ग्रहणमब्जसमुद्रान्तर्वर्तिनीनां खर्वनिखर्वमहापद्मशङ्कुसंज्ञानां संख्यानामुपलक्षकम् तेनाब्जं दशगुणं खर्वं खर्वं दशगुणं निखर्वं निखर्वं दशगुणं महापद्मं महापद्मं दशगुणं शङ्कुः शङ्कुर्दशगुणः समुद्रः समुद्रः दशगुणो मध्यं मध्यं दशगुणमन्तः अन्तः दशगुणः परार्धः । चकारा इतरेतरसमुच्चयार्थाः । एवमेकाग्नष्टादशसंख्यासंज्ञासंमिता इष्टका एता हे अग्ने मे धेनवः सन्त्विति पूर्वोक्तस्य निगमनम् । एतद्धेनुभवनं कुत्रार्थ्यते तदाह अमुत्र अन्यजन्मनि तथामुष्मिन् लोके स्वर्गे सर्वत्र इष्टदाः (5.) सन्त्वित्यर्थः । यद्यपि नियतसंख्येष्टकाश्चीयन्ते तथापि मन्त्रसामर्थ्याद्वर्धमाना एकादिपरार्धान्तसंख्या भवन्तीति भावः ॥२॥

ऋतव स्थ ऋतावृधं ऋतुष्ठा स्थ ऋतावृधः ।
घृतश्चुतो मधुश्चुतो विराजो नाम कामदुघा अक्षीयमाणाः ॥३॥

बृहती पङ्क्तिर्वा अष्टत्रिंशदक्षरत्वाद्विकल्पः । अग्निर्देवत्या इष्टकादेवत्या वा ।

हे इष्टका या यूयमेवंविधाः स्थ भवथ ता मे धेनवः सन्विति पूर्वेण सम्बन्धः । कीदृश्यः ऋतवः वसन्तादिरूपाः । ऋतावृधः ऋतं सत्यं यज्ञं वा वर्धयन्ति ऋतवृधः संहितायां पूर्वपददीर्घः । ऋतुष्ठाः ऋतुषु वसन्तादिषु तिष्ठन्ति तान् । स्थशब्दस्य पुनरुक्तिः पादपूरणा । ऋतावृध इति पुनर्वचनमादरार्थम् । घृतश्युतः (6.) श्युतिर् क्षरणे घृतं श्योतन्ति ता घृतश्युतः घृतस्राविण्यः । मधुश्युतः मधु श्योतन्ति ता मधुस्राविण्यः । नामेति प्रसिद्धौ । विराजः विशेषेण राजन्ते दीप्यन्ते ता विराजः दशलोकम्पृणाभिप्रायमेतत् । कामदुघाः यत्काम्यं तस्यं दोग्ध्र्यः पूरयित्र्यः दुहः कब्घश्चेति [पा° ३.२.७०.] कप् । अक्षीयमाणाः न क्षीयन्ते ताः क्षयरहिताः ॥ ३ ॥

समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावकोऽअस्मभ्यꣳ शिवो भव ॥ ४ ॥

का° [१८.२.१०.] मण्डूकावकावेतसशाखा वेणौ वद्ध्वावकर्षति मल्लकृष्टवत्समुद्रस्य वेति प्रत्यृचम् । मण्डूकशैवलवेतसतरुशाखा वंशे बद्ध्वा तं हस्तेनादायाग्निनेत्रं प्रत्यृचं कर्षति तेनित्यर्थः ॥ आग्नाया दक्षिणश्रोणीरारभ्य दक्षिणांसं यावत्कर्षति ॥ द्वे गायत्र्यावग्निर्देवत्ये अत्र्यो दशकः । हे अग्ने समुद्रस्य समुन्दति क्लिन्नं करोति समुद्रो जलं तस्यावकया शैवालेन त्वा त्वां परिव्ययामसि परितो वेष्टयामः इदन्तो मसि उपरिभागे सर्वत्र विकर्षाम इत्यर्थः । त्वं चास्मभ्यं पावकः शोधकः शिवः शान्तश्च भव ॥ ४ ॥

ह्रिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्यꣳ शिवो भव ॥ ५ ॥

दक्षिणश्रोण्यामुत्तरश्रोण्यन्तं कर्षति । ह्रिमस्य शैत्यस्य जरायुवदुत्पत्तिस्थानीयेन शैवालेन हे अग्ने त्वा त्वां परिव्ययामसि संवरणं कुर्मः त्वमस्मभ्यं पावकः शिवश्चेत्युक्तम् ॥ ५ ॥

उप ह्मन्नुप वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि ।
मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधि ॥ ६ ॥

उत्तरश्रोणेरुत्तरांसपर्यन्तं कर्षति । जगती त्रिष्टुब्वा चतुश्चत्वारिंशदक्षरत्वात्त्रिष्टु-

वेव नदीषु आ सा इममिति व्यूहद्वयेन ब्रूना जगती भवति । हे अग्ने त्वम् इमा पृथिवी सप्तम्या लुक् इमनि पृथिव्यामुपावतर आगहू । तथा वेतसे वञ्जुलशाखायामुपावतर नदीषु आ आ-उपसर्ग अध्यर्धे नदीधधि अवकासु उपावतर नदीशब्देन लक्षणयावका उच्यन्ते तत्प्रभवत्वात् । मण्डूक्यवकावेतसशाखाः कर्षणार्थं वेणौ बद्धाः सन्ति तदयं मन्त्रो वदति । कस्मात्त्वमस्माभिः प्रार्थ्यसे इत्यत आह हे अग्ने त्वमपां पित्तं तेजोऽसि यो यस्यावयवः स तं न हिनस्ति तद्धर्मा च भवति । एवमग्निं सम्बोध्य मण्डूकीमाह हे मण्डूकि मण्डूको भेकस्तस्य स्त्री मण्डूकी तत्सम्बुद्धौ हे मण्डूकि ताभिः पूर्वोक्ताभिरद्भिः सह आगहि आगहू शपि लोपे सलोपः । यासामग्निः पित्तं यत्र त्वमुत्पन्ना या त्वमग्नेः शान्त्यै इतस्ततो नीयसे सा त्वमिमं यज्ञमस्माभिः क्रियमाणं चयनलक्षणं पावकवर्णमग्निसमानतेजसं शिवं फलप्रदत्वेन शान्तं च कृधि कुरु ॥ ६ ॥

अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्यास्ते अस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥ ७ ॥

उत्तरांसादक्षिणांसं कृषति । आग्नेयी बृहती । इदं चित्याग्निस्थानं मण्डूक्यवकावेतसलक्षणं वा अपां-न्ययनम् नितरामीयते प्राप्यते येन तन्न्ययनम् उदकप्राप्तिसाधनम् यागाद्वारा ह्यापः प्राप्यन्ते अपां बाहुल्यात्समुद्रस्य निवेशनम् निविशन्त्यस्मिन्निति निवेशनं गृहस्थानीयम् तद्रूप हे अग्ने ते तव हेतयो ज्वाला अस्मत्सकाशादन्यान् अस्मद्विरोधिनः पुरुषान् तपन्तु क्लेशयन्तु अस्मभ्यमस्मदर्थं पावकः शोधकः शिवः शान्तश्च भव ॥ ७ ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥ ८ ॥

का॰ [१८. २. ११.] पक्षपुच्छानि चाभ्यात्मममे पावक रोचिषेति । पक्षपुच्छानि प्रात्तादारभ्याभ्यात्ममात्मसंमुखं संधिपर्यन्तं कर्षति प्रत्यृचमग्ने इति दक्षिणं पक्षं स न इति पुच्छं पावकयेत्युत्तरं पक्षमित्यर्थः ॥ आग्नेयी गायत्री वसूपदृष्टा । हे अग्ने हे पावक शोधक हे देव रोचिषा रोचनेन ज्वालासमूहेनाहवनीयात्मना स्थित इति शेषः । मन्द्रया मदनीयया जिह्वया होतृवाग्रूपेणावस्थित इति शेषः । दे-

वानावह्नि आवह यह्नि यज्ञ च द्वावग्नेरधिकारौ कौत्समाकवनीयरूपेण कविर्यज्ञ-णं चात एव स्तूयते । वहतेर्यजेश्च लोण्मध्यमैकवचने शपि लुप्ते ऽत्वषत्वादिके कृते वह्नि यक्षीति रूपम् ॥ ८॥

स नः पावक दीदिवोऽग्ने देवाँ२॥ऽइहावह । उप यज्ञꣳ हविश्च नः ॥ १॥

गायत्र्याग्नेयी मेधातिथिदृष्टा हे पावक पावयितः हे दीदिवः दिदेवेति दीदि-वान् तत्सम्बुद्धौ हे दीदिवः दीप्तिमन् दिवु क्रीडादिषु क्वसुप्रत्ययः द्वित्वम् तुज्ञादी-नामिति [पा° ६. १. ७.] अभ्यासदीर्घः लोपो व्योर्वलीति [पा° ६. १. ६६.] वलोपः । हे अग्ने देवानिह नोऽस्माकं यज्ञे आवह आनय यज्ञमुप यज्ञसमीपे नोऽस्माकं हविश्च देवानावह प्रापय ॥ १॥

पावकया यश्चितयन्त्या कृपा क्षामन्रुरुचेऽउषसो न भानुना ।

तूर्वन्न यामन्नेतशस्य नू रणेऽआ यो घृणे न ततृषाणोऽअजरः ॥ १०॥

जगती भरद्वाजदृष्टा । योऽग्निः क्षामन् क्षामणि पृथिव्यां रुरुचे रोचते शोभते । कया कृपा कृपू सामर्थ्ये कल्पनं कृपू क्विप् तया कल्पनया सामर्थ्येन दीप्त्या वा । क्षामिति पृथिवीनाम [निघ° १. १.] । किम्भूतया कृपा पावकया पावयतीति पा-वका तया पावयित्र्या । चितयन्त्या चेतयन्त्या यद्वा चितं करोति चितयन्ती तया दृढचयकारिण्या । रोचने दृष्टान्तः उषसो न भानुना न इवार्थे यथा उषसः का-न्त्याः भानुना स्वप्रकाशेन रोचन्ते तद्वत् । किं च यश्चाग्निः घृणिः घृणिरिति दी-प्तिनाम (7.) सुपां सुलुगिति [पा° ७. १. ३९.] विभक्तेः शे-आदेशः घृणिना दीप्त्या आ समन्तात् नु निश्चितं रुरुचेऽत्यनुषङ्गः नकारश्चार्थः । किं कुर्वन् एतशस्य एतीत्येतशः गमनकुशलस्याश्वस्य यामन् यामनि नियामके रणे युद्धे तूर्वन् तूर्व हिंसायां परबलानि हिंसन् न इवार्थे शत्रून्हिंसन्निव रोचते यद्वा यामन्शब्दः कर्मवाचकः नु अनर्थकम् यामनि कर्मणि तूर्वन्न त्वरमाण इव एतशस्याश्वस्य रणे रमणीये पदे आरूढोऽधर्युणा । तथा ततृषाणः तृष्यतीति ततृषाणः ऋतृषा पि-पासायाम् बहुलं छन्दसीति [पा° २. ४. ७६.] श्लादित्वाच्छानचि श्नुद्वित्वे पूर्णाकृतिं पि-पासुः । अजरः जरारहितः । य ईदृशोऽग्निस्तं कृषाम इत्यर्थः ॥ १०॥

II. नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ।

अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥ ११ ॥

का° [१८. ३. ५.] उभयमादाय चित्यारोहणं नमस्तऽइति । हिरण्यशकलसहितं स्रुक्स्थमाज्यम् दधिमधुघृतकुशमुष्टियुता पात्री एतद्वयमादायाधर्युश्चित्याग्निमारोहति ब्रह्मयज्ञमानौ तु अग्नेर्दक्षिणत उपविशत इत्यर्थः ॥ आग्नेयी बृहती लोपमुद्रादृष्टा । हे अग्ने ते तव शोचिषे शोचनहेतवे तेजसे नमोऽस्तु । कीदृशाय शोचिषे हरसे हरति सर्वरसानिति हरः तस्मै हरतेरसुन्प्रत्ययः । ते तव अर्चिषे पदार्थप्रकाशकाय तेजसे नमोऽस्तु । अन्यदुक्तम् ॥ ११ ॥

a. नृषदे वेट् । b. अप्सुषदे वेट् । c. बर्हिषदे वेट् ।

d. वनसदे वेट् । e. स्वर्विदे वेट् ॥ १२ ॥

का° [१८. ३. ६.] स्वयमातृण्णायां पञ्चगृहीतं जुहोति नाभिवद्धिरण्यादर्शनं च नृषदे वेडिति प्रतिमन्त्रम् । आरुह्य स्वयमातृण्णायां पञ्चगृहीतं जुहोति पञ्चमन्त्रैः नाभिवदिति दक्षिणांसश्रोणिद्वयोत्तरांसमध्येषु तत्र हिरण्यं पश्यन्नित्यस्ति तदत्र नेत्यर्थः ॥ पञ्चाग्नेयानि यजूंषि दैवी बृहती दैव्यः पङ्क्तयः अत्या दैवी बृहती । नृषु मनुष्येषु जठराग्निरूपेण तिष्ठतीति नृषत्प्राणस्तस्मै वेट् हविर्दत्तम् वेट्शब्दः स्वाहाकारार्थः प्रत्यक्षं वै तत्यत्स्वाहाकारः प्रत्यक्षꣳ सोत्तरवेदिर्वेट्कारेणेमां परोऽक्षं वै तत्यद्वेट्कार इति [१. २. १. ७.] श्रुतेः तथा नृषदे वेडिति प्राणो वै नृषन्मनुष्या नरस्तत्योऽयं मनुष्येषु प्राणोऽग्निस्तमेतत्प्रीणातीति [१. २. १. ८.] ॥ अप्सु उदकेषु और्वरूपेण सीदतीत्यप्सुषत् । योऽप्स्वग्निस्तमेतत्प्रीणातीति [८.] श्रुतेः ॥ बर्हिषि यज्ञे आहवनीयादिरूपेण सीदतीति बर्हिषत् बर्हिःषु ओषधीषु तिष्ठतीति वा तस्मै वेडस्तु । बर्हिषदे वेडिति य ओषधिष्वग्निस्तमेतत्प्रीणातीति [८.] श्रुतेः ॥ वनं वृक्षसमूहस्तत्र दावाग्निरूपेण सीदतीति वनसत्तस्मै वेट् । वनसदे वेडिति यो वनस्पतिष्वग्निस्तमे° ॥ स्वः स्वर्गे आदित्यरूपेण विद्यते स्वर्वित् विद्यतिः सीदत्यर्थः यद्वा स्वरादित्यं विन्दते स्वर्वित्तस्मै वषडस्तु ॥ १२ ॥

ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।

अक्रुतादो हविषो यज्ञेऽस्मिन्त्स्वयं पिबतु मधुनो घृतस्य ॥ १३ ॥

का° [१८. ३. ७.] समासिक्तान्कुशैः प्रोक्षति सपरिस्तित्कं बार्क्षेन च ये देवा इति । पात्र्यां सिक्तान्दधिमधुघृतान् कुशैः परिस्तित्सहितं सपद्मपुष्पमग्निं मध्ये बर्हिश्च प्रोक्षति ऋग्द्वयेनेत्यर्थः ॥ ङगत्यौ प्राणदेवत्ये । ते प्राणरूपा देवा अस्मिन्यज्ञे चयनलक्षणे मधुनो घृतस्य अर्थाद्यज्ञस्य च हविषो मधुघृतदधिरूपस्य हविषो भागं स्वयं पिबन्तु स्वाहाकारसमर्पणेन विना स्वयमेव स्वीकुर्वन्त्वित्यर्थः । कीदृशास्ते अक्रुतादः अक्रुतमदन्ति ते अक्रुतादः अन्ये देवा अग्निकृतामाकृतिमदन्ति प्राणास्तु साक्षादन्नमदन्ति अत एवाकृतादः । ते के संवत्सरीणं भागमुपासते संवत्सरेण निर्वृत्तः संवत्सरीणः संपरिपूर्वात्ख चेति [पा° ५. १. १२.] संपूर्वादत्सरान्निर्वृत्तार्थे खप्रत्ययः संवत्सरं हि भूत्वाग्निश्चीयते इत्यभिप्रायः । कीदृशाः यज्ञियानां यज्ञार्हाणां देवानां मध्ये यज्ञियाः यज्ञयोग्याः देवाः दीप्यमानाः । द्विविधा देवाः हविर्भुजः इन्द्रवरुणादयः शरीरनिर्वाहकाः प्राणापानादयश्च दीव्यन्तीति व्युत्पत्त्या उभयेऽप्येते यज्ञियाः तत्रेन्द्रादयो यज्ञे पूज्यत्वाद्यज्ञियाः प्राणादयस्तु यज्ञेन पूजकत्वाद्यज्ञियाः ॥ १३ ॥

ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरएतारोऽस्य ।

येभ्यो नऽऋते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ॥ १४ ॥

ये देवाः प्राणा देवेषिन्द्रादिषु अधिष्ठातृत्वेन देवत्वमायन् प्राप्ताः इन्द्रादीनामपि प्राणा देवाः । ये अस्य ब्रह्मणः जीवस्य पुरएतारः पुरोऽग्रे यन्तीति पुरएतारः इण् गतावित्यस्मात् एवुल्तृचाविति [पा° ३. १. १३३.] तृच्प्रत्ययः प्राणा हि प्राणिनां पुरःसराः अयमग्निर्ब्रह्म तस्यैते पुरएतार इति [१. २. १. १५.] श्रुतेः प्राणैर्विना चीयमानोऽग्निर्निर्वोढुं न शक्यते । किं च येभ्य ऋते यान्प्राणान्विना किं चन धाम किमपि शरीरं न पवते पवङ् गतौ न चेष्टते । इत्थम्भूता ये प्राणा देवास्ते पुनः क्वासते तत्राह न तऽइति ते प्राणरूपा देवा न दिवः षष्ठ्यौ सप्तम्यर्थे दिवि स्वर्गे न सन्ति पृथिव्याः पृथिव्यां भूमावपि न नैव ते दिवि न पृथिव्यां यदेव प्राणभृत्तस्मिँस्ते इति [१. २. १. १५.] श्रुतेः यद्वा दिवः प्रदेशेषु न पृथिव्याः

प्रदेशेषु न । किं तर्हि स्रुषु अधि स्रु प्रस्रवणे स्रुवन्ति क्षरन्ति स्रूनि स्रोतांसि चक्षुरादीनि प्राणायतनानि तेषु अधिश्रित्य वर्तन्ते तेषूपलभ्यन्ते तेषां स विशिष्टः प्रदेशः ॥ १४ ॥

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्यास्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥ १५ ॥

का° [१८.३.८.] प्राणदा इत्यवरोहति । प्रोक्षणानन्तरमग्नेरवतरतीत्यर्थः । अग्निदेवत्या बृहती पङ्क्तिर्वा अष्टत्रिंशदक्षरत्वाद्विकल्पः । हे अग्ने ते तव हेतयो ज्वाला अस्मदन्यान् तपन्तु त्वं चास्माकं पावकः शिवश्च भव । कीदृशस्त्वं प्राणदाः प्राणान्यजमानाय ददातीति प्राणदाः अपानं ददातीत्यपानदाः व्यानं सर्वशरीरसंचारिवायुं ददातीति व्यानदाः वर्चो बलं ददातीति वर्चोदाः वरिवो धनं ददातीति वरिवोदाः ॥ १५ ॥

III. अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनते रयिम् ॥ १६ ॥

का° [१८.३.१२.] पञ्चगृहीतं जुहोत्यग्निस्तिग्मेनेत्यृचा । शालायामागत्य पञ्चगृहीतमाज्यं शालाद्वार्येऽग्नौ जुहोति ॥ अग्नेयी गायत्री भरद्वाजदृष्टा । अग्निः विश्वं सर्वमत्रिणं राक्षसं नियासत् नितरां क्षीणं करोतु यास उपक्षये लेट् इतश्च लोपः परस्मैपदेषिति [पा° ३.४.९७.] इकारलोपः अत्रमदनं भक्षणमस्यास्तीत्यत्री भक्षकस्तम् । केन तिग्मेन शोचिषा तीक्ष्णेन तेजसा तिग्मं तेजतेरुत्साक्कर्मण इति [निर° १०.६.] यास्कः । किं च अग्निर्नोऽस्मभ्यं रयिं धनं वनते ददातु वनतिर्दानार्थः ॥ १६ ॥

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ२ऽआविवेश ॥ १७ ॥

का° [१८.३.१२.] षोडशगृहीतार्धमनुवाकशेषेण । पञ्चगृहीतहोमानन्तरं षोडशगृहीतमाज्यं जुह्वां कृत्वा तस्यार्धमनुवाकशेषेण शालाद्वार्ये एव जुहोति अनुवाकशेषश्च य इमा विश्वेत्यारभ्य विकृत्यो यथासदित्यन्तोऽष्टर्चश्च इत्यर्थः ॥ भुव-

नपुत्रविश्वकर्मदृष्टा विश्वकर्मदेवत्याः षोडश त्रिष्टुभः । प्रजाः संहरन्तं सृजन्तं विश्वकर्माणं पश्यन्नृषिः कथयति । यो विश्वकर्मा इमा इमानि विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि जुह्वत् संहरन्सन् न्यसीदत् निषण्णः स्वयं स्थितवान् । कीदृशः ऋषिः अतीन्द्रियद्रष्टा सर्वज्ञः । होता संहारद्रूपस्य होमस्य कर्ता । नो ऽस्माकं प्राणिनां पिता जनकः प्रलयकाले सर्वलोकान्संहृत्य यः परमेश्वरः स्वयमेक एवासीदित्यर्थः । तथा चोपनिषदः आत्मा वाऽइदमेक एवाग्र आसीन्नान्यत्किं चन मिषत् सदेव सोम्येदमग्रऽआसीदेकमेवाद्वितीयमित्याद्याः । स तादृशः परमेश्वरः आशिषाभिलाषेण बहुः स्यां प्रजायेयेत्येवंरूपेण पुनःसिसृक्षारूपेण द्रविणमिहमानः जगद्रूपं धनमपेक्षमाणः अवरानभिव्यक्तोपाधीनाविवेश जीवरूपेण प्रविष्टः । कीदृशः प्रथमहृत् प्रथममेकमद्वितीयं स्वरूपं हादयतीति प्रथमहृत् हादयतेः क्विपि ह्रस्वः उत्कृष्टं रूपमावृण्वन्सन् प्रविष्टः । इहमान इतीषेरात्मनेपदमार्षम् सोऽकामयत बहुः स्यां प्रजायेय स तपोऽतप्यत स तपस्तप्त्वा इदꣳ सर्वमसृजत यदिदं किं च तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेः ॥ १७॥

किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ १८॥

अथेश्वरो यथा जगत्सृजति तत्प्रश्नोत्तराभ्यामाह । लोके हि घटादि चिकीर्षुः कुलालो गृहादिकं स्थानमधिष्ठाय मृद्रूपेणारम्भकद्रव्येण चक्राद्युपकरणैर्घटादि निष्पादयति ईश्वरस्य तदाक्षिप्यते । स्विदिति वितर्के द्यावाभूमी सृजतो विश्वकर्मणोऽधिष्ठानं किमासीत् अधितिष्ठत्यस्मिन्नित्यधिष्ठानं निवासस्थानम् अयतना निरधिष्ठानाः किमपि न कुर्वन्ति । स्विदिति वितर्के आरम्भणं कतमत् किमासीत् आरभ्यतेऽनेनेत्यारम्भणमुपादानकारणं मृदिव घटानाम् । कथा (8.) क्रिया च किम्प्रकारासीत् निमित्तकारणमपि किमासीदित्यर्थः था हेतौ च छन्दसीति [पा° ५.३.२६.] किमः थाप्रत्ययः दण्डचक्रसलिलसूत्रादिभिर्घटादयो निष्पाद्यन्ते तत्स्थानीयं किमासीत् । यतो यस्मिन्काले विश्वकर्मा भूमिं द्यां स्वर्गं च जनयन्सन्महिना स्वसामर्थ्येन वि और्णोत् सृष्टे द्यावापृथिवी आच्छादितवान् ऊर्णु

आच्छादने लङ् उपसर्गव्यवधानमार्षम् व्यवहिताश्चेति [पा° १.४.८२.] वचनात् । कीदृशः विश्वचक्षाः विश्वं चष्टे स विश्वचक्षाः सर्वद्रष्टा अतीतानागतवर्तमानकालानां युगपद्द्रष्टा अनन्यशक्तिरित्यर्थः ॥ १८ ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ १९ ॥

उत्तरमाह । एकोऽसहायो देवः विश्वकर्मा द्यावाभूमी जनयन्सन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्माधर्माभ्यां संधमति धमतिर्गत्यर्थः संगच्छते संयोगं प्राप्नोति पतत्रैः पतनशीलैः अनित्यैः पञ्चभूतैश्च संगच्छते धर्माधर्मरूपैर्निमित्तैः पञ्चभूतरूपैरुपादानैश्च साधनान्तरं विनैव सर्वं सृजतीत्यर्थः यद्वा धर्माधर्माभ्यां भूतैश्च संधमति संगमयति जीवान् णिजन्तत्वं ज्ञेयम् । कीदृशः विश्वतश्चक्षुः विश्वतः सर्वतश्चक्षूंषि यस्य सः । विश्वतोमुखः विश्वतो मुखानि यस्य । विश्वतोबाहुः विश्वतो बाहवो भुजा यस्य । उतापि च विश्वतः पादा यस्य सः पादस्य लोपोऽहस्त्यादिभ्य इति [पा° ५.४.१३८.] पादस्यात्यलोपः । परमेश्वरस्य सर्वप्राण्यात्मकत्वाच्चक्षुरादीनां यस्य यस्य प्राणिनो ये चक्षुरादयस्ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्र चक्षुरादयः सम्पद्यन्त इत्यर्थः ॥ १९ ॥

किꣳ स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ २० ॥

पुनरपि प्रश्नः । स्विदिति वितर्के तद्वनं किमास बभूव उ अपि च स वृक्ष कः आस यतो वनाद्वृक्षाच्च विश्वकर्मा द्यावापृथिवी निष्टतक्षुः निस्ततक्ष निस्तक्ष्यालंकृतवान् (9.) वचनव्यत्ययः न हि तादृशं वनं वृक्षो वा सम्भवति । लोके हि गृहादिनिर्माणमिह्यन्कस्मिंश्चिद्वने कंचिद्वृक्षं छित्वा तक्षणादिना स्तम्भादिकं करोति इह तन्नास्तीत्यर्थः । किं च हे मनीषिणः विद्वांसः मनसा पर्यालोच्य तत् इत् उ तदपि यूयं पृच्छत तत्किम् भुवनानि धारयन्सन् विश्वकर्मा यदध्यतिष्ठत् यत्स्थानमधिष्ठितवान् तदपि पृच्छत । कुम्भकारादिर्गृहादिकमधिष्ठाय घ-

टादि करोति तदधिष्ठानमपि पृक्त ऊर्णानाभिवदयमात्मारम्भण इति भावः (10.)
॥ २० ॥

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥ २१ ॥

हे विश्वकर्मन् हे स्वधावः स्वधान्नमस्यास्तीति स्वधावान् तत्सम्बुद्धौ हे स्वधावः मतुवसो रुः सम्बुद्धौ छन्दसीति [पा° ८.३.१.] रुः हे हविर्लक्षणान्नवन् ते तव यानि परमाणि उत्कृष्टानि धामानि या यानि अवमा अवमानि कनीयांसि धामानि उतापि च या यानि मध्यमा धामानि इमा इमानि पूर्वोक्तानि त्रिविधानि धामानि सखिभ्यो यजमानेभ्यः शिक्ष देहि ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] संहितायां शिक्षपदस्य दीर्घः । क उपकार इति चेत् हविषि यजमानसम्बन्धिन्युपस्थिते सति तन्वं स्वशरीरं वृधानः वर्धयन्सन् स्वयं यजस्व । वयं यजाम इति कथं वक्तुं शक्यम् मनुष्यः कस्त्वां यष्टुं समर्थोऽत एवं ब्रवीमि स्वयं यजस्व । वर्धतेः शानचि व्यत्ययेन शपो लुक् वृधानः । तन्वमित्यत्र वा छन्दसीति [पा° ६.१.१०६.] पूर्वरूपाभावे यणादेशः ॥ २१ ॥

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥ २२ ॥

हे विश्वकर्मन्हविषा मदीयेन वावृधानः वर्धमानो ज्ञातहर्षः सन् मम यज्ञे पृथिवीं पृथिव्याश्रितानि भूतानि उतापि च द्यां द्युलोकाश्रितानि भूतानि स्वयं यजस्व मदनुग्रहाय । किं च त्वत्प्रसादादन्येऽभितः स्थिताः सपत्नाः शत्रवो मुह्यन्तु मोहं प्राप्नुवन्तु किं च इह यज्ञे मघवा इन्द्रोऽस्माकं सूरिः पण्डित आत्मज्ञानोपदेशकोऽस्तु ॥ २२ ॥

वाचस्पतिं विश्वकं° ॥ २३ ॥ विश्वकर्मन्हविषा व° ॥ २४ ॥

द्वे ऋचौ व्याख्याते [८.४५.४६.] ॥ २३ ॥ २४ ॥

IV. चक्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।

यदेदत्ता अदंदृक्षत पूर्वऽआदिद्द्यावापृथिवीऽअप्रथेताम् ॥ २५ ॥

का॰ [१८. ३. १३.] चक्षुषः पितेत्यपरमनुवाकेन । अष्टऽर्चेन षोडशगृहीतस्यापरमर्धं जुहोतीत्यर्थः ॥ यदा इत् यदैव पूर्वे वसिष्ठादयो मुनयः अत्ताः विभक्तिव्यत्ययः अत्तान् द्यावाभूम्योरन्तप्रदेशानददृक्षत दृष्टीकृतवन्तः दंक्षते द्रूपम् । आत् इत् आत् अनन्तरवाची इदेवार्थे अनन्तरमेव द्यावाभूमिदार्थ्यानन्तरमेव द्यावापृथिवी द्यावापृथिव्यौ अप्रथेतां पृथू अभूताम् । तदा द्यावापृथिवीप्रथनानन्तरं चक्षुषः पिता चक्षुरादीन्द्रियाणां पालको विश्वकर्मा मनसा धीरः सन् हि निश्चितमेने एते द्यावापृथिव्यौ प्रति घृतमुदकमजनदज्जनयत् छन्दस्युभयथेति [पा॰ ३. ४. ११७.] आर्धधातुकत्वाच्छपि णिचो लोपः रोदस्योर्दार्थे वृष्टिं कुरुतऽइत्यर्थः । किं कुर्वन् नम्रमाने नममाने द्यावापृथिव्यौ स्तम्भयन्निति शेषः जगदनुग्रहाय रोदसी स्तम्भयन्नित्यर्थः नमतेः शानचि नुगागमश्छान्दसः ॥ २५ ॥

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऽऋषीन्पर एकमाहुः ॥ २६ ॥

यत्र यस्मिन् लोके सप्तऽऋषीन् सप्त च ते ऋषयश्च सप्तऽऋषयः ऋत्यक इति [पा॰ ६. १. १२८.] संध्यभावः । तान्परः विभक्तेः सुः परेण विश्वकर्मणा सह एकमाहुः एकीभूतान्बुधा वदन्ति । यत्र लोके सप्तऽर्षयो विश्वकर्मणा सहैकत्वं प्राप्ताः तत्र लोके तेषां पुंसामिष्टानि अभिलषितानि वस्तूनि इषा अन्नेन आकृतिरसभूतेन सह संमदन्ति संमोदन्ते सम्यक् मोदयुक्तानि पुष्टानि भवन्ति ते विश्वकर्मलोके इष्टभोगान्प्राप्नुवन्तीत्यर्थः । तेषां केषाम् विश्वकर्मा येषां संदृक् सम्यक् पश्यतीति संदृक् सम्यग्द्रष्टा विश्वकर्मदृष्टाः सुखिनो भवन्त्वित्यर्थः । कीदृशो विश्वकर्मा विमनाः विशिष्टं मनो यस्य स तथा विभूतमनाः सर्वकर्मज्ञ इत्यर्थः । आत् अपि च विहायाः नभोव्यापकः यद्वा विशेषेण जहाति त्यजति विहायाः संहर्ता । धाता धारयिता पोष्टा स्थितिकर्ता । विधाता उत्पादकः । उत अपि परमः सर्वेभ्य उत्कृष्टः विभक्तेराकारः । एवंविधो विश्वकर्मा येषां द्रष्टा ते मुच्यन्ते भक्तानिव पश्यति तस्माद्भक्तिः कार्येत्यर्थः ॥ २६ ॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या ॥ २७॥

यो विश्वकर्मा नोऽस्माकं पिता पालकः जनिता जनयिता उत्पादकः जनिता मन्त्रे इति [पा° ६. ४. ५३.] निपातः । यो विधाता विशेषेण धारकः सेतुः यश्च विश्वा विश्वानि सर्वाणि धामानि स्थानानि भुवनानि भूतजातानि च वेद जानाति । यश्च एकोऽद्वितीय एव सन् देवानां बह्वनां नामधाः नामानि दधाति करोतीति नामधाः नाम च पितेव करोति । तस्मादन्या अन्यानि भुवना भुवनानि भूतजातानि संप्रश्नं सम्यक् प्रश्नो यस्यां क्रियायां यथा तथा तं विश्वकर्माणं यन्ति गच्छन्ति प्रलयकाले एकत्वं प्राप्नुवन्ति । यद्वा संप्रश्नं सम्यक् प्रष्टुं स्वाधिकारप्रश्नं कर्तुं भुवनानि यं यन्ति स एव स्वाधिकारेषु नियुङ्क्ऽइति भावः ॥ २७॥

तऽआयजन्त द्रविणꣳ समस्माऽऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥ २८॥

ते पूर्वे ऋषयो विश्वकर्मसृष्टा वसिष्ठाद्या अस्मै भूतग्रामाय द्रविणं धनं जलल्लक्षणं समायजन्त सम्यक् आभिमुख्येन ददुः द्रविणं भोगजातं वा यजतिर्दानार्थः । कथं ददुः न भूना न भूम्ना न बाहुल्येन मन्त्रोपश्छान्दसः किं तु युक्त्या कामिवर्षित्वेनेत्यर्थः । कीदृशाः जरितारः स्तोतारः । ते के ये ऋषय इमानि भूतानि समकृण्वन् स्वादेः करोतेर्लङ् ये वसिष्ठादयो तानि सृजन्ति तऽएव उदकदानेन जीवयन्तीत्यर्थः । कीदृशाः असूर्ते असुभिः सप्तदशावयवैर्लिङ्गशरीरैरीरिता असूर्ताः असुपूर्वस्य ईर् गतावित्यस्य छान्दस इडभावो निष्ठायाम् ईकारस्य पूर्वसवर्णदीर्घः जस एकारः । तथा रजसि अन्तरिक्षलोके निषत्ते निषत्ताः निषण्णाः स्थिताः जस एकारः लोका रजांस्युच्यन्तऽइति [निरु° ४. १९.] यास्कः । कीदृशे रजसि सूर्ते सुष्ठु ईरिते प्रेरिते विस्तीर्णे सुपूर्वस्य ईरधातोर्निष्ठायां पूर्ववत् । नसत्तनिषत्तेत्यादिना [पा° ८. २. ६१.] निपातः ॥ २८॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।

कꣳ स्विदꣳ गर्भं प्रथमं दध्रꣳ आपो यत्र देवाः समपश्यन्त पूर्वे ॥ २१ ॥

प्रश्नोत्तररूपा मन्त्राः ब्रह्मविषयप्रश्नः । विभक्तिव्यत्ययबाहुल्यमत्र मन्त्रे । यत् अस्ति हृदीति शेषः यदीश्वरतत्त्वं हृत्पुण्डरीके अस्ति तत् दिवा परः द्युलोकादपि दूरे तिष्ठति दिवो (11.) दुर्ज्ञेयत्वात् । परस्शब्दः सान्तो दूरवाची । एना पृथिव्या अस्याः पृथिव्याः परः पृथिव्या अपि दूरे । देवेभिरसुरैः देवेभ्योऽसुरेभ्यश्च परो दूरे दूरत्वं विलक्षणत्वम् सर्वज्ञगद्विलक्षणत्वाद्गुरुशास्त्रविमुखैर्न ज्ञायतऽइत्यर्थः । किं च स्विदिति वितर्के आपः प्रथमं कं गर्भं दध्रे दधिरे अधारयन् धाञो लिटि तङि प्रथमबहुवचनस्य लिटस्तझयोरेशिरेजिति [पा° ३. ४. ८१.] इरेचि (12.) कृते तस्य इरयो रे इति [पा° ६. ४. ७६.] रे-आदेशे तस्य स्थानिवद्भावादातो लोप इति चेत्यालोपे [पा° ६. ४. ६४.] दध्रे इति रूपम् । पूर्वे देवाः प्रथमोत्पन्ना देवाः वसिष्ठाद्यो यत्र गर्भे समपश्यन्त ददृशुः जगदिति शेषः । यदा स्थूलोऽप्ययं जगदाधारो गर्भरूपो न ज्ञायते तदात्यन्तसूक्ष्मं तत्त्वं न ज्ञायतऽइति किमु वक्तव्यमिति भावः ॥ २१ ॥

तमिदꣳ गर्भं प्रथमं दध्रꣳ आपो यत्र देवाः समगच्छन्त विश्वे ।

अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥ ३० ॥

प्रत्युत्तरमाह । आपः प्रथमं तमित् तमेव गर्भं दध्रे दधिरे यत्र कारणभूते गर्भे विश्वे सर्वे देवाः समगच्छन्त संगताः सम्भूय वर्तन्ते । ननु तस्य गर्भस्य को वाधारस्तत्राह । अजस्य जन्मरहितस्य परमेश्वरस्य नाभावधि नाभिस्थानीयस्य स्वरूपमध्ये एकमविभक्तमनन्यभूतं किंचिद्बीजं गर्भरूपमर्पितं स्थापितं यस्मिन्बीजे विश्वानि सर्वाणि भुवनानि भूतजातानि तस्थुः स्थितानि तद्बीजमर्पितम् तथा च स्मृतिः [मनु° १. ८. १.] अप एव ससर्जादौ तासु बीजमथाक्षिपत् (13.) तदण्डमभवद्धैमं सूर्यकोटिसमप्रभमिति (14.) । स एव सर्वाश्रयो न तु तस्याप्यन्यऽआश्रया इति भावः ॥ ३० ॥

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।

नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ ३१ ॥

इदानीमुपदिशति । यो विश्वकर्मा इमा इमानि भूतजातानि जजान उत्पादितवान् तं विश्वकर्माणं हे जीवा यूयं न विदाथ न जानीथ लेटोऽडाटाविति [पा° ३. ४. १४.] आडागमः । ननु देवदत्तोऽहं यज्ञदत्तोऽहमिति वयमात्मानं जानीम इति (15.) चेत् न न क्यङ्मप्रत्ययगम्यं (16.) जीवं रूपं परमेश्वरतत्त्वम् किं तु युष्माकमक्ष्मप्रत्ययगम्यानां (17.) जीवानामन्तरमभ्यन्तरं वास्तवस्वरूपमन्यत् अक्ष्मप्रत्ययादतिरिक्तं सर्वावदानं (18.) वेद्यमीश्वरतत्त्वं बभूव भवति विद्यते । जीवरूपवत्तदपि (19.) कुतो न विद्म इति चेत् (20.) भवन्त ईदृशाः चरन्ति प्रवर्तन्तेऽतो न जानीथ । कीदृशाः नीहारेण प्रावृताः नीहारसदृशेनाज्ञानेनावृतत्वान्न जानीथ यथा नीहारो नात्यन्तमसन् दृष्टेरावरकत्वात् नाप्यत्यन्तं सन् काष्ठाश्मादिवद्बोधयितुमयोग्यत्वात् एवमज्ञानमपि नात्यन्तमसत् ईश्वरतत्त्वावरकत्वात् नापि सत् बोधमात्रनिवर्त्यत्वात् ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः । न केवलं नीहारेण जल्प्या च प्रावृताः जल्पनं जल्पिस्तया देवोऽहं नरोऽहं ममेदं गृहं क्षेत्रमित्याद्यनृतजल्पनेन व्याप्ताश्च । किं च असुतृपः असुषु असून्वा तृप्यन्ति असुतृपः केनापि प्रकारेण प्राणान्भृत्वा तावतैव तृप्यन्ति न तु परमेश्वरतत्त्वं विचारयितुं प्रवर्तन्ते । न केवलमैहिकभोगेन तृप्तिः किं तु उक्थशासः परलोकभोगान्सम्पादयितुं यज्ञेषु उक्थानि शंसन्ति उक्थशासः शस्त्रस्तोतारः शसेः क्विप्यनिदितामिति [पा° ६. ४. २४.] नलोपः संहितायां दीर्घः ऐहिकामुष्मिकभोगप्रवृत्तानामज्ञानमिथ्याज्ञानपराधीनानां भवतां नास्ति तत्त्वज्ञानमित्यर्थः ॥ ३१ ॥

विश्वकर्मा क्यजनिष्ट देव आदिद्गन्धर्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ॥ ३२ ॥

ब्रह्माण्डमध्यगतानामुत्पत्तिरुच्यते । ब्रह्माण्डमध्ये प्रथमं विश्वकर्मा देवतिर्यगादिजगद्वेदकर्ता सत्यलोकवासी चतुर्मुखो देवः अजनिष्ट आदित्यान्तरपुरुषरूपेण ज्ञातः । आत् इत् अनन्तरमेव तदपेक्षया द्वितीयो गन्धर्वः अभवत् उत्पन्नः गां वाचं पृथिवीं वा धरति गन्धर्वोऽग्निः गानाद्वा गन्धर्वः अथोऽएवाङ्गिरेवास्ये

पृथिव्यै पृष्ठं सर्वः कृत्स्नो मन्यमानोऽगायदित्यादिश्रुतेः । पिता पालयिता ओषधीनां जनिता उत्पादकः पर्जन्यः पूर्वोक्तद्वयापेक्षया तृतीयोऽभवत् स पर्जन्य उत्पन्नः सन्नपामाकृतिपरिणामभूतानां गर्भं व्यदधात् धारयति करोति वा । कीदृशं गर्भं पुरुत्रा पुद्गन्बहून् त्रायते रक्षति पुरुत्राः बहूनां रक्षकम् विभक्तीराकारः बहुप्रकारं वा ॥ ॥ वैश्वकर्मणहोमः समाप्तः ॥३२॥

V. आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥३३॥

का° [११.१.१.१०.] आहवनीये प्रणीयमानेऽप्रतिरथस्य द्वादश ब्रुवन्नग्नौ सर्वत्रेके । अग्नौ चयने इध्ममादीप्याहवनीये चित्यां प्रति नीयमाने ब्रह्मप्रतिरथसूक्तस्य द्वादश ऋचो जपन्दक्षिणतोऽनुगच्छतीति सूत्रार्थः ॥ अप्रतिरथदृष्टा इन्द्रदेवत्या द्वादश त्रिष्टुभः । इन्द्रः शतं सेना शतसंख्याकाः शत्रुसेनाः साकं सहैव एकप्रयत्नेनैवाजयत् जयति । कीदृश इन्द्रः आशुः अश्नुते व्याप्नोति आशुः शीघ्रगामी. उणप्रत्ययः । शिशानः शो तनूकरणे बहुलं छन्दसीति [पा° २.४.७६.] श्नुप्रत्ययादिर्वाछानचि द्वित्वम् श्यति वज्रं तीक्ष्णीकरोति शिशानः । वृषभो न वृषभ-इव भीमः भयंकरः । घनाघनः शत्रूणामतिशयेन घातकः हन हनेति वक्ता वा वृष्टिकर्तृमेघरूपो वा कर्षुकाब्दो (21.) घनाघन इत्यभिधानात् चर्षणीनां मनुष्याणां क्षोभणः क्षोभयतीति क्षोभणः क्षोभहेतुः चालकः । संक्रन्दनः सम्यक् क्रन्दनं परभयहेतुर्धनिर्यस्य यद्वा समाक्रातां शत्रूणाम् । अनिमिषः नास्ति निमेषो यस्य सः देववात् यद्वा कदाचिदपि निमेषं न करोति अत्यन्तसावधान इत्यर्थः । एकवीरः एकश्चासौ वीरश्च अन्यनिरपेक्षं (22.) शत्रूनेक एव जेतुं समर्थः ॥३३॥

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥३४॥

युध्यन्ते ते युधः क्विप् पादादावामन्त्रितस्येति (23.) आद्युदात्तः हे युधो नरो योद्धारो मनुष्या इन्द्रेण कृत्वा यूयं तत्परबलं जयत वशीकुरुत वशीकृत्य च त-

त्सहधम् अभिभवत विनाशयतेत्यर्थः । कीदृशेनेन्द्रेण संक्रन्दनेन शब्दकारिणा । अनिमिषेण एकचित्तेन । जिष्णुना जयनशीलेन । युत्कारिण युधं करोतीति युत्कारस्तेन कर्मण्यण् युद्धकारिणा । दुश्यवनेन दुःखेन च्यावयितुं शक्यो दुश्यवनस्तेन अजय्येन । धृष्णुना प्रगल्भेन भीतिरहितेन इषुहस्तेन इषवो हस्ते यस्य तेन वारणाद्यायुधोपेतेन । वृङ्क्ते वर्षतीति वृषा तेन कामानां वर्षुकेण ॥३४॥

स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३५॥

स इन्द्रोऽस्मानवत्विति शेषः । संस्रष्टा (24.) एवुल्तृचाविति [पा° ३.१.१३३.] तृच्प्रत्ययः युद्धाय संसर्गकर्ता । वशी वशयति रिपूनिति वशी यद्वा कान्तः जनप्रियः स्वतन्त्रो वा निगृहीतारिषड्वर्गो वा ईश्वरो वा । गणेन रिपुसमूहेनापि सह युधः युध्यतेऽसौ युधः युद्धकर्ता इगुपधज्ञेति [पा° ३.१.१३५.] कप्रत्ययः । संसृष्टजित् संसृष्टान्युद्धाय संगतान्रिपून्जयति संसृष्टजित् । सोमपाः सोमं पिबतीति यज्ञमानानां यागेषु सोमपानकर्ता । बाहुशर्धी बाह्वोः शर्धो बलमस्यास्ति बाहुशर्धी बाहुबलोपेतः संयोगितानिरपेक्ष (25.) इत्यर्थः शर्ध इति बलनाम [निघ° २.९.] उग्रधन्वा उग्रमुत्कृष्टं धनुर्यस्य सः धनुषश्चेत्यनङादेशः [पा° ५.४.१३१.] प्रतिहिताभिरस्ता स्वेन धनुषा प्रेरिताभिरिषुभिरस्ता क्षेपणो तॄन् आद्युदात्तत्वात् अस्यतीत्येवंशीलः रिपुनाशयितेत्यर्थः सशब्दावृत्तिः पादपूरणार्था ॥३५॥

बृहस्पते परिदीया रथेन रक्षोहामित्रानपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥३६॥

बृहस्पतिरिन्द्रः वाग्वै बृहती तस्या एष पतिः व्याकरणकर्तृत्वादिन्द्रस्य वाक्पतित्वमिन्द्रस्य पुरोहितत्वेन वा बृहस्पतिरिव स्तूयते । हे बृहस्पते त्वं रथेन परिदीय सर्वतो गच्छ दीयतिर्गत्यर्थः गत्वा चास्माकं रथानामस्मदीयस्यन्दनानामविता रक्षक एधि भव । कीदृशस्त्वम् रक्षोहा रक्षांसि हन्तीति रक्षोहा क्विप् रक्षसां हन्ता । अमित्रान् शत्रूनपबाधमानः पीडयन् । सेनाः परकीयाः प्रभञ्जन्

प्रकर्षेण भग्नाः कुर्वन् । युधा युद्धेन प्रमृणो जयन् मृणातिर्हिंसाकर्मा तस्य क्विपि द्वितीयाबहुवचनम् प्रमृणो हिंसकान् जयन् पराभवन् ॥३६॥

बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरोऽअभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥३७॥

हे इन्द्र त्वं जैत्रं जयनशीलं रथमातिष्ठ आरोह । कीदृशस्त्वं बलविज्ञायः बलं परकीयं विशेषेण जानाति बलविज्ञायः कर्मण्यण् आतो युक् चिण्कृतोः [पा० ७.३.३३.] यद्वा बलेन कृत्वा विज्ञायते करणे घञ् । स्थविरः पुरातनः सर्वानुशासकः । प्रवीरः प्रकृष्टो वीरः शूरः । सहस्वान् सहो बलमस्यास्तीति सहस्वान् । वाजोऽस्यास्तीति वाजी अन्नवान् । सहमानः शत्रूनभिभवन् । उग्रः युद्धेषु क्रूरः । अभिवीरः अभितो वीराः शूराः यस्य सः । अभिसत्वा अभितः सत्वानः परिचारिकाः प्राणिनो यस्य सोऽभिसत्वा । सहसो बलाज्जातः सहोजाः न क्ष्यन्यस्माज्जात ईदृग्बलः स्यात् । गां स्तुतिगिरं वेत्ति गोवित् ॥३७॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्मं प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायोऽअनु सꣳरभध्वम् ॥३८॥

हे सजाताः समानं ज्ञातं जन्म येषां ते समानजन्मानः सखायो देवा इममिन्द्रमनु वीरयध्वम् शूर वीर विक्रान्तो अदन्तश्चुरादिः लोट् वीरकर्म कुर्वाणमनुगम्य वीरकर्मणा प्रोत्साहयत । अनु संरभध्वम् संरम्भं वेगं कुर्वाणमनु संरम्भं कुरुत । कीदृशमिन्द्रम् गोत्रभिदं गोत्रमसुरकुलं भिनत्ति गोत्रभित्तम् यद्वा गा अपः त्रायते गोत्रो मेघः तस्य भेत्तारम् । गोविदम् गां वाचं वेत्तीति गोवित् तम् पण्डितम् । वज्रबाहुं वज्रं बाह्वौ यस्य तम् । अज्मं संग्रामं जयन्तम् अज्मेति युद्धनाम [निघ० २.१७.] अजतिर्गत्यर्थस्य । ओजसा बलेन प्रमृणन्तं शत्रून्हिंसन्तम् मृणातिर्हिंसाकर्मा ॥३८॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥३९॥

इन्द्रः युत्सु युद्धेषु अस्माकं सेनाः प्रावतु प्रकर्षेण रक्षतु छन्दसि परेऽपीति [पा° १.४.८१.] उपसर्गस्य क्रियापदात्परप्रयोगः । कीदृश इन्द्रः गोत्राणि असुरकुलानि मेघवृन्दानि वा अभिगाहमानः सर्वतो विलोडयन् । अदयः दयारहितः । वीरः विक्रान्तः । शतमन्युः शतमसंख्यो मन्युः क्रोधो यस्य शतयज्ञो वा । दुश्यवनः अप्रच्याव्यः । पृतनां संग्रामं सहते अभिभवतीति पृतनाषाट् । अयुध्यः योद्धुमशक्यः नास्ति युध्यः प्रतियोधास्येति वा ॥३९॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥४०॥

इन्द्रः बृहस्पतिश्च आसां देवसेनानां नेता प्रणेता भवत्विति शेषः । यज्ञः यज्ञपुरुषो विष्णुर्दक्षिणा दक्षिणत एतु गच्छतु दक्षिणादाच्प्रत्ययः सोमः पुरोऽग्रे एतु । मरुतो गणदेवा अग्रं सेनाग्रभागं यन्तु गच्छन्तु । कीदृशीनां देवसेनानाम् अभिभञ्जतीनां भञ्जो आमर्दने शत्रून्मर्दयन्तीनाम् । तथा जयन्तीनां विजयमानानाम् ॥४०॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥४१॥

वृष्णः कामवर्षितुरिन्द्रस्य राज्ञो वरुणस्यादित्यानां द्वादशानां मरुतां चैषां देवानामुग्रमुत्कृष्टं शर्धो बलं गजतुरगरथपत्त्यात्मकसैन्यं घोषो जितं जितमिति शब्दश्च उदस्थात् उत्थितः । जितं जितमिति वदद्भिरादिसैन्यमुत्थितमित्यर्थः । कीदृशानां देवानां महामनसां महन्मनो येषां ते महामनसस्तेषाम् युद्धे स्थिरचित्तानाम् । तथा भुवनच्यवानां भुवनं लोकं च्यावयन्ति ते भुवनच्यवास्तेषां भुवनच्यावनसमर्थानाम् । जयतां विजयमानानाम् ॥४१॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उदृष्वञ्जय वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥४२॥

हे मघवन्धनवन्निन्द्र आयुधानि उद्धर्षय उद्भूतहर्षाणि कुरु मामकानां मदीया-

नां सत्वनां प्राणिनां मनांसि च उद्धर्षय हर्षयुक्तानि कुरु । हे वृत्रहन् वैरिघातिन् वाजिनामश्वानां वाजिनानि शीघ्रगमनानि उद्धर्षय उत्कृष्टानि कुरु । किं च जयतां विजयमानानां रथानां घोषाः शब्दा उद्यन्तु उद्गच्छन्तु रथाः सशब्दाः प्रसरन्तु ॥४२॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ३ऊँ देवा अवता हवेषु ॥४३॥

ध्वजेषु समृतेषु ऋ गतौ संगतेषु शत्रुध्वजैः संयुक्तेषु सत्सु इन्द्रः अस्माकं रक्षिता भवविति शेषः तदानीमस्माकं या इषवोऽस्मदीयैः प्रयुक्तास्ता जयन्तु परसैन्यानि घ्नन्तु । अस्माकं ये वीराः शूरास्ते उत्तरे परकीयभटेभ्य उत्कृष्टा भवन्तु ऊ अपि च हे देवा हवेषु अस्मान्यूयमवत रक्षत अन्येषामपि दृश्यतेऽइति [पा° ६.३.१३७.] दीर्घः ॥४३॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥४४॥

अप्वा देवता सा व्याधिर्भयं वा यस्मादेतया विद्धोऽपचीयते (26.) तस्मादप्वा अपपूर्वाद्वातेरुत्तभूतण्यर्थात् अन्येषपि दृश्यतेऽइति [पा° ३.२.१०१.] डप्रत्ययः अपशब्दान्त्याकारलोपश्छान्दसः ततष्टाप् अपवाति अपगमयति सुखं प्राणांश्चेत्यप्वा । ऐन्द्र्योऽभिरूपा द्वादश भवन्तीति [१.२.३.६.] श्रुतेरियमपीन्द्रसेनासम्बन्धिनी । हे अप्वे अमीषां शत्रूणां चित्तं चित्तानि प्रतिलोभयन्ती मोहयन्ती अङ्गानि शत्रुगात्राणि गृह्णाना ततः परेहि अङ्गान्यादाय परागच्छ पुनरन्यान्रिपून्गृहीतुमभि शत्रुसंघं प्रेहि प्रगच्छ तेषां हृत्सु हृदयानि शोकैर्धनपुत्रनाशादिनिमित्तैर्निर्दह विभक्तिव्यत्ययः । किं च अमित्राः शत्रवोऽन्धेन तमसा गाढान्धकारेण सचन्तां संगच्छन्तां षच् सम्बन्धे लोट् ॥ ॥ द्वादशेन्द्र्यः समाप्ताः ॥४४॥

अवसृष्टा परापत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्रपद्यस्व मामीषां कं चनोच्छिषः ॥४५॥

इत ऋक्कतुष्टयस्य विनियोगः कात्यायने नोक्तः । इयमिषुदेवत्यानुष्टुप् । हिंसिका शरमयी हेतिः शरव्या ब्रह्मणा मन्त्रेण संशिता तीक्ष्णीकृता ब्रह्मसंशिता तादृशि हे शरव्ये त्वमवसृष्टास्माभिर्मुक्ता सती परापत सहसा परसैन्ये पतिता भव । पतित्वा चामित्रान् शत्रून् गच्छ प्राप्नुहि प्राप्य च प्रपद्यस्व शत्रुशरीरेषु प्रविश प्रविश्य चामीषां शत्रूनां मध्ये कं चन पुरुषं मा ऽहिंसीः अवशिष्टं मा कुरु सर्वानपि जहीत्यर्थः शिष्लृ विशेषणे पुषादीत्यादिना [पा॰ ३.१.५५.] च्लेरङ् ॥४५॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥४६॥

योङ्देवत्यानुष्टुप् योद्धॄन्स्तौति । हे नरोऽस्मदीया योद्धारो यूयं प्रेत परसैन्यं प्रति प्रकर्षेण गच्छत ततो जयत विजयं प्राप्नुत द्व्यचोऽतस्तिङ इति [पा॰ ६.३.१३५.] प्रेतेत्यत्र दीर्घः अन्येषामपि दृश्यतऽइति [पा॰ ६.३.१३७.] जयतेत्यत्र दीर्घः । इन्द्रो वो युष्मभ्यं शर्म जयोत्थं सुखं यच्छतु ददातु दाण दानि पाघेत्यादिना [पा॰ ७.३.७८.] यच्छादेशः । किं च यथा यूयमनाधृष्या असथ केनाप्यतिरस्कार्या भवथ । तथा वो युष्माकं बाहवो भुजदण्डा उग्रा उद्गूर्णायुधाः सन्तु । असथेत्यत्र लेटोऽडाटाविति [पा॰ ३.३.९४.] अडागमः ॥४६॥

असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
तां गूहत तमसापव्रतेन यथामीऽअन्योऽअन्यं न (27.) जानन् ॥४७॥

मरुद्देवत्या त्रिष्टुप् हे मरुतो या प्रसिद्धा असौ परेषां शत्रूणां सेना नोऽस्मानभि आ एति अभ्यागच्छति । कीदृशी ओजसा बलेन स्पर्धमाना स्पर्धां कुर्वाणा तां सेनां तमसा अन्धकारेण यूयं गूहत संवृतां कुरुत । तथा गूहत यथा अमी सैनिका अन्योऽन्यं न जानन् परस्परं न जानीयुस्तथा गूहत । कीदृशेन तमसा अपव्रतेन अपगतं व्रतं कर्म यस्मात्तेन येन व्याप्तानां कर्म नश्यति तादृशेन तमसा गूहतेत्यर्थः ॥४७॥

यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।

तत्र इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वा हा (28.) शर्म यच्छतु ॥४८॥

इन्द्रबृहस्पत्यदितिदेवत्या पङ्क्तिरष्टाक्षरपञ्चपादा । यत्र यस्मिन्युद्धे बाणाः शत्रुप्रयुक्ताः सम्पतन्ति इतश्चेतश्च सम्भूय पतन्ति । तत्र दृष्टान्तः कुमारा विशिखा इव विगता शिखा येषां ते विशिखाः शिखारहिता मुण्डितमुण्डा विकीर्णकवचा वा अतिबालाश्चपलाः सन्तो यथा इतस्ततो गच्छन्ति तद्वत् । तत् तत्र युद्धे इन्द्रः नो ऽस्मभ्यं शर्म विजयोत्थं सुखं यच्छतु ददातु । कीदृश इन्द्रो बृहस्पतिः बृहतां महतां पतिः पालकः विजयोचितमन्त्रज्ञः । अदितिः नास्ति दितिः खण्डनं यस्य अखण्डितशक्तिः । विश्वाहा विश्वान्सर्वान् शत्रून्ना समन्ताद्धन्तीति विश्वाहा (29.) स शर्म यच्छतु इति पुनरुक्तिरादरार्था । यद्वा तत्र इन्द्रः बृहस्पतिरिन्द्रगुरुः अदितिरिन्द्रमाता च विश्वाहा सर्वाण्यहानि सर्वदा शर्म यच्छतु विश्वानि च तान्यहानि च (30.) विश्वाहा विभक्तिराकारः अत्यन्तसंयोगे द्वितीया ॥४८॥

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥४९॥

का° [१३.३.१०.] मर्माणि तऽइति कवचं प्रयच्छति । महाव्रते यागेऽध्वर्युः क्षत्रियाय संनाहं परिधानाय प्रयच्छतीत्यर्थः ॥ सोमवरुणदेवदेवत्या त्रिष्टुप् । हे यजमान ते तव मर्माणि जीवस्थानानि वर्मणा कवचेनाहं छादयामि आवृणोमि । राजा विप्रादीनामधिपः सोमोऽमृतेन नास्ति मृतं मरणं येन तेन मरणनिवारकेणानेन वर्मणा त्वा त्वामनुवस्तामन्वाछादयतु वस आछादनेऽदादिः लोट् । तथा वरुणः ते तव वर्म उरोः पृथोरपि वरीयः उरुतरं प्रथीयः कृणोतु करोतु अत्यन्तमुरु वरीयः ईयसुनि प्रस्थस्फोत्यादिना [पा° ६.४.१५७.] उरोर्वरादेशः । किं च देवाः जयन्तं विजयं प्राप्नुवन्तं त्वा त्वामनुमदन्तु अनुकूला भूत्वा हृष्यन्तु उत्साहयन्तु वा ॥४९॥

VI. उदेनमुत्तरां नयाग्ने घृतेनाहुत ।
रायस्पोषेण समिषा मदेम शतं हिमाः शतमु वर्षाणि जीव्यासम् ॥५०॥

का॰ [१८.३.१४.] आर्द्रौदुम्बरीघृतोपितास्तिस्र उदेनमित्यादधाति प्रत्यृचम् । अशुष्का उदुम्बरत्वत्या रात्रौ घृते स्थिताः (31.) प्रादेशमात्रीस्तिस्रः समिध ऋक्त्रयेण शालाद्वार्यै जुहोति ततोऽग्निप्रणयनमित्यर्थः ॥ तिस्रोऽनुष्टुभः प्रथमाग्नेदेवत्या द्वितीयेन्द्रदेवत्या (32.) तृतीया लिङ्गोक्तदेवता । हे घृतेनाक्त आज्येन सर्वतो ह्रूयमान हे अग्ने एनं यजमानमुत्तरां नय अतिशयेन उत् उत्तराम् तरबन्तादाम्प्रत्ययः । उत्कृष्टत्वमैश्वर्यं प्रापय ऐश्वर्यमेवाह रायस्पोषेण धनसमृद्ध्या संसृज संयोजय प्रजया संततया पुत्रपौत्रादिकया च वङ्कं कृधि भूयांसं कुरु बङ्कुटुम्बं कुर्वित्यर्थः ॥५०॥

इन्द्रेमं प्रतरां नय सजातानामसद्वशी ।
समेनं वर्चसा सृज देवानां भागदा असत् ॥५१॥

हे इन्द्र परमैश्वर्ययुक्त इमं यजमानं प्रतरां नय अतिप्रकर्षः प्रतराम् प्रकृष्टमैश्वर्यं प्रापय । तदेव दर्शयति सजातानां समानजातीयानां वशी असत् वशयति वशी नियमनसमर्थो भवतु । किं च एनं यजमानं वर्चसा संसृज तेजस्विनं कुरु । अयं यजमानो देवानां भागदा असत् भागं ददाति भागदाः यज्ञेषु देवानां भागप्रदाता भवतु ॥५१॥

यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् ।
तस्मै देवा अधिब्रवन्नयं च ब्रह्मणस्पतिः ॥५२॥

वयमृत्विजो यस्य यजमानस्य गृहे हविः कुर्मः पुरोडाशप्रधानं कर्म कुर्मः हे अग्ने तं यजमानं त्वं वर्धय । देवास्तस्मै तं यजमानमधिब्रवन् अधिकं ब्रुवन्तु सर्वेभ्योऽधिकोऽयमिति । अयं यजमानश्च ब्रह्मणो वैदिककर्मणः पतिः पालको भवतु । यद्वा देवा अयं ब्रह्मणस्पतिरग्निश्च इममधिब्रवन् । तस्मै द्वितीयार्थे चतुर्थी ॥५२॥

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥५३॥

का° [१८.३.१८.] त्रिरुक्तायामुच्यमोदु वेति । होत्रा प्रथमायामृचि त्रिः पठितायां सत्यां प्रतिप्रस्थाता उदु वेति मन्त्रेण प्रदीप्तमिध्मं शालाद्वार्यादूर्ध्वमुत्पाटयतीत्यर्थः ॥ व्याख्याता [१२.३१.] ॥५३॥

पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषं यज्ञपतिमाभजन्ती रायस्पोषेऽअधि यज्ञोऽअस्थात् ॥५४॥

का° [१८.३.१८.] चित्यं प्रतिगृह्णन्ति (33.) पञ्च दिश इति । ततो ब्रह्महोत्राध्वर्युप्रतिप्रस्यातृयजमानाः पञ्च दिश इत्याद्यृक्पञ्चकेन (34.) चित्यं प्रति गृह्णन्ति । सर्वेषां मन्त्रपाठ इति कर्कः अध्वर्युरेवेति हरिस्वामिन इत्यर्थः ॥ यज्ञाग्निसाधनवादिन्यः पञ्च ऋचः आद्ये द्वे त्रिष्टुभौ प्रथमा दिग्देवत्या । पञ्च दिशः प्राचीदक्षिणाप्रतीच्युदीचीमध्यारूपा देवीः देव्यो यज्ञमस्मदीयमवन्तु । कीदृश्यो दिशः दैवीः दैव्यः देवानामिन्द्रयमवरुणसोमब्रह्मणां सम्बन्धिन्यो दैव्यः । तथा अपतिमस्मदीयप्रज्ञामान्द्यं (35.) दुर्मतिं दुष्टां मतिं पापविषयां बुद्धिमपबाधमानाः विनाशयन्त्यः । तथा रायस्पोषे धनपुष्टौ यज्ञपतिं यजमानमाभजन्तीः आभजन्त्यः भागिनं कुर्वन्त्यः । किं च यज्ञोऽस्मदीयो रायो धनस्य पोषे पुष्टौ अधि अस्थात् अधिकं तिष्ठतु समृद्धोऽस्तु ॥५४॥

समिद्धेऽअग्नावधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तन्तं घर्मं परिगृह्यायजन्तोर्जा यज्ञमयजन्त देवाः ॥५५॥

अग्नेयी । दीव्यन्ति व्यवहरन्ति ब्रह्मब्रह्मौत्राध्वर्यवादिकर्मभिः प्रचरन्तीति देवा ऋत्विजो यत् यदा तन्तं घर्मं ज्वलितं प्रवर्ग्यं परिगृह्य परितः परीशासाभ्यामादायायजन्त यजन्ते । यदा च ऊर्जा हविर्लक्षणेनान्नेनायजन्त यजन्ते । यदो ग्रहणात्तद्ध्याहारः तदा अग्नौ समिद्धे सति दीप्यमाने सति उक्थपत्रः यज्ञो गृभीतः गृह्यीतः धारितः गृभीत इति धारित इत्येतदिति [१.२.३.१.] श्रुतेः । उक्थानि शस्त्राणि पत्रं वाहनं यस्य स उक्थपत्रः शस्त्रैरेव यज्ञो वाह्यते । कीदृश उक्थपत्रः ईड्यः ईडितुं योग्यः स्तुत्यः । अधिमामहानः (36.) महति पूजयति देवानिति मामहानः महतेर्विकरणव्यत्ययेन शुहोत्यादिभ्यः श्लुः श्लाविति [पा° ६.१.१०.]

द्वित्वम् तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६.१.७.] अभ्यासदीर्घः यद्वा अधिको मामह्यानो यजमानो यत्र यज्ञे यजमानो वै मामह्यान इति [१.२.३.१.] श्रुतेः ॥५५॥

दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमनाः शतपयाः ।
परिगृह्य देवा यज्ञमायन्देवा देवेभ्योऽअधर्यन्तोऽअस्थुः ॥५६॥

बृहती पङ्क्तिर्वाष्टत्रिंशदक्षरत्वात् । अग्निदेवत्या । एवंविधाय अग्नये यज्ञो भवतीति शेषः । कीदृशाय दैव्याय देवानां हितो दैव्यस्तस्मै । धरतीति धर्ता तस्मै यागद्वारा जगतो धारयित्रे । जोषते जोष्टा सेविता तस्मै अस्मद्दत्तहविषः सेवित्रे । कीदृशो यज्ञः देवश्रीः देवान् श्रयति हविर्दानेन सेवते देवश्रीः । श्रीमनाः श्रयते सेवते इन्द्रादीन् श्रीर्यजमानस्तस्मिन्मनोऽनुग्रहरूपं यस्य स श्रीमनाः यद्वा श्रीर्मनसि यस्य यद्वा भक्तेभ्यः श्रियं दातुं मनो यस्य । शतपयाः शतसंख्याकानि पयःप्रभृतीनि हवींषि यस्य सः । देवा ऋत्विज ईदृशं यज्ञाग्निं परिगृह्य यज्ञं प्रति आयन् प्राप्नुवन्ति । किं च देवा दीप्यमाना ऋत्विजो देवेभ्योऽर्थाय अधर्यन्तः सन्तः अस्थुः अधरं कर्तुमिच्छन्तस्तिष्ठन्ति अधरमिच्छति अधर्यति सुप आत्मनः क्यच् क्यङ्धरपूतनस्यर्चि लोप इति [पा° ७.४.३९.] अधरान्तलोपः ॥५६॥

वीतꣳ हविः शमितꣳ शमिता यज्ञधै तुरीयो यज्ञो यत्र हव्यमेति ।
ततो वाका आशिषो नो जुषन्ताम् ॥५७॥

हविर्यज्ञदेवत्या बृहती । यज्ञो यत्र यस्मिन्काले हव्यं होतुं योग्यं हविः एति प्राप्नोति ततो यज्ञादुत्थिता वाका वाक्यानि ऋग्यजुःसामलक्षणानि आशिषोऽभीष्टार्थशंसनानि च नोऽस्मान्जुषन्ताम् सेवन्तां यज्ञफलान्यस्मानालिङ्गन्त्वित्यर्थः । कीदृशं हविः वीतं देवानामिष्टम् इष्टꣳ स्विष्टमित्येतदिति [१.२.३.११.] श्रुतेः । तथा शमिता सुपां सु इति [पा° ७.१.३९.] तृतीयैकवचनस्य सु आदेशः शमित्रा यज्ञधै यष्टुं शमितं संस्कृतम् तुमर्थे से इत्यादिना [पा° ३.४.९.] यजेस्तुमर्थे शधैप्रत्ययः । कीदृशो यज्ञः तुरीयः चतुर्थः आदौ यजुर्जपः ततो होत्रा ऋचां पठनम् ब्रह्मणोऽप्रतिरथजपः एवं च तुरीयो होमः तथा च श्रुति [१.२.३.११.] अध्वर्युः पुरस्ताद्यजूꣳषि जपति होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं जपत्येष

एव तुरीयो यज्ञ इति । यद्वा आदावध्वर्युणाश्रावणम् तत आग्नीध्रेण प्रत्याश्रावणम् यजेति ततोऽध्वर्युप्रैषः ततो होतुर्वषट्कारः इति यज्ञश्चतुर्धा कल्प्यते ॥५७॥

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२॥ऽअजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥५८॥

अग्निदेवत्या त्रिष्टुप् । ज्योतिर्ज्योतीरूपोऽग्निः अजस्रं निरन्तरं प्रत्यहं पुरस्तात्पूर्वस्यां दिशि आहवनीयरूपेण होमार्थमुदयान् उद्गच्छति उत्पूर्वस्य यातिर्लडि प्रथमबहुवचने नो रु-आदेशाभावे (37.) रूपम् वचनव्यत्ययः छन्दसि लुङ्लङ्लिटः इति [पा° ३.४.६.] लङ् । कीदृशोऽग्निः सूर्यरश्मिः सूर्यस्येव रश्मयः किरणा यस्य सः यद्वा सूर्यश्चासौ रश्मिश्च सूर्यरूपस्तद्रश्मिरूपश्चेत्यर्थः । हरिकेशः हरति दारिद्र्यमिति हरि हिरण्यम् हिरण्यवर्णाः केशाः केशस्थानीया ज्वाला यस्य सः । सविता सौति सविता प्राणिनां तत्तद्व्यापारेषु प्रेरकः । तस्येदृशस्याग्नेः प्रसवे आज्ञायां पूषा पोषकः सूर्यः याति उदयास्तमयनद्वारेणाटति कीदृशः पूषा विद्वान् स्वाधिकारमहोरात्रिप्रवर्तनात्मकं जानन् । विश्वा विश्वानि भुवनानि भूतजातानि सम्पश्यन् सर्वान् लोकान्सम्यगवलोकयन् । गोपाः गोपायतीति गोपाः रक्षकः धर्मस्य ॥५८॥

विमान एष दिवो मध्येऽआस्तेऽआपप्रिवान्रोदसीऽअन्तरिक्षम् ।
स विश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥५९॥

का° [१८.३.१९.] आग्नीध्रदेशादक्षिणां पृष्ठ्या सक्तिं (38.) पृच्यमानमुपदधाति विमान इति । अध्वर्युराग्नीध्रगृहादक्षिणदिशि पृष्ठ्या संलग्नं पृश्निं तनुं वृत्तं चित्रवर्णां वा पाषाणं विमान इति ऋग्द्वयेनोपदध्यादित्यर्थः ॥ विश्वावसुदृष्टा आदित्यदेवत्या त्रिष्टुप् आदित्याध्यासेनाश्मा स्तूयते । एषोऽश्मादित्यरूपेण दिवोऽन्तरिक्षस्य मध्ये आस्ते तिष्ठति असौ वाऽआदित्योऽश्मा पृश्निरमुमेवैतदादित्यमुपदधातीति [१.२.३.१४.] श्रुतेः आहवनीयो द्युलोकः गार्हपत्यो भूलोकः तयोर्मध्ये आग्नीध्रमन्तरिक्षस्थानीयं तत्र स्थितत्वाद्दिवो मध्ये आस्ते तथा च श्रुतिः [१.२.३.१४.१५.] अन्तरिणाहवनीयं च गार्हपत्यं चोपदधात्ययं वै लोको गार्हपत्यो द्यौ-

राहवनीय एतं तदिमौ लोकावन्तरेण दधाति तस्मादेष इमौ लोकावन्तरेण तपति ॥ १४ ॥ आग्नीध्रवेलायामन्तरिक्षं वाऽआग्नीध्रमेतं तदन्तरिक्षे दधातीति ॥ कीदृश एषः विमानः विविधं मिमीतेऽस्मिन्निति विमानः जगन्निर्माणसमर्थः । तथा रोदसी द्यावापृथिव्यौ अन्तरिक्षमापप्रिवान् तेजसा सर्वतः पूरितवान् प्रा पूरणे क्वसुप्रत्ययः । स तथा स्तूयमान आदित्यरूपोऽग्मा विश्वाचीः वेदीः घृताचीः स्रुचश्चाभिचष्टे पश्यति यज्ञकर्तॄननुगृह्णीतुं कर्म पश्यतीत्यर्थः । विश्वं कविरञ्चितं स्थापितं यस्यामिति विश्वाची वेदिः घृतमञ्चितं यस्यामिति घृताची स्रुक् तथा च श्रुतिः [१. २.३.१७.] स विश्वाचीरभिचष्टे घृताचीरिति स्रुचश्चैतद्वेदीश्चाहेति । तथा पूर्वमिमं लोकमपरमसुं लोकं च अन्तरा मध्ये स्थितानां जनानां केतुं चित्तं चाभिचष्टे सर्वज्ञनाभिप्रायज्ञ इत्यर्थः । यद्वा विश्वाचीर्विश्वव्यापिनीर्दिशोऽभिचष्टे सर्वतः प्रकाशयति । तथा घृताचीर्घृतप्राप्तिहेतुभूता धेनूश्चाभिचष्टे । तथान्तरा ब्रह्माण्डमध्ये पूर्वमपरं च केतुमुदयास्तमयमध्यवर्तिनं बोधमभिचष्टे ॥ ५९ ॥

उद्ना समुद्रोऽअरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥ ६० ॥

अप्रतिरथदेवत्यादित्यदेवत्या त्रिष्टुप् । य आदित्यः पूर्वस्य पूर्वदिशि स्थितस्य पितुर्द्युलोकस्य योनिं स्थानमाविवेश आविशति द्यौः पितेत्युक्तेः पितुःशब्देन द्युलोकः उदयसमये द्युलोकाज्जायमान उपलभ्यते सूर्य इति द्युलोकपूर्वभागः सूर्यस्य पितृभूत उच्यते । किम्भूतो यः । उद्ना वृष्टिद्वारा सेक्ता । समुद्रः समुनत्ति क्लेदयति समुद्रः उदयकालेऽवश्यायपतनेन क्लेदनकर्ता । अरुणः उदयकाले अरुणवर्णः । सुपर्णः शोभनं पर्ण पतनं गमनं यस्य स सुपर्णः । यश्च दिवो मध्ये निहितोऽवस्थितः । पृश्निर्विचित्रवर्णः नानारश्मिसंकुलः । अश्मा अश्नुते व्याप्नोति नभ इत्यश्मा व्यापकः । एवंविधः सन्विचक्रमे विक्रमते नभः । यश्च विक्रममाणो रजसः रञ्जनस्य लोकत्रयस्य अन्तौ वचनव्यत्ययः अन्तान्पर्यन्तान्पाति रक्षति । यो ह्यन्तान्पाति स मध्यं पात्येवेत्यर्थः ॥ अथाश्मपक्षे व्याख्यानम् । अयं पृश्निर्विचित्रवर्णोऽश्मा पाषाणः पितुः कर्मपालकस्य पूर्वस्य पूर्वदिग्वर्तिन आहवनीयस्य

योनिं कारणभूतमाग्नीध्रमाविवेश प्रविष्टवान् यदाक्ववनीयमुद्वपेदाग्नीध्राडुद्धरेदित्याक्ववनीययोनित्वमाग्नीध्रस्याम्नातमन्यत्र । अयमश्मा दिवो मध्ये आग्नीध्रस्थानीयस्यान्तरिक्षस्य मध्ये निक्तिः स्थापितः सन्रजसो रजनीयस्य जगतः अन्तौ उत्पत्तिप्रलयरूपकोटिद्वयं विचक्रमे पाति रक्षति च परमेश्वररूपेण । कीदृशोऽश्मा उक्षा सेक्ता यागद्वरिणा फलाभिवर्षक इत्यर्थः । समुद्रः बकुफलप्रदत्वात्समुद्रसदृश इत्यर्थः । अरुणः पूर्वमल्ले सूर्यसाम्यात्सूर्यसदृशः । सुपर्णः स्वर्गं प्रत्युड्डयनकेतुत्वात्पक्षिसदृशः ॥ ६० ॥

इन्द्रं विश्वा अवी° ॥ ६१ ॥

का° [१८. ३. २१.] निधायैनमतिक्रामन्तीन्द्रं विश्वा इति । एनं पृश्न्यश्मानं क्वचिदुत्ते देशे स्थापयित्वा सर्वे चयनं प्रति गच्छन्ति इन्द्रं विश्वा इत्याग्नृक्तुत्वेनेत्यर्थः (39.) ॥ व्याख्याता [१२. ५६.] ॥ ६१ ॥

देवह्वर्यज्ञ आ च वक्षत्सुम्नह्वर्यज्ञ आ च वक्षत् ।
यक्षद्ग्निर्दिवो देवाँ२॥ऽआ च वक्षत् ॥ ६२ ॥

विधृतिदृष्टा यज्ञदेवत्यानुष्टुप् देवानाह्वयतीति देवह्वः देवानामाह्वाता यज्ञो देवानावक्षत् आवक्षतु चकारः समुच्चये यजतु च । सुम्नं सुखं धनपुत्रकलत्राद्युत्थमाह्वयति सुम्नह्वः सुखकरो यज्ञो देवानावक्षत् आवक्षतु । अग्निर्दिवश्च देवानावक्षत् आवक्षतु यक्षत् यजतु च । वक्षत् यक्षत् वक्तेर्यजेश्च सिब्बहुलं लेटीति [पा° ३. १. ३४.] सिप्प्रत्ययो लेटोऽडाटावित्यडागमः [पा° ३. ४. ९४.] इतश्चलोप इति [पा° ३. ४. ९७.] तिप इकारलोपः ॥ ६२ ॥

वाजस्य मा प्रसव उद्ग्राभेणोदयभीत् ।
अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ२॥ऽअकः ॥ ६३ ॥

इन्द्रदेवत्यानुष्टुप् वाजस्यान्नस्य प्रसवः प्रसूतिः उत्पत्तिः अनुज्ञा वा उद्ग्राभेण ऋग्यक्षोर्भश्छन्दसि उद्ग्राहेण उद्गृणेन ऊर्ध्वं विगृह्य दीयतऽइत्युद्गृणं दानं तेन मा मामुदयभीत् उदयग्रहीत् उद्गृह्णातु । अध अथ निग्राभेण निग्राहेण नीचैर्यगृणेन

नीचैर्हस्तं कृत्वा भिक्षादिः प्रार्थ्यते याचिष्णुतया अत्राभविन वा इन्द्रो मे मम स-पत्नान् शत्रूनधरानधमान् तिरस्कृतानकः करोतु मां दातारं करोतु शत्रून्भिक्षूत्क-रोवित्यर्थः । करोतिर्लङि वकुलं छन्दसीति [पा° २. ४. ७३.] शपि लुप्ते गुणे ति-पि लुप्ते अक इति रूपम् ॥ ६३ ॥

उद्नाभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥ ६४ ॥

इन्द्राग्निदेवत्यानुष्टुप् । देवा उद्नाभमुद्नाह्वमस्मद्विषयमुत्कर्षं निग्राभं निग्राह्वं शत्रुविषयमपकर्षं ब्रह्म त्रयीलक्षणं यज्ञविषयमवीवृधन् वर्धयन्तु । अध अथानन्तरं मे मम सपत्नान् शत्रून्विषूचीनान्विधगञ्चनान्नानागतीन्कृत्वा इन्द्राग्नी द्वौ व्यस्य-तां विनाशयितामपुनरागमनाय क्षिपतामित्यर्थः ॥ ६४ ॥

VII. क्रमधमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराधम् ॥ ६५ ॥

का° [१८. ४. १.] क्रमधमग्निनेति चित्यमारोहन्ति । ते ऋत्विजः क्रमधमिति पञ्च ऽग्निभिस्तीर्थेन (40.) चित्याग्निमारोहन्तीत्यर्थः ॥ आग्नेय्यनुष्टुप् । हे ऋत्विग्यजमाना यूयमग्निना चित्येन कृत्वा नाकं स्वर्गलोकं क्रमधमाक्रमत स्वर्गो वै लोको ना-क इति [१. २. ३. २४.] श्रुतेः । किम्भूता यूयम् उख्यां संस्कृतमुख्यमग्निं हस्तेषु बिभ्रतः धारयन्तः । यद्वा उख्यमग्निं हस्तेषु बिभ्रतः सन्तोऽग्निनानेकचित्याग्निना स-ह क्रमधम् चित्युपरि पादान्कुरुत आरोहधमित्यर्थः । ततो दिवोऽन्तरिक्षस्य पृष्ठं स्वः स्वर्गं गत्वा देवेभिर्देवैः मिश्राः संयुताः सन्तः आधं तिष्ठत आस उपवेशने लोट् मध्यमबहुवचनं शपो लोपः धि चेति [पा° ८. २. २५.] सलोपः ॥ ६५ ॥

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोऽअग्निर्भवेह ।
विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ ६६ ॥

आग्नेयी त्रिष्टुप् हे अग्ने इदानीमानीत उख्य वह्ने प्राचीं प्रदिशं प्रागाख्यां प्र-कृष्टां दिशमनु लक्षीकृत्य त्वं प्रेहि प्रकर्षेण गच्छ । कीदृशस्त्वम् विद्वान् स्वाधि-

कारं जानानः । गत्वा च हे अग्ने इहास्मिन्प्रदेशे अग्नेः इष्टकानिष्यादितस्य चितिरूपस्याग्नेः पुरोऽग्निर्भव पुरः अग्रे अङ्गति गच्छतीति पुरोऽग्निः पुरोगन्ता मुख्यो भव प्रकृत्यान्तःपादमव्यपरऽइति [पा° ६.१.११५.] संध्यभावः । किं च विश्वाः सर्वाः आशा दिशो दीद्यानः दीपयन्प्रकाशयन्सन् त्वं विभाहि विशेषेण दीप्यस्व । ततो नोऽस्माकं द्विपदे पुत्रादिकाय चतुष्पदे गवादिकाय ऊर्जमन्नं धेहि सम्पादय ॥ ६६ ॥

पृथिव्या अरुमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम् ॥ ६७ ॥

आग्नेयी पिपीलिकमध्या बृहती आद्यतृतीयौ त्रयोदशार्णौ द्वितीयोऽष्टकः सा पिपीलिकमध्या बृहती त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्येति वचनात् अत्राद्यस्त्रयोदशः द्वितीयो नवकः तृतीयश्चतुर्दशक इति षट्त्रिंशदक्षरत्वाद्बृहती त्रिपादणिष्टमध्या पिपीलिकमध्येति वचनात्पिपीलिकमध्या च । यजमान आरुरहं पृथिव्या उत् उद्गतः सन् अन्तरिक्षमारुहमारूढोऽस्मि । तस्मादन्तरिक्षादुद्गतो दिवमारुहं द्युलोकमारूढोऽस्मि । दिवो द्युलोकस्य यो नाको दुःखरहितः प्रदेशः तस्य पृष्ठादुपरिभागात्स्वः ज्योतिः स्वर्गलोकस्थं ज्योतिरादित्यमण्डलमहमगां गतोऽस्मि प्राप्स्यामीत्यर्थः इणो गा लुङीति [पा° २.४.४५.] गादेशः ॥ ६७ ॥

स्वर्यन्तो नापेक्षन्तऽआ द्याꣳ रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ॥ ६८ ॥

आग्नेयी अनुष्टुप् सुष्ठु विदन्ति जानन्ति ते सुविद्वांसः ज्ञानकर्मसमुच्चयकारिणः ये सुविद्वांसो यज्ञं वितेनिरे वितन्वन्ति अनुतिष्ठन्ति । कीदृशं यज्ञं विश्वतोधारं विश्वतो धारा यस्य तम् आकृतिदक्षिणान्नानि यज्ञस्य धाराः वैश्वानरमारुतपूर्णाकृतिवसोर्धारावाजप्रसवीयानि वा यज्ञस्य धाराः यद्वा विश्वस्य जगतो धारयितारम् । ते यज्ञकर्तारः स्वः स्वर्गं यन्तो गच्छन्तो नापेक्षन्ते पुत्रपश्वाद्यपेक्षां न कुर्वन्ति कृतकृत्यत्वात् । द्यां स्वर्गं चारोहन्ति कीदृशीं द्यां रोदसी रुणद्धि जरामृत्युशोकादीन्सा रोदसी ताम् धस्य ददिशश्छान्दसः पूर्वसवर्णदीर्घः दिवो विशेषणं न तु

द्यावापृथिव्योरभिधानं दिव इत्युपादानात् (41.) । यद्वा ये यजमानाः सुविद्वांसः सुष्ठु कर्मप्रकारं जानन्तः विश्वतोधारं. जगद्धरणकर्तुं यज्ञं वितन्वन्ति विशेषेण कुर्वन्ति ते यजमाना द्यामन्तरिक्षमारोहन्ति तथा रोदसी द्यावाभूमी आरोहन्ति ततः स्वर्यन्तः स्वर्गस्थमादित्यमण्डलं प्राप्नुवन्तोऽन्यत्किमपि स्थानं नापेक्षन्ते ॥ ६८॥

अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥ ६९॥

आग्नेयी त्रिष्टुप् हे अग्ने त्वं देवयतां देवानिच्छतां यजमानानां प्रथमः प्रेहि पुरतः प्रकर्षेण गच्छ देवानिच्छन्ति देवयन्ति देवयन्तीति देवयन्तः तेषाम् सुप आत्मनः क्यजिति [पा° ३. १. ८.] क्यजन्ताच्छतृप्रत्ययः क्यचि चेतीत्वे [पा° ७. ४. ३३.] प्राप्ते न छन्दस्यपुत्रस्येति [पा° ७. ४. ३५.] तदभावः । कथं मयाग्रतो गन्तव्यं तत्राह यतस्त्वं देवानामुतापि च मर्त्यानां मनुष्याणां चक्षुःस्थानीयः लोकेऽपि गच्छतः पुरुषस्य दृष्टिः पुरतो याति । किं च यष्टुमिच्छन्ति इयक्षमाणाः अभ्यासे यलोपश्छान्दसः इयक्षमाणा यष्टुमिच्छतो यजमानाः स्वस्ति यथा तथा अविनाशेन स्वः स्वर्गं यन्तु प्राप्नुवन्तु । कीदृशाः भृगुभिः भृगुगोत्रविप्रैः सजोषाः समानो जोषः प्रीतिर्येषां ते । भृगुग्रहणमनूचानब्राह्मणोपलक्षणम् उत्तमविप्रैः प्रीतिमन्तः ॥ ६९॥

नक्तोषासा समनसा विरूपे धा° ॥ ७०॥

का° [१८. ४. २.] स्वयमातृण्णामध्वर्यग्निं धारयंश्कुल्लवत्सायपयसाभिजुहोति कृष्णाया दोहनेन स्वयमातृण्णामवसिञ्चन्नक्तोषासेति । अध्वर्युः स्वयमातृण्णेष्टकोपरि समीपे प्रतिप्रस्थात्रा तमग्निं धारयन् कृष्णवर्णायाः श्वेतवत्साया गोर्दुग्धेन दोहनेन मृन्मयदोहनपात्रेण जुहूस्थानीयेन स्वयमातृण्णां सिञ्चन्निध्मस्थेऽग्नौ जुहोति नक्तोषासेत्यृग्द्वयेनेत्यर्थः ॥ व्याख्याता द्वादशे [१२. २.] ॥ ७०॥

अग्ने सहस्रात्र शतमूर्ध्वस्तं ते प्राणाः सहस्रं व्यानाः ।
त्वꣳ साहस्रस्य रायऽईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥ ७१॥

आग्नेयी विराट्पङ्क्तिः दशाक्षरचतुःपादा । हे अग्ने सहस्रात्र सहस्रमक्षीणि य-

स्य तत्सम्बुद्धिः हिरण्यशकलान्येव नेत्राणि तथा च श्रुतिः [१.२.३.३२.] हिरण्यशकलैर्वाऽएष सहस्राक्ष इति । हे शतमूर्धन् शतं मूर्धानो यस्य यद्दः शतशीर्षा रुद्रोऽसृज्यतेति [१.२.३.३२.] श्रुतेः । यस्य तव शतं प्राणाः सहस्रं व्यानाः शतसहस्रशब्दावपरिमितवचनौ । यश्च त्वं साहस्रस्य सहस्रपरिमितस्य रायः धनस्य ईशिषे प्रभुर्भवसि सहस्राद्णप्रत्ययः । तस्मै तादृशाय ते तुभ्यं वयं वाजाय विधेम वाजमन्नं हवीरूपं दद्मः वाजमिति विभक्तिव्यत्ययः विधतिर्दानकर्मा । स्वाहा एतद्धविः सुहुतमस्तु ॥७१॥

सुपर्णोऽसि गरुत्मान्पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृꣳह ॥७२॥

का° [१८.४.४.] तस्यामग्निं निदधाति सुपर्णोऽसीति वषट्कारेण । स्वयमातृण्णायां सुपर्णोऽसीति ऋग्द्वयेन वषट्कारेण चाग्निं स्थापयतीत्यर्थः ॥ अग्निर्देवत्या पङ्क्तिः । हे अग्ने त्वं सुपर्णोऽसि सुपर्णपक्ष्याकारो गरुडसमानोऽसि । गरुत्मान् गरुत् गरणं गलनं भक्षणमस्यास्तीति गरुत्मान् अशनायावानित्यर्थः । अतः पृथिव्याः पृष्ठेऽपरि सीद उपविश । भासा स्वप्रकाशेन अन्तरिक्षमापृण सर्वतः पूरय । ज्योतिषा स्वसामर्थ्येन दिवं द्युलोकमुत्तभान ऊर्ध्वं स्तम्भितं कुरु स्तम्भेर्हलः श्नः शानज्झाविति [पा° ३.१.८३.] श्नाप्रत्ययस्य शानजादेशः । तथा तेजसा स्वेन दिश उद्दृꣳह उत्कर्षेण दृढीकुरु दीपय वा ॥७२॥

आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद साधुया ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥७३॥

अग्नेयी त्रिष्टुप् । हे अग्ने त्वमाजुह्वानः आह्वयमानः सन्सुप्रतीकः शोभनं प्रतीकं मुखं यस्य सुमुखः सन् पुरस्तात्पूर्वस्यां दिशि साधुया साधुं समीचीनं विभक्तेर्यादेशः स्वं योनिं स्थानमासीद अधितिष्ठ । हे विश्वे देवाः यूयं यजमानश्च अस्मिन्पुरोवर्तिनि अध्युत्तरस्मिन् (42.) अधिकमुत्कृष्टे सधस्थे अग्निना सह स्थातुं योग्यस्थाने सीदत यज्ञाख्ये (43.) स्वर्गे उपविशत द्यौर्वाऽउत्तरꣳ सधस्थमिति [१.२.३.३५.] श्रुतेः ॥७३॥

ताꣳ सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वोऽदुहत्प्रपीनाꣳ सहस्रधारां पयसा महीं गाम् ॥ ७४॥

काण्° [१८. ४. ६.] समिदाधानꣳ शामित्रीविकङ्कत्यौडुम्बर्यस्तꣳ सवितुरिति प्रत्यृचम् । अग्निनिधानानन्तरमध्वर्युस्तत्राग्नौ समित्त्रयमादधाति तां सवितुरिति शमीमयीं विधेमेति वैकङ्कतीं प्रेद्धोऽअग्नऽइत्यौडुम्बरीमित्यर्थः ॥ कण्वदृष्टा सावित्री त्रिष्टुप् । वरेण्यस्य वरणीयस्य सवितुः सम्बन्धिनीं तां सुमतिं शोभनबुद्धिमहमावृणे आभिमुख्येन वृणोमि स्वीकरोमि । कीदृशीं सुमतिं चित्रां चायनीयां स्वापेक्षितबहुविधफलदानसमर्थाम् । विश्वजन्यां सर्वजनेभ्यो हितां यद्वा विश्वं जन्यमुत्पाद्यं यस्याः सा विश्वजन्या ताम् जगदुत्पादनसमर्थाम् । तां कां कण्वो मुनिरस्य सवितुर्यां सुमतिमेव गां धेनुमदुहत् अनुग्रहकारिणीं बुद्धिं दुग्धवान् कीदृशीं प्रपीनां प्रकर्षेण पीनां पयसा पूरितां सहस्रधारां सहस्रं धारा यस्यास्ताम् सहस्रक्षीरधारायुक्ताम् यद्वा बहूनः कुटुम्बस्य धारयित्रीम् । पयसा दुग्धेन महीं महतीं बहुदुग्धामित्यर्थः सर्वसिद्धिदात्रीम् । स्वर्मतिर्या कण्वेन दुग्धा वामहं वृणे इति सर्वार्थः ॥ ७४॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्मान्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ७५॥

गृत्समददृष्टा त्रिस्थानाग्निर्देवत्या त्रिष्टुप् । हेऽग्ने परमे जन्मन् परमे जन्मनि दिवि आदित्यात्मना स्थिताय ते तुभ्यं वयं विधेम हविर्दद्मः द्यौर्वाऽअस्य परमं जन्मेति [१. २. ३. ३१.] श्रुतेः । अवरे सधस्थे दिवोऽवाचीने सहस्थानेऽन्तरिक्षे स्थिताय विद्युद्रूपाय ते स्तोमैः स्तोत्रैर्वयं विधेम परिचरेम अन्तरिक्षं वाऽअवरꣳ सधस्थमिति [१. २. ३. ३१.] श्रुतेः । हे अग्ने यस्मान्योनेः इष्टकाचितिरूपात्स्थानात् (44.) त्वमुदारिथ उद्गतोऽसि ऋ गतौ लिट् संहितायां दीर्घः तं योनिमहं यजे पूजयामि । ततः समिद्धे सम्यक् प्रज्वलिते त्वे त्वयि हवींषि प्रजुहुरे प्रजुहुविरे प्रजुह्वति ऋत्विजः इरयो रे इति [पा° ६. ४. ७६.] इरेप्रत्ययस्य रे-आदेशः एष वाऽअस्य स्वो योनिरिति [१. २. ३. ३१.] श्रुतेः एष चित्योऽग्निः ॥ ७५॥

प्रेद्धोऽअग्ने दीदिहि पुरो नोऽज्ञस्रया सूर्म्या यविष्ठ ।
त्वाᳬ शश्वन्त उपयन्ति वाजाः ॥७६॥

वसिष्ठदृष्टाग्निदेवत्या विराडनुष्टुप् दशकास्त्रयो विराडित्युक्तेः । हे यविष्ठ अतियुवा यविष्ठः अतिशायने तमबिष्ठनौ स्थूलदूरयुवेत्यादिना [पा° ६. ४. १५६.] वलोपे पूर्वगुणः हे युवतम हे अग्ने त्वं नोऽस्माकं पुरोऽग्रे दीदिहि दीप्यस्व दीव्यतिर्विकरणव्यत्ययेन जुहोत्यादित्वाच्छपः श्लौ द्वित्वम् तुजादीनामिति [पा° ६. १. ७.] पूर्वदीर्घः । किम्भूतस्त्वम् अज्ञस्रयानुपक्षीणया सूर्म्या समित्काष्ठेन प्रेद्धः प्रकर्षेण दीप्तः सूर्मीशब्दः काष्ठवाचकः यद्वा लोकमयी ज्वलन्ती स्थूणा सूर्मी अज्ञस्रया सूर्म्या सूर्मीसमानया ज्वालया दीदिहि सूर्मीशब्दो ज्वालोपलक्षकः । हे अग्ने यतः शश्वन्तो निरन्तरभाविनो वाजाः अन्नानि हवींषि त्वामुपयन्ति प्राप्नुवन्ति अतो दीप्यस्वेत्यर्थः ॥७६॥

अग्ने तमद्याश्वं न स्तो° ॥७७॥

का° [१८. ४. ८.] स्रुवाहुती जुहोत्यग्ने तमद्येति प्रत्यृचम् । समिध आधायाग्ने तमिति ऋग्द्वयेन स्रुवेण द्वे घृताहुती तत्राग्नौ जुहोतीत्यर्थः ॥ व्याख्याता [१५. ४४.] ॥७७॥

चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यᳬ हविः ॥७८॥

विश्वकर्मदेवत्यातिजगती । मनसा घृतेन च सह चित्तिमृविग्यज्ञमानानां चित्तिं जुहोमि अग्निसम्बद्धं (45.) करोमि अग्नितत्त्वपरिज्ञानार्थं चित्तनं संतानं करोमीत्यर्थः । संकल्पविकल्पात्मकं मनः निश्चयात्मकं चित्तम् । तथा जुहोमि यथा इह यज्ञे देवा आगमन् आगच्छेयुः पुषादीत्यादिना [पा° ३. १. ५५.] गमेर्लुङि च्लेरङ् । कीदृशा देवाः वीतिहोत्राः होत्रा (46.) इति यज्ञनाम [निघ° ३. १७.] वीतिरभिलाषो होत्रा येषां (47.) ते वीतिहोत्राः कामितयज्ञाः । ऋतावृधः ऋतं सत्यं यज्ञं वा वर्धयन्ति ते ऋतवृधः संहितायां दीर्घः । किं च विश्वाहा विश्वानि च तान्य-

हानि च विश्वाहा सर्वेघस्रेषु अदब्धमनुपदृतं स्वादु हविः विश्वकर्मणे प्रजापतये जुहोमि । कीदृशाय विश्वकर्मणे भूमनो भूम्नो महतो विश्वस्य जगतः पत्ये स्वामिने भूमन इत्यत्रोपधालोपाभाव आर्षः ॥७८॥

सप्त तेऽग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥७९॥

का० [१८.४.१.] पूर्णाहुतिं च सप्त तऽइति । स्रुचा पूर्णाहुतिं च जुहोति घृतपूर्णया स्रुचा आहुतिः पूर्णाहुतिरित्यर्थः ॥ सप्तऽर्षिदृष्टा अग्नेयी द्व्यधिका त्रिष्टुप् । हे अग्ने ते तव सप्त समिधः समिन्धनाः प्राणाः शीर्षण्याः सन्ति प्राणा वै समिधः प्राणा खेतꣳ समिन्धतऽइति [१.२.३.४४.] श्रुतेः । किं च तव सप्त जिह्वाः सन्ति ज्वालारूपाः सप्त जिह्वाः हिरण्याङ्गणाद्या (48.) आगमोक्ताः यद्वा आथर्वणिकोक्ताः [मुण्डक० १.२.] काली कराली च मनोजवा च विलोहिता चापि सधूम्रवर्णा (49.) स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वा इति । तथा सप्त ऋषयः मरीच्यादयस्तव द्रष्टारः सन्ति । तथा सप्त प्रियाणि धाम धामानि छन्दांसि गायत्र्यादीनि तव सन्ति छन्दाꣳसि वाऽअस्य सप्त धाम प्रियाणीति [१.२.३.४४.] श्रुतेः यद्वा धामानि स्थानानि आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यप्राज्ञाहिताग्नीध्रीयाणि सोमयागे वह्निधारकाणि सन्ति । किं च हे अग्ने सप्त होत्राः होत्रादय ऋत्विजः सप्तधा सप्तप्रकारैरग्निष्टोमादिसप्तसंस्थाभिः त्वा त्वां यजन्ति होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रोऽहावाकश्चेति सप्त होत्राः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः (50.) षोडश्यतिरात्रोऽप्तोर्यामो वाजपेयश्चेति सप्तसंस्थाः प्रकाराः । हे अग्ने स त्वं सप्त योनीः चितीः घृतेनापृणस्व सप्त योनीरिति चितीरेतदाह [१.२.३.४४.] सप्तचितिकोऽग्निरिति च श्रुतेः । स्वाहा सुहुतमस्तु यद्वा यज्ञो वै स्वाहाकारः इति [१.२.३.४४.] श्रुतेः स्वाहा यज्ञरूपः त्वं सप्त योनीर्घृतेनापृणस्व पृण तृप्तौ तुदादिः ॥७९॥

VIII. शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च ।
शुक्रश्च ऋतपाश्चात्यꣳहाः ॥८०॥

का॰ [१८.४.२३.२४.] वैश्वानरेण प्रचर्य सर्वकृतेन स्रुक्तेन मारुतान्जुहोत्युपविश्य वैश्वानरे वा वैश्वानरं पृथुं कृत्वा शुक्रज्योतिरिति प्रतिमन्त्रम् विमुखेनारण्ये ऽनूच्यम् । वैश्वानरपुरोडाशेन यागं कृत्वोपविश्याहवनीये स्रुक्तेन मारुतान्पुरोडाशान्सर्वकृतान्जुहोति शुक्रज्योतिरित्येकैकमन्त्रेणैकैकम् । यद्वा वैश्वानरपुरोडाशस्योपर्येव मारुतान्जुहोति किं कृत्वा प्रथनकाले वैश्वानरं पुरोडाशं विस्तीर्णं कृत्वा । अरण्येऽनूच्यं सप्तमं पुरोडाशं विमुखेनोग्रश्च भीमश्चेति वक्ष्यमाणमन्त्रेण जुहोतीत्यर्थः ॥ षट् मरुद्देवत्याः आद्या ऽत्रिक् एकैकस्यामृचि सप्तसप्त मरुतः । शुक्रज्योतिरित्याद्या एकोनपञ्चाशन्मरुतो यूयमद्यास्मिन्नोऽस्माकं यज्ञे एतन एत आगच्छत इति पञ्चमऽर्चि (51.) अन्वयः तप्तनबित्यादिना [पा॰ ७.१.४५.] तस्य तनदिशः । तन्नामानि व्याख्यायन्ते शुक्रं शुद्धं शुक्रस्येव वा ज्योतिस्तेजो यस्य स शुक्रज्योतिः । चित्रं दर्शनीयं ज्योतिर्यस्य स चित्रज्योतिः । सत्यं ब्रह्मलक्षणं ज्योतिर्यस्य स सत्यज्योतिः । ज्योतिस्तेजोऽस्यास्तीति ज्योतिष्मान् । शोचते दीप्यत ऽइति शुक्रः । ऋतं सत्यं यज्ञं वा पातीति ऋतपाः । अंहः पापमतीत्य वर्तत ऽइत्यत्यंहाः । चकाराः समुच्चयार्थाः ॥ ८० ॥

ईदृङ्नान्यादृङ्ङ् सदृङ्ङ् प्रतिसदृङ्ङ् । मितश्च संमितश्च सभराः ॥ ८१ ॥

द्वे गायत्र्यौ । इमं पुरोडाशं गृहीत्वा पश्यतीति ईदृङ् । अन्यमपि पुरोडाशं पश्यतीति अन्यादृङ् । समानं पश्यतीति सदृङ् । तं-तं प्रति समानं पश्यतीति प्रतिसदृङ् । मितो मानं प्राप्तः यद्वा उत्तमाधममध्यमैस्तुल्यो मितः । सम्यक् एकीभावेन मितो मानं प्राप्तः संमितः । सह बिभर्तीति सभराः ॥ ८१ ॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ॥ ८२ ॥

ऋतः सत्यरूपः । सति वस्तुनि भवः सत्यः । ध्रुवः स्थिरः । धरुणः धारकः । धारयतीति धर्ता । विशेषेण धारयतीति विधर्ता । विविधं धारयतीति विधारयः ॥ ८२ ॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ।
अन्तिमित्रश्च दूरेऽमित्रश्च गणाः ॥ ८३ ॥

उञ्छिक् । ऋतं यज्ञं जयतीति ऋतजित् । सत्यं यातांतथ्यं जयतीति सत्यजित् । सेनां शत्रुसैन्यं जयतीति सेनजित् ह्रस्व आर्षः । शोभना सेना यस्य सुषेणः । अन्ति समीपे मित्राणि यस्य सः अन्तिमित्रः । दूरे अमित्राः शत्रवो यस्य स दूरेऽअमित्रः प्रकृत्यान्तःपादमिति [पा° ६. १. ११५.] संध्यभावः ह्रलन्तात्सप्तम्या इति [पा° ६. ३. १.] विभक्त्यलोपः । गणयति सर्वमिति गणः ॥ ८३ ॥

ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च संमितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥ ८४ ॥

हे मरुतो यूयमेते कीदृशाः ईदृक्षासः इदंदर्शनाः । एतादृक्षासः एतद्दर्शनाः । ऊ सु नः एतत्पदत्रयं पादपूर्तये । सदृक्षासः समानदर्शनाः । प्रतिसदृक्षासः प्रत्येकं समानदर्शनाः । मितासः मिताः प्रमाणतः । संमितासः संगत्य मिताः । सभरसः समानमलंकारादिकं बिभ्रति ते सभरसः भरसा आदरेण सह वर्तमाना इति वा ॥ बहुवचनमादरार्थम् ॥ ८४ ॥

स्वतवाँश्च प्रघासी च सांतपनश्च गृहमेधी च ।
क्रीडी च शाकी चोज्जेषी ॥ ८५ ॥

गायत्री उष्णिग्वा षड्विंशत्यक्षरत्वाद्विकल्पः । आद्याः पञ्च चातुर्मास्यदेवताः । स्वं स्वकीयं तवो बलं यस्य स स्वतवान् स्वाधीनबलयुक्तः । प्रकर्षेण घसति अत्ति प्रघासी पुरोडाशभक्षणशीलः । संतपनः सूर्यस्तत्सम्बन्धी सांतपनः । गृहमेधोऽस्यास्तीति गृहमेधी गृहधर्मवान् । क्रीडतीत्येवंशीलः क्रीडी सदा क्रीडनशीलः । शक्नोतीति शाकी शक्तः । उज्जयतीति उज्जेषी उत्कृष्टजयनशीलः । एते मरुतो यूयमत्र यज्ञे एतनेति पूर्वेणान्वयः ॥ ८५ ॥

[उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥] (52.)

इन्द्रं देवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं देवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं देवीश्च विशो मानुषीश्चानुवर्त्मानो भवतु ॥ ८६ ॥

विमुखमल्पोऽपि प्रसङ्गाद्व्याख्यायते (52.) । ऊर्ज ऊत्कृष्टः । बिभेत्यस्मादसौ भीमः भीमादयोऽपादाने इति [पा° ३.४.७४.] निपातः । धान्तयति शत्रूनन्धीकरोति धान्तः धान्तशब्दात्तत्करोतीति णिजन्तात्यचाप्यच् । धूनयति कम्पयति शत्रूनिति धुनिः । सक्तेऽभिभवते शत्रूनिति सासक्वान् सक्तेः क्वसुः अभ्यासदीर्घः । अभियुनक्ति अभियुग्वा अन्येभ्योऽपि दृश्यन्तऽइति [पा° ३.२.७५.] इति अभिपूर्वाद्युजेः क्वनिप् भक्तानां सुखयोक्ता । विक्षिपति प्रेरयति शत्रूनिति विक्षिपः शत्रुक्षेप्ता । चकाराः समुच्चयार्थाः । स्वाहा एतेभ्यो मरुद्भ्यः सुकृताः पुरोडाशाः सन्तु ॥ ॥ का° [१८.४.२५.] इन्द्रं दैवीरिति जपति । कर्मापवर्गान्ते यजुर्जपतीत्यर्थः ॥ मरुद्देवत्यं यजुः शक्वरी षट्पञ्चाशदक्षरत्वात् । दैवीः दैव्यः देवानामिमा देवसम्बन्धिन्यो विशः प्रजाः मरुतो मरुद्रूपा इन्द्रमनुवर्त्मानोऽभवन् अनु पश्चाद्वर्त्म वर्तनं यासां ताः इन्द्रानुगामिन्योऽभवन्निति स्वरूपाख्यानम् । दैवीर्विशो मरुतः यथा इन्द्रमनुवर्त्मानः इन्द्रमनुसृत्य वर्तमाना अभवन् उपमानमेतत् दैवीर्मानुषीश्च देवसम्बन्धिन्यो मनुष्यसम्बन्धिन्यश्च विशः एवमिन्द्रवत् इमं यजमानमनुवर्त्मानः अनुसृत्य वर्तमाना भवन्त्विति प्रार्थना ॥८६॥

IX. इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥८७॥

का° [१८.४.२६.] इमꣳ स्तनमिति वाचयति वा । इमं स्तनमिति मन्त्रगणमध्यायसमाप्तिपर्यन्तं यजमानेनाध्वर्युर्वाचयति स्वयं जपति वेत्यर्थः ॥ त्रयोदशर्च आग्नेयस्त्रिष्टुप्छन्दस्कोऽनुवाको यज्ञस्तुतिर्वसोर्धाराभिवादिनी घृतस्तुतिर्वा । हे अग्ने सरिरस्य लोकस्य मध्ये वर्तमानः त्वमिमं स्रुग्लक्षणं स्तनं (53.) स्रुचः पतन्तीं घृतधारां वा त्वं धय पिब धेट् पाने लोट् । इमे वै लोकाः सरिरमिति [७.५.२.३४.] श्रुतेः सरिरशब्देन लोका उच्यन्ते । वसोर्धारा स्रुचा क्षोष्यते सा स्रुगत्र रूपककल्पनया स्तन उच्यते कीदृशं स्तनम् ऊर्जस्वन्तमूर्जो रसोऽस्यास्ति ऊर्जस्वान् तम् विशिष्टरसवन्तम् । तथा अपां प्रपीनम् अप्शब्देन लक्षणया घृतमुच्यते अद्भिः घृतैः प्रपीनं पूर्णं तृप्त्यर्थानां करणे षष्ठीति (54.) तृतीयार्थे अपामिति षष्ठी ।

प्रप्याय्यते पूर्यते प्रपीनम् ओप्यायी वृद्धौ प्यायः पीति [पा° ६.१.२८.] च । हे अर्वन् इयर्तीति अर्वा सर्वतो गन्तः उत्समुत्स्यन्दनं स्रुग्लक्षणं कूपं जुषस्व सेवस्व कीदृशमुत्सम् मधुमन्तं मधुस्वादेन घृतेन युक्तं किं च समुद्रियं समुद्रसम्बन्धि चयनयागसम्बन्धि सदनं गृहमाविशस्व तृप्तः सन्यज्ञगृहं सेवस्व त्रयो ह वै समुद्रा अग्निर्यजुषां महाव्रतꣳ साम्नां महदुक्थमृचामित्यभिप्रायः समुद्रशब्दः समुद्राभ्राद्ध इति [पा° ४.४.११८.] घप्रत्ययः तस्येयादेशः ॥८७॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमु॑स्य धाम ।
अनु॒ष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥८८॥

गृत्समददृष्टा । अहं घृतं मिमिक्षे सेक्तुमिच्छामि अग्निमुखे मेक्तुमिच्छति मिमिक्षते मिह सेचने सनन्ताल्लट् उत्तमैकवचनम् । यतोऽस्याग्नेर्घृतं योनिरुत्पत्तिस्थानम् अग्निर्यस्मै योनिरसृज्यत तस्मै घृतमुल्वमासीदिति श्रुतेः गर्भाधारोदकमुल्वम् । यो ऽग्निर्घृते श्रितः घृतमाश्रितः ।-अस्याग्नेर्घृतमेव धाम स्थानं तेजःकरं वा ङ अवधारणे । अतो हे अध्वर्यो अनुष्वधं स्वधामन्नमुपलक्ष्य तमग्निमावह पूर्वमन्नमुपकल्प्य पश्चादाह्वय आह्वय च मादयस्व तर्पय तर्पयित्वा चैव ब्रूहि हे वृषभ कामानामभिवर्षुक स्वाहाकृतं स्वाहाकारेण हुतं हव्यं त्वं वक्षि वह देवान्प्रापय वहतेः शपि लुप्ते ष्ठ्वकत्वादौ कृते वक्षीति रूपम् । यद्वा यं प्रत्यहं मिमिक्षे यस्य घृतं योनिर्यो घृते श्रितः यस्य च घृतं धाम स त्वमनुष्वधं देवानावह मादय हव्यं च वक्षि इत्यग्निं प्रत्येवोक्तिः यतो वह्नेः कर्मद्वयं देवानामावाहनं हविर्वहनं च ॥८८॥

समुद्रादू॒र्मिर्मधु॑माँ२॥उदा॑रदु॒पाꣳ॑शुना॒ समं॒मृत॑त्वमा॒नट् ।
घृत॑स्य॒ नाम॒ गुह्यं॒ यदस्ति॑ जि॒ह्वा दे॒वाना॑ममृत॑स्य॒ नाभिः॑ ॥८९॥

वामदेवदृष्टा । अत्राऽन्नाध्यासेन घृतं स्तूयते प्राणाध्यासेन चाग्निः । समुद्रात् घृतमयात् मधुमान् रसवानूर्मिः कल्लोल उदारत् उद्गच्छत् ऋ गतौ चेरङ् ऋदृशोऽङि गुणः [पा° ७.४.१६.] अक्षीणत्वाद्घृतस्य समुद्रेणोपमानम् अन्नदेवताभिप्रायं वा सा क्ष्वक्षीणेव । उद्गत्य च स ऊर्मिः अंशुना प्राणेन जगत्प्राणभूतेनाग्निना सं संगत्यै-

कीभूय अमृतत्वममरणधर्मित्वमुपानट् उपव्याप्नोतु नश अदर्शनि लुङि मन्त्रे घसेत्यादिना [पा° २.४.८०.] च्लेर्लुक् हल्ङ्यावितिं [पा° ६.१.६८.] तिपो लोपः विआङुपसर्गाभ्यां व्याप्त्यर्थः । प्राणश्चान्नं च एकीभूयामृतत्वं प्राप्नुत इत्यर्थः । तस्य घृतस्य गुह्यमविज्ञातं नामाविद्वद्भिरज्ञेयं श्रुतिमन्त्रपठितं यदस्ति तत्कथ्यतेऽइति शेषः । किं तदाह देवानां जिह्वा अत्यभिलाषाद्देवानां जिह्वोत्थाननिमित्तम् अग्निर्जिह्वासीत्युक्तेः यदा वाऽएतदग्नौ जुह्वत्यथाग्निर्जिह्वा इवोत्तिष्ठतीति श्रुतेः । यच्च सर्वप्रकाशं नाम तदप्युच्यते अमृतस्य नाभिः अमरणधर्मस्य नह्नं बन्धनम् यो हि घृतमश्नाति स दीर्घायुर्भवति ॥ यद्वा ऋगर्धेन मन्त्रः स्तूयते अर्धेन घृतम् । समुद्रात् आग्निकाद्यज्ञःसमुद्रादस्माद्यज्ञात् य ऊर्मिः शब्दसंघातो नानाख्यातोपसर्गनिपातरूप उपमोत्प्रेक्षारूपकाद्यलंकाररूप मधुमान् रसवान्वाक्यार्थगुणैर्युक्त उदारत् मुखाद्उद्गात् स एव उपांशुना (55.) सवनेन क्रियमाणः सन्नमृतत्वमाप्नोत् तदेतद्यजुरुपाऽश्वनिरुक्तमिति श्रुतेः अतोऽग्निचिद्भिः स ऊर्मिः प्रकाशनीयः । घृतस्य गुह्यं नाम यदस्ति तदपि देवानां जिह्वोत्थाननिमित्तं किं पुनर्होमः अथास्य घृतकीर्तावेवाग्निर्वैश्वानरो मुखाद्उज्जज्वालेति [१.४.१.१३.] श्रुतेः । अमृतस्य नाभिः नह्नं यज्ञमानानाममृतत्वप्रापकं घृतं यज्ञनेनेत्यर्थः । अतोऽग्निचिद्भिर्हूयते स्तूयते च घृतमिति भावः ॥ ८१ ॥

वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ १० ॥

यतो घृतनामोच्चारणमपि देवानां प्रियमतो वयं घृतस्य नाम प्रब्रवाम अस्मिन्यज्ञे घृतनाम स्तुमः । नमोभिरन्नैः धारयाम यज्ञमिति शेषः । किं च ब्रह्मा ऋत्विक् शस्यमानं स्तूयमानमेतद्घृतनाम उपशृणवत् उपशृणोतु लेटोऽडाटाविति [पा° ३.४.९४.] अडागमः । यथा गौरः गौरवर्णः शृङ्गो यज्ञः एतत् घृतयज्ञफलरूपमवमीद्वृद्धिरिति यज्ञपरिणामाभिप्रायम् । कीदृशो गौरः चतुःशृङ्गः चत्वार ऋत्विजः शृङ्गभूता यस्य सः ॥ १० ॥

चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२॥ऽआविवेश ॥११॥

यज्ञपुरुषदेवत्य ऋषभो मन्त्रः । चतुःशृङ्गोऽवमीदित्युक्ता चतुःशृङ्गं यज्ञं वृषभरूपेण प्रतिपादयितुमाह । यो वृषभः कामानां वर्षिता रोरवीति रु शब्दे यङ्लुगन्तम् अत्यर्थं शब्दं करोति सोऽयं महो देवः महति पूजयति मह्यते वा ज्ञानैरिति महो महान्देवः ब्रह्मादिस्तम्बपर्यन्तानां प्राणिनामुपजीव्यो ज्ञानकर्मसमुच्चयकारिणां विदुषां शरीरभूतो मर्त्यान्मनुष्यानाविवेश आविशति मनुष्यान्व्याप्य तिष्ठति । यस्य वृषभस्य यज्ञस्य चत्वारि शृङ्गा शृङ्गाणि ब्रह्मोद्गातृहोत्रध्वर्युलक्षणानि त्रयः पादाः ऋग्यजुःसामरूपाः द्वे शीर्षे शिरसी हविर्धानप्रवर्ग्याख्ये शिर एवास्य हविर्धानं ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्य इति श्रुतेः । अस्य वृषभस्य सप्त हस्तासः सप्त होतारो हस्ताः हस्ता इव व्याप्रियन्ते सप्त छन्दांसि वा हस्ताः । यश्च त्रिधा त्रिप्रकारैर्बद्धः प्रातःसवनमाध्यन्दिनसवनतृतीयसवनैर्बद्धः ॥ यद्वा चत्वारो वेदाः शृङ्गाणि त्रयः पादाः सवनानि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्तासः छन्दांसि त्रिधा बद्धः मन्त्रब्राह्मणकल्पैर्बद्धः ॥ शब्दग्रामो वा व्याख्येयः चत्वारि शृङ्गाणि नामाख्यातोपसर्गनिपाताः त्रयः पादाः प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषाः त्रयः काला वा द्वे शीर्षे कार्यताव्यज्यते सप्त हस्ताः विभक्तिरूपाः त्रिधा बद्धः एकवचनद्विवचनबहुवचनैर्बद्धः । वृषभ-इवायमन्यशास्त्राणि अधः कृत्वा रोरवीति सोऽयं महान्देवो मर्त्यानाविवेश आविशति प्रतिपादयति मनुष्येषिति मनुष्याधिकारत्वाच्छास्त्रस्येति न्यायात् ॥११॥

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥१२॥

त्रिधा त्रिप्रकारेरेषु लोकेषु हितं स्थापितं घृतं यज्ञपरिणामभूतं पणिभिरसुरैर्गुह्यमानं गुप्यमानं सत् देवासो गवि अन्वविन्दन् धेनौ आनुपूर्व्यालब्धवन्तः । तस्य एकं भागमिन्द्रो जजान जनयति ते वाऽएतेऽआहुती हुतेऽउत्क्रामतस्तेऽअन्तरिक्षमाविशत इत्यादिश्रुतिरिन्द्रस्य जनकत्वं दर्शयति । सूर्य एकं भागं जजान जनी प्रादुर्भावे लिट् परस्मैपदमार्षम् ते तत उत्क्रामतस्ते दिवमाविशत इत्या-

द्यौतिः सूर्यस्य घृतभागजनकत्वं दर्शयति । येनाग्यज्ञसाधनभूताद्ग्नेः एकं स्वधया अन्नेन त्रैताकृतिलक्षणेन (56.) निष्टतक्षुः निष्कर्षितवन्तो द्विजातयः यस्ततः पुत्रो जायते स लोकप्रत्युत्थायीत्येतदुक्तं भवति ॥ १२ ॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ १३ ॥

एता वाच अर्षन्ति उद्गच्छन्ति कस्मात् हृद्यात्समुद्रात् श्रद्धोदकप्लुतात् देवताया-थात्म्यचिन्तनसंतानद्रूपात्समुद्रात् निगमनिरुक्तनिघण्टुव्याकरणशिक्षाछन्दोभिः पावनैः पूतात् । कीदृश्यो वाचः शतव्रजाः शतं व्रजं व्रजा गतयो यासां ताः बहुगतयः बह्वर्थ्या (57.) इत्यर्थः । याश्च अर्षन्त्यो रिपुणा कुतार्किकवृन्दशत्रुणा न अवचक्षे न अवचक्ष्यन्ते पुरुषवचनव्यत्ययः नापवदितुं खण्डयितुं शक्यन्ते ता घृतस्य धारा इवाभिचाकशीमि लुप्तोपमानम् अहं पश्यामि । आसां वाचां मध्ये यो हिरण्ययो हिरण्मयो दीप्यमानो वेतसोऽग्निः तं चाभिचाकशीमि अग्निर्हि वाचामधिष्ठात्री देवता ॥ यद्वा घृतधारा एवोच्यन्ते या एता हृद्यात्समुद्रात् घृतधारा अर्षन्ति गच्छन्ति हृदयेन संकल्प्य यज्ञनाद्धृदयाद्धुतिरुच्यते । शतव्रजा नानागतयः याश्च रिपुणा नावचक्षे यज्ञपरिपन्थिना द्रष्टुं न शक्यन्ते ता घृतधाराः पश्यामि । यश्चायं हिरण्ययो वेतसोऽग्निराहवनीय आसां धाराणां मध्ये स्थितस्तं च पश्यामि द्रव्यदेवतांश्च याथात्म्येनाहं पश्यामीत्यर्थः ॥ १३ ॥

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एतेऽर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ १४ ॥

या धेनाः वाचः सरितो न सरितोऽइव नद्य इवानवच्छिन्नप्रवाहाः सम्यक् स्रवन्ति प्रसरन्ति धेना इति वाङ्नामसु [निघ० १. ११.] पठितम् । कीदृश्यो धेनाः अन्तः हृदा मनसा पूयमानाः शरीरान्तर्व्यवस्थितेन हृदा पावनस्थानीयेन मनसा च पूयमानाः शब्ददोषेभ्यो विविच्यमानाः । ता अग्निमेव स्तुवन्तीति शेषः । ये च एते घृतस्य ऊर्मयः कल्लोलाः अर्षन्ति स्रुक्परिभ्रष्टाः गच्छन्ति ऋष गतौ तेऽप्यग्निं

तर्पयन्तीति शेषः । तत्र दृष्टान्तः क्षिपणोः क्षिपति क्षिनस्ति क्षिपणुर्व्याधः क्षिपणोरीषमाणाः पलायमाना मृगा-इव । व्याधाद्भीता मृगा इव ये घृतोर्मयो गच्छन्ति तेऽग्निं तर्पयन्तीत्यर्थः । श्रुतिर्द्रव्यं चाग्न्यर्थमेवेति भावः ॥ १४ ॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ १५ ॥

घृतस्य धाराः पतयन्ति सुस्रुवात्पतन्ति पत ऐश्वर्ये गतौ च चुरादिरदन्तः । कीदृश्यो धाराः यह्वाः महत्यः यह्व इति महन्नामसु [निघ० ३. ३.] पठितम् । तत्र दृष्टान्तद्वयम् प्राध्वने सिन्धोर्वातप्रमिय-इव प्रगतोऽध्वनः प्राध्वनः विषमप्रदेशः वातेन प्रमीयन्ते नश्यन्ति वातप्रमियस्तरङ्गाः मीङ् हिंसायां दिवादिः अस्मात्क्विप् यथा सिन्धोर्नद्याः वातप्रमियः तरङ्गाः प्राध्वने विषमप्रदेशे पतन्ति तद्वत् । कीदृशा वातप्रमियः शूघनासः शु इति क्षिप्रनाम [निघ० २. १५.] कृतेर्गत्यर्थस्य घनमिति रूपं शु क्षिप्रं घनं गमनं येषां ते शुघनाः शीघ्रगमनाः आज्जसेरसुक् । अन्यो दृष्टान्तः वाजी न न इवार्थे वाजीव यथा वाजी अश्वः पतति । कीदृशो वाजी अरुषः रुष क्रोधे रोषति क्रुध्यति रुषः इगुपधेति [पा० ३. १. १३५.] कप्रत्ययः न रुषः अरोषणः जात्यादिभिरुत्कृष्ट इत्यर्थः । तथा काष्ठाः आज्यस्तान्संग्रामप्रदेशान्भिन्दन्विदारयन् ऊर्मिभिः काष्ठभिदनोत्थश्रमस्वेदोद्भवैः पिन्वमानः भूमिं सिञ्चन् पिवि सेचने शानच् इदित्त्वान्नुम् स वाजी यथा पतित्वान्नान्यश्नाति एवं पतन्तीर्घृतधारा अग्निरश्नातीत्यर्थः ॥ १५ ॥

अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽग्निम् ।
घृतस्य धारा: समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ १६ ॥

घृतस्य धाराः अग्निमभिप्रवन्त प्रकृतौ अग्निं प्रतिगच्छन्ति लङ् अडभाव आर्षः । तत्र दृष्टान्तः योषा इव यथा योषाः स्त्रियः पतिं प्रतिप्रवन्ते । कीदृश्यो योषाः समना समानं मनो यासां ताः समनसः विभक्तेर्डादेशः कल्याण्यः रूपयौवनसम्पन्नाः स्मयमानाः ईषद्धसन्त्यः स्मिङ् ईषद्धसने । ता धारा अग्निं नसन्त कुर्वन्ति

नस ह्वरणे लङ् अडभाव आर्षः नसतिराप्नोतिकर्मा वा अग्निं व्याप्नुवन्ति । कीदृश्यो धाराः समिधः समिन्धते दीपयन्त्यग्निमिति समिधः । किं च ज्ञातविदाः ज्ञातप्रज्ञानोऽग्निर्जुषाणः प्रीतियुक्तः सन् ता घृतधारा हूर्यति प्राप्नोति हूर्य ह्वामे गतौ हूर्यतिः प्रेप्साकर्मा वा ता धारा प्रेप्सति कामयते नास्य ग्रहणशक्तिपरिहरणमस्तीति भावः ॥ १६ ॥

कन्या-इव वहतुमेतवाऽउ अञ्ज्यञ्जाना अभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥ १७ ॥

घृतस्य धाराः तत्तत्र अभिपवन्ते अभिगच्छन्ति पव गतौ । तत्र कुत्र यत्र स्थाने सोमः लताविशेषः सूयते अभिषूयते यत्र च यज्ञः सौत्रामण्याख्यः क्रियते तत्र गच्छन्तीर्घृतस्य धारा अभिचाकशीमि पश्यामि । तत्र गमने दृष्टान्तः कन्या वहतुमिव वहति परिणयति वहतुर्भर्ता यथा वहतुं पतिमितवै प्राप्तुं कन्या अभिप्रवन्ते इण् गतौ तुमर्थे तवेप्रत्ययः । कीदृश्यः कन्याः अञ्जि भगमज्ञानाः व्यक्तं योग्यं कुर्वाणाः अञ्यते व्यक्तीक्रियते स्त्रीपुंव्यक्तिर्येन तत् तदज्ञानाः कन्या यथा पतिं गच्छन्ति तथा यज्ञं घृतधारा गच्छन्ति ता यज्ञसहिता घृतधाराः पश्यामीत्यर्थः ॥ १७ ॥

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवतां नो घृतस्य धारा मधुमत्पवन्ते ॥ १८ ॥

हे देवा यूयं सुष्टुतिं शोभनां स्तुतिमाजिं यज्ञं च अभ्यर्षत अभ्यागच्छत अज्यते प्राप्यते स्वर्गो येन स आजिर्यज्ञः । कीदृशमाजिं गव्यं गव्यं घृतं विद्यते यस्मिन्स गव्यस्तम् घृतयुतम् अर्शआदित्वादच्प्रत्ययः । आगत्य चास्मासु भद्रा भद्राणि कल्याणानि द्रविणानि धनानि धत्त स्थापयत दत्त वा डुधाञ् धारणपोषणयोः दाने चेति वचनात् । किं च नोऽस्माकमिमं यज्ञं सौत्रामणीं देवता देवतासु देवलोके नयत प्रापयत देवताशब्दात्सुपां सुलुगिति [पा० ७.१.३९.] विभक्तिलोपः । किं च याज्ञेना घृतस्य धारा मधुमत् रसवद्यथा तथा पवन्ते प्रसरन्ति ता अपि देवतासु नयत यज्ञे यज्ञद्रव्ये स्वर्गं गते यजमानो गच्छत्येवेत्यर्थः ॥ १८ ॥

धामंन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं तऽऊर्मिम् ॥११॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां सप्तदशोऽध्यायः ॥ ॥

ब्रह्मादिस्तम्बपर्यन्तं निखिलं जगदाकृतिपरिणामभूतं मन्यमानो मुनिराह । हे अग्ने विश्वं भुवनं सर्वं भूतजातं ते तव धामन् धाम्नि विभूत्यामधिश्रितं (58.) आश्रितं स्थितं त्वन्महिमोत्थमित्यर्थः । यच्चान्तः समुद्रे समुद्रमध्ये तथा हृदि हृन्मध्ये तथा अन्तरायुषि आयुर्मध्ये ब्रह्मणो जीवनपर्यन्तं यद्भूतजातं तदपि ते धामनि श्रितं धामन्निति विभक्तिलोपः । अतोऽहं प्रार्थये मधुमन्तं रसवन्तं तमूर्मिं घृतकल्लोलं ते त्वदीयं वयमश्याम भक्षयामो व्याप्नुयामो वा तं कम् अपामनीके मुखे वर्तमानो य ऊर्मिः समिथे पणिभिः सह युद्धे आभृतः आकृत आनीतः त्रिधा कृतं पणिभिर्गुह्यमानमिति [कं° १२.] उक्तत्वात् । अश्यामेति अश्नातेरश्नुतेर्वा विकरणव्यत्ययेन श्यनि प्रत्यये लोटि रूपम् हविः परिणामिनो रसस्य वयं भोक्तारो भवेमेति भावः देवत्वं प्राप्नुयामेति वक्रोक्त्या प्रार्थ्यते ॥ यद्वास्या ऋचोऽर्थान्तरमुच्यते । हे अग्ने इदं विश्वं भुवनं तव धाम्नि अधिश्रितं (58.) तत्ते धाम कुत्र कुत्रेति तदुच्यते अन्तः समुद्रे अन्तरिक्षमध्ये सूर्यरूपेण समुद्र इत्यन्तरिक्षनाम [निघं° १.३.] हृदि अन्तः सर्वप्राणिनां हृदये जठराग्निरूपेण आयुषि अन्ने सर्वप्राण्याहारत्वेन अपामनीके उदकानां संघाते वैद्युताग्निरूपेण समिथे संग्रामे शौर्याग्निरूपेण एवं सर्वेषु स्थानेषु आभृतः स्थापितो यस्तव धामरूप ऊर्मिः घृतरूप उदकरूपो वा तं तव रसं मधुमन्तं माधुर्योपेतं वयमश्याम प्राप्नुयाम सर्वरसभोक्तारः स्यामिति भावः ॥११॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । सेकादिजपपर्यन्तोऽध्यायः सप्तदशोऽगमत् ॥१७॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ ॥१॥ २ इमा मे - नियुतं च ॥२॥ २ अर्बुदं च - °ल्लोके ॥३॥ ३-१० ॥४-११॥ ११. १२ ॥१२॥ १३-१५ ॥१३-१५॥१५॥ ॥

II. ॥ १६ [वनुते] - २१. २३. २२. २४ [°णोरयुध्यम्] ॥ १-१ ॥ २४ ॥ ॥

III. ॥ २५-३२ ॥ १-८ ॥ ३२ ॥ ॥

IV. ॥ ३६-३९ [°षात्संयु°] - ४१ ॥ १-१७ ॥ ४१ ॥ ॥

V. ॥ ५०-५५ [ऽअग्नाऽअधि]. ५६ [श्रीर्मणाः] - ६४ ॥ १-१५ ॥ ६४ ॥ ॥

VI. ॥ ६५-६९ [इयंदद्म्यमा°] - ७१ ॥ १-१५ ॥ ७१ ॥ ॥

VII. ॥ ८०-८५ [क्रीलो]. ८६ [- भूयासुः]. ॥ १-७ ॥ ८६ ॥ ॥ सप्तानुवाकेषु षडशीतिः ॥ ॥

इति काण्वशाखायां संहितापाठेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥

I. वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥

सप्तदशेऽध्याये (1.) चित्यारोहणादिमन्त्रा उक्ताः इदानीमष्टादशेऽध्याये वसोर्धारादिमन्त्रा उच्यन्ते ॥ ॥ का° [१८.५.१.] वसोर्धारां जुहोत्यौडुम्बर्या पञ्चगृहीतꣳ संततं यजमानोऽरण्येऽनूच्येऽग्निप्राप्ते वाजश्च मऽइत्यष्टानुवाकेन । अस्यार्थः । ततो यजमान आज्यं संस्कृत्यार्थपरिमाणया महत्यौडुम्बर्या स्रुचा महता स्रुवेण पञ्चवारं गृहीतमाज्यमरण्येऽनूच्ये पुरोडाशेऽधिकरणे तदुपरि संततमविच्छिन्नधारं यथा तथा वसोर्धारासंज्ञामाकृतिं जुहोति । घृतेऽग्निप्राप्ते सति वाजश्चेत्यादिहोममन्त्रारम्भः कार्योऽष्टाभिरनुवाकैर्वाजश्चेत्यादिवेट्स्वाहान्तैरेकोनत्रिंशत्कण्डिकात्मकैः ॥ वाजश्च मे । चकाराः समुच्चयार्थाः । यज्ञेनानेन मया कृतेन वाजादयः पदार्थाः कल्पन्तां क्लृप्ताः सम्पन्ना भवन्तु स. यज्ञो वाजादीनां दातास्मभ्यं भवत्वित्यर्थः अथोऽइदं च मे दक्षीदं च मऽइति [१.३.२.५.] श्रुतेः । यद्वा वाजादयः पदार्था मे मम यज्ञेन कल्पन्तां विभक्तिव्यत्ययः यज्ञेऽग्निं तर्पयन्तु अभिषिञ्चन्तु वा अनेन च त्वा प्रीणाम्यनेन च त्वाभिषिञ्चामीत्यादिश्रुतिः [१.३.३.५.] । द्वौ-द्वौ कामावनुपक्षयाय संयुज्याच्चकारेण कन्याकुमाराविव तथा च श्रुतिः [१.३.२.६.] द्वौ-द्वौ का-

मावभिद्रूपौ संयुनक्त्यव्यवच्छेदाय यथा व्योकसौ संयुज्यादिति । अथ पदार्था व्याख्यायन्ते । वाजश्चेत्यादियजुषां देवा ऋषयः अग्निर्देवता छन्दांसि पिङ्गलोक्तान्यक्षरसंख्यया ज्ञेयानि । एतैर्यजुर्भिर्यजमानोऽग्नेः कामान्याचते वाजो मेऽस्त्वित्यादि ॥ तत्रैकाधिकानि चतुःशतं यजूंषि कामास्तु पञ्चदशोत्तरं शतम् (2.) । तद्यथा । वाजश्चेत्याद्यासु ज्यैष्ठ्यं च मे [8.] वसु च मे [१५.] इति कण्डिकाद्वयवर्जितासु एकोनविंशतिकण्डिकासु त्रयोदश-त्रयोदश यजूंषि सन्ति ज्यैष्ठ्यं च मऽइत्यस्यां [8.] पञ्चदश वसु च मऽइत्यस्यां [१५.] नव । अग्निश्च मे घर्मश्च मऽइत्यस्यां [२२.] द्वादश कामास्तु त्रयोदश अङ्गुलयः शक्वरयो दिशश्च मऽइत्येकं यजुः कामास्त्वत्र त्रयः । व्रतं च मऽइत्यस्यां [२३.] षट् कामास्तु दश अहोरात्रिऽऊर्वष्ठीवे बृहद्रथन्तरे च मऽइत्येकं यजुः षट्कामाः । एका च मऽइत्यस्यां [२४.] त्रयस्त्रिंशत् । चतस्रश्च मे [२५.] अत्र त्रयोविंशतिः । त्र्यविश्च मे [२६.] ऽत्रैकादश । पष्ठवाट् च मे [२७.] इत्यत्र नव । वाजाय स्वाहेति [२८.] अत्र चतुर्दश । आयुर्यज्ञेनेति [२९.] अत्रैकविंशतिः कल्पन्तामन्तानि १२ स्तोमश्चेति षट् १८ स्वर्देवाः ११ प्रजापतेः २० वेट्स्वाहा २१ । एवमेकाधिका चतुःशती ॥ अथ यजुषामर्थाः । वाजोऽन्नम् चशब्दाः समुच्चयार्थाः । प्रसवोऽन्नदानाभ्यनुज्ञा दीयतां भुज्यतामिति । प्रयतिः शुद्धिः । प्रसितिः बन्धनमन्नविषयोत्सुक्यम् । धीतिः ध्यानम् धै चित्तायां छान्दसं सम्प्रसारणम् । क्रतुः संकल्पो यज्ञो वा । स्वरः साधुशब्दः । श्लोकः पद्यबन्धः स्तुतिर्वा । श्रवः वेदमन्त्राः श्रवणसामर्थ्यं वा । श्रुतिः ब्राह्मणं श्रवणसामर्थ्यं वा । ज्योतिः प्रकाशः । स्वः स्वर्गः । एते मे मम यज्ञेन कल्पन्ताम् । कल्पन्तामिति कण्डिकान्तस्य समुदायापेक्षया (3.) बहुत्वम् । मे-पदानामावृत्तिः प्रत्येकं प्राप्त्यर्था । एवं सर्वत्र ॥ १ ॥

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च मऽआधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥ २ ॥

प्राणः ऊर्ध्वसंचारी शरीरवायुः । अपानः अधोवृत्तिर्वायुः । व्यानः सर्वशरीर-

चरः । असुः प्रवृत्तिमान्वायुः (4.) । चित्तं मानसः संकल्पः । आधीतं वाक्यविषयज्ञानम् । वाक् वागिन्द्रियम् । मनः प्रसिद्धम् । चक्षुरिन्द्रियम् । श्रोत्रं श्रवणेन्द्रियम् । दक्षः ज्ञानेन्द्रियकौशलम् । बलं कर्मेन्द्रियकौशलम् । एतानि यज्ञेन मे कल्पन्ताम् ॥ २ ॥

ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे पर्वाणि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥ ३ ॥

ओजो बलहेतुरष्टमो धातुः । सहः शारीरं बलं सपत्नाभिभवितृत्वं वा । आत्मा परमात्मा । तनूः रम्यं वपुः । शर्म सुखम् । वर्म कवचम् । अङ्गानि हस्ताद्यवयवाः । अस्थीनि शरीरगतानि । पर्वाणि अङ्गुल्यादिपर्वाणि । शरीराणि पूर्वानुक्ताः शरीरावयवाः । आयुर्जीवितम् । जरा वार्धकान्तमायुः । एते यज्ञेन सम्पद्यन्ताम् ॥ ३ ॥

ज्यैष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥

ज्येष्ठस्य भावो ज्यैष्ठ्यं प्रशस्तत्वम् । अधिपतेर्भाव आधिपत्यम् स्वामित्वम् । मन्युः मानसः कोपः । भामोऽधिक्षेपादिलिङ्गको वाक्यः कोपः । न मीयतऽइत्यमः अपरिमेयत्वमन्यैरियत्तया परिच्छेत्तुमशक्यत्वम् । अम्भः शीतमधुरं जलम् । जेमा जयस्य भावो जयसामर्थ्यम् । महतो भावो महिमा महत्त्वं सम्पत्त्यादिना । उरोर्भावो वरिमा प्रज्ञादिविशालता । पृथोर्भावः प्रथिमा गृहक्षेत्रादिविस्तारः । वृद्धस्य भावो वर्षिमा दीर्घजीवित्वम् । दीर्घस्य भावो द्राघिमा अविच्छिन्नवंशत्वम् । वृद्धं प्रभूतमन्नधनादि । वृद्धिः विद्यादिगुणोत्कर्षः । एते मे कल्पन्ताम् ॥ ४ ॥

II. सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा

च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥५॥

सत्यं यथार्थभावित्वम् । श्रद्धापरलोकविश्वासः । जगत् जङ्गमं गवादि । धनं कनकादि । विश्वं स्थावरम् । महो दीप्तिः । क्रीडा अक्षद्यूतादिः । मोदः क्रीडादर्शनजो हर्षः । जातं पुत्रोत्पन्नमपत्यम् । जनिष्यमाणं भविष्यदपत्यम् । सूक्तमृक्समूहः । सुकृतमृक्पाठजन्यं शुभादृष्टम् । एते कल्पन्ताम् ॥५॥

ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥६॥

ऋतं यज्ञादिकर्म । अमृतं तत्फलभूतं स्वर्गादि । यक्ष्मणोऽभावोऽयक्ष्मं धातुक्षयादिरोगाभावः । अनामयत् आमयति पीडयतीत्यामयत् न आमयत् अनामयत् सामान्यव्याध्यादिराहित्यम् (5.) । जीवयतीति जीवातुः व्याधिनाशकमौषधम् । दीर्घायुषो भावो दीर्घायुत्वं बहुकालमायुः पृषोदरादित्वात्सलोपः आयुरुदको वा । अमित्राणामभावोऽनमित्रं शत्रुराहित्यम् । भयाभावोऽभयं भीतिराहित्यम् । सुखमानन्दः । शयनं संस्कृता शय्या । सूषाः शोभन उषाः स्नानसंध्यादियुक्तः प्रातःकालः । सुदिनं यज्ञदानाध्ययनादियुक्तं सर्वं दिनम् । एते मे यज्ञेन सिध्यन्तु ॥६॥

यत्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥७॥

यत्ताश्वादेर्नियन्ता । धर्ता पोषकः पित्रादिः । क्षेमः विद्यमानधनस्य रक्षणशक्तिः । धृतिः धैर्यमापत्स्वपि स्थिरचित्तत्वम् । विश्वं सर्वानुकूल्यम् । महः पूजा । संविद्वेदशास्त्रादिज्ञानम् । ज्ञातुर्भावो ज्ञात्रम् विज्ञानसामर्थ्यम् । सूः पुत्रादिप्रेरणसामर्थ्यम् । प्रसूः पुत्रोत्पत्त्यादिसामर्थ्यम् । सीरं हलादि कृषिकृतधान्यनिष्पत्तिः । लयः कृषिप्रतिबन्धनिवृत्तिः ॥७॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥ ८॥

शमैहिकं सुखम् । मयः आमुष्मिकं सुखम् । प्रियं प्रीत्युत्पादकं वस्तु । अनुकाम्यतऽइत्यनुकामः अनुकूलयत्नसाध्यः पदार्थः । कामः विषयभोगजनितं सुखम् । सुमनसो भावः सौमनसः मनःस्वास्थ्यकरो बन्धुवर्गः । भगः सौभाग्यम् । द्रविणं धनम् । भद्रमैहिकं कल्याणम् । श्रेयः पारलौकिकम् । वसतीति वस्तृ अतिशयेन वस्तृ वसीयः तुरिष्ठेमेयःस्विति [पा° ६.४.१५४.] तृचो लोपः निवासयोग्यो वसुमान्गृहादिः । यशः कीर्तिः । एते कल्पन्ताम् ॥ ८॥

III. ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मऽऔद्भिद्यं च मे यज्ञेन कल्पन्ताम् ॥ १॥

ऊर्क् अन्नम् । सूनृता प्रिया सत्या वाक् । पयः दुग्धम् । रसः तत्रत्यः सारः । घृतमाज्यम् । मधु क्षौद्रम् । समाना ग्धिर्भोजनं सग्धिः अदेः क्तिनि घसादिशः घसिभसोर्हलीति [पा° ६.४.१००.] घस उपधालोपे (6.) कृते क्तलो कलीति [पा° ८.२.२६.] सलोपे कृते क्षषस्तथोर्धोऽधः [पा° ८.२.४०.] ज्ञश्त्वं ग्धिः बन्धुभिः सह भोजनमित्यर्थः । सपीतिः बन्धुभिः सह पानम् । कृषिः तत्कृतधान्यसिद्धिः । वृष्टिः धान्यनिष्पादिकानुकूला । जेतुर्भावो (7.) जैत्रम् जयसामर्थ्यम् । उद्भिदो भाव औद्भिद्यम् चूतादितरोरुत्पत्तिः । एते यज्ञेन कल्पन्ताम् ॥ १॥

रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥ १०॥

रयिः सुवर्णम् । रायो मुक्तादिमणयः । पुष्टं धनपोषः । पुष्टिः शरीरपोषकः ।

विभु व्याप्तिसामर्थ्यम् । प्रभु ऐश्वर्यम् । पूर्णं धनपुत्रादिबाहुल्यम् । अत्यन्तं पूर्णं पूर्णतरं गजतुरगादिबाहुल्यम् । कुयवं कुत्सितधान्यमपि । अक्षितं क्षयरहितं धान्यादि । अन्नमोदनादि । क्षुत् (8.) भुक्तान्नपरिपाकः । एते कल्पन्ताम् ॥ १० ॥

वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च मऽऋद्धं च मऽऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥ ११ ॥

विद्लृ लाभे पूर्वलब्धं वित्तम् । वेद्यं लब्धव्यम् । भूतं पूर्वसिद्धं क्षेत्रादि । भविष्यत् सम्पत्स्यमानं क्षेत्रादि । सुखेन गम्यते यत्र तत्सुगम् सुदुरोरधिकरणे इति [पा° ३.२.४८. वा° ३.] गमेर्डः सुखगम्यो देशः । सुपथ्यं शोभनं हितम् । ऋद्धं समृद्धं यज्ञफलम् ऋद्धिः यज्ञादिसमृद्धिः । क्लृप्तं कार्यक्षमं द्रव्यादि । क्लृप्तिः स्वकार्यसामर्थ्यम् । मतिः पदार्थमात्रनिश्चयः । सुमतिः दुर्घटकार्यादिषु निश्चयः एते यज्ञेन कल्पन्ताम् ॥ ११ ॥

व्रीह्यश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥ १२ ॥

व्रीहियवमाषतिलमुद्गगोधूममसूराः प्रसिद्धाः । खल्वाः चणाकाः लङ्गाश्च । प्रियङ्गवः कङ्गवः प्रसिद्धाः (9.) । अणवश्चीनकाः (10.) । श्यामाकास्तृणधान्यानि ग्राम्याणि कोद्रववत्तेन प्रसिद्धानि । नीवारास्तृणधान्यान्यारण्यानि । एते धान्यविशेषा मे यज्ञेन कल्पन्ताम् ॥ १२ ॥

IV. अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥ १३ ॥

अश्मा पाषाणः । मृत्तिका प्रशस्ता मृत् मृदस्तिकन् । गिरयः क्षुद्रपर्वताः गो-

वर्धनार्बुदरैवतिकादयः । पर्वताः महान्तो मन्दरहिमाचलादयः । सिकताः शर्कराः । वनस्पतयः पुष्पं विना फलवन्तः पनसोडुम्बरादयः । हिरण्यं सुवर्णं रजतं वा द्रविणाकुप्ययोश्चेत्यभिधानात् । अयो लोहम् । श्यामं ताम्रलोहं कांस्यं रजतं कनकं वा । लोहं कालायसे सर्वतैजसे ज्ञोङ्गकेऽपि चेत्यभिधानात् । सीसं प्रसिद्धम् । त्रपु रङ्गम् । एते कार्यविशेषेषु मे कल्पन्ताम् ॥ १३ ॥

अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥ १४ ॥

अग्निः पृथिवीस्थो वह्निः । आपोऽन्तरिक्षस्थानि जलानि । वीरुधः गुल्माः । ओषधयः फलपाकान्ताः । कृष्टपच्याः कृष्टे पच्यन्ऽइति कृष्टपच्याः राजसूयसूर्येत्यादिना [पा° ३. १. ११४.] क्यबन्तो निपातः भूमिकर्षणवीजवापादिकर्मभिर्निष्पाद्या ओषधयः । तद्विपरीता अकृष्टपच्याः स्वयमेवोत्पाद्यमाना नीवारगवेधुकादयः । ग्राम्याः ग्रामे भवाः पशवः गोऽश्वमहिषाजाविगर्दभोष्ट्रादयः । आरण्याः अरण्ये भवाः पशवः कृत्तिसिंहशरभमृगगवयमर्कटादयः । वित्तं पूर्वलब्धम् । वित्तिः भाविलाभः । भूतं ज्ञातपुत्रादिकम् । भूतिरैश्वर्यं स्वार्जितम् । एतानि यज्ञेन मम सम्पद्यन्ताम् ॥ १४ ॥

वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च मऽएमश्च मऽइत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥ १५ ॥

वसु धनं गवादिकम् । वसतिर्वासस्थानं गृहम् । कर्माग्निहोत्रादि । शक्तिस्तदनुष्ठानसामर्थ्यम् । अर्थोऽभिलषितः पदार्थः । एमः ईयतऽइत्येमः एतेर्मप्रत्ययः प्राप्तव्योऽर्थः । इत्या भावे क्यप् अयनमिष्टप्राप्त्युपायः । गतिरिष्टप्राप्तिः । एते कल्पन्ताम् ॥ १५ ॥

V. अग्निश्च मऽइन्द्रश्च मे सोमश्च मऽइन्द्रश्च मे सविता च मऽइन्द्रश्च मे

सरस्वती च मऽइन्द्रश्च मे पूषा च मऽइन्द्रश्च मे बृहस्पतिश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१६॥

अथार्धेन्द्राणि जुहोति [१.३.२.१.] अर्धस्येन्द्रदेवत्यत्वादर्धस्य नानादेवत्यत्वात्। अग्निसोमसवितृसरस्वतीपूषबृहस्पतयः प्रसिद्धाः तैः समानभागत्वादिन्द्र एकैकया सह पच्यते। यास्कोक्ता इन्द्रशब्दस्य नानार्थाः कार्याः एवमग्रेऽपि कण्डिकाद्वये। एते कल्पन्ताम् ॥१६॥

मित्रश्च मऽइन्द्रश्च मे वरुणश्च मऽइन्द्रश्च मे धाता च मऽइन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे मरुतश्च मऽइन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१७॥

मित्रवरुणधातृत्वष्टृमरुद्विश्वेदेवाः प्रसिद्धाः। प्रत्येकमिन्द्रः। एते कल्पन्ताम् ॥१७॥

पृथिवी च मऽइन्द्रश्च मेऽन्तरिक्षं च मऽइन्द्रश्च मे द्यौश्च मऽइन्द्रश्च मे समाश्च मऽइन्द्रश्च मे नक्षत्राणि च म इन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८॥

पृथिव्यन्तरिक्षदिवस्त्रैलोक्यम्। समा वर्षाधिष्ठात्र्यो देवताः। नक्षत्राणि अश्विन्यादीनि। दिशः प्रागाद्याः। एते कल्पन्ताम् ॥१८॥

VI. अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मऽउपाꣳशुश्च मेऽन्तर्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥११॥

अथ ग्रहान्जुहोति [१.३.२.१०.] कण्डिकात्रये ग्रहहोममन्त्राः। ग्रहादयः सोमयज्ञविशेषाः (11.) सोमप्रकरणे प्रसिद्धाः। अदाभ्यस्यैव गृह्यमाणावदृशायां (12.) पृथक्कृत्य ग्रहणे रश्मिशब्देन निर्देशः रश्मीनां तद्ग्रहणे (13.) साधनत्वात् अꣳशो रूपे सूर्यस्य रश्मिषु इति [८.४८.] मन्त्रलिङ्गात्। अधिपतिशब्देन निग्राह्यो

विवक्षितः तस्य ज्येष्ठत्वादाधिपत्यम् ज्येष्ठो वाऽएष ग्रहाणामिति श्रुतेः । प्रतिप्रस्थानशब्देन निग्राह्यो विवक्षितः द्विदेवत्यैः सह पाठात् । अन्ये प्रसिद्धाः ॥११॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥

आग्नो वैश्वदेवः प्रातःसवनगतः महावैश्वदेवस्तु तृतीयसवनगतः । ध्रुवाख्यस्यैव ग्रहस्य श्रवणदशायां वैश्वानरसूक्तपाठात्तद्दशापन्नो (15.) ध्रुवो वैश्वानरशब्देनोच्यते । मरुत्वतीया इति बहुवचनं त्रित्वात् मरुत्वतीयो महामरुत्वतीयः कुण्ठमरुत्वतीयश्चेति । अभिषेचनीये सारस्वतीनामपां ग्रहणमेव सारस्वतो ग्रहः सारस्वतं ग्रहं गृह्णातीति तत्राम्नानात् ॥२०॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥२१॥

स्रुचो जुह्वादयः । चमसानि ग्रहपात्राणि । वायव्यानि पात्रविशेषाः । अधिषवणे काष्ठफलके । पूतभृदाधवनीयौ सोमपात्रविशेषौ । स्वगाकारः शम्युवाकः तेन यथास्वं देवतानां हविरङ्गीकारात् । प्रसिद्धमन्यत् । एते मम यज्ञेन निमित्तेन कल्पन्ताम् ॥२१॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥२२॥

काण्डिकाद्वयेन यज्ञक्रतुहोमः अथैतान्यज्ञक्रतून्जुहोत्यग्निश्च मऽइति [१.३.३.१.] श्रुतेः । अग्निः चीयमानो वह्निरग्निष्टोमो वा । घर्मः प्रवर्ग्यः । इन्द्रायार्कवते पुरोडाशमिति विहितो यागोऽर्कः । सौर्यं चरुमिति विहितः सूर्यः । प्राणो गवा-

मयनम् । अश्वमेधः प्रसिद्धः । पृथिव्यदितिदितिद्यौ देवताविशेषाः । अङ्गुलयः विराट्पुरुषावयवाः । शक्वरयः शक्तयः । दिशः प्राच्याद्याः । एते यज्ञेन कल्पन्ताम् ॥ २२ ॥

व्रतं च मऽऋतवश्च मे तपश्च मे संवत्सरश्च मेऽहोरात्रिऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥

व्रतं नियमः । ऋतवो वसन्तादयः । तपः कृच्छ्रं चान्द्रायणादि । संवत्सरः प्रभवादिः । अहश्च रात्रिश्चाहोरात्रे दिननिशे । ऊढ्र (16.) चाष्ठीवन्तौ जानुनी (17.) च ऊर्वष्ठीवे अवयवविशेषौ अचतुरेति [पा° ५. ४. ७७.] निपातः । बृहद्रथन्तरे एतन्नामके सामनी । एतानि कल्पन्ताम् ॥ २३ ॥

VII. एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविꣳशतिश्च मऽएकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च मऽएकत्रिꣳशच्च मऽएकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥ २४ ॥

अयुग्मस्तोमकोमार्था मन्त्राः अथायुज स्तोमान्जुकोतीति [१. ३. ३. २.] श्रुतेः । एकामादाय द्वितीयां विहाय तृतीयामादाय चतुर्थीं विहाय परित्यक्तसमसंख्याकेनात्तविषमसंख्याकेन मन्त्रेणायुग्मान्स्तोमान्जुकुयादित्यर्थः । आदरातिशयद्योतनार्था सर्वत्र पुनरुक्तिः । अयुग्मस्तोमकोमैः सर्वकामावाप्तिः तथा श्रुतिः [१. ३. ३. २.] एतद्वै देवाः सर्वान्कामानाप्नुवन्भि स्तोमैः स्वर्गं लोकमायँस्तथैवैतद्यजमानः सर्वान्कामानाप्नुवन्भि स्तोमैः स्वर्गं लोकमेतीत्यादि ॥ २४ ॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे

षोडश च मे विंशतिश्च मे विंशतिश्च मे चतुर्विंशतिश्च मे चतुर्विंशतिश्च मेऽष्टाविंशतिश्च मेऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे यज्ञेन कल्पन्ताम् ॥ २५ ॥

एककण्डिकया (18.) युग्मस्तोमान्जुहोति अथ युग्मतो जुहोति चतस्रश्च मऽइति [१.३.३.४.] प्रथमं चतस्र इत्येतां संख्यामादाय चतुरुत्तरत्वेन स्थितान्युग्मान्स्तोमानष्टाचत्वारिंशत्पर्यन्तान्जुहुयादित्यर्थः । तत्फलं स्वर्गप्राप्तिः एतद्वै छन्दाꣳस्यब्रुवन्यातयामा वाऽअयुज्ञ स्तोमा युग्मभिर्वयꣳ स्तोमैः स्वर्गं लोकमयामेति तथैतद्यजमानो युग्मभि स्तोमैः स्वर्गं लोकमेतीति [१.३.३.५.] श्रुतेः । पूर्व-पूर्वमुत्तरेण सम्बध्नाति वृक्षारोहणवत् तथा च श्रुतिः [१.३.३.६.] पूर्व-पूर्वमुत्तरेणोत्तरेण (19.) संयुनक्ति यथा वृक्षं रोहन्नुत्तरामुत्तराꣳ शाखाꣳ समालम्भꣳ रोहेत्तादृक्तादिति (20.) । अत्रोक्ता संख्या संख्येयनिष्ठा । एते यज्ञेन कल्पन्ताम् ॥२५॥

ऋविश्च मे ऋवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥

कण्डिकाद्वयं वयोहोमे विनियुक्तम् । तथा च श्रुतिः [१.३.३.७.] अथ वयाꣳसि जुहोति ऋविश्च मऽइति पशवो वै वयाꣳसि पशुभिरेवैनमेतद्यज्ञेन प्रीणात्यथो पशुभिरेवैनमेतद्यज्ञेनाभिषिञ्चतीति । अविः षण्मासात्मकः कालः त्रयोऽवयो यस्य स ऋविः सार्धसंवत्सरो वृषः तादृशी गौरृष्यवी । द्विसंवत्सरो वृषो दित्यवाट् तादृशी गौर्दित्यौही । पञ्चावयो यस्य स पञ्चाविः सार्धद्विसंवत्सरो वृषः तादृशी गौः पञ्चावी । वत्सो वत्सरः त्रयो वत्सा यस्य स त्रिवत्सः त्रिवर्षो वृषः तादृशी गौस्त्रिवत्सा । तुर्यं वर्षं वक्तीति तुर्यवाट् सार्धत्रिवर्षो वृषः तादृशी गौस्तुर्यौही । एते यज्ञेन कल्पन्ताम् ॥ २६ ॥

cccc*

पष्ठवाट् मे पष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहच्च मे ऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥२७॥

पष्ठं वर्षचतुष्कं वहतीति पष्ठवाट् चतुर्वर्षो वृषः तादृशी गौः पष्ठौही । उक्षा सेचनक्षमो वृषः । वशा वन्ध्या गौः । अतियुवा वृष ऋषभः (21.) । वेहद्गर्भघातिनी (22.) गौः । अनः शकटं वहतीत्यनड्वान् शकटवहनक्षमो वृषः वहेः क्विपि सम्प्रसारणमनसो डकारः चतुरनडुहोरामुदात्त इति [पा° ७.१.९८.] आमागमः । धेनुर्नवप्रसूता गौः । एते मम यज्ञेन निमित्तेन कल्पन्तां स्वस्वव्यापारसमर्था भवतु यद्वा एते यज्ञेन मम कल्पन्तां मह्यमुपभोगक्षमा (23.) भवन्त्वित्यर्थः एवं पूर्वत्र ॥२७॥

VIII. वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहार्कर्पतये स्वाहाग्नेर्मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनेऽआत्यायनाय स्वाहात्यायाय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा । इयं ते राण्मित्राय पत्नासि यमेन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याय ॥२८॥

अथ नामग्राहहोमः तथा च श्रुतिः [१.३.३.८.] अथ नामग्राहं जुहोति वाजाय स्वाहेत्येतद्वै देवाः सर्वान्कामानाप्नुवंतमेव प्रत्यक्षमप्रीणँस्तथैवैतद्यजमानः सर्वान्कामानाप्नुवंतमेव प्रत्यक्षं प्रीणातीति । वाजोऽन्नं तस्मै स्वाहेति होममन्त्रः वाजादीनि चैत्रादिमासानां नामानि तन्नाम गृहीत्वा होतव्यमित्यर्थः अन्नप्राचुर्यात्चैत्रोऽन्नरूपः । प्रसवायानुज्ञारूपाय जलक्रीडादौ अन्यनुज्ञादानात्प्रसवो वैशाखः । अपिजाय (24.) अप्सु जायतऽइत्यपिजः सप्तम्या अलुक् जलक्रीडारतत्वादपिजो ज्येष्ठः । क्रतवे यागरूपाय चातुर्मास्यादियागप्राचुर्यात्क्रतुरषाढः । वसवे वासयति वसुः चातुर्मास्ये यात्रानिषेधाद्वसुः श्रावणः । अर्कर्पतये दिनस्वामिने सूर्यरूपाय तापकरत्वाद्वाहरूपदस्यार्कर्पतित्वम् । मुग्धायाग्नेः तुषारादिना मोहरूपाय दिवसाय तुषारबाहुल्यान्मुग्धमग्नेः आश्विनः । अमुग्धाय (25.) वैनशिनाय विनश्यतीति वि-

नंशी मस्जिनशोर्कलीति [पा° ७. १. ६०.] बाहुलकादकत्यपि नशेर्नुमागमः (26.) विनंश्यैव विनशिनः स्वार्थे अण् अल्पघटिकावत्वेन विनाशशीलाय कार्त्तिकाय स्माननियमादिना पापनाशकत्वादमुग्धाय मोक्षनिवर्तकाय कार्त्तिकाय (27.) । अविनंशिने (28.) आत्यायनाय न विनश्यतीत्यविनंशी तस्मै विनाशरहिताय अन्ते सर्वेषां नाशे भवमन्त्यं तदयनं चेत्यन्त्यायनं तत्र भव आन्त्यायनस्तस्मै सर्वनाशेऽप्यवशिष्टायात एवाविनंशिने विष्णुरूपाय (29.) मार्गशीर्षाय मासानां मार्गशीर्षोऽस्मीति (30.) स्मृतेः [भगवद्गीता° १०. ३५.] । आन्त्याय भौवनाय भुवनानामयं भौवनः अन्ते स्वरूपे भव आन्त्यस्तस्मै लोकस्वरूपपुष्टिकरत्वात्तत्रभवत्वम् ज्ञाठराग्नेर्दीप्तिकरत्वेन पुष्टिकरत्वं पौषस्य । भुवनस्य भूतजातस्य पतये पालकाय माघाय स्नानादिना (31.) पुण्यजनकत्वेन पालकत्वं माघस्य । अधिपतये अधिकपालकाय फाल्गुनाय वर्षान्तत्वात् । प्रजापतये एवं द्वादशमासाधिष्ठात्रे प्रजापतिनामकाय देवाय । स्वाहेति होमार्थं सर्वत्र ॥ हे अग्ने इयं ते तव राट् इदं राज्यं यत्र-यत्र यागाः क्रियन्ते तत्तवैव राज्यम् । किं च हे अग्ने त्वं मित्रस्य सख्युर्यजमानस्य यत्ता नियानकोऽसि षष्ठ्यर्थे चतुर्थी मित्रायेति । कीदृशस्त्वं यमनो यमयतीति यमनः अग्निष्टोमादिकर्मसु सर्वान्नियमयन् । अत ऊर्जे विशिष्टान्नरसाय त्वा त्वामभिषिञ्चामीति शेषः । तथा वृष्टै वर्षणाय त्वाभिषिञ्चामि अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः । ततः प्रजानामाधिपत्याय प्रजास्वामित्वार्थं त्वाभिषिञ्चामि वसोर्धारया । तथा च श्रुतिः [१, ३, ३, १०. ११.] प्रजानामाधिपत्यायेत्यन्नं वाऽऊर्गन्नं वृष्टिरन्नेनैवैनमेतत्प्रीणाति यद्वेवाक्षेयं ते राणिमित्राय यत्तासि यमन ऊर्जे त्वा वृष्टै त्वा प्रजानां त्वाधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य त्वं यत्तासीति ॥ २८ ॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् । स्तोमश्च यजुश्चऽऋक्च साम च बृ-

कृच्चं रथन्तरं च । स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट्-स्वाहा ॥ २१ ॥

कल्पक्रोमः कल्पतामिति लिङ्गात् (32.) अथ कल्पान्क्रुक्रोतीति [१.३.३.१२.] श्रुतेः । यज्ञेन निमित्तेनायुर्जीवनकालः कल्पतां साध्यतां प्राप्यताम् । प्राणचक्षुः-श्रोत्रवाङ्मनांसि मम यज्ञेन क्लृप्तानि भवन्तु । आत्मा देहः आत्मेन्द्रियमनोयुक्तो भोक्तेत्याङ्गर्मनीषिण इति स्मृतेः । ब्रह्मा (33.) वेदो यज्ञेन कल्पताम् । ज्योतिः स्वयंप्रकाशः परमात्मा यज्ञेन साध्यताम् पुण्यकर्मानुष्ठानं परमात्मज्ञाने कारणम् ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः [१४.७.२.२४.] कर्मणैव हि संसिद्धिमास्थिता जनकादय इति स्मृतेश्च [भगवद्गी° ३.२०.] । स्वः स्वर्गः । पृष्ठं स्तोत्रं स्वर्गस्थानं वा कल्पताम् । यज्ञो यज्ञेनैव क्लृप्तो भवतु नाकं यज्ञक्लृप्तौ समर्धः यज्ञेन यज्ञमयजन्त देवा इति श्रुतेः [३१.१६.] । किं च स्तोमयजुर्ऋक्साम-बृहद्रथन्तराणि च यज्ञेन क्लृप्तानि भवन्त्वित्यनुषङ्गः । स्तोमस्त्रिवृत्पञ्चदशादिः य-जुरनियतपादो मन्त्रः ऋक् नियतपादा साम गीतिप्रधानम् बृहद्रथन्तरे तद्विशेषौ ॥ वसोर्धारयैवमग्निमभिषिच्यात्मानं यजमानः प्रशंसति वयं यजमाना देवा (34.) भू-त्वा स्वः स्वर्गमगन्म गतवन्तः गमेर्लङि शबुपे मस्य नवे (35.) ट्वयम् । गत्वा चामृता अमरणधर्मिणोऽभूम भूताः भवतेर्लुङि ट्वयम् ततः प्रजापतेर्हिरण्यगर्भस्य प्रजा अभूमेति फलवचनम् । अनेन वसोर्धारायाः सर्वकामप्राप्तिहेतुत्वमुक्तम् । वेट् स्वाहेति वसोर्धाराहोमार्थो मन्त्रः वेडिति वषट्कारः । वषट्कारो वै षोऽग्नं यद्वै-ट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयतऽइति [१.३.३.१४.] श्रुतेः ॥ इति वसोर्धाराहोममन्त्राः समाप्ताः ॥ २१ ॥

IX. वाजस्य नु प्रसवे मा° ॥ ३० ॥

का° [१८.५.४.५.] वप्रावत्सम्भृत्य चमसवत्स्रुवेण वाजपेयिकानि वाजस्येम-मिति आग्निकानि च वाजस्य न्विति । क्षेत्रवपनवत्सर्वौषधमौडुम्बरे चमसे सम्भृ-त्य तस्मात्सर्वौषधाच्चमसवत्स्रुवेणेत्यौडुम्बरेण चतुष्कोणपुष्करेण स्रुवेण वाजस्ये-मं प्रसवऽइति सप्तमन्त्रैः [१.२३-३०.] सप्त वाजपेयसम्बन्धीनि वाजप्रसवीयानि

ङ्क्त्वा वाजस्य नु प्रसवे इत्यादिसप्तमन्त्रैः प्रतिमन्त्रमाग्निकानि सप्त वाजप्रसवीयानि तस्मादेव सर्वौषधात्तेनैव स्रुवेण जुहोतीति सूत्रार्थः ॥ व्याख्याता [१.५.] ॥३०॥

विश्वेऽअद्य मरुतो विश्वेऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसागमन्तु विश्वमस्तु द्रविणं वाजोऽअस्मे ॥ ३१ ॥

लुशोधानाकदृष्टा वैश्वदेवी त्रिष्टुप् । अद्यास्मिन्दिने विश्वे सर्वे मरुतः सप्तकगणा आगमन्तु आगच्छन्तु छत्वाभावे ह्रूपम् । विश्वे अन्ये च सर्वे गणदेवता वसवो रुद्रा आदित्याश्च ऊती ऊत्या पूर्वसवर्णः अनेन तर्पणेन निमित्तेनागमन्तु तृप्त्यर्थमागच्छन्त्वित्यर्थः । विश्वे देवा च गणदेवता नोऽस्माकमवसान्नेन हविषा निमित्तेन हविर्ग्रहणायागमन्तु तदागमनेन च विश्वे सर्वेऽग्नयः गार्हपत्यादयः समिद्धाः सम्यग्दीप्ता भवन्तु तदर्थं होमेनेत्यर्थः । तेषां देवानां तुष्ट्या विश्वं सर्वं द्रविणं धनं गोभूहिरण्यादि वाजोऽन्नं चास्मेऽस्माकमस्तु विभक्तेः शे-आदेशः ॥ ३१ ॥

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः ।
वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥ ३२ ॥

तिस्रोऽन्नदेवत्याः तत्राद्यानुष्टुप् द्वे त्रिष्टुभौ । नोऽस्माकं वाजोऽन्नं सप्त प्रदिशः भूरादिलोकत्रयं प्राच्यादिदिक्चतुष्कम् परावतः दूरस्थाश्चतस्रश्च महर्जनतपःसत्याख्याश्चापूरयत्विति शेषः वाशब्दश्चार्थः यद्वा अस्माकं वाजोऽन्नं सप्त प्रदिशश्चतस्रो महाद्याश्चावतु प्रीणातु प्रशब्देन प्रकृष्टं लोकत्रयं दिशः प्राच्याद्याः परावच्छब्दो दूरार्थः महादयो हि लोकत्रयमतीत्य वर्तन्ते अस्मदुत्तान्नेन सप्त लोका दिक्चतुष्कं च तृप्यत्वित्यर्थः । किं च धनसातौ षन्सम्भक्तौ क्तिनन्तो निपातः धनस्य सातौ सम्भजनकाले प्राप्ते वाजोऽन्नं नोऽस्मान्विश्वैर्देवैः सहावतु पालयतु इहास्मिन् लोके यज्ञे वा यदास्माकं धनेच्छा जायते तदास्माकं देवतर्पणाद्धवं बह्वन्नमस्त्विति वाक्यार्थः ॥ ३२ ॥

वाजो नोऽअद्य प्रसुवाति दानं वाजो देवाँ२॥ऽऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयम् ॥ ३३ ॥

अद्यास्मिन्दिने वाजोऽन्नमन्नाधिष्ठात्री देवता नोऽस्मान्प्रसुवाति प्रेरयतु अनुजानातु दानार्थमिति शेषः (36.) अन्नदानेच्छास्माकं भवत्वित्यर्थः । वाजः ऋतुभिः कालैः सह देवान्कल्पयाति यथास्थानं कल्पयतु लेटोऽडाटौ यस्मिन्काले यो देवो यष्टव्यस्तं तत्र यजत्वित्यर्थः । हि चकारार्थो वाजश्च मा मां सर्ववीरं सर्वे वीराः पुत्रपौत्रादयो यस्य स सर्ववीरस्तादृशं जजान जनयतु छन्दसि लुङ्लङ्लिटः पुत्रादियुतं मां करोत्वित्यर्थः । ततो वाजपतिः समृद्धान्नः सन्नहं विश्वा आशा सर्वा दिशो जयेयमन्नदानेन सर्वा दिशो वशीकुर्यामित्यर्थः ॥३३॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवान्हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ॥३४॥

वाजोऽन्नं नोऽस्माकं पुरस्तादस्तु उतापि च नोऽस्माकं मध्यतो गृहमध्ये च वाजोऽस्तु । नोऽस्माकं वाजो हविषा कृत्वा देवान्वर्धयाति वर्धयतु पुष्णातु । हि चार्थे वाजो मां सर्ववीरं पुत्रादियुतं चकार करोतु । वाजपतिरन्नपालकः सन्नहं विश्वा (37.) आशा सर्वा दिशो भवेयम् दिवूपता व्यापकता प्रार्थ्यते यद्वा विश्वा (37.) आशा भवेयं प्राप्नुयाम् वशीकुर्यामित्यर्थः । भू प्राप्तौ ॥३४॥

सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः ।
सोऽहं वाजꣳ सनेयमग्ने ॥३५॥

द्वे विराजौ । दशकास्त्रयो विराडेकादशका वेत्युक्तेरेकादशाक्षरत्रिपादा विराट् तृतीयो व्यूहेन दशकस्तेनैकोना । सोऽहमिति तच्छब्दश्रवणाद्यदोऽध्याहारः हे अग्ने योऽहं पृथिव्याः पयसा पृथिवीसम्बन्धिरसेन मामात्मानं संसृजामि संयोजयामि । अद्भिरोषधीभिश्च मां संसृजामि । सोऽहं संसृष्टपयोऽब्ओषधिशरीरः सन्वाजमन्नं सनेयं सम्भजेयम् । यद्वा व्यत्ययेनास्मच्छब्दस्य युष्मदादेशः हे अग्ने योऽहं त्वं पृथिव्याः पयसाद्भिरोषधीभिश्च त्वां संसृजामि होमेन सोऽहं वाजं सनेयम् ॥३५॥

पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥३६॥

हे अग्ने त्वं पृथिव्यां पयो रसं धाः धेहि स्थापय दधातेर्लुङि मध्यमैकवचने बहुलं छन्दस्यमाङ्योगेऽपीति [पा° ६.४.७५.] अडभावः । ओषधीषु च पयो धाः । दिवि स्वर्गे च पयो धाः । अन्तरिक्षे च पयो धाः । किं च मह्यं मदर्थं प्रदिशः दिशो विदिशश्च पयस्वतीः पयस्वत्यो रसयुताः सन्तु आकृतिपरिणामेन पृथिव्यादयो ममाभीष्टदा भवन्वित्यर्थः ॥३६॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
b. सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥३७॥

का° [१८.५.६-१.] स्रुवं प्रास्य परिश्रित्स्पृक् कृष्णाजिनमास्तीर्य पुष्कादुत्तरꣳ शेषेऽपः कृत्वाभिषेकसामर्थ्यात् क्षीरोदके वा वाजपेयिकानीति श्रुतेस्तत्राभिषिच्यते ब्रह्मवर्चसकामश्चित्यन्वारब्धो देवस्य त्वेति । अस्यार्थः । कर्मापवर्गे औडुम्बरं चतुष्कोणं स्रुवमाहवनीये प्रक्षिप्याग्निपुष्कादुत्तरदिशि परिश्रित्संलग्नं प्राग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तत्र स्थितो ब्रह्मवर्चसकामो यजमानश्चयनकृतान्वारम्भोऽध्वर्युणा सर्वौषधशेषेणाभिषिच्यते । किं कृत्वा सर्वौषधशेषेऽपो जलानि (38.) कृत्वा अभिषेकस्यैव द्रव्यसाध्यत्वात् (39.) अयं पूर्वपक्षः सिद्धान्तमाह क्षीरोदके वेति वा पूर्वपक्षनिरासे शेषे जलसेको न यतस्तत्र क्षीरोदके विद्येते (40.) वाजपेयिकानीति श्रुतिः [१.३.४.७.] अत्र वाजपेयसम्बन्धीनि वाजप्रसवीयानि श्रूयन्ते तत्रोदकक्षीरे स्त एव औडुम्बरे पात्रेऽप आसिच्य पयश्चेत्युक्तेः [कात्या° १४.५.१६.] अतस्तस्मिन्मिश्रेणैवाभिषेको न जलसेक इत्यर्थः ॥ देवस्य त्वा । व्याख्यातम् ॥ सरस्वत्यै लिङ्गोक्तदेवतं यजुः । सरस्वत्यै षष्ठ्यर्थे चतुर्थी सरस्वतीसम्बन्धिन्या वाचो वाण्या यन्तुर्नियन्तुः प्रजापतेः यन्त्रेण नियमेन अग्नेश्च साम्राज्येन चक्रवर्तित्वेन हे यजमान त्वामभिषिञ्चामि मत्कृताभिषेकेण वाक्सद्भिरैश्वर्यं साम्राज्यं च तव सम्पद्यन्तामित्यर्थः ॥३७॥

X. ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ॥३८॥

का॰ [१८.५.१६.] द्वादशगृहीतं विग्राहं जुहोत्यृताषाडिति प्रतिस्वाहाकारꣳ राष्ट्रभृतो वाट्कारान्तः पूर्वः-पूर्वो मन्त्रः । आज्याद्द्वादशगृहीतं गृहीत्वा विभज्य द्वादशांशं कृत्वा ऋतेत्यादिद्वादशमन्त्रैः (41.) प्रतिस्वाहाकारं राष्ट्रभृत्संज्ञा आहुतीर्जुहोति व्यतिषक्तेषु द्वादशमन्त्रेषु पूर्वो मन्त्रः स्वाहा वाडित्यन्तः उत्तरस्ताभ्यः स्वाहेत्यन्तः ततो मन्त्रे यानि पुंलिङ्गानि स न इदं ब्रह्मेत्यादीनि तानि व्यवहितपठितान्यप्यपकृष्य (42.) पठित्वा पूर्वो मन्त्रः सम्पाद्यः यानि च स्त्रीलिङ्गानि तस्यौषधयोऽप्सरस इत्यादीनि तान्युत्कृष्योत्तरो (43.) मन्त्रः सम्पाद्य इत्यर्थः ॥ द्वादश यज्ञर्षि गन्धर्वाप्सरोदेवत्यानि । तत्रायं विभागः । ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाडिति वाडन्तः पूर्वः-पूर्वो मन्त्रः तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहेति स्वाहान्त उत्तर-उत्तरो (44.) मन्त्रः पूर्वो गन्धर्वदेवत्यः उत्तरोऽप्सरोदेवत्यः । एवं पञ्चकण्डिकास्वप्यग्रे मन्त्रविभागो ज्ञेयः । तथा च श्रुतिः [१.४.१.६.] पुꣳसे (45.) पूर्वस्मै जुहोत्यथ स्त्रीभ्यः पुमाꣳसं तद्वीर्येणाद्धात्येकस्माऽइव पुꣳसे जुहोति बह्वीभ्य-इव स्त्रीभ्यस्तस्माद्प्येकस्य पुꣳसो बह्व्यो जाया भवन्त्युभाभ्यां वाट्कारेण च स्वाहाकारेण च पुꣳसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः पुमाꣳसमेव तद्वीर्येणाद्धातीति ॥ तथा चैवमृताषाट् संहितः सुषुम्णाः ऋषिरः भुज्युः प्रजापतिरिति षण्णां पूर्वमन्त्राणामृताषाडित्यादिनामका गन्धर्वा देवताः तस्यौषधयः तस्य मरीचयः तस्य नक्षत्राणि तस्यापः तस्य दक्षिणाः तस्यऽऋक्सामानीति षण्णामुत्तरमन्त्राणामोषध्यादिनामका अप्सरसो देवताः ॥ अथ मन्त्रार्थः । योऽग्निर्गन्धर्वः स नोऽस्माकमिदं ब्रह्म ब्राह्मणजातिमिदं क्षत्रं क्षत्रजातिं च पातु रक्षतु । कीदृशो गन्धर्वः ऋताषाट् ऋतं सत्यं सक्तऽइति ऋतषाट् सत्यं सक्ते असत्ये कुपितो भवतीत्यर्थः सक्तेः साडः स इति [पा॰ ८.३.५६.] षत्वम् पूर्वपदस्य छान्दसो दीर्घः । तथा ऋतधामा ऋतं सत्यमविनश्वरं धाम स्थानं यस्य स ऋतधामा । य ईदृशोऽग्निः तस्मै अग्नये गन्धर्वाय स्वाहा वाट् वषट्कारेण सुहुतमस्त्वित्येको मन्त्रः ॥ तस्याग्नेर्गन्धर्वस्यौषधयो व्रीह्याद्या नाम नाम्ना अप्सरसः स्त्रीत्वेन भोग्याः । कीदृश्य ओषधयः मुदः मोदन्ते जना याभिस्ता मुदः ओषधयो वै मुद ओषधीभिर्हीदꣳ सर्वं मोदतऽइति [१.४.१.७.] श्रु-

तेः । ओषधयोऽग्नेर्भाग्याः तथा च श्रुतिः [१.४.१.७.] अग्निर्ह गन्धर्व ओषधीभिरप्सरोभिर्मिथुनेन सहोच्चक्रामेति । ताभ्य ओषधीभ्यः स्वाहा सुकृतमस्तु ॥३८॥

सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम । स न इदं ब्र° ॥३९॥

यः सूर्यो गन्धर्वः स नोऽस्माकमिदं ब्रह्म क्षत्रं च पातु । कीदृशः संहितः संदधात्यहोरात्रेऽइति संहितः असौ वाऽआदित्यः सꣳहित एष ह्यहोरात्रे संदधातीति [१.४.१.८.] श्रुतेः । विश्वसामा विश्वानि सर्वाणि सामानि प्रतिपादकत्वेन यस्य स विश्वसामा सर्वसामरूपो वा । विश्वसामित्येष ह्येव सर्वꣳ सामेति [१.४.१.८.] श्रुतेः । यदेतदर्चिर्दीप्यिते तन्महाव्रतं तानि सामानीति च । तस्मै सूर्याय स्वाहा वाट् ॥ तस्य सूर्यस्य मरीचयो नामाप्सरसः तेजस्त्वसरणावः सूर्यो ह गन्धर्वो मरीचिभिरप्सरोभिर्मिथुनेन सहोच्चक्रामेति [१.४.१.८.] श्रुतेः । कीदृश्यो मरीचयः आयुवः आ समन्तायुवन्ति मिश्रीभवन्त्यायुवः आयुवाना-इव हि मरीचयः प्लवन्तऽइति [१.४.१.८.] श्रुतेः ताभ्यो मरीचिभ्यः स्वाहा ॥३९॥

सुषुम्णाः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम । स न इदं ब्र° ॥४०॥

यश्चन्द्रमा गन्धर्वः स नोऽस्माकमिदं ब्रह्म क्षत्रं च पातु । कीदृशः सुषुम्णाः शोभनं सुम्नं सुखं यस्मात् सुयज्ञियः यज्ञद्वारा सुखप्रदः याज्ञिकानां चन्द्रलोकातिरुक्तत्वात् । तथा च सूर्यरश्मिः सूर्यस्येव रश्मयः किरणा यस्य । सुषुम्णा इति सुयज्ञिय इत्येतत्सूर्यरश्मिरिति सूर्यस्येव हि चन्द्रमसो रश्मय इति [१.४.१.९.] श्रुतेः तस्मै चन्द्रमसे स्वाहा वाट् ॥ तस्य चन्द्रमसः नक्षत्राणि नाम (46.) अप्सरसः कीदृश्यः भेकुरयः भां कान्तिं कुर्वन्तीति भेकुरयः पृषोदरादित्वात्साधुः । चन्द्रमा ह गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सहोच्चक्राम भेकुरयो नामेति भाकुरयो ह नामैते भाꣳ हि नक्षत्राणि कुर्वन्तीति [१.४.१.९.] श्रुतेः । ताभ्यो नक्षत्राप्सरोभ्यः स्वाहा ॥४०॥

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽअप्सरस ऊर्जो नाम ।
स न इदं ब्र° ॥४१॥

यो वातो वायुर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् सुकृतमस्तु । कीदृशो वातः इषिरः इष गतौ दिवादिः इष्यति गच्छतीति इषिरः श्रीणादिक इरप्रत्ययः (47.) शीघ्रगमनः । विश्वव्यचाः विश्वस्मिन्व्यचो गमनं यस्य स विश्वव्यचाः सर्वतोगमनः । इषिर इति क्षिप्र इत्येतद्विश्वव्यचा इत्येष क्षीदꣳ सर्वं व्यचः करोतीति [१.४.१.१०.] श्रुतेः ॥ तस्यापो नामाप्सरसः वातो ह गन्धर्वोऽद्भिरप्सरोभिर्मिथुनेन सहोच्चक्रामेति [१.४.१.१०.] श्रुतेः । कीदृश्यः ऊर्जः ऊर्जयन्ति जीवयन्ति धान्योत्पादनेनेत्यूर्जः आपो वाऽऊर्जोऽद्भ्यो ह्येवोर्जायतऽइति [१.४.१.१०.] श्रुतेः ताभ्योऽद्भ्योऽप्सरोभ्यः स्वाहा ॥४१॥

भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरस स्तावा नाम ।
स न इदं ब्र° ॥४२॥

यो यज्ञो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् । कीदृशो यज्ञः भुज्युः भुनक्ति पालयति भूतानीति भुज्युः यज्ञो हि सर्वाणि भूतानि भुनक्तीति [१.४.१.११.] श्रुतेः । सुपर्णः शोभनं पर्णं पतनं स्वर्गगमनं यस्य सः यज्ञे स्वर्गे गते यजमानो गच्छति ॥ तस्य यज्ञस्य दक्षिणा नाम अप्सरसः यज्ञो ह गन्धर्वो दक्षिणाभिरप्सरोभिर्मिथुनेन सहोच्चक्रामेति [१.४.१.११.] श्रुतेः । कीदृश्यः स्तावाः स्तूयते यज्ञो यजमानश्च याभिस्ताः स्तावाः दक्षिणाभिर्हि यज्ञः स्तूयतेऽथो यो वै कञ्चन दक्षिणां ददाति स्तूयतऽएव स इति [१.४.१.११.] श्रुतेः । ताभ्यो दक्षिणाभ्यः स्वाहा ॥४२॥

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यऽऋक्सामान्यप्सरस एष्टयो नाम ।
स न इदं ब्र° ॥४३॥

यो मनोरूपो गन्धर्वः स न इदं ब्रह्म क्षत्रं च पातु तस्मै मनसे गन्धर्वाय स्वाहा वाट् हविर्दत्तम् । कीदृशो गन्धर्वः प्रजापतिः प्रजायाः पालकः । विश्व-

कर्मा विश्वं सर्वं करोतीति अन्येभ्योऽपि दृश्यन्तऽइति [पा० ३.२.७५.] करोतेर्मनिन् । स वीद७ सर्वमकरोदिति [१.४.१.१२.] श्रुतिः ॥ तस्य मनसो गन्धर्वस्य ऋक्सामान्यप्सरसः नाम प्रसिद्धम् । कीदृश्यः एष्टयः इष्यते काङ्क्ष्यतेऽभीष्टं याभिस्ता एष्टयः मनो ह गन्धर्व ऋक्सामैरप्सरोभिर्मिथुनेन सहोच्चक्रामिष्टयो नामित्यृक्सामानि वाऽएष्टय ऋक्सामैर्ह्याशासतऽइति नोऽस्त्वित्थं नोऽस्त्विति [१.४.१.१२.] श्रुतेः ताभ्योऽप्सरोभ्यः स्वाहा सुकृतमस्तु ॥४३॥

स नो भुवनस्य पते प्रजापते यस्य तऽउपरि गृहा यस्य वेह ।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥४४॥

का० [१८.५.१७.] पञ्चगृहीतं च रथशिरस्यध्यध्याहवनीयं ध्रियमाणे पञ्च कृत्वः स नो भुवनस्येति । राष्ट्रभृद्धोमानन्तरं पूर्वसंस्कृतादिडाद्यात्पञ्च गृहीत्वाहवनीयोपरि प्रतिप्रस्थात्रादिना धार्यमाणे रथशिरसि तदाज्यं पञ्चधा विभज्य पञ्च कृत्वो जुहोति पञ्चवारं मन्त्र इति सूत्रार्थः ॥ प्रजापतिर्देवत्या प्रस्तारपङ्क्तिः आद्यौ द्वादशकावन्त्यावष्टकौ सा प्रस्तारपङ्क्तिः तृतीयोऽत्र नवकः । हे भुवनस्य पालक हे प्रजापते यस्य ते तवोपरि स्वर्गे गृहाः सन्ति वाथवा यस्य तऽइह भूलोके गृहाः सन्ति स त्वं नोऽस्माकमस्मै ब्रह्मणे ब्राह्मणायास्मै क्षत्राय क्षत्रियाय च महि महत् शर्म सुखं यच्छ देहि स्वाहा सुकृतमस्तु ॥४४॥

a. समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा ।
b. मारुतोऽसि मरुतां गणः शम्भूर्मः ।
c. अवस्यूरसि दुवस्वाञ्छम्भूर्मः ॥४५॥

का० [१८.६.१.] वातहोमान्जुहोत्यञ्जलिनाकृत्य बर्हिर्वेर्देरधो दक्षिणास्यां धुर्युत्तरत उत्तरस्यां दक्षिणतो दक्षिणाप्रष्टेः समुद्रोऽसीति प्रतिमन्त्रम् । रथहोमानन्तरं तं रथमग्नेरुत्तरतो वेदौ प्राङ्मुखमवस्थाप्य तस्य स्थानत्रये त्रीन्वायुहोमान्जुहोति प्रतिमन्त्रं मन्त्रत्रयेण । रथयुगदक्षिणधुरोऽधः प्रथमम् उत्तरधुरोऽधो द्वितीयम् युगमध्याधस्तृतीयम् । किं कृत्वा बर्हिर्वेर्देरञ्जलिना वा तमानीयेति सूत्रार्थः ॥

वायव्यानि त्रीणि यजूंषि । त्रिलोकस्थो वायुः स्तूयते । हे वायो यस्त्वमीदृशोऽसि स त्वं मा मामभिवाहि मदभिमुखमागह स्वाहा सुकृतं तेऽस्तु वा गतिगन्धनयोः लोट् मध्यमैकवचनम् । कीदृशः समुद्रः सम्यक् उन्दति क्लेदैः क्लिन्नो भवतीति समुद्रः उन्दी क्लेदे रक्प्रत्ययः । नभस्वान् नभांसि नक्षत्राणि विद्यन्ते यत्र सः । आर्द्रदानुः आर्द्रं वृष्ट्यवश्यायादिकं ददातीत्यार्द्रदानुः । शम्भूः शमेकिकं सुखं भावयति प्रापयतीति शम्भूः । मयोभूः मयः पारलौकिकं सुखं भावयतीति मयोभूः स्वर्लोकरूपोऽसि असौ वै लोकः समुद्र इति श्रुतेः [१.४.२.५.] स मामभिवाहि ॥ मरुतां वातानामयं मारुतः । मरुतां शुक्रज्योतिःप्रभृतीनां गणः (48.) तन्निवासित्वात् अन्तरिक्षलोको वै मारुत इति [१.४.२.६.] श्रुतेः । शम्भूः मयोभूः त्वं मामभिवाहि पूर्ववत् ॥ अव अवनं रक्षणं सीव्यतीत्यवस्यूः षिवु तन्तुसंताने क्विप् ह्रस्वोः प्रूडनुनासिके चेति [पा° ६.४.११.] ऊठि कृते यणादेशः अयं वै लोकोऽवस्यूरिति [१.४.२.७.] श्रुतेः भूलोकरूपोऽसि । दुवस्वान् दुवोऽन्नं हविर्लक्षणं विद्यते यस्य सः शम्भूरित्यादि पूर्ववत् ॥४५॥

यास्तेऽअग्ने सूर्ये रुचो° ॥४६॥ या वो देवाः सूर्ये रुचो° ॥४७॥

का° [१८.६.६.] नव जुहोति यास्तेऽइति प्रतिमन्त्रम् । अस्यार्थः । पूर्वसंस्कृताज्यादत्सकृत्सकृदादाय नवाहुतीर्जुहोति यास्तेऽअग्ने या वो देवाः रुचं नः तन्वा यामि एताश्चतस्रः स्वर्णेति कण्डिकायां पञ्चयजुर्भिः पञ्चेति नव ॥ द्वे व्याख्याते [१३,२२.२३.] ॥४६॥४७॥

रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥४८॥

अग्निदेवत्यानुष्टुप् प्रथमो नवकः हे अग्ने नोऽस्माकं ब्राह्मणेषु अस्मत्सम्बन्धिषु विप्रेषु रुचं दीप्तिं धेहि आरोपय । नोऽस्माकं राजसु क्षत्रियेषु रुचं कृधि कुरु शृणुष्वित्यादिना [पा° ६.४.१०२.] हेर्धित्वम् शपो लुक् । विश्येषु वैश्येषु शूद्रेषु चास्माकीनेषु रुचं कुरु । किं च मयि विषये रुचा सह रुचं धेहि अवि-

छिन्नां रुचं धेह्यित्यर्थः ॥ यद्वा ब्राह्मणराजविट्शूद्रेषु या रुक् तां नोऽस्माकं धेहि देहि । शिष्टं पूर्ववत् ॥४८॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥४९॥

वरुणदेवत्या त्रिष्टुप् शुनःशेपदृष्टा । अत्र द्वौ तच्छब्दौ वर्तेते तत्रैकस्य यच्छब्दपरिणामः कार्यः । हे वरुण यजमानः हविर्भिः दत्तैः यद्धनपुत्रादिकमाशास्ते इच्छति यत्कामस्तुभ्यं हविर्दत्ते तत् यजमानेष्टं त्वा त्वामहं यामि याचामि तत्त्वया यजमानाय दीयतामित्यर्थः यामीति याच्ञाकर्मसु [निघ० ३.१९.] पठितः अथापि वर्णलोपो भवति तत्त्वायामीति यास्कोक्तेराकारलोपः (49.) । कीदृशोऽहम् ब्रह्मणा त्रयीलक्षणेन वेदेन वन्दमानः त्वां स्तुवानः । किं च हे उरुशंस शंसनं शंसः स्तुतिः शंसु स्तुतौ उरुर्महान् शंसः स्तुतिर्यस्य स उरुशंसः तत्सम्बुद्धौ हे बहुस्तुते इहास्मिन्स्थाने अहेडमानः हेडते क्रुध्यति हेडमानः न हेडमानोऽहेडमानः अक्रुध्यन्सन् त्वं बोधि बुध्यस्व त्वं मत्प्रार्थनां जानीहीत्यर्थः । बहुलम्भ्यो हेर्धिः वा छन्दसीति [पा० ३.४.८८.] हेरपित्त्वाद्धुणाः धलोपश्छान्दसः । किं च नो ऽस्माकमायुर्जीवनं मा प्रमोषीः मा चोरय मुष स्तेये लुङ् न माङ्योगऽइति [पा० ६.४.७४.] अडभावः पूर्णमायुश्च देहीत्यर्थः ॥४९॥

a. स्वर्णा घर्मः स्वाहा । b. स्वर्णार्कः स्वाहा । c. स्वर्ण शुक्रः स्वाहा ।
d. स्वर्णा ज्योतिः स्वाहा । e. स्वर्ण सूर्यः स्वाहा ॥५०॥

पञ्च यजूंष्यग्निदेवत्यानि । सूर्याहर्देववाची स्वःशब्दः । न इवार्थे । अर्काश्वमेधसंततिसंज्ञाः पञ्चाहुतयः तथा च श्रुतिः [१.४.३.१८.] अथार्काश्वमेधयोः संततीर्जुहोतीति अस्यार्थः अर्कोऽग्निः अश्वमेधो रविस्तयोः संततयः संतन्वन्तीति संयोजयन्तीति संततयस्ताः अग्न्यादित्यैक्यकारिका आहुतय इत्यर्थः तथा च श्रुतिः [१.४.३.१८.] अग्निरर्कोऽसावादित्योऽश्वमेधस्तौ सृष्टौ नानैवास्तां तौ देवा एताभिराहुतिभिः समतन्वन्त्समदधुरिति । तदनुसारेण व्याख्या यथा । न इवार्थे स्वः न

स्वरिव अहरिव-दिनकरत्वात्सूर्यस्याहरुपमानम् स्वरिव दिनमिव यो घर्मः आदित्यः तं स्वाहा अग्नौ जुहोमि तमग्ताविति शेषः पूरणीयः आदित्यमग्नौ स्थापयामि असौ वाऽआदित्यो घर्मोऽमुं तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयतीति [१.४.३.१९.] श्रुतेः ॥ स्वरिव सूर्य-इव योऽर्कोऽग्निस्तमादित्ये जुहोमि स्थापयामि अयमग्निरर्क इमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयतीति [१.४.३.२०.] श्रुतेः ॥ स्वरिव स्वर्देवः नकारो निश्चितार्थः स्वर्न देव एव यः शुक्र आदित्यस्तमादित्ये एव जुहोमि स्थापयामि असौ वावादित्यः शुक्रस्तं पुनरमुत्र दधातीति [२१.] श्रुतेः ॥ स्वः स्वर्गः स इव ज्योतिरग्निः स्वर्गप्रदत्वादग्नेः स्वर्गोपमानम् तमग्निमग्ताविव जुहोमि स्थापयामि अयमग्निर्ज्योतिस्तं पुनरिह ददातीति [२२.] श्रुतेः ॥ एवमग्निं सूर्ये सूर्यमग्नौ सूर्ये च सूर्यमग्ताविग्निं च संधाय किं बहुना तयोः संयोगं कृत्वा सूर्यमुत्तमं करोति स्वर्ण सूर्यः स्वाहेति । स्वः न सर्वदेवरूप-इव यः सूर्यस्तं स्वाहा (50.) उत्तमं करोमि अव्ययानामनेकार्थत्वात्स्वाहाशब्द उत्तमार्थः सर्वे देवा भिन्ना भ्रान्त्या भासन्ते वस्तुतः सूर्य एव नानारूपोऽस्तीतीवशब्दार्थः असौ वाऽआदित्यः सूर्योऽमुं तदादित्यमस्य सर्वस्योत्तमं दधाति तस्मादेषोऽस्य सर्वस्योत्तम इति [१.४.३.२३.] श्रुतेः । एवं पञ्चाहुतिभिरग्न्यर्कयोरैक्यं विधाय सर्वदेवेष्वर्कस्योत्तमत्वं कृतमिति भावः ॥५०॥

XI. अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् ।
तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥५१॥

का० [१८.६.१६.] अग्नियोजनं प्रातरनुवाकमुपाकरिष्यन्परिधीनालम्भ्य यथापूर्वमग्निं युनज्मीति प्रत्यृचम् । अस्यार्थः । प्रातरनुवाकोपाकरणात्प्राक् यथापूर्वमित्युपधानक्रमेण ऋक्त्रयेण प्रत्येकं परिधीन्स्पृष्ट्वाग्नियोजनं करोतीति ॥ अग्निर्देवत्यास्तिस्रः द्वे त्रिष्टुभौ तृतीया पङ्क्तिः । शवसा बलेन घृतेनाज्येन चाहमग्निं युनज्मि संयोजयामि युजिर्योगे रुधादिभ्यः श्नम् । कीदृशमग्निम् दिव्यं दिवि भवो दिव्यस्तम् । सुपर्णं शोभनं पर्ण पतनं यस्य तं सुगमनम् । वयसा धूमेन बृहन्तं वह्निर्धूमेन महान्भवति अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरिति [५.३.५.१७.] श्रुतेः । किं च

तेन युक्तेनाग्निना ब्रध्नस्यादित्यस्य विष्टपं लोकं वयं गमेम गच्छेम । गमेराशीर्लिङि लिङ्याशिष्यङिति [पा° ३.१.८६.] अङ्प्रत्यये उत्तमवक्रुवचने रूपम् । विगतस्तापो दुःखं यस्य स विष्टपो लोकः ततोऽधि उपरि ब्रध्नविष्टपोपरिष्टात् स्वो रुहाणाः स्वर्गं लोकमारोक्ष्यन्तः सन्त उत्तमं नाकं दुःखरहितं श्रेष्ठं लोकं गमेमित्यनुवर्तते । रोहतेर्बहुलं छन्दसीति शपि लुप्ति शानचि रूपम् रुहाणा इति । नास्त्यकं दुःखं यत्र स नाकः ॥५१॥

इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षाँस्यपकृधस्यग्ने ।
ताभ्यां पतेम सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥५२॥

हे अग्ने यौ ते तवेमौ पक्षौ उत्तरदक्षिणौ । कीदृशौ अजरौ नास्ति जरा ययोस्तौ सदा नवौ । पतत्रिणौ पतत्रं पतनं ययोरस्ति तौ उत्पतनशीलौ । याभ्यां पक्षाभ्यां रक्षांसि राक्षसान् त्वमपकृंसि नाशयसि । उ एवार्थे । ताभ्यां पक्षाभ्यां वयं सुकृतां पुण्यकृतामेव लोकं पतेम उत्पतेम । यत्र सुकृल्लोके प्रथमजाः प्रथमोत्पन्नाः पुराणाः पुरातना ऋषयो मुनयो जग्मुः ॥५२॥

इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुव आ निषत्तो नमस्तेऽअस्तु मा मा हिꣳसीः ॥५३॥

हे अग्ने यस्त्वमेतादृशस्तस्मै ते तुभ्यं नमोऽस्तु त्वं मां मा हिंसीः हिंसां मा कुरु । कीदृशस्त्वम् इन्दुः इन्दति ईष्टे इन्दुः ईश्वरः इदि परमैश्वर्ये चन्द्रवदाह्लादको वा । दक्षः उत्साहवान् श्येनः श्येनपक्षिवदाकाशधारित्वाद्येनः (51.) यद्वा शंसनीयगतिः । ऋतावा ऋतं सत्यं यज्ञ उदकं वास्यास्ति ऋतवा संहितायां दीर्घः । हिरण्यपक्षः सुवर्णशकलैर्हिरण्यरूपौ पक्षौ यस्य । शकुनः पक्ष्याकारः । भुरण्युः बिभर्तीति भुरण्युः भृञ औणादिकः कन्युप्रत्ययः पोषकः । महान्प्रभावेण । ध्रुवः स्थिरः । सधस्थे ब्रह्मणा सह स्थाने आ निषत्तः समन्तान्निषण्णः । सह तिष्ठन्ति यत्रेति सधस्थं सध मादस्थयोश्छन्दसीति [पा° ६.३.९६.] सधादेशः । नसत्तेत्यादिना [पा° ८.२.६१.] निष्ठायां निपातः ॥५३॥

दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् ।
विश्वायुः शर्म सप्रथा नमस्पथे ॥५४॥

का° [१८. ६. १७.] आग्निमारुतस्तोत्रस्य पुरस्ताद्विमोचनं परिधिसंध्योर्दिवो मूर्धेति प्रत्यृचम् । यज्ञायज्ञियस्तोत्रप्रकरणात्प्राक् दिवो मूर्धेति ऋग्द्वयेन दक्षिणोत्तरयोः परिधिसंध्योरुपस्पृश्याग्निविमोचनं करोतीति सूत्रार्थः ॥ आग्नेयी परोष्णिक् आद्यावष्टकौ तृतीयो द्वादशकः सा त्रिपादा परोष्णिक् अत्राद्यो दशकः द्वितीयः सप्तकः तृतीयो द्वादशकस्तेनैकाधिका । हे अग्ने यस्त्वमीदृशोऽसि तस्मै पथे मार्गाय स्वर्गमार्गरूपाय नमो नमस्कारोऽस्तु अग्निमुखो हि देवयानपन्थाः श्रुतावुक्तः । कीदृशस्त्वम् दिवो मूर्धा स्वर्लोकस्योत्तमाङ्गस्थानीयः । पृथिव्या नाभिः मध्यस्थानीयः नह्यतिऽनया सा नाभिः नह्यति बध्नाति जीवनेनेति नाभिः नह्यो भश्चेति [उणा° ४. १२७.] इन्प्रत्ययो (52.) णिश्च (53.) भात्तादृशः नित्वादाद्युदात्तः निञत्यादि नित्यमित्युक्तेः [पा° ६. १. ११७.] । पृथ्वी लोकानां जीवनमग्निर्निबन्धनमिति भावः । अपां जलानामोषधीनां व्रीह्यादीनां च ऊर्क् रसः सारः । विश्वायुः विश्वं सर्वमायुर्यस्य सः बहुजीवनः यद्वा विश्वेषां सर्वेषां प्राणिनामायुर्जीवनम् तदधि जीवनत्वात्तेषामिति भावः । शर्म शरणभूतः सर्वेषाम् सप्रथाः प्रथनं प्रथो विस्तारः प्रथसा सह वर्तमानः सप्रथाः तिर्यगूर्ध्वमधश्चानवच्छिन्नप्रभावः । ईदृशायाग्नये नमः ॥५४॥

विश्वस्य मूर्धन्नधितिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिं भिन्त्त ।
दिवस्पर्जन्यादुत्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्यावतेळ ॥५५॥

आग्नेयी महापङ्क्तिर्जगती आद्यो व्यूहेन षडक्षरः द्वितीयः सप्तकः तृतीयो दशकः चतुर्थोऽष्टकः पञ्चमो नवकः षष्ठो नवकः एवमष्टचत्वारिंशदर्णा महापङ्क्तिः । हे अग्ने स त्वं नोऽस्मान् वृष्या कृत्वा अव रक्ष वृष्टिं कृत्वा पालयेत्यर्थः । किं कृत्वा दिवो द्युलोकात् पर्जन्यान्मेघात् अन्तरिक्षादाकाशात् पृथिव्याः भूमेः सकाशाद्वान्यत्र वा यत्र जलं ततः प्रदेशाज्जलमादायेति शेषः । यस्त्वं श्रितः इन्द्रियाणि सुषुम्णां नाडीमाश्रितः सन् विश्वस्य मूर्धन् मूर्धनि शिरसि अधितिष्ठसि मूर्धन्-

शब्दात्सुपां सुलुगिति [पा° ७.१.३९.] सप्तम्या लुक् सर्वेषां मूर्ध्नि उपरि रविरूपेण दीप्यसऽइत्यर्थः । यस्य ते तव समुद्रे समुनत्त्याद्रेर्भवतीति समुद्रोऽन्तरिक्षं तत्र हृदयं मध्यभागः भुवि पादौ स्वर्लोके शिरोऽन्तरिक्षे मध्यभागः त्रिलोकव्यापीत्यर्थः ॥ यस्य ते अप्सु जलेषु आयुः जीवनं जलाधीनं जीवनं तव जलाद्दृष्ट्वा जायते ततोऽग्निरित्यग्नेर्जलाधीनजीवनत्वम् । किं बहुना हे अग्ने अपो जलानि दत्त देहि उदधिं भित्त भिन्धि । उदकानि दधाति धीयन्ते वात्रेत्युदधिर्मेघः तं विदार्य मेघं भिन्धि जलं देहीत्यर्थः पेषंवासवाहनधिषु चेति [पा° ६.३.५८.] उदकस्योदादेशः । दत्त भित्तेत्युभयत्र व्यत्ययो बहुलमिति [पा° ३.१.८५.] वचनव्यत्ययः ॥५५॥

इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः ।
तस्य न इष्टस्य प्रीतस्य द्रविणेहागमेः ॥५६॥

का° [१८.६.११.] अधरसमिष्टयजुरन्तऽइष्टो यज्ञ इति प्रत्यृचमपरे । समिन्द्र णइत्यादिनवानामधरसमिष्टयजुषां [८.१५.] होमान्ते इष्टो यज्ञः इष्टोऽग्निरिति द्वाभ्यामपरे आग्निके द्वे समिष्टयजुषी जुहोतीति सूत्रार्थः ॥ यज्ञदेवत्या उक्थिग्गालवदृष्टा अष्टविंशत्यक्षरत्वात् । अध्वर्युर्द्रव्यं प्रत्याह । हे द्रविण द्रव्य तस्य यजमानस्य इह सदने त्वमागमेः आगच्छ आङ्पूर्वाद्गमेश्छान्दसाभावे लिङि मध्यमैकवचने रूपम् । कीदृशस्य यजमानस्य नोऽस्माकमिष्टस्य वल्लभस्य प्रीतस्य अस्मासु स्निग्धस्य । तस्य कस्य यस्य यजमानस्य यज्ञो भृगुभिः भृगुगोत्रैर्ब्राह्मणैः वसुभिर्वस्वादिदेवैश्च इष्टः सम्पादितः । कीदृशो यज्ञः आशीर्दाः आशिषोऽभिलषितपदार्थान्ददातीत्याशीर्दाः क्विप् । विप्रैर्देवैर्यस्य यज्ञः कृतस्तस्य गृहे त्वं धन सर्वदा तिष्ठेत्यर्थः ॥५६॥

इष्टोऽअग्निराकूतः पिपर्तु (54.) न इष्टꣳ हविः ।
स्वगेदं देवेभ्यो नमः ॥५७॥

अग्निर्देवत्या गायत्री गालवदृष्टा । अग्निर्नोऽस्माकमिष्टमभिलषितं पिपर्तु पूर्-

यतु ददावित्यर्थः नोऽस्मान्पालयतिति वा पॄ पालनपूरणयोः लोट् ह्वादित्वाद्धि-त्वम् अर्तिपिपर्त्योश्चेति [पा° ७.४.७७.] अभ्यासस्येत्वम् । कीदृशोऽग्निः इष्टः कृत-यागः । हविः विभक्तिव्यत्ययः हविषा आक्तः समन्तात्तर्पितः । किं च इदं नमः हविः समिष्टयजुर्लक्षणं देवेभ्योऽर्थायास्तु । कीदृशं स्वगा स्वयं गमनशीलं वि-भक्तेराकारः ॥५७॥

XII. यदाकूतात्समसुस्रोद्धृदो वा मनसो वा सम्भृतं चक्षुषो वा ।
तदनु प्रेत सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥५८॥

का° [१८.६.२२.] हृदयशूलाग्ने स्रुवाङ्कृतीर्जुहोति यदाकूतादिति प्रत्यृचमष्टौ । साग्निचित्ये मैत्रावरुण्यनूबन्ध्यावश्यमेका भवति तेन तस्या हृदयशूलसम्बन्धिस-मिदाधानाग्ने कृते यदाकूतादिति प्रत्यृचमष्टौ स्रुवाङ्कृतीर्जुहोतीति सूत्रार्थः ॥ अष्टा-वृच अग्निर्देवत्या विश्वकर्मदृष्टाः आद्या जगती त्रयः पादा एकादशार्णाः चतुर्थश्च-तुर्दशार्णाः । हे ऋत्विजो यूयं तदनु प्रेत प्रजापतिकृतं कर्मानुगच्छतानुसरत प्रजाप-तिशरीरादुत्पन्नं यत्कर्म वैदिकं तत्कुरुतेत्यर्थः । तत्र कर्मणि कृते सति सुकृतां पुण्यवतां लोके ऽ एवार्थे स्वर्गमिव प्रेतेत्यनुषङ्गः स्वर्गं गच्छत । प्रथमजाः पूर्वो-त्पन्नाः पुराणाः पुरापि नवा अजरामरा ऋषयो यत्र लोके जग्मुः । तत्किं कर्म यत्प्रज्ञाक्तिराकूतादभिप्रायात् हृदो वा हृदश्च बुद्धेः मनसः संकल्पात्मकात् चक्षुषः चक्षुरुपलक्षणम् (55.) चक्षुरादीन्द्रियेभ्यश्च समसुस्रोत् संस्रुतं प्रसृतम् ब्रह्मणा य-त्सर्वात्मना सृष्टं कर्म तत्कृत्वा स्वर्लोकं गच्छतेत्यर्थः । कीदृशं कर्म सम्भृतं सम्भा-रैः पुष्टं पूर्णसामग्रीकम् ॥ मनःप्रवर्तक आत्मनो धर्म आकूतम् । समसुस्रोदिति स्रु गतावित्यस्माच्छन्दसीति [पा° २.४.७६.] ङुहोत्यादित्वात् श्लौ द्वि-त्वम् ॥५८॥

ऋतꣳ सधस्थ परि ते ददामि यमावहाच्छिवधिं जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वोऽअत्र तꣳ स्म जानीत परमे व्योमन् ॥५९॥

तिस्रस्त्रिष्टुभः । सह तिष्ठन्ति देवा यत्रेति सधस्थः स्वर्गः तं प्रार्थयते । हे स-

धस्थ एतं यज्ञमानं ते तव परिददामि । ज्ञातवेदा अग्निर्यं शेवधिं सुखनिधिमाङ्गतिपरिणामभूतमावक्षात् आवक्षति प्रापयति तं यज्ञफलभूतं च सुखनिधिं तव परिददामि । उभयं रक्षणार्थं तुभ्यं ददामीत्यर्थः ॥ एवं यज्ञमानं यज्ञं च स्वर्गे समर्प्य तत्स्थान्देवानर्थयते अन्विति हे देवा यज्ञपतिर्यज्ञमानो वो युष्मानन्वागन्ता कर्मसमाप्तौ भवतः प्रत्यागमिष्यति लुट् । अत्रास्मिन्परमे व्योमन् उत्कृष्टे व्योम्नि आकाशे स्वर्गाख्ये आगतं तं यज्ञमानं यूयं ज्ञानीत स्मेति पादपूरणाः स्वर्गागतः स भवद्भिः सम्भावनीय इत्यर्थः ॥ आवक्षात् वक्षतेर्लेट् इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.१७.] तिप इलोपः (56.) लेटोऽडाटावितिं [पा° ३.४.१४.] अडागमः । शेव इति सुखनाम [निघ° ३.६.] शेवं धीयतेऽस्मिन्निति शेवधिः ॥५१॥

एतं ज्ञानाथ परमे व्योमन्देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवाथाविरस्मै ॥ ६० ॥

सह तिष्ठन्ति सधस्थाः । परमे व्योमन् उत्कृष्टे स्वर्गभूते व्योम्नि सह स्थिता हे देवाः एतं यज्ञमानं ज्ञानाथ ज्ञानीत लेटो मध्यमबहुवचने आडागमे रूपम् । किं च अस्य यज्ञमानस्य रूपं विद वित्त ज्ञानीत प्रत्यभिज्ञानाय वेत्तेर्विकरणव्यत्यये शः वचनव्यत्ययश्च । विदितरूपोऽयं यद्यदा देवयानैः पथिभिः स्वर्गमार्गैः आगच्छात् आगच्छति इलोपाडागमौ तदा इष्टापूर्ते श्रौतस्मार्तकर्मफले अस्मै यज्ञमानायाविः कृणवाथ प्रकटीकुरुत दत्तेत्यर्थः देवा यान्ति येषु ते देवयानाः करणाधिकरणयोश्चेति [पा° ३.३.११७.] ल्युट् । उपभोगस्थानभेदाद्बहुत्वं पूज्यार्थं वा ॥ इष्टं च पूर्तं च इष्टापूर्ते देवसम्बन्धिकर्मत्वाद्देवताद्वन्द्वे चेति [पा° ६.३.२६.] पूर्वपदस्यानङ् आपूर्ते चेति वा । कृणवाथ कृञ् कृतौ स्वादिः आडागमश्च ॥ ६० ॥

उद्बुध्यस्वाग्ने प्रतिजागृ° ॥ ६१ ॥ येन वहसि सहस्रं पे° ॥ ६२ ॥

उद्बुध्यस्व । त्रिष्टुप् ॥ येन वहसि । अनुष्टुप् ॥ एते द्वे व्याख्याते [१५,५४.५५.] ॥ ६१ ॥ ६२ ॥

प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा ।

ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ ६३ ॥

तिस्रोऽनुष्टुभः । अग्ने नोऽस्माकमिमं यज्ञं स्वः स्वर्गं नय । किं कर्तुम् देवेषु गन्तवे देवान्प्रति गन्तुं प्राप्तुम् तुमर्थे तवेन्प्रत्ययः नित्त्वादाद्युदात्तः । कीदृशं प्रस्तरेण स्रुगाधारभूतेन दर्भमुष्टिना परिधिना परिधिभिस्त्रिभिर्बाहुमात्रैः काष्ठैः स्रुचा स्रुक्स्रुवादिकया वेद्या मितया वेदेर्भूम्या वा बर्हिषा दर्भपूलकेन (57.) ऋचा ऋगादिभिर्मन्त्रैश्चोपलक्षितमिति शेषः ॥ ६३ ॥

यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः ।

तद्ग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥ ६४ ॥

वैश्वकर्मणः विश्वकर्मा प्रजापतिस्तदीयः विश्वकर्मैव वैश्वकर्मणः स्वार्थे तद्धितो वा विश्वकर्ता अग्निः नोऽस्माकं तदानं स्वः स्वर्लोके देवेषु मध्ये दधत् दधातु स्थापयतु फलभोगायेत्यर्थः । तत्किम् यद्दत्तं भार्यापुत्रजामातृभगिनीतत्पत्यादिभ्यो दत्तम् यच्च परादानं परोपकाराय दयादिनान्धकृपणेभ्यो दत्तम् यच्च पूर्तं स्मृतिविहितं विप्रभोजनकूपारामादि याश्च दक्षिणाः यज्ञसम्बन्धिन्यः । यज्ञे गते यज्ञाङ्गत्वाद्यजमानः स्वर्गत एव ॥ ६४ ॥

यत्र धारा अनपेता मधोर्घृतस्य च याः । तद्ग्निर्वैश्व° ॥ ६५ ॥

वैश्वकर्मणः विश्वकर्ताग्निस्तत् तत्र स्वः स्वर्गे देवेषु मध्ये नोऽस्मान्दधत् दधातु स्थापयतु तत्र यत्र देशे मधोर्मधुनो घृतस्य च याश्चान्याः पयोदध्यादीनां धाराः प्रवाहा अनपेता न अपेता उपभुज्यमाना अप्यक्षीणा वर्तन्ते ॥ ६५ ॥

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।

अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥ ६६ ॥

अग्न्यद्वैतवादिनी (58.) त्रिष्टुप् देवश्रवोदेववातदृष्टा यज्ञेऽविनियुक्ता । अग्निप्रकरणात्स्वयजमान आत्मानमग्नित्वेन ध्यायति । जन्मना उत्पत्त्यैवाहमग्निरस्मि अग्निरूपोऽस्मि । नाम विभक्तिलोपः नाम्ना हविः पुरोडाशादिकमप्यहमस्मि । कीदृशोऽहं जातं-जातं विन्दतऽइति जातवेदाः उत्पन्नस्य सर्वस्य स्वामीत्यर्थः । अर्कः

अर्चनीयो यज्ञोऽप्यङ्गमेव । त्रिधातुः त्रयो धातव ऋग्यजुःसामलक्षणा यस्य । रज-सो विमानः रज उदकं तस्य निर्माता विमिमीतऽइति विमानः नन्द्यादित्वात्कर्त-रि ल्युट् । अजस्रः न जसति क्षीयतऽइत्यजस्रः अनुपक्षीणः जसु उपक्षये नमिक-म्पीत्यादिना [प्रा° ३. २. १६७.] रप्रत्ययः । घर्मः घृ क्षरणदीप्त्योः जिघर्ति घर्मः औ-णादिको मप्रत्ययः दीप्तः आदित्यरूपः क्षरणो मेघरूपो वा । एतादृशोऽग्निरहं य-तस्ततो घृतं मे मम चक्षुर्नेत्रं घृतस्रोमिनं पश्यामीति भावः अमृतं हविर्मम आ-सन् आस्ये मुखे पदन्न इत्यादिना [पा° ६. १. ६३.] आस्यशब्दस्यासन्नादेशः सप्तम्या लुक् मन्मुखे हविर्जुह्वतममृतं करोमीति भावः । एवमात्मन्यग्न्यद्वैतं (59.) स-म्पाद्यम् ॥ ६६ ॥

a. ऋचो नामास्मि यजूꣳषि नामास्मि सामानि नामास्मि ।

b. येऽअग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि ।

तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥ ६७ ॥

ऋचः । आत्मदेवत्यं यजुः सप्तदशाक्षरम् । यज्ञेऽस्य विनियोगो नास्ति । यज-मानोऽनेनात्मनि वेदत्रयात्मकत्वं सम्पादयति । नाम नाम्नाहमृचोऽस्मि ऋग्वेदरू-पोऽस्मि यजूꣳषि नामास्मि यजुर्वेदरूपोऽस्मि सामानि नामास्मि सामवेदो नाम्ना-स्मि ॥ का° [१८. ६. २३.] चित्रोऽसीति चित्यनाम कृत्वोपतिष्ठते येऽअग्नय इति । चित्यस्याग्नेः चित्रोऽसीति नाम विधाय तमुपतिष्ठते कर्मशेषं समाप्येदमुपस्थानं कार्यमुपस्थानानन्तरं समारोपविधानादिति सूत्रार्थः ॥ अग्निदेवत्यानुष्टुप् अस्यां पृ-थिव्यामधि अस्याः पृथिव्या उपरि ये अग्नयो वर्तन्ते । कीदृशाः पाञ्चजन्याः पञ्चज-ना मनुष्यास्तेभ्यो हिताः पाञ्चजन्याः यद्वा पञ्च जनाः समूहाः चितिरूपा येषां ते पञ्चजनास्तऽएव पाञ्चजन्याः स्वार्थे तद्धितः । हे चित्याग्ने तेषां पृथिवीस्थानाम-मीषां त्वमुत्तमोऽसि श्रेष्ठोऽसि अतो नोऽस्मान् जीवातवे चिरजीवनाय प्रसुव प्रे-रय चिरं जीवयेत्यर्थः जीवेरातुरिति [उणा° १. ७१.] आतुप्रत्ययः व्यवहिताश्चेति [पा° १. ४. ८२.] प्रेत्यस्य सुवेत्यनेन व्यवधानम् ॥ ६७ ॥

XIII. वार्त्रघ्न्याय शवसे पृतनाषाह्याय च । इन्द्र त्वावर्तयामसि ॥ ६८ ॥

का॰ [१७.७.१.२.] चितिं पुरीषवतीमुपतिष्ठते वार्त्रघ्न्यायेति सप्तभिरष्टाभिरेके दशभिर्वा । मृत्पूरणानन्तरमेतां चितिमुपतिष्ठते सप्तभिरष्टाभिरेकेषां मते दशभिर्वेति सूत्रार्थः ॥ आग्नेय्यः सप्त ऋच इन्द्रदृष्टाः आग्ने द्वे वृत्रघ्नेन्द्रदेवत्ये गायत्रीत्रिष्टुभौ विश्वामित्रेणापि दृष्टे । हे इन्द्र वयं त्वा त्वामावर्तयामसि आवर्तयामः इदन्तो मसि उपतिष्ठामहे । किमर्थं शवसे बलाय बद्धलवृद्धये इत्यर्थः । कीदृशाय शवसे वार्त्रघ्न्याय वृत्रस्य दैत्यस्य घ्न्यायां घ्नने कुशलं वार्त्रघ्न्यं वृत्रघातसमर्थमित्यर्थः । च पुनः पृतनाषाह्याय पृतना शत्रुसेना सह्यतेऽभिभूयते येन तत्पृतनासाह्यं तस्मै शत्रुसेनापराभवसमर्थायेत्यर्थः ॥ ६८ ॥

सद्दानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सम्पिणाक्कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥ ६९ ॥

हे पुरुहूत पुरुभिर्बहुभिर्हूतोऽभिहूतः पुरुहूतः हे बहुभिराहूत हे इन्द्र त्वं सद्दानुं शत्रुमहस्तं हस्तहीनं कृत्वा सम्पिणाक् सम्पिङ्हि चूर्णय । सह इति बलनाम [निघ॰ २.९.] सहो बलं ददाति सद्दानुः पृषोदरादित्वात्सहःशब्दान्त्यलोपः नुप्रत्ययो ददातेः अयमसमर्थोऽस्ति त्वं तु समर्थ इति यः शत्रुं प्रेर्य बलं ददाति स सद्दानुः यद्वा सह एकीभूय योद्धुमल्पं ददाति सद्दानुः शत्रुः । कीदृशं क्षियन्तं क्षियति वसतीति क्षियन् तम् क्षि निवासगत्योः तुदादिः शतृप्रत्ययः निकटे वसन्तम् । कुणारुं क्षणति हिंसति कुणारुः तम् क्षण शब्दे औणादिक आरुप्रत्ययः धातोः सम्प्रसारणं च । पिष्लृ संचूर्णने लङि मध्यमैकवचनं रुधादित्वात् श्नम् संपूर्वः अडभावस्त्वार्षः षस्य कुत्वमार्षम् । हे इन्द्र वृत्रं दैत्यमपादं पादहीनं कृत्वा तवसा बलेन त्वमभिजघन्थ जहि सम्यक् मारय छन्दसि लुङ्लङ्लिटः इति [पा॰ ३.४.६.] लोडर्थे लिट् । कीदृशं वृत्रं वर्धमानं जगद्व्याप्नुवन्तम् । पियारुं सुराणां हन्तारं पियतिर्हिंसाकर्मा ॥ ६९ ॥

वि न इन्द्र मृधो जहि ॥ ७० ॥

शासदृष्टानुष्टुप् । व्याख्याता [८.४४.] ॥ ७० ॥

मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्था परस्याः ।

सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रूꣳताढि वि मृधो नुदस्व ॥७१॥

ऋषिदृष्टा त्रिष्टुप् हे इन्द्र परस्याः परावतो दूरतरादेशादाजगन्थ आगच्छ परावच्छब्दो दूरवचनः परस्या दूरदिशोऽपि परावतः दूरदेशादित्यर्थः लोडर्थे लिट् । आगत्य च शत्रून्विताढि विशेषेण ताडय । मृधः संग्रामांश्च विनुदस्व विशेषेण प्रेरय दूरीकुरु । किं कृत्वा पविं वज्रं संशाय तीक्ष्णीकृत्य शो तनूकरणे ल्यप् । कीदृशं पविं सृकम् सरति शत्रुशरीरे गच्छतीति सृकः तम् । तिग्ममुत्साक्ववत्तम् तिग्मं तेजतेरुत्साक्वर्कर्मण इति [निरु° १०.६.] यास्कः । क-इव मृगो न मृग-इव यथा मृगः सिंहो दूरादित्य प्राणिनं हन्ति । कीदृशो भीमः भयंकरः । कुचरः कुत्सितं चरति गच्छति कुचरः । गिरिष्ठाः गिरौ तिष्ठति गिरिष्ठाः पर्वताश्रयः ॥ ताडयतिर्हिंसाकर्मा तस्य हौ परे छन्दस्युभयथेत्यार्धधातुकत्वे [पा° ३.४.११७.] णिचो लोपः झलो झलित्यो र्धेर्धिः ष्टुत्वम् ताढि ॥७१॥

वैश्वानरो न ऊतयऽआ प्रयातु परावतः । अग्निर्नः सुष्टुतीरुप ॥७२॥

वैश्वानरदेवत्या गायत्री । वैश्वानरः (60.) अग्निर्नोऽस्माकं सुष्टुतीः शोभनाः स्तुतीरुप उपश्रोतुं परावतो दूरदेशादा प्रयातु आगच्छतु । किमर्थं नोऽस्माकमूतये रक्षणाय अस्मान्रक्षितुमित्यर्थः ॥७२॥

पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वा ओषधीरावि वेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु नक्तम् ॥७३॥

वैश्वानरदेवत्या त्रिष्टुप् कुत्सदृष्टा । वैश्वानरः सर्वनरेभ्यो हितोऽग्निर्दिवा दिवसे नोऽस्मान्पातु रक्षतु स च नक्तं रात्रौ नः पातु सर्वदास्मान्रक्षत्वित्यर्थः । स कः योऽग्निर्दिवि द्युलोके पृष्टः कोऽयमादित्यात्मना तपतीति मुमुक्षुभिः पृष्टः अन्तरिक्षे (61.) यमेतमादित्ये पुरुषं वेदयते स इन्द्रः स प्रजापतिस्तद्ब्रह्मेति श्रुतेः । यश्चाग्निः पृथिव्यामन्तरिक्षलोके पृष्टः कोऽयं विद्युदात्मना स्थित इति ज्ञानार्थिभिः पृष्टः अन्तरिक्षनामसु [निघ° १.३.] पृथिवीति पठितम् । यश्च विश्वा ओषधीः सर्वा व्रीह्याद्योषधीः आविवेश प्रविष्टः सन्पृष्टः कोऽयं प्रजानां जीवनहेतुस्तापपा-

कप्रकाशैरुपकरोति । यश्च सहसा बलेनाधर्युणा मथ्यमानः सन्पृष्टः जनैः कोऽयं मथ्यतऽइति । सोऽयमग्निर्दिवा नक्तं रिषो बधात्पातु रिषतिर्हिंसाकर्मा मास्मान्नाशयत्वित्यर्थः ॥७३॥

अश्याम॑ ते काम॑मग्ने तवो॑तीऽअश्याम॑ र॒यि॒ꣳ र॑यिवः सुवी॒र्म्॑ ।
अश्याम॑ वाज॑मभि वाज॑यन्तोऽश्याम॑ द्यु॒म्नम॑जरा॒जर॑ं ते ॥७४॥

भरद्वाजदृष्टाग्नेयी कामवती त्रिष्टुप् । हे अग्ने तव ऊती ऊत्या अवनेन पालनेन वयं ते काममभिलाषमश्याम प्राप्नुयाम यमिच्छाम इत्यर्थः । अशूङ् व्याप्तौ विकरणव्यत्ययेन लोटि श्यन्प्रत्ययः । रयिर्धनमस्यास्तीति रयिवान् तत्सम्बुद्धौ हे रयिवः धनवन् सुवीरं रयिं वयमश्याम शोभना वीराः पुत्रा यत्र तं रयिं पुत्रसहितं धनं वयं प्राप्नुयाम । वाजयतिरर्चतिकर्मा [निघ० ३.१४.] वाजयन्तो वह्निमर्चयन्तः सन्तो वयं वाजमन्नमभि अश्याम समन्तात्प्राप्नुयाम । हे अजर नास्ति जरा यस्य सोऽजरः हे जरारहित अजरमक्षीणं ते तव द्युम्नं यशो वयमश्याम सर्वदा यशस्विनो भवामित्यर्थः ॥७४॥

व॒यं तेऽअ॒द्य र॑रि॒मा हि काम॒मुत्ता॑नहस्ता॒ नम॑सोप॒सद्य॑ ।
यज्ञि॑ष्ठेन॒ मन॑सा॒ यज्ञि॑ दे॒वान्त्स्रु॒धता॒ मन्म॑ना॒ विप्रोऽअ॑ग्ने ॥७५॥

उत्कीलदृष्टाग्नेयी त्रिष्टुप् । हे अग्ने हि यस्मात्कारणात् वयं ते तुभ्यमद्यास्मिन्दिने कामं. हविः ररिम दद्मः काम्यतऽइष्यतऽइति कामं हविः रा दाने लिट् अन्येषामपि दृश्यतऽइति [पा० ६.३.१३७.] ररिमित्यस्य संहितायां दीर्घः । किं कृत्वा नमसा उपसद्य नमस्कारेणोपसंगम्य नमस्कृत्य निकटमागत्य हविर्दद्म इत्यर्थः । कीदृशा वयम् उत्तानहस्ताः उत्ताना हस्ता येषां ते अबद्धमुष्टिकाः त्यक्तकार्पण्या इत्यर्थः । तथा मनसा उपलक्षिताः सावधाना इत्यर्थः । कीदृशेन मनसा यज्ञिष्ठेन यजतीति यष्टृ अतिशयेन यष्टृ यज्ञिष्ठं तेन तुरिष्ठेमेयःस्विति [पा० ६.४.१५४.] तृचो लोपः यागतत्परेणेत्यर्थः । तथा स्रुधता स्रिध गतौ स्रेधति अन्यत्र गच्छति स्रेधत् न स्रेधत्स्रुधत् तेन अनन्यगतेनेत्यर्थः । मन्मना मन्यते देवान्

वमहिमानं जानाति मन्म तेन मन्यतेर्मन्प्रत्ययः देवतायाथात्म्यज्ञेनेत्यर्थः । यत एतादृशेन मनसा वयं हविः ररिम अतो हे अग्ने विप्रो मेधावी त्वं देवान्यक्षि यज्ञ मद्दत्तेन हविषा देवांस्तर्पयेत्यर्थः यज्ञतेर्बहुलं छन्दसीति [पा° २.४.७३.] शपि लुप्ते मध्यमैकवचने षत्वे ष्टुत्वे यक्षीति रूपम् । विप्रोऽअग्ने इत्यत्र प्रकृत्यान्तःपादमव्यपरऽइति [पा° ६.१.१०५.] प्रकृतिभावः ॥७५॥

धामछदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥७६॥

विश्वदेवदेवत्यानुष्टुप् । एते देवा नोऽस्माकं यज्ञं प्रावन्तु प्रकर्षेण रक्षन्तु अन्यूनातिरिक्तं कुर्वन्त्वित्यर्थः अन्यूनातिरिक्त एव कर्मणो रक्षणम् । शुभे इष्टे स्थाने स्वर्गे च यज्ञं स्थापयन्त्विति शेषः यद्वा शुभे स्थाने यज्ञं प्रावन्तु । एते के अग्निः । देव इति सर्वत्र सम्बन्धनीयम् । इन्द्रः । ब्रह्मा चतुर्मुखः । बृहस्पतिर्जीवः । विश्वे देवाश्च । धामानि स्थानानि छादयति आच्छादयति धामछत् छादयतेः क्विपि ह्रस्व इति (62.) क्विपि णिलोपे धातोर्ह्रस्वः धाम्नां छदनं न्यूनानां पूरणमतिरिक्तानां समीकरणम् इदं सर्वेषां विशेषणम् । तथा सचेतसः चेतसा प्रज्ञया सहिताः सचेतसः समानं चेतो येषामिति वा । समानज्ञाना अग्न्यादयो मद्यज्ञं रक्षन्त्वित्यर्थः ॥७६॥

त्वं यविष्ठ दाशुषो° ॥७७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामष्टादशोऽध्यायः ॥ ॥

ऋष्यादि प्रागुक्तम् व्याख्याता च [१३.५२.] ॥७७॥

इति श्री-महीधरकृते वेद-दीपेऽष्टादश ईरितः (63.) । वसोर्धारादिकोऽध्यायश्चित्युपस्थावसानकः ॥१८ (64.)॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १७, ८७ [जुषस्व शतधारमर्व°] - ११ ॥१-१२॥ ॥

II. ॥ १८, १ [आवश्च]. २ [मिऽसुं च] - ४ ॥१-४॥१६॥ ॥

III. ॥ ५ [क्रीला] ॥१॥ ११ ॥२॥ ७ [सीरं च मे लयश्च मे सूश्च मे प्रसूश्च मे] ॥३॥ ८ ॥४॥२०॥ ॥

IV. ॥ १ ॥१॥ ६ [सुगं च मे शयनं] ॥२॥ १० ॥३॥ १२ ॥४॥२४॥ ॥

V. ॥ १३ [सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे] ॥१॥ १४ ॥२॥ १५ [यामश्च मऽइत्या] ॥३॥२७॥ ॥

VI. ॥ १६-१८ ॥१-३॥३०॥ ॥

VII. ॥ ११-२३ [संवत्सरश्च मे तपश्च मेऽहो°] ॥१-५॥३५॥ ॥

VIII. ॥ २४-२७ ॥१-४॥३९॥ ॥

IX. ॥ २८ - प्रजापतये स्वाहा ॥१॥ इदं - °त्याय ॥२॥ २९ - °त्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पताम् ॥३॥ स्तोमश्च - वेट् स्वाहा ॥४॥४२॥ ॥ नवानुवाकेषु त्रयश्चत्वारिंशत् ॥

इति काण्वशाखायां संहितापाठे एकोनविंशोऽध्यायः ॥१९॥

I. ॥ १८, ३० [साविषक्] ॥१॥ ३१ ॥२॥ ३२ [धनसाताऽइदावंतु] ॥३॥ ३३ [°वीरं चकार सर्वा आशा वाजपतिर्भवियम्] ॥४॥ ३४ [विश्वा आशा वाजपतिर्जयियम्] ॥५॥ ३५ ॥६॥ ३६, ३७ ॥७॥७॥ ॥

II. ॥ ३८ [ऋताषाल्ऋत°] - ४९ [अक्रेलमानो] ॥१-१२॥ ५० ॥१३॥२०॥ ॥

III. ॥ ५१ [अग्निं युनग्मि - तेन गमेम -] ॥१॥ ५२ [पक्षाऽअग्नेरो पतत्रिणो -] - ५७ ॥२-७॥२७॥ ॥

IV. ॥ ५८ ॥१॥ ५९ [ज्ञानीथ] ॥२॥ ६० [कृणवथा°] - ६५ ॥३-८॥ ६७b ॥९॥३६॥ ॥

V. ॥ ६८ ॥१॥ ६९ [ज्ञघंध (65.)] ॥२॥ ७० ॥३॥ ७१ [तालिह्] ॥४॥

७२-७७ [नृभिः] ॥५-१०॥४६॥ ॥ पञ्चानुवाकेषु षट्चत्वारिंशत् ॥ ॥

इति काण्वशाखायां संहितापाठे विंशोऽध्यायः ॥२०॥ ॥

I. a. स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृतामृतेन ।
मधुमतीं मधुमता सृजामि सꣳ सोमेन ॥
b. सोमोऽसि । c. अश्विभ्यां पच्यस्व । d. सरस्वत्यै पच्यस्व ।
e. इन्द्राय सुत्राम्णे पच्यस्व ॥१॥

कृपानाथं रमाकान्तं नत्वा नृहरिमीश्वरम् । एकोनविंशे स्वध्याये (1.) मन्त्रदीपमथो ब्रुवे ॥ ॥ अथ सौत्रामणीमन्त्रास्त्रिभिरध्यायैः ॥ ऋद्धिकामस्याग्निचितो मुखेतरच्छिद्रसोमवामिनो (2.) मुखेन सोमवामिनो राज्यच्युतनृपस्य पशुकामस्य च सौत्रामणीयागः ॥ अन्तःपात्यस्थाने गोचर्मणि एतानि स्थापयेत् सोमसुराविक्रयिणः क्लीवाद्वा क्रीत्वा सीसेन शष्पं क्रीत्वा ऊर्णाभिस्तोकान् सूत्रेण लाजान् केनचिद्व्रीहिणा नग्नकुम् विदृता व्रीह्यः शष्पम् विदृता यवास्तोकनाः भृष्टव्रीह्यो लाजाः सर्जवक्त्रिफलाशुण्ठीपुनर्नवाचतुर्जातकपिप्पलीगजपिप्पलीवंशावकाबृहच्छत्राचित्रकेन्द्रवारुणश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयविदृढयवव्रीह्य एकीकृता नग्नकुः । शष्यतोकलाजनग्नकुन्दक्षिणाद्वरिणाग्निगृहं नीत्वा संचूर्ण्य दर्शपौर्णमासधर्मेण व्रीहिश्यामाकयोश्चरू वकुञ्जले पक्त्वा (3.) घृतालम्भनानन्तरं तयोश्चर्वोर्निःस्रावमुप्तं (4.) पृथक्-पात्रयोरादाय शष्यादिचतुर्णां चूर्णैः संसृज्य स्थापयेत् द्वयं चूर्णाचामरूपं (5.) मासराख्यम् । का° [१९.१.२२.] ओदनौ चूर्णामासरैः सꣳसृज्य स्वाद्वीं त्वाꣳशुनेति त्रिरात्रं निदधाति । एवमाचामयोश्चूर्णसंसर्गे (6.) मासरत्वनिष्पादनानन्तरमोदनौ व्रीहिश्यामाकचरू चतुर्भिश्चूर्णैः संसृज्य स्वाद्वीं त्वेति मन्त्रेण अंशुनेति विंशाध्यायसप्तविंशया ऋचा चैकस्मिन्पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां संसृज्य त्रिरात्रं शाल्मलिनैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयेत् । अयमर्थः । चरू उद्वास्य द्वयोः पृथगाचामग्रहणम् ततः शष्यतोकलाजचूर्णानां पृथक् त्रिधा कृतानां तृतीयांशं द्वेधा कृत्वाचामयोः क्षिपेत् ततो नग्नकुचूर्णं द्वेधा कृत्वैकमर्धं द्वि-

धा विभज्याचामयोः क्षिपेत् । एवं चूर्णसंसृष्टाचामयोर्मासरसंज्ञा । ततः शष्यतोकलाजचूर्णानां द्वितीयं तृतीयांशं द्विधा कृत्वैकैकं भागमोदनयोः क्षिपेत् नग्नहुचूर्णद्वितीयार्धं द्वेधा कृत्वौदनयोः क्षिपेत् तत ओदनावेकपात्रे कृत्वा तत्राचामौ क्षिपेत् ततः स्वाद्वीं त्वा अंशुनेति मन्त्राभ्यां चूर्णमासरैः सह्यौदनयोराडालनेन संसर्गः कार्यः ततस्त्रिरात्रनिधानम् शष्यतोकलाजचूर्णतृतीयांशानां प्रतिदिनं सुरायां निवापार्थं रक्षणमिति सूत्रार्थः ॥ स्वाद्वीं त्वा । सुरासोमदेवत्यानुष्टुप् सुराद्रव्यः सोमो देवता । सौत्रामणीमन्त्राणां प्रजापत्यश्विसरस्वत्य ऋषयः । अथ मन्त्रार्थः । हे सुरे त्वा त्वां सोमेन संसृजामि संयोजयामि छन्दसि परेऽपीति [पा० १.४.८१.] समुपसर्गस्य क्रियापदात्परप्रयोगः । कीदृशीं त्वाम् स्वाद्वीम् मिष्टां मिष्टरसाम् । तीव्रां तीव्रशब्दः कटुवचनः कटुं शीघ्रमदजनिकामित्यर्थः । अमृताममृततुल्याम् । मधुमतीं मधुरस्वादोपेताम् । कीदृशेन सोमेन स्वादुना मृष्टेन तीव्रेण कटुरसेन अमृतेन सुधातुल्येन मधुमता मधुरस्वादेन ॥ सोमोऽसि । चत्वारि यजूंषि सुरादेवत्यानि । पूर्व एव विनियोगः । सोमोऽसि दैव्युष्णिक् अश्विभ्यां यजुर्गायत्री सरस्वत्यै यजुरुष्णिक् इन्द्राय यजुर्बृहती । हे सुरे त्वं सोमसंसर्गात्सोमः असि अतस्त्वां वदामि अश्विभ्यामर्थाय (7.) पच्यस्व विपरिणाम पाको विपरिणामः सरस्वत्यै सरस्वत्यर्थं पच्यस्व इन्द्राय च पच्यस्व कीदृशायेन्द्राय सुत्रामणे सुष्ठु त्रायते रक्षतीति सुत्रामा तस्मै त्रायतेरातो मनिन्निति [पा० ३.२.७४.] मनिन् ॥ १ ॥

परीतो षिञ्चता सुतꣳ सोमो य उत्तमं हविः ।
दधन्वा (8.) यो नर्योऽअप्स्वन्तरा सुषाव सोममद्रिभिः ॥ २ ॥

का० [११.१.२३-२८.] एकस्याः पयस्यायाः कृतेनाश्विनेन परिषिञ्चति परीतो षिञ्चतेति शष्यचूर्णानि चावपति सारस्वतेन द्वयोः प्रातस्तोकचूर्णानि चैन्द्रेणोत्तमे (9.) तिसृणां लाजचूर्णानि च । साग्रंहोमान्तेऽश्विभ्यामपाकरोमीति करेण गां स्पृष्ट्वा एकां तां दुग्धा तत्पयसाधर्युः सुरां सिञ्चति परीत इति मन्त्रेण । रक्षितं शष्यचूर्णानां तृतीयांशं सुराभाण्डे क्षिपेत् । द्वितीयेऽह्नि निशान्ते (10.) सरस्वत्याऽग्रपाकरोमीति गावौ स्पृष्ट्वा दोहितेन (11.) तयोर्दुग्धेन तेनैव मन्त्रेण

सुरां सिञ्चति तोक्मचूर्णतृतीयांशञ्चेपश्च । तृतीयेऽह्नि रात्रौ इन्द्राय सुत्राम्णेऽपाकरोमीति तिस्रो गाः स्पृष्ट्वा ता दुग्धैकीकृततत्पयसा सुरां सिञ्चति तेनैव मन्त्रेण तत्र लाजचूर्णतृतीयांशञ्चेपश्चेति सूत्रार्थः ॥ भरद्वाजदृष्टा सोमदेवत्या बृहती । हे ऋत्विज इतो गोः सकाशाद्गृहीतेन दुग्धेनेति शेषः सुतमभिषुतं सोमं परिस्रुद्रूपं परिषिञ्चत यूयम् परि इतः सिञ्चतेति पदेषु सत्सु ओकारमितः सिञ्चतो सोपध इति [प्रातिशा° ३.३.१.] सूत्रेण सविसर्गस्य तकारस्याकारस्य ओकारः अन्येषामपि दृश्यतऽइति [पा° ६.३.१३७.] सिञ्चतपदस्य संहितायां दीर्घः । तं कम् यः सोम उत्तमं हविः सर्वेषां हविषां श्रेष्ठम् यश्च नर्यः नरेभ्यो हितः सन् दधन्वान् (8.) यजमानं धारितवान् धन शब्दे ह्वासुप्रत्ययः । अप्सु जलेषु अन्तर्मध्ये वर्तमानं यं सोममद्रिभिः ग्रावभिरधर्युः आसुषाव अभिषुतवान् । तं सोमं सुराद्रूपमापन्नं पयसा सिञ्चतेति सम्बन्धः ॥२॥

a. वायोः पूतः पवित्रेण प्रत्यङ्सोमोऽतिद्रुतः । इन्द्रस्य युज्यः सखा ॥

b. वायोः पूतः पवित्रेण प्राङ्सोमोऽतिद्रुतः । इन्द्रस्य युज्यः सखा ॥३॥

का° [११.२.७-१.] सते पुनाति गोऽश्ववालवालेन पुनाति ते परिस्रुतमिति [क° 8.] वायोः पूत इति सोमातिपूतस्य प्राडिति तद्वामिनः । वायोः पूत इति कण्डिकायां द्वे ऋचौ पुनाति तऽइति तृतीया तासां व्युत्क्रमेण विनियोगमाह पूतां सुरामादाय गोऽश्वकेशनिर्मितेन वालेन् पवित्रेण सते पलाशपात्रे पुनाति पुनाति तऽइति मन्त्रेण सतं वारणमिति केचित् मुखेतरच्छिद्रसोमवामिनो यजमानस्य सौत्रामण्यां वायोः पूतः पवित्रेण प्रत्यङ्क्षिति मन्त्रेण सते सुरां पुनाति मुखेन सोमवामिनस्तु वायोः पूतः पवित्रेण प्राडिति मन्त्रेण सते सुरां पुनातीत्यर्थः ॥ ऋक्त्रयमाभूतिदृष्टं सोमदेवत्यं गायत्रम् । प्रत्यञ्चति अधो गच्छति प्रत्यङ् अधोमुखोऽतिद्रुतो गुदद्वारा गतः सोमः वायोः पवित्रेण (12.) उदरान्तर्वर्तिना पूतः शुद्धः । कीदृशः इन्द्रस्य युज्यः सखा योगार्होऽगर्ह्यः सहायः ॥ प्राञ्चत्यूर्ध्वं गच्छति प्राङ् मुखतोऽतिद्रुतो निर्गतः सोमो वायोः पवित्रेण हृदयान्तर्वर्तिना पूतः य इन्द्रस्य युज्यः योग्यः सखा ॥३॥

पुनाति ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना ॥४॥

अध्वर्युर्यजमानं प्रत्याचष्टे हे यजमान सूर्यस्य दुहिता पुत्री श्रद्धा ते तव परिस्रुतं सुरां सोमं च पुनाति शोधयति श्रद्धा वै सूर्यस्य दुहितेति श्रुतिः । यद्वा लुप्तोपमानम् ते तव परिस्रुतं सोममिव पुनाति सोमवत्पवित्रां करोति । यद्वा सोमं सोमरूपापन्नां परिस्रुतं श्रद्धा पुनाति । केन वारेण वालेन रलयोरैक्यम् गोऽश्ववालवालेन । कीदृशेन वारेण शश्वता शाश्वतिकेन अनादिना । तथा तना तनेति धननाम [निघ० २. १०.] तनेन धनेन धनरूपेण धनोत्पत्तिनिमित्तभूतेनेत्यर्थः ॥४॥

ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमः सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ॥५॥

का० [११. २. १०.] उत्तरस्यां पयो वेतसेऽज्ञाविलोमपवित्रेण ब्रह्म क्षत्रमिति । अजमेषलोमकृतपवित्रेण वेतसपात्रे उत्तरदिशि (13.) पयः पुनाति ब्रह्म क्षत्रमिति मन्त्रेणेत्यर्थः ॥ सुरासोमदेवत्या त्रिष्टुप् आद्यो द्वादशकः द्वितीयस्त्रयोदशार्णः अन्त्यावेकादशार्णौ तेन त्र्यधिका । हे देव सोम शुक्रेण शुद्धेन वीर्येण त्वं देवताः अन्त्याद्याः पिपृग्धि प्रीणीहि । पुनः रसेन घृतादिना सहितमन्नं यजमानाय धेहि देहि । यतः सोमो भवान् सुतोऽभिषुतः सन् ब्रह्म ब्राह्मणं क्षत्रं क्षत्रियं तेजः कान्तिमिन्द्रियमिन्द्रियसामर्थ्यं पवते जनयति पवतिर्जननार्थः यज्ञादेव सर्वोत्पत्तेः सोमे उपचर्यते । आसुतः सुरया तीव्रीकृतः सन् भवान् मदाय च भवति । ईदृशसामर्थ्ययुक्तस्त्वं देवान्यजमानं चाभीष्टेन प्रीणीहीत्यर्थः ॥५॥

a. कुविदङ्ग यवमन्तो यवं०
b. उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।
c. एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥६॥

का० [११. २. १२. १३.] पयोग्रहान्गृह्णाति कुविदङ्गेति पृथगुपयामयोनी । एवं सुरापयसोः पावनं कृत्वा कुविदङ्गेति मन्त्रेणैव त्रीन्पयोग्रहान्गृह्णाति मन्त्रपाठे उ-

पयामगृहीतोऽसि एष ते योनिरिति द्वे यजुषी सकृत्पठिते त्रिषु ग्रहेषु पृथग्भवतः ॥ ततश्चैते मन्त्राः । कुविदङ्गेत्यृचं पठित्वा उपयामगृहीतोऽस्यश्विभ्यां त्वा । ऋग्व्याख्याता [१०.३२.] । हे पयोग्रह त्वमुपयामेन पात्रेण गृहीतोऽसि अश्विभ्यामर्थे त्वा त्वां गृह्णामि । सादयति एष ते योनिस्तेजसे त्वा एष ते तव योनिः स्थानम् योनिर्द्वयोरिति योनिशब्द उभयलिङ्गः तेजसे तेजोऽर्थं त्वां सादयामि ॥ द्वितीये पयोग्रहे कुविदिति पठित्वा उपयामगृहीतोऽसि सरस्वत्यै त्वा सरस्वत्यर्थं त्वां गृह्णामि । सादयति एष ते योनिर्वीर्याय त्वा वीर्यार्थं त्वां सादयामि ॥ तृतीयपयोग्रहे कुविदित्यन्ते उपयामगृहीतोऽसीन्द्राय त्वा सुत्राम्णो सुष्ठु त्रायते रक्षतीति सुत्रामा तस्मै रक्षकायेन्द्राय त्वां गृह्णामि । सादयति एष ते योनिर्बलाय त्वा बलाय बलार्थं त्वां सादयामि ॥ एतेषां क्रमादश्वत्थोडुम्बरन्यग्रोधपात्रैर्ग्रहणम् ॥ ६ ॥

नाना॒ हि वां॑ दे॒वहि॑त॒ꣳ सद॑स्कृतं॒ मा स॒ꣳसृक्षा॑थां पर॒मे व्यो॑मन् ।
सु॒रा त्वम॑सि शु॒ष्मिणी॒ सोम॑ ए॒ष मा मा॑ हि॒ꣳसीः स्वां योनि॑मावि॒शन्ती॑ ॥७॥

का॰ [११.२.२०.] स्थालीभिः सौरान्नाना हि वामिति व्यत्यासम् । नाना हीति मन्त्रेण मृन्मयस्थालीभिस्त्रीन्सुराग्रहान्गृह्णाति । व्यत्यासमित्ययमर्थः आदावाश्विनं पयोग्रहं गृहीत्वासाव्याश्विनसुराग्रहस्य ग्रहणासादने ततः सारस्वतौ पयोग्रहसुराग्रहौ तत ऐन्द्रौ पयःसुराग्रहौ । क्रमेण वा । उपयामयोनी अत्रापि पृथक् प्रथमे नाना हीति पठित्वोपयामगृहीतोऽस्याश्विनं तेज इति ग्रहणमेष ते योनिर्मोदाय त्वेति सादनम् द्वितीये नाना हीत्यन्ते उपयामगृहीतोऽसि सारस्वतं वीर्यमिति ग्रहणमेष ते योनिरानन्दाय त्वेति सादनम् तृतीये नानेत्यन्ते उपयामगृहीतोऽस्यैन्द्रं बलमिति ग्रहणमेष ते योनिर्मक्षते त्वेति सादनमिति सूत्रार्थः ॥ सुरासोमदेवत्या जगती । हे सुरासोमौ हि यस्मात्कारणाद्वां युवयोः नाना पृथक् सदः स्थानं कृतम् सुरापयसोर्द्वे वेदी भवतः । कीदृशं सदः देवहितं देवानां हितं पथ्यम् यद्वा देवैः हितं स्थापितम् । अतः कारणात् परमे उत्कृष्टे व्योमन् व्योम्नि व्योमवद्विशाले हवनस्थाने युवं मा संसृक्षाथां संसर्गं मा कुरुतम् । आहवनीये

पयो ह्रूयते दक्षिणाग्नौ सुरा ह्रूयते अतो न संसर्गः । सृज विसर्गे लुङ् । एवं द्वौ प्रत्युक्ता सुरामाह हे सुरे त्वं सुरा असि कीदृशी शुष्मिणी शुष्मं बलमस्या अस्तीति बलवती ततस्त्वां पीत्वा मत्तो भवति । एष सोमः शान्तः अतः स्वां योनिमाविशन्ती प्रविशन्ती सती सोमं मा हिंसीः अनुदात्तो माशब्दः पादपूरणः ॥७॥

a. उपयामगृहीतोऽस्याश्विनं तेजः सारस्वतं वीर्यमैन्द्रं बलम् ।

b. एष ते योनिर्मोदाय त्वानन्दाय त्वा मह्से त्वा ॥८॥

आश्विनं तेजः साक्षात्त्वमेव । सारस्वतं सरस्वतीसम्बन्धि वीर्यं सामर्थ्यं च त्वम् । ऐन्द्रमिन्द्रसम्बन्धि बलं च त्वमिति शेषः ॥ सादयति । एष ते तव योनिः स्थानं मोदाय प्रमोदाय त्वा त्वां सादयामि । आनन्दाय हर्षाय त्वां सादयामि । मह्से महत्त्वाय च सादयामि । प्रत्येकं मन्त्राः ॥८॥

a. तेजोऽसि तेजो मयि धेहि । b. वीर्यमसि वीर्यं मयि धाः ।

c. बलमसि बलं मयि धेहि । d. ओजोऽस्योजो मयि धेहि ।

e. मन्युरसि मन्युं मयि धेहि । f. सहोऽसि सहो मयि धेहि ॥९॥

का° [११.२.१६.] गोधूमकुवलचूर्णानि चावपति तेजोऽसीति । आश्विनग्रहग्रहणानन्तरं सादनात्प्राक् द्वे दर्भतृणे प्रागग्रे पात्रोपरि कृत्वा गोधूमकुवलयोश्चूर्णानि सक्तव पयसि क्षिपति कुवलं स्थूलं बदरीफलमित्यर्थः ॥ त्रीणि यजूंषि पयोदेवत्यानि आद्यं यजुर्बृहती । हे पयः त्वं तेजोऽसि अतो मयि तेजो धेहि स्थापय यो यदात्मकः स तत्र नियुज्यतऽइति न्यायात् ॥ का° [११.२.१७.] उपवाकबदरचूर्णानि च वीर्यमसीति । उपवाका इन्द्रयवाः बदरं सूक्ष्मबदरीफलम् तयोश्चूर्णानि सारस्वते पयोग्रहे निवपेदित्यर्थः ॥ यजुःपङ्क्तिः । हे ग्रह त्वं वीर्यमसि अतो मयि वीर्यं सामर्थ्यं धेहि ॥ का° [११.२.१९.] यवकर्कन्धुचूर्णानि च बलमसीति । यवाः प्रसिद्धाः कर्कन्धुः अतिस्थूलं बदरम् तयोश्चूर्णान्यैन्द्रे पयोग्रहे क्षिपेदित्यर्थः ॥ यजुःपङ्क्तिः । हे ग्रह त्वं बलमसि अतो मयि विषये बलं धेहि ॥ का° [११.२.२२.२३.] सुराग्रहाञ्छ्रीणात्योजोऽसीति वृकव्याघ्रसिंहलोमभिः प्र-

तिमन्वं मिश्रैरेके यथासंख्यम् । वृकादीनां मिश्रैः केशैरोजोऽसीति प्रतिमन्वं सुरा-ग्रहान्मिश्रयेत् ओजोऽसीत्याश्विनं मन्युरसीति सारस्वतं सहोऽसीत्यैन्द्रम् एके वृकादिकेशैर्यथासंख्यं ग्रहं मिश्रयन्ति वृककेशैराश्विनं वैयाघ्रैः (14.) सारस्वतं सैं-हैरैन्द्रमिति सूत्रार्थः ॥ त्रीणि यजूंषि सुरादेवत्यानि हे सुरे त्वमोजः असि अतो मयि विषये ओजः कान्तिं धेहि स्थापय । त्वं मन्युर्मानसं प्रज्वलनं कोपोऽसि मयि मन्युं धेहि । सहोऽसि मयि सहो बलं धेहि ॥ १ ॥

या व्याघ्रं विषूचिकोभौ वृकं च रक्षति ।
श्येनं पतत्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥ १० ॥

का° [११.२.२६.] दीक्षावत्पावयतोऽन्तःपात्ये श्येनपत्राभ्यां या व्याघ्रमिति । अध्वर्युप्रतिप्रस्थातारौ सहैवान्तःपात्येऽवस्थितं प्राङ्मुखं यजमानं श्येनपिक्षाभ्यां पाव-यतः दीक्षावदित्येकेन नाभेरूर्ध्वं प्रदक्षिणं द्वितीयेन सकृदवाङ् यद्वोभाभ्यां नाभे-रूर्ध्वमधश्च द्विरिति सूत्रार्थः ॥ हैमवर्चिदृष्टा विषूचिकादेवत्यानुष्टुप् । व्याध्यधिष्ठा-त्री देवतास्ति सा प्रार्थ्यते । विषु सर्वत्र अञ्चति गच्छति विपूची सैव विषूचिका रोगविशेषः केऽण इति [पा° ७.४.१३.] ङीपो ह्रस्वः या विषूचिका व्याघ्रं वृक-मेनावुभौ द्वौ परिरक्षति पाति तथा श्येनं पतत्रिणं पक्षिणं सिंहं चोभौ रक्षति न हि तेषामन्नपरिणामजनितो दोषः सा विषूचिका इमं यजमानमंहसः व्याधिहे-तुभूतात्पापात्पातु रक्षतु ॥ १० ॥

a. यदापिपेष मातरं पुत्रः प्रमुदितो धयन् ।
एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया ॥
b. सम्पृच स्थ सं मा भद्रेण पृङ्क्त । c. विपृच स्थ वि मा पाप्मना पृङ्क्त ॥ ११ ॥

का° [११.२.२७.] अग्निं प्रेक्षयति यदापिपेषेति । अग्निं प्रेक्षस्वेति प्रैषेणाध्वर्यु-र्यजमानमग्निं दर्शयति स प्रेषित औत्तरवेदिकमग्निमीक्षतऽइत्यर्थः ॥ अग्निदेवत्या बृ-हती । पुत्रोऽहं प्रमुदितः प्रहृष्टो धयन् स्तनपानं कुर्वन्सन् यत् मातरं जननी-मापिपेष पिष्टवान् पद्भ्यां पीडितवान् पिषेर्लिट उत्तमैकवचनम् हे अग्ने तत् ए-

तत् वत्समक्षमक्षमनृणो भवामि ऋणत्रयरहितोऽस्मि अत एव ब्रवीमि मया पितरौ मातापितरौ अक्षतौ न पीडितौ यः पुत्रः प्रत्युपकर्तुमशक्तः स एव पित्रोर्क्षतेति भावः ॥ का॰ [११.२.२८.] पयोग्रहसंमर्शनꣳ सम्पृच स्थेति । यजमानः सक्षैव पयोग्रहाणां स्पर्शं करोतीत्यर्थः ॥ पयोग्रहदेवत्यम् । यजुस्त्रिष्टुप् । हे पयोग्रहा यूयं सम्पृचः स्थ सम्पृञ्चन्ति संयोजयन्तीति सम्पृचः स्वत एव संयोजका भवत अतो मा मां भद्रेण कल्याणेन सम्पृङ्क्त संसृजत कल्याणयुक्तं मां कुरुतेत्यर्थः । सम्पूर्वात्पृचेः क्विप् । पृचे रौधिकाल्लोट् सम्पृङ्क्त ॥ का॰ [११.२.२८.] विपृच स्थेति सौराणाम् । यजमानं सौरग्रहान्संमृशतीत्यर्थः ॥ हे सुराग्रहा यूयं विपृचः स्थ विपृञ्चन्तीति विपृचः वियोजकां भवत अतो मा मां पाप्मना कल्माषेण विपृङ्क्त निष्पापं कुरुतेत्यर्थः ॥ ११ ॥

II. देवा यज्ञमतन्वत भेषजं भिषज्ञाश्विना ।
वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥ १२ ॥

देवा यज्ञमित्यादिकण्डिकाविंशतिर्ब्राह्मणरूपात्तो विनियोगाभावः । ब्राह्मणानुवाको विंशतिरनुष्टुभः सौत्रामण्याः सोमसाम्यप्रतिपादिकाः । अत्रेतिहासः । अनुपक्षतसोमपानाद्भष्टस्येन्द्रस्य (15.) वीर्यं नमुचिरसुरोऽपिबत् तत्र देवैरिन्द्रस्य भेषज्यं कृतम् तत्राश्विनौ सरस्वती च भिषजः सौत्रामणी चौषधम् तथा च श्रुतिः [१२. ८. ३. १.] त्वष्टा कृतपुत्रोऽभिचरणीयमपेन्द्रꣳ सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्स विघड् व्यार्छत्तस्य मुखात्प्राणेभ्यः श्रीयशसान्यूर्ध्न्युदक्रामँस्तानि पशून्प्राविशँस्तस्मात्पशवो यशो यशो ह भवति य एवं विद्वात्सौत्रामण्याभिषिच्यते ततोऽस्माऽएतमश्विनौ च सरस्वती च यज्ञꣳ समभरत्सौत्रामणी भेषज्याय तयैनमभ्यषिञ्चँस्ततो वै स देवानाꣳ श्रेष्ठोऽभवद्भ्रेष्ठः स्वानां भवति य एतयाभिषिच्यतऽइति ॥ देवा यज्ञं सौत्रामण्याख्यं भेषजमिन्द्रस्यौषधरूपमतन्वत विस्तारयामासुः तदा अश्विना अश्विनौ भिषजा भिषजौ वैद्यौ आस्तामिति शेषः । सरस्वती च वाचा त्रयीलक्षणया भिषगासीत् । कीदृशाः सरस्वत्यश्विनाः इन्द्राय इन्द्रियाणि वीर्याणि दधतः इन्द्राय सामर्थ्यं ददत इत्यर्थः ॥ १२ ॥

दीक्षायै रूपꣳ शष्याणि प्रायणीयस्य तोकानि ।
क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु ॥ १३ ॥

इदानीं सौत्रामण्याः सोमसम्पत्तिं निरूपयति । शष्याणि नवप्ररूढव्रीहिरूपाणि पूर्वोक्तानि दीक्षायै षष्ठ्यर्थे चतुर्थी दीक्षाया दीक्षणीयेष्टे रूपम् शष्याणि दीक्षणीयात्वेन ध्येयानि । एवमग्रेऽपि । तोकानि नवप्ररूढयवाः प्रायणीयस्य प्रायणीयेष्टे रूपं ध्येयम् । सोमस्य क्रयस्य रूपं लाजाः सोमक्रयोऽस्ति सोमे अत्र लाजास्तस्य रूपम् लाजाः सोमक्रयरूपेण ध्येया इत्यर्थः सोमक्रयस्येति समासे युक्ते तद्भावः सोमक्रयपदयोर्व्यत्ययो रूपपदेन व्यवधानं च छान्दसम् । मधु सोमांशवः सोमखण्डास्तद्रूपेण ध्येयम् यद्वा मधु मधुरस्वादा लाजा एव सोमांशवो ध्येयाः ॥ १३ ॥

आतिथ्यरूपं मासरं महावीरस्य नग्नहुः ।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता ॥ १४ ॥

किं च मासरमातिथ्यरूपमातिथ्येष्टेः स्वरूपं ध्येयम् व्रीहिश्यामाकौदनाचामयोः शष्यतोकलाजनग्नहुचूर्णैः संसर्गो मासरं पूर्वमुक्तम् । सर्जत्वगादिषड्विंशतिवस्तून्येकीकृतानि नग्नहुः पूर्वोक्तः स महावीरस्य घर्मस्य रूपं ध्येयम् । या तिस्रो रात्रीः कालाधनोरिति [पा° २.३.५.] द्वितीया त्रिरात्रपर्यन्तं सुरा आसुता अभिषुता पूर्वोक्तं सर्वमेकपात्रे कृत्वा स्वाद्वीं वेति मन्त्रेण यद्गर्ते त्रिरात्रं स्थापनम् एतदुपसदामुपसत्संज्ञानामिष्टीनां रूपम् ॥ १४ ॥

सोमस्य रूपं क्रीतस्य परिस्रुत्परिषिच्यते ।
अश्विभ्यां दुग्धं भेषजमिन्द्रायेन्द्रꣳ सरस्वत्या ॥ १५ ॥

यत् अश्विभ्यां सरस्वत्या च ऐन्द्रमिन्द्रदेवत्यमिन्द्राय भेषजमिन्द्रार्थे औषधं दुग्धं पयः अश्विभ्यामपाकरोमीति दुग्धेनैकगोः पयसा सरस्वत्याऽपाकरोमीति दुग्धेन गोद्वयपयसा इन्द्रायापाकरोमीति दुग्धेन गोत्रयपयसा दिनत्रये परिस्रुत् सुरा यत् परिषिच्यते तत्क्रीतस्य सोमस्य रूपं ज्ञातव्यम् । एकस्याः पयसापाकृतेना-

श्विनेन परिषिञ्चति सारस्वतेन द्वयोः प्रातः ऐन्द्रेणोत्तमे तिसृणामिति [१९.१.२३. २५.२७.] कात्यायनेन निर्दिष्टत्वादश्विभ्यां सरस्वत्या च द्रुग्धमिति निर्देशः ॥ १५॥

आसन्दी रूपꣳ राजासन्यै वेद्यै कुम्भी सुराधानी ।
अन्तर् उत्तरवेद्या रूपं कारोतरो भिषक् ॥ १६॥

राज्ञः सोमस्यासन्दी राजासन्दी तस्यै चतुर्थी षष्ठ्यर्थे आसन्दी यजमानाभिषेका यासन्दी मञ्चिका राजासन्याः सोमासन्द्या रूपम् तत्त्वेन ध्येया । सुराधानी सुरा धीयते स्थाप्यते यस्यां सा सुराधानी कुम्भी वेद्यै वेद्याः सौमिक्या वेदेः रूपम् । अन्तरः वेदिद्वयमध्यभाग उत्तरवेद्या रूपम् । कारोतरः सुरापावनचालनी (16.) इन्द्रस्य यजमानस्य च भिषक् ज्ञेयः ॥ १६॥

वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूप आप्यते प्रणीतोऽअग्निरग्निना ॥ १७॥

वेद्यात्र वर्तमानया वेदिः सौमिकी समाप्यते सम्यक् प्राप्यते तद्रूपा ध्येयेत्यर्थः । बर्हिषात्रत्येन बर्हिः सौमिकं समाप्यते । इन्द्रियं वीर्यं चेन्द्रियेणेति शेषः समाप्यते सामर्थ्यं फलदाने उभयोरप्यस्तीत्यर्थः । यूपेनात्रत्येन यूप आप्यते । अग्निनात्रत्येन प्रणीतोऽग्निः सौमिक आप्यते प्राप्यते ॥ १७॥

कृविर्धानं यदश्विनाग्नीध्रं यत्सरस्वती ।
इन्द्रायेन्द्रꣳ सदस्कृतं पत्नीशालं गार्हपत्यः ॥ १८॥

अत्र सौत्रामण्यां यत् अश्विना अश्विनौ देवते वर्तेते तेनाश्विसद्भविन कृविर्धानं सौमिकमाप्यतेऽित्यनुषङ्गः । अत्र यत्सरस्वती देवतास्ति तेन सरस्वतीसद्भविन आग्नीध्रं सौमिकमाप्यते । सोमे ऐन्द्रमिन्द्रदेवत्यं सदः कृतमस्ति । ऐन्द्रं सदः पत्न्याः शाला पत्नीशालम् विभाषा सेनासुरेत्यादिना [पा० २.४.२५.] क्लीवत्वम् गार्हपत्यश्चेति त्रयमिन्द्राय यद्भविः क्रियते तेनाप्यते । सौत्रामण्यामिन्द्राय यद्भविस्तत्सौमिकसदःपत्नीशालगार्हपत्यरूपेण (17.) ध्येयमित्यर्थः ॥ १८॥

प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य ।

प्रयाजेभिरनुयाजान्वषट्कारेभिराकूतीः ॥ १९ ॥

प्रैषेभिः प्रैषैः प्रैषानाप्नोति आप्रीभिः प्रयाजयाज्याभिर्यज्ञस्याप्रीराप्नोति । प्रयाजेभिरित्यादिवाक्यचतुष्टयस्योत्तरपदलोपश्छान्दसः प्रयाजेभिः प्रयाजैः प्रयाजानाप्नोति अनुयाजैरनुयाजानाप्नोति वषट्कारेभिर्वषट्कारैर्वषट्कारानाप्नोति आकूतिभिराकूतीराप्नोति । प्रैषादीनामुभयत्र सद्भावात् ॥ १९ ॥

पशुभिः पशूनाप्नोति पुरोडाशैर्हविर्भिष्याः ।
छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥ २० ॥

पशुभिः कृत्वा पशूनाप्नोति पुरोडाशैः पुरोडाशानाप्नोति हविर्भिरन्यैर्हवींषि आप्नोति छन्दोभिश्छन्दांसि आप्नोति सामिधेनीभिः सामिधेनीराप्नोति याज्याभिर्याज्या आप्नोति वषट्कारैर्वषट्कारानाप्नोति । पश्वादीनामुभयत्र सद्भावात् । अत्राप्युत्तरार्धलोपः पूर्ववत् ॥ २० ॥

धानाः करम्भः सक्तवः परीवापः पयो दधि ।
सोमस्य रूपꣳ हविषः आमिक्षा वाजिनं मधु ॥ २१ ॥

धानादयः सोमस्य रूपं ध्येयाः । धानाः भ्रष्टधान्यम् करम्भः उदमन्थः (18.) सक्तवः प्रसिद्धाः । परीवापः हविष्यङ्गैः परिवापो जलस्थाने पर्युप्युपरिवार्योरिति (19.) कोशः । पयोदधनी प्रसिद्धे । एतानि सोमरूपम् । आमिक्षा पयस्या मधु मधुरं वाजिनं च हविषो रूपम् । उष्णे दुग्धे दधि क्षिप्ते घनभाग आमिक्षा (20.) शिष्टं वाजिनम् ॥ २१ ॥

धानानाꣳ रूपं कुवलं परीवापस्य गोधूमाः ।
सक्तूनाꣳ रूपं बदरमुपवाकाः करम्भस्य ॥ २२ ॥

नन्वधस्तनमन्त्रे धानादीनां सोमरूपवमुक्तम् तेऽत्र कुत्र सन्तीति धानादिसोमहविषां सोमस्य च सम्पत्तिं सौत्रामणीद्रव्यैराह । कुवलं कोमलं बदरीफलं धानानां पूर्वोक्तानां रूपं ध्येयम् कुवलं बदरीफले मुक्ताफलोत्पलयोश्चेति कोशः ।

गोधूमाः परीवापस्य रूपम् बदरं सर्वं बदरीफलं सक्तूनां रूपम् उपवाकाः यवाः करम्भस्य रूपं ज्ञेयम् ॥ २२ ॥

पयसो रूपं यव्यवा दध्नो रूपं कर्कन्धूनि ।
सोमस्य रूपं वाजिनꣳ सौम्यस्य रूपमामिक्षा ॥ २३ ॥

यत् ये यवाः ते पयसो रूपम् कर्कन्धूनि स्थूलबदराणि दध्नो रूपम् वाजिनं सोमस्य रूपम् आमिक्षा पयस्या सौम्यस्य चरोः रूपं ज्ञेयम् ॥ २३ ॥

आश्रावयेति स्तोत्रियाः प्रत्याश्रावोऽअनुरूपः ।
यजेति धय्यारूपं प्रगाथा येयजामहाः ॥ २४ ॥

शस्त्रसम्पत्तिमाह आश्रावयेति शब्दः स्तोत्रियारूपो ज्ञेयः स्तोत्रे प्रथमस्तृचोऽनुवाकः स्तोत्रियाः । प्रत्याश्रावः अस्तु श्रौषडिति शब्दः अनुरूपः उत्तरस्तृचः तद्रूपः । यजेति शब्दो धाय्याया रूपम् निष्केवल्ये स्तोत्रियानुरूपयोरनन्तरं धय्या शस्यते सा यजेति शब्दो ज्ञेयः । येयजामहाः ये यजामहऽइति शब्दः प्रगाथाः प्रगाथरूपत्वेन ध्येयाः ॥ २४ ॥

अर्धऽऋचैरुक्थानाꣳ रूपं पदैराप्नोति निविदः ।
प्रणवैः शस्त्राणाꣳ रूपं पयसा सोम आप्यते ॥ २५ ॥

ऋचामर्धानि अर्धऽऋचास्तैः अर्धर्चादयः पुंसि चेति [पा° ७.४.३१.] पुंस्त्वम् ऋत्यक इति [पा° ६.१.१२८.] ऋकारस्य संध्यभावः अत्रत्यैरर्धर्चैरुक्थानां शस्त्रविशेषाणां रूपमाप्यते प्राप्यते । पदैर्निविदो न्यूङ्खानाप्नोति । प्रणवैः ओंकारैः शस्त्राणां रूपमाप्यते । पयसा दुग्धेन सोम आप्यते । अर्धर्चादय उक्थादयो ध्येयाः ॥ २५ ॥

अश्विभ्यां प्रातःसवनमिन्द्रेणैन्द्रं माध्यन्दिनम् ।
वैश्वदेवꣳ सरस्वत्या तृतीयमाप्तꣳ सवनम् ॥ २६ ॥

सवनसम्पत्तिमाह । अश्विभ्यां देवाभ्यां प्रातःसवनमाप्तं प्राप्तम् इन्द्रेण देवेन

ऐन्द्रमिन्द्रदेवत्यं माध्यन्दिनं सवनं प्राप्तम् सरस्वत्या देवतया कृत्वा वैश्वदेवं विश्वदेवदेवत्यं तृतीयं सवनं प्राप्तम् ॥ २६ ॥

वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम् ।
कुम्भीभ्यामम्भृणौ सुते स्थालीभिः स्थालीराप्नोति ॥ २७ ॥

वायव्यानि सोमपात्राणि वायव्यैर्वायव्यानि पात्राणि आप्नोति । वैतसं पात्रं सतः तेन सतेन द्रोणकलशमाप्नोति । कुम्भी सुराधानी तद्द्वयमस्ति कुम्भीभ्यां शतच्छिद्राभ्यां (21.) सुराधानीभ्यामम्भृणौ पूतभृदाधवनीयौ सुतेऽभिषुते सोमे यौ स्तस्तावाप्नोति । स्थालीभिः कृत्वा स्थालीराप्नोति उभयत्र स्थालीसद्भावात् ॥ २७ ॥

यज्ञुर्भिराप्यते ग्रहा ग्रहैः स्तोमाश्च विष्टुतीः ।
छन्दोभिरुक्थाशस्त्राणि साम्नावभृथ आप्यते ॥ २८ ॥

यज्ञुर्भिः यजूंषि आप्यन्ते ग्रहा ग्रहैराप्यन्ते स्तोमैः स्तोमा आप्यन्ते विष्टुतिभिर्विविधस्तुतिभिर्विष्टुतीर्विष्टुतय आप्यन्ते छन्दोभिरुक्थाशस्त्राणि उक्थानि शस्त्राणि चाप्यन्ते । साम्ना सामाप्यते । अवभृथेनावभृथ आप्यते ॥ २८ ॥

इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ।
शम्युना पत्नीसंयाज्ञात्समिष्टयजुषा सꣳस्थाम् ॥ २९ ॥

इडाभिरिडामाप्नोति भक्षैर्भक्षानाप्नोति सूक्तवाकेन सूक्तवाकमाप्नोति आशीर्भिराशिष आप्नोति शम्युना स्रोमविशेषेण शम्युमाप्नोति पत्नीसंयाजैः पत्नीसंयाजानाप्नोति समिष्टयजुषा समिष्टयजुराप्नोति संस्थया संस्थामाप्नोति इडादीनामुभयत्र सद्भावात् ॥ २९ ॥

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ३० ॥

कृतोच्छिष्टभक्षश्चतूरात्रमग्निहोत्रं जुहोतीति व्रतेन दीक्षामाप्नोति दीक्षया दक्षिणामाप्नोति दक्षिणा विभक्तिलोपः दक्षिणया श्रद्धामाप्नोति श्रदिति सत्यनाम श्रत्

सत्यं धीयते यस्यां सा श्रद्धा आस्तिक्यबुद्धिः (22.) पुण्यवतां मनोविशेषः श्रद्धया सत्यं ज्ञानमनन्तं ब्रह्माप्यते प्राप्यते श्रद्धां विना ज्ञानाभावात् ॥३०॥

एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् ।
तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥३१॥

यज्ञस्य सोमयज्ञस्य एतावत् एतत्परिमाणं रूपम् देवैर्ब्रह्मणा प्रजापतिना च यद्रूपं कृतं दृष्टम् । दर्शनकरणयोः को भेदः सुप्तप्रतिबुद्धन्यायो दर्शनं बुद्धिपूर्वं तु करणम् । सौत्रामणी सप्तम्येकवचनस्य पूर्वसवर्णदीर्घः सौत्रामणी सौत्रामण्यां यज्ञे सुते सुरा सोमेऽभिषुते सति तदेतत् सोमयागरूपं सर्वमाप्नोति ॥३१॥

III. सुरावत्तं बर्हिषद्ँ सुवीरं यज्ञँ क्रिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥३२॥

का॰ [११.३.८.] सुरावत्तमिति जुहोति । अध्वर्युस्त्रीनपि पयोग्रहान्सकृदेव जुहोतीत्यर्थः ॥ एवं सौत्रामण्याः सोमसम्पत्तिमापाद्य प्रकृतमनुसरति । चतस्रस्त्रिष्टुभोऽश्विसरस्वतीन्द्रदेवत्याः । महिषा महान्तः ऋत्विजो यज्ञं सौत्रामणीसंज्ञं क्रिन्वन्ति वर्धयन्ति प्रापयन्ति वा । किम्भूतं यज्ञम् बर्हिषदं बर्हिषि सीदन्तीति देवा यत्र स बर्हिषत्तम् । तथा सुरावत्तं सुरा विद्यते यत्र स सुरावान् तम् सुरावान्वाऽएष बर्हिषद्यज्ञो यत्सौत्रामणीति [१२.८.१.२.] श्रुतेः । सुवीरं शोभना वीरा यत्र शोभनऽर्त्विजम् । कीदृशा महिषाः नमोभिरन्नैर्नमस्कारैर्वा सह दिवि स्वर्गे वर्तमानासु देवतासु सोमं दधानाः धारयन्तः । तत्र यज्ञे इन्द्रं यजमानाः यजन्तः सन्तो वयं मदेम हृष्येम । किम्भूता वयं स्वर्काः शोभनोऽर्कोऽर्चनं मन्त्रा वा येषां ते स्वर्काः यद्वा शोभनोऽर्कोऽन्नं येषां ते स्वर्का इत्यर्को वै देवानामन्नमन्नं यज्ञो यज्ञेनैवैनमन्नाद्येन समर्धयन्तीति [१२.८.१.२.] श्रुतेः । अर्को देवो भवति यदेनमर्चन्ति अर्को मन्त्रो भवति यदेनेनार्चन्ति अर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति संवृतः कटुकिम्नेति (23.) यास्कः [निरु॰ ५.४.] । महिषशब्दो यद्यपि महन्नामसु पठितस्तथाप्यत्र ऋत्विग्वाचकः महिषा नमोभिरित्यृत्विजो वै महिषा इति [१२.८.१.२.] श्रुतेः ॥३२॥

यस्ते॑ रसः॑ सम्भृ॑त ओषधीषु॒ सोम॑स्य॒ शुष्मः॑ सु॒र॑या सु॒तस्य॑ ।
तेन॑ जिन्व॒ यज॑मानं॒ मदे॑न॒ सर॑स्वतीमश्विना॒विन्द्र॑मग्निम् ॥ ३३ ॥

का॰ [११.३.१.] पालाशैः सौत्रान्न मृन्मयमाकृतिमानशञ्इति श्रुतेर्यस्तञ्इति । प्रतिप्रस्थाता पालाशोलूखलैः सुराग्रहान्द्विणेऽग्नौ यजति मृन्मयपात्रमाकृतिं न व्याप्नोतीत्युक्तेरित्यर्थः ॥ हे सुरे ओषधीषु वर्तमानो यस्ते तव रसः सम्भृत एकीकृतः अपां च वाऽएष ओषधीनां च रसो यत्सुरेति [१२.८.१.४.] श्रुतेः । सुरया सह सुतस्य सोमस्य च यः शुष्मः यद्बलम् । मद्यतीति मदस्तेन मदेन मदजनकेन तेन सुरारसेन सोमशुष्मेण च यजमानं सरस्वतीमश्विनौ इन्द्रमग्निं च जिन्व प्रीणीहि ॥ ३३ ॥

यमश्विना॒ नमु॑चेरासु॒रादधि॒ सर॑स्व॒त्यसु॑नोदिन्द्रि॒याय॑ ।
इ॒मं त॑ꣳ शु॒क्रं मधु॑मन्त॒मिन्दु॑ꣳ सो॒मꣳ रा॒जा॑नमि॒ह भ॑क्षयामि ॥ ३४ ॥

का॰ [११.३.१०-१३.] अध्वर्युः प्रतिप्रस्थाताग्नीध्यमश्विनेत्याश्विनं भक्षयन्ति द्विर्द्विरावर्तꣳ होतृब्रह्मणेत्रावरुणाः सारस्वतमाश्विनवदैन्द्रं यजमानः । त्रय आवृत्याश्विनं पयोग्रहं क्रमेण द्विर्द्विर्भक्षयन्ति सकृन्मन्त्रः होत्रादयः सारस्वतं पयोग्रहमदन्ति यजमान ऐन्द्रं पयोग्रहमत्तीति सूत्रार्थः ॥ नमुचिनेन्द्रस्य वीर्यं पीतम् तस्मिन्हृते रुधिरमिश्रः सोमो ज्ञातस्तं देवाः पपुस्तदभिवादिन्येषा ऋक् । असुरस्यापत्यमासुरस्तस्मादसुरपुत्रान्नमुचेरधि सकाशाद्यं सोममाहरतामिति शेषः अश्विनौ होनं नमुचेरध्याहरतामिति [१२.८.१.३.] श्रुतेः । सरस्वती च यं सोममश्विभ्यामानीतमसुनोत् (24.) अभ्यषुणोत् किमर्थमिन्द्रियाय इन्द्रस्य वीर्याय भैषज्याय वा । तमश्व्याहृतं सरस्वतीसुतमिमं राजानमिह यज्ञेऽहं भक्षयामि । कीदृशं सोमं शुक्रं शुद्धं लोहितासंसृष्टमत एव मधुमन्तं रसवन्तमिन्दुमिदि परमैश्वर्ये परमैश्वर्यप्रदम् ॥ ३४ ॥

यद॒द्य रि॒प्तꣳ र॒सिनः॑ सु॒तस्य॒ यदिन्द्रो॑ऽपि॒बच्च॑मूभिः ।
अ॒हं तद॑स्य॒ मन॑सा शि॒वेन॒ सोम॑ꣳ रा॒जा॑नमि॒ह भ॑क्षयामि ॥ ३५ ॥

का° [११.३.१४.] यदत्रेति सौरान्भक्षयन्ति यथाभक्षितं प्राचीनावीतिनो दक्षिणतः । अधर्व्वादय आश्विनं क्षोत्रादयः सारस्वतं यजमान ऐन्द्रं सुराग्रहं यदत्रेति मन्त्रेण विकारदक्षिणे स्थिता प्राचीनावीतिनो भक्षयन्ति आघ्राणमन्येन मूल्येन भक्षणमित्यर्थः ॥ रसोऽस्त्यस्मिन्निति रसी तस्य रसिनो रसवतः सुतस्याभिषुतस्य सोमस्य यत् सामान्ये नपुंसकत्वम् यो भागः अत्र सुरायां रिप्तं लिप्तं सोमसम्बन्धि यत्सुरायां लग्नं यच्च सुरालग्ने सोमांशं शचीभिः कर्मभिः शुद्धं कृत्वा इन्द्रः अपिबत् । सोमं राजानमिति द्वितीये षष्ठ्यर्थे अस्य विशेषणत्वात् (25.) अस्य सोमस्य राज्ञः तत् तं सुरानिर्गतं सोमं शिवेन शुद्धेन मनसा इह यन्नेऽहं भक्षयामि सुरासकाशाकुद्धं कृत्वा भक्षयामि तथा च श्रुतिः [१२.८.१.५.] अहं तदस्य मनसा शिवेनेत्यशिव इव वाऽएष भक्षो यत्सुरा ब्राह्मणस्य शिवमेवैनमेतत्कृत्वात्मन्धत्तऽइति ॥३५॥

a. पितृभ्यः स्वधायिभ्यः स्वधा नमः । b. पितामहेभ्यः स्वधायिभ्यः स्वधा नमः । c. प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । d. अक्षन्पितरः । e. अमीमदन्त पितरः । f. अतीतृपन्त पितरः । g. पितरः शुन्धध्वम् ॥३६॥

का° [११.३.१७.] अङ्गारेषु वा बर्हिष्परिधि दक्षिणातो जुहोत्याश्विनमुत्तरे मध्यमे सारस्वतमैन्द्रं दक्षिणे पितृभ्य इति प्रतिमन्त्रं सुराग्रहाणां भक्षणम् घ्राणम् अन्येन मूल्येन भूपालपानमिति पक्षत्रयमुक्तम् चतुर्थमाह यद्वाक्षवतीयस्याङ्गारेषु परिधेर्बर्हिर्दक्षिणादिक्स्थेषु क्षोमशेषान्सुराग्रहान्पितृभ्य इति प्रतिमन्त्रं जुहोति तदेवाह उत्तरेऽङ्गारे आश्विनम् मध्यमे सारस्वतम् दक्षिणे ऐन्द्रं सुराग्रहं जुहोतीति सूत्रार्थः ॥ अपसव्येन कर्म । सप्त यज्ञेषि पितृदेवत्यानि । पितृभ्यः स्वधासंज्ञकं नमोऽन्नमस्तु स्वधा वै पितृणामन्नमिति श्रुतेः यद्वा पितृभ्यः स्वधान्नमस्तु तेभ्यो नमो नमस्कारश्चास्तु कीदृशेभ्यः स्वधायिभ्यः स्वधामन्नं प्रति यन्ति गच्छन्तीत्येवंशीलाः स्वधायिनस्तेभ्यः । इण् गताविति धातोः सुप्यजातौ णिनिस्ताच्छील्य ऽइति [पा° ३.२.७८.] णिनिप्रत्ययः पितृभ्य इति बहुवचनं पितृव्याद्यपेक्षं पूजार्थं

वा । एवं पितामहेभ्यः प्रपितामहेभ्य इति मन्त्रौ व्याख्येयौ ॥ का° [११.३.१८.] अन्नन्पितर इति प्रक्षालनेनोपसिञ्चति । सौर्यकृष्णोमपात्रक्षालनजलेन यथास्व-मङ्गारान्सिञ्चति प्रतिमन्त्रम् ॥ पितरः अन्नन् भक्षितवन्तः घसॢ अदने लङि ङूपम् ॥ पितरोऽमीमदन्त मद तृप्तौ तृप्ताः ॥ अतीतृपन्त तर्पिता अस्माभिः पितरः यद्वान्मा-नतीतृपन्त तर्पयन्ति तृप्ताः सन्तोऽभीष्टदानेन ॥ का° [११.३.११.] पितरः शुन्धध्व-मिति जपति ॥ हे पितरः शुन्धध्वं शुद्धाः पाणिप्रक्षालनेन शुद्धा यूयं भवत ॥३६॥

a. पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः ।
पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥
b. पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥३७॥

का° [११.३.२०.] कुम्भीमासज्य कुम्भवक्त्रवितृणां वालपवित्रक्विरण्यानन्तर्धाय नवर्चं वाचयति पुनन्तु मेति । दक्षिणाक्वनीयपार्श्वयोः स्तम्भद्वयोपरि दक्षिणाग्रं वंशं निधाय तत्रस्थे शिक्ये शतच्छिद्रां कुम्भीं निधाय कुम्भीतले वालादीनि निधाय तत्र सुराशेषं सिक्ताग्रेरुपरि स्रवन्त्यां सुरायां नवर्चं यजमानं वाचयेत् वालो गो-ऽश्वबालकृतं सुरागलनम् पवित्रमजाविलोमकृतं पयोगलनम् क्विरण्यं शतमान-मितम् प्रत्यृचं वाचनमिति सूत्रार्थः ॥ द्वे पितृदेवत्येऽनुष्टुभौ । पितरो मा मां पु-नन्तु शोधयन्तु केन पवित्रेण गोऽश्वबालकृतेन कीदृशेन पवित्रेण शतायुषा शतं शतवर्षमितमायुर्यस्मात्तत्कृतायुस्तेन येन पूतः शतायुर्भवतीत्यर्थः । पितामहाश्च मां पुनन्तु प्रपितामहाश्च मां पुनन्तु कीदृशाः पित्रादयः सोम्यासः सोम्याः सोमं सम्पा-दयन्ति सोम्याः ॥ आदरार्थं पुनर्वचनम् पितामहाः प्रपितामहाश्च मां पुनन्तु शता-युषा पवित्रेण । एवं पित्रादिभिः पूतोऽहं विश्वं सर्वमायुः व्यश्नवै व्याप्नवै प्राप्नु-याम् आशूङ् व्याप्तौ लोट् ॥३७॥

अग्नऽआयूꣳषि पवसऽआसुवोर्ज्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥३८॥

प्रजापतिदृष्टाग्निदेवत्या गायत्री । हे अग्ने त्वमायूꣳषि पवसे स्वत एवायुःप्राप-

कानि कर्माणि पावयसे चेष्टयसे अन्तर्भूतण्यन्तः । अत एव नोऽस्मदर्थमिषं व्रीह्यादिधान्यमूर्जं दध्यादि च आसुव ज्ञापय देहीत्यर्थः जीवनहेतुत्वात् । किं च अरे दूरेऽपि स्थितानां द्विषताम् द्विष्टाश्च ते श्वानश्च द्विषानः तेषाम् कर्माणि षष्ठी द्विष्टान् श्वनः सारमेयप्रायान्दुर्जनान्बाधस्व नाशयसि (26.) दुर्जने जीवनाशक्तिः ॥३८॥

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥३९॥

अनुष्टुप् देवजनधीविश्वभूतजातवेदोदेवत्या । देवानां जना देवजनाः देवानुगामिनो जना मां पुनन्तु मनसा सह धियः बुद्धयः कर्माणि वा मां पुनन्तु विश्वा विश्वानि सर्वाणि भूतानि मां पुनन्तु हे जातवेदः त्वमपि मां पुनीहि ॥३९॥

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँ२॥ऽनु ॥४०॥

अग्निदेवत्या गायत्री । हे अग्ने हे देव शुक्रेण शुक्लेन शुद्धेन पवित्रेण मा मां पुनीहि । किम्भूतस्त्वम् दीद्यत् अतिदीव्यतीति दीद्यत् दीप्यमानः दिवेर्यङ्लुगन्तं रूपम् । किं च हे अग्ने क्रतूननु अस्माकं यज्ञाननुलक्ष्य क्रत्वा क्रतुना कर्मणा त्वं पुनीहि यज्ञे मां पुनीहि यद्वा यज्ञान्पुनीहि सम्यक्कारयेत्यर्थः ॥४०॥

यत्ते पवित्रमर्चिष्यग्ने वितततमन्तरा । ब्रह्म तेन पुनातु मा ॥४१॥

आग्नेयी गायत्री तृतीयः पादो ब्रह्मदेवत्यः । हे अग्ने ते तव अर्चिषि ज्वालायामन्तरा मध्ये यत् ब्रह्म त्रयीरूपं (27.) परब्रह्मरूपं वा पवित्रं विततं विस्तृतं प्रसारितं तेन पवित्रेण मा मां भवान्पुनातु ॥४१॥

पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥४२॥

सोमदेवत्या गायत्री तृतीयः पादो वायुदेवत्यः । स पवमानः पवतेऽसौ पवमानः शोधकः सोमः अद्यास्मिन्दिने पवित्रेण नोऽस्मान्पुनातु कीदृशः सोमः विचर्षणिः विविधं चष्टे विचर्षणिः द्रष्टा कृताकृतज्ञः यद्वा विशिष्टाः चर्षणयो मनुष्याः ऋत्विजो यस्य सः । किं च यः पोता पुनाति पवते वा पोता वायुः स मा मां पुनातु ॥४२॥

उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥४३॥

सवितृदेवत्या गायत्री । हे देव सवितरुभाभ्यां कृत्वा विश्वतः सर्वतो मां पुनीहि उभाभ्यां काभ्याम् पवित्रेण अज्ञाविलोमनिर्मितेन सवेनाभ्यनुज्ञया च त्वदाज्ञया यज्ञसिद्धिरित्यर्थः ॥४३॥

विश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥४४॥

विश्वदेवदेवत्या त्रिष्टुप् । इयं प्रवल्हिका । अज्ञाताभिधेया । ततः कांचिद्देवतामुद्दिश्य व्याख्यास्यामः दक्षिणाग्नेरुपरि शतातृण्णा कुम्भी क्षरति ताम् सौत्रामणीं वा वाचं वा उखां वा । देवी द्योतमाना सुराकुम्भी आगता कीदृशी वैश्वदेवी विश्वेभ्यः सर्वेभ्यो देवेभ्यो हिता वैश्वदेवी विश्वेभ्यो देवेभ्य आगता वा पुनती पावनं कुर्वती । यस्यां कुम्भ्यामिमाः प्रत्यक्षतो दृश्यमानाः बह्व्यः बहुसंख्याकाः तन्वः शरीरप्राया धाराः वर्तन्ते कीदृश्यस्तन्वः वीतपृष्ठाः वीतमिष्टं पृष्ठं स्वरूपं यासां ताः कामितशरीराः सुराधाराः सुरैः काम्यन्ते । तया कुम्भ्या सधमादेषु यज्ञस्थानेषु मदन्तो मोदमानाः सन्तो वयं रयीणां धनानां पतयः स्याम भवेम सह माद्यन्ति देवा येषु ते सधमादाः सध मादस्थयोश्छन्दसीति [पा° ६.३.९६.] सहस्य सधादेशः ॥४४॥

ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥४५॥

का° [११.३.२३.] ये समाना इति यजमानो जुहोति । सकृद्गृहीतमाज्यं दक्षिणेऽग्नौ प्राचीनावीती दक्षिणामुखो यजमानो जुह्वा जुहोतीत्यर्थः ॥ द्वे अनुष्टुभौ । आद्या पितृदेवत्या । यमराज्ये यमस्य राज्यं यस्मिन् तत्र यमलोके ये पितरो वर्तन्ते धर्मराजः पितृपतिरिति [अमर° १.१.५८.] अभिधानात् । कीदृशाः पितरः समानाः ज्ञातिरूपादिभिस्तुल्याः समनसः समानं मनो येषां ते तुल्यमनस्काः समानस्य छन्दसीति [पा° ६.३.८४.] समानस्य सादेशः । तेषां पितॄणां लोकः वि-

भक्तिव्यत्ययः लोके स्वधा नमः स्वधाशब्दोपलक्षितं नमोऽन्नमस्तु यद्वान्नं नमस्कारश्चास्तु । यज्ञस्तु देवेषु कल्पतां देवांस्तर्पयितुं समर्थो भवत्वित्यर्थः ॥ ४५ ॥

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ॥ ४६ ॥

का° [१९.३.२४.] उत्तरे (28.) यज्ञोपवीत्युत्तरया । उत्तरे उत्तरवेद्याहवनीये कृतसव्यो यजमान उत्तरयाग्निमया ऋचाज्यं जुहोतीत्यर्थः ॥ यजमानाशीः श्रीदेवत्या । जीवन्तीति जीवास्तेषु जीवेषु प्राणिषु मध्ये ये समानाः समनसः समनस्काः मामका (29.) मदीया जीवाः प्राणिनः । सपिण्डाः ये मे ते (30.) मामकाः तवकममकावेकवचनऽइति [पा° ४.३.३.] अस्मदो ममकादेशः । अस्मिन् लोके भूलोके शतं समाः शतवर्षपर्यन्तं तेषां मामकानां जीवानां श्रीर्मयि कल्पतां तांस्त्यक्त्वा मयि कृपा भवतु मामाश्रयतामित्यर्थः गोत्रिणो हि पापात्मानः सकृज्जाः शत्रवोऽत एवं प्रार्थ्यन्ते ॥ ४६ ॥

द्वे सृतीऽअशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥ ४७ ॥

का° [१९.३.२५.] अन्वारब्धेषु पयो जुहोति द्वे सृतीऽइति । ऋत्विग्यजमानेषु कृतान्वारम्भेषु अध्वर्युः पयो जुहोतीत्यर्थः ॥ देवयानपितृयानमार्गदेवत्या त्रिष्टुप् । मर्त्यानां मरणधर्मिणां प्राणिनां द्वे सृती द्वौ मार्गौ अहमशृणवं श्रुतवानस्मि श्रुतितः स एष देवयानो वा पितृयानो वा पन्था इति श्रुतेः । के द्वे सृती अत आह देवानां मार्ग एकः उतापि च पितॄणाम् देवमार्गः पितृमार्गश्चेति । पितरं मातरम् द्यौः पिता पृथिवी माता असौ वै पितेयं मातेति [१२.८.१.२१.] श्रुतेः पितरं मातरं च अन्तरा भूलोकद्युलोकयोर्मध्ये तत् एजत् कम्पमानं क्रियावत् विश्वं सर्वमिदं ताभ्यां सृतिभ्यां देवयानपितृयानाभ्यां समेति संगच्छते ताभ्यां सृतिभ्यां सुकृतमस्तु ॥ ४७ ॥

इदं हविः प्रजननं मेऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।

आत्मसनिं प्रजासनिं पशुसनिं लोकसन्यभयसनिं ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽस्मासु धत्त ॥४८॥

का० [११.३.२६.] शेषं यजमानो भक्षयतीद्ं हविरिति । उखास्थितं शेषं पयो यजमानो भक्षयतीत्यर्थः ॥ यजमानाशीर्देवत्या त्र्यवसाना अष्टिः एको व्यूहः । इदं पयोरूपं हविर्मे मम स्वस्तये अविनाशायास्तु । कीदृशं हविः प्रजननं प्रजननयतीति प्रजननं प्रजोत्पादकम् । दशवीरं दश वीराः प्राणा यत्र तत् यत्र पीते दशानां प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनंजयसंज्ञानां प्राणानां स्वास्थ्यं भवतीत्यर्थः प्राणा वै दश वीराः प्राणानेवात्मन्धत्तऽइति [१२.८.१.२२.] श्रुतिः । तथा सर्वगणं सर्वे गणा अङ्गानि यस्मिंस्तत् यत्र पीतेऽङ्गानि स्वस्थानि स्युरित्यर्थः अङ्गानि वै सर्वे गणा अङ्गान्येवात्मन्धत्तऽइति [१२.८.१.२२.] श्रुतिः । आत्मसनि आत्मानं सनोति सनति ददाति सम्भजते वा षणु दानि तुदादिः षन सम्भक्तौ भ्वादिः । एवमग्रेऽपि । प्रजासनि पशुसनि आत्मानमेव सनोति पशून्सनोतीत्यादिश्रुतिः [१२.८.१.२२.] । लोकसनि लोकमैहिकं सनोति ऐहिकं सुखं ददातीत्यर्थः लोकाय वै यजते तमेव जयतीति [२२.] श्रुतिः । अभयसनि अभयं स्वर्गं सनोति स्वर्गो वै लोकोऽभयं स्वर्गऽएव लोकेऽत्तः प्रतितिष्ठतीति [२२.] श्रुतिः ॥ एवं हविः प्रार्थ्याग्निं प्रार्थयते अग्निर्मे मम प्रजां बहुलां प्रवृद्धां करोतु । एवमग्निमुक्त्वा ऋत्विज आह हे ऋत्विजः अस्मासु अन्नं व्रीह्यादि पयो दुग्धं रेतो वीर्यवत्तां यूयं धत्त स्थापयत तथाऽएवैनमेते याजयन्ति तानेतदाह्वैतन्मयि सर्वं धत्तेति [२२.] श्रुतिः ॥४८॥

IV. उदीरतामवरऽउत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं यऽईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥४९॥

का० [११.३.२१.] सोमवतां बर्हिषदामग्निष्वात्तानां च । उदीरतामित्यादित्रयोदशर्चोऽनुवाकः तत्र उदीरताम् [४९.] अङ्गिरसः [५०.] ये नः [५१.] इति ऋक्त्रयस्याग्निष्वात्तानित्यन्त्यायाश्च [६१.] विनियोगः कात्यकृतोक्तः त्वं सोमेति [५२.] तृचं सोमवताम् बर्हिषद इति [५५.] तृचं बर्हिषदाम् आयन्तु न इति [५८.] तृचमग्नि-

घात्तानाम् पुनन्तु मेति [३९.] नवऽर्चवाचनानन्तरं (31.) वं सोमेत्यादि [५२.] तन्वं कल्पयातीत्यन्तं नवऽर्चं प्रत्यृचमध्वर्युर्यज्ञमानेन वाचयतीत्यर्थः ॥ त्रयोदश शङ्खदृष्टाः पितृदेवत्याः एकादशी अग्निघात्ताः पितरः [५९.] इयं जगती अन्या द्वादश त्रिष्टुभः । अवरे अस्मिन् लोकेऽवस्थिताः पितरः उदीरताम् ऊर्ध्वं क्रमन्ताम् ऊर्ध्वलोकं गच्छन्तु ईर कम्पने अदादिः लोट् । परासः पराः परस्मिन् लोके स्थिताः पितर उदीरतां तस्मादपि स्थानात्परं स्थानं गच्छन्तु । उन्मध्यमाः मध्ये भवा मध्यमाः मध्यमाः पितरः उदीरताम् । कीदृशाः पितरः सोम्यासः सोमं सम्पादयन्ति ते सोम्याः । ये च असुं प्राणमीयुः वातात्मानो वातरूपं प्राप्तास्ते पितरो हविषु आर्द्धानिषु नोऽस्मानवन्तु रक्षन्तु । कीदृशाः अवृकाः नास्ति वृकः शत्रुर्येषां ते उदासीनाः ऋतज्ञा सत्यज्ञा यज्ञज्ञा वा स्वाध्यायनिष्ठा वा ॥ ४९ ॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ५० ॥

ये नोऽस्माकं पितरः तेषां सुमतौ शोभनबुद्धौ वयं स्याम भवेम अस्तेर्लिङ् तेऽस्मासु सुमतिं कुर्वन्त्वित्यर्थः तेषां भद्रे कल्याणकारिणि सौमनसे शोभनमनस्त्वेऽपि वयं स्याम सुमनसो भावः सौमनसम् अस्मासु कल्याणं मनः कुर्वन्त्वित्यर्थः । कीदृशानां तेषां यज्ञियानां यज्ञे हिता यज्ञियाः यज्ञसम्पादिनः । कीदृशाः पितरः अङ्गिरसः अङ्गिरसो बह्वन्यपत्यानि अङ्गिरसः बहुत्वे तद्धितलोपः । नवा नूतना ग्वा गतिर्येषां ते नवा नवनीया स्तोतव्या ग्वा येषामिति वा । अथर्वाणः अथर्वणो मुनिर्बह्वन्यपत्यानि । भृगवः भृगोरपत्यानि । सोम्यासः सोममर्हति य इति [पा° ४.४.१३७.] यः सोमसम्पादिनः ॥ ५० ॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः सꣳरराणो हवीꣳष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ५१ ॥

नोऽस्माकं ये पूर्वे पितरः सोमपीथं सोमपानमनूहिरे अनुवहन्ति स्म देवान्प्रापितवन्तः कीदृशाः सोम्यासः सोमसम्पादिनः । वसिष्ठाः वसिष्ठस्य गोत्राप-

त्यानि । यमः तेभिः तैः पितृभिः संरराणाः प्रीयमाणाः सन्प्रतिकामं हवींषि अत्तु भक्षयतु रा दानि शानच्प्रत्ययः । कीदृशो यमः उशन् वष्टि कामयते इत्युशन्कामयमानः । कीदृशैः तैः उशद्भिः उशन्ति ते उशन्तः तैः कामयमानैः वश कान्तौ शतृप्रत्ययः ॥५१॥

त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥५२॥

त्वं मनीषा मनीषया स्वप्रज्ञया रजिष्ठमृजुतमं देवयानं पन्थां पन्थानमनु नेषि अनुनयसि प्रापयसि । मनीषा तृतीयैकवचने पूर्वसवर्णदीर्घः । अत्यन्तमृजुः रजिष्ठः अतिशायने तमबिष्ठनौ [पा० ५.३.५५.] विभाषर्जोरिष्टेनलोपश्छन्दसीति [पा० ६.४.१६२.] ऋकारस्य र इष्ठादिषु । पन्थाम् अयस्मयादीनि छन्दसीति [पा० १.४.२०.] सर्वनामस्थानेऽपि पदसंज्ञायां नलोपः प्रातिपदिकान्तस्येति [पा० ८.२.७.] नलोपे सवर्णदीर्घे पन्थामिति रूपम् । अनुनेषि नयतेः शपि लुप्ते गुणे लटि रूपम् । कीदृशस्त्वम् प्रचिकितः कित् ज्ञाने प्रकर्षेण चिकितः चेतनावान् विशिष्टचैतन्ययुतः । किं च हे इन्दो सोम नोऽस्माकं पितरः तव प्रणीती प्रणीत्या प्रणयनेनाभ्यनुज्ञानेन देवेषु विष्टये रत्नं रमणीयं यज्ञफलमभजन्त सिषेविरे सोमयागेनैव स्वर्गाप्तेः । कीदृशाः पितरः धीराः धीमन्तः यज्ञज्ञानवन्तः ॥५२॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥५३॥

हे सोम हे पवमान शोधक नोऽस्माकं धीरा धीमन्तः पूर्वे पूर्वजाः पितरः हि यस्मात्कारणात् त्वया कृत्वा कर्माणि यज्ञादीनि चक्रुः अतः प्रार्थये त्वं परिधीनुपद्रवकारिणः अपोर्णुहि अपगमय ऊर्णुञ् आच्छादने लोट् परिदधति सर्वत उपद्रवाय तिष्ठन्ति ते परिधयो यज्ञोपद्रावकाः । कीदृशस्त्वं वन्वन् वनुतऽइति वन्वन् अस्मत्कर्माणि सम्भजमानः । तथावातः नास्ति वातो यस्य वात उपलक्षणं वाताद्युपद्रवरहितः । किं च वीरेभिर्वीरैः अश्वैश्च सहितः सन्नोऽस्माकं

मघवा धनवान् भव मघं धनमस्यास्तीति मघवा यो यस्य दाता स तदीयधनवानिति लोकप्रसिद्धिः । भवेत्यस्य संहितायां दीर्घः परिधीन् अपेत्यत्र दीर्घादटि समानपाद॰ इति [पा॰ ८.३.६.] नकारस्य रुः ॥५३॥

त्वꣳ सोम पितृभिः संविदानो॰नु द्यावापृथिवी॰ आततन्थ ।
तस्मै तऽइन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥५४॥

हे सोम त्वं द्यावापृथिवी अन्वाततन्थ विस्तारितवान् तनु विस्तारे लिट् बभुथाततन्थेत्यादिना [पा॰ ७.२.६४.] निपातः । किम्भूतस्त्वं पितृभिः संविदानः संवित्त॰ इति संविदानः संवादं कुर्वाणः समो गमित्यादिना [पा॰ १.३.२९.] आत्मनेपदित्वाच्छानच् । हे इन्दो तस्मै ते तुभ्यं वयं हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः विधतिर्दानार्थः हविर्दानेन च वयं रयीणां धनानां पतयः स्याम भवेम ॥५४॥

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
तऽआगतावसा शंतमेनाथा नः शं योरपो दधात ॥५५॥

सोमवतां पितॄणां षड्ऋचः समाप्तः अतो बर्हिषदां पितॄणां तृचः ॥ बर्हिषदः बर्हिषि दर्भे सीदन्तीति बर्हिषदः पृषोदरादित्वादल्लोपः हे बर्हिषदः पितरः ते यूयमूत्या (32.) अवनेन निमित्तेन अर्वागागत आगच्छत किमर्थमिति चेत् वो युष्माकमिमा इमानि हव्या हव्यानि वयं चकृम करोतेर्लिट् कृतवन्तः तानि यूयं जुषध्वं सेवध्वम् । अथानन्तरं शंतमेन सुखयितृतमेनावसान्नेन तर्पिताः सन्तो नोऽस्माकं शं सुखं रोगशमनं योः भयपृथक्करणमरपः पापाभावं च दधात धत्त स्थापयत तप्तनबिति [पा॰ ७.१.४५.] तबादिशात् श्नाभ्यस्तयोरात इति [पा॰ ६.४.११२.] आत्लोपाभावः । शं योः शमनं च रोगाणां यावनं च भयानामिति [निरु॰ ४.२१.] यास्कः । रपो रिप्रमिति पापनामनी भवतः [निरु॰ ४.२१.] ॥५५॥

आहं पितॄत्सुविदत्राँ२॥ऽअवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त॰ इहागमिष्ठाः ॥५६॥

अहं पितृना अवित्सि आभिमुख्येन वेद्मि विदितवान् विदेर्लुङि आत्मनेपदे उत्तमैकवचनरूपम् । कीदृशान्पितॄन् सुविदत्रान् सुष्ठु विशेषेण ददतीति सुविदत्राः तान् कल्याणदानान् । किं च वेवेष्टि विष्णुः तस्य विष्णोः व्यापनशीलस्य यज्ञस्य यज्ञो वै विष्णुरिति [१.१.३.१.] श्रुतेः तस्य नपातं विक्रमणं च वेद्मि नास्ति पातो यत्र स नपातो देवयानपथः यत्र गतानां पातो नास्ति विविधं क्रमणं गमनागमनं यत्र स विक्रमणः पितृयानपथः यत्र गतानां पुनर्भागात्ते पतनम् यज्ञसम्बन्धिनौ देवयानपितृयानौ पन्थानौ वेद्मीत्यर्थः उद्गामिनः पितॄंश्च । अतो ब्रवीमि ये बर्हिषदः पितरः स्वधया सवनीयलक्षणेनान्नेन सह सुतस्याभिषुतस्य सोमस्य पित्वः पानं भजन्त भजन्ते सेवन्ते लङ् अडभाव आर्षः ते इह यज्ञे आगमिष्ठाः आगच्छन्तु लोडर्थे लुङ् पुरुषवचनव्यत्ययः ॥५६॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
तऽआगमन्तु तऽइह श्रुवन्त्वधिब्रुवन्तु तेऽवन्त्वस्मान् ॥५७॥

ते पितर इह यज्ञे आगमन्तु आगच्छन्तु व्यत्ययेन शपो लुक् ते शृण्वन्तु अस्मद्वचः शृण्वन्तु श्रुत्वा च अधिब्रुवन्तु पितृभिः पुत्राणां यद्वक्तव्यं तद्वदन्तु ते अस्मानवन्तु पालयन्तु । कीदृशाः पितरः प्रियेषु अभिरुचितेषु हविःषु उपहूताः सोम्यासः सोम्याः कीदृशेषु प्रियेषु बर्हिष्येषु बर्हिषि भवानि बर्हिष्याणि तेषु बर्हिषि सादितेषु तथा निधिषु निधिभूतेषु निधिवत्स्थापनीयेषु ॥५७॥

आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥५८॥

चतस्र ऋचोऽग्निष्वात्तानां पितृणाम् ॥ नोऽस्माकं पितरः देवयानैः पथिभिर्मार्गैः आयन्तु आगच्छन्तु देवैः सह यान्ति पितरो येषु ते देवयाना मार्गाः तैः । कीदृशाः पितरः सोम्यासः सोम्याः सोमपानार्हाः । अग्निष्वात्ताः अग्निना स्वात्ताः स्वादिताः अग्निर्यान्दहन्स्वादयति । श्रौतस्मार्तकर्मानुष्ठायिनः । येषां पुत्रादिभिरेतत्कर्मानुष्ठीयते तदुक्तम् पुत्रेण लोकान्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण

ब्रध्नस्याप्नोति विष्टपमिति । किं च पितर आगत्यास्मिन्यज्ञे स्वधयान्नेन मदन्तः तृप्यन्तस्तुष्टाः सन्तो नोऽस्मानधिब्रुवन्तु अधिकान्वदन्तु तद्वाक्यात्तथैव, वयमधिकाः स्यामित्यर्थः ते पितरोऽस्मानवन्तु पालयन्तु ॥५८॥

अग्निष्वात्ताः पितर इह गच्छत सदः-सदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥५९॥

हे अग्निष्वात्ताः पितर इह यज्ञे यूयमागच्छत आगत्य च सदः-सदः प्रतिगृहं सदत उपावेशत नित्यवीप्सयोरिति [पा° ८.१.४.] द्वित्वम् । कीदृशा यूयं सुप्रणीतयः शोभना प्रणीतिः प्रणयनं येषां ते । ततः सदस्युपविष्टाः सन्तः हवींषि अत्त भक्षयत अत्तेर्लोट् संहितायां दीर्घः । कीदृशानि हवींषि बर्हिषि दर्भे प्रयतानि नियमपूर्वकं स्थापितानि प्रकर्षेण यम्यन्ते नियम्यन्ते तानि प्रयतानि । अथानन्तरं तृप्ताः सन्तः सर्ववीरं रयिं दधातन स्थापयत सर्वे वीराः पुत्रा यत्र तम् । निपातस्य चेति [पा° ६.३.१३६.] दीर्घोऽथशब्दस्य तप्तनबिति [पा° ७.१.४५.] तनबादेशः ॥५९॥

येऽअग्निष्वात्ता येऽअनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥६०॥

ये पितरः अग्निष्वात्ताः अग्निना दग्धाः विधिवदौर्ध्वदेहिकं प्राप्ताः ये चानग्निष्वात्ता न अग्निना स्वादिता अदग्धाः श्मशानकर्म न प्राप्ताः सन्तः दिवः स्वर्गस्य मध्ये स्वधयान्नेन स्वकर्मोपार्जितेन मादयन्ते तृप्यन्ति सुखं सेवन्ते । स्वराट् स्वेनैव राजते स्वराट् यमः तेभ्यः पितृभ्योऽर्थे यथावशं वशोऽभिलाषः यथाकाममेतां मनुष्यसम्बन्धिनीं तन्वं शरीरं कल्पयाति कल्पयतु लेट् लेटोऽडाटौ तेभ्यो नरशरीरं यमो ददात्वित्यर्थः । कीदृशीं तन्वमसुनीतिम् असून्प्राणान्नयति प्राप्नोत्यसुनीतिः प्राणयुक्ता चिरकालजीविनीत्यर्थः ते यथा पुनः स्तम्भनं (33.) कुर्वन्ति ॥६०॥

अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथं यऽआशुः ।

ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ॥ ६१ ॥

अग्निष्वात्तान्पितॄन्वयं हवामहे आह्वयामः । कीदृशानृतुमतः ऋतवो विद्यन्ते येषु ते ऋतुमन्तः तानृतुयुक्तानाह्वयामः । ये पितरो नाराशंसे चमसे सोमपीथं सोमपानमाशुः अश्नन्ति स्म अश भोजने लिट् अथ यदि नाराशꣳसेषु सन्न इत्युपक्रम्य पितृभ्यो नाराशꣳसेभ्यः स्वाहेति जुहुयादिति [१२. ६. १. ३३.] श्रुत्या नाराशंसे चमसे पितॄणां भक्षः प्रतिपादितः । ते पितरो नोऽस्माकं सुहवाः स्वाह्वाना भवन्तु अस्मदाह्वृताः शीघ्रमायान्वित्यर्थः । एवं पितृष्वाह्वृतेषु वयं रयीणां धनानां पतयः स्वामिनः स्याम भवेम ॥ ६१ ॥

V. आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे ।
मा हिꣳसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता करम ॥ ६२ ॥

कात्यायनेन आच्य जान्वित्यनुवाकस्य विनियोगो नोक्तः उदीरतामित्यनुवाकद्वयस्य श्राद्धेऽश्नत्सु (34.) द्विजेषु जपे विनियोगः ॥ दशर्चोऽनुवाकः आच्या नव पितृदेवत्याः । द्वे त्रिष्टुभौ । हे पितरः विश्वे सर्वे सोमवन्तो बर्हिषदोऽग्निष्वात्ताश्च यूयमिमं यज्ञं सौत्रामणीमभिगृणीत अभिष्टुत दक्षिणामल्पकालकर्तृकविर्यज्ञमानोत्कर्षैः साधयं यज्ञ इति स्तुतिं कुरुतेत्यर्थः । किं कृत्वा जान्वाच्य वामजानु पातयित्वा तथा दक्षिणतो निषद्य दक्षिणाभिमुखा उपविश्य स हि तेषां स्वभावः अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदन्निति श्रुतेः । किं च हे पितरः केन चित् केनाप्यपराधेन नोऽस्मान् मा हिंसिष्ट हिंसां मा कुरुत हिनस्तेर्लुङ् । यत् यस्मात् पुरुषता पुरुषस्य भावः पुरुषता विभक्तिलोपः पुरुषभावेन चलचित्तत्वेन वो युष्माकमागोऽपराधं वयं कराम कुर्मः करोतेः शपि लङि रूपम् अडभावः । यद्यप्यपराधिनो वयं तथापि मास्मान्बधिष्टेत्यर्थः ॥ ६२ ॥

आसीनासोऽअरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत तऽइहोर्जं दधात ॥ ६३ ॥

हे पितरो दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय यूयं रयिं धनं

धत्त दत्त । कीदृशा यूयम् अरुणीनामरुणवर्णानामूर्णानामुपस्थे उपरिभागे आसीनासः आसीनाः उपविष्टाः याभिः कुतपाः क्रियन्ते ता ऊर्णा अरुणा भवन्ति कुतपं वासने दध्यादिति स्मृतिः (34.) कुतपप्रियाः पितरः । यद्वा अरुणीनामरुणवर्णानां रश्मीनामुपस्थे उत्सङ्गे आसीना आदित्यलोकस्था इत्यर्थः । किं च हे पितरः पुत्रेभ्यो यजमानेभ्यः तस्य वस्वः वसुनो धनस्य प्रयच्छत दत्त कर्मणि षष्ठी यदभीष्टं धनं तद्दत्त । पितॄणां पुत्रा एव यजमानाः । ते यूयमिहास्मदीये यज्ञे ऊर्जं रसं दधात स्थापयत ॥ ६३ ॥

यमग्ने कव्यवाहन त्वं चिन्मन्यसे रयिम् ।
तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥ ६४ ॥

द्वे अनुष्टुभौ । कव्यं पितृभ्यो देयमन्नं वहतीति कव्यवाहनः कव्यपुरीषपुरीष्येषु ण्युडिति [पा° ३. २. ६५.] ण्युट्प्रत्ययः । हे कव्यवाहन हे अग्ने त्वं चित् त्वमपि यं रयिं हविर्लक्षणं धनं मन्यसे उत्तमं जानासि नोऽस्माकं तं रयिं देवत्रा देवेषु पनय देहि पनतिर्दानकर्म देवमनुष्यपुरुषेत्यादिना [पा° ५. ४. ५६.] सप्तम्यर्थे देवात् त्राप्रत्ययः । कीदृशं रयिं गीर्भिः वाग्भिः पुरोऽनुवाक्यायाज्यावषट्कारलक्षणाभिः श्रवाय्यं श्रोतुं योग्यम् शृदृक्षिस्पृक्षिगृक्षिदृक्षिभ्य आय्य इति [उणा° ३. १५.] शृणोतेराय्यप्रत्ययः । तथा युजं युज्यतेऽनेति युक् तम् क्विप् चेति [पा° ३. २. ७६.] क्विप्प्रत्ययः योग्यम् ॥ ६४ ॥

योऽग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ ६५ ॥

यः कव्यवाहनोऽग्निः पितॄन्यक्षदिष्टवान् लेटोऽडाटौ सिब्बहुलं लेटि इतो लोपः । कीदृशान्पितॄन् ऋतावृधः ऋतं सत्यं यज्ञं वा वर्धयन्ति ते ऋतवृधः संहितायां दीर्घः तान् । सोऽग्निरिदानीं देवेभ्यः पितृभ्यश्च हव्यानि हवींषि प्रवोचति प्रब्रवीतु इमानि देवेभ्य इमानि पितृभ्य इति वदवित्यर्थः । इदु इ निपातौ पादपूरणौ । आकारः समुच्चयार्थः । व्यत्ययेन वचेः शपि वच उमिति [पा° ७. ४. २७.] छान्दस उमागमः ॥ ६५ ॥

त्वमग्नऽईडितः कव्यवाहनावाड्व्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते ऽअक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥ ६६॥

चतस्रस्त्रिष्टुभः । हे कव्यवाहन हे अग्ने त्वं कव्यानि हवींषि सुरभीणि कृत्वी सुगन्धानि कृत्वा अवाट् वहसि स्म । वहेर्लुङि इडागमाभावे सिचो लोपे ट्वपमवाट् । स्नाव्यादयश्चेति [पा० ७. १. ४१.] कृत्वीति निपातः । कीदृशस्त्वम् ईडितः स्तुतः देवैर्ऋत्विग्भिश्च । किं च कव्यानि ऊढ्वा स्वधया पितृमन्त्रेण पितृभ्यः त्वं प्रादाः दत्तवानसि ददातेर्लुङि ट्वपम् । ते च पितरः अक्षन् भक्षयन्ति स्म घसॢ अदने इत्यस्य ट्वपम् । हे देव त्वमपि अद्धि हवींषि भक्षय अद् भक्षणे लोट् कीदृशानि हवींषि प्रयता प्रयतानि शुद्धानि ॥ ६६॥

ये चेह पितरो ये च नेह याँश्च विद्म याँ२॥ऽउ ड च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व ॥ ६७॥

ये पितर इह लोके वर्तन्ते ये च इह लोके न सन्ति यांश्च पितॄन्वयं विद्म जानीमः उ पादपूरणः यांश्च पितॄन् वयं न प्रविद्म प्रकर्षेण जानीमः । हे जातवेदः ते पितरो यति यावन्तो वर्तन्ते तान् त्वं वेत्थ जानासि । या सख्या येषां ते यति किमः संख्यापरिमाणऽइत्यादिना [पा० ५. २. ४१.] सूत्रेण यत्तद्भ्यामपि डतिरिति वार्त्तिकेन यत्शब्दात् डतिप्रत्ययः डति चेति [पा० १. १. २५.] तस्य षट्संज्ञत्वात् षट्भ्यो लुगिति [पा० ७. १. २२.] जसो लुक् । यद्वा यतीन् शुचीन् नित्यनैमित्तिकानुष्ठानैर्निष्पापान् ते तान् त्वं वेत्थ यति विभक्तिलोपः ते इत्यत्र व्यत्ययेन जस् । किं च स्वधाभिः पितृणामन्नैः सुकृतं शोभनं कृतं यज्ञं त्वं जुषस्व सेवस्व ॥ ६७॥

इदं पितृभ्यो नमोऽस्त्वद्य ये पूर्वासो यऽउपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥ ६८॥

ये पितरः पूर्वासः पूर्वे ईयुः स्वर्गं जग्मुः ये च उपरासः उपराः उपरमन्ते विरमन्ति ते उपरा उपरतव्यापाराः कृतकृत्याः सन्त ईयुः परं ब्रह्म प्रापुः । ये च

पार्थिवे रजसि पृथिव्यां भवं पार्थिवं रजो ज्योतिरग्निः तस्मिन्ना निषत्ताः आभिमुख्ये निषण्णाः नसत्तनिषत्तेत्यादिना [पा° ८. २. ६१.]-निष्ठायां निपातः । ये वा वा समुच्चयार्थः ये च नूनं निश्चितं विक्षु प्रजासु यजमानलक्षणासु निषण्णाः । कीदृशीषु विक्षु सुवृजनासु शोभनं वृजनं बलं यासां ताः सुवृजनास्तासु धर्मबलयुक्तासु । अध्यास्मिन्दिने तेभ्यश्चतुर्विधेभ्यः स्वर्गब्रह्माग्नियजमानस्थेभ्यः इदं नमोऽन्नमस्तु ॥ ६८ ॥

अधा यथा नः पितरः परासः प्रत्नासोऽअग्नऽऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीरपव्रन् ॥ ६९ ॥

हे अग्ने नोऽस्माकं पितरः अध अथानन्तरं देहयात्रोत्तरकालं यथा येन प्रकारेण शुचि सुपो लोपः इदेवार्थे शुचिं निर्मलं दीधितिं रविमण्डलमिव अयन् प्राप्ताः अय गतौ लङ् अडभाव आर्षः । कीदृशाः पितरः परासः परा उत्कृष्टाः प्रत्नासः प्रत्नाः पुराणाः ऋतं यज्ञमाशुषाणाः अश्नुवाना व्याप्नुवन्तः । एवम्भूताः पितरः यथा देवयानं पन्थानं प्राप्ताः तथा वयमपि अरुणीः अरुणवर्णाः सूर्यदीधितिमपव्रन् अपवृणुमः सूर्यरश्मीनपवृत्य देवयानमार्गं प्राप्नुम इत्यर्थः वृञ् वरणे विकरणव्यत्ययेन शपि लुप्ते लङि व्रूपम् अडभावः पुरुषव्यत्ययश्छान्दसः । कीदृशा वयमुक्थशासः यज्ञेषु उक्थानि शस्त्राणि शंसन्ति वदन्ति ते उक्थशसः क्विप् संहितायां दीर्घः । तथा क्षामा क्षामां भूमिं भिन्दन्तः वेदिचात्वालयूपावटोपरवादिखननैर्विदारयन्तः सर्वोपकरणैर्यज्ञं कुर्वन्त इत्यर्थः ॥ ६९ ॥

उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।
उशन्नुशत आवह पितॄन्हविषेऽअत्तवे ॥ ७० ॥

अनुष्टुप् । हे अग्ने उशन्तः कामयमाना वयं तं त्वा निधीमहि स्थापयामः । कामयमाना एव वयं त्वां समिधीमहि संदीपयामः । त्वं च उशन्कामयमानः सन् उशतः कामयमानान्पितॄनावह आनय किं कर्तुं हविषे अत्तवे हविः अत्तुं भक्षयितुम् तुमर्थे तवेप्रत्ययः विभक्तिव्यत्ययः ॥ ७० ॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥७१॥

ऐन्द्री गायत्री अग्निमानुवाकनिदानभूता । हे इन्द्र यत् यदा त्वं विश्वाः स्पृधः सर्वान्संग्रामानजयो जितवानसि तदा अपां फेनेन जलडिण्डीरेण नमुचेरसुरस्य शिरः उदवर्तयः छिन्नवानसि उत्पूर्वो वृतिः छेदार्थः ॥७१॥

VI. सोमो राजामृतꣳ सुत ऋज्रीषिणाऽऽक्रान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु
॥७२॥

का° [११.२.२४.] सोमो राजेत्यनुवाकेन ग्रहानुपतिष्ठते युगपत् । अष्टर्चेनानुवाकेन समानकालमेव पयोग्रहान्सुराग्रहांश्चाधर्युरुपतिष्ठते यद्वा चतुर्भिः पयोग्रहांश्चतुर्भिः सुराग्रहान् ग्रहणानन्तरमेवोपस्थानम् मन्त्रपाठक्रमाद्व्यालेखीत्यर्थः ॥ अश्विसरस्वतीन्द्रदृष्टा अष्टौ ऋचः आद्यास्तिस्रो महाबृहत्यः यस्याश्चत्वारः पादा अष्टकाः पञ्चमों द्वादशकः सा महाबृहती । सोमो राजा सुतोऽभिषुतः सन् अमृतममृतवृपो रसवृपो भवति स्थूलस्य सूक्ष्मतापादनममृतीभावः । यत ऋज्रीषिणा ऋज्रीषं नीरसं सोमलताचूर्णम् तद्रूपेण मृत्युं स्थूलभावमजहात् जहाति । ऋतेन अनेन सत्येन एतत्सत्यम् ज्ञातम् यत् अन्धसोऽन्नस्य सोमस्य विपानं विविच्य पानं शुक्रं शुक्लं शुद्धमत एव इन्द्रियं वीर्यप्रदं भूयात् पयश्चेन्द्रस्येदृशं भवतु कीदृशम् इन्द्रियं वीर्यवत् अमृतमजरामरत्वप्रदं मधु मधुरं च ॥ अपां फेनेनित्यस्य मन्त्रस्यास्याष्टर्चानुवाकस्य च श्रुत्या सम्बन्ध उक्तः [१२.७.३.४.] तस्य शीर्ष्णि छिन्ने लोहितमिश्रः सोमोऽतिष्ठत् तस्मादबीभत्सन्त तऽएतदन्धसो विपानमपश्यन्त्सोमो राजामृतꣳ सुत इति तेनैनꣳ स्वदयित्वात्मन्नदधतेति । यथा एककारणानि वस्तूनि विविच्यमानानि दृश्यन्ते यथा च पृथग्भूतानि संमृष्टानि पुनर्विविच्यन्ते एवमयमपि लोहितमिश्रः सोमो विविक्तः सोम एवेति सर्वानुवाकार्थः ॥७२॥

अह्यः क्षीरं व्यपिबत्क्रुङ्ङाङ्गिरसो धिया । ऋतेन सत्यमिन्द्रि° ॥७३॥

आङ्गिरसः अङ्गानां रसः प्राणो यथा क्रुङ् हंसो भूत्वा धिया प्रज्ञया अह्यः स-

काशात्क्षीरं दुग्धमपिबत्पिबति संसृष्टाभ्यां क्षीरोदकाभ्यां क्षीरमिव हंसः पिबतीति जातिस्वभावः । अनेन सत्येनेदं सत्यं यदन्धसो विपानं शुक्रं भवतु अथेन्द्रस्य पयो वीर्यममृतं भवतु ॥७३॥

सोमम॒द्भ्यो व्यपिब॒च्छन्द॑सा हꣳस॑ः शु॒चिष॑त् । ऋ॒तेन॑ स॒त्यमिन्द्रि॑ꣳ ॥७४॥

हंसः आदित्यः अद्भ्यः सकाशात् छन्दसा वेदेन वेदरूपैः किरणैर्यथा सोमं व्यपिबत्पिबति सोमोदकाभ्यां रविः सोममेव पिबति । ऋतेनेत्युक्तम् । कीदृशो रविः शुचिषत् शुचि निर्मले गगने सीदतीति शुचिषत् ॥७४॥

अन्ना॑त्परि॒स्रुतो॒ रस॒ं ब्रह्म॑णा॒ व्यपिबत्क्ष॒त्रं पयः॒ सोम॑ं प्र॒जाप॑तिः ।

ऋ॒तेन॑ स॒त्यमिन्द्रि॑ꣳ ॥७५॥

अतिजगती द्वापञ्चाशदक्षरा । प्रजापतिः प्रथमशरीरी परिस्रुतोऽन्नात् सुरारूपादन्नात् रसं ब्रह्मणा गायत्रीलक्षणेन व्यपिबत् विविच्य पीतवान् क्षत्रं च व्यपिबत् वशीचकार क्षत्रियस्य पानं वशीकरणम् पयः सोमं च व्यपिबत् अनेन सत्येनेदं सत्यम् ॥७५॥

रेतो॒ मूत्रं॑ विज॑हाति॒ योनिं॑ प्रवि॒शदिं॑न्द्रि॒यम् ।

गर्भो॑ ज॒रायु॑णावृ॒त॒ उल्वं॑ जहाति॒ जन्म॑ना ॥ ऋ॒तेन॑ स॒त्यमिन्द्रि॑ꣳ ॥७६॥

अतिशक्वर्यौ द्वे षष्यक्षरातिशक्करी । इन्द्रियं पुम्प्रजननं शिश्नं योनिं स्त्रीप्रजननं प्रविशत् सत् रेतो वीर्यं विजहाति त्यजति योनिप्रवेशादन्यत्र मूत्रं विजहाति समानद्वारयोरपि रेतोमूत्रयोर्मूत्रस्थानादन्यत्र रेतोऽवतिष्ठते । जरायुणा गर्भवेष्टनेनावृतः गर्भः जन्मना कृत्वा उल्वं जरायु जहाति । भिन्नस्थानानामेकद्वाराणामाद्यमुदाहरणम् एकस्थानानामेकद्वाराणां द्वितीयम् । ऋतेनेति व्याख्यातम् ॥७६॥

दृ॒ष्ट्वा रू॒पे व्याक॑रोत्स॒त्यानृ॑ते प्र॒जाप॑तिः ।

अश्र॑द्धाम॒नृते॑ऽदधाच्छ्र॒द्धा स॒त्ये प्र॒जाप॑तिः ॥ ऋ॒तेन॑ स॒त्यमिन्द्रि॑ꣳ ॥७७॥

प्रजापतिः रूपे रूपवती मूर्तिमती सत्यानृते दृष्ट्वा व्याकरोत् व्याकरणं पृथ-

क्कं कृतवान् इदं सत्यमिदमनृतमिति पृथगवास्थापयत् । तदेवाह । अनृते अश्रद्धां नास्तिक्यमदधात् अस्थापयत् अनृतस्याश्रद्धानिमित्तत्वात् । सत्ये श्रद्धामदधात् सत्यस्य श्रद्धानिमित्तत्वात् श्रद्धास्तिक्यबुद्धिः अनेन ऋतेनेत्युक्तम् ॥ ७७ ॥

वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ॥ ऋतेन सत्यमिन्द्रि° ॥ ७८ ॥

महाबृहती । प्रजापतिः सुतासुतौ सुतासुतयोः रूपे वेदेन ज्ञानेन त्रय्या विद्यया वा व्यपिबत् विवच्य पीतवान् सुतः सोमः असुतः पयः परिस्रुच्च । ऋतेनेत्युक्तम् ॥ ७८ ॥

दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत् । पयः सोमं प्रजापतिः ॥
ऋतेन सत्यमिन्द्रि° ॥ ७९ ॥

अतिजगती । प्रजापतिः परिस्रुतः सुराया रसं दृष्ट्वा शुक्रेण शुद्धेन मद्येन पयः सोमं च शुक्रं शुक्लं शुद्धं कृत्वा व्यपिबत् विपुज्य पीतवान् । ऋतेनेत्युक्तार्थम् ॥ ७९ ॥

VII. सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥ ८० ॥

का° [११.४.१२.] खुरैर्वसायरुान्द्वात्रिꣳशतं जुहोति सीसेनेति प्रत्यृचम् । पञ्चपलो ग्रह इति परिशिष्टोक्तेः ऋषभखुराणां महत्त्वाच्चार्षभैः खुरैः पशूनां वसां गृहीत्वा सीसेनेति प्रतिमन्त्र द्वात्रिंशत्संख्यान्सुरायग्रहान्जुहोति एकेन मन्त्रेण द्वयोर्होम इत्यर्थः ॥ अश्विसरस्वतीन्द्रदेवत्याः षोडश जगत्यः जगतीभिर्जुहोतीति [१२.८.३.१३.] श्रुतिबलाद्बृहत्यादिन्यूनानामपि (36.) कासां चिज्जगतीत्वमेव । दस्रादिभिर्यथा इन्द्रस्य भैषज्यं कृतं तदनेनानुवाकेन प्रतिपाद्यते । अश्विना अश्विनौ दस्रौ सविता सरस्वती वरुणश्च मनसा विचार्य यज्ञं सौत्रामणीं वयन्ति निष्पादयन्ति । केन सीसेन ऊर्णासूत्रेण च सीसेन शष्पक्रयणाद्ऊर्णाया (37.) तोकक्रयणात् ताभ्यां यज्ञनिष्पादनमित्यर्थः । तत्र दृष्टान्तः सीसेन ऊर्णासूत्रेण च तन्त्रमिव यथा कश्चित्सीसेन धातुविशेषेण तन्त्रमङ्गविशेषं वयति ऊर्णासूत्रेण च तन्त्रं प-

टं (38.) वयति तद्वत् तत्त्वं राष्ट्रे च सिद्धान्ति परस्परान्दाप्रधानयोः अङ्गदे कुटुम्बकृते तन्तुवानि परिस्कन्दऽइति कोशात् । कीदृशा अश्व्यादयः मनीषिणः मेधाविनः । कवयः क्रान्तदर्शनाः । इन्द्रस्य रूपं भिषज्यन् भिषज्यन्तः भिषज् रुग्जये कण्ड्वादिभ्यक् ततः शतृप्रत्ययः वचनव्यत्ययः । इन्द्रभैषज्याय यज्ञं वयन्तीत्यर्थः ॥ ८० ॥

तदस्य रूपममृतꣳ शचीभिस्तिस्रो दधुर्देवताः सꣳरराणाः ।
लोमानि शष्पैर्बभ्रुधा न तोकमभिस्त्वगस्य माꣳसमभवन्न लाजाः ॥ ८१ ॥

तिस्रो देवताः अश्विसरस्वत्यः संरराणाः सम्यक् रममाणाः सत्यः अस्येन्द्रस्य तदमृतममरणधर्मि रूपं शचीभिः कर्मभिः संदधुः (39.) कर्माङ्गैः संधानं चक्रुः तदेवाह लोमानि इन्द्ररोमाणि शष्पैर्विरूढव्रीहिभिः संदधुः अस्येन्द्रस्य त्वक् त्वचं च तोकमभिः विरूढयवैर्बभ्रुधा संदधुः लाजा न लाजाश्चास्य मांसं समभवत् । अध्यायसमाप्तिपर्यन्तं नकाराः सर्वे चकारार्थाः ॥ ८१ ॥

तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशोऽअन्तरम् ।
अस्थि मज्ञानं मासरैः कारोतरेण दधतो गवां त्वचि ॥ ८२ ॥

रुद्रवत् वर्तनिर्मार्गो ययोस्तौ रुद्रवर्तनी रुग्णवर्तनी (40.) वा भिषजा भिषजौ वैद्यौ अश्विना अश्विनौ सरस्वती च तदन्तरं शरीरान्तर्वर्ति पेश इन्द्रस्य रूपम् वयति वयन्ति सम्बध्नन्ति वचनव्यत्ययः । तदेवाह मासरैः शष्पादिचूर्णचरुनिःस्रावैः (41.) अस्थि सम्बध्नन्ति कारोतरेण गलनवासमा मज्ञानं वयन्ति । कीदृशास्ते गवां त्वचि चर्मणि दधतः सुरां स्थापयन्तः ॥ ८२ ॥

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ ८३ ॥

नासत्याभ्यामश्विभ्यां सहिता सरस्वती वसु धनं दर्शतं दर्शनीयं वपुश्च वयति पटमिव सृजति इन्द्रस्येति शेषः कीदृशं वसु पेशलं पेश इति हिरण्यरूपयोर्नाम [निघं० १, २. ३, ७.] पेशं लाति गृह्णाति पेशलं हिरण्यवद्रूपवद्वा (42.) । मनसा विचार्येति शेषः । परिस्रुता परिस्रुतः सुरायाः रोहितं लोहितं रसं न रसं च वय-

ति इन्द्रवपुषो रक्षनाय अत एव वेदेषु रोक्तिः इन्द्रः पठ्यते । अथ तदा नग्नहुः किणवः सुराकन्दः पूर्वोक्तः तसरं वयनसाधनं वेम न वेमा च भवति तसरवेमानौ कुविन्दानां प्रसिद्धौ । कीदृशो नग्नहुः धीरः धियमीरयति प्रेरयतीति धीरः मादक इत्यर्थः विवक्षातः कारकाणि भवन्तीति वचनात् नग्नहोः कर्तृत्वं विवक्षितम् ॥ ८३ ॥

पयसा शुक्रममृतं जनित्रꣳ सुरया मूत्रान्नजनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊर्ध्वं वातꣳ सब्वं तदारात् ॥ ८४ ॥

प्रकृतत्वादश्विनौ सरस्वती च पयसा दुग्धेन रेतसे वीर्यं जनयन्त उदपादयन् अडभाव आर्षः इन्द्रस्येति शेषः । कीदृशं रेतः शुक्रं शुक्लाम् अमृतननश्यत् जनित्रं जनयतीति जनित्रं जननशीलम् । आरात् समीपे स्थित्वा तत्प्रसिद्धमूर्ध्वं वातं नाडीगतं सब्वं च (43.) सुरया कृत्वा मूत्रात् मूत्रं चाजनयन्त (44.) आमाशयगतमन्नमूर्ध्वम् पक्वाशयगतमन्नं सब्वम् । कीदृशास्ते अमतिं बध्यभावं (45.) दुर्मतिं दुर्बुद्धिं च बाधमाना निवर्तयन्तः सद्बुद्धिं ददत इत्यर्थः ॥ ८४ ॥

इन्द्रः सुत्रामा हृदयेण सत्यं पुरोडाशेन सविता जजान ।
यकृत्क्लोमानं वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तम् ॥ ८५ ॥

सुष्ठु त्रायते रक्षति सुत्रामा इन्द्रः पुरोडाशदेवता इन्द्रस्य हृदयेण हृदयं जजान जनयति । सविता च पुरोडाशेनेन्द्रस्य सत्यं जजान । वरुणो भिषज्यन् इन्द्रस्य चिकित्सां कुर्वन्सन् यकृत् कालखण्डं क्लोमानं गलनाडिकां च जजान । वायव्यैः सौमिकौर्ध्वपात्रैः मतस्ने हृदयोभयपार्श्वस्थे अस्थिनी पित्तं न पित्तं च मिनाति निर्मिमीते सृजतीत्यर्थः सौमिकान्यौर्ध्वपात्राणि वायव्यसंज्ञानि ॥ ८५ ॥

आत्नाणिं स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न क्षीहा शचीभिरासन्दी नाभिरुदरं न माता ॥ ८६ ॥

स्थालीः स्थाल्यः आत्नाणि अभवन् कीदृश्यः स्थाल्यः मधु पिन्वमानाः मधु सिञ्चत्यः । पात्राणि गुदा गुदस्थानान्यभवन् । सुदुघा न धेनुः शोभनं दुग्धे सा

सुदुघा दोग्ध्री च धेनुः आदित्येष्टेर्दक्षिणारूपा गुदा एवाभवत् । श्येनस्य पत्रं च प्लीहा हृदयवामभागस्थः शिथिलमांसपिण्डः गुल्मसंज्ञोऽभवत् । आसन्दी शचीभिर्नाभिरुदरं चाभवत् कीदृश्यासन्दी माता जननीस्थानीया आसन्द्यामभिषिच्यते ऽतस्ततो जायतऽइव । नाश्वार्थाः ॥ ८६॥

कुम्भो वनिष्टुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भोऽअन्तः ।
प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ ८७॥

कुम्भः सुराधानकुम्भः शचीभिः कर्मभिः कृत्वा वनिष्टुः स्थूलान्त्रं जनिता जनयति । यस्मिन्कुम्भे योन्यां कुम्भरूपे योनौ स्थाने अग्रे प्रथममन्तर्मध्ये गर्भः सुरारूपः उषितः । शतधार उत्सः कूपतुल्यः कुम्भः व्यक्तः स्पष्टः प्लाशिः शिश्नोऽभवत् । कुम्भी सुराधानी च पितृभ्यः स्वधां दुहे दुग्धे अन्नं पूरयति लोपस्तऽआत्मनेपदेष्विति [पा० ७.१.४१.] तलोपः ॥ ८७॥

मुखꣳ सदस्य शिर इत्सतेन जिह्वा पवित्रमश्विनासत्सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥ ८८॥

अस्येन्द्रस्य सत् सतः पात्रविशेषो मुखमभूत् सतशब्दस्यान्तलोपश्छान्दसः सतेन इत् सतेनैवास्य शिरोऽभूत् । पवित्रं जिह्वाभवत् । अश्विना अश्विनौ सरस्वती च आसन् आस्येऽभवन् । चप्यं च पायुरिन्द्रियमभूत् । वालो सुरागलनवस्त्रमस्येन्द्रस्य भिषग्वैद्यो वस्तिर्गुदं शेपो लिङ्गं चाभूत् वालेन त्रयं ज्ञातम् कीदृशः शेपः हरसा वीर्येण तरस्वी वेगवान् ॥ ८८॥

अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पद्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ॥ ८९॥

अश्विभ्यामिन्द्रस्य चक्षुः क्रियते ग्रहाभ्यामश्विदेवत्याभ्यां चक्षुरेवामृतमनश्वरं क्रियते । शृतेन पक्वेन हविषा छागेन छागरूपेण पक्वहविषा तेजश्चक्षुःसम्बन्धि क्रियते । गोधूमैः पद्माणि नेत्रलोमानि क्रियन्ते कुवलैर्बदरैः उतानि चक्षुर्निविष्टानि लोमानि क्रियन्ते । शुक्रं शुक्लमसितं कृष्णं च पेशः रूपं शुक्लकृष्णे नेत्रगते

रूपे वसाते आच्छादयाते कुर्वीते इत्यर्थः (46.) प्रकृतवादश्विनौ कर्तारौ ॥ ८९ ॥

अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥ १० ॥

अविः सारस्वतो मेषश्च नसि इन्द्रस्य नासिकायां वीर्यायावस्थितः । ग्रहाभ्यां सारस्वताभ्यां प्राणस्य प्राणवायोः पन्था मार्गोऽमृतः अनश्वरः क्रियते । सरस्वती उपवाकैर्यवाङ्कुरैः कृत्वा व्यानमिन्द्रस्य व्यानवायुं जजान जनयति । बर्हिर्बदरैः सह नस्यानि नासिकाभवानि लोमानि जजान ॥ १० ॥

इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥ ११ ॥

ऋषभः बलाय सामर्थ्यायेन्द्रस्य रूपं चक्रे । ग्रहाभ्यामिन्द्राभ्याममृतं भूतभविष्यद्वर्तमानशब्दग्राहि श्रोत्रं श्रोत्रेन्द्रियं कर्णाभ्यामिन्द्रस्य कर्णयोश्चक्रे कर्णशष्कुल्योः श्रोत्रेन्द्रियं स्थापितमित्यर्थः । यवा बर्हिश्च भ्रुवि भ्रुवोः केसराणि लोमान्यभवन् कर्कन्धु बदरं मुखात् सारघं मधु तत्तुल्यं लालाश्लेष्मादि जज्ञे सरघा मधुमक्षिका तत्सम्बन्धि सारघम् यथा मधु नानातरुभ्य आनीयते एवं लालादि सर्वाङ्गेभ्यो भवति इति लालादीनां मधुसाम्यम् ॥ ११ ॥

आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रिये शिखा सिꣳहस्य लोम विषिरिन्द्रियाणि ॥ १२ ॥

आत्मन् आत्मनि शरीरे उपस्थे गुह्ये च यानि लोमानि तानि वृकस्य लोमानि लोमेति ज्ञातावेकवचनम् । मुखे यानि श्मश्रूणि तानि च व्याघ्रलोम । शीर्षन् शीर्ष्णि शिरसि च यशसे यशोऽर्थं ये केशाः या च श्रिये शोभायै शिखा या च विषिः कान्तिः यानि चेन्द्रियाणि तत्सर्वं सिंहस्य लोम ॥ १२ ॥

अङ्गान्यात्मन्भिषजा तदश्विनात्मानमङ्गैः समधात्सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥ १३ ॥

भिषजा भिषजौ अश्विना अश्विनौ आत्मन् आत्मनि अङ्गान्यवयवान्समधातां

समयोजयताम् सरस्वती तत् तमात्मानमङ्गैः समधात्संदधे । कीदृशा अश्व्यादयः इन्द्रस्य रूपमायुश्च चन्द्रेणाह्लादकेन ज्योतिर्ज्योतिषा सङ्कामूनमनश्वरं दधानाः सम्पादयन्तः कीदृशं रूपं शतमानं शतानामनेकेषां प्राणिनां मानं पूजा यस्मिन् तज्जगत्पूज्यमित्यर्थः ॥ १३ ॥

सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रिये जनयन्नप्सु राजा ॥ १४ ॥

सरस्वती अश्विभ्यां पत्नी अश्विनोः पत्नी भूत्वा योन्यामन्तर्योनिमध्ये गर्भमिन्द्रलक्षणं सुकृतं यथा तथा शोभनं कृतं बिभर्ति । अप्सु राजा अपामीश्वरो वरुणः अपां रसेन साम्ना उदकरसभूतेन साम्ना इन्द्रं श्रिये जनयन्सन् बिभर्तीत्यनुषङ्गः । नश्वार्थः ॥ १४ ॥

तेजः पशूनाꣳ हविरिन्द्रियावत्परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्यामृतः सोम इन्दुः ॥ १५ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकोनविंशोऽध्यायः ॥ १९ ॥ ॥

भिषजा भिषग्भ्यामश्विभ्यां सरस्वत्या च इन्द्रियावत् इन्द्रियवत् वीर्यवत् पशूनां सम्बन्धि हविरादाय परिस्रुता पयसा च सह सारघं मधु चादाय इन्द्रार्थं तेजो दुग्धं स्रावितम् । सुतासुताभ्यां परिस्रुत्पयोभ्यां सकाशात् अमृतोऽमृतरूपः इन्दुरैश्वर्यप्रदः सोमश्च दुग्धः ॥ एवं यैः सरस्वत्यश्विभिरिन्द्राय नानाद्रव्येभ्यो नानारसानादायोपकारः कृतः तेभ्यः सौत्रामणीद्रष्टृभ्यो नमः ॥ १५ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । सुरादीन्द्राभिषेकान्तोऽध्यायो नवदशोऽगमत् ॥

इति वेददीपे सौत्रामणीप्रकरणे ऊनविंशोऽध्यायः (47.) ॥ ११ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

१-३ [प्राङ् सोमो - प्रत्यङ् सोमो]. ४ ॥ १-४ ॥ ५. ६ [न जग्मुः] ॥ ५ ॥ ७ [ब्रह्मसि] ॥ ६ ॥ ८-११ a ॥ ७-१० ॥ ११ b. c [पापेन] ॥ ११ ॥ २० [पुरोलाशैर्हं°] ॥ २० ॥ २५ [प्राणविः] ॥ २५ ॥ २१ [इलाभिर्भं°] ॥ २१ ॥ ३३ [अश्विनाऽइन्द्रं-

म°] ॥३३॥ ३६ a.b.c ॥३६॥ ३६ d.e.f.g ॥३७॥ ३७ a ॥३८॥ ३७ b ॥३९॥ ३८-४१ ॥४०-५१॥ ५२-५५ ॥५२-५५॥ ५७ ॥५६॥ ५६ ॥५७॥ ५९ ॥५८॥ ५८ ॥५९॥ ६० [स्वराल्सुं°] ॥६०॥ ६६ [वमग्न्ऽईत्तितो ज्ञा-तवेदोऽवाड्व्या°] ॥६६॥ ६८ ॥६७॥ ६७ ॥६८॥ ७३. ७४. ७५ ॥७३॥ ७६ ॥७४॥ ७७ ॥७५॥ ७८. ७९ ॥७६॥ ८०-८५ [पुरोलाशेन] ॥७८-८२॥ ८६-९५ ॥८३-९२॥

२०. १ [क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि]. २ [मृत्योष्पाहि] ॥९३॥ ३-८ ॥९८-९९॥ ९ [°नन्दाऽआण्डौ] - पसः ॥१००॥ ९ जङ्घाभ्यां - १० गोषु ॥१०१॥ १० प्रत्यङ्गेषु - यज्ञे ॥१०२॥ ११ ॥१०३॥ १२ - सामभिः ॥१०४॥ १२ सा-मान्यू° - स्वाहा ॥१०५॥ १३ ॥१०६॥ ॥ सप्तानुवाकेषु षट्शतम् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायामेकविंशोऽध्यायः ॥२१॥ ॥

I. a. क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ।

b. मा त्वा हिꣳसीन्मा मा हिꣳसीः ॥१॥

का° [१९. ४. ७.] सोमासन्दीवदासन्दीं ज्ञानुमात्रपदीं वेद्योर्निदधाति क्षत्रस्य योनिरिति । ज्ञानुप्रमाणपादामासन्दीं वेद्योर्मध्ये निदधाति सोमासन्दीवदिति मु-ञ्जरज्जुव्युतान् आसन्द्या द्वौ पादौ दक्षिणवेदौ द्वावुत्तरवेदौ यथा तथेति सूत्रार्थः ॥ आसन्दीदेवताका द्विपदा गायत्री । हे आसन्दि त्वं क्षत्रस्य योनिरुत्पत्तिस्थानम-सि । आसन्द्यामभिषिक्तो गुणधर्मानर्हति राजेति भावः । क्षत्रस्य नाभिर्नद्धनं ब-न्धनं चासि ॥ का° [१९. ४. ८.] कृष्णाजिनमस्यामास्तृणाति मा त्वेति । अस्यामास-न्द्यां कृष्णाजिनं ह्यादयेदित्यर्थः ॥ यजुः कृष्णाजिनदेवत्यम् प्राजापत्या गायत्री । य-ज्ञाध्यासेन कृष्णाजिनं प्रार्थयते । हे कृष्णाजिन आसन्दी त्वा त्वां मा हिंसीः त्वं च मा मां मा हिंसीः मा जहि । यज्ञो वै कृष्णाजिनं यज्ञस्य चैवात्मनश्चाहिंसाये इ-ति [१२. ८. ३. १.] श्रुतेः ॥१॥

a. निषसाद धृतः । b. मृत्योः पाहि । c. विद्योत्पाहि ॥ २ ॥

काः [११.४.१.] तस्मिन्नास्ते यजमानो निषसादेति । यजमानः कृष्णाजिने उपविशेत् ॥ व्याख्याता [१०.२७.] ॥ काः [११.४.१०.११.] पादयो रुक्माऽउपास्यति राजतꣳ सव्ये मृत्योरिति सौवर्णꣳ शिरस्येके विद्योदिति । आसन्युपविष्टयजमानस्य पादयोरधो रुक्मौ मण्डलाकारौ भूषणाविशेषौ न्यस्यति राजतं सव्ये मृत्योरिति मन्त्रेण सौवर्णं दक्षे विद्योदिति सौवर्णं रुक्मं शिरसीत्येके ऊचुरिति सूत्रार्थः ॥ रुक्मदेवत्ये यजुषी दैव्यौ बृहत्यौ । हे रुक्म मृत्योः अकालमरणान्मां पाहि रक्ष । हे सौवर्ण रुक्म विद्योत् विद्युतः मां पाहि विद्योततऽइति विद्योत् विद्युत्पातादक्षेत्यर्थः ॥ २ ॥

a. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

b. अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ।

c. सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि ।

d. इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ ३ ॥

काः [११.४.१४.] सर्वसुरभ्युन्मृदितꣳ शेषैरभिषिञ्चत्या मुखादवस्रावयन्प्रतिदिशꣳ सर्वत्र सावित्रमश्विनोः सरस्वत्याऽइन्द्रस्येति प्रतिमन्त्रम् । वेतसमात्रस्थापितैर्वसाग्रकृशेषैः प्रतिदिशं स्थितोऽधर्युरा मुखादवस्रावयन्नासन्दीस्थं यजमानमभिषिञ्चति मन्त्रत्रयेण कीदृशम् सर्वैः सुरभिभिश्चन्दनकर्पूरकस्तूरिकेसरादिभिरुद्वर्तितम् । सावित्रं यजुर्देवस्य त्वेति सर्वत्र त्रिष्वपि मन्त्रेष्वन्विति । चतुर्थोऽभिषेक उत्तरे स्थितस्त्रिभिर्मन्त्रैर्महाव्याहृतिभिरिन्द्रस्येति तृतीयमन्त्रेण वा कुर्यादिति सूत्रार्थः ॥ देवस्य त्वा । व्याख्यातम् ॥ अश्विनोः । त्रीणि लिङ्गोक्तदेवतानि आद्यं प्राजापत्या बृहती द्वे ऋग्गायत्र्यौ । हे यजमान अश्विनोः भैषज्येन वैद्यकर्मणा त्वामभिषिञ्चामि भिषजः कर्म भैषज्यम् किमर्थं तेजसे काल्यै ब्रह्मवर्चसाय सर्वत्रास्खलितवेदवेदाङ्गजनिता कीर्तिर्ब्रह्मवर्चसम् ॥ सरस्वत्यै भैषज्येन षष्ठ्यर्थे चतुर्थी सरस्वत्या भिषक्कर्मणा च भवन्तं देवमभिषिञ्चामि किमर्थं वीर्यायान्नाद्याय वीर्यं सामर्थ्यम् अन्नाद्यमन्नभक्षणसामर्थ्यम् तस्मै ॥ इन्द्रस्येन्द्रियेण इन्द्रियपाटवेन सामर्थ्येन च त्वा-

मभिषिञ्चामि किमर्थं बलाय सामर्थ्याय श्रियै सर्वसमृद्धै यशसे कीर्त्यै ॥३॥

कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥४॥

का° [११.४.११.] यजमानमालभते कोऽसीति । अध्वर्युर्यजमानं स्पृशति ॥ प्राजापत्या गायत्री उल्लिग्गर्भा षट्सप्तैकादशोल्लिग्गर्भेति वचनात् । हे यजमान त्वं कः प्रजापतिः असि अत्यन्तं कः कतमः श्रेष्ठः प्रजापतिरसि प्रजापतयो बहवः तत्रोत्तमोऽसि । कस्मै प्रजापतिपदप्राप्तये त्वामहमभिषिक्तवानिति शेषः काय प्रजापतिभावाय चाभिषिक्तवान् ॥ का° [११.४.२०.] सुश्लोकेत्यालब्धो ह्वयति । अध्वर्युणा स्पृष्टो यजमानः सुश्लोकादिसंज्ञान्नरांनाह्वयति ॥ हे सुश्लोक एहीति शेषः शोभनः श्लोकः कीर्तिर्यस्य । शोभनं मङ्गलमुदयो यस्य स सुमङ्गलः हे सुमङ्गल त्वमेहि । हे सत्यराजन् एहि सत्योऽविनाशी राजा प्रभुर्यस्य सः ॥४॥

शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।

राजा मे प्राणोऽअमृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥५॥

का° [११.४.२१.] अङ्गानि चालभते यथालिङ्गꣳ शिरो मऽइति प्रतिमन्त्रम् । यजमानो यथालिङ्गमङ्गान्यालभते ॥ इन्द्रशरीरावयवदेवताकं पञ्चर्चं तत्र तृतीया गायत्री अन्त्या त्र्यवसाना महापङ्क्तिः तिस्रोऽनुष्टुभः । अभिषिक्तो यजमान इन्द्ररूप आत्मानं सर्वात्मकं पश्यन्नाह । मे मम शिरः श्रीः शोभास्तु वर्तते वा मे मुखं यशोऽस्तु केशाः श्मश्रूणि मुखलोमानि च त्विषिर्दीप्तिरस्तु । राजा दीप्यमानो मे मम प्राणो मुखवायुरमृतमस्तु । चक्षुरिन्द्रियं सम्राट् अस्तु सम्यक् राजते सम्राट् । श्रोत्रमिन्द्रियं विराट् विविधं राजमानमस्तु ॥५॥

जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड्भामः ।

मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥६॥

मे जिह्वा रसनेन्द्रियं भद्रं कल्याणरूपमस्तु । वाक् वागिन्द्रियं महः मह्यते पूज्यते महः पूज्यमानास्तु महतेरसुन्प्रत्ययः । मनो मन्युः क्रोधरूपमस्तु क्रोधफलं ददातु । भामः क्रोधः स्वराट् स्वेनैव राजमानोऽस्तु न तु कुतश्चित्प्रतिहन्यतामि-

त्यर्थः तदुक्तम् शक्तिरहितोऽपि कुप्यति मानं चोद्वहति सेवकजनोऽपि अर्थरहितोऽपि कामी जानाति विधिं विडम्बयितुमिति । अङ्गुलयो मोदाः आनन्दरूपाः सन्तु मोदन्ते ता मोदाः पचाद्यच् । अङ्गानि प्रमोदाः प्रकृष्टहर्षाः सन्तु । मे मम मित्रं सक्तः अस्तु सक्तते अभिभवति शत्रुमिति सक्तः रिपुनाशकमस्तु ॥ ६॥

बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥७॥

मे बाहू बलमस्तु बलवन्तौ स्तामित्यर्थः । इन्द्रियं च बलं स्वकार्यक्षममस्तु । मे हस्तौ कर्म चास्तु सत्कर्मकुशलौ सामर्थ्यवन्तौ च स्तामित्यर्थः । मम आत्मा अन्तरात्मा उरो हृदयं च क्षत्रं क्षतात् त्राणकरमस्तु ॥ ७॥

पृष्टीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी ।
ऊरूऽअरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ८॥

मे मम पृष्टीः पृष्ठप्रदेशो (1.) राष्ट्रं देशो देशवत्सर्वाधारमस्तु । मे मम उदरमंसौ स्कन्धौ ग्रीवाः कण्ठदेशाः श्रोणी कटिदेशौ ऊरू सक्थिनी अरत्नी हस्तदेशौ जानुनी च सर्वतोऽन्यान्यङ्गानि च विशः प्रजाः सन्तु प्रजावत्पोष्याः सन्तु ॥ ८॥

नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ॥ ९॥

मे नाभिः चित्तं ज्ञानरूपमस्तु । पायुर्मे गुदेन्द्रियं विज्ञानं ज्ञानजनितसंस्काराधारमस्तु । भसत्स्त्रीप्रजननमपचितिः प्रज्ञारूपमस्तु सुभगमस्तु यजमानपत्नीविषयमेतत् । मे आण्डौ वृषणौ आनन्दनन्दौ स्तामानन्देन सम्भोगजनितसुखेन नन्दतस्तौ तत्सुखभोक्तारौ भवतामित्यर्थः । पसः पसतेः स्पृशतिकर्मण इति यास्कोक्तेः पसो लिङ्गं भगः सौभाग्यं चास्तु भग ऐश्वर्यं सौभाग्यं सम्पत्तिः सर्वदा भोगासक्तमस्त्वित्यर्थः । जङ्घाभ्यां पद्भ्यां चाहं धर्मोऽस्मि उपलक्षणमेतत् सर्वाङ्गैर्धर्मरूपोऽस्मि धर्मरूपत्वादेव विशि प्रजायां राजा प्रतिष्ठितोऽस्मि धर्मप्रतिष्ठितो हि राजा भवति ॥ ९॥

प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ।
प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रति प्राणेषु प्रतितिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥१०॥

का° [११.४.२३.] कृष्णाजिनेऽवरोहति प्रति क्षत्रेऽइति । आसन्दीतो यजमानः कृष्णाजिनेऽवतरति ॥ विश्वदेवदेवत्यं यजुः अतिशक्वरी । अहं क्षत्रे प्रतितिष्ठामि क्षत्रियजातौ प्रतिष्ठायुक्तो भवामि । राष्ट्रे देशे अश्वेषु गोषु अङ्गेषु करपादाद्यवयवेषु आत्मन् आत्मनि चित्ते प्राणेषु पञ्चसु पुष्टे पुष्टौ समृद्धौ द्यावापृथिव्योः स्वर्गेहलोकयोः यज्ञे ज्योतिष्टोमादौ च प्रतितिष्ठामि । क्रियापदावृत्तिः फलातिशयद्योतनार्था । क्षत्रियदेशयोः प्रतिष्ठा वशीकरणम् गोऽश्वप्रतिष्ठा तत्प्राप्तिः प्राणाङ्गप्रतिष्ठा नीरोगत्वम् आत्मप्रतिष्ठा निराधित्वम् पुष्टप्रतिष्ठा धनसमृद्धिः द्यावापृथिव्योः प्रतिष्ठोभयलोककीर्तिः यज्ञे प्रतिष्ठा यज्ञकरणम् वश्यविश्वः पशुमान्निराधिव्याधिः श्रीमान्यज्ञकर्ता च भवेयमिति भावः ॥१०॥

त्रया देवा एकादश त्रयस्त्रिंशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥११॥

का° [११.५.८.] त्रया देवा इति शस्त्रान्ते जुहोति । शस्त्रसमाप्तौ वषट्कृते त्रया इति (2.) कण्डिकाद्वयात्मकेन मन्त्रेण त्रयस्त्रिंशं वसायहं जुहोति ॥ त्र्यवसाना विश्वदेवदेवत्या (3.) पङ्क्तिः । एकादश देवा देवैः वक्ष्यमाणैः सह मा मामवन्तु रक्षन्तु । कीदृशाः त्रयाः त्रयोऽवयवा येषां ते संख्याया अवयवे तयप् [पा° ५.२.४२.] द्वित्रिभ्यां तयस्यायज्वेति [पा° ५.२.४३.] अयजादेशः । एकादश त्रिगुणा इत्यर्थः ते च कतीति स्वयमेवाह त्रयस्त्रिंशाः तिसृभिरधिका त्रिंशत्संख्या येषां ते त्रयस्त्रिंशत्संख्या इत्यर्थः । सुराधसः शोभनं राधो येषां ते राध इति धननाम राधुवन्त्यनेनेति [निरु° ४.४.] यास्कोक्तेः । तथा बृहस्पतिपुरोहिताः बृहस्पतिः पुरोहितो येषां ते । तथा सवितुः देवस्य सवे आज्ञायां वर्तमानाः । देवाः दीप्यमानाः ॥११॥

प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भि-र्यजूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या या-ज्याभिर्याज्या वषट्कारैर्वषट्कारा आकूतिभिराकूतयो मे कामान्त्समर्धयतु भूः स्वाहा ॥ १२॥

कथमवतु तत्राह । विश्वदेवदेवत्यमाशीर्लिङ्गं यजुः प्रकृतिच्छन्दः । प्रथमा देवा द्वितीयैः सहिता मामवतु द्वितीयास्तृतीयैः सहावतु तृतीयाः सत्येन सह सत्यं यज्ञेन सह यज्ञो यजुर्भिः सह यजूꣳषि सामभिः सह सामान्यृग्भिः सह ऋचः पुरो-ऽनुवाक्याभिः सह पुरोऽनुवाक्या याज्याभिः सह याज्या वषट्कारैः सह वषट्कारा आकूतिभिः सह एवं त्रिप्रकारैरेकादशसंख्यैर्देवैरुत्तरोत्तरं पालिता आकूतयो मे मम कामानभिलाषान् समर्धयतु पूरयतु भूः भुवनं भूः कृतमिदं स्वाहा सुकृ-तमस्तु ॥ १२॥

लोमानि प्रयतिर्मम त्वङ्मऽआनतिरागतिः ।

मांसं मऽउपनतिर्वस्वस्थि मज्जा मऽआनतिः ॥ १३॥

का० [११.५.१०.] प्रत्यक्षभक्षं यजमानो लोमानि प्रयतिरिति । यजमानो यज्ञ-शेषं प्रत्यक्षमुपहवपूर्वकं भक्षयति ॥ लोमत्वगादिदेवतानुष्टुप् । मम लोमानि प्रयतिः प्रयतनं प्रयतिः प्रयत्नो वर्तते तथोग्रामी यथा लोमस्वपि प्रयत्नः । मे मम त्वङ् आनतिः आगतिश्च आनमन्ति भूतानि यस्यां सा आनतिः आगच्छन्ति भू-तानि यां प्रति सा आगतिः मदीयां त्वचं दृष्ट्वा भूतान्यागच्छन्ति नमन्ति चेत्यर्थः । मे मम मांसमुपनतिः उपनमन्ति भूतानि यत्र । ममास्थि वसु धनं धनरूपमेव । मे मज्जा आनतिः आनमन्ति भूतानि यत्र । उपलक्षणमितत् मम सप्त धातवो ज्ञ-गद्वशीकरणसमर्था इत्यर्थः ॥ १३॥

II. यद्देवा देवहेडनं देवासश्चकृमा वयम् ।

अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ १४॥

इत उत्तरमवभृथः ॥ का० [११.५.१३.] मासरकुम्भं प्लावयति यद्देवा इति ।

अवभृथेष्टिं कृत्वा यद्देवा इत्यादिना वरुण नो मुञ्चेत्यन्तेन [१८ a.] सार्धकण्डिकाचतुष्कात्मकेन मन्त्रेण मासरकुम्भं जले तारयति ॥ अग्निवायुसूर्यदेवत्यास्तिस्रो ऽनुष्टुभः कूष्माण्डीसंज्ञाः । दीव्यन्ति देवाः दीप्यमाना हे देवासो देवा वयं यद्देवक्रेडनं देवानां क्रेडनमपराधं चकृम कृतवन्तः करोतेर्लिट् संहितायां छान्दसो दीर्घः । अग्निस्तस्मादेनसः पापात् मा मां मुञ्चतु पृथक्करोतु विश्वात् विश्वस्मात्सर्वस्मात् अंहसः विघ्नाच्च मुञ्चतु । ङसेः स्मादभाव आर्षः ॥ १४ ॥

यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् । वायुर्मा तस्मादेनः ॥ १५ ॥

यदि चेत् दिवा अह्नि यदि नक्तं रात्रौ वयमेनांसि पापानि चकृम । वायुः तस्मादेनसः विश्वस्मादंहसश्च मां मुञ्चतु ॥ १५ ॥

यदि जाग्रद्यदि स्वप्नꣳएनाꣳसि चकृमा वयम् । सूर्यो मा तस्मादेनः ॥ १६ ॥

यदि जाग्रत् सप्तम्या लुक् यदि जाग्रति जाग्रदवस्थायाम् यदि स्वप्ने स्वप्नावस्थायामेनांसि वयं चकृम सूर्यस्तस्मादेनसः विश्वादंहसश्च मां मुञ्चतु ॥ श्रुत्या त्वन्यथा व्याख्यातम् । जाग्रति मनुष्ये यत्पापं कृतं स्वप्ने पितृषु यत्पापं कृतम् तस्मान्मा मुञ्चतु । मनुष्या वै जागरितं पितरः सुप्तं मनुष्यकिल्विषाच्चैवैनं पितृकिल्विषाच्च मुञ्चतीति [१२.१.२.२.] श्रुतेः ॥ १६ ॥

यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।

यच्छूद्रे यदार्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि ॥ १७ ॥

लिङ्गोक्तदेवतं यजुः । ग्रामे अरण्ये वने सभायां पक्षपातादि यदेनः इन्द्रिये इन्द्रियविषये परापवादपरनारीदर्शनादि यत् देवविषये वा शूद्रे अर्ये वैश्ये अर्यः स्वामिवैश्ययोरिति [पा° ३.१.१०३.] निपातः यत्पापं वयं चकृम । आवयोः पत्नीयजमानयोरेकस्य अधि धर्मणि कर्मणि अधिकर्मविषये यदेनो धर्मलोपलक्षणम् । तस्यैनसः पापस्यावयजनं नाशनं त्वमसि नाशको ऽसीत्यर्थः । कुम्भं प्रति वचनम् । अवपूर्वो यजिर्नाशनार्थः ॥ १७ ॥

a. यदापोऽअध्या इति वरु° ।

b. अवभृथ निचुम्पुण निचे॰ - एनोऽयक्ष्यवे मर्त्यैम॰ ॥ १८॥

a. समुद्रे ते हृदय॰-- उतापः । b. सुमित्रिया न॰ ॥ १९॥

यदापः । व्याख्यातम् [६.२२.] ॥ का॰ [११.५.१४.] पूर्ववन्मज्जानम् । पूर्ववदिति अवभृथेत्यादि ओषधीरुताप इत्यन्तेन [११ a.] सुराकुम्भस्य जले मज्जानम् ॥ अवभृथ । व्याख्यातम् [३,४८.८,२५.] इयान्विशेषः अयक्षि अवायक्षि नाशितवानस्मि यजेर्लुङि तङि उत्तमैकवचने रूपम् पूर्वत्र अयासिषमिति ॥ का॰ [११.५.१५.] सुमित्रिया न इत्यपोऽञ्जलिनादाय दुर्मित्रिया इति द्वेष्यं परिषिञ्चति द्वौ विक्रमाऽउदङ्गत्वा । यजमानोऽवभृथप्रदेशात् द्वौ विक्रमौ उदीच्यां गत्वा सुमित्रिया इति जलाञ्जलिमादाय यस्यां दिशि रिपुस्तां प्रति सिञ्चतीति सूत्रार्थः ॥ सुमित्रिया नः । व्याख्यातम् [६.२२.] ॥ १८॥ १९॥

द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।

पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ २०॥

का॰ [११.५.१६.] अवभृथवत्स्नात्वा वासोऽपासनं द्रुपदादिवेति । जलस्थाविव जायापती सौमिकावभृथवत्स्नात्वा कर्मकाले धृतं वासोऽप्सु क्षिपतः ॥ अद्देवत्यानुष्टुप् । आपो जलानि एनसः पापात् मा मां शुन्धन्तु पुनन्तु पापात्पृथक्कुर्वन्तु । तत्र दृष्टान्तत्रयमाह द्रुपदादिवेति पलाशीद्रुद्रुमागमा इत्यभिधानोक्तेः [अमर॰ २.४.५.] द्रुस्तरुः तन्मयं पदं द्रुपदं पादुका तस्मान्मुमुचानः पृथग्भवन् यथा पादुकादोषैरसम्बद्धो भवति मुचेर्विकरणव्यत्ययेन शानचि ज्रुह्वोत्यादिवाद्धित्वे मुमुचान इति रूपम् । यथा च स्विन्नः स्वेदयुक्तः स्नातः सन्मलात्पृथग्भवति । आज्यमिव यथा पवित्रेण कम्बलमयेन पूतं गालितमाज्यं घृतं कीटेभ्यः पृथग्भवति । तथापो मां शुन्धन्तु ॥ २०॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।

देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ २१॥

का॰ [११.५.१७.] सोमवदुत्क्रमणमागमनं च । सोमवदिति उद्वयमिति मन्त्रेण

जलान्निष्क्रमणम् अपाम सोममृता अभूमेति जपनां सर्वेषां त्रिपशुदेशमागमनमिति (4.) सूत्रार्थः ॥ सूर्यदेवत्यानुष्टुप् प्रस्कण्वदृष्टा । वयं तमसः परि तमसः सकाशात् तमोबहुलादस्माल्लोकात् उदगन्म उद्गता निर्गताः गमेर्लङि शपि लुप्ते मस्य नः । कीदृशा वयम् उत्तरमुत्कृष्टतरं स्वः स्वर्गं पश्यन्तः ईक्षमाणाः किं च देवत्रा देवलोके सूर्यं देवं पश्यन्तः सन्त उत्तमं ज्योतिर्ब्रह्मरूपमुदगन्म प्राप्ताः ॥२१॥

अपोऽअन्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वानग्नऽआगमं तं मा सꣳसृज वर्चसा प्रजया च धनेन च ॥ २२ ॥

का° [११.५.१८.] आहवनीयमुपतिष्ठतेऽपोऽअन्वेति । यजमान आहवनीयमुपतिष्ठते ॥ अग्निदेवत्या पङ्क्तिः । हे अग्ने तं मां वर्चसा ब्रह्मवर्चसेन प्रजया पुत्रादिकया धनेन सुवर्णादिकेन च त्वं संसृज संयोजय योऽहमद्य अपः अन्वचारिषम् अवभृथकर्मणा जलमनुचरितवानस्मि प्राप्तोऽस्मि चरतेर्लुङ् यश्चाहं रसेन जलेन समसृक्ष्महि संसृष्टोऽस्मि सृजेर्लुङ् वचनव्यत्ययः यश्चाहं पयस्वानुदकवान्सन् आगममागतवानस्मि गमेर्लुङि पुषादीति [पा° ३.१.५५.] च्लेरङ् । तं मां वर्चआदिभिर्योजय ॥ २२ ॥

a. एधोऽस्येधिषीमहि । b. समिदसि तेजोऽसि तेजो मयि धेहि ।
c. समावर्वर्त्ति पृथिवी समुषाः समु सूर्यः । समु विश्वमिदं जगत् ॥
d. वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥ २३ ॥

का° [११.५.११.] एधोऽसीति समिधमादायाहवनीयेऽभ्यादधाति समिदसीति । यजमानः एधोऽसीति मन्त्रेण समिधं गृहीत्वा समिदसीति मन्त्रेणाग्नौ दधाति ॥ समिद्देवत्ये यजुषी । हे समित्त्वमेधः एधयति दीपयतीति एधः दीपिकासि वयं त्वत्प्रसादादेधिषीमहि धनादिभिर्वृद्धिं व्याप्नुयाम एधतेराशीर्लिङ् । हे समित्वं समिदसि समिन्धयति दीपयतीति समित् तेजश्चासि तत्संयोगेनाग्नेर्ज्वलनात् अतो मयि विषये तेजो धेहि धारय ॥ का° [११.५.२०.] जुहोति (5.) समावर्वर्त्तीति । यजमानः सकृद्गृहीतमाज्यं कण्डिकाशेषेण जुहोति ॥ समावर्वर्त्ति आग्नेयी गायत्री

वैश्वानरज्योतिरिति यजुः आग्नेयम् । पृथिवी समाववर्त्ति सम्यगावर्तते विकरणा व्यत्ययेन वृतेः शपः श्लुः नश्यतीत्यर्थः उषाः दिवसोऽपि समाववर्त्ति सूर्यः समाववर्त्ति उ एवार्थे विश्वमिदं जगत्समाववर्त्ति । अतोऽहं वैश्वानरज्योतिः भूयासम् विश्वेभ्यो नरेभ्यो हितो वैश्वानरः परमात्मा तद्रूपं ज्योतिर्ब्रह्मैव भूयासम् । विभूम्नकृतोऽपि कामान् मनोरथान्व्यश्नवै प्राप्नुयाम् । भूः स्वाहा भुवनं भूः सत्तामात्रं ब्रह्म तस्मै स्वाहा सुकृतमस्तु भूरित्यव्ययम् ॥ २३ ॥

III. अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितोऽहम् ॥ २४ ॥

का° [१९. १. १२.] अभ्यादधामीति प्रत्यृचमाहवनीये तिस्रः समिधोऽभ्यादधाति । सौत्रामण्यादावादित्येष्टिं समाप्य त्रिपश्वर्धमाहवनीयदक्षिणाग्नी विकृत्याग्न्यन्वाधानं ब्रह्मावरणं च कृत्वाहवनीये यजमानस्तिस्रः समिधः प्रत्यृचमादधाति ॥ अग्निदेवत्यास्तिस्रोऽनुष्टुभः आश्वतराश्विदृष्टाः । हे अग्ने व्रतपते व्रतस्य कर्मणः पालक अहं समिधं त्वयि अभ्यादधामि जुहोमि तेन समिदाधानेन दीक्षितः सन्नहं व्रतं कर्म श्रद्धां विश्वासं चोपैमि उपगच्छामि त्वा त्वामिन्धे दीपयामि ॥ २४ ॥

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥ २५ ॥

पुण्यं पवित्रं लोकं प्रज्ञेषं ज्ञानीयाम् लोकमप्राप्तानां तल्लोकज्ञानं न भवतीति स्वर्लोकगमनं प्रार्थ्यते । तं कम् यत्र लोके ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रियजातिश्च सहावियोगेन चरतस्तिष्ठत इत्यर्थः कीदृशे ब्रह्मक्षत्रे सम्यञ्चौ लिङ्गव्यत्ययः समीची सम्यक् अञ्चतस्ते । यत्र चाग्निना सह देवाः संचरन्ति । सदा च विप्राः क्षत्रियाश्च यं गच्छन्ति तं देवलोकं प्राप्नुयामित्यर्थः ॥ २५ ॥

यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह ।
तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥ २६ ॥

यत्र लोके इन्द्रश्च वायुश्च सम्यञ्चौ सह चरतः यत्र च सेदिः सदनं सेदिः

आदृगमेति [पा° ३.२.१७१.] चात्किप्रत्ययः लिङ्वद्भावाभ्यासलोपौ । अन्नाप्राप्तिजनितं दुःखं सेदिः स यत्र न विद्यते तं लोकं पुण्यं पवित्रं प्रज्ञेषं प्रज्ञानीयाम् ज्ञानातेः सिब्बहुलं लेटीति [पा° ३.१.३४.] सिपीठि च रूपम् ॥२६॥

अꣳशुना ते ऽअꣳशुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः ॥२७॥

सुरादेवत्यानुष्टुप् सुरासंसर्जने विनियुक्ता तत्सूत्रं सौत्रामण्यारम्भे [१९.१.] लिखितम् । हे सुरे ते तव अंशुः भागः सोमस्यांशुना भागेन सह पृच्यतां संयुज्यताम् तव परुः पर्व सोमस्य परुषा पर्वणा सह पृच्यताम् । तव गन्धः अच्युतः अनश्वरो रसश्च सोममवतु आलिङ्गतु किमर्थं मदाय मत्तताये सुरायुक्तः सोमः पीतो मदजनको भवति अत उभयोर्योगोऽस्तु ॥२७॥

सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च ।
सुरायै बभ्रवे मदे किंवो वदन्ति किंवः ॥२८॥

सुरादेवत्येन्द्रदेवत्या वानुष्टुप् पूतसुरादाने विनियोग उक्तः [का° १९.२.६.] । बभ्रवे बभ्रुवर्णायै तस्यै सुरायै षष्ठ्यर्थे चतुर्थी सुराया मदे स्थितः सुरया मत्तः इन्द्रः किंवः किंवेत्र इति वदति त्वं किम् कस्य त्वमित्याद्यन्यतिरस्कारकरं वचो वदति । यां सुरां सिञ्चन्ति पात्रे ऋत्विजः परिषिञ्चन्ति पयआदिभिः उत्सिञ्चन्ति ग्रहैः गोवालपवित्रहिरण्यादिभिः पुनन्ति च ॥२८॥

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥२९॥

इन्द्रदेवत्या गायत्री विश्वामित्रदृष्टा स्मार्ते श्रवणाकर्मणि धानाहोमे विनियुक्ता प्रातःसवने पुरोडाशपुरोऽनुवाक्यापि । हे इन्द्र त्वं प्रातःकाले नोऽस्माकं पुरोडाशं जुषस्व कीदृशं धानावन्तं धाना विद्यन्ते यत्र तम् करम्भिणं करम्भोऽस्यास्ति अपूपवन्तमपूपाः सन्ति यत्र उक्थिनमुक्थं शस्त्रं यत्र स्तुतियुक्तम् ॥२९॥

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥३०॥

का° [११.५.२.] ऐन्द्र्यां बृहत्यां गायति । अध्वर्युप्रेषितो ब्रह्मा इन्द्रदेवतायां बृहत्यां साम गायति ॥ इन्द्रदेवत्या बृहती नृमेधपुरुषमेधदृष्टा । हे मरुतः ऋत्विजः इन्द्राय इन्द्रार्थं यूयं बृहत्साम गायत सामगानं कुरुत कीदृशं बृहत् वृत्रकृतमम् वृत्रं पापं प्रति अतिशयेन कृन्ति गच्छति वृत्रमसुरं नाशयति वा नाद्वस्येति [पा° ८.२.१७.] नुम् । ऋतं यज्ञं वर्धयन्ति ऋतवृधः देवा ऋत्विजो वा येन सामगानेन देवाय इन्द्राय ज्योतिः तेजः अजनयन्नुदपादयन् कीदृशं ज्योतिः देवं दीप्यमानम् जागृवि जागर्तीति जागृवि जागरणशीलमविनश्वरमित्यर्थः । सामगानेनेन्द्रस्तेजस्वी जात इत्यर्थः ॥३०॥

अध्वर्यो॑ऽअद्रिभिः सुतꣳ सोमं॑ पवित्र॒ऽआ न॑य । पुना॑हीन्द्रा॑य पा॑तवे ॥३१॥

का° [११.२.११.] ब्रह्मानुमन्त्रणमध्वर्यो॑ऽअद्रिभिरिति । ब्रह्मा पयो॑ऽनुमन्त्रयते ॥ ऐन्द्री गायत्री । हे अध्वर्यो त्वं सोमं पवित्रे कम्बलमये आनय सिञ्च । कीदृशमद्रिभिर्ग्रावभिः सुतमभिषुतम् । ततः पुनाहि पुनीहि गालय ईत्वाभाव आर्षः । किमर्थं इन्द्राय पातवे इन्द्रस्य पानार्थम् तुमर्थे तवेप्रत्ययः ॥३१॥

IV. यो भू॒तानामधि॑पतिर्यस्मि॑ँल्लो॒का अधि॑ श्रि॒ताः ।

य ईशे॑ मरु॒तो म॒हाँस्तेन॑ गृह्णामि॒ त्वाम॒हं मयि॑ गृह्णामि॒ त्वाम॒हम् ॥३२॥

का° [११.४.२४.] त्रयस्त्रि॑ꣳशं वसायहं गृह्णाति यो भूतानामिति । प्रागभिषेकात्सीसेन तल्लमिति [११.८०.] षोडशभि॑र्द्वात्रिंशद्वसायहाः तेषां संस्रवैर्यजमानाभिषेकः कृतः ततो॑ऽधर्युर्यो भूतानामिति सार्धकण्डिकात्मकेन मन्त्रेण त्रयस्त्रिंशं वसायहमार्षभखुरेण गृह्णाति ॥ आत्मवादिनो ग्रहदेवत्या कौण्डिन्यदृष्टा पङ्क्तिः । यः परमात्मा भूतानां जरायुजादिभूतानां चतुर्विधानामधिपतिः अधिकं पालकः यस्मिन् आत्मनि लोका भूरादयो॑ऽधिश्रिताः (6.) आश्रिताः लोका यदाधारा इत्यर्थः । महान्सर्वोत्कृष्टो यः मरुतः मरुत्तत्त्वप्रमुखस्य तत्त्वगणस्य ईशे ईष्टे नियन्ता वर्तते लोपस्त आत्मनेपदे॑षिति [पा° ७.१.४१.] तलोपे सटि तडि प्रथमैकवचने ईशे इति रूपम् अधीगर्थदयेशामिति [पा° २.३.५२.] कर्मणि षष्ठी । हे

ग्रह अग्रं तेन परमात्मना कृत्वा त्वा (7.) त्वां गृह्णामि मयि परमात्मभावमापन्ने मयि विषये अग्रं त्वां गृह्णामि ॥३२॥

a. उपयामगृहीतोऽस्यश्वि॰ ।

b. एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्रामणे ॥३३॥

उपयाम॰ यजुः सामत्रिष्टुप् व्याख्यातम् [१०.३२b.] । एष ते यजुः प्राजापत्या बृहती सादने विनियोगः । ग्रहदेवते द्वे यजुषी ॥३३॥

प्राणापा मेऽअपानपाश्चक्षुष्याः श्रोत्रपाश्च मे ।
वाचो मे विश्वभेषजो मनसोऽसि विलायकः ॥३४॥

का॰ [११.५.१.] शेषमृत्विजः प्राणभक्षं भक्षयन्ति । सशस्त्रग्रहहोमानन्तरं शेषमृत्विजः सर्वेऽवघ्रन्ति कण्डिकाद्वयेन ॥ ग्रहदेवत्ये द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ । हे ग्रह त्वं मे प्राणापा असि प्राणान्पाति रक्षति प्राणापाः अपानपाः अपानस्य रक्षकोऽसि चक्षुषी पातीति चक्षुष्याः मे मम श्रोत्रपाश्चासि श्रोत्रेन्द्रियं पाति । मे वाचो वागिन्द्रियस्य विश्वभेषजः विश्वं सर्वं भेषजमौषधं यस्मात्स वाचः औषधमुन्मार्गनिवृत्तिर्जपादौ प्रवृत्तिश्च तत्कर्ता । मनसो विलायकश्चासि विलाययति विषयेभ्यो निवर्त्यात्मनि स्थापयति विलायकः आत्मज्ञानप्रदोऽसीत्यर्थः यद्वा ली श्लेषणे विलाययति चक्षुरादिभिः सह श्लेषयति विलायकः सर्वेन्द्रियैः सह मनः संयोजयसीत्यर्थः ॥३४॥

अश्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्रामणा कृतस्य ।
उपहूत उपहूतस्य भक्षयामि ॥३५॥

हे ग्रह उपहूत आज्ञप्तोऽहं ते तव त्वां भक्षयामि कर्मणि षष्ठी । कीदृशस्य ते अश्विनकृतस्य करोतिर्दर्शनार्थः अश्विनावेवाश्विनौ स्वार्थेऽण् वृद्धभाव आर्षः अश्विनाभ्यां कृतो दृष्टस्तस्य । सरस्वत्या कृतः सरस्वतिकृतः (8.) सरस्वत्या दृष्टस्य आपोः संज्ञाछन्दसोर्बहुलमिति [पा॰ ६.३.६३.] सरस्वतीशब्दस्य ह्रस्वः । सुष्ठु त्रायते रक्षति सुत्रामा तेनेन्द्रेण कृतस्य दृष्टस्य । उपहूतस्य ऋत्विग्भिः कृतोपह्वस्य ॥३५॥

V. समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्धावृधानः ।
त्रिभिर्दैवैस्त्रिंशता वज्रबाहुर्जघान वृत्रं वि दुरो ववार ॥३६॥

आधर्यवं समाप्तम् इतः सौत्रामणिकं कौत्रमुच्यते ॥ का° [१९. ६. १२.] समिद्ध इन्द्र इत्याप्रियः प्रथमस्य । समिद्ध इत्याद्या एकादश ऋचः प्रथमस्येन्द्रस्य पशोराप्रियः प्रयाजयाज्याः ॥ आङ्गिरसदृष्टा एकादशाप्रियः त्रिष्टुभः तासां क्रमादिना देवता इध्मः तनूनपान्नराशंसो वा इडः बर्हिः द्वारः उषासानक्ता दैव्यौ होतारौ तिस्रो देव्यः त्वष्टा वनस्पतिः स्वाहाकृतयः एता देवताः यथायोगमिन्द्रविशेषणत्वेन व्याख्येयाः अनुवाकेनानेनेन्द्रः स्तूयते । इन्द्रो वृत्रं मेघं दैत्यं वा जघान कृतवान् दुरः द्वाराणि च विववार मेघस्य द्वाराणि स्रोतांसि विवृतान्यकरोत् दैत्यपक्षे तत्पुरद्वाराणि शून्यान्यकरोत् द्वारशब्दस्य सम्प्रसारणे डुर इति रूपम् । कीदृश इन्द्रः समिद्धः संदीप्तः उषसामनीके मुखे प्रातःकाले पुरोरुचा अग्रे प्रसरत्या दीप्त्या पूर्वकृत् पूर्वां दिशं करोतीति आदित्यात्मना पूर्वस्याः कर्ता सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । त्रिभिर्दैवैः त्रिंशता च त्रयस्त्रिंशद्दैवैः सह वावृधानः वर्धमानः वृधेर्विकरणव्यत्ययेन शपः तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६. १. ७.] अभ्यासदीर्घः संहितायाम् । वज्रबाहुः वज्रं बाह्वौ यस्य वज्रपाणिः ॥३६॥

नराशꣳसः प्रति शूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान्मधुना समञ्जन्हरण्यैश्चन्द्री यजति प्रचेताः ॥३७॥

एकस्यामृचि नराशंसतनूनपातौ । प्रचेताः प्रकृष्टं चेतो ज्ञानमस्य स प्रचेताः कर्मज्ञाता यजमानस्तमिन्द्रं प्रतियजति प्रत्यक्षं यजति । तं कम् य ईदृशः नराशंसः नरैर्ऋत्विग्भिरा समन्तात् शस्यते शस्त्रैः स्तूयते स नराशंसः यद्वा नरा अस्मिन्नासीनाः शंसन्तीति [निरु° ८. ६.] यास्कोक्तेर्नराशंसो यज्ञः तद्रूपस्तद्वान्वा । यज्ञस्य धाम स्थानं प्रतिमिमानः मिमीते मिमानः प्रतिगणयन् यज्ञस्थानानि जानन्नित्यर्थः एकः प्रतिर्मिमान इत्यनेन सम्बध्यतेऽपरो यजतीत्यनेन । तथा शूरः शौर्यवान् । तनूनपात् तनोति विस्तारयति सृष्टिं तनूः प्रजापतिर्मरीचिस्तस्य नपात् पौत्रः कश्यपात्मज इत्यर्थः यद्वा तनूं शरीरं न पातयति रक्षति जाठराग्नि-

रूपेणेति तनूनपात् अग्निस्तद्रूपः यद्वा तनोति भोगानिति तनूः गौस्तस्या नपात्पौत्रं घृतम् गोः पयो जायते पयस आज्यमिति घृतद्रूपस्तद्वान्वा । गोभिर्वपावान् पशुसम्बन्धिनीभिर्वपावान्वपायुक्तः (9.) मधुना मधुस्वादोपेतेन घृतेन समञ्जन्हवींषि भक्षयन् हिरण्यैः पश्ववदानभूतैः चन्द्री चन्द्रं सुवर्णमस्यास्तीति चन्द्री ॥३७॥

ईडितो देवैर्हरिवाँ२॥ऽअभिष्टिरानुक्षानो क्रविषा शर्धमानः ।
पुरंदरो गोत्रभिद्वज्रबाहुरायातु यज्ञमुप नो जुषाणः ॥३८॥

एवंविध इन्द्र आयातु आगच्छतु कीदृशः देवैरीडितः पूजितः स्तुतः । हरिवान् हरी इन्द्राश्वौ अस्य स्त इति हरिवान् । अभिष्टिः अभि समन्तादिष्टिर्यागो यस्य इलोपश्छान्दसः यद्वा अभिस्तूयतऽइत्यभिष्टिः स्तौतेरौणादिको डिप्रत्ययः । आनुक्षानः आक्ष्यमान ऋत्विग्भिः क्रविषा निमित्तेन क्रविर्निमित्तं द्विजैराक्ष्यमानः । शर्धमानः शर्ध इति [निघ° २.९.] बलनाम अतिबलायमानः । पुरं रिपुनगरं दारयति पुरंदरः । गोत्रभित् गां भूमिं वृष्ट्या त्रायते गोत्रा मेघाः तान्वृष्ट्यर्थं भिनत्ति गोत्रभित् गोत्रान्गिरीन्वा भिनत्ति । वज्रबाहुः वज्रधरः । नोऽस्माकं यज्ञमुपजुषाणः उपसेवमानः ॥३८॥

जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तं वसुभिः सजोषाः ॥३९॥

इन्द्रो नोऽस्माकं प्राचीनं प्राग्भवं प्रदेशं सीदत्सीदतु आस्ताम् इतश्च लोप इति [पा° ३.४.९७.] इलोपः कीदृश इन्द्रः हरिवान् हरी अश्वौ तद्युक्तः । पृथिव्याः प्रदिशा द्वितीयार्थे षष्ठी पृथिवीं देवयजनभूमिं प्रदिशन् उपदिशन् प्रदिशति प्रदिशन् सुपां सुलुगित्यादिना [पा° ७.१.३९.] विभक्तेर्डादेशः । उरुप्रथाः प्रथनं प्रथः ख्यातिः उरु विस्तीर्णं प्रथो यस्य स उरुप्रथाः । सजोषाः जोषणं जोषः असुन्प्रत्ययः जोषसा प्रीत्या सहितः सजोषाः संतुष्टः । बर्हिर्जुषाणः सेवमानः शानचि शपो लुक् कीदृशं बर्हिः प्रथमानं प्रथते तत्प्रथमानं विस्तीर्णम् स्योनं सुखरूपम् आदित्यैः वसुभिः मरुद्भिश्च अक्तं अञ्जितम् बर्हिरञ्जने मल्ले आदित्यादी-

नामुक्तवात्तिरक्तम् सं वर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिरिति [२. २२.] उक्तेः ॥ ३१ ॥

इन्द्रं दुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो विश्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥ ४० ॥

दुरो यज्ञगृहद्वार इन्द्रं यन्तु प्राप्नुवन्तु । कीदृशमिन्द्रं वृषाणं वर्षति वृषा तम् वर्षितारम् इन्द्रः पृथिव्यै वर्षीयानित्युक्तेः । वीरं शूरम् । कीदृश्यो दुरः कवष्यः कु शब्दे कूयन्ते कुवन्ति शब्दयन्ति वा जना यासु ताः कवष्यः ससुषिराः सह्रिद्रे एव शब्दप्रसरात् कौतेरौणादिकोऽषट्प्रत्ययः । तथा धावमानाः धावन्ते धावमानाः आदरयुक्ता इत्यर्थः । तथोपमानं जनयः सुपत्नीः शोभनाः साध्व्यः पत्न्यो यज्ञे सहाधिकारिण्यो जायाः स्त्रिय-इव लुप्तोपमानम् ता यथा धावमानाः यन्ति यान्ति तथा द्वार इन्द्रं यान्तु । किं च इन्द्रं प्राप्य द्वारो देवीः देव्यः अभितः सर्वत्र विश्रयन्तां विवृता भवन्तु । कीदृश्यो द्वारः सुवीराः शोभना वीरा ऋत्विजो यासु ताः सुवीराः ऋत्विग्युक्ताः महोभिस्तेजोभिरुत्सवैर्वा प्रथमानाः विस्तृता भवन्त्यः ॥ ४० ॥

उषासानक्ता बृहती वृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ॥ ४१ ॥

उषासानक्ता इन्द्रं यजतः संगतं कुरुतः इन्द्रेण संगमं कुरुतः यज्ञिरत्र संगतिकरणार्थः । उषा आदित्यप्रभा नक्ता रात्रिः उषाश्च नक्ता च उषासानक्ता समासे उषःशब्दस्योषासादिशः । किम्भूतमिन्द्रं वृहन्तं महान्तं शूरं विक्रान्तं देवानां देवं सर्वदेवपूज्यम् । कीदृश्यौ उषासानक्ता बृहती वृहत्यौ पयस्वती उदकवत्यौ अवश्यायवत्यौ । सुदुघे शोभनं दुग्धः ते दुहः कब्धश्चेति [पा° ३. २. ७०.] कप् घादेशश्च । पेशसा विचित्ररूपेण संवयन्ती संग्रथयन्त्यौ इन्द्रं रूपेण योजयन्त्यौ तत्र दृष्टान्तः तन्तुमिव यथा पटार्थं ततं विस्तीर्णं तन्तुं सूत्रं रूपेण कश्चित्संवयति । तथा सुरुक्मौ शोभनं रुक्मं रोचनं कान्तिर्ययोस्ते सुरुक्मौ ॥ ४१ ॥

दैव्या मिमाना मनुषः पुरुत्रा होतारावि॑न्द्रं प्रथमा सुवाचा ।
मूर्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥४२॥

अयं चाग्निरसौ च वायुर्मध्यमस्तौ देवानामिमौ दैव्यौ होतारौ वाय्वग्नी प्राचीनं प्राच्यां दिशि वर्तमानं ज्योतिराहवनीयाख्यं मधुना मधुरेण हविषा कृत्वा वृधातः वर्धयतः वृधेर्लेटोऽडाटावित्याट् [पा॰ ३.४.९४.] । कीदृशौ होतारौ पुरुत्रा बहुधा मिमाना मिमानौ यज्ञं निर्मिमाणौ । मनुषः मानुषाद्धोतुः प्रथमा आद्यौ मनुषः इति प्रथमा पञ्चम्यर्थे । सुवाचा सुवाचौ शोभना वाक् ययोस्तौ । यज्ञस्य मूर्धन् मूर्धनि प्रधानेऽङ्गे इन्द्रं दधाना स्थापयन्तौ सर्वत्र प्रथमद्विवचनस्याकारः ॥४२॥

तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥४३॥

सरस्वती इडा भारती तिस्रो देव्यः पयसा हविषा कृत्वा तन्तुं यज्ञमच्छिन्नं छेदेन विघ्नेन रहितं कुर्वन्त्विति शेषः । वर्धमानाः पुष्टियुक्ताः । पत्नीः पत्न्यः साध्व्यो जनयो न जाया इव इन्द्रं जुषाणाः सेवमानाः । देवी दीप्यमाना (10.) विश्वस्मिन्सर्वत्र वरते तूर्णं गच्छति विश्वतूर्तिः सर्वगामिनीति द्वे विशेषणे तिसृणाम् ॥४३॥

त्वष्टा दधद्वृष्ममिन्द्राय वृत्रेऽपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवान् ॥४४॥

त्वष्टा यज्ञस्य मूर्धन्मूर्धनि शिरःस्थानीये आहवनीये देवान्समनक्तु भोजयतु अन्तर्भूतण्यर्थोऽनक्तिरत्र भोजनार्थः । कीदृशस्त्वष्टा यशसे यशस्विने वृत्रे सेक्ते इन्द्राय पुरूणि वचनव्यत्ययः पुरु बहु वृष्मं बलं दधत् धारयन् । तथा अपाकः पाक इति प्रशस्यनाम न विद्यते पाकः प्रशस्यो यस्मात्सोऽपाकः नञोऽस्त्यर्थानां (11.) बहुव्रीहिर्वाच्यो वोत्तरलोपश्चेति [पा॰ २.२.२४. वा॰ ८.] समासः । अचिष्टुः अचनशीलः सर्वत्र गतः । वृषा वर्षिता वृषणमिन्द्रं यजन्पूजयन् । भूरिरेताः भूरि बहु रेतो वीर्यं यस्य सः सर्वज्ञनक इत्यर्थः त्वष्टा वक्तेः क-

रोत्यर्थस्येति [निरु° ८.१३.] यास्कोक्तिः । ईदृशस्त्वष्टा देवान्भोजयवित्यर्थः ॥४४॥

वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य कुक्षैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृतेन ॥४५॥

वनस्पतिर्यूपो देवो मधुना रसेन घृतेन च यज्ञं स्वदाति स्वदतु लेढ्वास्वादयतु समनक्तु वा कीदृशो वनस्पतिः अवसृष्टो न आज्ञप्त-इव पाशैः कृत्वा त्मन्या आत्मनि समञ्जन् अर्थात्पशुम् संयोजयन् आत्मन्शब्दस्य तृतीयाया यादेशः मन्क्षेषाञ्यादेरात्मन इति [पा° ६.४.१४१.] आत्लोपः तत्र दृष्टान्तः शमिता न शमिता इव यथा शमिता पाशैः पशुमात्मनि संयोजयति । तथा कुक्षैरिन्द्रस्य जठरमुदरं पृणानः पूरयन् पृणीतेश्शौ पृणानः ॥४५॥

स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ॥४६॥

इन्द्रः स्वाहा देवाः नामैकदेशे नामग्रहणं स्वाहाकृतयो देवाश्च मादयन्तां तृप्यन्तु मद तृप्तौ चुरादिः । किमुद्दिश्य स्तोकानामिन्दुं प्रति स्तोका वपासम्बन्धिनो घृतविन्दवः तत्सम्बन्धी य इन्दुः सोमः तं प्रति तमुद्दिश्य वपास्तोकेषु सोमत्वमारोप्यते वपास्तोकरूपं सोममुद्दिश्येन्द्रः स्वाहाकृतयश्च तृप्यन्तामित्यर्थः । कीदृश इन्द्रः शूरः शौर्यवान् वृषायमाणः वृषवदाचरति वृषायते वृषायतेश्शौ वृषायमाणः शत्रून्प्रतिगर्जन्नित्यर्थः वृषभः वर्षिता तुराषाट् तूर्णं सहते शत्रूनभिभवति तुराषाट् । कीदृशाः स्वाहाकृतयः घृतप्रुषा घृतविन्दुनापि मनसा मोदमानाः मोदन्ते ते मोदमानाः संतुष्टाः । अमृताः अमरणधर्माणः नास्ति मृतं मरणं येषां ते ॥४६॥

VI. आयाविन्द्रोऽवसऽउप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥४७॥

का° [११. ६.१३.] याज्यानुवाक्याश्च । वपापुरोडाशपशुयागानां याज्यानुवाक्याः आयाविन्द्र इति [४७.] वपायाः पुरोऽनुवाक्या आ न इन्द्रो दूरादिति [४८.]

याज्या आ न इन्द्रो दूरिभिरिति [४६.] पशुपुरोडाशस्य पुरोऽनुवाक्या त्रातारमिन्द्रमिति [५०.] याज्या इन्द्रः सुत्रामेति [५१.] पशुयागे पुरोऽनुवाक्या तस्य वयमिति [५२.] याज्येति सूत्रार्थः ॥ सप्त त्रिष्टुभ इन्द्रदेवत्याः । इन्द्रो नोऽस्मानवसे अवितुं रक्षितुमुप आयातु समीपमागच्छतु तुमर्थेऽवतेरसेन्प्रत्ययः । इहायातः सन्सधमात् अस्तु सह देवैः सार्धं मादयति तृप्यति सहमात् सहभोजनकर्तास्तु मादयतेः ब्विप् । कीदृश इन्द्रः शूरः विक्रान्तः । स्तुतोऽस्माभिः । वावृधानः वर्धमानः । यस्येन्द्रस्य पूर्वीः तविषीः पूर्वाः तविष्यः पूर्वाणि कृतानि बलानि वृत्रबधादयः पराक्रमाः द्यौर्न स्वर्ग-इव कथ्यन्ते स्वर्गो यथा स्तूयते तथा यस्येन्द्रस्य बलानि स्तूयन्ते तविषीति बलनाम तवतेर्वृद्धिकर्मण इति [निरु° १.२५.] यास्कः । यश्चेन्द्रः क्षत्रमस्मदीयं पुष्यात् पुष्यति लेटोऽडाटौ कीदृशं क्षत्रम् अभिभूति अभिभवनशीलं शूरम् । स इन्द्र आयाविति सम्बन्धः ॥४७॥

आ न॒ इन्द्रो॑ दू॒रादा न॑ आसा॒दभि॑ष्टिकृ॒दव॑से यासदु॒ग्रः ।
ओजि॑ष्ठेभि॒र्नृपति॒र्वज्र॑बाहुः सं॒गे स॒मत्सु॒ तुर्वणिः॑ पृत॒न्यून् ॥४८॥

इन्द्रो नोऽस्माकं दूराद्दूरप्रदेशात् द्युलोकादिरपि आयासत् आयातु यातेर्लेटो ऽडाटाविति [पा° ३.४.१४.] अटि कृते सिब्बहुलं लेटीति [पा° ३.१.३४.] सिप्प्रत्ययः । आसान्निकटप्रदेशादपि आयासत् आसादित्यन्तिकनाम [निघ° २.१६.] । दूरात्समीपाच्चागच्छत्वित्यर्थः । किं कर्तुमवसे अवितुमस्माकं रक्षणं कर्तुम् । कीदृश इन्द्रः अभिष्टिकृत् अभिष्टिमभिलाषं करोतीत्यभिष्टिकृत् मनोरथप्रदः । उग्रः उत्कृष्टः । ओजिष्ठेभिः तेजस्वितमैर्बलैर्युक्त इति शेषः ओजो विद्यते येषां ते ओजस्विनः अत्यन्तमोजस्विनः ओजिष्ठाः विन्मतोर्लुक् तैः । नृपतिः नृणां पालकः । वज्रबाहुः वज्रं बाहौ यस्य सः । तथा संगे समत्सु संगः समदिति द्वे संग्रामनामनी [निघ° २.१७.] संगे एकस्मिन्संग्रामे समत्सु बहुष्वपि संग्रामेषु युगपदुत्थितेषु सत्सु पृतन्यून् शत्रून् तुर्वणिः तुर्व हिंसायां तुर्वतीति तुर्वणिः कृत्वा पृतनामिच्छन्ति पृतन्यन्ति सुप आत्मनः क्यजिति [पा° ३.१.८.] क्यचि परे कव्यध्वरेति [पा° ७.४.३९.] अत्लोपः ततः क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः संग्रामेच्छूनां कृत्वेत्यर्थः ॥४८॥

आ न इन्द्रो हरिभिर्यात्वर्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥४९॥

अर्वाभिरर्थैः । इन्द्रोऽर्वाचीनोऽभिमुखः सन् नोऽस्मानर्वाङ् अस्मानभि आयातु कैः हरिभिरश्वैः किमर्थमवसे अवनमवः असुन् तस्मै रक्षणाय राधसे धनाय च आगत्य च वज्री इन्द्रो नोऽस्माकमिमं यज्ञमनु प्रति वाजसातौ अन्नसम्भजने निमित्ते तिष्ठाति तिष्ठतु लेट् । कीदृशः मघवा मघं धनमस्यास्तीति धनवान् । विरप्शी विविधं रपति लपति विरप्शी महान् ॥४९॥

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे-हवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥५०॥

गर्गदृष्टा । त्रातारं रक्षितारमिन्द्रम् अवितारं प्रीणयितारमिन्द्रम् हवे हवे आह्वाने आह्वाने यज्ञे वा सुहवं सुखेन ह्वयते आह्वयतऽइति सुहवम् शूरम् शक्रम् शक्नोति शक्रस्तं समर्थम् पुरुहूतं पुरुभिर्बहुभिर्ह्वयते पुरुहूतस्तं बहुभिराहूतम् ईदृशमिन्द्रं ह्वयामि आह्वयामि । मघवा धनवानिन्द्र आहूतः सन्नोऽस्माकं स्वस्ति अविनाशं धातु दधातु करोतु विकरणव्यत्ययः । इन्द्रशब्दावृत्तिरादरार्था ॥५०॥

इन्द्रः सुत्रामा स्ववाँ२ऽअवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषोऽअभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥५१॥

इन्द्रः अवोभिरन्नैः सुमृडीकः शोभनसुखकारी भवतु शोभनं मृडीकं सुखं यस्मात्स सुमृडीकः । कीदृश इन्द्रः सुत्रामा सुष्ठु त्रायते रक्षति सुत्रामा आतो मनिन्निति [पा° ३.२.७४.] मनिन् । स्ववान् स्वं धनमस्यास्तीति स्ववान् आतोऽटि नित्यमिति [पा° ८.३.३.] अनुनासिकत्वम् दीर्घादटि समानपादऽइति [पा° ८.३.९.] नस्य रुः । विश्ववेदाः विश्वं सर्वं वेदो धनं यस्य सः । स चेन्द्रो द्वेषः दौर्भाग्यं बाधतां निवर्तयतु अभयं च कृणोतु करोतु किं च इन्द्रप्रसादाद्वयं सुवीर्यस्य धनस्य पतयः स्वामिनः स्याम भवेम शोभनाश्च ते वीराश्च सुवीराः पुत्रादयः तेभ्यो हितं सुवीर्यं तस्य ॥५१॥

तस्य॑ व॒यꣳ सु॑म॒तौ य॒ज्ञिय॑स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ।
स सु॒त्रामा॒ स्ववाँ॑२॥ऽइन्द्रोऽअस्मेऽआरा॒च्चिद्वे॒षः स॑नु॒तर्यु॑योतु ॥५२॥

वयं तस्येन्द्रस्य सुमतौ शोभनबुद्धौ स्याम भवेम भद्रे कल्याणरूपे सौमनसे सुमनसो भावि शोभनमनस्कत्वेऽपि स्याम इन्द्रोऽस्मासु सुमतिं मनश्च भद्रं करोत्वित्यर्थः । कीदृशस्येन्द्रस्य यज्ञियस्य यज्ञाय हितो यज्ञियस्तस्य यज्ञसम्पादिनः । सुत्रामा सुरक्षकः स्ववान्धनवान्स इन्द्रः अस्मे अस्मत्तः आराच्चित् दूरादपि वर्तमानं द्वेषो दौर्भाग्यं सनुतरन्तर्हितं कृत्वा युयोतु पृथक्करोतु विकरणव्यत्ययः । सनुतरिति निर्णीतान्तर्हितनाम [निघ॰ ३.२५.] ॥५२॥

आ म॒न्द्रैरि॑न्द्र॒ हरि॑भिर्याहि म॒यूर॑रोमभिः ।
मा त्वा॒ के चि॒न्नि य॑मन्वि॒ं न पा॒शिनोऽति॒ धन्वे॑व॒ ताँ२॥ऽइ॒हि ॥५३॥

विश्वामित्रदृष्टा बृहती तृतीयो द्वादशार्णोऽन्ये त्रयोऽष्टार्णाः–आ मन्द्रैः एवेत् अनयोर्विनियोगाभावः । हे इन्द्र त्वं हरिभिः अश्वैः आयाहि कीदृशैः मन्द्रैः गम्भीरनादैः मयूररोमभिः मयूरस्येव रोमाणि येषां ते मयूररोमाणस्तैः-मयूरसमवर्णैः । किं च केचित् दुष्टा आगच्छन्तं त्वा त्वां मा नियमन् नियच्छन्तु मा निबध्नन्तु तत्र दृष्टान्तः पाशिनो पाशहस्ता व्याधाः विं पक्षिणमिव यथा पाशिनः पक्षिणं बध्नन्ति तथा त्वां मा बध्नन्तु अथ ये परिपन्थिनो भवेयुस्तानतीहि अतिक्रम्यागच्छ किमिव धन्व इव धन्व निरुदकदेशः यथा पान्थो मरुदेशमतिक्रम्य गच्छति तथागच्छ ॥५३॥

ए॒वेदिन्द्रं॑ वृष॒णं व॑ज्र॒बाहुं॑ वसि॒ष्ठासोऽअ॒भ्यर्च॑न्त्य॒र्कैः ।
स न॑ स्तु॒तो वी॒रव॑द्धातु गो॒मद्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥५४॥

वसिष्ठदृष्टा इन्द्रदेवत्या त्रिष्टुप् । वसिष्ठाः वसिष्ठापत्यानि मुनयः अर्कैर्मन्त्रैः एव इत् एवमेव इन्द्रमभ्यर्चन्ति पूजयन्ति कीदृशमिन्द्रं वृषणं वर्षितारम् वज्रबाहुं वज्रं बाहौ यस्य तम् स इन्द्रः स्तुतः सन्वीरवत् वीरा विद्यन्ते यत्र तत् पुत्रयुक्तम् गोमत् गावो विद्यन्ते यत्र तत् गोसंयुक्तं धनम् नोऽस्मभ्यं धातु दधातु वि-

करणाव्यत्ययः । एवं पादत्रयेणेन्द्रं स्तुत्वा ऋत्विज आहुः हे ऋत्विजः यूयं स्वस्तिभिः अविनाशैः सदा सर्वदा नोऽस्मान्पात रक्षत ॥५४॥

VII. समिद्धोऽअग्निरश्विना तप्तो घर्मो विराट् सुतः ।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम् ॥५५॥

का° [१९.६.१५.] आप्रियश्च समिद्धोऽअग्निरश्विनेति । समिद्ध इत्याद्या द्वादशानुष्टुभः चकारात्त्रिपदाः प्रयाजयाज्याः इति सूत्रार्थः ॥ विदर्भिदृष्टा अश्विसरस्वतीन्द्रदेवत्या आप्रीसंज्ञा द्वादशानुष्टुभः । अश्विनावधर्यू देवानामिति तौ प्रति होता प्राह हे अश्विना अश्विनौ अग्निः समिद्धो दीप्तोऽस्ति कविर्दक्षनक्षमोऽस्ति घर्मः प्रवर्ग्यः तप्तोऽस्ति विराट् विविधं राजमानः सोमः सुतोऽभिषुतः । किं च धिनोति प्रीणाति धेनुः औणादिको नुप्रत्ययो धिवेः वलोपो गुणश्च प्रीणयित्री सरस्वती इह यज्ञे सोमं दुहे दुग्धे इह प्रपूरणे लटि तडि प्रथमैकवचने टेरेत्वे लोपस्त आत्मनेपदेष्विति [पा° ७.१.४१.] तलोपे दुहे इति रूपम् । कीदृशं सोमं शुक्रं शुक्लं शुद्धम् इन्द्रियमिन्द्राय हितं बलकरम् । एतावता यज्ञसम्पत्तिरस्ति युवामागच्छतमिति भावः ॥५५॥

तनूपा भिषजा सुतेऽश्विनोभा सरस्वती ।
अधा रजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥५६॥

उभा अश्विना उभौ अश्विनौ सरस्वती मधा मधुना रजांसि लोकान् दुहन्ति पूरयन्ति पूर्वऽर्धे (12.) दुहे इत्यस्य वचनव्यत्ययेनेहानुषङ्गः लोका रजांस्युच्यन्तऽइति [निरु° ४.११.] यास्कोक्ते रजःशब्दोऽत्र लोकवाची । कीदृशावश्विनौ तनूपा तनूः शरीराणि पातस्तौ तनूपौ शरीराणां रक्षितारौ भिषजा भिषजौ वैद्यौ । क्व सति । सुते सोमेऽभिषुते सति पूरयन्तीत्यर्थः । किं च अश्विसरस्वत्य इन्द्राय इन्द्रियं वीर्यं पथिभिर्यज्ञमार्गैः वहान्वहन्ति इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.९७.] इकारलोपे वहानिति रूपम् ॥५६॥

इन्द्राग्निन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।

अधातामश्विना मधु भेषजं भिषजा सुते ॥५७॥

सरस्वती नराशंसेन यज्ञेन सह इन्द्राय इन्द्रार्थमिन्दुं सोमं नग्नहुं सुराकन्दं च पूर्वोक्तमधात् धृतवती किं च भिषजा अश्विना भिषजौ अश्विनौ सुते सोमे ऽभिषुते सति मधु मधुरं भेषजमौषधमधातां धारितवतौ अधातामित्येव क्रिया वचनव्यत्ययेन पूर्वार्धे योज्या ॥५७॥

आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् ।

इडाभिरश्विनाविषꣳ समूर्जꣳ सꣳ रयिं दधुः ॥५८॥

आह्वयते आजुह्वाना अर्थादिन्द्रमाह्वयन्ती सरस्वती अश्विना चेन्द्राय इन्द्रियाणि चक्षुरादीनि संदधुः वीर्यं सामर्थ्यं च दधुः इडाभिः पशुभिः सह इषमन्नं संदधुः पशवो वाऽइडेति [१.८.१.१२.] श्रुतिः ऊर्जं दध्यादि रयिं धनं च संदधुः एतानि ददुरित्यर्थः ॥५८॥

अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रं परिस्रुता ।

सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥५९॥

अश्विना अश्विनौ परिस्रुता सुरया सह सुतमभिषुतं शुक्रं शुद्धममलिनं सोमं नमुचेः असुरात्सकाशात् आहरताम् सरस्वती च तमेव सोमं बर्हिषास्तरणार्थेन सह आभरत् आहरत् किमर्थमिन्द्राय पातवे इन्द्रस्य पानार्थं तुमर्थे तवेप्रत्ययः ॥५९॥

कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः ।

इन्द्रो न रोदसीऽउभे दुहे कामान्त्सरस्वती ॥६०॥

ऋस्यामृचि त्रयो नकाराश्चकारार्थाः । अश्विभ्यां सहिता सरस्वती इन्द्रो न इन्द्रश्च उभे रोदसी द्यावापृथिव्यौ कामान्दुहे दुग्धे द्विकर्मकः द्यावापृथिवीभ्यां सकाशात्कामान्दोग्धि दुरो दिशश्च सकाशात् दोग्धि अकथितं चेति [पा° १.४.५१.] द्वारां दिशां रोदसोश्च कर्मत्वम् कीदृश्यो द्वारः कवष्यः कुष निष्कर्षे कुषिताः सछिद्राः तया व्यचस्वतीः व्यचनं व्यचोऽवकाशः तद्वत्यः ॥६०॥

उषासानक्तमश्विना दिवेन्द्रꣳ सायमिन्द्रियैः ।
संजानाने सुपेशसा समञ्जाते सरस्वत्या ॥ ६१ ॥

हे अश्विनौ उषासा रविप्रभा नक्तं रात्रिश्च सरस्वत्या सह दिवा दिवसे सायंकाले च इन्द्रमिन्द्रियैः वीर्यैः सह समञ्जाते संयोजयतः । कीदृश्यौ ते संजानाने संजानीतः ते संजानाने एकमती सुपेशसा शोभनं पेशो रूपं ययोस्ते शुक्ला उषाः कृष्णा रात्रिः ॥ ६१ ॥

पातं नोऽश्विना दिवा पाहि नक्तꣳ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते ॥ ६२ ॥

हे अश्विना अश्विनौ दिवा दिवसे नोऽस्मान्युवां पातं रक्षतम् हे सरस्वति नक्तं रात्रौ त्वं नः पाहि रक्ष । हे दैव्या होतारा देवसम्बन्धिनौ होतारौ भिषजा भिषजौ अश्विनौ सुते सोमेऽभिषुते सति सचा सह एकीभूय युवमिन्द्रं पातं रक्षतम् सर्वत्र विभक्तेराकारः ॥ ६२ ॥

तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा ।
तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥ ६३ ॥

तिस्रो देव्यः अश्विना अश्विनौ च परिस्रुता सुरया सह सोममिन्द्राय सुषुवुरभिषुतवत्यः । काः तिस्रः सरस्वती भारती इडा च कीदृश्यः त्रेधा स्थिता इति शेषः सरस्वती मध्यस्थाना भारती द्युस्थाना इडा पृथिवीस्थाना कीदृशं सोमं तीव्रं पटुत्वकरम् मदं मदजनकम् ॥ ६३ ॥

अश्विना भेषजं मधु भेषजं नः सरस्वती ।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳ-रूपमधुः सुते ॥ ६४ ॥

अश्विना नोऽस्माकं सरस्वती त्वष्टा प्रयाजदेवता च सुते सोमेऽभिषुते सति इन्द्रे एतानि वस्तूनि अधुः स्थापयामासुः दधातेर्लुङ् कानीत्यत आह भेषजमौषधं मधु मधुरूपं भेषजं च यशः कीर्तिं श्रियं लक्ष्मीं रूपं-रूपं नानाविधं रूपं च नित्यवीप्सयोरिति [पा° ८. १. ४.] रूपशब्दस्य द्वित्वम् ॥ ६४ ॥

ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता ।
कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥ ६५ ॥

वनस्पतिः प्रयाजदेवः शशमानः स्तुवन्सन् ऋतुथा ऋतौ-ऋतौ काले-काले परिस्रुता सुरया सह कीलालमन्नरसमिन्द्रः इन्द्राय इन्द्रार्थं दुहे दुग्धे सुपां सुलुगित्यादिना [पा० ७. १. ३९.] चतुर्थ्येकवचनस्य सुआदेशे इन्द्र इति लोपस्त आत्मनेपदेष्विति [पा० ७. १. ४१.] तलोपे दुहे इति रूपम् । किं च सरस्वती अश्विभ्यां सहिता धेनुर्भूत्वा इन्द्राय मधु दुहे दुग्धे ॥ ६५ ॥

गोभिर्न सोममश्विना मासरेण परिस्रुता ।
समधात्ँ सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥ ६६ ॥

हे अश्विना अश्विनौ मासरेण परिस्रुता सह गोभिर्न गोप्रभृतिपशुभिश्च सह नश्चार्थे सुतमभिषुतं सोमं मधु च इन्द्रे युवां समधातमारोपयतम् सम्पूर्वाद्धातेर्लुङि मध्यमद्विवचनम् हे स्वाहाकृतयः प्रयाजदेवाः यूयं सरस्वत्या सह इन्द्रे सुतं मधु समधातेति वचनव्यत्ययः ॥ ६६ ॥

VIII. अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती ।
आ शुक्रमासुराद्धसु मघमिन्द्राय जभ्रिरे ॥ ६७ ॥

का० [१९. ६. १६. १७.] अश्विना हविरिति तिस्रो वपानां याज्यानुवाक्याः प्रथमामनूच्य द्वितीया याज्या द्वितीयामनूच्य तृतीया याज्या तृतीयामनूच्य प्रथमा याज्या । अश्विनेत्याद्यास्तिस्रस्तिसृणां वपानां क्रमाद्याज्यापुरोऽनुवाक्याः तत्प्रकारमाह आश्विनवपायागे अश्विनेति [६७.] अनुवाक्या यमश्विनेति [६८.] याज्या सारस्वतवपायागे यमश्विनेति [६८.] अनुवाक्या तमिन्द्रमिति [६९.] याज्या ऐन्द्रवपायागे तमिन्द्रमिति [६९.] अनुवाक्यां अश्विनेति [६७.] याज्येति सूत्रार्थः ॥ अश्विसरस्वतीन्द्रदेवत्यास्तिस्रोऽनुष्टुभः । अश्विना अश्विनौ सरस्वती च धिया बुद्ध्या कृत्वा नमुचेर्नमुचिसंज्ञात् आसुरात् दैत्यात् इन्द्रायेन्द्रार्थमेतानि वस्तूनि आजभ्रिरे आजह्रिरे कानीत्यत आह हविः शुक्रं शुद्धममलिनं हविः इन्द्रियं वीर्यं मघं महनीयं वसु धनं च ॥ ६७ ॥

०० ००

यमश्विना सरस्वती हविषेन्द्रमवर्धयन् ।
स विभेद वलं मघं नमुचावासुरे सचा ॥ ६८ ॥

अश्विनौ सरस्वती च हविषा कृत्वा यमिन्द्रमवर्धयन् स इन्द्रो नमुचावासुरे सचा नमुचिना असुरेण सह मघं मघनीयं वलं मेघं बिभेद विदारितवान् । सचेत्यव्ययं सहार्थे तद्योगे नमुचावासुरे इति तृतीयार्थे सप्तमी । वृणोतेर्वल इति [निरु° ६.२.] यास्कः नमुचिं विदार्य वृष्टिं कारितवानित्यर्थः ॥ ६८ ॥

तमिन्द्रं पशवः सचाश्विनोभा सरस्वती ।
दधाना अभ्यनूषत हविषा यज्ञऽइन्द्रियैः ॥ ६९ ॥

पशवः कर्माङ्गभूता गोमेषाद्याः उभा अश्विना उभौ अश्विनौ सरस्वती च सचा सहभूताः सन्तः यज्ञे हविषा इन्द्रियैः वीर्यैश्च दधानाः पुष्णन्तः सन्तः तमिन्द्रमभ्यनूषत अवर्धयन् अस्तुवन्वा नू स्तवने ॥ ६९ ॥

यऽइन्द्रऽइन्द्रियं दधुः सविता वरुणो भगः ।
स सुत्रामा हविष्यतिर्यजमानाय सश्चत ॥ ७० ॥

का° [१९.६.१८.] यऽइन्द्रऽइति पुरोडाशानां पूर्ववत् यऽइन्द्रऽइति तिसृणां पशुपुरोडाशानां याज्यानुवाक्याः पूर्ववत् यऽइन्द्रे [७०.] सविता [७१.] इत्यैन्द्रस्यानुवाक्यायाज्ये सविता [७१.] वरुणः क्षत्रम् [७२.] इति सावित्रस्य ते वरुणः क्षत्रम् [७२.] यऽइन्द्रे [७०.] इति वारुणस्येति सूत्रार्थः ॥ प्रत्येकमिन्द्रसवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभः । सविता वरुणो भग इति ये त्रयो देवाः इन्द्रे इन्द्रियं वीर्यं दधुः स्थापयामासुः । हविष्यतिः हविषां स्वामी सुत्रामा शोभनत्राणकर इन्द्रो यजमानाय कर्मणि चतुर्थी यजमानं सश्चत सेवताम् इष्टदानेन यजमानं सुखयत्वित्यर्थः षश्च सेवने लोडर्थे लङ् अडभाव आर्षः ॥ ७० ॥

सविता वरुणो दधद्यजमानाय दाशुषे ।
आदत्त नमुचेर्वसु सुत्रामा वलमिन्द्रियम् ॥ ७१ ॥

सुत्रामा इन्द्रो नमुचेरसुरात्सकाशात् यद्वसु धनं बलमिन्द्रियं वीर्यं च आदत्त

ज्ञग्राह सविता वरुणो भगश्च पशुपुरोडाशमल्पदेवास्तत् नमुचेरानीतं वस्वादिकं यज्ञमानाय दधत् दधातु ददवित्यर्थः कीदृशाय यज्ञमानाय दाशुषे दाशति ददाति दाश्वान् तस्मै हविर्षि दत्तवते दाश्वान्साह्वानित्यादिना [पा° ६.१.१२.] क्वसन्तो निपातः ॥७१॥

वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् ।
सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥७२॥

वरुणः सविता सुत्रामा इन्द्रश्च यज्ञं सौत्रामणीमाशत भक्षितवन्तः व्याप्तवन्तो वा अश भोजने अशूङ् व्याप्तौ वा उभयोर्विकरणव्यत्ययः । कीदृशास्ते क्षत्रं क्षतात्त्राणसामर्थ्यमिन्द्रियं वीर्यं भगेन भाग्येन सह श्रियं लक्ष्मीं यशसा सह बलं च दधानाः यजमाने स्थापयन्तः । तत्र वरुणः क्षत्रमिन्द्रियं च दधाति सविता भगं प्रियं सुत्रामा यशो बलं चेति विभागः ॥७२॥

अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् ।
हविषेन्द्रꣳ सरस्वती यजमानमवर्धयन् ॥७३॥

का° [११.६.११.] अश्विना गोभिरिति च हविषाम् । अश्विना गोभिरिति तिस्रो हविषां याज्यानुवाक्याः चात्पूर्ववत् अश्विना [७३.] ता नासत्या [७४.] इत्याश्विनपशुयागे पुरोऽनुवाक्यायाज्ये ता नासत्या [७४.] ता भिषजा [७५.] इति सारस्वते ता भिषजा [७५.] अश्विना [७३.] इत्यैन्द्रे इति सूत्रार्थः ॥ अश्विसरस्वतीन्द्रदेवत्यास्तिस्रोऽनुष्टुभः । अश्विना सरस्वती च एतैः पदार्थैः इन्द्रं यजमानं चावर्धयन् । कैस्तत्राह गोभिर्गोप्रभृतिपशुभिः इन्द्रियम् विभक्तिव्यत्ययः इन्द्रियेण इन्द्रियपाटवेन अश्वेभिः अश्वैः दक्षिणाहृपैः वीर्यं बलं वीर्येण मनःसामर्थ्येन बलेन शरीरदार्ढ्येन हविषा पशुपुरोडाशेन च । इन्द्रस्य वर्धनं तृप्तिः यजमानस्य वर्धनं धनपुत्रपश्वादिपुष्टिः ॥७३॥

ता नासत्या सुपेशसा हिरण्यवर्तनी नरा ।
सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥७४॥

ता तौ नासत्या नासत्यौ अश्विनौ सरस्वती च कर्मसु सौत्रामण्यादियागेषु नोऽस्मानवत अवतु रक्षतु पुरुषव्यत्ययः हे इन्द्र त्वमपि नोऽस्मान्कर्मसु अव वचनव्यत्ययः । कीदृशौ नासत्यौ हिरण्यवर्तनी हिरण्येनोपलक्षिता वर्तनिर्मार्गो ययोस्तौ यत्र पथि गच्छतस्तत्र सुवर्णमिव सम्पद्यतऽइत्यर्थः । सुपेशसा शोभनं पेशो रूपं ययोस्तौ सुन्दरौ । नरा नरौ नरगुणयुक्तौ नराकारौ च । कीदृशी सरस्वती हविष्मती हविर्विद्यते यस्याः सा ॥७४॥

ता भिषजा सुकर्मणा सा सुदुघा सरस्वती ।
स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥७५॥

ता तौ प्रसिद्धौ भिषजा भिषजौ वैद्यौ अश्विनौ सा प्रसिद्धा सरस्वती च स प्रसिद्धो वृत्रहा इन्द्रः कल्पान्तरप्रभवः इन्द्राय एतत्कल्पप्रभवाय इन्द्रियं वीर्यं दधुः यद्वा इन्द्र एव दातृपात्रद्वयेण बहुधा भवति देवानामचिन्त्यशक्तित्वात् । कीदृशौ भिषजौ सुकर्मणा सुकर्माणौ शोभनं कर्म ययोस्तौ । कीदृशी सरस्वती सुदुघा सुष्ठु दुग्धे सा सुदुघा साधुदोहना । कीदृशो वृत्रहा शतक्रतुः शतं क्रतवः कर्माणि यस्य बहुकर्मकर्ता ॥७५॥

युवꣳ सुराममश्विना नमुचावासुरे सचा ।
विपिपानाः सरस्वतीन्द्रं कर्मस्वावत ॥७६॥

का° [११.६.२०.] ग्रहाणां युवꣳ सुरामं पुत्रमिवेति । त्रयाणां पयोग्रहाणां सुराग्रहाणां च युवमिति पुरोऽनुवाक्या पुत्रमिवेति याज्येति सूत्रार्थः ॥ द्वे अश्विसरस्वतीन्द्रदेवत्येऽनुष्टुप्त्रिष्टुभौ । हे अश्विनौ हे सरस्वति युवं यूयं वचनव्यत्ययः नमुचावासुरे दैत्ये वर्तमानं सुरामं सुरामयं ग्रहं सचा सह विपिपाना विविधं पिबन्तः सन्तः कर्मस्विन्द्रमावत आ समन्ताद्रक्षत (13.) । पिपाना अत्र विकरणव्यत्ययः ॥७६॥

पुत्रमिव पितꣳ ॥७७॥

इयं व्याख्याता दशमेऽध्याये [१०.३४.] ॥७७॥

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥ ७८ ॥

का° [११. ६. २१.] पशुस्विष्टकृतो यस्मिन्नश्वासोऽहाव्यग्ऽइति । पशोः सम्बन्धिनि स्विष्टकृद्भागे यस्मिन्नश्वास इति पुरोऽनुवाक्या अहाव्यग्ऽइति याज्या ॥ द्वे अग्निदेवत्ये जगतीत्रिष्टुभौ । हे अध्वर्यो तस्मै अग्नये हृदा सह मतिं बुद्धिं चारुं समीचीनं जनय अन्यर्थं मनोबुद्धी शुद्धे कुरु इत्यर्थः । कीदृशायाग्नये कीलालपे कीलालमन्नरसं पिबति कीलालपास्तस्मै । सोमपृष्ठाय सोमः पृष्ठे यस्य तस्मै यस्य पृष्ठे सोमाहुतयो हूयन्तऽइत्यर्थः । वेधसे विदधाति शुभं करोति वेधाः तस्मै शुभमतिकर्त्रे । तस्मै कस्मै यस्मिन्नग्नौ एते पशवः अवसृष्टासः अवसृष्टाः अवदायावदाय चतुरवत्तेन निद्धिप्ताः तथा आहुताः आदायादाय हुताः । के पशवः अश्वासः अश्वाः ऋषभासः ऋषभाः उक्षणः उक्षाणः सेचनसमर्था वृषाः वा षपूर्वस्य निगमऽइति [पा° ६. ४. १.] उपधादीर्घाभावः । वशाः वन्ध्याः मेषाः अजाः । यस्मिन्नेते पशवो हुतास्तस्मै मनःशुद्धिं कुर्विति होतुर्वाक्यम् ॥ ७८ ॥

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीवं सोमः ।
वाजसनिꣳ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ ७९ ॥

हे अग्ने ते तवास्ये हविरहावि हुतं सर्वतः जुहोतेः कर्मणि लुङ् संततहोमे दृष्टान्तः स्रुचि घृतमिव यथा स्रुचि घृतं सर्वदा स्थितम् चम्वि चम्वामधिषवणचर्मणि सोम-इव तत्र यथा सोमः सर्वदा स्थितस्तद्वन्नित्यं मया तवास्ये हविर्हुतम् । हे अग्ने सः त्वमस्मे अस्मासु एतानि वस्तूनि धेहि स्थापय । कानि वाजसनिं वाजस्य अन्नस्य सनिं भोगम् । रयिं धनं कीदृशं सुवीरं शोभना वीराः पुत्रा यत्र तं सुपुत्रयुक्तं धनमित्यर्थः । प्रशस्तं सर्वलोकस्तुतं बृहन्तं महान्तं यशसं यशश्च पुंस्त्वमार्षम् सर्वलोकप्रसिद्धं यशो देहीत्यर्थः यशो वै सोमो राजेति श्रुतेः यशसं सोममिति वा ॥ ७९ ॥

IX. अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् ।

वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥ ८० ॥

का॰ [१९.७.१.] प्रतिगरिष्यत्युपविष्टेऽध्वर्यो शोऽसावेत्याङ्ख्याश्विना तेजसेत्यनुवाकꣳ शꣳसति । त्रयस्त्रिंशवसायज्ञसादनानन्तरमध्वर्योः क्रोतुः पुरस्तात्प्रतिगरार्थमुपवेशनमुक्तम् तदाह प्रतिगरिष्यत्यध्वर्यो पुर उपविष्टे सत्यध्वर्यो शोंसावोऽमित्याङ्ख्याश्विना तेजसा चक्षुरित्येकादशर्चमनुवाकं शस्त्रं शंसति प्रथमाल्ये ऋचौ त्रिः शंसनीये मध्यस्थानां त्रयाणां तृचानामादिषाह्वावः कार्य इति सूत्रार्थः ॥ अश्विसरस्वतीन्द्रदेवत्यानुष्टुप् आद्यः पादोऽष्टार्णः द्वितीयो नवार्णः तृतीयः षडर्णः चतुर्थोऽष्टार्णः । अश्विनौ तेजसा सह चक्षुरिन्द्रियमिन्द्राय दधुः दधतुः ददतुः । सरस्वती प्राणेन सह वीर्यमिन्द्राय दधौ ददौ । इन्द्रः कल्पान्तरीणः वाचं बलेन च सह इन्द्रायैतत्कल्पोत्थाय इन्द्रियं सामर्थ्यं ददौ । एवमश्विसरस्वतीन्द्रा इन्द्राय तेजआदि दधुरित्यर्थः सर्वापेक्षया दधुरिति बहुवचनम् ॥ ८० ॥

गोमद्वू षु णासत्या अश्वावद्यातमश्विना । वर्तिर्यातं रुद्रा नृपाय्यम् ॥ ८१ ॥

गृत्समददृष्टा अश्विदेवत्यास्तिस्रो गायत्र्यः आद्या पादनिवृद्गायत्री त्रयः सप्तकाः पादनिवृदिति वचनात् । ऊ सु निपातौ पादपूरणौ इकः सुञ्रीति [पा॰ ६.३.१३४.] सुनिपाते परे ऊ इत्यस्य संहितायां दीर्घः सुञ्र इति [पा॰ ८.३.१०७.] सूत्रेण सु इत्यस्य षत्वम् पूर्वपदादिति [पा॰ ८.३.१०६.] नासत्यशब्दनकारस्य णत्वम् । हे नासत्या नासत्यौ हे अश्विना हे रुद्रा रुद्रौ शत्रूणां रोदयितारौ वर्तिः विभक्तिव्यत्ययः वर्त्या मार्गेण युवां नृपाय्यं यज्ञं प्रति यातं गच्छतम् नृभिः पीयते सोमो यस्मिन्स नृपाय्यः क्रतौ कुण्डपाय्यसंचाय्याविति [पा॰ ३.१.१३०.] अत्र कुण्डशब्द उपलक्षकः नृशब्देऽपि तृतीयान्ते उपपदे पिबतेर्धातोरधिकरणे यत्प्रत्ययो युगागमश्च निपात्यते । किं कृत्वा गोमत् गावो विद्यन्ते यस्मिन्गोमत् अश्वावत् अश्वा विद्यन्ते यस्य तदश्वावत् मन्त्रे सोमाश्वेत्यादिना [पा॰ ६.३.१३१.] अश्वशब्दस्य दीर्घः गोयुक्तमश्वयुक्तं च धनमादाय यज्ञं गच्छतमित्यर्थः ॥ ८१ ॥

न यत्परो नान्तर आदधर्षद्वृषण्वसू । दुःशꣳसो मर्त्यो रिपुः ॥ ८२ ॥

हे वृषण्वसू वृषा वृष्टिरेव वसु धनं ययोस्तौ यद्वा वृष्णा वृष्ट्या वासयतो

लोकं स्थापयतस्तौ वृषणवसू हे अश्विनौ दुःशंसो दुष्टमपवादं शंसति कथयति दुःशंसोऽपवदिता रिपुः शत्रुः मर्त्यः मनुष्यः परः असम्बद्धः अन्तरः सम्बद्धः स्वकीयोऽपि ईदृशो मर्त्यो यत् यमिन्द्रं न आदधर्षीत् न आधृष्णुयात् न पराभूयात्। स्वजनोऽस्वजनोऽपि रिपुः पिशुनोऽपि यमिन्द्रं पराभवितुं न शक्त इत्यर्थः। जिधृषा प्रागल्भ्येऽस्माद्धातोर्यङ्लुगन्ताच्छतृप्रत्ययः ॥ ८२ ॥

ता न आवोऽमश्विना रयिं पिशंगसंदृशम्। धिष्ण्या वरिवोविदम् ॥ ८३ ॥

हे धिष्ण्या धिष्ण्यौ धिष्ण्याग्निरूपौ धातारौ वा हे अश्विना युवां नोऽस्माकं रयिं धनमावोऽमावक्तम् आनयतमित्यर्थः वक्तेर्लुडि परस्मैपदे मध्यमद्विवचनम्। कीदृशं रयिं पिशंगसंदृशं पिशंगं पीतं सम्यक् दृश्यते तत्पिशंगसंदृशम् पीतवर्णं सुवर्णमित्यर्थः। तथा वरिवोविदं वरिवो धनं विन्दति प्राप्नोति वरिवोविदस्तम् विदृ लाभे इगुपधेति [पा° ३.१.१३५.] कः। यच्च धनं धनान्तरहेतुभूतं भवतीत्यर्थः ॥ ८३ ॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ॥ ८४ ॥

मधुछन्दोदृष्टाः सरस्वतीदेवत्यास्तिस्रो गायत्र्यः। सरस्वती नोऽस्माकं यज्ञं वष्टु कामयतां वशं कान्तौ यो यदिच्छति स तत्प्रति गच्छति अस्मद्यज्ञं प्रत्यागच्छत्वित्यर्थः। कीदृशी सरस्वती पावका पावयित्री पवनं पावः शोधनम् घञ् पावं कायति कथयति पावका आतोऽनुपसर्गे कः [पा° ३.२.३.]। वाजेभिर्वाजैः अन्नैः वाजिनीवती वाजा अन्नानि विद्यन्ते यस्यां सा वाजिनी यज्ञक्रिया वाजिनी विद्यते यस्याः सा वाजिनीवती यज्ञक्रियाधिष्ठात्री। धियावसुः धिया कर्मणा वसु धनं यस्याः सा धियावसुः छान्दसस्तृतीयाया अलुक ॥ ८४ ॥

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ॥ ८५ ॥

सरस्वती यज्ञं दधे धारयति। कीदृशी सूनृतानां प्रियं सत्यं सूनृतं प्रियसत्यवचनानां वेदत्रयीशब्दानां चोदयित्री प्रेरयित्री चुद प्रेरणे णिजन्तात्तृच् ततो ङीप्। सुमतीनां शोभनानां बुद्धीनां चेतन्ती चेतयन्ती प्रकटयन्ती सुमतिदात्रीत्यर्थः छन्दस्युभयथेति [पा° ३.४.११७.] शपोऽप्यार्धधातुकत्वाच्चिचो लोपः ॥ ८५ ॥

मरुोऽअर्णः सरस्वती प्रचेतयति केतुना । धियो विश्वा विराजति ॥ ८६॥

सरस्वती केतुना कर्मणा प्रज्ञया वा मरुो मरुत् अर्णः उदकं प्रचेतयति प्रज्ञापयति प्रेरयति सर्वस्यां भूमौ वृष्टिं कारयतीत्यर्थः । किं च विश्वाः सर्वाः धियः सर्वप्राणिस्था बुद्धीः विराजति विराजयति दीपयति सर्वज्ञत्वबुद्धीः प्रकाशयति तां स्तुमः ॥ ८६॥

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ ८७॥

मधुछन्दोदृष्टा इन्द्रदेवत्यास्तिस्रो गायत्र्यः । चित्रा नानाविधा भानवो दीप्तयो यस्य स चित्रभानुः हे चित्रभानो इन्द्र त्वमायाहि आगच्छ । किमिति इमे सोमाः सुताः अभिषुताः । कीदृशा इमे त्वायवः त्वां कामयन्ते त्वायवः सुप आत्मनः क्यच् [पा° ३.१.८.] क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः । तथा अण्वीभिः अण्वीत्यङ्गुलीनाम [निघ° २.५.] अङ्गुलीभिः तना दशापवित्रेण च पूतासः पूताः शोधिताः तनशब्दो दशापवित्रवाची तृतीयैकवचनस्य पूर्वसवर्णः । शोधिताः सुताः सोमा इन्द्रोऽस्मान्पिबत्विति कामयन्तेऽतोऽत्रायाहीत्यर्थः ॥ ८७॥

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ ८८॥

हे इन्द्र धिया स्वबुद्ध्या इषितः प्रेरितः सन्नायाहि अनन्यप्रेरित आगच्छेत्यर्थः । कीदृशस्त्वं विप्रजूतः जु गतौ विप्रैर्मेधाविभिरनुगतः सेवितः । किमित्यागन्तव्यमिति चेत् सुतावतः छान्दसो दीर्घः सुतवतः सोममभिषुतवतो यजमानस्य ब्रह्माणि हवींषि उप हविषां समीपे वाघतः ऋत्विजो वर्तन्तऽइति शेषः वाघत इति ऋत्विङ्नामसु [निघ° ३.१८.] पठितम् ऋत्विजो हविरादाय स्थिता वर्तन्तऽइत्यायाहीत्यर्थः ॥ ८८॥

इन्द्रायाहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ८९॥

हरी अश्वौ विद्येते यस्य स हरिवान् मतुवसो रुः सम्बुद्धौ छन्दसीति [पा° ८.३.१.] रुत्वम् हे हरिवः अश्ववन् हे इन्द्र तूतुजानः त्वरमाणः सन् त्वं ब्रह्माणि हवींषि उप हवींषि प्रति आयाहि तूतुजान इति [निघ° २.१५.] क्षिप्रना-

म । आगत्य सुते सोमेऽभिषुते सति नोऽस्माकं चनः अन्नं सोमरूपं हविः दधिघ उदरे धारय धि धारणे व्यत्ययेन शपो लुकि द्वित्वं जुहोत्यादित्वात् अभ्यासस्यात्वं छान्दसम् । चन इत्यन्ननाम [निघ० २.७.] ॥ ८१ ॥

अश्विना पिबतं मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ता सोम्यं मधु ॥ १० ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां विंशोऽध्यायः ॥ २० ॥ ॥

अश्विसरस्वतीन्द्रदेवत्यानुष्टुप् । अश्विना अश्विनौ मधु मधुरस्वादं सोमं पिबतां भक्षयताम् कीदृशौ अश्विनौ सरस्वत्या सजोषसा सजोषसौ जोषः प्रीतिः असुन् समानं जोषः प्रीतिर्ययोस्तौ सरस्वत्या सह प्रीतिमन्तावित्यर्थः । किं च सुष्ठु त्रायते रक्षति सुत्रामा वृत्रं हतवान्वृत्रहा ईदृश इन्द्रः अश्विनौ सरस्वती च मधु मधुरं सोम्यं सोममयं हविर्जुषन्ताम् सेवन्ताम् मये चेति [पा० ४.४.१३८.] सोमशब्दात् मयडर्थे यप्रत्ययः सोममयं सोम्यम् ॥ १० ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । सेकासन्ध्यादिकौत्रान्तो विंशो ध्यायो निद्रूपितः ॥ २० ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

१४ [देवहेलनं] - १६ ॥ १-३ ॥ १७. १८. १९ a ॥ ४ ॥ १९ d ॥ ५ ॥ २० ॥ ६ ॥ २१ ॥ ७ ॥ २२. २३ a. b ॥ ८ ॥ २३ c. d ॥ ९ ॥ २४-३८ [ईलितो] ॥ १०-२४ ॥ ३९-४२ [होताराऽइन्द्रं] ॥ २५-२८ ॥ ४३ [°स्वतीर्ला] ॥ २९ ॥ ४४-५१ [सुमृलीको] ॥ ३०-३७ ॥ ५२-६३ [भारतीर्ला] ॥ ३८-४९ ॥ ६४-६८ [नमुचाऽआसुरे] ॥ ५०-५४ ॥ ६९-७६ [नमुचाऽआसुरे] ॥ ५५-६२ ॥ ७७ [पितराऽअश्विनोर्भे°] - ८३ [वोल्हम°] ॥ ६३-६९ ॥ ८४-९० ॥ ७०-७६ ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां द्वाविंशोऽध्यायः ॥ २२ ॥

I. इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ १ ॥

ओम् श्रीगणेशाय नमः ॥ प्रणम्य (1.) शिरसा देवं लक्ष्मीकान्तमुमापतिम् । एकविंशेऽधुनाध्याये वेददीपो वितन्यते ॥ का° [११.७.१३.] इमं मे तत्रेत्येककपालस्य । अवभृथेष्टौ वारुणस्यैककपालस्य पुरोडाशस्य द्वे पुरोऽनुवाक्याया‌ज्ये इत्यर्थः ॥ वरुणदेवत्ये गायत्रीत्रिष्टुभौ शुनःशेपदृष्टे । हे वरुण त्वं मे मम इमं हवमाह्वानं श्रुधि शृणु श्रुशृण्विति [पा° ६.४.१०२.] हेर्धिः (2.) संहितायां दीर्घः । च पुनः अद्य दिने (3.) मृडयास्मान्सुखय यतोऽहं त्वामाचके कामये आचकऽइति [निघ° २.६.] कान्तिकर्मा । कीदृशोऽहम् अवस्युः अवनमवः पालनमवतेरसुन् तदिच्छति अवस्युः सुप आत्मनः क्यच् [पा° ३.१.८.] क्याच्छन्दसीति [पा° ३.२ १७०.] उप्रत्ययः आत्मनो रक्षणमिच्छन् त्वामिच्छामीत्यर्थः ॥ १ ॥

तत्त्वा यामि ब्रह्मणा व° ॥ २ ॥

व्याख्याता [१८.४१.] ॥ २ ॥

त्वं नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥

का° [११.७.१४.] अग्नीवरुणयोस्त्वं नः स त्वं न इति । अवभृथेष्टावेवाग्निवरुणयागे पुरोऽनुवाक्याया‌ज्ये ॥ अग्निवरुणदेवत्ये त्रिष्टुभौ वामदेवदृष्टे । हे अग्ने त्वं नोऽस्मान्प्रति वरुणस्य देवस्य हेडः क्रोधमवयासिसीष्ठाः निवर्तय यसु उपक्षये अवपूर्वस्य णिजन्तस्यास्याशीर्लिङि रूपम् । किं च विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि अस्मत् अस्मत्तः सकाशात्प्रमुमुग्धि प्रमुञ्च दूरीकुरु मुचेर्व्यत्ययेन शपः श्लुः । कीदृशस्त्वम् विद्वान् स्वाधिकारं जानन् यजिष्ठः अतिशयेन यष्टा यजिष्ठः तुरिष्ठेमेयःस्विति [पा° ६.४.१५४.] तृचो लोपः । वह्नितमः वहतीति वह्निः अत्यन्तं वह्निर्वह्नितमः हविषां वोढा । शोशुचानः अत्यन्तं शोचते दीप्यते शोशुचानः शोचतेर्यङ्लुगन्ताच्छानच्प्रत्ययः ॥ ३ ॥

स त्वं नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्या उषसो व्युष्टौ ।

अवयद्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥४॥

हे अग्ने स त्वमस्या उषसो व्युष्टौ व्युष्टिकालेऽस्मिन्नह्नि (4.) ऊती ऊत्या अवनेन नोऽस्माकमवमः रक्षकः नेदिष्ठोऽन्तिकतमः समीपतमश्च भव । अवतीत्यवमः अवतेरमप्रत्ययः यद्वा अवतीत्यवः पचाद्यच् अत्यन्तमवोऽवतमः तलोपश्छान्दसः । अत्यन्तमन्तिको नेदिष्ठः अन्तिकवाढयोर्नेदसाधाविति [पा° ५.३.६३.] इष्ठ परे नेदादेशः । किं च रराणो हविर्ददत् सन् नोऽस्माकं वरूणमवयद्व अवयज अवपूर्वाद्यजतेर्लोटि शपो लुक् ततो मृडीकं सुखकरं हविः वीहि भक्षय वी कान्तिव्याप्तिक्षेपप्रजननखादनेषु । किं च नोऽस्माकं सुहवः स्वाह्वान एधि भव घ्वसोरेद्धावभ्यासलोपश्चेति [पा° ६.४.११९.] एकारः ॥४॥

महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥५॥

का° [११.७.१५.] आदित्यस्य सुत्रामाणम् महीमूषु मातरमिति । आदित्यं चरुं यक्ष्यमाणो निर्वपत्यादित्यमीक्षान इत्यादावक्ते चादित्यश्चरुरुक्तस्तस्य सुत्रामाणमिति [६.] पुरोऽनुवाक्या महीमू षिति याज्या ॥ अदितिर्देवत्या त्रिष्टुप् । ऊ सु निपातौ पादपूरणौ संहितायामाद्यस्य दीर्घोऽन्त्यस्य षत्वम् । वयमवसे अवितुं रक्षितुमदितिं हुवेम आह्वयामः तुमर्थे असेप्रत्ययः । कीदृशीमदितिं महीं महतीम् । सुव्रतानां शोभनकर्मणां मातरं निर्मात्रीम् व्रतमिति [निघ° २.१.] कर्मनाम । ऋतस्य यज्ञस्य पत्नीं पालयित्रीम् । तुविक्षत्रां तुवीति [निघ° ३.१.] बहुनाम बहुक्षतात्राणशीलाम् । अजरन्तीं न जीर्यति अजरन्ती तां जरारहिताम् । उरू अञ्चतीति उरूची बहुगमनशीलाम् । सुशर्माणं शोभनं शर्माश्रयः सुखं वा यस्यास्ताम् । सुप्रणीतिं शोभना प्रणीतिः प्रणयनं भजनं यस्यास्ताम् । अदितिरदीना देवमाता [निरु° ४.२२.] ॥५॥

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥६॥

अदितिर्देवत्या त्रिष्टुप् गयप्रातदृष्टा (5.) । दैवीं देवसम्बन्धिनीं नावं यज्ञरूपां स्वस्तये कल्याणायाविनाशाय वयमारुहेम यज्ञं कृत्वा स्वर्गं गच्छेमित्यर्थः । कीदृशीं नावं सुत्रामाणं सुष्ठु त्रायते रक्षति सुत्रामा ताम् । पृथिवीं विशालाम् । द्यां स्वर्गरूपां स्वर्गहेतुभूतामित्यर्थः । अनेहसमेह इति [निघ॰ २.१३.] क्रोधनाम नास्ति एहो यत्र क्रोधरहिताम् । यद्वा लुप्तोपमानम् पृथिवीमिव सुत्रामाणं पालयित्रीं द्यामिवानेहसमक्रोधाम् । सुशर्माणं साधुशरणभूताम् । अदितिमखण्डितामदीनां वा । सुप्रणीतिं सुष्ठु प्रणयतीति सुप्रणीतिः साधुप्रणेत्री । स्वरित्रां साधुकेन्दुवालाम् अरित्रशब्दः केन्दुवालवाचकः अरित्रं केनिपातक इत्यभिधानात् [अमर॰ १.२.२७.] प्रयाजानुयाजादयोऽरित्रस्थानीयाः । अनागसमनपराधाम् । अस्रवन्तीमछिद्रां निर्दोषामित्यर्थः । ईदृशीं नावमारुहेम संहितायां दीर्घः ॥ ६ ॥

सुनावमारुहेयमस्रवन्तीमनागसम् । शतारित्राꣳ स्वस्तये ॥ ७ ॥

स्वर्गसम्बन्धिनौदेवत्या गायत्री । तद्वै सर्व एव यज्ञो नौः स्वर्ग्येति श्रुतेः स्वर्ग्या नौर्यज्ञ एव । सुनावं शोभनां नावं यज्ञरूपां स्वस्तयेऽविनाशाय संसारसागरोत्तरणायारुहेयमारोहेयं यज्ञं कुर्यामित्यर्थः । कीदृशीमस्रवन्तीमछिद्राम् । अनागसं निरपराधां सर्वेष्टदामित्यर्थः । शतारित्रां बहुकेन्दुवालाम् ऋग्यजुःसामभिरित्यर्थः । स्मार्ते नावारोहणे विनियोगोऽस्या ऋचः ॥ ७ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मधा रजाꣳसि सुक्रतू ॥ ८ ॥

का॰ [११.७-१६.] आ नः प्र बाहवेति पयस्यायाः । अवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतीति या पयस्या तस्या आ नो मित्रावरुणेति पुरोऽनुवाक्या प्र बाहवेति याज्या । मित्रावरुणदेवत्या गायत्री विश्वामित्रदृष्टा । हे मित्रावरुणा मित्रावरुणौ देवौ नोऽस्माकं गव्यूतिं यज्ञमार्गं घृतैर्युवामा उक्षतम् सर्वतः सिञ्चतम् यद्वा गवि पृथिव्यामूतिमवनहेतुभूतं क्षेत्रं घृतैः शुद्धोदकैः सिञ्चतम् । किं च हे सुक्रतू शोभनः क्रतुः कर्म ययोस्तौ हे सुकर्माणौ मधा मधुना रजाꣳसि लोकाना उक्षतम् अनित्यमागमशासनमिति नुमभावः ॥ ८ ॥

प्र बाहवा सिसृतं जीवसे नु आ नो गव्यूतिमुक्षतं घृतेन ।

आ मा॒ ज्ञने॑ श्रवयतं युवाना श्रु॒तं मे॑ मित्रावरुणा हवे॒मा ॥ १ ॥

मित्रावरुणदेवत्या त्रिष्टुप् वसिष्ठदृष्टा । हे मित्रावरुणौ हे युवाना युवानौ तरुणौ छिन्नजरसौ नोऽस्माकं जीवसे चिरं जीवनाय बाहवा बाहू प्रसिसृतमन्तर्भूतण्यर्थः प्रसारयतं जीवनविघ्ननिवारणाय बाहुप्रसारणं कुरुतमित्यर्थः । किं च नोऽस्माकं गव्यूतिं क्षेत्रं घृतेन जलेन आ उक्षतं सिञ्चतम् । भवत्सिक्तक्षेत्रनिष्पन्नधान्यैः यज्ञिनं मा मां ज्ञने जनपदे युवामाश्रवयतम् आश्रावयतम् इत्यमदात् इत्यमयाक्षीदिति लोके मां कथयतमित्यर्थः वृद्ध्यभाव आर्षः किं च युवां मे मम इमा इमानि हवा हवानि आह्वानानि श्रुतं शृणुतम् श्रुत्वा पूर्वोक्तं कुरुतमित्यर्थः शृणोतेः शपो लुक् ॥ १ ॥

शं नो॑ भवन्तु॰ ॥ १० ॥ वाजे॑-वाजि॰ ॥ ११ ॥

का॰ [११.७.१७.] वाजिनस्य शं नो वाजे-वाजऽइति । पयस्यायां वाजिनयागोऽस्ति तत्र शं न इति पुरोऽनुवाक्या वाजे-वाजऽइति याज्या—॥ व्याख्याते [१,१६.१८.] ॥ १० ॥ ११ ॥

II. समि॑द्धोऽअ॒ग्निः स॒मिधा॑ सु॒समि॑द्धो वरे॒ण्यः ।

गाय॒त्री छन्द॑ इन्द्रि॒यं त्र्यवि॒र्गौर्वयो॑ दधुः ॥ १२ ॥

का॰ [११.७.११.] वायोधसऽआप्रियः समिद्धोऽअग्निः समिधेति । वायोधसे पशौ समिद्धोऽअग्निरित्याद्या एकादश ऋच आप्रियः प्रयाजानां याज्या इति सूत्रार्थ ॥ एकादश आप्रीदेवत्या अनुष्टुभः स्वस्त्यात्रेयदृष्टाः । अग्निः गायत्री छन्दो गौश्च एते त्रय इन्द्रे इन्द्रियं वीर्यं वयः सत्त्वमन्नमायुर्वा दधुः दधतु प्रयच्छतु । कीदृशोऽग्निः समिधा प्रयाजदेवतया समिद्धः दीप्तः सुसमिद्धश्च अतिदीप्तः प्रयाजघृतेनेति शेषः वरेण्यः वरणीयः सम्भजनीयः । कीदृशो गौः त्र्यविः त्रयोऽवयोऽनुचरत्वेन यस्य स त्र्यविः यद्वा षण्मासावधिः कालोऽविः त्रयोऽवयो यस्य सार्धवत्सरो गौरित्यर्थः ॥ १२ ॥

तनू॒नपा॑दुचि॒व्रतस्तनू॒पाश्च॑ सर॒स्वती ।

उष्णिहा छन्द इन्द्रियं दित्यवाड्गौर्वयो दधुः ॥ १३ ॥

तनूनामपां नपात् पौत्रोऽग्निः तनूनां गवां नपात् घृतं वा प्रयाजदेवता सरस्वती उष्णिहा छन्दः रुलत्वादाप् उष्णिक्छन्दः गौश्च एते चत्वार इन्द्रे इन्द्रियं वयश्च दधुः दधतु । कीदृशस्तानूनपात् शुचिव्रतः शुचि शुद्धं व्रतं कर्म यस्य सः । कीदृशी सरस्वती तनूपाः तनूं शरीरं पाति रक्षतीति । कीदृशो गौः दित्यवाट् दित्यं रूविर्वक्तीति ॥ १३ ॥

इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्यः ।

अनुष्टुप्छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥ १४ ॥

इडाभिः प्रयाजदेवताभिः सहाग्निः सोमो देवः अनुष्टुप्छन्दः गौः एते पञ्च इन्द्रियं वयश्चेन्द्रे दधुः कीदृशोऽग्निः ईड्यः स्तुत्यः कीदृशः सोमः अमर्त्यः अमरणधर्मा कीदृशो गौः पञ्चाविः पञ्चावयोऽनुचराः कालविशेषा वा यस्य सार्धद्विवर्षः ॥ १४ ॥

सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः ।

बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥ १५ ॥

शोभनं बर्हिः प्रयाजदेवता अग्निः बृहती छन्दः गौः एते चत्वार इन्द्रियं वयश्चेन्द्रे दधुः । कीदृशोऽग्निः पूषण्वान् पूषास्यास्तीति पूष्णा युक्तः स्तीर्णबर्हिः स्तीर्णं बर्हिर्यस्य सः अमर्त्यः अनश्वरः । कीदृशो गौः त्रिवत्सः त्रयो वत्सा अनुचरा वत्सरा वा यस्य स त्रिवत्सः ॥ १५ ॥

उरो देवीर्दिशो मह्रीर्ब्रह्मा देवो बृहस्पतिः ।

पङ्क्तिश्छन्द इन्द्रेन्द्रियं तुर्यवाड्गौर्वयो दधुः ॥ १६ ॥

उरो द्वारो देव्यः प्रयाजदेवताः छान्दसं सम्प्रसारणम् मह्रीर्महत्यो दिशः ब्रह्मा देवो बृहस्पतिः पङ्क्तिश्छन्दः तुर्यं चतुर्थं वर्षं वक्तीति तुर्यवाट् गौः एते षट् देवा इन्द्र इन्द्रे इन्द्रियं वयश्च दधुः ॥ १६ ॥

उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः ।

त्रिष्टुप्छन्द इन्द्रेन्द्रियं पष्ठवाड्वीर्यं दधुः ॥ १७ ॥

उषे द्विवचनाद्दिनं रात्रिश्च अमर्त्याः विश्वे देवाः त्रिष्टुप्छन्दः षष्ठं भारं वहतीति षष्ठवाड्गौः एते पञ्चेन्द्रियं वयश्च दधुः । कीदृश्यौ उषे यह्वी यह्व्यौ महत्यौ यह्व इति [निघ० ३.३.] महन्नाम । सुपेशसा शोभनं पेशो रूपं ययोस्ते सुपेशसौ सुरूपे विभक्तिराकारः ॥ १७ ॥

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।

जगती छन्द इन्द्रियमनड्वान्गौर्वयो दधुः ॥ १८ ॥

दैव्यौ होतारौ प्रयाजदेवौ अयं चाग्निरसौ च मध्यमो वायुः । जगती छन्दः अनः शकटं वहतीत्यनड्वान्गौः एते चत्वार इन्द्रे इन्द्रियं वयश्च दधुः । कीदृशौ होतारौ भिषजा भिषजौ वैद्यौ इन्द्रेण सयुजौ सह युज्येते सयुजौ संयुक्तौ युजौ (6.) परस्परं संयुक्तौ ॥ १८ ॥

तिस्र इडा सरस्वती भारती मरुतो विशः ।

विराट् छन्द इन्द्रेन्द्रियं धेनुर्गौर्न वयो दधुः ॥ १९ ॥

इडा सरस्वती भारतीति तिस्रः प्रयाजदेव्यः मरुतो विशः इन्द्रप्रजाः विराट् छन्दः धेनुः दोग्ध्री गौश्च नकारश्चार्थे एते षट् इन्द्रेन्द्रे इन्द्रियं वयश्च दधुः ॥ १९ ॥

त्वष्टा तुरीपोऽद्भुत इन्द्राग्नी पुष्टिवर्धना ।

द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥ २० ॥

त्वष्टा प्रयाजदेवः इन्द्राग्नी द्विपदा छन्दः उक्षा सेक्ता गौश्च एते पञ्चेन्द्रे इन्द्रियं वयश्च दधुः । कीदृशः त्वष्टा तुरीपः तूर्णमाप्नोति व्याप्नोति तुरीपः अद्भुतो महान् कीदृशाविन्द्राग्नी पुष्टिवर्धना पुष्टिं धनादिपोषं वर्धयतस्तौ पुष्टिवर्धनौ । नश्चार्थः ॥ २० ॥

शमिता नो वनस्पतिः सविता प्रसुवन्भगम् ।

ककुप्छन्द इन्द्रेन्द्रियं वशा वेहद्वयो दधुः ॥ २१ ॥

वनस्पतिः प्रयाजदेवः सविता सूर्यः ककुप्छन्दः वशा वन्ध्या गौः वेहत् गर्भ-

घ्नी गौः एते पञ्च इन्द्रेन्द्रे इन्द्रियं वयश्च दधुः । कीदृशो वनस्पतिः नोऽस्माकं शमिता शमयति सुखयति शमिता शमिता मल्ल॰इति [(7.) पा॰ ६.४.५४.] छान्दसो णिचो लोपः । कीदृशः सविता भगं प्रसुवन् धनं प्रेरयन् ददत् ॥२१॥

स्वाहा॑ यज्ञं वरु॑णः सुक्षत्रो भेषजं॑ करत् ।
अति॑च्छन्दा इन्द्रि॒यं बृ॒हदृ॑षभो गौर्वयो॑ दधुः ॥२२॥

शोभनं क्षत्रं क्षतत्राणं यस्य स सुक्षत्रः शोभनक्षतत्राता वरुणः स्वाहा नामिकदेशे नामग्रहणम् स्वाहाकृतिभिः प्रयाजदेवैः सह यज्ञं भेषजं यज्ञलक्षणमौषधमिन्द्राय करत्करोतु । किं च अतिछन्दाः छन्दः बृहत् महान् ऋषभः समर्थो गौः वरुणश्च स्वाहाकृतयोऽपि एते चत्वार इन्द्रियं वयश्च इन्द्रे दधुः दधतु ददतु ॥२२॥

III. व॒सन्ते॑नऽऋ॒तुना॑ दे॒वा व॑सव॒स्त्रिवृ॑ता स्तु॒ताः ।
र॒थन्त॑रेण॒ तेज॑सा ह॒विरि॑न्द्रे॒ वयो॑ दधुः ॥२३॥

का॰ [११.७.२०.] याज्यापुरोऽनुवाक्याश्च वपापुरोडाशपशूनां वसन्तेनऽऋतुनेति । चकाराद्वायोधसे पशावेव षड्चो यथाक्रमं वपादीनां याज्यानुवाक्याः वपायागे वसन्तेनेति [२३.] पुरोऽनुवाक्या ग्रीष्मेणेति [२४.] याज्या पशुपुरोडाशयागे वर्षाभिरिति [२५.] पुरोऽनुवाक्या शारदेनेति [२६.] याज्या हृदयादियागे हेमन्तेनेति [२७.] पुरोऽनुवाक्या शैशिरेणेति [२८.] याज्येति सूत्रार्थः ॥ अनुष्टुभः षट् लिङ्गोक्तदेवताः वयोधा इन्द्रो देवतेत्यर्थः । वसवो देवा इन्द्रे तेजसा सह हविर्वपाख्यं वयः शक्तिं च दधुः दधतु स्थापयन्तु कीदृशा वसवः वसन्तेन ऋतुना त्रिवृता स्तोमेन रथन्तरेण पृष्ठेन च स्तुताः ॥२३॥

ग्री॒ष्मेणऽऋ॒तुना॑ दे॒वा रु॒द्राः प॑ञ्चद॒शे स्तु॒ताः ।
बृ॒हता यश॑सा॒ बल॑ꣳ ह॒विरि॑॰ ॥२४॥

रुद्रा देवा इन्द्रे यशसा सह बलं हविर्वयश्च दधुः । कीदृशाः रुद्राः ग्रीष्मेण ऋतुना पञ्चदशः पञ्चदशेन स्तोमेन विभक्तिव्यत्ययः बृहता पृष्ठेन च स्तुताः ॥२४॥

वर्षाभिर्ऋतुनादित्या स्तोमेन सप्तदशेन स्तुताः ।
वैरूपेण विशौजसा कविर्न ॥ २५ ॥

आदित्या देवाः इन्द्रे विशा प्रजया ओजसा च सह कविर्वयश्चदधुः । कीदृशाः वर्षाभिर्ऋतुना सप्तदशेन स्तोमेन तृतीयार्थे सप्तम्यौ वैरूपेण पृष्ठेन च स्तुताः ॥ २५ ॥

शारदेनऽऋतुना देवा एकविꣳशऽऋभव स्तुताः ।
वैराजेन श्रिया श्रियꣳ कविर्न ॥ २६ ॥

ऋभवः ऋभुसंज्ञा देवाः इन्द्रे श्रियं कविर्वयश्च दधुः कीदृशाः शारदेन ऋतुना एकविंशेन स्तोमेन वैराजेन पृष्ठेन श्रिया लक्ष्म्या च स्तुताः । सप्तमी तृतीयार्थे ॥ २६ ॥

हेमन्तेनऽऋतुना देवास्त्रिणवे मरुत स्तुताः ।
बलेन शाक्वरीः सहो कविर्न ॥ २७ ॥

मरुतो देवाः इन्द्रे बलेन सह सहः इन्द्रियसामर्थ्यं कविर्वयश्च दधुः । कीदृशा मरुतः हेमन्तेन ऋतुना त्रिणविन स्तोमेन स्तुताः शाक्वरीरिति शाक्वरस्य योनिर्निर्देशः शाक्वरेण पृष्ठेन स्तुता इत्यर्थः ॥ २७ ॥

शैशिरेणऽऋतुना देवास्त्रयस्त्रिꣳशऽमृता स्तुताः ।
सत्येन रेवतीः क्षत्रꣳ कविर्न ॥ २८ ॥

अमृता देवाः सत्येन सह क्षत्रं क्षतत्राणं कविर्वयः शक्तिं च इन्द्रे दधुः दधतु कीदृशा अमृताः शारदेन ऋतुना त्रयस्त्रिंशेन स्तोमेन स्तुताः रेवतीरिति रैवतस्य योनिः रैवतेन पृष्ठेन स्तुता इत्यर्थः ॥ २८ ॥

IV. होता यक्षत्समिधाग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः
कुवलैर्भेषजं मधु शष्पैर्न तेज इन्द्रिय पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यजं ॥ २९ ॥

का॰ [११.६.१४.] होता यक्षत्समिधाग्निमिति प्रयाजप्रैषास्त्रिपशोः । होता यक्षत्समिधाग्निमिडस्पदꣳइत्यादयो द्वादश कण्डिकास्त्रिपशोः प्रयाजप्रैषाः स्युः ॥ द्वादशाप्रीणां प्रयाजयाज्यानां प्रैषा अश्विसरस्वतीन्द्रदेवत्याः आद्या अष्टिः । दैव्यो होता समिधा प्रयाजदेवतया सह अग्निमश्विना अश्विनौ इन्द्रं सरस्वतीं च इडः पदे गोपदे आहवनीये यक्षत् यजतु (8.) गोपदे स्थाप्यतꣳइत्यभिप्रायेणेदं वचनम् । तत्र यागे अजो धूम्रो मेषश्च गोधूमैः कुवलैः बदरैः शष्पैः अङ्कुरितव्रीहिभिश्च सहितो भेषजमौषधं भवति नकारौ चार्थौ इन्द्रायेति शेषः कीदृशं भेषजम् मधु मधुरं तेजः तेजःप्रदमिन्द्रियमिन्द्रियसामर्थ्यप्रदम् । किं च ते अश्विसरस्वतीन्द्रा दैव्येन होत्रेज्यमानाः सन्तः पयः परिस्रुता मदिरया सह सोमः सोमं घृतं मधु च व्यन्तु पिबन्तु सोम इति विभक्तिव्यत्ययः सर्वत्र हे होतर्मनुष्यहोतः त्वमपि आज्यस्य यज्ञ कर्मणि षष्ठी यजतिर्दानार्थः अश्व्यादिभ्य आज्यं देहीत्यर्थः ॥ २१ ॥

होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजं पथा मधुमता
भरन्नश्विनिन्द्राय वीर्यं बदरैरुपवाकाभिर्भेषजं तोकमिः पयः सो॰ ॥ ३० ॥

एकाधिका अत्यष्टिः । तनूनपादिति प्रथमा द्वितीयार्थे इन्द्रायेति चतुर्थी द्वितीयार्थे नकारश्चार्थः । दैव्यो होता तनूनपातं प्रयाजदेवं सरस्वतीमश्विनौ इन्द्रं च यजतु । तत्र यागे अविः अजः मेषश्च नश्चार्थे मधुमता रसवता पथा यज्ञमार्गेण भरन् आत्मानं हरन् सन् बदरैर्बदरीफलैः उपवाकाभिरिन्द्रयवैः तोकमिरङ्कुरितव्रीहिभिर्यवैर्वा सहितो वीर्यं वीर्यकरं भेषजं भवति । अश्विसरस्वतीन्द्रा दैव्येन होत्रेज्यमानाः पयआदीनि व्यन्तु हे होतस्त्वमपि आज्यस्य यज्ञ आज्यं देहि ॥ ३० ॥

होता यक्षन्नराशꣳसं न नग्नꣳ सुधिं सुरया भेषजं मेषः सरस्वती भिषग्यथो न चन्द्रश्विनोर्वपा इन्द्रस्य वीर्यं बदरैरुपवाकाभिर्भेषजं तोकमिः पयः सोमः परि॰ ॥ ३१ ॥

दैव्यो होता नराशंसं प्रयाजदेवं सरस्वती सरस्वतीं भिषक् भिषजोः अश्विनीः रथः रथं च यक्षत् यजतु कीदृशो रथः चन्द्री चन्द्रं सुवर्णमस्मिन्नस्तीति च-

न्द्री सुवर्णमयः । रथस्य यागोऽश्विनोरिव तदुक्तम् आयुधं वाहनं वापि स्तुतौ यस्येह दृश्यते तमेव तत्स्तुतं विन्द्यात्तस्यात्मा बहुधा हि स इति । सरस्वतीरथयोः प्रथमा द्वितीयार्थे भिषजि प्रथमा षष्ठ्यर्थे ॥ तत्र सुरया सह नग्नहुं नग्नहुः किणवः मेषः वपाः बहुत्वात्पिपशुसम्बन्धिन्यो वपा बदरैः उपवाकाभिर्यवैः तोकमिश्र व्रीहिभिः सहिता इन्द्रस्य वीर्यकरं भेषजं भवतु । अश्व्यादयः पयआदीनि पिबन्तु हे होतराज्यस्य यज्ञ देहि । कीदृशं नराशंसं पतिं पालकम् । नग्नहुः सुराकन्दः । नकारौ चार्थौ । द्वितीयो भेषजशब्द आर्षः ॥३१॥

होता यक्षद्दिडेडित आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजं यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिः ॥३२॥

दैव्यो होता इडा इडां प्रयाजदेवतां सरस्वतीमिन्द्रमश्विना अश्विनौ च यक्षत् यजतु किं कुर्वन् ऋषभेण गवा च धेन्वा च बलेन वर्धयन् इडादीन्समर्धयन्यजतु कीदृशो होता ईडितः ऋत्विग्भिः स्तुतः आजुह्वानः इडादीनाह्वयन् । तत्र यवैः लाजैश्च सहितं मधु मासरमोदनं निःस्रावं (9.) च इन्द्राय इन्द्रियं वीर्यकरं भेषजं भवति । अश्विसरस्वतीन्द्रा होत्रेज्यमानाः पयआदीनि पिबन्तु हे होतः त्वं च यज्ञ ॥३२॥

होता यक्षद्बर्हिरूर्णम्रदा भिषङ्नासत्या भिषजाश्विनाश्वा शिश्रुमती भिषग्धेनुः सरस्वती भिषग्दुरुष्इन्द्राय भेषजं पयः सोमः परिः ॥३३॥

दैव्यो होता ऊर्णम्रदाः ऊर्णामिव म्रदीयः बर्हिः प्रयाजदेवं भिषजा भिषजौ वैद्यौ नासत्या न असत्यौ सत्यरूपौ अश्विना अश्विनौ सरस्वती सरस्वतीं च यक्षत् यजतु । तत्र शिश्रुमती बालकोपेता अश्वा वडवा भिषक् धेनुः भिषक्च इन्द्राय भेषजमौषधं दुरुह दुग्धे पूरयति । अश्वादयो दक्षिणा दीयन्ते । लोपस्त आत्मनेपदेष्विति [पा० ७.१.४१.] तलोपः । ते पयआदीनि व्यन्तु होतर्यज्ञ (10.) ॥३३॥

होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिश इन्द्रो

न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजꣳ शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परि॰ ॥३४॥

दैव्यो होता दुरो द्वारः प्रयाजदेवीः इन्द्रः इन्द्रं सरस्वती सरस्वतीमश्विना अश्विनौ च यक्षत् यजतु नकाराश्चार्थाः द्वारशब्दस्य सम्प्रसारणम् कीदृशीः द्वारः दिशः दिश-इव सावकाशाः कवष्यः ससुषिराः अत एव व्यचस्वतीः व्यचो व्यचनं गमनं विद्यते यासु ताः गमनवत्यः । दिशो दित्तुल्या दुरो द्वार अश्विभ्यां सहिताः सत्यो रोदसी द्यावापृथिव्यौ इन्द्राय भेषजमौषधं दुहे दुग्धे कीदृश्यौ रोदसी दुघे दुहः कब्धश्चेति [पा॰ ३. २. ७०.] हकारस्य घकारः । दुहे इत्यत्र तलोपश्च वचनव्यत्ययः दुहते रोदसीभ्यां सकाशादिन्द्रायौषधं दुहते इत्यर्थः । अकथितं चेति [पा॰ १. ४. ५१.] द्विकर्मकत्वम् । सरस्वती च धेनुर्भूत्वा इन्द्राय शुक्रं शुक्लं शुद्धं ज्योतिरिन्द्रियं वीर्यं च दुहे दुग्धे । अन्यद्व्याख्यातम् ॥३४॥

होता यक्षत्सुपेशसोषे नक्तं दिवाश्विना समञ्जाते सरस्वत्या विषिमिन्द्रे न भेषजꣳ श्येनो न रजसा कृदा श्रिया न मासरं पयः सोमः परि॰ ॥३५॥

होता सुपेशसा सुरूपे उषे द्विवचनाद्रात्रिश्च नक्तोषे प्रयाजदेवौ सरस्वत्या सहितौ अश्विनौ च यक्षत् । तौ चाश्विनौ नक्तं दिवा दिने च रजसा ज्योतिषा रजःशब्दो ज्योतिर्वचनः कृदा चित्तेन श्रिया च सह मासरं भेषजं मासरूपमौषधं श्येनः श्येनपत्रं विषिं कान्तिं च इन्द्रे समञ्जाते संश्लेषयतः नकाराश्चार्थाः । ते पयआदीनि व्यन्तु हे होतः त्वं यज ॥३५॥

होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः भूषꣳ सरस्वती भिषक् सीसेन दुहऽइन्द्रियं पयः सोमः परि॰ ॥३६॥

दैव्यो होता दैव्या होतारा दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमः एतौ प्रयाजदेवौ भिषजौ वैद्यौ अश्विनौ इन्द्रं च यक्षत् यजतु नौ चार्थौ । भिषग्भूता सरस्वती भेषजैः सह भूषं बलमिन्द्रियं वीर्यं च सीसेन कृत्वा दुहे दुग्धे दुहेर्लट् लोपस्त आत्मनेपदेघिति [पा॰ ७. १. ४१.] तलोपः इन्द्रियार्थम् कीदृशी सरस्वती

दिवा नक्तमहोरात्रं जागृवि जागरणशीला स्वकार्यसिद्धावप्रमत्ता सुपां सुलुगिति [पा० ७.१.३९.] सोर्लुक् तां च दैव्यो होता यजतु । अश्व्यादयः पयआदीनि व्यन्तु हे होतः त्वमपि यज ॥३६॥

होता॑ यक्षत्ति॒स्रो दे॒वीर्न भे॑ष॒जं त्र॑यस्वि॒धात॑वोऽपसो॒ रूप॒मिन्द्रं॑ हिर॒ण्यय॑-
म॒श्विनेडा॒ न भार॑ती वा॒चा सर॑स्वती म॒ह इन्द्रा॑य दुहऽइन्द्रि॒यं पय॒ः सो-
म॑ः परि॑° ॥३७॥

नौ चार्थौ दैव्यो होता इडा भारती सरस्वती चेति तिस्रो देवीः प्रयाजदेवीः इन्द्रं इन्द्रमश्विना अश्विनौ च यक्षत् यजतु । या सरस्वती वाचा त्रयीलक्षणया भेषजमौषधं हिरण्ययं द्योतमानं रूपं च महस्तेजश्च इन्द्रियं चेन्द्राय इन्द्रार्थं दुहे दुग्धे । कैः कृत्वा त्रयस्त्रिधातवः त्रिभिः पशुभिः तृतीयार्थे प्रथमा त्रयो धातवः प्रधानाङ्गोपयङ्लक्षणाः प्रकारा येषां ते त्रिधातवः पशवः ते च त्रयः आश्विनो धूम्रः सारस्वतो मेषः ऐन्द्र ऋषभः । कीदृशाः पशवः अपसः अप इति कर्मनाम [निघ० २.१.] विनो लोपः अपस्विनः कर्मवन्तः । त्रिभिः पशुभिर्भेषजरूपेन्द्रियमहांसि इन्द्राय दुग्धे । तेऽश्व्यादयः पयआदीनि पिबन्तु हे होतः त्वमप्याज्यस्य यज घृतं देहि ॥३७॥

होता॑ यक्षत्सु॒रेत॑समृष॒भं नर्या॑पस॒ त्वष्टा॑र॒मिन्द्र॑मश्वि॒ना भि॑षज॒ं न सर॑स्व-
तीमो॒जो न जू॒तिरि॑न्द्रि॒यं वृको॒ न रे॑भ॒सो भि॑षग्यश॒ः सुर॑या भेषज॑ꣳ श्रि-
या॒ न मास॑र॒ं पय॒ः सोम॑ः परि॑° ॥३८॥

नकाराश्चार्थाः होता त्वष्टारं प्रयाजदेवमिन्द्रमश्विना अश्विनौ सरस्वतीं भिषजं च यक्षत् यजतु (8.) कीदृशं त्वष्टारं सुरेतसं शोभनं रेतो वीर्यं वृष्टिलक्षणं यस्य स सुरेताः तम् यद्वा सुष्ठु रेतो यस्मात्तम् पुंसो रेतःकारणभूतम् ऋषभं वर्षितारम् नर्यापसं नरेभ्यो हितं नर्यमपः कर्म यस्य स नर्यापाः तम् । केन यजतु तदाह रेभसः स्तोत्रमयो भिषग्वैद्यभूतो यो वृकः तेन प्रथमा तृतीयार्थे सुरायां वृकलोमानि क्षिप्यन्तेऽतो वृकेण यजतु सुरया च यजतु भेषजं यन्मासरं तेन च

यजतु । एवं च यागे ओजस्तेजः इन्द्रियं वीर्यं श्रिया सह यशश्चेन्द्रे भवत्विति शेषः अश्व्यादयः पयआदीनि व्यन्तु हे होतः त्वमप्याज्यस्य यज ॥३८॥

होता॑ यक्षद्वन॒स्पति॑ꣳ शमि॒तार॑ꣳ शतक्र॒तुं भी॒मं न म॒न्युꣳ रा॑जा॒नं व्या॒घ्रं नम॑सा॒श्विना॒ भाम॑ꣳ सर॑स्वती भि॒षगिन्द्रा॑य दुह्र॒ऽइन्द्रि॒यं पयः॑ सो॒मः परि॑ ॥३९॥

दैव्यो होता वनस्पतिं प्रयाजदेवं व्याघ्रं विशेषेणाजिघ्रतीति व्याघ्रः व्याघ्रमिव राजानं शतक्रतुमिन्द्रमश्विना अश्विनौ सरस्वती सरस्वतीं च नमसा अन्नेन यक्षत् यजतु कीदृशं वनस्पतिं शमितारं पशूनां संस्कर्तारं यूपरूपेण भीमं भयंकरं मन्युं क्रोधात्मानं । भिषक् वैद्यरूपा या सरस्वती इन्द्राय भामं क्रोधमिन्द्रियं वीर्यं च दुहे दोग्धि । ते वनस्पत्यादयः इज्यमानाः पयआदीनि पिबतु हे होतर्यज्ञ ॥३९॥

होता॑ यक्षद॒ग्निꣳ स्वाहा॑ज्य॒स्य स्तो॒काना॑ꣳ स्वाहा॒ मेद॑सां पृथ॒क् स्वाहा॑ ह्राग॑मश्वि॒भ्या॑ꣳ स्वाहा॑ मे॒षꣳ सर॑स्वत्यै॒ स्वाहा॑ऽऋष॒भमिन्द्रा॑य सि॒ꣳहाय॑ स॒क्ष॑स॒ऽइन्द्रि॑यꣳ स्वाहा॒ग्निं न भे॑ष॒जꣳ स्वाहा॑ सो॒ममिन्द्रि॑यꣳ स्वाहेन्द्र॑ꣳ सु॒त्रामा॑णꣳ सवि॒तार॑ं वरु॒णं भि॑षजां॒ पति॑ꣳ स्वाहा॒ वन॒स्पतिं॒ प्रिय॑ं पाथो॒ न भे॑ष॒जꣳ स्वाहा॑ दे॒वा आ॑ज्यपा जु॒षाणो॑ऽअ॒ग्निर्भे॑ष॒जं पयः॑ सो॒मः परि॑ ॥४०॥

होता अग्निं प्रयाजदेवमाहवनीयं वा यक्षत् यजतु । किं च आज्यस्य घृतस्य स्तोकानां विप्रुषां स्वाहा सुष्ठु आह शोभनं वदति ब्रूचोऽतस्तिङ इति [पा० ६.३.१३५.] दीर्घः ब्रुवो वचिरूपम् यजमान इति शेषः यजमानो घृतबिन्दून् शोभनान्वदतीत्यर्थः कर्मणि षष्ठी । मेदसां वपासम्बन्धिनां पृथक् स्वाहा वपासम्बन्धिमेदांसि समीचीनानीति पृथग्वदति । अश्विभ्यामश्विनोरर्थे ह्राग शोभनमाह । सरस्वत्यै मेषं शोभनमाह । इन्द्राय इन्द्रियं वीर्यप्रदमृषभं सु आह कीदृशायेन्द्राय सिंहाय सिंहतुल्याय हिनस्तीति सिंहस्तस्मै शत्रूणामभिभवित्रे तथा सक्षते ब-

लात्मकाय । भेषजं हितकारिणमग्निं च सु आह नश्चार्थः इन्द्रियं वीर्यप्रदं च सोमं सु आह एतावग्नीषोमावाज्यभागौ सु आहेत्यर्थः । सुष्ठु त्रायते सुत्रामा तं सुत्रामाणमिन्द्रं सवितारं भिषजां वैद्यानां पतिं वरुणं च सु आह पशुपुरोडाशदेवताः सु आहेत्यर्थः । प्रियमिष्टं पाथोऽन्नमन्नभूतं भेषजं च पशुदेवतानां वनस्पतिं प्रयाजदेवं सु आह नकारश्चार्थः । आज्यपा देवा आज्यपान्देवान् सु आह प्रयाजानुयाजा वै देवा आज्यपाः । स्वाहेति क्रियाया यजमानः कर्ता देवा ह वा ऽऊचुर्हन्त विजितमेवानु सर्वं यज्ञं सꣳस्थापयेत्युपक्रम्य तत उत्तमे प्रयाजे स्वाहाकारेणैव यज्ञꣳ समस्थापयन्नित्याहेति श्रुतेः समाप्तिवचनाः स्वाहाकाराः । भेषजमौषधभूतं जुषाणाः सेवमानोऽग्निरश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयआदीनि व्यन्तु । हे मनुष्यहोतः त्वमपि यज्ञ ॥४०॥

V. a. होता॑ यक्षद॒श्विनौ॒ छाग॑स्य व॒पाया॒ मेद॑सो जु॒षेता॑ꣳ हविर्होतर्यज ।

b. होता॑ यक्ष॒त्सर॑स्वतीं मे॒षस्य॑ व॒पाया॒ मेद॑सो जु॒षता॑ꣳ हविर्होतर्यज ।

c. होता॑ यक्षदि॒न्द्र॑मृष॒भस्य॑ व॒पाया॒ मे॰ ॥४१॥

का॰ [११.६.२२.] होता यक्षदश्विनाविति त्रयो वपानां प्रैषा यथालिङ्गम् । होता यक्षदश्विनौ छागस्य होता यक्षत्सरस्वतीम् होता यक्षदिन्द्रमृषभस्येति त्रयो वपात्रयस्य क्रमात्प्रैषा एककण्डिकायामिति सूत्रार्थः ॥ सप्त लिङ्गोक्तदेवताः तत्राद्यास्त्रयो वपानां प्रैषाः त्रयाणां प्राजापत्या पङ्क्तिश्छन्दः (11.) द्वितीयस्य द्व्यधिका प्रथमतृतीययोरेकाधिका । दैव्यो होता अश्विनौ यक्षत् यजतु इज्यमानौ तावश्विनौ छागस्य वपाया मेदसः सम्बन्धि हविर्जुषितां सेवेताम् मेदः स्निग्धभागः । हे होतर्यज ॥ होता सरस्वतीं यक्षत् सा मेषस्य वपाया मेदसो हविर्जुषताम् । हे होतः त्वं यज ॥ होता इन्द्रं यक्षत् स इन्द्रः ऋषभस्य वपाया मेदसो हविर्जुषताम् । हे मनुष्यहोतस्त्वमपि यज ॥४१॥

होता॑ यक्षद॒श्विनौ॒ सर॑स्वतीमिन्द्र॑ꣳ सु॒त्रामा॑णमि॒मे सोमाः॑ सु॒रामा॑णश्छा॒गैर्न मे॒षैर्ऋ॑ष॒भैः सु॒ताः शष्पै॒र्न तोक्मभि॑र्लाजै॒र्मक्षु॑ त्वो॒ मदा॑ मासरे॒ण प॒-

रिष्कृताः प्रुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सर-
स्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु पिबन्तु मदन्तु व्यन्तु हो-
तर्यज ॥४२॥

का॰ [११.६.२३.] ग्रहाणां चतुर्थः । होता यक्षदश्विनौ सरस्वतीमिन्द्रमिति चतुर्थी ग्रहाणां प्रैषः ॥ होता यक्षदश्विनौ सरस्वतीं सुष्ठु रक्षितारमिन्द्रं च यक्षत् यजतु । एवं होतारमुक्ताध्वर्यूनाह हे अध्वर्यवः इमे सोमाः वो युष्माकं युष्माभिः सुताः अभिषुताः । कीदृशाः सोमाः छागैर्मेषैर्ऋषभैश्च सुरामाणः सुष्ठु रमयन्ति ते सुरामाणः रमणीयाः रमतेरनणप्रत्ययः पशुभिः कृत्वा रमणीयाः नौ चार्थौ सुरावन्तः (12.) सुरामया वा । तथा शष्पैः तोकमिर्यवाङ्कुरैर्लाजैश्च मक्षस्वन्तः तेजोयुताः । मदाः मदयन्ति तर्पयन्तीति मदाः । मासरेण पूर्वोक्तेन परिष्कृताः अलंकृताः सम्पर्युपेभ्य इति [पा॰ ६.१.१३७.] सुट् । प्रुक्राः शोचिष्मन्तः । पयस्वन्तः पयसा युक्ताः । अमृताः अमृतकल्पाः । प्रस्थिताः होमाभिमुखं चलिताः । मधुश्चुतः मधु श्चोतन्ते ते मधुस्राविणः । अश्विनौ सरस्वती सुत्रामा वृत्रहा वृत्रासुरहन्ता इन्द्रश्च तान्सोमान् जुषन्तां सेवन्तां सोम्यं मधु पिबन्तु मदन्तु तृप्यन्तु व्यन्तु राजन्तां हविर्भक्षयन्तु वा । हे होतः त्वमपि यज ॥४२॥

होता यक्षदश्विनौ छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वे-
षोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासेऽग्रेणां यवसप्रथमानाꣳ
सुमत्क्षराणाꣳ शतरुद्रियाणामग्निधात्तानां पीवोपवसनानां पार्श्वतः श्रो-
णितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाश्विना जुषेतांꣳ
हविर्होतर्यज ॥४३॥

का॰ [११.६.२४.] हविषामुत्तरे यथालिङ्गम् । चतुर्थात्प्रैषादग्रे पठ्यमाना होता यक्षदश्विनौ छागस्य हविष इत्याद्यास्त्रयो यथालिङ्गमाश्विनादिहविर्यागानां प्रैषा इत्यर्थः ॥ दैव्यो होता अश्विनौ यक्षत् यजतु । ताविज्यमानावश्विनौ छागस्य हविषः छागसम्बन्धि हविः आत्तामभक्षयताम् कर्मणि षष्ठी । किं च अद्य अ-

स्मिन्दिने मध्यतः उदरमध्याडुद्धृतमुद्धृतं मेदो वपाद्रूपं चात्ताम् कृग्रहोर्भश्छन्दसि कथमुद्धृतम् तत्राह द्वेषोभ्यः द्विषन्तीति द्वेषांसि द्विषेरसुन्प्रत्ययः यज्ञद्वेष्टृणि असुररक्षांसि तेभ्यः उद्धृतम् यावत्तानि पराभवायागच्छन्ति ततः पुरैवोद्धृतमित्यर्थः तथा गृभः गृह्यते भक्ष्यार्थमिति गृप् तस्या गृभ इडायाः पुरा प्रथममुद्धृतम् वपायामिडाप्रयोजनाभावात् कीदृश्या गृभः पौरुषेय्याः पुरुषार्थमियं पौरुषेयी ऋविगर्था तस्याः ॥ तावश्विनौ नूनं निश्चितमङ्गानां घस्तामङ्गानि भक्षयताम् घसू अदने विशेषणैर्विशिष्यस्याध्याहारः । कीदृशानामङ्गानाम् घासेऽग्राणाम् एकपदम् घासे ग्रासे अन्नराणां नवानां रुचिजनकानाम् अन्यानि ग्रासेभ्यूत्तरोत्तररुचिं जनयन्ति नेमानि । तथा यवसप्रथमानां यवसानामन्नानां मध्ये प्रथमानां मुख्यानाम् मांसत्वात् एतद्वै परममन्नाद्यं यन्माꣳसमिति श्रुतेः । सुमत्क्षराणां सुमत् स्वयं क्षरन्ति तानि सुमत्क्षराणि तेषाम् सुमदिति स्वयमित्यस्य पर्यायः । शतरुद्रियाणाम् रुद्र इति स्तोतृनामसु [निघ° ३.१६.] पठितं रुद्रस्य स्तोतुरिमा रुद्रियाः स्तुतयः शतसंख्या रुद्रिया येषां तेषाम् बह्वृग्भिः स्तुतानामित्यर्थः । अग्निघात्तानाम् अग्निना स्वात्तानामास्वादितानां पाककाले पूर्वमग्निना सुश्रुतानामित्यर्थः । पीवोपवसनानाम् पीवस्शब्दोऽसुन्नन्त स्थूलवाचो पीवसां स्थूलानामङ्गानामुप समीपे वसनं स्थितिर्येषां तानि पीवोपवसनानि तेषाम् स्थूलाङ्गसमीपस्थितानां सूक्ष्माणामित्यर्थः उपवसने पीव इति प्रातिशाख्यसूत्रेण [३.१.१३.] उपवसने परे पीवसो विसर्गलोपः । किं च पार्श्वतः पार्श्वप्रदेशात् श्रोणितः कटिप्रदेशात् शितामतो बाहुप्रदेशात् उत्सादतः उत्सादनमुत्सादः छेदनप्रदेशः तस्मात् । एवमङ्गादङ्गात् एकपदम् नित्यवीप्सयोरिति [पा° ८.१.४.] द्वित्वम् प्रत्यङ्गात् अवत्तानामवदानधर्मेण गृहीतानामङ्गावयवानामश्विनौ घस्ताम् तान्भक्षयतामिति पूर्वेण सम्बन्धः । एव एवमश्विना अश्विनौ हविर्जुषितां सेवेताम् भक्षितावदानौ तौ कृतः कुरुतः तृप्तिमिति शेषः विकरणव्यत्ययः पुनर्वचनमादराय । हे मनुष्यहोतः त्वमपि यज्ञ । शितामशब्देन बाहुयकृप्योर्निमेदांस्युच्यन्ते ॥४३॥

होता यक्षत्सरस्वतीं मेषस्य हविष आवयदग्न मेध्यतो मेद उद्भृ° - गृभो

घसन्नूनं घासेऽश्वा॑ - ॰ङ्गादवत्तानां करदेवꣳ सरस्वती जुषतांꣳ हविर्होतर्यज ॥ ४४ ॥

होता सरस्वतीं यक्षत् या सरस्वती मेषस्य हविषः हविः आवयत् अभक्षयत् आङ्पूर्वस्य वेतेर्लङि रूपम् यद्वा भक्षयतु लेटि वाडागमे रूपम् । अथ मध्यतो मेद इत्यादिव्याख्या पूर्ववत् । सा अङ्गानि घसत् । एवं सरस्वती हविर्जुषतां तृप्तिं च करदित्येकवचनानि अन्यदुक्तम् ॥ ४४ ॥

होतो यक्षदिन्द्रमृषभस्य हविष आवयदस्य मध्यतो मेद उद्भृ॰ - गृभो घसन्नूनं घासेऽश्वा॑ - ॰ङ्गादवत्तानां करदेवमिन्द्रो जुषतांꣳ हविर्होतर्यज ॥ ४५ ॥

होता इन्द्रं यक्षत् स इन्द्र ऋषभस्य हविष आवयत् भक्षयतु एवमिन्द्रो हविर्जुषतामित्यन्तं पूर्ववत् ॥ ४५ ॥

होतो यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित ।
यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्रिया धामानि यत्रेन्द्रस्यऽऋषभस्य हविषः प्रिया धामानि यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णः प्रिया धामानि यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथाꣳसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्भीयस-इव कृत्वी करदेवं देवो वनस्पतिर्जुषतांꣳ हविर्होतर्यज ॥ ४६ ॥

का॰ [११. ६. २५.] उत्तमौ वनस्पतिस्विष्टकृतोः । अन्ते पठ्यमानौ होता यक्षद्वनस्पतिमभि होता यक्षदग्निं स्विष्टकृतमिति क्रमेण वनस्पतियागे स्विष्टकृद्यागे च प्रैषौ ॥ यूपो देवता । दैव्यो होता वनस्पतिं यूपमभियक्षत् अभियजतु हि यस्मात् वनस्पतिः रशनया रज्ज्वा कृत्वा अधित धृतवान् पशूनिति शेषः दधति-

र्लुङि स्याद्ध्वोरिच्चेतीकारः [पा° १.२.१७.] कीदृश्या रज्ज्वा पिष्टतमया पिष्टशब्दो रूपवाची अत्यन्तं पिष्टा सुरूपा पिष्टतमा तया । रभिष्ठया रभते पशून्नियच्छतीति रब्धी तृच् ङीप् अत्यन्तं रब्धी रभिष्ठा तया तुश्छन्दसीति [पा° ५.३.५९.] इष्ठनि तृचो लोपः समर्थयेत्यर्थः ॥ इदानीं वनस्पतिः प्रार्थ्यते यत्र अश्विनोः सम्बन्धिनः छागस्य हविषः छागरूपस्य हविषः प्रिया प्रियाणि इष्टानि धामानि स्थानानि वर्तन्तऽइति शेषः एवमग्रेऽपि यत्र सरस्वत्या मेषस्य मेषरूपस्य हविषः प्रियाणि धामानि यत्र इन्द्रस्य ऋषभस्य हविषः प्रियाणि धामानि एतेषां पशुदेवानां स्थानानि । यत्राग्नेः प्रियाणि धामानि यत्र सोमस्य प्रियाणि धामानि एतावाज्यभागौ । यत्र सुत्राम्णा इन्द्रस्य प्रियाणि धामानि यत्र सवितुः प्रियाणि धामानि यत्र वरुणस्य प्रियाणि धामानि एते पशुपुरोडाशदेवाः । यत्र वनस्पतेः प्रियाणि पाथांसि अन्नानि । अथ यत्र आज्यपानां देवानां प्रयाजानुयाजानां प्रियाणि धामानि । यत्र होतुरग्नेः स्विष्टकृतः प्रियाणि धामानि । एतान् छागादीन्पशून् रभीयस-इव कृत्वी रभन्ते ते रब्धारः अत्यन्तं रब्धारो रभीयांसः सरभसांश्च कृत्वा इवश्चार्थः (13.) प्रस्तुत्येव प्रकर्षेण स्तुत्वा च उपस्तुत्येव उप समीपे स्तुत्वा च इवौ चार्थौ तत्र तेषु पूर्वोक्तेषु स्थानेषु वनस्पतिर्देव उपावसृजतात् उपावसृजतु स्थापयतु सृजेर्लुङि रूपं लेटि वा सिब्बहुलं लेटीति [पा° ३.१.३४.] सिप्रत्ययेऽडागमे च रूपम् वनस्पतिर्देव एवं करत् करोतु हविश्च जुषताम् हे मनुष्यहोतः त्वमपि यज ॥४६॥

होता॑ यक्षद॒ग्निꣳ स्वि॑ष्ट॒कृत॑मय॒ाऽअग्नि॒रश्वि॑नोश्छा॒गस्य॑ ह॒विषः॑ प्रि॒या धामा॒न्यया॒ट् सर॑स्वत्या मे॒षस्य॑ ह॒विषः॑ प्रि॒या धामा॒न्ययाऽइन्द्र॑स्य ऋष॒° - - पा॒शाꣳस्यय॒ाऽऽदे॒वाना॑माज्य॒पाना॑ प्रि॒या धामा॑नि यक्षद॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि यक्षत्स्वं म॑हि॒मान॑माय॑जतामि॒ड्या इ॒षः कृ॑णोतु सोऽअ॑ध्व॒रा जा॑तवेदा जुष॒ताꣳ ह॒विर्होत॑र्यज ॥४७॥

स्विष्टकृदग्निर्देवता । होता स्विष्टकृतमग्निं यक्षत् यजतु योऽग्निः स्विष्टकृत् अश्विनोः छागस्य हविषः सम्बन्धीनि प्रियाणि धामानि अयाट् अयादीत् इष्ट-

वान् अवदानानि यजति स्मेत्यर्थः एवमग्नेऽपि सरस्वत्या मेषस्य हविषः प्रियाणि धामानि अवदानानि अयाट् इन्द्रस्य ऋषभस्य हविषः प्रियाणि धामानि अयाट् (14.) एताः प्रधानदेवताः । अग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामानि अयाट् एतावाज्यभागौ । सुष्ठु त्रायते सुत्राम्ण इन्द्रस्य प्रिया॰ सवितुः प्रिया॰ वरुणस्य प्रिया॰ एताः पशुपुरोडाशदेवताः । वनस्पतेः प्रिया॰ एतत्प्रधानाङ्गम् । आज्यपानां देवानां प्रिया॰ एते प्रयाजानुयाजाः । होतुरग्नेः स्विष्टकृतः स्वस्यैव प्रियाणि धामानि यक्षत् इष्टवान् । स्वं महिमानं स्वां विभूतिं यक्षत् । किं च आ इज्याः समन्ताद्यष्टुं योग्या एज्याः यागार्हाः इषः इच्छन्ति इषः सकामाः प्रजाः आयजतां सम्यक् यजन्तु वचनव्यत्ययः प्रजा यागशीला यागयोग्याश्च भवन्त्वित्यर्थः । स जातवेदाः स्विष्टकृदग्निः अधरा अधरान्यज्ञान्कृणोतु करोतु हविश्च जुषताम् । हे मनुष्यहोतः त्वं यज्ञ । विभक्तेराकारः ॥४७॥

VI. देवं बर्हिः सरस्वती सुदेवमिन्द्रेऽअश्विना ।
तेजो न चक्षुरद्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज्ञ ॥४८॥

का॰ [११.७.८.१.] अनुयाजप्रैषा देवं बर्हिरिति याज्याश्च । देवं बर्हिः सरस्वतीत्याद्या एकादश कण्डिकास्त्विषशोरनुयाजानां प्रैषा याज्याश्च भवन्तीत्यर्थः ॥ एकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याः चतस्र आर्ष्यस्त्रिष्टुभः व्यवहितपदप्रायाः । शोभना देवा यस्य तत्सुदेवं यद्बर्हिः देवमनुयाजदेवता तेन बर्हिषा सह सरस्वती अश्विना अश्विनौ च इन्द्रे तेजो दधुः दधतु अद्योः इन्द्रनेत्रयोः चक्षुः इन्द्रियं च दधुः नकारश्चार्थः । एवमग्नेऽपि । वसुवने वसुवननाय धनलाभाय वसुधेयस्य वसुनो धेयं वसुधेयं तस्य वसुनिधानाय च अश्विसरस्वतीन्द्रा व्यन्तु हविर्भक्षयन्तु । हे मनुष्यहोतः त्वमपि यज्ञ । सप्तमीषष्ठ्यौ चतुर्थ्यर्थे ॥४८॥

देवीर्द्वारोऽश्विना भिषज्येन्द्रे सरस्वती ।
प्राणं न वीर्ये नसि द्वारो दधुरिन्द्रि॰ ॥४९॥

उत्तरार्धे द्वार इति प्रथमा तृतीयार्था । या द्वारो देवीः यज्ञगृहद्वारो देव्यो

ऽनुयाजदेवाः ताभिर्द्वाभिः सह भिषजा अश्विना वैद्यावश्विनौ सरस्वती च इन्द्रे वीर्यं बलं दधुः नसि इन्द्रस्य नासिकायां प्राणमिन्द्रियं प्राणेन्द्रियं च दधुः वसुः व्याख्यातम् ॥४१॥

देवीऽउषासावश्विना सुत्रामेन्द्रे सरस्वती ।
बलं न वाचमास्यऽउषाभ्यां दधुरिन्द्रिः ॥५०॥

नक्तोषासाविति प्राप्ते छान्दस आदिपदलोपः । उषासा देवी नक्तोषसौ अनुयाजदेव्यौ ताभ्यामुषाभ्यां नक्तोषोभ्यां सह अश्विनौ सुत्रामा शोभनरक्षणकर्त्री सरस्वती च इन्द्रे बलं दधुः आस्ये इन्द्रमुखे वाचमिन्द्रियं वागिन्द्रियं च दधुः नश्चार्थः वस्वित्युक्तम् ॥५०॥

देवी ञोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन् ।
श्रोत्रं न कर्णयोर्यशो ञोष्ट्रीभ्यां दधुरिन्द्रिः ॥५१॥

ये ञोष्ट्री ञोषयित्र्यौ सुखस्य सेवयित्र्यौ देवी देव्यौ अनुयाजदेव्यौ द्यावापृथिव्यौ अहोरात्रे वा सस्यं च समा चेति कात्थक्यः [(15.) निरु° १.४१.] ताभ्यां ञोष्ट्रीभ्यां सह सरस्वती अश्विना अश्विनौ च इन्द्रमवर्धयन् कथमवर्धयन् तत्राह इन्द्रे यशो दधुः तत्कर्णयोश्च श्रोत्रमिन्द्रियं दधुः वसुः ॥५१॥

देवीऽऊर्ज्जाऽऽकुंती डुघे सुडुघेन्द्रे सरस्वत्यश्विना भिषज्ञावतः ।
शुक्रं न ज्योति स्तनयोराकुंती धत्त इन्द्रियं वसुः ॥५२॥

उत्तरार्धे आकुतीशब्दस्तृतीयार्थः । ञोष्ट्योरेव देवताविकल्पः । ये देवी ऊर्ज्जाकुती ऊर्ज्जा रसवती आकुतिराज्यानं होमो वा ययोस्ते ऊर्ज्जाकुती डुघे डुग्धस्ते डुघे कामपूरके सुडुघे सुदोहने ताभ्यामाकुतिभ्यां सह सरस्वती भिषज्ञावश्विनौ च इन्द्रे इन्द्रमवतः अवन्ति रक्षन्ति वचनव्यत्ययः कथम् तदाह ज्योतिः तेज इन्द्रे धत्तः दधति स्तनयोः शुक्रमिन्द्रियं च धत्तः वचनव्यत्ययः नश्चार्थः व्याख्यातमन्यत् ॥५२॥

देवा देवानां भिषज्ञा होतारावेन्द्रमश्विना ।

वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां दधुरिन्द्रि॰ ॥५३॥

देवानां देवा देवौ यौ होतारौ अनुंयाजदेवौ ताभ्यां होतृभ्यां सह वषट्कारैश्च सह भिषजौ अश्विनौ सरस्वती च इन्द्रमिन्द्रे त्विषिं कान्तिं दधुः हृदये मतिमिन्द्रियं बुद्धीन्द्रियं च दधुः नश्चार्थः वसु॰ उक्तम् ॥५३॥

देवीस्तिस्रस्तिस्रो देवीरश्विनेडा सरस्वती ।

भूषं न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रि॰ ॥५३॥

यास्तिस्रो देव्यो भारती इडा सरस्वती तिस्रो देवीः विभक्तिव्यत्ययः ताभिस्तिसृभिः देवीभिः सह अश्विनौ सरस्वती इडा च इन्द्राय इन्द्रे नाभ्यां मध्ये च भूषं बलमिन्द्रियं च दधुः नश्चार्थः वसु॰ व्याख्यातम् ॥५४॥

देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः ।

रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसु॰ ॥५५॥

नरा अस्मिन्नासीनाः शंसन्तीति यास्कोक्तेः [निरु॰ ८. ६.] नराशंसो देवोऽनुयाजरूपो यज्ञः रेतो वीर्यं रूपं सौन्दर्यममृतं जनित्रमुत्तमं जन्म इन्द्रियाणि च इन्द्राय दधत् (16.) दधातु नश्चार्थः । कीदृशो नराशंसः इन्द्रः इन्दतीतीन्द्रः ऐश्वर्यवान् इदि परमैश्वर्ये । त्रिवरूथः त्रीणि वरूथानि गृहाणि सदोहविर्धानाग्नीध्राणि यस्य सः । तथा त्वष्टा त्वक्षतिः करोतिकर्मा जगतः कर्ता यज्ञादेव जगदुत्पत्तेः । यस्य नराशंसस्य रथः सरस्वत्या अश्विभ्यां च ईयते नीयते ऊह्यते । वसु॰ व्याख्यातम् ॥५५॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णोऽश्विभ्याꣳ सरस्वत्या सुपिप्पल इन्द्राय पच्यते मधु ।

ओजो न जूतिर्वृषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसु॰ ॥५६॥

वनस्पतिर्देवो नोऽस्माकमोजः तेजः जूतिः जूतिं जवं वेगं भामं क्रोधमिन्द्रियाणि च दधत् दधातु यो वनस्पतिर्यूपः इन्द्राय मधु मधुरं फलं पच्यते पचति

फलति इन्द्राय फलं ददाति नकारौ चार्थौ । कीदृशो वनस्पतिः देवैर्हिरण्यपर्णाः हिरण्यवृपाणि पर्णानि यस्य देवा यस्य हिरण्मयानि पर्णानीत्यर्थः । अश्विभ्यां सरस्वत्या च सुपिप्पलः शोभनं पिप्पलं फलं यस्य सः अश्विनौ सरस्वती च यस्य वनस्पतेः फलानीत्यर्थः । ऋषभः पूज्यः ऋषभशब्दः पूजावचनः । वसु॰ ॥५६॥

देवं बर्हिर्वारितीनामधरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या स्योनमिन्द्र ते सदः । ईशायै मन्युꣳ राज्ञानं बर्हिषा दधुरिन्द्रियं वसु॰ ॥५७॥

हे इन्द्र वारितीनां वारि जले इतिर्गतिर्यासां ता वारितयः तासां जलोद्भवानामोषधीनां सम्बन्धि बर्हिः ते तव सदः सदसि अधरे यज्ञे अश्विभ्यां सरस्वत्या च स्तीर्णमास्तृतं कीदृशं बर्हिः देवं दीप्यमानम् ऊर्णम्रदाः ऊर्णामिव म्रदीयः छान्दस ईयोलोपः अत एव स्योनं सुखरूपम् । किं च अश्विसरस्वत्यः बर्हिषा सह राज्ञानं दीप्यमानं मन्युं क्रोधमिन्द्रियं च हे इन्द्र त्वयि दधुः किमर्थम् ईशायै ऐश्वर्याय ईशनमीशा तस्यै गुरोश्च हल इति [पा॰ ३.३.१०३.] स्त्र्यधिकारे ईशतेरप्रत्ययः स्त्रीत्वादाप् । वसु॰ उक्तम् ॥५७॥

देवोऽग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होताराविन्द्रमश्विना वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत्स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपाः स्विष्टोऽग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधां वसु॰ ॥५८॥

शोभनमिष्टं यागं करोतीति स्विष्टकृत् अग्निर्देवो यथाययं यथास्वं यो यथा इष्टव्यस्तथा (17.) देवान्वक्ष्यमाणान्यक्षत् इष्टवान् । कान्देवानत आह होतारौ अयं चाग्निरसौ च मध्यमो वायुः होतृमैत्रावरुणौ वा इन्द्रम् अश्विना अश्विनौ च वाचा मन्त्रेण वाचं च यक्षत् सरस्वतीमग्निं सोमं च । किं च स्विष्टकृत् शोभनयज्ञकारी सुत्रामा शोभनरक्षकः मनिन्प्रत्ययः इन्द्रः स्विष्टः सुष्ठु इष्टः सविता वरुणो भिषगिष्टः वनस्पतिर्देवश्च इष्टः आज्यपा देवाः प्रयाजानुयाजाः स्विष्टाः अग्निरधिष्ठाता अग्निना भौमेन होविर्द्धारा सुष्ठु (18.) इष्टः । किं च होता दैव्यः

स्विष्टकृत् होत्रे मानुषाय यशः इन्द्रियमूर्जमन्नमपचितिं पूजां स्वधां पित्र्यमन्नं दधत् ददातु नकारश्चार्थः । वसुवननाय वसुधानाय च देवा व्यन्तु हविरदन्तु मनुष्यहोतर्यज्ञ ॥५८॥

अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै मेषमिन्द्रायऽऋषभꣳ सुन्वन्नश्विभ्याꣳ सरस्वत्याऽइन्द्राय सुत्राम्णे सुरासोमान् (19.) ॥५९॥

का॰ [११.७.१०.] अग्निमद्येति सूक्तवाकप्रैषः । अग्निमद्य होतारमित्यादिः (20.) सूक्ता ब्रूहीत्यन्तः कण्डिकात्रयात्मकः सूक्तवाके प्रैषो भवति ॥ लिङ्गोक्तदेवतः प्रैषः प्रथमा अष्टिः द्वितीया धृतिः तृतीया विकृतिः । अयं यजमानोऽद्य अग्निं होतारमवृणीत वृतवान् वृणातेर्लङ् किं कुर्वन् पक्तीः (21.) पक्तव्यानि हवींषि पचन् सामान्येनोक्ता विशेषमाह पुरोडाशान्पचन् अश्विभ्यामश्विनोरर्थे छागं बध्नन् यूपे इति शेषः सरस्वत्यै मेषं बध्नन् इन्द्राय ऋषभं च बध्नन् तथा अश्विभ्यां सरस्वत्यै सुत्राम्णे रक्षकाय इन्द्राय च सुरासोमान्सुन्वन् अग्निमवृणीत ॥५९॥

सूपस्था अद्य देवो वनस्पतिरभवद्दाश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऽऋषभेणाच्छैस्तान्मेदस्तः प्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥६०॥

अद्य वनस्पतिर्देवः छागेन कृत्वा अश्विभ्यां सूपस्था अभवत् सुष्ठु उपतिष्ठते सेवते सूपस्थाः (22.) छागेनाश्विनोः सेवां चकारेत्यर्थः मेषेण सरस्वत्यै सूपस्था अभवत् ऋषभेण इन्द्राय सुपस्था अभवत् वनस्पतिना छागमेषऽर्षभैरश्व्यादीनामुपस्थानं कृतम् । तत्कथं ज्ञायते तत्राह अश्व्यादयो मेदस्तः मेदो वपामारभ्य तान् छागादीन् अत्तन् अभक्षयन् । पुनः पचता पच्यन्ते तानि पचता पचतानि पक्वानि अवदानानि प्रत्यगृभीषत प्रत्यगृह्णन् पचतेर्मृदृशियजिपर्विपच्यमितमिनमिक्ष्येभ्योऽतन्निति [उणा॰ ३.१०१.] अतच्प्रत्ययः भूतेऽपि दृश्यतऽइति [पा॰ ३.३.२.] वचनाद्भूतेऽपि द्रष्टव्यः विभक्तेराकारः । पुनस्ते पुरोडाशैरवीवृधन्त ऐधन्त ।

किं च अश्विना सरस्वती सुत्रामा इन्द्रश्च सुरासोमानपुः पीतवन्तः पातेर्लङ् पिबादेशाभावश्छान्दसः ररन्तुर्वा । सुराश्च सोमाश्च तान् सुरामयान्सोमान्वा ॥ ६० ॥

त्वामग्ऽऋषऽआर्षेयऽऋषीणां नपादवृणीतायं यजमानो बर्कुभ्य आ संगतेभ्य एष मे देवेषु वसु वार्यायद्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ६१ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकविंशोऽध्यायः ॥ २१ ॥ ॥

दैव्यो होता अग्निरुच्यते । हे ऋषे मन्त्राणां द्रष्टः हे आर्षेय यजमानार्षेयैर्त्रियत इत्येवं संबोध्यते हे ऋषीणां नपात् पुत्रायं यजमानः बर्कुभ्यः संगतेभ्यः मिलितेभ्यो देवेभ्य इति हेतोरथ त्वामेव आ अवृणीत सम्यग्वृतवान् । इति किम् एषोऽग्निर्मे मह्यं देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायद्यते आदास्यते यजतेर्दानार्थाच्छतृ मया देवेभ्यो दातुं ग्रहीष्यते इत्यर्थः । किं च हे देव अग्ने या यानि ता तानि दानानि देवा अदुः दत्तवन्तः तानि दानानि अस्मै यजमानाय आशास्स्व च इह तानि यजमानाय दातव्यानीति इहेत्यर्थः । आगुरस्व च ऊह्य च गुरी ऊह्यमे तुदादिः दानायोह्यमं कुरु आकारौ चकारौ च भिन्नक्रमौ । हे होतः त्वमिषितः प्रेषितोऽसि प्रेरितोऽसि कथम् तदाह भद्रवाच्याय वक्तुं योग्यं वाच्यं भद्रं शुभं च तत् वाच्यं च भद्रवाच्यं तस्मै भद्रं ब्रूहीति प्रेषितोऽसीत्यर्थः । किं च सूक्ता सूक्तानि त्वं ब्रूहि इति सूक्तवाकाय सूक्तवचनाय सूक्तानि वक्तुं मानुषः होता च प्रेषितोऽस्ति ॥ ६१ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
एकविंशोऽयमध्यायो याज्यादिप्रेषणान्तिमः (23.) ॥ २१ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

१ [मृलय] ॥ १ ॥ २ [अहेलमानो] ॥ २ ॥ ३ [हेलो] ॥ ३ ॥ ४ [मृल्लीकऽ] ॥ ४ ॥ ५-१० ॥ ५-१० ॥ १. १७ [मिधसाताऽइव त्मना महो°] ॥ ११ ॥ ११

॥१२॥ १२ ॥१३॥ १३ ॥१४॥ १४ [इलाभि°] - ११ [इला] ॥१५-२०॥ २१-२८ ॥२२-२१॥ २२ [°मिलस्प°] - ३२ [°क्षदिलेलित आज्ञु°] ॥३०-३३॥ ३३-३७ [अश्विनेला] ॥३४-३८॥ ३८-४२ [मधुश्युतस्ता°] ॥३१-४३॥ ४३. ४४. ४५ ॥४४॥ ४६-५० [उषासाऽश्वि°] ॥४५-४१॥ ५१-५३ [होतारा ऽइन्द्रं°] ॥५०-५२॥ ५४ [अश्विनेला] - ५८ [होतारा ऽइन्द्रं°] ॥५३-५७॥ ५१ [पुरोलाशा°] ॥५८॥ ६० [पुरोलाशैर्°] ॥५१॥ ६१॥६०॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां त्रयोविंशोऽध्यायः ॥२३॥ ॥

I. a. तेजोऽसि शुक्रममृतमायुष्या आयुर्मे पाहि । b. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । c. आददे ॥१॥

श्रीविनायकाय (1.) नमः ॥ सर्वकामस्य राज्ञोऽश्वमेधः तस्य फाल्गुनशुक्लाष्टम्यामारम्भः ॥ का° [२०.१.१.] निष्कं प्रतिमुञ्चन्वाचयति तेजोऽसीति । चतुःसुवर्णानिर्मित आभरणविशेषो निष्कः तं यजमानकण्ठे प्रतिबध्नन्नध्वर्युस्तेजोऽसीति मन्त्रं पाहीत्यन्तं वाचयति तं च निष्कं प्रातर्होमान्ते पूर्णाहुतिं कृत्वाध्वर्यवे दद्यादिति सूत्रार्थः ॥ चत्वारोऽध्याया अश्वमेधमन्त्रास्तेषां प्रजापतिर्ऋषिः । तेजोऽसीत्यस्य सौवर्णो निष्कं देवता । प्राजापत्यानुष्टुप् । हे निष्क तेजोऽसि आग्नेयत्वात् । शुक्रमग्नेर्वीर्यं चासि अग्निर्ह वाऽपोऽभिध्यावित्युपक्रम्य तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवदिति श्रुतेः । अमृतं च वह्नितोऽनुच्छिद्यमानद्रवत्वाधिकरणत्वात् (2.) दानेनामृतत्वप्रदानाच्च हिरण्यदा अमृतत्वं भजत्वऽइति श्रुतेः । आयुष्याः आयुः पातीति आयुषो गोपायिता अतो याचे मे ममायुः पाहि रक्ष यज्ञसमाप्तिपर्यन्तमायुः प्रार्थ्यते ॥ का° [२०.१.२७.] देवस्य त्वेति रशनामादाय ब्रह्मन्नश्वं भक्ष्यामीत्याह । देवस्य-त्वेत्यादि-सरमारपत्नीत्यन्तेन मन्त्रेण त्रयोदशारत्निं दर्भमयीं द्विगुणामश्वबन्धनार्थां रशनां रज्जुमादाय ब्रह्मन्नश्वमित्यादि-तेन-राध्यासमित्यन्तं मन्त्रं [8.] ब्रह्माणं प्रत्याहेति सूत्रार्थः ॥ देवस्य त्वेति व्याख्यातम् [१.१०.] ॥१॥

इमामगृभ्णन्रशनामृतस्य पूर्वऽआयुषि विदथेषु कव्या ।

सा नोऽअस्मिन्त्सुतऽआबभूवऽऋतस्य सामन्त्सरमारपन्ती ॥२॥

यज्ञपुरुषदृष्टा रशनादेवत्या त्रिष्टुप्। सवनं सुतं यज्ञः भावे क्तः नोऽस्माकमस्मिन् सुते यज्ञे सा रशना आबभूव उत्पन्ना। कीदृशी ऋतस्य यज्ञस्य सामन् साम्नि समारम्भे सरं प्रसरं यज्ञप्रसारमारपन्ती रप् उक्तौ उच्चारयन्ती यज्ञप्रसारो भवतिति वदन्तीत्यर्थः। सा का विद्यते लभ्यते स्वर्गो यैस्ते विदथाः यज्ञाः विदथेषु यज्ञेषु विदेरथगिति अथकप्रत्ययः कव्या (3.) कवयः विभक्तेर्डादेशः सुपां सुलुगित्यादिना [पा० ७.१.३९.] यज्ञेषु कुशलाः प्रजापत्यादयो यामिमां रशनामृतस्य यज्ञस्य पूर्वे प्रथमे आयुषि प्रारम्भे इत्यर्थः अगृभ्णान् अगृह्णन् या पूर्वैर्गृहीता सा रशनात्रोद्भूता (4.) इत्यर्थः ॥२॥

अभिधा असि भुवनमसि यन्तासि धर्ता।
स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः ॥३॥

का० [२०.१.२८.] तं बधानेति ब्रह्मानुज्ञातोऽभिधा असीति बध्नात्यश्वम्। तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति मन्त्रेण ब्रह्मणानुज्ञातोऽधर्युरभिधा असीत्यादि-स्वगा-त्वा-देवेभ्यः-प्रजापतयऽइत्यन्तेन मन्त्रेण रशनयाश्वं बध्नाति ॥ लिङ्गोक्तदेवतानि यजूंषि अश्वो देवताप्यस्य। हे अश्व यस्त्वमभिधा असि अभिधीयते स्तूयतऽइत्यभिधाः क्विप् भुवनं सर्वेषामाश्रयश्चासि यन्ता नियमनकर्ता वासि धर्ता जगद्धारयिता च। स एवंविधः त्वं स्वाहाकृतः स्वाहाकारेण कृतः श्रुतः सन् अग्निं गच्छ प्राप्नुहि कीदृशमग्निम् वैश्वानरं विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितम् सप्रथसं प्रथतेरसुन्प्रत्ययः प्रथनं प्रथो विस्तारस्तत्सहितम् यद्वा सर्वतस्तिर्यगूर्ध्वमधश्च प्रथते सप्रथाः तम् सर्वतःशब्दस्य सादेशः ॥३॥

a. स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भक्ष्यामि देवेभ्यः प्रजापतये तेन राध्यासम्।

b. तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥४॥

हे अश्व त्वा त्वां देवेभ्यः प्रजापतये च देवार्थं प्रजापत्यर्थं च स्वगा करोमीति

शेषः स्वेनैव गच्छतीति स्वगा डाजन्तः विभक्तेर्डादेशो वा स्वयंगामिनमित्यर्थः ॥ ब्रह्मन्नश्वम् (5.) ब्रह्मा देवता ब्रह्माणमामन्त्रयते हे ब्रह्मन् अश्वं भक्ष्यामि बन्धनं करिष्यामि बध्नातेर्लृटि स्यपि एकाचो बश इति [पा° ८.२.३७.] भष्त्वम् किमर्थम् देवेभ्यः प्रजापतये च तेनाश्वबन्धेनाहं राध्यासं राध संसिद्धौ सिद्धिं कर्मसमाप्तिरूपां प्राप्नुयाम् आशीर्लिङ् ॥ ब्रह्मा प्रसौति तं बधान अध्वर्युर्देवतं यजुः । हे अध्वर्यो यं बन्धुमिच्छसि तमश्वं बधान किमर्थम् देवेभ्यः प्रजापतये च तेनाश्वबन्धनेन राध्नुहि सिद्धिं यज्ञसमाप्तिलक्षणां प्राप्नुहि राधिः स्वादित्वाल्लोटि श्नुप्रत्ययः ॥४॥

a. प्रजापतये त्वा जुष्टं प्रोक्षामि । b. इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि ।
c. वायवे त्वा जुष्टं प्रोक्षामि । d. विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ।
e. सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ।
f. योऽअर्वन्तं जिघांसति तमभ्यमीति वरुणः परो मर्तः परः श्वा ॥५॥

का° [२०.१.३७.] स्थावरा अपो गत्वा प्रजापतये वेति प्रोक्षत्यश्वं प्रतिमन्त्रम् । ततोऽध्वर्युः स्थावरास्तडागादिस्था अपो गत्वा ताभिरद्भिः पञ्चमन्त्रैः प्रतिमन्त्रमश्वं प्रोक्षति ॥ लिङ्गोक्तदेवतानि पञ्च यजूंषि । हे अश्व प्रजापतये जुष्टं त्वा त्वां प्रोक्षामि सिञ्चामि अनेन प्रोक्षणेन प्रजापतेरिवाश्वे वीर्यं दधाति तथा च श्रुतिः [१३.१.२.५.] प्रजापतिर्वै देवानां वीर्यवत्तमो वीर्यमेवास्मिन्दधाति तस्मादश्वः पशूनां वीर्यवत्तम इति । इन्द्राग्निभ्यां जुष्टं त्वां प्रोक्षामि अनेनेन्द्राग्न्योरिवाश्वे ओजो दधाति तथा च श्रुतिः [१३.१.२.६.] इन्द्राग्नी वै देवानामोजस्वितमाऽओज एवास्मिन्दधाति तस्मादश्वः पशूनामोजस्वितम इति । वायवे जुष्टं प्रीतं त्वा प्रोक्षामि अनेन वायोरिवाश्वे वेगं दधाति तथा च श्रुतिः [१३.१.२.७.] वायुर्वै देवानामाशिष्ठो जवमेवास्मिन्दधाति तस्मादश्वः पशूनामाशिष्ठ इति आशिष्ठो वेगवत्तरः । विश्वेभ्यो देवेभ्यो जुष्टं त्वां प्रोक्षामि अनेनाश्वे यशो दधाति विश्वे वै देवा यशस्वितमा यश एवास्मिन्दधाति तस्मादश्वः पशूनां यशस्वितम इति [१३.१.२.८.] श्रुतेः । सर्वेभ्यो देवेभ्यो जुष्टं त्वां प्रोक्षामि अनेन सर्वा देवता अश्वे

दधाति सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति सर्वा एवास्मिन्देवता अश्वे अन्वायातयतीति [१३.१.२.१.] श्रुतेः ॥ का° [२०.२.१.] योऽअर्वन्तमिति वाचयति । भ्रूद्वैश्यायां जातेन पुंसा अधर्युप्रेरितेन (6.) चतुर्नेत्रे शुनि खादिरमुशलेन कृते सति योऽअर्वन्तमित्यादि-वरुण-इत्यन्तं मन्त्रं यजमानं वाचयति ॥ गायत्री पूर्वार्धे ऽश्वस्तुतिः परेऽर्धे (7.) लिङ्गोक्तदेवता । यः अर्वन्तमश्वं जिघांसति कर्तुमिच्छति अर्वणस्त्रसावनञ इति [पा° ६.४.१२७.] त्रन्तादेशः (8.) कृतेः सन्नन्ताल्लट् वरुणः तमश्वं जिघांसन्तमभ्यमीति क्षिनस्ति अम् क्षिंसायाम् एतस्य लटि तुरुस्तुशम्यम इति [७.३.९५.] ईप्रत्ययः ॥ का° [२०.२.४.] वेतसकटेनाधोऽश्वं प्लावयति परो मर्त इति । वेतसतरुकृतेन कटेन मृतं श्वानमश्वाधो जले तारयति ॥ अश्वं जिघांसुर्मर्तो मनुष्यः परः पराभूतः अधस्पदं नीतः श्वा च परः पराकृतः श्वरूपेणाश्वकर्तेव (9.) पराकृत इत्यर्थः ॥५॥

II. a. अग्नये स्वाहा । b. सोमाय स्वाहा । c. अपां मोदाय स्वाहा । d. सवित्रे स्वाहा । e. वायवे स्वाहा । f. विष्णवे स्वाहा । g. इन्द्राय स्वाहा । h. बृहस्पतये स्वाहा । i. मित्राय स्वाहा । k. वरुणाय स्वाहा ॥६॥

का° [२०.२.३.४.] अग्निसमीपमानीयाग्नये स्वाहेति जुहोत्यनुवाकेन प्रतिमन्त्रं सकृत्सकृत्सर्वं वावर्तम् । ततः स्थावराभ्योऽश्वः सकाशादश्वमग्निपार्श्वमानीयाग्नये स्वाहेत्येककण्डिकात्मकेनानुवाकेन प्रतिमन्त्रं सकृदृक्षीत्वा जुहोति स्तोकीयसंज्ञा दशाज्याहुतीर्जुहोति यद्वानुवाकमावर्त्यावर्त्य सकृत्समाज्याहुतीर्जुहोतीति सूत्रार्थः ॥ दश यज्ञर्षि लिङ्गोक्तदेवतानि । अञ्जतीत्यग्निः । सुनोतीति सोमः । अपां जलानां मोदाय मोदयति हर्षयति मोदः । सूते सविता । वातीति वायुः । वेवेष्टि व्याप्नोति विष्णुः । इन्दतीन्द्रः । बृहतां वेदानां पतिर्बृहस्पतिः । मिद्यति स्निह्यति मित्रः । वृणोति भक्तं भजते वरुणः । एताभिराहुतिभिरेतेभ्यो दश देवेभ्योऽश्वं ददाति तथा च श्रुतिः [१३.१.३.३.] एतावतो वै सर्वे देवास्तेभ्य एवैनं जुहोतीति ॥६॥

III. क्रिङ्काराय स्वाहा क्रिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा सङ्कानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥७॥

का° [२०.३.३.] दक्षिणाग्नौ जुहोति क्रिङ्काराय स्वाहेति प्रक्रमान् । एतदर्थमेवोक्तं दक्षिणाग्नौ प्रतिमन्त्रं प्रक्रमसंज्ञान्होमानेकोनपञ्चाशज्जुहोतीत्यर्थः ॥ अश्वस्यैकोनपञ्चाशच्चेष्टितानि व्यापाराः कण्डिकाद्वयेन । क्रिङ्करणं क्रिङ्कारस्तस्मै । क्रिङ्कृताय कृतं यत्क्रिङ्कृतं (10.) तस्मै । क्रन्दतीति क्रन्दन् । अव नीचैः क्रन्दतीत्यवक्रन्दः । प्रोथतीति प्रोथन् प्रोथृ पर्यापणे (11.) । प्रकृष्टः प्रोथो घोणा यस्य घोणा तु प्रोथमस्त्रियाम् । गन्धोऽस्यास्ति गन्धः । घ्रातमाघ्राणमस्यास्ति घ्रातः । निविशते निविष्टः । उपविशतीत्युपविष्टः । सम्यक् दितं लूनं (12.) खण्डनं यस्य स संदितः । वल्गतीति वल्गन् । आस्तेऽसावासीनः । शेतेऽसौ शयानः । स्वपिति स्वपन् । जाग्रतीति जाग्रत् । कूजतीति कूजन् । प्रकर्षेण बुध्यते प्रबुद्धः । विजृम्भते विजृम्भमाणः । चृती दीप्तौ विशेषेण चर्तति विचृतः (13.) । संक्रानाय संगतशरीराय । उपतिष्ठते उपस्थितः । अयतेऽयनः (14.) । प्रकृष्टमयते प्रायणः तस्मै स्वाहा ॥७॥

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्दुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा ज्ञवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदन्ति तस्मै

स्वाहा॑ यत्पिब॑ति तस्मै॒ स्वाहा॑ यन्मू॒त्रं क॒रोति॒ तस्मै॒ स्वाहा॑ कुर्व॒ते स्वा-
हा॑ कृ॒ताय॒ स्वाहा॑ ॥ ८॥

एतीति यन्। धावतीति धावन्। ऊत् अधिको द्रावो गतिर्यस्य स ऊद्रावः। ऊत् अधिकं द्रुतं यस्य स ऊद्द्रुतः। भू इति करोतीति भूकारः। भूकृतमस्यास्ति भूकृतः। निषीदति निषीदन्। ऊत्तिष्ठते ऊत्थितः। जवते जवो वेगवान्। बलमस्यास्ति बलः। विवर्तते स विवर्तमानः। विवर्तते स्म विवृत्तः। विधूनुते कम्पते स विधून्वानः। विधूयतेऽसौ विधूतः। श्रोतुमिच्छति शुश्रूषमाणः ज्ञाश्रुस्मृदृशां सन इति [पा॰ १.३.५७.] शानन् (15.)। शृणोति शृण्वन्। ईक्षते स ईक्षमाणः। ईक्षते स्मेति ईक्षितः। विशेषेणेक्षितो वीक्षितः। निमिषति निमेषः। यत्किंचित् अत्ति तस्मै। यत् जलादिकं पिबति तस्मै पानकर्त्रे। यन्मूत्रं करोति तस्मै मूत्रयते। करोति कुर्वन्। कृतमस्यास्ति कृतः। तस्मै स्वाहेति सर्वत्र। इत्येकोनपञ्चाशत्प्रक्रमाः ॥ ८॥

तत्स॑वि॒तुर्वरे॑ण्यं॰ ॥ १॥

षड्ऋचः सवितृदेवत्या गायत्र्यः सावित्रीणामिष्टीनां याज्यानुवाक्याः ॥ आद्या व्याख्याता [३.३५.] ॥ १॥

हिर॑ण्यपाणिमू॒तये॑ सवि॒तार॒मुप॑ ह्वये। स चेत्ता॑ दे॒वता॑ प॒दम् ॥ १०॥

मेधातिथिदृष्टा। अहं सवितारमुपह्वये आह्वयामि। किमर्थम् ऊतये अवनाय। कीदृशं सवितारं हिरण्यपाणिं हिरण्मयौ पाणी यस्य तम्। यतः स सविता चेत्ता चेतयिता सर्वज्ञः। देवता। पदं स्थानं ज्ञानिनाम् ॥ १०॥

दे॒वस्य॑ चेत॒तो म॒हीं प्र सं॑वि॒तुर्हवामहे। सु॒म॒तिꣳ स॒त्यरा॑धसम् ॥ ११॥

वयं सवितुः देवस्य सुमतिं शोभनां बुद्धिं प्रह्वामहे प्रकर्षेण प्रार्थयामहे कीदृशस्य सवितुः। चेततः चेततीति चेतन् तस्य जानतः। कीदृशीं सुमतिं महीं महतीं सत्यराधसं सत्यमनश्वरं राधो धनं यस्यास्ताम् यद्वा सत्यं राधयति साधयति सा सत्यराधास्ताम् ॥ ११॥

सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे । प्र देवाय मतीविदे ॥ १२॥

देवाय मतिविदे इति चतुर्थ्या षष्ठ्यर्थे । वयं सवितुर्देवस्य सुष्टुतिं शोभनां स्तुतिं रातिं दानं च प्र ईमहे प्रकर्षेण याचामहे छन्दसि परेऽपीति [पा० १.४. ८१.] क्रियापदात्परः प्रशब्दः । कीदृशस्य सवितुः सुमतीवृधः शोभनां मतिं वर्धयति सुमतिवृत् तस्य संहितायामितद्दीर्घः । तथा मतीविदे सर्वेषां मतिं वेत्ति मतिवित् तस्य पूर्ववद्दीर्घः ॥ १२॥

रातिꣳ सत्पतिं महे सवितारमुपह्वये । आसवं देववीतये ॥ १३॥

अहं सवितारमुपह्वये आह्वयामि च महे पूजयामि च महु पूजायाम् किमर्थम् देववीतये देवानां तर्पणाय । कीदृशं सवितारं रातिं राति ददातीति रातिः तम् ऊतियूतीत्यादिना [पा० ३.३.९७.] कर्तरि क्तिप्रत्ययान्तो निपातः । सत्पतिं सतां पतिं पालकम् । आसवम् आभिमुख्येन सौति कर्मण्यनुज्ञानाति आसवस्तम् पचाद्यजन्तः ॥ १३॥

देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ॥ १४॥

सवितुर्देवस्य मतिं बुद्धिं प्रति वयं धिया बुद्ध्या भगं धनं मनामहे याचामहे सवितुर्देवस्य बुद्धिरस्मासु दानतत्परा भवत्वित्यर्थः । कीदृशं भगम् आसवम् आसौत्यनुज्ञानाति येन आसवस्तम् धनेन सर्वेषामाज्ञां दातुं शक्यतऽइत्यर्थः । विश्वदेव्यं विश्वेभ्यो देवेभ्यो हितम् धनेनैव देवतर्पणादित्यर्थः ॥ १४॥

अग्निꣳ स्तोमेन बोधय समिधानोऽअमर्त्यम् । कव्या देवेषु नो दधत् ॥ १५॥

तिस्रः स्विष्टकृति पुरोऽनुवाक्याः । अग्निर्देवत्या गायत्र्यो यथाक्रमं सुतम्भरविश्वामित्रविश्वरूपदृष्टाः । हे अध्वर्यो त्वं स्तोमेन स्तुत्या अग्निं बोधय अवगतार्थं कुरु किं कुर्वन् समिधानः समिन्द्धे स समिधानः संदीपयन् कीदृशमग्निम् अमर्त्यं मरणधर्मरहितम् सोऽग्निर्बोधितः सन्नोऽस्माकं कव्या कव्यानि देवेषु दधत् धारयतु अस्य सोऽधिकारोऽस्ति ॥ १५॥

स कव्यवाडमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥ १६॥

सोऽग्निर्धिया बुद्ध्या समृण्वति संगच्छते देवैः सह हविर्दानाय । कीदृशोऽग्निः हव्यवाट् हव्यं वहतीति हविषां वोढा । अमर्त्यः मरणहीनः । उशिक् वष्टि उश्यते वा सर्वैरित्युशिक् कामनीयः मेधावी वा । दूतः देवानां दूत्यकर्ता । चनोहितः चन इत्यन्ननाम [निरु° ६.१६.] चनसेऽन्नाय हितः हवीरूपान्नस्यादनाय स्थापितः ॥१६॥

अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२॥ऽआसादयादिह ॥१७॥

यमग्निमहं पुरो दधे पुरतः स्थापयामि तं प्रति उपब्रुवे कथयामि । किम् तदाह । हे अग्ने इह यज्ञे त्वं देवानासादयात् आसादय स्थापय । कीदृशमग्निं दूतं देवानां हव्यवाहं हविषां वोढारम् ॥१७॥

अजीजनो हि पवमान सूर्यं विधरे शकमना पयः ।
गोजीरया रंहमाणः पुरंध्या ॥१८॥

अरुणाऋषदस्तुभ्यां दृष्टा पवमानदेवत्या पिपीलिकामध्या कृतिरनुष्टुप् । यस्या आद्यतृतीयौ पादौ द्वादशार्णौ द्वितीयोऽष्टार्णः सा पिपीलिकामध्या कृतिरनुष्टुप् जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः पिपीलिकमध्येति वचनात् । पवमानस्तुतिः । हे पवमान त्वं सूर्यमजीजनः उत्पादितवानसि जनेर्णिजन्ताल्लुङ् शकमना शकनं शक्र शक्लृ शक्तौ मनिन्प्रत्ययः शकमना सामर्थ्येन पयः जलं विधरे विशेषेण धारयामि वृष्ट्यै केन हेतुना गोजीरया जीवनं जीरा वस्य रेफः छान्दसः गवां जीरा गोजीरा तया गवां जीविकाहेतुना जलं धारयसि तासां हविषा यज्ञनिष्पत्तेः प्राणिनां जीवनाच्च । कीदृशस्त्वं पुरंध्या रंहमाणः पुरं बहु दधाति पुरंधिर्धारा तया रंहमाणः रंहतऽइति रंहमाणो गच्छन् दशापवित्राद्रोणकलशमभिगच्छन्नित्यर्थः । विधरे विधारये विधारयसि पुरुषव्यत्ययः धारयतेस्तङि लटि उत्तमैकवचने धारयेऽइति प्राप्ते छन्दस्युभयथेति [पा° ३.४.११७.] शितोऽप्यार्धधातुकत्वे सति णेरनिटीति [पा° ६.४.११.] शिल्लोपे धारे इति रूपम् ॥१८॥

V. a. विभूर्मात्रा प्रभूः पित्रा श्वोऽसि हयोऽस्त्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ।

ययुर्नामासि शिश्नुर्नामास्यादित्यानां पत्वान्विहि ।

b. देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षत ।

c. इह रन्तिः । d. इह रमताम् । e. इह धृतिः । f. इह स्वधृतिः स्वाहा ॥ ११ ॥

का° [२०. २. १८.] अधर्युयजमानौ दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति । तृतीयायां सावित्र्यामिष्टौ समाप्तायामधर्युयजमानौ दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति सूत्रार्थः ॥ अश्वदैवतं यजुः अतिजगतीछन्दस्कम् । मात्रा पित्रेति तृतीये पञ्चम्यर्थे हे अश्व त्वं मात्रा मातुः पृथिव्याः सकाशात् विभूरसि विभवति विभूः समर्थोऽसि पित्रा पितुः सकाशाद्दिवः प्रभूः समर्थोऽसि इयं वै मातासौ पिता ताभ्यामेवैनं परिददातीति [१३. १. ६. १.] श्रुतेः । अथ नामभिरश्वं स्तौति त्वमश्वोऽसि अश्नुते व्याप्नोति मार्गमित्यश्वः अशूप्रुषीत्यादिना [उणा° १. १५०.] अशेः क्वन्प्रत्ययः अश्नाति वाश्वः । हयोऽसि हयति याति हयः हय गतौ पचाद्यच् । अत्योऽसि अत सातत्यगमने अततीत्यत्यः सततगामी औणादिको यप्रत्ययः । मयोऽसि मयते गच्छति मयः मय गतौ पचाद्यच् यद्वा मय इति सुखनाम सुखरूपोऽसि । अर्वासि इयर्ति गच्छति अर्वा स्तामदिपद्यर्तिपृशकिभ्यो वनिन्निति [उणा° ४. ११४ (16.).] वनिन्प्रत्ययः यद्वा अर्वति हिनस्ति रिपूनित्यर्वा कनिन्प्रत्ययः । ससिरसि सपति सैन्येन समवैति ससिः सप सम्बन्धे क्विन्प्रत्ययः । वाजी असि वाजति तच्छीलो वाजी वज गतौ अनेकगतिसूचना पुनःपुनर्गत्युक्तिः यद्वा वाजाः पक्षा अभूवन्नस्येति वाजी । वृषासि वर्षति सिञ्चति वृषा कनिन्युवृषीत्यादिना [उणा° १. १५५.] कनिन्प्रत्ययः । नृमणा असि नृषु यजमानेषु मनो यस्य स नृमणाः । नाम नाम्ना ययुरसि अत्यर्थं याति ययुः ययुरश्वोऽश्वमेधीय इत्यभिधानात् [अमर° २. ८. ४५.] यो द्वे चेति [उणा° १. २१.] उप्रत्ययः । किं च नाम्ना शिश्नुरसि श्यति कृशं करोति स्तनमिति शिश्नुः शः कित्सन्वच्चेति [उणा° १. २०.] उप्रत्ययः सन्वद्भावाद्द्वित्वमभ्यासस्येकारश्च । एवंविधनामा त्वमादित्यानामदितेरपत्यानां देवानां पत्व मार्गमन्विहि पतन्ति गच्छन्ति यत्र स पत्वा मार्गः स्तामदोत्यादिना [उणा° ४. ११४.]

वनिन्प्रत्ययः आदित्या येन पथा गच्छन्ति तमनुगच्छ ॥ का० [२०.२.२०.] देवा आशापाला इति रक्षिणोऽस्यादिशत्यनुचरीज्ञातीयांस्तावतस्तावतः कवचिनिषङ्गिकलापिदण्डिनो यथासंख्यम् । चतुर्विंशतिवार्षिकाश्वशतमध्यस्थस्यैशान्यामुत्सृष्टस्य रक्षकान्नरानादिशति कीदृशान् अनुचरीसज्ञातीयान् तावतोऽनुचरीसंख्यान् तेन शतं राजपुत्रान् शतं क्षत्रियपुत्रान् शतं सूतग्रामण्यां पुत्रान् सूता अश्वपोषकास्तेषां मध्ये ग्रामण्यो मुख्यास्तत्सुतानित्यर्थः शतं क्षात्तृसंग्रहीतॄणां पुत्रान् क्षत्तार आयव्ययाध्यक्षास्तत्समूहः क्षात्तृं तत्राधिकृताः क्षात्तृसंग्रहीतारस्तत्सुतान् क्रमात्कवचिनिषङ्गिकलापिदण्डिनः तेन राजपुत्राः सेनाकृवन्तः क्षत्रियपुत्रा निषङ्गिणः सखड्गाः सूतग्रामणीपुत्रा इषुधिमन्तः क्षात्तृसंग्रहीतृपुत्राः वंशादिदण्डधरा इत्यर्थः । वडवाभ्यो जलस्नानाच्चाश्ववारणम् वर्षमश्वरक्षणम् तावद्यजमानो वावातोर्वोः शेते सावित्रीः कारयति वीणागानम् पारिप्लवशस्त्रपाठम् धृतिहोमं चेत्यादि ज्ञेयमिति सूत्रार्थः ॥ देवदेवत्यं यजुः ऋगुष्णिक् । आशा दिशः पालयन्तीति आशापाला हे देवा यूयमितमस्मं रक्षत कीदृशं मेधाय यागाय प्रोक्षितं प्रोक्षणेन संस्कृतम् राजपुत्राद्य एवाशापालाः तदुक्तम् शतं वै तल्क्या राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीति [१३.१.६.२.] ॥ का० [२०.३.४.] आकृवनीयेऽस्तमिते चतस्रो धृतीरिड रन्तिरिति । अस्तमितेऽर्केऽग्निहोत्रहोमात्प्रागग्निहोत्रार्थमुद्धृते आकृवनीयेऽग्नौ चतस्रो धृतिसंज्ञा आकृतीः प्रतिमन्त्रं जुहोति वर्षपर्यन्तं प्रत्यहम् एवं चत्वारिंशदधिका चतुर्दशशती भवति तथा च श्रुतिः [१३.१.६.२.] संवत्सरमाकृतीर्जुहोति षोडश नवतीरिता वाऽश्वस्य बन्धनं ताभिरेवैनं बध्नातीति ॥ चत्वारि यजूंषि अग्निदेवत्यानि । चतुर्थमन्त्रान्ते स्वाहाकारश्रवणात्त्रिष्वपि स्वाहाकारः प्रयोज्यः । अश्वं प्रत्युच्यते हे अश्व इड रन्तिः रमणं तेऽस्तु । इड भवान्रमताम् । इड ते धृतिः संतोषोऽस्तु । इड यज्ञे स्वधृतिः स्वा निजा धृतिर्धरणमस्तु स्वाहा ॥११॥

VI. काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञाताया॑दित्यै स्वाहादित्यै मह्यै स्वा-

क्षादित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ॥ २० ॥

का° [२०. ४. ३-५.] काय स्वाहेति चाश्वमेधिकानि त्रीणि कृष्णाजिनदीक्षाऽन्तो ऽधरदीक्षणीयायाश्चत्वारि त्रीणि-त्रीणि चाश्वमेधिकानि । चत्वार्याधरिकाण्यौद्भभणानि कृत्वा काय स्वाहेत्याश्वमेधिकानि त्रीण्यौद्भभणानि जुहुयात् अत औद्भभणहोमानन्तरं दीक्षणीयाशेषं समाप्य कृष्णाजिनदीक्षा तत्रोपवेशनान्ता कर्तव्या । सप्ताहं प्रचरन्तीति [१३. १. ७. २.] श्रुतेः सप्ताहं दीक्षणीया कार्या तत्र प्रत्यहं कर्तव्यमाह अधरदीक्षणीयायाश्चत्वारि चत्वार्यौद्भभणानि आकूत्यै प्रयुजे इत्यादीनि [४. ७.] त्रीणि त्रीणि चाश्वमेधिकानि काय स्वाहेतिकण्डिकापठितानि प्रत्यहमन्यान्यन्यानि पाठक्रमेण एवं सप्त-सप्त प्रत्यहं हूयन्ते । काय स्वाहेति कण्डिकायां सप्त त्रिकानि पठितानि तन्मध्ये सप्तस्वहःसु क्रमेणैकैकं त्रिकं हूयते तत्र द्वितीयत्रिके स्वाहाकाराग्यं मन्त्रत्रयं स्वाहाधिमाधीतायेत्यादीति सूत्रार्थः ॥ औद्भभणसंज्ञानि यजूंषि लिङ्गोक्तदेवतानि । काय प्रजापतये सुकृतमस्तु कस्मै प्रजापतये कतमस्मै प्रजापतिश्रेष्ठाय । आधिमाधानमाधीताय प्राप्ताय मनः मनसि वर्तमानाय प्रजापतये चित्तं विज्ञाताय सर्वेषां चित्तसाक्षिणे । अदित्यै अखण्डितायै मह्यै पूज्यायै अदित्यै सुमृडीकायै सुखयित्र्यै अदित्यै । सरस्वत्यै वागधिष्ठात्र्यै पावयति पावका तस्यै शोधयित्र्यै सरस्वत्यै बृहत्यै महत्यै सरस्वत्यै । पूष्णे प्रपथ्याय प्रगतः पन्थाः प्रपन्थाः तत्र भवः प्रपथ्यः तस्मै पूष्णे नरंधिषाय धिष् शब्दे क्षादिर्वैदिकः नरं दिधेष्टि शब्दयति उदयेन स नरंधिषः तस्मै पूष्णे इगुपधेति [पा° ३. १. १३५.] कः । त्वष्ट्रे त्वक्षति तनूकरोति त्वष्टा तस्मै तुरीपाय तुर वेगे तस्य रूपं तुरी वेगस्तं पाति रक्षति तुरीपस्तस्मै त्वष्ट्रे पुरुरूपाय पुरूणि बह्वनि रूपाणि यस्य तस्मै त्वष्ट्रे । वेवेष्टि व्याप्नोति विष्णुस्तस्मै निभूयपाय नितरां भूत्वा मत्स्या-

ग्रवतारं कृत्वा पाति निभूयपस्तस्मै विष्णवे शिपिषु पशुषु प्राणिषु विष्टः प्रविष्टोऽन्तर्यामिरूपेण शिपिविष्टस्तस्मै विष्णवे ॥ एते औद्भिदमन्त्राः ॥२०॥

विश्वो देवस्य नेतुः ॥२१॥

का० [२०.४.१.१०.] षडाग्निकानि चतुःस्थाने दशमं विश्वो देवस्येति । सप्तम्यां दीक्षणीयायामयं विशेषः प्रत्ययानि चत्वार्यौद्भिदान्याधरिकाणि क्रियन्ते तेषां चतुर्णां स्थाने षडाग्निकानि आकूतिं प्रयुजमग्निꣳ स्वाकृतिं [११.६६.] कृत्वाश्वमेधिकानि च त्रीणि विष्णवे स्वाकृत्यादीनि कृत्वा विश्वो देवस्येति दशममौद्भिदं जुहोतीति सूत्रार्थः ॥ व्याख्याता [४.८.] ॥२१॥

VII. आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥२२॥

का० [२०.४.११.] कृष्णाजिनाद्या समिदाधानात्कृत्वा ब्रह्मन्निति जपत्युत्सर्गकालꣳएके । कृष्णाजिनदीक्षात आरभ्योखायां त्रयोदशसमिदाधानान्तं कृत्वाध्वर्युरेवा ब्रह्मन्निति जपति उत्सर्गेऽपतिष्ठतꣳइत्युत्सर्गोपस्थानकाले एके आ ब्रह्मन्निति जपमिच्छन्ति यद्वाश्वस्योत्सर्गकाले विभूर्मात्रेति जपानन्तरमित्यर्थः ॥ लिङ्गोक्तदेवता उत्कृतिः । हे ब्रह्मन् (17.) राष्ट्रेऽस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः आजायतामुत्पद्यताम् । राजन्यः क्षत्रियश्चेदृश आजायतां । कीदृशः शूरः पराक्रमी शूर विक्रान्तौ शूरयति शूरः । इषव्यः इषुभिर्विध्यतीति इषव्यः यद्वा इषौ कुशलः इषव्यः । अतिव्याधी अत्यन्त विध्यतीत्यतिव्याधी शत्रुभेदनशीलः । महारथः एकः सहस्रं जयति स महारथः । दोग्ध्री दुग्धपूरयित्री धेनुः आजायतां राष्ट्रे इति सर्वत्र सम्बन्धः । अनड्वान्वृषभो वोढा वहनशीलो जायताम् । सप्तिरश्च आशुः शीघ्रगामी जायताम् । योषा स्त्री पुरंधिः पुरं शरीरं सर्वगुणसम्पन्नं दधाति पुरं-

धिः । रथे तिष्ठति रथेष्ठाः क्विप् सप्तम्या अलुक् रथे स्थितो युयुत्सुर्नरो जिष्णुः जयनशीलो जायताम् । युवा आ अस्येति पदव्याख्यानः अस्य यजमानस्य युवा समर्थः सभेयो सभायां योग्यो वीरः पुत्रो जायताम् सभायां साधुः सभेयः ढश्छन्दसीति [पा° ४.४.१०६.] सभाशब्दात्तत्र साधुरित्यर्थे ढप्रत्ययः । तस्य एयादेशः । किं च नो ऽस्माकं राष्ट्रे पर्जन्यो निकामे-निकामे नितरां कामनायां सत्यां वर्षतु अभ्यासो वीप्सार्थः । नो ऽस्माकमोषधयः यवाद्याः फलवत्यः फलयुक्ताः पच्यन्तां स्वयमेव पक्वा भवन्तु । नो ऽस्माकं योगक्षेमः कल्पतां योगेन युक्तः क्षेमो योगक्षेमः सकलो भवतु अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः ॥ २२ ॥

VIII. प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ २३ ॥

का° [२०.४.३१.] आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमन्त्रं सर्वरात्रमावर्तम् । आज्यादीनां प्रतिप्रकरमेकैकं क्रमेण सर्वरात्रमुत्तरवेदिस्थाग्नौ जुहोति प्राणाय स्वाहेत्यादिद्वादशकण्डिकात्मकैरनुवाकैः । किं कृत्वा आवर्तम् प्राणाय स्वाहेत्यादिकमेकशताय स्वाहेत्यन्तं मन्त्रगणमावर्त्यावर्त्य सर्वरात्रमिति द्वितीयायज्ञक्रियाङ्गहोमक्रियाया रात्रेः कार्त्स्न्येन संयोगः कार्यः ततः प्रथमयामे घृतेन यागः द्वितीये सक्तुभिः तृतीये धानाभिः चतुर्थे लाजैः । एकस्मै इति द्वादशेऽनुवाके [३४.] एकस्मै स्वाहा द्वाभ्यः स्वाहेत्यत्र त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहा अष्टभ्यः स्वाहा नवभ्यः स्वाहेत्येवमाद्यो मन्त्रा अपठिता अपि एकैकोच्चयेन शतपर्यन्ताः प्रयोज्याः एकोत्तरा जुहोतीति [१३.२.१.५.] श्रुतेः । व्युष्टायां समाप्तायां रात्रौ व्युष्टै स्वाहेति घृताहुतिमेकामुदिते सूर्ये स्वर्गाय स्वाहेति च जुहोतीति सूत्रार्थः ॥ लिङ्गोक्तदेवतानि यजूंषि । प्राणाद्य इन्द्रियदेवाः ॥ २३ ॥

IX. प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै

दिशे स्वाहोर्ध्वायै दिशे स्वाहोर्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २४ ॥

X. अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ २५ ॥

XI. वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुषाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥ २६ ॥

XII. अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः स्वाहाशाभ्यः स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २७ ॥

XIII. नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वौषधीभ्यः स्वाहा ॥ २८ ॥

XIV. पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पशुभ्यो विश्वेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ २९ ॥

XV. असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा मूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥३०॥

XVI. मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाꣳहसस्पतये स्वाहा ॥३१॥

XVII. वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥३२॥

XVIII. आयुर्यज्ञेन कल्पताꣳ स्वाहा प्राणो यज्ञेन कल्पताꣳ स्वाहापानो - व्यानो - स्वाहोदानो - समानो - चक्षुर्यज्ञेन - श्रोत्रं - वाग्यज्ञेन - मनो - स्वाहात्मा - ब्रह्मा - ज्योतिर्यज्ञेन - स्वाहा स्वर्यज्ञेन - पृष्ठं - यज्ञो यज्ञेन कल्पताꣳ स्वाहा ॥३३॥

XIX. एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्टै स्वाहा स्वर्गाय स्वाहा ॥३४॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां द्वाविंशोऽध्यायः ॥२२॥

प्राच्यै । दिग्देवताः ॥२४॥ अद्भ्यः । जलदेवताः ॥२५॥ वाताय । मेघोपयोगिदेवताः ॥२६॥ अग्नये । अग्न्यादयः प्रसिद्धाः ॥२७॥ नक्षत्रेभ्यः । नक्षत्रादयः कालाधिष्ठात्र्यः ॥२८॥ पृथिव्यै । पृथिव्यादयो लोकाधिष्ठात्र्यः ॥२९॥ असवे । अस्वादयश्च ॥३०॥ मधवे । मधादयो मासाधिष्ठातारः ॥३१॥ वाजाय । वाजादयोऽन्नाधीशाः ॥३२॥ आयुः । यज्ञेनाश्वमेधेनायुः कल्पताम् एवमग्नेऽपि प्रार्थनामन्त्राः ॥३३॥ एकस्मै । संख्याधीशाः । व्युष्टी रात्रिः स्वर्गो दि-

नम् रात्रिर्वै व्युष्टिरहः स्वर्गोऽहोरात्रेऽएव तत्प्रीणातीति श्रुतेः [१३.२.१.६.] ॥ प्राणाद्योऽश्वमेधस्यावयविनोऽवयवाः स च प्रजापतेरवयवः स आत्मन इत्यात्मैव स्तूयते रज्यते इति भावः सर्वमिदं यदयमात्मेति श्रुतेः ॥३४॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
अश्वमेधाङ्कृतिर्नाम द्वाविंशोऽध्याय ईरितः ॥२२॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

I-IV. ॥ ४.५ a-e ॥४॥ ५ f ॥५॥ ७ ॥७-९॥ ८ ॥१०-१२॥ १-१६ [हव्यवाल्मं°] ॥१३-२०॥ तं त्वा घृतस्नऽईमहे चित्रभानो स्वर्विदम् । देवाँ३ आ वीतये वह ॥२१॥ १७ ॥२२॥

V. ॥ १८ ॥२३॥ VI. ॥ १९ a ॥२४॥ १९ b-f ॥२५॥

VII. ॥ २० [सुमृलीकायि] ॥२६-२८॥ २१ ॥२९॥

VIII. ॥ २२ [वोल्हा] ॥३०-३२॥ IX-XIII. २३-२७ ॥३३-३७॥

XIV. ॥ २८ नक्षत्रेभ्यः - °थिवीभ्याꣳ स्वाहा ॥३८॥ चन्द्राय - देवेभ्यः स्वाहा ॥३९॥

XV. ॥ २८ मूलेभ्यः - ओषधीभ्यः स्वाहा ॥४०॥

XVI. ॥ २९ ॥४१॥ XVII. ॥ ३० ॥४२-४३॥

XVIII. ॥ ३१ ॥४४॥

XIX. ॥ ३२ [स्वाहाल्यायनाय भौवनाय] ॥४५॥

XX. ॥ ३३ [पृष्ठं - ब्रह्मा - यज्ञो - ज्योतिर्यं° - स्वर्यं°] ॥४६॥

XXI. ॥ ३४ ॥४७॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां चतुर्विंशोऽध्यायः ॥२४॥ ॥

I. हिरण्यगर्भः समवर्तता° ॥१॥

श्रीगणाधिपतये नमः (1.) ॥ द्वाविंशे क्रोममन्त्रास्त्रयोविंशेऽध्याये शिष्टं कर्मोच्यते ॥ का॰ [२०.५.१.२.] प्रातरुक्थ्यो महिमानौ गृह्णाति सौवर्णेन पूर्वꣳ हिरण्यगर्भ इति । प्रानर्द्वितीयेऽहनि उक्थ्यसंस्थमकर्भवति तत्र महिमसंज्ञौ द्वौ ग्रहौ गृह्णाति आगत्वादाग्रयणोक्थ्ययोर्मध्ये तौ गृह्णाति अन्तराग्रयणोक्थ्यावागत्वस्थानं ग्रहाणामिति वचनात् द्वयोर्मध्ये पूर्वं महिमानं सौवर्णेनोलूखलेन गृह्णाति ॥ व्याख्याता [१३.४.] ॥१॥

a. उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि ।

b. एष ते योनिः सूर्यस्ते महिमा ।

c. यस्तेऽहन्त्संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥२॥

उपयाम॰ प्रजापतये जुष्टं रुचितं त्वां हे ग्रहाहं गृह्णामि ॥ का॰ [१.५.२५.] एष ते योनिरिति ग्रहसादनम् । एष ते योनिः स्थानं ते तव महिमा शक्तिः सूर्यः दीपस्येव प्रभा ॥ का॰ [२०.७.१६.] यस्तेऽहन्निति जुहोति । पूर्वमहिमानं ग्रहं जुहोति वषट्कृते सर्वहुतम् ॥ देवदेवत्यं यजुः द्व्यधिका शक्वरी । हे महिमन् यः ते तव महिमा अहन् अह्नि दिवसे संवत्सरे च निमित्ते सम्बभूव उत्पन्नः वायौ अन्तरिक्षे च यः तव महिमा सम्बभूव दिवि सूर्ये च यस्ते महिमा सम्बभूव ते तव तस्मै महिम्ने प्रजापतये देवेभ्यश्च स्वाहा सुहुतमस्तु ॥२॥

II. यः प्राणतो निमेषतो महित्वैकऽइद्राजा जगतो बभूव ।

य ईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥

का॰ [२०.५.२.] द्वितीयꣳ राजतेन यः प्राणत इति । द्वितीयं महिमानं ग्रहं राजतेनोलूखलेन गृह्णाति ॥ हिरण्यगर्भदृष्टा कदेवत्या त्रिष्टुप् । तस्मै कस्मै प्रजापतये देवाय वयं हविर्विधेम हविर्दद्मः विधतिर्दानार्थः तृतीया द्वितीयार्थे । तस्मै कस्मै यः प्रजापतिः प्राणतः प्राणनं जीवनं कुर्वतो निमेषतो निमेषणं कुर्व-

तः उपलक्षणमेतत् दृगादीन्द्रियव्यापारं कुर्वतः सचेतनस्य जगतः विश्वस्य एक एव राजा बभूव केन महिम्ना महेर्महिम्नो भावो महित्वं तेन महित्वेन विभक्तेः पूर्वसवर्णः महाभाग्येनेत्यर्थः । यश्चास्य द्विपदः द्वौ पादौ यस्य स द्विपात् तस्य पादः पदिति [पा° ६.४.१३०.] पदादेशः द्विपादस्य मनुष्यपक्ष्यादेः चतुष्पदः हस्तिगवादेः प्राणिजातस्य ईशे ईष्टे ऐश्वर्यं करोति लोपस्त आत्मनेपदेष्विति [पा° ७.१.४१.] तकारलोपे ईशे इति रूपम् अधीगर्थदयेशां कर्मणीति [पा° २.३.५२.] कर्मणि षष्ठी ॥३॥

a. उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि ।

b. एष ते योनिश्चन्द्रमास्ते महिमा ।

c. यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥४॥

उपयामपात्रेण गृहीतोऽसि प्रजापतये जुष्टं त्वां गृह्णामि ॥ सादयति । एष ते । चन्द्रमास्ते तव महिमा दीप्तिः ॥ का° [२०.७.२६.] वपास्ते द्वितीयेन पूर्ववद्यस्ते रात्रावितिं जुहोति । वपायागास्ते द्वितीयेन महिम्ना पूर्ववदिति सर्वकृतं महिमानं जुहोति ॥ अष्टिः के महिमन् रात्रौ संवत्सरे च यस्ते तव महिमा सम्बभूव पृथिव्यामग्नौ च यस्ते महिमा सम्बभूव नक्षत्रेषु चन्द्रमसि च यस्तव महिमा सम्बभूव सर्वव्यापकस्तव यो महिमा तस्मै महिम्ने प्रजापतये देवेभ्यश्च स्वाहा सुहुतमस्तु ॥४॥

III. युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥५॥

का° [२०.५.११.] युनक्त्येनं युञ्जन्ति ब्रध्नमिति । अश्वं रथे युनक्ति ॥ मधुछन्दो-दृष्टा आदित्यदेवत्या गायत्री । तस्थुषः विभक्तेर्व्यत्ययः तस्थिवांसः कर्मार्थं स्थिता ऋत्विजः ब्रध्नमादित्यं युञ्जन्ति रथे योजयन्ति । अश्व आदित्यत्वेन स्तूयते असौ वा ऽआदित्यो ब्रध्नोऽरुषोऽमुमेवास्याऽआदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै इति

श्रुतेः [१३.२.६.१.] । किम्भूतं ब्रध्नम् अरुषं रोषति क्रुध्यति रुषः इगुपधेति [पा° ३.१.१३५.] कः न रुषः अरुषः तं क्रोधरहितम् परिचरन्तं वैदिककर्मसिद्ध्यर्थं सर्वत्र गच्छन्तम् । यस्य ब्रध्नस्य रोचना विभक्तिलोपः रोचनाः दीप्तयो दिवि आकाशे रोचन्ते प्रकाशन्ते यद्वा रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि ब्रध्नस्य भासा रोचन्ते तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलका इति ज्योतिःशास्त्रोक्तेः ॥५॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥६॥

का° [२०.५.११.] इतराँश्च युञ्जन्त्यस्येति । इतरान् त्रीनश्वान्रथे युनक्ति ॥ गायत्री अश्वस्तुतिः । ऋत्विजो हरी अश्वौ रथे युञ्जन्ति । कीदृशौ अस्याश्वमेधिकाश्वस्य काम्या काम्यौ काम्येते तौ काम्यौ कामसम्पादिनौ न त्वेको रथं वोढुं शक्त इति तौ काम्यौ विपक्षसा पक्ष परिग्रहे असुन्प्रत्ययः पक्षयन्ति शरीरं गृह्णन्ति पक्षसः पक्षाः विविधाः पक्षसः पक्षाः ययोस्तौ विपक्षसौ यद्वा विरिति शकुनिनाम वेतेर्गतिकर्मण इति यास्कः [निरु° २.६.] वेः पक्षिण-इव पक्षसो ययोस्तौ (2.) । शोणा शोणौ रक्तौ धृष्णू प्रगल्भौ जिधृषा प्रागल्भ्ये क्नुप्रत्ययः । नृवाहसा नृन्वहतस्तौ वहेरसुन्प्रत्ययः सर्वत्र विभक्तेराकारः नृणां वोढारौ ॥६॥

यद्वातोऽअपोऽअग्नीगन्प्रियामिन्द्रस्य तन्वम् ।
एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥७॥

का° [२०.५.१४.] अपो यात्रावगाढेषु वाचयति यद्वात इति । चतुर्भिरश्वैर्युक्तं रथमध्वर्युयजमानावारुह्य तडागादिजलं गत्वा जलं प्रविष्टेष्वश्वेषु यजमानं वाचयति ॥ वृहती अश्वस्तुतिः । सिंहो माणवक इति वत् वातः वातसमानवेगोऽश्वः यत् यस्मात् अपो जलानि अगनीगन् इन्द्रस्य प्रियं तन्वं शरीरं चागनीगन् अत्यर्थं गतः दाधर्तिदर्धर्तीत्यादिना [पा° ७.४.६५.] यङ्लुगन्तो निपातः अतो हे स्तोतः अध्वर्यो एतं नोऽस्माकमश्वमनेन पथा मार्गेण येन गतस्तेन पुनरावर्तयासि आवर्तय आनय लेटोऽडाटौ पुरुषव्यत्ययः ॥७॥

a. वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा । b. रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा ।

c. आदित्यास्त्वाज्जन्तु जागतेन छन्दसा । e. भूर्भुवः स्वर्लाजी३ऽज्ञाची३न्यव्ये गव्यं३ एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ॥ ८ ॥

का° [२०.५.१५.] आयाय विमुक्तमश्वं महिषी वावाता परिवृक्ताभ्येनाभ्यञ्जन्ति पूर्वकायमध्यापरकायान्यथादेशं वसवस्त्वेति प्रतिमन्त्रम् । आयाय जलप्रदेशाद्विवयजनमागत्य रथाद्विमुक्तमश्वं महिष्याद्यास्तिस्रः पत्न्यो यथाक्रममश्वस्य पूर्वादिकानभ्यञ्जन्ति घृतेन महिषी पूर्वकायं वसव इति वावाता देहमध्यं रुद्रा इति परिवृक्ता पश्चाद्भागमादित्या इति मन्त्रेणेति सूत्रार्थः ॥ त्रीणि यजूंषि लिङ्गोक्तदेवत्यानि । हे अश्व वसवोऽष्टौ देवा गायत्रेण छन्दसा त्वा त्वामज्जन्तु स्निग्धं कुर्वन्तु । रुद्रा एकादश त्रैष्टुभेन छन्दसा त्वामज्जन्तु । आदित्या द्वादश जागतेन छन्दसा त्वामज्जन्तु ॥ का° [२०.५.१६.] अभ्रश्यमानान्मणीन्सौवर्णानेकशतमेकशतं केसरापुच्छेषावयन्ति भूर्भुवः स्वरिति प्रतिमन्त्रव्याकृति । महिष्याद्यास्तिस्रः पत्न्यः एकाधिकं शतं सुवर्णमयमणीन् यथा न पतन्ति तथा केसरयोः शिरःस्कन्धस्थयोः पुच्छे चाबध्नन्ति महिष्यश्वशिरोरोमसु भूरिति एकशतं मणीन्प्रवयति वावाता ग्रीवारोमसु भुव इति परिवृक्ता पुच्छरोमसु स्वरिति वयतीति सूत्रार्थः ॥ भूर्भुवः स्वः व्याख्याताः ॥ का° [२०.५.१८.] अश्वाय रात्रिकृतशेषं प्रयच्छति लाजीञ्छाचीनिति । सक्तुधानालाजान्वयं रात्रिकृतशेषमश्वाय ददाति भक्ष्याय । अश्वो नात्ति चेत् जले प्रक्षेपः ॥ लाजीन् (3.) अश्वदेवत्यं यजुः । लाजानां समूहो लाजीनित्युक्तः सक्तूनां समूहः शाचीन् यश्चायं यव्ये यव्यः यवसमूहः गव्ये गव्यः गोर्विकारसमूहो दध्यादिः हे देवा एतदन्नमत्त भक्षयत हे प्रजापते एतदन्नमद्धि भक्षय येभ्योऽश्वः प्रोक्षितस्तद्रूपोऽश्वः सम्बोध्यते ॥ ८ ॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥ १ ॥

का° [२०.५.२०.] ब्रह्मा पृच्छति होतारं यूपमभितः कः स्विदेकाकीति । यूपस्य दक्षिणत उदङ्मुखो ब्रह्मा यूपोत्तरतो दक्षिणामुखं होतारं पृच्छति ॥ ब्रह्मोद्ये कर्मणि होतुर्ब्रह्मणश्च प्रश्नप्रतिप्रश्नभूताश्चतस्रोऽनुष्टुभः । स्विदिति वितर्के एकः

असक्थयः कः चरति गछति । ॐ पादपूरणः कः स्वित् विनष्टः सन्पुनर्जायते ऊ-त्पद्यते । किं स्वित् क्ष्मस्य शीतस्य भेषजमौषधम् । किं स्वित् मरुत् आवपनम् आ समन्ताद्वप्यते यस्मिंस्तद्वपनस्थानम् ॥ ९ ॥

सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्क्ष्मस्य भेषजं भूमिरावपनं मरुत् ॥ १० ॥

का॰ [२०.५.२१.] सूर्य इत्याचष्टे । होता ब्रह्माणं प्रति वक्ति ॥ सूर्योऽसक्थयो गछति अनेन होतृब्रह्माणौ यजमाने ब्रह्मवर्चसं धत्तः असौ वाऽआदित्य एका-की चरत्येष ब्रह्मवर्चसं ब्रह्मवर्चसमेवास्मिंस्तद्धत्त इति [१३.२.६.१०.] श्रुतेः । चन्द्रमाः क्षीणः पुनर्जायते वर्धते अनेनायुर्धत्तः चन्द्रमा वै जायते पुनरायुरेवा-स्मिंस्तद्धत्त इति [१३.२.६.११.] श्रुतेः । क्ष्मस्य भेषजमग्निः अनेन तेजो धत्तः अ-ग्निर्वै क्ष्मस्य भेषजं तेज एवास्मिंस्तद्धत्त इति [१२.] श्रुतेः । भूमिरयं लोको म-रुदावपनम् अनेनास्मिन्प्रतिष्ठां धत्तः अयं वै लोक आवपनं मरुदस्मिन्नेव लोके प्रतितिष्ठतीति [१३.] श्रुतेः ॥ १० ॥

का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशंगिला ॥ ११ ॥

का॰ [२०.५.२२.] होता ब्रह्माणं का स्विदासीदिति । होता ब्रह्माणं पृछति ॥ पूर्वं चिन्त्यतऽइति पूर्वचित्तिः सर्वेषां प्रथमस्मृतिविषया का स्वित् बृहत् मरुत् वयः पक्षी किं स्वित् आसीत् । पिलिप्पिला का स्वित् पिशंगिला च का स्वि-दासीत् ॥ ११ ॥

द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशंगिला ॥ १२ ॥

का॰ [२०.५.२३.] द्यौरिति प्रत्याह । ब्रह्मा होतारं प्रति वक्ति ॥ पूर्वचित्तिः पूर्वस्मरणविषया द्यौर्वृष्टिरासीत् द्योशब्देन वृष्टिर्लक्ष्यते सर्वप्राणिनामिष्टत्वात् तथा च श्रुतिः [१३.२.६.१४.] द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेव वृष्टिमवरुन्द्धे इति ॥

अश्वः बृहद्वयः आसीत् अश्वशब्देनाश्वमेधो लक्ष्यते अश्वमेधेन वयसेव स्वर्गमारोहतीत्यश्वमेधो वयः । अवतीत्यविः पृथिवी पिलिप्पिलासीत् वृष्या भूः पिलिप्पिला चिक्कणा भवति श्रीर्वै पिलिप्पिलेति [१३.२.६.१६.] श्रुत्या श्रयन्त एनामिति श्रीशब्देन भूरेव । रात्रिः पिशंगिला आसीत् पिशमिति (4.) रूपनाम पिशं रूपं गिलतीति पिशंगिला रात्रौ सर्वाणि रूपाण्यन्तर्भवन्ति ॥१२॥

IV. a. वायुष्ट्वा पचतैरवतु । b. असितग्रीवश्छागैः । c. न्यग्रोधश्चमसैः । d. शल्मलिर्वृद्ध्या । e. एष स्य राध्यो वृषा । f. पड्भिश्चतुर्भिरिदंगन् । g. ब्रह्माकृष्णश्च नोऽवतु । h. नमोऽग्नये ॥१३॥

का० [२०.६.७.] अश्वप्रोक्षणमश्वस्त्वा वायुष्ट्वेति । अश्वस्त्वौषधीभ्य इति प्राकृतमन्त्रेण [६.१.] वायुष्ट्वेत्यारभ्य देवः सविता दधात्वित्यन्तेन [१६.] कण्डिकाचतुष्टयेनाश्वमेधिकेन चाश्वप्रोक्षणं करोतीति सूत्रार्थः ॥ चत्वारि यजूंष्यश्वदेवत्यानि । हे अश्व वायुः पचतैः पाकैः त्वा त्वामवतु वायुसंयोगादग्निः शीघ्रं पचति । असिता ग्रीवा यस्य धूमेनेत्यसितग्रीवोऽग्निः छागैः त्वामवतु अग्निर्वाऽअसितग्रीव इति [१३.२.७.२.] श्रुतिः कृष्णग्रीव आग्नेयो ररांट इति [२४.१.] वक्ष्यमाणत्वाद्यज्ञेषु कृष्णग्रीवादयः पञ्चदश पर्यग्नयः पशवः सन्ति तैरग्निरवत्वित्यर्थः । न्यग्रोधः चमसैः सोमपात्रैः त्वामवतु । शल्मलिः वृक्षविशेषो वृद्ध्या त्वामवतु शल्मलिर्वनस्पतीनां वर्षिष्ठ वर्धतऽइति [१३.२.७.४.] श्रुतिः ॥ किं च स्यः स एष वृषा सेक्ताश्वः राध्यः रथे साधुः षड्भिः पादैः चतुर्भिरिव आ अगन् आगतः आ इदगन्निति पदच्छेदः अश्वस्त्रिभिः पादैस्तिष्ठति चतुर्भिश्च गच्छतीति चतुर्यज्ञाम् तथा च श्रुतिः [१३.२.७.५.] तस्मादश्वस्त्रिभिस्तिष्ठत्यथ युक्ताः सर्वैः षड्भिः सममायुतऽइति । पदशब्दस्य डात्वं छान्दसम् । किं च अकृष्णः नास्ति कृष्णं लाञ्छनं यस्मिन्स ब्रह्मा चन्द्रो नोऽस्मानवतु चन्द्रमा वै ब्रह्माकृष्णश्चन्द्रमसऽएनं परिददातीति [१३.२.७.७.] श्रुतेः । नोऽस्माकमश्वमवत्विति वा । अग्नये नमः नमस्कारोऽस्तु विघ्नाभावायाग्नेर्नतिः क्रियते ॥१३॥

सꣳशितो रश्मिना रथः सꣳशितो रश्मिना क्रयः ।

सꣳशितोऽअ॒प्स्वप्सु॒ज्ञा ब्रह्मा सोम॑पुरोगवः ॥ १४॥

अश्वदेवत्यानुष्टुप् । सम्पूर्वः श्यतिः शोभनार्थः रथः रश्मिना कृत्वा संशितः दर्शनीयो भवति तस्माद्रथः पर्युतो दर्शनीयतमो भवतीति [१३.२.७.८.] श्रुतेः । कृयोऽश्वो रश्मिना संशितः शोभितः । अप्सु जायते अप्सुज्ञा अश्वः अप्सु अद्भिः संशितः विभक्तिव्यत्ययः अप्सुयोनिर्वाऽअश्व इति [१३.२.७.१०.] श्रुतेः । कीदृशः ब्रह्मा परिवृढः सोमपुरोगमः (5.) सोमः पुरोगमोऽग्रगामी यस्य सः सोमं पुरस्कृत्य स्वर्गं लोकं गच्छति सोमपुरोगममेवैनꣳ (6.) स्वर्गं लोकं गमयतीति [१०.] श्रुतेः ॥ १४॥

स्व॒यं वा॑जिँस्त॒न्वं॑ कल्पयस्व स्व॒यं य॑जस्व स्व॒यं जु॑षस्व ।
म॒हि॒मा ते॒ऽन्येन॒ न स॑न॒शे ॥ १५॥

आश्वी विराट् । हे वाजिन् स्वयं तन्वं शरीरं त्वं कल्पयस्व स्वयं रूपं कुरुष्व यादृशमिच्छसीति [१३.२.७.११.] श्रुतेः स्वाराड्यं तवास्तीति भावः अतः स्वयं यजस्व न तवान्यो यष्टास्ति स्वयं जुषस्व इष्टस्थानं सेवस्व । यतस्ते तव महिमा अन्येन महिम्ना न संनशे न संनश्यते न व्याप्यते नशिरदर्शनार्थोऽत्र तु व्याप्त्यर्थः तलोपे यलोपे नशे रूपम् ॥ १५॥

न वाऽउ॒एत॒न्म्रि॑यसे॒ न रि॑ष्यसि दे॒वाँ२॑ऽइ॒दे॑षि प॒थिभिः॑ सु॒गेभिः॑ ।
यत्रा॑सते सु॒कृतो॒ यत्र॒ ते य॒युस्तत्र॑ त्वा दे॒वः स॑वि॒ता द॑धातु ॥ १६॥

आश्वी त्रिष्टुप् । हे अश्व अस्माभिर्यत्नं संज्ञप्यसे एतन्न म्रियसे मरणं नाप्नोषि न च रिष्यसे न विनश्यसि विशस्यमानः । वै उ निपातौ पादपूरणौ । यत्सुगेभिः सुगैः सुदुरोरधिकरणेऽइति [पा॰ ३.१.४८. वा॰ ३.] गमेर्डप्रत्ययः साधुगमनैः पथिभिः देवयानमार्गैः देवानित् देवान्प्रति एषि गच्छसि । किं च सुकृतः साधुकारिणो नरा यत्र लोके आसते तिष्ठन्ति यत्र च ते सुकृतो ययुर्गताः तत्र लोके सविता देवः त्वा त्वां दधातु स्थापयतु सवितैवैनꣳ स्वर्गे लोके दधातीति [१३.२.७.१२.] श्रुतेः ॥ १६॥

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबेता अपः । वायुः पशुरा° - °जयद्यस्मिन्वायुः स - । सूर्यः पशुरा° - °जयद्यस्मिन्त्सूर्यः स - ॥१७॥

का° [२०.६.८.] उपगृह्णात्यपां पेरुरग्निः पशुरिति । अपां पेरुरिति [६.१०.] प्राकृतेन मन्त्रेणाग्निः पशुरिति वैकृतेन च प्रोक्षणीरभ्यस्ये उपगृह्णातीति सूत्रार्थः ॥ अश्वदेवत्यानि त्रीणि यजूंषि । सृष्टिदेवानामग्निः पशुरासीत् तेनाग्निरूपेण पशुना देवा अयजन्त ईजिरे स पशुभावमुपगतोऽग्निः एतं लोकं पृथ्वीलोकमजयत् यस्मिन् लोकेऽग्निः हे अश्व स लोकः ते तव भविष्यति तं लोकं त्वं जेष्यसि एताः प्रोक्षणीरपः पिब । तथा च श्रुतिः [१३.२.७.१३.] यावानग्नेर्विजयो यावां लोको यावदैश्वर्यं तावांस्ते विजयस्तावां लोकस्तावदैश्वर्यं भविष्यतीत्येवैनं तदाहेति ॥ वायुः पशुरासीत् सूर्यः पशुरासीत् वायुलोकोऽन्तरिक्षं सूर्यलोकः स्वर्गः तावपि ते भविष्यत इत्यर्थः ॥१७॥

V. a. प्राणाय स्वाहा । b. अपानाय स्वाहा । c. व्यानाय स्वाहा ।
d. अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥१८॥

का° [२०.६.११.] परिपशव्ये हुत्वा प्राणाय स्वाहेति तिस्रोऽपराः । परिपशव्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेति [६.११.] द्वे आहुती हुत्वा प्राणायेत्याद्यास्तिस्र आहुतीर्जुहोति एकामश्वसंज्ञपनादौ चतस्रोऽन्ते इति सूत्रार्थः ॥ त्रीणि यजूंषि । प्राणाय अपानाय व्यानाय आभिराहुतिभिरश्वं प्राणवन्तं करोति तथा च श्रुतिः [१३.२.८.२.] प्राणानेवास्मिन्नेतद्दधाति तथो हास्यैतेन जीवतैव पशुनेष्टं भवतीति ॥ का° [२०.६.१२.] वाचयति पत्नीर्नियन्नमस्तेऽम्बऽइति । सर्वाः पत्नीः पशुशोधनाय पात्रेजनीहस्ताः पशून्प्रति नियन्नमस्तेऽआतानेति [६.१२.] प्राकृतं मन्त्रमम्बेऽइत्याश्वमेधिकं च वाचयतीति सूत्रार्थः ॥ अश्वदेवत्यानुष्टुप् । पत्न्यः परस्परं वदन्ति हे अम्बे हे अम्बिके हे अम्बालिके नामान्येतानि कश्चन नरो मां न

नयति अश्वं प्रति न प्रापयति तर्हि किमर्थं गम्यते तत्राह अश्वकः कुत्सितोऽश्वो ऽश्वकः अकुत्सितोऽपीर्ष्यया कुत्स्यते सुभद्रिकां कुत्सिता सुभद्रा सुभद्रिका ईर्ष्यया कुत्स्यते तां नारीमादाय ससस्ति शेते सस् स्वप्ने ष्ठादिः मद्गमनेऽश्वोऽन्यामादाय शयिष्यतऽइति मया गम्यते न तु मां कश्चिन्नयतीति भावः । किम्भूतां सुभद्रिकाम् काम्पीलवासिनीं काम्पीले नगरे वसतीति काम्पीलवासिनी ताम् तत्र हि विदग्धाः सुरूपाः कामिन्यो भवन्ति आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे अम्बालेऽम्बिकेपूर्वेऽइति [पा° ६.१.११८.] प्रकृतिभावः (7.) ॥१८॥

a. गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम । b. आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥१९॥

का° [२०.६.१३.] अश्वं त्रिरिः परियन्ति पितृवन्मध्ये गणानां प्रियाणां निधीनामिति । सर्वाः पत्न्यः पात्नेवतनकृत्ता एव प्राणशोधनात्प्राक् अश्वं त्रिरिः परियन्ति मध्ये पितृवत् अप्रदक्षिणं परियन्ति त्रिः त्रिभिर्मन्त्रैः वसो ममेति त्रिधप्यनुषङ्गः ततश्चैवम् प्रथमं गणानामिति त्रिः प्रदक्षिणं परियन्ति तत्र सकृन्मन्त्रेण द्विस्तूष्णीम् ततः प्रियाणामित्यप्रदक्षिणं त्रिः निधीनामिति प्रदक्षिणं त्रिः एवं नवकृत्व इति सूत्रार्थः ॥ त्रीणि यजूंषि लिङ्गोक्तदेवत्यानि । हे अश्व वयं त्वां हवामहे आह्वयामः कीदृशं त्वाम् गणपतिं गणानां मध्ये गणपतिं गणरूपेण पालकम् प्रियाणां वल्लभानां मध्ये प्रियपतिं प्रियस्य पालकम् निधीनां सुखनिधीनां मध्ये निधिपतिं सुखनिधेः पालकं त्वां हवामहे । हे वसुरूप अश्व मम पतिस्त्वं भूया इति शेषः ॥ का° [२०.६.१४.] प्रज्वालितेषु महिष्यश्वमुपसंविशत्याहमजानीति । प्रज्वालितेषु शोधितेषु पशूनां प्राणेषु पत्नीभिरध्वर्युणा यजमानेन प्राणशोधने कृते महिषी अश्वसमीपे शेते ॥ अश्वदेवत्यम् । हे अश्व गर्भधं गर्भं दधाति गर्भधं गर्भधारकं रेतः अहम् आ अजानि आकृष्य (8.) क्षिपामि अज गतिक्षेपणयोः .लोट् (9.) तं च गर्भधं रेतः आ अजासि आकृष्य क्षिपसि ॥१९॥

ताऽऊभौ चतुरः पदः सम्प्रसारयाव स्वर्गे लोके प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु ॥२०॥

पूर्वमन्त्रशेषः । तौ त्वमहं च ऊभौ चतुरः पदः पादानावां सम्प्रसारयाव तव द्वौ मम द्वौ एवं संवेशनप्रकारः ॥ का० [२०. ६. १४.] अधीवासेन प्रह्लादयति स्वर्गे लोकऽइति । अधीवासेनाश्वमहिष्यौ ह्लादयति अध (10.) उपरिष्टाच्चाह्लादनवन्नमं वासोऽधीवासः ॥ अश्वदेवत्यम् । अधर्युर्वदति । हे अश्वमहिष्यौ युवां स्वर्गे लोकेऽस्यां यज्ञभूमौ प्रोर्णुवाथां वास आह्लादयतम् ऊर्णुञ् आह्लादने एष वै स्वर्गो लोको यत्र पशुश्च संज्ञपयन्तीति [१३. २. ८. ५.] श्रुतेः ॥ का० [२०. ६. १६.] अश्वशिश्नमुपस्थे कुरुते वृषा वाजीति । महिषी स्वयमेवाश्वशिश्नमाकृष्य स्वयोनौ स्थापयति ॥ अश्वदेवत्यम् । वाजी अश्वो रेतो दधातु मयि वीर्यं स्थापयतु कीदृशोऽश्वः वृषा सेक्ता रेतोधाः रेतो दधातीति रेतोधाः वीर्यस्य धारयिता ॥२०॥

VI. उत्सक्थ्या अव गुदं धेहि समञ्जिं चारया वृषन् ।
य स्त्रीणां जीवभोजनः ॥२१॥

का० [२०. ६. १७.] उत्सक्थ्या इत्यश्वं यजमानोऽभिमन्त्रयते ॥ अश्वदेवत्या गायत्री । हे वृषन् सेक्तः अश्व महिष्या गुदमव गुदोपरि रेतो धेहि वीर्यं धारय कीदृश्याः उत्सक्थ्याः उत् ऊर्ध्वे सक्थिनी ऊरू यस्याः सा उत्सक्थी तस्याः । कथम् तदाह अञ्जिं लिङ्गं संचारय अनक्ति व्यनक्ति पुंस्त्वमित्यञ्जिर्लिङ्गम् लिङ्गं योनौ प्रवेशय योऽञ्जिः स्त्रीणां जीवभोजनः जीवयति जीवः भोजयति भोजनः जीवश्चावौ भोजनश्च जीवभोजनः यस्मिन् लिङ्गे योनौ प्रविष्टे स्त्रियो जीवन्ति भोगांश्च लभन्ते तं प्रवेशय ॥२१॥

यकासकौ शकुन्तिकाहलगिति वञ्चति ।
आहन्ति गभे पसो निगल्गलीति धारका ॥२२॥

का० [२०. ६. १८.] अधर्युब्रह्मोद्गातृहोतृदक्षाराः कुमारीपत्नीभिः संवदन्ते यकासकाविति दशर्चस्य द्वाभ्यां-द्वाभ्याञ्च रूपे-रूपेऽसावित्यामन्त्र्यामन्त्र्य । अधर्युरादयः

पक्ष कृये-कृयेऽसाविति सम्बुद्ध्यन्तनामोच्चारणपूर्वकं संमुखीकृत्य यकासकाविति दृशर्चसम्बन्धिनीभ्यां द्वाभ्यामृग्भ्यां कुमारीपत्नीभिः सह सोपहासं संवदन्ति तत्र प्रथममध्वर्युः कुमारीं पृच्छति कुमारि कृये कृये कुमारि यकासकौ शकुन्तिकेतीत्यर्थः ॥ कुमार्यादिदेवत्या दश तन्मध्ये द्वितीयोपरिष्टाद्बृहती अन्या नवानुष्टुभः । अव्ययसर्वनाम्नामकच् प्राक् टेरिति [पा° ५.३.७१.] अकच् कुत्सायाम् । अल्पा शकुन्तिः शकुन्तिका अल्पेऽर्थे [पा° ५.३.८५.] कन् । अङ्गुल्या योनिं प्रदेशयन्नाह । यका या असकौ असौ शकुन्तिका अल्पपक्षिणीव आकूलक् शब्दानुकरणम् कूले कूले इति शब्दयन्ती वक्षति गच्छति । स्त्रीणां शीघ्रगमने योनौ कूलकूलाशब्दो भवतीत्यर्थः । गभे वर्णविपर्यय आर्षः भगे योनौ शकुनिसदृश्यां यदा पसो लिङ्गमाकृन्ति आगच्छति पस इति पसतेः स्पृशतिकर्मण इति [निरु° ५.१६.] यास्कः पुंस्प्रजननस्य नाम कृन्तिर्गत्यर्थः यदा भगे शिश्नमागच्छति तदा धारका धरति लिङ्गमिति धारका योनिर्निगल्गलीति नितरां गलति वीर्यं क्षरति यद्वानुकरणम् गल्गलेति शब्दं करोति ॥२२॥

यकोऽसकौ शकुन्तक आकूलगिति वक्षति ।
विवक्षत-इव ते मुखमध्वर्यो मा नस्त्वमभिभाषथाः ॥२३॥

कुमारी अध्वर्युं प्रत्याह । अङ्गुल्या शिश्नं प्रदर्शयन्त्याह । हे अध्वर्यो यकः यः असकौ असौ शकुन्तकः पक्षीव विवक्षतः वक्तुमिच्छतस्ते तव मुखमिव आकूलगिति वक्षति इतस्ततश्चलति अग्रभागे सक्थिनं लिङ्गं तव मुखमिव भासते । अतो नोऽस्मान्प्रति मा अभिभाषथाः मा वद तुल्यत्वात् ॥२३॥

माता च ते पिता च तेऽग्रं वृक्षस्य रोक्षतः ।
प्रतिलामीतिं ते पिता गभे मुष्टिमतंसयत् ॥२४॥

ब्रह्मा मक्षिकामाह । मक्षिके कृये कृये मक्षिके ते तव माता च पुनस्ते तव पिता यदा वृक्षस्य वृक्षजस्य काष्ठमयस्य मञ्चकस्याग्रमुपरिभागं रोक्षतः आरोक्षतः तदा ते पिता गभे भगे मुष्टिं मुष्टितुल्यं लिङ्गमतंसयत् तंसयति प्रक्षिपति एवं

तवोत्पत्तिरित्यश्लीलम् तसि अलंकृतौ चुरादिः लिङ्गमुत्थानिनालंकरोति वा । किं कुर्वन् प्रतिलामीति वदन्निति शेषः तिल स्निह्ने तव भोगेन स्निह्यामीति वदन् । एवं तवोत्पत्तिः ॥२४॥

माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः ।
विवक्षतइव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥२५॥

सानुचरी महिषी ब्रह्माणं प्रत्याह । हे ब्रह्मन् ते तव माता ते पिता च यदि वृक्षस्य वृक्षविकारस्य मञ्चकस्याग्रे क्रीडतः रमेते तदा तवोत्पत्तिरिति तवापि तुल्यम् । यत्रोभयोः समो दोषः परिहारोऽपि वा समः नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारण इति न्यायात्त्वयेदं न वक्तव्यमिति भावः । एवं सत्यपि विवक्षतः वक्तुमिच्छोरिव ते तव मुखं लक्ष्यतऽइति शेषः । हे ब्रह्मन् त्वं मा बहु वदः मा ब्रूहि ॥२५॥

ऊर्धमेनामुच्छ्रापय गिरौ भारꣳ हरन्निव ।
अथास्यै मध्यमेधताꣳ शीते वाते पुनन्निव ॥२६॥

उद्गाता वावातामाह । कंचिन्नरं प्रत्याह । हे नर एनां वावातामूर्धामुच्छ्रापय उच्छ्रितां कुरु । कथमिव गिरौ भारं हरन्निव यथा कश्चित् गिरौ पर्वते भारं हरन् पर्वतोपरि भारमारोपयन् यथा तमुच्छ्रयति तथैनामूर्धां कुरु । कथमूर्धा कार्या तदाह अथेति निपातो यथार्थः यथा अस्यै अस्या वावाताया मध्यमेधतां योनिप्रदेशो वृद्धिं यायात् यथा योनिर्विशाला भवति तथा मध्ये गृहीत्वोच्छ्रापयेत्यर्थः । दृष्टान्तान्तरमाह शीते वाते पुनन्निव यथा शीतले वायौ वाति पुनन्धान्यपवनं कुर्वाणः कृषीवलो धान्यपात्रं यथा ऊर्ध्वं करोति तथेत्यर्थः ॥२६॥

ऊर्धमेनमुच्छ्रयतादिरौ भारꣳ हरन्निव ।
अथास्य मध्यमेदतु शीते वाते पुनन्निव ॥२७॥

वावातोद्गातारं प्रत्याह । भवतोऽप्येतत्समानम् । हे नर एनमुद्गातारमूर्धमु-

ह्रयतात् ऊर्ध्वं कुरु गिरौ भारमिति पूर्ववत् । अथ यथास्य उद्गातुर्मध्यं लिङ्गमेजतु कम्पताम् एजृ कम्पने लोट् । शीते वाते उक्तम् ॥ २७ ॥

यद॑स्या अ॒ꣳशुभे॑द्याः कृ॒धु स्थू॒लमुपा॑तसत् ।
मु॒ष्काविद॑स्या एजतो गोश॒फे श॑कु॒लाविव ॥ २८ ॥

होता परिवृक्तामाह । यत् यदा अस्याः परिवृक्तायाः कृधु ह्रस्वं स्थूलं च शिश्नमुपातसत् उपगच्छेत् योनिं प्रति गच्छेत् तस उपक्षये तदा मुष्कौ वृषणौ इत् एव अस्याः योनेरुपरि एजतः कम्पेते । लिङ्गस्य स्थूलत्वात् योनेरल्पत्वात् वृषणौ बहिस्तिष्ठत इत्यर्थः । तत्र दृष्टान्तः गोशफे जलपूर्णे गोः खुरे शकुलौ मत्स्याविव यथा उदकपूर्णे गोः पदे मत्स्यौ कम्पेते । कृधीति ह्रस्वनाम [निघ० ३. २.] । कीदृश्या अस्याः अंशुभेद्याः अंशु भगं भेद्यं विदार्यं यस्याः सा अंशुभेदी तस्याः अंशुर्भिद्यते यस्या वा ॥ २८ ॥

यद्दे॒वासो॑ ल॒लामगुं॒ प्र वि॑ष्टी॒मिन॒माविषुः ।
स॒क्थ्या॑ दे॒दिश्यते॒ नारी॑ स॒त्यस्या॒क्षि॒भुवो॑ यथा ॥ २९ ॥

परिवृक्ता होतारमाह । यत् यदा देवासः देवाः दीव्यन्ति क्रीडन्ति देवा होत्राद्य ऋत्विजो ललामगुं लिङ्गं प्र आविषुः योनौ प्रवेशयन्ति । अव रक्षे गतौ कान्तौ तृप्तौ प्रीतौ द्युतौ श्रुतौ प्राप्तौ श्लेषेऽर्पणे वेशे भागे वृद्धौ यज्ञे बधे इत्युक्तेरत्रावधातुः प्रवेशनार्थः लुङ् छन्दसि लुङ्लङ्लिट इति [पा० ३. ४. ६.] वर्तमाने लुङ् व्यवहिताश्चेति [पा० १. ४. ८२.] प्रोपसर्गेण व्यवधानम् । ललामेति सुखनाम ललाम सुखं गच्छति प्राप्नोति ललामगुः शिश्नः यद्वा ललाम पुण्ड्रं गच्छति ललामगुः लिङ्गं योनिं प्रविशदित्थितं पुण्ड्राकारं (11.) भवतीत्यर्थः । कीदृशं ललामगुं विष्टीमिनं ष्टीम क्लेदे विशेषेण स्तीमनं क्लेदनं विष्टीमः घञ्प्रत्ययः विष्टीमः क्लेदोऽस्यास्ति विष्टीमी तम् अत इनिठनाविति [पा० ५. २. ११५.] अस्त्यर्थे इनिप्रत्ययः शिश्नस्य योनिप्रवेशे क्लेदनं भवतीत्यर्थः । यदा देवाः शिश्नक्रीडिनो भवन्तो ललामगुं योनौ प्रवेशयन्ति तदा नारी सक्थ्या ऊरुणा ऊरुभ्यां देदिश्यते

निर्दिश्यते अत्यन्तं लक्ष्यते दिश्यतेर्यङ्प्रत्ययः भोगसमये सर्वस्य नार्यङ्गस्य नरेण व्याप्तत्वाद्रूपमात्रं लक्ष्यते इयं नारीतीत्यर्थः (12.) । तत्र दृष्टान्तः सत्यस्याक्षिभुवो यथेति सत्यं द्विविधम् अक्षिभ्यां भवतीत्यक्षिभु प्रत्यक्षम् एकं च श्रोत्रग्राह्यम् षष्ठ्यौ तृतीयार्थे । यथा कश्चिदक्षिभुवा प्रत्यक्षेण सत्येन निर्दिश्यते तत्र विश्वासो भवति तथा ऊरुणा दृष्टेन नारीति लक्ष्यतऽइत्यर्थः । श्रोत्रग्राह्ये तु सत्ये वक्तुराप्ततमत्वमपेक्षितम् (13.) ॥२१॥

यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते ।
शूद्रा यदर्यजारा न पोषाय धनायति ॥३०॥

क्षत्ता पालागलीमाह । यत् यदा हरिणो यवमत्ति मृगो यदा क्षेत्रस्थं धान्यं भक्षयति तदा क्षेत्री पशु पशुं हरिणं पुष्टं न मन्यते मम धान्यभक्षणेन पशुः पुष्टो ज्ञातः सम्यगिति न जानाति किंतु मदीयं क्षेत्रं भक्षितमिति दुःखी भवतीत्यर्थः । पशुशब्दात् सुपां सुलुगित्यमो लुक् । एवं शूद्रा शूद्रजातिः स्त्री यदा अर्यजारा भवति अर्यः स्वामिवैश्ययोरिति [पा° ३.१.१०३.] निपातनादर्यो वैश्यो जार उपपतिर्यस्याः सा अर्यजारा । शूद्राच्चामहत्पूर्वाज्जातिरिति [पा° ४.१.४. वा° १.२.] शूद्राज्जात्यर्थे टाप् । वैश्यो यदा शूद्रां गच्छति तदा शूद्रः पोषाय न धनायते पुष्टिं न इच्छति मद्भार्या वैश्येन भुक्ता सती पुष्टा जातेति न मन्यते किं तु व्यभिचारिणी जातेति दुःखितो भवतीत्यर्थः अशनायोदन्येति [पा° ७.४.३४.] क्वचि धनायतीति इच्छार्थे निपातः ॥३०॥

यद्धरिणो यवमत्ति न पुष्टं बक्रु मन्यते ।
शूद्रो यदर्यायि जारो न पोषमनुमन्यते ॥३१॥

पालागली क्षत्तारमाह । यदा हरिणो यवमत्ति तदा बक्रु यथा तथा पशुं पुष्टं न मन्यते इदं भवतोऽपि तुल्यम् इयान्विशेषः यत् यदा शूद्रः अर्यायि अर्यायां वैश्याया जारो भवति तदा वैश्यः पोषं पुष्टिं नानुमन्यते मम स्त्री पुष्टा जातेति नानुमन्यते किं तु शूद्रेण नीचेन भुक्तेति क्लिश्यतीत्यर्थः ॥ ॥ अश्लीलभाषणं समाप्तम् ॥ ॥३१॥

दधिक्रावणोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूꣳषि तारिषत् ॥ ३२॥

का° [२०.६.२१.] मक्षिषीमुत्थाप्य पुरुषा दधिक्रावण इत्याहुः । मक्षिषीं यज्ञमानस्य प्रथमपरिणीतां पत्नीमश्वसमीपमुत्थाप्य पुरुषा अध्वर्युब्रह्मोद्गातृहोतृक्षत्तारो मन्त्रं पठेयुरिति सूत्रार्थः ॥ वामदेवात्मजदधिक्रावदृष्टाश्वदेवत्यानुष्टुप् । वयमध्वर्यादयः अकारिषमकार्ष्म कृतवन्तः वचनव्यत्ययः अश्लीलभाषणमिति शेषः किमर्थम् अश्वस्य संस्कारायेति शेषः अश्वसंस्कारायाश्लीलभाषणं कृतवन्त इत्यर्थः । कीदृशस्याश्वस्य दधिक्रावणः दधाति धारयति नरमिति दधिः आदृगमहनेति [पा° ३.२.१७१.] किप्रत्ययः दधिः सन्क्रामतीति दधिक्रावा तस्य अन्येभ्योऽपि दृश्यत ऽइति [पा° ३ २.७५.] वनिप्प्रत्ययः विड्वनोरनुनासिकस्यादिति [पा° ६.४.४१.] धातोराकारः । जिष्णोः जयनशीलस्य । वाजिनः वजति गच्छति वाजी वाजोऽस्यास्तीति वा वाजी । तस्य च नोऽस्माकं मुखा मुखानि सुरभि सुरभीणि करत् करोतु यज्ञ इति शेषः अश्लीलभाषणेन दुर्गन्धं प्राप्तानि मुखानि सुरभीणि यज्ञः करोवित्यर्थः । तथा च श्रुतिः [१३.२.१.१.] सुरभिमतीमृचमन्ततोऽन्वाहुर्वाचमेव पुनतऽइति । सुरभिशब्दाद्विभक्तिलोपः । किं च नोऽस्माकमायूꣳषि जीवनानि बाल्ययौवनवार्द्धकानि प्रतारिषत् प्रतारयतु प्रवर्धयतु लेटि रूपम् ॥ ३२॥

VII. गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥ ३३॥

का° [२०.७.१.] तिस्रः पत्न्योऽसिपद्यान्कल्पयत्यश्वस्य सूचीभिर्लौहराजतसौवर्णीभिर्मणिसंख्याभिर्गायत्री त्रिष्टुबिति द्वाभ्यां-द्वाभ्याम् । गायत्री त्रिष्टुबिति षड्चे द्वाभ्यां-द्वाभ्यामृग्भ्यां महिष्याद्यास्तिस्रः पत्न्यः ताम्रद्रप्यस्वर्णमयीभिः प्रत्येकमेकाधिकशतसंख्याभिः सूचीभिरश्वाङ्गेऽसेः शासस्य मार्गान्कुर्वन्ति शासस्य सुखप्रवेशाय सूचीभिर्वितुद्य-वितुद्याश्वत्वचं जर्जरीकुर्वन्तीति सूत्रार्थः ॥ अश्वदेवत्याः षड्चः आद्योष्णिक् । हे अश्व गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह बृहती उष्णिहा

सह ककुप् एतानि छन्दांसि सूचीभिरिताभिः त्वां शम्यन्तु संस्कुर्वन्तु विकरणव्यत्ययः असिपधार्थे त्रभेदनं संस्कारः ॥ ३३ ॥

द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विछन्दा याश्च सछन्दाः सूचीभिः शम्यन्तु त्वा ॥ ३४ ॥

चतस्रोऽनुष्टुभः । द्वे पदे यासां ता द्विपदाः याः चतुष्पदाः याः त्रिपदाः याः षट्पदाः याः विछन्दाः विगतं छन्दो याभ्यस्ताः छन्दोलक्षणहीनाः याः सछन्दाः छन्दोलक्षणयुताः ताः सर्वाः छन्दोजातयः हे अश्व सूचीभिः त्वां शम्यन्तु ॥ ३४ ॥

महानाम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः ।
मेघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥ ३५ ॥

महत् नाम यासां ता महानाम्न्यः शक्वर्य ऋचः । रेवत्यः ऋचः यस्यामृचि रैवतं साम गीयते सा रेवती । विश्वाः सर्वाः आशा दिशः । कीदृश्य आशाः प्रभूवरीः प्रभवन्ति सर्वभूतानि धारयितुं समर्था भवन्ति प्रभूवर्यः अन्येभ्योऽपि दृश्यन्त इति [पा° ३.२.७५.] वनिप् ऋन्नेभ्य इति [पा° ४.१.५.] ङीप् वनो र च इति [पा° ४.१.७.] तस्य रेफः पूर्वसवर्णदीर्घत्वम् । मेघे भवा मैघ्यः पूर्वसवर्णाः मेघोत्था विद्युतः वाचो वेदलक्षणा अन्या अपि । एताः सर्वाः सूचीभिः हे अश्व त्वां शम्यन्तु स्रुवाः कुर्वन्तु ॥ ३५ ॥

नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥ ३६ ॥

हे अश्व नार्यः नृणामपत्यानि स्त्रियः ते तव लोम रोमाणि मनीषया मनसा इच्छया विचार्य विचिन्वन्तु पृथक्कुर्वन्तु रोमेत्यत्र (14.) जातावेकवचनं विभक्तिलोपो वा । कीदृश्यो नार्यः पत्न्यः पत्युर्नो यज्ञसंयोगेऽइति [पा° ४.१.३३.] नकारः यज्ञमानभार्या महिष्यात्या इत्यर्थः । किं च देवानामिन्द्रादीनां पत्न्यः दिशः प्राच्याद्याः सूचीभिः त्वां शम्यन्तु ॥ ३६ ॥

रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।

अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥३७॥

रजताः रजतमय्यः हरिणीः हरिण्यः सुवर्णमय्यः सीसाः सीसं ताम्रं तन्मय्यः । त्रय्यः सूच्यो भवन्ति लोहमय्यो रजता हरिण्यो दिशो वै लोहमय्योऽवान्तरदिशो रजता ऊर्धा हरिण्यस्ताभिरेवैनं कल्पयन्तीति [१३.२.१०.३.] श्रुतिः सूचीनां दिग्रूपत्वादश्वसंस्कारक्षमत्वम् ताः सूच्यः कर्मभिः अश्वदेहे सीमाकरणलक्षणैः युज्यन्ते योगं प्राप्नुवन्ति सीमाकरणयोग्या भवन्तीत्यर्थः । कीदृश्यस्ताः युजः युज्यन्ते ता युजः संयुता एकीभूता इत्यर्थः । ताः सूच्यो वाजिनो वेगवतोऽश्वस्य त्वचि सिमाः सीमा रेखाः शम्यन्तु सम्यक्कुर्वन्तु सिमाशब्दः सीमापर्यायः । कीदृश्यस्ताः शम्यन्तीः शम्यन्त्यः संस्कारं कुर्वाणाः ॥३७॥

कुविदङ्ग यवमन्तो य° ॥३८॥

व्याख्याता [१०.३२ a.] ॥३८॥

VIII. कस्त्वाच्यति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति ।
क उ ते शमिता कविः ॥३९॥

का° [२०.७.६.] अश्वं विशास्त्यनुवाकेन कस्त्वाच्यतीति । षड्चेनानुवाकेनाश्वं विशास्ति अश्वोदरं पाठयति मेदस उद्धरणाय वपाया अभावात् उदरमध्यस्थं स्त्यानं घृताभं घनं श्वेतं मांसं मेद इति सूत्रार्थः ॥ अश्वदेवत्याः षड्चः आद्या गायत्री । हे अश्व कः प्रजापतिः त्वा त्वामाच्यति छिनत्ति छो छेदने लट् श्नोतः श्यनीति [पा° ७.३.७१.] श्नोकारलोपः । हे अश्व कः त्वां विशास्ति त्वचा वियोजयति । ते तव गात्राणि कः शम्यति शमनेन करोति । कः उ कश्च प्रजापतिरेव कविर्मेधावी ते तव शमिता शमयिता प्रजापतिरेव सर्वं करोति नाकमित्यर्थः ॥३९॥

ऋतवस्त ऋतुथा पर्व शमितारो विशासतु ।
संवत्सरस्य तेजसा शमीभिः शम्यन्तु त्वा ॥४०॥

पञ्चानुष्टुभः । हे अश्व ऋतवः शमितारः ऋतुथा ऋतौ-ऋतौ काले-काले ते

तव पर्व पर्वाणि अस्थियन्थीन् शमीभिः कर्मभिः विशासतु भिन्नानि कुर्वन्तु । केन संवत्सरस्य संवत्सरात्मकस्य कालस्य तेजसा । किं च ऋतवः त्वा त्वां शम्यन्तु पर्वविशासनेन रुविः कुर्वन्तु ॥४०॥

अर्धमासाः पर्नूषि ते मासा आछ्यन्तु शम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टꣳ सूदयन्तु ते ॥४१॥

अर्धमासाः पक्षाः मासाश्च तदभिमानिनो देवाः शम्यन्तः संस्कुर्वन्तः सन्तो हे अश्व ते तव पर्नूषि पर्वाणि आछ्यन्तु समन्ताच्छिन्दन्तु ग्रन्थिर्ना (15.) पर्वपरुषीति कोशः । किं च अहोरात्राणि अहोरात्राभिमानिदेवा मरुतश्च देवाः ते तव विलिष्टं लिश अल्पीभावे विशेषेणाल्पमङ्गम् तत्सूदयन्तु संदधतु सूद निरासे अत्र संधानार्थः व्यर्थं मास्तु ॥४१॥

दैव्या अधर्यवस्त्वाछ्यन्तु वि च शासतु ।
गात्राणि पर्वशस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥४२॥

देवानामिमे दैव्याः अश्विनौ देवानामधर्यू इत्युक्तत्वात् अश्विप्रभृतयो देवसम्बन्धिनोऽधर्यवः हे अश्व त्वा त्वामाछ्यन्तु आछिन्दन्तु विशासतु च चकारो भिन्नक्रमः रुविः कुर्वन्तु किं च ते तव गात्राणि विभक्तिव्यत्ययः गात्रेषु शरीरेषु पर्वशः पर्वणि-पर्वणि सिमाः सीमा मर्यादाः कृण्वन्तु कुर्वन्तु कृ करणे स्वादिः कीदृशीः सीमाः शम्यन्तीः संस्कुर्वाणाः ॥४२॥

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते ।
सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥४३॥

द्यौः स्वर्गः पृथिवी अन्तरिक्षं लोकत्रयाभिमानिनो देवाः अग्निवायुसूर्याः वायुरन्योऽपि शरीरस्थः प्राणादिः हे अश्व ते तव छिद्रं पृणातु वचनव्यत्ययः पृणातु पूरयतु यत् न्यूनं तत्पूरयतु । किं च नक्षत्रैः सह नक्षत्रयुक्तः सूर्यः ते तव साधुया साधुं समीचीनं लोकं कृणोतु करोतु सुपां सुलुगित्यादिना साधुशब्दात्परस्यामो यादेशः सूर्यस्ते उत्तमं लोकं ददात्वित्यर्थः ॥४३॥

शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यः शमु तन्वे तव ॥४४॥

हे अश्व ते तव परेभ्योऽवयवेभ्य उच्चेभ्यः शिरआदिभ्यः शं सुखमस्तु । अवरेभ्यः अधःस्थेभ्यश्च पादादिभ्यो गात्रेभ्यः शमस्तु । अस्थभ्यः तवास्थिभ्यश्च शमस्तु अस्थिदधीति [पा° ७.१.७५.] अस्यानुवृत्तौ छन्दस्यपि दृश्यतेऽङ्गति [पा° ७.१.७६.] सूत्रेण ह्लादावप्यस्थिशब्दस्यानङादेशः । मज्जभ्यः पृषधातुभ्योऽपि (16.) शमस्तु किम्बहुना तव तन्वै तन्वाः सर्वस्यापि शरीरस्य शमु सुखमेवास्तु । षष्ठी चतुर्थ्यर्थे (17.) आशिषि वा चतुर्थी । ङ एवार्थे ॥४४॥

IX. कः स्विदेकाकी चं° ॥४५॥

का° [२०.७.१०.] प्राग्वपाहोमाद्धोताधर्यू च सदसि संवदेते चतसृभिः कः स्विदेकाकीति पूर्ववत् । वपाहोमात्प्राङ्क चतुर्ऋग्भिः पूर्ववदुक्तिप्रत्युक्त्या सदोमध्ये गत्वा होता अध्वर्युश्च संवादं कुरुतः ॥ अष्टादश ऋचो ब्रह्मोद्यसंज्ञाः ब्रह्मोद्यं परस्परं संवादः आद्याश्चतस्रोऽनुष्टुभः का स्विदित्याद्याश्च [५३.] अनुष्टुभः । होताध्वर्युं पृच्छति । व्याख्याता [१.] ॥४५॥

सूर्य एकाकी चंर° ॥४६॥

व्याख्याता [१०.] ॥४६॥

किꣳ स्वित्सूर्यसमं ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥४७॥

अध्वर्युर्होतारं पृच्छति । हे होतः स्विदिति तर्के सूर्यसमं सूर्यमण्डलतुल्यं ज्योतिः तेजः किं तत् ब्रूहि । समुद्रसमं सरः किं स्वित् । पृथिव्यै पृथिव्याः सकाशात् वर्षीयः महत्तरं किं स्वित् प्रियस्थिरेत्यादिना [पा° ६.४.१५७.] वृद्धस्य वर्षादेशः । कस्य मात्रा परिमाणं न विद्यते ॥४७॥

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यते ॥४८॥

होता प्रत्याह सूर्यसमं ज्योतिर्ब्रह्म त्रयीलक्षणम् परं च । समुद्रसमं सरो द्यौरन्तरिक्षं यतो वृष्टिर्भवति । पृथिव्यै पृथिव्याः सकाशात् इन्द्रः वर्षीयान् वृद्धतरः । तु पुनः गोः धेनोः मात्रा न विद्यते यज्ञधारकत्वात् ॥ ४८ ॥

पृ॒च्छामि॑ त्वा चि॒तये॑ देवसख॒ यदि॒ त्वम॒त्र मन॑सा ज॒गन्थ॑ ।
येषु॑ विष्णु॒स्त्रिषु॑ पदे॒ष्वेष्टस्तेषु॒ विश्वं॒ भुव॑नमावि॒वेशा॑३॥ऽ ॥ ४९ ॥

का॰ [२०.७.११.] ब्रह्मोद्गातारौ च पृच्छामि त्वेति (18.) । ब्रह्मोद्गातारं पृच्छति पृच्छामीति । चकाराच्चतुर्ऋग्भिः सदसि ब्रह्मोद्गातारौ संवदेते ॥ ब्रह्मा उद्गातारं पृच्छति । पृच्छामि । देवानां सखा देवसखः राजाहःसखिभ्यष्टच् हे देवसख देवानां मित्र उद्गातः त्वा त्वां चितये ज्ञानायाहं पृच्छामि अत्र मत्कृते प्रश्ने यदि त्वं मनसा जगन्थ ज्ञानासि गमिर्लिट् ये गत्यर्थास्ते ज्ञानार्थाः । किं पृच्छसीत्यत आह विष्णुः यज्ञो येषु त्रिषु पदेषु गार्हपत्याहवनीयदक्षिणाग्निषु एष्टः आ इष्टः यागेन तर्पितः यज्ञैः क्तः तेषु त्रिषु पदेषु विश्वं सर्वं भुवनमाविवेश प्रविष्टमुत नेति प्रश्ने प्लुतः ॥ ४९ ॥

अपि॒ तेषु॒ त्रिषु॑ पदे॒ष्वस्मि॒ येषु॒ विश्वं॒ भुव॑नमावि॒वेश॑ ।
स॒द्यः पर्ये॑मि पृथि॒वीमु॒त द्यामे॒केना॒ङ्गेन॑ दि॒वोऽ॒स्य पृ॒ष्ठम् ॥ ५० ॥

उद्गाता प्रत्याह । येषु त्रिषु पदेषु विश्वं भुवनमाविवेशेति यत्त्वया पृष्टम् तेषु त्रिषु पदेषु गार्हपत्यादिषु अहमस्मि अहमपि तत्रैव स्थितोऽस्मि अपि-शब्दात् त्वं च तत्रैवासि किमेतावदेव जानामि किं तु पृथिवीमुतापि चं द्यां स्वर्गं दिवः स्वर्गस्य पृष्ठमुपरिभागमपि सद्यः स्वल्पक्षणमेव (19.) एकेनाङ्गेन मनसा पर्येमि परिगृह्णामि सर्वं जानामि किम्पुनर्भूतानि प्रविष्टानीति भावः ॥ ५० ॥

के॒ष्व॒न्तः पु॑रु॒ष आ॑वि॒वेश॒ कान्य॒न्तः पु॑रु॒षेऽ॒र्पितानि ।
ए॒तद्ब्र॑ह्मन्नुप॒वल्हामसि॒ त्वा किꣳ स्वि॑न्नः प्रति॒वोचा॒स्यत्र॑ ॥ ५१ ॥

उद्गाता ब्रह्माणं पृच्छति । हे ब्रह्मन् पुरुषः केषु पदार्थेषु अन्तर्मध्ये आविवेश प्रविष्टः । पुरुषे अन्तः पुरुषमध्ये कानि वस्तूनि अर्पितानि स्थापितानि । एतत्

त्वा त्वां वयमुपवल्हामसि उपवल्हामः स्पर्धया पृच्छामः वल्ह प्राधान्यपरिभाषणहिंसादानेषु लट् इदत्तो मसि । अत्र प्रश्ने किं स्वित् त्वं प्रतिवोचासि प्रतिवदसि वच उमिति [पा° ७.४.२०.] लेटि छान्दस उम् लेटोऽडाटाविति [पा° ३.४.९४.] आडागमः ॥५१॥

पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुषेऽर्पितानि ।
एतद्ब्राह्मं प्रतिमन्वानोऽस्मि न मायया भवसुत्तरो मत् ॥५२॥

ब्रह्मा प्रत्याह । पुरुषः आत्मा पञ्चसु प्राणेषु अन्तः प्राणमध्ये आविवेश प्रविष्टः तानि प्रसिद्धानि श्रोत्राधिकरणानि पुरुषे अन्तः मध्ये अर्पितानि प्राणात्मनामन्योऽन्यापेक्षासिद्धिरित्यर्थः न चात्मानमन्तरेण प्राणाः व्यायन्ति त प्राणानन्तरेणात्मेति बह्वृचश्रुतेः यद्वा पञ्चसु भूतेषु भूम्यादिषु आत्मा प्रविष्टस्तानि चात्मनि प्रविष्टानि तानि सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । उद्गातः अहमत्र प्रश्ने त्वा त्वां प्रति एतद्ब्राह्मं प्रतिमन्वानः प्रतिजानानोऽस्मि एवमुत्तरं ददामीत्यर्थः । किं च मायया बुद्ध्या मत् मत्तः उत्तरोऽधिकस्त्वं न भवसि मत्तो बुद्धिमान्नासीत्यर्थः ॥५२॥

का स्विदासीत्पूर्वचि° ॥५३॥

का° [२०.७.१२.] पुनः पूर्वावपरिणोत्तरवेदिं का स्विदिति । ततः सदसो निष्क्रम्य हविर्धानस्य पुर उत्तरवेदेः पश्चादुपविश्य पूर्वौ पूर्वोक्तौ होत्रध्वर्यू चतुर्भिः संवदेते इति सूत्रार्थः ॥ होताध्वर्युं पृच्छति । व्याख्याता [११.] ॥५३॥

द्यौरासीत्पूर्वचि° ॥५४॥

व्याख्याता [१२.] ॥५४॥

क ईमरे पिशंगिला क ईं कुरुपिशंगिला ।
क ईमास्कन्दमर्षति क ईं पन्थां विसर्पति ॥५५॥

अध्वर्युर्होतारं पृच्छति । ईमिति निपातश्चार्थः अरे होतः का च पिशंगिला का च कुरुपिशंगिला कश्च आस्कन्दं णमुलन्तः आस्कन्द्य उत्प्लुत्य अर्षति गच्छति

ऋष गतौ तुदादिः व्यत्ययेन शपू कश्च पन्थां पन्थानं मार्गं प्रति विसर्पति विविधं गच्छति ॥५५॥

अन्नारे पिशंगिला श्वावित्कुरुपिशंगिला ।
शश आस्कन्दमर्षत्यहिः पन्थां विसर्पति ॥५६॥

अरे अधमे अन्ना पिशंगिला अन्ना नित्या माया रात्रिर्वा पिशंगिला पिशं रूपं गिलति भक्षयति पिशंगिला माया विश्वं ग्रसते रात्रावपि रूपाणि न प्रतीयन्ते तमसा । श्वावित् सेधा कुरुपिशंगिला कुरुशब्दोऽनुकरणे पिश अवयवे इति धातोरिगुपधेति कप्रत्ययः कुरु इति शब्दानुकुर्वाणा पिशान्मूलाद्यवयवान्गिलति पिशंगिलाँ मूलानां शतं कुक्षौ स्थापयति शतं च भक्षयतीति सेधायाः स्वभावः । शशः वन्यो जीवविशेषः आस्कन्दमास्कद्यास्कद्य अर्षति स तस्य स्वभावः । अहिः सर्पः पन्थां पन्थानं विसर्पति विशेषेण गच्छति ॥५६॥

कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥५७॥

का० [२०.७.१३.] उत्तरौ च कत्यस्येति । उत्तरौ पश्चादुक्तौ ब्रह्मोद्गातारौ चतुर्ऋग्भिः संवदेते ॥ ब्रह्मोद्गातारं पृच्छति । अस्य कति विष्ठाः कियन्ति अन्नानि का संख्या यासां ताः कति विशेषेण तिष्ठति यज्ञो यासु ताः विष्ठाः अन्नानि कियत्प्रकाराणि यज्ञे । अक्षराणि च कति । होमासः होमाः कति । समिद्धः समिधः कतिप्रकाराः धकारस्य द्वित्वमार्षम् । यज्ञस्य विदथा वेत्तीति विदः विदस्य भावो विदथा यज्ञवेदित्वेन हेतुना अत्र स्थले त्वा त्वामहं पृच्छमपृच्छम् पृच्छामि पृच्छतेर्लङ् अडभाव आर्षः । ऋतुशः ऋतौ-ऋतौ कति होतारः यजन्ति ॥५७॥

षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतार ऋतुशो यजन्ति ॥५८॥

उद्गाता प्रत्याह । रससंख्यया अन्नसंख्यामाह अस्य यज्ञस्य षट् विष्ठाः अन्नानि सर्वेषामन्नानां षड्रसात्मत्वात् षडेवान्नानीत्यर्थः । अस्य यज्ञस्य शतमक्षराणि

छन्दोभिर्यज्ञो निष्पाद्यते तानि च छन्दांसि गायत्र्यादीन्यतिधृत्यन्तानि चतुर्दश चतुर्विंशत्यक्षरादीनि चतुर्वर्णान्तराणि तेषां क्रमोत्क्रमगत्या द्वाभ्यां शतमक्षराणि भवन्ति । तथा हि । गायत्री चतुर्विंशतिवर्णा अतिधृतिः षट्सप्तत्यक्षरा एवं द्वे मिलित्वा शतमक्षराणि उष्णिक् २८ धृतिः ७२ एवं शतम् अनुष्टुप् ३२ अत्यष्टिः ६८ एवं शतम् अष्टिः ६४ बृहती ३६ एवं शतम् अतिशक्वरी ६० पङ्क्तिः ४० एवं शतम् शक्वरी ५६ त्रिष्टुप् ४४ एवं शतम् अतिजगती ५२ जगती ४८ एवं शतमक्षराणि अनेनाभिप्रायेण शतमक्षराणीत्युक्तम् । क्रोमाः अशीतिः अश्वमेधऽएकविंशतियूपाः तत्राग्निष्टे मध्यमयूपेऽश्वतूपरगोमृगान्नियुनक्ति इतरेषु षोडश पशून् तत्र विंशतियूपेषु चतस्रोऽशीतयः पशवो भवन्तीत्यभिप्रायेणोक्तम् अशीतिर्क्रोमाः । क्रु स्फुटं तिस्रः समिधः अश्वतूपरगोमृगाः प्राजापत्याः पशवः तद्रूपाभिः समिद्भिर्यज्ञो दीप्त इति तिस्रः समिधः उक्ताः । यज्ञस्य विद्वा वेदनेन हेतुना ते तुभ्यं प्रब्रवीमि प्रवदामि । किं च सप्त क्रोतारो वषट्कर्तारः ऋतुशः ऋतुयाजिषु यजन्ति ॥५८॥

कोऽअस्य वेद भुवनस्य नाभिं को द्यावापृथिवीऽअन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः ॥५९॥

ऊह्माता ब्रह्माणं पृच्छति । हे ब्रह्मन् अस्य भुवनस्य भूतजातस्य नाभिं नभ्यते यत्र स नाभिर्बन्धनस्थानं कारणमिति यावत् नाभौ हि सर्वा नाड्यो बध्यन्ते नभ हिंसायामत्र बन्धनार्थः औणादिक इप्रत्ययः भूतजातस्य कारणं को वेद जानाति । द्यावापृथिवी द्यावापृथिव्यौ अन्तरिक्षं च को वेद । बृहतो महतो जनित्रं जन्म को वेद सूर्यस्योत्पत्तिः कस्मादित्यर्थः जनेस्त्रल्प्रत्ययः । यतो जायते उत्पद्यते इति यतोजाः यत इत्युपपदे जनसनखनक्रमगमो विडिति [पा° ३.२.६७.] विट्प्रत्ययः विड्वनोरनुनासिकस्येति [पा° ६.४.४१.] नकारस्यात्वम् प्रथमा द्वितीयार्था यतोजाः यत उत्पन्नं चन्द्रमसमिन्दुं को वेद यतश्चन्द्रस्योत्पत्तिस्तं को वेदेत्यर्थः ॥५९॥

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवीऽअन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ॥६०॥

ब्रह्मा प्रत्याह । अस्य भुवनस्य नाभिं कारणमहं वेद ज्ञानामि विदो लटो वा [पा° ३. ४. ८३.] परब्रह्मैव जगत्कारणं जानामीत्यर्थः । द्यावापृथिवी अन्तरिक्षं च वेद ब्रह्मणो विकारभूतं जानामि । बृहतः सूर्यस्य जनित्रमुत्पत्तिकारणं ब्रह्मैव वेद । अथो अपि च यतोऽहं चन्द्रमसमहं वेद परमात्मनो ज्ञातं चन्द्रमहं वेद्मीत्यर्थः ॥ ६० ॥

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णोऽअश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ६१ ॥

का° [२०. ७. १४.] यजमानोऽध्वर्युं पृच्छामि त्वेति । यजमानोऽध्वर्युं पृच्छति ॥ हे अध्वर्यो पृथिव्याः परमन्तमवधिभूतं पर्यन्तं त्वा त्वामहं पृच्छामि द्विकर्मकः । यत्र यस्मिन्स्थले भुवनस्य भूतजातस्य नाभिः कारणं तदपि त्वां पृच्छामि । वृष्णः सेक्तुः अश्वस्य रेतः वीर्यं त्वां पृच्छामि । वाचो वाण्याः त्रयीलक्षणायाः परममुत्कृष्टं व्योम स्थानं त्वां पृच्छामि ॥ ६१ ॥

इयं वेदिः परोऽअन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णोऽअश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ६२ ॥

का° [२०. ७. १५.] इयं वेदिरित्यध्वर्युः । अध्वर्युः यजमानं प्रत्याह । इयं वेदिः उत्तरवेदिः पृथिव्याः परः अन्तोऽवधिः वेदिः सर्वपृथ्वीरूपत्वादित्यर्थः । भुवनस्य नाभिः कारणम् अयं यज्ञोऽश्वमेधः भुवनस्य प्राणिजातस्य नाभिः कारणम् यज्ञाद्धि प्रजाः प्रजायन्त इति श्रुतेः । वृष्णः अश्वस्य रेतः अयं सोमः सोमलताश्वस्य वीर्याज्जातित्यर्थः । अयं ब्रह्मा ऋत्विक् वाचः त्रयीरूपायाः परमं व्योम स्थानम् ब्रह्मणस्त्रिवेदसंयोगादित्यर्थः ॥ ॥ ब्रह्मोद्यं समाप्तम् ॥ ६२ ॥

XI. सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे ।
दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥ ६३ ॥

सुभूरिति पूर्वस्य महिम्नः पुरोऽनुवाक्या उत्तरस्य याज्या च । उदिते ब्रह्मोद्यं समाप्याध्वर्युर्हिरण्मयेन (20.) पात्रेण प्राजापत्यं महिमानं ग्रहं गृह्णाति तस्य पु-

रोरुग्घिरण्यगर्भः समवर्तताग्रऽइत्यथास्य पुरोऽनुवाक्या सुभूः स्वयम्भूरिति [१३.५.२.२३.] श्रुतेः । प्रजापतिर्देवत्यानुष्टुप् । क (21.) इति प्रसिद्धम् प्रथमः सर्वस्य आदिः अनादिनिधनः पुरुषः मक्ति अर्णवि कल्पान्तकालीने समुद्रे अन्तर्मध्ये गर्भं दधे स्थापितवान् कीदृशः सुष्ठु भूरुत्पत्तिर्यस्मात्स सुभूः विश्वोत्पादकः स्वयं भवतीति स्वयम्भूः स्वेच्छाधृतशरीरः कीदृशं गर्भम् ऋत्वियम् ऋतुः प्राप्तो यस्य घस्प्रत्ययः प्राप्तकालम् यतो गर्भात् प्रजापतिः ब्रह्मा जातः उत्पन्नः ॥ ६३ ॥

क्रोता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः । जुषतां पिबतु सोमꣳ क्रोतर्यज ॥ ६४ ॥

महिम्नः प्रैषः । क्रोता यक्षत्प्रजापतिमिति प्रैष इति [१३.५.२.२३.] श्रुतेः । आर्षी गायत्री । महिम्नः सोमस्य महिमसंज्ञस्य सोमग्रहस्य सम्बन्धिनं प्रजापतिं क्रोता दैव्यो यक्षत् यजतु । इज्यमानः स प्रजापतिः जुषतां सोमं महिमग्रहं पिबतु च । हे मनुष्यक्रोतः त्वमपि यज ॥ ६४ ॥

प्रजापते न त्वदे॰ - रयीणाम् ॥ ६५ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥

पूर्वस्य महिम्नो याज्या । प्रजापते न त्वदेतान्यन्य इति क्रोता यजतीति [१३.५.२.२३.] श्रुतेः । व्याख्याता [१०.२० a.] ऋगियम् ॥ ६५ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । त्रयोविंशोऽयमध्यायो व्यरंसीदाश्वमेधिकः ॥ २३ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

२ [वायाऽअन्त॰] ॥ २ ॥ ८ abc ॥ ८ ॥ ८ d ॥ १ ॥ १-१२ ॥ १०-१३ ॥ १३ abcd ॥ १४ ॥ १३ efgh ॥ १५ ॥ १४-१८ ॥ १६-२० ॥ ११ - वसो मम ॥ २१ ॥ आहम॰ - गर्भधम्. २० [प्रोर्णवार्था] ॥ २२ ॥ २१-२५ [क्रीलतः] - २८ [मुष्काऽइद॰ - शकुलाऽइव] - ३७ ॥ २३-३१ ॥ ३८ [नमऽउक्तिं न जग्मुः] - ५२ ॥ ४०-५४ ॥ X. ॥ ५३-५८ [षलस्य] - ६५ ॥ ५५-६७ ॥ ॥ दशानुवाकेषु सप्तषष्टिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥

1. अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो ललाटे पुरस्तात्सारस्वती मेष्यधस्ताद्बन्वोराश्विनावधोरामौ वाह्वोः सौमापौष्णः श्यामो नाभ्याᳬ सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुछऽइन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥१॥

श्रीगणाधिपतये नमः (1.) । श्रुतिरूपमन्त्रा आश्वमेधिकानां पशूनां देवतासम्बन्धविधायिनोऽध्यायेनोच्यन्ते ॥ तत्राश्वमेधे एकविंशतिर्यूपाः सन्ति तत्र मध्यमो यूपोऽग्निष्ठसंज्ञः तत्र सप्तदश पशवो नियोजनीयाः तान्देवतासम्बन्धकथनपूर्वकमाह । अश्वस्तूपरो गोमृगस्ते प्राजापत्याः । अश्वः तूपरः शृङ्गोत्पत्तिकालेऽतीतेऽपि शृङ्गहीनः गोमृगः गवयः एते प्रजापतिदेवताः ततः प्रजापतये जुष्टं नियुनज्मीति मन्त्रेण बन्धनीयाः । एवमग्रेऽपि यो यद्देवत्यः पशुः सः अमुष्मै जुष्टं नियुनज्मीत्यादिमन्त्रैर्बन्धनीयः ॥ आग्नेयोऽग्निदेवतः कृष्णग्रीवः श्यामवर्णगलोऽजः अश्वस्य पुरस्तात् ललाटे उपायेन बन्धनीयः । स्रुन्वोरधस्तात्सारस्वती मेषी बन्ध° । आश्विनावधोरामौ अधोभागे शुक्लवर्णावजौ बाह्वोः अश्वस्य पूर्वपादयोरेकैकः । सौमापौष्णदेवत्यः श्यामः शुक्लकृष्णरोमाजोऽश्वस्य नाभ्यां बन्ध° । श्वेतः कृष्णश्च सौर्ययामौ श्वेतः पशुः सूर्यदेवतो दक्षिणापार्श्वे बन्ध° यमदैवतः कृष्णोऽश्ववामपार्श्वे । त्वाष्ट्रौ त्वष्टृदेवतौ लोमशसक्थौ बहुरोमपुच्छिकौ पशू अश्वस्य सक्थ्योरूर्वोः पश्चात्पदयोरेकैकः । वायव्यः श्वेतवर्णः पशुरश्वस्य पुछे । स्वपस्याय शोभनकर्मणे इन्द्राय स्वपस्येन्द्रदेवता वेहत् गर्भघातिनी वैष्णवो वामनः पशुश्च पुछऽएव अङ्गान्तरानुक्तेः ॥ एवमश्वादिभिः सह पञ्चदश भवन्ति एते पर्यङ्गा उच्यन्ते । अत्राश्वस्य शरीरं तरणाय (2.) तुंवीफलवद्गुरुं बद्ध्वा गुम्फनीयम् ततः कृष्णग्रीवः आग्नेयो ललाटऽइत्यादयोऽश्वस्य शरीरे यथोक्तस्थाने सम्बद्धायां रज्ज्वां बन्धनीयाः ततो रोहितो धूम्ररोहित इत्यादयो द्वादशसंख्याकाः शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्या इत्युक्ता मध्यमे एव यूपे नियोज्याः सप्तदशैव पशून्मध्यमे यूप ऽआलभतऽइति [१३.५.१.१५.] श्रुतेः तत्र त्रयोऽश्वतूपरगोमृगाः द्वौ चाग्नेयावेकादशिनौ द्वादश रोहितादयः एवं सप्तदश मध्यमे यूपे । ततः पृषती स्रुक्पृष-

तीत्यादीनां श्वेताः सौर्या इत्यन्तानां [११.] शतत्रयसंख्याकानां पशूनां मध्ये पञ्चदश-पञ्चदश पशूनेकैकस्मिन्यूपे युनक्ति । एवमितरेषु यूपेषु पञ्चदश-पञ्चदशैते पशवः एकैकश्चैकादशिनः । एवं मध्यमयूपव्यतिरिक्तेषु विंशतियूपेषु षोडश-षोडश पशवो भवन्ति षोडश-षोडशेतरेष्विति [१३.५.१.१५.] श्रवणात् ॥१॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाङ्रन्यतःशितिबाङ्ः समन्तशितिबाङ्स्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥२॥

रोहितः सर्वरक्तः धूम्ररोहितः धूम्रवर्णमिश्रो रक्तः तृतीयः कर्कन्धुरोहितः बदरसदृशरक्तः ते त्रयः सौम्याः सोमदैवत्याः सोमाय क्षुष्टं नियुनज्मीत्यादिमन्त्रेण प्रत्येकं मध्यमे यूपऽएव नियोज्याः । ततो बभ्रुः कपिलवर्णः अरुणबभ्रुः अरुणवर्णमिश्रः कपिलः शुकबभ्रुः शुकपक्षिसमवर्णः कपिलश्च ते त्रयो वारुणाः वरुणदैवत्याः मध्यमयूपऽएव । शिति कृष्णं रन्ध्रं छिद्रं यस्य स शितिरन्ध्रः अन्यत इत्येकपार्श्वे शितिरन्ध्रः समन्तं सर्वतः शितिरन्ध्रः एते सारस्वताः मध्यमे एव । शितिबाङ्ः श्वेतपूर्वपादः अन्यतःशितिबाङ्ः एकस्मिन्नेव पार्श्वे शितिपादः समन्तशितिबाङ्ः सर्वश्वेतबाङ्ः शिती धवलमेचकौ एते बार्हस्पत्याः बृहस्पतिदैवत्याः मध्यमे एव ॥ ॥ अथ द्वितीययूपे । पृषती विचित्रवर्णबिन्दुयुक्तशरीरा क्षुद्रपृषती सूक्ष्मविचित्रबिन्दुयुक्ता स्थूलपृषती स्थूलविचित्रबिन्दुयुक्ता एते स्त्रीपशवो मित्रावरुणदेवताः द्वितीये यूपे नियोज्याः ॥२॥

शुङ्वालः सर्वशुङ्वालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोऽरुणास्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥३॥

शुङ्वालः शुभ्रवालः सर्वशुङ्वालः मणिशुङ्वालः मणिवर्णकेशः ते त्रय अश्विदैवत्याः द्वितीये । श्येतः श्वेतवर्णः श्येताक्षः (3.) श्वेतनेत्रः अरुणाः रक्तः ते त्रयो रुद्राय पशुपतये पशुपतिरुद्रदैवता द्वितीये । कर्णास्त्रयः पशुविशेषाः कर्णश्चन्द्रे च

वृत्ते चेति विश्वोक्तिः कर्णाश्चन्द्रसदृशश्वेतकर्णास्त्रयः पशवः बर्कुवचनस्य त्रित्वे पर्यवसानात् यामाः यमदेवताः द्वितीये । अवलिप्ताः सगर्वास्त्रयो रौद्राः । एते द्वितीये पञ्चदश ॥ ॥ अथ तृतीये यूपे । नभोरूपाः आकाशवन्नीलवर्णाः पार्जन्याः पर्जन्यदेवताः पशवस्तृतीये नियोज्याः ॥३॥

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूलोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णाः शुण्ठाकर्णोऽह्रस्वालोहकर्णास्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्तऽउषस्याः ॥४॥

पृश्निः विचित्रवर्णा तिरश्चीनानि पृश्नीनि विन्दवो यस्य सः एवमूर्ध्वानि पृश्नीनि यस्य सः ते त्रयो मारुताः मरुद्देवत्यास्तृतीये । फल्गूः अपुष्टशरीरा लोहितोर्णी रक्तरोमवती पलक्षी श्वेता पलक्षशब्दो वलक्षार्थः श्वेतपर्यायः तास्तिस्रोऽजाः सारस्वत्यः सरस्वतीदेवतास्तृतीये । प्लीहाकर्णाः प्लीहा रोगविशेषः तद्युक्तौ कर्णौ यस्य स प्लीहकर्णः अन्येषामपि दृश्यतऽइति [पा° ६. ३. १३७.] संहितायां दीर्घः शुण्ठकर्णाः ह्रस्वकर्णाः अह्रस्वालोहकर्णाः रक्तवर्णकर्णाः ते त्रयस्त्वाष्ट्राः त्वष्टृदेवतास्तृतीये । कृष्णग्रीवः शितिकक्षः श्वेतकक्षः अञ्जिसक्थः अञ्जि पुण्ड्रं सक्थ्नोरूर्वोर्यस्य सः ते त्रय ऐन्द्राग्नाः इन्द्राग्निदेवताः तृतीये । पञ्चदश पूर्णाः ॥ ॥ कृष्णाञ्जिः कृष्णपुण्ड्रः अल्पाञ्जिः महाञ्जिः अल्पमञ्जि यस्य महदञ्जि यस्य स तथा ते त्रय उषस्याः उषोदेवताश्चतुर्थे यूपे नियोज्याः ॥४॥

शिल्पा वैश्वदेव्यो रोहिणस्त्र्यवयो वाचेऽविज्ञाता अदित्यै सदृपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥५॥

विचित्रवर्णास्तिस्रः स्त्रीपशवो वैश्वदेव्यः विश्वेदेवदेवताश्चतुर्थे । रोहिणयः रक्तवर्णाः त्र्यवयः सार्धसंवत्सरास्तिस्रोऽजा वाचे वाग्देवताश्चतुर्थे । अविज्ञाताः कृष्णग्रीवादिचिह्नविज्ञानशून्यास्त्रयः पशवोऽदित्यै अदितिदेवताश्चतुर्थे । सदृपाः समानरूपास्त्रयः पशवो धात्रे धातृदेवताश्चतुर्थे । एवं पञ्चदश ॥ ॥ अथ पञ्चमे यूपे तिस्रो वत्सतर्यः बालहायनो देवानां पत्नीभ्यः तद्देवताः पञ्चमे ॥५॥

कृष्णग्रीवा आग्नेयाः शितिभ्रवो वसूनाꣳ रोहिता रुद्राणाꣳ श्वेता अवरोकिणऽ आदित्यानां नभोरूपाः पार्जन्याः ॥ ६॥

कृष्णग्रीवाः कालकण्ठास्त्रयः पशव आग्नेयाः अग्निदेवताः पञ्चमे । शितिभ्रवः श्वेतवर्णभ्रूयुक्तास्त्रयो वसूनां वसुदेवताः पञ्चमे । रोहिताः रक्तवर्णास्त्रयः रुद्राणां रुद्रदेवताः पञ्चमे । श्वेताः अवरोकिणः अवलोकिनः यद्वा अवाधस्ताद्रोकः छिद्रं येषां ते छिद्रं निर्व्यथनं रोकः ते त्रयः आदित्यानां तद्देवताः पञ्चमे ॥ ॥ अथ षष्ठे यूपे । नभोरूपाः पार्जन्यास्त्रयः षष्ठे ॥ ६॥

उन्नत ऋषभो वामनस्तऽऐन्द्रविष्णवा उन्नतः शितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याः शुकरूपा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥ ७॥

उन्नतः उच्चः ऋषभः पुष्टः वामनः बडुन्यपि वयसि गते वृद्धिरहितः ते त्रय ऐन्द्राविष्णवाः इन्द्रविष्णुदेवताः षष्ठे । उन्नतः शितिबाहुः श्वेतपूर्वपादः शितिपृष्ठः श्वेतपृष्ठः ते त्रयः ऐन्द्राबार्हस्पत्याः इन्द्रबृहस्पतिदेवताः षष्ठे । शुकरूपाः शुकपक्षिसमवर्णाः त्रयो वाजिनाः वाजिदेवताः षष्ठे । कल्माषाः कर्बुरास्त्रयः पशव आग्निमारुताः षष्ठे । एवं पञ्चदश ॥ ॥ अथ सप्तमे यूपे । श्यामाः शुक्लकृष्णवर्णाः पौष्णाः पूषदेवताः सप्तमे ॥ ७॥

एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नाविष्णवा वशा मैत्रावरुणयोऽन्यत-एन्यो मैत्र्यः ॥ ८॥

एताः कर्बुरवर्णास्त्रय इन्द्राग्निदेवताः सप्तमे । द्विरूपाः वर्णद्वयोपेतास्त्रयः अग्नीषोमीयाः अग्निसोमदेवत्याः सप्तमे । वामना अनड्वाहः त्रय आग्नाविष्णवाः अग्निविष्णुदेवत्याः सप्तमे । वशाः वन्ध्याः तिस्रोऽजाः मैत्रावरुण्यः तद्देवताः सप्तमे ॥ ॥ अथाष्टमे यूपे । अन्यतएन्यः एकपार्श्वे कर्बुरवर्णास्तिस्रोऽजा मैत्र्यः मित्रदेवत्याः अष्टमे ॥ ८॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या अविज्ञाता आदित्ये सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥ १ ॥

कृष्णग्रीवा आग्नेयास्त्रयः अष्टमे । बभ्रवः कपिलवर्णास्त्रयः सौम्याः सोमदेवत्याः अष्टमे । श्वेतास्त्रयः वायव्याः वायुदेवत्याः अष्टमे । अविज्ञाताः चिह्नविशेषेणाज्ञातास्त्रयः अदितिदेवत्याः अष्टमे ॥ ॥ अथ नवमे । सरूपाः धातृदेवत्याः नवमे । वत्सतर्यः देवपत्नीदेवत्यास्तिस्रः नवमे ॥ १ ॥

कृष्णा भौमा धूम्रा आन्तरिक्षा बृहन्तो दिव्याः शबलाः वैद्युताः सिध्मास्तारकाः ॥ १० ॥

कृष्णाः भौमाः भूमिदेवत्यास्त्रयः नवमे । धूम्रवर्णास्त्रयः अन्तरिक्षदेवत्याः नवमे । बृहन्तो महान्तस्त्रयः दिव्याः द्युदेवत्याः नवमे ॥ ॥ अथ दशमे शबलाः कर्बुरास्त्रयः वैद्युताः विद्युद्देवत्याः दशमे । सिध्माः सिध्माख्यरोगवन्तस्त्रयः तारकाः नक्षत्रदेवत्याः दशमे ॥ १० ॥

II. धूम्रान्वसन्तायालभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥ ११ ॥

धूम्रवर्णान् त्रीनजान् वसन्ताय वसन्तदेवतानालभते नियुनक्ति दशमे । श्वेतान् त्रीन्ग्रीष्माय दशमे । कृष्णवर्णान् त्रीन्वर्षाभ्यः दशमे ॥ ॥ अथैकादशे अरुणान् रक्तान् त्रीन् शरदे एकादशे । पृषतः नानावर्णविन्दुयुक्तान् त्रीन्हेमन्ताय एकादशे । पिशङ्गान् लोहितमिश्रकपिलवर्णान् त्रीन् शिशिराय एकादशे ॥ ११ ॥

त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाड्जगत्यै त्रिवत्सा अनुष्टुभे तुर्यवाड्डक्षिण्यै ॥ १२ ॥

सार्धसंवत्सरास्त्रयः (4.) गायत्र्यै एकादशे । सार्धद्विसंवत्सरास्त्रयः (5.) त्रिष्टुभे एकादशे ॥ ॥ अथ द्वादशे यूपे । दित्यवाट्ः द्विसंवत्सरास्त्रयो जगत्यै द्वा° । त्रिवत्साः त्रिवर्षाः त्रयोऽनुष्टुभे द्वा° । तुर्यवाट्ः सार्धत्रिसंवत्सरास्त्रय उक्षिण्यै द्वा° ॥ १२ ॥

पष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिछन्दसे ॥ १३ ॥

पष्ठवाहः चतुःसंवत्सरास्त्रयो विराजे द्वा° । उक्षाणः सेचनसमर्था युवानस्त्रयः बृहत्यै द्वा° ॥ ॥ अथ त्रयोदशे यूपे । ऋषभाः उक्षणोऽप्यधिकवयस्काः त्रयः ककुभे त्रयोदशे । अनड्वाहः शकटवहनसमर्था अज्ञास्त्रयः पङ्क्त्यै त्रयो° । धेनवः नवप्रसूता अज्ञास्तिस्रः अतिछन्दसे त्रयो° ॥ १३ ॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपधस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बभ्रुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥ १४ ॥

अथ चातुर्मास्यदेवाः पशवः श्वेताः सौर्या इत्यन्ताः । तत्र प्रथमं वैश्वदेवपर्वपशव उच्यन्ते । कृष्णग्रीवाः त्रयः आग्नेयाः त्रयो° । बभ्रवः कपिलास्त्रयः सौम्याः ॥ ॥ अथ चतुर्दशे यूपे । उपधस्ताः उपधंसनमधः पतन तद्गुणविशिष्टा वर्णान्तरमिश्रिता वा त्रयः सवितृदेवताः चतु° । वत्सतर्यः तिस्रः सरस्वतीदेवताः चतु° । श्यामाः शुक्लकृष्णवर्णाः पौष्णाः पूषदेवत्याः चतु° । पृश्नयः तनुकाया विचित्रवर्णा वा त्रयो मरुद्देवताः चतु° । बभ्रुरूपास्त्रयो वैश्वदेवाः चतु° ॥ ॥ अथ पञ्चदशे । वशाः वन्ध्यास्तिस्रो द्यावापृथिवीयाः द्यावापृथिवीदेवत्याः पञ्च° ॥ १४ ॥

उक्ताः संचरा एता ऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥ १५ ॥

अथ वरुणप्रघासपर्वपशव उच्यन्ते । संचरशब्देन कृष्णग्रीवा आग्नेया इत्यादयः पूर्वकण्डिकोक्ताः पञ्चदश पशव उच्यन्ते पञ्च संचराणि हवींषि भवन्तीति वत् यथा चातुर्मास्येषु चतुर्ष्वपि पर्वसु आग्नेयादीनि पञ्च हवींषि समानानि एवमत्रापि चतुर्णां पर्वणां सम्बन्धिनां आद्यानां पञ्चानां देवानामाद्या एते पञ्चदश पशवः समाना एव भवन्ति । तेन संचरा उक्ताः आग्नेयादयः पञ्चदश पशव उक्ता इत्यर्थः । आग्नेयाः कृष्णग्रीवास्त्रयः पञ्चदशे । सौम्याः बभ्रवस्त्रयः पञ्च° । सावित्रा

ऽपधस्ताः त्रयः पञ्च° । सारस्वत्यः वत्सतर्यः तिस्रः पञ्च° ॥ ॥ अथ षोडशे । पौष्णाः श्यामाः त्रयः षोडशे । एते संचराः उक्ताः । एताः कर्बुरास्त्रय ऐन्द्राग्नाः इन्द्राग्निदेवताः षो° । कृष्णाः कृष्णवर्णास्त्रयः वारुणाः वरुणदेवताः षो° । पृश्नयः तनुशरीरास्त्रयः मारुताः षो° । त्रयः तूपराः निःशृङ्गाः कायाः कदेवताः षो° ॥१५॥

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सांतपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान्मरुद्भ्यः क्रीडिभ्यः सञ्सृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥१६॥

अथ सप्तदशे । अथ साकमेधपशवः । प्रथमजान् मात्रा प्रथमगर्भे जातान् त्रीन् अजान् अनीकवते अनीकवदुणाविशिष्टायाग्नये आलभते नियुनक्ति सप्त° । वातसमूहो वात्या तया सह वर्तन्तऽइति सवात्याः वातमण्डलीमध्यस्थान् त्रीनजान् सांतपनेभ्यः मरुद्भ्यः सप्त° । बष्किहान् चिरप्रसूतान् त्रीन्गृहमेधिभ्यो मरुद्भ्यः सप्त° । संसृष्टान् सह सृष्टान् त्रीन् क्रीडिभ्यो मरुद्भ्यः सप्त° । अनुसृष्टान् अनु क्रमेण जातान् त्रीन् स्वतवद्भ्यो मरुद्भ्यः सप्त° ॥१६॥

उक्ताः संचरा एता ऐन्द्राग्नाः प्राप्तशृङ्गा माहेन्द्रा बभ्रुरूपा वैश्वकर्मणाः ॥१७॥

अथाष्टादशे यूपे महाहविःपशवः कृष्णग्रीवाद्यः पञ्चदश पूर्ववत् ॥ ॥ अथैकोनविंशतितमे एताः कर्बुरास्त्रय ऐन्द्राग्नाः एकोन° । प्राप्तशृङ्गाः संहितायां दीर्घः प्रकृष्टशृङ्गयुक्ता माहेन्द्राः महेन्द्रदेवताः एकोन° । बभ्रुरूपास्त्रयो वैश्वकर्मणाः विश्वकर्मदेवताः एकोन° ॥१७॥

धूम्रा बभ्रुनीकाशाः पितृणां सोमवतां बभ्रवो धूम्रनीकाशाः पितृणां बर्हिषदां कृष्णा बभ्रुनीकाशाः पितृणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥

अथ पित्र्येष्टिदेवतापशवः । धूम्राः कृष्णवर्णमिश्रा लोहितवर्णाः बभ्रुनीकाशाः कपिलवर्णसदृशास्त्रयः पशवः सोमवतां पितृणां नियोज्याः एकोन° । बभ्रवः कपिलाः धूम्रनीकाशाः धूम्रा इव नितरां काशन्ते इति तादृशास्त्रयः बर्हिषदां पि-

तृणामेकोन॰ ॥ ॥ अथ विंशे यूपे । कृष्णाः बभ्रुनीकाशाः अग्निधात्तानां पितॄणां विंशे । कृष्णाः पृषन्तः विन्दुयुक्ताः त्रैयम्बकाः त्र्यम्बकदेवताः विंशे ॥१८॥

उक्ताः संचरा एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः ॥११॥

अथ शुनासीरीयपशवः । तत्र संचराः आग्नेयाद्यः पञ्चदशोक्ताः । तेन कृष्णग्रीवा आग्नेयाः विंशे । बभ्रवः सौम्याः विंशे । उपधस्ताः सावित्राः विंशे ॥ ॥ अथैकविंशे यूपे । वत्सतर्यः सारस्वत्यः एकविंशे । श्यामाः पौष्णाः एक॰ । एताः कर्बुराः शुनासीरीयाः शुनासीरदेवताः एक॰ । श्वेताः त्रयो वायव्याः वायुदेवत्याः एक॰ । श्वेताः त्रयः सौर्याः सूर्यदेवताः एक॰ ॥ एवं समाप्ताः यूपाः । इत्याद्याः सौर्यान्ताः सप्तविंशत्यधिकशतत्रयं ग्राम्याः पशवः सर्वे उक्ताः ॥११॥

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिका हेमन्ताय ककराञ्छिशिराय विकंकरान् ॥२०॥

अथारण्याः पशव उच्यन्ते ॥ अत्रैकविंशतिर्यूपाः तेषां यूपानां विंशतिरन्तरालानि तेष्वन्तरालेषु अन्तरालोत्पत्तिक्रमेण कपिञ्जलाद्यस्त्रयोदश-त्रयोदश पशव आलम्भनीयाः । अत्र यूपान्तरालेष्वारण्यपशूनां बन्धनोपाय उक्तो मानवसूत्रे नाडीषु ह्रुषिमशकान् करण्डेषु सर्पान् पञ्जरेषु मृगव्याघ्रसिंहान् कुम्भेषु मकरमत्स्यमण्डूकान् जालेषु पक्षिणः कारासु हस्तिनो नौषु चौदकानि यथार्थमितरानिति । ये पशवो येनोपायेन यूपान्तरालेषु तिष्ठन्ति ते तेनोपायेन स्थापनीया इति तात्पर्यम् ॥ अत्र येषामारण्यजीववाचिपदानामर्था न ज्ञायन्ते ते निगमनिरुक्तनिघण्टुव्याकरणोणादिवृत्त्यभिधानग्रन्थेभ्यो विलोक्यावगन्तव्याः आटवीकेभ्यश्च लक्षणीयाः ॥ तत्र प्रथमोत्पन्ने यूपान्तराले त्रीन्कपिञ्जलान्वसन्ताय आलभते नियुनक्ति । त्रीन्कलविङ्कान् चटकान्ग्रीष्माय । तित्तिरीन् त्रीन्वर्षाभ्यः । वर्तिकाः पक्षिविशेषान् शरदे । ततस्त्रयाणां ककराणां मध्ये एकं ककरं हेमन्ताय ॥ ॥ अथ द्वितीये ऽवकाशे शिष्टौ द्वौ ककरौ पक्षिविशेषौ हेमन्ताय । त्रीन्विककरान् शिशिराय ॥२०॥

III. समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकान्ह्रदो मत्स्यान्मित्राय कुलीपयान्वरुणाय नाक्रान् ॥२१॥

त्रीन् शिशुमारान् जलचरजन्तून्समुद्रायालभते । त्रीन्मण्डूकान्मेकान्पर्जन्याय । त्रयाणां मत्स्यानां मध्ये द्वौ अद्यः ॥ ॥ अथ तृतीयेऽवकाशे एकं शिष्टं मत्स्यमद्यः । त्रीन्कुलीपयान् जलजान्मित्राय । त्रीन्नाक्रान् नक्रा एव नाक्रास्तान् जलचरान् वरुणाय ॥ २१ ॥

सोमाय हꣳसानालभते वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्मित्राय मद्गून्वरुणाय चक्रवाकान् ॥ २२ ॥

त्रीन् हꣳसान्सोमाय । तिस्रो वलाकाः वकपत्नीः वायवे ॥ ॥ अथ चतुर्थेऽवकाशे । त्रीन् क्रुञ्चान्पक्षिणः इन्द्राग्निभ्यां । त्रीन्मद्गून् (6.) जलकाकान्मित्राय । त्रीन् चक्रवाकान्वरुणाय ॥ २२ ॥

अग्नये कुटरूनालभते वनस्पतिभ्य उलूकान्ग्रीषोमाभ्यां चाषान्नृभ्यो मयूरान्मित्रावरुणाभ्या कपोतान् ॥ २३ ॥

त्रीन्कुटरून् कुक्कुटानग्नये । ततस्त्रयाणामुलूकानां मध्ये एकमुलूकं वनस्पतिभ्यः ॥ ॥ अथ पञ्चमेऽवकाशे द्वौ उलूकौ काकवैरिणौ । त्रीन् चाषानग्रीषोमाभ्यां त्रीन्मयूरान्नृभ्यां त्रीन्कपोतान्मित्रावरुणाभ्याम् ॥ २३ ॥

सोमाय लवानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥ २४ ॥

त्रयाणां लवानां लावकानां मध्ये द्वौ सोमाय ॥ ॥ अथ षष्ठेऽवकाशे एकं लवं सोमाय । कौलीकान्पक्षिणः त्वष्ट्रे । तिस्रो गोषादीः गवां सादयित्रीः पक्षिणीः देवानां पत्नीभ्यः । तिस्रः कुलीकाः पक्षिणीः देवजामिभ्यः देवबधूभ्यः जामिः स्वसृकुलस्त्रियोः । त्रीन्पारुष्णसंज्ञान्गृहपतयेऽग्नये ॥ २४ ॥

अह्ने पारावतानालभते रात्र्यै सीचापूरक्रोरात्रयोः संधिभ्यो (7.) ऋतूर्मासेभ्यो दात्यौहान्संवत्सराय मरुतः सुपर्णान् ॥ २५ ॥

अथ सप्तमेऽवकाशे त्रीन्पारावतान्कलरवानह्ने तिस्रः सीचापूः पक्षिणीः रात्र्यै

तिस्रो जतूः (8.) पात्राख्याः पक्षिणीः अक्तोरात्रयोः संधिभ्यः । त्रीन्दात्यूहान् कालकण्ठान्मासेभ्यः त्रयाणां मरुतां सुपर्णानां मध्ये एकं संवत्सराय ॥ ॥ अथाष्टमे ऽवकाशे द्वौ महान्तौ सुपर्णौ संवत्सराय ॥२५॥

भूम्या ऽआखूनालभतेऽन्तरिक्षाय पाङ्क्तान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥२६॥

भूम्यै आखून्मूषकान् त्रीन् पाङ्क्तान् मूषकजातिविशेषानन्तरिक्षाय काशान् (9.) तद्वदानेव दिवे त्रीन्नकुलान्दिग्भ्यः तत्र द्वौ अष्टमे ॥ ॥ अथ नवमे एकम् । त्रीन्बभ्रुकानवान्तरदिशाभ्यः ॥२६॥

वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून्विश्वेभ्यो देवेभ्यः पृषतान्साध्येभ्यः कुलुङ्गान् ॥२७॥

त्रीनृष्यान् (10.) वसुभ्यः ऋष्यादयो मृगविशेषाः । रुद्रेभ्यः रुरून् । त्रीन्यङ्कूनादित्येभ्यः ॥ ॥ अथ दशमेऽवकाशे त्रीन्पृषतान्विश्वेभ्यो देवेभ्यः त्रीन्कुलङ्गान् (11.) साध्येभ्यः ॥२७॥

ईशानाय परस्वत आलभते मित्राय गौरान्वरुणाय महिषान्बृहस्पतये गवयँस्त्वष्ट्रेऽष्ट्रान् ॥२८॥

परस्वतः मृगविशेषानीशानाय । त्रीन्गौरान्मृगान्मित्राय त्रीन्महिषान्वरुणाय तत्रैकं दशमे ॥ ॥ अथैकादशेऽवकाशे त्रीन्गवयान्गोसदृशानारण्यपशून्बृहस्पतये त्रीनुष्ट्रान् त्वष्ट्रे ॥२८॥

प्रजापतये पुरुषान्हस्तिन आलभते वाचे प्लुषीञ्चक्षुषे मशकाञ्श्रोत्राय भृङ्गाः ॥२९॥

प्रजापतये पुरुषान्हस्तिनः त्रीन् । त्रीन्प्लुषीन्वक्रतुण्डान्वाचे तन्मध्ये द्वौ प्लुषी एकादशे ॥ ॥ अथ द्वादशेऽवकाशे एकं प्लुषिम् । त्रीन्मशकान् चक्षुषे । त्रयो भृङ्गाः श्रोत्राय नियोज्याः ॥२९॥

प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलंगोः कृमिः समुद्राय शिशुमारो ह्रिमवते हस्ती ॥३०॥

प्रजापतये च वायवे च एको गोमृगः गवयः । एक आरण्यो मेषो वरुणाय । एकः कृष्णो मेषो यमाय । एको मर्कटः मनुष्यराजाय । एको रोहिदृष्यः शार्दूलाय । एका गवयी ऋषभाय तदाख्यदेवाय ॥ ॥ अथ त्रयोदशेऽवकाशे एका वर्तिका क्षिप्रश्येनाय देवाय । एकः कृमिः कीटः नीलंगोः नीलंगवे । शिशुमारः एको जलचरः समुद्राय । हस्ती ह्रिमवते ॥३०॥

IV. मयुः प्राजापत्य उलो हरिद्रणो वृषदंशस्ते धात्रे दिशां कङ्को धुङ्गाग्नेयी कलविङ्को लोहिताक्षिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥३१॥

मयुः प्राजापत्यः तुरगवदनः किंनरः प्रजापतिदैवतः । उलो मृगविशेषः हरिद्रणः सिंहविशेषः वृषदंशो विडालः (12.) ते त्रयो धात्रे । एकः कङ्कः बकः दिशां दिग्भ्यः । एका धुङ्गा पक्षिणी आग्नेयी अग्निदेवत्या । कलविङ्कः चटकः लोहिताक्षिः रक्तवर्णासर्पः पुष्करसादी पुष्करे सीदतीति कमलभक्षी पक्षिविशेषः ते त्रयः त्वाष्ट्राः त्वष्टृदेवताः ॥ ॥ अथ चतुर्दशेऽवकाशे एकः क्रुञ्चः वाचे ॥३१॥

सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्काय चक्रवाकः ॥३२॥

कुलङ्गः (13.) कुरङ्गो हरिण एकः सोमाय । आरण्यो वनजोऽजश्छागः नकुलः शका शकुन्तिः एते त्रयः पौष्णाः पूषदेवत्याः । क्रोष्टा शृगालो मायोर्देवस्य । एको गौरमृगः इन्द्रस्य । पिद्वो मृगविशेषः न्यङ्कुः अपि कक्कटः (14.) स एव ते त्रयोऽनुमत्यै । चक्रवाकः प्रतिश्रुत्काय ॥३२॥

सौरी बलाका शार्गः सृञ्जयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥ ३३ ॥

वलाका वकस्त्री सूर्यदेवत्या । शार्गः (15.) पक्षिविशेषः ॥ ॥ अथ पञ्चदशेऽवकाशे सृञ्जयः पक्षिविशेषः शयाण्डकोऽपि ते मैत्राः मित्रदेवत्याः पुरुषवाक् मनुष्यवद्वादिनी (16.) शारिः शुकी सरस्वत्यै । श्वावित् सेधा भौमी भूदेवत्या शार्दूलो व्याघ्रः वृकः चित्रकः पृदाकुः सर्पः ते त्रयो मन्यवे । पुरुषवाक् शुकः सरस्वते समुद्राय ॥ ३३ ॥

सुपर्णः पार्जन्य आतिर्वाक्सो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥ ३४ ॥

सुपर्णः गरुत्मान्पार्जन्यः पर्जन्याय आतिः आडी वाक्सः दार्विदा (17.) काष्ठकुट्टः ते त्रयः पक्षिविशेषाः वायवे । बृहस्पतये वाचस्पतये वाचो वाण्याः पतये इति बृहस्पतिविशेषणम् ईदृशाय बृहस्पतये पैङ्गराजः पक्षिविशेषः ॥ ॥ अथ षोडशेऽवकाशे अलजः पक्षिविशेषः आन्तरिक्षः अन्तरिक्षदेवतः । प्लवः जलपक्षी मद्गुः (18.) कारण्डवः मत्स्यः ते नदीपतये । कूर्मः कच्छपः द्यावापृथिवीयः द्यावापृथिवीदेवतः ॥ ३४ ॥

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हंसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्पकः ॥ ३५ ॥

पुरुषमृगः पुंमृगः चन्द्रमसः । गोधा कालका पक्षिविशेषः दार्वाघाटः (19.) सारसः ते वनस्पतीनाम् । कृकवाकुः ताम्रचूडः सावित्रः सवितृदेवतः हंसः वातस्य नाक्रः मकरः कुलीपयः ते त्रयो जलचरविशेषाः अकूपारस्य समुद्रस्य त्रया-

णां मध्ये द्वौ षोडशे ॥ ॥ अथ सप्तदशेऽवकाशे एकः कुलीपयः अकूपारस्य । शल्यकः श्वावित् ह्रियै देव्यै ॥३५॥

एणयङ्को मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्याऽऋक्षो जतूः सुषिलीका तऽइतरजनानां जक्का वैष्णवी ॥३६॥

एणी मृगी अङ्कः आलभ्या । मण्डूको मूषिका तित्तिरिः ते त्रयः सर्पाणाम् । लोपाशो वनचरविशेषः आश्विनः अश्विदेवतः । कृष्णो मृगः रात्र्यै । ऋक्षः भल्लूकः (20.) जतूः सुषिलीका (21.) एतौ पक्षिविशेषौ ते त्रयः इतरजनानां देवानाम् । जक्का गात्रसंकोचनी वैष्णवी विष्णुदेवत्या ॥३६॥

अन्यवापोऽर्धमासानामृष्यो मयूरः सुपर्णास्ते गन्धर्वाणामपामुद्रो मासां कश्यपो रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥३७॥

अन्यवापः कोकिलाख्यः पक्षिविशेषोऽर्धमासानां पशुः ॥ ॥ अथाष्टादशेऽवकाशे । ऋष्यो (22.) मृगविशेषः मयूरः वर्ही सुपर्णो गरुत्मान् ते गन्धर्वाणां पशवः । उद्रः जलचरः कर्कटसंज्ञः अपां पशुः । कश्यपः कच्छपः मासां मासानाम् । रोहित् ऋष्यः कुण्डृणाची (23.) वनचरीविशेषः गोलत्तिकापि ते त्रयोऽप्सरसाम् । असितः कृष्णः पशुर्मृत्यवे ॥३७॥

वर्षाभ्रूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाऽजगरो वसूनां कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥३८॥

वर्षाभ्रूः वर्षाभूः भेकी ऋतूनाम् । आखुः मूषकः कशः मान्थालश्च तद्विशेषौ ते त्रयः पितॄणाम् ॥ ॥ अथैकोनविंशे । अजगरो महासर्पः बलाय । कपिञ्जलो वसूनाम् । कपोतः उलूकः शशः ते निर्ऋत्यै । आरण्यो मेषो वरुणाय ॥३८॥

श्वित्र आदित्यानामुष्ट्रो घृणीवान्वाध्रीनिसस्ते मत्याऽअरण्याय सृमरो रुद्रो रौद्रः क्रव्यिः कुटरुर्दात्यौक्षस्ते वाजिनां कामाय पिक्कः ॥३९॥

श्वित्रः श्वेतः पशुरादित्यानाम् । उष्ट्रः दीर्घग्रीवः घृणिवान् तेजस्वी पशुविशेषः

संहितायां घृणिशब्ददीर्घः वार्ध्रीनसी (24.) कण्ठे स्तनवानजः ते त्रयो मर्त्ये दे-व्यै । सृमरः गवयोऽरण्याय देवाय । रुरुः मृगः रौद्रः रुद्रदेवतः क्वयिः पक्षिवि-शेषः ॥ ॥ अथ विंशेऽवकाशे । कुटरुः कुक्कुटः दात्यौहः कालकण्ठः ते त्रयो वाजिनां देवानाम् । पिकः कोकिलः कामाय ॥३१॥

खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिं-ह्रो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृ-षतः ॥४०॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां चतुर्विंशोऽध्यायः ॥२४॥

खड्गो (25.) मृगविशेषो विश्वदेवदेवतः । एकः कृष्णः श्वा सारमेयः द्वितीयः कर्णो लम्बकर्णो गर्दभः तृतीयस्तरक्षुः मृगादनः ते त्रयो रक्षसां पशवः । सूकरः इन्द्राय । सिंह्रो मारुतः मरुद्देवतः । कृकलासः सरटः पिप्पका पक्षिणी शकुनिः पक्षी ते त्रयः शरव्यायै । एकः पृषतः मृगविशेषो विश्वेषां देवानां पशुर्भवति विश्वेभ्यो देवेभ्यो जुष्टं वियुनज्मीति योज्यः ॥ ॥ एवं षष्ट्यधिकं शतद्वयमारण्याः पशव उक्ताः ॥ ॥ अत्र द्वाविंशतिरेकादशिनः सप्तविंशत्यधिकानि त्रीणि शतानि अश्वाद्यः सौर्यान्ताः षष्ट्यधिकं शतद्वयं कपिञ्जलाद्यः पृषतान्ता आरण्याः पशवः सर्वे मिलित्वा षट् शतानि नवाधिकानि पशवो भवन्ति । श्लोकश्च षट् शता-नि नियुज्यन्ते पशूनां मध्यमेऽहनि अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि चेति ॥ तेऽारण्याः सर्वे उत्सृष्टव्या न तु हिंस्याः ॥४०॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । गतोऽध्यायश्चतुर्विंशो देवतापशुवा-चकः ॥२४॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

I. ॥ १ अश्व॰ - °ङ्वोः ॥१॥ १ आश्विनाऽश्वो॰ - पार्श्वयोः ॥२॥ १ त्वाष्ट्रौ - २ वारुणाः ॥३॥ २ शितिरन्ध्रो - वारुणयः ॥४॥ ३ शुङ्ग॰ - यामाः ॥५॥ ३ अवलिप्ता - ४ मारुताः ॥६॥ ४ फल्गू॰ - त्वाष्ट्राः ॥७॥ ४ कृष्ण॰ - ऽऽ-षस्याः ॥८॥ ५ ॥१॥ ॥

II. ॥ ६-१० ॥१०-१४॥ ॥ III. ॥ ११-१५ ॥१५-१९॥ ॥

IV. ॥ १६ [क्रीलिभ्यः] - २० ॥२०-२४॥ ॥ V. ॥ २१-२५ ॥२५-२९॥ ॥

VI. ॥ २६-३० ॥३०-३४॥ ॥ VII. ॥ ३१ [धुङ्क्ष्वा J. धुङ्क्ष्या K.]

॥३५॥ ३२ ॥३६॥ ३३ [सृज्यः K.] - ३५ ॥३७-३९॥ ॥

VIII. ॥ ३६-३८ [मान्धाल° J.] ॥४०-४२॥ ३९ ॥४३॥ ४० [खड्गो] ॥४४॥ ॥

अष्टानुवाकेषु चतुश्चत्वारिंशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां षड्विंशोऽध्यायः ॥२६॥ ॥

I. शादं दद्भिरवकां दत्तमूलैर्मृदं बस्वैस्तेगान्द७ष्ट्राभ्या७ सरस्वत्याऽग्रन्निक्कं न्निक्कायां उत्सादमवक्रन्देन तालु वाज७ हनुभ्यामप आस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः (1.) पन्थानं भ्रूभ्यां द्यावापृथिवी वर्तीभ्यां विद्युतं कनीनकाभ्या७ शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पद्मानिवार्या इत्तवोऽवार्याणि पद्मानि पार्या इत्तवः ॥१॥

प्रणम्य कमलानाथं गणेशं गिरिजां गिरम् । पञ्चविंशेऽयमध्याये वेददीपो मयेर्यते (2.) ॥ ॥ का° [२०.८.५.६.] स्विष्टकृद्वनस्पत्यन्तरे शूल्य७ हुत्वा देवताश्चाङ्गेभ्यो जुहोत्यमुष्मै स्वाहेति प्रतिदेवत७ शादप्रभृतित्वगन्तेभ्यो विमुखाच्च परेभ्य इति । स्विष्टकृद्वनस्पत्योरन्तरे वनस्पतियागानन्तरं स्विष्टकृद्यागात्पूर्वं शूले अपितं मांसं प्राजापत्योऽश्व इति वचनात्प्रजापतये हुत्वा अमुष्मै स्वाहेति प्रतिदेवतं शादादित्वगन्तेभ्यो देवताश्चाङ्गेभ्यो देवताभ्योऽश्चाङ्गेभ्यश्च घृतं जुहुयात् अनादेशे घृतस्योक्तत्वात् । तत्र शादं दद्भिरित्यादि-पृथिवीं त्वचेत्यन्तः संहिताभागो ब्राह्मणं न मन्त्राः । शादादयो देवाः दत्ताद्यङ्गानि । ततश्चतुर्गृहीतमाज्यं गृहीत्वा-गृहीत्वा शादाय स्वाहा दद्भ्यः स्वाहा अवकाभ्यः स्वाहा दत्तमूलेभ्यः स्वाहेत्यादि पृथिव्यै स्वाहा त्वचे स्वाहेत्यन्तं जुहुयादित्येकः पक्षः शाखान्तरोदितः । स्वपक्षे तु शादं दद्भिः प्रीणामि स्वाहेत्यादिहोममन्त्राः । देवता भोक्त्री द्वितीयया निर्दिश्यते अश्वाङ्गं भोग्यं

तृतीयया करणविभक्त्या निर्दिश्यते । क्वचित्केवला देवतैव यथा शुक्लाय स्वाहा कृष्णाय स्वाहेति क्वचिदन्यविभक्त्यैव द्रव्यदेवतयोर्निर्देशः यथा अग्नेः पक्षतिर्वायोर्निपक्षतिरिति । तथा च श्रुतिः [१३.३.५.१.] शादं दद्भिरवकां दन्तमूलैरित्याज्यमवदानानि (3.) कृत्वा प्रत्याख्यायं देवताभ्य आकुतीर्जुहोति या एव देवता अपिभागास्ता भागधेयेन समर्धयतीति । अस्यायमर्थः । शादं नाम देवमश्वस्य दद्भिर्दन्तैः प्रीणामीति शेषः स्वाहाकारो दानार्थः ततश्च शादं दद्भिः प्रीणामि स्वाहेति एवमन्यान्यपि योज्यानि । आज्यमवदानानि कृत्वा आज्यमेवाश्वाङ्गत्वेन परिकल्प्य प्रत्याख्यायमवदानमवदानं (4.) प्रति शादादिदेवता आख्यायाख्याया-ज्याकुतीर्जुहोति संकल्पिताश्वाङ्गभावा घृताकुतीः शादादिभ्यो ददाति एवं कुर्वन्नपिभागाः कल्पितभागास्ता भागेन समर्धयति प्रीणातीत्यर्थः ॥ अथ संहितार्थः । दद्भिरश्वदन्तैः शादं देवं प्रीणामि । दन्तमूलैरवकां देवतां प्रीणामि । वस्त्रैर्दन्तपीठैर्मृदं देवतां प्रीणामि वस्त्रं स्याद्दन्तपीठिका । शादादयोऽप्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः । दंष्ट्राभ्यां तेगां (5.) देवतां प्रीणामि । सरस्वत्यै अग्रजिह्वम् अत्र चतुर्थ्या देवतोद्देशः प्रथमयाङ्गस्य अतो विभक्तिव्यत्ययः जिह्वाया अग्रमग्रजिह्वं जिह्वायेण सरस्वतीं प्रीणामि । जिह्वायाः उत्सादम् अत्र षष्ठ्याश्चाङ्गोद्देशः द्वितीयया देवस्य विभक्तिव्यत्ययः जिह्वयोत्सादं देवं प्रीणामि । अवक्रन्देन तालु अत्र देवे तृतीया अङ्गे प्रथमा व्यत्ययः तालुना अवक्रन्दं देवं प्रीणामि । वाजं हनुभ्याम् हनुभ्यां वक्त्रैकदेशाभ्यां वाजं देवं प्रीणामि । आस्येन मुखेनापो देवताः प्रीणामि । श्मश्रुभिर्मुखकेशैरादित्यान्प्रीणामि । भ्रूभ्यां ललाटरोमपङ्क्तिभ्यां पन्थानं देवं प्रीणामि । वर्ताः पक्ष्मपङ्क्तिः ताभ्यां द्यावापृथिव्यौ देवते प्रीणामि । कनीनकाभ्यां नेत्रमध्यगकृष्णगोलाभ्यां विद्युतं देवतां प्रीणामि । शुक्लाय स्वाहा कृष्णाय स्वाहा देवोद्देश एव न वङ्गम् शुक्लाय कृष्णाय देवाय सुकृतमस्तु यद्वा चतुर्थ्याश्चाङ्गमेव निर्दिश्यते प्राजापत्योऽश्व इति वचनाद्देवोऽध्याहर्तव्यः शुक्लेन कृष्णेन चाश्वाङ्गेन प्रजापतिं प्रीणामि एवं लोमभ्यः स्वाहेत्यादावपि बोध्यम् । पार्याणि पक्ष्माणि अत्र तद्धितेन देवतोद्देशः पक्ष्माणि नेत्रोपरिलोमानि पार्याणि पारदेवत्यानि ततः पक्ष्मभिः पारं प्रीणा-

मि । इक्षवो नेत्राधोभागरोमाणि अवारदेवत्याः ततः इक्षुभिरवारं प्रीणामि । विपरीतं वा अवार्याणि अवारदेवत्यानि पक्ष्माणि इक्षवः पार्याः पारदेवत्याः ॥१॥

II. वातं प्राणेनापानेन नासिकेऽउपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्तरमनूकाशेन वाक्व्यं निवेष्यं मूर्धा स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां कर्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदितिꣳ शीर्ष्णा निर्ऋतिं निर्ऽर्ऽइत्येन शीर्ष्णा संक्रोशैः प्राणान्रेष्माणꣳ स्तुपेन ॥२॥

अश्वस्य प्राणवायुना वातं प्रीणामि । अपानवायुना नासिकासंज्ञे द्वे देवते प्रीणामि । अधस्तनेन ओष्ठेन उपयामं देवं प्रीणामि । उपरितनेन ओष्ठेन सत्संज्ञं देवं प्रीणामि । प्रकाशिनोपरितनदंष्ट्रकाल्या अन्तरं देवं प्रीणामि । उपसर्गस्य घञ्यमनुष्ये बहुलमिति [पा° ६.३.१२२.] अनोर्दीर्घः अनूकाशिनाधस्तनदंष्ट्रकाल्या वाक्यं देवं प्रीणामि । मूर्धा मस्तकेन निवेष्यं देवं प्रीणामि । निश्चितं बध्यते निर्बाधः शिरोऽस्थिमध्यसंलग्नो मज्जाभागः तेन स्तनयित्नुं देवं प्रीणामि । मस्तके भवं मस्तिष्कं शिरोमध्यस्थो जर्जरो मांसभागः मस्तिष्कं गोर्दमित्यमरः [२.६.६५.] मस्तकमिष्यति गच्छति मस्तिष्कम् इष गतौ मस्तकमज्ञेति क्षीरस्वामी तेन मस्तिष्केणाशनिं देवं प्रीणामि । विद्युतं कनीनकाभ्यां प्रीणामीति पूर्ववत् । कर्णाभ्यां श्रोत्रम् अत्राश्वाङ्गात्मिका एव देवता कर्णाभ्यां कर्णशष्कुलीभ्यां श्रोत्रं देवं प्रीणामि । श्रोत्रेन्द्रियाभ्यां कर्णौ देवौ प्रीणामि । कण्ठाधोभागेन तेदनीं देवतां प्रीणामि । शुष्कश्चासौ कण्ठश्च शुष्ककण्ठम् कण्ठस्य यः शुष्को निर्मांसो देशः तेनापो देवताः प्रीणामि । पश्चाद्ग्रीवा शिरा मन्येति [२.६.६५.] अमरः ग्रीवापश्चाद्भागे कृकाटिकायां शिरा मन्या मन्यतऽइति मन्या संज्ञायां समज्ञनीति [पा° ३.३.९९.] क्यप् ग्रीवापश्चान्नाडीभिश्चित्तं प्रीणामि । शीर्ष्णा शिरसादितिं देवतां प्रीणामि शीर्षस्य शीर्षन्नादेशः शसादौ । नितरां जर्जरीभूतेन शिरोभागेन निर्ऋतिं देवं प्रीणामि । सम्यक् क्रोशन्ति शब्दायन्ते तानि संक्रोशानि गच्छतोऽश्वस्य

यान्यङ्गानि शब्दं कुर्वन्ति तैरङ्गैः प्राणान्देवान्प्रीणामि । स्तुप उच्छ्रये स्तुपेन उच्छ्रितेन शिखाभूतेनाङ्गेन रेष्माणं देवं प्रीणाति ॥२॥

III. मशकान्केशैरिन्द्रꣳ स्वपसा वक्षेन बृहस्पतिꣳ शकुनिसादेन कूर्माञ्छफैराक्रमणꣳ स्थूराभ्यामुल्लालाभिः कपिञ्जलान्ज्ञवं ज्ञङ्घाभ्यामधानं बाहुभ्यां ज्ञाम्बीलेनारण्यमग्निमंतिरुग्भ्यां पूषणं दोर्भ्यामश्विनावꣳसाभ्याꣳ रुद्रꣳ रोरावाभ्याम् ॥३॥

केशैः स्कन्धस्थरोमभिः मशकान्देवान् प्रीणामि । वक्षः स्कन्धस्तेनेन्द्रं प्रीणामि कीदृशेन वक्षेन स्वपसा अप इति कर्मनाम शोभनमपः कर्म पर्याणधारणनरवक्षनादिकं यस्य स स्वपाः तेन । शकुनिः पक्षी तद्वत्सादो गमनम् षद्लृ विशरणगत्यादौ घञ् वेगवत्कूर्दनं तेन बृहस्पतिं देवं प्रीणामि । शफं क्लीबे खुरः पुमान् खुरैः कूर्मान्देवान्प्रीणामि । रलयोरैक्यम् स्थूलाभ्यां गुल्फाभ्यामाक्रमणं देवं प्रीणामि । गुल्फाधःस्था नाड्यः ऋज्वलास्ताभिः कपिञ्जलान्देवान्प्रीणामि । गुल्फजानुनोर्मध्यभागो ज्ञङ्घा ताभ्यां ज्ञवं देवं प्रीणामि । अग्रपादयोर्जानूर्ध्वभागौ बाहू ताभ्यां अधानं देवं प्रीणामि । ज्ञाम्बीरं ज्ञम्बीरतरोः फलं रलयोरभेदः (6.) तदाकारो ज्ञानुमध्यभागो ज्ञाम्बीरस्तेनारण्यं देवं प्रीणामि । अत्यन्तं रोचेते तौ अतिरुचौ ज्ञानुदेशौ ताभ्यामग्निं देवं प्रीणामि । अग्रपादयोर्जान्वधो दोषौ करौ ताभ्यां पूषणं देवं प्रीणामि । अंसौ स्कन्धौ ताभ्यामश्विनौ देवौ प्रीणामि । रोरावंसग्रन्थी ताभ्यां रुद्रं प्रीणामि ॥३॥

IV. अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥४॥

अत्र षष्ठ्या देवतोद्देशः प्रथमयाङ्गोद्देशः ततोऽस्तीत्यध्याहारः । अग्नेः देवस्य पक्षतिरस्तु । पक्षः साध्यविरोधयोः बले काले पतत्रे च रुचौ पार्श्वे प्रकल्पिते इत्यभिधानोक्तेरत्र पक्षः पार्श्ववाची पक्षस्य मूलं पक्षतिः पक्षात्तिरिति [पा° ५.२.

२५.] मूलार्थे तिप्रत्ययः ततः पक्षस्य पार्श्वस्य मूलभूतान्यस्थीनि वङ्क्रिशब्दवाच्यानि पक्षतिशब्देनोच्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति षड्विंशतिरस्य वङ्क्रय इति श्रुतेः [कौषीत° ब्रा° १०.४.] । तेषां क्रमेण देवतासम्बन्धं वक्ति । तत्रादौ दक्षिणपार्श्वास्थां देवता आह अग्नेः पक्षतिः प्रथमं दक्षिणपार्श्वास्थि अग्नेरस्तु विभक्तिव्यत्ययो वा पक्षत्याग्निं देवं प्रीणामि । वायोर्निपक्षतिः नीचा पक्षतिर्निपक्षतिः द्वितीयं दक्षिणपार्श्वास्थि वायोर्देवस्यास्तु । एवमग्नेऽपि व्याख्येयम् । तृतीया पक्षतिरिन्द्रस्यास्तु । चतुर्थी पक्षतिः सोमस्य । अदित्यै चतुर्थी षष्ठ्यर्था पञ्चमी पक्षतिः अदित्याः । षष्ठी पक्षतिः इन्द्राण्याः । सप्तमी पक्षतिः मरुताम् । अष्टमी पक्षतिः बृहस्पतेः । नवमी पक्षतिर्यमाणो देवस्य । दशमी धातुर्देवस्य । एकादशी पक्षतिः इन्द्रस्य । द्वादशी पक्षतिः वरुणस्य । त्रयोदशी पक्षतिः दक्षिणपार्श्वास्थि यमस्य देवस्यास्तु ॥४॥

V. इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाꣳ सप्तमी विष्णोरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥५॥

अथ वामपार्श्वास्थां देवानाह । प्रथममुपरिस्थं वामपार्श्वास्थि इन्द्राग्न्योर्देवयोरस्तु । सरस्वत्यै निपक्षतिः द्वितीया पक्षतिः सरस्वत्याः । तृतीया पक्षतिर्मित्रस्य देवस्य । चतुर्थी अपां देवतानाम् । पञ्चमी निर्ऋत्यै निर्ऋतेः । षष्ठी अग्नीषोमयोः । सप्तमी सर्पाणां देवानाम् । अष्टमी विष्णोर्देवस्य । नवमी पूष्णो देवस्य । दशमी त्वष्टुः । एकादशी इन्द्रस्य । द्वादशी वरुणस्य । यमस्येयं यमी त्रयोदशी पक्षतिः यमसम्बन्धिनी चतुर्थी प्रथमार्था ॥ अथ समस्तयोः पार्श्वयोर्देवानाह दक्षिणं पार्श्वं द्यावापृथिव्योरस्तु उत्तरं वामं पार्श्वं विश्वेषां देवानामस्तु ॥५॥

VI. मरुताꣳ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्या-

नाँ तृतीयाँ वायोः पुह्मग्नीषोमयोर्भासदौ क्रुचौ श्रोणिभ्यामिन्द्रावृहस्पती. ऽऊरुभ्याँ मित्रावरुणावल्गाभ्यामाक्रमणꣳ स्थूराभ्याँ बलं कुष्ठाभ्याम् ॥ ६॥

अथाङ्गान्तराणां देवता आह । विभक्तिव्यत्ययः । स्कन्धप्रदेशैर्मरुतो देवान्प्रीणामि । अश्वपुच्छोपरि तिस्रोऽस्थिपङ्क्तयः सन्ति तासां देवता आह । कीकसं कुल्यमस्थि चेत्यमरः [२. ६. ६८.] कीकसति शब्दं करोति कीकसमस्थि प्रथमा कीकसा प्रथमानि कीकसानि पुच्छोपरिस्थास्थिपङ्क्तिर्विश्वेषां देवानां प्रथमकीकसैर्विश्वान्देवान्प्रीणामि । द्वितीयास्थिपङ्क्तिः रुद्राणां द्वितीयैः रुद्रान्प्रीणामि । तृतीयानि कीकसानि आदित्यानां तृतीयैः कीकसैरादित्यान्प्रीणामि । वायोः पुह्मं पुच्छेन वायुं प्रीणामि । भासदौ भासेते तौ भासदौ नितम्बौ तावग्नीषोमयोः भासद्भ्यामग्नीषोमौ प्रीणामि । क्रुचौ श्रोणिभ्याम् पुनः पूर्ववदङ्गात्तृतीया कटिः श्रोणिः ककुभतीत्यमरः [२. ६. ७४.] श्रोणिभ्यां दक्षवामाभ्यां कटिप्रदेशाभ्यां क्रुचौ देवौ प्रीणामि । इन्द्रावृहस्पती ऊरुभ्याम् सक्थि क्लीवे पुमानूरुरित्यमरः [२. ६. ७३.] ऊरुभ्यामिन्द्रावृहस्पती देवौ प्रीणामि । मित्रावरुणौ अल्गाभ्याम् अलमत्यर्थं गच्छत ऊरुभ्यां संयोगं प्राप्नुतस्तौ अल्गौ वङ्क्षणौ ऊरुसंधी ताभ्यां मित्रावरुणौ प्रीणामि । स्थूरौ स्थूलौ स्फिचौ नितम्बाधोभागौ ताभ्यामाक्रमणं देवं प्रीणामि । कुष निष्कर्षे कुष्यते तौ कुष्ठौ नितम्बस्थौ कूपकौ आवर्तौ ककुन्दरशब्दवाचौ ताभ्यां बलं देवं प्रीणामि ॥ ६॥

VII. पूषणँ वनिष्ठुनान्धाह्रीन्स्थूलगुदया सर्पान्गुदाभिर्विक्रुतं श्रोत्रैरपो वस्तिना वृषणमाण्डाभ्याँ वाजिनꣳ शेपेन प्रजाꣳ रेतसा चार्षान्पित्तेन प्रदरान्पायुना क्रूश्माञ्ज्कपिण्डैः ॥ ७॥

वनति सम्भजति वनिष्ठुः (7.) स्थूलान्त्रं तेन पूषणं देवं प्रीणामि । गुदं त्वपानं पायुर्नेत्यमरः [२. ६. ७३.] स्त्रीत्वं छान्दसम् स्थूला चासौ गुदा च स्थूलगुदा तया गुदस्य स्थूलभागेन अन्धाह्रीन्प्रीणामि अन्धाश्च ते अह्रयश्च सर्पास्तान् । सर्पान्गुदाभिः स्थूलगुदातिरिक्तैर्गुदभागैः सर्पान्प्रीणामि । विक्रुत श्रोत्रैः अन्त्रं पुरीत-

दित्यमरः [२.६.६६.] अम् गतौ भक्षने शब्दे अमति भक्षत्यनेनान्नमित्यक्लम् अक्ले भवा आक्लाः अक्लसम्बन्धिनो मांसभागाः तैर्विकृतो देवान्प्रीणामि । अपो वस्तिना वस्तिर्नाभिरधो द्वयोरित्यमरः [२.६.७३.] वसति मूत्रं यस्मिन्स वस्तिः नाभेरधो वर्तमानं मूत्रपुटं तेनापो देवताः प्रीणामि । मुष्कोऽण्डो वृषणः कोशः [अमर० २.६.७६.] अण्ड एवाण्डः ताभ्यां लिङ्गोभयपार्श्वस्थाभ्यां मांसपिण्डाभ्यां वृषणं देवं प्रीणामि । शेपो लिङ्गं तेन वाजिनं देवं प्रीणामि शिश्नो मेढ्रो मेहनशेपसी इति [२.६.७६.] अमरः शि निशाने शिनोति भगमिति शेपः सात्तोऽदन्तश्च । प्रजां रेतसा शुक्रं तेजो रेतसी च वीजवीर्येन्द्रियाणि चेति [२.६.६२.] अमरः रीङ् स्रवणे रियते स्रवति रेतो वीर्यं तेन प्रजां देवतां प्रीणामि । मायुः पित्तं पतति स्रंसते पित्तं धातुविशेषस्तेन चाषान्देवान्प्रीणामि । पाति मलोत्सर्गमिति पायुर्गुदमुक्तातिरिक्तं तेन गुदतृतीयभागेन प्रदरान्देवान्प्रीणामि । कूश्माण्ड शकपिण्डैः । शकृो देशे नृपे विशि । विशि विष्ठायां । शकस्य विष्ठायाः पिण्डैः कूश्माण्डान्देवान्प्रीणामि ॥७॥

VIII. इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसज्जीमूतान्हृदयौपशेनान्तरिक्षं पुरीतता नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभिरुपलान्प्लीह्ना वल्मीकान्क्लोमभिर्गुल्मान्हरामिः स्रवन्तीर्हृदान्कुक्षिभ्यां समुद्रमुदरेण वैश्वानरं भस्मना ॥८॥

पुनर्देवे षष्ठी अङ्गे प्रथमा । ननु क्रोडं भुजान्तरमित्यमरः [२.६.७७.] क्रुड घनत्वे क्रुडतीति क्रोडः घनो वक्षोमध्यभागः स इन्द्रस्यास्तु क्रोडेन वा इन्द्रं प्रीणामि एवमग्रेऽपि । पाजसे बलाय हितं पाजस्यं बलकरमङ्गम् तददित्याः देवतायाः । संधी तस्यैव जत्रुणीऽइति [२.६.७८.] अमरः अंसकक्षयोः संधिर्जत्रु । जायतऽइति । पुंस्त्वमार्षम् तानि दिशां देवतानाम् । भस भर्त्सनदीप्त्योः बभस्ति दीप्यते भसत् लिङ्गाग्रं तददित्याः अस्तु ॥ पुनर्देवे द्वितीया अङ्गे तृतीया । हृदये उपशेते हृदयौपशं हृदयस्थं मांसं तेन जीमूतान्प्रीणामि । पूर्यते पुरीतत् हृदयाच्छादकमक्लं तेनान्तरिक्षं देवं प्रीणामि । उदरे भवमुदर्यमुदरस्थं मांसं तेन नभो

देवं प्रीणामि शरीरावयवाद्यत् । ग्रीवाधस्ताद्बागस्थितहृदयोभयपार्श्वस्थे अस्थिनी मतस्ने ताभ्यां चक्रवाकौ देवौ प्रीणामि । वृक्काग्रमांसमित्यमरः [२. ६. ६४.] वृक्क आदाने वृक्यते स्वादुतया गृह्यते वृक्का नात्तः पुंस्ययं स्त्रीत्येके इति क्षीरस्वामी वृक्का मुख्यं मांसं तेन दिवं देवतां प्रीणामि वृक्कौ कुक्षिस्थौ मांसगोलकावाम्रफलाकृती इति याज्ञिकाः । प्रकर्षेणाश्नन्ति भुञ्जतेऽन्नानीति प्लाशयः शिश्नमूलनाड्यः तन्नाडीद्वारिवान्नस्य देहे संचारात् रलयोरभेदः ताभिर्गिरीन्देवान्प्रीणामि । गुल्मस्तु प्लीहा पुंसीति [२. ६. ६६.] अमरः हृदयवामभागे शिथिलो मांसभागः पुप्पुससंज्ञः प्लिह् गतौ प्लेहते प्लीहा नात्तः तेन उपलान्देवान्प्रीणामि । तिलकं क्लोमेत्यमरः [२. ६. ६५.] क्लोमति क्लोमा उदर्यो जलाधारः । हृदयस्य दक्षिणे यकृत् क्लोमा (8.) वामे प्लीहा पुप्पुसश्चेति वैद्या (9.) इति क्षीरस्वामी क्लोमा गलनाडीति कर्कः तैर्वल्मीकान्देवान्प्रीणामि । ग्लायन्ति श्राम्यन्ति ग्लावो हृदयनाड्यः ताभिर्गुल्मान्देवान्प्रीणामि । हरत्यन्नरसमिति हिरा अन्नवाहिन्यो नाड्यः ताभिः स्रवन्तीः देवताः प्रीणामि । पिचण्डकुक्षी जठरोदरतुण्डमित्यमरः [२. ६. ७७.] जठरस्य दक्षवामभागौ कुक्षी ताभ्यां हृदान्देवान्प्रीणामि । उदरेण जठरेण समुद्रं प्रीणामि । भस्मनाङ्गोत्थेन वैश्वानरं देवं प्रीणामि ॥ ८ ॥

IX. विधृतिं नाभ्या घृतꣳ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्टा अश्रुभिर्हादुनीर्दूषीकाभिरस्रा रक्ताꣳसि चित्राण्यङ्गैर्नेत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय स्वाहा ॥ ९ ॥

नाभ्या उदराधःस्थग्रन्थिना विधृतिं देवतां प्रीणामि । रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः शृङ्गारादिरसे वीर्ये देहधात्वम्बुपारदे इति विश्वः रसेन वीर्येण धातुविशेषेण वा घृतं देवं प्रीणामि । यूषः क्वाथितो रसः पद्दन्नित्यादिना [पा° ६. १. ६३.] यूषन्नादेशः यूष्णा पक्वान्नरसेनापो देवताः प्रीणामि । पृषन्ति विन्दुपृषताः पुमांसो विप्रुषः स्त्रिय इत्यमरः [१. २. २१.] विप्रुड्भिर्वसाविन्दुभिर्मरीचीदेवताः प्रीणामि । ऊष्माणास्तु निदाघोष्मग्रीष्माः शष्पसक्था अपीति विश्वः ऊष्मणा शरीरगतिनोष्मणेन नीहारं देवं प्रीणामि । मेदस्तु वपा वसेति [२. ६. ६४.]

अमरः वस्ते मांसमिति वसा शुद्धमांसस्य यः स्नेहः सा वसेति वैद्या (10.) इति स्वामी वसया मांसस्नेहेन शीनं देवं प्रीणामि । अश्रु नेत्राम्बु रोदनमित्यमरः [२. ६. १३.] अश्रुभिर्नेत्राम्बुभिः प्रुषाः देवताः प्रीणामि । दूषिका नेत्रयोर्मलमित्यमरः [२. ६. ६७.] दूषीकाभिर्नेत्रमलैर्हाडुनीर्देवताः प्रीणामि । रुधिरेऽसृग्लोहितास्रक्षतजशोणितमित्यमरः [२. ६. ६४.] अस्यते सृज्यते (11.) इति वा असृक् रुधिरं पदन्न इत्यसन्नादेशः [पा° ६. १. ६३.] अस्ना रक्षांसि प्रीणामि । अङ्गैः पूर्वानुक्तावयवैः चित्राणि दैवतानि प्रीणामि । रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोरिति विश्वः रूपेण सौन्दर्येण नक्षत्राणि दैवतानि प्रीणामि । त्वचा चर्मणा पृथिवीं देवीं प्रीणामि स्वाहेति मन्त्रैराज्यं जुहोतीत्यर्थः ॥ अत्र अग्निं हृदयेनाशनिं हृदयाग्रेणेत्यादि द्यावापृथिवीभ्यां स्वाहेत्यन्ता अपि [३१. ८-१३.] आकृतीर्जुहुयात् आश्वमेधिकत्वात् ॥ ॥ का° [२०. ८. १८.] अवभृथिष्यन्तेऽप्सु मग्नस्य पिङ्गलस्य खलतिविल्लिधशुक्लास्य मूर्धनि जुहोति जुम्बकाय स्वाहेति । अवभृथयागान्ते एवंविधस्य पुंसो मूर्धनि जुम्बकायेति मन्त्रेणाज्यं सकृद्गृहीतं जुहुयात् कीदृशस्य पुंसः जले मग्नस्य पिङ्गलाक्षस्य खलतेः खल्वाटस्य विल्लिधस्य दलुरस्य शुक्लस्यातिगौरस्येति सूत्रार्थः ॥ वरुणदेवत्या द्विपदा यजुर्गायत्री उदन्यपुत्रमुणिऽभदृष्टा । जुम्बकाय वरुणाय स्वाहा सुहुतमस्तु वरुणो वै जुम्ब इति श्रुतेः [१३. ३. ७. ५.] । एषा चान्तर्जले जप्ता पापनाशिनी तदुक्तं हारीतेन जुम्बका नाम गायत्री वेदे वाजसनेयके अन्तर्जले सकृज्जप्ता ब्रह्महत्यां व्यपोहतीति ॥ १ ॥

X. हिरण्यगर्भः समव° ॥ १० ॥ यः प्राणतो निमि° ॥ ११ ॥

चतस्रः कदेवत्याः त्रिष्टुभः प्रजापतिसुतहिरण्यगर्भदृष्टाः प्राजापत्यपशूनामश्वादीनां याज्यानुवाक्याः ॥ द्वे व्याख्याते [२३. १. ३.] ॥ १० ॥ ११ ॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ १२ ॥

वयं कस्मै प्रजापतये देवाय हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः कशब्दस्य सर्वनामत्वमार्षम् । इमे हिमवन्तः बहुवचनादन्येऽपि हिमाचलप्रभृतयः

पर्वताः प्रथमा द्वितीयार्थे सुपां सुपो भवन्तीति वचनात् इमान्हिमवत्प्रभृत्यद्री-न्यस्य प्रजापतेर्महित्वं महिमानमाहुर्बुधाः महित्वेति विभक्तेराकारः । रसा नदी रसतेः शब्दकर्मण इति [निरु° ११.२५.] यास्कः रसया नद्या सह समुद्रं यस्य म-हित्वमाहुः । इमाः प्रदिशः पूर्वाद्याः प्रकृष्टा आशा यस्य महित्वमाहुः यस्य बाहू भुजौ जगद्रक्षणाविति शेषः । सर्वं जगद्यस्य प्रजापतेर्विभूतिरित्यर्थः ॥ १२ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्यच्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ १३ ॥

कस्मै देवाय हविषा विधेमेति व्याख्यातम् । आत्मानं ददाति आत्मदाः उपास-कानां सायुज्यप्रदः बलं सामर्थ्यं ददाति बलदाः भुक्तिमुक्तिप्रद इत्यर्थः । विश्वे सर्वे मनुष्याः यस्य प्रशिषं शासनमुपासते देवाश्च यस्य प्रशिषमुपासते तदुक्तम् यस्य ज्ञेयावधि ज्ञानं शिक्षावधि च शासनम् कार्यावधि च कर्तृत्वं स स्वयम्भूः पुनातु व इति । किं च यस्य छाया आश्रयो ज्ञानपूर्वमुपासनम् अमृतं मुक्तिहेतुः यस्य अज्ञानमिति शेषः मृत्युः संसारहेतुः तदुक्तम् ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुः-खमेवोपयन्तीति [श्वेताश्वतरोपनिष° ३.१०.] ॥ १३ ॥

XI. आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे-दिवे ॥ १४ ॥

वैश्वदेवपशुवपापुरोडाशपशूनां याज्यानुवाक्या दश ऋचो विश्वदेवदेवत्या गो-तमदृष्टाः । तत्रादौ पञ्च जगत्यः । क्रतवो यज्ञाः संकल्पा वा नोऽस्मान्प्रति आ-यन्तु आगच्छन्तु यज्ञकर्तारो वयं भवेमेत्यर्थः । कीदृशाः क्रतवः भद्राः भन्दनीयाः भदि कल्याणे कल्याणकारिणः । तथा विश्वतः अदब्धासः सर्वतोऽनुपहिंसिता निर्विघ्ना इत्यर्थः । अपरीतासः न परीता अपरीताः अपरिगता अज्ञाताः केनचित् फलानुमेया इत्यर्थः । उद्भिदः उद्भिन्दन्ति प्रकटयन्ति उद्भिदः उद्भेत्तारो यज्ञान्तराणां प्रकटीकर्तार इत्यर्थः । किं च यथा येन प्रकारेण देवा नोऽस्माकं सदमित् सदैव वृधे वृद्ध्यै असन् भवन्ति तथा क्रतवः आयन्त्वित्यर्थः । सदमित्यव्ययं सदर्थे ।

कीदृशा देवाः अप्रायुवः प्रकर्षेणायुवन्ति प्रमाद्यन्ति ते प्रायुवः यौतेः ब्विप् तुगभाव आर्षः न प्रायुवः अप्रायुवः अनालसा अस्माकं वृद्धौ भवन्त्वित्यर्थः तथा दिवे-दिवे अहन्यहनि प्रत्यहं रक्षितारः पालकाः ॥ १४ ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्तताम् ।
देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ १५ ॥

भद्रा कल्याणकारिणी देवानां सुमतिः शोभना बुद्धिः नोऽस्मान्प्रति अभिनिवर्ततामस्मदभिमुखी भवतु । कीदृशानां देवानाम् ऋजूयताम् ऋजु अवक्रं यन्ति गच्छन्ति ऋजुयन्तस्तेषाम् इणः शतृप्रत्ययः अवक्रगामिनाम् यद्वा ऋजुमवक्रं साधुं यजमानं कामयन्ते ते ऋजूयन्ति सुप आत्मनः क्यच् ऋजूयन्ति ते ऋजूयन्तस्तेषाम् क्यङलाक्षत् साधुं यजमानं कामयमानानामित्यर्थः । किं च देवानां रातिः दानं नोऽस्मानभिनिवर्तताम् देवा अस्मभ्यं ददित्यर्थः । देवेभ्यो लब्धदाना वयं देवानां सख्यं मैत्रीमुपसेदिम प्राप्नुयाम सदेर्लिटि उत्तमबहुत्वे रूपं संहितायां दीर्घः । देवा नोऽस्माकं सखीनामायुः जीवसे जीवितुं प्रतिरन्तु प्रवर्धयन्तु ॥ १५ ॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ १६ ॥

पूर्वया प्राचीनया अकृत्रिमया स्वयम्भुवा निविदा वाचा वेदरूपया वयं तान्प्रसिद्धान्देवान्हूमहे आह्वयामः । निविद्शब्दो वाग्वाचकः । तान्कान् तत्राह भगं मित्रमदितिं देवमातरम् दक्षं प्रजापतिम् अर्यमणं वरुणं सोममश्विना अश्विनौ । अस्रिधमिति भगादीनां विशेषणम् न स्रेधते च्योतते सोऽस्रित् तमच्युतसद्भावम् । किं च शोभनं भगं भाग्यं यस्याः सा सुभगा भजनीया सरस्वती भगादिसहिता नोऽस्माकं मयः करत् सुखं करोतु ॥ १६ ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ १७ ॥

वातः पवनः नोऽस्माकं भेषजमौषधं हितं यथा तथा वातु वा गतिगन्धन-

योः लोढ् प्रवातु अनुगृह्णात्वित्यर्थः ददात्विति यावत् । कीदृशं क्षितं मयोभु मयः सुखं भवति यस्मात् तन्मयोभु सुखोत्पादकं क्षितं ददातु । माता जगन्निर्मात्री पृथिवी तत् क्षितं वातु । पिता पालको द्यौः स्वर्गः तत् क्षितं वातु । सोमं सुन्वन्ति सोमसुतः सोमाभिषवकारिणो ग्रावाणः दृषदः तत् भेषजं वान्तु ददतु कीदृशा ग्रावाणः मयोभुवः मयः सुखं भावयन्ति ते मयोभुवः सुखस्य दातारः । हे अश्विना अश्विनौ युवं युवां तत् वातादिभ्यो भेषजप्रार्थनं शृणुतं युवामपि क्षितं दत्तमित्यर्थः । कीदृशौ युवां धिष्ण्या धिष्ण्यौ गृहवद्धारयितारौ ॥ १७ ॥

तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १८ ॥

वयं तं प्रसिद्धमीशानं रुद्रं हूमहे आह्वयामः । कीदृशं तम् जगतः जङ्गमस्य तस्थुषः स्थावरस्य च भूतजातस्य पतिं पालकम् । धियंजिन्वं धियं बुद्धिं जिन्वति प्रीणातीति धियंजिन्वस्तम् अलुक् बुद्धिसंतोषकारकम् जिन्वतिः प्रीणनार्थः । किमर्थं हूमहे अवसे अवितुं तर्पयितुं तुमर्थे असिप्रत्ययः यथा येन प्रकारेण पूषा नो ऽस्माकं वृधे वृद्धौ स्वस्तये कल्याणाय च असत् भवतु तथा हूमहे इत्यर्थः । कीदृशः पूषा वेदसां धनानां ज्ञानानां वा रक्षिता रक्षकः । पायुः पालकः पुत्रादीनाम् । अदब्धः अनुपहिंसितः ॥ १८ ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १९ ॥

विराट्स्थाना । आद्यौ पादौ नववर्णौ (12.) तृतीयो दशकः तुर्यो व्यूहैनैकादशकः नवकौ वैराजस्त्रैष्टुभश्चेति वचनात् । इन्द्रः नो ऽस्मभ्यं स्वस्ति अविनाशं शुभं दधातु ददातु । कीदृशः वृद्धश्रवाः वृद्धं महत् श्रवः कीर्तिर्यस्य सः । पूषा नः स्वस्ति ददातु कीदृशः विश्ववेदाः विश्वं सर्वं वेदो धनं यस्य विश्वं वेत्तीति वा विश्ववेदाः । तार्क्ष्यो रथो गरुडो वा नः स्वस्ति दधातु कीदृशः अरिष्टनेमिः अरिष्टा अनुपहिंसिता नेमिश्चक्रधारा पक्षो वा यस्य सः । बृहस्पतिः देवगुरुर्नो ऽस्मभ्यं स्वस्ति ददातु ॥ १९ ॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥ २० ॥

जगती । मरुतो देवाः अवसान्नेन हविर्लक्षणेन हेतुना इह यज्ञे आगमन्नागच्छन्तु । कीदृशा मरुतः पृषदश्वाः पृषत्यः पृषतीसंज्ञा अश्वा वडवा वाहनं येषां ते पृषदश्वाः पुंवद्भावः पृषत्यो मरुतामिति [निघ० १.१५.] वचनात् यद्वा पृषन्तः शबलाः अश्वाः येषां ते । पृश्निर्वा गौर्दितिर्वा माता जननी येषां ते पृश्निमातरः । शुभं कल्याणं यान्ति प्राप्नुवन्ति प्रापयन्ति वा शुभंयावानः आतो मनिन्निति [पा० ३.२.७४.] वनिप्प्रत्ययः । विदथेषु यज्ञगृहेषु जग्मयः गमनशीलाः आदृगमहनेति [पा० ३.२.१७१.] किः । अग्निजिह्वाः अग्निर्जिह्वा भोजनसाधनं येषां ते अग्निमुखा वै देवा इति श्रुतेः क्रुताद इत्यर्थः । मन्यन्ते जानन्ति मनवः सर्वज्ञाः । सूरः सूर्यश्चक्षः चक्षुः येषां ते सूर्यं चक्षते पश्यन्ति वा सूरचक्षसः । किं च न केवलं मरुतः विश्वे सर्वे देवाः च नोऽस्माकं यज्ञे आगमन्नागच्छन्तु ॥ २० ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २१ ॥

तिस्रस्त्रिष्टुभः । हे देवाः कर्णेभिः कर्णैः भद्रं कल्याणमनुकूलं वयं शृणुयाम । हे यजत्राः यजन्तं त्रायन्ते रक्षन्ति यजत्राः यजमानपालकाः अक्षभिः नेत्रैः भद्रं वयं पश्येम बहुलं छन्दसीति [पा० ७.१.७६.(13)] लुलादौ अक्षिशब्दस्यानङादेशः । किं च देवहितं देवैः स्थापितं देवानां हितं देवोपासनयोग्यं वा यदायुः जीवनं तद्वयं व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम । कीदृशा वयं स्थिरैः दृढैरङ्गैः अवयवैः करचरणादिभिः तनूभिः शरीरैश्च पुत्रादिभिर्वा युताः तुष्टुवांसः भवतः स्तुवन्तः सन्तः ॥ २१ ॥

शतमित्नु शरदोऽन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ २२ ॥

हे देवाः शतमित् शतमपि शरदो वर्षाणि शतवर्षपर्यन्तं यूयमन्ति अन्तिके

समीपे भवतेति शेषः यत्र शरहते नोऽस्माकं तनूनां शरीराणां यूयं जरसं जरां चक्र कुरुथ करोतेर्लिटि मध्यमबहुवचनम् बचोऽतस्तिङ इति [पा° ६. ३. १३५.] चक्रेत्यत्र संहितायां दीर्घः निपातस्य चेति [पा° ६. ३. १३६.] यत्रेत्यत्र दीर्घः वार्द्धकावधि यूयं समीपे भवतेत्यर्थः । यत्रास्माकं जरायां पुत्रासोऽस्मत्पुत्राः पितरो भवन्ति पुत्रवन्तो भवन्ति यावदस्माकं पौत्रा भवन्तीत्यर्थः तावत् मध्या मध्ये नोऽस्माकमायुर्मा रीरिषत मा हिंसिष्ट रिषतेर्हिंसार्थस्य णिजन्तस्य चङि रूपम् । कीदृशमायुः गन्तोः गन्तृ गमनशीलम् तदुक्तम् संचिन्त्य-संचिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य वर्षासु सिक्ता-इव चर्मदण्डाः सर्वे प्रयत्नाः शिथिलीभवन्तीति ॥ २२ ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ २३ ॥

मन्त्रदृक् सर्वात्मकत्वेनादितिं स्तौति । द्यौः स्वर्गोऽदितिः तदधिष्ठातृत्वात् एवमग्रेऽपि अन्तरिक्षमदितिः माता पिता पुत्रश्च सः सादितिरेव लिङ्गव्यत्ययः विश्वे सर्वे देवाः अदितिः । पञ्च जनाः मनुष्या अप्यदितिः । किं बहुना जातमुत्पन्नं प्राणिजातं जनित्वं जनिष्यमाणं च सर्वमदितिरेव । यद्वादितिर्मन्त्रेण नोच्यते द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितिः अदितीनि अदीनानि महाभाग्ययुक्तानि सन्तु ॥ २३ ॥

XII. मा नो मित्रो वरुणोऽर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ २४ ॥

का° [२०. ८. ७.] मा नो मित्र इति च प्रत्यृचमनुवाकाभ्याम् । मा न इत्यादिषोडशकण्डिकात्मकेनानुवाकद्वयेन पूर्ववच्चतुर्गृहीतमाज्यं गृहीत्वा जुहोति मा नो यदश्वस्याष्टकावित्युक्तेः षोडशाश्वस्तोमीया जुहोतीति श्रुतेश्च । द्वाविंशतिर्ऋचोऽश्वस्तुतिपरत्वादश्वदेवत्यास्त्रिष्टुभो दीर्घतमोदृष्टाः अत्र एष छाग इति [२६.] तृतीया यूपवस्का इति [२१.] षष्ठी एते द्वे जगत्यौ । ततः षोडशभिर्होमः षड्भि

स्तुतिः सर्वाभिर्वा होमः अश्वस्तोमीयꣳ कृत्वा द्विपदा जुहोतीति श्रुतेः ॥ अथ मन्त्रार्थः । विदथे यज्ञे वाजिनोऽश्वस्य वीर्याणि चरित्राणि यत् वयं प्रवक्ष्यामः उच्चारयिष्यामः तत्र मित्रादयो देवा नोऽस्मान्मा परिख्यन् मा निन्दन्तु परिख्यानं निन्दा अस्यतिवक्तिख्यातिभ्योऽङितिं [पा° ३. १. ५२.] च्लेरङ् न माङ्योगऽइति [पा° ६. ४. ७४.] अडभावः अस्माभिर्देवाः स्तुत्या न त्वश्वादयस्तिर्यञ्च इति यद्यपि निन्दोचिता तथाप्यश्वरूपेण देवानामिव स्तुतिः क्रियते । कीदृशस्य वाजिनः देवज्ञातस्य देवात्सूर्याज्ज्ञातस्योत्पन्नस्य देवैर्ज्ञानितस्य वा सूरादश्वं वसवो निरतष्टेत्युक्तेः [२१. १३.] । सप्तेः सप सम्बन्धे सपति देवैः सह युज्यतऽइति सप्तिस्तस्य । के मा निन्दन्तु तानाह मित्रः अहरभिमानी देवः वरुणः रात्र्यभिमानी देवः । अर्यमा आदित्यः । आयुः एति सततं गच्छतीति आयुर्वायुः । इन्द्रः देवराजः । ऋभुक्षाः ऋभवो देवाः क्षियन्ति निवसन्ति यस्मिन्स ऋभुक्षाः देवाधारः प्रजापतिः यद्वा इयर्ति व्याप्नोति सर्वमिति इति ऋभुक्षाः अर्तेर्भुक्षिन्प्रत्ययः पथिमथ्यृभुक्षामादिति [पा° ७. १. ८५.] सावाकारः । इन्द्रविशेषणं वा ॥ २४ ॥

वन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥ २५ ॥

यत् यदा विप्रा अश्वस्य मुखतो मुखाग्रे गृभीतां गृहीतां रातिं दानमाज्यसक्तुधानालक्षणां नयन्ति प्रापयन्ति अश्वाय रात्रिकृतशेषं प्रयच्छतीत्युक्तेः तदा अजः छागः अप्येति भक्षणायागच्छति । कीदृशोऽजः सुप्राङ् सुष्ठु प्राञ्चति पूर्वं गच्छति सुप्राङ् ललाटे बद्ध इत्यर्थः कृष्णग्रीव आग्नेयो ललाटे पुरस्तादित्युक्तेः [२४. १.] । तथा मेम्यत् शब्दानुकरणम् मे-मे इति शब्दं कुर्वन् । विश्वरूपः विश्वानि रूपाणि यस्य नानावर्ण इत्यर्थः । किं च इन्द्रापूष्णोः इन्द्रश्च पूषा च इन्द्रपूषणौ तयोः देवताद्वन्द्वेति [पा° ६. ३. २६.] इन्द्रपदस्य दीर्घः इन्द्रस्य पूष्णश्च प्रियमिष्टं पाथोऽन्नं पशुलक्षणं तदप्येति भक्षाय नाभिबद्धोऽप्यागच्छति सौमापौष्णः श्यामो नाभ्यामित्युक्तेः [२४. १.] । कृतशेषमन्नं यदाश्वाय दीयते तदा ललाटनाभिबद्धावजौ भक्षायागच्छत इत्यर्थः । कीदृशस्याश्वस्य निर्णिजा निर्णेजनेन स्नानेन प्रावृतस्य संस्कृ-

तस्य आलम्भनकाले म्नापितस्य निर्णेजनं निर्णिक् तया निजतेः सम्यदादित्वाद्भावे क्विप् । तया रेकणासा प्रावृतस्य आह्लादितस्य रेकण इति धननाम [निघ० २. १०.] धनेन सौवर्णमणिलक्षणेन प्रावृतस्य अश्वस्य सौवर्णान्मणीन्केसरपुच्छेषु पत्न्य आवयन्तीत्युक्तिः ॥ २५ ॥

एष छागः पुरोऽश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेनꣳ सौश्रवसाय जिन्वति ॥ २६ ॥

यत् यदा एषः छागोऽजः वाजिना वेगवताश्वेन पुरः पुरस्तात् नीयते प्राप्यते ललाटवद्भवात् । कीदृशः छागः पूष्णो भागः पुष्णाति देवानिति पूषाग्निस्तस्य भागः भजनीयः अग्नेयो रराटे इत्युक्तत्वात् [२४. १.] । तथा विश्वदेव्यः विश्वेभ्यो हितः सर्वदेवार्हः अग्नेः सर्वदेवात्मकत्वात् । तदा त्वष्टा इत् त्वष्टैव प्रजापतिरेव अर्वता अश्वेन सह एनं छागं जिन्वति प्रीणाति । किमर्थं सौश्रवसाय शोभनं श्रवः कीर्तिर्यस्य सः सुश्रवास्तस्य भावः सौश्रवसं तस्मै सुकीर्तये यज्ञेऽमृतानां स्वर्गाप्तेरुक्तत्वात् । किम्भूतमेनम् अभिप्रियम् अभिप्रीणातीति तम् समन्तद्दिवानां प्रीणयितारम् । पुरोडाशं पुरो डाशन्ते ददति एनं स पुरोडाशः तम् पुरस्ताद्दातव्यम् ॥ २६ ॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥ २७ ॥

मानुषा मनुष्या ऋत्विजो यत् यदा अश्वं त्रिः परिणयन्ति वारत्रयं पर्यग्निकुर्वन्ति । कीदृशमश्वं हविष्यं हविषे हितं हविर्योग्यम् । ऋतुशः ऋतौ-ऋतौ यज्ञकाले देवयानं देवानां प्रापणीयं देवेषु यानं गमनं यस्य तम् देवयानमार्गगामिनं वा यद्वा देववदादित्यवद्यानं गतिर्यस्य अनिवारितगतिमित्यर्थः । अत्रास्मिन्समये पर्यग्निकरणकाले पूष्णः पोषकस्य वृद्धस्य वाग्निर्भागोऽजः प्रथमः पुरोगामी सन् एति गच्छति । त्रिं कुर्वन् देवेभ्यः यज्ञं प्रतिवेदयन् प्रख्यापयन् स्वशब्देन ज्ञापयन् पूष वृद्धौ पूषति वर्धते पूषाग्निः ॥ २७ ॥

होतार्ध्वर्यवावया अग्निमिन्धो ग्रावयाभ उत शꣳस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आपृणाधम् ॥ २८ ॥

हे होत्राद्य ऋत्विजः तेन प्रसिद्धेन यज्ञेनाश्वमेधेन वक्षणाः नदीः घृतकुल्याः आपृणाधं घृतपयोदधिपयस्यापुरोडाशमांसैः पूरयत । वक्ष्यतीति वक्षणाः । यज्ञं सम्पाद्य फलं साधयतेत्यर्थः । कीदृशेन यज्ञेन स्वरंकृतेन रत्नयोरिक्यम् सुष्ठु अलंकृतेन विप्रकृविर्दक्षिणादिभिः शोभितेन । स्विष्टेन सुष्ठु इष्टेन । के ऋत्विजस्तानाह होता आह्वाता देवानां तन्नामक ऋत्विक् । अध्वर्युः अध्वरमिच्छति अध्वर्यति सुप आत्मनः क्यच् कव्यध्वरपृतनस्यर्चि लोप इति [पा° ७.४.३९.] टिलोपः ततः क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः । आवयाः आभिमुख्येनावयजतीत्यावयाः द्येतवाक्रोक्थशासेति (14.) उस् आवयाः प्रतिप्रस्थाता अवे यज्ञ इति [पा° ३.२.७२.] णिवन् अवाप्योरिति अवस्याल्लोपः । अग्निमिन्धः अग्निमिन्द्धे दीपयति अग्निमिन्धः अग्नीत् आष्ट्राग्न्योरिन्धश्इति [पा° ६.३.७०. वा° ६.] मुन् । ग्रावयाभः ग्रावणो गृह्णाति स्तौति ग्रावयाभः कर्मण्यण् हस्य भः ग्रावस्तोता । उतापि शंस्ता शंसति स्तौति शंस्ता प्रशास्ता । सुविप्रः शोभनो विप्रो मेधावी सुविप्रो ब्रह्मा ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीत्युक्तेः । अयमनुक्तार्विगुपलक्षकः । एते यज्ञेन वक्षणाः (15.) पृणाधमिति सम्बन्धः ॥ २८ ॥

यूपव्रस्का उत ये यूपवाह्याश्चषालं येऽअश्वयूपाय तक्षति ।
ये चार्वते पचनꣳ सम्भरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ २९ ॥

तेषामृत्विजामभिगूर्तिः अभिगोरणमभिगूर्तिरुद्यमः नोऽस्मानिन्वतु प्रीणातु व्याप्नोतु वा अस्माकं यज्ञं सम्यक् साधयत्वित्यर्थः इवि व्याप्तिप्रीणनयोः लोट् शपि इदितो नुम् धातोरिति [पा° ७.१.५८.] नुमागमः । तेषां केषाम् ये यूपव्रस्काः यूपाय व्रश्चन्ति तरुं छिन्दन्ति ते यूपव्रस्काः । उतापि च ये यूपवाह्याः यूपं वहन्ति ते यूपवाह्याः कर्मण्यन् छिन्नस्य यूपस्य वोढारः । ये च अश्वयूपाय अश्वबन्धनयूपार्थं चषालं तक्षति यूपाग्रे भागे स्थाप्यं काष्ठं तक्षन्ति वचनव्यत्ययः । चषालो यूपकटक इत्यमरः [२.७.१८.] तक्षू तनूकरणे साधु सम्पादयन्तीत्यर्थः । उतो अपि

च ये नराः अर्वते अश्वाय पचनं पच्यतेऽनेनेति पचनं पाकसाधनं काष्ठभाण्डादिकं सम्भरन्ति संहरन्ति आनयन्ति तेषामुग्रमोऽस्मान्प्रीणात्वित्यर्थः ॥ २१ ॥

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ३० ॥

मन्म मननीयं फलं सुमत् स्वयमुपप्रागात् उपगच्छतु सुमदित्यव्ययं स्वयमित्यर्थे सुमत्स्वयमित्यर्थे इति यास्कोक्तेः [निरु° ६. २२.] तन्मन्म फलं मे मया अधायि धृतमित्यर्थः । किं च अयं वीतं पुष्टं पृष्ठं यस्य यद्वा वीतं कामितं पृष्ठं यस्य अश्वपृष्ठमारोहणाय सर्वे कामयन्ते स वीतपृष्ठोऽश्वो देवानामाशाः मनोरथान् पूरयितुमिति शेषः उप गच्छतु उपसर्गेण क्रियावृत्तिः । किं च देवानां पुष्टि पोषणं पुष्टम् भावे निष्ठा निमित्ते सप्तमी देवपुष्टिनिमित्तं यमश्वं वयं सुबन्धुं चकृम कृतवन्तः संहितायां दीर्घः शोभनो बन्धुर्बन्धनं यस्य तम् यमश्वं वद्धवन्तः एनमश्वं विप्रा मेधाविनः ऋषयो मन्त्रदर्शिन ऋत्विजोऽनुमदन्ति अनुमोदन्तां तुष्यन्तु ॥ ३० ॥

यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशनां रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते ऽअपि देवेषस्तु ॥ ३१ ॥

वाजिनो वेगवतोऽर्वतोऽश्वस्य यत् दाम ग्रीवाबद्धा रज्जुः यच्च संदानं पादबन्धनरज्जुः । या च शीर्षण्या शीर्षे भवा शीर्षण्या शिरोबद्धास्याश्वस्य रज्जुः शिरःशब्दाद्वे छन्दसीति [पा° ४.४.११०.] यत् मे च तद्धितऽइति [पा° ६.१.६१.] शीर्षन्नादेशः तित्स्वरितम् । काष्ठस्था रशना रज्जुः अस्यान्यापि या रज्जुः । वाथवा अस्याश्वस्य घ प्रसिद्धम् आस्ये मुखे प्रभृतं प्रक्तं प्रक्षिप्तं यत् तृणं हे अश्व ते तव सर्वा सर्वाणि ता तानि देवेषु अस्तु सत्तु देवोपयोगीनि भवतु देवत्वं प्राप्नुवतु वा । अत्रोपयुक्तानां सर्वेषां देवत्वमाशास्यते ॥ ३१ ॥

XIII. यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेषस्तु ॥ ३२ ॥

मक्षिका अश्वस्य क्रविषः क्रविः यदाश भक्षितवती अश्नातेर्लिट् क्रविषः इति

कर्मणि षष्ठी । वाथवा यत् मांसं स्वरौ पश्वज्ञनकाले रिप्तं लिप्तमस्ति स्वरुणा पशुमनक्तीति श्रुतेः । यत् स्वधितौ शासे लिप्तमस्ति छेदनकालेऽवदानकाले च । यच्च शमितुर्हस्तयोः लिप्तं यच्च शमितुर्नखेषु लिप्तम् हे अश्व सर्वा ता सर्वाणि तानि अपि देवेषु अस्तु भवतु वचनव्यत्ययः सर्वं तदीयं देवभोग्यं भवतु ॥३२॥

यद्ग्वध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धोऽअस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ श्रृतपाकं पचन्तु ॥३३॥

उदरस्य ऊवध्यमीषज्जीर्णतृणपुरीषं यत् अपवाति अपगच्छति । भक्षितमपक्वमामाशयस्थमूवध्यमुच्यते । आमस्यापक्वस्य क्रविषो मांसस्य यो गन्धो लेशोऽस्ति शमितारः विशसितारः तत्सर्वं सुकृता सुकृतं सुसंस्कृतं कृण्वन्तु कुर्वन्तु । उतापि च मेधं मेध्यमश्वं श्रृतपाकं यथा पचन्तु श्रृतो देवयोग्यो ज्ञातः पाको यस्मिन्कर्मणि तथा पचन्तु अतिपक्वमीषत्पक्वं च मा कुर्वन्त्वित्यर्थः ॥३३॥

यत्ते गात्रादग्निना पच्यमानादभि शूलं निर्हतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्त उशद्भ्यो रातमस्तु ॥३४॥

हे अश्व अग्निना पच्यमानात्ते तव गात्रात् शरीरात् यत् ऊष्मा रसो वा अवधावति अधस्ताद्गच्छति । तथा निर्हतस्य निःशेषेण हृतस्य यत् अङ्गं शूलमभि अवधावति शूलेन पाके क्रियमाणे यन्निर्गच्छति तन्निर्गतमूष्माङ्गादिकं भूम्यां मा आश्रिषत् भूम्याश्लिष्टं मा भूत् श्रिषेः पुषादित्वाच्छिरङ् । तथा तृणेषु माश्रिषत् विशसनसमये तृणलग्नं मास्तु । किं तर्हि तत्पतितं तृणलग्नं सर्वं देवेभ्यो रातं दत्तमस्तु रा दाने । कीदृशेभ्यो देवेभ्यः उशन्ति कामयन्ते ते उशन्तः तेभ्यः हविः कामयमानेभ्यः वश कान्तौ लटः शत्रादेशः ॥३४॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासतऽउतो तेषामभिगूर्तिर्न इन्वतु ॥३५॥

ये जनाः पक्वं वाजिनमश्वं परिपश्यन्ति अयं पक्व इति जानन्ति । ये ईम् ईमित्यव्ययं चार्थे ये च इत्याहुः एवं कथयन्ति किम् सुरभिः सुगन्धः पाको ज्ञातः अ-

तो निर्हर अग्नेः सकाशादुत्तारयेति । ये च जनाः अर्वतोऽश्वस्य मांसभिक्षामुपासते क्रुताशिष्टमांसयाचनां कुर्वते । उतो अपि च तेषां पाकद्रष्ट्रादिजनानामभिगूर्तिः उद्यमो नोऽस्मानिन्वतु प्रीणातु । यद्वायं मन्त्रो देवपरो व्याख्येयः । ये देवाः पक्वं वाजिनं परिपश्यन्ति कदा क्रोष्यतीति ये च विलम्बं दृष्ट्वा सुरभिः पाको ज्ञातोऽस्मभ्यं निर्हर देहीत्याहुः ये चार्वतो मांसभिक्षामुपासते मांसं याचन्ते तेषामभिगूर्तिः संकल्पोऽस्मान्प्रीणातु सफलो भवत्वित्यर्थः ॥३५॥

यन्नीक्षणं माꣳस्पचन्या ऽउखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परिभूषत्यश्वम् ॥३६॥

एते पदार्था अश्वं परिभूषन्ति अलंकुर्वन्ति स्वव्यापारेण साधयन्तीत्यर्थः भूष अलङ्कारे भौवादिकः । एते के तानाह यत् उखायाः (16.) स्थाल्याः नीक्षणं नितरामीक्षणं पाकपरीक्षार्थं दर्शनम् । कीदृश्या उखायाः मांस्यचन्याः मांसं पच्यते यस्यां सा मांस्यचनी तस्याः मांसपाकाधिकरणभूतायाः करणाधिकरणयोश्चेति [पा° ३.३.११७.] ल्युट् मांसस्य पचि युडचोरिति [काशिका° पा° ६.१.१४४.(17.)] मांसस्याकारलोपः ठिठ्णाञ्जिति [पा° ४.१.१५.] ङीप् । तथा यूष्णः पक्वरसस्य आसेचनानि आसिच्यन्ते येषु तानि आसेचनसाधनानि या यानि पात्राणि पक्वान्नेति यूषशब्दस्य यूषन्नादेशः । यानि च चरूणां मांसपूर्णपात्राणामपिधाना अपिधानानि आच्छादनपात्राणि । कीदृशानि तानि ऊष्मण्या ऊष्माणं धारयन्ति तानि ऊष्मण्यानि ऊष्मन्शब्दाद्धारणार्थे यप्रत्ययः आच्छादने ऊष्मा बहिर्न यातीत्यर्थः । तथा अङ्काः चिह्नसाधनानि हृदयाद्यवयवज्ञापकानि वेतसमयानि । सूनाः विशसनकरणभूताः स्वधित्यादयः । एतेऽश्वं परिभूषयन्ति ॥३६॥

मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राड्अत्यभिविक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रतिगृभ्णात्वश्वम् ॥३७॥

हे अश्व पच्यमानाश्रावयव अग्निः त्वा त्वां मा ध्वनयीत् ध्वनिं मा कारयतु धनौ सति भाण्डभङ्गः स्यात् दह्यमानं मांसं सिम-सिमेति शब्दं करोति तन्मास्तु

नोनयतिधनयतीत्यादिना [पा° ३.१.५१.] ण्यन्ताच्चङ्प्रतिषधः क्ष्यन्तक्षणेति [पा° ७.२.५.] वृद्ध्यभावः । कीदृशोऽग्निः धूमगन्धिः धूमस्य गन्धो लेशो यत्र सः अल्पधूमवानित्यर्थः अल्पाख्यायामिति [पा° ५.४.१३६.] धूमादिकारः । किं च भ्राष्ट्री अतितापिन दीप्यमाना उखा स्थाली मा अभिवित्त मा चलतु ओविजी भयचलनयोः लुङि तङि कलो कलीति [पा° ८.२.२६.] सिलोपे ट्वयम् न माङ्योगेऽडिति [पा° ६.४.७४.] अडभावः । कीदृशी उखा जघ्रिः जिघ्रति गन्धं गृह्णातीति जघ्रिः आदृगमेति [पा° ६.२.१७१.] किन्प्रत्ययः अधिष्ठात्र्या देवताया घ्राणम् । तमेवंविधमश्वं देवासः देवाः प्रतिगृभ्णान्ति प्रतिगृह्णन्तु । कीदृशमश्वम् इष्टं प्रयाजैः वीतमाप्रीभिः पर्यग्निकृतम् अभिगूर्तं ये यज्ञामक्ष्इत्यागूर्त्योक्तम् वषट्कृतं वषट्कारेण संस्कृतम् ॥३७॥

निक्रमणं निषदनं विवर्तनं यच्च पड्वीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता तेऽश्विषु देवेष्वस्तु ॥३८॥

यत् निक्रमणं नितरां क्रमते यत्र तत् निक्रमणस्थानम् निषदनं नितरां सीदत्यस्मिन्निति निषदनमुपवेशनस्थानम् विवर्तनं विविधं वर्तते यत्र तत् इतस्ततो लुण्ठनस्थानम् सर्वत्राधिकरणे ल्युट् यच्चार्वतोऽश्वस्य पड्वीशम् पदेषु विशति पड्वीशं पादबन्धनम् । क्रियापरा वा निक्रमणादयः शब्दाः आलम्भसमये यानि अश्वस्य निक्रमणादीनि चेष्टितानि । किं च यच्च पपौ यज्जलं पीतवान् यच्च घासिमदनीयं तृणादिकं जघास भक्षितवान् घसॢ अदने लिट् हे अश्व ता तानि सर्वाणि ते तव निक्रमणादीनि देवेषु अस्तु सत्तु । देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वं मास्त्वित्यर्थः ॥३८॥

यदश्वाय वासं उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्वीशं प्रिया देवेष्वायामयन्ति ॥३९॥

प्रिया प्रियाणि एतानि वस्तूनि देवेषु आयामयन्ति आगमयन्ति ऋत्विजोऽश्वस्यैतानि देवेष्वेव प्रापयन्तीत्यर्थः । कानीत्यत आह अश्वाय यत् अधीवासमाहाद-

कं वासो वस्त्रमुपस्तृणन्ति स्तृञ् आच्छादने क्रयादिकः तथा या यानि हिरण्यानि सौवर्णशकलानि अस्मै अश्वाय उपस्तृणन्ति । तथा अर्वन्तम् षष्ठ्यर्थे द्वितीया अर्वतोऽश्वस्य संदानं शिरोबन्धनं पड्वीशं पादबन्धनम् । एतानि देवेषु प्रापयन्ति । कीदृशानि प्रिया प्रियाणि देवानामिष्टानि ॥३९॥

XIV. यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषोऽअध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥४०॥

हे अश्व अश्ववारः सादे गमने यत्ते तव त्वां पार्ष्ण्या पादाधोभागेन कशया वा तुतोद पीडितवान् तुद व्यथने लिट् सदनं सादः घञ् कीदृशस्य तव महसा बलेन शूकृतस्य शूकृतमस्यास्ति शूकृतः तस्य शब्दानुकरणमेतत् शूकारं कुर्वतः । अध्वरेषु ता सर्वा तानि सर्वाणि ते तव पार्ष्णिकशाताडनानि ब्रह्मणा मन्त्रेणाहं सूदयामि षूद क्षरणे चुरादिः क्षारयामि यज्ञे आकृतित्वेन कल्पयामीत्यर्थः । तत्र दृष्टान्तः हविषः स्रुचेव हविराज्यादिकं यथा स्रुचा जुह्वा सूदयामि तद्वत् । एकं तापदं पादपूरणाय ॥४०॥

चतुस्त्रिꣳशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त ॥४१॥

स्वधितिः पशुच्छेदनसाधनोऽसिः अश्वस्य चतुस्त्रिंशत् वङ्क्रीः चतुस्त्रिंशत्संख्याकान्युभयपार्श्वास्थीनि समेति सम्यगागच्छति छेदनाय । कीदृशस्याश्वस्य वाजिनः वजति गच्छतीति वाजी तस्य वेगवत इत्यर्थः । देवबन्धोः देवानां बन्धुः प्रियस्तस्य देवा बन्धवो यस्येति वा । भावी निर्देशः । अश्वस्य चतुस्त्रिंशद्वङ्क्रयः अज्ञादीनां षड्विंशतिः । अतो हे ऋत्विजो वयुना वयुनेन ज्ञानेनाश्वस्य गात्रा गात्राणि अच्छिद्रा अच्छिद्राणि छिद्रहीनानि यूयं कृणोत कुरुत स्वधितिना छिन्नानि सच्छिद्राणि वर्तन्ते तान्यच्छिद्राणि कुरुत । किं च परुः-परुः ग्रन्थिर्ना पर्वपरुषीति अमरः नित्यवीप्सयोरिति [पा० ८.१.४.] द्वित्वम् प्रतिपर्व प्रत्यवयवम् अनुघुष्य इदमिदमिति नाम्ना संशब्द्य यूयं विशस्त विशसनं छेदं कुरुत शसु हिंसायाम्

छान्दसः शपो लुक् । कृणोत कृ करणे स्वादिः तप्तनबिति [पा° ७.१.४५.] मध्यमबहुवचनस्य तबादेशः (18.) ततो गुणः । अनुघुष्य घुषिर् शब्दे क्त्वो ल्यप् ॥४१॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः ।
या ते गात्राणामृतुथा कृणोमि ता-ता पिण्डानां प्रजुहोम्यग्नौ ॥४२॥

अश्वस्य विशस्ता विशसनकर्ता एकः ऋतुः । कीदृशस्याश्वस्य त्वष्टुः दीप्तस्य । ऋतूपलक्षितः कालात्मा प्रजापतिरेवाश्वस्य शस्तेत्यर्थः शसेस्तृच् । तथा यन्तारा यन्तारौ नियमकर्तारौ द्वा द्वौ द्यावापृथिव्यभिमानिदेवौ भवतः तयोरेव सर्वेषां नियन्तृत्वादिति भावः । तथा ऋतुः अत्र ऋत्यक इति [पा° ६.१.१२८.] ह्रस्वप्रकृतिभावौ । एवमश्वस्य विशसितृयन्तृनुक्ताधर्युः स्वकर्माह हे अश्व ते तव गात्राणां पिण्डानां गात्रसम्बन्धिनां मांसपिण्डानां या यानि अङ्गानि अहं कृणोमि करिष्यामि छिनद्मि कृञ् बधे स्वादिः ऋतुथा ऋतौ ऋतूपलक्षिते वसन्तादियज्ञकाले ता-ता तानि-तान्यङ्गानि अग्नौ प्रजुहोमि प्रकर्षेण हुतानि करोमि ॥४२॥

मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व आतिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥४३॥

हे अश्व प्रियः वल्लभो भोगायतनत्वात् तवात्मा देहः वा त्वां मा तपत् तप्तं दुःखितं मा कार्षीत् तव देहवियोगजनिता व्यथा मा भूदिति विज्ञानात्मानं प्रत्युच्यते । किम्भूतं त्वाम् अपियन्तम् अप्येतीत्यपियन् तम् देवलोकं गच्छन्तम् अपिपूर्वादितेः शतृप्रत्ययः । किं च स्वधितिः शस्त्रं ते तव तन्वः तनूः अङ्गानि मा आतिष्ठिपत् मा स्थापयतु सर्वाणि छित्त्वा देवेभ्यो ददत्वित्यर्थः । तिष्ठतेर्ण्यन्तस्य लुङि चङि तिष्ठतेरित्यादि [पा° ७.४.५.] इकारे कृते द्वित्वादि । किं च शमिता ते तव गात्राणि अङ्गानि अतिहाय त्यक्त्वा शास्त्रोक्तक्रमं त्यक्त्वा असिना शस्त्रेण मिथु मिथ्या छिद्रा छिद्राणि अवयवच्छिन्नानि (19.) मा कः मा कार्षीत् करोतेर्लुङि मन्त्रे घसह्वरित्यादिना [पा° २.४.८०.] च्लेर्लुक् गुणे हल्ङ्यादिति [पा° ६.१.६८.]

तिपो लोपे विसर्गः । मिथु इति मिथ्यार्थेऽव्ययम् संहितायां दीर्घः । कीदृशः शमिता गृधुः गृध्यतीति गृधुः लुब्धः केवलं मांसग्रहणेच्छुः अत एवाविशस्ता न विशेषेन शसति हिनस्ति अविशस्ता विशसने अकुशलः अत एवान्यथा (20.) मा क्षिदत् सम्यगवदानानि करोत्वित्यर्थः ॥४३॥

न वाऽउऽएतन्म्रियसे न रिष्यसि देवाँ२॥ऽइदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषतीऽअभूतामुपास्थाद्वाजी धुरि रासभस्य ॥४४॥

वै एवार्थे उ अवधारणे हे अश्व त्वमेतन्नैव म्रियसे इतराश्ववन्मृतो न भवसि देवत्वप्राप्तेर्वक्ष्यमाणत्वात् अत एव न रिष्यसि हिंस्यसे व्यर्थहिंसाया अभावात् रिषतेर्यकि परस्मैपदमार्षम् । ननु प्रत्यक्षत्वे मरणभङ्गनाशश्च दृश्यते तर्हि कथमेवमुच्यते तत्राह सुष्ठु गम्यते यत्र ते सुगाः तैः सुगेभिः सुगैः साधुगमनैः पथिभिर्मार्गैः देवयानरूपैः देवान् इत् एषि देवानेव गच्छसि अथो युक्ता मदुक्तिः । कथं देवान्प्रति गमनम् तत्राह हे अश्व ते तव हरी इन्द्राश्वौ युञ्जा युञ्जौ रथे युक्तौ अभूतां भविष्यतः आशंसायां भूतवच्चेति [पा° ३.३.१३२.] भूतकालप्रयोगो भविष्यदर्थे । हरीऽइन्द्रस्येति यास्कः [निघ° १.१५.] । तथा पृषती मरुतां वाहनभूते तव युञ्जौ अभूताम् पृषत्यो मरुतामिति यास्कः [निघ° १.१५.] । युङ्क्ते युञ्जौ ऋत्विग्दधृगित्यादिना [पा° ३.२.५९.] क्विन् क्विन्प्रत्ययस्य कुरिति [पा° ८.२.६२.] कुत्वम् युजेरसमासे इति [पा° ७.१.७१.] नुम् सुपां सुलुगिति [पा° ७.१.३९.] विभक्तेराकारः । किं च रासभस्याश्विवाहनस्य धुरि अश्विवाहनस्थाने वाजी कश्चिदश्वः उपास्थात् उपस्थास्यति । देवत्वं प्राप्तस्य तव वहनाय इन्द्रादयो निजवाहनानि प्रेषयिष्यन्तीति भावः यद्वा तत्तद्देवभावं प्राप्तं त्वां तानि-तानि वाहनानि वक्ष्यन्तीत्यर्थः ॥४४॥

सुगव्यं नो वाजी स्वश्व्यं पुꣳसः पुत्राँ२॥ऽउत विश्वापुषꣳ रयिम् ।
अनागास्त्वं नोऽअदितिः कृणोतु क्षत्रं नोऽअश्वो वनताꣳ हविष्मान् ॥४५॥

इदानीं याच्ञा क्रियते । वाजी देवत्वं प्राप्तोऽश्वः नोऽस्माकं सुगव्यं शोभनं गो-

समूहं कृणोतु करोतु गवां समूहो गव्यम् खलगोरथादिति [पा° ४.२.५०.] यत्प्रत्ययः शोभनं गव्यं सुगव्यम् । तथा स्वश्व्यं कृणोतु अश्वानां समूहः अश्व्यम् केशाश्वेति [पा° ४.२.४८.] विकल्पात् पक्षे यत् शोभनमश्व्यं स्वश्व्यम् । तथा पुंसः पुत्रान्करोतु पुत्रशब्दोऽपत्यवाचक इति पुंस इति विशेषणम् । यद्वा पुंसः पुरुषार्थसाधकान् पुत्रान्करोतु । उतापि च रयिं धनं करोतु कीदृशं रयिं विश्वपुषम् पुष्णाति पुषः इगुपधेति [पा° ३.१.१३५.] कप्रत्ययः विश्वस्य सर्वस्य पुषस्तम् सर्वजनपोषणसमर्थं धनं करोत्वित्यर्थः संहितायां विश्वशब्दस्य दीर्घः । किं च नो ऽस्माकमनागस्त्वं करोतु नास्ति आगः अपराधः पापरूपो यस्य सोऽनागाः तस्य भावोऽनागस्त्वम् दीर्घश्छान्दसः निष्पापत्वं करोतु पापसद्भावे उक्तफलाप्राप्तिः । किं च अश्वो नोऽस्माकं क्षत्रं क्षतत्राणं बलं पराभवाद्रक्षणं वा करोतु । कीदृशो ऽश्वः अदितिः नास्ति दितिः खण्डनं दैन्यं वा यस्य सः । हविष्मान् हविरस्यास्ति हविष्मान् तदस्यास्तीति [पा° ५.२.१४.] मतुप् हविर्भूतावयवः यद्वा देवत्वाद्या हविष्मान् । ईदृशोऽश्वो नः क्षत्रं वनतां करोतु वनतिः करोत्वित्यर्थः ॥४५॥

XV. a. इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।

b. आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।

c. यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥४६॥

का° [२०.८.१२.] इमा नु कमिति च द्विपदाः । अयस्मयपात्रेणाश्वलोहितहोमानन्तरमिमा नु कमित्याद्याः षट् द्विपदाः जुहोति । कण्डिकाद्वयस्य षडर्धानि सन्ति तैः षडाहुतीर्जुहोतीति सूत्रार्थः ॥ द्विपदाछन्दस्का विश्वदेवदेवत्या आत्मपुत्रभुवनदृष्टास्तिस्र ऋचः । नु कम् एतौ निपातौ पादपूरणौ इमा इमानि भुवना भुवनानि भूतजातानि वयं सीषधाम साधयामः वशीकुर्म इत्यर्थः साधयतेर्लुङि उत्तमबहुवचने रूपम् अडभाव आर्षः । किं च इन्द्रः इदि परमैश्वर्ये ऐश्वर्यवान् सगणो निजगणैः परिवारैः सहित इन्द्रो देवेशो विश्वे देवाश्च आदित्यैः द्वादशभिः मरुद्भिः एकोनपञ्चाशत्संख्यैश्च सहिताः अस्मभ्यं भेषजा भेषजानि औषधानि हितानि करत् कुर्वन्तु सर्वे देवा अस्माकं हितकारिणो भवन्त्वित्यर्थः । किं च

इन्द्रः आदित्यैः सह नोऽस्माकं यज्ञमश्वमेधं तन्वं शरीरं प्रजां पुत्रादिकां च सीषधाति साधयतु वशीकरोत्वित्यर्थः नीरोगाः सपुत्रा वयं यज्ञं सम्यक्कुर्म इति भावः ॥४६॥

a-c. अग्ने॒ त्वं नो॑ऽअन्त॒म उ॒त° ॥४७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां पञ्चविंशोऽध्यायः ॥२५॥ ॥

तिस्रो द्विपदा व्याख्याताः [३.२५.२६a.] ॥ ॥ समिद्धोऽअञ्जन् [२१.१.] आश्वमेधिकोऽध्याय इति वचनादत्र क्षौत्रे तन्मन्त्राणां विनियोगः ॥ समाप्तोऽश्वमेधः सप्तविंशत्युत्तरवर्षसाध्यः ॥४७॥

श्रीमन्महीधरकृते वेददीपे मनोरमे । अध्यायः पञ्चविंशोऽयमश्वमेधगतोऽगमत् ॥२५॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

१ - आ॒ण्डाभ्या॑म् ॥१॥ १ आ॒दि॑° - इ॒क्षवः॑ ॥२॥ २ - कृ॒नी॑नका॒भ्याम् ॥३॥ २ कर्णा॑° - स्तु॒पेन॑ ॥४॥ ३ - कृ॒पिञ्ज॑लान् ॥५॥ ३ ज्ञ॒वं - रो॒रा॑भ्याम् ॥६॥ ४ [°यापां च॑तु°] ॥७॥ ५ [°या सो॑मस्य चतु°] ॥८॥ ६ [°रु॑णाऽअल्गा°] ॥९॥ ७ [कू॒ष्मा° K.] ॥१०॥ ८ [क्रो॒लोऽदि॑° - °यौप॒सेना° J.] - °रीतता॑ ॥११॥ ८ नर्भ॑ - भस्म॑ना ॥१२॥ १-२१ [व्यशेम] ॥१३-२५॥ २२-२६ [पु॑रो॒ल्लाश्म°] ॥२६-३०॥ २७-३४ [°माश्लिष॑° J.] ॥३१-३८॥ ३५-३८ ॥३९-४२॥

XIV. । ३९ ॥४३॥ ॥ XV. । ४६.४७ ॥४४.४५॥ ॥

पञ्चदशानुवाकेषु पञ्चचत्वारिंशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां सप्तविंशोऽध्यायः ॥२७॥ ॥

I. a. अग्निश्च॑ पृथि॒वी च॒ सं न॑ते॒ ते मे॒ सं न॑मताम॒दः ।

b. वायुश्चान्तरिक्षं च संनते ते मे° । c. आदित्यश्च द्यौश्च संनं° ।

d. आपश्च वरुणश्च संनं° । e. सप्त सप्तऽसदोऽअष्टमी भूतसाधनी ।

f. सकामाँ२॥ऽअधनस्कुरु संज्ञानमस्तु मेऽमुना ॥ १ ॥

श्री (1.) । इषे त्वेत्यारभ्य दर्शपौर्णमासपितृयज्ञाग्निहोत्रोपस्थानपशुचातुर्मास्याग्निष्टोमवाजपेयराजसूयाग्निसौत्रामण्यश्वमेधसम्बद्धा मन्त्रा व्याख्याताः । इदानीं खिल्यान्युच्यन्ते क्वचिद्विनियोगानुक्तेः । तेषां विवस्वानृषिरन्यस्यानुक्तेः आदित्यानीमानि यजूंषि व्याख्यायन्तऽइति श्रुतेः [बृहदारण्य° ५.५.२३.] याज्ञवल्क्यो वा याज्ञवल्क्येन व्याख्यायन्तऽइति श्रुतेः ॥ ॥ अग्निश्च । सप्त लिङ्गोक्तानि यजूंषि । चतस्र ऋग्गायत्र्यः । सप्त संसदः आसुर्यनुष्टुप् । सकामान् प्राजापत्यानुष्टुप् । यथेमाम् ब्राह्मी गायत्री ॥ अग्निश्च पृथिवी च संनते संनमनं संनतम् आनुकूल्येन प्रवृत्तिः अग्निपृथिव्यौ भोगाय संगते अतो ब्रवीमि ते अग्निपृथिव्यौ मे ममादः अमुकं संनमताम् संनमयतां वशवर्तिनं कुरुतामित्यर्थः । अद इति पुरुषादेर्नाम द्वितीयान्तं प्रयोज्यम् । छन्दस्युभयथेति [पा° ३.४.११७.] शपोऽप्यार्धधातुकत्वाणेर्निटीति [पा° ६.४.५१.] णिचो लोपः संनमतामित्यत्र । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् । वायुरन्तरिक्षं च संनते ते ममामुकं संनमयताम् । आदित्यः द्यौश्च संनते ते मे° । आपश्च वरुणश्च संनते ते मे° ॥ परमात्मानं प्रत्युच्यते हे स्वामिन् यस्य तव सप्त संसदः संसदनानि अधिष्ठानानि अग्निवायुरन्तरिक्षादित्यद्युलोकाम्बुवरुणाख्यानि तत्राष्टमी भूतसाधनी पृथ्वी भूतानि साधयति उत्पादयति भूतसाधनी भूमिं विना भूतोत्पत्तेरभावात् अतः सर्वाधिष्ठानभूतस्त्वमधनो मार्गान् सकामान्कुरु येषु मार्गेषु मया गम्यते तत्रास्माकं कामप्राप्तिरस्त्वित्यर्थः । किं च मे ममामुना देवदत्तादिना संज्ञानं संगतं ज्ञानमस्तु इष्टेन मम प्रीतिरस्तु ॥ विज्ञानात्मा वोच्यते यस्य तव सप्त संसदः पञ्च बुद्धीन्द्रियाणि मनो बुद्धिश्चेति सप्तायतनानि अष्टमी भूतसाधनी भूतानि साधयति वशीकरोति भूतसाधनी वाक् स त्वं नोऽस्माकमधनः सकामान्कुरु अमुना सह मे संज्ञानं संगतमस्तु ॥ १ ॥

a. यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।

ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय ।

b. प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ २॥

इमां कल्याणीमनुद्वेगकरीं वाचमहं यथा यतः आवदानि सर्वतो ब्रवीमि दीयतां भुज्यतामिति सर्वेभ्यो वच्मि । केभ्यस्तदाह ब्रह्मराजन्याभ्यां ब्राह्मणाय राजन्याय क्षत्रियाय च शूद्राय अर्याय वैश्याय स्वायात्मीयाय अरणाय पराय अरणोऽपगतोदकः शत्रुः (2.) नास्ति रणः शब्दो येन सह वाक्सम्बन्धरहितः शत्रुरिति वा ॥ प्रियो देवानाम् मध्येऽवसानरहितानुष्टुप् लौगाक्षिदृष्टा । यथेति पूर्वोक्तेत्र तथाशब्दोऽध्याहार्यः यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं वदामि तथा ततोऽहं देवानां प्रियः भूयासम् इह संसारे दक्षिणायै दक्षिणायाः दातुश्च प्रियः भूयासम् देवा दक्षिणादातारश्च मयि प्रीतिं कुर्वन्त्वित्यर्थः । किं च मे ममायं कामः समृध्यतां सफलो भवतु अयमिति नामनिर्देशः धनपुत्रादिलाभकामो मे सम्पद्यतामित्यर्थः । किं च अदो मा मामुपनमतु अद इति इष्टनामग्रहणम् देवदत्तादिर्मां प्रीणयतु (3.) ॥ २॥

a. बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

b. उपयामगृहीतोऽसि बृहस्पतये त्वा । c. एष ते योनिर्बृहस्पतये त्वा ॥ ३॥

ब्रह्मदेवत्या त्रिष्टुप् गृत्समददृष्टा बृहस्पतिसवे बार्हस्पत्यग्रहणेऽस्याः सोपयामाया विनियोगः । ऋतात् सत्यात् ब्रह्मणः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य ऋतप्रजातः हे ऋतप्रजात हे बृहस्पते बृहतां वेदानां पते पालक चित्रं नानाविधं तत् द्रविणमस्मासु यजमानेषु धेहि धारय स्थापय देहीत्यर्थः । तत्किम् अर्यः स्वामी यद्धनमर्हात् अर्हति पूजयति लेटोऽडाटाविति [पा° ३. ४. ९४.] आडागमः अर्यः स्वामिवैश्ययोरिति [पा° ३. १. १०३.] अर्यशब्दः स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः ईश्वरयोग्यं धनं देहीत्यर्थः । यद्धनं जनेषु लोकेषु वि-

भाति विविधं शोभते । कीदृशं धनं द्युमत् द्यौः कान्तिरस्यास्ति द्युमत् दिव उ-च्चेति [पा° ६.१.१३१.(4.)] उकारः । क्रतुमत् क्रतवो यज्ञो विद्यते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः । यत् धनं शवसा बलेन दीदयत् दापयति प्रापयति वा धनान्तरम् तद्धनं देहीत्यर्थः दय दानगतिहिंसादानेषु अस्माल्लिङ्लुङि रूपम् अडभाव आर्षः ॥ उपयामेन पात्रेण गृहीतोऽसि बृहस्पतयेऽर्थाय त्वा गृह्णामि । स्थापयति एष ते योनिः स्थानम् बृहस्पतये त्वां सादयामि ॥३॥

a. इन्द्र गोमन्निहायाहि पिबा सोमꣳ शतक्रतो । विद्मद्ग्रावभिः सुतम् ॥

b. उपयामगृहीतोऽसीन्द्राय त्वा गोमते ।

c. एष ते योनिरिन्द्राय त्वा गोमते ॥४॥

हे इन्द्रदेवत्ये गायत्र्यौ रम्याद्विदृष्टे गोसवे यज्ञे ग्रहग्रहणे नियुक्ते सोपयामि । शतं क्रतवः कर्माणि यस्य स शतक्रतुः हे शतक्रतो हे इन्द्र हे गोमन् गावो धेनवः स्तुतयः किरणा वा विद्यन्ते यस्य स गोमान् त्वमिह यज्ञे आयाहि आगच्छ सोमं च पिब ह्यचोऽतस्तिङ इति [पा° ६.३.१३५.] दीर्घः । कीदृशं सोमं ग्रावभिः सुतमश्मभिरभिषुतम् कीदृशैर्ग्रावभिः विद्मद्भिः विशेषेण द्यन्ति खण्डयन्तिः ते विद्यन्तः तैः दो अवखण्डने दिवादित्वाद्यन् शतरि श्नातः श्यनीति [पा° ७.३.७१.] श्नाकारलोपः ॥ उपया° गोमते इन्द्राय त्वां गृह्णामि । सादयति एष ते° ॥४॥

a. इन्द्रायाहि वृत्रहन्पिबा सोमꣳ शतक्रतो । गोमद्ग्रावभिः सुतम् ॥

b. c. = 4 b. c. ॥५॥

वृत्रं दैत्यं हन्ति वृत्रहा शतं क्रतवो मखा यस्य स शतक्रतुः । हे वृत्रहन् हे शतक्रतो हे इन्द्र त्वमायाहि आगच्छ सोमं च पिब कीदृशं सोमं ग्रावभिः सुतम् कीदृशैर्ग्रावभिः गोमद्भिः गौः स्तुतिर्विद्यते येषां ते गोमन्तस्तैः ॥ उप° एष ते° व्याख्याते ॥५॥

a. ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥

b. उपयामगृहीतोऽसि वैश्वानराय त्वा । c. एष ते योनिर्वैश्वानराय त्वा ॥६॥

तिस्रो वैश्वानरीयाः पुरोऽनुवाक्याः । आद्या गायत्री प्राङ्नाक्षिदृष्टा । वयं वैश्वानरमीमहे याचामः यज्ञसमाप्तिमिति शेषः ईमहे याञ्चाकर्मसु पठितः । कीदृशं वैश्वानरम् ऋतवानम् ऋतं सत्यं यज्ञो जलं वास्यास्ति ऋतवा तम् छन्दसीवनिपौ वाच्याविति [पा° ५. २. १०९. वा° २.] अस्त्यर्थे वन्प्रत्ययः संहितायामृतस्य दीर्घः । ऋतस्य सत्यस्याविनाशिनो ज्योतिषः तेजसः पतिं पालकम् तेजोऽधिष्ठानमित्यर्थः । अजस्रं न जस्यति नश्यति अजस्रस्तमनुपक्षीणम् जसु हिंसायाम् नमिकम्पीति [पा° ३. २. १६७.] रप्रत्ययः । घर्मं घृ क्षरणदीप्त्योः ञिघर्ति क्षरति जलं घर्मस्तम् दीप्तं वा ॥ उप॰ वैश्वानराय त्वां गृह्णामि । एष ते॰ सादयामि ॥ ६॥

a. वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥

b. c. = ६ b. c. ॥ ७॥

त्रिष्टुप्कुत्सदृष्टा । वैश्वानरस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम । कं निपातः पादपूरणः हि यस्माद्धितोवैश्वानरः इतोऽरणितो जातः उत्पन्नः सन् इदं विश्वं सर्वं विचष्टे कर्मानुरूपं पश्यति सूर्येण सह यतते स्पर्धते च सूर्यसमतेजा इत्यर्थः । कीदृशोऽग्निः राजा राजते दीप्यते राजा । भुवनानां भूतजातानामभिश्रीः आश्रयणीयः अभि समन्तात् श्रीयते सेव्यतेऽभिश्रीः कर्मणि क्विप् । उप॰ एष ते उक्तो ॥ ७॥

a. वैश्वानरो न ऊतयऽआ प्रयातु परावतः । अग्निरुक्थेन वाहसा ॥

b. c. = ६ b. c. ॥ ८॥

गायत्री । नोऽस्माकमूतयेऽवनाय परावतः दूरदेशाद्वैश्वानरः आ प्रयातु आगच्छतु केन वाहसा वाहनभूतेन उक्थेन स्तोमेन वाहिष्ठो वाहनानां स्तोमो दूतो द्रुतं नरा (5.) इति श्रुत्यन्तरे स्तोमस्य वाहनत्वमुक्तम् । उप॰ एष॰ उक्तो ॥ ८॥

a. अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥

b. उपयामगृहीतोऽस्यग्नये त्वा वर्चसे । c. एष ते योनिरग्नये त्वा वर्चसे ॥ ९॥

अग्निर्देवत्या गायत्री वसिष्ठभरद्वाजदृष्टा पुरोरुक् । महान्गयः स्तुतिर्यस्य स महागयो महागृहरूपो वा तमग्निं वयमीमहे याचयामः । तं कं योऽग्निर्ऋषिः मन्त्रद्रष्टा । पवमानः पव गतौ पवतऽइतस्ततो गच्छति पवमानः यद्वा पूङ् शोधने पवते शोधयति पवमानः । पञ्चजन्यः पञ्चजनेभ्यो हितः विप्रादयश्चत्वारो वर्णा निषादश्चेति पञ्चजनास्तेषां यज्ञाधिकारात् पुरोहितः पुरोऽग्रे हितः स्थापितः दधातेर्निष्ठा ॥ उप॰ वर्चसे तेजोरूपायाग्नये त्वां गृह्णामि । एष॰ ॥ १ ॥

a. महाँ२॥ऽइन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि ॥

b. उपयामगृहीतोऽसि महेन्द्राय त्वा । c. एष ते योनिर्महेन्द्राय त्वा ॥ १० ॥

महेन्द्रदेवत्या गायत्री वसिष्ठकृता । पुरोरुक् । इन्द्रः शर्म सुखं यच्छतु ददातु योऽस्मान्द्वेष्टि तं च पाप्मानं पापिष्ठं हन्तु नाशयतु यद्वास्मद्द्वेष्टारं पाप्मानं च पापं ब्रह्महत्यादिकं हन्तु अस्त्री पङ्क्ति पुमान्पाप्मेत्यमरः [१.१.१३१.] । कीदृश इन्द्रः महान् श्रेष्ठः । वज्रहस्तः वज्रं हस्ते यस्य सः । षोडशी पञ्च प्राणा दशेन्द्रियाणि मनश्चेति षोडशपदार्था लिङ्गशरीररूपा यस्य स षोडशी आत्मरूप इत्यर्थः ॥ उप॰ एष॰ उक्तौ ॥ १० ॥

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ११ ॥

इन्द्रदेवत्या पथ्या बृहती नोधागोतमदृष्टा स्वाध्यायादिषु नियुक्ता । आदित्ययाज्ञवल्क्ययोरार्षमाध्यायात् । हे यजमानाः तमिन्द्रं वयं गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः अभिनवामहे सम्यक् स्तुमहे नु स्तुतौ व्यत्ययेन शप् । किम्भूतमग्निं वो युष्माकं दस्मं दर्शनीयम् दस दर्शने मप्रत्ययः । ऋतिषहम् ऋ गतौ क्तिन्प्रत्ययः ऋत्या गत्या सहतेऽभिभवति शत्रूनिति ऋतिषट् तम् पूर्वपदाच्चेति [पा॰ ८. ३. १०६. (6.)] षत्वम् संहितायां दीर्घः । वसोः वासयितुः स्थितिहेतुभूतस्यान्धसोऽन्नस्य षष्ठी तृतीयार्थे अन्नेन मन्दानं मोदमानम् मदिङ् स्वप्ने जाड्ये मदे मोदे स्तुतौ

गताविति धातोः शानच्प्रत्ययेन शपो लुक् । दृष्टान्तमाह वत्सं न नकार इवार्थः स्वसरेषु स्वेनैवात्मनैव सरन्ति प्रसरन्ति किरणा येषु ते स्वसरा दिवसाः तेषु यथा धेनवो नवप्रसूता गावो वत्सं नुवन्ति स्तुवन्ति शब्दैराकृयन्तीत्यर्थः । तद्वद्वयमिन्द्रं स्तुमः ॥११॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥१२॥

अग्निदेवत्यानुष्टुब्वसूयुदृष्टा । हे उद्गातः अग्नये अग्न्यर्थं तत् बृहत्साम अर्च गाय बृहत्साम्नो गानं कुरु तत्किम् यत् वाहिष्ठम् वाहयति प्रापयति इष्टमिति वाहयितृ वहेर्णयत्तातृच् अत्यन्तं वाहयितृ वाहिष्ठम् अतिशायने तमबिष्ठनाविति [पा° ५.३.५५.] अनुवृत्तौ तुश्छन्दसीति [पा° ५.३.५९.] इष्ठनि परे तुरिष्टेमेयःस्विति [पा° ५.४.१५४.] च तृचो लोपे वाहिष्ठमिति रूपम् । किं च सामगानेन प्रत्यक्षमग्निं ब्रूहि किम् हे विभावसो विभा कान्तिरेव वसु धनं यस्य स विभावसुः हे अग्ने रयिः धनं वाजा अन्नानि च त्वत् त्वत्तः सकाशात् उदीरते उद्गच्छन्ति ईर गतौ कम्पे च लट् शपो लुक् अदभ्यस्तात् [पा° ७.१.४.] । तत्र दृष्टान्तः महिषीव यथा महिषी प्रथमपरिणीता स्त्री गृहात् भोगार्थं पतिं प्रति उदीर्ते उद्गच्छति । एकं त्वत्पदं पादपूरणम् रयिः त्वदुदीर्ते इति वा ॥१२॥

एक्वू षु ब्रवाणि तेऽग्नऽइत्येतरा गिरः । एभिर्वर्धासऽइन्दुभिः ॥१३॥

अग्निदेवत्या गायत्री भरद्वाजदृष्टा हे अग्ने त्वमेहि आगच्छ उ पादपूरणः सुञ्जिचेति (7.) संहितायामुकारस्य दीर्घः । इत्था इत्थमनेन प्रकारेण न (8.) इतराः अन्याः गिरो वाणीः स्तुतिलक्षणाः ते तव सु ब्रवाणि सुतरां वदानि ब्रूञो लोट् । किं च एभिरिन्दुभिः सोमैः वर्धासे वर्धस्व लेटोऽडाटौ ॥१३॥

ऋतवस्ते यज्ञं वितन्वन्तु मासा रक्षन्तु ते हविः ।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परिपातु नः ॥१४॥

अग्निदेवत्या बृहती १.८.११.८. वर्णपादा विषमपादा नवकाष्टकैकादशाष्टि-

नो विषमपादेति वचनात् । हे अग्ने ऋतवः ऋतूपलक्षिताः कालविशेषाः ते तव यज्ञं वितन्वन्तु विस्तारयन्तु । मासाः चैत्राद्यधिष्ठातारो देवास्ते तव कविः पुरोडाशादिकं रक्षन्तु पान्तु । संवत्सरस्तदधिष्ठाता देवः ते तुभ्यं त्वदर्थं नोऽस्माकं यज्ञं दधातु पुष्णातु नोऽस्माकं प्रजां पुत्रादिकां च परिपातु रक्षतु संवत्सर एव ॥ १४ ॥

उपक्षरे गिरीणाꣳ संगमे च नदीनाम् । धिया विप्रोऽअजायत ॥ १५ ॥

सोमदेवत्या गायत्री वत्सदृष्टा । गिरीणां पर्वतानामुपक्षरे निकटे नदीनां गङ्गादीनां च संगमे विप्रो मेधावी सोमः अजायत उत्पन्नः इनिर्लङ् कया धिया बुद्ध्या विप्रादयो मया यज्ञं करिष्यन्तीति विचार्येत्यर्थः ॥ १५ ॥

II. उच्चा ते जातमन्धसो दिवि सद्भूम्याददे । उग्रꣳ शर्म महि श्रवः ॥ १६ ॥

सोमदेवत्यास्तिस्रो गायत्र्य आमहीयवदृष्टाः । हे सोम ते तव अन्धसोऽन्नाद्यसद्रूपात् जातमुत्पन्नं क्षोमतो जातमपूर्वम् उच्चा उच्चं गतं दिवि स्वर्गे सत् विद्यमानं भूमिः आददे गृह्णाति भूमिशब्दस्य विसर्गलोपे संधिश्छान्दसः (9.) । किं तत् द्युलोकस्थं भूमिर्गृह्णाति तदाह । उग्रमुत्कृष्टं शर्म सुखं गृहपुत्रादिजन्यं महि महत् श्रवः कीर्तिर्धनं वा ॥ अनेन मन्त्रेण पञ्चाङ्गतिपरिणाम उक्तः । स यथा । कृताङ्गतिरादौ दिवि गच्छति ततोऽन्तरिक्षे जलद्रूपेण ततो भूमावन्नद्रूपेण ततो नरे रेतोद्रूपेण ततो योनौ नरद्रूपेणागत्य तं नरं (10.) धनयशोभ्यां सुखिनं करोतीति भावः ॥ १६ ॥

स नः इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रव ॥ १७ ॥

हे सोम स त्वं नोऽस्माकं परिस्रव क्षर रसद्रूपो भूत्वाङ्गतित्वमेकीत्यर्थः किमर्थमिन्द्राय वरुणाय मरुद्भ्यश्च इन्द्रादीनां तृप्तये परिस्रवेत्यर्थः । कीदृशायेन्द्राय यज्यवे यष्टुं योग्यो यज्युस्तस्मै यष्टव्याय इदं त्रयाणां विशेषणम् यज्युभ्य इति मरुताम् । कीदृशस्त्वं वरिवोवित् वरिवो धनं वेत्ति जानाति विन्दति लभते वा वरिवोवित् धनस्य ज्ञाता प्रापकश्च ॥ १७ ॥

FF FF F*

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥ १८ ॥

अर्यः ईश्वरः सोमः एना एनानि विश्वानि सर्वाणि मानुषाणां नराणां द्युम्नानि धनानि यशांसि वा आ नयत्विति शेषः अस्मभ्यं ददात्वित्यर्थः तानि सोमदत्तानि द्युम्नानि वयं वनामहे वन सम्भक्तिशब्दयोः लट् सम्भजामहे । कीदृशा वयं सिषासन्तः षनु दनि सनितुं दातुमिच्छन्ति सिषासन्ति ते सिषासन्तः सनेर्धातोः सन्नन्ताच्छतृप्रत्ययः जनसनखनां सन्झलोरिति [पा° ६. ४. ४२.] आत्वम् सन्यन्यत इति [पा° ७. ४. ७९.] अभ्यासेकारः दानं कुर्वाणा धनभाजः स्यामित्यर्थः ॥ १८ ॥

अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥ १९ ॥

आशीरियं देवदेवत्या त्रिष्टुप् मुद्गलदृष्टा । वयं वीरैः पुत्रैः अनुपुष्यास्म पुष्टा भवेम पुषेराशीर्लिङि उत्तमबहुवचनम् गोभिर्धेनुभिः अनुपुष्यास्म उपसर्गावृत्त्या क्रियावृत्तिः अश्वैरनु पुष्यास्म सर्वेणान्येनापि कामेन पुष्यास्म पुष्टैः सर्वपदार्थैर्गृहादिभिः पुष्यास्म । द्वौ पादौ यस्येति द्विपात् तेन द्विपदा मनुष्येण दासादिना चतुष्पदा गजादिना च पुष्यास्म पादोऽन्यतरस्यामिति [पा° ४. १. ८.] अत्तलोपः पादः पदिति [पा° ६. ४. १३०.] पदादेशः । किं च ऋतुथा ऋतावृतौ काले-काले देवा नोऽस्माकं यज्ञं नयन्तु प्रापयन्तु प्राप्नुवन्तु ॥ १९ ॥

अग्ने पत्नीरिहावह देवानामुशतीरुप । त्वष्टारꣳ सोमपीतये ॥ २० ॥

अग्निर्देवत्या गायत्री मेधातिथिर्दृष्टा । इतः पञ्च ऋचोऽग्निष्टोमे नेष्टुर्याज्याः आग्या प्रातःसवने नेष्टृचमसयागे याज्या । हे अग्ने देवानां पत्नीः इह यज्ञे त्वमुपावह आगमय कीदृशीः पत्नीः उशतीः कृविः कामयमानाः वशेः शत्रन्तात् उगित इति [पा° ४. १. ६.] ङीप् । किं च सोमपीतये सोमपानाय त्वष्टारं देवं चोपावह ॥ २० ॥

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिबर्तु नो । त्वꣳ हि रत्नधा असि ॥ २१ ॥

हे ऋतुदेवते गायत्र्यौ मेधातिथिर्दृष्टे ऋतुयागे नेष्टुर्याज्ये । ग्नाः पत्न्योऽस्य स-

क्तीति ग्रावा तदस्यास्तीति [पा° ५.२.९४.] मतुप् (11.) मादुपधाया इति [पा° ८.२.९.] वत्वम् तस्य सम्बोधनं हे ग्रावः पत्नीवन् हे नेष्टः नोऽस्माकं यज्ञमभिगृणीहि स्तुहि गॄ शब्दे क्र्यादित्वात् श्ना ई हल्यघोरिति [पा° ६.४.११३.] तस्येकारः घ्वादीनां ह्रस्व इति [पा° ७.३.८०.] धातोर्ह्रस्वः । किं च ऋतुना देवेन सह पिब सोममिति शेषः । हि यस्मात् त्वं रत्नधा असि रत्नानि दधाति ददाति रत्नधाः रमणीयधनानां दातासि ॥२१॥

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥२२॥

द्रविणस्शब्दः सान्तो धनवाची द्रविणो धनं ददाति द्रविणोदाः धनदाताग्निः पिपीषति पातुमिच्छति सोममिति शेषः पीङ् पानेऽस्माद्दिवादिकात्सन्प्रत्ययः । अतो हे ऋत्विजः यूयं जुहोत जुहुत प्रतितिष्ठत च तप्तनबिति [पा° ७.१.४५.] तबादेशः कर्मसूद्युक्ता भवतेत्यर्थः । किं च नेष्टुरिदं नेष्ट्रम् वृद्ध्यभाव आर्षः नेष्टुर्धिष्ण्यात् ऋतुभिः देवैः सह इष्यत सोमं प्रतिगच्छत इष गतौ दिवादित्वात् श्यन् लोट् ॥२३॥

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमꣳ सुमना अस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठरꣳइन्दुमिन्द्र ॥२३॥

इन्द्रदेवत्या त्रिष्टुप् विश्वामित्रदृष्टा । माध्यन्दिने सवने नेष्टृचमसयागे याज्या । हे इन्द्र तव अयं सोमोऽस्ति अतः अर्वाङ् अस्मदभिमुखः त्वमेहि आगच्छ शश्वत्तमं सर्वकालमस्य पाहि कर्मणि षष्ठी इमं सोमं रक्ष पा रक्षणे लोट् । कीदृशः त्वं सुमनाः शोभनं मनो यस्य सः प्रसन्नचित्तः । किं च अस्मिन्यज्ञे बर्हिषि आस्तृतदर्भेषु निषद्य उपविश्य इममिन्दुं सोमं जठरे उदरे दधिष्व धारय धि धारणे तुदादिः व्यत्ययेन शपः श्लुस्तङ् अभ्यासिकारस्याकार आर्षः ॥२३॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषाणोऽअन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥२४॥

त्वष्टृदेवत्या जगती गृत्समददृष्टा । तृतीयसवने नेष्टृचमसयागे याज्या । देवप-

ल्यः प्रार्थ्यन्ते । अमाशब्दो गृहवाचकः अमेव स्वगृहमिव नोऽस्माकं यज्ञगृहाणि हे देवपत्न्यो यूयमागन्तन आगच्छत गमेः शपो लुक् लोटि मध्यमबहुवचने । हि पादपूरणः बर्हिषि दर्भे निसदतन निषीदत उपविशत सद् गतौ रणिष्टन रण शब्दे अस्य लुङि बहुलम् अडागमाभावः परस्परं वार्त्ता कुरुतेत्यर्थः तनतनेति [पा० ७.१.४५.] सर्वत्र तनबित्यादिशः । कीदृश्यो यूयं सुहवाः शोभनः सुकरो हव आह्वानं यासां ताः । एवं देवपत्नीरुक्त्वाथ त्वष्टारमाह हे त्वष्टः त्वमथानन्तरं देवपत्नीष्वागतासु मदस्व मोदस्व तृप्यस्वेत्यर्थः । कीदृशस्त्वम् अन्धसः अन्धः हविर्लक्षणमन्नं जुजुषाणः सेवमानः जुषी प्रीतिसेवनयोः व्यत्ययेन शानचि शपः श्लुः । अन्धसः इति कर्मणि षष्ठी । देवेभिः देवैः ज्ञानिभिः देवपत्नीभिश्च सुमद्गणः सुष्ठु माद्यन्ति हृष्यन्ति सुमदः मदेः क्विप् सुमदः संतुष्टा गणा देवाः स्त्रीगणाश्च यस्य स सुमद्गणः । जनयन्ति जनयो नार्यः ॥ २४ ॥

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ २५ ॥

सोमदेवत्ये द्वे गायत्र्यौ मधुरुन्दोदृष्टे जपादिषु नियुक्ते । हे सोम धारया कृत्वा पवस्व गच्छ दशापवित्राद्द्रोणकलशं प्रति गच्छ । कीदृश्या धारया स्वादिष्ठया स्वादो विद्यते यस्यां सा स्वादवती अत्यन्तं स्वादवती स्वादिष्ठा तया विन्मतोर्लुगिति [पा० ५.३.६५.] इष्ठनि मतुपो लुक् स्वाद्वतमया । मदिष्ठया मदयति मदयित्री अत्यन्तं मदयित्री मदिष्ठा तया इष्ठनि तुरिष्ठेमेयःस्विति [पा० ६.४.१५४.] तृचो लोपः । यत इन्द्राय पातवे इन्द्रस्य पातुं त्वं सुतोऽभिषुतोऽसि अस्माभिरतो धारया पवस्व ॥ २५ ॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्थमासदत् ॥ २६ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां षड्विंशोऽध्यायः ॥ २६ ॥ ॥

सोमः द्रोणे विभक्तिव्यत्ययः द्रोणं द्रोणकलशलक्षणं योनिं स्थानमभि आसदत् आभिमुख्येन सीदति तिष्ठति । कीदृशः सोमः रक्षोहा रक्षांसि हन्तीति रक्षोहा दुष्टनाशकः । विश्वचर्षणिः विश्वं सर्वं जगत् चष्टे पश्यति विश्वचर्षणिः सर्वस्य शुभाशुभद्रष्टा यद्वा चर्षणिरिति मनुष्यनामसु [निघ० .] पठितम्

विश्वे सर्वे चर्षणयो मनुष्या ऋत्विग्यजमानलक्षणा यस्य कण्डनाकरणादिषु स । तथा कीदृशं द्रोणम् अयः सुपां सुलुगिति तृतीयैकवचनलोपः (12.) अयसा लोहेन कृतमुत्कीर्णम् वास्या कृत्वा तक्ष्णा सोमभाजनीकृतम् कृतमिति विभक्तिव्यत्ययः । तथा सधस्थे सह सार्धं तिष्ठन्ति सोमा यत्र स सहस्थः सुपि स्थ इति [पा° ३.२.४.] कप्रत्ययः । आतो लोप इति [पा° ६.४.६४.] आलोपः सध मादस्थयोश्छन्दसीति [पा° ६.३.९६.] सहस्य सधादेशः । असदत् पुषादीति [पा° ६.१.५५.] लुङि च्लेरङ् छन्दसि लुङ्लङ्लिटः इति [पा° ३.४.६.] लडर्थे लुङ् ॥२६॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । अनुक्तमन्त्रकथनः षड्विंशोऽध्याय ईरितः ॥२६॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ - भूतसाधनी ॥१॥ सकामाꣳ३ अर्ध° - ऽनेभ्यः ॥२॥ २ ब्रह्मरा° - मादो नमतु ॥३॥

II. ॥ ३ ॥४॥ III. ॥ ४ ॥५॥ IV. ॥ ६ ॥६॥

V. ॥ वैश्वानरꣳ हवामहेऽमृतस्य ज्यो° - योनिर्विश्वानराय त्वा ॥७॥

VI. ॥ ८ (13.) ॥८॥ VII. ॥ ७ ॥९॥

VIII. ॥ मरुत्वाꣳ३ इन्द्र वृष° [७.३८.] ॥१०॥

IX. ॥ १० [महाꣳ३ इन्द्रो वज्रहस्तः षोलशी श° - °हीतोऽसीन्द्राय त्वा षोलशिनेऽषु ते योनिरिन्द्राय त्वा षोलशिने] ॥११॥

X. ॥ १ a ॥१२॥ XI. ॥ ११ ॥१३॥

XII. ॥ आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यꣳ सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यꣳ सु मघवन्बोधि गोदाः ॥१४॥

द्वादशानुवाकेषु चतुर्दश ॥

इति काण्वीयायां वाजसनेयसंहितायामष्टाविंशोऽध्यायः ॥२८॥ ॥

I. समास्त्वाग्ऽऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥ १ ॥

श्रीगणेशाय नमः (1.) । अथमध्यायः पञ्चचितिकस्याग्नेः सम्बन्धी प्रजापतिदृष्टः । नव ऋचोऽग्निदेवत्यास्त्रिष्टुभोऽग्निना दृष्टाः इष्टकापशौ समिध्यमानसमिद्धत्योरन्तराले आसां विनियोगः । अग्निर्ऋषिः कर्माङ्गभूतमग्निं स्तौति । हे अग्ने एते त्वा त्वां वर्धयन्तु । के । समा मासाः संवत्सरस्य पृथगुक्तेः समाशब्दो मासवाचकः । ऋतवो वसन्ताद्याः संवत्सराः तदधिष्ठातारः ऋषयो मन्त्रद्रष्टारः यानि सत्या सत्यानि सत्यरूपा मन्त्रा इत्यर्थः । त्वमप्येतैर्वर्धमानो दिव्येन दिवि भवेन रोचनेन दीप्त्या संदीदिहि संदीप्यस्व दिवः झौ लुकि रूपम् तुदादीनां दीर्घोऽभ्यासस्येति [पा° ६. १. ७.] अभ्यासदीर्घः । किं च विश्वाः सर्वाः प्रदिशो विदिशः चतस्रो दिशश्च आभाहि दीपय अन्तर्भूतो णयर्थः भा दीप्तौ ॥ १ ॥

सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता तेऽग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ २ ॥

व्यवहिताश्चेति पाणिन्युक्तेः [१. ४. ८२.] उपसर्गक्रिययोर्व्यवधानम् हे अग्ने समिध्यस्व च दीप्यस्व व्यत्ययेन श्यन् एनं यजमानं प्रबोधय च ज्ञातार्थं कुरु अग्निश्चेतव्य इति । महते सौभगाय ऐश्वर्याय उत्तिष्ठ च ऐश्वर्यं दातुमुद्यमं कुर्वित्यर्थः । किं च हे अग्ने ते तव उपसीदतीत्युपसत्ता तृच् सेवको मा रिषत् च मा नश्यतु च यजमानो ह्यग्निमुपसीदति । ते तव ब्रह्माणः ब्राह्मणा ऋत्विग्यजमानाः यशसः यशस्विनः सन्तु मत्वर्थीयप्रत्ययलोपः । मा अन्ये अन्ये अयज्वानो मा यशसः सन्तु ॥ २ ॥

त्वामग्ने वृणते ब्राह्मणा इमे शिवोऽग्ने संवरणे भवा नः ।
सपत्नहा नोऽभिमातिजिच्च स्वे गये जागृह्यप्रयुछन् ॥ ३ ॥

हे अग्ने इमे ब्राह्मणाः ऋत्विजः त्वा त्वां वृणते वृङ् सम्भक्तौ यागाय भजन्ति अतो हे अग्ने संवरणे ब्राह्मणैः सह्येकस्मिन्वरणे सति नोऽस्माकं शिवः शान्तो

भव । अस्माकं सपत्नहा अभिमातिजिच्च भव अभिमातिरपि शत्रुः तत एवं व्याख्या सपत्नानां हन्ता भव हतावशिष्टानां जेता च भव । किं च स्वे गये निजे गृहे जागृहि सावधानो भव किं कुर्वन् अप्रयुछन् अप्रमाद्यन् ॥ ३ ॥

इहैवाग्नेऽअधिधारया रयिं मा त्वा निक्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां तेऽअनिष्टृतः ॥ ४ ॥

हे अग्ने इहैवास्मास्वेव यज्ञमानेषु रयिं धनं त्वमधिधारय अधिकं देहि । किं च पूर्वं चिन्वन्ति पूर्वचितः पूर्वमग्निं चितवन्तोऽत एव निकारिणः नितरां यज्ञकरणशीलाः त्वा त्वां मा निक्रन् मा नीचैः कुर्वन्तु मावज्ञानन्त्वित्यर्थः करोतेः शपि लुप्ते लङि प्रथमबहुवचने रूपम् । किं च हे अग्ने क्षत्रं क्षत्रजातिः तुभ्यं तव सुयममस्तु सुखेन यन्तुं शक्यं सुयमं सुखेन वशीकर्तुं शक्यमस्तु ईषदुःसुषिनि [पा° ३. ३. १२६.] सुपूर्वाद्यमेः खल् । किं च ते तव उपसत्ता उपसदनकर्ता यष्टा अनिष्टृतः अनुपहिंसितः सन्वर्धताम् धनपुत्रादिभिरेधताम् स्तृञ् हिंसायां निष्ठान्तः ॥ ४ ॥

क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ ५ ॥

हे अग्ने त्वं क्षत्रेण संरभस्व समारभस्व एतन्तो बोध्यः क्षत्रेण समारभ्य यज्ञमिति शेषः क्षत्रियान्यज्ञं कारयेत्यर्थः । कीदृशस्त्वं स्वायुः शोभनमायुः जीवनं यस्य सः यद्वा आयुः उकारान्तो मनुष्यवाची शोभन आयुर्मनुष्यो यजमानो यस्य स स्वायुः । किं च हे अग्ने मित्रेण सूर्येण सह वर्तमानः सन् मित्रधेये यतस्व धातुं धारयितुं योग्यं धेयं मित्रस्य यजमानस्य धेयं कार्यं यागलक्षणं तत्र यत्नं कुरु यजमानेन यज्ञं कारय । किं च सजातानां समानजन्मनां मध्यमेस्थाः मध्यमे तिष्ठतीति क्विप् मध्यमस्थ एधि भव सजाता अपि यजमानो भवत्वित्यर्थः । किं च हे अग्ने इह यज्ञगृहे दीदिहि दीप्यस्व दीव्यतेर्व्यत्ययेन शपः श्लुः श्लाविति [पा° ६. १. १०.] द्वित्वम् तुजादीनां दीर्घ इति [पा° ६. १. ७.] अभ्यासदीर्घः । कीदृशस्त्वम् राज्ञां

विकृव्यः कर्तरि षष्ठी राजभिर्विविधं क्रियते आक्रियते विकृव्यः राजभिर्यज्ञे आख्यातव्यः ॥५॥

अति निक्रोऽअति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा क्रयग्ने दुरिता सकृस्वाथास्मभ्यꣳ सकृवीराꣳ रयिं दाः ॥६॥

हे अग्ने क्रि निश्चितं विश्वा विश्वानि सर्वाणि दुरिता दुरितानि पापानि त्वं सकृस्व अभिभव निवर्तयेत्यर्थः । किं कृत्वा निक्रः निकृत्ति निकः निपूर्वाद्धन्तेर्डप्रत्ययः सुपां सुलुगिति शसः सु-आदेशः निकान् कृत्तॄन् अतिक्रम्य । स्रेधतिः कुत्सितकर्मा स्रेधन्ति स्रिधः क्विप् कुत्सिताचारान् अतिक्रम्य । अचित्तिमन्यमनस्कतामतिक्रम्य । न रातिर्दानं यस्य सोऽरातिस्तमदातारमतिक्रम्य । दुष्टान्सर्वानतिक्रम्य पापं नाशयेत्यर्थः । किं च अथानन्तरं हे अग्ने अस्मभ्यं सकृवीरां वीरैः पुत्रैः सहितां रयिं दाः देहि लुङ् ॥६॥

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिक्रीक्र ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः (2.) शिवेभिरद्य परिपाक्रि नो वृधे ॥७॥

हे अग्ने इक्र कर्मणि वर्तमानस्त्वं विश्वा आशाः दीदिक्रि सर्वाः दिशः प्रकाशय । कीदृशस्त्वम् अनाधृष्यः पराभवितुमशक्यः । जातवेदाः जातं वेदो धनं ज्ञानं वा यस्मात् । अनिष्टृतः न क्रिंसितः केनापि स्तृ क्रिंसायां क्तान्तः । विराट् विविधं राजमानः क्षत्रभृत् क्षत्रं बिभर्ति पुष्णाति । किं च मानुषीः मनुष्यसम्बन्धिनीर्भियः जन्मजरामृतिदैन्यशोकादिकाः प्रमुञ्चन्निवर्तयन्सन् शिवेभिः शिवैः शान्तैस्तेभिरद्य (3.) वृधे वृद्धौ नोऽस्मान्परिपाक्रि । वर्धनं वृत् तस्मै वृधे सम्पदादित्वाद्भावे क्विप् ॥७॥

बृक्रस्पते सवितर्बोधयैनꣳ सꣳशितं चित्संतरांꣳ सꣳशिशाधि ।
वर्धयैनं मरुते सौभगाय विश्वेऽएनमनुमदन्तु देवाः ॥८॥

हे बृक्रस्पते हे सवितः एनं यजमानं बोधय कर्माभिज्ञं कुरु । किं च चिदप्यर्थे संशितं चित् संशितं शिक्षितमपि संतरामतितरां संशिशाधि शिक्षय शासेः

शपः श्लौ द्वित्वम् छान्दसमभ्यासस्येत्वम् । किं च मरुते सौभगाय ऐश्वर्याय एनं वर्धय । विश्वे देवाः एनं यजमानमनुमदन्तु तृप्ता हृष्टा वा भवन्तु । बृहस्पतिसवितृशब्दाभ्यां सामिधेन्यङ्गभूतोऽग्निरेवोच्यते वाक्यद्वयं वा एकेन बृहस्पतिरुक्तोऽन्येन सविता ॥ ८ ॥

अमुत्रभूयादध यद्यमस्य बृहस्पतेऽअभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ९ ॥

हे बृहस्पते त्वममुत्रभूयादमुञ्चः अमुत्र परलोके भवनममुत्रभूयम् भुवो भाव ऽइति [पा° ३. १. १०७.] क्यप् परलोकगमनान्मरणात् मुञ्च मरणाद्रक्षेत्यर्थः लकारव्यत्ययः । अध अथ यत् यमस्य भयं परलोकभयं (4.) नरकपातादि तस्मादपि मुञ्च । किं च अभिशस्तेः अभिशापादपि लोकापवादादपि मुञ्च । देवानां भिषजा भिषजौ अश्विना अश्विनौ अस्मात् यजमानान्मृत्युं प्रत्यौहतां निवर्तयतां कैः शचीभिः कर्मभिः कृत्वा । अत्र बृहस्पतिरग्निरेव सामिधेनीप्रकरणास्याग्नेयत्वात् ॥ ९ ॥

उद्वयं तमसस्° ॥ १० ॥

व्याख्याता [२०. २१.] ॥ १० ॥

II. ऊर्धा अस्य समिधो भवत्यूर्धा शुक्रा शोचीष्यग्नेः ।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ११ ॥

द्वादशाप्रीदेवत्या उष्णिहो विषमपादा आग्नेय्योऽग्निना दृष्टाः । अग्निः प्रजापतिस्तेन स्तूयते तेन प्राजापत्या अपि । ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिमप्रीणात्तेन प्राजापत्या इति श्रुतेः । अस्याग्नेः समिधः ऊर्धाः देवगामिन्यो भवन्ति शोचींषि तेजांस्यपि ऊर्धा ऊर्धानि भवन्ति । कीदृशानि शोचींषि शुक्रा शुक्राणि शुद्धशुद्धानि । द्युमत्तमा द्यौः दीप्तिः प्रकाशो येषां तानि द्युमन्ति अत्यन्तं द्युमन्ति द्युमत्तमानि विश्वप्रकाशकानि । कीदृशस्याग्नेः सुप्रतीकस्य सुष्ठु प्रतीकं मुखं यस्य । तथा सूनोः यजमानपुत्रस्य स यदेनं जनयति तेनास्यैष सूनुरिति श्रुतेः । य ईदृशस्तं स्तुम इति शेषः ॥ ११ ॥

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथोऽअनक्तु मधा घृतेन ॥१२॥

देवोऽग्निः मधा मधुना मधुरेण घृतेन पथो यज्ञमार्गाननक्तु । मधेति नुमभावः अनित्यमागमशासनमित्युक्तेः । पथोऽनक्तु इत्यत्र प्रकृत्यान्तःपादमव्यपरऽइति [पा° ६.१.११५.] संध्यभावः । यज्ञे बद्ध घृतमस्तु येन मार्गा घृताभ्यक्ताः स्युरितिभावः । कीदृशो देवः तनूनपात् तनूनामपां नपात् पौत्रः अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरिति अपां पौत्रः । असुरः असवोऽस्य सन्ति प्राणवान् रो मत्वर्थः । विश्ववेदाः सर्वधनः । देवेषु अपि देवः दीप्तिमान् श्रेष्ठः ॥१२॥

मधा यज्ञं नक्षसे प्रीणानो नराशꣳसोऽअग्ने ।

सुकृद्देवः सविता विश्ववारः ॥१३॥

हे अग्ने त्वं मधा स्वादुना घृतेन यज्ञं नक्षसे व्याप्नोषि नक्षतिर्व्याप्तिकर्मा । कीदृशस्त्वम् प्रीणानः प्रीणीते प्रीणानः देवान् तर्पयन् । नराशंसः नरैर्ऋत्विग्भिराशंस्यते स्तूयते नराशंसः । सुकृत् शोभनकारी । देवः दीप्तिमान् । सविता विश्वस्योत्पादकः । विश्वेन व्रियते सेव्यते विश्ववारः विश्वं वृणोति अङ्गीकरोतीति वा कर्मण्यण् सर्वस्य वरणीयः सर्वाङ्गीकर्ता वा ॥१३॥

अक्षायमेति शवसा घृतेनेडानो वक्ष्निमसा ।

अग्निꣳ सुचोऽअध्वरेषु प्रयत्सु ॥१४॥

अयमध्वर्युः अध्वरेषु प्रयत्सु वर्तमानेषु सत्सु अग्निमक्ष एति अभ्येति अक्षभिराप्तुमिति शाकपूणिः [निरु° ५.२८.] । कीदृशः शवसा ज्ञानबलेन ईडानः इड स्तुतौ शानच् तथा वक्ष्निः वक्ति यज्ञभारमिति वक्ष्निः यज्ञनिर्वाहकः । किं कृत्वा घृतेन नमसा अन्नेन हविर्लक्षणेनोपलक्षिताः सुचो स्रुक्स्रुवा गृहीत्वेति शेषः ॥१४॥

स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः ।

वसुश्चेतिष्ठो वसुधातमश्च ॥१५॥

सोऽध्वर्युरस्याग्नेः महिमानं यक्षत् यजतु सिब्बहुलं लेटि [पा° ३.१.३४.] लेटोऽडाटौ इतश्च लोपः परस्मैपदेषिति [पा° ३.४.१४.१७.] सूत्रैर्यक्षदिति रूपम् । सः

ईम् स च मन्द्रा मन्द्राणि मदजनकानि हवींषि च यजतु ददातु । कीदृशस्याग्नेः सुप्रयसः प्रयस् इत्यन्ननाम [निघ० २.७.] शोभनानि प्रयांसि यस्य सुप्रयास्तस्य । कीदृशस्याग्नेर्महिमानं यजतु यो वसुः वासयिता । चेतिष्ठः अतिचेतयिता वसुधातमः वसूनां धनानां दातृतमः त्रिबर्हात्तमप् ॥ १५ ॥

द्वारो॑ दे॒वीर॒न्वस्य॒ विश्वे॑ व्र॒ता द॑दन्ते॒ऽअग्नेः॑ ।
उ॒रु॒व्यच॑सो॒ धाम्ना॑ पत्य॑मानाः ॥ १६ ॥

द्वारो देव्योऽस्याग्नेर्व्रता व्रतानि कर्माणि ददन्ते धारयन्ति दद दाने धृतौ च । अनु पश्चात् विश्वे सर्वे देवाः अग्निव्रतानि ददन्ते । कीदृश्यो द्वारः उरुव्यचसः उरु विशालं व्यचोऽवकाशो यासां ताः विशालान्तराः । तथा धाम्ना स्थानेन पत्यमानाः पत ऐश्वर्ये दिवादिरात्मनेपदी पत्यते ईशते ताः पत्यमानाः स्थानैरैश्वर्यं कुर्वाणाः ऋत्विजां स्थानानि ददाना इत्यर्थः ताः स्तुमः ॥ १६ ॥

ते॒ऽअ॑स्य योष॑णे दि॒व्ये न योना॑ऽउषासान॒क्ता । इ॒मं य॒ज्ञम॑वतामध्व॒रं नः ॥ १७ ॥

उषाश्च नक्ता रात्रिश्च उषासानक्ता उषस उषासदिशो द्वन्द्वे ते प्रसिद्धे उषासानक्ता अहोरात्रिदेव्यौ नोऽस्माकमिमं यज्ञमवतां रक्षताम् । कीदृश्यौ ते अस्याग्नेः योषणे भार्ये । तथा दिव्ये दिवि भवे स्वर्गस्थे । कीदृशस्याग्नेः योनौ गार्हपत्यस्थाने स्थितस्येति शेषः नकारः पादपूरणः । कीदृशं यज्ञम् अधरम् धृ कौटिल्ये न धरतीत्यधरस्तम् अकुटिलम् शास्त्रोक्तमित्यर्थः ॥ १७ ॥

दैव्या॑ होतारा॒ऽऊ॒र्ध्वमध्व॑रं नो॒ऽग्नेर्जि॒ह्वाम॑भिगृणीतम् ।
कृ॒णु॒तं नः॒ स्विष्टि॑म् ॥ १८ ॥

अयं चाग्निरसौ च मध्यमो वायुः हे दैव्या होतारौ अग्निवायू युवां नोऽस्माकं स्विष्टिं शोभनं यज्ञं कृणुतं कुरुतम् किं च नोऽस्माकमध्वरं यज्ञमूर्ध्वं कृणुतं देवमार्गगामिनं कुरुतम् । अग्नेर्जिह्वां ज्वालामभिगृणीतं वर्णयतम् समीची वह्निज्वालेति स्तुतमित्यर्थः ॥ १८ ॥

ति॒स्रो दे॒वीर्ब॒र्हिरेदꣳ स॑दन्त्विडा॒ सर॑स्वती भार॒ती । म॒ही गृ॑णा॒ना ॥ १९ ॥

तिस्रो देव्यः इदं बर्हिरासदन्तु आसीदन्तु ह्वान्दसः सीदादेशाभावः व्यवहिताश्चेति [पा° १.४.८२.] आङा सह क्रियापदव्यवधानम् । कास्ता अत आह इडा पृथिवीस्थाना सरस्वती मध्यस्थाना भारती द्युस्थाना । महो महती गृणाना स्तुवन्तीति विशेषणद्वयं तिसृणाम् ॥११॥

तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । रायस्पोषं विष्यतु नाभिमस्मे ॥२०॥

त्वष्टा देवः तं प्रसिद्धं रायो धनस्य पोषं पुष्टिमस्मे अस्माकं नाभिं प्रति विष्यतु विमुञ्चतु नाभौ मुक्तमुत्सङ्गे पतनीति भावः षोऽन्तकर्मणि श्नातः श्यनीति [पा° ७.३.७१.] ओकारलोपः स्यतिरुपसृष्टो विमोचने इति यास्कः । कीदृशं रायः पोषम् नोऽस्माकं तुरीपम् तुरा वेगेन आप्नोति तुरीपं शीघ्रप्रापकम् । अद्भुतं महान्तम् । पुरुक्षु पुरुषु वक्षसु क्षियति निवसति पुरुक्षु सुपां सुलुगिति [पा° ७.१.३९.] अमो लुक् क्षियतेरौणादिको डुप्रत्ययः । सुवीर्यं साधु वीर्यं सामर्थ्यं येन तम् । ईदृशं धनं देहीत्यर्थः ॥२०॥

वनस्पतेऽवसृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ॥२१॥

अग्निः शमिता हव्यं सूदयाति सूदयति संस्करोति यतः अतो हे वनस्पते तत्संस्कृतं हव्यमवसृज सुश्रुवतोऽवाचीनां क्षिप । कीदृशस्त्वम् त्मना आत्मना देवेषु रराणः हविर्ददानः रा दाने कानच् । मन्क्रेघाञ्भ्यादेरात्मन इति [पा° ६.४.१४१.] आत्वलोपः ॥२१॥

अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् ।

विश्वे देवा हविरिदं जुषन्ताम् ॥२२॥

हे अग्ने हे जातवेदः जातप्रज्ञान हव्यमिन्द्राय स्वाहा कृणुहि स्वाहाकारेण प्रयच्छ । किं च विश्वे देवा इदं हविर्जुषन्तां सेवन्ताम् ॥२२॥

III. पीवोऽअन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।

ते वायवे समनसो वितस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥२३॥

अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते इति श्रुतस्य (5.) पशोः पीवो-

ऽअन्ना रयिवृध इत्याद्याः षट् याज्यानुवाक्याः । द्वे वायुदेवत्ये त्रिष्टुभौ वसिष्ठदृष्टे । शुक्रो हि वायुरिति श्रुतेः श्वेतो वायुः यान्नियुतोऽश्वान् सिषक्ति सेवते ते नियुतः समनसः सममनस्काः सन्तो वायवेऽर्थाय वितस्थुर्विशेषेण तिष्ठन्ति । कीदृशान्नियुतः पीवोऽअन्ना पीवः पुष्टमन्नं येषां तान् नकारलोपः प्रकृत्यान्तःपादमिति [पा° ६.१.११५.] पीवोऽअन्नानित्यत्र संध्यभावः । तथा रयिवृधः रयिं धनं वर्धयन्ति तान् । कीदृशः श्वेतः सुमेधा शोभना मेधा बुद्धिर्यस्य । नियुतामभिश्रीः अश्वानामाश्रयणीयः । एवमश्वयोगे वायुना कृते नरो मनुष्या ऋविज्ञः विश्वा इत् विश्वानि सर्वाण्येव स्वपत्यानि शोभनापत्यप्रापकानि चक्रुः कर्माणीति शेषः ॥२३॥

रयिं नु यं जज्ञतू रोदसीमे रयिं देवी धिषणा धाति देवम् ।
अधं वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥२४॥

इमे रोदसी द्यावापृथिव्यौ यं वायुं जज्ञतुः उत्पादयामासतुः नु क्षिप्रम् किमर्थम् रयिं धनायोदकरूपाय । धियं सनोति ददाति धिषणा वाक् देवी देवं वायुं धाति धारयति शपो लुक् रयिं धनाय । रोदस्योः सद्भावेऽपि वायुं विना जगद्धारणाशक्तेर्वायुरुत्पादितः । धिषणेति ह्रस्वमार्षम् । अध अथ उत्पत्त्यनन्तरमेव उत निश्चितं स्वा नियुतो निजाश्वा वायुं सश्चत सश्चन्ते सेवन्ते षच् सेवने पुरुषव्यत्ययः । क्व निरेके निर्गतः रेकः रेचनं रेकः शून्यता यस्मात् तादृशे बहुजनाकीर्णे स्थाने । कीदृशं वायुं श्वेतं श्वेतवर्णम् । तथा वसुधितिं वसुनो धनस्य धितिर्धारणं यत्र तम् धनस्य धारयितारम् ॥२४॥

आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानाꣳ समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥२५॥

द्वे प्रजापतिदेवत्ये त्रिष्टुभौ हिरण्यदृष्टे प्रथमा द्व्यधिका । आपो ह वाऽइदमग्रे सलिलमेवासेति [११.१.६.१.] ब्राह्मणमेतयोः कण्डिकयोर्निदानभूतं बोध्यम् । ह प्रसिद्धौ यत् यदा पुरा आपो जलानि विश्वमायन् प्रापुः । कीदृश्य आपः बृहतीः बृहत्यो महत्यः बहुलाः । तथा गर्भं हिरण्यगर्भलक्षणं दधानाः

धारयत्यः अत एवाग्निं जनयन्तीः अग्निरूपं हिरण्यगर्भं जनयत्यः उत्पादयिष्यत्यः । ततो गर्भात् संवत्सरोषितात् देवानामसुः प्राणरूप आत्मा लिङ्गशरीररूपो हिरण्यगर्भः समवर्तत उदपद्यत । कस्मै प्रजापतिरूपाय देवाय हिरण्यगर्भाय हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः विधतिर्दानार्थः ॥ २५ ॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥ २६ ॥

चिदप्यर्थः यो देवोऽन्तर्यामी महिम्ना (6.) आपः विभक्तिव्यत्ययः अपः पूर्वोक्ताः पर्यपश्यत् सर्वतो ददर्श । कीदृशीः दक्षं कुशलं प्रजापतिं दधानाः । यज्ञं जनयन्तीः यज्ञशब्देन यज्ञकर्त्री प्रजा उच्यते सृष्टिकर्त्रीरित्यर्थः । यश्च देवेषु अधिकः एको मुख्यो देव आसीत् । तस्मै देवाय हविर्दद्मः ॥ २६ ॥

प्र यामिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिꣳ सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ २७ ॥

हे वायुदेवत्ये त्रिष्टुभौ वसिष्ठदृष्टे । हे वायो त्वं यामिर्नियुद्भिरश्वाभिः कृत्वा इष्टये यागाय दुरोणे यज्ञगृहे वर्तमानं दाश्वांसं हविर्दत्तवन्तं यजमानमच्छ अभिमुखं प्रयासि गच्छसि निपातस्य चेति [पा° ६.३.१३६.] संहितायामच्छा इति दीर्घः व्यवहिताश्चेति [पा° १.४.८२.] प्रेण यासीत्यस्य व्यवधानं तामिर्नियुद्भिरागत्य नोऽस्मभ्यं रयिं धनं नियुवस्व देहि नियौतिर्दानार्थः व्यत्ययेन शप्रत्ययः । कीदृशं रयिं सुभोजसं सुष्ठु भुज्यतऽइति सुभोजास्तम् भुजेरसुन्प्रत्ययः । किं च वीरं पुत्रं गव्यं गोसम्बन्धि अश्व्यमश्वसम्बन्धि गोऽश्वरूपं राधः धनं च नियुवस्व ॥ २७ ॥

आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायोऽअस्मित्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २८ ॥

हे वायो नियुद्भिरश्वाभिः नोऽस्माकमध्वरं यज्ञमुपयाहि । कीदृशीभिः शतिनीभिः सहस्रिणीभिः शतं सहस्रं च संख्या यासां ताभिः वयं बहुवाहनतर्पणे शक्ता इति भावः । एत्य चास्मिन् सवने तृतीये मादयस्व तृप्यस्व । अथ पादेन

ऋत्विज आहु हे ऋत्विजः स्वस्तिभिः कल्याणैर्यूयं नोऽस्मान्यात रक्षत ॥ २८ ॥

नियुत्वान्वायवाग॰ह्यय॰ शुक्रोऽअयामि ते । गन्तासि सुन्वतो गृहम् ॥ २९ ॥

षट्चो वायुदेवत्याः वायव्येष्टकापशुपत्नी वपादीनां याज्यानुवाक्यावेन नियुत्ताः आद्या गायत्री गृत्समददृष्टा । हे वायो यतः सुन्वतो यजमानस्य गृहं प्रति त्वं गन्ता गमनशीलोऽसि तस्मात आद्युदात्तत्वात् अतो नियुत्वानश्वावान् सन् आगहि आगच्छ शपो लुक् । अयं शुक्रो ग्रहः ते त्वां प्रति अयामि अयतु प्राप्नोतु लकारपुरुषव्यत्ययः (7.) । शुक्रादिग्रहाणां पात्रं त्वमेवेति भावः ॥ २९ ॥

वायो शुक्रोऽअयामि ते मधोऽअग्रं दिविष्टिषु ।

आयाहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ३० ॥

अनुष्टुप् पुरुमीढाजमीढदृष्टा हे वायो शुक्रो ग्रहः त्वामयामि आगच्छतु । कीदृशः शुक्रः दिविष्टिषु मधः अग्रं याच्यते प्रार्थ्यते याभिस्ता दिविष्टयो यज्ञाः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्युक्तेः मधः मधुनो रसस्याग्रं सारभूतः यज्ञरसेषु शुक्रो ग्रहः सारभूत इत्यर्थः । किं च हे देव वायो नियुत्वता अश्वावता रथेन आयाहि आगच्छ किमर्थं सोमपीतये सोमपानाय कीदृशस्त्वं स्पार्हः स्पृहायोग्यः यजमानादिभिः स्पृहणीयः ॥ ३० ॥

वायुरयेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ॥ ३१ ॥

द्वे गायत्र्यौ । वायुः शिवाभिः कल्याणरूपाभिः नियुद्भिरश्वाभिः कृत्वा मनसा साकं चित्तेन सह सादरं यज्ञं गन् गच्छतु । कीदृशः अयेगाः अग्रे गच्छत्ययेगाः विट्नोरनुनासिकस्यादिति [पा॰ ६. ४. ४१.] आकारः । यज्ञप्रीः यज्ञेन प्रीयते तुष्यति यज्ञप्रीः । शिवः कल्याणकरः ॥ ३१ ॥

वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥ ३२ ॥

हे वायो ये ते तव सहस्रिणः सहस्रसंख्याका रथासः रथाः तेभिस्तैः रथैः आगहि आगच्छ किमर्थं सोमपानाय । कीदृशस्त्वं नियुत्वान् अश्वायुक्तः नियुतो वायोरित्युक्तेः [निघ॰ १. १५.] ॥ ३२ ॥

एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च ।
तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता विमुञ्च ॥ ३३ ॥

त्रिष्टुप् अनयर्चा पात्राणि मुच्यन्ते । स्वा निजा भूतिः समृद्धिर्ऐश्वरूपा यस्य स स्वभूतिः हे स्वभूते हे वायो एकया दशभिः द्वाभ्यां विंशती विंशत्या पूर्वसवर्णः तिसृभिः त्रिंशता च नियुद्भिः अश्वाभिः कृत्वा इष्टये यज्ञाय त्वं यानि पात्राणि वहसे ता तानि पात्राणि इह यज्ञे विमुञ्च । पञ्च चकाराः समुच्चयार्थाः ॥ ३३ ॥

तवं वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवाꣳस्यावृणीमहे ॥ ३४ ॥

गायत्री व्यश्वदृष्टा । हे वायो हे ऋतस्पते सत्यस्य पालक ऋतस्य पतिपरे सुडागमः । हे त्वष्टुर्जामातः आदित्यादप आदाय वायुर्गर्भयति ततो वृष्टिर्भवतीति वायुरादित्यस्य जामाता । हे अद्भुत आश्चर्यरूप तवावांसि अन्नानि वयमावृणीमहे प्रार्थयामः ॥ ३४ ॥

IV. अभि त्वा शूर नोनुमोऽदुग्धा-इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ३५ ॥

बृहतीसतोबृहतीद्वयं प्रगाथं वसिष्ठदृष्टमिन्द्रदेवत्यम् । रथन्तरं दक्षिणे पक्षे इति श्रुतेः । नान्योऽधर्यौगायेदित्यधर्यौगानं विहितम् । अतः साम्नां योनय ऋचः पठ्यन्ते तत्रेन्द्रः प्रगाथो रथन्तरस्य योनिः । हे शूर हे इन्द्र वयं त्वा त्वामभिनोनुमः आभिमुख्येनात्यन्तं स्तुमः नु स्तुतौ यङ्लुगन्तम् । तत्र दृष्टान्तः अदुग्धाः धेनवः इव यथा अदुग्धा गावो वत्सान्स्तुवन्ति । कीदृशं त्वाम् जगतो जङ्गमस्येशानं प्रभुम् स्वर्दृशं स्वः पश्यतीति स्वर्दृक् तम् यद्वा स्वः आदित्य-इव दृश्यते स्वर्दृक् तस्थुषः स्थावरस्य ईशानम् विश्वनियन्तारमित्यर्थः ॥ ३५ ॥

न त्वावाँ२॥ऽअन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ३६ ॥

हे मघवन् धनवन् हे इन्द्र दिवि भवो दिव्यः पार्थिवः पृथिवीभवश्च त्वावान् त्वत्सदृशोऽन्यो नास्तीति शेषः न च जातः न जनिष्यते उत्पत्स्यते । त्वत्सदृशो

ऽस्तीति त्वावान् सादृश्यार्थे वतुप्रत्ययः । अतो वयं त्वा त्वां हवामहे । कीदृशा वयम् अश्वायन्तः अश्वान्कामयमानाः अश्वाघस्यादिति [पा° ७.४.३७.] क्यचि आत्वम् ततः शतृप्रत्ययः । वाजिनोऽन्नवन्तः हविर्युताः । गव्यन्तः गा इच्छन्ति गव्यन्तः गोकामाः । गवाश्वान्देहीत्यर्थः ॥३६॥

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥३७॥

ऋग्द्वयमैन्द्रः प्रगाथः शम्युदृष्टः बृहत्साम्नो योनिः अर्धर्गानस्योक्तिः आद्या बृहती द्वितीया सतोबृहती बृहदुत्तरे पत्ने इति श्रुतेः । हे इन्द्र कारवः कर्तारः यज्ञानाम् नरः ऋत्विजो वयं त्वामेव हवामहे आह्वयामः इत् एवार्थे हि निश्चये । किंनिमित्तम् वाजस्यान्नस्य सातौ लाभनिमित्तम् वृत्रेषु शत्रुषु शत्रुघातनिमित्तम् काष्ठासु दिक्षु दिग्विजयनिमित्तम् । कीदृशं त्वां सत्पतिं सतां पालयितारम् श्रुतिस्मृत्युक्ताचाररता निषिद्धत्यागिनः सन्तः कथयन्ति । तथा अर्वतः अश्वप्राप्तिनिमित्तं च विभक्तिव्यत्ययः । त्वांशब्दावृत्तिरादरार्था ॥३७॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानोऽद्रिवः ।
गामश्वं रथ्यमिन्द्र संकिर सत्रा वाजं न जिग्युषे ॥३८॥

हे चित्र आश्चर्यकारिन् हे वज्रहस्त वज्रं हस्ते यस्य हे अद्रिवः अद्रयोऽस्त्रेयत्वेन सन्तीत्यद्रिवान् तत्सम्बुद्धिः मतुवसोरिति [पा° ८.३.१.] रुत्वम् हे इन्द्र स त्वं नोऽस्मभ्यं गामश्वं च संकिर देहि सम्पूर्वः किरतिर्दानार्थः । कीदृशमश्वम् रथ्यं रथे साधुं रथवहनसमर्थम् । कीदृशस्त्वम् धृष्णुया प्रागल्भ्येन महः महसा तेजसा च स्तवानः स्तूयमानः । धृषेः क्नुः ततो विभक्तेर्यादेशः धृष्णुना धृष्णुत्वेन भावप्रधानो निर्देशः । महः विभक्तिलोपः । स्तवान इत्यत्र विकरणव्यत्ययः । कथमिव वाजं न वाजमिव न इवार्थे यथा जिग्युषे जितवतेऽश्वाय हस्तिने वा यथा सत्रा त्राणं त्रा रक्षणम् तत्सहितं वाजमन्नं यवं यथा ददति तथास्मभ्यं देहि ॥३८॥

कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥३९॥

तिस्रो गायत्र्य इन्द्रदेवत्या वामदेवदृष्टाः वामदेव्यसाम्नो योनिः वामदेव्यमात्मन्निति श्रुतेः अत्र्या पादनिचृत् (8.) सप्ताक्षरत्रिपादा । पूर्वऽर्चः (9.) इन्द्रपदमनुषञ्जनीयम् । इन्द्रः कया ऊती ऊत्या अवनेन तर्पणेन प्रीणनेन वा नोऽस्माकं सखा सहायः आभुवत् आभिमुख्येन भवति । तया वृता वर्ततऽइति वृत् तया वृता वर्तमानया शचिष्ठया अतिशयेन शची शचिष्ठा तया अतिशयवत्या यागक्रियया अस्माकं सखा भवति । शचीति कर्मनाम तत इष्ठन्प्रत्ययः । कीदृश इन्द्रः चित्रः विचित्रः पूज्यो वा । सदावृधः सदा वर्धतऽइति सदावृधः इगुपधेति [पा° ३.१.१३५.] कप्रत्ययः सदा वर्धमानः । ऊती तृतीयैकवचनस्य सुपां सुलुगिति [पा° ७.१.३९.] पूर्वसवर्णः । आभुवत् इतश्च लोपः परस्मैपदेषिति [पा° ३.४.१७.] तिप इलोपः शपश्छान्दसे डिच्वे धातोरुवङादेशः [पा° ६.४.७७.] ॥३९॥

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥४०॥

हे इन्द्र अन्धसोऽन्नस्य सोमरूपस्य कः अंशः त्वा त्वां मत्सत् माद्यति मत्तं करोति मदी हर्षे लेटोऽडाटाविति [पा° ३.४.९४.] अडागमः सिब्बहुलं लेटीति [पा° ३.१.३४.] सिप्प्रत्ययः तिप इलोपः । कीदृशः मदानां मंहिष्ठः (10.) मदयन्ति तानि मदानि पचाद्यच् मदजनकानि हवींषि तेषां मध्ये मंहिष्ठः श्रेष्ठः अत्यन्तमदजनकः मंहि कान्तौ चुरादिः मंहयति द्योतते मंही अत्यन्तं मंही मंहिष्ठः यद्वा मंहि वृद्धौ भ्वादिः मंहते वर्धते मंही अत्यन्तं मंही मंहिष्ठः । येनांशेन मत्तः सन् दृढा चित् दृढान्यपि वसु वसूनि धनानि कनकादीनि त्वमारुजे रुजो भङ्गे पुरुषपदव्यत्ययः आरुजसि चूर्णयसि दातुं भनक्षि भङ्क्त्वा-भङ्क्त्वा ददासीत्यर्थः ॥४०॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥४१॥

हे इन्द्र त्वमूतयेऽवनाय पालनाय सु सुष्ठु सम्यक् अभि आभिमुख्येन शतं भवासि भवसि आडागमः. शतशब्दो बहुवाची बहुरूपो भवसि पालनाय नानारूपाणि दधासीत्यर्थः । कीदृशस्त्वम् सखीनां मित्राणां जरितॄणां स्तोतॄणां नो ऽस्माकमृत्विजामविता पालयिता । संहितायामभीत्यस्य दीर्घः । सुञ इति [पा°

८.३.१०७.] सुशब्दस्य षत्वम् । नश्च धातुस्थोरुषुभ्य इति [पा° ८.४.२७.] पुशब्दात्परस्य नः ण्त्वस्य णत्वम् ॥४१॥

यज्ञा-यज्ञा वोऽअग्नये गिरा-गिरा च दक्षसे ।
प्र-प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥४२॥

तृचः प्रगाथः अग्नेयः शम्युदृष्टः यज्ञायज्ञियस्य साम्नो योनिः । यज्ञायज्ञियं पुरुमिति श्रुतेः । द्वे बृहत्यौ तृतीया सतोबृहती । यज्ञा-यज्ञा वीप्सायां द्विवम् सप्तम्येकवचनस्याकारः । व इति द्वितीयावद्भवचनमेकवचनार्थे यजमानविषयं वा । अग्नये चतुर्थ्येकवचनं द्वितीयैकवचनार्थे । गिरा-गिरा वीप्सायां द्विवम् । चः पादपूरणः । दक्षसे चतुर्थी द्वितीयार्थे । प्र-प्र समुपोदः पादपूरणऽइति [पा° ८.१.६.] द्विवम् तस्य च शंसिषमिति क्रियया सम्बन्धः । वयमिति प्रथमावद्भवचनमेकवचनार्थे । तथा चैव योजना । यज्ञे यज्ञेऽनेकयज्ञेषु गिरा-गिरान्यान्यया स्तुत्या वः त्वाम् यद्वा वो युष्माकमर्थे अग्निं प्रशंसिषं स्तौमि शंस स्तुतौ लुङ् अडभाव आर्षः । कीदृशमग्निं दक्षसम् दक्षतेरुत्साहार्थस्य धातोरसुन्प्रत्ययः दक्षते उत्सहते दक्षाः तम् उत्साहिनम् यद्वा दक्ष इति बलनाम अत्तर्नीतिमत्वर्थे द्रष्टव्यम् दक्षसं बलवन्तम् । अमृतममरणधर्माणम् । जातवेदसम् जाते वेदो ज्ञानं धनं वा यस्मात्तम् । प्रियं प्रीतिजनकम् । नशब्द उपरिष्टादुपचाराद्उपमार्थीयः मित्रं न मित्रमिव यथा कश्चित्प्रियं मित्रं स्तौति तद्वदग्निं स्तुमऽइत्याशास्महे ॥४२॥

पाहि नोऽअग्नऽएकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो. ॥४३॥

भर्गदृष्टा । हे अग्ने हे ऊर्जां पते अन्नानां पालक हे वसो वासयितः यद्वा लुप्तमत्वर्थं द्रष्टव्यम् हे वसो वसुमन् धनवन् एकया गिरा इति पदस्यानुषङ्गः एकया गिरा ऋग्लक्षणया तृतीयानिर्देशात्स्तुतः सन्निति वाक्यशेषः नोऽस्मान्पाहि रक्ष । उत अपि च द्वितीयया यजुर्लक्षणया स्तुतः सन् पाहि । तिसृभिर्गीर्भिः ऋग्यजुःसामलक्षणाभिः स्तुतो नः पाहि । चतसृभिः ऋग्यजुःसामनिगदलक्षणाभिः स्तुतो नः पाहि गद्यपद्यकाव्यादिरूपा चतुर्थी गीः ॥४३॥

ऊर्जो नपात्ँ स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृधऽउत त्राता तनूनाम् ॥४४॥

यज्ञमानोऽध्वर्युं प्रार्थयते । हे अध्वर्यो ऊर्जो नपातमपां पौत्रमग्निं स त्वं हिन हिनु तर्पय (11.) हि गतौ वृद्धौ स्वादिः लोट् उलोपश्छान्दसः ऊर्क्शब्देनाप उच्यन्ते अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः । यतोऽयमग्निरस्मयुः अस्मानिच्छति अस्मयुः क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः अतो हव्यदातये हविषो दानाय दाशेम संकल्पयामः दाशृ दाने अत्र संकल्पार्थः । यतोऽयं वाजेषन्नेषु अविता रक्षिता भुवत् भवति वृधे वृद्धौ च भुवत् भवति उतापि च तनूनां शरीराणां त्राता रक्षिता भवति बहुवचनं भार्यादिशरीररक्षार्थमुपात्तम् । अग्निरन्नतनुरक्षिता वर्धयितास्मान्कामयतेऽतो हविर्दानाय तं संकल्पयामः ॥४४॥

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीदत्सरोऽसि वत्सरोऽसि ।
उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ संवत्सरस्ते कल्पताम् ।
प्रेत्याऽएत्यै सं चाञ्च प्र च सारय ।
सुपर्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीद ॥४५॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां सप्तविंशोऽध्यायः ॥२७॥ ॥

अग्निर्देवत्यं यजुः अत्र यजुषि नवनवत्यक्षराणि एको व्यूहः ततः शताक्षराभिकृतिश्छन्दः । चित्याग्निरभिमर्शने विनियोगः । पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिमिति [ज्यो° १.१.] ज्योतिःशास्त्रोक्तमिहोच्यते । हे अग्ने त्वं संवत्सरोऽसि परिवत्सरोऽसि इदावत्सरोऽसि इदत्सरोऽसि वत्सरोऽसि निर्विशेषणाः पञ्चसंवत्सरात्मकयुगरूपोऽसीत्यर्थः युगं भवेदत्सरपञ्चकेनेति (12.) ज्योतिःशास्त्रोक्तेः । तस्य ते तव उषसः प्रातःकालादयः कालविशेषाः संगवमध्याह्नादयः अहोरात्राः दिवसनिशाः अर्धमासाः पक्षाः मासाश्चैत्रादयः ऋतवो वसन्तादयः कल्पन्तामवयवत्वेन कल्पा भवन्तु । संवत्सरश्च उपलक्षणम् संवत्सरादयः पञ्चापि कल्पन्ताम् ।

क्रियावृत्तिरादरार्था । किं च प्रेत्यै प्रगमनाय एत्यै आगमनाय च समञ्च संकुच प्रसारय च स्वेच्छया संकोचविकासौ कुर्विति भावः । किं च सुपर्णाकारेण चित-त्वात्सुपर्णाचिदसि । तया देवतया वाचा सहितः सन् अङ्गिरस्वत् अङ्गिरस-इव प्राणा-इव ध्रुवः स्थिरः सीद तिष्ठ ॥४५॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । सप्तविंशोऽयमध्याय आग्निको विरतो ऽधुना ॥२७॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-६ [सुरुवीरꣳ रꣳ°] ॥१-६॥ ७ [विराळग्ने - शिवाभिरꣳय -] - १० ॥७-१०॥ ॥

II. ॥ ११-१४ [घृतेन । ईलानो] - १५ [इला] - २० [सुवीरम् ।] - २२ ॥११-२२॥ ॥

III. ॥ २३. २४ ॥२३. २४॥ ३१ ॥२५॥ २७ [वायऽइष्टये] ॥२६॥ ३२ ॥२७॥ ३३ [वायऽइह] ॥२८॥ २९ [वायऽआगं°] ॥२९॥ ३० ॥३०॥ २८ ॥३१॥ ३४ [वायऽऋतस्पते] ॥३२॥ ॥

IV. ॥ हिरण्यगर्भः [१३.४] । येन द्यौरुग्रा [३२.६] ॥३३॥ यं क्रन्दसी [३२. ७] ॥३४॥ २५ ॥३५॥ २६ । मा मा हिꣳसी° [२७.१०२.] । प्रजापते न [२३.६५. - विश्वा जातानि -] ॥३६॥ ॥

V. ॥ अग्नऽआयूꣳषि [११.३८.] ॥३७॥ अग्ने पवस्व [८.३८ a] ॥३८॥ अ-ग्निर्ऋषिः [२६.१ a] ॥३९॥ ३५-४२ ॥४०-४७॥ ४४ ॥४८॥ ॥

VI. ॥ ४५ - °रस्ते कल्पताम् ॥४९॥ ४५ प्रेत्याऽएत्यै - सीद ॥५०॥ ॥

षल्लनुवाकेषु पञ्चाशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायामेकोनत्रिंशोऽध्यायः ॥२९॥ ॥

I. होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्या अधि ।

दिवो वर्ष्मन्त्समिध्यतऽओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ॥ १ ॥

श्रीगणेशाय नमः । इन्द्रमिडः सौत्रामणिकोऽध्याय इति कात्यायनोक्तेः [अनुक्रमण्याम्] अयमध्यायः सौत्रामणीसम्बन्धी सौत्रामण्यङ्गभूतयोरिन्द्रवायोधसयोराग्यत्तपश्वोः प्रयाजानुयाजप्रैषरूपः ततश्च प्रजापत्यश्विसरस्वत्योऽध्यायस्य ऋषयः । आग्नेऽनुवाके एकादशैन्द्रपशोः सम्बन्धिन आप्रीदेवताः समित्तनूनपादित्यादिदेवताकाः प्रयाजानां प्रैषाः होता यक्षत्समिधेन्द्रमित्यादयो होता यक्षदिन्द्रमित्यन्ताः [कं० ११.] । अथ मन्त्रार्थः आर्षी त्रिष्टुप् । दैव्यो होता समिधा समित्काष्ठेन हविर्भूतेन समिधाप्रीदेवतया सहितं वा इन्द्रं यक्षत् यजतु । य इन्द्रः त्रिषु स्थानेषु समिध्यते दीप्यते प्रथमम् इडः पृथिव्याः पदे यज्ञनीये प्रदेशे अग्न्यात्मना समिध्यते । द्वितीयम् पृथिव्याः नाभौ पृथिवीशब्देनान्तरिक्षम् अन्तरिक्षस्य मध्ये विद्युदात्मना समिध्यते अधि उपरि । तृतीयम् दिवो वर्ष्मन् स्वर्गस्य वर्ष्मणि वर्षिष्ठे प्रदेशे आदित्यात्मना समिध्यते । कीदृशः चर्षणिसहामोजिष्ठः चर्षणयो मनुष्यास्तान्सहते ऽभिभवति चर्षणिसहो मनुष्याभिभावुकास्तेषां मध्ये ओजस्वितमः अत्यन्तमोजस्वी ओजिष्ठः इष्ठनि परे विन्मतोर्लुगिति [पा० ५.३.६५.] विनो लुकि ठिलोपे ओजिष्ठ इति रूपम् । संहितायां चर्षणिशब्दस्य दीर्घः । एवंविध इन्द्रः आज्यस्य वेतु घृतं पिबतु । हे मनुष्यहोतः त्वमपि यज्ञ ॥ १ ॥

होता यक्षत्तनूनपातमूतिभिर्नेतारमपराजितम् ।
इन्द्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यं० ॥ २ ॥

अतिजगती । नराशंसेन देवेन युतं तनूनपातमिन्द्रं च देवं होता यजतु कैः पथिभिः पतन्ति गच्छन्ति स्वर्गं यजमाना यैस्ते पन्थानो हवींषि तैः । कीदृशैः ऊतिभिः अवन्ति तर्पयन्ति ते ऊतयस्तैः ऊतियूतीत्यादिना [पा० ३.३.९७.] कर्तरि निपातः तथा मधुमत्तमैः मधुर्मधुरस्वादोऽस्ति येषु ते मधुमन्तः अत्यन्तं मधुमन्तो मधुमत्तमाः तैः । कीदृशमिन्द्रं नेतारं शत्रूणाम् अपराजितं केनापि न पराभूतम् स्वर्विदं स्वः स्वर्गं वेत्ति स्वीयं जानाति स्वर्वित् यद्वा स्वः स्वर्गे विद्यते स्वर्वित्तम् विद् सत्तायाम् । कीदृशेन नराशंसेन तेजसा तेजस्विना । एवं देवद्वययुत

इन्द्रः आज्यस्य वेतु । शेषं पूर्ववत् । अत्र तनूनपान्नराशंसावेकत्र प्रयाजे पठिताविति उभयवानयं प्रयाजः ॥ २ ॥

होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरंदरो वेत्वाज्यं० ॥ ३ ॥

ब्राह्मी उष्णिक् । होता इडाभिः प्रयाजदेवताभिः सह इन्द्रं यजतु । कीदृशमिन्द्रम् ईडितम् ऋत्विग्भिः स्तुतम् आजुह्वानमाह्वयमानम् यजमानैः देवानाह्वयन्तं वा । अमर्त्यममरणधर्माणम् । ईदृशो देव इन्द्रः आज्यस्य वेतु कीदृशो देवः सवीर्यः समानं वीर्यं यस्य सः सर्वदेवेषु यादृशं वीर्यं तदेकस्मिन्निन्द्रे इत्यर्थः । वज्रहस्तः वज्रं हस्ते यस्य । पुरंदरः पुरं शत्रूणां नगरं दारयति पुरंदरः । उक्तमन्यत् ॥ ३ ॥

होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यं० ॥ ४ ॥

आर्षी त्रिष्टुप् । बर्हिषि प्रयाजदेवतायां स्थितमिन्द्रं होता यजतु कीदृशमिन्द्रं निषद्वरं निषीदन्ति निषद् उपविष्टाः तेषां वरं श्रेष्ठम् वृषभं वर्षितारम् नर्यापसं नरेभ्यो यजमानेभ्यो हितं नर्यमपः कर्म यस्य स नर्यापाः तम् नराणां हितकारिणम् । स इन्द्रो वसुभिः रुद्रैः आदित्यैः सवनत्रयदेवैः सहितः बर्हिरासदत् आसीदतु आज्यस्य वेतु च । कीदृशैर्वस्वादिभिः सयुग्भिः सह युञ्जन्ति ते सयुजः तैः समानयोगैः ॥ ४ ॥

होता यक्षदोजो न वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ।
सुप्रायणा अस्मिन्यज्ञे विश्रयन्तामृतावृधो द्वार इन्द्राय मीळुषे व्यत्वाज्यं० ॥ ५ ॥

अतिजगती । नकारश्चार्थः । या द्वारः प्रयाजदेवा इन्द्रमिन्द्रे ओजो वीर्यं सहश्चावर्धयन् ओज इन्द्रियबलं वीर्यं शारीरं बलं सहो मनोबलम् ता द्वारो होता यजतु । ताश्च द्वारः इन्द्राय इन्द्रार्थं विश्रयन्तां विवृता भवन्तु अस्मिन्यज्ञे आज्यं व्यन्तु पिबन्तु च । कीदृश्यो द्वारः सुप्रायणाः सुखेन प्रकृष्टमयनं गमनं यासु

ताः विवृतत्वादित्यर्थः । ऋतं यज्ञं वर्धयन्ति ऋतवृधः संहितायामृतशब्दस्य दीर्घः । इन्द्राय कीदृशाय मीळुषे सेक्ति मीढ्वान् तस्मै सेक्त्रे छान्दसो निपातः ॥५॥

क्षोता यक्षदुषेऽइन्द्रस्य धेनू सुदुघे मातरा मही ।
सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यं० ॥६॥

आर्षी त्रिष्टुप् । उषे अत्र पूर्वपदलोपः क्षोता उषे नक्तोषे यजतु ते च तेजसा इन्द्रमवर्धताम् आज्यं वीतां पिबतां च । तत्र दृष्टान्तः सवातरौ न न इवार्थे समानो वाता वत्सरो ययोस्ते सवत्सरौ एकशिशुके गावौ वत्सं यथा वर्धयेते तथेन्द्रं वर्धयताम् कीदृश्यौ उषे इन्द्रस्य धेनू धेनुतस्ते धेनू प्रीणयित्र्यौ । सुदुघे सुष्ठु दुग्धस्ते सुदुघे दुग्धं पूरयत्र्यौ । मातरा मातरौ विभक्तेराकारः मातृवत्पालिके । मही मह्यौ महत्यौ विभक्तिलोपः ॥६॥

क्षोता यक्षद्दैव्या क्षोतारा भिषजा सखाया क्षविषेन्द्रं भिषज्यतः ।
कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यं० ॥७॥

अतिजगती । दैव्यौ क्षोतारौ अयं चाग्निरसौ च मध्यमस्तौ क्षोता यजतु यौ च क्षविषा इन्द्रं भिषज्यतः चिकित्सतः भिषज् रुग्ज्ञये कण्ड्वादिभ्यो यक् । इन्द्राय इन्द्रियं वीर्यं धत्तः च तौ आज्यं वीताम् । कीदृशौ भिषजा भिषजौ चिकित्साकुशलौ । सखाया सखायौ अन्योन्यं स्नेहवन्तौ । कवी क्रान्तदर्शनौ देवौ दीप्यमानौ । प्रचेतसौ प्रकृष्टं चेतो ज्ञानं ययोस्तौ ॥७॥

क्षोता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती मही: ।
इन्द्रपत्नीर्क्षविष्मतीर्व्यन्त्वाज्यं० ॥८॥

ब्राह्मी अनुष्टुप् भेषजं भेषजरूपा ये त्रयो लोकास्तान् इडा सरस्वती भारतीति तिस्रो देवीश्च क्षोता यजतु ताश्चाज्यं व्यन्तु नकारश्चार्थे । कीदृशास्त्रयः त्रिधातवः त्रयोऽग्निवायुसूर्या धातवो धर्तारो येषां ते । अपसः अपस्विनः कर्मवन्तः शीतोष्णवातवर्षादीनि लोकानां कर्माणि । कीदृश्यस्तिस्रः मह्यः महत्यः ।

इन्द्रपत्नीः इन्द्रस्य पत्न्यः पालयित्र्यः । हविष्मतीः हविर्विद्यते यासां ताः ॥८॥

होता यक्षत्त्वष्टारमिन्द्रं देवं भिषजꣳ सुयजं घृतश्रियम् ।

पुरुरूपꣳ सुरेतसं मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यꣳ ॥९॥

अतिजगती । होता त्वष्टारं प्रयाजदेवतां यजतु । कीदृशं त्वष्टारम् इन्द्रम् इदि परमैश्वर्ये ईश्वरं प्रभुम् । देवं दातारम् । भिषजं रोगनिवर्तकम् । सुयजं सुष्ठु इज्यते स सुयजस्तम् साधु यष्टव्यम् । घृतश्रियं घृतेन श्रीः शोभा यस्य तम् आज्यहविष्का हि प्रयाजाः । पुरुरूपं पुरूणि बहूनि रूपाणि यस्य तम् । सुरेतसं शोभनं रेतो वीर्यं यस्य तम् । मघोनं मघवन्तं धनवन्तम् । स त्वष्टा इन्द्राय इन्द्रियाणि वीर्याणि दधत् सन् आज्यं वेतु ॥९॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम् ।

मधा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यꣳ ॥१०॥

शक्वरी । होता ~~वनस्पतिं~~ प्रयाजदेवतां यजतु । कीदृशं वनस्पतिं शमितारम् उलूखलादिरूपेण हविषां संस्कर्तारम् । शतक्रतुं शतं क्रतवः कर्माणि यस्य तं बहुकर्माणम् । धियो जोष्टारं बुद्धेः सेवितारम् । इन्द्रियमिन्द्रस्यात्मनो हितं वीर्यरूपं वा । स त्वष्टा (13.) मधा मधुना स्वादुना घृतेन समञ्जन् यज्ञं संमृक्षयन्सन् सुगेभिः सुगैः सुगमनैः पथिभिर्मार्गैः मधुना स्वादुना घृतेन युतं यज्ञं स्वदाति देवान्प्रापयति स्वदातिः (14.) प्रापणार्थः स आज्यं वेतु । सुखेन गम्यते येषु ते सुगाः सुदुरोरधिकरणेऽइति [पा० ३.२.४८. वा० ३.] गमेर्डप्रत्ययः ॥१०॥

होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा

स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम् ।

स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ॥११॥

शक्वरी । होता इन्द्रं यजतु । स्वाहाकारेणाज्यस्य देवान्यजतु । स्वाहाकारेण मेदसो देवान्यजतु । स्वाहाकारेण स्तोकानां सोमविन्दूनां देवान्यजतु । स्वाहाकारेण स्वाहाकृतीनां देवानां स्वाहाकृतीः प्रयाजदेवताः यजतु । स्वाहाकारे-

ण हव्यसूक्तीनां हव्यसम्बन्धिसुवचनानां देवान्यज्ञतु । स्वाहाकरिणाज्यपा देवाः प्रयाजाः जुषाणाः प्रीयमाणा भवन्तः सन्तः इन्द्रश्चाज्यं व्यन्तु पिवन्तु ॥ ११ ॥

II. देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरैर्वत्स्तीर्णं वेद्यामवर्धयत् ।
वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज्ञं ॥ १२ ॥

एकादश ऐन्द्रपशोः सम्बन्धिन एवानुयाजप्रैषाः । देवता बर्हिरादयः ॥ अतिजगती । मैत्रावरुणो वदति । बर्हिः देवं बर्हिःसंज्ञानुयाजदेवता इन्द्रमवर्धयत् पुष्णाति किम्भूतं बर्हिः सुदेवं शोभना देवा मरुदादयो यत्र तत् । तथा देवैः दातृभिः ऋत्विग्भिः वीरवत् वीरयुतम् । वेद्यां स्तीर्णमाछादितम् । वस्तोरह्नि वृतं लूनम् धातूनामनेकार्थत्वात् अक्तोः रात्रौ प्रभृतं प्रकर्षेण धृतम् वस्तोरक्तोरित्यव्ययद्वयं क्रमादह्निशावाचकम् । यत् बर्हिः राया हविर्लक्षणेन धनेन बर्हिष्मतः बर्हिषा युक्तानन्यान्यागानत्यगात् अतिक्रम्य गतं संस्कारोत्कर्षात् तत् बर्हिः वसुवने वसुवननाय धनदानाय वसुधेयस्य वसुधेयाय वसुनो धानाय निधानाय यज्ञमानगृहे निखननाय वेतु आज्यं पिवतु । वसुवने वसुधेयस्येति सप्तमीषष्ठ्यौ चतुर्थ्यर्थे । हे मनुष्यहोतः त्वमपि यज्ञ । एवमग्रेऽपि कण्डिकाशेषो व्याख्येयः ॥ १२ ॥

देवीर्द्वार इन्द्रꣳ संघाते वीड्वीर्यामन्नवर्धयन् ।
आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणꣳ रेणुकंकाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज्ञं ॥ १३ ॥

एकाधिका शक्वरी । यज्ञगृहद्वारोऽत्र देवताः । यछन्ति नियता भवन्ति ऋत्विजो यत्रेति याम कर्म यमेरनिणप्रत्ययो वृद्धिश्च सप्तम्या लुक् यामनि कर्मणि या द्वारो देव्यः इन्द्रमवर्धयन् । कीदृश्यो द्वारः संघाते देहलीकपाटद्वारशाखार्गलादिसमूहे सति वीड्वीः वीड्व्यः दृढाः संघातं विना न द्वारां दृढत्वं स्यात् । ता द्वारो रेणुककाटमपनुदन्ताम् काटः कूपः कुत्सितः काटः ककाटः रेणुभिः कृत्वा

ककाटो रेणुककाटः तम् अपनुदन्तां निवर्तयन्तु । किमित्यतो विशेषणं । कीदृशं कूपं वत्सेन गोपुत्रेण तरुणेन कुमारेण च आ आभिमुख्येन अर्वाणम् अर्यते गम्यते यत्रेत्यर्वा तम् ऋ गतावित्यतोऽन्येभ्योऽपि दृश्यन्तऽइति [पा° ३.२.७५.] वनिप्प्रत्ययः । कीदृशेन मीवता मीञ् हिंसायां मयनं मीः क्विप् मीरस्यास्ति मीवान् तेन हिंसाशीलेन । हिंसाशीलाश्चञ्चला उच्चलन्तो वत्साः कुमाराश्च यत्र पतन्ति तं कूपमपनुदेत्यर्थः उपलक्षणमेतत् यज्ञप्रजाविघ्नकराणि कूपादीनि मार्गादपनयन्वित्याशयः । ता व्यन्तु च ॥१३॥

देवीऽउषासानक्तेन्द्रं यज्ञे प्रयत्यध्वेताम् ।
देवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज्ञे ॥१४॥

ब्राह्मी उष्णिक् । उषाश्च नक्ता च उषासानक्ता समासे उषःशब्दस्य उषासादेशः अहोरात्राधिष्ठात्र्यौ देवी देव्यौ यज्ञे प्रयति प्रवर्तमाने सति इन्द्रमध्वेतामाहूतवत्यौ । प्रेति प्रयन् प्रपूर्वादिणः शतृ । ये च दैवीः देवसम्बन्धिनीर्विशः प्रजाः प्रायासिष्टां प्रगतवत्यौ यातेर्लुङ् वसवो रुद्रा आदित्या विश्वे देवा मरुत इत्यादयो देवप्रजाः । ते च वीतां पिबताम् कीदृश्यौ सुप्रीते अतितुष्टे सुधिते सुतरां हिते ॥१४॥

देवी ज्रोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् ।
अयावान्यान्याघा द्वेषाꣳस्यान्या वनन्वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज्ञे ॥१५॥

एकाधिकातिजगती । ज्रोष्ट्री जुषिते ते ज्रोष्ट्र्यौ प्रीतियुक्ते देवी देव्यौ वसुधिती वसुनो धनस्य धितिर्धारणं याभ्यां ते द्यावापृथिव्यौ अहोरात्रे वा सस्यं च समा चेति कात्यक्यः [निरु° १.४१.] । ते इन्द्रं देवमवर्धतामवर्धयताम् तयोर्मध्ये अन्या एका अघा अघानि पापानि द्वेषांसि दौर्भाग्यानि च अयावि यु पृथग्भावि दूरीकरोति यौतेश्चिण् लकारव्यत्ययः । अन्या द्वितीया वार्याणि वरणीयानि भोगयोग्यानि वसु वसूनि धनानि आवनत् आवकृति । कीदृश्यौ ते शिक्षिते विदितवेद्ये तत्त्वज्ञे । ते वीताम् ॥१५॥

देवीऽऊर्जाऽऊंती दुघे सुदुघे पयसेन्द्रमवर्धताम् ।
इषमूर्जमन्या वक्षत्सग्धꣳ सपीतिमन्या नवेन पूर्वं दयमाने पुराणेन नव-
मधातामूर्जमूर्जाऽऊंतीऽऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वꣳ ॥१६॥

विकृतिः । अधस्तनमन्त्रोक्तो देवताविकल्पः । देवी देव्यौ पूर्वप्रैषोक्ते पयसा दुग्धेनेन्द्रमवर्धताम् अवर्धयताम् छन्दस्युभयथेति [पाꣳ ३.४.११७.] शप आर्धधातुकत्वाच्चिलोपः । कीदृश्यौ ऊर्जाऽऊंती ऊर्जा बलं तद्युक्ता आऽऊंतिराक्षानं ययोस्ते । दुघे दुग्धस्ते दुघे दुहः कब्घश्चेति [पाꣳ ३.२.७०.] कप् घादेशश्च दोग्ध्र्यौ अनयोरनु सम्भोगमिमाः सर्वाः प्रजा अनुसम्भुञ्जतऽइति श्रुतिः । सुदुघे साधुदोह्ने । तयोर्मध्ये अन्या एका इषमन्नमूर्जं दध्यादि च वक्षत् वक्ष्यति यजमानाय । अन्या द्वितीया सग्धिं सपीतिं च वक्षत् समाना ग्धिर्भोजनं सग्धिः ताम् समाना पीतिः सपीतिः पुत्रादिभिः सह पानभोजने वक्ष्यति । ये देव्यौ नवेनान्नेन पूर्वं पुराणमन्नमधाताम् पुराणेनान्नेन नवमन्नमधाताम् यजमानाय वार्याणि वसु वसूनि चाधाताम् अन्नं धनं चाक्षयं कृतवत्यावित्यर्थः । कीदृश्यौ दयमाने उक्षत्यौ कृपयत्यौ वा । ऊर्जाऽऊंती ऊर्जा युता आऽऊंतिर्होमो ययोस्ते । ऊर्जं रसमूर्जयमाने वर्धयत्यौ । शिक्षिते तत्त्वज्ञे । ते वीतां पिबताम् ॥१६॥

देवा देव्या होतारा देवमिन्द्रमवर्धताम् ।
कृताघशꣳसावाभार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ वꣳसुवꣳ ॥१७॥

अतिजगती । एकः पार्थिवोऽग्निः अन्यो मध्यमः । देवा देवौ दैव्या दैव्यौ होतारौ इन्द्रं देवमवर्धताम् यजमानाय वार्याणि वसु वसूनि च आभार्ष्टाम् आहार्ष्टामाहृतवन्तौ आङ्पूर्वाद्धरतेर्लुङ् ह्रस्य भः । कीदृशौ कृताघशंसौ अघं पापं शंसतीह्रति अघशंसः पापी कृतोऽघशंसो याभ्यां तौ पापिनिवर्तकौ । तौ वीताम् ॥१७॥

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् ।

अस्पृक्षद्भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज्ञं ॥ १८ ॥

अतिजगती । तिस्रो देवीः देव्यः पतिं पालकमिन्द्रमवर्धयन् आदरार्थं पुनरुक्तिः । ता एवाह भारती दिवं स्वर्गमस्पृक्षत् स्पृशति भरतो रविस्तत्कान्तिर्भारती । सरस्वती रुद्रैः युता यज्ञमस्पृक्षत् । वसुमती वसुयुता इडा गृहानस्पृक्षत् गृहशब्देन भूलोकः । ता व्यन्तु ॥ १८ ॥

देव इन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्धयत् ।
शतेन शितिपृष्ठानामाक्षितः सहस्रेण प्रवर्तते मित्रावरुणेदस्य क्षोत्रमर्क्षतो बृहस्पतिं स्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज्ञं ॥ १९ ॥

कृतिः । नरा अस्मिन्नासीनाः शंसन्ति नराशंसः यज्ञो देवः इन्द्रं देवमवर्धयत् । कीदृशो नराशंसः इन्दतीतीन्द्रः ऐश्वर्यवान् । त्रिवरूथः वरूथं गृहम् त्रीणि वरूथानि सदोहविर्धानाग्नीध्राणि यस्य सः । त्रिबन्धुरः त्रीणि बन्धुराणि ऋग्यजुःसामलक्षणानि बन्धनानि यस्य । स नराशंसः शितिपृष्ठानां शतेनाक्षितः सन् सहस्रेण गोसहस्रेण प्रवर्तते । शिति श्यामं पृष्ठं यासां ताः शितिपृष्ठा गावः । मित्रावरुणा इत् मित्रावरुणाविवास्य नराशंसस्य क्षोत्रमर्क्षतः क्षोतृकर्मणि योग्यौ भवतः बृहस्पतिः स्तोत्रमौद्गात्रमर्क्षति अश्विना अश्विनौ अस्याध्वर्यवमर्क्षतः । स वेतु ॥ १९ ॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदन्तरिक्षं पृथिवीमदꣳहीद्वसुवने वसुधेयस्य वेतु यज्ञं ॥२०॥

अतिशक्वरी । यूप उच्यते वनस्पतिर्देवो देवैः सह इन्द्रमवर्धयत् । कीदृशः हिरण्यपर्णः हिरण्यमयानि पर्णानि यस्य । मधुशाखः मधुर्मधुरा रसवती शाखा यस्य । सुपिप्पलः शोभनानि पिप्पलानि फलानि यस्य । यो वनस्पतिरग्रेण दिवं स्वर्गमस्पृक्षत् स्पृशति स्पृशेर्लुङि शल इगुपधादनिटः क्स इति [पा° ३. १. ४५.] क्स-

प्रत्ययः । अन्तरिक्षं मध्येनेति शेषः आ स्पृशति । पृथिवीमुपरेणेति शेषः अदृंहीत् दृढामकरोत् । स वेतु ॥ २० ॥

देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीष्यभ्यभूद्सुवनं वसुधेयस्य वेतु यज्ञं ॥ २१ ॥

आर्षी त्रिष्टुप् । बर्हिः अनुयाजदेव इन्द्रं देवमवर्धयत् अन्या अन्यानि बर्हीष्यभ्यभूत् अभिभवति तद्वेतु । कीदृशं बर्हिः वारितीनामोषधीनां मध्ये देवं दीप्यमानं श्रेष्ठम् वारि जले इतिर्गतिर्यासां ता वारितयो जलाश्रिता ओषधयः । स्वासस्थं सुखेनासनेन स्थीयते यत्र तत्स्वासस्थम् । इन्द्रेणासन्नमाश्रितम् ॥ २१ ॥

देवोऽग्निः स्विष्टकृद्देवमिन्द्रमवर्धयत् ।
स्विष्टं कुर्वन्त्स्विष्टकृत्स्विष्टमग्न करोतु नो वः वः वेतु यज्ञं ॥ २२ ॥

आर्षी त्रिष्टुप् । स्विष्टकृद्देवः अग्निः इन्द्रं देवमवर्धयत् स नोऽस्माकं स्विष्टं साधु इष्टं करोतु वेतु च । कीदृशः स्विष्टं कुर्वन् सन् स्विष्टकृत् नाम शोभनमिष्टं कर्तव्यमिति तस्याधिकारः ॥ २२ ॥

a. अग्निमग्न होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राय हागम् ।

b. सूपस्था अग्न देवो वनस्पतिरभवद्दिन्द्राय हागेन ।
अघत्तं मेदस्तः प्रति पचताग्नीद्वीवृधत्पुरोडाशेन ॥

c. त्वामग्नऽऋषेः ॥ २३ ॥

त्वामग्न अयं प्रतीकः उभयत्रापि । ऐन्द्रपशुसम्बन्धी सूक्तवाकप्रेषः त्वामग्नऽऋषे इत्ययं मन्त्र उभयत्रापि ऐन्द्रानुवाके वायोधसानुवाके च प्रतीकोक्तेः आदिमात्रेणोक्तः सकलो ज्ञेयः । अग्निमग्न एकाधिका प्राजापत्या जगती । सूपस्थाः ब्राह्मी उष्णिक् । त्वामग्न एकाधिका विकृतिः । व्याख्यातः प्रेषः [२१.५१-६१.] ॥ २३ ॥

III. होता यक्षत्समिधानं मरुत्वशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ।
गायत्रीं छन्द इन्द्रियं ऋविं गां वयो दधद्घृताच्यस्य होतर्यज ॥ २४ ॥

एकादश वायोधसे पशौ प्रयाजप्रैषाः समित्तनूनपादाद्याप्रीदेवताः । अतिजगती । दैव्यो होता अग्निं वयोधसमिन्द्रं च यजतु वयः आयुर्दधाति वयोधाः तम् आयुषो दातारं धारयितारं वा । कीदृशमग्निं समिधानं दीप्यमानम् । मरुत्वशः सुपां सुलुगिति तृतीयैकवचनस्य सु-आदेशः मरुता यशसा समिद्धं (1.) दीप्तम् । वरेण्यं वरणीयम् । किं कुर्वन्यजतु गायत्रीं छन्दः इन्द्रियं वीर्यम् ऋविं गाम् वयः आयुश्च दधत् स्थापयन् इन्द्रे इति शेषः । षण्मासात्मकः कालोऽविः त्रयोऽवयो यस्याः सा ऋविः सार्धसंवत्सरा गौः ताम् । प्रयाजदेवतेन्द्रयुता आज्यं वेतु हे मनुष्यहोतः त्वमपि यज । एवमग्रेऽपि ॥ २४ ॥

होता यक्षत्तनूनपातमुद्विदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् ।
उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयो द° ॥ २५ ॥

एकाधिका जगती । होता तनूनपातं प्रयाजदेवं वयोधसमिन्द्रं च यजतु अदितिर्यं गर्भं दधे तम् इन्द्रमित्यर्थः । कीदृशं तनूनपातम् उद्विदम् उद्विनत्ति प्रकटयति फलमित्युद्वित् तं यज्ञफलानामुद्वित्तारम् । शुचिं पवित्रम् । किं कुर्वन् उष्णिहं छन्दः इन्द्रियम् दित्यवाहं गाम् वयश्च इन्द्रे दधत् । द्विवर्षा गौर्दित्यवाट् । स सेन्द्रो वेतु ॥ २५ ॥

होता यक्षदीडेन्यमीडितं वृत्रहत्तममिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् ।
अनुष्टुभं छन्द इन्द्रियं पञ्चाविं गां वयो द° ॥ २६ ॥

व्यूहेन शक्वरी । होता इडाभिः प्रयाजदेवताभिः सहः वयोधसमिन्द्रं यजतु । कीदृशमिन्द्रम् ईडिन्यम् ईडितुं योग्य ईडिन्यः ईडेरिन्यप्रत्ययः । ईडितमृषिभिः स्तुतम् । वृत्रहत्तमम् अत्यन्तं वृत्रहा वृत्रहत्तमः तम् नाद्घस्येति [पा° ८. २. १७.] नुडागमः । ईड्यं सर्वैः स्तुत्यम् । सहः सोमं सहसा बलेन सोमवदाह्लादकम् । किं

कुर्वन् अनुष्टुभं छन्दः इन्द्रियम् पञ्चाविं गाम् वयश्चेन्द्रे दधत् । पञ्चावयो यस्याः सा सार्धद्विवर्षा गौः । स वेतु ॥२६॥

होता यक्षत्सुबर्हिषं पूषण्वन्तममर्त्यꣳ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् ।

बृहतीं छन्द इन्द्रियं त्रिवत्सं गां वयो दꣳ ॥२७॥

शक्वरी । होता वयोधसमिन्द्रं यजतु । कीदृशम् सुबर्हिषं शोभनं बर्हिः प्रयाजदेवता यस्य तम् । पूषण्वन्तम् पूषास्यास्ति पूषण्वांस्तम् पूष्णा युक्तम् । अमर्त्यममरणधर्माणम् । प्रिये रुचिते अमृता अमृते अनश्वरे बर्हिषि सीदन्तं तिष्ठन्तम् । किं कुर्वन् बृहतीं छन्दः इन्द्रियम् त्रिवत्सं गाम् वयश्चेन्द्रे दधत् । वत्सः संवत्सरः त्रयो वत्सा यस्य त्रिवत्सो गौः त्रिवर्षो वृषः । स वेतु ॥२७॥

होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् ।

पङ्क्तिं छन्द इन्द्रियं तुर्यवाहं गां वयो दधद्वाज्यस्य होतर्यज ॥२८॥

अतिशक्वरी । होता द्वारो देवीः ब्रह्माणं परिवृढं वयोधसमिन्द्रं च यजतु । कीदृशीर्द्वारः व्यचस्वतीः व्यचो व्यञ्चनं गमनावकाशो विद्यते यासु ताः । अत एव सुप्रायणाः शोभनं प्रकर्षेणायनं गमनं यासु ताः । ऋतवृधः सत्यस्य वर्धयित्रीः । हिरण्ययीः हिरण्मयीः दृढाः । किं कुर्वन् पङ्क्तिं छन्दः इन्द्रियम् तुर्यवाहं गाम् वयश्च इह इन्द्रे दधत् । सार्धत्रिवर्षो गौस्तुर्यवाट् तुर्यं चतुर्थं वर्षं वहतीति ॥२८॥

होता यक्षत्सुपेशसा सुशिल्पे बृहतीऽउभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ।

त्रिष्टुभं छन्द इन्द्रियं पष्ठवाहं गां वयो दधद्घीतामाज्यस्य होतर्यज ॥२९॥

अतिशक्वरी । होता उभे नक्तोषासा नक्तोषसौ (2.) विश्वं सर्वात्मकं वयो-

धसमिन्द्रं च यज्ञतु । नक्ता रात्रिः उषा रात्रेरपरभागः । नकारश्चार्थः । कीदृश्यौ नक्तोषसौ सुपेशसा सुपेशसौ पेशः रूपनाम शोभनं पेशो ययोस्ते सुरूपे । सुशिल्पे यद्वै प्रतिरूपं तच्छिल्पमिति श्रुतेः सुष्ठु शिल्पं ययोस्ते अन्योऽन्यं प्रतिरूपे । बृहती बृहत्यौ । दर्शते दर्शनीये दृशेरतच्प्रत्ययः । किं कुर्वन् त्रिष्टुभं छन्दः इन्द्रियम् पष्ठवाहं गाम् वयश्च इन्द्रे दधत् । ते वीतां पिवताम् ॥२१॥

होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ।

जगतीं छन्द इन्द्रियमनड्वाहं गां वयो दधद्धीतामाज्यस्य होतर्यज ॥३०॥

एकाधिका शक्वरी । होता दैव्यौ होतारौ वयोधसमिन्द्रं च यज्ञतु अयं चाग्निरसौ च मध्यम इति होतारौ । कीदृशौ प्रचेतसा प्रकृष्टं चेतो ज्ञानं ययोस्तौ प्रचेतसौ । देवानामुत्तमं यशः युक्तीकृतदेवयशोरूपौ । कवी क्रान्तदर्शनौ । सयुजा सह युङ्क्तस्तौ समानयोगौ । किं कुर्वन् । जगतीं छन्दः इन्द्रियम् अनड्वाहं गाम् वयश्च इन्द्रे दधत् । अनः शकटं वहतीत्यनड्वान् शकटवाहको वृषः तौ वीताम् ॥३०॥

होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम् ।

विराजं छन्द इन्द्रियं धेनुं गां न वयो दधद्वाज्यस्य होतर्यज ॥३१॥

एकाधिका शक्वरी । होता तिस्रो देवीः पतिं पालकं वयोधसमिन्द्रं च यज्ञतु । कीदृशीस्तिस्रः पेशो रूपमस्ति यासां ताः रूपसमृद्धाः । हिरण्ययीः हिरण्यालंकृतदेहाः । बृहतीः प्रभाविन । महीः महतीः तेजसा आदित्येन्द्राग्निसम्बन्धात् । कास्ताः भारतीः बह्वचनमिडासरस्वत्युपलक्षणम् इडासरस्वतीभारत्यस्तिस्र इत्यर्थः । किं कुर्वन् । विराजं छन्दः इन्द्रियम् धेनुं दोग्ध्रीं गाम् वयश्चेन्द्रे दधत् नकारश्चार्थः । सेन्द्रास्ता व्यन्तु ॥३१॥

होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्धनं रूपाणि बिभ्रतं पृथक्पुष्टिमिन्द्रं वयोधसम् ।

द्विपदं छन्द इन्द्रियमुक्षाणं गां न वयो दधद्वाज्यस्य होतर्यज ॥३२॥

एकाधिका शक्वरी । होता त्वष्टारं वयोधसमिन्द्रं च यजतु । कीदृशं त्वष्टारं सुरेतसं शोभनं रेतो यस्य तम् जगदुत्पादकत्वात्त्वष्टुः (3.) शोभनं रेतः । पुष्टिवर्धनं पुत्रादिपुष्टेर्वर्धयितारम् । पृथक् नानाजातिषु रूपाणि पुष्टिं च बिभ्रतम् । किं कुर्वन् द्विपदं छन्दः इन्द्रियम् उक्षाणं रेतःसेकक्षमं गां वृषभं वयश्चेन्द्रे दधत् । नञ्र्थः । सेन्द्रस्त्वष्टा वेतु ॥३२॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम् ।

ककुभं छन्द इन्द्रेन्द्रियं वशां वेहतं गां वयो दधद्वाज्यस्य होतर्यज ॥३३॥

अत्यष्टिः । होता वनस्पतिं वयोधसमिन्द्रं च यजतु । कीदृशं वनस्पतिं शमितारं संस्कर्तारं हविषाम् । शतक्रतुं बहुकर्माणम् । हिरण्यपर्णं हिरण्मयानि पर्णानि यस्य तम् । उक्थिनम् उक्थानि शस्त्राणि सन्त्यस्य यज्ञवन्तं वा । रशनां रज्जुं बिभ्रतम् स्वभावानुवादः यूपे हि पशुबन्धाय रज्जुर्बध्यते । वशिं कान्तम् । भगं भजनीयम् । किं कुर्वन् ककुभं छन्दः इन्द्रियम् वशां वन्ध्यां वेहतं गर्भोपघातिनीं च गाम् वयश्च इह इन्द्रे दधत् । सेन्द्रो वनस्पतिर्वेतु ॥३३॥

होता यक्षत्स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् ।

अतिछन्दसं छन्द इन्द्रियं बृहदृषभं गां वयो दधच्चत्वाज्यस्य होतर्यज ॥३४॥

अतिशक्वरी । होता स्वाहाकृतीः प्रयाजदेवताः इन्द्रं च यजतु । कीदृशमिन्द्रम् अग्निमङ्क्तीत्यग्निः अग्रे गन्तारम् । पृथक् प्रत्येकं यज्ञेषु गृहपतिं गृहस्य पालकम् । वरुणम् व्रियतेऽसौ वरुणस्तम् ऋत्विग्भिर्वरणीयम् । भेषजं रोगनाशकम् । कविं क्रान्तदर्शनम् । क्षत्रं क्षत्रात्प्रकाराच्चातारम् । वयोधसमायुषो दातारम् । किं कुर्वन् अतिछन्दसं छन्दः इन्द्रियं वीर्यं बृहत् महत् ऋषभं पुष्टं गां वयश्चेन्द्रे दधत् । सेन्द्राः स्वाहाकृतयः आज्यं व्यन्तु । मनुष्यहोतस्त्वमपि यज ॥३४॥

IV. देवं बर्हिर्वयोधसं देवमिन्द्रमवर्धयत् ।

गायत्र्या छन्दसेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज्ञ ॥३५॥

वायोधसे पशावेवैकादशानुयाजानां प्रैषाः बर्हिरादिदेवताः । एकाधिके आर्ष्यौ त्रिष्टुभौ द्वे । बर्हिः देवं वयोधसमिन्द्रं देवमवर्धयत् । कीदृशं बर्हिः गायत्र्या छन्दसा कृत्वा चक्षुरिन्द्रियं वयश्चेन्द्रे दधत् । तत् वसुवनाय वसुधानाय चाज्यं वेतु षष्ठीसप्तम्यौ चतुर्थ्यर्थे । हे मनुष्यस्तोतस्त्वमपि यज्ञ । एवमग्रेऽपि व्याख्येयम् ॥३५॥

देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रमवर्धयन् ।

उष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज्ञ ॥३६॥

द्वारो देव्यः वयोधसं शुचिं पवित्रमिन्द्रमवर्धयन् । कीदृश्यो द्वारः उष्णिहा छन्दसा कृत्वा सह वा प्राणमिन्द्रियं प्राणेन्द्रियं वयश्चेन्द्रे दधत् दधत्यः लिङ्गवचनव्यत्ययः । ता व्यन्तु ॥३६॥

देवीरुषासानक्ता देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।

अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज्ञ ॥३७॥

द्वे ब्राह्म्यौ बृहत्यौ । उषासानक्तौ देवी देव्यौ वयोधसमिन्द्रं देवमवर्धताम् उषाश्च नक्तं च उषासानक्ता उषासोषस इति [पा० ६.३.३१.] उषःशब्दस्य देवताद्वन्द्वे उषासा-आदेशः विभक्तेराकारश्च । कीदृश्यौ ते देवी दीप्यमाने । कीदृशमिन्द्रं देवं दीप्यमानम् । एकौ देवीदेवंशब्दौ दीप्तिवाचकौ अन्यौ सुरवाचकौ । अनुष्टुभा छन्दसा बलमिन्द्रियं वयश्च इन्द्रे दधत् दधत्यौ । दधदित्यव्ययम् लिङ्गवचनव्यत्ययो वा । ते वीताम् ॥३७॥

देवी ज्योष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।

बृहत्या छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज्ञ ॥३८॥

देवी देव्यौ दीप्यमाने देवी देव्यौ अनुयाजदेवते देवं दीप्तं वयोधसमिन्द्रं देवमवर्धताम्। देवीदेवशब्दौ पूर्ववत्। कीदृश्यौ ज्योष्ट्र्यौ जुषेते ते ज्योष्ट्र्यौ प्रीतियुक्ते जुषिस्तृच्। वसुधिती वसुनो धनस्य धारयित्र्यौ। बृहत्या छन्दसा श्रोत्रमिन्द्रियं वयश्च इन्द्रे दधत्यौ ॥३८॥

देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्धताम्।
पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज्ञ ॥३९॥

शक्करी। देवी दात्र्यौ ऊर्ज्जाहुत्यौ देव्यौ पयसा वयोधसं देवमिन्द्रमवर्धताम्। कीदृश्यौ दुघे दोग्ध्र्यौ। सुदुघे सुखेन दोग्धुं शक्ये। पङ्क्त्या छन्दसा शुक्रं वीर्यमिन्द्रियं वयः चेन्द्रे दधत्यौ ॥३९॥

देवा देव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्धताम्।
त्रिष्टुभा छन्दसेन्द्रियं विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज्ञ ॥४०॥

अतिजगती। दैव्या दैव्यौ देवा देवौ दीप्तौ देवसम्बन्धिनौ होतारा होतारौ देवौ वयोधसं देवं दीप्तमिन्द्रं देवमवर्धताम्। त्रिष्टुभा छन्दसा विषिं कान्तिमिन्द्रियं त्वगिन्द्रियं वयश्चेन्द्रे दधतौ ॥४०॥

देवीस्तिस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन्।
जगत्या छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज्ञ ॥४१॥

एकाधिका ब्राह्मी अनुष्टुप्। तिस्रो देव्यो भारतीडासरस्वत्यः पतिं पालकं वयोधसमिन्द्रमवर्धयन् अभ्यास आदराधः। कीदृश्यः जगत्या छन्दसा शूषं बलमिन्द्रियं वयश्चेन्द्रे दधत्यः ॥४१॥

देवो नराशꣳसो देवमिन्द्रं वयोधसं देवो देवमवर्धयत्।
विराजा छन्दसेन्द्रियꣳ द्रुपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज्ञ ॥४२॥

अतिजगती । देवो दाता नराशंसो देवः देवं दीप्तं वयोधसमिन्द्रमवर्धयत् । कीदृशः विराजा छन्दसा रूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥४२॥

देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।

द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज्ञ ॥४३॥

अतिजगती । देवो दाता वनस्पतिर्यूपः देवं द्योतनं वयोधसमिन्द्रं देवमवर्धयत् । कीदृशः द्विपदा छन्दसा भगं सौभाग्यरूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥४३॥

देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत् ।

ककुभा छन्दसेन्द्रियं यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज्ञ ॥४४॥

ब्राह्मी बृहती । बर्हिः देवमिन्द्रमवर्धयत् । कीदृशमिन्द्रं देवं दीप्यमानम् वयोधसं वयसो दातारम् । कीदृशं बर्हिः वारितीनां वार्म्यः सकाशात् इतिरुत्यत्तिर्यासां ता वारितय ओषधयस्तासां मध्ये देवं दीप्तं श्रेष्ठमित्यर्थः । ककुभा छन्दसा यशोरूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥४४॥

देवोऽग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।

अतिछन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज्ञ ॥४५॥

ब्राह्मी बृहती । देवो दाता स्विष्टकृत् अग्निः देवो वयोधसं देवं दीप्तमिन्द्रं देवमवर्धयत् । कीदृशः अतिछन्दसा छन्दसा क्षत्रं क्षतात्त्राणरूपमिन्द्रं वयश्चेन्द्रे दधत् । स वसुवननाय वसुधानाय च वेतु । हे द्योतः त्वमपि यज्ञ ॥४५॥

a. अग्निमग्न - °डाशं बध्नन्निन्द्राय वयोधसे छागम् ।

b. सूपस्था - °भवदिन्द्राय वयोधसे छागेन - °त्पुरोडाशेन ।

c. त्वामग्नऽऋषे° ॥४६॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामष्टाविंशोऽध्यायः ॥२८॥ ॥

अग्निमग्न एकाधिका ब्राह्मी गायत्री । सूपस्थाः ब्राह्म्यनुष्टुप् । एते व्याख्याते

[कं० २३.] ॥ वामग्र प्रतीकोक्तः सर्वोऽपि पाठः एकाधिका विकृतिः अयमपि व्याख्यातः [कं० २३.] । इन्द्राय वयोधसे इति विशेषः ॥ २८ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । अष्टाविंशोऽयमध्यायोऽगमत्सौत्रामणीभवः ॥

इति सौत्रामणीसम्बन्धिप्रयाजानुयाजप्रैषनिरूपणं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ।

I. ॥ १ [°मिलस्पदे] - ३ [°दिलाभिरिन्द्रमीलितमा°] - ७ [प्रचेतसाऽइन्द्राय] ८ [इला] - ११ ॥ १-११ ॥ ॥

II. ॥ १२-१७ [°शऽसाऽआभा°] - १८ [°स्वतीला] - २३ [-पचन्पङ्क्तीः (4.) पचेन्पुरोलाशान्ब° - पचताग्नीद्वीवृधत पुरोलाशेन -] ॥ १२-२३ ॥ ॥

III. ॥ २४-२६ [°दीलेन्यमीलितं वृत्रक्रतमिलाभि°] - ३४ ॥ २४-३४ ॥ ॥

IV. ॥ ३४-४६ [- पचन्पङ्क्तीः (4.) पचेन्पुरोलाशान्ब° - पचताग्नीद्वीवृधत पुरोलाशेन -] ॥ ३४-४६ (5.) ॥ ॥ चतुरनुवाकेषु षट्चत्वारिंशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां त्रिंशोऽध्यायः ॥ ३० ॥ ॥

I. समिद्धोऽअग्नऽआवह देवान्यज्ञे सुनोतेः पूतबन्धायो ।
तीव्रान्घोषान्कृणुहि वाजिनऽआनय साधया धियः ॥ १ ॥

आश्वमेधिकोऽध्यायः ततोऽस्य प्रजापतिर्ऋषिः । आद्या एकादश त्रिष्टुभः आप्रीसंज्ञाः अश्वस्तुतयो वामदेवपुत्रेण बृहदुक्थेन समुद्रपुत्रेणाश्वेन वा दृष्टाः समित्तनूनपादिडादिदेवताकाः । हे अग्ने हे जातवेदः जातप्रज्ञान त्वं देवानां सधस्थं सहस्थितिर्यत्रेति सहस्थानं प्रति प्रियं प्रीतिमावह आवह देवान्प्रीणयेत्यर्थः वहतेः शपो लुकि मध्यमैकवचने रूपम् । कीदृशस्त्वं समिद्धः दीप्तः मतीनां कुदरं बुद्धीनामुदरं गर्भमञ्जन् व्यक्तीकुर्वन् बुद्धिरहस्यं प्रकाशयन्नित्यर्थः । मधुमत् स्वादु घृतं पिन्वमानः देवेषु सिञ्चन् । वाजी वजति वाजी वज गतौ चलनवान् । वाजिनं हविः वहन् देवान्प्रापयन्सन् प्रीणय ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ता७ स्वधामस्मै यजमानाय धेहि ॥२॥

वाजी अश्वो देवानप्येतु । कीदृशः घृतेन देवयानान्पथः समञ्जन् देवा यायन्ते प्राप्यन्ते यैस्ते देवयानाः पन्थानो हवींष्युच्यन्ते । प्रजानन् देवानां हविरहमिति जानन् । एवं परोक्षमुक्त्वा प्रत्यक्षमाह । हे सप्ते अश्व प्रदिशो दिगाश्रयाणि भूतानि त्वा त्वामनुसचन्ताम् षप् सम्बन्धे सपति कर्मणा सम्बध्यते स सप्तिः । किं च अस्मै यजमानाय स्वधामन्नं धेहि प्रयच्छ । अत्र घृतशब्दस्तनूनपाद्वाची ॥२॥

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥३॥

हे वाजिन् हे सप्ते ईड्यः स्तुत्योऽसि वन्द्यः नमनीयोऽसि आशुः शीघ्रः मेध्यः मेधायाश्वमेधाय योग्यः चकाराः समुच्चयार्थाः । किं च जातवेदाः अग्निः त्वा त्वां वहतु देवान्प्रापयतु । कीदृशोऽग्निः वसुभिः देवैः सजोषाः जोषसा प्रीत्या सहितः । कीदृशं त्वाम् प्रीतं तुष्टम् वह्निं हविषो वोढारम् ॥३॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥४॥

वयं बर्हिः सुष्टरीम साधु स्तरीम स्तृणाम (1.) अदितिर्देवी स्तीर्णं तत् बर्हिः सुविते सु इते साधु गते स्वर्गलोके दधातु स्थापयतु । कीदृशी अदितिः सजोषाः जोषसा प्रीत्या युक्ता । स्योनं कृण्वाना सुखं कुर्वती । जुषाणा प्रीयमाणा । कीदृशं बर्हिः उरु बहु पृथु विस्तीर्णम् पृथिव्यां प्रथमानं विस्तार्यमाणम् देवेभिर्युक्तं देवैः सहितम् ॥४॥

एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
कृधाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥५॥

हे ऋत्विग्यजमानाः वो युष्माकमेता द्वारो देवीः यज्ञगृहद्वारो देव्यः ईदृश्यो भवन्तु उ पादपूरणः । कीदृश्यः सुभगाः शोभनं भगं श्रीर्यासां ताः । विश्वरूपाः ना-

नाद्रूपचित्राः । पक्षोभिः पक्षस्शब्दः सान्तः पक्षवाची पक्षैः पक्षप्रायैः कपाटैः विश्रयमाणाः विस्तार्यमाणाः कीदृशैः पक्षोभिः उत् ऊर्धम् अतैः अत्यक्तैः विस्तार्यन्ते आताः अत सातत्यगमने ऊर्धं प्रसृतैरित्यर्थः । पुनः कीदृश्यो द्वारः ऋष्वाः ऋषन्ति ऋष्वाः ऋष गतौ इतस्ततो गमनशीलाः मरुत्यः । सतीः सत्यः समीचीनाः । कवषः कु शब्दे कुवन्ति शब्दं कुर्वन्ति कवषः कुवतेरसुन्प्रत्ययः षत्वमार्षम् कपाटपिधानसमये शब्दं कुर्वाणाः ससुषिरा वा । शुम्भमानाः शोभमानाः । सुप्रायणाः सुखेन प्रकृष्टमयनं गमनं यासु सुगमनाः ॥५॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभिसंविदाने ।
उषासा वाꣳ सुहिरण्ये सुशिल्पेऽऋतस्य योनाविह सादयामि ॥६॥

हे पत्नीयजमानौ वां युवयोर्ऋतस्य यज्ञस्य योनौ इह उषासा उषसौ नक्तोषसौ सादयामि स्थापयामि द्विवचनात्सहचारित्वाच्च द्वितीया रात्रिः । कीदृश्यौ उषसा मित्रावरुणा मित्रावरुणौ अन्तरा द्यावापृथिव्योर्मध्ये संचरन्ती संचरन्त्यौ वर्तमाने अयं वै लोको मित्रोऽसौ वरुण इति श्रुतेर्मित्रवरुणशब्देन द्यावापृथिव्यावुच्येते । यज्ञानां मुखमग्निहोत्रहोमकालमभिसंविदाने कथयन्त्यौ उत्तिष्ठतायमग्निहोत्रहोमकाल इति प्रातर्विप्रा वदन्ति तदुषस्युपचर्यते । सुहिरण्ये साधु हिरण्यं भूतं ययोस्ते । सुशिल्पे अन्योन्यं प्रतिरूपे शिल्पं प्रतिरूपं भवतीति वचनात् ॥६॥

प्रथमा वाꣳ सरथिना सुवर्णा देवी पश्यन्ती भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥७॥

हे यजमानौ वां युवयोः प्रथमा प्रथमौ मुख्यौ होतारा होतारौ अहमपिप्रयं प्रीणितवानस्मि प्रीणातेर्णिजन्तस्य लुङि उत्तमैकत्वे रूपम् अयं चाग्निरसौ च मध्यम इति होतारौ । कीदृशौ सरथिना सरथिनौ समानो रथो ययोस्तौ एकरथारूढौ सुवर्णा सुवर्णौ शोभनो वर्णो द्युतिर्ययोस्तौ देवौ दीप्यमानौ दातारौ । विश्वा सर्वाणि भुवनानि पश्यन्तौ । वां युवयोश्चोदना चोदनानि कर्माणि मिमाना मिमानौ निर्मिमाणौ । प्रदिशा प्रदेशेनाभिनयेन ज्योतिः दिशन्तौ आहवनीयाख्यं ज्योतिर्यष्टव्यमिति दर्शयन्तौ ॥७॥

आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सꣳह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८॥

आदित्यैः युता भारती नोऽस्माकं यज्ञं वष्टु कामयताम् । सरस्वती रुद्रैः सꣳह नोऽस्माकं यज्ञमावीत् अवतु । इडा चावतु कीदृशी उपहूता कृतोपह्वा वसुभिः देवैः सजोषाः प्रीतियुता । एवं परोक्षमभिधाय प्रत्यक्षमाह हे देवीः देव्यो भारतीसरस्वतीडाः नोऽस्माकं यज्ञममृतेषु देवेषु धत्त यूयं स्थापयत ॥ ८॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायतऽआशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बह्वोः कर्तारमिह यक्षि होतः ॥ ९॥

त्वष्टा वीरं पुत्रं जजान जनयति कीदृशं वीरं देवकामं देवान्कामयते देवकामस्तम् यष्टारमृणत्रयापाकरणसमर्थमित्यर्थः । त्वष्टुः सकाशात् अश्वः जायते उत्पद्यते कीदृशोऽश्वः अर्वा इयर्ति गच्छति अर्वा अन्येभ्योऽपि दृश्यत्तऽइति [पा॰ ३. २.७५.] अर्तेर्वनिप् आशुः अश्नुते दिशो व्याप्नोति अश्नाति भक्षयति वा आशुः उणप्रत्ययः । किं च त्वष्टा इदं विश्वं सर्वं भुवनं भूतजातं जजान उदपादयत् । हे होतः एवं बह्वोः कार्यस्य कर्तारं त्वष्टारमिह यज्ञे त्वं यक्षि यज यजतेः शपि लुप्ते रूपम् ॥ ९॥

अश्वो घृतेन त्मन्या समक्त उप देवाँ२॥ऽऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १०॥

पाथ इत्यन्ननाम-। अश्वः पाथः अश्वरूपं हविः ऋतुशः ऋतौ-ऋतौ यज्ञकाले त्मन्या आत्मना स्वयं देवान् उप एतु प्राप्नोतु । विभक्तेर्यादेशे मन्त्रेषाञ्चादिरात्मन इति [पा॰ ६.४.१४१.] आत्वोपः । कीदृशोऽश्वः घृतेन समक्तः पत्नीभिः समुक्षितः । किं च वनस्पतिर्देवः हव्या हव्यानि वक्षत् वक्तु देवान्प्रति । कीदृशो वनस्पतिः देवलोकं प्रजानन्विदन् अत एव वक्तु । कीदृशानि हव्यानि अग्निना स्वदितानि आस्वादितानि आस्वाद्य मिष्टीकृतानि ॥ १०॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।

स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ ११ ॥

हे अग्ने त्वं यज्ञं दधिषे धारयसि लडर्थे लिट् । कीदृशस्त्वम् प्रजापतेस्तपसा वावृधानः वर्धमानः । सद्यो जातः अरणयाद्युत्पन्नः । किं च स्वाहाकृतेन स्वाहाकारमुक्ता कृतेन हविषा सह पुरोगाः पुरो गच्छतीति अग्रगामी सन् (2.) याहि देवान्गच्छ त्वयि गते सति देवाः हविरदन्तु भक्षयन्तु कीदृशं हविः साध्या साधु श्रेष्ठम् विभक्तेर्डादेशे टिलोपे (3.) ट्टपम् ॥ ११ ॥

II. यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्राद्उत वा पुरीषात् ।

श्येनस्य पत्त्रा हरिणस्य बाहू ऽउपस्तुत्यं महि जातं ते अर्वन् ॥ १२ ॥

त्रयोदशाश्वस्तुतिट्टपास्त्रिष्टुभो जमदग्निर्दीर्घतमोभ्यां दृष्टाः अश्वस्तुतौ विनियुक्ताः । हे अर्वन् अश्व यत् यदा त्वमक्रन्दः क्रन्दितवान् हेषारवमकार्षीः तदा ते तव महि माहात्म्यम् उपस्तुत्यं स्तोतुं योग्यं ज्ञातम् । कथं स्तुत्यम् तदाह श्येनस्य पत्त्रौ हरिणस्य बाहू अनेन क्रन्दनेन जिताविति शेषः श्येनपत्त्रौ शौर्येण हरिणबाहू वेगेनेत्यर्थः । कीदृशस्त्वम् समुद्रात् अन्तरिक्षात् उदधेर्वा प्रथमं जायमानः उत वा अथवा पुरीषात् पशोः सकाशात् उद्यन् उत्पद्यमानः ॥ १२ ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमोऽअध्यतिष्ठत् ।

गन्धर्वोऽअस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ १३ ॥

वसवोऽष्टगणदेवाः सूरादादित्यमण्डलादश्वं निरतष्ट निःकृष्टवन्तः तक्षतेर्लुङि मध्यमबहुवचनम् । ततः त्रितः त्रिस्थानो वायुः यमेन दत्तमेनमश्वम् अयुनक् युक्तवान् युजेर्लङ् संहितायामटो दीर्घः । इन्द्रश्चैनमश्वं प्रथमः अध्यतिष्ठत् आदावधिष्ठितवान् । गन्धर्वः विश्वावसुरस्याश्वस्य रशनामगृभ्णात् गृहीतवान् । य ईदृशस्तं स्तुमः । एणमिति णत्वं छान्दसम् ॥ १३ ॥

असि यमोऽअस्यादित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।

असि सोमेन समया विपृक्त आदुस्ते त्रीणि दिवि बन्धनानि ॥ १४ ॥

हे अर्वन् त्वं यमोऽसि आदित्यश्चासि गुह्येन गोप्येन व्रतेन कर्मणा त्रितः

त्रिस्थान इन्द्रोऽसि । सोमेन समया सह विपृक्तः सम्पृक्तः एकीभूतोऽसि । एवं यमादिभिः सायुज्यं प्राप्तस्य तव दिवि नभसि आदित्यरूपेण स्थितस्य त्रीणि बन्धनानि बुधा आहुः । ऋग्यजुःसामरूपाणि मण्डलान्तरपुरुषार्चींषि त्रीणि बन्धनानि स्वरूपाणि । यदेतन्मण्डलं तपति तन्महदुक्थमित्यादिश्रुतेः ॥ १४ ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतैव मे वरुणश्छत्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥ १५ ॥

हे अर्वन् यत्र ते तव परमं जनित्रं बुधा आहुः आदित्यरूपेण तत्र ते तव त्रीणि बन्धनानि पूर्वमन्त्रोक्तान्याहुः । अप्सु उदकेषु त्रीणि बन्धनानि आहुः कृषिर्वृष्टिर्वीजमिति । अन्तः समुद्रे अन्तरिक्षमध्ये त्रीणि बन्धनानि आहुः मेघो विद्युत्स्तनयित्नुरिति । उतैव उतापि च वरुणः वरुणरूपः त्वं मे मां छृत्सि प्रशंससि कर्मणि षष्ठी छन्दतिरर्चतिकर्मा अर्चनं प्रशंसनम् ॥ १५ ॥

इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधानां ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ १६ ॥

हे वाजिन् ते तव इमा इमानि अवमार्जनानि अहमपश्यं पश्यामि अवमार्ज्यते यैस्तानि अवमार्जनानि वेतसकटादीनि । शफानां खुरानां सनितुः सम्भक्तुर्नियन्तुः पादवासस्य इमा इमानि निधाना निधानानि स्थानानि अपश्यम् । अत्र यज्ञे ते तव रशनाः मध्यबन्धनरज्जूः अपश्यम् । कीदृशी रशनाः (4.) भद्राः कल्याणरूपाः स्तुत्याः । गोपाः गोपायन्ति गोपाः रक्षणकर्त्र्यः । याः रशनाः ऋतस्य ऋतं यज्ञमभिरक्षन्ति कर्मणि षष्ठी । निपातस्य चेति [पा° ६. ३. १३६.] अत्रपदस्य दीर्घः ॥ १६ ॥

आत्मानं ते मनसाराद्जानामवो दिवा पतयन्तं पतंगम् ।
शिरोऽअपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ १७ ॥

एवमश्वं स्तुत्वा भविष्यत्कर्मणा स्तौति । हे अश्व ते तवात्मानं मनसा आरादूरे अहमजानां जानामि जानातिर्लङ्युत्तमैकवचनम् । कीदृशमात्मानम् अवः अ-

धस्तात्प्रदेशात् दिवा नभोमार्गेण पतंगं सूर्यं प्रति पतयत्नमुत्पतन्तम् पत ऐश्वर्यगत्योश्चुरादिरदन्तः । किं च ते शिरः सूर्यरूपं पश्यामि । कीदृशं शिरः पथिभिः नभोमार्गैः जेतुमानं गच्छत् कीदृशैः पथिभिः सुगेभिः सुगैः सुखेन गम्यते येषु ते सुगास्तैः सुदुरोरधिकरणेऽइति [पा० ३.२.४८. वा० ३.] गमेर्डः अरेणुभिः नास्ति रेणुर्येषु ते अरेणवस्तैः उपद्रवरहितैरित्यर्थः । पुनः कीदृशं शिरः पतत्रि पतनशीलं गत्रं ॥ १७॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तोऽअनु भोगमानडादिद्गसिष्ठ ओषधीरजीगः ॥ १८॥

हे अश्व अत्रास्मिन्गोः सूर्यस्य पदे मण्डले ते तवोत्तमं रूपमहम् आ अपश्यम् समन्तात्पश्यामि गौर्नादित्ये बलीवर्दऽइत्यभिधानाद्गौरादित्यः । कीदृशं रूपम् इषः अन्नानि हवींषि जिगीषमाणं जेतुमिच्छत् जयतेः सन्नन्ताच्छानच् सन्लिटोर्जेरिति [पा० ७.३.५७.] गः । किं च मर्तः मनुष्यो यदा ते तव भोगमनु आनट् अनुव्याप्नोति हवीरूपं भोगं समर्पयति आत् इत् अनन्तरमेव त्वमोषधीः हवीरूपाः अजीगः गृ निगरणे गिरसि भक्षयसि । कीदृशस्त्वम् ग्रसिष्ठः ग्रसते इति ग्रसिता अतिशयेन ग्रसिता ग्रसिष्ठः अत्यन्तं भक्षयिता इष्ठनि तृचो लुक् । गृणातेर्णिजन्तस्याजीगः (5.) ॥ १८॥

अनु त्वा रथोऽअनु मर्योऽअर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ १९॥

हे अर्वन् अश्व रथः त्वा त्वामनु वर्ततऽइति शेषः । मर्यः मनुष्यः त्वामनु । गावः त्वामनु । कनीनां कन्यानां भगः सौभाग्यं त्वामनु । यत्र त्वम् तत्र रथादयः स्युरित्यर्थः । किं च व्रातासः व्राताः मनुष्यसंघाः तव सख्यं मैत्रीम् अन्वीयुः प्रापुः । किं बहुना देवाः तव वीर्यं सामर्थ्यमनुममिरे अनुमितवन्तः ॥ १९॥

हिरण्यशृङ्गोऽयोऽअस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्योऽअर्वन्तं प्रथमोऽअध्यतिष्ठत् ॥ २०॥

यः प्रथमः मुख्यः अर्वत्तमश्वमध्यतिष्ठत् अधिष्ठितवान् सोऽपि इन्द्रः अवरः इन्द्रापत्नया न्यून आसीत् कीदृश इन्द्रः हिरण्यशृङ्गः हिरण्यवत् शृङ्गं दीप्तिर्यस्य शृङ्गमिति ज्वलन्नामसु [निघ० १.१७.] पठितम् । अस्याश्वस्य पादा अयः लोहं हिरण्यं वा अयोरूपाः पादा इत्यर्थः कीदृशाः पादाः मनोजवाः मनोवत् जवो वेगो येषां ते । किं च देवा अस्याश्वस्य हविरद्यमायन् अत्तुं योग्यमद्यं हविश्च तदद्यं च हविरद्यम् हविर्लक्षणं भद्यं प्रति आयन् आगच्छन् इत् एवार्थे अप्यर्थे वा ॥२०॥

ईर्मान्तासः सिलिकमध्यमासः सꣳ शूरणासो दिव्यासोऽअत्र्याः ।
कृꣳसा-ईव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥२१॥

सूर्याश्वरूपेणाग्निरश्वः स्तूयते । यत् यदा अश्वाः सप्त रविरथस्थाः श्रेणीभूता कृंसा-इव संयतन्ते सम्यक् प्रयत्नं कुर्वन्ति तदा दिव्यं दिवि भवमज्मं गमनं संग्रामं वा आक्षिषुः व्याप्नुवन्ति अत्र व्यापौ लुङि रूपम् । कृंसा यथा गमनाय यतन्ते तथाश्वा अपि । कीदृशा अश्वाः ईर्मान्तासः ईर्मान्ताः ईर्यते ईर्मः ईर् प्रेरणे मप्रत्ययः ईर्मः प्रेरितः अन्तः शरीरप्रान्तो येषां ते पृथुजघनोरस्का इत्यर्थः । सिलिकमध्यमासः सिलिकः श्लिष्टः संलग्नो मध्यमो मध्यप्रदेशो येषां ते सिलिकमध्यमाः कृशोदरा इत्यर्थः षिल संश्लेषे इकप्रत्ययः । शूरणासः शू शीघ्रे रणो रवो युद्धं वा येषां ते शूरणाः यद्वा शूरणो रविस्तदीयाः शूरणाः । दिव्यासः दिवि भवा दिव्याः । अत्र्याः अतन्ति सततं गच्छन्ति अत्र्याः सकृच्युक्ता ब्रह्माकल्पपर्यन्तं रविरथं वहन्ति ॥२१॥

तव शरीरं पतयिष्ण्ववर्त्तवं चित्तं वात-इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥२२॥

हे अर्वन् तव शरीरं पतयिष्णु ऊर्ध्वपतनशीलम् । तव चित्तं ध्रजीमान्गतिमान् वात-इव वेगवत् सूक्ष्मार्थान्गच्छतीत्यर्थः । तव शृङ्गाणि दीप्तयः अरण्येषु वनेषु दवाग्निरूपेण चरन्ति प्रसरन्ति कीदृशानि शृङ्गाणि पुरुत्रा बहुधा विष्ठिता विविधं

स्थितानि विद्युच्चन्द्रार्काग्निषु स्थितानि । जर्भुराणा जर्भुराणानि जृम्भ विकसने विकसितानि ॥ २२ ॥

उप प्रागाद्दसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ २३ ॥

अर्वा अश्वः शसनं विशसनस्थानमुपप्रागात् आगतः । कीदृशोऽर्वा वाजी वजति वाजी गमनशीलः अन्नवान्वा । देवद्रीचा मनसा दीध्यानः । देवान्प्रत्यञ्चति देवद्र्यक् तेन विधन्देवयोश्च ठेरद्र्यञ्चतावप्रत्ययऽइति [पा° ६. ३. १२.] देवशब्दस्य ठेरञ्चतौ परेऽद्र्यादेशः । दीधीते दीध्यानः दीधी दीप्तिदेवनयोः शानच्प्रत्ययः देवान्प्रति गतेन चित्तेन दीप्यमानः । किं च अस्याश्वस्य पुरोऽग्रे अजो नीयते स्थाप्यते तदुक्तम् कृष्णग्रीव आग्नेयो ललाटे पुरस्तादिति । अस्य नाभिः अजो नीयते नाभौ स्थाप्यते तदुक्तम् सौमापौष्णः श्यामो नाभ्यामिति । अस्य पश्चात् कवयः ऋत्विजः अनुयन्ति अनुगच्छन्ति । कीदृशाः कवयः रेभाः रेभते रेभाः रेभृ शब्दे स्तोतार इत्यर्थः ॥ २३ ॥

उप प्रागात्परमं यत्सधस्थमर्वाँ२॥ऽअद्या पितरं मातरं च ।
अद्या देवान्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि ॥ २४ ॥

एवमश्वं स्तुत्वा यजमानमाह । अर्वान् अर्वाश्वः पितरं मातरं च अद्य द्यावापृथिव्यौ अभि समीपे परममुत्कृष्टं यत्सधस्थं सहस्थानं तत् उपप्रागात् अर्वन्शब्दस्य नलोपाभावश्छान्दसः अश्व एव देवलोकं गते हे यजमान जुष्टतमः प्रीततमः सन् अद्य त्वं देवान् गम्याः देवलोकं गच्छेः गमेराशीर्लिङि मध्यमैकवचने गम्या इति रूपम् अश्वेव देवत्वं गताय दाशुषे हविर्दत्तवते तुभ्यं वार्याणि वरणीयानि भोग्यवस्तूनि हि नूनम् आशास्ते देवगणोऽश्वो वा ददात्वित्यर्थः ॥ २४ ॥

III. समिद्धोऽअद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ २५ ॥

द्वादशाप्रीसंज्ञास्त्रिष्टुभो जमदग्निदृष्टाः समित्तनूनपादादयो (6.) देवताः हे जा-

तवेदः ज्ञातज्ञान मनुषो मनुष्यस्य यजमानस्य दुरोणे यज्ञगृहे अद्य त्वं देवान्यज-सि । कीदृशस्त्वम् समिद्धः दीप्तः देवः दानादिगुणयुक्तः । हे मित्रमहः मित्रान्यज-मानान्महति पूजयति मित्रमहाः तत्सम्बुद्धौ हे मित्रमहः आवह च देवानावह यज्ञ चेत्यर्थः । यतः त्वमीदृशोऽसि कीदृशः चिकित्वान् चेतनावान् दूतः कविः क्रान्तदर्शी प्रचेताः प्रकृष्टं चेतो यस्य सोऽत एव यज्ञ ॥ २५॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥ २६॥

तनूनामपां नपात्पौत्रोऽग्निः अद्भो वृद्धाः जायन्ते तेभ्योऽग्निरित्यपां पौत्रत्व-मग्नेः । हे तनूनपात् अग्ने हे सुजिह्व शोभना जिह्वा यस्य स सुजिह्वः नानादिव-त्यानि हवींषि भक्षयन्नपि नोच्छिष्टानि करोतीति वह्नेः शोभनजिह्वत्वम् हे सुजि-ह्व ऋतस्य यानान्यथः स्वदय रोचय भक्षयेत्यर्थः । यायन्ते यैर्येषु वा ते यानास्तान् करणाधिकरणयोरिति [पा० ३.३.११७.] ल्युप्रत्ययः ऋतो यज्ञः तस्य गमनसाधन-मार्गा हवींषि तान्भक्षयेत्यर्थः । हविर्भिर्यज्ञः प्रवर्तते इति यज्ञगमनपन्थानो ह-वींषि । किं कुर्वन् मधा समञ्जन् मधुरेण रसेन संभक्षयन् । किं च नोऽस्माक-मध्वरं यज्ञं देवत्रा कृणुहि देवान्गमय करोतिर्गत्यर्थः । किं कुर्वन् धीभिः बुद्धिभिः सह मन्मानि ज्ञानानि उत अपि च यज्ञमृन्धन् समर्धयन् अस्माकं ज्ञानं यज्ञं च वर्धयन् यज्ञं देवलोकं नयेत्यर्थः ॥ २६॥

नराशꣳसस्य महिमानमेषामुपस्तोषाम यज्ञतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ २७॥

नरा अस्मिन्नाशंसन्तीति नराशंसोऽग्निः प्रजापतिर्वा नरैः प्रशस्यो भवतीति वा । नराशंसस्य प्रजापतेरग्नेर्वा महिमानं महाभाग्यमेषां देवानां मध्ये वयमुप-स्तोषाम उपस्तुमः स्तौतेर्लेटि उत्तमैकवचने सिब्बहुलं लेटीति [पा० ३.१.३४.] सिप्प्रत्यये रूपम् । कीदृशस्य नराशंसस्य यज्ञैः यज्ञतस्य यजेरतच्प्रत्ययः । एषां के-षाम् ये देवाः उभयानि हव्या हवींषि सोमम् इतराणि च स्वदन्ति भक्षयन्ति ।

कीदृशाः देवाः सुक्रतवः शोभनः क्रतुः कर्म येषां ते । शुचयः शुद्धाः निष्पापाः । धिषंधाः धिषं बुद्धिं कर्म वा दधतीति अत्रुगार्षः ॥ २७ ॥

आ॒नु॒ष्वा॒न॒ ईड्यो॑ वन्द्य॒श्चायाह्य॒ग्ने व॑सु॒भिः स॒जोषाः॑ ।
त्वं दे॒वाना॑मसि यह्व॒ होता॒ स ए॑नान्यक्षीषि॒तो य॑जीयान् ॥ २८ ॥

हे अग्ने त्वमायाहि आगच्छ कीदृशस्त्वम् आनुष्वानः आह्वयते आह्वयति देवानित्यानुष्वानः ह्वयतेः शपः श्लुः ह्वः सम्प्रसारणमिति [पा० ६. १. ३२.] अभ्यासस्य सम्प्रसारणं शानचि । ईड्यः स्तुत्यः । वन्द्यः नमनीयः । वसुभिः देवैः सजोषाः समानप्रीतिः । किं च हे यह्व महन् यः त्वं देवानां होता आह्वाता असि स त्वमेनान्यक्षि यज । कीदृशस्त्वम् इषितः प्रेषितः अभीष्टो वा । यजीयान् यजतीति यष्टा अत्यन्तं यष्टा यजीयान् ईयसुनि तुरिष्टेमेयःस्विति [पा० ६. ४. १५४.] तृचो लोपः ॥ २८ ॥

प्राचीनं ब॒र्हिः प्र॒दिशा॑ पृथि॒व्या वस्तो॑रस्या वृज्यते॒ऽअग्रे॒ऽअह्ना॑म् ।
व्यु प्रथते वित॒रं वरी॑यो दे॒वेभ्यो॒ऽअदि॑तये स्यो॒नम् ॥ २९ ॥

अह्नां दिनानामग्रे पूर्वाह्णे बर्हिः प्राचीनं प्रागग्रं वृज्यते प्रस्तीर्यते प्रातर्यागकालस्य प्रशस्तत्वादह्नामग्रे इत्युक्तम् । किं स्वबुद्ध्या चेत्याह (7.) प्रदिशा प्रागग्रं बर्हिः स्तृणातीति अतिवाक्येन प्रदिक्शब्देन श्रुतिवाक्यम् अस्याः पृथिव्या वेदेः वस्तोः वसितुमाच्छादयितुमित्यर्थः । तद्बर्हिः वृज्यमानं सत् विप्रथते विविधं विस्तीर्णं भवति उकारः पादपूरणः । कीदृशं बर्हिः वितरं (8.) वरीयः अत्यन्तं वि वितरमतितराम् वरीयः अत्यन्तमुरु वरीयः प्रस्थस्फवरित्यादिना [पा० ६. ४. १५७.] उरोर्वरादेशः । देवेभ्यः अदितये च स्योनं सुखकरम् ॥ २९ ॥

व्यच॑स्वतीरु॒र्विया॒ विश्र॑यन्तां॒ पति॑भ्यो न ज॒नय॑ः शुम्भमानाः ।
दे॒वीर्द्वारो॑ बृहतीर्विश्वमिन्वा दे॒वेभ्यो॑ भवत सुप्राय॒णाः ॥ ३० ॥

द्वारो देवीः देव्यो विश्रयन्तां विवृता भवन्तु । कीदृश्यो द्वारः उर्विया उरुत्वेन व्यचस्वतीः व्यञ्चनवत्यो गमनवत्यः कथमिव पतिभ्यो जनयो न जनय-इव यथा

जनयः जायाः यथा पत्यर्थं ऊढ्वा विश्रयन्ति । एवं परोक्षमुक्त्वा प्रत्यक्षमाह हे द्यावो देव्यो यूयं देवेभ्यो देवार्थं सुप्रायणाः सुप्रगमना भवत । कीदृश्यः बृहतीः बृहत्यः विश्वमिन्वाः विश्वमेति गच्छति यासु ताः एतेर्न्वक्प्रत्ययः अलुक्समासः शुम्भमानाः शोभमानाः । उर्विया इति द्वार्विशेषणं वा उरवो विशालाः इयाडियाजियारश्चेति (9.).विभक्तेरियाजादेशः चित्वादन्तोदात्तः ॥३०॥

आ सुघ्वयन्ती यजतेऽउपाकेऽउषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मेऽअधि श्रियꣳ शुक्रपिशं दधाने ॥३१॥

आ नि एतयोः सदतामिति सम्बन्धः अधीत्यस्य दधाने इत्यनेन सम्बन्धः । उषासानक्ता अहोरात्रे देवते योनौ यज्ञगृहे आनिसदताम् (10.) सम्यक् उपविशताम् । कीदृश्यौ ते सुघ्वयन्ती स्वयतेः स्वपतेर्वा सुपूर्वस्य ह्वयम् पूर्वपक्षे मकारस्य वकारश्छान्दसः उत्तरपक्षे पकारस्य यकारः परस्परं हसत्यौ साधु स्वपत्यौ वा । यजते यजनीये । उपाके उप समीपमकतस्ते उपाके अक गतौ परस्परं समीपस्थिते । दिव्ये दिवि भवे । योषणे योषे स्त्रीरूपिण्यौ । बृहती बृहत्यौ महत्यौ । सुरुक्मे शोभनं रुक्मं सुवर्णं ययोस्ते साभरणे इत्यर्थः । शुक्रपिशं शुक्लां कपिशां च श्रियं शोभामधिदधाने अधिकं धारयत्यौ । शुक्लमहः कपिशा रात्रिः ॥३१॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥३२॥

दैव्यौ होतारौ ईदृशौ आसाते इति शेषः । कीदृशौ प्रथमा आद्यौ । सुवाचा शोभना वाक् ययोस्तौ । मनुषो मनुष्यस्य यजध्यै यष्टुं यज्ञं मिमाना निर्मिमाणौ । तुमर्थे शध्यैप्रत्ययः । विदथेषु यज्ञेषु प्रचोदयन्ता प्रचोदयन्तौ ऋत्विजः प्रेरयन्तौ । कारू कुरुतस्तौ कारू उणादयो बहुलमिति [पा° ३.३.१.] उण् स्वयं कर्तारौ । प्राचीनं पूर्वदिशि भवं ज्योतिः आहवनीयाख्यं प्रदिशा अभिनयेन श्रुतिवाक्येन दिशन्ता यष्टव्यमिति कथयन्तौ । सर्वत्र विभक्तेराकारः ॥३२॥

MM MM M*

आ नो॑ यज्ञं भार॒ती तू॒यमे॒त्विडा॑ मनु॒षद्दि॒ह चे॒तय॑न्ती ।
ति॒स्रो दे॒वीर्ब॒र्हिरेदꣳ स्यो॒नꣳ सर॑स्वती स्व॒पसः॑ सदन्तु ॥ ३३ ॥

भारती इडा सरस्वती च नोऽस्माकं यज्ञं तूयं क्षिप्रमा एतु आगच्छतु । कीदृशी मनुषत् मनुष्यवदिह कर्मणि चेतयन्ती ज्ञापयन्ती कर्मज्ञानं बोधयन्ती इदं तिसॄणां विशेषणम् । एतास्तिस्रो देवीः देव्यः स्योनं सुखरूपमिदं बर्हिः आसदन्तु आसीदन्तु । कीदृश्यः स्वपसः शोभनमपः कर्म यासां ताः शुभकर्माणः अप इति [निघं० २.१.] कर्मनाम ॥ ३३ ॥

य इ॒मे द्यावा॑पृथि॒वी ज॒नित्री॒ रू॒पैरपि॑ꣳशद्वु॒वना॑नि॒ विश्वा॑ ।
तमद्य होत॒रिषि॑तो यजीया॒न्देवं त्वष्टा॑र॒मिह य॑क्षि वि॒द्वान् ॥ ३४ ॥

हे होतः अद्य इषितः प्रेषितः सन् तं त्वष्टारं देवमिह यज्ञे यक्षि यज । कीदृशः त्वम् यजीयान् अत्यन्तं यष्टा तुरिष्टेमेयःस्विति [पा० ६.४.१५४.] ईयसुनि तृचो लोपः । विद्वान् स्वाधिकारज्ञः । तं कम् यः त्वष्टा इमे द्यावापृथिवी द्यावाभूमी रूपैः अपिंशद्वयवैर्विचित्रे अकरोत् पिश अवयवे तुदादिः लङि शे मुचादीनामिति [पा० ७.१.५९.] नुम् । विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि रूपैः अपिंशत् विविधरूपाण्यकरोत् । कीदृश्यौ द्यावापृथिव्यौ जनित्री जनयतस्ते जनित्र्यौ प्राण्युत्पादिके ॥ ३४ ॥

उ॒पाव॑सृज त्म॒न्या स॑मञ्जन्दे॒वाना॑ पाथ ऋतु॒था हवी॑ꣳषि ।
वन॒स्पति॑ः शमि॒ता दे॒वोऽअ॒ग्निः स्व॑दन्तु ह॒व्यं मधु॑ना घृ॒तेन॑ ॥ ३५ ॥

यजमानो वदति । हे होतः त्मन्या आत्मना हवींषि ऋतुथा ऋतौ-ऋतौ यज्ञकाले त्वमुपावसृज देहि । किं कुर्वन् देवानां पाथः हविः मधुना मधुररसेन घृतेन समञ्जन् संभक्षयन् । देवानामित्युक्तं तानाह वनस्पतिर्यूपः शमिता देवः अग्निः एते त्रयो हव्यं होत्रा संमृज्य दत्तं स्वदन्तु भक्षयन्तु । आत्मन्शब्दस्य विभक्तेर्यादेशे मन्क्षत्रियाज्ञादेरात्मन्निति [पा० ६.४.१४१.] आकारलोपः ॥ ३५ ॥

स॒द्यो ज॒तो व्य॑मिमीत य॒ज्ञम॒ग्निर्दे॒वाना॑मभवत्पु॒रोगाः॑ ।

अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ २६ ॥

देवा हविरदन्तु भक्षयन्तु । कीदृशं हविः अस्याग्नेः वाचि वागिन्द्रियोपलक्षिते मुखे स्वाहाकृतं स्वाहाकारेण कृतम् कीदृशस्यास्य होतुः देवानामाह्वातुः प्रदिशि पूर्वदिशि ऋतस्य ऋ गतौ आहवनीयात्मना स्थितस्य । अस्य कस्य योऽग्निः सद्यो जातः उत्पन्नः सन् यज्ञं व्यमिमीत विशेषेण निरमात् यश्च देवानां पुरोगाः अग्रगामी मुख्योऽभवत् पुरो गच्छति पुरोगाः विट् प्रत्यये विड्वनोरनुनासिकस्यादिति [पा° ६.४.४१.] मस्याकारः ॥ २६ ॥

IV. केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ २७ ॥

अग्निर्देवत्या गायत्री मधुच्छन्दोदृष्टानिरुक्ता । हे अग्ने त्वमुषद्भिः कृत्वा अजायथाः उत्पन्नोऽसि जनेर्लङि रूपम् ङष दाहे उषन्ति हविर्दहन्ति ते उषतोऽग्निहोमकर्तारो यजमानाः । कीदृशस्त्वम् अकेतवे अज्ञानाय मर्याः मर्याय मनुष्याय केतुं ज्ञानं कृण्वन् कुर्वन् विभक्तिव्यत्ययः । नास्ति पेशः सुवर्णं यस्य स अपेशाः तस्मै अपेशसे मर्याय पेशः सुवर्णं कुर्वन् ॥ २७ ॥

ज्रीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ २८ ॥

एवमग्निं स्तुत्वाश्वरक्षणे योधा युद्धोपकरणानि (11.) च स्तूयन्ते । भरद्वाजसुतपायुः संग्रामाङ्गानि प्रत्यृचं स्तौति त्रिष्टुब्भिः । वर्म स्तूयते यत् यदा वर्मी कवचवान् समदां संग्रामाणामुपस्थे उत्सङ्गे याति तदा प्रतीकं सेनामुखं ज्रीमूतस्य मेघस्येव भवति । सह माद्यन्ति योधा यासु ताः समदः संग्रामाः मदेः क्विप् । मेघस्य मुखं विद्युत्स्तनयित्नुधाराभिर्यथासक्तम् एवं कुत्स्यश्वरथपादात्यस्त्रजालतूर्यनादशरौघैः सेनामुखमसक्तं भवतीत्यर्थः । अतोऽहं ब्रवीमि हे वर्मिन् अनाविद्धया अक्षतया तन्वा शरीरेण त्वं जय शत्रून्हत्वा जयं प्राप्नुहि । किं च स वर्मणः महिमा त्वा त्वां पिपर्तु पालयतु ॥ २८ ॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।

धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥३१॥

धनुः स्तूयते । धन्वना धनुषा कृत्वा वयं गाः धेनूः जयेम । धन्वना आजिं मार्गं जयेम अजन्ति गच्छन्ति यस्मिन्नसावाजिर्मार्गः । तीव्राः ज्याः समदः संग्रामान्धन्वना जयेम । धनुः शत्रोरपकामं मनोरथाभावं कृणोति करोति कामस्याभावोऽपकामम् अव्ययं विभक्तीत्यादिना [पा० २.१.६.] अर्थाभावेऽव्ययीभावः । किं च धन्वना सर्वाः प्रदिशो जयेम । ईदृशो धनुःप्रभावः ॥३१॥

वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्याऽइयꣳ समने पारयन्ती ॥४०॥

ज्या स्तूयते । इयं ज्या धन्वन् धन्वनि धनुषि अधि वितता उपरि विस्तारिता सती शिङ्क्ते अव्यक्तशब्दं कुरुते शिञि अव्यक्ते शब्दे अदादिः इदितो नुम् धातोरिति [पा० ७.१.५८.] नुम् । का इव योषेव यथा योषा कामिनी कामुकस्य ज्ञानायाव्यक्तं वदति एवमियमपि । कीदृशी ज्या समने संग्रामे पारयन्ती पार तीर कर्मसमाप्तौ अदन्तः संग्रामादुत्तारयन्ती विजयं कुर्वन्तीत्यर्थः । इयं का या ज्या कर्णमागनीगन्ति आकृष्टा सती योद्धुः कर्णं प्रत्यत्यर्थमागच्छति यङ्लुकि गमेः रूपम् । कीदृशी उत्प्रेक्ष्यते वक्ष्यन्तीव वक्तुमिच्छन्तीव अन्योऽपि वक्तुमिच्छन्कर्णं प्रत्यागच्छति । प्रियं सखायमिष्टं मित्रं वाणरूपं परिषस्वजाना आलिङ्गन्ती स्वञ्जेः शानचि शपः श्लौ सति द्वित्वम् । इत् पादपूरणार्थः ॥४०॥

तेऽआचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यताꣳ संविदानेऽआर्ल्ली३ऽइमे विष्फुरन्तीऽअमित्रान् ॥४१॥

धनुःकोटी स्तूयेते । ते प्रसिद्धे इमे आर्ल्ली आर्ल्यौ धनुःकोटी उपस्थे उत्सङ्गे मध्यभागे बिभृतां धारयतां शरमिति शेषः । तत्र दृष्टान्तः माता पुत्रमिव यथा जननी पुत्रमुत्सङ्गे बिभर्ति । शत्रून् अपविध्यतां ताडयतां च । कीदृश्यौ आर्ल्यौ आचरन्ती आचरन्त्यौ आगच्छन्त्यौ धानुष्कं प्रति तत्र दृष्टान्तः समना योषा इव वचनव्यत्ययः समना समानमेकपतिगतं मनो ययोस्ते समनसौ विभक्तेर्डादेशः

समचित्ते योधा योधे स्त्रियौ यथा कान्तमागच्छतः । संविदाने संविदाते ते संविदाने समो गमीत्यादिना [पा॰ १.३.२१.] शानच् परस्परं संकेतं कुर्वाणे । अमित्रान् शत्रून्प्रति विष्फुरन्ती टङ्कारं (12.) कुर्वाणे ॥४१॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥४२॥

इषुधिः स्तूयते । य इषुधिः तूणो बह्वीनामिषूणां पिता पालकः । यतो वाणान्धरति । अस्येषुधेर्बहुः पुत्रः । वाणसमूहः पुत्रस्थानीयः पाल्यमानत्वात् । पुत्रान्बहून् त्रायतऽइति पुत्रः । स इषुधिः समना (13.) संग्रामान् अवगत्य ज्ञात्वा चिश्चाकृणोति चिश्चेति शब्दं करोति शब्दानुकरणमेतत् वाणे तूणान्निष्क्राम्यमाणे चिश्चेति शब्दो भवति । च पुनः स इषुधिर्धानुष्केन पृष्ठे निनद्धः बद्धोऽपि प्रसूतः अनुज्ञातः सन् सर्वाः पृतनाः जयति शत्रुसेनाः पराभवति । कीदृशाः पृतनाः सङ्काः सङ्काः सचतेः सम्पूर्वाद्वा किरतेरिति [निरु॰ १.१४.] यास्कोक्तेः सचतेः किरतेर्वा ङपम् सचन्ते सम्बध्यन्ते संकीर्यन्ते वा योधा यासु ताः सङ्काः । विवक्षातः कारकाणि भवन्तीति वचनादिषुधेः कर्तृत्वम् ॥४२॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र-यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥४३॥

अर्धेन सारथिरर्धेन रश्मयः स्तूयन्ते । जगती इयम् । सुषारथिः सुसारथिः शोभनः सारथिः यत्र-यत्र प्रदेशे कामयते इच्छति मयात्र गन्तव्यमिति तत्र-तत्र पुरो वर्तमानान् वाजिनः नयति प्रापयति । कीदृशः रथे तिष्ठन् । तं स्तुम इति शेषः । इदानीं रश्मयः स्तूयन्ते हे जनाः अभीशूनां रश्मीनां महिमानं महाभाग्यं यूयं पनायत स्तुत । ये रश्मयः पश्चाद्वर्तमानाः सन्तः मनोऽश्वचित्तमनुयच्छन्ति अनुगम्य गृह्णन्ति वशवर्तिनं कुर्वन्तीत्यर्थः । पन स्तुतौ गुपूधूपेत्यादिना [पा॰ ३.१.२८.] आयप्रत्ययान्तात्पनेर्लोट् ॥४३॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।

अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति शत्रूँ१॥रनपव्ययन्तः ॥ ४४ ॥

अश्वाः स्तूयन्ते । वृषाः अश्वाः पाणौ हस्ते येषां ते वृषपाणयोऽश्ववाराः तीव्रान्घोषान् जय-जयेति शब्दान् कृण्वते कुर्वन्ति । अश्वा अपि रथेभिः रथैः सह वाजयन्तः गच्छन्तः सन्तस्तीव्रान्घोषान् हेषाशब्दान्कुर्वन्ति शत्रून् क्षिणन्ति नाशयन्ति च । कीदृशाः अश्वाः प्रपदैः पादाग्रैः खुरैः अमित्रान् रिपून् अवक्रामन्तः आक्रामन्तः । अनपव्ययन्तः व्यय क्षये अदन्तश्चुरादिः अपव्ययन्ति ते अपव्ययन्तः न अपव्ययन्तोऽनपव्ययन्तः अनश्यन्तः समर्थाः । वज गतौ स्वार्थे णिच् वाजिनः ॥ ४४ ॥

रथवाहनꣳ हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥ ४५ ॥

शकटद्वारा रथः स्तूयते । अस्यानसो रथवाहनं नाम रथं वहतीति रथवाहनम् वाजपेयेऽनसि रथस्यारोप्यमाणत्वात् । तथास्य हविः हविर्धानं नाम पृषोदरादिवाडुत्तरार्धलोपः । यत्रानसि अस्य योद्धुर्वर्म आयुधं च निहितं स्थापितम् तत्रानसि वयं रथमुपसदेम उपसादयामः । कीदृशं रथं शग्मं सुखकरम् । कीदृशा वयम् विश्वाहा सर्वदा सुमनस्यमानाः शोभनं मनो येषां ते सुमनसः असुमनसः सुमनसो भवन्ति सुमनस्यन्ते भृशादिभ्यो भुव्यच्वेरिति [पा° ३. १. १२.] क्यङ् ततः शानच् अनुकूलचित्ता इत्यर्थः । तत्रेत्यस्य संहितायां निपातस्य चेति [पा° ६. ३. १३६.] दीर्घः ॥ ४५ ॥

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृधाः सतोवीरा उरवो व्रातसाहाः ॥ ४६ ॥

रथगोपान्स्तौति । ईदृशा नरा अस्माकं रथं गोप्तारो भवन्त्विति शेषः । कीदृशाः स्वादुसंसदः स्वादु सुखं यथा तथा संसीदन्ति ते स्वादुसंसदः । पितरः पान्ति ते पितरः रक्षितारः । वयोधाः वयोऽन्नमायुर्वा दधति धारयन्ति वयोधाः । कृच्छ्रेश्रितः इत्येकं पदम् कृच्छ्रे कष्टे श्रीयन्ते सेव्यन्ते कृच्छ्रेश्रितः कर्मणि क्विप् अलुक् सप्तम्याः दुःखे सति आश्रयणयोग्याः दुःखनाशकत्वात् यद्वा सप्तमी द्वितीय-

यार्थे कृच्छ्रं श्रयन्ति कृच्छ्रेश्रितः दुःखं प्राप्यापि स्वामिसेवनपराः । शक्तीवन्तः शक्तिः सामर्थ्यमायुधं वा अस्ति येषां ते अश्वरश्मिमतीत्यादिप्रतिशाख्यसूत्रेण [३. ६. २.] शक्तिशब्दस्य दीर्घः । गभीराः गम्भीरबला गम्भीरप्रज्ञाश्च । चित्रसेनाः चित्रा नानाविधा सेना येषां ते । इषुबलाः इषुभिर्बाणैर्बलं येषां ते । अमृधाः मृधा मृद्वो न भवन्त्यमृधाः कठिनाङ्गा ऽयशासना वा । सतोवीराः इत्येकं पदम् सतो ऽश्वमेधयाजिनो वीराः शूराः यद्वा सतो विद्यमानस्य बलस्य वीराः प्रेरकाः विविधमीरयन्तीति वीराः षष्ठ्या अलुक् । उरवः विशालाः पृथुजघनोरस्का इत्यर्थः । व्रातसाहाः व्रातान् शूरसमूहान्सहन्ते ऽभिभवन्ति ते व्रातसाहाः पचाद्यच् अभिमातिषहेत्यादिना [प्रातिशा° ३. ६. २७.] सूत्रेण सहेरुपधादीर्घः ॥ ४६ ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी ऽअनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो ऽअघशंस ईशत ॥ ४७ ॥

जगती लिङ्गोक्तदेवता । ब्राह्मणासः ब्राह्मणाः नो ऽस्मान्पान्तु रक्षन्तु पालित्यस्यार्थवशाद्वचनव्यत्ययः कार्यः । पितरः च पान्तु । कीदृशाः सोम्यासः सोम्याः सोमसम्पादिनः सोमपानयोग्या वेत्युभयोर्विशेषणम् । द्यावापृथिवी द्यावाभूमी नः पाताम् । कीदृश्यौ शिवे कल्याणकारिण्यौ । अनेहसा अनेहसौ नास्ति एकोऽपराधो ययोस्ते अपराधनिवर्तिके । किं च पूषा सूर्यो नो ऽस्मान्दुरितात् पातु । एवं परोक्षेणोक्ता प्रत्यक्षमाह हे ऋतवृधः ऋतं सत्यं यज्ञं वा वर्धयन्ति ऋतवृधः देवाः संहितायामृतस्य दीर्घः रक्ष रक्षतास्मान् वचनव्यत्ययः । माकिः मा कश्चन अघशंसः पापी नो ऽस्माकमीशत ऐश्वर्यं मा करोतु वयं दुष्टवशा मा भूमेत्यर्थः । अघं पापं शंसतिं वक्ति प्रकाशयति वाघशंसः दुष्टः । ईशतेति वचनव्यत्ययः ॥ ४७ ॥

सुपर्णं वस्ते मृगो ऽअस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ ४८ ॥

द्वाभ्यामिषुं स्तौति आद्या त्रिष्टुप् अन्यानुष्टुप् । या इषुः सुपर्णं पक्षिपिङ्गं व-

स्ति परिधत्ते वस परिधाने शोभनं पर्ण पिङ्गं यस्य स सुपर्णः पक्षी तस्य विकारः सौपर्णम् तत्र कृत्स्नवन्निगमा भवन्तीति [निरु० २.५.] यास्कोक्तेः सुपर्णशब्देन तत्पिङ्गं गृह्यते वाणपुङ्खे पिङ्गस्यारोप्यमाणत्वात् । किं च अस्या इषोः दत्तः (14.) फलं मृगः मृगयतेऽन्विष्यति रिपून्हन्तुमिति मृगः मृग मार्गणे चुरादिरदन्तः पचाद्यच् मृगो मृगयतेरिति [निरु० १.११.] यास्कः शल्यं हि वेध्यं मृगयते । किं च या इषुः गोभिः गोविकारैः स्नायुभिः संनद्धा बद्धा प्रसूता धनुष्मता प्रेरिता सती पतति शत्रुबलं प्रति गच्छति । किं च यत्र नरो योद्धारः संद्रवन्ति च सम्यक् गच्छन्ति विद्रवन्ति च विविधं प्रसरन्ति चौ समुच्चये तत्र रणे इषवः वाणाः अस्मभ्यं शर्म सुखं यंसन् यच्छन्तु यमु उपरमे लेटि तिप इत्लोपेऽडागमे सिब्बहुलं लेटीति [पा० ३.१.३४.] सिबागमे यंसन्निति द्रूपम् सुखं ददतु ॥४८॥

ऋजीते परिवृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमोऽधिब्रवीतु नोऽदितिः शर्म यच्छतु ॥४९॥

ऋजुः सरला इतिर्यस्याः सा ऋजीतिः टिलोप आर्षः । हे ऋजीते ऋजुगामिनि हे इषो नोऽस्मान्परिवृङ्धि परिवर्जय अस्मासु मा पतेत्यर्थः । किं च नोऽस्माकं तनूः शरीरम् अश्मा पाषाणतुल्यदृढा भवतु । सोमः नोऽस्मानधिब्रवीतु अधिकान्वदतु । अदितिः देवमाता शर्म सुखं यच्छतु ददातु ॥४९॥

आजङ्घन्ति सान्वेषां जघनाँ२॥ऽउपजिघ्रते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥५०॥

अनुष्टुप् । कशा स्तूयते अज गतौ क्षेपणे च । अश्वाः अज्यन्ते क्षिप्यन्ते यया सा अश्वाजनी हे अश्वाजनि कशे समत्सु संग्रामेषु त्वमश्वान् चोदय प्रेरय जयाय कीदृशानश्वान् प्रचेतसः प्रकृष्टं चेतो मनो येषां ते । हे कशे यया त्वयाश्ववारा एषामश्वानां सानु सानूनि सानुतुल्यानि मांसोपचिताङ्गानि आजङ्घन्ति वचनव्यत्ययः आघ्नन्ति ताडयन्ति जघनान्कटिभागान् उपजिघ्रते निघ्नन्ति । तुरङ्गारोहा यया श्वान्वशयन्ति सा त्वमश्वान्प्रेरयेत्यर्थः ॥५०॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥५१॥

हस्तघ्नः स्तूयते । सप्त त्रिष्टुभः हस्ते स्थितो हन्ति हस्तघ्नः खेटकः यद्वा हस्त हन्ति प्राप्नोति हस्तघ्नः प्रकोष्ठत्राणम् पुमांसं मां विश्वतः सर्वतः परिपातु रक्षतु । किम्भूतो हस्तघ्नः विश्वा विश्वानि सर्वाणि वयुनानि ज्ञानानि विद्वान् जानन् । तथा पुमान् पुंस्त्वयुक्तः शूर इत्यर्थः (15.) । यो हस्तघ्नो भोगैः (16.) स्वशरीरावयवैः कृत्वा बाहुं पर्येति हस्तं वेष्टयति क-इव अहिरिव यथाहिः सर्पो भोगैः स्वदेहैः हस्तादिकं वेष्टयति । कीदृशः ज्यायाः हेतिं वाणं शत्रुप्रेरितम् परिबाधमानः निवर्तयन् खेटकपक्षे प्रकोष्ठत्राणपक्षे तु ज्याया हेतिं (17.) प्रहारं निवारयन् ज्याघातस्य निवारकत्वात् ॥५१॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धोऽसि वीडयस्वास्थाता ते जयतु जेत्वानि ॥५२॥

तिस्र ऋचो रथदेवताः । हे वनस्पते वनस्पतिविकार काष्ठमय रथ कृत्स्नवन्निगमः [निरु० २.५.] त्वं वीड्वङ्गः दृढाङ्गो भूयाः भव वीडूनि अङ्गानि यस्य । कीदृशः अस्मत्सखा अस्माकं मित्रभूतः । प्रतरणः प्रतरति संग्रामपारं गच्छति प्रतरणः । सुवीरः शोभनो वीरो रथी यत्र । किं च हे रथ यतः त्वं गोभिः गोविकारैश्चर्मभिः संनद्धः बद्धोऽसि अतो वीडयस्व आत्मानं स्तम्भय । किं च ते तवास्थाता आरोढा रथी जेत्वानि जेतव्यानि रिपुधनानि जयतु हि पादपूरणः ॥५२॥

दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥५३॥

हे अध्वर्यो त्वं हविषा कृत्वा रथं यज । कीदृशं रथम् दिवः द्युलोकात् पृथिव्याः भूमेः सकाशात् पर्युद्भृतं समन्ताद्धृतम् ओजः तेजः । तथा वनस्पतिभ्यो वृक्षेभ्यः पर्याभृतं समन्तादाहृतमानीतं सहः बलम् । तथा अपां जलानामोज्मानं तेजः सारभूतम् ओज बलतेजसोरिति धातोः अन्येभ्योऽपि दृश्यन्तेऽइति [पा० ३.

२.७५.] मनिन् ओजयति बलिनं करोतीति ओज्मा तम् । द्यावाभूमिवृक्षजलानां तेजश्चतुष्टयेन निर्मितमित्यर्थः । तथा गोभिः किरणैः पर्यावृतं वेष्टितम् तेजोनिर्मितत्वात् यद्वा गोभिः चर्मभिर्वेष्टितम् । तथा इन्द्रस्य वज्रमिन्द्रवज्राज्जातमित्यर्थः इन्द्रो यदा वृत्राय वज्रं प्रजहार तदा वृत्रशरीरकाठिन्येन प्रतिहतं चतुर्धा जातम् यूपः स्फ्यः रथः शरश्चेति चतुःखण्डाः तत्र यूपस्फ्यौ विप्रैर्गृहीतौ रथशरौ नृपैरिति श्रुतिकथानुसंधेया इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारित्युपक्रम्य रथस्तृतीयमित्यभिधाय रथेन च शरेण चेति राजन्यबन्धव इति श्रुतेः [१.२.४.१.२.] । ईदृशं रथं यजेत्यर्थः ॥५३॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥५४॥

हे रथ हे देव स त्वं हव्या हवींषि प्रतिगृभाय प्रतिगृह्णाण । कीदृशः त्वम् इन्द्रस्य वज्रः वज्रोत्पन्नत्वात् । मरुतामनीकं मुखं मुख्यः देवानां जयप्रापकत्वात् । मित्रस्य देवस्य गर्भः गीर्यते स्तूयते गर्भः गृणातेर्भप्रत्ययः सूर्येण स्तूयमानः । वरुणस्य नाभिः नभ्यतेऽरिर्हन्यतेऽनेनेति नाभिः नभ हिंसायाम् इण्प्रत्ययः वरुणस्य हननसाधनम् । नोऽस्माकमिमां हव्यदातिं हविषो दानं जुषाणः सेवमानः । सेमामित्यत्र सोऽचि लोपे चेत्पादपूरणमिति [पा° ६.१.१३४.] संधिः । गृभाय गृह्णातेर्हलः श्नः शानज्झावित्यनुवृत्तौ [पा° ३.१.८३.] छन्दसि शायजपीति [पा° ३.१.८४.] ह्नौ परे श्नाप्रत्ययस्य शायजादेशः हस्य भश्च ॥५४॥

उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयोऽअपसेध शत्रून् ॥५५॥

तिस्र ऋचो दुन्दुभिदेवत्याः । हे दुन्दुभे स त्वं पृथिवीमुत द्यामन्तरिक्षमपि उपश्वासय उपशब्दय (18.) श्वसिः शब्दार्थः । विष्ठितं विविधं स्थितं जगत् स्थावरजङ्गमात्मकं विश्वम् पुरुत्रा बहुधा ते त्वां मनुतां जानातु दुन्दुभिर्नदतीति । स त्वं दूराद्दवीयः अतिदूरं शत्रूनपसेध अपगमय अत्यन्तं दूरं दवीयः स्थूलदूरेति [पा° ६.४.१५६.] रेफलोपपूर्वगुणौ । कीदृशः त्वम् इन्द्रेण देवैश्च सजूः प्रीतियुक्तः ॥५५॥

आक्रन्द्य बलमोजो न आधा निष्टनिहि दुरिता बाधमानः ।
अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥५६॥

हे दुन्दुभे त्वं बलं शत्रुसैन्यमाक्रन्द्य रोदय पलायध्वं मदीयाः सर्वे कृता इत्यादिदीनरवं कारयेत्यर्थः । नोऽस्माकमोजः तेजः आधाः आधेहि देहि । दुरिता दुरितानि पापानि बाधमानो निराकुर्वन्सन् निष्टनिहि शब्दं कुरु स्तन शब्दे चुरादिरदन्तः । किं च इतोऽस्मत्सेनायाः सकाशात् दुच्छुनाः दुच्छुनः दुष्टाश्च ते श्वानश्च दुच्छुनाः तान् दुष्टान् शुनः श्वसदृशान् शत्रूनपप्रोथ नाशय प्रोथतिर्नाशनार्थः । यतः त्वमिन्द्रस्य मुष्टिः असि मुष्टिवदङ्गभूतोऽसि अतो वीडयस्व आत्मानमस्मान्दृढय ॥५६॥

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥५७॥

हे इन्द्र अमूः शत्रुसेनाः त्वमा अज समन्तात्परिक्षिप अज गतिक्षेपणयोः । यतो दुन्दुभिः केतुमत् प्रज्ञावत् यथा वावदीति अत्यन्तं नदति अत इमाः अस्मत्सेनाः प्रत्यावर्तय जयं प्रापय्य प्रत्यानय । किं च नोऽस्माकं नरः योधाः संचरन्ति कीदृशा नरः अश्वपर्णाः अश्वस्येव पर्ण पतनं येषां ते । किं च अस्माकं रथिनः रथस्थाः जयन्तु युद्धे जयं प्राप्नुवन्तु ॥५७॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शितिपो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः सँहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्येवं ॥५८॥

अश्वमेधे श्रुतिरस्ति द्वे वैवैतेऽएकादशिन्यावालभेतेति [१३.५.१.३.] तयोरेकादशिन्योः पशवस्तद्देवताश्च कण्डिकाद्वयेनोच्यन्ते तेनेमानि ब्राह्मणवाक्यानि द्रव्यदेवताप्रतिपादकानि न तु मन्त्राः । कृष्णा ग्रीवा यस्य स कृष्णग्रीवः पशुराग्नेयः अग्निदेवत्यः १. मेषी सारस्वती सरस्वतीदेवताका २. बभ्रुः पिङ्गलवर्णः पशुः सौम्यः सोमदेवत्यः ३. श्यामः कृष्णवर्णः पौष्णः पूषदेवत्यः ४. शिति श्यामं पृष्ठं

यस्य स शितिपृष्ठः बार्हस्पत्यः बृहस्पतिदेवत्यः ५. शित्यो विचित्रवर्णो वैश्वदेवः विश्वदेवदेवत्यः ६. अरुणाः रक्तः ऐन्द्रः इन्द्रदेवत्यः ७. कल्माषः कर्बुरो मारुतः मरुद्देवत्यः ८. संहितः दृढाङ्गः ऐन्द्राग्नः इन्द्राग्निदेवत्यः ९. अधोरामः अधोदेशे श्वेतः सावित्रः सवितृदेवत्यः १०. एकः शितिः श्वेतः पादो यस्य स एकशितिपात् एकपदे श्वेतोऽन्यत्र कृष्णः पेत्वः पतनशीलो वेगवान्पशुः वारुणाः वरुणदेवत्यः ११. एवमेकादश ज्ञाताः ॥५८॥

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशंगौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणाः पेत्वः ॥५९॥

द्वितीयैकादशिनीपशुदेवानाह । रोहितो रक्तोऽञ्जिस्तिलको यस्य सोऽनड्वान्वृषभोऽनीकवतेऽग्नये आलभ्यः अनीकं मुखं सैन्यं वा यस्य सोऽनीकवान् तस्मै १. अधोरामौ अधोभागे श्वेतौ द्वौ पशू सावित्रौ सवितृदेवतौ २. ३. रजतवर्णा नाभिर्ययोस्तौ रजतनाभी द्वौ पौष्णौ पूषदेवत्यौ ४. ५. पिशंगौ पीतौ तूपरौ निःशृङ्गौ वैश्वदेवौ विश्वदेवदेवत्यौ ६. ७. कल्माषः कर्बुरो मारुतः ८. कृष्णः श्यामोऽजो मेषः आग्नेयः अग्निदेवत्यः ९. मेषी सारस्वती १०. पेत्वः वेगवान्वरुणदेवत्यः ११. एवमेकादश ॥५९॥

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्रेऽऔष्णिकाय त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्याऽअष्टाकपालः ॥६०॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकोनत्रिंशोऽध्यायः ॥२९॥ ॥

अथाग्निषोमीयस्य पशुपुरोडाशमनुदिशामाविष्टीर्निर्वपतीत्युपक्रम्य तदाङ्कर्दशकृ-विषमत्यामिष्टिं (19.) निर्वपेदिति श्रुत्या दशकृत्वोष्काविष्टिसंज्ञेष्टिः कथिता तस्या देवता कृवींषि चाकृ । इमान्यपि ब्राह्मणवाक्यानि न मन्त्राः । अग्नेऽष्टाकपालः पुरोडाशः कार्यः अष्टसु कपालेषु संस्कृतोऽष्टकपालः तद्धितार्थोत्तरपदसमाहारे चेति [पा° २.१.५१.] समासः अष्टनः कपाले कृविषीति [पा° ६.३.४६. वा° २.] अष्टन्शब्दस्य दीर्घः कीदृशायाग्नये गायत्राय गायत्र्या स्तुताय त्रिवृते त्रिवृत्स्तोमेन स्तुताय राथन्तराय रथन्तरसाम्ना स्तुताय १. इन्द्राय एकादशकपालः पुरोडाशः समासः पूर्ववत् कीदृशाय इन्द्राय त्रैष्टुभाय त्रिष्टुभा स्तुताय पञ्चदशाय पञ्चदश-स्तोमस्तुताय बार्हताय बृहत्सामस्तुताय २. विश्वेभ्यो देवेभ्यः द्वादशकपालः पु-रोडाशः कीदृशेभ्यः जागतेभ्यः जगत्या छन्दसा स्तुतेभ्यः सप्तदशेभ्यः सप्तदशस्तोम-स्तुतेभ्यः वैरूपेभ्यः वैरूपसामस्तुतेभ्यः ३. मित्रावरुणाभ्यां पयस्या पयसि श्रितः चरुः कीदृशाभ्यामानुष्टुभाभ्याम् अनुष्टुभा स्तुताभ्याम् एकविंशाभ्यामेकविंशस्तो-मस्तुताभ्याम् वैराजाभ्यां वैराजसामस्तुताभ्याम् ४. बृहस्पतये चरुः कीदृशाय पा-ङ्क्ताय पङ्क्तिछन्दसा स्तुताय त्रिणवाय त्रिणवस्तोमस्तुताय शाक्वराय शाक्वरसामस्तु-ताय ५. सवित्रे द्वादशकपालः पुरोडाशः कीदृशाय सवित्रे औष्णिहाय उष्णिक्छ-न्दसा स्तुताय त्रयस्त्रिंशाय त्रयस्त्रिंशस्तोमस्तुताय रैवताय रैवतसामस्तुताय ६. एवं छन्दःस्तोमसामसहितान् षट् देवानभिधाय चतुरः केवलानाह प्राजापत्यश्च-रुः प्रजापतिदेवत्यश्चरुः कार्यः ७. विष्णुपत्न्यै अदित्यै चरुरेव ८. वैश्वानराय वैश्वा-नरगुणविशिष्टायाग्नये द्वादशकपालः पुरोडाशः ९. अनुमत्यै देवतायै अष्टाकपालः पुरोडाशः कार्यः १०. दशकृत्वोऽवेष्टेर्देवताकृवींष्यपि अश्वमेधोपयोगित्वादुक्तानि समिद्धोऽअग्नन्नाश्वमेधिकोऽध्याय इति कात्यायनोक्तेः [अनुक्रमण्याम्] ॥ ६० ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । शिष्टाश्वमेधमन्त्रोक्तिर्गतोऽध्यायोऽङ्कदृ-ग्मितः ॥ २१ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥ ॥

I. ॥ १-६ [योनाऽइह] - ८ [इलोपं°] - ११ ॥ १-११ ॥ ॥

II. ॥ ३७-३९ ॥१२-१४॥ ४१ ॥१५॥ ४० ॥१६॥ ५१ ॥१७॥ ४२ ॥१८॥ ४८ ॥१९॥ ५२ [वील्यं°] ॥२०॥ ४३ ॥२१॥ ५० ॥२२॥ ५५ ॥२३॥ ॥

III. ॥ १२-१७ [°पश्यन्य° K.] - १८ [पश्यन्ज्ञि° K. - °आनल्ला°] - २४ ॥२४-३६॥ ॥

IV. ॥ २५-३३ [°विल्ला] - ३६ ॥३७-४८॥ ॥

V. ॥ ६० ॥४९॥ ॥ VI. ॥ ५८ ॥५०॥ ॥

VII. ॥ ५९ ॥५१॥ ॥ सप्तानुवाकेष्वेकपञ्चाशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायामेकत्रिंशोऽध्यायः ॥३१॥ ॥

I. देव सवितः प्रसुव - - वाचं नः स्वदतु ॥१॥

तत्सवितुर्वरे° ॥२॥

श्रीगणेशाय नमः । इत ऊर्ध्वं पुरुषमेधः । द्वावध्यायौ नारायणः पुरुषोऽपश्यत् । ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपं मध्यमे वा यूपे यथेष्टं नियोजनम् ॥ आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति । तत्र देव सवितः [११.७.] तत्सवितुः [३.३५.] द्वे व्याख्याते ॥१॥२॥

विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥३॥

हे देव सवितः विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय । यद्भद्रं कल्याणं तन्नोऽस्मान्प्रति आसुव आगमय ॥३॥

विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥४॥

वयं सवितारं हवामहे आह्वयामः किम्भूतं वसोः वासयितुश्चित्रस्य नाना-

विधस्य राधसः धनस्य विभक्तारं विभज्य दातारम् नृचक्षसं नृणां द्रष्टारं यथायोग्यम् ॥४॥

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयायायोगूं कामाय पुंश्चलूमतिक्रुष्टाय मागधम् ॥५॥

अतः परं पुरुषमेधकाः पशवः आ अध्यायसमाप्तेः । ततः प्रतियूपमेकैकमेकादशिनं नियुज्य ब्राह्मणादीनष्टचत्वारिंशत्संख्यान्पुरुषान्प्रकामोद्याय सदमित्यत्तानग्निष्ठे यूपे नियुनक्ति इतरेषु यूपेष्वेकादशैकादश पुरुषान् वर्णायानुरुधमित्यादीन्नियुनक्ति ॥ ब्रह्मणे ब्राह्मणम् तत्र ब्रह्मणे नुष्टं नियुनज्मीति अग्निष्ठे ब्राह्मणं प्रथमं नियुनक्ति । एवमग्रे सर्वेषां यूपे एव बन्धनम् चतुर्थ्यन्तं देवतापदं द्वितीयान्तं पुरुषपदं बोद्धव्यम् ॥ क्षत्राय राजन्यं क्षत्रियम् २. मरुद्भ्यो वैश्यम् ३. तपसे शूद्रम् ४. तमसे तस्करं स्तेनम् ५. नारकाय वीरहणं नष्टाग्निं शूरं वा ६. पाप्मने क्लीबं नपुंसकम् ७. आक्रयाय अयोगूमयसो गन्तारम् ८. कामाय पुंश्चलूं व्यभिचारिणीम् ९. अतिक्रुष्टाय (1.) मागधं मगधदेशजं क्षत्रियायां वैश्यपुंसो जातं वा (2.) १० ॥५॥

नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्टायै भीमलं नर्माय रेभं हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥६॥

नृत्ताय सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतः ११. गीताय शैलूषं नटम् १२. धर्माय सभाचरं सभायां चरतीति तम् १३. नरिष्टायै (3.) भीमलं भयंकरम् १४. नर्माय रेभं शब्दकर्तारं वाचाटम् १५. हसाय कारिं करणविशिष्टम् १६. आनन्दाय स्त्रीषखं स्त्रियाः सखायम् १७. प्रमदे कुमारीपुत्रं कानीनम् १८. मेधायै रथकारं माहिष्येण करिण्यां जातम् ११. धैर्याय तक्षाणं सूत्रधारम् २०. ॥६॥

II. तपसे कौलालं मायायै कर्मारं दृषाय मणिकारं शुभे वपं शैर-

व्याघाऽइषुकारꣳ केत्यै धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्ज मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥ ७॥

तपसे कौलालं कुलालापत्यम् २१. मायायै क्मारं लोहकारम् २२. रूपाय मणिकारं रत्नकर्तारम् २३. शुभे शुभाय वपं वीजवप्तारम् २४. शरव्यायै इषुकारं वाणकर्तारम् २५. केत्यै धनुःकारं चापकारिणम् २६. कर्मणे ज्याकारं प्रत्यञ्चनकर्तारम् (4.) २७. दिष्टाय रज्जुसर्ज रज्ज्वाः स्रष्टारं निर्मातारम् २८. मृत्यवे मृगयुं मृगग्राहम् २९. अन्तकाय श्वनिनं शुनो नेतारम् ३०. ॥ ७॥

नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यतायाऽअकितवं पिशाचेभ्यो बिदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८॥

नदीभ्यः पौञ्जिष्ठ (5.) पुञ्जिष्ठोऽन्त्यजः (6.) पुल्कसस्तदपत्यम् ३१. ऋक्षीकाभ्यो नैषादं निषादपुत्रम् ३२. पुरुषव्याघ्राय दुर्मदमुन्मत्तम् ३३. गन्धर्वाप्सरोभ्यो व्रात्यं सावित्रीपतितम् ३४. प्रयुग्भ्यः उन्मत्तम् ३५. सर्पदेवजनेभ्यः अप्रतिपदं प्रतिपद्यते ज्ञातानीति प्रतिपत् अतथाविधं विकलमित्यर्थः ३६. अयेभ्यः कितवं द्यूतकारम् ३७. ईयतायै अकितवमद्यूतकृतम् ३८. पिशाचेभ्यः बिदलकारीं (7.) वंशविदारिणीं वंशपात्रकारिणीम् ३९. यातुधानेभ्यः कण्टकीकारीं कण्टकी "कर्म तत्कारिणीम् (8.) ४०. ॥ ८॥

संधये जारं गेहायोपपतिमार्त्यै (9.) परिवित्तं निर्ऋत्यै परिविविदानमराड्याऽएदिधिषुःपतिं निष्कृत्यै पेशस्कारीꣳ संज्ञानाय स्मरकारीं प्रकामोद्यायोपसदं वर्णायानुरुधं बलायोपदाम् ॥ ९॥

संधये जारमुपपतिम् ४१. गेहाय उपपतिं व्यभिचारिणम् ४२. आर्त्यै परिवित्तम् ऊढे कनिष्ठेऽनूढम् ४३. निर्ऋत्यै परिविविदानम् अनूढे ज्येष्ठे ऊढवन्तम् ४४. अराड्यै (10.) देव्यै एदिधिषुःपतिम् ज्येष्ठायां पुत्र्यामनूढायामूढा एदिधिषुः तत्पतिम् ४५. निःकृत्यै पेशस्कारीं रूपकर्त्रीम् ४६. संज्ञानाय स्मरकारीं कामदीपिकरीम् ४७.

प्रकामोद्याय तत्संज्ञाय देवाय उपसीदतीत्युपसत् समीपस्थितस्तम् ४८. एतानग्निष्ठे नियुनक्ति ॥ ॥ अथ द्वितीये यूपे । वर्णाय अनुरुधम् अनुरुध्यतेऽनुसरतीत्यनुरुत् तम् १. बलाय उपदाम् उपददातीत्युपदास्तमुपायनदातारम् ॥ १ ॥

उत्सादेभ्यः कुब्जं प्रमुदे वामनं ह्रस्वाभ्यः स्थाम स्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायाऽअभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ॥ १० ॥

उत्सादेभ्यः कुब्जं वक्राङ्गम् २. प्रमुदे वामनं ह्रस्वाङ्गम् ३. ह्रस्वेभ्यः स्थामं सर्वदा जलक्लिन्ननेत्रम् ५. स्वप्नाय अन्धं नेत्रहीनम् ६. अधर्माय बधिरं कर्णेन्द्रियहीनम् ७. पवित्राय भिषजं वैद्यम् ८. प्रज्ञानाय नक्षत्रदर्शं नक्षत्राणि दर्शयति तम् गणकम् ९. आशिक्षायै प्रश्निनं प्रश्नवन्तम् शकुनादिप्रष्टारमित्यर्थः १०. उपशिक्षायै अभिप्रश्निनमभिप्रश्नवन्तम् ११. ॥ ॥ अथ तृतीये यूपे । मर्यादायै प्रश्नविवाकं कृतान्प्रश्नान्यो विविनक्ति ब्रूते स प्रश्नविवाकस्तम् १. ॥ १० ॥

अर्मेभ्यो हस्तिपं ज्ञवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालमिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहपं श्रेयसे वित्तधमाध्यक्ष्यायानुद्दत्तारम् ॥ ११ ॥

अर्मेभ्यो हस्तिपं गजपालकम् २. ज्ञवाय अश्वपं तुरगपालकम् ३. पुष्ट्यै गोपालं धेनुपालकम् ४. वीर्याय अविपालम् ५. तेजसे अजपालम् ६. इरायै कीनाशं कर्षुकम् कीनाशः कर्षुके यमे ७. कीलालाय सुराकारं मद्यकृतम् ८. भद्राय गृहपं गेहपालकम् ९. श्रेयसे वित्तधं वित्तं दधातीति वित्तधस्तम् धनकर्तारम् १०. आध्यक्ष्याय अनुद्दत्तारं सारथ्यनुसारिणम् ११. ॥ ११ ॥

भागदुघं दावाहारं प्रभागाऽअग्नेधं ब्रध्नस्य विष्टपायाभिषिक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारं सर्वेभ्यो लोकेभ्य उपसेक्तारमवऽऋत्यै बधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामायै रजयित्रीम् ॥ १२ ॥

ooooo

अथ चतुर्थे यूपे । भवे दार्वाहारं काष्ठानामाहर्तारम् १. प्रभवे अग्न्येधम् अग्निमेधयतीति तमग्नेर्वर्धकम् २. ब्रध्नस्य विष्टपाय सूर्यलोकाय अभिषेक्तारम् ३. वर्षिष्ठाय नाकाय उत्कृष्टस्वर्गाय परिवेषणकर्तारम् ४. देवलोकाय पेशितारम् पेश अवयवे पिंशतीति पेशिता तम् प्रतिमाद्यवयवकर्तारम् ५. मनुष्यलोकाय प्रकरितारम् कृ विक्षेपे विक्षेप्तारम् ६. सर्वेभ्यो लोकेभ्यः उपसेक्तारमुपसेचनकर्तारम् ७. अवऽऋत्यै बधाय उपमन्थितारमुपमन्थनकर्तारम् ८. मेधाय वासःपल्यूलीम् वाससां प्रक्षालनकर्तारम् पल्यूल प्रक्षालनछेदनयोः ९. प्रकामाय रजयित्रीं वस्त्राणां रङ्गकारिणीं नारीम् १०. ॥१२॥

ऋतवे स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्रयायानुक्षत्तारं बलायानुचरं भूम्ने परिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्याऽअश्वसादꣳ स्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥१३॥

ऋतवे स्तेनहृदयं स्तेनस्येव हृदयं यस्य तम् ११. ॥ ॥ अथ पञ्चमे यूपे । वैरहत्याय पिशुनं परवृत्तसूचकम् १. विविक्त्यै क्षत्तारं प्रतीहारम् २. औपद्रष्ट्रयाय (11.) अनुक्षत्तारं प्रतिहारसेवकम् ३. बलाय अनुचरं सेवकम् ४. भूम्ने परिष्कन्दम् (12.) परितः स्कन्दति रेतः सिञ्चति तम् ५. प्रियाय प्रियवादिनं मधुरभाषिणम् ६. अरिष्ट्यै अश्वसादम् अश्वारोहम् ७. स्वर्गाय लोकाय भागदुघम् भागं दुग्धे भागदुघस्तन् विभागप्रदम् ८. वर्षिष्ठाय नाकाय परिवेष्टारम् ९. ॥१३॥

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारꣳ शोकायाभिसर्तारं क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ॥१४॥

मन्यवे अयस्तापमयस्तपं लोहतापकम् १०. क्रोधाय निसरं नितरां सर्तारम् ११. ॥ ॥ अथ षष्ठे यूपे । योगाय योक्तारं योगकर्तारम् १. शोकाय अभिसर्तारं संसुखमागन्तम् २. क्षेमाय विमोक्तारं विमोचनकरम् ३. उत्कूलनिकूलेभ्यः त्रिष्ठिनम् त्रिषु तिष्ठतीति त्रिष्ठी तम् विद्यादिषु स्थितं शीलवन्तमित्यर्थः ४. वपुषे

मानस्कृतं (13.) पूजाया अभिमानस्य वा कर्तारम् सक् छान्दसः ५. शीलाय आञ्जनीकारीम् अञ्जनविद्याकर्त्रीम् ६. निर्ऋत्यै कोशकारीं खड्गाद्यावरणं कोशस्तत्कारिणीं स्त्रियम् ७. यमाय असूम् न सूते सा असूः ताम् वन्ध्याम् ८. ॥१४॥

यमाय यमसूमथर्वभ्योऽवतोकाꣳ संवत्सराय पर्यायिणीं परिवत्सरायाविज्ञातामिदावत्सरायातीव्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विज्जर्जराꣳ संवत्सराय पलिक्नीमृभुभ्योऽजिनसंधꣳ साध्येभ्यश्चर्मघ्नम् ॥१५॥

यमाय यमसूं युग्मप्रसवित्रीम् १. अथर्वभ्योऽवतोकां निरपत्याम् १०. संवत्सराय पर्यायिणीम् पर्यायोऽनुक्रमस्तद्वतीमनुक्रमज्ञाम् (14.) ११. ॥ ॥ अथ सप्तमे यूपे । परिवत्सराय अविज्ञाताम् अप्रसूताम् १. इदावत्सराय अतीव्वरीमत्यन्तं कुलठाम् पुंश्चली कुलठेव्वरी २. इद्वत्सराय अतिष्कद्वरीम् अतिस्कन्दति स्रवति इत्यतिस्कद्वरी स्कन्देर्वन्नन्तात् ङीव्रेफौ ३. वत्सराय विज्जर्जरां शिथिलशरीराम् ४. संवत्सराय पलिक्नीं (15.) श्वेतकेशाम् ५. ऋभुभ्यः अजिनसंधं चर्मसंधातारम् ६. साध्येभ्यः चर्मघ्नं चर्माभ्यासकरम् ७. ॥१५॥

सरोभ्यो धिवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बिन्दं नड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय कैवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्णकं गुहाभ्यः किरातꣳ सानुभ्यो जम्भकं पर्वतिभ्यः किम्पूरुषम् ॥१६॥

सरोभ्यो धिवरं कैवर्तापत्यम् ८. उपस्थावराभ्यः दाशम् दाशृ दाने दातारम् दाशो धीवरो वा १. वैशन्ताभ्यो वैन्दं (16.) विन्दो निषादापत्यम् १०. नड्वलाभ्यः शौष्कलं (17.) मत्स्यजीविनम् शुष्कला मत्स्यास्तैर्जीवति तम् ११. ॥ ॥ अथाष्टमे यूपे । पाराय मार्गारम् मृगारेरपत्यं मार्गारस्तम् १. अवाराय कैवर्तम् २. तीर्थेभ्यः आन्दम् अदि बन्धने अदति आन्दस्तं बन्धनकर्तारम् ३. विषमेभ्यो मैनालम् अल् वारणे मीनानलति वारयति ज्वालैरसौ मीनालस्तदपत्यम् ४. स्वनेभ्यः पर्णकं भिल्लम् ५. गुहाभ्यः किरातम् ६. सानुभ्यः जम्भकं जभि नाशने जम्भयतीति तम् हिंसकम् ७. पर्वतेभ्यः किम्पूरुषं कुत्सितनरम् ८. ॥१६॥

वीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्धाऽअपगल्भꣳ संशरायं प्रक्षिदम् ॥ १७॥

बीभत्सायै पौल्कसं पुल्कसापत्यम् १. वर्णाय हिरण्यकारं स्वर्णनिष्पादकम् १०. तुलायै वाणिजं वणिगपत्यम् ११. ॥ ॥ अथ नवमे यूपे । पश्चादोषाय (18.) ग्लाविनं ग्लौ कृषक्षये अकृष्टम् १. विश्वेभ्यो भूतेभ्यः सिध्मलं सिध्माख्यरोगवन्तम् २. भूत्यै जागरणं जागरूकम् (19.) ३. अभूत्यै स्वपनं शयालुम् ४. आर्त्यै (20.) जनवादिनं जनान्वदति तम् ५. व्यृद्धै अपगल्भम् ६. संशराय प्रक्षिदं प्रक्षिदनकर्तारम् ७. ॥ १७॥

अक्षराजायं कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दायं सभास्थाणुं मृत्यवे गोव्यछमन्तकाय गोघातं क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥ १८॥

अक्षराजाय कितवं धूर्तम् ८. कृताय आदिनवदर्शम् आदिनवो दोषस्तं पश्यति तथाभूतम् १. त्रेतायै कल्पिनं कल्पकम् १०. द्वापराय अधिकल्पिनम् अधिकल्पनाकर्तारम् ११. ॥ ॥ अथ दशमे यूपे । आस्कन्दाय सभास्थाणुं सभायां स्थिरम् १. मृत्यवे गोव्यछं गाः प्रति गमनशीलम् २. अन्तकाय गोघातं गवां कृन्तारम् ३. क्षुधे यो गां विकृन्तन्तं भिक्षमाणो याचमानः उपतिष्ठते यः पुमान् गां विकृन्तन्तं छिन्दन्तं भिक्षमाणो याचमानः उपतिष्ठते तं याचितारं क्षुधे दैव्यै आलभेत ४. दुःकृताय चरकाचार्यं चरकाणां गुरुम् ५. पाप्मने सैलगं सीलगो दुष्टस्तदपत्यम् ६. ॥ १८॥

प्रतिश्रुत्कायाऽअर्तनं घोषाय भषमन्ताय बह्वृवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्मवरस्पराय शङ्खध्मं वनाय वतपमन्यतोऽरण्याय दावपम् ॥ १९॥

प्रतिश्रुत्कायै अर्तनं दुःखिनम् ७. घोषाय भषं जल्पकम् ८. अन्ताय बह्वृवादि-

नम् ९. अनन्ताय मूकं वाग्विकलम् १०. शब्दाय आडम्बराघातम् आडम्बरमाहन्ति तम् कोलाहलकर्तारम् ११. ॥ ॥ अथैकादशे यूपे । महसे वीणावादं वीणावादनकर्तारम् १. क्रोशाय तूणवध्मम् तूणवं वाद्यविशेषं धमति तथाभूतम् २. अवस्यराय (21.) शङ्खध्मं शङ्खवादकम् ३. वनाय वनपं वनपालकम् ४. अन्यतोऽरण्याय दावपं वनवह्निपम् ५. ॥ ११ ॥

नर्माय पुंश्चलूꣳ हसाय कारिं वादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥

नर्माय पुंश्चलूं दुष्टां नारीम् ६. हसाय कारिं करणशीलम् ७. वादसे शाबल्याम् शबलः कर्बुरवर्णः (22.) तदपत्यभूतां स्त्रियम् ८. ग्रामण्यं ग्रामनेतारम् ९. गणकं ज्योतिर्विदम् १०. अभिक्रोशकं निन्दकम् ११. तान् त्रीन्महसे जुष्टं नियुनज्मीति एकादशे यूपे आलभते ॥ ॥ एवं प्रतियूपमेकादशस्वेकादशसु नियुक्तेषु ये ऽधिका अवशिष्टास्तान्समाप्तिपर्यन्तान्द्वितीयोक्षिते यूपे नियुनक्ति तांश्च वीणावादं पाणिघ्नमित्यादीन् रात्र्यै कृष्णं पिङ्गाक्षमित्यन्तांश्चतुर्दश ततोऽथैतानष्टौ विरूपानित्यष्टौ च मागधादींश्चतुरः एवं षड्विंशतिं द्वितीये यूपे पूर्वोक्ता एकादश एवं सप्तत्रिंशत् । तानिवाह । वीणावादम् पाणिघ्नं हस्ततालवादकम् तूणवध्मम् तान् त्रीन् नृत्ताय आलभते ३. आनन्दाय तलवम् वा गतिगन्धनयोः गन्धनं हिंसा तलं हस्तादितलं वाति वाद्यमुखं हन्ति स तलवस्तम् वाद्यवादकम् ४. ॥ २० ॥

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वꣳशनर्तिनं दिवे खलतिꣳ सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमङ्गे शुक्लं पिङ्गाक्षꣳ रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥

अग्नये पीवानं स्थूलम् ५. पृथिव्यै पीठसर्पिणं पीठेनासनेन सर्पति गच्छति पीठसर्पी तं पङ्गुम् ६. वायवे चाण्डालं चण्डालकर्माणम् ७. अन्तरिक्षाय वंशनर्तिनम् वंशेन नर्तनशीलम् ८. दिवे खलतिमलोमशिरस्कं खल्वाटमित्यर्थः ९. सूर्याय हर्यक्षं हरितनेत्रम् १०. नक्षत्रेभ्यः किर्मिरं कर्बुरवर्णम् ११. चन्द्रमसे कि-

लासं सिध्मरोगवन्तम् १२. अङ्गे शुक्लवर्णं पिङ्गाक्षम् १३. रात्र्यै कृष्णवर्णं पिङ्गाक्षम् १४. ॥ २१ ॥

अथैतानष्टौ विरूपानालभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं चातिकुल्वं चातिलोमशं च ।

अशूद्रा अब्राह्मणास्ते प्राजापत्याः ।

मागधः पुंश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां त्रिंशोऽध्यायः ॥ ३० ॥ ॥

तत एतान्वक्ष्यमाणानष्टौ विरूपान् परस्परं विरुद्धरूपान्यशूनालभते । तानाह । अतिदीर्घम् अतिह्रस्वम् अतिस्थूलम् अतिकृशम् अतिशुक्लम् अतिकृष्णम् अतिकुल्वं रोमरहितम् अतिलोमशं सर्वाङ्गव्यापिरोमाणम् । ते अष्टौ अशूद्राः अब्राह्मणाः शूद्रब्राह्मणव्यतिरिक्ताः पशवो भवन्ति तेऽष्टावपि प्राजापत्याः प्रजापतिदेवताः अष्टाऽउत्तमानालभतऽइत्युपक्रम्य ते वै प्राजापत्या भवन्तीति [१३, ६. २. ७. ८.] श्रुतेः । अत्र जातिनियमात्पूर्वेषु जातेरनियमः । वीणावादादयश्चतुर्दश अतिदीर्घादयोऽष्टौ एवं द्वाविंशतिः शेषाः । तथा मागधः पुंश्चली कितवः क्लीवः एते चत्वारोऽपि शूद्रब्राह्मणव्यतिरिक्ताः प्रजापतिदेवताः पूर्वैः सङ्कीर्ते षड्विंशतिः ते सर्वे द्वितीययूपे नियोज्याः ॥ ॥ सर्वेषां नियोगानन्तरं तान्नियुक्तान्पुरुषान्सहस्रशीर्षा पुरुष इति [३१. १-१६.] षोडशर्चेनानुवाकेन दक्षिणत उपविष्टो होतृवदभिष्टौति । होतृवदिति प्रथमोत्तमयोस्त्रिर्वचनम् ऋगन्तानां प्रणवेन संधानं च । यथा । सहस्रशीर्षा पुरुषः - °ङ्गुलोऽम् पुरुष एवेद७ °रोहतोऽम् । एवमभिष्टौति । तत आलम्भनक्रमेण यथादेवतं प्रोक्षणादि । ब्राह्मणादीनां पर्यग्निकरणानन्तरमिदं ब्रह्मणे इदं क्षत्रायेत्येवं सर्वेषां यथास्वस्वदेवतोद्देशेन त्यागः । ततः सर्वान्ब्रह्मणादीन्यूपेभ्यो विमुच्योत्सृजति । तत एकादशिनैः पशुभिः संज्ञपनादिप्रधानयागान्तं वनस्पतियागं कृत्वा प्राक् स्विष्टकृतः अध्वर्युराज्यं संस्कृत्य सकृदुद्गृहीतमाज्यं गृहीत्वा ओम् पुरुषदेवताभ्यो ब्रह्मादिभ्यः आहवनीये जुहोति ओम् ब्रह्मणे स्वाहा १. क्षत्राय स्वाहा २. मरुद्भ्यः ३. तपसे ४. तमसे ५. इत्या-

ध्यायान्तं सर्वदेवताभ्यः चतुरशीत्युत्तरशतसंख्याकाभ्यः (23.) तावतीर्घृताहुतीर्हुत्वा स्विष्टकृदादि उदवसानीयान्तं कर्म कृत्वान्ते यजमानः अयं ते योनिरिति मन्त्रेणात्मन्यग्नीन्समारोप्याह्वः सम्भृत इति [३१. १७.] षड्चेनानुवाकेन सूर्यमुपस्थाय पश्चादनवलोकयन्नरण्यं गत्वा संन्यसेत् गार्हपत्येऽधरारणिमनुप्रहृत्याहवनीयऽउत्तरारणिमात्मन्नग्नी समारोप्यारण्यं व्रजेदिति शाङ्खायनोक्तेः । यदि पुरुषमेधानन्तरं ग्रामवासेच्छा तर्ह्युदवसानीयान्ते सायमाहुती हुत्वारण्योरग्नी समारोप्योत्तरनारायणेनार्कमुपस्थाय देवयजनमादीप्य गृहं व्रजेत् गृहे आगत्य निर्मथ्याग्निं स्थापयेत् यथेच्छं यज्ञानपि कुर्यात् । अयमपि पक्षोऽस्ति । तत्पुरुषमेधानन्तरं संन्यास एव ॥ २२ ॥

श्रीमन्महीधरकृते वेददीपे मनोरमे । त्रिंशेऽध्याये प्रकथिताः पशवो नरमेधिके (24.) ॥ ३० ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-८ ॥ १-८ ॥ ॥ II. ॥ १-१३ [°यद्रष्ट्रियाया° K.] ॥ १-१३ ॥ ॥

III. ॥ १४. १५ [चर्म्माम् K.] - १८ ॥ १४-१८ ॥ ॥

IV. ॥ ११ [°ब्दायालम्बरा°] - २२ [°तिंशुक्लं चातिंकृष्णं चातिंदीर्घं चातिंह्रस्वं चातिंस्थूलं चातिंकृशं चातिंकूल्वं चा° - °ली क्लीवः किंतवोऽशूद्रा°] ॥ ११-२२ ॥ ॥ चतुरनुवाकेषु द्वाविंशतिः ॥

इति काण्वीयायां वाजसनेयसंहितायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥

I. सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वतं स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

श्रीगणेशाय नमः । रमाकान्तं गिरं नत्वा हेरम्बं शिवमम्बिकाम् । एकत्रिंशेऽधुनाध्याये वेददीपो वितन्यते ॥ ॥ कात्या° [२१. १. ११.] नियुक्तान्ब्रह्माभिष्टौतीति होतृवदनुवाकेन सहस्रशीर्षेति । अस्यार्थः । नियुक्तान् ब्राह्मणमित्यादिपशून् सहस्रशीर्षेत्यनुवाकेन षोडशर्चेन ब्रह्मा स्तौति होतृवदिति त्रिः प्रथमाम् त्रिरु-

त्तमामित्याद्युक्तप्रकारेणेत्यर्थः ॥ का° [२१.१.१७.१८.] त्रैधातव्यन्ते समारोक्ष्यात्मन्नग्नी सूर्यमुपस्थायाद्ध्यः सम्भृत इत्यनुवाकेनानपेक्षमाणोऽरण्यं गत्वा न प्रत्यवेयाद्ग्रामे वाविवत्सन्नरण्योः । त्रैधातवी उदवसानीयेष्टिः तदन्ते अयं ते योनिरित्यग्नी आत्मनि समारोक्ष्य तदुष्माणमास्ये प्रवेश्याद्ध्यः सम्भृत इति षड्चेनानुवाकेन सूर्यमुपस्थाय पश्चादपश्यन्वनं गत्वा ग्रामं नागच्छेत् वानप्रस्थो भवेदित्यर्थः । यद्वा ग्रामे वस्तुमिच्छन् अरण्योरग्नी समारोप्यार्कोपस्थानानन्तरं ग्रामे गत्वा यज्ञान्कुर्यादिति सूत्रार्थः ॥ अथ मन्त्रार्थः । नारायणपुरुषदृष्टा जगद्बीजपुरुषदेवत्याः षोडश ऋचः पञ्चदशानुष्टुभः षोडशी त्रिष्टुप् । ब्रह्मणे ब्राह्मणमित्याद्याः पुरुषमेधद्रूपस्य परमात्मनोऽवयवाः पूर्वाध्यायान्ते प्रोक्तास्तेषामवयवी पुरुषोऽत्र स्तूयते । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः पुरुषान्न परं किंचिदित्यादिश्रुतिषु प्रसिद्धः सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराजाख्योऽस्ति । कीदृशः सहस्रशीर्षा सहस्रशब्दो बहुत्ववाची । संख्यावाचकत्वे सहस्राक्ष इति विरोधः स्यात् नेत्रं सहस्रद्वयेन (1.) भाव्यम् । ततः सहस्रमसंख्यानि शीर्षाणि शिरांसि यस्य सः शीर्षश्छन्दसीति [पा° ६.१.६०.] शिरःशब्दस्य शीर्षन्नादेशः शिरोग्रहणं सर्वावयवोपलक्षणम् । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तस्यैवेति सहस्रशीर्षत्वम् एवमग्रेऽपि । सहस्राक्षः सहस्रमक्षीणि यस्य सः अक्षिग्रहणं सर्वज्ञानेन्द्रियोपलक्षकम् । सहस्रपात् सहस्रं पादा यस्य संख्यासुपूर्वस्येति [पा° ५.४.१४०.] पादस्याद्यल्लोपः पाद्ग्रहणं कर्मेन्द्रियोपलक्षणम् । सः पुरुषो भूमिं ब्रह्माण्डलोकरूपां सर्वतः तिर्यक् ऊर्ध्वमधश्च स्पृत्वा व्याप्य स्पर्णोतिर्व्याप्तिकर्मा यद्वा भूमिशब्दो भूतोपलक्षकः पञ्च भूतानि व्याप्य दशाङ्गुलपरिमितं देशमध्यतिष्ठत् अतिक्रम्यावस्थितः । दशाङ्गुलमित्युपलक्षणम् ब्रह्माण्डाद्बहिरपि सर्वतोव्याप्यावस्थित इत्यर्थः यद्वा नाभेः सकाशाद्दशाङ्गुलमतिक्रम्य हृदि स्थितः नाभित इति कुतो लभ्यते कतम आत्मेत्युपक्रम्य सोऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरिति श्रुतेः विज्ञानात्मनो हृद्यवस्थानं कर्मफलोपभोगाय अन्तर्यामिणो नियन्तृत्वेन तदुक्तम् [मुण्ड° ३.१.१.] द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति इति ॥ स पुरुषोऽत्र देवता तथा च श्रुतिः [१३.६.२.

१.] इमे वै लोकाः पूरयमेव पूरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुष इति ॥ १ ॥

पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

यत् इदं वर्तमानं जगत् तत्सर्वं पुरुष एव यत् भूतमतीतं जगत् यच्च भाव्यं भविष्यं जगत् तदपि पुरुष एव यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमिति भावः । उतापि च अमृतत्वस्य देवत्वस्य ईशानः स्वामी स पुरुषः यत् यस्मात् अन्नेन प्राणिनां भोग्येनान्नेन फलेन निमित्तभूतेनातिरोहति स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्पुरुष एव । प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः । यद्वा सर्वं (2.) पुरुषश्चेत्तर्हि परिणामीत्याशङ्क्याह अमृतत्वस्यामरणधर्मस्येशानः मुक्तेरीशः यो हि मोक्षेश्वरो नासौ म्रियतेऽत्यर्थः किं च यत् जीवजातमन्नेनातिरोहति उत्पद्यते तस्य सर्वस्य चेशानः । ब्रह्मादिस्तम्बपर्यन्तो भूतग्राम उक्तः तस्यान्नेनैव स्थितेः इतः प्रदानाद्धि (3.) देवा उपजीवन्तीति श्रुतेः ॥ २ ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

अतीतानागतवर्तमानकालसम्बद्धं जगद्यावदस्ति एतावान् सर्वोऽपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषो विभूतिः न तु वास्तवं स्वरूपम् वास्तवपुरुषस्तु अतः अस्मान्महिम्नो जगज्जालात् ज्यायान् च अतिशयेनाधिकः । एतद्भवं स्पष्टीक्रियते अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादश्चतुर्थांशः अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपम् अमृतं विनाशरहितम् तत् दिवि द्योतनात्मके स्वप्रकाशे स्वरूपेऽवतिष्ठतेऽति शेषः । यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य परब्रह्मणः इयत्तायां अभावात् पादचतुष्टयं नि-

दूषयितुमशक्यम् तदापि जगदिदं ब्रह्मदूषापेक्षयाल्पमिति विवक्षितत्वात्पादत्वोपन्यासः ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽभि ॥ ४ ॥

योऽयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मदृपः अयमूर्ध्वः उदैत् अस्माद्ज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्यर्थंगुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् । तस्यास्य पादो लेशो जगद्रूपः इह मायायां पुनः अभवत् सृष्टिसंहाराभ्यां पुनः-पुनरागच्छति । सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम् [भग° १०.४२.] विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति । ततो मायायामागत्यानन्तरं विष्वङ् विषु सर्वत्राञ्चतीति विष्वङ् उद्भवतिर्यगादिदृपेण विविधः सन् व्यक्रामत् व्याप्तवान् किं कृत्वा साशनानशने अभि अभिलक्ष्य अशनेन सह वर्तमानं साशनम् अशनादिव्यवहारोपेतं चेतनप्राणिजातम् अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् ते अभिलक्ष्य स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥ ४ ॥

ततो विराडजायत विराजोऽधि पूरुषः ।
स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

विष्वङ् व्यक्रामदिति यदुक्तम् तदेव प्रपञ्च्यते । ततः तस्मादादिपुरुषात् विराट् ब्रह्माण्डदेहोऽजायत जातः विविधं राजन्ते वस्तून्यत्रेति विराट् । विराजः अधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी एक एव पुमानजायत सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवदित्यर्थः एतच्चाथर्वणोत्तरतापनीये [नृसिंहतापि° २.१.] स्पष्टमुक्तम् स वाऽएष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वात्र प्रविष्ट-इव विकुरुतीति (4.) । किं च स जातो विराट्पुरुषोऽत्यरिच्यत अतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् पश्चाद्देवादिजीवभावाद्ऊर्ध्वं भूमिं ससर्जेति शेषः अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ॥ ५ ॥

तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६॥

सर्वं हूयते यस्मिन्स सर्वहुत् तस्मात्पुरुषमेधाख्यात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं (5.) सम्भृतम् सम्पादितम् दध्याज्यादिभोग्यजातं सम्पादितमित्यर्थः पुरुषोति शेषः । तथा स पुरुषः वायव्यान्वायुदेवताकान् तान् प्रसिद्धान् पशून् चक्रे उत्पादितवान् अन्तरिक्षदेवत्याः खलु वै पशव इति श्रुतेः अन्तरिक्षस्य च वायुदेवत्यत्वात्पशूनां वायुदेवत्वम् । तान्कान् ये चारण्याः अरण्ये भवाः हरिणादयः ये च ग्रामभवा गवाश्वादयस्तान्पशून् चक्रे ॥ ६॥

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७॥

सर्वहुतः तस्माद्यज्ञात् ऋचः सामानि च जज्ञिरे उत्पन्नानि । छन्दांसि गायत्र्यादीनि जज्ञिरे तस्माद्यजुरप्यजायत । ऋग्यजुःसामभिश्छन्दोभिश्च विना यज्ञा न सिध्यन्ति ॥ ७॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८॥

तस्माद्यज्ञात् अश्वाः अजायन्त उत्पन्नाः तथा ये के चाश्वातिरिक्ता गर्दभाद्यो ऽश्वतराश्च उभयदतः उभयोर्भागयोर्दन्ता येषां ते उभयदतः छान्दसं दीर्घम् ऊर्ध्वाधोभागयोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त । तथा ह स्फुटं तस्माद्यज्ञात् गावः च जज्ञिरे । किं च तस्माद्यज्ञात् अजावयः अजाः अवयश्च जाताः । न हि पशुभिर्विना यज्ञः सिध्येत् ॥ ८॥

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९॥

यज्ञसाधने यज्ञशब्दः यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वमाभाव्य यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रोक्षितवन्तः प्रोक्षणादिभिः संस्कारैः संस्कृतवन्तः ।

कीदृशम् अग्रतः सृष्टेः पूर्वं जातं पुरुषत्वेनोत्पन्नम् एतच्च प्रागेवोक्तम् तस्माद्विराडजायत (6.) विराजोऽधि पूरुष इति । तेन पुरुषरूपेण पशुना देवा अयजन्त मानसयागं निष्पादितवन्तः के ते देवा इत्यत्राह ये साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः ये च तदनुकूला ऋषयः मन्त्रद्रष्टारः ते सर्वेऽप्ययजन्त ॥ १ ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते ॥ १० ॥

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापतेः प्राणरूपा देवा यत् यदा पुरुषं व्यदधुः कालेनोदपादयन् तदा कतिधा कतिभिः प्रकारैर्व्यकल्पयन् विविधं कल्पितवन्तः अस्य पुरुषस्य मुखं किमासीत् किं बाहू ऊरू चास्ताम् किं च पादौ उच्येते पादावपि किमास्तामित्यर्थः ॥ १० ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽअजायत ॥ ११ ॥

पूर्वोक्तप्रश्नोत्तराण्याह । ब्राह्मणः ब्रह्मत्वजातिविशिष्टः पुरुषोऽस्य प्रजापतेर्मुखमासीत् मुखादुत्पन्न इत्यर्थः । राजन्यः क्षत्रियत्वजातिविशिष्टो बाहू कृतः बाहुत्वेन निष्पादितः । तत् तदानीमस्य प्रजापतेः यत् यावूरू तद्रूपो वैश्यः सम्पन्नः ऊरुभ्यामुत्पादित इत्यर्थः । तथास्य पद्भ्यां पादाभ्यां शूद्रत्वजातिमान् पुरुषोऽजायत उत्पन्नः ॥ ११ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

यथा दध्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदाः ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । मनसः सकाशात् चन्द्रमाः जातः चक्षोः चक्षुषः सकाशात्सूर्यः अजायत वायुः प्राणश्च श्रोत्रात्कर्णादजायत मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ऽअकल्पयन् ॥ १३ ॥

यथा प्रजापतेर्मनःप्रभृतयश्चन्द्रादीनकल्पयन् तथान्तरिक्षादिलोकानित्याह नाभ्येति (7.) प्रजापतेः नाभेः सकाशात् अन्तरिक्षमासीत् शीर्ष्णः शिरसः द्यौः स्वर्गः समवर्ततोत्पन्ना अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना श्रोत्राद्दिशः उत्पन्नाः तथा तेनोक्तेन विधिना लोकान्भूरादीन्प्रजापतेः सकाशादकल्पयन् कल्पितवन्तः फलदानोत्सुकाः काला इति (8.) शेषः ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥

यत् यदा पूर्वोक्तक्रमेण देवशरीरेषु सत्सु देवाः उत्तरसृष्टिसिद्ध्यर्थं वाक्यद्रव्यस्यानुत्पन्नत्वेन पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञमतन्वतातनिषत तदानीमस्य यज्ञस्य वसन्तः ऋतुरेवाज्यमासीत् आज्यत्वेन संकल्पितवन्त इत्यर्थः एवं ग्रीष्मः इध्मः आसीत् ग्रीष्ममेवेध्मत्वेन संकल्पितवन्तः तथा शरत् हविः आसीत् शरदमेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्तः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्य इति द्रष्टव्यम् ॥ अत्र काण्डकाव्युत्क्रमोऽस्ति अस्यानन्तरं तं यज्ञम् [१.] ततः तस्माद्यज्ञादिति [६.] तिस्रः क्रमेणैव (9.) ततः सप्तास्यासन्निति [१५.] क्रमोऽपेक्षितः ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥

यत् यदा देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं कुर्वाणाः पुरुषं पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वं [१४.] पुरुषेण हविषेत्युक्तम् तदा अस्य संकल्पितस्य यज्ञस्य सप्त गायत्र्यादीनि छन्दांसि परिधयः आसन् ऐष्टिकस्याहवनीयस्य त्रयः परिधयः औत्तरवेदिकाः त्रयः आदित्यः सप्तमः परिधिः प्रतिनिधिरूपः तथा च श्रुतिः गुह्ये वाऽअभितः परिधयो

भवत्यथैतत्सूर्यमेव पुरस्ताद्धोमारं करोतीति तत एते आदित्यसंहिताः सप्त परिधयोऽत्र सप्तछन्दोरूपाः । त्रिः सप्त त्रिगुणाः सप्त एकविंशतिसंख्याकाः समिधः कृताः द्वादश मासाः पञ्चर्तवः त्रय इमे लोकाः असावादित्यः एते एकविंशतिरेकविंशतिदारुयुक्तेध्मत्वेन भाविताः । यद्वा सप्त समुद्राः क्षीरोदाद्योऽस्य यज्ञस्य परिधयः आसन् भारतखण्डे यागा भवन्ति समुद्राणां परिधित्वम् त्रिः त्रिगुणाः सप्त छन्दोवर्गाः समिधः कृताः गायत्र्यादीनि सप्त अतिजगत्यादीनि सप्त कृत्यादीनि सप्तेति ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

पूर्वप्रपञ्चेनोक्तमर्थं संक्षिप्याह । देवाः प्रजापतिप्राणरूपा यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञेन यज्ञं यज्ञस्वरूपं प्रजापतिमयजन्त पूजितवन्तः तस्मात्पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि भूतानि आसन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः उक्तः अथोपासनतत्फलानुवादकभागार्थः संगृह्यते । यत्र यस्मिन्विराड्रूपप्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः विराडुपाधिसाधकाः देवाः सन्ति तिष्ठन्ति ते नाकं विराड्रूपप्राप्तिरूपं स्वर्गं ह एव ते महिमानः तदुपासका महात्मानः सचन्त सचन्ते समवयन्ति प्राप्नुवन्ति अडभाव आर्षः । सृष्टेः प्रवाहनित्यतां दर्शयति तदुक्तम् सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति ॥ १६ ॥

II. अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

इति पुरुषसूक्तानुवाकः । अद्भ्यः सम्भृत इत्युत्तरनारायणेनादित्यमुपस्थायेति [१३. ६. २. २०.] षट् कण्डिका उत्तरनारायणम् । उपाख्ये द्वे अनुष्टुभौ शेषास्त्रिष्टुभः आदित्यदेवत्याः । पूर्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्तः स्तूयते । अद्भ्यः जलात् पृथिव्याः सकाशात् च पृथिव्यपां ग्रहणं भूतपञ्चकोपलक्षकम् भूतपञ्चकात्

यो रसः सम्भृतः पुष्टः तया विश्वं कर्म यस्य विश्वकर्मणः कालस्य रसात् प्रीतिः यो रसोऽग्रे प्रथमं समवर्तत समभवत् भूतपञ्चकस्य कालस्य च सर्वं प्रति कारणत्वात् पुरुषमेधयाजिनो लिङ्गशरीरे पञ्च भूतानि तुष्टानि कालश्च ततस्तुष्टेभ्यः कश्चिद्रसविशेषपरिणतरूपः उत्तमजन्मप्रद उत्पन्न इत्यर्थः । तस्य रसस्य रूपं विदधत् धारयन् स्रष्टा आदित्यः एति प्रत्यक्षमुदयं करोति । अग्रे प्रथमं मर्त्यस्य मनुष्यस्य सतस्तस्य पुरुषमेधयाजिनः आत्मानं देवत्वं मुख्यं देवत्वम् सूर्यरूपेण । द्विविधा देवाः कर्मदेवा आत्मानदेवाश्च कर्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः सृष्ट्यादावुत्पन्ना आत्मानदेवाः ते कर्मदेवेभ्यः श्रेष्ठाः ये शतं कर्मदेवानामानन्दाः स एक आत्मानदेवानामानन्द इति श्रुतेः [बृहदार० भा० ४.३.३३] सूर्यादय आत्मानदेवाः ॥१७॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिं मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१८॥

एतं महान्तं सर्वोत्कृष्टं पुरुषं सूर्यमण्डलस्थमहं वेद जानामि इति ऋषिर्वचनम् कीदृशमादित्यवर्णमादित्यस्येव वर्णो यस्य तम् उपमालाभावात्स्वोपमम् तथा तमसः परस्तात् दूरतरम् तमोरहितमित्यर्थः तमःशब्देनाविद्योच्यते । तमेवादित्यं विदित्वा ज्ञात्वा मृत्युमत्येति अतिक्रामति परं ब्रह्म गच्छति । अयनायायायान्यः पन्था मार्गः न विद्यते सूर्यमण्डलान्तःपुरुषमात्मरूपं ज्ञात्वैव मुक्तिः ॥१८॥

प्रजापतिश्चरति गर्भेऽन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥१९॥

यः सर्वात्मा प्रजापतिः अन्तर्हृदि स्थितः सन् गर्भे चरति गर्भमध्ये प्रविशति यश्चाजायमानोऽनुत्पद्यमानो नित्यः सन् बहुधा कार्यकारणरूपेण विजायते मायया प्रपञ्चरूपेणोत्पद्यते । धीराः ब्रह्मविदस्तस्य प्रजापतेः योनिं स्थानं स्वरूपं [परि]पश्यन्ति अहं ब्रह्मास्मीति जानन्ति । विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि तस्मिन्ह तस्मिन्नेव कारणात्मनि ब्रह्मणि तस्थुः स्थितानि । सर्वं तदात्मकमेवेत्यर्थः ॥१९॥

यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥

यः प्रजापतिरादित्यरूपो देवेभ्योऽर्थायातपति द्योतते यश्च देवानां पुरोहितः सर्वकार्येष्वग्रे नीतः यश्च देवेभ्यः सकाशात् पूर्वः जातः प्रथममुत्पन्नः तस्मै आदित्याय नमः । कीदृशाय रोचतेऽसौ रुचस्तस्मै दीप्यमानाय इगुपधेति [पा° ३.१.१३५.] कप्रत्ययः तथा ब्राह्मये ब्रह्मणोऽपत्यं ब्राह्मिः इञि टिलोपः ब्रह्मावयवभूताय वा ॥ २० ॥

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥

देवाः दीप्यमानाः प्राणाः रुचं शोभनं ब्राह्मं ब्रह्मणोऽपत्यमादित्यं जनयन्तः उत्पादयन्तः अग्रे प्रथमं तत् वचोऽब्रुवन् ऊचुः ब्राह्मो ज्ञातावितिः [पा° ६.४.१७१.] निपातः । तत्किमत आह यो ब्राह्मणः हे आदित्य त्वा त्वामिवमुक्तविधिना उत्पन्नं विद्यात् जानीयात् तस्य ब्राह्मणस्य देवा वशे असन् वश्या भवन्ति आदित्योपासिता जगत्पूज्यो भवतीत्यर्थः ॥ २१ ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण ॥ २२ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥

ऋषिरादित्यं स्तुत्वा प्रार्थयते । हे आदित्य श्रीः लक्ष्मीश्च ते तव पत्न्यौ जायास्थानीये वर्तेते इत्यर्थः । यया सर्वजनाश्रयणीयो भवति सा श्रीः श्रीयतेऽनया श्रीः सम्पदित्यर्थः । यया लक्ष्यते दृश्यते जनैः सा लक्ष्मीः सौन्दर्यमित्यर्थः । अहोरात्रे तव पार्श्वे पार्श्वस्थानीये । नक्षत्राणि गगनगास्ताराः तव रूपम् तवैव तेजसा भासमानत्वात् तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलका इति ज्योतिःशास्त्रोक्तेः (10.) । अश्विनौ द्यावापृथिव्यौ तव व्यात्तं विकासितमुखस्थानीये अश्नुवाते व्याप्नुतस्तौ अश्विनौ अश्विनौ द्यावापृथिव्यौ इमे कीदृशं सर्वमश्नुवातामि-

ति श्रुतेः । य ईदृशस्तं त्वां याचे इच्छन् कर्मफलमिच्छन् सन् इषाण इच्छ इषु इच्छायाम् विकरणव्यत्ययः यद्वा इष आभीक्ष्ण्ये क्र्यादिः अन्नेच्छार्थः किमेषणीयम् तत्राह अमुं परलोकं मे मम इषाण मम परलोकः समीचीनोऽस्त्वितीच्छा अमोघेच्छत्वादिष्टं भवतीत्यर्थः । सर्वं मे मम इषाण सर्वलोकात्मकोऽहं भवेयमितीच्छेत्यर्थः मुक्तो भवेयमित्यर्थः सर्वं खल्विदं ब्रह्मेति सामश्रुतेः ॥२२॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । नरमेधोऽध्याय एष एकत्रिंशोऽयमीरितः ॥३१॥ ॥

I. तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥१॥

श्रीगणेशाय नमः । पुरुषमन्त्रा उक्ताः । अथ सर्वमेधमन्त्रा उच्यन्ते प्र वायुमिच्छेत्यस्मात्प्राक् [३३.५५.] । स्वयम्भुब्रह्मादृष्टाः आत्मदेवत्याः सप्तमेऽहनि आप्तोर्यामसंज्ञिके सर्वक्रतौ विनियुक्ताः आप्तोर्यामः सप्तममहर्भवतीत्युपक्रम्य सर्वं जुहोति सर्वस्यात्यै सर्वस्यावरुद्ध्यै इति श्रुतेः [१३.७.१.१.] ॥ द्वे अनुष्टुभौ । विज्ञानात्मा परेणात्मना विशिष्टोऽग्न्यादिद्योतप्रोतत्वेनोपास्योऽभिधीयते । अग्निः तदेव कारणं ब्रह्मैव आदित्यस्तदेव वायुस्तदेव चन्द्रमास्तत् तदेव उ एवार्थे । शुक्रं शुक्लं तत् प्रसिद्धम् । ब्रह्म त्रयीलक्षणं तत् ब्रह्मैव । ताः प्रसिद्धाः आपः जलानि [स] प्रसिद्धः प्रजापतिरपि तदेव ब्रह्म ॥१॥

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ॥२॥

सर्वे निमेषाः निमेषाः त्रुटिकाष्ठा घट्यादयः (I.) कालविशेषाः पुरुषात् अधि पुरुषसकाशाज्जज्ञिरे । कीदृशात्पुरुषात् विद्युतः विशेषेण द्योतते विद्युत् तस्मात् । किं च कश्चिदपि एनं पुरुषमूर्ध्वमुपरिभागे न परिजग्रभत् परिगृह्णाति । एनं तिर्यञ्चं चतुर्दिक्षु न परिः मध्ये मध्यदेशेऽपि न गृह्णाति न ह्यसौ प्रत्यक्षादीनां विषय इत्यर्थः स एष नेति-नेत्यात्मागृह्यो न हि गृह्यतेऽइति श्रुतेः । जग्रभत् ग्रहेः शतरि जुहोत्यादित्वेन श्लुप्म् ॥२॥

a. न तस्य प्रतिमाऽअस्ति यस्य नाम महद्यशः ।

b. हिरण्यगर्भ इत्येषः । मा मा हिꣳसीदित्येषा । यस्मान्न जात इत्येष ॥३॥

द्विपदा गायत्री तस्य पुरुषस्य प्रतिमा प्रतिमानमुपमानं किंचिद्वस्तु नास्ति अत एव नाम प्रसिद्धं महत् यशः यस्यास्ति सर्वातिरिक्तयशा इत्यर्थः ॥ हिरण्यगर्भ इत्येषोऽनुवाक्यश्चतुर्ऋचः हिरण्यगर्भः यः प्राणतः यस्येमे य आत्मदाः इति [२५. १०-१३.] । मा मा हिंसीज्जनितित्येका एषा [१२.१०२.] । यस्मान्न जातः इन्द्रश्च सम्राडिति [८.३६.३७.] द्वयो (2.) ऽनुवाकः । एताः प्रतीकचोदिताः पूर्वं पठितत्वादादिमात्रेणोक्ताः ब्रह्मयज्ञे जपे च सर्वा अध्येयाः । एवं सर्वत्र ॥३॥

एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भेऽअन्तः ।

स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥४॥

चतस्रस्त्रिष्टुभः । ह प्रसिद्धम् एषो ह देवः सर्वाः प्रदिशः अनुतिष्ठति व्याप्य स्थितः । ह जनाः (3.) ह प्रसिद्धमेष पूर्वः प्रथमो जातः उत्पन्नः । गर्भे अन्तः गर्भमध्ये स उ स एव तिष्ठति । जातोऽपि स एव । जनिष्यमाणः उत्पत्स्यमाणोऽपि स एव । प्रत्यङ् प्रतिपदार्थमञ्चति प्रत्यङ् । सर्वतोमुखः सर्वतो मुखाद्यवयवा यस्य अचिन्त्यशक्तिरित्यर्थः ॥४॥

यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा ।

प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥५॥

यस्मात्पुरा किं चन किमपि न जातमेव यश्च विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि आबभूव समन्ताद्भावयामास अन्तर्भूतो ऽभवत् । स षोडशी षोडशावयवलिङ्गशरीरी प्रजापतिः प्रजया सꣳरराणः रममाणः त्रीणि ज्योतींषि रवीन्द्वग्निरूपाणि सचते सेवते ॥५॥

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः ।

योऽअन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥६॥

येन पुरुषेण द्यौरुग्रा उद्भूणा वृष्टिदा कृतेति शेषः पृथिवी च येन दृढा कृता

सर्वप्राणिधारणं वृष्टिद्वारकम् अन्ननिष्पादनं चेति भूमेर्दार्ढ्यम् । येन स्वः आदित्यमण्डलं स्तभितं स्तम्भितम् येन नाकः स्वर्गोऽपि स्तम्भितः । यः अन्तरिक्षे नभसि रजसो जलस्य वृष्टिरूपस्य विमानः विमिमीते निर्माता । तं विहाय कस्मै देवाय हविषा विधेम हविर्दद्मः न कस्मैचिदित्यर्थः ॥ ६॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥
आपो ह यद्बृहतीः । यश्चिदापः ॥ ७॥

क्रन्दसी द्यावापृथिव्यौ यं पुरुषं मनसा अभ्यैक्षेतां साधु कृतमित्यपश्यताम् कीदृश्यौ क्रन्दसी अवसा हविर्लक्षणेनान्नेन वृष्टिजनकेन तस्तभाने प्राणिजातं स्तम्भयत्यौ व्यत्ययेन स्तम्भेर्ह्रादित्वम् । रेजमाने शोभमाने । सूरः सूर्यः यत्र द्यावापृथिव्योः उदितः सन् अधिविभाति अधिकं शोभते विभासयति वा । तं विहाय कस्मै हविर्दद्मः ॥ आपो ह यद्बृहतीः [२७.२५.] यश्चिदापः [२७.२६.] द्वे प्रतीकोके जपादावध्येये ॥ ७॥

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु ॥ ८॥

वेनः पण्डितो विदितवेदान्तरहस्यः तत् ब्रह्म पश्यत् पश्यति जानातीत्यर्थः । कीदृशं तत् गुहा गुहायां हृत्स्थाने निहितं स्थापितं दुर्ज्ञेयमित्यर्थः । सत् नित्यम् । यत्र ब्रह्मणि विश्वं कार्यजातमेकनीडं भवति एकमेव नीडमाश्रयो यस्य तत् अविभक्तमविशेषं कारणमिव भवतीत्यर्थः । तस्मिन्ब्रह्मणि इदं सर्वं भूतजातं समेति च संगच्छते संहारकाले व्येति च निर्गच्छति सर्गकाले । स परमात्मा प्रजासु ओतः प्रोतश्च ऊर्धतन्तुषु पट-इव शरीरभावेन (4.) ओतः तिर्यक्तन्तुषु पट-इव शरीरिभावेन (5.) प्रोतश्च । कीदृशः विभूः कार्यकरणरूपेण विविधं भवतीति विभूः । सर्वं स एवेत्यर्थः ॥ ८॥

प्र तद्वोचदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत् ।

त्रीणि॑ प॒दानि॒ निहि॑ता॒ गुहा॑स्य॒ यस्तानि॒ वेद॒ स पि॒तुः पि॒तास॑त् ॥ १ ॥

गां वेदवाचं धारयति विचारयतीति गन्धर्वः वेदार्थवेत्ता विद्वान्पण्डितः नु क्षिप्रम् अमृतं शाश्वतम् तत् ब्रह्म प्रवोचेत् प्रब्रूयात् गुहा गुहायां सत् विद्यमानम् धाम स्वरूपं विभृतं विकृतं सर्गस्थितिप्रलयरूपैर्विभक्तम् । किं च अस्यामृतस्य त्रीणि पदानि स्वरूपाणि गुहा गुहायां [निहिता] निहितानि । पदानि सर्गस्थितिप्रलयाः वेदाः काला वा ब्रह्मात्मयामिविज्ञानात्मानो वा । किं च यः तानि पदानि वेद जानाति स पितुः ब्रह्मणोऽपि पिता परमात्मा असत् भवति परं ब्रह्मैव भवतीत्यर्थः ॥ १ ॥

स नो॒ बन्धु॑र्जनि॒ता स वि॑धा॒ता धामा॑नि वेद॒ भुव॑नानि॒ विश्वा॑ ।
यत्र॑ दे॒वा अ॒मृत॑मानशा॒नास्तृ॒तीये॒ धाम॒न्नध्यै॑रयन्त ॥ १० ॥

स परमात्मा नोऽस्माकं बन्धुः बन्धुवन्मान्यः जनिता जनयिता जनिता मन्त्र ऽइति [पा॰ ६.४.५३.] णिचो लोपः स च विधाता धारयिता । सः विश्वा सर्वाणि भुवनानि भूतजातानि धामानि स्थानानि च वेद । देवा अग्न्यादयः तृतीये धामन् धामनि स्थाने स्वर्गरूपे अध्यैरयन्त स्वेच्छया वर्तन्ते । कीदृशा देवाः अमृतं मोक्षप्रापकं ज्ञानं यत्र ब्रह्मणि आनशानाः व्याप्नुवानाः अश्नुवते आनशानाः बहुलं छन्दसीति [पा॰ २.४.७६.] अशेर्हादित्वेन द्वित्वे शानचि अभ्यासस्य नुगागमः । ब्रह्मनिष्ठं ज्ञानं प्राप्ताः सन्तः स्वर्गे देवा मोदन्तऽइति भावः ॥ १० ॥

प॒रीत्य॑ भू॒तानि॑ प॒रीत्य॑ लो॒कान्प॒रीत्य॒ सर्वाः॑ प्र॒दिशो॒ दिश॑श्च ।
उ॒पस्था॑य प्रथम॒जाम॒तस्यात्मना॒त्मान॑मभि॒ सं वि॑वेश ॥ ११ ॥

इदानीं सर्वभूतेषूक्तमस्मि सर्वाणि भूतानि मयीति ज्ञानवतः सर्वमेधयाजिनो मुक्तिरुच्यते । किं च सर्वमेधयाजोऽपि (6.) न ज्ञानं प्रधानम् ब्रह्मज्ञानवतो यजमानस्याग्निहोत्रादयोऽपि यज्ञाः सर्वमेधा एवेत्याह परीत्य भूतानीति कण्डिकाभ्याम् ॥ एवं ज्ञानवान् सर्वमेधयाजी आत्मना जीवरूपेण ऋतस्य यज्ञस्यात्मानं यज्ञाधिष्ठातारं परमात्मानमभिसंविवेश प्रविशति ब्रह्मैव भवतीत्यर्थः ।

किं कृत्वा भूतानि परीत्य सर्वभूतानि ब्रह्मत्वेन विज्ञाय। लोकान्भूरादीन् परीत्य ब्रह्मरूपान् ज्ञात्वा। सर्वाः प्रदिशः विदिशः दिशश्च परीत्य तद्रूपा ज्ञात्वा। प्रथमजां प्रथमोत्पन्नां त्रयीरूपां वाचमुपस्थाय संसेव्य यज्ञादि कृत्वेत्यर्थः अपिहि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यतेति श्रुतेः प्रथमजा वाक् वेदरूपा ॥ ११ ॥

परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥ १२ ॥

परीत्युपसर्ग इत्वेत्यनेन सम्बध्यते। सर्वमेधयाजी तत् ब्रह्म अपश्यत् पश्यति तत् अभवत् भवति तत् आसीत् वस्तुगत्या तदेवास्ति। अज्ञाननिवृत्तिरेव दर्शनं भवनं (7.) चेति भावः। किं कृत्वा द्यावापृथिवी सद्यः परि इत्वा परीत्य तद्रूपेण ज्ञात्वा लोकान्परीत्य दिशः परीत्य स्वरादित्यं च परीत्य। गुह्यं वस्तु पुनः-पुनः कथितं चित्तमारोहतीति पुनरुक्तिः। ऋतस्य यज्ञस्य तन्तुमितिकर्तव्यतां विततं प्रसारितं यथा तथा विचृत्य समाप्य यज्ञं कृत्वेत्यर्थः। तदेव सत्तस्तद्ध तद्वामेति श्रुतेः ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेश्च ब्रह्मरूपस्य जीवस्याज्ञाननिवृत्तिरेव ब्रह्मप्राप्तिरित्यर्थः ॥ १२ ॥

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषꣳ स्वाहा ॥ १३ ॥

इत ऊर्ध्वमृक्त्रये मेधा याच्यते चतुर्थ्या श्रीर्याच्यते। प्रथमा गायत्री लिङ्गोक्तदेवता। अग्निं सनिं द्रव्यदानं मेधां बुद्धिं च अयासिषं याचे (8.) द्विकर्मकः। कीदृशमग्निम् सदसः यज्ञगृहस्य पतिं पालकम् अद्भुतमचिन्त्यशक्तिम् इन्द्रस्य प्रियं मित्रम् काम्यं कामनीयं धनमेधार्थिभिः ॥ १३ ॥

यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ १४ ॥

अनुष्टुप्। हे अग्ने तया मेधया अद्य मां मेधाविनं बुद्धियुक्तं कुरु। स्वाहा सुकृतमस्तु। अस्मायामेधास्रजो विनिरिति [पा° ५.२.१२१.] विनिप्रत्ययः मेधास्वास्ति मेधावी तम्। तया कया देवगणाः देवसमूहाः पितरश्च यां मेधामुपासते पूजयन्ति। देवपितृमान्या बुद्धिरस्माकमस्त्वित्यर्थः ॥ १४ ॥

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ १५ ॥

लिङ्गोक्तदेवतानुष्टुप् । वरुणो मे मह्यं मेधां ददातु अग्निः प्रजापतिश्च मे मेधां ददातु इन्द्रः वायुश्च मेधां ददातु धाता मे मेधां ददातु स्वाहा सुकृतमस्तु ॥ १५ ॥

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ १६ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥

मन्त्रोक्तदेवतानुष्टुप् । श्रीकामोऽनया श्रियं याचते । ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रियजातिः इदमिमे उभे ब्रह्मक्षत्रे मे मम श्रियमश्नुताम् । देवाः मयि उत्तमां श्रियं दधतु स्थापयन्तु । तस्यै प्रसिद्धायै ते तुभ्यं श्रियै स्वाहा सुकृतमस्तु । चौ समुच्चयार्थौ । श्रीमेधे विना यज्ञासिद्धिस्ते प्रार्थ्येते ॥ १६ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । सार्वमेधिकमन्त्रोक्तिर्द्वात्रिंशोऽध्याय ईरितः ॥ ३२ ॥ ॥

I. अस्याजरासो दमामरित्रा अर्चद्धूमासोऽअग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ १ ॥

सर्वमेधेऽग्निष्टोमसंस्थेऽग्निष्टुत्संज्ञे प्रथमेऽहनि अस्याजरास इत्याद्या मह्नो अग्ने इत्यन्ताः सप्तदश ऋचोऽग्निदेवत्याः पुरोरुचो भवन्ति । पुरोरुक्शब्देन ऋग्रूपा ग्रहणमन्त्रा उच्यन्ते न यजूरूपाः ऋग्घि पुरोरुगिति श्रुतेः । उक्थ्यमहर्विश्वदेवपात्नीवतहारियोजनेषु यजूरूपे ग्रहणमन्त्रे सत्यपि तं वाऽअपुरोरुक्तं (1.) गृह्णातीति श्रुतिस्तत्र न दोषः अत एवाग्नेयीभिर्ऋग्भिरेव निवर्त्यन्ते नोपयामादीनि ॥ ॥ आद्ये द्वे ऐन्द्रवायवग्रहस्य पुरोरुचौ । वत्सप्रीदृष्टाग्नेयी त्रिष्टुप् आ वायवित्यस्याः [७.७.] स्थाने । अस्य यजमानस्य अग्नयः ईदृशाः सन्तु । कीदृशाः अजरासः नास्ति जरा येषां ते अजराः वार्द्धक्यहीनाः (2.) । दमां गृहाणामरित्राः रक्षकाः नावामिव केनिपाताः अरिभ्यः त्रायन्तेऽरित्राः यद्वा दमानां दमनीयानां रक्षसामरित्राः

तारकाः विभक्तेर्नुडभावात्सवर्णदीर्घः । अर्चद्धूमासः अर्चन् अर्चनीयः पूजनीयो धूमो धूमोपलक्षिता ज्वाला येषां तेऽर्चद्धूमाः । पावकाः शोधकाः । श्वितीचयः श्वितिं श्वेतवर्णं चिन्वन्ति श्वितिचयः चिनोतेः क्विप् अनित्यमागमशासनमिति तुगभावः श्वितिशब्दस्य छान्दसो दीर्घः श्वेतत्वमुज्ज्वलत्वं यजमानस्य वर्धयन्तः । श्वात्रासः श्वात्रशब्दः क्षिप्रवाचकः श्वात्राः क्षिप्रफलप्रदाः । भुरण्यवः भरणकर्तारः । वनर्षदः वनसदः वने काष्ठे सीदन्तीति वनसदः वनसदोऽवेठो रेफेणेति [३.३.११.] प्रातिशाख्यसूत्रेण रेफागमः । वायवो न वायव-इव दीपयितारः । सोमाः सोमा इव यजमानेष्टदाः ॥ १ ॥

हरयो धूमकेतवो वातजूता उप द्यविं । यतन्ते वृथगग्रयः ॥ २ ॥

गायत्री विश्वरूपदृष्टा इन्द्रवायू इत्यस्याः [७.८.] स्थाने । अग्रयः वृथक् (3.) पृथक् नानाप्रकारेण द्यवि स्वर्गे उपयतन्ते स्वर्गं गन्तुं यत्नं कुर्वन्ति । कीदृशाः हरयः हरितवर्णाः । धूमकेतवः धूम एव केतुर्ज्ञापको येषां ते यत्र धूमस्तत्राग्निरिति व्याप्तेः । वातजूताः वातेन जूतं गमनं प्रसारो येषां ते ॥ आ वायो इन्द्रवायूऽइमे [७,७.८.] अनयोः स्थाने एते द्वे उक्ते ॥ २ ॥

यज्ञा नो मित्रावरुणा यज्ञा देवाँ२ऽऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ ३ ॥

गायत्री गोतमदृष्टा मैत्रावरुणस्य पुरोरुक् अयं वामित्यस्याः [७.९.] स्थाने । हे अग्ने नोऽस्माकं मित्रावरुणा यज्ञ । यज्ञ देवान् । यज्ञ बृहत् महत् ऋतं यज्ञम् । स्वं दमं गृहं यक्षि यज्ञ ॥ ३ ॥

युञ्ज्वा हि देव° ॥ ४ ॥

आश्विनग्रहस्य पुरोरुक् या वां कशेत्यस्याः स्थाने [७.११.] । व्याख्यातेयम् [१३.३७.] ॥ ४ ॥

द्वे विरूपे चरतः स्वर्थेऽअन्यान्या वत्समुपधापयेते ।

हरिरन्यस्यां भवति स्वधावाञ्छुक्रोऽअन्यस्यां ददृशे सुवर्चाः ॥ ५ ॥

शुक्रग्रहपुरोरुक् कुत्सदृष्टा त्रिष्टुप् तं प्रत्नथेत्यस्याः [७.१२.] स्थाने । द्वे रात्र-

द्यनी चरतः निरन्तरं प्रवर्तेते । कीदृशे (4.) विरूपे विविधं रूपं ययोस्ते कृष्णा रात्रिः शुक्लमहः । स्वर्थे शोभनोऽर्थो ययोस्ते कल्याणप्रयोजने । अन्यान्या अन्या च अन्या च वत्समुपधापयेते क्षीरं पाययतः अन्या एका रात्रिः वत्समग्निमुपधापयते रात्रावग्निर्देवत्यमग्निहोत्रम् अन्या दिवसरूपा वत्समादित्यमुपधापयते अह्नि सूर्यदेवत्यमग्निहोत्रम् । किं च तदेवाह अन्यस्यां रात्रौ हरिः हरितवर्णोऽग्निः स्वधावान् अन्नवान्भवति अन्यस्यामहनि शुक्रः शुक्लः आदित्यः सुवर्चाः शोभनतेजाः ददृशे दृश्यते । यद्वा द्वे द्यावापृथिव्यौ अग्निर्भूमौ स्वधावान् रविर्दिवि सुवर्चाः दृश्यते ॥५॥

अयमिह प्रथमोऽधायि धा॰ ॥६॥

मन्थिग्रहपुरोरुक् अयं वेन इत्यस्याः [७.१६.] स्थाने । व्याख्याता [३.१५.] ॥६॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माऽआदिद्धोतारं न्यसादयन्त ॥७॥

विश्वामित्रदृष्टा त्रिष्टुप् विश्वदेवदेवतस्याग्रयणग्रहस्य पुरोरुक् ये देवास इति [७.११.] स्थाने । त्रीणि शता त्रीणि शतानि त्री त्रीणि सहस्राणि त्रिंशत् नव च देवाः यथा ३३३९ । एते वस्वादिगणा देवा अग्निमसपर्यन् परिचरन्ति सपर्यतिः परिचरणकर्मा । यद्वागमोक्ता देवाः नवैवाङ्गास्त्रिवृद्वाः स्युर्देवानां दशकैर्गणैः ते ब्रह्मविष्णुरुद्राणां शक्तीनां वर्णभिदत इति ते च ३३३ ३३३ ३३३ एतावतो भवन्ति । कथं परिचरन्ति तदाह ते घृतैरग्निमौक्षन् असिञ्चयन् उक्ष सेचने लुङ् अस्मै अग्नये बर्हिरस्तृणन् आह्लादयन् आत् इत् अनन्तरमेव होतारं वृत्वा होत्रे कर्मणि न्यसादयन्त नियुक्तवन्तः । घृतसेचनबर्हिःस्तरणहोतृवरणमेवाग्निपरिचर्येति भावः ॥७॥

मूर्धानं दिवोऽअरतिं पृथि॰ ॥८॥

प्रकृतिवदेव ध्रुवयग्रहपुरोरुक् । व्याख्याता [७.२४.] ॥८॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥९॥

गायत्री भरद्वाजदृष्टा ऐन्द्राग्नयऋक्पुरोरुक् इन्द्राग्नीऽआगतमित्यस्याः [७.३१.] स्थाने । अग्निर्वृत्राणि पापानि जङ्घनत् अत्यर्थं हन्ति यद्वृत्रगन्तम् । कया विपन्यया पनतिरर्चतिकर्मा विविधया पूजया पापं हन्ति । कीदृशोऽग्निः द्रविणास्युः द्रविणो धनमिच्छति द्रविणस्यति सुप आत्मनः क्यच् क्यच्छन्दसीति [पा० ३.२.१७०.] क्यङन्ताडुप्रत्ययः हविर्लक्षणं धनमिच्छन् । समिद्धः दीप्तः । शुक्रः शुद्धः । आकृतः निमन्त्रितः ॥ ९ ॥

विश्वेभिः सोम्यं मधवन्निन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥ १० ॥

गायत्री मेधातिथिदृष्टा वैश्वदेवयऋक्पुरोरुक् ओमासश्चर्षणीत्यस्याः [७.३३.] स्थाने । हे अग्ने विश्वेभिः विश्वैर्देवैः इन्द्रेण वायुना च सह सोम्यं सोममयं मधु पिब । कीदृशस्त्वं मित्रस्य धामभिः नामभिः स्तुत इति शेषः त्वमग्ने वरुणो जायसे यस्त्वं मित्रो भवसि दस्म (5.) ईड्यः इति श्रुतेः ॥ १० ॥

आ यदिषे नृपतिं तेज आनड् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानꣳ स्वाध्यं जनयत्सूदयच्च ॥ ११ ॥

त्रिष्टुप्पराशरदृष्टा मरुत्वतीयऋक्पुरोरुक् इन्द्र मरुत्व इत्यस्याः [७.३५.] स्थाने । आ उपसर्गः आनडित्यनेन सम्बध्यते यत् यदा तेजः तेजसो हेतुभूतं हविर्नृपतिं नुर्यजमानस्य पालकमग्निमानड् अश्नुते व्याप्नोति यदाग्नौ हविर्हूयतऽइत्यर्थः तदा अग्निः रेतो जगद्बीजभूतं जलम् द्यौरभीके प्रथमा षष्ठ्यर्थे दिवः समीपेऽन्तरिक्षे (6.) [जनयत्] जनयति मेघरूपेण च पुरः सूदयत् सूदयति क्षरति वृष्टिद्वारेण षुद क्षरणे । कीदृशं तेजः इषे वृष्ट्यै निषिक्तं देवतोद्देशेनाग्नौ सिक्तं कृतम् । शुचि मन्त्रसंस्कृतम् । कीदृशं रेतः शर्धं बलहेतुभूतम् अनवद्यं निर्दोषम् अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेष्विति [पा० ३.१.१०१.] गर्ह्यार्थेऽवद्यमिति निपातः न अवद्यमनवद्यमगर्ह्यम् प्रशस्यम् । युवानं युवतुल्यं परिपक्वारसं दृढमित्यर्थः । स्वाध्यं सुष्ठु आ समन्तात् ध्यायते चिन्त्यतऽइति स्वाध्यं चिन्तनीयम् सर्वो वृष्टिमिच्छति । हविषा तर्पितोऽग्निरष्टमासैर्जलं निष्पाद्य वर्षासु वर्षतीत्यर्थः । व्यवहितपदो मन्त्रः ॥ ११ ॥

अग्ने शर्ध मरुते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥ १२ ॥

त्रिष्टुप् विश्ववाराद्दृष्टा द्वितीयमरुत्वतीयपुरोरुक् मरुत्वन्तं वृषभमित्यस्याः [७. ३६.] स्थाने । हे अग्ने त्वं शर्ध उत्सहस्व बलमाविष्कुरु किमर्थं मरुते सौभगाय मरुत्सौभाग्यं लोकस्थितिः । उग्रश्चकृतस्तव द्युम्नानि उत्तमानि उत्कृष्टानि सन्तु द्युम्नं द्योततेर्यशो वान्नं वेति [निरु° ५.५.] यास्कः रुविर्लक्षणान्यन्नानि यशांसि वा सन्तु । किं च जास्पत्यं जायापत्यमित्यर्थे जास्पत्यमिति निपातः जायापत्यं पत्नीयज्ञमानरूपं सुयमं सुनियमं जितेन्द्रियमन्योन्यावद्धरागं समाकृणुष्व कुरु सुष्ठु यम्यते सुयमम् ईषद्दुःसुष्विति [पा° ३.३.१२६.] खल्प्रत्ययः । किं च शत्रूयतां शत्रुत्वमिच्छतां महांसि तेजांसि अभितिष्ठ आक्रमस्व अभिभव ॥ १२ ॥

त्वाꣳ हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥ १३ ॥

त्रिष्टुब्भरद्वाजदृष्टा माहेन्द्र्यरुपुरोरुक् इन्द्रो नृवदित्यस्याः [७.३९.] स्थाने । हे अग्ने वयं त्वां ववृमहे वृतवन्तः कीदृशं त्वां मन्द्रतममतिगम्भीरम् कैः अर्कशोकैः अर्कवत् शोचतेऽर्कशोका मन्त्रास्तैः अविप्लुतब्रह्मचर्यैर्यथोक्तमधीता मन्त्रा अर्कवद्दीप्ताः स्युरिति भावः । हि यस्मात् नोऽस्माकं महि महत् स्तोत्रं त्वं श्रोषि शृणोषि विकरणव्यत्ययः । किं च नृतमाः मनुष्यश्रेष्ठाः देवता देवतां त्वा त्वां राधसा हवीरूपेणान्नेन पृणन्ति पूरयन्ति देवताशब्दात्सुपो लुक् । कीदृशं त्वां शवसा बलेन इन्द्रं न इन्द्रमिव वायुमिव च स्थितम् न इवार्थे उभयोः सम्बध्यते ॥ १३ ॥

वेꣳ अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥ १४ ॥

द्वे वृहत्यौ आदित्यग्रहपुरोरुचौ आद्या वसिष्ठदृष्टा अन्त्या प्रस्कण्वदृष्टा कदा चन स्तरीरसि कदा चन प्रयुच्छसीत्यनयोः [८.२.३.] स्थाने । सुष्ठु ह्वयते स्वाहुतः

हे स्वाङ्कृत हेऽग्ने जनानां मध्ये ये जनाः गोनां गवां सम्बन्धिभिर्दुग्धदधिघृतैः सह ऊर्वान् (7.) अन्नविशेषान्पुरोडाशादीन् दयन्त ददति दय दानगतिहिंसादानेषु लङ् अडभाव आर्षः । ते सूरयः पण्डिताः वे तव प्रियासः सन्तु । कीदृशास्ते यत्नारः निगृहीतेन्द्रियाः । मघवानः धनवन्तः । गोनामित्यत्र गोः पादान्तऽइति [पा° ७. १. ५७.] नुडागमः ॥ १४ ॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आसीदन्तु बर्हिषि मित्रोऽअर्यमा प्रातर्यावाणोऽअध्वरम् ॥ १५ ॥

शृणुतः इति श्रुतौ अर्थिवचःश्रोतारौ कर्णौ यस्य स श्रुत्कर्णः हे श्रुत्कर्ण देवैः सह त्वमध्वरं यज्ञं श्रुधि शृणु । कीदृशैर्देवैः वह्निभिः हवींषि वहन्ति ते वह्नयः तैः । सयावभिः सह यान्ति ते सयावानः तैः । किं च मित्रः अर्यमा प्रातर्यावाणश्च देवाः बर्हिषि आसीदन्तु उपविशन्तु प्रातर्यान्ति हविः प्राप्नुवन्ति ते प्रातःसवने येषां हविःप्राप्तिस्ते ॥ १५ ॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृडीको भवतु जातवेदाः ॥ १६ ॥

त्रिष्टुब्गोतमदृष्टादित्यग्रहदधिग्रयणे (8.) विनियुक्ता यज्ञो देवानामित्यस्याः [८. ४.] स्थाने । अग्निः ईदृशो भवतु । कीदृशः विश्वेषां सर्वेषां देवानां मध्ये अदितिः नास्ति दितिः खण्डनं यस्य अदीनः कीदृशानां देवानाम् यज्ञियानां यज्ञार्हाणाम् । तथा विश्वेषां सर्वेषां मानुषाणां नराणामतिथिः पूज्यः देवानामवो हविर्लक्षणमन्नमावृणानः समर्पयन् । सुमृडीकः शोभनं मृडीकं सुखं यस्मात् सुखकारी । जातवेदाः जातप्रज्ञानः ॥ १६ ॥

महोऽअग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्या वृणीमहे ॥ १७ ॥

लुशोधानाकदृष्टा त्रिष्टुप् सावित्र्यग्रहपुरोरुक् वाममद्येत्यस्याः [८. ६.] स्थाने । देवानां तत् अवः अन्नं हविर्लक्षणमद्य वयं वृणीमहे संस्कुर्मः क्व सति सवितुः

सूर्यस्य सवीमनि सति आज्ञायां सत्याम् देवस्य त्वा सवितुः प्रसवऽइत्युक्तेः सवीमा प्रसवोऽनुज्ञेति कोशः । कीदृशे सवीमनि श्रेष्ठे अन्यदेवाज्ञातः सूर्याज्ञोत्कृष्टा । तात्किम् येनान्नेन वयं स्वस्तये स्वस्तिमन्तो भवेम । कीदृशा वयम् अग्नेः शर्मणि शरणे आश्वये मित्रे वरुणे च अनागाः अनागसः सुपां सुप इति [पा० ७. १. ३९. वा० १.] जसः सुः अग्निमित्रवरुणोपराधरहिताः । कीदृशस्याग्नेः मह्नः पूज्यस्य मह्यते पूज्यते मह् तस्य मह पूजायां क्विप् समिधानस्य दीप्यमानस्य ॥ १७ ॥

II. आपश्चित्पिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नोऽअध्रा त्वꣳ हि धीभिर्दयसे वि वाजान् ॥ १८ ॥

इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति तस्मिन्द्राग्रहा भवत्यैन्द्र्यः पुरोरुचः सर्वमिन्द्रमसदिति सर्वमेधे श्रुतिः [१३. ७. १. ४.] । ततः इन्द्रस्तुत्संज्ञे उक्थ्यसस्थे सर्वमेधस्य द्वितीयेऽहनि आपश्चिदित्यादि इमां तऽइत्यन्ता द्वादश ऋचः तं प्रत्यधा अयं वेनः मह्यां इन्द्रः कदा चन स्तरीः कदा चन प्रयुच्छसीति पञ्च प्रतीकोक्ताः एवं सप्तदशेन्द्र देवत्याः ऐन्द्रवायवादिसावित्रान्तानां ग्रहाणां ग्रहणमन्त्राः ॥ ॥ वसिष्ठदृष्टा त्रिष्टुप् ऐन्द्रवायवस्य पुरोरुक् आ वायो इत्यस्याः [७. ७.] स्थाने । हे इन्द्र जरितारः स्तोतारः ऋत्विजः ते तव ऋतं यज्ञं नक्षन् नक्षन्ति व्याप्नुवन्ति नक्षतिर्व्याप्तिकर्मा लडि अडभाव आर्षः । आपः चित् आपोऽपि निम्नाभ्यात्मकाः पिप्युः आप्याययन्ति सोमं वर्धयन्ति ओप्यायी वृद्धौ लिटि प्यायः पी-आदेशः । तत्र दृष्टान्तः स्तर्यो गावः इव स्तृणन्ति सुन्वन्ति याभिः ताः स्तर्यः याभिः सोमः सूयते ता गावो वाचो वेदरूपा-इव ता यथा सोममाप्यायन्ति तथापोऽपि । अत एव त्वं नोऽस्मानक्ष अभिमुखं याहि आगच्छ वायुर्न वायुरिव वायुर्यथा नियुतः स्वानश्वानभियाति । हि यतः त्वं धीभिः बुद्धिभिः कर्मभिर्वा वाजानन्नानि विदयसे विविधं ददासि दय दानादौ अत एवागच्छ ॥ १८ ॥

गाव उपावतावतं मह्ना यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ १९ ॥

तिस्रो गायत्र्यः आद्या पुरुमीळाजमीळदृष्टा ऐन्द्रवायवस्य द्वितीया पुरोरुक् इन्द्रवायू इत्यस्याः [७. ८.] स्थाने । गाव उच्यन्ते हे गावः अवतं कूपं चावालरूपं

प्रति उपावत उपगच्छत दानार्थम् चावालान्तरेण गत्वा संचरोऽस्ति अवत इति कूपनाम [निघ० ३. २३.] । को हेतुरागमने तत्राह मही महत्यौ द्यावापृथिव्यौ यज्ञस्य रप्सुदा रप्सुदे रप्स्विति रूपनाम (9.) तद्वत्तस्ते रप्सुदे वर्तेते (10.) । द्यावाभूमी यज्ञस्य शोभां कुरुत इति यूयमुपागच्छत । किं च उभा कर्णा भवतीनामुभौ कर्णौ हिरण्ययौ हिरण्मयौ अत एव दानार्थमागच्छतेत्यर्थः ॥ ११ ॥

यदद्य सूर उदितेऽनागा मित्रोऽर्यमा । सुवाति सविता भगः ॥ २० ॥

वसिष्ठदृष्टा मैत्रावरुणापुरोरुक् अयं वामित्यस्याः [७. १.] स्थाने । अद्य सूरे सूर्ये उदिते सति मित्रः अर्यमा सविता भगश्च यत्सुवाति प्रेरयति तत्कर्म कुर्यादिति शेषः । नास्ति आगोऽपराधो यस्य सोऽनागा इति चतुर्णां विशेषणम् ॥ २० ॥

आ सुते सिञ्चत श्रियꣳ रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥
तं प्रत्नथा । अयं वेनः ॥ २१ ॥

सुनीतिदृष्टाश्विनपुरोरुक् या वामित्यस्याः [७. ११.] स्थाने । रसा नदी रसतेः शब्दकर्मण इति [निरु० ११. २५.] यास्कः रसानदी वृषभं वर्षितारं सोमं दधीत पुष्णाति दधातेर्लिङ् नदीसमीपे हि सोमोत्पत्तेः । तस्मिन्सोमे सुते अभिपुते सति आसिञ्चत चमसेष्विति शेषः ऋत्विजः प्रति वचनमेतत् । कीदृशं वृषभं रोदस्योः पृथिव्योः श्रियं श्रीयते (11.) श्रीः तम् आश्रयम् सोमस्य जगदाधारत्वात् । अभिश्रियम् अभि सर्वतः श्रीः शोभा यस्य सोऽभिश्रीः तम् ॥ तं प्रत्नथा अयं वेनः द्वे प्रतीकोक्ते शुक्रमन्थिनोः प्राकृते [७. १२. १६.] पुरोरुचौ ॥ २१ ॥

अतिष्ठन्तं परि विश्वेऽअभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णोऽअसुरस्य नामा विश्वरूपोऽअमृतानि तस्थौ ॥ २२ ॥

विश्वामित्रदृष्टाग्नयणपुरोरुक् ये देवास इत्यस्याः [७. ११.] स्थाने । इन्द्रस्य वृष्टिकर्मोच्यते । विश्वे देवाः अतिष्ठन्तं समन्तात्स्थितमिन्द्रं पर्यभूषन् परिरक्षितवन्तः । स इन्द्रः चरति सर्वत्र गच्छति । कीदृशः श्रियो वसानः देवानां दीप्तीः आच्छादयन् स्वरोचिः स्वं रोचिर्यस्य सः अनन्याधीनदीप्तिः । किं च विश्वं रूपयति निरूपयति

विश्वरूपः इन्द्रो यतः अमृतानि ज्वालानि आतस्थौ वृष्टये आस्थितवान् वृष्णः इन्द्रस्य तत् महत् प्रसिद्धं नाम वासवो वृत्रहा इत्यादि । कीदृशस्य वृष्णः असुरस्य असवो विद्यन्ते यस्य सोऽसुरस्तस्य प्राणवतः सावधानस्य प्रज्ञावत इत्यर्थः ॥ २२ ॥

प्र वो॑ महे॒ मन्द॑मानायान्ध॒सोऽर्चा॑ वि॒श्वान॑राय विश्वा॒भुवे॑ ।
इन्द्र॑स्य॒ यस्य॒ सुम॑ख॒ꣳ सहो॒ महि॒ श्रवो॑ नृ॒णां च॒ रोद॑सी स॒पर्य॑तः ॥ २३ ॥

सुचीकदृष्टा त्रिटुप् ध्रुवग्रहपुरोरुक् मूर्धानमित्यस्याः [७.२४.] स्थाने । हे ऋत्विजो यूयं विश्वानराय विश्वे सर्वे नरा यजमाना यस्य तस्मै प्रार्च प्रार्चत वचनव्यत्ययः इन्द्रं पूजयतेत्यर्थः । कीदृशाय महे महते । वो युष्माकमन्धसः अन्धसा अन्नेन हविर्लक्षणेन मन्दमानाय मोदमानाय । विश्वभुवे विश्वं भवति प्राप्नोति विश्वभूः तस्मै सर्वव्यापिने विश्वा भूर्यस्येति वा विश्वं भवति यस्मादिति वा संहितायां दीर्घः । किं च रोदसी द्यावापृथिव्यौ यस्येन्द्रस्य एतान्पदार्थान्सपर्यतः पूजयतः कान् सुमखं शोभनं यज्ञम् सहः बलम् महि महत् श्रवो यशः नृणां धनं च । द्यावाभूमी यस्य मखादीनि मानयतस्तं पूजयतेत्यर्थः ॥ २३ ॥

वृ॒हन्नि॑दि॒ध्म ए॑षां॒ भूरि॑ शस्तं पृथु॒ः स्वरुः॑ । येषा॒मिन्द्रो॒ युवा॒ सखा॑ ॥ २४ ॥

त्रिशोकदृष्टा गायत्री ऐन्द्राग्नपुरोरुक् इन्द्राग्नी इत्यस्याः [७.३१.] स्थाने । युवा समर्थः इन्द्रः येषां यजमानानां सखा सहायः एषामिन्द्रः वृहन् इत् महानिव भवति । शस्तं शस्त्रं भूरि बहु । स्वरुः खड्गः पृथुः विशालः । यज्ञबाहुल्यमाशास्यतऽइत्यर्थः ॥ २४ ॥

इन्द्रे॒हि मत्स्यन्ध॑सो वि॒श्वेभिः॑ सोम॒पर्व॑भिः । म॒हाँ२॑ऽअ॒भि॒ष्टिरोज॑सा ॥ २५ ॥

मधुछन्दोदृष्टा गायत्री वैश्वदेवपुरोरुक् ओमास इत्यस्याः [७.३३.] स्थाने । इन्द्र आ इहि ओमाङोश्चेति [पा० ६.१.९५.] पररूपम् हे इन्द्र आ इहि आगच्छ आगत्य अन्धसः अन्धसान्नेन हविर्लक्षणेन विश्वेभिः विश्वैः सर्वैः सोमपर्वभिः सोमांशुभिश्च त्वं मत्सि तृप्यस्व मद तृप्तौ शपो लुक् । कीदृशः त्वम् ओजसा ते-

ज्ञसा महान् श्रेष्ठः । अभिष्टिः अभीड्यतऽइत्यभिष्टिः अभियष्टव्यः पूषोदरादिः ॥२५॥

इन्द्रो वृत्रमवृणोद्धर्षनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अकृन्व्यꣳसमुशधग्वनेषाविर्धेना अकृणोद्राम्याणाम् ॥ २६ ॥

विश्वामित्रदृष्टा त्रिष्टुप् प्रथममरुत्वतीयपुरोरुक् इन्द्र मरुत्व इत्यस्याः [७.३५.] स्थाने । इन्द्रः वृत्रं दैत्यमवृणोत् युद्धाय वृणोति स्म । मायिनां मायिनो दैत्यान् प्रामिणात् क्षिनस्ति मीञ् क्षिंसायाम् क्र्यादिः घ्रादित्वाङ्ङस्वः कर्मणि षष्ठी । व्यꣳसमकृन् कृन्ति अंस विभागे चुरादिरदन्तः अंसयति विभजति स्वान् परानिति व्यꣳसो दुष्टः तम् क्व वनेषु वनस्थान्कृन्तीत्यर्थः । रमयन्ति देवान् ऋते राम्याः यायजूका: तेषां धेनाः स्तुतिरूपा वाचः आविः अकृणोत् आविः करोति यजमानाः स्तुवन्तीति देवेषु प्रकटयतीत्यर्थः । कीदृशः इन्द्रः शर्धनीतिः शर्ध इति बलनाम [निघ° २.९.] शर्धे चतुरङ्गे बले नीतिर्यस्य सः । वर्पनीतिः वर्प इति रूपनाम [निघ° ३.७.] वर्प नानारूपं नयति प्राप्नोति वर्पणीतिः नानारूपधारी । उशधक् उशन्ति कामयन्ते परस्वं ते उशाश्चौरास्तान्दहति उशधक् ॥ २६ ॥

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं तऽइत्था ।
सम्पृक्षसे समराणः शुभानिर्वोचिस्तन्नो हरिवो यत्तेऽस्मे ॥
महाँ२॥ऽइन्द्रो य ओजसा । कदा चन स्तरीरसि । कदा चन प्रयुच्छसि ॥२७॥

अगस्त्यदृष्टा त्रिष्टुप् सशस्त्रमरुत्वतीयपुरोरुक् मरुत्वन्तमित्यस्याः [७.३६.] स्थाने । इन्द्रं प्रति मरुद्वाक्यम् हे इन्द्र हे सत्पते श्रुतिस्मृत्युक्ताचाररताः सन्तः तेषां पते पालक त्वमेकः सन्कुतो यासि असहायः क्व गच्छसि । ते तव किमित्था गमने को हेतुः किं प्रयोजनम् था हेतौ च छन्दसीति [पा° ५.३.२६.] इदमः थाप्रत्ययः एतेतौ रथोरिति [पा° ५.३.४.] इदम इदादेशः । कीदृशस्त्वं माहिनः महितः पूज्यः निष्ठा तस्य नत्वम् धातोर्वृद्धिश्च छान्दसी यद्वा मह उत्सवोऽस्यास्तीति मही एव माहिनः स्वार्थेऽण् इन्नण्यनपत्यऽइति [पा° ६.४.१६४.] टिलोपाभावः । किं च समराणः सम्यक् गच्छन्सन् शुभानिः शोभनैः वचनैः त्वं सम्पृक्षसे कतमः

पन्था इति लोकान्पृच्छसि एकाकित्वात् शोभन्ते तानि शुभानानि शानचि शपि लुप्ते रूपम् । सम्पूर्वस्यर्तेः शानचि शपि लुप्ते (12.) समराणा इति । हरयोऽश्वा अस्य सन्तीति हरिवान् मतुवसो रुः सम्बुद्धौ छन्दसीति [पा° ८. ३. १.] रुः के हरिवः इन्द्र नोऽस्माकं तत् एकाकिगमनकारणं वोचिः ब्रूहि यत् यतो हेतोः अस्मे वयं ते तव ब्रदीया वयमिति हेतोर्वक्तव्यमित्यर्थः ॥ तिस्रः प्रतीकोक्ताः तत्र महां इन्द्र इत्यस्याः [७. ४०.] माहेन्द्रग्रहणे विनियोगः नृवदित्यस्याः [७. ३१.] स्थाने कदा चनेति [८. २. ३.] द्वयोरादित्यग्रहणे विनियोगः ॥ २७ ॥

आ तत्तऽइन्द्रायवः पनन्ताभि यऽऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां महीꣳ सहस्रधारां बृहतीं दुदुक्षन् ॥ २८ ॥

गौरीवितिदृष्टा त्रिष्टुप् आदित्यग्रहस्य दधिग्रहणे (13.) विनियोगः यज्ञो देवानामित्यस्याः [८. ४.] स्थाने । हे इन्द्र आयवो मनुष्याः ते तव तत्कर्म आपनन्त पूजयन्ति पनतिः पूजाकर्मा लङ् अडभाव आर्षः । ये आयवः ऊर्वमन्नं सोमरूपमभितितृत्सान् अभितितृत्सन्ति तर्दितुं हिंसितुमिच्छन्ति तितृत्सन्ति ऊतृदिर् हिंसानादरयोः सनन्तः इतश्च लोपः परस्मैपदेघिति [पा° ३. ४. १७.] अतेरिकारलोपः । सोमं सोतुमिच्छतीत्यर्थः । कीदृशमूर्वं गोमन्तं गौरुदकमस्ति यस्मिन्स गोमान् तम् निद्याभ्यालक्षणोदकयुतम् ताभिरेव सोमः सूयते । किं च ये मनुष्याः महीं भूमिं दुदुक्षन् (14.) दुधुक्षन्ति दोग्धुमिच्छन्ति दुहेः सनन्ताच्छट् पूर्ववदिकारलोपः तेऽपि तव कर्म पनन्ति स्तुवन्ति । कीदृशीं महीं सकृत्स्वम् सकृदेकवारमेव सूते हिरण्यधान्यादि ददाति सकृत्सूः ताम् पुरुपुत्रां बहुपुत्राम् सर्वे पदार्थाः पृथिवीत उत्पद्यन्ते । सहस्रधारां सहस्रं धारा हिरण्यादयो यस्याः सा ताम् बहुभोगदाम् यद्वा सहस्रमसंख्यं प्राणिजातं धरति सहस्रधारा ताम् । बृहतीं महतीम् । ये विप्राः सोमाभिषवं कुर्वन्ति ये च क्षत्रिया भूमिं दुहन्ति पालयन्ति ददते तऽइन्द्रस्य वृत्रबधादिकर्म स्तुवन्ति नान्ये दुर्मेधस इत्यर्थः ॥ २८ ॥

इमां ते धियं प्रभरे महो महीमस्य स्तोत्रे धिषणा यतꣳआनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥ २९ ॥

कुत्सदृष्टा जगती सावित्रपुरोरुक् वाममद्येत्यस्याः [८. ६.] स्थाने । हे इन्द्र इ-मां मामकीं धियं बुद्धिं स्तुतिं वा कर्म वा ते तुभ्यं प्रभरे प्रहरे समर्पयामि । की-दृशस्य ते मरुः मरुतः पूज्यस्य । कीदृशीं धियं मरीं मरुतीम् यत् यस्मात् अस्य यजमानस्य धिषणा बुद्धिर्वाग्वा स्तोत्रे क्रियमाणे ते तव आनजे त्वां व्यनक्ति कर्मणि षष्ठी अञ्जेर्लिट् नलोपश्छान्दसः । किं च देवासः देवाः तमिन्द्रमन्वमदन् अनुमदन्ति स्तुवन्ति छन्दसि परेऽपीति [पा° १.४.८१.] अनोः परः प्रयोगः । क्व स्तुवन्ति उत्सवे अभ्युदये प्रसवे गुर्वाज्ञानुज्ञायां सत्याम् यद्वा प्रसवे पुत्रोत्पत्ति-रूपे उत्सवे इन्द्रं स्तुवन्ति । कीदृशमिन्द्रं शवसा बलेन सासह्विम् सहते सासह्विः शत्रूणामभिभवितारम् चौ समुच्चये ॥ ॥ इन्द्रस्तुत्संज्ञं द्वितीयमरुः समाप्तम् ॥ २९ ॥

III. विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंक्षुतम् ।
वातजूतो योऽअभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥ ३० ॥

अथ तृतीयमरुः सूर्यस्तुत् तथा च श्रुतिः [१३.७.१.५.] सूर्यस्तुडुक्थस्तृतीयम-रुर्भवति तस्य सौर्या ग्रहा भवन्ति सौर्यः पुरोरुचः सर्वꣳ सौर्यमसदिति । चतुर्दश पुरोरुचस्तिस्रः प्रतीकोक्ताः एवं सप्तदश ऋचः सूर्यस्तुत्संज्ञे उक्थ्यसंस्थे सर्वमेधस्य (15.) तृतीयेऽहनि ॥ ऐन्द्रवायवादिसावित्रान्तानां ग्रहाणां पूर्वोक्तक्रमेण ग्रहण-मत्रा बोध्याः ॥ विभ्राड्दृष्टा जगती ऐन्द्रवायवपुरोरुक् । विविधं भ्राजते विभ्राट् सूर्यः सोम्यं सोमरूपं हविः पिबतु कीदृशं सोम्यं वृहत् महत् मधु मधुरस्वादम् । यः सूर्यः त्मना आत्मना प्रजाः अभिरक्षति पालयति पुपोष पुष्णाति च पुरुधा ब-हुधा विराजति च शोभते । कीदृशः यज्ञपतौ यजमाने अविक्षुतमस्खण्डितमायुः दधत् स्थापयन् । वातजूतः वातेन प्रेरितः वातेन प्रेरितं रविमण्डलं भ्रमतीति प्रसिद्धिः ॥ त्मना मन्त्रेष्वाङादेरात्मन [पा° ६.४.१४१.] इत्याकारलोपः । क्व कौ-ठिल्ये क्रु क्वरेश्छन्दसीति [पा° ७.२.३१.] क्रु-आदेशः ॥ ३० ॥

उदु त्यं जातं° ॥ ३१ ॥

ऐन्द्रवायवस्य द्वितीया पुरोरुक् । व्याख्याता [७.४१.] ॥ ३१ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ२ऽअनु । त्वं वरुण पश्यसि ॥ ३२ ॥

प्रस्कण्वदृष्टा गायत्री मैत्रावरुणपुरोरुक् । सर्वमेधे पत्न्याकारिणाग्निश्चीयते तद्रूपमात्मानं सम्पाद्य मुक्तिमाप्नोति तदत्र प्रार्थ्यते । हे पावक शोधक येन चक्षसा दर्शनेन त्वं भुरण्यन्तमनुपश्यसि क्षिप्रपाती पक्षी भुरण्युः भुरण्युमात्मानं करोति भुरण्यति भुरण्यतीति भुरण्यन् तम् क्विबन्तात् शतृप्रत्ययः । सर्वमेधयाङ्गिनं भुरण्युपक्षिरूपमात्मानं कृत्वा स्वर्गङ्तं येन चक्षसानुपश्यसीत्यर्थः । तेन चक्षसा ज्ञानानस्मानपि भुरण्यतः हे वरुण त्वं पश्य वरुणः सूर्यः ॥ ३२ ॥

दैव्यावध्वर्यूऽआगतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ समञ्जाथे ॥
तं प्रत्नथा । अयं वेनः । चित्रं देवानाम् ॥ ३३ ॥

आश्विनपुरोरुक् गायत्री । देवानामिमौ दैव्यौ हे दैव्यौ अध्वर्यू अश्विनौ युवां रथेन आगतमागच्छतम् शपो लुक् कीदृशेन रथेन सूर्यत्वचा सूर्यस्येव त्वक् कान्तिर्यस्य तेन । एत्य मधा मधुरेण हविषा सोमपुरोडाशदध्यादिना यज्ञं समञ्जाथे युवां संभक्तवतम् बह्वनि हवींषि कुरुतमित्यर्थः ॥ तं प्रत्नथा [७.१२.] अयं वेनः [७.१६.] चित्रं देवानाम् [७.४२.] तिस्रः प्रतीकोक्ताः आद्ये द्वे शुक्रमन्थिपुरोरुचौ (16.) तृतीयाग्रयणस्य ॥ ३३ ॥

आ नऽइडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ ३४ ॥

अगस्त्यदृष्टा त्रिष्टुप् ध्रुवपुरोरुक् । विश्वानरो विश्वनरहितकारी सविता देवः नोऽस्माकं विदथे यज्ञगृहे आ एतु आगच्छतु । कथम् इडाभिः सुशस्ति यथा स्यात्तथा इडाभक्षणेन शोभना शस्तिः शंसनं प्रशंसा यस्यां क्रियायां तथा यथा सर्वे इडां भक्षयन्ति तथा एतित्यर्थः यद्वा सुशस्ति विभक्तिलोपः कीदृशे यज्ञगृहे सुशस्ति सुशस्तौ इडाभिः शोभनप्रशंसायुक्ते । एवं सूर्यमुक्ता देवानाह हे युवानः जरारहिता देवा अपि निश्चितम् अभिपित्वे अभिपतने आगमनकाले यथा येन प्रकारेण यूयं मत्सथ मद तृप्तौ तृप्यथ तथा नोऽस्माकं विश्वं सर्वं जगत् गन्तृ (17.) जङ्गमं पुत्रगवादिकं मनीषा मनीषया बुद्ध्या मत्सथ अन्तर्भूतण्यर्थः तर्पयत (18.) यथा भवद्भिस्तृप्तिः क्रियते तथास्मत्प्रज्ञास्तर्पणीया इत्यर्थः ॥ ३४ ॥

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥३५॥

श्रुतकक्षसुकक्षदृष्टा गायत्री ऐन्द्राग्नपुरोरुक् । वृत्रो मेघे रिपौ धान्ते दानवे वासवे गिराविति कोशात् वृत्रमन्धकारं शार्वरं (19.) हन्ति वृत्रहा रविः हे वृत्रहन् हे सूर्य हे इन्द्र ऐश्वर्ययुक्त अद्य यत् कच्च यत्र कुत्रचित् त्वमभि उदगाः अभ्युदेषि तत्सर्वं ते तव वशेऽस्तीति शेषः यद्वा उदगाः अत्र पुरुषव्यत्ययः यत्किंचित्प्राणिज्ञातमुदेति तत्सर्वं तव वशे सर्वस्येशिता त्वमेवेत्यर्थः ॥३५॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ॥३६॥

प्रस्कण्वदृष्टा गायत्री वैश्वदेवपुरोरुक् । हे सूर्य त्वं ज्योतिष्कृत् तेजसः कर्तासि विश्वमाभासि प्रकाशयसि च अग्निविद्युन्नक्षत्रचन्द्रग्रहतारकादिषु त्वदीयं तेज इत्यर्थः । कीदृशं विश्वं रोचनं दीप्यमानं त्वत्प्रकाशेनेति भावः । कीदृशस्त्वम् तरणिः तरत्यतिक्रामति नभोवर्त्मेति तरणिः अश्यवितृभ्योऽनिरिति [उणा० २.१८.] तरतेरनिप्रत्ययः । विश्वदर्शतः विश्वस्य दर्शतो दर्शनीयः दृशेरतच् ॥३६॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वितत्तं संजभार ।
यदेदयुक्त हरितः सधस्यादाद्रात्री वासस्तनुते सिमस्मै ॥३७॥

कुत्सदृष्टे द्वे त्रिष्टुभौ मरुत्वतीययोः पुरोरुचौ । सूर्यस्य तत् देवत्वं देवतानुभावः तच्च महित्वं महाभाग्यमैश्वर्यम् तत्किम् कर्तोः ईश्वरे तोसुन्कसुनाविति [पा० ३.४.१३.] इति करोतेस्तोसुन्प्रत्ययः कार्यश्रेष्ठस्य जगद्रूपस्य मध्या मध्ये वितत्तं विस्तारितमंशुजालं संजभार संजहार संहरते न क्वान्य एतादृशमंशुजालं प्रसारयितुं संहर्तुं वा शक्नोतीत्यर्थः । किं च यदा इत् यदैव हरितः हरिनवर्णाश्वमीनयुक्त युङ्क्ते आत्मनि आरोपयति सधस्थात् सह तिष्ठन्त्यंशवो यत्र तत्सधस्थं व्योममण्डलम् सध मादस्थयोश्छन्दसीति [पा० ६.३.९६.] सहस्य सधादेशः संध्याकाले पीतवर्णानंशून्यदा व्योममण्डलात्स्वस्मिन्योजयति । आत् अनन्तरमेव रात्री निशा सिमस्मै वासः तनुते सर्वं वस्तु तमसाच्छादयतीत्यर्थः सूर्यास्तादनन्तरं रात्रिसद्भावात् । सिमशब्दः सर्वपर्यायः ॥३७॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥३८॥

सूर्यो द्योः द्युलोकस्योपस्थे उत्सङ्गे मित्रस्य वरुणस्य च तद्रूपं कृणुते कुरुते येन रूपेण जनानभिचक्षे अभिचष्टे पश्यति मित्ररूपेण सुकृतिनोऽनुगृह्णाति वरुणरूपेण दुष्कृतिनो निगृह्णातीत्यर्थः । अस्य सूर्यस्य अन्यत् एकं पाजो रूपमनन्तम् कालतो देशतश्चापरिच्छेद्यम् रुशत् शुक्लं दीप्यमानं विज्ञानघनानन्दं ब्रह्मैव । अन्यत् कृष्णं द्वैतलक्षणं रूपं हरितः दिशः इन्द्रियवृत्तयो वा सम्भरन्ति धारयन्ति । इन्द्रियग्राह्यं द्वैतरूपमेकम् एकं शुद्धं चैतन्यमद्वैतमिति द्वे रूपे सूर्यस्य सगुणनिर्गुणं ब्रह्म सूर्य एवेत्यर्थः ॥ पाज इति बलनाम [निघ० २.२.] इह रूपमुच्यते । रोचतेऽर्चिरित्यादिना रुशत् औणादिकेऽति प्रत्यये चकारस्य शकारो गुणाभावश्च निपात्यते यद्वा रुश हिंसायाम् रुच्यर्थे वर्तमानादस्माच्छटः शतरि रुशदिति रूपम् ॥३८॥

वण्महाँ२॥ऽअसि सूर्य वडादित्य महाँ२॥ऽअसि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२॥ऽअसि ॥३९॥

जमदग्निर्दृष्टे द्वे बृहतीसतोबृहत्यौ । आद्या माहेन्द्रपुरोरुक् । वडित्यव्ययं (20.) सत्यार्थम् । हे सूर्य सुवति प्रेरयति कार्येषु जगदिति सूर्यः राजसूयसूर्येत्यादिना [पा० ३.१.११४.] क्यबन्तो निपातः । वट् सत्यं त्वं महान् असि श्रेष्ठोऽसि । आदत्तेऽभूनित्यादित्यः हे आदित्य वट् त्वं महानसि । किं च महः महतः सतः नित्यस्य ते तव महिमा पनस्यते लोकैः स्तूयते । हे देव दीप्यमान अद्धा सत्यं त्वं महानसि अभ्यासे भूयांसमर्थं मन्यत्तऽइति [निरु० १०.४२.] पुनरुक्तिरादरार्था ॥३९॥

वट्सूर्य श्रवसा महाँ२॥ऽअसि सत्रा देव महाँ२॥ऽअसि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥४०॥

आदित्यमहप्रथममहरणम् । हे सूर्य वट् सत्यं श्रवसा धनेन यशसा वा त्वं महानसि । हे देव सत्यं त्वं महानसि देवानां मध्ये श्रेष्ठोऽसि केन मह्ना महः

त्वेन । कीदृशः त्वम् असुर्यः असवः प्राणा येषां सन्ति तेऽसुराः तेभ्यो हितोऽसुर्यः प्राणिहितः । पुरोहितः पुरोऽग्रे हितः स्थापितः सर्वकार्येषु पुरः पूज्यः सर्वदेवानां सूर्यार्घदानानन्तरमेव पूजाधिकारात् । विभु व्यापकमदाभ्यमनुपहिंस्यं ज्योतिः तेजस्त्वमेव तेजोरूप इत्यर्थः ॥ ४० ॥

आयन्त-इव सूर्ये विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ ४१ ॥

नृमेधदृष्टा बृहती । आदित्यस्य पुनर्ग्रहणम् । अयन्त इति आयन्तः अिञ् सेवायाम् अतः शतरि शपि गुणे प्राप्ते व्यत्ययेन वृद्धिः इव एवार्थे । सूर्ये अयन्तः आश्रयन्तः एव अर्थाद्रश्मयः इन्द्रस्य विश्वा इत् विश्वानि सर्वाण्येव वसूनि धनानि वृष्टिधान्यनिष्पत्त्यादीनि भक्षत अभक्षत भजन्ते विभजन्ते (21.) प्राणिभ्यो विभज्य ददतीत्यर्थः भज भागसेवयोः अस्य लुङि तङि प्रथमबहुवचने रूपम् अडभाव आर्षः आत्मनेपदेघनत इति [पा° ७.१.५.] झस्यादादेशः । सूर्यकिरणा इन्द्रदत्तां वृष्टिं भूमौ विभजन्तीत्यर्थः । किं च वयं तान्येव वसूनि जाते पुत्रे जनमाने उत्पद्यमाने च ओजसा तेजसा सह प्रतिदीधिम धारयाम स्थापयामेत्यर्थः । किमिव भागं न भागमिव यथा स्वभागं पुत्रादिषु धारयामस्तथेत्यर्थः । धि धृतौ लङ् व्यत्ययेन शपः श्लुः द्वित्वम् तुजादित्वादभ्यासदीर्घः ॥ ४१ ॥

अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ४२ ॥

कुत्सदृष्टा त्रिष्टुप् दध्यादित्यग्रहस्थयणे विनियोगः । दीव्यन्ति दीप्यन्ते इति देवाः रश्मयः हे देवाः नोऽस्मानंहसः पापात् निःपिपृत निर्मुञ्चत अवद्यात् दुर्यशसोऽपि निःपिपृत पृथक् कुरुत अस्माकं पापानि दुर्यशांसि च नाशयतेत्यर्थः । अद्य अस्मिन्दिने सूर्यस्य उदिता उदिते उदये अद्य सूर्योदयेऽस्मान् शुद्धान्कुरुतेत्यर्थः । अद्येत्यत्र ह्यचोऽतस्तिङः निपातस्य चेति [पा° ६.३.१३५.१३६.] दीर्घः । अन्येषामपि दृश्यत इति [पा° ६.३.१३७.] दीर्घः पिपृतेत्यत्र । किं च मित्रादयः तत्

[नः] अस्मद्वचनं मामकृतां पूजयन्तु अङ्गीकुर्वन्त्वित्यर्थः के मित्रः वरुणः अदितिः देवमाता सिन्धुः समुद्रो नदी वा पृथिवी उतापि च द्यौः स्वर्गः ॥ ४२ ॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ४३ ॥

हिरण्यस्तूपदृष्टा त्रिष्टुप् सावित्रपुरोरुक् । सविता देवः हिरण्ययेन हिरण्मयेन रथेन आयाति आगच्छति किं कुर्वन् कृष्णेन रजसा रात्रिलक्षणेन सह आवर्तमानः पुनर्भ्रमणं कुर्वन् अमृतं देवादिकं मर्त्यं मनुष्यादिकं च निवेशयन् स्वस्वप्रदेशेषु स्थापयन् भुवनानि पश्यन् कानि साधु कुर्वन्ति कान्यसाधूनि विचारयन् ॥ ४३ ॥

IV. प्रवावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ४४ ॥

तृतीयं सूर्यस्तुदुक्थ्यमहः समाप्तम् अथ चतुर्थमहः वैश्वदेवस्तुत् तथा च श्रुतिः [१३. ७. १. ६.] वैश्वदेववच्चतुर्थमहर्भवति वैश्वदेवा ग्रहा भवन्ति वैश्वदेव्यः पुरोरुच इति । वैश्वदेवस्तुति चतुर्थेऽह्नि एकादश पुरोरुचः षट् प्रतीकोक्ताः इति सप्तदश ऐन्द्रवायवादिसावित्रान्तग्रहाणां पुरोरुचो ग्रहणमन्त्राः ॥ वसिष्ठदृष्टा त्रिष्टुप् ऐन्द्र[वायव]पुरोरुक् । एषां यजमानानां स्वस्तये कल्याणाय वीरिट ऽन्तरिक्षे वर्तमानौ वायुः पूषा च आ इयाते आगच्छतः ई कान्त्यसनगतिव्याप्त्यादौ [धातु° २४. ३१.] व्यत्ययेन तङ् । कीदृशौ वायुः नियुत्वान् नियुतो नियुत्संज्ञा अश्वाः सन्त्यस्य सः नियुतो वायोरित्युक्तेः [निघ° १. १५.] । कस्मिन्काले अक्तोः रात्रेः उषसः दिनस्य पूर्वहूतौ पूर्वा चासौ हूतिश्च पूर्वहूतिस्तस्याम् प्रथमाह्वानकाले अग्निहोत्रहोमकाले इत्यर्थः उषसः पूर्वाह्णे पूषा रविरायाति रात्रौ वायुः वायुना वायुसखत्वादग्निर्लक्ष्यते रात्रिहोमस्याग्निदेवत्यत्वात् । तत्र दृष्टान्तः काविव विश्पतीव यथा विशां पती द्वौ राजानौ विशां वीरिटे मनुष्याणां गणे आगच्छतस्तद्वत् तावपि तेषां स्वस्तये इयाते । एषां केषाम् येषां बर्हिः प्रवावृजे प्रवृज्यते प्रस्तीर्यते

वृङ्गी वृतित्यागयोः लिट् अभ्यासदीर्घः संहितायाम् । कीदृशं बर्हिः सुप्रयाः शोभनं प्रयः प्रगमनं प्रस्तरणं यस्य तत्सुप्रयः दीर्घश्छान्दसः सम्यक् विधिना प्रस्तीर्णमित्यर्थः । वीरिटशब्दो गुणवाचकः तथा च यास्कः [निरु° ५.२८.] प्रवृज्यते सुप्रायणं बर्हिरेषामियाते (22.) सर्वस्य पातारौ वा पालयितारौ वां वीरिटमन्तरिक्षं भियो वा भासो वा ततिरिति गणाभिधानं वा स्यात् सोऽपि भीतननो (23.) भासस्तनयश्च अन्तरिक्षे निरालम्बने (24.) भयम् भासो नक्षत्राणां तननम् गणमपि दृष्ट्वा योद्धारो बिभ्यति भियो वी-आदेशे तनोतेः (25.) रिट इति ॥४४॥

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान्मारुतं गणम् ॥४५॥

मेधातिथिदृष्टे द्वे गायत्र्यौ आद्या ऐन्द्रवायवस्य पुनर्ग्रहणे द्वितीया मैत्रावरुणग्रहणे । इन्द्रवायू बृहस्पतिं मित्रा विभक्तेराकारः अग्निं पूषणं भगम् आदित्यान् मारुतं मरुत्सम्बन्धिनं गणम् एतानाह्वयामि ॥४५॥

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥४६॥

वरुणः मित्रश्च विश्वाभिः सर्वाभिः ऊतिभिः अवनैः रक्षणप्रकारैः प्राविता प्रकर्षेण रक्षको भुवत् भवतु भवतेर्व्यत्ययेन तुदादित्वात् शप्रत्ययः इतश्च लोप इति [पा° ३.४.९७.] तिप इत्लोपः धातोरुवङ् । किं च मित्रावरुणौ नोऽस्मान्सुराधसः शोभनधनान् करतां कुरुताम् शोभनं राधो येषां ॥४६॥

अधि न इन्द्रेषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ॥
तं प्रत्नथा । अयं वेनः । ये देवासः । आ न इडाभिः । विश्वेभिः सोम्यं मधु । ओमासश्चर्षणीधृतः ॥४७॥

कुसीदिदृष्टा गायत्र्याश्विनपुरोरुक् । हे इन्द्र हे विष्णो हे मरुतः हे अश्विना अश्विनौ नोऽस्माकमेषां सजात्यानां समानजातीयानामधि सजात्यमध्ये यूयमित आगच्छत ॥ अत्र प्रतीकोक्ताः तं प्रत्नथा [७.१२.] शुक्रग्रहे अयं वेनः [७.१६.] मन्थिग्रहे ये देवासः [७.११.] आग्रयणस्य आ न इडाभिः [३३.३४.] ध्रुवस्य

विश्वेभिः सोम्यं मधु [३३. १०.] ऐन्द्राग्नस्य ओमासश्चर्षणीधृतः [७. ३३.] वैश्वदेवस्य ग्रहणे ॥ ४७ ॥

अग्ऽइन्द्र वरुण मित्र देवाः शर्धः प्रयन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रोऽअध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ ४८ ॥

प्रतिक्षत्रदृष्टा त्रिष्टुप् मरुत्वतीयपुरोरुक् हे अग्ने हे इन्द्र हे वरुण हे मित्र हे देवाः हे मारुत (26.) मरुद्गण उतापि हे विष्णो यूयं शर्धः बलं प्रयन्त प्रयच्छत दत्त यमेः शपो लुक् । एवं प्रत्यक्षमुक्त्वा परोक्षमाह उभा नासत्या उभौ नासत्यावश्विनौ रुद्रः अध अथ ग्नाः देवपत्न्यः पूषा भगः सरस्वती च जुषन्त जुषन्तां सेवन्तां हवींषि ॥ ४८ ॥

इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ऽअपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥ ४९ ॥

वत्सारदृष्टा जगती सशस्त्रमरुत्वतीयपुरोरुक् । इन्द्राग्नी मित्रावरुणौ अदितिम् स्वः आदित्यम् पृथिवीम् द्याम् द्युलोकम् मरुतः पर्वतान् अपः विष्णुम् पूषणम् ब्रह्मणस्पतिम् भगम् शंसं स्तुत्यं सवितारम् एतान् नु क्षिप्रमूतयेऽवनायाहं हुवे आह्वयामि ॥ ४९ ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ऽअवन्तु देवाः ॥ ५० ॥

पज्र त्रिष्टुभः आद्या प्रगाथदृष्टा माहेन्द्रपुरोरुक् । यो नरः शंसते शस्त्राणि शंसति स्तुवते स्तौति स्तोत्राणि प्रकर्षेण जपति पज्रः प्राप्तिधनः सन् धायि दधाति हवींषि तान् (27.) अस्मांश्च यजमानान्देवा अवन्तु पान्तु पज्रः पृषोदरादिः । कीदृशा देवाः अस्मे अस्मासु मेहना जस आकारः मेहन्ति सिञ्चन्ति मेहनाः धनादिसेक्तारः । रोदयन्ति शत्रूनिति रुद्राः । पर्वतासः पर्वाणि उत्सवा विद्यन्ते येषां ते पर्वताः उत्सववन्तः पर्वमरुद्भ्यां तबिति [पा° ५. २. १२२. वा° ११.] तप्रत्ययः । वृत्रहत्ये वृत्रासुरवधाय भरहूतौ भरे संग्रामे हूतिराह्वानम् तत्र स-

ज्ञोषाः समानो ज्ञोषः प्रीतिर्येषां ते एकमतय इत्यर्थः । इन्द्रज्येष्ठाः इन्द्रो ज्येष्ठो येषां ते । ईदृशा देवा नोऽवन्तु ॥५०॥

अर्वाञ्चोऽअध्वा भवता यज्ञत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राधं नो देवा निजुरो वृकस्य त्राधं कर्तादवपदो यजत्राः ॥५१॥

कूर्मदृष्टादित्यस्य प्रथमा पुरोरुक् । यज्ञं त्रायन्ते यज्ञत्राः यष्टव्या वा हे यज्ञत्राः देवाः अध्व यूयमर्वाञ्चः अस्मदभिमुखाः भवत दीर्घौ संहितायाम् । यतो भयमानः बिभ्यत् अहं वो युष्माकं हार्दि हृदि भवं मनः आव्ययेयम् आगमयेयमभिमुखं सम्पादयेयमित्यर्थः । व्यय गतौ णिजन्तः । भिञो व्यत्ययेन शपि भयमानः । किं च हे यजत्राः देवाः नोऽस्मान् वृकस्य वृकात् त्राधम् पालयत कर्तात् कूपाच्च त्राधम् । कीदृशाद्वृकात् निजुरः जूरी बधे नितरां जूर्यते हिनस्ति निजूः क्विप् तस्मान्निजुरः हिंसकात् । कीदृशात्कर्तात् अवपदः अवाचीनाः पादन्यासा यत्र सः अवपात् तस्मादवपदः सोपानैर्यत्रोत्तरीतुं शक्यतऽइत्यर्थः ॥५१॥

विश्वेऽअद्य मरुतो वि° ॥५२॥

लुशदृष्टादित्यपुनर्ग्रहणे । व्याख्याता [१८.३१.] ॥५२॥

विश्वे देवाः शृणुतिम६ हवं मे येऽअन्तरिक्षे यऽउप द्यवि ष्ठ ।
येऽअग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥५३॥

सुहोत्रदृष्टादित्यग्रहस्य दध्वा श्रयणे (28.) विनियुक्ता । हे विश्वे देवाः ये यूयमन्तरिक्षे स्थ भवथ ये च द्यवि उप स्वर्गसमीपे स्थ ये चाग्निजिह्वाः वह्निमुखाः उत वा अपि च यजत्राः यजनीयाः ते सर्वे यूयमिमं मे मत्कृतं हवमाह्वानं शृणुत श्रुत्वा चास्मिन्बर्हिषि आसद्योपविश्य मादयध्वं तृप्यध्वम् ॥५३॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्व६ सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥५४॥

वामदेवदृष्टा जगती सावित्र्यृचस्य पुरोरुक् । हे सवितः हि निश्चितं प्रथममुदयसमये यज्ञियेभ्यः यज्ञार्हेभ्यो देवेभ्यः त्वमुत्तमं भागमग्निहोमद्रूपं सुवसि प्रेरय-

सि षू प्रेरणे तुदादिः अभ्यनुज्ञानासीत्यर्थः । कीदृशं भागममृतत्वममृतप्रदमित्यर्थः कार्यकारणयोरभेदेन निर्देशः । आत् इत् अनन्तरमेव उदयानन्तरम् दामानम् ददाति प्रकाशमिति दामा रश्मिसमूहः तं व्यूर्णुषे विवृणोषि विस्तारयसि । ततो मानुषेभ्यः [जीविता] जीवितानि जीवनहेतूनि कर्माणि व्यूर्णुषे सूर्योदयानन्तरमेव प्राणिनां कर्मसु प्रवृत्तेः कीदृशानि जीवितानि [अनूचीना] अनूचीनानि अन्वञ्चन्ति तान्यनूचीनानि रश्मिसमूहानुगतानि तमसि तदभावात् । लौकिकवैदिकव्यवहारप्रवर्तयिता त्वमेवेत्यर्थः ॥ ॥ इति वैश्वदेवस्तुच्चतुर्थमहः । समाप्तोऽयं सर्वमेधः ॥५४॥

V. प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥५५॥

अथ पञ्चदशपञ्चदशत्रयोदशर्चास्त्रयोऽनुवाकाः पुरोरुचोऽनारभ्याधीताः श्रौतकर्मण्यविनियुक्ताः ब्रह्मयज्ञार्हा आदित्ययाज्ञवल्क्यदृष्टाः पितृमेधपर्यन्तम् ॥ ऋज्रिश्वदृष्टा त्रिष्टुप् वायुदेवत्या । प्रकर्षेण यजति प्रयज्युः हे प्रयज्यो अध्वर्यो बृहती मनीषा महत्या बुद्ध्या कृत्वा अच्छ आभिमुख्येन त्वं वायुं प्र इयक्षसि प्रकर्षेण यष्टुमिच्छसि । कीदृशः त्वम् कविः ज्ञानी । कीदृशं वायुं बृहद्रयिम् बृहन्रयिर्यस्य तम् महाधनम् । विश्ववारम् विश्वेन व्रियते तम् सर्वस्य वरणीयम् विश्वं वृणोतीति वा सर्वव्यापकम् । रथप्राम् रथं प्राति पूरयति रथप्राः तम् यजमानाय दातुं धनैः रथं पूरयति । द्युतद्यामा व्यत्ययः द्युतद्यामानम् द्युतत् दीप्यमानं याम यमनं नियमनं यस्य तम् । नियुतः पत्यमानः उभयत्रविभक्तिव्यत्ययः नियुद्भिरश्वैः पत्यमानं गच्छन्तम् । कविं क्रान्तदर्शनम् । ईदृशं वायुं यजेत्यर्थः ॥५५॥

इन्द्रवायूऽइमे सु° ॥५६॥

व्याख्याता [७.८.] ॥५६॥

मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीꣳ साधन्ता ॥५७॥

हे मधुच्छन्दोदृष्टे गायत्र्यौ आद्ये लिङ्गोक्तदेवत्या । मित्रं वरुणं चाहं हुवे आ-

क्रियामि । कीदृशं पूतदक्षम् पूतं पवित्रं सदाचारं दक्षयति धनपुत्रादिभिर्वर्धयति पूतदक्षस्तम् दक्ष कम्पृद्योरित्यस्मान्निजन्तात्कर्मण्यण् । रिशादसम् रिशन्ति हिंसन्ति रिशा डुष्टाः तान्समन्ताद्यसति नाशयति रिशादसः तम् रिश हिंसायाम् दस उपक्षये । द्वयोर्विशेषणे । कीदृशावुभौ धियं कर्म साधन्ता साधयन्तौ । कीदृशीं धियं घृताचीम् घृतमञ्च्यते क्रियते यत्र तम् ॥५७॥

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आयातꣳ रुद्रवर्तनी ॥

तं प्रत्नथा । अयं वेनः ॥५८॥

आश्विनौ द्वयोरश्विनोरेकस्य दस्र इति नामापरस्य नासत्य इति । हे दस्रौ दर्शनीयौ हे [नासत्या] नासत्यौ न असत्यौ सत्यवादिनावित्यर्थः । युवामायातमागच्छतम् यतः सुताः अभिषुताः सोमा इति शेषः । कीदृशाः सोमाः युवाकवः युवां कामयन्ते ते युवाकवः मां पिबतमितीच्छन्तः यद्वा युवन्ति अग्नौ मिश्रीभवन्ति युवाकवः कठिकुषिभ्यां काकुरिति [उणा° ३.७६.] बहुलग्रहणात्काकुप्रत्ययः । वृक्तबर्हिषः वृक्तं बर्हिर्यत्र ते । कीदृशौ युवां रुद्रवर्तनी रुद्रस्येव वर्तनिः पन्था ययोस्तौ रुद्रवद्गमनशीलौ ॥ तं प्रत्नथा [७.१२.] अयं वेनः [७.१६.] एते द्वे प्रतीकोक्ते ॥५८॥

विद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ।

अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥५९॥

कुशिकदृष्टा त्रिष्टुप् इन्द्रदेवत्या । सरु रमन्ते देवा विप्रा वा यस्यां सा सरमा वाक् । प्रथमा आद्या सरमा त्रयीलक्षणा वाक् अरु यज्ञाभिमुखं गात् आगच्छति यज्ञं प्रतिपादयतीत्यर्थः । कीदृशी सरमा सुपदी शोभनानि पदानि सुप्तिङन्तानि यस्यां सा । अक्षराणामकारादीनां रवं शब्दं जानती ज्ञापयन्ती अन्तर्भूतणिजर्थः । तां सरमां यदि चेत् विदत् जानीयात् अध्वर्युः तर्हि पाथः सोमलक्षणमन्नं कः कुर्यात् वेदानभिज्ञस्य सोमकण्डनानधिकारात् । कीदृशं पाथः अद्रेः रुग्णम् विभक्तिव्यत्ययः अद्रिणा सोमाभिषवग्रावणा रुग्णमभिषुतम् । महि महत् । पूर्व्यं पूर्वगृहीतमुपांशुयाजार्थमैन्द्रवायवादिपात्रेषु । सध्यक् सहाञ्चति सहस्य सधिः सहैव कृव-

नाय गहत् । अग्रं नयत् अग्रं मुख्यत्वं यजमानं प्रापयत् यज्ञेन यजमानो मुख्यो भवति ॥ एवमधियज्ञं मन्त्रो व्याख्यातः । बह्वृचानां तु संवादसूक्तमिदम् । तत्र पणिभिरसुरैर्देवगोधनेऽपहृते इन्द्रेण देवशुनी तद्वीत्यै (29.) प्रेरिता तदभिप्रायेण व्याख्यायते । सरमा देवशुनी इन्द्रेण गवन्वेषणाय प्रहिता सती यदि यदा अद्रेः गिरेः रुग्णं भग्नम् द्वारम् विदत् अविदत् अलभत् तदा इन्द्रः पाथः कविरन्नं कः अकार्षीत् तस्मै दत्तवान् । ततः सुपदी शोभनपादयुक्ता सा सरमा अङ्गिराणां द्वारेण नाशेन रक्षितानामनुपद्रुतानां गवाम् अग्रं प्राप्तं नयत् अनयत् प्रापयत् (30.) । प्रथमा प्रथमम् स्वं गवां कृम्भारवं जानती सती अञ्ज गवामभिमुखं गात् अगात् जगाम । कीदृशं पाथः नह्यि मन्हत् । पूर्व्यं पूर्वं प्रेषणकाले अन्नादिनीं ते प्रजां करिष्यामीति प्रतिज्ञातम् । सध्यक् सधीचीनमितरैरपि सह भोज्यम् ॥ विदत् विदृ लाभे पुषादीत्यादिना [पा° ३.१.५५.] च्लेरङादेशः अडभाव आर्षः । सरमा सृ गतौ औणादिकोऽमप्रत्ययः सरमा सरणिरिति (32.) यास्कः । रुग्णम् रुजो भङ्गे निष्ठायामोदितश्चेति [पा° ८.२.४५.] नत्वम् । पाथः पातीति पा रक्षणे असुन्प्रत्ययस्य (31.) थुडागमः । कः करोतेर्लुङि मन्त्रे घसह्वरेत्यादिना [पा° २.४.८०.] च्लेर्लोपे रूपम् । सुपदी पादोऽन्यतरस्यामिति [पा° ४.१.८.] ङीप् । गात् इणो गा लुङि ॥५१॥

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरएतारमग्नेः ।
एनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६० ॥

विश्वामित्रदृष्टा त्रिष्टुब्वैश्वानरी । देवाः वैश्वानरात् विश्वेभ्यो हितात् अग्नेः अन्यं स्पशं द्रुतं पुरएतारं सर्वकार्येषु पुरःसरं च नहि अविदन् नालभन्त नञ्शब्दो निषेधवाची । स्पशः प्रणिधिरुच्यते । पुर एति गच्छति पुरएता तम् । आ ईम् निपातौ अथार्थौ अथामृता देवाः एनं वैश्वानरमवृधन् अवर्धयन् कीदृशमग्निम् अमर्त्यममरणधर्माणम् किमर्थमवृधन् क्षैत्रजित्याय क्षेत्रमेव क्षैत्रं तस्य जित्यं जयस्तस्मै यजमानस्य क्षेत्राप्त्यै ॥ ६० ॥

उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥ ६१ ॥

भरद्वाजदृष्टा ऐन्द्राग्नी गायत्री । वयमिन्द्राग्नी हवामहे आह्वयामः कीदृशाविन्द्राग्नी उग्रौ उद्गूर्णबलौ । मृधो हिंसकान्विघनिनौ विशेषेण हन्तो नाशयतस्तौ विघनिनौ हन्तेर्घः । ता तौ आहूतौ इन्द्राग्नी नोऽस्मान् ईदृशे भयानके संग्रामे कर्मणि वा मृडातः मृडयतः सुखयतः ॥ ६१ ॥

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२॥ऽइयक्षते ॥ ६२ ॥

देवलदृष्टा सोमदेवत्या गायत्री । हे नरो यज्ञनेतारः ऋत्विजः अस्मै इन्दवे सोमाय उपगायत उद्गातृशास्त्रमनुसृत्योपशब्दयत स्तोत्राणि कुरुतेत्यर्थः । कीदृशायेन्दवे पवमानाय पव गतौ पवते दशापवित्राद्द्रोणकलशं गच्छति पवमानस्तस्मै । देवान् यष्टव्यानभि संमुखमियक्षते यष्टुमिच्छते यजेः सनि छान्दसोऽभ्यासयकारलोपः ॥ ६२ ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥ ६३ ॥

विश्वामित्रदृष्टाद्या द्वे त्रिष्टुभौ इन्द्रदेवत्यास्तिस्रः । हे मघवन्धनवन् ये मरुतो गणदेवाः अहिहत्ये वृत्रहननरूपे कर्मणि वा त्वामवर्धन् जहि वीर्यस्वेत्यादिवचोभिस्ते वृद्धिमकुर्वन् । हे हरिवः हरिनामकाश्वयुक्त शाम्बरे शम्बरसम्बन्धिनि युद्धे ये त्वामवर्धन् । ये च मरुतो गविष्टौ गवां पणेसुरहृतानामिष्टौ प्रत्याहरणेच्छायां ये त्वामवर्धयन् । ये च विप्राः मेधाविनो मरुतो नूनं निश्चितं त्वामनु मदन्ति उत्कर्षयन्ति तर्पयन्ति वा (33.) । हे इन्द्र तैर्मरुद्भिः सगणः गणसहितः सन् सोमं पिब मरुत्वतीयादिग्रहं पिबातृतेः ॥ अहिहत्ये हन्तेर्भावे हनस्त चेति [पा° ३. १. १०८.] क्यप् कृदुत्तरपदप्रकृतिस्वरः । अवर्धन् तेः सार्वधातुकत्वेऽपि छन्दस्युभयथेति [पा° ३. ४. ११७.] आर्धधातुकत्वे णिलोपः यङ्लुगन्तत्वान्निघाताभावः [पा° ८. १. ६६.] । गवामिष्टिर्यस्मिन्रणे इति बहुव्रीहौ प्रकृत्या पूर्वपदमिति [पा° ६. २. १.] पूर्वपदस्वरः । अनुमदन्ति हेर्लसार्वधातुकानुदात्तत्वे धातुस्वरः तिङि चोदात्तवतीति [पा° ८. १. ७१.] गतेर्निघातः ॥ ६३ ॥

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।

अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ६४॥

गौरीवितिदृष्टा । हे इन्द्र त्वं सक्षते बलाय जनिष्ठा अजनिष्ठाः जातोऽसि लुङ् अडभावः । कीदृशाय सक्षते तुराय त्वरमाणाय वेगवते । कीदृशः त्वम् उग्रः उत्कृष्टः । मन्द्रः स्तुत्यः ओजिष्ठः अत्यन्तमोजस्वी ओजिष्ठः विन्मतोर्लुगिति [पा° ५.३.६५.] विनो लुक् । बकुलाभिमानः सर्वं जगन्मद्विभूतिरिति भूयिष्ठाभिमनः (34.) । अत्र वृत्रवधे ईदृशमिन्द्र मरुतश्चित् मरुतोऽपि अवर्धन् स्तुतिसक्षायाम्यामिति शेषः । इदं चेन्द्रसौभाग्यं गर्भकालीनमित्याह यत् यस्मात् मातादितिः धनिष्ठान्या वीरमिन्द्रं दधनत् गर्भे धारितवती नकार उपजनः ॥ ६४॥

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥ ६५॥

वामदेवदृष्टा गायत्री । तु इति निपातः क्षिप्रवचनः ऋचि तुनुघेत्यादिना [पा° ६.३.१३३.] तस्य संहितायां दीर्घः । वृत्राणामावरकाणां पाप्मनां हन्ता वृत्रहा हे वृत्रहन् हे इन्द्र त्वं नोऽस्मान्प्रति तु क्षिप्रम् आ आगच्छेत्यर्थः आगत्य चास्माकमर्धमस्मन्निवासदेशमागहि देवयजनदेशं प्राप्नुहीत्यर्थः । कीदृशस्त्वम् महीभिः महतीभिः ऊतिभिः अवनैः रक्षाभिः महान् योऽन्यं रक्षति स महानुच्यते ॥ ६५॥

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ६६॥

नृमेधदृष्टे द्वे ऐन्द्र्यौ पथ्यावृहतीसतोबृहत्यौ । प्रकृष्टा तूर्तिर्हिंसा येषां यत्र वा ते प्रतूर्तयः शत्रवः संग्रामा वा तेषु प्रतूर्तिषु हे इन्द्र त्वं विश्वाः सर्वाः स्पृधः स्पर्धमानाः शत्रुसेनाः अभि असि अभिभवसि । किं च यतः त्वं विश्वतूरसि विश्वान्सर्वान्रिपून् तूर्वति हिनस्ति विश्वतूः ततः तरुष्यतः हनिष्यतः शत्रून् तूर्य जहि मारय । कीदृशस्त्वम् अशस्तिहा नास्ति शंसा प्रशस्तिर्येषां ते अशस्तयः दुष्टास्तान्हंतीत्यशस्तिहा । जनिता जनयिता स्वपक्षप्रशंसोत्पादकः ॥ ६६॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६७॥

हे इन्द्र द्वीणी द्यावापृथिव्यौ ते तव शुष्मं बलमन्वीयतुः अनुगच्छतः द्यावापृथिवीस्था लोकास्त्वद्बलं बहु मन्यन्ते इति भावः । कीदृशं शुष्मं तुरण्यन्तं शत्रुषु त्वरमाविष्कुर्वन्तम् । अनुगमने दृष्टान्तः मातरौ मातापितरौ शिश्नुं न शिश्नुमिव यथा पितरौ बालमनुगच्छतः यस्य बलाद्द्यावापृथिव्यावप्यबिभीतामिति [निरु° १०.१०.] यास्कः । तदेव प्रपञ्चयति विश्वा इति विश्वाः सर्वाः स्पृधः स्पर्धमानाः शत्रुसेनाः ते तव मन्यवे पञ्चम्यर्थे चतुर्थी तव क्रोधात् अथयन्त (35.) अश्रथयन्त श्रथिताः खिन्ना भवन्ति तव क्रोधदर्शनाद्विज्ञप्तऽइत्यर्थः युक्तमेतत् यत् यस्मात् युद्धे इन्द्र त्वं वृत्रं देवासुराबध्यं तूर्वसि हंसि तूर्वतिर्हिंसार्थः ॥ ६७ ॥

यज्ञो देवानां प्र° ॥ ६८ ॥

कुत्सदृष्टा त्रिष्टुप् । व्याख्याता [८.४.] ॥ ६८ ॥

अद॑ब्धेभिः सवितः पायुभि॒ष्ट्वꣳ शि॒वेभि॑रद्य परि॑पाहि नो॒ गय॑म् ।
हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नोऽअघशꣳस ईशत ॥ ६९ ॥

भरद्वाजदृष्टा जगती सवितृदेवत्या । हे सवितः सर्वस्य प्रसवितः पायुभिः पालनैः नोऽस्माकं गयं गृहं धनं वा त्वमद्य परिपाहि रक्ष गयः कृदरः (36.) इति गृहनामसु [निघ° ३.४.] मोल्कं गय इति [निघ° २.१०.] धननामस्वपि पाठात् गृहधनयोर्गयशब्दः । कीदृशैः पायुभिः अदब्धेभिः अदब्धैरनुपहिंसितैः । शिवेभिः शान्तैः सुखरूपैः कीदृशस्त्वम् हिरण्यजिह्वः हिरण्यवदविचला जिह्वा यस्य सत्यवाक् यद्वा हिरण्या हितरमणीया जिह्वा ज्वाला यस्येति वा हिरण्यं कस्मादित्यादि हितरमणीयं भवतीति वेति [निरु° २.१३.] यास्कोक्तेः । किं च नव्यसे नवीयसे नवतराय सुविताय सु इताय सुखाय अस्मान्रक्ष पालय । किं च माकिः मा कश्चनाघशंसः पापमाशंसमानः शत्रुः नोऽस्माकमीशत ऐश्वर्यं कुर्यात् त्वत्प्रसादात्पाप्मास्माकमीशिता मा भूदित्यर्थः । ईशत लङ् बहुलं छन्दसीति [पा° २.४.७३.] शपो लुगभावः अडभावश्च ॥ ६९ ॥

VI. प्र वी॒रया॒ शुच॑यो दद्रिरे वामध्व॒र्युभि॒र्मधु॑मन्तः सु॒तासः॑ ।

वह॑ वायो नि॒युतो॑ याह्यच्छा॒ पिबा॑ सु॒तस्यान्ध॑सो॒ मद॑ाय ॥७०॥

वसिष्ठदृष्टा त्रिष्टुप् । वायुदेवत्याः पञ्चदश ऋचः द्वे प्रतीकोक्ते एवं सप्तदशकः पुरोरुचां समूहः । वामिति द्विवचनं पत्नीयजमानविषयम् हे पत्नीयजमानौ वां युवयोः स्वभूताः सोमाः दद्भिरे विदीर्णाः चूर्णीभूताः दृ विदरि कर्मकर्तरि लिट् । कीदृशाः प्रवीरया (37.) प्रकृष्टा वीरा ज्ञानोद्बला ऋत्विजो येषां सोमानां ते प्रवीराः सुपां सुलुगिति [पा॰ ७.१.३९.] जसो याजादेशः । शुचयः निर्मलाः । अध्वर्युभिः सुतासः सुताः अभिषवधर्मेण ग्रावभिः द्रवीभावमापादिताः अभिषुण्वन्ति चत्वारः पर्युपवेशनसामर्थ्यादिति [का॰ १.५.१.] कात्यायनस्मरणाद्धर्युभिरिति वक्ष्यवचनम् अध्वर्नेतृभिर्ऋत्विग्विशेषैः सुता इत्यर्थः । मधुमन्तः मधु निग्राभ्याद्रूपमुदकम् तद्वन्तः । एवं पूर्वार्धे पत्नीयजमानौ सम्बोध्य वायुमाह वाति सर्वत्र गच्छति वायुः हे वायो नियुतोऽश्वान् त्वं वह देवयजनदेशं प्रापय अच्छ्याहि अच्छाभिरर्थे आप्तुमिति वा सोमाभिमुखं सोममाप्तुं वा याहीत्यर्थः । याता च मदाय तृप्तये मत्ततायै वा सुतस्याभिषुतस्यान्धसः सोमस्य स्वमंशं पिब ॥७०॥

गाव॒ उपा॑वता॒ ॥७१॥

व्याख्याता [३३.१९.] ॥७१॥

काव्ये॑राज्ञानि॑षु क्रत्वा॒ दक्ष॑स्य दुरो॒णे । रि॒शाद॑सा सधस्थ॒ आ ॥७२॥

दक्षदृष्टा गायत्री मैत्रावरुणी । कवीनां क्रान्तदर्शिनां ज्ञानसमुच्चयकारिणां हितौ काव्यौ तयोः । रिशन्ति हिंसन्ति रिशाः ताना समन्ताद्स्यतो नाशयतः तौ रिशादसौ द्विवचनं मित्रावरुणाविषयम् हे रिशादसौ शत्रूपक्षयितारौ मित्रावरुणौ यजमानस्य सधस्थे देवमनुष्याणां सहसोमपानस्थाने युवाम् आ आगच्छतम् । कीदृशस्य यजमानस्य काव्ययोः कविहितयोर्युवयोः आज्ञानेषु आ समन्ताज्ज्ञानेषु सोमपानार्थमाविर्भूतभूमिषु देवयजनादिषु दुरोणे यज्ञगृहे च क्रत्वा क्रतुना यज्ञकर्मणा कृत्वा दक्षस्य उत्साहवतः यज्ञं समर्धयत इत्यर्थः । दक्षस्येति विशेषणात् यजमानपदमध्याहर्तव्यम् आ इत्युपसर्गेण गच्छतमिति क्रियाध्याहारः ॥७२॥

दैव्या॑वध्वर्यू आ॒गत॑ꣳ रथे॒न॒ ॥ तं प्र॒त्नथा॑ । अ॒यं वे॒नः ॥७३॥

व्याख्याता [३३.३३.] । तं प्रत्नथा [७.१२.] अयं वेनः [७.१६.] इति द्वे प्रतीकोते ॥७३॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासीदुपरि स्विदासीत् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥७४॥

प्रजापतिदृष्टा त्रिष्टुप् भाववृत्तदेवत्या भावेषु पदार्थेषु वृत्तः स्थितो भाववृत्तः परमात्मा सोऽस्या देवता । आयवणयके विनियोगः क्रमपाठाल्लभ्यते ततोऽधियज्ञं तावद्व्याख्यायते । आधवनीयादुन्नेता निग्राभ्यास्वासिञ्चति ताः पवित्रे यजमानस्ततो ग्रहयग्रहणमा ध्रुवादिति [का° १.५.१७.] कात्यायनेनोक्तम् तदभिप्रायेणोच्यते । एषां पूयमानसोमानां रश्मिः यमनात् ऋजीषादिकल्कनियामको दशापवित्रलक्षणः तिरश्चीनः तिर्यङ् एव विततो विस्तारितः उद्गातृभिरिति शेषः । तस्मिन्दशापवित्रे सोमः प्रक्षिप्तः सन् दशापवित्रादधश्च आसीत् उपरि च आसीत् स्वित्शब्दौ चार्थौ उपरि स्विदासीदितीकारः श्रुतः (38.) । किं च तत्रैके पदार्था ग्रहचमसाधवनीयद्रोणकलशादयो रेतोधा आसन् रेतो जगदुत्पत्तिबीजं सोमं दधति धारयन्ति ते रेतोधाः सोमाधारभूताः आसन् यज्ञाद्वै प्रजाः प्रजायन्त इति श्रुतेर्जगद्बीजत्वं सोमस्य । तथापरे पदार्थाः सोमरसरूपास्तत्राधेयाः सन्तो महिमानः महान्तः उत्कृष्टा आसन् । आधाराधेयभावेन सर्वोऽयं यज्ञात्मैव स्थित इति भावः ब्रह्मार्पणं ब्रह्म हविरिति स्मृतेः । किं च स्वधान्नं तद्रूपः अवस्तात् अवरो होमात्प्राक् नीच आसीत् प्रयतिः प्रयतते प्रयतिः प्रयत्नवान् होमानन्तरं लब्धफलकः सन् परस्तात् परः उत्कृष्टः आसीत् ॥ ॥ अथाधिदैवतं व्याख्या । एषां प्रसिद्धानां सूर्यरश्मीनां मध्ये एकः सुषुम्णाख्यो रश्मिः तिरश्चीनः विततः विस्तृतः सन् किम् द्युलोकादधः स्वित् आसीत् उतोपरि स्विदासीत् स्विदिति वितर्के विचार्यमाणामिति [पा° ८.२.१७.] श्रुतः । किं च स रश्मिः रेतोधाः रेतसो विश्ववीजस्योदकस्य धारयिता आसीत् व्यत्ययेनैकवचनम् तथा च श्रुतिः सूर्यस्य ह वाऽएको रश्मिर्वृष्टिमनिर्नाम येनेमाः सर्वाः प्रजा बिभर्तीति । अन्ये रश्मयो महिमानः महात्म्याधायका आसन् विश्वप्रकाशत्वेन । किं च स्वधान्ननिष्पादकः स एव रश्मिः

अवस्तात् अवरो भूम्यभिमुखः प्रयतिः प्रयत्नात्सोर्धमुखः सन् परस्तात् परः उत्कृष्टः दर्शनमात्रेण देवानां तृप्तिदः तथोक्तं छान्दोग्यश्रुतौ [छान्दोग्योपनिष° ५. १-६.] असौ वाऽआदित्यो देवमधित्युपक्रम्य न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीति ॥ ॥ अथाध्यात्मपक्षे व्याख्या । नासदासीदिति सप्तर्चेऽध्यात्मप्रतिपादके सूक्ते [अष्ट° ८. ७. १७. माध्य° १०. ११. १.] बह्वृचा इमामृचं पठन्ति तत्र नासदासीदिति निरस्तसमस्तप्रपञ्चां प्रलयावस्थामनूद्य विश्ववीजमविद्योक्ता । कामस्तदग्रे समवर्ततेति पादेन च काम उक्तः । मनसो रेतः प्रथमं यदासीदिति पादेन पुण्यापुण्यात्मकं कर्मोक्तम् । एवमविद्याकामकर्माणि सृष्टिहेतून्युक्ता तेषां स्वकार्यं ज्ञनने शिष्यमाह तिरश्चीन इति । एषामविद्याकामकर्मणां रश्मिरिव रश्मिः कार्यवर्गो वियदादि विततः विस्तृतः सन् तिरश्चीनः तिर्यगवस्थितो मध्ये स्थितः अधश्चासीदुपरि चासीत् सूर्यरश्मिवद्युगपत्सर्वं व्यापेत्यर्थः । तदेव विभज्यते रेतोधा इति । सृष्टे कार्यवर्गे के चन रेतोधाः रेतसो वीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवाः आसन् अन्ये महिमानः महान्तो विपुला वियदादयो भोग्या आसन् महिमान इति स्वार्थे इमनिच् । एवं मायावामीश्वरः (39.) सर्वं जगत्सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यरूपेण विभागं कृतवानित्यर्थः । तयोर्भोक्तृभोग्ययोर्मध्ये स्वधान्नं भोग्यप्रपञ्चोऽवस्तादवरो निकृष्ट (40.) आसीत् प्रयतिः प्रयतिता भोक्ता (41.) परस्तात् परः उत्कृष्टः भोक्तृप्रपञ्चाधीनं भोग्यप्रपञ्चं कृतवानित्यर्थः । विभाषा परावराभ्यामिति [पा° ५. ३. २१.] प्रथमार्थेऽस्तातिप्रत्ययः अस्तातीति [पा° ५. ३. ४०.] अवरशब्दस्यावादेशः । एतद्वाऽइदꣳ सर्वमन्नं चैवान्नादश्चेति श्रुतेः ॥७४॥

आ रोदसीऽअपृणदा स्वर्महज्जातं यदेनमपसोऽअधारयन् ।
सोऽअध्वराय परिणीयते कविरत्यो न वाजसातये चनोहितः ॥७५॥

तमेव वैश्वानराख्यं भोक्तारं परमात्मानं स्तौति । विश्वामित्रदृष्टा जगती वैश्वानरदेवत्या । यत् यदा जातमरणीत उत्पन्नमात्रमेनं वैश्वानरमपसोऽपस्विनः कर्मवन्तो यजमाना अधारयन् कर्माणि स्थापितवन्तः । तदा स रोदसी द्यावाभूमी

आ सर्वतः अपृणात् पूरयति स्म स्थावराणां प्रस्तरादा तदुपलब्धेः (42.) । न केवलं रोदसी किं तु महत् प्रभूतं स्वः अन्तरिक्षमापृणात् सूर्यात्मना । त्रैलोक्यं (43.) ज्ञाठरात्मना पूरितमित्यर्थः । गार्हपत्यादीनां लोकत्वं श्रुत्योक्तम् अयं वै लोको गार्हपत्यो द्यौराहवनीय इति । उक्तार्थमेव विवृणोति स इति सोऽग्निरधराय यागाय परिणीयते सर्वतोऽतिप्रणीताग्नीध्रीयादिधिष्ण्यादिषु प्रकर्षेण प्रापण्यते । नयने दृष्टान्तः अश्वो न यथाश्वो वाजसातयेऽन्नलाभाय सर्वतो नीयते । राजाश्ववान्भोगजातं लभते यथा तद्वद्विप्रोऽग्निं सेवमानो ब्रह्मलोकान्तभोगानिति भावः । कीदृशोऽग्निः कविः सर्वज्ञः । चनोहितः चन इत्यन्ननामेति [निरु° ६. १६.] यास्कः चनसेऽन्नाय भोग्याय हितः सर्वभोगसम्पादक इत्यर्थः ॥ ७५ ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ७६ ॥

वसिष्ठदृष्टेन्द्राग्निदेवत्या गायत्री । या यौ इन्द्राग्नी आङ्गूषैः आघोषैः चित् लौकिकवाक्स्तोमैरपि (44.) स्तुतौ आ आगच्छतः आङ्गूष स्तोम आघोष इति [निरु° ५. ११.] यास्कः तौ उक्थेभिः उक्थैः गिरा स्तोत्रात्मिकया स्तुत्या आविवासतः आविवस्येते (45.) परिचर्येते यजमानैरिति शेषः व्यत्ययेन कर्तरि लट् विवासतिः परिचर्यायामिति [निरु° ११. २३.] यास्कः । कीदृशौ तौ वृत्रहन्तमा वृत्राणामावरकाणां पाप्मनां हन्तृतमौ नाद्धस्येति [पा° ८. २. १७.] नुम् । मन्दाना मन्दानौ मोदमानौ स्वभावतः । सर्वत्र विभक्तिर्व्यदिशः ॥ ७६ ॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ ७७ ॥

सुहोत्रदृष्टा वैश्वदेवी गायत्री । ये अमृतस्य मरणहीनस्य प्रजापतेः सूनवः पुत्राः विश्वे देवाः ते नोऽस्माकं गिरः उप शृण्वन्तु समीपमागत्यावधारयन्तु श्रुत्वा च नोऽस्माकं सुमृडीकाः सुखकाराः भवन्तु शोभनं मृडीकं सुखं येभ्यस्ते ॥ ७७ ॥

ब्रह्माणि मे मतयः शꣳ सुतासः शुष्मं इयर्ति प्रभृतो मेऽअद्रिः ।
आशꣳसते प्रतिहर्यत्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥ ७८ ॥

तिस्रस्त्रिष्टुभः द्वे इन्द्रमरुत्संवादे इन्द्रमरुद्देवत्ये आद्येऽगस्त्यदृष्टे (46.) । इन्द्रो

मरुतः सहचरानाह हे मरुतः ब्रह्माणि मन्त्रवाक्यात्मकानि स्तुतिवचांसि हवींषि वा सोमाज्यादीनि मे मम स्वभूतानि चोदनावाक्येऽग्न्यादिदेवतान्तरसम्बन्धेन प्रतीयमानान्यपि सर्वदेवताप्राणात्मनो (47.) ममेन्द्रस्यैव तानीति भावः । मतयः मननयुक्ताः स्तुतयोऽपि शं मम सुखोत्पादिकाः अतो यज्ञे गन्तव्यमिति भावः (48.) । किं च मे मया प्रभृतः प्रकर्षेण धृतः अद्रिः वज्रः इयर्ति गन्तव्येव लक्ष्यं प्रति न प्रतिहन्यतेऽत्यर्थः कीदृशः शुष्मः शोषयति शत्रूनिति शुष्मः अत एव गमने राक्षसाद्युपद्रवो नास्तीत्यर्थः । न केवलं हविरादीनां मदीयत्वेन गन्तव्यम् अपि तु आशासते प्रार्थयन्ते यजमाना यानि (49.) उक्था उक्थानि ता तानि स्तोत्रशस्त्राणि मां प्रतिहर्यन्ति कामयन्ते हर्यतिः प्रेप्साकर्मेति यास्कः । किं च नोऽस्माकमिमा इमौ हरी अश्वौ अद्य यज्ञाभिमुखं वहतः मां प्रापयतः अत एवास्माभिर्गन्तव्यमिति भावः । यद्वार्थान्तरम् ब्रह्माणि मतयः सुताः सोमाः (50.) प्रहृतः अद्रिः सोमाभिषवग्रावा शुष्मः सुखरूपः एतत्सर्वं मम शं सुखमियर्ति अर्पयति उद्गमयति णिजन्तर्भूतः समानमन्यत् ॥ शुष्मः अविसिविशुषिभ्यः (51.) किदिति [उणा° १. १४२.] मन्प्रत्ययः कित्त्वादुणाभावः नित्त्वादाद्युदात्तः । अत्ति भक्षयति रिपूनित्यद्रिः अदिशदिभूशुभिभ्यः क्रिन्निति [उणा° ४. ६६.] क्रिन्प्रत्ययः आद्युदात्तः ॥ ७८ ॥

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२॥ऽअस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ७९ ॥

एवमिन्द्रेणोक्ता मरुतः प्रत्याहुः । नुद् प्रेरणे अस्य निष्ठायां नसत्तनिषत्तेत्यादिना [पा° ८. २. ६१.] अनुत्तमिति निपातः । आ इति स्मरणे स्मृतवन्तो वयम् हे मघवन्धनवन् इन्द्र ते तव अनुत्तं न केनापि नुत्तं नाशितं महाभाग्यमिति शेषः । नु निश्चये न किः न कोऽपि त्वन्महाभाग्यनाश इति शेषः । न केवलं तवैश्वर्यमात्रं किंतु सर्वज्ञत्वमपीत्याह (52.) न त्वेति वतुरत्र सादृश्ये त्वावान् त्वत्सदृशो विदानः विद्वान् देवता देवो नास्ति (53.) स्वार्थे तल् विदेः शानन् नित्त्वादाद्युदात्तः । किं च हे प्रवृद्ध प्रकर्षेण वृद्ध पुराण पुरुष यानि कर्माणि वृ-

त्रबधादीनि त्वं कृणुहि करोषि व्यत्ययेन लोट् तानि कर्माणि ज्ञायमानः वर्तमानः ज्ञातो भूतपूर्वश्च देवमनुष्येषु कश्चित् न नशते न व्याप्नोति न करोतीत्यर्थः नशतिर्व्याप्तिकर्मा । न करिष्या न च करिष्यति उत्पत्स्यमान इति शेषः तिलोपो दीर्घश्च छान्दसः । कालत्रये त्वादृशो नास्तीत्यर्थः अतो यज्ञेशस्त्वम् ॥ ७९ ॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदत्यूमाः ॥ ८० ॥

बृहद्दिवदृष्टा माहेन्द्री त्रिष्टुप् । भुवनेषु भूतजातेषु तत् इत् तदेव ज्येष्ठं श्रेष्ठमास बभूव छन्दस्युभयथेति [पा° ३. ४. ११७.] लिटः सर्वधातुत्वादस्तेर्भूभावो न सर्वोत्कृष्टं ब्रह्मैवासीत् यतो ज्येष्ठात् उग्रः उत्कृष्टः इन्द्रो जज्ञे ज्ञातः । कीदृशः त्वेषनृम्णाः त्वेषः कान्तिः नृम्णं धनं यस्य तेजोधनः कार्यं दृष्ट्वा कारणमनुमानं कल्पते । किं च य इन्द्रो जज्ञानः ज्ञायमान एव सद्यः तत्क्षणं शत्रून्निरिणाति नितरां हन्ति री बधे क्र्यादिः घ्वादित्वाद्ध्रस्वः । किं च विश्वे सर्वे देवाः यमिन्द्रमनुमदन्ति अनुतृप्यन्ति अनुर्लक्षणेऽति [पा° १. ४. ८४.] द्वितीया यद्वृत्तान्नित्यमिति [पा° ८. १. ६६.] मदन्तीत्यत्र निघातो न । कीदृशा विश्वे ऊमाः अवन्ति रक्षन्ति ऊमाः रक्षकाः अवतेर्मन्प्रत्ययः क्नोः प्रूडिति [पा° ६. ४. १९.] ऊट् ॥ ८० ॥

इमा उ त्वा पुरुवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ८१ ॥

मेधातिथिदृष्टे आदित्यदेवत्ये द्वे बृहत्यौ । पुरु बहु वसु धनं यस्य स पुरुवसुः संहितायां छान्दसो दीर्घः पुरुशब्दस्य के पुरुवसो बहुधनादित्य या मम गिरः शस्त्ररूपा वाचः इमाः त्वा त्वां वर्धन्तु वर्धयन्तु । किं च विपश्चितो विद्वांसः तव स्वरूपाभिज्ञा उद्गातारश्च स्तोमैः स्तोत्रैः बर्हिष्यवमानादिभिः त्वमभ्यनूषत अस्तुवत नू स्तुतौ लुङ् कुटादित्वादुणाभावः [पा° १. २. १.] । कीदृशा विपश्चितः पावकवर्णाः अग्नितुल्यतेजसः ब्रह्मवर्चसवन्तोऽत एव शुचयः शुद्धागमाः स्तोत्रशस्त्ररूपा गिरस्त्वां स्तुवन्तीत्यर्थः ॥ ८१ ॥

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिद्र्ये रुशमे पवीरवि तुभ्येत्सोऽअज्यते रयिः ॥ ८२ ॥

हे आदित्य यस्य तवायं विश्वः सर्वोऽपि आर्यः वर्णाश्रमविहितकर्मानुष्ठाता सन् दासः दासवत् सर्वदा रक्षणीयः शेवधिपाः निधिरक्षकः कृपणो यस्य तवारिः शत्रुः निधिः शेवधिरिति [निरु° २.४.] यास्कः । किं च एवंविधे कृपणे अर्ये धनस्वामिनि वैश्ये वा तिरश्चित् तिरोऽन्तर्धौ चिदप्यर्थे अन्तर्भूतो भूमिगर्तादौ निक्षिप्तोऽपि तस्य रयिर्धननिचयः तुभ्य इत् मत्तोपश्छान्दसः तुभ्यमेव त्वदर्थमेवाज्यते व्यक्तो भवति कर्मकर्तरि यक् । कृपणस्य धनं त्वदर्थमेवोपयुज्यते पक्षहरणादिना न तु कृपणभोगाय भवतीत्यर्थः । कीदृशेऽर्ये रुशमे रुशतिर्हिंसाकर्मा औणादिकोऽमप्रत्ययः रुशति हिनस्तीति रुशमः तस्मिन्धनापहर्तॄनां हिंसके अतिथ्यादितिरस्कारिणात्मनोऽपि हिंसके । पवीरवि पविः शल्यमस्यास्ति पवीरमायुधम् 'रो मत्वर्थीयः पवीरं वाति गच्छति पवीरवाः तस्मिन् धनरक्षार्थमायुधधारके तथा यास्कः [निरु° १२.३१.] पविः शल्यो भवति यद्विपुनाति कायं तद्वत् पवीरमायुधं तद्वानिन्द्रः पवीरवानिति । धनिनातियत्नेन गुप्तमपि धनं तत आहृत्य धर्मिष्ठाय ददासीति भावः ॥ ८२ ॥

अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र-इव पप्रथे ।
सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ८३ ॥

मेधातिथिदृष्टादित्यदेवत्या सतोबृहती । अयमादित्यरूप इन्द्रः समुद्र-इव उदधिवत् पप्रथे प्रथितो विस्तीर्णो व्यापकोऽभूत् कीदृशोऽयम् ऋषिभिरतीन्द्रियार्थदर्शिभिः सहस्कृतः सहसा बलेन युक्तः कृतः स्तुत्या हि देवता बलं वर्धन्ते (54.) । किं च अस्यादित्यस्य स महिमा सत्योऽवितथः । शवो बलं च सत्यम् । यज्ञेषु विप्रराज्ये विप्राणां राज्ये स्तोत्रशस्त्रसंदोहे गृणे स्तौमि तं महिमानमिति शेषः । यज्ञेषु विप्राः स्वतन्त्राः राजान इव भवन्ति राज्ञां कर्मराज्यम् । स्तोत्रशस्त्राणां संसदि पठनेन सोऽयं (55.) स्तूयतऽइत्यर्थः ॥ ८३ ॥

अद्ब्भिः सवितः पा° ॥ ८४ ॥

व्याख्याता [३३. ६६.] । षष्ठः पुरोरुग्गणः समाप्तः ॥ ८४ ॥

VII. आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।

अन्तः पवित्रेऽउपरि श्रीणानोऽयꣳ शुक्रोऽअयामि ते ॥ ८५ ॥

इतोऽध्यायसमाप्त्यन्तं त्रयोदश ऋचः प्रतीकोक्ताश्चतस्रश्चेति ऐन्द्रवायवादिसावित्रान्तानां यज्ञानां यज्ञगणस्थाः पूर्ववत् ॥ जमदग्निदृष्टा वायुदेवत्या । बृहत्य आद्या नव द्वादशी च दशम्येकादशीत्रयोदश्यः सतोबृहत्यः । हे वायो नोऽस्माकं यज्ञमायाहि आगच्छ कीदृशं यज्ञं दिविस्पृशं द्युलोकव्यापिनम् (56.) ऋत्विग्यजमानवैगुण्याद्दक्षिणासम्पन्नत्वाच्च (57.) स्वर्गेऽपि श्रूयमाणमित्यर्थः । आगम्य किं फलमत आह अन्तरिति अन्तः पात्रमध्यस्थः पवित्रे दशापवित्रस्योपरि श्रीणानः श्रयमाणः होतृचमसेन विषिच्यमानोऽयं शुक्रः शुद्धः ऋत्वीषकल्करहितः सोमो रसात्मा ते तुभ्यं त्वदर्थमयामि नियतः त्वदीयभागत्वेन मया संस्कृतः यमु उपरमे (58.) कर्मणि चिण् ॥ ८५ ॥

इन्द्रवायू सुसंदृशा सुहवेह हवामहे ।

यथा नः सर्व इज्जनोऽनमीवः संगमे सुमना असत् ॥ ८६ ॥

तापसदृष्टैन्द्रवायवी । इह यज्ञे वयमिन्द्रवायू हवामहे आह्वयामः उभयत्र वायोः प्रतिषेध इति [पा° ६. ३. २६. वा° १.] आनङभावः । कीदृशौ सुसंदृशा सुसंदृशौ सुतरां सम्यक् पश्यतस्तौ । सुहवा सुहवौ शोभनाह्वानौ । तथा हवामहे यथा नोऽस्माकं सर्व इत् सर्व एव जनः पुत्रपौत्रादिरीदृशः असत् भवेत् अस्तेर्लेट्यडागमः कीदृशः अनमीवः व्याधिरहितः संगमे धनप्राप्तौ बहूनां समागमे वा सुमनाः शोभनचित्तः उदारो वक्ता चेत्यर्थः ॥ ८६ ॥

ऋधगित्था स मर्त्यः शशमे देवतातये ।

यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥ ८७ ॥

जमदग्निदृष्टा मैत्रावरुणी । नूनं निश्चितं यो मर्त्यो मनुष्यो मित्रावरुणौ आचक्रे आकुरुते सेवते गन्धनावक्षेपणेत्यादिना [पा° १. ३. ३२.] करोतेः सेवनार्थे

आत्मनेपदम् । किमर्थम् अभिष्टये अभिमतलाभाय पृषोदरादित्वादिलोपः कव्यदातये कविषो दानाय च । स नरः इत्था अनेन हेतुना सेवनरूपेण शशमे शाम्यति यमनियमशमदमादियुक्तो भवतीत्यर्थः । कीदृक् सः देवतातये देवस्य कर्म देवतातिः तस्मै यज्ञाय ऋधक् ऋध्नोतीति ऋधक् समृद्धिमान् यज्ञसम्पत्तिक्षमधनाढ्यः सन् शान्तो भवतीत्यर्थः । बट् अत् सत्रा इत्येते [निघ० ३.१०.] निपातः सत्यवचनो वा सत्यं शाम्यति । एत्वाभ्यासलोपाभाव आर्षः शशमेऽत्र ॥ ८७॥

आयातमुपभूषतं मधुः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमागतम् ॥ ८८॥

वसिष्ठदृष्टाश्विदेवत्या । हे अश्विना अश्विनौ युवामायातं यज्ञं प्रत्यागच्छतम् आगत्य च उपभूषतमलंकुरुतं यज्ञम् । मधुः मधुरं सोमं पिबतम् कर्मणि षष्ठी नुमभावश्छान्दसः । किं च हे वृषणा वृषणौ वर्षकौ यज्ञफलस्य सेक्तारौ हे जेन्यावसू जेन्यं जेतव्यं जितं वा आ समन्तात् वसु धनं याभ्यां तौ जेन्यावसू वशीकृतधनौ तादृशौ युवां पयः वृष्युदकम् दुग्धमन्तरिक्षात्प्रक्षारयतम् दुहेर्लोणमध्यमद्विवचनं (59.) दुग्धमिति । किं च नोऽस्मान्मा मर्धिष्टं मा हिंस्तम् मृधिर्हिंसार्थः लुङ् । किं बहुना युवामागतमागच्छतम् आदरार्थं पुनर्वचनम् ॥ ८८॥

प्रेतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ८९॥

कण्वदृष्टा वैश्वदेवी । ब्रह्मणो वेदस्य पतिः हिरण्यगर्भः नोऽस्माकं यज्ञमह यज्ञाभिमुखं प्रेतु प्रकर्षेणागच्छतु ब्रह्मणस्पतिः ब्रह्मणः पाता पालयिता वेति [निरु० १०.१२.] यास्कः । तथा देवी देवतात्मा सूनृता प्रियसत्यस्वरूपा तस्यैव वाक् त्रयीरूपा यज्ञं प्रेतु । किं च देवा यष्टव्या नोऽस्मान्यज्ञं नयन्तु प्रापयन्तु यज्ञं कारयन्वित्यर्थः । कीदृशं यज्ञं वीरं विशेषेणेरयति वीरस्तम् शत्रूणां विशेषोन्मूलयितारम् वीरो वीरयत्यमित्रानिति [निरु० १.७.] यास्कः । नर्यं नृभ्यो मनुष्येभ्यो हितम् उगवादिभ्य इति [पा० ५.१.२.] यत् । पङ्क्तिराधसम् इन्द्रस्य पुरोडाशः कर्मार्धानाः पूष्णः कर्म्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या एषा कविःपङ्क्तिः ।

द्विनाराशंसं प्रातःसवनं द्विनाराशंसं माध्यन्दिनं सवनं सकृन्नाराशंसं तृतीयं सवनम् एषा नाराशंसपङ्क्तिः त्रीणि सवनानि पशुरुपवसथ्यः पशुरनुबन्ध्यः एषा सवनपङ्क्तिः एताभिः पङ्क्तिभिः राधः समृद्धिर्यस्य पङ्क्तयो राध्यन्ते साध्यन्ते यत्रेति वा पङ्क्तिराधाः तम् । ब्रह्मणस्पत्यादयः ईदृशं यज्ञमस्माभिः कारयन्त्विति सर्वार्थः ॥ ८९ ॥

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिं पिशंगं बकुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ १० ॥

त्रितदृष्टाकृतिपरिणामवादिन्यैन्द्री । आकृतेर्द्रोणद्रव्यस्य परिणामो द्युपर्जन्यपृथिवीपुरुषयोषात्मकपञ्चाग्निक्रमेण परिपाकः इति तु पञ्चम्यामाकृतावापः पुरुषवचसो भवन्तीति श्रुत्योक्तः (60.) तं वदत्येषा ऋक् । अधियज्ञं तावदर्थः । चन्द्रं देवानामाह्लादं मिमीते करोति चन्द्रमाः लतारूपः सोमोऽभिषुतः सन् अप्सु वसतीवरीनिग्राभ्यादिजलेषु अन्तर्मध्ये रसरूपेण स्थिताऽग्नौ हुतः सन् सुपर्णः गरुडाकृतिः साधुपतनो भूत्वा दिवि आधावते शीघ्रं गच्छति सृ गतावित्यस्य शीघ्रगतौ धावादेशः तृतीयस्यामितो दिवि सोम आसीदिति श्रुतेः । हरिः सोमो हरितवर्ण इति [निरु° ४. ११.] यास्कोक्तेर्हरिः पूर्वोक्तः सोम एव दिवि गतः पर्जन्यरूपमास्थायोदकदानद्वारेण रयिमेति रयिरिति धननामेति [निरु° ४. १७.] यास्कः धान्यभावं प्राप्नोति व्रीहियवाद्यन्नरूपो भवतीत्यर्थः । कीदृशं रयिं पिशंगम् परिपाकेन व्रीहियवादिकं धान्यं पीतवर्णं भवति । बकुलमसंख्यातम् चतुर्विधभूतग्रामजीवनपर्याप्तमित्यर्थः । पुरुस्पृहं पुरूणां बह्वनामपि स्पृहा लिप्सा यत्र तम् बहवोऽपि यद्धान्यमिच्छन्ति तद्रूपो भवतीत्यर्थः । कीदृशो हरिः कनिक्रदत् पर्जन्यरूपात्यर्थस्तनितं कुर्वन् दाधर्तीत्यादि [पा° ७. ४. ६३.] निपातः ॥ १० ॥

देवं-देवं वोऽवसे देवं-देवमभिष्टये ।
देवं-देवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥ ११ ॥

मनुदृष्टा वैश्वदेवी । वीप्सार्थोऽभ्यासः यावन्तो देवास्तान्वो युष्मानवसेऽवनाय पालनाय वयं हुवेम आह्वयामः । अभिष्टयेऽभिलषितफलाप्तये देवं-देवं हु-

वेम । वाजसातयेऽन्नलाभाय देवं देवं हुवेम । अभ्यासे भूयांसमर्थं मन्यत्तऽइति [निरु० १०.४२.] यास्कः । कीदृशा वयम् देवया देवतायाथात्म्यानुसंधानपरया धिया बुद्ध्या गृणान्तः स्तुवन्तः यद्वा देव्या स्वरादिसौष्ठवेन दीप्यमानया धिया स्तुत्या गृणान्तः ॥११॥

दिवि पृष्टोऽअरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधान ओजसा चनोहितो ज्योतिषा बाधते तमः ॥१२॥

मेधदृष्टा वैश्वानरी । योऽग्निः दिवि द्युलोके पृष्टः सिक्तः आदित्यात्मना स्थितः सन् अरोचत दीप्यते पृषु सेके निष्ठान्तः सेकः स्थितिरेव । कीदृशोऽग्निः वैश्वानरः विश्वेषां नराणां हितः । बृहन् महान् । किं च सोऽग्निः ज्योतिषा स्वप्रकाशेन तमः निशं बाधते लोकानुग्रहायान्धकारं निवर्तयति । कीदृशः क्ष्मया वृधानः क्ष्मा पृथिवी तया तत्स्था मनुष्या उपलक्ष्यन्ते मह्याः क्रोशन्तीति वत् भूस्थैर्वर्णाश्रमिभिः नरैर्दत्तेन हविषा वर्धमानः अत एव ओजसो चनोहितः ओषधिपाकक्षमेण तेजसा चनसेऽन्नाय हितः चन इत्यन्ननाम [निरु० ६.१८.] अन्ननिष्पादक इत्यर्थः ॥१२॥

इन्द्राग्नीऽअपादियं पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिꣳशत्पदा न्यक्रमीत् ॥१३॥

सुहोत्रदृष्टा इन्द्राग्निदेवत्या प्रवल्हिका । हे इन्द्राग्नी अपात् स्वयं पादरहितापि इयमुषाः पद्वतीभ्यः पादयुक्ताभ्यः सुप्ताभ्यः प्रजाभ्यः पूर्वा प्रथमभाविनी सती आ अगात् आगच्छति सा च तासां प्रजानां शिरो हित्वी निद्रात्याजनेन प्रेरयित्री यद्वा शिरो हित्वी हित्वा त्यक्त्वा स्वयमशिरस्का सती जिह्वया प्राणिनां वागिन्द्रियेण वावदत् यङ्लुगन्तं भृशं शब्दं कुर्वती सती चरत् चरति प्रसरति अडभावः । एवं चरन्ती उषाः एकदिनेन त्रिंशत्संख्यानि पदा पदानि गमनसाधनभूतान्मुहूर्तान् नि अक्रमीत् नितरां क्रमते अहोरात्रेण त्रिंशन्मुहूर्तान्क्रामतीत्यर्थः ॥ यद्वा वाक्यपक्षेऽर्थः । इन्द्रः प्राणः अग्निः पुरुषः हे इन्द्राग्नी युवयोरेवैतत्कर्म यत् अपात् पादरहिता गत्यात्मिका त्रयीलक्षणेयं वाक् पूर्वा प्रथमभाविनी सती आ

अगात् पद्यतीभ्यः पादयुक्ताभ्यो रामायणभारतादिश्लोकात्मकवाल्मीकिव्यासादिवाणीभ्यः सकाशात् । वेदवाचः प्राधम्यं श्रुत्योक्तम् ततो ब्रह्मैव प्रथममसृज्यतेति । एवं प्रथमजाया वाचोऽविकृतत्वं निर्णीय मानुष्या वाचो विकृतत्वमाह हिवी शिर इति शिर इति प्राधान्यादाख्यातपदमुच्यते अश्वाज गां दण्डेन शुल्कां गां दण्डेनाश्वाजेत्येवं लौकिक्या वाचः पदप्रयोगनियमाभावात् शिरः शिरःस्थानीयमाख्यातपदं हित्वा त्यक्त्वा जिह्वया विदुषो वागिन्द्रियेण वावदत् अतिवदन्ती सती चरति प्रकाशीभवति । एवं चरन्ती सा त्रिंशत्पदानि न्यक्रमीत् क्रमति अत्र पदशब्दोऽङ्गुलवचनः मूलाधारादारभ्य मुखपर्यन्तं त्रिंशदङ्गुलानि क्रामति । एवं वाग्विषयोऽर्थः ॥ १३ ॥

देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातयः ।
ते नोऽअद्य तेऽअपरं तुचे तु नो भवन्तु वरिवोविदः ॥ १४ ॥

मनुदृष्टा वैश्वदेवी । हि स्म एतौ निपातौ प्रसिद्ध्यतिशयार्थौ छान्दसौ षत्वदीर्घौ ते प्रसिद्धा विश्वे देवासः अद्य वर्तमानकाले नोऽस्माकं साकं सहैव वरिवोविदः भवन्तु वरिवो धनं वेदयन्ति लम्भयन्ति वरिवोविदः एकीभूय धनप्रापका भवन्तु । तु पुनः अपरं भविष्यति काले नोऽस्माकं तुचे अपत्याय पुत्रपौत्रादिकाय ते वरिवोविदः भवन्तु तुगित्यपत्यनाम [निघ० २.२.] । कीदृशास्ते मनवे समन्यवः मनुनामकाय मुनये मन्त्रदर्शिने मन्युं समानो मन्युर्दीप्तिर्येषां ते मन्यु-र्मन्यतेर्दीप्तिकर्मण इति [निरु० १०.२१.] यास्कः मदर्थमेकमत्यं प्राप्ताः यद्वा मन्युना क्रोधेन सह वर्तमानाः अस्मद्धत्यनाय क्रोधयुक्ता इत्यर्थः । तथा सरातयः रातिर्दानं तत्सहिताः दातार इत्यर्थः ॥ १४ ॥

अपाधमदभिशस्तीरशस्तिहाथेन्द्रो युध्याभवत् ।
देवास्तऽइन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥ १५ ॥

नृमेधदृष्टे द्वे मरुद्वद्गणविशिष्टेन्द्रदेवत्ये । बृहन्तो महान्तो भानवो दीप्तयो यस्य स बृहद्भानुः मरुतां गणो यस्य स मरुद्गणः हे बृहद्भानो हे मरुद्गण हे इन्द्र देवाः वसुरुद्रादित्याः ते तव सख्याय मैत्र्ये येमिरे कथं नु नामेन्द्रोऽस्मान्सखिभा-

वाय वृणीतऽइत्यभिप्राया आत्मानं संयतं कृतवत्तऽइत्यर्थः (61.) स भवान् अभिशस्तीः अभिशापान् शत्रुप्रयुक्तानपवादान् अपाधमत् अपगमयति निवर्तयति धमतिर्गतिकर्मेति [निरु° ६.२.] यास्कः । अथ पश्चात् द्युम्नी अन्नवान् यशस्वी वा आ अभवत् सर्वतो धनवान्भवति । कीदृशो भवान् अशस्तिहा शंसनं शस्तिः प्रशंसा सा नास्ति येषां ते अशस्तयः निन्द्या असुरास्तान्हन्तीत्यशस्तिहा । इन्द्रः ऐश्वर्यवान् इन्दतीतीन्द्रः । यो दुष्टहन्ताभिशापनाशको यशस्वी तेजस्वी बहुभृत्यसेव्यस्तस्य सख्यायान्ये यतन्तऽइति युक्तमिति भावः ॥१५॥

प्र व॒ इन्द्रा॑य बृह॒ते मरु॑तो ब्र॒ह्मार्च॑त ।
वृ॒त्र॒हा श॒तक्र॑तुर्व॒ज्रेण॑ श॒तप॑र्वणा ॥१६॥

हे मरुतः वो युष्माकं स्वामिने इन्द्राय यूयं ब्रह्म वेदं सामरूपस्तोत्रं प्रर्चत प्रोच्चारयत । कीदृशायेन्द्राय बृहते महते । ततो वृत्रहा वृत्रस्यासुरस्य पाप्मनो वा हन्तेन्द्रो वृत्रं हनति हन्तु बहुलं छन्दसीति [पा° २.४.७३.] शपो लुगभावः केन वज्रेण स्वायुधेन कीदृशेन वज्रेण शतपर्वणा शतसंख्याकानि पर्वाणि धारा ग्रन्थयो वा यस्य स शतपर्वा तेन । कीदृशो वृत्रहा शतक्रतुः शतं क्रतवो यस्य बहुकर्मा बहुप्रज्ञो वा ॥१६॥

अ॒स्येदिन्द्रो॑ वावृधे॒ वृष्ण्यं॑ शवो॒ मदे॑ सु॒तस्य॒ विष्ण॑वि ।
अ॒द्या तम॑स्य महि॒मान॑माय॒वोऽनु॑ष्टुवन्ति पू॒र्वथा॑ ॥
इ॒मा ऊ॑ त्वा । यस्या॑यम् । अ॒यꣳ स॑हस्रम् । ऊ॒र्ध ऊ॒ षु णः॑ ॥१७॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥

मेधातिथिदृष्टा माहेन्द्री सतोबृहती । इन्द्रः अस्य इत् अस्यैव यजमानस्य वृष्ण्यं शवः च वावृधे वर्धयति णिजन्तत्वं बोध्यम् वर्षति सिञ्चति वृषा तस्येदं वृष्ण्यं वीर्यम् यप्रत्यये उपधालोपः शवः बलम् । ब्रा सति सुतस्याभिषुतस्य सोमस्य मदे सति कीदृशे मदे विष्णवि वेवेष्टि व्याप्नोति विष्णुस्तस्मिन् सर्वशरीरव्यापके सप्तम्येकवचने घेर्ङितीति [पा° ७.३.१११.] गुणेऽवादेशः यद्वा विष्णवि

विष्णौ यज्ञेऽभिष्टुतस्येति सम्बन्धः यज्ञो वै विष्णुरिति श्रुतेः । सोमपानेन मत्त इन्द्रो यजमानस्य महात्म्यं बलं च वर्धयतीत्यर्थः । किं च अस्येन्द्रस्य तमुक्तं यज्वनो वीर्यादिवर्धनरूपं महिमानमद्यास्मिन्काले ऽपि आयवः मनुष्याः अनुष्टुवन्ति आनुपूर्व्येण स्तुवन्ति तत्र दृष्टान्तः पूर्वथा पूर्वमिव यथा पूर्वमृषयोऽस्तुवन्नेवमिदानीमपि नराः स्तुवन्तीत्यर्थः प्रत्नपूर्वविश्वेमाच्छन्दसीति [पा° ५.३.१११.] पूर्वशब्दादिवार्थे थाल्प्रत्ययः ॥ इमा उ त्वा यस्यायम् अयं सहस्रम् [३३, ८१-८३.] ऊर्ध्व ऊ षु णः [११.४२.] एताः प्रतीकोक्ताः ॥१७॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । त्रयस्त्रिंशत्तमोऽध्यायो गतोऽयं सार्वमेधिकः ॥३३॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-१६ [सुमृलीको] - १७ ॥१-१७॥ ॥

II. ॥ १८-२१ ॥१८-२१॥ ॥

III. ॥ ३० [यज्ञपताऽऽर्वि°] - ३२ [दिव्याऽऽध°] - ३४ [इलां°] - ३१ [बलां°] ४३ ॥३०-४३॥ ॥

IV. ॥ ४४-४७ [इलां°] - ५४ ॥४४-५४॥ ॥

V. ॥ ५५-६१ [मृलात] - ६३ [गऽइष्टौ] - ६८ [मृलय°] - ६१ ॥५५-६१॥ ॥

VI. ॥ ७०-७७ [सुमृलीका] - ८४ ॥७०-८४॥ ॥ षडनुवाकेषु चतुरशीतिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां द्वात्रिंशोऽध्यायः ॥३२॥ ॥

I. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥१॥

अनारभ्याधीतोऽध्यायः आ पितृमेधात् आदित्ययाज्ञवल्क्यदृष्टा मन्त्राः पाठे (1.) विनियुक्ताः ॥ षड्ऋचस्त्रिष्टुभो मनोदेवत्याः शिवसंकल्पदृष्टाः । ऋषिर्वदति । तन्मे मनः शिवसंकल्पमस्तु शिवः कल्याणकारी धर्मविषयः संकल्पो यस्य तत् तादृशं

भवतु मन्मनसि सदा धर्म एव भवतु न कदाचित्यापमित्यर्थः । तत्किम् यत् मनो जाग्रतः पुरुषस्य दूरमुदैति उद्गच्छति चक्षुराद्यपेक्षया मनो दूरगामीत्यर्थः । यच्च दैवं दीव्यति प्रकाशते देवो विज्ञानात्मा तत्र भवं दैवमात्मग्राहकमित्यर्थः मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमिति श्रुतेः । तत् उ यदः स्थाने तच्छब्दः उकारश्चार्थः । यच्च मनः सुप्तस्य पुंसः तथैव एति यथा गतं तथैव पुनरागच्छति स्वापकाले सुषुप्तावस्थायां पुनरागच्छति । यच्च दूरंगमं दूरं गच्छतीति दूरंगमम् खशप्रत्ययः अतीतानागतवर्तमानविप्रकृष्टव्यवहितपदार्थानां ग्राहकमित्यर्थः । यच्च मनो ज्योतिषां प्रकाशकानां श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्तकमित्यर्थः प्रवर्तितान्येव श्रोत्रादीन्द्रियाणि स्वविषये प्रवर्तन्ते । आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेनेति न्यायोक्तेर्मनःसम्बन्धमन्तरा तेषामप्रवृत्तेः । तादृशं मे मनः शान्तसंकल्पमस्तु ॥ १ ॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ २ ॥

मनीषिणः मेधाविनः यज्ञे येन मनसा सता (2.) कर्माणि कृण्वन्ति कुर्वन्ति कृ करणे स्वादिः मनःस्वास्थ्यं (3.) विना कर्माप्रवृत्तेः । केषु सत्सु विदथेषु ज्ञानेषु सत्सु विद्यन्ते ज्ञायन्ते तानि विदथानि तेषु वेत्तेरौणादिकोऽथप्रत्ययः प्रत्ययोदात्तत्वेन मध्योदात्तं पदम् प्रत्ययः परश्च आद्युदात्तश्चेति पाणिन्युक्तेः [पा° ३.१.१-३.] यज्ञसम्बन्धिनां ऋविरादिपदार्थानां ज्ञानेषु सत्स्वित्यर्थः । कीदृशा मनीषिणः अपसः अप इति कर्मनाम [निघ° २.१.] अपो विद्यते येषां ते अपस्विनः कर्मवन्तः अस्मायामेधास्रजो विनिरिति [पा° ५.२.१२१.] विन्प्रत्ययः विन्मतोर्लुगितीष्टाभावेऽपि छान्दसो विनो लुक् [पा° ५.३.६५.] सदा कर्मनिष्ठा इत्यर्थः । तथा धीराः धीमन्तः धीर्विद्यते येषां ते धीराः कर्मण्यण् [पा° ३.२.१.(4.)] । यच्च मनः अपूर्वम् न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वम् इन्द्रियेभ्यः पूर्वं मनसः सृष्टेः यद्वा अपूर्वमनपरमवाक्यमित्युक्तेरपूर्वमात्मरूपमित्यर्थः । यच्च यक्षं यष्टुं शक्तं यक्षम् यजतेरौणादिकः सन्प्रत्ययः ञित्यादिर्नित्यमिति [पा° ६.१.१९७.] आद्युदात्तं पदम् । यच्च

प्रज्ञायन्ते इति प्रज्ञास्तासां प्राणिमात्राणामन्तः शरीरमध्ये आस्ते इतेरिन्द्रियाणि वक्ष्यन्ति मनस्त्वन्तरिन्द्रियमित्यर्थः । तत् तादृशं मे मनः शिवसंकल्पमस्त्विति व्याख्यातम् ॥ २ ॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्नऋते किं चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥ ३ ॥

यत् मनः प्रज्ञानं विशेषेण ज्ञानजनकम् प्रकर्षेण ज्ञायते येन तत् प्रज्ञानम् करणाधिकरणयोश्चेति [पा° ३.३.११७.] करणे ल्युट्प्रत्ययः । उत अपि यत् मनः चेतः चेतयति सम्यक् ज्ञापयति तच्चेतः चिती संज्ञाने अस्मात् एयन्तादसुन्प्रत्ययः सामान्यविशेषज्ञानजनकमित्यर्थः । यच्च मनो धृतिर्धैर्यरूपम् मनस्येव धैर्योत्पत्तेर्मनसि धैर्यमुपचर्यते कार्यकारणयोरभेदात् । यच्च मनः प्रजासु जन्तुषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणाम् उक्तमपि पुनरुच्यते आदरार्थम् अभ्यासे भूयांसमर्थं मन्यन्तऽइति [निरु° १०.४२.] यास्कोक्तेः । यच्चामृतममरणधर्मि आत्मरूपत्वात् । यस्मान्मनसः ऋते यन्मनो विना किं चन किमपि कर्म न क्रियते जन्तुभिः सर्वकर्मसु प्राणिनां मनः पूर्वं प्रवृत्तेर्मनःस्वास्थ्यं विना कर्माभावादित्यर्थः । अन्यारादितरर्ते इत्यादिना [पा° २.३.२९.] यस्मादिति ऋते-योगे पञ्चमी । तन्मे मन इति व्याख्यातम् ॥ ३ ॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥ ४ ॥

येन मनसा इदं सर्वं परिगृहीतम् परितः सर्वतो ज्ञातम् । इदं किम् भूतम् भूतकालसम्बन्धि वस्तु । भुवनं भवतीति भुवनम् भवतेः क्युप्रत्ययः वर्तमानकालसम्बन्धि । भविष्यत् भविष्यतीति भविष्यत् लृटः सद्वेति [पा° ३.३.१४.] शतृप्रत्ययः तौ सदित्युक्तेः [पा° ३.२.१२७.] । त्रिकालसम्बद्धवस्तुषु मनः प्रवर्ततऽइत्यर्थः श्रोत्रादीनि तु प्रत्यक्षमेव गृह्णन्ति । कीदृशेन येन । अमृतेन शाश्वतेन मुक्तिपर्यन्तम् श्रोत्रादीनि नश्यन्ति मनस्त्वनश्वरमित्यर्थः । येन च मनसा यज्ञोऽग्निष्टोमादिः तायते विस्तार्यते तनोतेर्यकीति [पा° ६.४.४४.] आकारः । कीदृशो

यज्ञः सप्तहोता सप्त होतारो देवानामाह्वातारो होतृमैत्रावरुणादयो यत्र स सप्तहोता अग्निष्टोमे सप्त होतारो भवन्ति । तन्मे मनः इति व्याख्यातम् ॥४॥

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥५॥

यस्मिन्मनसि ऋचः प्रतिष्ठिताः यस्मिन् साम सामानि प्रतिष्ठितानि यस्मिन्यजूꣳषि प्रतिष्ठितानि । मनसः स्वास्थ्ये एव वेदत्रयीस्फूर्तेर्मनसि शब्दमात्रस्य प्रतिष्ठितत्वम् अन्नमयं हि सोम्य मन इति छान्दोग्ये मनस एव स्वास्थ्ये वेदोच्चारणशक्तिः प्रतिपादिता । तत्र दृष्टान्तः रथनाभौ आराः-इव यथा आराः रथचक्रनाभौ मध्ये प्रतिष्ठितास्तद्वच्छब्दजालं मनसि । किं च प्रजानां सर्वं चित्तं ज्ञानम् सर्वपदार्थविषयि ज्ञानं यस्मिन्मनसि ओतं प्रोतं निक्षिप्तम् तन्तुसंततिः पटे-इव सर्वं ज्ञानं मनसि निक्षितम् मनःस्वास्थ्ये एव ज्ञानोत्पत्तिर्मनोविक्षेपे ज्ञानाभावः । तन्मे मम मनः शिवसंकल्पं शान्तव्यापारमस्तु ॥५॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन-इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥६॥

यत् मनो मनुष्यान्नरान्नेनीयते अत्यर्थमितस्ततो नयति नयतेः क्रियासमभिहारे यङ् मनःप्रेरिता एव प्राणिनः प्रवर्तन्ते मनुष्यग्रहणं प्राणिमात्रोपलक्षकम् । तत्र दृष्टान्तः सुषारथिः अश्वानिव शोभनः सारथिर्यन्ता यथा कशया अश्वान्नेनीयते । द्वितीयो दृष्टान्तः अभीशुभिर्वाजिन इव यथा सुसारथिरभीशुभिः प्रग्रहैः वाजिनोऽश्वान्नेनीयतऽइत्यनुषङ्गः रश्मिभिर्नियच्छतीत्यर्थः । उपमाद्वयम् प्रथमायां नयनं द्वितीयायां नियमनम् तथा मनः प्रवर्तयति नियच्छति च नरानित्यर्थः । यच्च मनः हृत्प्रतिष्ठं हृदि प्रतिष्ठा स्थितिर्यस्य तत् हृच्चेव मन उपलभ्यते । यच्च मनः अजिरं जरारहितम् बाल्ययौवनस्थाविरेषु मनसस्तद्वस्थत्वात् । यच्च जविष्ठम् अतिजववद्वेगवत् जविष्ठम् न वै वातात्किं चनाशीयोऽस्ति न मनसः किं चनाशीयोऽस्तीति श्रुतेः । तन्मऽइत्युक्तम् ॥६॥

पितुं नु स्तोषं महो धर्माणं तविषीम् ।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥७॥

ऽत्रिक् अन्नस्तुतिः । तं पितुमन्नं स्तोषं स्तौमि किम्भूतम् महो महसः तविषीं तविष्याः बलस्य धर्माणं धारयितारम् तविषीति [निघ० २.१.] बलनाम विभक्तिव्यत्ययः अन्नेनैवं बलोत्पत्तेः । तं कम् यस्य पितोरोजसा बलेन त्रितः त्रिस्थान इन्द्रः वृत्रं दैत्यं विपर्वं विगतसम्बन्धनं कृत्वा वि अर्दयत् विविधमर्दितवान् इन्द्रेण वृत्रोऽन्नबलेनैव हत इत्यर्थः ॥ स्तोषं स्तौतेर्मिपि इतश्च लोपः परस्मैपदेषिति [पा० ३.४.१७.] इकारलोपे लेटोऽडाटाविति [पा० ३.४.९४.] अडागमे सिब्बहुलं लेटीति [पा० ३..१.३४.] सिप्प्रत्यये गुणे च रूपम् । महः महच्छब्दस्य ङसि छान्दसष्टिलोपः । धर्माणम् धरतेर्मन् । विपर्वम् विगतानि पर्वाणि यस्य तम् ऽप्रत्यये टिलोपः । अर्दयत् बहुलं छन्दस्यमाङ्योगेऽप्यीति [पा० ६.४.७५] अडभावः । व्यवहिताश्चेति [पा० १.४.८२.] वेरुपसर्गस्य व्यवधानम् ॥७॥

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि ।
क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः ॥८॥

चतस्रोऽनुष्टुभः द्वयोरनुमतिर्देवता । इत् निपातोऽनर्थकः हे अनुमते त्वमनुमन्यासै अनुमन्यस्वास्मद्वृतं वुध्यस्व नोऽस्माकं शं च शमेव सुखमेव कृधि कुरु । च पुनः नोऽस्माकं क्रत्वे क्रतवे संकल्पाय दक्षाय तत्समृद्धये संकल्पसिद्धये च नोऽस्मान्हिनु गमय नोऽस्माकमायूंषि प्रतारिषः प्रतारय वर्धय । लेटोऽडाटाविति [पा० ३.४.९४.] आट् वैतोऽन्यत्रेति [पा० ३.४.९६.] ऐकारः । कृधि शृणुपृकृवृभ्यश्छन्दसी ति [पा० ६.४.१०२.] हेर्धिः बहुलं छन्दसीति [पा० २.४.७३.] शपो लुक् । क्रत्वे गुणाभावे यणादेशः । तारिषः सिब्बहुलं छन्दसि णिश्रिद्रुस्रुभ्य इति [पा० ३.२.३४. वा० ३.] वृद्धिः अन्यत्पूर्ववत् प्रपूर्वस्तरतिर्वृद्ध्यर्थः ॥८॥

अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् ।
अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥९॥

अनुमतिः अद्य नोऽस्माकं यज्ञं देवेषु यज्ञियेषु अनुमन्यताम् अग्निश्च यज्ञं देवेषु अनुमन्यताम् किम्भूतोऽग्निः हव्यवाहनः हविषो वोढा । किं च दाशुषे हवींषि दत्तवते यजमानाय मयः सुखरूपौ अनुमत्यग्नी भवतं भवतामिति पुरुषव्यत्ययः । हव्यं वहतीति हव्यवाहनः हव्येऽनन्तःपादमिति [पा° ३.२.६६.] वहेर्ण्युट् । दाशुषे दाश्वात्साह्वानिति [पा° ६.१.१२.] साधुः ॥ १ ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ १० ॥

सिनीवाली देवता । हे सिनीवालि हे पृथुष्टुके स्तुकं केशभारः स्तुतिः कामो वा हे पृथुकेशभारे महास्तुते वा पृथुकामे वा या त्वं देवानां स्वसा असि भगिनी भवसि सा त्वमाहुतं हव्यं जुषस्व प्रीत्या गृह्णीष हे देवि नोऽस्मभ्यं प्रजां च दिदिड्ढि (5.) दिश देहि बहुलं छन्दसीति [पा° २.४.७६.] दिशतेः शपः श्लुः ततो द्वित्वादि ॥ १० ॥

II. पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ ११ ॥

सरस्वतीनदीदेवत्या । याः दृषद्वत्याद्याः पञ्च नद्यः सरस्वतीमपियन्ति गच्छन्ति किम्भूताः सस्रोतसः समानं स्रोतः प्रवाहो यासां ताः । तुरवधारणे सा उ (6.) सैव सरस्वत्येव पञ्चधा देशे सरिन्नदी अभवत् पञ्चापि स्वनामानि त्यक्त्वा सरस्वत्येवाभवत् ॥ ११ ॥

त्वमग्ने प्रथमोऽअङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ १२ ॥

चतस्र आग्नेय्यः द्वे जगत्यौ अन्ये त्रिष्टुबनुष्टुभौ । हे अग्ने त्वं देवानां प्रथमः सखा अभवः भूतोऽसि आद्यो मित्रभूतो देवानां त्वमेवेत्यर्थः । किम्भूतस्त्वम् अङ्गिराः अङ्गानां रसः यद्वा अङ्गिभ्य आत्मभ्यो यजमानेभ्यो सति सुखमित्यङ्गिराः । ऋषिर्द्रष्टा । देवो द्योतमानः । शिवः कल्याणः । किं च तव व्रते कर्मणि वर्त-

मानि मरुतः ईदृशा अजायन्त । कीदृशाः कवयः क्रान्तदर्शिनः । विद्मनापसः अप इति कर्मनाम [निघ० २.१.] विद्मना विदितानि अपांसि कर्माणि यैस्ते विद्मनापसः विदितकर्माणः । भ्राजदृष्टयः भ्राजन्त्यः शोभमानाः ऋष्टयः आयुधानि येषां ते तथा शत्रुघातकत्वात् । विद्मनेति वेत्तेः कर्मणि मनिन्प्रत्ययः बहुलग्रहणात् ततो विभक्तेराकारः तस्य चालुक् विद्मनापसः । अजायन्त जनेर्लङ् जादेशश्च श्यन् ॥ १२ ॥

त्वं नोऽअग्ने तवऽ देव पायुभिर्मघोनोऽ रक्ष तन्वश्च वन्द्य ।
त्रातारस्तोकस्य तनयेऽ गवामस्यर्निमेषꣳ रक्षमाणास्तवऽ व्रते ॥ १३ ॥

रक्षणार्थो मन्त्रः । हे अग्ने हे देव द्योतमान हे वन्द्य स्तुत्य तव व्रते कर्मणि वर्तमानान्मघोनो धनवतो यजमानान्रक्ष पालय । नोऽस्माकं तन्वः शरीराणि च रक्ष । कैः तव पायुभिः बलीयैः पालनैः यतस्त्वमनिमेषं सावधानं रक्षमाणाः पालयन्सन् तोकस्य पुत्रस्य तनये विभक्तिव्यत्ययः तनयस्य पौत्रस्य गवां च त्राता रक्षकोऽसि ॥ १३ ॥

उत्तानायामवभरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इडायास्पुत्रो वयुनेऽजनिष्ट ॥ १४ ॥

यः इडायाः पृथिव्याः पुत्रोऽग्निर्वयुने प्रज्ञाने कर्तव्ये अजनिष्ट जातः । किम्भूतः अरुषस्तूपः रुष बधे रोषति रुषः अरुषोऽहिंसकः स्तूपो ज्वालोच्छ्रायो यस्य स तथा ष्टुप उच्छ्राये । अस्याग्नेः रुशत् दीप्तं पाजः बलमुत्तानायामरण्यामवभर अवाचीनं कुरु द्यचोऽतस्तिङ इति [पा० ६.३.१३५.] दीर्घः । चिकित्वान् अरणिबलं जानन् किं बलमिति चेत् यारणिः प्रवीता कामिता सती वृषणं सेक्तारमग्निं सद्यः तत्कालं जजान जनयति छन्दसि लुङ्लङ्लिट इति [पा० ३.४.६.] लिट् । सोऽग्निर्जात इत्यर्थः ॥ १४ ॥

इडायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो निधीमह्यग्ने हव्याय वोढवे ॥ १५ ॥

हे ज्ञातवेदः ज्ञातप्रज्ञान हे अग्ने इडायाः पृथिव्याः स्थाने देवयजनाख्ये पृथिव्या नाभा अधि उत्तरवेद्या मध्ये वयं त्वा त्वां निधीमहि स्थापयामः किमर्थम् हव्याय वोढवे हव्यं वोढुम् विभक्तिव्यत्ययः वहतेस्तुमर्थे सेसेनिति [पा° ३. ४. ९.] तवेप्रत्ययः सहिवहोरिति [पा° ६. ३. ११२.] ओकारः ॥ १५ ॥

प्रमन्महे शवसानाय शूषमाङ्गूषं गिर्वणसेऽअङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवतऽऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १६ ॥

चतस्र ऐन्द्र्यस्त्रिष्टुभः । वयमिन्द्राय इन्द्रार्थमाङ्गूषं स्तोमं त्रिवृदादिकं प्रमन्महे जानीमः किम्भूतं स्तोमम् शूषं बलहेतुम् । अर्कं मन्त्रं च अर्चाम उच्चारयाम धातूनामनेकार्थत्वादर्चतिरुच्चारणार्थः अङ्गिरस्वत् अङ्गिरस-इव तेनैव स्तोमो ज्ञातो मन्त्रश्च पठितस्तस्मै तद्वत् । किम्भूतायेन्द्राय शवसानाय शवो बलमात्मन इच्छति शवस्यति शवस्यतीति शवसानः तस्मै बलमभिलषमाणाय सुप आत्मनः क्यजिति [पा° ३. १. ८.] क्यच् तदन्ताच्छानच् शप् बहुलं छन्दसीति [पा° २. ४. ७३.] तस्य लुक् छन्दस्युभयथेति [पा° ३. ४. ११७.] तस्य शानचोऽप्यार्धधातुकत्वात् क्यस्य विभाषेति [पा° ६. ४. ५०.] क्यचो लोपः शवसान इति सिध्यति । पुनः कीदृशाय गिर्वणसे गिरा स्तुत्या वनयति सम्भाजयति आत्मानमभिलषितदानात्स्तोतृभ्य इति गिर्वणाः गीःशब्दोपपदाद्वनोतेर्णयन्तादसुनि वनेर्घठादित्वेन मित्संज्ञत्वात् [पा° ६. ४. १२.] ह्रस्वत्वम् णिचो लोपः गीर्वणा इति प्राप्ते दीर्घाभावश्छान्दसः यद्वा स्वार्थे णिच् गीर्भिरेनं देवा भजन्ति इति गिर्वणाः तस्मै गीर्वाणशशब्देन (7.) समानार्थो गिर्वणःशब्दः । पुनः किम्भूताय सुवृक्तिभिः शोभनाभिः स्तुतिभिः स्तुवते स्तौतीति स्तुवन् तस्मै यजमानानिति शेषः तदुक्तम् त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यमिति [६. ३७.] । पुनः कीदृशाय ऋग्मियाय ऋग्मयाय वेदमयाय मयडर्थे छान्दसो मियट् यद्वा ऋच स्तुतावित्यस्माद्भावे औणादिको मक् कुत्वं जश्त्वम् ऋग्मः स्तुतिः तमर्हति ऋग्मियः अर्हार्थे घच् स्तुतियोग्याय । पुनः कीदृशाय नरे नरवत्पाय नृशब्दस्य ङे परे छान्दसो गुणः । पुनः कीदृशाय विश्रुताय शौर्यदानबलादिभिर्लब्धख्यातये ॥ १६ ॥

प्र वो॑ महे॒ महि॒ नमो॑ भरध्माङ्गू॒ष्यं॑ शवसा॒नाय॒ साम॑ ।
येना॑ नः पू॒र्वे पि॒तरः॑ पद॒ज्ञा अर्च॑न्तोऽअङ्गिरसो॒ गा अवि॑न्दन् ॥ १७॥

महे॒ महते॑ शवसानाय॒ बलमभिलषमाणायेन्द्राय॒ महि॒ महत्॒ नमोऽन्नं॑ वः यू॒यं प्रभ॑रध्वं प्रकृतम्॒ समर्पयत॒ यूयमित्यर्थे॑ व इत्यव्ययम्॒ मुनीनां॑ पुत्रादी॒न्प्रति॑ वचः । आङ्गू॒ष्यमाङ्गू॒षाय॑ हितं॑ साम॑ प्रभरध्वमुच्चारयत । नोऽस्माकं॑ पू॒र्वे॑ पितरः॒ अङ्गि॑रसः॒ येनान्नेन॑ साम्ना चार्चन्तः॒ स्तुवन्तः॑ सन्तः॑ गाः॑ सूर्यकिरणानविन्दन्॒ लेभिरे॑ स हि॒ साम्नां॑ लोकः॑ तत्साम॑ प्रभरध्वम्॒ । कीदृशाः॑ अङ्गि॑रसः॒ पदज्ञाः॑ पदमात्मस्वरूपं॑ जानन्तीति॑ पदज्ञाः॑ ॥ १७॥

इ॒ह॒न्ति॑ त्वा॒ सो॑म्यासः॒ सखा॑यः सु॒न्व॒न्ति॒ सोमं॑ द॒धति॒ प्रया॑ꣳसि ।
तिति॑क्षन्तेऽअभिशस्तिं॒ जना॑नामिन्द्र॒ त्वदा॒ कश्च॒न हि॒ प्र॑केतः॑ ॥ १८॥

हे इन्द्र॒ त्वत्॒ त्वत्तः॑ सकाशात्॒ कश्च॒न चनशब्दोऽप्यर्थे॑ कोऽपि॑ लोकोत्तरः॒ प्रकेतः॑ प्रकृष्टो॑ ज्ञानविशेषः॑ आ॒ समन्ता॑त्॒ हि॒ यतो॑ भवति॒ अतः॑ सखा॑यो॒ विप्राः॑ त्वामिह॒न्ति॒ अथ॒ ये ब्राह्मणाः॑ शुश्रुवाꣳसोऽनूचानास्ते॑ मनुष्यदेवा॒ इत्युक्तेर्देवानां॑ विप्राणां॑ च सखित्वम्॒ । किम्भूताः॑ सखा॑यः सो॒म्यासः॑ सोमसम्पादिनः॑ । इह॒न्तीति॑ कथं॑ ज्ञातं॑ तत्राह॒ यतस्ते॑ सोमं॑ सु॒न्व॒न्ति॒ अभिषुण्वन्ति॒ प्रया॑ꣳसि॒ अन्नानि॑ द॒धति॑ च॒ प्रय॒ इत्यन्ननाम॑ [निघ॰ २.७.] हवींषि॑ धारयन्ति॑ । किं॑ च॒ जना॑नामभिशस्तिं॒ दुर्वचनं॑ तितिक्षन्ते॑ सहन्ते॑ मनोवाक्कायसंयताः॑ क्षान्तिपरा॒ इत्यर्थः॑ ॥ १८॥

न॒ ते॒ दू॒रे प॑र॒मा चि॒द्रजा॑ꣳस्या तु॒ प्रया॑हि॒ हरि॑वो॒ हरि॑भ्याम्॒ ।
स्थि॒राय॒ वृष्णे॑ सवना॒ कृते॒मा यु॒क्ता ग्रावा॑णः समिधा॒नेऽअ॒ग्नौ ॥ १९॥

हे हरिवः॑ हरी॒ अश्वौ॑ विद्येते॑ यस्य॑ स हरिवान्॒ तस्य॑ सम्बोधनम्॒ मतुवसो॒रिति॑ [पा॰ ८.३.१.] रुत्वम्॒ हे हरिवः॑ स्थिराय॒ दृढसौहृदाय॑ वृष्णे॑ सेक्त्रे॑ तुभ्यम्॒ इमा॑ सवना॒ कृता॑ इमानि॑ सवनानि॑ प्रातःसवनादीनि॑ कृतानि॑ । द्यौ॑ सति॑ अग्नौ॑ समिधाने॑ समिध्यमाने॑ सति॑ छान्दसो॑ यको॑ लुक्॒ । ग्रावाणः॑ च॒ युक्ताः॑ योजिताः॑ अभिषवकर्मणि॑ । तुशब्दो॑ हेत्वर्थे॑ अतो॑ हेतोः॑ हरि॑भ्यामश्वाभ्यामा॑ प्रयाहि॒ आगच्छ॑ ।

ननु स्वर्गात्कथमतिदूरे मया गन्तव्यमित्यत आह परमा परमाणि दूरदेशस्थानि रजांसि स्थानानि ते तव दूरे न चित् दूरे न सन्ति चित्शब्दोऽप्यर्थे (8.) अतिदूरमपि ते निकटम् अत आयाहीत्यर्थः ॥ १९ ॥

अषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनुमदेम सोम ॥ २० ॥

चतस्रः सोमदेवत्यास्त्रिष्टुभः । हे सोम त्वां जयन्तमुत्कर्षेण वर्तमानमनु (9.) वयं मदेम हृष्टाः स्याम । किम्भूतं त्वां युत्सु युद्धेषु अषाढमसह्यनमनभिभूतम् । पुनः कीदृशं पृतनासु सेनासु पप्रिं पालयितारम् । स्वर्षाम् स्वर्दिवं सनोति सम्भजते स स्वर्षाः तम् । अप्साम् अपो जलानि सनोतीत्यप्साः तम् । वृजनस्य बलस्य गोपां रक्षकम् । भरेषुजां संग्रामेषु जेतारम् । सुक्षितिं सुनिवासम् । सुश्रवसं शोभनं श्रवः कीर्तिर्यस्य स सुश्रवाः तम् ॥ अषाढम् सह्यतेऽसौ साढः न साढः असाढस्तम् सहेः क्तः ढत्वं [पा° ८.२.३१.] धत्वं [पा° ८.२.४०.] ष्टुत्वम् [पा° ८.४.४१.] ढो ढे लोपः [पा° ८.३.१३.] ढ्रलोपे पूर्वस्य दीर्घोऽणः [पा° ६.३.१११.] वाऋलकात् सहिवहोरोदवर्णस्येति [पा° ६.३.११२.] अस्याप्रवृत्तिः षत्वं छान्दसम् । पप्रिम् पॄ पालनपूरणयोः आदृगमहनेति [पा° ३.२.१७१.] किः द्वित्वादि । स्वर्षाम् स्वःपूर्वात्सनोतेर्विट् विड्वनोरनुनासिकस्यात् [पा° ६.४.४१.] । एवमप्साम् । गोपायतीति गोपाः ह्विप् अतो लोपः यलोपः । भरेषुजाम् भरेषु संग्रामेषु जयति शत्रूनिति भरेषुजाः कृल्लदत्लात्सप्तम्या इति [पा° ६.३.१.] अलुक् जयतेरौणादिको डाप्रत्ययः । मदेम मदी हर्षे लिङ् व्यत्ययेन शप् ॥ २० ॥

III. सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ २१ ॥

यो यजमानोऽस्मै सोमाय ददाशत् ददाति हविः तस्मै सोमो धेनुं ददाति । आशुं शीघ्रमर्वन्तमश्वं च सोमो ददाति । सोमश्च तस्मै वीरं पुत्रं ददाति कीदृशं वीरं कर्मण्यं कर्मणि साधुम् । सादन्यं सदने गृहे साधुम् । विदथ्यं विदथो यज्ञस्तत्र साधुम् । सभेयं सभामर्हति सभेयस्तम् । पितृश्रवणं पितरं शृणोति पितृश्रव-

णः पित्राज्ञाकारिणं विनीतमित्यर्थः ॥ कर्मण्यमित्यादौ तत्र साधुरिति [पा° ४.४.९८.] यत् । सभेयं ऽश्छन्दसीति [पा° ४.४.१०६.] सभायाः साधुर्ये ऽप्रत्ययः तस्यै-यादेशः [पा° ७.१.२.] । ददाशत् दाशृ दाने वक्रुलं छन्दसीति [पा° २.४.७६.] शपः श्लुः द्वित्वम् इतश्च लोपः परस्मैपदेष्विति [पा° ३.४.९७.] तिप इलोपः लेटो ऽडाटावित्यडागमः [पा° ३.४.९४.] ॥२१॥

त्वमिमा ओषधीः सोम विश्वास्त्वमपो ऽअनयस्त्वं गाः ।
त्वमातनोरुर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥

हे सोम त्वमिमाः विश्वाः सर्वाः ओषधीः अपो जलानि गाः (10.) धेनूः अजनयः जनितवानसि । त्वमुरु विस्तीर्णमन्तरिक्षमातनोरु विस्तारितवानसि त्वं च ज्योतिषा तेजसा तमो ऽन्धकारं विववर्थ विवृणोषि आदित्यात्मना सर्वं तमो ऽपनयसीति सर्वात्मा त्वमित्यर्थः बभूथाततन्थ जगृभ्म ववर्थेति निगम ऽइति [पा° ७.२.६४.] निपातः ॥२२॥

देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभियुध्य ।
मा त्वातनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ॥२३॥

हे देव सोम हे सहसावन् बलवन् देवेन मनसा देवसम्बन्धिना मनसा सह रायो धनस्य भागं नो ऽस्मभ्यमभियुध्य युध्यतिर्गतिकर्मा अन्तर्भावितण्यर्थः अभिगमय देहीत्यर्थः । एवं दानप्रवृत्तं त्वां कश्चित् मा आतनत् वा त्वां मा आतनोतु मा प्रतिबध्नातु तनोतिः प्रतिबन्धार्थः । कुतस्त्वमेव मुच्यस ऽइति चेत् यतस्त्वं वीर्यस्य ईशिषे वीरकर्मण ईश्वरो भवसि अधीगर्थदयेशामिति [पा° २.३.५२.] कर्मणि षष्ठी । किं च गविष्टौ गोः स्वर्गस्य इष्टौ इच्छायां स्वर्गैषणायां विषयभूतायां सत्यामुभयेभ्यः प्रचिकित्स उभयलोकप्राप्त्यर्थं चिकित्सां कुरु व्याध्यपगमं कुरु उभयलोकप्रतिबन्धकं विघ्नं निवर्तयेत्यर्थः । दैवं मनः प्राप्य लब्धधना अरोगाश्च सत्कर्म कुर्वाणा यथा स्वर्गं यास्यामस्तथा कुर्विति वाक्यार्थः ॥ देवेन देवानामिदं दैवम् तद्धितप्रत्ययलोपः । सहसावन् प्रथमार्थे तृतीया सहसा सहो बलमस्यास्तीति सहसावान् अलुक् । तनत् तनोतेः परस्य लेटो ऽडागम इलो-

पश्च । चिकित्स गुप्तिज्किद्भ्यः सन् [पा° ३. १. ५.] अन्येषामपि दृश्यतेऽइति [पा° ६. ३. १३७.] दीर्घः ॥ २३ ॥

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ २४ ॥

चतस्रः सावित्र्यः द्वितीया जगती त्रिष्टुभोऽन्त्याः हिरण्यस्तूपदृष्टाः । स सविता देवः आगात् आगच्छतु इणो गा लुङीति [पा° २. ४. ४५.] इणो गादेशः । किं कुर्वन् दाशुषे हवींषि दत्तवते यजमानाय वार्याणि वरणीयानि रत्ना रत्नानि दधत् ददत् स्थापयन्वा । कीदृशः हिरण्याक्षः हिरण्यमिव कान्तियुक्ते अक्षिणी यस्य स हिरण्याक्षः अमृतदृष्टिर्वा । स कः यः सविता पृथिव्याः सम्बन्धिनीः अष्टौ ककुभो दिशः व्यख्यत् प्रकाशितवान् । यश्च त्री त्रीणि धन्व धन्वानि लोकान् व्यख्यत् । धन्वेत्यन्तरिक्षनाम [निघ° १. ३.] तेन तदुपलक्षितावितरावपि लोकौ लक्ष्येते ह्यन्तरिक्षो गह्यतीति वत् । यश्च योजना योजनानि योजनगव्यूतिक्रोशादीनध्वपरिमाणविशेषान् व्यख्यत् । यश्च सप्त सिन्धून्समुद्रान्क्षीरोदाद्यान् व्यख्यत् । उपलक्षणमेतत् सर्वजगत्प्रकाशकः सविता रत्नानि ददान आयात्वित्यर्थः ॥ अख्यत् ख्या प्रकथने अस्यतिवक्तिख्यातिभ्योऽङिति [पा° ३. १. ५२.] च्लेरङ् आलोपश्च धातूनामनेकार्थत्वादत्र प्रकाशनार्थो ग्राह्यः । त्री योजना सुपां सुलुगित्यादिना [पा° ७. १. ३९.] पूर्वसवर्णदीर्घो विभक्तेः । धन्व सुपो लुक् । रत्ना सुप आकारः । दाशुषो दाश्वान्साह्वानिति [पा° ६. १. १२.] निपातः । वार्याणि ऋहलोर्ण्यदिति [पा° ३. १. १२४.] वृणोतेर्ण्यत् ॥ २४ ॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥ २५ ॥

सविता प्रसविता सूर्यं सूर्यः विभक्तिव्यत्ययः उभे उभयोः द्यावापृथिवी द्यावापृथिव्योः अन्तर्मध्ये ईयते आगच्छति यदा तदा अमीवां व्याधिमपबाधते अन्धकारलक्षणरोगं निवर्तयति । अथ यदा वेति अस्तमयसमये गच्छति तदा कृष्णेन रजसा अन्धकारलक्षणेन द्यां द्युलोकमभि-ऋणोति अभिव्याप्नोति । कीदृशः सूर्यः हि-

रण्यपाणिः सुवर्णपाणिः । विचर्षणिः विविधं द्रष्टा कृताकृतप्रत्यवेक्षकः । उभे द्यावापृथिवी षष्ठ्यर्थे द्वितीया । अन्तर्यागे वा । ईयते ईङ् गतौ दिवादिः ॥ २५ ॥

हिरण्यहस्तोऽसुरः सुनीथः सुमृडीकः स्ववां याल्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ २६ ॥

यो देवो रविः रक्षसो राक्षसान् यातुधानान् असुखकारांश्च अपसेधन् अपगमयन्सन् अस्थात् उदस्थात् उदेति स देवः अर्वाङ् अर्वागञ्चनः अस्मदभिमुखः यातु आयात्वित्यर्थः । कीदृशो देवः हिरण्यहस्तः हिरण्यं दानार्थं हस्ते यस्य स तथोक्तः ब्रूपेण वा स्तुतिः । असुरः असून्प्राणान्राति ददातीत्यसुरः । सुनीथः नीथा स्तुतिः कल्याणस्तुतिः । सुमृडीकः साधु सुखयिता । स्ववान्धनवान् । प्रतिदोषम् प्रतिजनं यो दोषः प्रतिदोषः तम् श्रुतिस्मृतिविहितधर्मपराङ्मुखानां यावतो दोषास्तावतः गृणानः उच्चारयन् उपभोगार्थमित्यभिप्रायः । स्ववान् यातु इत्यत्र दीर्घादटि समानपादश्इति [पा° ८.३.९.] नस्य रुत्वे भोभगोऽ[अघोऽ]अपूर्वस्य यो ऽशीति [पा° ८.३.१७.] तस्य रोर्यादेशे क्लि सर्वेषामिति [पा° ८.३.२२.] तस्य लोपः । रक्षसशब्दस्य व्यत्ययेनाल्लोवत्वम् ॥ २६ ॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नोऽअद्य पथिभिः सुगेभी रक्षा च नोऽधि च ब्रूहि देव ॥ २७ ॥

हे सवितः हे देव पन्थाः पन्थानो मार्गाः अन्तरिक्षे सुकृताः साधुकृताः धात्रा वर्तन्ते । कीदृशास्ते पूर्व्यासः पूर्वेषु कालेषु भवाः पूर्व्याः । अरेणवः नास्ति रेणुर्यत्र अपांसुलाः । तेभिः तैः पथिभिः मार्गैः नोऽस्मान् अद्य नयेति शेषः । च पुनः गन्तो नोऽस्मान् रक्ष पालय । अधिब्रूहि च अधि अङ्गीकृत्य ब्रूहि एते मदीया इति यद्वा अधिब्रूहि उपदिशास्माकं यद्धितं पथ्यं तत् यद्वा अधि अधिकान्वद एते मदायान्निका दातार इत्यादि । किम्भूतैः पथिभिः सुगेभिः सुगैः सुखेन गम्यते येषु सुगाः तैः अन्नपानप्रभूतैरित्यर्थः अधिकरणे गन्तेर्डप्रत्ययः ॥ पूर्व्यासः पूर्वैः कृताः पूर्वैः कृतमिनियौ चेति [पा° ४.४.१३३.] यप्रत्ययः ॥ २७ ॥

उभा पिबतमश्विनोभा नः शर्म यच्छतम् । अविद्रियाभिरूतिभिः ॥ २८ ॥

आश्विन्यस्तिस्रः एका गायत्री द्वे अनुष्टुभौ । हे [अश्विना] अश्विनौ उभा उभौ द्वावपि युवां पिबतम् सोममिति शेषः । उभा द्वौ युवां नोऽस्मभ्यं शर्म शरणं सुखं वा यच्छतम् काभिः सह अविद्रियाभिः अविदीर्णाभिः अखण्डिताभिः ऊतिभिः अवनैः पालनैः सह । सुखं दत्तं पालयतं चेत्यर्थः ॥ उभा अश्विना विभक्तेराकारः । विदीर्यन्तीति विद्रियाः दृ विदारे औणादिक इयक्प्रत्ययः ॥ २८ ॥

अप्रस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे निह्वये वां वृधे च नो भवतं वाजसातौ ॥ २९ ॥

हे अश्विना अश्विनौ हे दस्रा दर्शनीयौ हे वृषणा वर्षितारौ सेक्तारौ युवानौ अस्मे अस्माकं वाचम् अप्रस्वतीं कर्मवतीं युवां कृतं कुरुतम् तथा नोऽस्माकं मनीषां मनस इच्छामप्रस्वतीमिव कुरुतम् । मनसा वचसा च यज्ञं कुर्मस्तथा कुरुतमित्यर्थः । यतो ह वां युवां निह्वये आह्वयामि किंनिमित्तम् अद्यूत्ये सन्मार्गागते अवसे अन्ने अन्ननिमित्तम् तद्दानार्थमित्यर्थः द्यूताद्यागतं द्यूते भवं वा द्यूत्यम् न द्यूत्यमद्यूत्यम् तस्मिन् द्यूताद्यागतं कर्मण्यं न भवतीत्येवमुच्यते द्यूतमन्येषामप्यन्याय्यधनागमानामुपलक्षकम् । किं च वाजसातौ वाजानामन्नानां सातिः सम्भजनं यस्मिन् स वाजसातिः तस्मिन्यज्ञे नोऽस्माकं वृधे वृद्धौ भवतम् ॥ अस्मे विभक्तेः शे-आदेशः । कृतम् करोतेः बहुलं छन्दसीति [पा° २.४.७३.] शपि लुप्ति लोण्मध्यमद्विवचने रूपम् । वृषणा वृषणौ वा षपूर्वस्य निगमञ्इति [पा° ६.४.१.] उपधादीर्घाभावः । वृधे वर्धनं वृत् सम्पदादित्वाद्भावे क्विप् ॥ २९ ॥

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३० ॥

हे अश्विना अश्विनौ द्युभिः दिवसैः अक्तुभिः रात्रिभिः सप्तम्यर्थे तृतीया दिवसेषु रात्रिषु च अहोरात्रम् अस्मान्परिपातं सर्वतो रक्षतम् । कैः सौभगेभिः सौभगैः भग इति धननाम [निघ° २.१०.] शोभनैः धनैः किम्भूतैः अरिष्टेभिः अनुपहिं-

सितैः अखण्डितैर्धनैरस्मान्रक्षतमित्यर्थः । किं च मित्रः वरुणः अदितिः सिन्धुः समुद्रः उतापि च द्यौः एते नोऽस्माकं तत् भवत्कृतं रक्षणं मामकृतां पूजयन्तामनुमन्यन्ताम् (11.) इत्यर्थः ॥ द्युरित्यङ्को नाम अक्तुरिति रात्रेः । मामकृताम् मकृ पूजायाम् बकुलं छन्दसीति [पा° २.४.७६.] शपः श्लुः श्लाविति [पा° ६.१.१०.] द्वित्वम् तुजादीनां दीर्घोऽभ्यासस्येति [पा° ६.१.७.] अभ्यासदीर्घः ॥३०॥

IV. आ कृष्णेन रजसा वर्तं° ॥३१॥

व्याख्याता [३३.४३.] ॥३१॥

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः ।

दिवः सदाꣳसि बृहती वितिष्ठस आ त्वेषं वर्तते तमः ॥३२॥

रात्रिदेवत्या पथ्याबृहती । हे रात्रि यया त्वया पार्थिवं रजः पृथिवीसम्बन्धिलोकः पितुः मध्यमलोकस्य धामभिः स्थानैः सह आ अप्रायि समन्तात्पूर्यते । या च त्वं दिवो द्युलोकस्य सदांसि स्थानानि बृहती महती सती वितिष्ठसे आक्रमसे व्याप्नोषि । तस्यास्तव तमः आवर्तते तथापि प्रवर्तते किम्भूतं तमः त्वेषं दीप्तं महाप्राग्भारमित्यर्थः । रजःशब्दो लोकवचनः । अप्रायि प्रा पूरणे कर्मणि लुङि चिणि ह्रूपम् ॥३२॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति । येन तोकं च तनयं च धामहे ॥३३॥

उषोदेवत्या पुरोष्णिक् । हे उषः हे वाजिनीवति हे अन्नवति अस्मभ्यं तत् प्रसिद्धं चित्रं चायनीयमाश्चर्यकारि महनीयं धनमाभर आहर देहि येन धनेन वयं तोकं पुत्रं तनयं पौत्रं च सर्वं संतानवर्गं धामहे दध्महे पुष्णीमः ॥ धामहे दधातेः शपो लुकि ह्रूपम् ॥३३॥

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।

प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम ॥३४॥

जगती बकुदेवत्या । प्रातःशब्दो वीप्सावचनः । वयं प्रातः पुनः-पुनः एतान्देवान्हवामहे आह्वयाम इति प्रत्येकं सम्बध्यते । कान् अग्निम् इन्द्रम् मित्राव-

रुणौ अश्विनौ भगम् पूषणम् ब्रह्मणस्पतिम् सोमम् उत अपि च रुद्रं हुवेम आ-ह्वयाम ॥ हवामहे हुवेम ह्वयतेः सम्प्रसारणे ऊपदधयम् ॥३४॥

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चित्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥३५॥

पञ्च भगदेवत्यास्त्रिष्टुभः । वयं तं भगमादित्यं हुवेम आह्वयाम । किम्भूतम् प्रातर्जितं प्रातर्जयतीति प्रातर्जित् तम् प्रातर्जयनशीलम् । उग्रमुत्कृष्टमुदूर्णादानं वा । अदितेः पुत्रं तनयम् । तं कम् यो विधर्ता जगतो धारयिता । यं च आध्र-श्चित् चिह्नब्दोऽप्यर्थे न ध्रायति ध्रै तृप्तौ न तृप्यति स अध्रः नञो दीर्घश्छान्दसः यद्वा आ समन्तात् ध्रः आध्रः यद्वा अध्र एवाध्रः स्वार्थे तद्धितः आध्रः अतृप्तः बुभु-क्षितो दरिद्रो वापि यं भगं भक्षि भजस्व अर्थाद्धनम् इत्याह किं कुर्वन् मन्यमा-नः पूजयन् स्वार्थसिद्धये मन्यतिरर्चतिकर्मा स हि सूर्योदये भिक्षादिना किंचिल्ला-भते तत धनं वाञ्छति । तुरश्चित् आतुरोऽपि यं भगं मन्यमानो भक्षि धनं भ-जस्वेत्याह दिवसे तस्य सुखोदयात् रोगिणो रात्रिः कष्टेन याति यद्वा तुरो यमः स हि मारणाय दिनानि गणयति । राजा चित् राजापि यं भगं भक्षि इत्याह त-द्धनं हि राज्ञां व्यवहारदर्शनादिना सर्वेष्टसिद्धिः ॥ भक्षि भजतेः शपि लुप्ते लटि मध्यमे ऊपम् ॥३५॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥३६॥

हे भग हे प्रणेतः प्रकर्षेण नयति प्रापयति धनमिति प्रणेता तस्य सम्बोधने हे प्रणेतः । आदरार्थं पुनः सम्बोधनम् हे भग हे सत्यराधः सत्यमनश्वरं राधो धनं यस्य स सत्यराधाः तत्सम्बुद्धौ हे सत्यराधः हे भग त्वं ददत् धनं प्रयच्छन् नोऽस्माकमिमां धियं प्रज्ञां कर्म वा उदव उन्नय यथा सूक्ष्मार्थान्पश्यामस्तथा कुर्विति भावः । किं च हे भग नोऽस्मान्गोभिः अश्वैः प्रजनय प्रवर्धय गा अश्वां-श्च वर्धयेत्यर्थः । हे भग वयं नृभिः पुत्रादिभिः नृवन्तः मनुष्यवन्तः प्रकर्षेण स्याम भवेम ॥३६॥

उतेदानीं भगवन्तः स्यामोत प्रपित्वऽउत मध्येऽअह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥ ३७ ॥

हे मघवन् धनवन् त्वे उत अपि च वयमिदानीं भगवन्तः धनवन्तो ज्ञानवन्तो वा स्याम भवेम । उतापि च सूर्यस्य प्रपित्वे प्रपतने अस्तमये भगवन्तः स्याम । उत अह्नां मध्ये मध्यन्दिने भगवन्तः स्याम उत सूर्यस्य उदिता उदितौ उदयसमये भगवन्तः स्याम । किं बहुना सर्वदास्माकं धनवत्तास्त्वित्यर्थः । किं च देवानां सुमतौ कल्याण्यां बुद्धौ वयं स्याम देवा अस्मासु शोभनामनुग्रहविषयां बुद्धिं दधत्वित्यर्थः ॥ ३७ ॥

भग एव भगवाँ२ऽअस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ३८ ॥

हे देवाः भग एव भगवान्धनवानस्तु किमन्यैरदातृभिर्धनिभिर्देवैरिति भावः । तेन भगदत्तेन धनेन वयं भगवन्तः स्याम । एवं देवानुक्त्वाथ भगमाह हे भग सर्व इत् सर्व एव जनः तं प्रसिद्धं त्वा जोहवीति अत्यन्तमाह्वयति इष्टसिद्धये हे भग स त्वमिह नोऽस्माकं कर्मणि पुरएता पुरोऽग्रे एतीति पुरएता अग्रयायी भव अग्रेसरो भूत्वा सर्वकार्याणि साधयेत्यर्थः ॥ ३८ ॥

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु ॥ ३९ ॥

उषसः प्रातःकालाधिष्ठातारो देवाः अध्वराय संनमन्त संनमन्ते प्रह्वीभवन्ति कथमिव दधिक्रावा अश्वः इव यथा अश्वः शुचये पदाय अग्न्याधानार्थं शुचि पदम् (12.) । ता उषसः भगमादित्यं नोऽस्माकमर्वाचीनमभिमुखमावहन्तु आगमयन्तु किम्भूतं भगम् वसुविदम् वसु धनं विन्दतीति वसुविदः इगुपधेति [पा° ३. १. १३५.] कः । (13.) यथा वाजिनोऽन्नवन्तो वेगवन्तो वा अश्वा रथमावहन्ति तद्वत् ॥ ३९ ॥

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।

घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥४०॥

उषोदेवत्या त्रिष्टुप् । उषसः सदं सदाकालं नोऽस्मानुहन्तु विपाशयन्तु अज्ञानलक्षणं पाशं मोचयन्तु उही विपाशे । किम्भूता उषसः अश्ववतीः अश्ववत्यः गोमतीः गोमत्यः वीरवतीः वीरवत्यः भद्राः भन्दनीयाः कल्याणरूपाः घृतमवश्यायलं दुहानाः क्षरत्यः विश्वतः सर्वतः प्रपीताः धर्मार्थकामैराप्यायिताः प्यायः पीआदेशः । एवं परोक्षं प्रार्थ्य प्रत्यक्षमाह हे उषसः यूयं स्वस्तिभिः अविनाशैः सदा नोऽस्मान्पात पालयत ॥४०॥

V. पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥४१॥

द्वे पौष्ण्यौ गायत्रीत्रिष्टुभौ । हे पूषन् तव व्रते कर्मणि वर्तमाना वयं कदा चन कदापि न रिष्येम न विनश्येम । किं च इह कर्मणि ते तव स्तोतारः स्तुतिकर्तारः स्मसि भवामः इदन्तो मसि ॥४१॥

पथस्पथः परिपतिं वचस्या कामेन कृतोऽभ्यानडर्कम् ।
स नो रासदुरुधश्चन्द्राग्रा धियं-धियꣳ सीषधाति प्र पूषा ॥४२॥

यः पूषा अर्कं देवमभ्यानट् अभिव्याप्नोति किम्भूतः कामेन काम्यतऽइति कामं तेन वाञ्छितेन वचस्या वचसा वेदोक्तेन कृतः अभिमुखीकृतः । किम्भूतमर्कम् पथस्पथः मार्गस्य-मार्गस्य सर्वेषां मार्गाणां परिपतिमधिपतिं स्वामिनम् । सः पूषा नोऽस्मभ्यं प्रुरुधः शुचं रुन्धन्ति वर्णनाशाः पृषोदरादित्वात् शोकनाशकराणि साधनानि रासत् ददातु लिङ्व्यत्ययः किम्भूताः प्रुरुधः चन्द्राग्राः चन्द्रमाच्छादकमग्रं यासां ताः साधने कृते आच्छादो भवति । पुनः पूषा धियं-धियं कर्माणि सर्वाणि प्रसीषधाति प्रकर्षेण साधयतु ॥ पथस्पथः धियं-धियमिति नित्यवीप्सयोरिति [पा० ८.१.४.] द्वित्वम् । वचस्या विभक्तेर्यादेशः । आनट् व्याप्तिकर्मसु दशस्वयं पठितः [निघ० २.१८.] । सीषधाति साध संसिद्धौ शपः श्लुश्छान्दसः द्वित्वम् लेटोऽडाटौ तुजादीनां दीर्घोऽभ्यासस्य उपधाह्रस्वश्छान्दसः ॥४२॥

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥४३॥

विष्णव्यौ गायत्र्यौ द्वयोर्ऋचोरेकवाक्यम् । यो विष्णुः यज्ञः त्रीणि पदा पदानि विचक्रमे विक्रान्तवान् अग्निवाय्वादित्याख्यानि पदानि व्याप्तवान् । किम्भूतो विष्णुः गोपाः जगतो रक्षकः अदाभ्यः अहिंस्यः । किं कुर्वन् अतः अस्मादेव पदत्रयात् धर्माणि पुण्यानि कर्माणि धारयन् । धर्मसञ्ज्ञियाम् ॥४३॥

तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं पदम् ॥४४॥

तस्य विष्णोः यज्ञस्य यत् परमं पदं ब्रह्मलक्षणम् तद्विप्रासः विप्राः ब्राह्मणाः समिन्धते णिचो लोपः समिन्धयन्ति दीपयन्ति उपासते इत्यर्थः । किम्भूताः विप्राः विपन्यवः विगतः पन्युः संसारव्यवहारो येभ्यः निष्कामाः । जागृवांसः जागरणशीलाः अप्रमत्ताः ज्ञानकर्मसु समुच्चयकारिणः इत्यर्थः ॥४४॥

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते ऽअजरे भूरिरेतसा ॥४५॥

जगती द्यावापृथिवीदेवत्या । द्यावापृथिवी द्यावापृथिव्यौ वरुणस्यादित्यस्य धर्मणा धारणेन धरणशक्त्या विष्कभिते स्तम्भिते स्कम्भेर्तिर्दृढीकरणार्थः वरुणेन स्वशक्त्या दृढीकृते इत्यर्थः । किम्भूते ते घृतवती उदकवत्यौ घृतमित्युदकनाम [निघ० १.१२.] । भुवनानां भूतजातानामभिश्रिया अभिश्रियौ आश्रयणीये कर्मणि क्विप् विभक्तेराकारः । उर्वी उर्व्यौ विस्तीर्णे पृथ्वी पृथ्व्यौ पृथुले आयामविस्ताराभ्यां महत्त्वं विशेषणद्वयेनोक्तम् । मधुदुघे मधु उदकं तस्य दोग्ध्यौ । सुपेशसा सुरूपे । अजरे जरारहिते । भूरिरेतसा भूरि रेतो ययोस्ते भूरिरेतसौ बहुरेतस्के सर्वभूतानां हि रेतांसि ताभ्यामेवोत्पद्यन्ते ॥४५॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामवबाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥४६॥

जगती लिङ्गोक्तदेवता । ये नोऽस्माकं सपत्नाः शत्रवः ते अपभवन्तु अपगतवीर्या निरुद्यमा भवन्तु पराभवं यान्त्वित्यर्थः । यतो वयं तान्सपत्नान् इन्द्राग्निभ्यां कृत्वा अवबाधामहे इन्द्राग्निबलेन नाशयामः । किं च वसवोऽष्टौ रुद्रा एकादश

आदित्या द्वादश एते मा मामेतादृशमक्रन् कुर्वन्तु । कीदृशमुपरिस्पृशम् उपरि स्पृशतीति उपरिस्पृक् तमुच्चस्थानस्थितम् । उग्रमुत्कृष्टम् । चेत्तारं ज्ञातारं ज्ञेयस्य । अधिराजम् अधिकश्चासौ राजा च अधिराजस्तम् अधिपतिमीश्वरं कुर्वन्त्वित्यर्थः ॥४६॥

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतꣳ सेधतं द्वेषो भवतꣳ सचाभुवा ॥४७॥

जगती अश्विदेवत्या । हे नासत्या नासत्यौ हे अश्विनौ त्रिभिः एकादशैः त्रिगुणैरेकादशभिः त्रयस्त्रिंशत्संख्याकैः देवेभिः देवैः इह स्थाने मधुपेयं सोमपानं प्रति आयातमागच्छतम् मधुः सोमस्तस्य पेयं पानम् । किं च आयुः प्रतारिष्टम् तरतिर्वृद्ध्यर्थः प्रवर्धयतम् । रपांसि पापानि निर्मृक्षतं निःशेषं शोधयतम् नाशयतमित्यर्थः । द्वेषः दौर्भाग्यं सेधतं षिधु गत्याम् गमयतं नाशयतम् । सचाभुवा भवतम् सचा इत्यव्ययं सहार्थे सचा सह भवतस्तौ सचाभुवौ ह्यिय् कार्येषु संयुक्तौ भवतम् । अष्टौ वसव इत्यादिना त्रयस्त्रिंशद्देवा गणिताः । तारिष्टम् तरतेर्लुङि मध्यमद्विवचनम् बहुलं छन्दस्यमाङ्योगेऽपीति [पा० ६.४.७५.] अडभावः । मृक्षतम् मृजूष् शुद्धौ लेटोऽडाटौ सिब्बहुलं लेटीति [पा० ३.१.३४.] सिप् तस्थस्थमिपामिति [पा० ३.४.१०१.] व्यत्ययेन थसः तमादेशः ॥४७॥

एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामिषं वृजनं जीरदानुम् ॥४८॥

मारुती त्रिष्टुप् हे मरुतः कारोः कर्तुर्यजमानस्य एषः स्तोमः इयं च गीः स्तुत्या च प्रिया च वो युष्मभ्यं युष्मदर्थं वर्ततेऽइति शेषः । किम्भूतस्य कारोः मान्दार्यस्य मां ममेति स्वस्वामिसम्बन्धं (14.) दारयति इति मान्दार्यः तस्य वीतरागस्येत्यर्थः । यद्वा मां दारयतीत्येवं यः शत्रूणां प्रत्ययमादधाति मान्दार्यः । यद्वा मन्दारः कल्पवृक्षः तत्तुल्यो मान्दार्यः तस्य अथ कामपूरकस्येत्यर्थः । मान्यस्य मानार्हस्य । किं च हे मरुतः यूयमिषा अन्नेन निमित्तेन आयासीष्ट आगच्छत किमर्थं वयां वयसाम् आमि टिलोप आर्षः बाल्ययौवनस्थाविराणां वयसां सम्ब-

न्धिन्वे तन्वे शरीराय सर्वदा शरीरस्थित्यर्थमित्यर्थः अस्मच्छरीरं दृढीकर्तुमिति भावः । किं च इषमन्नं वृजनं बलं च वयं विद्याम लभेमहि किम्भूतमिषं वृजनं च जीरदानुं जीवयतीति जीरदानुस्तम् जीविरौणादिको रदानु प्रत्ययः लोपो व्योर्वलीति [पा° ६.१.६६.] वलोपः जीवितदातृ बलमन्नं च वयं प्राप्नुयामेति प्रार्थना ॥४८॥

सꣳहस्तोमाः सꣳहछन्दस आवृतः सꣳहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन् ॥४९॥

ऋषिसृष्टिप्रतिपादिका त्रिष्टुप् । दैव्याः सप्त ऋषयः देवस्य प्रजापतेः इमे दैव्याः प्रजापतिप्राणाभिमानिनः सप्त ऋषयः भरद्वाजकश्यपगोतमात्रिवसिष्ठविश्वामित्रजमदग्निसंज्ञाः । अन्वालेभिरे सृष्टवन्तः सृष्टियज्ञमिति शेषः । किं कृत्वा पूर्वेषां पन्थां पन्थानमनुदृश्य अधस्तनकल्पोत्पन्नानामवसिताधिकाराणां मार्गं विलोक्य पूर्वकल्पोत्पन्नैर्ऋषिभिर्यथा सृष्टम् तथा सृष्टवन्त इत्यर्थः सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्युक्तेः । कथमिव रथ्यो न रश्मीन् नकार उपमार्थः रथे साधुः रथ्यः रथीर्यथा इष्टदेशप्राप्त्यर्थं प्रथमं रश्मीन्प्रग्रहानालभते स्पृशति सृजति वा तथा ते ऽपि सृष्टियज्ञं सृष्टवन्तः । किम्भूता ऋषयः सꣳहस्तोमाः स्तोमसहिताः । सꣳहछन्दसः छन्दोभिर्गायत्र्यादिभिः सहिताः । आवृतः अत्रापि सꣳहशब्दाध्याहारः आवृत्शब्देन कर्मोच्यते सꣳहावृतः कर्मसहिताः अङ्गासत्यप्रधानानां कर्मणामनुष्ठातारः । सꣳहप्रमाः प्रमाणं प्रमा तत्सहिताः शब्दप्रमाणपरीक्षणतत्पराः । धीराः धीमन्तः ॥४९॥

आयुष्यं वर्चस्यꣳ रायस्पोषमौद्गिदम् ।
इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु मामु ॥५०॥

तिस्रः उष्णिक्शक्वरीत्रिष्टुभः दक्षदृष्टाः । हिरण्यस्तुतिः । इदं हिरण्यं कनकं जैत्राय जयाय मामु मामेवाविशतात् आविशतु मयि तिष्ठतु । कीदृशमायुष्यमायुषे हितम् वर्चस्यं वर्चसे तेजसे हितम् रायो धनस्य पोषं पोषयितृ वर्धकम् औद्गि-

दम् उद्विनक्तीति उद्वित् उद्विदेवोद्विदमुद्वित्तृ धनस्य स्वर्गस्य वा प्रकाशकम् वर्चस्वत् अन्नसंयुक्तम् ॥५०॥

VI. न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत् ।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥५१॥

रक्षांसि पिशाचाश्च तत् हिरण्यं न तरन्ति न हिंसन्ति हि यस्मात् एतत् हिरण्यं देवानां प्रथमजमोजः प्रथमोत्पन्नं देवानां तेज एवेदम् । अत एव यो हिरण्यं दाक्षायणं बिभर्ति अलंकारत्वेन धारयति दाक्षायणशब्दोऽलंकारार्थः स देवेषु देवलोकेषु दीर्घमायुः कृणुते कुरुते देवलोके चिरं वसतीत्यर्थः स च मनुष्येषु मनुष्यलोकेषु (15.) स्वमायुर्दीर्घं कृणुते मनुष्यायुरतिक्रम्य जीवति ॥५१॥

यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्मऽआबध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासम् ॥५२॥

दाक्षायणाः दक्षस्यापत्यानि नडादित्वात्फक् दक्षवंशोत्पन्ना ब्राह्मणा यत् हिरण्यं शतानीकाय राज्ञे अबध्नन् बबन्धुः शतं बह्वनि अनीकानि सैन्यानि यस्य सः शतानीकस्तस्मै । किम्भूताः दाक्षायणाः सुमनस्यमानाः मनसि शोभनं ध्यायन्तः शोभनं मनः कुर्वन्ते सुमनस्यन्ते सुमनस्यन्ते सुमनस्यमानाः । तत् हिरण्यं मे मयि आबध्नामि किमर्थं शतशारदाय शतं शरदो जीवनाय । यथा येन प्रकारेण हिरण्यबन्धनाख्येन अहमायुष्मान्दीर्घजीवी जरदष्टिश्च आसं भूयासम् तथा आबध्नामि । जरत् जरामश्नुते व्याप्नोति जरदष्टिः यद्वा जरन्ती जरां प्राप्ता अष्टिः शरीरं यस्य स जरदष्टिः ॥५२॥

उत नोऽहिर्बुध्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥५३॥

बह्वृदेवत्या त्रिष्टुप् । उत अपि च अहिर्बुध्यः रुद्रविशेषः शृणोतु नः अस्माकं वचांसीति शेषः अज एकपात् रुद्रः प्राणो वा शृणोतु पृथिवी च शृणोतु

समुद्रश्च शृणोतु विश्वे देवाश्च शृण्वन्तु । श्रुत्वा च ते अहिर्बुध्न्यादयः अवन्तु पालयन्तु अस्मान् । किम्भूतास्ते ऋतवृधः सत्यवृधो यज्ञवृधो वा । हूयमाना आह्वयमानाः । मन्त्राः मन्त्रैरिति विभक्तिव्यत्ययः स्तुताः । कविशस्ताः मेधाविभिः पूजिताः ॥५३॥

इमा गिरः आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रोऽअर्यमा भगो नस्तुविजातो वरुणो दक्षोऽअꣳशः ॥५४॥

आदित्यदेवत्या त्रिष्टुप् । इमा गिरो वाचः जुह्वा स्रुचा कृत्वा आदित्येभ्यो जुहोमि स्तुतिलक्षणा वाणीर्बुद्धिरूपया स्रुचादित्येभ्यः समर्पयामीत्यर्थः । किम्भूता गिरः घृतस्नूः घृतं स्रुवन्ति स्रवन्ति (16.) ताः घृतस्रवः ता घृतस्नूः तुगभावश्चार्षः घृतप्रसारिणीर्घृतहोमसहचरिता वा । किम्भूतेभ्य आदित्येभ्यः सनात् चिरकालं राजभ्यः दीप्यमानेभ्यः । ताः स्रुचाह्वयमाना गिरो नोऽस्माकं गिरः शृणोतु कः मित्रः अर्यमा भगश्च । तुविजातो बहुजातः त्वष्टा वातो वा स हि बहुशः प्रज्ञायते । वरुणः दक्ष अंशश्च । एते सूर्यविशेषाः ॥५४॥

सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥५५॥

अध्यात्मवादिनी जगती । सप्त ऋषयः प्राणाः बह्वृचश्रवणरसनाघ्राणमनोबुद्धिलक्षणाः शरीरे प्रतिहिताः व्यवस्थिताः ते एव सप्त सदं सदाकालमप्रमादं सावधानं यथा तथा शरीरं रक्षन्ति । ते सप्त स्वपतो नरस्य लोकमात्मानमीयुः प्राप्नुवन्ति लोकशब्देन विज्ञानात्मा हृदयाकाशप्रतिष्ठ उच्यते । किम्भूताः सप्त आपः आप्नुवन्ति व्याप्नुवन्ति देहमित्यापः व्यापनाः । तत्र तस्यामृषीणां लोकगमनावस्थायां देवौ दीप्यमानौ प्राणापानौ जागृतः जागरणं कुर्वाते कीदृशौ अस्वप्नजौ न स्वप्नो निद्रा जायते ययोस्तौ अस्वप्नजौ । तथा सत्रसदौ सतां जीवानां त्राणं रक्षणं सत्रम् तत्र सीदतः तौ सत्रसदौ जीवितदातारावित्यर्थः ॥५५॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।

उप प्रयन्तु मरुतः सुदानव इन्द्रं प्राशूर्भवा सचा ॥५६॥

तृचो ब्रह्मणस्पतिर्देवतः द्वे बृहत्यौ तृतीया त्रिष्टुप् । हे ब्रह्मणो देवस्य पते पालक उत्तिष्ठ ऊर्ध्वः आरब्धकार्यो भव । यतो वयं देवयन्तो देवान्कामयमानाः त्वा त्वामीमहे याचामहे आगहीति । मरुतः भवत्तमागच्छन्तमुप समीपे प्रयन्तु आगच्छन्तु किम्भूताः मरुतः सुदानवः शोभनं ददति ते सुदानवः । हे इन्द्र त्वमपि सचा सह गमनाय प्राशूः प्रकर्षेण शीघ्रो भव ॥ देवान्कामयन्ते देवयन्ति ततः शतृप्रत्ययः सुप आत्मनः क्यच् [पा° ३.१.८.] न छन्दस्यपुत्रस्येति [पा° ७.४.३५.] निषेधात्क्यचि चेतीत्वाभावः [पा° ७.४.३३.] अश्वाघस्यादिति [पा° ७.४.३७.] अश्वाघयोरेवाकारविधानादकृत्सार्वधातुकयोरिति [पा° ७.४.२५.] दीर्घोऽपि न स्यात् । ईमहे याचतिकर्मसु पठितः [निघ° ३.१९.] ई गतौ दिवादित्वादागतस्य श्यनश्छान्दसो लोपः । सुदानवः दाभाभ्यां नुः [उणा° ३.३२.] । प्राशूः आशुशब्दो दीर्घश्छान्दसः । भवा संहितायां ब्रचोऽतस्तिङ इति [पा° ६.३.१३५.] दीर्घः ॥५६॥

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रोऽर्यमा देवा ओकांसि चक्रिरे ॥५७॥

ब्रह्मणस्पतिः नूनं निश्चितमुक्थ्यं शस्त्रयोग्यं मन्त्रं प्रवदति प्रकर्षेणोच्चारयति यस्मिन्मन्त्रे इन्द्रः वरुणः मित्रः अर्यमा अन्ये च देवाः ओकांसि निवासान् चक्रिरे कृतवन्तः । सर्वदेवाधारभूतं शस्त्रं पठनीयं मन्त्रवदित्यर्थः (17.) ॥५७॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥
य इमा विश्वा । विश्वकर्मा । यो नः पिता । अन्नपतेऽन्नस्य नो देहि ॥५८॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां चतुस्त्रिंशोऽध्यायः ॥३४॥ ॥

हे ब्रह्मणस्पते त्वं यतोऽस्य जगतो यन्ता नियन्ता अतः प्रार्थ्यते सूक्तस्यास्मदुक्तस्य साधुवचनस्य कर्मणि षष्ठी सूक्तम् बोधि बुध्यस्व अस्मदुक्ता स्तुतिर्भवता ज्ञायतामित्यर्थः । तनयं च अस्मदपत्यानि जिन्व प्रीणीहि जिन्वतिः प्रीतिकर्मा ।

देवा यत् भद्रं कल्याणमवन्ति पालयन्ति तत् विश्वं सर्वं भद्रमस्माकमस्त्विति शेषः । किं च सुवीराः कल्याणपुत्राः सन्तो वयं विदथे यज्ञे बृहत् महत् वदेम दीयतां भुज्यतामित्यादि उच्चारयेम ॥ अथ चतस्रः कण्डिकाः प्रतीकोक्ताः य इमा विश्वा भुवनानि जुह्वत् [१७.१७.] विश्वकर्मा विमनाः [१७.२६.] यो नः पिता [१७.२७.] अन्नपतेऽन्नस्य नो देहि [११.८३.] इति । ता ब्रह्मयज्ञेऽध्येयाः ॥५८॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । चतुस्त्रिंशोऽयमध्यायो ब्रह्मयज्ञार्थको ऽगमत् ॥३४॥

अथ काण्वशाखायां पाठविशेषः ।

I. ॥ १ (18.) ॥१॥ ७ ॥२॥ ८ ॥३॥ १०-१४ [इलां°] - १५ [इलां° - वोल्कंवे] - २० [अषाल्कं] - २३ [गऽइष्टौ] - २६ [सुमृलीकः] - ३१ ॥४-२५॥ ॥

II. ॥ ३२ ॥२६॥ ३३ ॥२७॥ ३५ ॥२८॥ ४१ ॥२९॥ ४२ [भ्यानल°] - ५८ ॥३०-४६॥ ॥ अनुवाकयोः षट्चत्वारिंशत् ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥

I. a. अपेतो यन्तु पणयोऽसुम्ना देवपीयवः । अस्य लोकः सुतावतः ॥

b. युभिरक्तोभिरक्तुभिर्व्यक्तं यमो ददाववसानमस्मै ॥१॥

त्रयस्त्रिंशेऽध्याये सर्वमेधसम्बन्धिनः कियतो मन्त्रानुक्त्वा प्र वायुमच्छेत्यारभ्य [३३.५५.] अनारभ्याधीतान्मन्त्रानुक्त्वा (1.) चतुस्त्रिंशेऽध्याये तानेव समाप्येदानीं पञ्चत्रिंशेऽध्याये पितृमेधसम्बन्धिनो मन्त्रा उच्यन्ते स च पितृमेधो मृतस्य वर्षास्मरणे भवति वर्षस्मृतौ तु विषमवर्षेषु भवति एकतारकनक्षत्रे चित्रादौ दर्शे वा ग्रीष्मे शरदि माघे भवति ॥ पितृमेधं करिष्यता द्विजेन कुम्भेऽस्थिसंचयः कार्यः । मृतस्य च यावतोऽमात्यपुत्रपौत्रास्तावतः कुम्भाः कर्मदिने आनेयाः कुम्भेभ्योऽधिकानि हृत्वाणि च । ततोऽरण्ये कुम्भे कृतमस्थिसंचयनं ग्रामसमीपे समानीय शय्यायां कुम्भं संस्थाप्याहृतवस्त्रैकदेशेन संवेष्य लोहमयवादित्रेषु वाद्यमानेषु वीणायां च

वाद्यमानायां मृतस्य पुत्रपौत्रा उत्तरोत्तरैर्व्यञ्जनैश्चास्थिकुम्भं वीक्षयन्तस्त्रिस्त्रिः प्रदक्षिणं परियन्ति । स्त्रियोऽपीति केचित् । रात्रेः पूर्वमध्यापरभागेषु तद्दिने वक्ष्यमाणदानं कुर्वन्ति नृत्यगीतवादित्राणि च कारयन्ति अस्थिकुम्भायान्नमुपकल्पयन्ति च । तत उपप्रातरस्थिकुम्भसहिताः पूर्वोक्तान्कुम्भान् क्षुत्राणि चादाय ग्रामाद्दक्षिणस्यां बहिर्गच्छन्त्यधर्युयजमानामात्याः । श्मशानान्तं (2.) कर्म कुर्वतो यथा रविरुदयेत्तथा रात्रावारब्धव्यम् तत्र वने गत्वा ग्रामान्मार्गादश्वत्थतिल्वककरिरुस्फूर्जकविभीतकक्षेप्मान्तककोविदारादिभ्यश्च दूरे अन्यवृक्षगुल्मादिवृते ऊषरे वोदक्प्रवणे दक्षिणप्रवणे समे वा सुखकारिणि रम्ये वनाद्वृक्षाद्वा पूर्वभागे उत्तरभागे वा वर्तमाने गर्तवति वीरणतृणवति प्रदेशे श्मशानार्थं दिक्कोणं पुरुषप्रमाणं क्षेत्रं मिमीते । पितृक्यां द्विपुरुषं समचतुरस्रं कृत्वा करणीमध्येषु शङ्कवः स समाधिरिति शुल्वोक्तविधिना [यजुःपरिशिष्ट° ७. २.] तच्चतुरस्रमुत्तरतः पश्चाच्च पृथु भवति । तत्र साधनप्रकारः पूर्वदक्षिणपार्श्वयोर्नवाङ्गुलानि स्वत्रयोदशांशेनाङ्गुलचतुर्थभागसहितानि पुरुषप्रमाणमध्ये न्यूनानि कार्याणि (3.) पश्चिमोत्तरपार्श्वयोस्तावन्ति पुरुषप्रमाणादधिकानि (4.) तथाहि पुरुषमात्रक्षेत्रस्याद्गुलाया प्राचीं कृत्वा तत्प्रान्तयोः शङ्कू निखाय सार्धाष्टदशाङ्गुलहीनां पुरुषद्वयप्रमाणामुभयतःपाशां रज्जुं मध्यमदेशे सल्लक्षणां कृत्वा पूर्वापरयोः शङ्कोस्तस्याः पाशौ प्रतिमुच्य मध्यलक्षणेन दक्षिणत आयम्य दक्षिणः कोणः साधनीयः ततः सार्धाष्टदशाङ्गुलाधिकां पुरुषद्वयप्रमाणां रज्जुमुभयतःपाशां मध्यलक्षणयुतां कृत्वा शङ्कोः पाशौ प्रतिमुच्य मध्यलक्षणेनोत्तरत आयम्योत्तरकोणः साध्य इति । ततः पूर्वादिकोणेषु पालाशशमीवारणाश्ममयाश्चत्वारः (5.) शङ्कवो निखेयाः । एतत्कुर्वतां (6.) निकटे कश्चिद्यजमानपुरुषस्तृणपूलकमुक्षित्य (7.) धारयेत् । कर्मसमाप्तौ गृहमागत्य तं गृहेषूक्षयेत् (8.) प्रजावृद्धौ । इत्यादि बोध्यम् ॥ कात्यायनः [२१. ३. ३२.] अपसलवि सृष्टया रज्ज्वा परितन्यापेतो यत्त्विति पलाशशाखया व्युदूहतीति । अपसलवि अप्रादक्षिण्येन निष्पादितया रज्ज्वा तत्क्षेत्रं समन्तादप्रदक्षिणं संवेष्यापेतो यत्त्विति मन्त्रेण क्षेत्रमध्यपतितं तृणपर्णादिकं पलाशशाखया कृत्वा क्षेत्राद्बहिर्निःकाशयतीति सूत्रार्थः ॥ अस्याध्यायस्य पितरो देवता आदित्या ऋषयो देवा वा । आद्या गायत्री ।

पणन्ति परद्रव्यैर्व्यवहरन्तीति पणयोऽसुराः इतोऽपयन्तु अपगच्छन्तु व्यवहिताश्चेति [पा° १.४.८२.] उपसर्गस्य यत्त्विति क्रियापदेन व्यवधानम् । किम्भूताः पणयः असुम्नाः सुम्नमिति सुखनाम [निघ° ३.६.] नास्ति सुम्नं येभ्यस्ते असुखकराः । तथा देवपीयवः पीयतिर्हिंसाकर्मा देवान्पीयन्ति हिंसन्ति ते देवपीयवः देवद्विषः । किमित्यसुराणामपगमोऽर्थ्यते तत्राह अस्य लोकः अस्य यजमानस्यास्थिभूतस्यायं लोकः स्थानम् किम्भूतस्यास्य सुतवतः सोमाभिषवं कृतवतः सुषावेति सुतवान् तस्य षुञ् अभिषवे क्तवतुप्रत्ययान्तः अश्वरश्मिमतिसुमतीत्यादिना प्रातिशाख्यसूत्रेण [३.६.२.] संहितायां सुतशब्दस्याकारे दीर्घः ॥ द्युभिरक्तोभिरिति यजुः । यमोऽस्मै यजमानायावसानं ददातु अवस्यत्यस्मिन्नित्यवसानं स्थानम् किम्भूतं द्युभिर्ऋतुभिः अक्तोभिः दिवसैः अक्तुभिः रात्रिभिश्च व्यक्तं स्पष्टीकृतम् द्युशब्देन श्रुतौ ऋतव उक्ताः तदेनमृतुभिश्चाक्तोरात्रैश्च सल्लोकं करोतीति श्रुतेः [१३.८.२.३.] । ऋत्वाद्यधिष्ठातृदेवताभिः प्रकटितमस्मै यमो ददात्वित्यर्थः ॥१॥

सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु । तस्मै युज्यतामुस्रियाः ॥२॥

का° [२१.३.३४.] औडुम्बरसीरेऽउत्तरतो वा षड्वे युज्यमाने युङ्क्ते सम्प्रेष्य सविता तऽइति जपतीति । ततोऽधर्युस्तां पलाशशाखां दक्षिणास्यां निरस्य परिश्रिद्विर्वेष्टयित्वा तत्क्षेत्रस्य दक्षिणत उत्तरतो वा षड्भिरनड्वद्भिः सीरं युनक्ति तस्मिन्युज्यमाने युङ्क्ते सम्प्रेष्य सवितेति मन्त्रं जपति ॥ गायत्री । हे यजमान सविता सूर्यः ते तव शरीरेभ्यः शरीराणां विभक्तिव्यत्ययः पृथिव्यां लोकं स्थानमिच्छतु सवित्रनुज्ञां विना न केनापि स्थातुं शक्यते । द्वितीयं वाक्यमाह तस्मै इति तस्मै सवित्रा दत्ताय क्षेत्राय संस्कारार्थम् उस्रियाः अनड्वाहो युज्यतां युक्ता भवतु ॥२॥

a. वायुः पुनातु । b. सविता पुनातु । c. अग्नेर्भ्राजसा ।

d. सूर्यस्य वर्चसा । e. विमुच्यतामुस्रियाः ॥३॥

का° [२१.४.१.२.] अनुरज्जु चतस्रः सीताः कृषति वायुः पुनात्विति प्रतिमन्त्रमुत्तरतः प्रतीचीं प्रथमामिति । अधर्युः परितो वेष्टितां रज्जुमनुलक्षीकृत्य वायुः

पुनाविति प्रतिमल्लं पादेन-पादेन चतस्रः सीताः अप्रदक्षिणं कृषति तत्र प्रथमां सीतामुत्तरपार्श्वे प्रतीचीं कृषति दक्षिणतः सीरयोजनपक्षेऽपि तत्सीरमप्रदक्षिणमुत्तरत आनीय प्रथममुत्तरत एव कृषति । तदपसलवि पर्याकृत्योत्तरतः प्रतीचीं प्रथमां सीतां कृषति वायुः पुनाविति सविता पुनाविति जघनार्धेन दक्षिणाग्नेर्भ्राजसेति (9.) दक्षिणार्धेन प्राचीं सूर्यस्य वर्चसेत्यग्नेर्दीचीमिति [१३. ८. २. ६.] श्रुतेः ॥ चत्वारि यजूंषि लिङ्गोक्तदेवतानि । हे पृथिवि वायुः त्वां पुनातु विदारयतु सूर्यः त्वां पुनातु अग्नेर्भ्राजसा दीप्त्या सूर्यस्य वर्चसा तेजसा च त्वां विदारयतु ॥ का° [२१. ४. ४.] अनडुहो विमुच्य विमुच्यन्तामिति । एवं पूर्वोक्तचतुर्मन्त्रैः पार्श्वचतुष्के कर्षणं कृत्वा मध्येऽपि सर्वं क्षेत्रं यथा कृष्टं भवति तथा परिमिताः सीताः कृत्वा वृषभान्सीराद्विमुञ्चति ॥ यजुः वृषदेवतम् । उस्रा धेनुः तदपत्यानि उस्रियाः अनड्वाहो विमुच्यन्तां सीराद्वियुज्यन्ताम् ॥ ३ ॥

अश्वत्थे वो निषदनं प° ॥ ४ ॥

का° [२१. ४. ४.] दक्षिणा सीरं निरस्याश्वत्थे व इति सर्वौषधं वपतीति । हलं दक्षिणादिशि तूष्णीं प्रक्षिप्य कृष्टक्षेत्रमध्ये सर्वौषधं वपति ॥ अनुष्टुप् व्याख्याता [१२. ७१.] ॥ ४ ॥

सविता ते शरीराणि मातुरुपस्थऽआवपतु । तस्मै पृथिवि शं भव ॥ ५ ॥

का° [२१. ४. ५.] सविता तऽइति शरीराणि निवपति मध्ये इति । तस्य पुरुषमात्रस्य क्षेत्रस्य मध्ये शरीराणि मृतस्यास्थीनि राशीकरोति एतच्च सूर्योदयकालं कर्तव्यम् यथा कुर्वतोऽभ्युदियादिति [१३. ८. ३. २.] श्रुतेः ॥ गायत्री सवितृदेवत्या । हे यजमान सविता सूर्यः ते तव शरीराणि अस्थीनि मातुः पृथिव्याः उपस्थे उत्सङ्गे आवपतु स्थापयतु । हे पृथिवि भूमि तस्मै सवित्रोप्तायास्थिरूपाय यजमानाय शं भव सुखरूपा भव ॥ ५ ॥

प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ।
अप नः शोशुचदघम् ॥ ६ ॥

ऽस्थिक् प्रजापतिदेवत्या अस्थिनिवापे एव विनियुक्ता । असाविति नामग्रहणम् अनुदात्तत्वादामन्त्रितम् हे देवदत्त ऽपोदके उदकसमीपवर्तिनि लोके स्थाने प्रजापतौ देवतायां त्वां निदधामि स्थापयामि । स प्रजापतिर्नोऽस्माकमघं पापं शोशुचत् अत्यर्थं दहतु शुच शोके यङ्लुगन्तं रूपम् ॥ ६॥

परं॑ मृत्योऽअनु॒ परे॑हि॒ पन्थां॒ यस्ते॑ऽअ॒न्य इ॒तरो॑ देव॒यानात्॑ ।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि॒ मा नः॑ प्र॒जाꣳ रीरिषो॑ मोत वी॒रान् ॥ ७॥

का॰ [२१. ४. ७.] प्रत्यागते परं मृत्यविति ऽपतीति । दक्षिणां गत्वानुकूसन्कुम्भं प्रक्षिप्यैहीति कश्चिद्विप्रः प्रेषितोऽस्ति तस्मिन्कुम्भं क्षिप्त्वा प्रत्यागते सति यजमानोऽध्वर्युर्वा ऽपति ॥ मृत्युदेवत्या त्रिष्टुप् संकसुकदृष्टा । हे मृत्यो परा परामुखो भूत्वा परमन्यं पन्थां पन्थानं मार्गमन्विहि अनुगच्छ । तमेव दर्शयति यस्ते तव त्वदीयः पन्था देवयानात्पथः इतरः तुच्छः अन्यः पितृयानाख्यः देवा यान्ति यस्मिन्स देवयानः । किं च चक्षुष्मते ज्ञानिने शृण्वते च ते तुभ्यं मृत्यो किंचिद्ब्रवीमि वदामि आदरार्थं वचनम् न हि तस्यादृष्टमश्रुतं वास्ति षष्ठ्यर्थे चतुर्थ्यौ चक्षुष्मतः शृण्वतस्तव वदामि किम् हे मृत्यो नोऽस्माकं प्रजां संततिं वंशपरम्परां मा रीरिषः मा हिंसीः रिष वधे स्वार्थे णिजन्तस्य लुङि रूपम् उत अपि च वीरान्पुत्रान्मा हिंसीः ॥ ७॥

शं वा॑तः शꣳ हि ते॒ घृणिः॑ शं ते॑ भवन्त्विष्ट॒काः ।
शं ते॑ भवन्त्व॒ग्नयः॑ पार्थि॒वासो॒ मा त्वाभि॑ शू॒शुच॑न् ॥ ८॥

का॰ [२१. ४. ८.] शं वात इति यथाङ्गं कल्पयित्वेष्टकां (10.) निदधाति मध्ये तूष्णीमिति शं वात इति मन्त्रद्वयेन तानि मध्ये न्युप्तान्यस्थीनि यथाङ्गं कल्पयित्वा यदस्थि यस्याङ्गस्य तेनास्थ्ना तदङ्गकल्पनया प्राक्शिरसं पुरुषाकृतिं कृत्वा तन्मध्ये पादमात्रीमिष्टकां तूष्णीं निदधाति ॥ द्वे ऋचावनुष्टुब्बृहत्यौ विश्वेदेवदेवते । हे यजमान वातो वायुस्ते तव शं सुखरूपो भवतु । हि पुनः घृणिः सूर्यकिरणाः ते तव शं सुखरूपो भवतु । इष्टका मध्ये प्रतिदिशं च तिस्रस्तिस्रः प्रक्षिप्तास्ते तव

शं सुखरूपा भवन्तु । अग्नयश्च ते शं भवन्तु । पार्थिवासः पृथिव्यां भवाश्चाग्नयः त्वा त्वां माभिशूशुचन् मा शोचयन्तु अभितापयन्तु ॥ ८ ॥

कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः ।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥ ९ ॥

दिशः [ते] तुभ्यं त्वदर्थं कल्पन्तां क्लृप्ता भवन्तु आपो जलानि तुभ्यं शिवतमाः कल्याणकारिण्यो भवन्तु सिन्धवः समुद्राश्च शिवतमास्तुभ्यं भवन्तु । अन्तरिक्षमाकाशं तुभ्यं शिवं कल्याणकारि भवतु सर्वाः दिशः ते तुभ्यं कुल्पन्ताम् । आदरार्थं कार्त्स्न्यार्थं वा पुनर्वचनम् ॥ ९ ॥

अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः ।
अत्रा जहीमोऽशिवा येऽअसञ्छिवान्वयमुत्तरेमाभि वाजान् ॥ १० ॥

का° [२१.४.२१.] अध्यधिगङ्कल्यश्मन्वतीरिति । गर्तान्मृदमानीय पूर्ववर्हदिग्भ्यः कृष्ट्वा वा मृदमानीय तत् श्मशानं विप्रस्य मुखमितं क्षत्रस्योरोमितं वैश्यस्योरुमितं स्त्रिया भगमितं शूद्रस्य जानुमितं सर्वेषां वा जानुमितं मृदा कृत्वा शैवलैः कुशैश्च प्रच्छाद्य तद्दक्षिणतो गर्तौ खात्वा क्षीरोदकाभ्यां सम्पूर्य श्मशानोत्तरे सप्त गर्तान्खात्वा दक्षिणोत्तरान्जलेन सम्पूर्योत्तरगर्तेषु अर्धर्युयजमानामात्यास्त्रीन्पाषाणान्प्रक्षिप्याश्मन्वतीरिति (11.) मन्त्रेण तद्गर्तोपरि गच्छन्ति ॥ विश्वदेवदेवत्या त्रिष्टुप् सुचीकदृष्टा । हे सखायः मित्राणि एषा अश्मन्वती पाषाणवती नदी रीयते गच्छति री गतौ दिवादिः आत्मनेपदी अतो यूयं संरभध्वमुत्तरणाय प्रयतध्वम् । उत्तिष्ठत अभिमुखा भवत प्रतरत प्रकर्षेण तां नदीं तरत । किमिति यतोऽत्र प्रदेशे ये अशिवाः अशान्ता दुष्टा राक्षसादयः असन् स्युः तान्वयं जहीमः परित्यजामः तेषु त्यक्तेषु शिवान् सुखकरान्वाजानन्नविशेषान्वयमुत्तरेम प्राप्नुयाम ॥ १० ॥

II. अपाघमप किल्बिषमप कृत्यामपो रपः ।
अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥ ११ ॥

का° [२१.४.२२.] अपाघमित्यपामार्गैरपमृजतऽइति । ते अमात्या यज्ञोपवीति-

नो भूत्वाप उपस्पृश्य हस्तगृहीतैरपामार्गैः स्वशरीरं शोधयन्ते अपामार्गवीजैरुद्वर्तयन्तीति केचित् ॥ लिङ्गोक्तदेवतानुष्टुप् शुनःशेपदृष्टा दुःस्वप्ननाशनी । हे अपामार्ग त्वमस्मत् अस्मत्तः सकाशाद्यं मानसं पापमपसुव षू प्रेरणे अपगमयेत्यर्थः । किल्विषं कीर्तिभेदकं कायिकं च पापमपसुव । कृत्यां परकृतमभिचारमपसुव । अप उ रपः रपो रिप्रमिति पापनामनी भवत इति [निरु° ४.२१.] यास्कः रपः पापं वाचिकं च अपसुव उ चार्थे । दुःस्वप्न्यम् (12.) दुष्टः स्वप्नो दुःस्वप्नः तत्र भवं दुःस्वप्नोत्थमसुखरूपं फलं चास्मत्तोऽपसुव ॥११॥

सुमित्रिया न आप ओषध° ॥१२॥

का° [२१.४.२३.] सुमित्रिया न इति स्नात्वाकृतवाससोऽनड्वत्युक्षमन्वारभ्यानड्वाहमित्युद्वयमित्यागच्छन्तीति । सुमित्रिया इति मन्त्रेण स्नात्वा नूतनवस्त्राणि परिहितवन्तोऽनड्वाहमिति मन्त्रेण वृषपुङ्क्षमन्वारभ्य उद्वयं तमिति (13.) मन्त्रेण यजमानामात्या ग्राममागच्छन्ति यद्यप्यत्र सुमित्रिया इति मन्त्रेण स्नानमुक्तं तथापि सुमित्रिया इत्यपोऽञ्जलिनादाय दुर्मित्रिया इति द्वेष्यं परिषिञ्चतीति [का° १२.५.१५.] द्वयं विधेयम् । दुर्मित्रिया - - द्विष्म इति यामस्य दिशं द्वेष्यः स्यात्तां दिशं परासिञ्चेत्तेनैव तं पराभावयतीति [१३.८.४.५.] श्रुतिः ॥ व्याख्याता [६.२२.२०,१९.] ॥१२॥

अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये ।
स न इन्द्र-इव देवेभ्यो वक्षिः संतरणो भव ॥१३॥

अनुष्टुप् अनड्वद्देवत्या उत्तरोऽर्धर्चः प्रत्यक्षकृतः ततः सर्वनाम्नोऽध्याहारेण सामर्थ्यम् वयं यमनड्वाहमन्वारभामहे आलभामहे स्पृशामः किम्भूतं सौरभेयं सुरभ्याः अपत्यम् स्त्रीभ्यो ढगिति [पा° ४.१.१२०.] ढक् । किमर्थं स्वस्तये अविनाशाय । हे अनड्वन् स त्वं नोऽस्माकं संतरणः तारको दुःखनाशको भव । किं च त्वं वक्षिः देवानां वोढा । तत्र दृष्टान्तः देवेभ्यः इन्द्र इव इन्द्रो यथा देवार्थं तारको भवति ॥१३॥

उद्वयं तमसस्परि स्वः प° ॥१४॥

उद्वयं तमिति (13.) ग्राममागच्छन्ति । व्याख्याता [२०.२१.] ॥१४॥

इ॒मं जी॒विभ्यः॑ परि॒धिं द॑धामि॒ मैषां॑ नु गा॒दप॑रोऽअ॒र्थमे॒तम्॑ ।
श॒तं जी॒वन्तु॑ श॒रदः॑ पु॒रूची॒रन्त॑र्मृ॒त्युं द॑धतां पर्व॒तेन॑ ॥ १५ ॥

का॰ [२१.४.२४.] ग्रामश्मशानान्तरे मर्यादालोष्टं निदधातीमं जीविभ्य इति । स्वनिवासग्रामस्य श्मशानस्य च मध्ये मर्यादालोष्टं मक्तरं मृत्खण्डमध्वर्युरेव निदधाति ॥ मनुष्यदेवत्या त्रिष्टुप् संकसुकदृष्टा । जीवेभ्यः विद्यमानजन्त्वर्थमिमं परिधिं मर्यादां दधामि स्थापयामि कथमिति चेत् एषां जीवानां मध्ये अपरः कश्चित् नु क्षिप्रं वेदोक्तादायुषोऽर्वाक् एतमर्थं (14.) पितृलोकगमनलक्षणं कार्यमुद्दिश्य मा गात् मा गच्छतु । एते जीवाः शतं शरदः जीवन्तु शतवर्षायुषो भवन्तु । किम्भूताः (15.) शरदः पुरूचीः पुरु बहु अञ्चन्तीति पुरूच्यः दानाध्ययनयागानुकूलाः । किं च (16.) पर्वतेन लोष्टेनैव मृत्युमन्तर्दधताम् मृत्युमन्तर्हितं कुर्वन्तु एते जीवाः ॥ १५ ॥

अग्न॒ऽआयू॑ꣳषि पव॰ ॥ १६ ॥

का॰ [२१.४.२५.] आञ्जनाभ्यञ्जने कृत्वोपासनं परिस्तीर्य वारणान्परिधीन्परिधाय वारणेन स्रुवेणैकामाकृतिं जुहोत्यग्नऽआयू॑ꣳष्यायुष्मानग्नऽइति । कज्जलादिना नेत्राञ्जनमाञ्जनम् तैलेन पादाञ्जनमभ्यञ्जनम् तद्द्वयं कृत्वा औपासनं कर्तुरावसथ्याग्निं दर्भैः परिस्तीर्य वारणवृक्षावयवांश्चतुरः परिधींश्चतुर्दिक्षु तूष्णीमेव परिधाय वारणेन स्रुवेणैकामाकृतिं जुहोति ऋग्द्वयेन । औपासनः प्रेतस्यैव तस्यैवाद्वारेण (17.) निरसनीयत्वादिति हरिस्वामिनः कर्तुरेवौपासने होमस्तस्यैकदेशनिरसनमिति कर्कादयः ॥ व्याख्याता [११.३८.] ॥ १६ ॥

आयु॑ष्मानग्ने ह॒विषा॑ वृधा॒नो घृ॒तप्र॑तीको घृ॒तयो॑निरेधि ।
घृ॒तं पी॒त्वा मधु॒ चारु॒ गव्यं॑ पि॒तेव॑ पु॒त्रमभि॑रक्षतादि॒मात्स्वाहा॑ ॥ १७ ॥

अग्निर्देवत्या त्रिष्टुब्वैषानसदृष्टा । हे अग्ने त्वमेवम्भूत एधि भव किम्भूतः आयुष्मान् चिरंजीवी । तथा हविषा वृधानः वर्धतेऽसौ वृधानः बहुलं छन्दसीति [पा॰ २.४.७३.] शानचि शपो लुक् । तथा घृतप्रतीकः घृतं प्रतीकं मुखं यस्य ।

घृतयोनिः घृतं योनिरुत्पत्तिस्थानं यस्य उत्तरवेद्याधारणाभिप्रायमेतत् । स त्वं गव्यं गोसम्बन्धि घृतं पीत्वा इमान् जीवान् अभिरक्षतादभिरक्ष तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति [पा° ७.१.३५.] ह्येस्तातङ्ङादेशः । तत्र दृष्टान्तः पिता पुत्रमिव यथा पिता पुत्रं रक्षति । किम्भूतं घृतं मधु मधुरं चारु सुगन्धि स्वाहा सुकृतमस्तु ॥ १७ ॥

परीमे गामनेषत पर्यग्निमक्रषत ।

देवेष्वक्रत श्रवः क इमाँ२॥ऽआदधर्षति ॥ १८ ॥

का° [२१.४.२६.] अथैषां परिदां वदन्ति परीमे गामनेषतेति । अध्वर्युर्यजमानामात्यानां परिदाम् परिदा रक्षणम् तत्संज्ञं मन्त्रं वदति दाङ् पालने परिदीयते समन्ताद्रक्ष्यतेऽनेनेति परिदाः रक्षणः तम् ॥ इन्द्रदेवत्यानुष्टुप् भरद्वाजात्मजशिरिम्बिठदृष्टा । इमे जीवाः गामनड्वाहं पर्यनेषत परिणीतवन्तः अनडुत्पुच्छालभनाभिप्रायम् नयतेर्लुङि तङि सिचि प्रथमबहुवचने रूपम् व्यवहिताश्चेति [पा° १.४.८२.] परेर्व्यवधानं क्रियापदेन । इमे जीवाः अग्निं च पर्यक्रषत परिक्रतवन्तः यस्मिन्नग्नावेतत्कर्म कृतं तं परिजक्रुः अद्धारेणोपासनं निरस्यतीत्येतदभिप्रायम् । इमे देवाः दीव्यन्ति कर्मसु दीप्यन्ते ते देवाः ऋत्विजः तेषु श्रवः धनं दक्षिणालक्षणमक्रत कृतवन्तः अक्रषतेति प्राप्ते सिचो लोपे अक्रतेति रूपम् । अत एतैः कर्मभिः कृतकृत्यानिमान् जीवान् को नाम आदधर्षति आधर्षयितुं पराभवितुं शक्नुयात् अशक्यप्रतिक्रिया एते ज्ञाता इति भावः ॥ १८ ॥

क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।

इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १९ ॥

का° [२१.४.२७.] अद्धारेणोपासनं निरस्यति क्रव्यादमिति । आकृतिहोमानन्तरं यत्र स्रुतं तस्योपासनस्यैकशेषं निरस्यति प्रेतस्यैवोपासन इति पक्षे सर्वमपि निरस्यति ॥ अग्निर्देवत्या त्रिष्टुप् दमनदृष्टा । येन पुरुषो दह्यते स क्रव्यात् तं क्रव्यादमग्निमहं दूरम् अपुनरागमनाय प्रहिणोमि प्रेषयामि स प्रहितः क्रव्यादग्निः यमराज्यं गच्छतु यमस्य राज्यं प्रति व्रजतु किम्भूतः रिप्रवाहः रिप्रमिति पापनाम

[निरु° ४.२१.] क्षिप्रं पापं वक्ति नाशयति क्षिप्रवाक्‌ः ॥ का° [२१.४.२८.] इहैवायमिति ब्रूयात् । यजमानो ब्रूयात् ॥ अयमितरः क्रव्यादादन्यो जातवेदाः जातप्रज्ञानोऽग्निः इहैवास्मिन्नेव गृहे सदने देवेभ्योऽर्थाय हव्यं हविः वक्तु प्रापयतु किं कुर्वन् प्रजानन् स्वाधिकारं जानानः ॥ ॥ इति पितृमेधः समाप्तः । उपधानासन्दीवृषभयवानजीर्णान् तद्दक्षिणात्वेन दद्यात् इहन्हेमाद्यपि दद्यात् ॥ ११ ॥ ॥

वक्ं वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके ।
मेदसः कुल्या उप तांस्स्रवन्तु सत्या एषामाशिषः संनमन्ताꣳ स्वाहा ॥२०॥

जातवेदोदेवत्या त्रिष्टुप् । अस्या विनियोगः श्रौतसूत्रे नास्ति । गृह्यसूत्रेऽस्ति तथा हि [पारस्कर° ३.३.] मध्यमा गवा तस्यै वपां जुहोति वक्ं वपां जातवेदः पितृभ्य इति अस्यार्थः मध्यमाष्टका गोपशुना कार्या तस्या धेनोर्वपां जुहोति वक्ं वपामिति मन्त्रेणेत्यर्थः ॥ हे जातवेदः जातं वेदो धनं यस्मात्स जातवेदाः तत्सम्बोधने हे जातवेदः पितृभ्योऽर्थाय त्वं वपां धेनुसम्बन्धिनीं चर्मविशेषत्वं वक्ं प्रापय । पराके पराक्काले दूरेऽपि यत्र यस्मिन्देशे निहितान् स्थापितानेनान्वितॄन् (18.) त्वं वेत्थ जानासि तत्र वक्तीत्यर्थः । तस्याः वपायाः निःसृत्य मेदसः धातुविशेषस्य कुल्याः नद्यः तान्वितॄन्प्रति उपस्रवन्तु प्रसरन्तु । किं च एषां दातॄणामाशिषः मनोरथाः सत्याः अवितथाः संनमन्तां प्रह्वीभवन्तु । स्वाहा सुहुतमस्तु स्वाहेति ऋग्भिन्नं यजुः ॥ २० ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥
अप नः शोशुचदघम् ॥ २१ ॥

पृथिवीदेवत्या गायत्री मेधातिथिदृष्टा यजुरुक्ता । अस्या अपि श्रौते विनियोगो नास्ति स्मार्ते स्वस्तारारोहणे शयने (19.) विनियोगः तथा हि [पारस्कर° ३.२.] स्योना पृथिवि नो भवेति दक्षिणपार्श्वेः प्राक्शिरसः संविशन्तीति ॥ हे पृथिवि त्वं नोऽस्माकं स्योना सुखरूपा भव । किम्भूता त्वम् अनृक्षरा ऋक्षरः कण्टकः ऋक्षतेः कण्टकः कृन्तपो वा कण्टतेर्वा कृन्ततेर्वा स्यादृतिकर्मण इति [निरु° १.३२.] यास्कः तद्रहिता चौरदायादादिदुःखनिवृत्त्यर्थम् न सन्ति ऋक्षराः कण्टकाः दुःखदायिनो यस्यां

सा अनृक्षरा । तथा निवेशनी निविशन्ति जनाः यस्यां सा निवेशनी साधुप्रतिष्ठाना करणाधिकरणयोश्चेति [पा° ३.३.११७.] ल्युट् । तथा सप्रथाः प्रथनं प्रथः विस्तारः प्रथसा सह वर्तमाना सप्रथाः सर्वतः पृथुः । किं च नोऽस्मभ्यं शर्म शरणं यह देहि ॥ अतः परं यजुः तद्विनियोगो गृह्यसूत्रे सम्बन्धिमरणनिमित्ते स्नाने जलापनोदने तथा हि [पारस्कर° ३.१०.] सव्यस्थानामिकया अपनोद्याप नः शोशुचदघमिति । इदं जलं नोऽस्माकमघं पापमपशोशुचत् अपशोचयतु दहतु ॥२१॥

अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहा ॥२२॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां पञ्चत्रिंशोऽध्यायः ॥३५॥ ॥

का° [२५.७.३७.] आहुतिं जुहोति पुत्रो भ्रातान्यो वा ब्राह्मणोऽस्मात्त्वमधि जातोऽसीति । साग्निकस्य पात्रप्रतिपत्त्यर्थे दाहात्पूर्वमाज्याहुतिं (20.) पुत्रादिर्जुहोति ॥ अग्निदेवत्या गायत्री अनिरुक्ता । हे अग्ने त्वमस्मात् यजमानात् आधानकाले अधिजातोऽसि (21.) उत्पन्नोऽसि अतोऽयं यजमानः पुनः त्वत् त्वत्तः जायतामुत्पद्यताम् । असाविति विशेषनामवचनः (22.) तथा हि देवदत्तः स्वर्गाय लोकाय स्वर्गलोकप्राप्त्यर्थं त्वत्तो जायतां त्वदंश्य एव भवत्विति भावः । स्वाहा सुहुतमस्तु ॥२२॥ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । पञ्चत्रिंशोऽयमध्यायः पितृमेधाभिधोऽगमत् ॥३५॥ ॥

अथ काण्वशाखायां पाठविशेषः ।

I. ॥ ३१. १-५ [विराल°] - १६ ॥१-१६॥ ॥

II. ॥ ३१. १७-२२ [पल्यो॑ऽअहो°] ॥१७-२२॥ ॥

III. ॥ ३२. १ [तदापस्तत्प्रजा°] ॥२३॥ २ ॥२४॥ ३ - °गर्भ इत्येषः ॥२५॥
४ । यस्मान्न जात इत्येषः ॥२६॥ ८ [एकनीलम्] - १६ ॥२७-३५॥ ॥

IV. ॥ ३५. १-४ ॥३६-३९॥ ५. ६ - °म्यसौ ॥४०॥ ७-१३ [°भामहे स्व-

स्तये । -] - १७ [चारुं गव्यम् K.] - १८ [°मर्पत K. °मर्कृषत J.] - १९ [द्रुतं K.] - २० [°माशिषः सन्तु कामाः स्वाहा] - २२ । अप नः शोशुचद्घम् ॥ ४१-५६॥ [२३. ३२ ॥५७॥ ३६. १७ - वनस्पतयः शान्तिः शान्तिरेव शान्तिः ॥५८॥] ॥ चतुरनुवाकेषु षट्पञ्चाशत् (23.) ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां पञ्चत्रिंशोऽध्यायः ॥ ३५॥ ॥

I. ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहौजो मयि प्राणापानौ ॥ १॥

श्रीगणेशाय नमः ॥ पञ्चाध्यायी आथर्वणेन दधीचा दृष्टा दध्यङ् ह वाऽआथर्वण एतꣳ शुक्रमेतं यज्ञं विदां चकारेति [१४. १. १. २०.] श्रुतेः । ऊर्ध्वश्चेत्याग्निको मन्त्रः [३१. ७. १७, ८६.] अग्निं हृदयेनेत्याद्यध्यायसमाप्तिपर्यन्तमाश्वमेधिकम् [३१, ८-१३.] तद्द्वयं वर्जयित्वा ॥ का° [अनुक्रमण्याम्] शान्तिकरणमाद्यन्तयोः । ऋचं वाचमित्यध्यायेन शान्तिकरणं कार्यम् स्वाध्याये मन्त्रपाठे प्रवर्ग्यमन्त्रादावस्याध्यायस्य (1.) दर्शनात् ॥ अथ मन्त्रार्थः । पञ्च यज्ञर्षि लिङ्गोक्तदेवतानि । ऋचमृग्रूपां वाचमहं प्रपद्ये प्रविशामि शरणं व्रजामि । यजुः यजूरूपं मनः प्रविशामि । प्राणं प्राणरूपं साम प्रपद्ये । चक्षुरिन्द्रियं श्रोत्रेन्द्रियं च प्रपद्ये । वागादियज्ञाङ्गं सप्तदशावयवोपलक्षणम् सप्तदशावयवं प्रजापतेर्लिङ्गं प्रपद्ये इत्यर्थः त्रयीविद्यां लिङ्गशरीरं च प्रपन्नं प्रवर्ग्यो न नाशयेदिति भावः ॥ तथा वागिन्द्रियमोजो मानसं बलं धार्ष्ट्यम् पुनरोजोयज्ञाङ्गशरीरं च बलम् प्राणापानौ उच्छ्वासनिश्वासवायू च एते सह एकीभूताः सन्तो मयि वर्तन्ते । अतोऽपि प्रवर्ग्योऽस्मान्न क्रुद्धीति भावः ॥ १॥

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु । शं नो भवतु भुवनस्य यस्पतिः ॥ २॥

बृहस्पतिर्देवत्या पङ्क्तिः । मे मम चक्षुषः चक्षुरिन्द्रियस्य यत् छिद्रमवखण्डनं जातम् प्रवर्ग्याचरणेन (2.) । हृदयस्य वुद्धेर्वा यत् छिद्रं जातम् । मनसो वा यत्

अतितृणमतिहिंसितम् । प्रवर्ग्याचरणेन यत् चक्षुर्बुद्धिमनसां व्याकुलत्वं ज्ञातम् बृहस्पतिर्देवगुरुः मे मम तत् छिद्रमतितृणं च दधातु संदधातु छिद्रं निवर्तयतु । भुवनस्य भूतजातस्य यः पतिरधिपतिः प्रवर्ग्यरूपो यज्ञः स नोऽस्माकं शं सुखरूपो भवतु । बृहस्पतिना छिद्रापाकरणात्प्रवर्ग्यः कल्याणरूपोऽस्वित्यर्थः ॥ २ ॥

a. भूर्भुवः स्वः । b. तत्सवितुर्वरेण्यं भर्गो दे॰ ॥ ३ ॥

कया नश्चित्र आभुवद्॒ ॥ ४ ॥ कस्त्वा सत्यो म॰ ॥ ५ ॥

अभी षु णः स॰ - - °स्तूतिभिः ॥ ६ ॥

भूर्भुवः स्वः त्रीणि यजूंषि । तत्सवितुः कया नः कस्त्वा अभी षु णः एताश्चतस्र ऋचो व्याख्याताः [३.३५.२७.३१-४१.] । अभी षु ण इत्यस्यामृचि शतं भवास्तूतिभिरिति वक्तृवचनम् पूर्वमूतयऽइत्येव पाठः ऊतिभिः अवनैर्हेतुभिः शतमसंख्यरूपो भवसीत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

कया त्वं नऽऊत्याभि प्रमन्दसे वृषन् । कया स्तोतृभ्य आभर ॥ ७ ॥

इन्द्रदेवत्या गायत्री अनिरुक्तेन्द्रपदहीना । आद्यपादे व्यूढद्वयम् । हे वृषन् वर्षतीति वृषा हे सेक्तः इन्द्र वासवो वृत्रहा वृषेत्यभिधानम् [अमर॰ १.१.४२.] कया ऊत्या केन तर्पणेन हविर्दानेन नोऽस्मानभिप्रमन्दसे अभिमोदयसि मदिस्तु स्वप्ने (3.) ज्ञाद्ये मदे मोदे स्तुतौ गतौ लट् । कया च ऊत्या तृप्त्या स्तोतृभ्यः स्तुतिकर्तृभ्यो यजमानेभ्यः आभर आहर आहरसि धनं दातुमिति शेषः तद्रूपेण तथा वयं कुर्म इति भावः । आभरेति लडर्थे लोट् ॥ ७ ॥

इन्द्रो विश्वस्य राजति । शं नोऽअस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

द्विपदा विराट् इन्द्रदेवत्या । विंशत्यक्षरा द्विपदा विराट् कथ्यते । विश्वस्य सर्वस्य जगतः इन्द्रः इदि परमैश्वर्ये इन्दतीतीन्द्रः परमेश्वरः महावीरः आदित्यो वा यो राजति देदीप्यते ईष्टे वा स नोऽस्माकं द्विपदे विभक्तिव्यत्ययः द्विपदां पुत्रादीनां शं सुखरूपोऽस्तु चतुष्पदे चतुःपदां गवादीनां च शं सुखरूपोऽस्तु ॥ ८ ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

cc cc cc*

शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ १ ॥

द्वे अनुष्टुभौ मित्रवरुणादयो देवताः । मित्रो देवो नोऽस्माकं शं सुखरूपो भवतु महावीरप्रसादात् मेद्यति भक्तेषु स्निह्यतीति मित्रः । वरुणः शं सुखरूपो भवतु वृणोत्यङ्गीकरोति भक्तमिति वरुणः । अर्यमा नोऽस्माकं शं भवतु इयर्ति गच्छति भक्तं प्रतीत्यर्यमा । इन्द्रो देवेशो नोऽस्माकं शं भवतु । बृहस्पतिर्देवगुरुर्नः शं भवतु बृहतां वेदानां पतिः पालकः । उरुर्विस्तीर्णः क्रमः पादन्यासो यस्य स विष्णुः नोऽस्माकं शं भवतु वेवेष्टि व्याप्नोतीति विष्णुः ॥ १ ॥

शं नो वातः पवताꣳ शं नस्तपतु सूर्यः ।
शं नः कनिक्रदद्देवः पर्जन्योऽअभिवर्षतु ॥ १० ॥

वातो वायुर्नोऽस्माकं शं सुखकारी अपरुषः अव्याधिजनकश्च पवतां वहताम् पव गतौ लोट् । सुवति जनान्स्वस्वव्यापारेषु प्रेरयति सूर्यः शं सुखरूपोऽदहनो भेषजरूपश्च नोऽस्माकं तपतु किरणान्प्रसारयतु । पर्जन्यः पिपर्ति पूरयति जनमिति पर्जन्यः परोऽभ्राः पुरो (4.) जन्यतेऽनेन वा पर्जन्यौ रसदब्देन्द्राविति (5.) अभिधानम् [अमर° ३.३.१५१.] पर्जन्यः पर्जन्येशो (6.) देवः नोऽस्माकं शं सुकखरं काशनिद्धाररहितं यथा तथा अभिवर्षतु सिञ्चतु कीदृशः कनिक्रदत् अत्यन्तं क्रन्दतीति शब्दं कुर्वन् दाधर्तिदर्धर्तीत्यादिना [पा° ७.४.६५.] यङ्लुगन्तो निपातः ॥१०॥

a. अहꣳनि शं भवन्तु नः शꣳ रात्रीः प्रतिधीयताम् ।
b. शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शं न इन्द्रापूषणा (7.) वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥११॥

द्विपदा गायत्री अहानि रात्रयश्च देवताः । अहानि दिनानि नोऽस्माकं शं सुखरूपाणि भवन्तु रात्रीः शं सुखरूपाः अस्मासु प्रतिधीयतां प्रतिदधातु महावीर इति शेषः कर्तरि यक् छान्दसः ॥ शं न इन्द्राग्नी । त्रिष्टुप् इन्द्राग्नी इन्द्रावरुणौ इन्द्रापूषणौ इन्द्रासोमौ देवताः । इन्द्राग्नी अवोभिः पालनैः कृत्वा नोऽस्माकं शं सुखरूपौ भवताम् । रातं दत्तं हव्यं ययोस्तौ रातहव्यौ हविस्तृतौ इन्द्रावरु-

णौ नः शं भवताम् । वाजसातौ वाजस्यान्नस्य सातौ दाने निमित्तभूते इन्द्रापूष-णा इन्द्रपूषसंज्ञौ देवौ नोऽस्माकं सुखरूपौ भवताम् । इन्द्रासोमा इन्द्रसोमौ देवौ शं सुखरूपौ भवताम् । किमर्थम् सुविताय सुष्ठु इतं सुवितम् साधुगमनाय साधुप्रसवाय वा । तथा शं रोगाणां शमनाय । योः यवनाय (8.) पृथक्करणाय च भयानाम् रोगं भयं च निवर्त्य सुखरूपौ भवतामित्यर्थः । देवताद्वन्द्वे चेति [पा° ६.३.२६.] सर्वत्र पूर्वपदस्य दीर्घः ॥११॥

शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑ । शं योर॒भिस्र॑वन्तु नः ॥१२॥

अब्देवत्या गायत्री । देवीः देव्यो दीप्यमाना आपो नोऽस्माकमभिष्टये अभिषेकायाभीष्टाय वा पीतये पानाय च शं सुखरूपा भवन्तु अस्माकं स्नाने पाने चापः सुखयित्र्यो भवन्तु । आपः शं योः रोगाणां शमनं भयानां यवनं पृथक्करणं च अभिस्रवन्तु नोऽस्माकं भयरोगनाशं कुर्वन्त्वित्यर्थः ॥१२॥

स्यो॒ना पृ॑थिवि नो भवा॰ - - सु॒प्राया॑ः ॥१३॥ आपो॒ हि ष्ठा म॑॰ ॥१४॥

यो व॑ः शि॒वत॑॰ ॥१५॥ तस्मा॒ऽअर॑ं ग॰ ॥१६॥

स्योना पृथिवि । व्याख्याता [३५.२१.] ॥ आपो हि ष्ठा । तृचो व्याख्यातः [११,५०-५२.] ॥१३॥१४॥१५॥१६॥

II. द्यौः शान्ति॑र॒न्तरि॑क्ष॒ꣳ शान्तिः॑ पृथि॒वी शान्ति॒रापः॒ शान्ति॒रोष॑धयः॒ शान्तिः॑ ।
वन॒स्पत॑यः॒ शान्ति॒र्विश्वे॑ दे॒वाः शान्ति॒र्ब्रह्म॒ शान्तिः॒ सर्व॒ꣳ शान्तिः॒ शान्ति॑रे॒व
शान्ति॒ः सा मा॒ शान्ति॑रे॒धि ॥१७॥

यज्ञूंषि संदृशि जीव्याससमित्यन्तानि [कं° ११.] । एकाधिका शक्करी (9.) । द्यौः द्युलोकरूपा या शान्तिः अन्तरिक्षरूपा च या शान्तिः पृथिवी भूलोकरूपा या शान्तिः आपो जलरूपा या शान्तिः ओषधयः ओषधिरूपा या शान्तिः वनस्पतयः वृक्षरूपा या शान्तिः विश्वे देवाः सर्वदेवरूपा या शान्तिः ब्रह्म त्रयीलक्षणं परं वा तद्रूपा या शान्तिः सर्वं सर्वजगद्रूपा या शान्तिः शान्तिरेव शान्तिः या स्वरूपतः शान्तिः सा शान्तिः मा मां प्रति एधि अस्तु पुरुषव्यत्ययः । महावीरप्रसादात्सर्वं

शान्तिरूपं मां प्रत्यस्वित्यर्थः । यद्वा द्यौरित्यादिषु विभक्तिव्यत्ययः सप्तम्यर्थे प्रथमा दिव्यन्तरिक्षे पृथिव्यामप्स्वोषधिषु वनस्पतिषु विश्वेदेवेषु (10.) ब्रह्मणि सर्वस्मिंश्च या शान्तिः सा मां प्रत्यस्वित्यर्थः ॥ १७ ॥

दृते (11.) दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥

दृते दृ विदारे विदीर्णे ज्वराज्जर्जरितेऽपि शरीरे हे महावीर मा मां त्वं दृꣳह दृढीकुरु यद्वा दृते विदीर्णे कर्मणि मां दृꣳह अक्षिप्रं कर्म कुरु यद्वा ससुषिरत्वात् सेतृत्वाच्च दृतिशब्देन महावीरः हे दृते (12.) महावीर मां दृꣳह दृढीकुरु । कथं दार्ढ्यम् तदाह सर्वाणि भूतानि प्राणिनो मा मां मित्रस्य चक्षुषा समीक्षन्तां सम्यक् पश्यन्तु मित्रदृष्ट्या सर्वे मां पश्यन्तु नारिदृष्ट्या सर्वेषां प्रियो भूयासमित्यर्थः । किं च अहमपि सर्वाणि भूतानि मित्रस्य चक्षुषा समीक्षे पश्यामि सर्वे मे प्रियाः सन्तु । मित्रचक्षुः शान्तं भवति मित्रः कं चन न हन्ति मित्रं च कश्चन न हन्ति एवं परस्पराद्रोहेण सर्वानहिंसन्तो मित्रस्य चक्षुषा वयं समीक्षामहे पश्यामः ॥ १८ ॥

दृते दृꣳह मा । ज्योक्ते सꣳदृशि जीव्यासꣳ ज्योक्ते सꣳदृशि जीव्यासम् ॥ १९ ॥

हे दृते वीर मां दृꣳह आदरार्थं पुनर्वचनम् । हे महावीर ते तव सꣳदृशि सन्दर्शने अहं ज्योक् चिरं जीव्यासं जीवेयम् जीवेराशीर्लिङि रूपम् । ज्योगिति निपातश्चिरार्थः । पुनरुक्तिरादरार्था ते सꣳदृशि ज्योग्जीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिꣳ ॥ २० ॥

व्याख्याता [१७. ११.] ॥ २० ॥

नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २१ ॥

हे अनुष्टुभौ विद्युत्स्तनयित्नुरूपभगवद्देवते । हे भगवन् महावीर विद्युते विद्युद्रूपाय ते तुभ्यं नमोऽस्तु स्तनयित्नवे स्तनयित्नुर्गर्जितं तद्रूपाय ते नमो

ऽस्तु । यतः कारणात् स्वः स्वर्गं गन्तुं त्वं समीहसे चेष्टसे अतस्ते तुभ्यं नमोऽस्तु ॥ २१ ॥

यतो-यतः समीहसे (13.) ततो नोऽअभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ २२ ॥

हे महावीर यतो-यतः यस्माद्यस्माद्दुश्चरितात्त्वं समीहसे अस्मास्वपकर्तुं चेष्टसे ततस्ततो नोऽस्माकमभयं कुरु । किं च नोऽस्माकं प्रजाभ्यः शं सुखं कुरु नोऽस्माकं पशुभ्यः चाभयं भीत्यभावं कुरु ॥ २२ ॥

सुमित्रिया न आप ओषधः ॥ २३ ॥

यजुः । व्याख्यातम् [६.२२.] ॥ २३ ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ २४ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥

सूर्यदेवत्या ब्राह्मी त्रिष्टुप् । एतैर्मन्त्रैर्यो महावीरोऽस्माभिः स्तुतः तत् चक्षुः जगतां नेत्रभूतमादित्यरूपं पुरस्तात् पूर्वस्यां दिशि उच्चरत् उच्चरति उदेति इतश्च लोपः परस्मैपदेषिति [पा॰ ३.४.९७.] इकारलोपः । कीदृशं तत् देवहितं देवैर्हितं स्थापितम् यद्वा देवानां हितं प्रियम् शुक्रं शुक्लं पापासंसृष्टं शोचिष्मद्वा । तस्य प्रसादात् शतं शरदः वर्षाणि वयं पश्येम शतवर्षपर्यन्तं वयमव्याहतचक्षुरिन्द्रिया भवेम प्रार्थनायां लिङ् अत्यन्तसंयोगे द्वितीया । शतं शरदः जीवेम अपराधीनजीवना भवेम । शतं शरदः शृणुयाम स्पष्टश्रोत्रेन्द्रिया भवेम । शतं शरदः प्रब्रवाम अस्खलितवागिन्द्रिया भवेम । शतं शरदः अदीनाः स्याम न कस्याप्यग्रे दैन्यं कुर्याम । शतात् शरदः शतवर्षोपर्यपि भूयश्च बहुकालम् पश्येमेत्यादि योज्यम् ॥ २४ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । अध्यायः शान्तिपाठार्थः षट्त्रिंशोऽयं प्रकाशितः ॥ ३६ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

१ [सहोजा] - ५ [दृल्हा] - ११ [रात्रिः] - १६ ॥ १-१६॥ १७ - - वनस्पतयः शान्तिः शान्तिरेव शान्तिः ॥ १७॥ १८-२४ -शृणुयाम शरदः शतम् ॥ १८-२४ ॥ ॥ अनुवाके चतुर्विंशतिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६॥ ॥

I. a. देवस्य त्वा सवितुः प्रसः । b. आददे नारिरसि ॥ १॥

युञ्जते मन उत युः ॥ २॥

श्रीगणेशाय नमः (1.) । का° [२६. १. ३.] देवस्य त्वेत्यभ्रिमादायौडुम्बरीं विकङ्कतीं वारत्निमात्रीं सव्ये कृत्वा दक्षिणेनालभ्य जपति युञ्जतऽइति । उडुम्बरतत्थां विकङ्कततत्थां वा हस्तप्रमाणामभ्रिं देवस्य त्वा नारिरसीति मन्त्रेणादाय वामहस्ते तां कृत्वा दक्षिणहस्तेन स्पृष्ट्वा युञ्जते मन इति मन्त्रं जपतीति सूत्रार्थः ॥ देवस्य त्वा । अभ्रिर्देवत्यं यजुः । हे (2.) अभ्रे सवितुर्देवस्याज्ञायां स्थितोऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वामाददे गृह्णामि त्वं च नारिरसि स्त्रीनाम्नी भवसि ॥ युञ्जते मनः । व्याख्याता [५. १४.] ॥ १॥ २॥

a. देवी द्यावापृथिवी मखस्य वामस्य शिरो राध्यासं देवयजने पृथिव्याः ।

b. मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ३॥

द्यावापृथिवीदेवतं यजुः ब्राह्मी गायत्री ॥ का° [२६. १. ४.] मृदमादत्ते पिण्डवद्देवी द्यावापृथिवी इति । अधर्युर्देवीति मन्त्रेण विधणं (4.) मृत्पिण्डमादत्ते पिण्डवदिति (5.) पाणिभ्यां गृह्णाति दक्षिणः (6.) साभ्रिरिति लभ्यतऽइति सूत्रार्थः ॥ मन्त्रार्थस्तु हे देवी देव्यौ दीप्यमाने द्यावापृथिवी द्यावापृथिव्यौ अस्यास्मिन्दिने पृथिव्याः देवयजने देवा इज्यन्ते अत्रेति देवयजनस्थाने मखस्य यज्ञस्य शिरो राध्यासं साधयेयम् राध साध संसिद्धौ । मन्त्रावीरो यज्ञशिरः । किं कृत्वा वां युवां द्यावापृथिव्यौ आदायेति शेषः दिवोंऽशं जलं पृथिव्यंशं मृदमादायेत्यर्थः । एवं द्यावापृथिव्यौ प्रार्थ्य मृदमाह मखाय हे मृत् यज्ञाय त्वां गृह्णामि । एवं सा-

मान्येनोक्ता विशेषमाह मखस्य यज्ञस्य शीर्ष्णे शिरसे महावीराय त्वां गृह्णामीति शेषः । तं मृत्पिण्डमुत्तरस्थापिते कृष्णाजिने निदध्यात् ॥ ३ ॥

a. देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽग्न्य शिरो राध्यासं देवयजने पृथिव्याः । b. मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

का° [२६.१.५.६.] उत्तरतो देव्यो वम्र्य इति वल्मीकवपाम् । उपदीकृतो मृत्संचयो वल्मीकस्तस्य वपेव वपा तां मध्यस्थं लोष्टमादाय कृष्णाजिने मृत्पिण्डोत्तरे तूष्णीं निदध्यादिति सूत्रार्थः ॥ वल्मीकवपादेवता आर्षी पङ्क्तिः । हे देव्यो दीप्यमानाः वम्र्यः उपजिघ्रिकाः वो युष्मानादाय पृथिव्याः देवयजने मखस्य शिरो महावीरमग्न्य राध्यासं सम्पादयेयम् । मखाय त्वामाददे मखस्य शीर्ष्णे त्वामाददे इति व्याख्यातम् । किम्भूता वम्र्यः भूतस्य प्राणिजातस्य प्रथमजाः प्रथमोत्पन्नाः पृथिवी जन्तूनां प्रथमजा तत्सम्बन्धात् वम्र्योऽपि प्रथमजा उच्यन्ते ॥ ४ ॥

a. इयत्यग्रेऽआसीन्मखस्य (7.) तेऽग्न्य शिरो राध्यासं दे° पृ° ।

b. मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

का° [२६.१.७.] इयत्यग्रऽइति वराहविकृतम् । वराहोत्खातमृदमादाय तूष्णीं कृष्णाजिने वल्मीकवपोत्तरे निदध्यादिति सूत्रार्थः ॥ वराहविकृतमृद्देवतं यजुः ब्राह्मी गायत्री । हे पृथिवि भवती अग्रे आदौ वराहोद्धरणासमये इयती प्रादेशमात्राभिनयेन प्रदर्श्यते एतत्प्रमाणा आसीत् इयती ह वाऽइयमग्रे पृथिव्यास प्रादेशमात्रीत्यादि वराह उज्जघानेति श्रुतिः [१४.१.२.१२.] । ते इति द्वितीयार्थे षष्ठी तां त्वामादाय पृथिव्याः देवयजनेऽग्न्य मखस्य शिरो राध्यासम् । मखायेति व्याख्यातम् ॥ ५ ॥

a. इन्द्रस्यौजः स्थ मखस्य वोऽग्न्य शिरो राध्यासं देवयजने पृथिव्याः ।

b. मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥

का° [२६.१.८.] इन्द्रस्यौजः स्थेति पूतीकान् । पूतीकान् रोहिषतृणान्यादाय

तूष्णीं कृष्णाजिने वराहविकृतोत्तरे निदध्यादिति सूत्रार्थः ॥ आदारदेवत्यम् ऋक्-ष्टुप् । हे पूतीका यूयमिन्द्रस्य ओजः तेजोरूपाः स्थ भवथ वो युष्मानादाय पृथिव्याः देवयजने अस्य मखस्य शिरो राध्यासम् मखाय वो गृह्णामि मखस्य शीर्ष्णे महावीराय च गृह्णामीत्युक्तम् ॥ का° [२६. १. १.] मखायेति पयः । पय आदाय तूष्णीं कृष्णाजिने पूतीकोत्तरे निदध्यादिति सूत्रार्थः ॥ पयोदेवत्यम् । हे पयः मखाय मखशीर्ष्णे त्वां गृह्णामि ॥ तूष्णीं गवेधुका अपि ग्राह्याः ॥ का° [२६. १. ११.] सम्भृतानभिमृशति मखायेति । सम्भृतान्सम्भारान्करेण (8.) स्पृशेदित्यर्थः ॥ सम्भारदेवत्यम् । हे सम्भाराः मखस्य तच्छीर्ष्णे च वः स्पृशामि ॥ ६ ॥

a. प्रैतु ब्रह्मणस्पतिः प्र दे° ॥

b. मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ॥

का° [२६. १. १२.] कृष्णाजिनं परिगृह्योत्तरतः परिवृतं गच्छन्ति प्रैतु ब्रह्मणस्पतिरिति । अध्वर्युप्रतिप्रस्थात्रादयः कृष्णाजिनं समन्तादादाय प्रैत्विति जपन्तोऽन्तःपात्याद्उत्तरे परिवृतं प्रति गच्छन्ति । पञ्चारत्निमितः समचतुरस्रः प्राग्द्वारः सिकतोपकीर्णः पूर्वमेव कृतः सप्तभूसंस्कारसंस्कृतश्चादितप्रदेशः परिवृत उच्यते । इति सूत्रार्थः ॥ बृहती । व्याख्याता [३३. ८१.] ॥ का° [२६. १. १३. १४.] परिवृते निदधाति सम्भारानुद्धतावोक्षिते सिकतोपकीर्णे प्राग्द्वारे मखायेति । अध्वर्युः कृष्णाजिनस्थानेव सम्भारान्परिवृते निदधाति कीदृशे उद्धतावोक्षिते उच्छिखितजलसिक्ते एतत्संस्कारद्वयं पञ्चाधिकम् सिकतायुक्ते प्राग्द्वारे चेति सूत्रार्थः ॥ हे सम्भारा मखाय युष्मान्निदधामि ॥ का° [२६. १. १५.] सम्भारैः सꣳसृजति मखायेति । गवेधुकाजापयसी पृथक्कृत्य वल्मीकवपादित्रिसम्भारैर्मृत्पिण्डं मिश्रयतीत्यर्थः ॥ हे सम्भारा युष्मान्मखाय मृत्पिण्डेन संसृजामि ॥ का° [२६. १. १६.] मृदमादाय मखायेति महावीरं करोति प्रादेशमात्रमूर्ध्वमासेचनवन्तं मेखलावन्तं मध्यसंगृहीतमूर्ध्वं मेखलायास्त्र्यङ्गुलम् । महावीरपर्यायं तूष्णीं मृत्पिण्डमादाय मन्त्रेण महावीरं करोति कीदृशम् प्रादेशोच्चं (9.) गर्तवन्तं मेखलायुतं मध्ये संकुचितं मेखलो-

परि त्र्यङ्गुलोच्चमिति सूत्रार्थः ॥ हे महावीर् मखाय तर्हीर्ष्णे त्वां करोमि ॥ ७॥

मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ८॥

का° [२६. १. १७.] निष्ठितमभिमृशति मखस्य शिर इति । निष्पन्नं महावीरं वामकरस्थं दक्षिणेन स्पृशतीत्यर्थः ॥ हे महावीर् त्वं मखस्य शिरो मूर्धासि भवसि ॥ का° [२६. १. १९.] एवमितरौ प्रतिमल्लम् । इतरौ द्वौ महावीरौ प्रतिमल्लमेवमेव करोति अभिमृशति चेत्यर्थः ॥ मखाय द्वितीयं महावीरं करोमि मखस्य निष्पन्नं स्पृशामि मखाय तृतीयं महावीरं करोमि मखस्येति निष्पन्नं स्पृशति । मखस्य शिरोऽसि मखाय त्वा मखस्य शीर्ष्णे (10.) त्वामभिमृशामि ॥ का° [२६. १. २२.] गवेधुकाभिः श्लक्ष्णयति मखायेति प्रतिमल्लम् । गवेधुकाभिः महावीरान् घर्षणेन (11.) मृदून्करोति मखायेति प्रतिमल्लमेकैकम् ॥ मखाय मखस्य शीर्ष्णे च त्वां गवेधुकाभिः श्लक्ष्णयामि । एवमग्रिमौ मल्लौ ॥ ९॥

a. अश्वस्य त्वा वृक्णः शक्ना धूपयामि देवयजने पृथिव्याः । b. मखाय त्वा मखस्य त्वा शीर्ष्णे । c. d = a. b. । e. f = a. b. । g. मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १॥

का° [२६. १. २३.] अश्वशकृता धूपयत्यश्वस्येति प्रतिमल्लम् । दक्षिणाग्निदीप्तेनाश्वपुरीषेण त्रिभिर्मल्लैस्त्रीन्महावीरान्धूपयेत् एकैकधूपने सप्तसप्ताश्वशकृत्ति गृह्णाति (12.) ॥ हे महावीर् पृथिव्याः देवयजने मखाय मखस्य शीर्ष्णे च वृक्णः सेक्तुरश्वस्य शक्ना शकृता पुरीषेण त्वा त्वां धूपयामि पदन्न इति सूत्रेण [पा° ६. १. ६३.] शकृच्छब्दस्य शकन्नादेशः । एवमितरमल्लाभ्यामितरौ धूपयेत् ॥ का° [२६. १. २४.]

प्रदक्षिणं च मखायेति प्रतिमन्त्रम् । मखायेति त्रिभिर्मन्त्रैस्त्रीन्महावीरानुखावत् अपयेत् पिन्वनरौहिणैः सक्तेत्यर्थः ॥ मखाय मखस्य शीर्ष्णे त्वा त्वां निर्दहामि । एवमितरौ ॥ १ ॥

a. ऋजवे त्वा । b. साधवे त्वा । c. सुक्षित्यै त्वा ।

d. मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥

का° [२६.१.२५.] पक्षानुद्धरत्यृजवे त्वेति प्रतिमन्त्रम् । पक्षान्महावीरानापाकादिवोद्धरति (13.) त्रिभिर्मन्त्रैरित्यर्थः ॥ ऋजवे । असौ लोक ऋजुः तत्र सत्यमेव न तु कौटिल्यम् सत्यमादित्यः हे महावीर ऋजवे सत्यायादित्याय त्वा त्वामुद्वपामीति शेषः तथा च श्रुतिः [१४.१.२.२२.] स उद्वपत्यृजवे त्वेत्यसौ वै लोक ऋजुः सत्यꣳ ह्यृजुः सत्यमेष य एष तपत्येष ऽ प्रथमः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाहर्ऽजवे त्वेति ॥ अथ द्वितीयम् साधवे त्वा । साधवे वायवेऽर्धाय वायुप्रीत्यै त्वामुद्वपामि तथा च श्रुतिः [१४.१.२.२३.] साधवे त्वेत्ययꣳ साधुर्योऽयं पवतऽएष ह्येमां लोकान्त्सिद्धोऽनुपवतऽएष ऽ द्वितीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह साधवे त्वेति ॥ अथ तृतीयम् सुक्षित्यै त्वा । सुतरां क्षियन्ति निवसन्ति सर्वभूतानि यस्यां सा सुक्षितिर्भूमिः तथा च श्रुतिः [१४.१.२.२४.] सुक्षित्यै त्वेत्ययं वै लोकः सुक्षितिरस्मिन्हि (14.) लोके सर्वाणि भूतानि क्षियन्त्यथो ऽग्निर्वै सुक्षितिरग्निर्ह्येवास्मिं लोके सर्वाणि भूतानि क्षियत्येष ऽ तृतीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सुक्षित्यै त्वेति ॥ का° [२६.१.२६.] अज्ञापयसावसिञ्चति मखायेति प्रतिमन्त्रम् । अज्ञाद्रुग्धेन त्रीन्महावीरांस्त्रिभिः तुल्यमन्त्रैः सिञ्चतीत्यर्थः ॥ मखाय मखशीर्ष्णे चाज्ञापयसा त्वां सिञ्चामीत्यर्थः ॥ १० ॥ इति महावीरसम्भरणं समाप्तम् ॥ ॥

II. a. यमाय त्वा । b. मखाय त्वा । c. सूर्यस्य त्वा तपसे ।

d. देवस्त्वा सविता मध्वानक्तु । e. पृथिव्याः सꣳस्पृशस्पाहि ।

f. अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

का° [२६. २. १३.] ब्रह्मानुज्ञातो यमाय त्वेति महावीरं प्रोक्षति । प्रचरेति ब्रह्मणानुज्ञातोऽध्वर्युरुपविश्य यमाय त्वेति मन्त्रत्रयेण प्रचरणीयं महावीरं वारत्रयं प्रोक्षतीत्यर्थः ॥ त्रीणि यजूंषि । यमयति नियच्छति सर्वमिति यम आदित्यस्तत्प्रीत्यै त्वा त्वां प्रोक्षामि तथा च श्रुतिः [१४. १. ३. ४.] स प्रोक्षति यमाय त्वेत्येष वै यमो य एष तपत्येष ह्येद्ँ सर्वं यमयत्येतेनेदं सर्वं यतमेष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह यमाय त्वेति ॥ मखाय त्वा । मखो यज्ञः प्रवर्ग्यः सूर्यरूपस्तस्मै त्वां प्रोक्षामि तथा च श्रुतिः [१४. १. ३. ५.] एष वै मखो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह मखाय त्वेति ॥ सूर्यस्य त्वा तपसे । तपतीति तपस्तेजः सूर्यतेजोरूपाय प्रवर्ग्याय त्वां प्रोक्षामि तथा च श्रुतिः [१४. १. ३. ६.] एष वै सूर्यो य एष तपत्येष उ प्रवर्ग्यस्तदेवमेवैतत्प्रीणाति तस्मादाह सूर्यस्य त्वा तपसऽइति ॥ का° [२६. २. २०.] अञ्जन्तीत्युच्यमाने देवस्त्वेत्यनक्ति महावीरमाज्यं संस्कृत्य । क्रोत्रा अञ्जन्ति यं प्रथयन्तीति मन्त्रे पठ्यमानेऽध्वर्युराज्यं विधिना संस्कृत्य तेनाज्येन प्रचरणीयं महावीरं मन्त्रेणानक्ति ॥ सविता देवः मधा मधुना मधुरेण सर्वजगद्रूपेणाज्येन के महावीर त्वामनक्तु लिम्पतु मधेति नुमभावः आगमस्यानित्यत्वात् तथा च श्रुतिः [१४. १. ३. १३.] सर्वं वाऽइदं मधु यदिदं किं च तदेनमनेन सर्वेण समनक्तीति ॥ का° [२६. २. २१.] रजतशतमानं खरऽउपगूहति पृथिव्याः सꣳस्पृश इति । रजतस्य शतमानं शतरक्तिकामितं रजतं खरे सिकतात्मरूपगूहतीत्यर्थः ॥ प्राजापत्या गायत्री रजतदेवत्या । संस्पृशति उपद्रवार्थं स्पर्शं करोति संस्पृक् रात्रसः क्विबन्तम् पृथिव्याः सम्बन्धिनः संस्पृशः रात्रसात् महावीरं के रजत त्वं पाहि रक्ष । देवा रात्रसेभ्यो भीताः सन्तो यज्ञरक्षार्थमग्नेरपत्यं रजतं रक्षसां घाताय खरे निदधुः अथ च पृथिवी महावीरपाकेऽग्नेर्भीता ततोऽसौ मा दह्यतामिति रजतं खरेऽन्तर्हितमिति श्रुतौ कथा तथा च श्रुतिः [१४. १. ३. १४.] देवा अबिभयुर्यद्वै न इममधस्ताद्रक्षाꣳसि नाष्ट्रा न कृन्युरित्यग्नेर्वाऽएतद्रेतो यद्धिरण्यं नाष्ट्राणाꣳ रक्षसामपकृत्याऽइति तथा [१४. १. ३. १४.] अथो पृथिव्यु ह वाऽएतस्माद्बिभयां चकार यद्वै मायं तप्तः शुशुचानो न

क्ष्ठिस्यादिति तदेवास्याऽएतदन्तर्दधाति रजतमिति ॥ का° [२६. ३. ३. ४.] सꣳसीदस्वेत्युच्यमाने मुञ्जप्रलवान्द्विगुणानादीप्य प्रतिदिशं खरे करोति तेषु मह्यावीरमाज्यवत्तमर्चिरसीति । क्रोत्रा संसीदस्वेति [११. ३७.] पठ्यमानेऽर्धर्युर्द्विगुणितान्मुञ्जखण्डान्गार्हपत्ये प्रदीप्य खरे चतुर्दिक्षु कृत्वा तेषु मुञ्जेषु संस्कृताज्यपूर्णां प्रचरणीयं मह्यावीरं निदधातीति सूत्रार्थः ॥ यजुस्त्रिष्टुप् घर्मदेवत्या । हे मह्यावीर त्वमर्चिश्चन्द्रकान्तिद्रूपोऽसि शोचिरग्नितेजोद्रूपोऽसि तपः सूर्यतपद्रूपोऽसि एष वै घर्मो य एष तपति सर्वं वाऽएतदेष तदेतमेवैतत्प्रीणातीति श्रुतेः [१४. १. ३. १७.] यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति स्मृतेश्च [भगवद्गीता° १५. १२.] ॥ ११ ॥

a. अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः ।
b. पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः ।
c. सुषदा पश्चादेवस्य सवितुराधिपत्ये चक्षुर्मे दाः ।
d. आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ।
e. विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजो मे दाः ।
f. विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि । g. मनोरश्वासि ॥ १२ ॥

का° [२६. ३. ५.] अनाधृष्टेति वाचयति प्रादेशमध्यधि धारयन्तम् । मह्यावीरोपवर्ङुष्टाङ्गुलिदेशं धरन्तं यजमानमधर्युर्मन्त्रान्वाचयतीति सूत्रार्थः ॥ सप्त यजूंषि पृथिवीदेवत्यानि यजमानस्याशीः । हे पृथिवि या त्वं पुरस्तात् पूर्वस्यां दिशि अनाधृष्टा रक्षोभिरनाधर्षिता अग्नेराधिपत्ये स्वामित्वे सति मे मह्यमायुर्दाः देहि ददातेर्लुङि मध्यमैकवचनेऽडभाव आर्षः अग्निमेवास्याऽधिपतिं करोतीति [१४. १. ३. ११.] श्रुतेः ॥ या त्वं दक्षिणस्यां दिशि इन्द्रस्याधिपत्ये सति पुत्रवती पुत्रयुता सा मे मह्यं प्रजां पुत्रादिकां दाः देहि इन्द्रमेवास्याऽधिपतिं करोति नाष्ट्राणाꣳ रक्षसामपहत्याऽइति [१४. १. ३. २०.] श्रुतेः ॥ या त्वं पश्चात् पश्चिमायां दिशि सुषदा भवसि सुष्ठु अस्यां सीदन्ति जना इति सुषदा ईषदुःसुषिति [पा° ३. ३. १२६.]

खल्प्रत्ययः सवितुर्देवस्याधिपत्ये सति सा त्वं मे चक्षुः नेत्रेन्द्रियं दाः देहि देवमेवास्यै सवितारमधिपतिं करोतीति [१४. १. ३. २१.] श्रुतेः ॥ हे पृथिवि या त्वमुत्तरतः उत्तरस्यां दिशि धातुर्ब्रह्मण आधिपत्ये सति आश्रुतिरसि आश्रावयन्ति ऋत्विजो यस्यां सा आश्रुतिः यज्ञियो द्युत्तरदेशः सा त्वं मे रायो धनस्य पोषं पुष्टिं दाः देहि धातारमेवास्याऽधिपतिं करोतीति [१४. १. ३. २२.] श्रुतेः ॥ या त्वमुपरिष्टादुपरिप्रदेशे बृहस्पतेराधिपत्ये सति विधृतिरसि विशेषेण धारयतीति विधृतिः उपरिष्टाज्जुह्वादिकं ध्रियते सा त्वं मे मह्यमोजो बलं दाः देहि बृहस्पतिमेवास्याऽधिपतिं करोतीति [१४. १. ३. २३.] श्रुतेः ॥ का° [२६. ३. ७.] विश्वाभ्यो मेति दक्षिणत उत्तानं पाणिं निदधाति । महावीरादक्षिणभूमौ (15.) यजमानो मह्यं पठन्स्वकरं निदधात्युत्तानम् ॥ यजुर्बृहती । हे महावीरदक्षिणभूमे विश्वाभ्यः सर्वाभ्यः नाष्ट्राभ्यः नाशकत्रीभ्यः पिशाचादिभ्यो लोकप्रसिद्धं नो (16.) ऽस्मान् पाहि रक्ष सर्वाभ्यो मार्त्तिभ्यो गोपायेति [१४. १. ३. २४.] श्रुतेः छन्दसि वाप्रामेडितयोरिति [पा° ८. ३. ४९.] विसर्गस्य सत्वम् ॥ का° [१६. ३. ८.] मनोरश्वेति प्रादेशमुत्तरतः । महावीराडुत्तरतो यजमानो निम्नप्रदेशं निदधातीति सूत्रार्थः ॥ दैवी पङ्क्तिः । हे धर्मोत्तरभूमे त्वं मनोः राज्ञः अश्वा वडवासि वहनाय अश्वा ह्व वाऽश्वं भूत्वा मनुमुवाहेति [१४. १. ३. २५.] श्रुतेः ॥ १२ ॥

a. स्वाहा॑ मरुद्भिः परि॑श्रीयस्व ।

b. दिवः॑ स्तृ॒ऽस्पृशस्पाहि । मधु॑ मधु॑ मधु॑ ॥ १३ ॥

का° [२६. ३. १. १०.] धृष्टिभ्यां भस्मना परिकीर्याङ्गारैश्च विकङ्कतशकलैः परिश्रयति त्रयोदशभिः प्रागुदग्भिः स्वाहा मरुद्भिरित्यधिकं (17.) दक्षिणतो द्वौ मह्नेण । अधर्युर्धृष्टिभ्यां गार्हपत्यस्य भस्माङ्गारांश्च महावीरं परितो निक्षिप्य प्रागग्रैरुदगग्रैस्त्रयोदशविकङ्कतशकलैर्महावीरं वेष्टयति अङ्गारोपरि शकलान्निक्षिपतीत्यर्थः तन्मध्याद्द्वौ शकलौ मह्नेण प्राञ्चौ निदधाति शेषांस्तूष्णीम् एवं प्रतिदिशं त्रिषु त्रिषु स्थितेषु अधिकं त्रयोदशं दक्षिणतो निदधातीति सूत्रार्थः ॥ मासानां त्रयोदशत्वात्त्रयोदशशकलैराच्छादनम् त्रयोदश वै मासाः संवत्सरस्य संवत्सर एष

य एष तपत्येष उ प्रवर्ग्य इति [१४.१.३.२८.] श्रुतेः । यजुःपङ्क्तिर्घर्मदेवत्या । हे घर्म त्वं स्वाहाकारोऽसि हविराधारत्वात् सूर्यरूपोऽसि एष वै स्वाहाकारो य एष तपत्येष उ प्रवर्ग्य इति [१४.१.३.२६.] श्रुतेः अतस्त्वं मरुद्भिः प्रजाभिरस्मद्रूपाभिः परिश्रीयस्व सेव्यस्व कर्मणि यक् मरुतस्त्वामाश्रयन्त्वित्यर्थः विशो वै मरुतो विशैवैतत्क्षत्रं परिवृङ्क्त इति तदिदं क्षत्रमुभयतो विशा परिवृढमिति [१४.१.३.२७.] श्रुतिः ॥ का० [२६.३.१०.] सुवर्णशतमानेनापिदधाति दिवः सꣳस्पृश इति । शतरक्तिकामितेन सुवर्णेन मह्यावीरमाच्छादयतीति सूत्रार्थः ॥ दैवी जगती सुवर्णदेवत्या । हे शतमान दिवः द्युलोकसम्बन्धिनः संस्पृशः स्पर्शकर्त्रीन्देवान्याहि देवा राक्षसेभ्यो भीता मह्यावीरक्षायै स्वर्णं स्थापितवन्त इति श्रुतौ कथा देवा अबिभयुरित्यादिकार्या [१४.१.३.२१.] । का० [२६.४.२.] कृष्णाजिनावकृत्तिर्धवित्रैरुपवाजयति त्रिभिर्दण्डवद्भिर्मधु मथिति । कृष्णाजिनकृतैर्दण्डयुक्तैस्त्रिभिर्व्यञ्जनैरग्निं वीजयति दीपनायेति सूत्रार्थः ॥ त्रीणि यजूंषि प्राणदेवत्यानि दैव्युष्णिक् । मधुररसस्साम्यात्प्राणो मधु उच्यते मधु मधु मधु प्राणोदानव्यानत्रयं मह्यावीरे स्थापयामीत्यर्थः तथा च श्रुतिः [१४.१.३.३०.] अथ धवित्रैराधूनोति मधु मथिति त्रिः प्राणो वै मधु प्राणमेवास्मिन्नेतद्दधाति त्रीणि भवन्ति त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिन्नेतद्दधातीति ॥ १३ ॥

गर्भो॑ दे॒वाना॑ पि॒ता म॑ती॒नां पति॑: प्र॒जाना॑म् ।
स दे॒वो दे॒वेन॑ सवि॒त्रा ग॑त स॒ꣳ सूर्ये॑ण रोचते ॥ १४ ॥

का० [२६.४.११.] परिक्रम्योपतिष्ठन्तेऽकृतं चेद्गर्भो देवानामिति । धवित्रैर्वीजिनसमये उत्तरं देववत्परिक्रमणं प्रागकृतं चेदिह त्रिः परिक्रम्येतरथावृत्तिं सकृत् कृत्वा गर्भो देवानामित्यादिभिर्नमस्तेऽस्तु मा मा हिꣳसीरित्यन्तैरवकाशसंज्ञकैर्मन्त्रैः सयजमाना ऋत्विजो मह्यावीरमुपतिष्ठन्तेऽइति सूत्रार्थः ॥ घर्मदेवत्या अवकाशमन्त्रा मा मा हिꣳसीरित्यन्ताः आद्या ऋचां पङ्क्तिः । अथ मन्त्रार्थः देवो दीप्यमानो मह्यावीरः सवित्रा देवेन सह संगत संगच्छते गमेर्लुडि वा गमऽइति [पा० १.२.१३.] आत्मनेपदे विकल्पेन सिचः कित्त्वादनुदात्तोपदेशेति [पा० ६.४.३७.]

मलोपे ह्रस्वादङ्गादिति [पा° ८.२.२७.] सिचो लोपः वङ्कलं छन्दस्यमाङ्योगेऽपीति [पा° ६.४.७५.] अडभावः समो गमीत्यादिना [पा° १.३.२१.] तङ् । यश्च घर्मः सूर्येण सहैकीभूतः सन् संरोचते सम्यग्दीप्यते तं वयं स्तुम इति शेषः । कीदृशः देवानां दीप्तानां रश्मीनां दृश्यमानानां सर्वेषां वा गर्भः गृह्णातीति गर्भः ग्रहीता एष वै गर्भो देवानां य एष तपत्येष ह्येतꣳ सर्वꣳ संगृह्णात्येतेनेदꣳ सर्वं गृहीतमेष उ प्रवर्ग्य इति [१४.१.४.२.] श्रुतिः । तथा मतीनां बुद्धीनां पिता पालकः बुद्धिप्रवर्तकः प्रजानां पतिः पालकः ॥ १४ ॥

a. समग्निरग्निना गत सं देवेन सवित्रा सꣳ सूर्येणारोचिष्ट ।

b. स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणाह्रुरुचत ॥ १५ ॥

ब्राह्म्यनुष्टुप् । यः अग्निः घर्मः अग्निना सह संगत संगच्छते एकीभवति देव एव देवः सवित्रा दैवेन देवेन सह संगच्छते यश्च सूर्येण सह समरोचिष्ट संरोचते ॥ अवरं स्वाहाकारं करोति परां देवतामसावेव बन्धुरिति [१४.१.४.६.] श्रुतेः । स्वाहा अग्निः । स्वाहासहितोऽग्निर्घर्मस्तपसा सूर्यतेजसा संगत संगच्छते दैव्येन देवेन सवित्रा च संगच्छते सूर्येण सह समह्रुरुचत सर्वं सम्यक् रोचयति प्रकाशयति रोचतेर्णिजन्ताल्लुङ् वयं तं स्तुम इति शेषः ॥ १५ ॥

धर्ता दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः ।

वाचमस्मे नियच्छ देवायुवम् ॥ १६ ॥

ऊर्ध्वबृहती । त्रिजागतोर्ध्वबृहती अत्राद्यौ त्रयोदशवर्णौ तृतीय एकादशवर्णस्तेनैकाधिका । स देवो घर्मः अस्मे अस्मासु विभक्तेः शे-आदेशः वाचं नियच्छ पुरुषव्यत्ययः यज्ञं नियच्छतु स्थापयतु किम्भूतां वाचम् देवयुवं देवान्यौति मिश्रयति देवयुः तान् क्विपि तुगभाव आर्षः अनित्यमागमशासनमिति वचनात् देवसमूहमाकृयत्तं यज्ञं समापयत्वित्यर्थः यज्ञो वै वाग्यज्ञमस्मभ्यं प्रयच्छ येन देवान्प्रीणामेत्येवैतदाहेति [१४.१.४.८.] श्रुतेः देवयुवमित्यत्र संहितायां वकारस्य दीर्घः । स कः यो देवः पृथिव्यां विभाति शोभते । कीदृशः दिवो धर्ता द्युलोकस्य धारयिता । तपसः रश्मिजालस्य च धर्ता । देवानां च धर्ता । अमर्त्यः मनुष्यधर्मरहितः

अजरामरः । तपोजाः तप आदित्यस्तस्माज्जायतऽइति तपोजाः सूर्योत्पन्नः ॥ १६॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः ॥ १७॥

त्रिष्टुब्दीर्घतमोदृष्टा । स धर्मो भुवनेषु त्रिलोकेषु अन्तर्मध्ये व्यवस्थितः आवरीवर्त्ति पुनः पुनरावर्तते वृतेर्यङ्लुकि रूपम् । कीदृशः सध्रीचीः सह अञ्चतीति सध्रीच्यः सहस्य सध्रिरादेशः सहाञ्चना दिशो रश्मीन्वा वसानः आच्छादयन् वस आच्छादने शानच्प्रत्ययः (17.) । विषूचीः विषुनिपातो नानार्थः विषु अञ्चतीति विषूच्यः ताः नानाञ्चना दिशो रश्मीन्वा वसानः क्विब्वचिप्रच्छीत्यादुगितश्चेति [पा° ४. १. ६.] ङीपि अचश्चेति [पा° ६. ४. १३८. (18.)] अलोपे चाविति [पा° ६. ३. १३८.] पूर्वपदस्य दीर्घः । सध्रीचीश्च ह्येष विषूचीश्च दिशो वस्तेऽथो रश्मीनिति [१४. १. ४. १०.] श्रुतिः । एकः सशब्दः पादपूरणः । स कः यमहमपश्यमादित्यरूपं पश्यामि । कीदृशं गोपाम् गोपायतीति (19.) गोपास्तम् क्विपि यलोपः । अनिपद्यमानं निपद्यते पततीति निपद्यमानः न निपद्यमानोऽनिपद्यमानस्तम् अन्तरिक्षे गच्छन्तमपि नाधः पतन्तम् । च पुनः पथिभिः देवमार्गैः आचरन्तमागच्छन्तम् पराचरन्तं परागच्छन्तं च गमनागमने कुर्वाणम् ॥ १७॥

a. विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते । b. देवश्रुन्नं देव धर्म देवो देवान्पाहि । c. अत्र प्रावीर्नु वां देववीतये । d. मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८॥

अत्यष्टिः । हे विश्वासां भुवां पते सर्वासां पृथिवीनां स्वामिन् विश्वस्य सर्वप्राणिगतस्य मनसः पतेऽधिपते विश्वस्य वचसः पते सर्वप्राणिवचनस्य पालक सर्वस्य त्रयीलक्षणस्य वचसः पते प्रवर्तक हे देवश्रुत् (20.) देवैः श्रूयतऽइति देवश्रुत् देवप्रसिद्धः हे देव दीप्यमान हे धर्म देवस्त्वं देवान्पाहि रक्ष । एवं धर्मं सम्प्रार्थ्याश्विनावाह हे अश्विनौ अत्र यज्ञे देववीतये देवतर्पणाय अनु अनन्तरं धर्मो वां प्रावीः प्रावीत् तर्पयतु लोडर्थे लुङ् पुरुषव्यत्ययश्च युवयोस्तृप्त्या सर्वदे-

वास्तृप्यन्तीति भावः याभ्यां युवाभ्यां दध्यङ्ङाथर्वणो मधुसंज्ञकं ब्राह्मणमुवाच दध्यङ् ह वाऽश्राभ्यामाथर्वणो मधुनाम ब्राह्मणमुवाचेति [१४.१.४.१३.] श्रुतेः । कीदृशाभ्यां युवाभ्यां माधीभ्यां मधुब्राह्मणमीयाते तौ माध्यौ ताभ्याम् ई गतौ क्विप् । तथा माधूचीभ्यां मधुब्राह्मणमञ्चतः पूजयतस्तौ मधञ्चौ ताभ्यां मधग्भ्यामिति प्राप्ते ङीपि अलोपे मधूचीभ्यामिति लिङ्गव्यत्ययः आदिर्दीर्घश्छान्दसः ॥१८॥

कृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वोऽअधरं दिवि देवेषु धेहि ॥११॥

परोक्षिक् । आत्मावष्टार्णो तृतीयो द्वादशार्णः सा परोक्षिक् परोक्षिकपरत इत्युक्तेः । आद्ययोर्व्यूहः । हे घर्म कृदे त्वा कृदयस्वास्थाय त्वा त्वां स्तुम इति शेषः मनसे मनःशुद्ध्यर्थं त्वा त्वां स्तुमः दिवे स्वर्गप्राप्त्यै त्वा त्वां स्तुमः सूर्याय सूर्यतृप्त्यै त्वा त्वां स्तुमः कृदयं संशोध्य मनो निर्मलं कृत्वा दिवमस्मान्नीत्वा सूर्यं तर्पयेति भावः । किं च ऊर्ध्वः सावधानः सन् अधरमस्मदीयं यज्ञं दिवि द्युलोके वर्तमानेषु देवेषु धेहि स्थापय यज्ञे गते यजमानो गछत्येवेति भावः ॥११॥

a. पिता नोऽसि पिता नो बोधि नमस्तेऽअस्तु मा मा हिꣳसीः ।

b. ब्रह्मन्मस्त्वा सपेम पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाꣳ सꣳस्तनूभिः सꣳस्तनूस्त्वा भूयासम् ॥२०॥

ऋग्गायत्री । हे महावीर त्वं नोऽस्माकं पितासि पालको भवसि पितेव नोऽस्मान् बोधि बोधय सर्वथा नमस्ते अस्तु मा मां मा हिंसीः मा जहि ॥ ॥ महावीरोपस्थानं समाप्तम् ॥ ॥ का° [२६.४.१३.] ब्रह्मन्मत्त इत्येनां वाचयति । महावीरमीक्षमाणामपनीतशिरोवस्त्रां घर्मं पश्यन्तीं पत्नीमध्वर्युर्वाचयतीत्यर्थः ॥ ऋचां त्रिष्टुप् घर्मदेवत्या पत्न्याशीः । हे घर्म वयं त्वा त्वां सपेम सपतिः स्पृशतिकर्मा मैथुनाय त्वामुपस्पृशामः । कीदृशा वयं ब्रह्मन्मतः ब्रह्मा विद्यते येषां ते ब्रह्मन्मतः ब्रह्मा रेतसामधिकारी तत्सहिताः मैथुनार्थोपस्पर्शे वीर्याधिष्ठातापेक्षितोऽत एतद्युताः (21,) । अतः पुत्रान् पशून् च मयि विषये त्वं धेहि स्थापय प्रजामुत्त-

रोत्तरवंशवृद्धिमस्मासु धेहि स्थापय । किं च पत्या (22.) भर्त्रा सहारिष्टा अनुपहिंसिता अहं भूयासं भवेयम् भर्तृमती चिरं जीवेयमित्यर्थः । वृषा वै प्रवर्ग्यो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियतऽइति [१४. १. ४. १६.] श्रुतेः ॥ २० ॥

a. अर्कः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।

b. रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २१ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥

का° [२६. ४. १४.] अर्कः केतुनेति दक्षिणꣳ रौहिणं जुहोति । उपस्थानगानयोः समाप्तौ रौहिणकवन्या स्रुचा दक्षिणं रौहिणं पुरोडाशं सर्वहुतं जुहोतीत्यर्थः ॥ घर्मदेवत्ये यजुषी सामानुष्टुभौ । केतुः प्रज्ञा कर्म वा केतुना प्रज्ञया कर्मणा वा सहितमर्कः दिनं जुषतां रौहिणकोमेन प्रीयताम् कीदृशमर्कः ज्योतिषा स्वकीयेनैव तेजसा सुज्योतिः शोभनं ज्योतिर्यस्य तत् विशिष्टतेजस्कम् स्वाहा एतद्धविः सुहुतमस्तु । रोहति स्वर्गं यजमानो याभ्यां तौ रौहिणौ अग्न्यादित्यौ अहोरात्रे वा इमौ लोकौ वा चक्षुषी वा शिरः प्रवर्ग्यो रौहिणौ चक्षुषी (23.) तत्र दधातीत्यादिरौहिणप्रशंसा श्रुतौ [१४. २. १. १-५.] ज्ञेया ॥ का° [२६. ४. १४.] रात्रिरिति सायम् । सायंकालीने प्रवर्ग्ये रात्रिरिति मन्त्रेण द्वावपि प्रवर्ग्यौ यथाकालं जुहोतीत्यर्थः ॥ केतुना सहिता रात्रिः जुषतां प्रीयताम् ज्योतिषा कृत्वा सुज्योतिरित्युक्तम् ॥ २१ ॥

श्रीमन्महीधरकृते वेददीपे हरिप्रिये (24.) । अर्क्यादिरौहिणान्तोऽयं सप्तत्रिंशो निरूपितः ॥ ३७ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १-४ [वह्नियो] - १० ॥ १-१० ॥ ॥ II. ॥ ११-१३ ॥ ११-१३ ॥

III. ॥ १४-१७ ॥ १४-१७ ॥ १८. ११ ॥ १८ ॥ २० [- पश्चून्मयि धेह्यरिष्टा° -] ॥ १९ ॥ २१ ॥ २० ॥ ॥ त्र्यनुवाकेषु विंशतिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥

I. a. देवस्य᳕ त्वा सवितुः᳕ प्रसः᳕ । b. आदद᳕ेऽदित्यै᳕ रास्ना᳕सि ॥१॥

श्रीगणेशाय नमः (1.) ॥ का° [२६.५.१.] देवस्य त्वेति रज्जुसंदानमादायेडऽएहीति गामाह्वयति नाम्ना च त्रिरुच्चैरपरेण गार्हपत्यं गच्छन् । अधर्युर्देवस्य त्वेति रज्जुसंदानमादाय गार्हपत्यस्य पश्चाद्गच्छन् इडऽएहीति वाक्यत्रयेण घर्मदुघां गामाह्वयति असावेहीति गोर्नाम्ना चोच्चैस्त्रिवारमाह्वयतीति सूत्रार्थः ॥ रज्जुर्देवत्यं यजुः प्राजापत्या गायत्री । हे रज्जो सवितुर्देवस्याज्ञायां वर्तमानोऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वामाददे गृह्णामि यतः त्वमदित्यै अदित्या देवमातुः रास्ना रसना मेखलासि भवसि षष्ठ्यर्थे चतुर्थी ॥१॥

a. इडऽएहि᳕ । b. अदि᳕तऽएहि᳕ । c. सर᳕स्वत्येहि᳕ । d. असा᳕वेहि᳕ । e. असा᳕वेहि᳕ । f. असा᳕वेहि᳕ ॥२॥

हे इडे (2.) मानवि एहि आगच्छ हे अदिते देवमातः एहि हे सरस्वति वाक् एहि । अतस्मिंस्तद्बुद्धस्तत्सादृश्यार्थः । इडा हि गौरदितिर्हि गौः सरस्वती हि गौरिति [१४.२.१.७.] श्रुतेः ॥ नाम्ना त्रिरुच्चैराह्वयति असौ धवलि एहि एवं त्रिः ॥२॥

a. अदि᳕त्यै रास्ना᳕सीन्द्राण्याऽउष्णी᳕षः । b. पूषा᳕सि । c. घर्मा᳕य दीष्व ॥३॥

का° [२६.५.३.] अदित्यै रास्नेति गां पाशेन प्रतिमुच्य स्थूणायां बद्ध्वा पूषासीति वत्समुत्सृजति । आगतां गामदित्याऽइति मन्त्रेण पाशेन बद्ध्वा तं पाशं स्तम्भे बद्ध्वा पूषासीति वत्सं मुञ्चतीत्यर्थः ॥ हे रज्जुपाश त्वमदित्यै रास्ना रसनासि इन्द्राण्यै इन्द्रपत्न्याः उष्णीषः शिरोवेष्टनमसि एतेन पाशमिन्द्राण्युष्णीषं करोतीत्यर्थः तमेवैनमेतत्करोतीति [१४.२.१.८.] श्रुतेः ॥ वत्सं मुञ्चति पूषासि दैव्यनुष्टुप् वत्सो देवता हे वत्स त्वं पूषा वायुरसि वायुर्यथा वृष्टिमाप्याययति तथा त्वं प्रस्रवेण पय आप्याययस्वेति भावः अयं वै पूषा योऽयं पवतऽएष हीदꣳ सर्वं पुष्यत्येष उ प्रवर्ग्य इति [१४.२.१.९.] श्रुतेः ॥ का° [२६.५.४.] संदाय घर्माय दीष्वेति वत्समुन्नयति । धेनुं रज्ज्वा पश्चिमपादयोर्बद्ध्वा वत्समपाकरोतीत्यर्थः ॥ दैवी

पङ्क्तिः वत्सो देवता हे वत्स घर्माय घर्मार्थं दीर्घ देहि पयः पयः शेषय मा सर्वं पासीरित्यर्थः दी दाने वक्लं छन्दसीति [पा° २. ४. ७३.] शपो लुक् ॥ ३ ॥

a. अश्विभ्यां पिन्वस्व । b. सरस्वत्यै पिन्वस्व । c. इन्द्राय पिन्वस्व ।
d. स्वाहेन्द्रवत् । e. स्वाहेन्द्रवत् । f. स्वाहेन्द्रवत् ॥ ४ ॥

का° [२६. ५. ५.] अश्विभ्यां पिन्वस्वेति पिन्वने दोग्धि । पिन्वने पात्रे प्रतिमल्लं गां दोग्धीत्यर्थः ॥ अश्विभ्यां पिन्वस्व इन्द्राय पिन्वस्व यजुर्गायत्र्यौ सरस्वत्यै पिन्वस्व यजुरनुष्टुप् लिङ्गोक्ता देवताः । हे पयः अश्विभ्यामर्थाय त्वं पिन्वस्व सम्प्लवस्व सरस्वत्यै च पिन्वस्व अश्विनौ वाऽऽहुतयज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणातीति श्रुतिः [१४. २. १. १३.] सरस्वत्या वाचा कृत्वा इन्द्राय यज्ञशिरोऽश्विभ्यां संहितमिति तयोरर्थे ह्यस्वेति भावः ॥ का° [२६. ५. ६.] स्वाहेन्द्रवदिति विप्रुषोऽभिमन्त्रयते । पिन्वनपतितान्पयःकणानभिमन्त्रयतऽइत्यर्थः ॥ यजुर्ऋगती विप्रुषो देवता । यत् दुह्यमाने स्कन्नं तत्स्वाहा सुकृतमस्तु इन्द्रवत् इन्द्रसंयुक्तं चास्तु ॥ ४ ॥

a. यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः ॥
b. उर्वन्तरिक्षमन्वेमि ॥ ५ ॥

का° [२६. ५. ७.] यस्ते स्तन इति स्तनमालभते । गोस्तनानालभते ज्ञातावेकवचनमित्यर्थः ॥ वाग्देवत्या त्रिष्टुप् दीर्घतमोदृष्टा । हे सरस्वति तं स्तनमिहास्मिन्स्थाने धातवे धेटू पाने तुमर्थे तवेप्रत्ययः पानार्थमकः कुरु मम पानाय प्रयच्छेत्यर्थः लोडर्थे लङ् शपि लुप्ते गुणः । तं कम् यस्ते तव स्तनः स्तन इव स्तनः (3.) शशयः शेते इति शशयः अचप्रत्यये द्वित्वम् पूर्वस्यात्वं च छान्दसम् सुप्त इवास्ते अन्यैरनुपभुक्तत्वात् यस्ते स्तनो निहितो गुहायामिति [१४. २. १. १५.] श्रुतेः । यश्च स्तनो मयोभूः मयः सुखं भावयति प्रापयति सर्वभूतानामिति मयोभूः । यश्च रत्नधाः रत्नानि दधाति रत्नधाः रमणीयानां धनानां धारयिता । यश्च

वसुवित् वसु धनं विन्दति वेत्ति वा वसुवित् । यश्च सुदत्रः सुष्ठु ददातीति सुदत्रः दाता धनवानन्यो दातुं न शक्नोति त्वत्स्तनस्तु धनवान्दाता चेति अन्येभ्य आधिक्यम् । किं च येन स्तनेन विश्वा विश्वानि सर्वाणि वार्याणि वरणीयानि वस्तूनि त्वं पुष्यसि पुष्णासि तं स्तनं मत्पानाय प्रयच्छेत्यर्थः ॥ का० [२६.५.११.] उपद्रव पयसेत्युच्यमाने गच्छत्युर्वन्तरिक्षमिति । उपद्रवेति मन्त्रे क्रोत्रोच्यमाने उर्विति मन्त्रेणाधर्युर्गोसमीपाद्गार्हपत्यं प्रति गच्छतीत्यर्थः ॥ प्राजापत्या गायत्री । विशालमन्तरिक्षमनु एमि गच्छामि ॥५॥

a. गायत्रं छन्दोऽसि । b. त्रैष्टुभं छन्दोऽसि । c. द्यावापृथिवीभ्यां त्वा परिगृह्णामि । d. अन्तरिक्षेणोपयच्छामि । e. इन्द्राश्विना । f. मधुनः सारघस्य घर्मं पात वसवो यजत वाट् । g. स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥६॥

का० [२६.५.१२.] परीशासावादत्ते गायत्रं छन्दोऽसीति प्रतिमन्त्रम् । गायत्रमिति मन्त्राभ्यां परीशासौ (4.) गृह्णातीत्यर्थः ॥ यजुर्गायत्र्यौ परीशासौ देवते । हे परीशास त्वं गायत्रं छन्दोऽसि गायत्र्येव गायत्रं स्वार्थेऽण् गायत्रीछन्दोरूपोऽसि । त्रिष्टुबेव त्रैष्टुभं त्रिष्टुप्छन्दरूपोऽसीति द्वितीयम् ॥ का० [२६.५.१४.] ताभ्यां महावीरं परिगृह्णाति द्यावापृथिवीभ्यां त्वा परिगृह्णामीति । ताभ्यां परीशासाभ्यां महावीरमादत्तऽइत्यर्थः ॥ यजुर्जगती महावीरो देवता । हे महावीर द्यावापृथिवीभ्यां द्युभूमिभ्यां कृत्वा (5.) त्वा त्वां परिगृह्णामि परीशासयोर्द्यावाभूमी अध्यस्ते महावीरे चादित्योऽध्यस्तः तथा च श्रुतिः [१४.२.१.१६.] इमे वै द्यावापृथिवी परीशासावादित्यः प्रवर्ग्योऽमुं तदादित्यमाभ्यां द्यावापृथिवीभ्यां परिगृह्णातीति ॥ का० [२६.५.१५.] उद्यम्य मुञ्जवेदेनोपमृज्योपयमन्योपगृह्णात्यन्तरिक्षेणोपयच्छामीति । परीशासगृहीतं महावीरमूर्ध्वं कृत्वा मुञ्जकृतवेदेन संमार्ज्योपयमन्या स्रुचा तं गृह्णातीत्यर्थः ॥ यजुर्बृहती घर्मो देवता । हे घर्मान्तरिक्षेनाकाशेनोदरेण वा त्वामुपयच्छामि निगृह्णामि उपयमन्यन्तरिक्षत्वेनोदरत्वेन च स्तूयते तथा च श्रुतिः [१४.२.१.१७.] अन्तरिक्षं वाऽउपयमन्यन्तरिक्षेण खलु सर्वमुपयतमथोऽउदरं वा उप-

यमन्युदरेण क्रीदꣳ सर्वमन्नाद्यमुपयति (6.) तस्मादाक्रान्तरिक्तेणोपयन्नामीति ॥ का॰ [२६. ५. १६.] अज्ञापयत्सावसिच्य शान्ते गोः पयोऽवनयतीन्द्राश्विनेति । अज्ञादुग्धेन महावीरं तूष्णीं सिक्त्वा शान्ते क्षीणज्वाले तत्र गोपयः सिञ्चतीत्यर्थः ॥ ब्राह्मी गायत्री विश्वे देवा देवताः । हे इन्द्र हे अश्विना अश्विनौ हे वसवः वासयितारो यूयं मधुनो मधुरस्य पयसो घर्मं रसं पात पिबत पिबादेशाभावश्छान्दसः कीदृशस्य मधुनः सारघस्य सरघा मधुमक्षिका अत्र सरघा मधुकृतो भ्रमरा-इव ऋत्विजः तैः कृतं सारघं तस्य । घर्मं पातेति रसं पातेत्येवैतदाहेति [१४. २. १. २०.] श्रुतिः । किं च हे इन्द्रादयः वाट् वषट्कारेण स्वाहा सुष्ठु हुतं सारघं मधु सूर्यस्य रश्मये किरणाय यूयं यजत दत्त यजतिर्दानार्थः वषट्कृतꣳ हुतमेवमस्यैतद्भवतीति श्रुतेः [१४. २. १. २०.] । किम्भूताय रश्मये वृष्टिवनये वृष्टिं वनति ददाति वृष्टिवनिस्तस्मै यो रश्मिर्वृष्टिं दत्ते तस्मै मधु दत्तेत्यर्थः । तथा च श्रुतिः [१४. २. १. २१.] सूर्यस्य ह वाऽएको रश्मिर्वृष्टिवनिर्नाम येनेमाः सर्वाः प्रजा बिभर्ति तमेवैतत्प्रीणातीति ॥ ६॥

a. समुद्राय त्वा वाताय स्वाहा । b. सरिराय त्वा वाताय स्वाहा ।
c. अनाधृष्याय त्वा वाताय स्वाहा । d. अप्रतिधृष्याय त्वा वाताय स्वाहा ।
e. अवस्यवे त्वा वाताय स्वाहा । f. अशिमिदाय त्वा वाताय स्वाहा ॥७॥

का॰ [२६. ६. १.] प्रैतु ब्रह्मणस्पतिरित्युच्यमाने समुद्राय वेति वातनामानि जपति गार्हपत्यावनीयम् । प्रैवेति क्रोत्रोच्यमाने आहवनीयं प्रति गार्हपत्यधर्युः समुद्रायेत्यादीनि द्वादश वातनामानि स्वरेण जपतीत्यर्थः ॥ द्वादश यजूंषि वातनामदेवत्यानि । हे घर्म वाताय त्वा त्वां स्वाहा जुहोमि कीदृशाय वाताय समुद्राय समुद्रवन्त्युद्रवन्ति सर्वाणि भूतानि यस्मात्स समुद्रस्तस्मै अयं वै समुद्रो योऽयं पवतऽएतस्माद्वै समुद्रात्सर्वे देवाः सर्वाणि भूतानि समुद्रवन्ति तस्माऽएवैनं जुहोतीति [१४. २. २. २.] श्रुतेः ॥ सरिराय । सह ईरते-गच्छन्ति सर्वभूतानि सिद्धार्थानि यस्मात् सरिरस्तस्मै वाताय घर्म त्वां जुहोमि अयं वै सरिरो योऽयं पवतऽएतस्माद्वै सरिरात्सर्वे देवाः सर्वाणि भूतानि सहेरतऽइति [१४. २. २. ३.] श्रुतेः ॥ अ-

नाधृष्याय । न आधर्षितुं पराभवितुं शक्योऽनाधृष्यः तस्मै । अप्रतिधृष्याय । न प्रतिधर्षितुं प्रतियोद्धुं शक्योऽप्रतिधृष्यस्तस्मै वातायेत्युक्तम् अयं वाऽअनाधृष्यो ऽप्रतिधृष्यो योऽयं पवतऽइति [१४.२.२.४.] श्रुतेः ॥ अवस्यवे । अवो रक्षणमिच्छति अवस्यति अवस्यतीत्यवस्युः सुप आत्मनः क्यच् क्याच्छन्दसीति [पा° ३.२.१७०.] उप्रत्ययः अवनशीलाय ॥ अशिमिदाय । क्लेशात्मकं कर्म शिमि तन्न ददातीत्यशिमिदस्तस्मै क्लेशनिवर्तकाय वाताय अयं वाऽअवस्युरशिमिदो योऽयं पवतऽइति [१४.२.२.५.] श्रुतेः ॥७॥

a. इन्द्राय त्वा वसुमते रुद्रवते स्वाहा । b. इन्द्राय त्वादित्यवते स्वाहा ।
c. इन्द्राय त्वाभिमातिघ्ने स्वाहा । d. सवित्रे त्वऽऋभुमते विभुमते वाजवते स्वाहा । e. बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥८॥

वसवो विद्यन्ते यस्य स वसुमान् रुद्रा विद्यन्ते यस्य रुद्रवान् तस्मै वसुयुताय रुद्रयुतायेन्द्राय वाताय हे घर्म त्वां स्वाहा जुहोमि अयं वाऽइन्द्रो योऽयं पवत ऽइति [१४.२.२.६.] श्रुतेः ॥ आदित्या विद्यन्ते यस्य स आदित्यवान् तस्मै आदित्ययुक्तायेन्द्राय वाताय स्वाहा ॥ अभिमातीन्सपत्नान्हन्तीत्यभिमातिहा सपत्नो वाऽअभिमातिरिति [१४.२.२.८.] श्रुतेः शत्रुनाशकायेन्द्राय वाताय त्वां जुहोमि ॥ सूते स सविता तस्मै चेष्टयित्रे वाताय त्वां जुहोमि अयं वै सविता योऽयं पवत ऽइति [१४.२.२१.] श्रुतेः कीदृशाय ऋभुमते ऋभुरस्यास्ति ऋभुमान् विभुरस्यास्ति विभुमान् वाजोऽस्यास्ति वाजवान् आङ्गिरसस्य सुधन्वनस्त्रयः पुत्रा ऋभुविभुवाजास्तद्युक्ताय वाताय ॥ बृहस्पतये बृहतां महतां पतिर्वातस्तस्मै अयं बृहस्पतिर्योऽयं पवतऽइति [१४.२.२.१०.] श्रुतेः कीदृशाय विश्वदेव्यावते विश्वेषां देवानां समूहो विश्वदेव्यम् तदस्यास्ति विश्वदेव्यवान् तस्मै मत्ते सोमाश्वेन्द्रियविश्वदेव्यस्य मताविति [पा° ६.३.१३१.] दीर्घः सर्वदेवसहिताय जुहोमि ॥८॥

II. a. यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
b. स्वाहा घर्माय । c. स्वाहा घर्मः पित्रे ॥१॥

यमाय वायवे हे घर्म त्वां जुहोमि अयं वै यमो योऽयं पवतऽइति [१४. २. २. ११.] श्रुतिः । कीदृशाय यमाय अङ्गिरस्वते अङ्गिरसो मुनयोऽस्य सन्ति अङ्गिरस्वान् अयस्मयादीनि छन्दसीति [पा° १. ४. २०.] भसंज्ञायां सस्य विसर्गाभावः । पितृमते पितरोऽस्य सन्ति पितृमान् अङ्गिरःपितृयुताय वातायित्यर्थः ॥ ॥ वातनामानि समाप्तानि ॥ ॥ का° [२६. ६. २.] स्वाहा घर्मायेत्युपयमन्या सिञ्चति घर्मे । उपयमन्या स्रुचा स्रुक्स्थं घृतं घर्मे सिञ्चतीत्यर्थः ॥ घर्माय स्वाहा एतदाज्यं सुहुतमस्तु ॥ का° [२६. ६. ३.] स्वाहा घर्मः पित्रऽइति जपित्वातिक्रम्याश्रावयाह घर्मस्य यजेति । अपसव्यवान्दक्षिणास्यः स्वाहेति मन्त्रं स्वरेण जपित्वा सव्येन जत्रं स्पृष्ट्वा घर्महस्तोऽतिक्रम्याश्रावय घर्मस्य यजेत्याहेत्यर्थः ॥ स्वाहा घर्मः पित्रे पित्रर्थायास्तु ॥ १ ॥

विश्वा आशा दक्षिणसद्विश्वान्देवानयाडिह ।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥ १० ॥

का° [२६. ६. ४.] वषट्कृते जुहोति विश्वा आशा इति । वषट्कृते सति घर्मं जुहोतीत्यर्थः ॥ अश्विदेवत्यानुष्टुप् । इह यज्ञे दक्षिणासत् दक्षिणास्यां दिशि सीदति तिष्ठति दक्षिणासत् सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः दक्षिणतः स्थितोऽधर्युर्विश्वाः सर्वाः आशाः दिशो विश्वान् सर्वान् देवान् च अयाट् अयाक्षीत् यजेर्लुडि च्लेर्लोपे ट्वृपम् इष्टवान् दक्षिणतः स्थितो व्याहृतीर्जुहोति (7.) । अतो ब्रवीमि हे अश्विना अश्विनौ स्वाहाकृतस्य वषट्कारानन्तरं हुतस्य मधोर्मधुरास्वादस्य घर्मं युवां पिबतम् कर्मणि षष्ठी ॥ १० ॥

a. दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः ।
b. स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥ ११ ॥

का° [२६. ६. ५.] दिवि धा इति त्रिरुत्कम्पयति । महावीरं त्रिरूर्ध्वं कम्पयति सकृन्मन्त्रेण द्विस्तूष्णीमिति सूत्रार्थः ॥ यजुर्घर्मदेवत्यं सामोष्णिक् । हे महावीर इमं मदीयं यज्ञं त्वं दिवि द्युलोके धाः धेहि स्थापय इमं यज्ञं दिवि धा इति पुनरुक्तिरादरार्था अभ्यासे भूयांसमर्थं मन्यन्तऽइति [निरु° १०. ४२.] वचनात् ॥

का° [२६. ६. ६.] स्वाहाग्नयऽइत्यनुवषट्कृते । अनुवषट् स्वाहेति मन्त्रेण घर्मं जुहोतीत्यर्थः ॥ यज्ञियाय यज्ञार्हितायाग्नये स्वाहा सुहुतमस्तु यजुर्भ्यः सकाशात् अस्माकं शं सुखमस्तु ॥ ११ ॥

अश्विना घर्मं पातꣳ हार्द्वानमर्हद्दिवाभिरूतिभिः ।
तल्पायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥

का° [२६. ६. ७.] अश्विना घर्ममिति ब्रह्मानुमन्त्रयते । ब्रह्मा घर्ममभिमन्त्रयत ऽइत्यर्थः ॥ स्वराडुष्णिक् । अश्विनावादित्यो द्यावापृथिव्यौ च देवताः । हे अश्विना अश्विनौ युवां घर्मं पातं पिबतम् काभिः ऊतिभिरवनैः निमित्तैः अवनं कृत्वा पिबतमित्यर्थः कीदृशीभिरूतिभिः अरुर्दिवाभिः (8.) अरुः शब्देन प्रातःकालः दिवाशब्देन सायंकालः प्रातःसायंकालोपलक्षिताभिः प्रवर्ग्यकालः स एव यतः । कीदृशं घर्मं हार्द्वानम् वा गतिगन्धनयोः ल्युट् हृदि वानं गमनं यस्य स हृद्वानः हृद्वान एव हार्द्वानस्तम् स्वार्थेऽण् हृद्यप्रियमित्यर्थः । एवं घर्मपानायाश्विनौ सम्प्रार्थ्य तत्साहाय्याय सूर्यादीन्नमति तल्पायिणे नमः तन्यते तल्पम् पटरचनाय तुरीशलाकाप्रोतास्तन्तवस्तल्पमुच्यते तद्वन्नभसि कालचक्रमपि तल्पमुच्यते तथा चाभिधानम् (9.) तल्पे राष्ट्रे परश्छन्दाप्रधानयोः (10.) अगदे कुटुम्बकृत्ये तन्तुवाने परिच्छदे श्रुतिशाखान्तरे शास्त्रे करणे द्यूतसाधके (11.) इतिकर्तव्यतातन्त्रयोरिति तल्पे कालचक्रे एति निरन्तरं गच्छति तल्पायी तस्मै आदित्याय नमोऽस्तु एष वै तल्पायी य एष तपत्येष ह्येमां लोकाँस्तल्पमिवानुसंचरतीति [१४. २. २. २२.] श्रुतेः । द्यावापृथिवीभ्यामुभाभ्यां लोकाभ्यां तदधिष्ठात्रीभ्यां नमः ॥ १२ ॥

अपातामश्विना घर्ममनु द्यावापृथिवीऽअमꣳसाताम् ।
इदैव रातयः सन्तु ॥ १३ ॥

का° [२६. ६. ८.] अपातामिति यजमानः । यजमानः घर्ममभिमन्त्रयतऽइत्यर्थः । ककुबुष्णिक् अश्विदेवत्या मध्यमः पादो द्वादशार्णाः आद्यन्तावष्टार्णौ सा ककुप् मध्यमश्चेत्ककुबित्युक्तेः । अश्विना घर्ममपातामपिबतां लुङ् द्यावापृथिवी अन्वमंसाताममनुमतवत्यौ साधु कृतमिति अनुमेनाते इत्यर्थः अत एवाश्यादिप्रसादात् इदै-

वास्मद्गृहे स्थितानामस्माकं रातयो धनानि सन्तु इहैव रातयः सन्वितीहैव नो धनानि सन्वित्येवैतदाहेति [१४.२.२.२६.] श्रुतेः ॥ १३ ॥

a. इषे पिन्वस्व । b. ऊर्जे पिन्वस्व । c. ब्रह्मणे पिन्वस्व । d. क्षत्राय पिन्वस्व । e. द्यावापृथिवीभ्यां पिन्वस्व । f. धर्मासि सुधर्मा । g. अमेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ १४ ॥

का° [२६.६.९.] इषे पिन्वस्वेति पिन्वमानमनुमन्त्रयते । पिन्वमानमतितप्तं धर्ममभिमन्त्रयतऽइत्यर्थः ॥ ऋचां पङ्क्तिः धर्मदेवत्या । हे पिन्वमान धर्म इषे वृष्टै पिन्वस्व पुष्टो भव वृष्ट्यर्थम् ऊर्जेऽन्नाय पिन्वस्व अन्नं वर्धय ब्रह्मणे ब्राह्मणेभ्यः पिन्वस्व क्षत्राय क्षत्रियेभ्यः पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ब्राह्मणक्षत्रियद्यावापृथिवीस्तर्पयेत्यर्थः ॥ का° [२६.६.१०.] धर्मासीत्युत्क्रामत्युत्तरपूर्वार्धम् । ऐशानीं दिशं प्रत्युत्क्रामतीत्यर्थः ॥ यजुर्गायत्री धर्मदेवत्या । हे धर्म हे सुधर्म (12.) सुष्ठु धारयतीति सुधर्मः हे साधुधरणशील त्वं धर्म असि सर्वजगतो धारणमसि आकृतिपरिणामद्वारेण सर्वं धरसीत्यर्थः ॥ का° [२६.६.११.] अमेन्यस्मेऽइति खरे करोति । महावीरं खरे आसादयतीत्यर्थः ॥ ऋग्बृहती धर्मदेवत्या । हे धर्म अमेनि मिञ् हिंसायां मिनोति हिनस्तीति मेनिः न मेनिरमेनिः सुपां सुलुगिति [पा° ७.१.३९.] सुलोपः अमेनिः अहिंसन् अक्रुध्यन् सन् अस्मे अस्मासु नृम्णानि धनानि धारय स्थापय नृम्नमयतीति नृम्णम् अक्रुध्यन्नो धनानि धारयेति [१४.२.२.३०.] श्रुतिः ब्रह्म क्षत्रं विशं च धारय विप्रादीनस्मद्वशान्कुर्वित्यर्थः ॥ १४ ॥

a. स्वाहा पूष्णे शरसे । b. स्वाहा द्यावेभ्यः । c. स्वाहा प्रतिरवेभ्यः । d. स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपावभ्यः । e. स्वाहा द्यावापृथिवीभ्याम् । f. स्वाहा विश्वेभ्यो देवेभ्यः ॥ १५ ॥

का° [२६.६.१२.] विकङ्कतशकलैर्जुहोति घर्मे न्यञ्य-न्यञ्य स्वाहा पूष्णे शरस ऽइति प्रतिमन्त्रम् । घर्मे नितरामञ्चा विकङ्कतशकलैर्घर्माज्यं जुहोति स्वाहा पूष्ण ऽइति प्रतिमन्त्रमित्यर्थः ॥ सप्त लिङ्गोक्तदेवतानि यजूंषि । शरःशब्दो दध्युपरिस्थ-

स्नेहवाचकः अत्र स्नेहमात्रवाची शरसे स्नेहकर्त्रे पूष्णे वाताय प्राणरूपाय स्वाहा सुकृतमस्तु । अवरꣳ स्वाहाकारं करोति परां देवतामिति [१४. २. २. ३२.] श्रुतेरादौ स्वाहाकारस्ततो देवतापदानि । अयं वै पूषा योऽयं पवतऽएष क्रीदꣳ सर्वं पुष्यत्येष ऽ प्राणः प्राणमेवास्मिन्नेतद्दधातीति [१४. २. २. ३२.] श्रुतिः ॥ गृह्णन्ति ते ग्रावाणः प्राणा विषयग्रहणशीलाः तेभ्यः स्वाहा प्राणा वै ग्रावाणः प्राणानेवास्मिन्नेतद्दधातीति [१४. २. २. ३३.] श्रुतिः ॥ प्रतिरुवन्ति शब्दं कुर्वन्ति प्रतिरमन्ते वा यान्प्राप्येति प्रतिरवाः प्राणाः तेभ्यः स्वाहा प्राणा वै प्रतिरवाः प्राणान्क्रीदꣳ सर्वं प्रतिरन्तमिति [१४. २. २. ३४.] श्रुतिः ॥ का° [२६. ६. १४.] चतुर्थमङ्कृतमुद्गृह्णन्नाणो दक्षिणतो बर्हिष्युपगूहति । चतुर्थं शकलमङ्कृतमेवोदीचीं पश्यन्वेदेर्दक्षिणभागे आतिथ्यावर्हिषि प्रवेशयतीत्यर्थः ॥ पितृभ्यः स्वाहा कीदृशेभ्यः ऊर्ध्वबर्हिर्भ्यः ऊर्ध्वं प्रागग्रं बर्हिर्येषां ते ऊर्ध्वबर्हिषः तेभ्यः सोमपाभ्य इत्यर्थः तथा घर्मपावभ्यः घर्मं पिवन्ति घर्मपावानः तेभ्यः स्वाहा ॥ द्यावापृथिवीशब्देन प्राणोदानावुच्येते ताभ्यां सुकृतमस्तु प्राणोदानौ वै द्यावापृथिवी प्राणोदानावेवास्मिन्नेतद्दधातीति [१४. २. २. ३६.] श्रुतिः ॥ विश्वेभ्यो देवेभ्यः स्वाहा प्राणा वै विश्वे देवाः प्राणानेवास्मिन्नेतद्दधातीति [१४. २. २. ३७.] श्रुतिः ॥ १५ ॥

a. स्वाहा॑ रु॒द्राय॑ रु॒द्रक्ष॑तये । b. स्वाहा॒ सं ज्योति॑षा॒ ज्योतिः॑ ।

c. अ॒र्कः के॒तुना॑ जुषता॒ꣳ सुज्योति॒र्ज्योति॑षा॒ स्वाहा॑ ।

d. रात्रिः॑ के॒तुना॑ जुषता॒ꣳ सुज्योति॒र्ज्योति॑षा॒ स्वाहा॑ ।

e. मधु॑ कृ॒तमि॑न्द्र॒तमे॑ऽअग्नावश्याम॑ ते देव घर्म॒ नमस्ते॑ऽअस्तु मा मा॑ हि॒ꣳसीः ॥ १६ ॥

का° [२६. ६. १५.] सप्तमं च सर्वलेपाक्तं दक्षिणोद्गृह्णन्नाणः प्रतिप्रस्थात्रे प्रयच्छति । मूलाग्रावधि घर्मघृताभ्यक्तं सप्तमं शकलं दक्षिणं पश्यन्प्रतिप्रस्थात्रे ददातीत्यर्थः ॥ रुद्र इति स्तोतृनामसु [निघ° ३. १६.] पठितम् रुद्रैः स्तोतृभिर्ह्रियते आह्रियतऽइति रुद्रक्षतिः तस्मै स्तोतृस्तुताय रुद्राय सुकृतमस्तु ॥ एवं सप्तयजुषां मध्ये चतुर्थसप्तमयोर्विनियोग उक्तः शेषैः पञ्चशकलैराज्यहोमः ॥ का° [२६. ६. १७.] स्वाहा सं

ज्योतिषेत्युपयमन्यामासिञ्चति घर्म्यम् । घर्मसम्बन्धि घृतमुपयमन्यामासिञ्चति पूर्वं स्रुक्स्थं घर्मे नीतमधुना घर्मस्थं स्रुचि नयतीत्यर्थः ॥ पयोदेवत्यम् यजुरनुष्टुप् । ज्योतिः घर्मस्थं घृतं ज्योतिषोपयमनीस्थेन घृतेन संगच्छताम् स्वाहा सुकृतमस्तु ज्योतिर्वाऽइतरस्मिन्पयो भवति ज्योतिरितरस्यां ते क्षेतऽउभे ज्योतिषी संगच्छेते इति [१४. २. २. ४०.] श्रुतेः पयो देवता ॥ का° [२६. ६. १८.] मल्लक्रमेणोत्तरꣳ रौक्मिणं जुहोति । उत्तरं रौक्मिणं मल्लक्रमेण सं ज्योतिषा ज्योतिरेतन्मल्लकर्मणोऽनन्तरं जुहोतीत्यर्थः ॥ अक्तः केतुना । व्याख्याते यजुषी [३७. २१.] ॥ का° [२६. ६. २०.] अग्निहोत्रावृता जुहुवा वाजिनवद्भक्षयन्ति मधु कृतमिति । उपयमन्यामानीतं घर्माज्यमग्निहोत्रहोमप्रकारेण समल्लकं जुहुवा वाजिनवदुपहवप्रार्थनपूर्वकं भक्षयन्ति होत्रधर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्रग्नीध्यजमानाः ॥ घर्मदेवत्यम् ऋग्बृहती । अग्नौ मधु मधुरं घर्माज्यं कृतमस्माभिः कीदृशेऽग्नौ इन्द्रतमे इन्द्रं वीर्यमस्यास्ति इन्द्रवान् अत्यन्तमिन्द्रवानिन्द्रतमः वत्प्रत्यये लोपः वीर्यवत्तमे इत्यर्थः मधु कृतमिन्द्रियवत्तमेऽग्नावित्येवैतदाहेति [१४. २. २. ४२.] श्रुतेः । हे घर्म हे देव ते तव कृतशेषमंशं वयमश्याम भक्षयाम अश्नोतेर्विकरणव्यत्ययेन बहुलं छन्दसीति [पा° २. ४. ७३.] शपो लुक् लिङि उत्तमबहुवचने । ते तुभ्यं नमोऽस्तु मा मां हिंसीः आत्मनः परित्राणमर्थयते ॥ १६ ॥

a. b. अभीमं महिमा दिवं विप्रो बभूव सप्रथाः । उत अवसा पृथिवीꣳ सꣳसीदस्व महाँ२ऽअसि रोचस्व देववी° ॥ १७ ॥

का° [२६. ६. २५.] अभीममिति महावीरम् । प्रचरणीयं घर्ममासन्यां करोति मल्लेणेतराणि तूष्णीम् ततः शान्तिपाठ इत्यर्थः ॥ गायत्रीबृहत्यौ मध्येऽवसानहीने अभीमं गायत्री संसीदस्व बृहती यद्वावसानत्रयोपेतातिशक्वरी षष्यक्षराग्निदेवत्या एकैव ऋक् ऋग्द्वयं वेत्यर्थः । हे अग्ने तव महिमा इमं दिवमभिबभूव अभिभवति छन्दसि लुङ्लिङिटः [पा° ३. ४. ६.] दिवशब्दः पुल्लिङ्गः अर्धर्चादिवात् । कीदृशो महिमा विप्रः विशेषेण प्राति पूरयति सर्वमिति विप्रो मेधावी । सप्रथाः प्रथनं प्रथो विस्तारस्तेन सहितः सप्रथाः । उतापि च अवसा धनेन यशसा वा

पृथिवीमभिभवतीत्यनुषङ्गः ॥ संसीदस्वेति व्याख्यातिकादशेऽध्याये षट्त्रिंशी कण्डिका तत्र शोचस्वेति पाठेऽत्र रोचस्वेति अर्थ एक एव ॥ १७॥

a. या तें घर्म दिव्या शुग्या गायत्र्याꣳ हविर्धानें । सा तऽआप्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥

b. या तें घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे । सा तऽआप्या° ॥

c. या तें घर्म पृथिव्याꣳ शुग्या जगत्याꣳ सदस्या । सा तऽआप्या° ॥ १८॥

का° [२६. ७. ४.] चतुर्गृहीतेनाभिजुहोति या ते घर्म दिव्या शुगिति प्रतिमन्त्रम् । अधर्युराज्यं संस्कृत्य चतुर्गृहीतं कृत्वा तेन जुहोति अग्नीधा ध्रियमाणेषु त्रिषु शलाकात्रिकेषु त्रिभिर्मन्त्रैस्तृतीयेनोपविश्येत्यर्थः ॥ त्रीणि यजूंषि घर्मदेवत्यानि ऋक्पङ्क्त्यः । हे घर्म या ते तव दिव्या दिवि भवा शुक् दीप्तिः या गायत्र्यां छन्दसि प्रविष्टा या हविर्धाने यज्ञगृहे प्रविष्टा सा ते तव शुक् आप्यायतां वर्धताम् निष्ट्यायतां (13.) संहता दृढा भवतु ष्ट्यै स्त्यै शब्दसंघातयोः लोट् तस्यै शुचे ते तुभ्यं च स्वाहा ॥ हे घर्म या ते तवान्तरिक्षे शुक् त्रिष्टुभि छन्दसि आग्नीध्रे सदने च प्रविष्टा सा तऽइति पूर्ववत् ॥ या ते हे घर्म पृथिव्यां शुक् जगत्यां छन्दसि प्रविष्टा कीदृशी सदस्या सदसि प्रविष्टा यज्ञगृहे स्थिता सा त ऽइत्युक्तम् ॥ १८॥

III. क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि । विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ॥ १९॥

का° [२६. ७. ६.] क्षत्राय त्वेति निष्क्रमणं पुरस्तात्पत्नीमन्तर्धाय । सोमानन्तरमधर्युः पत्नीमग्रे कृत्वा शालायाः निष्क्रामतीत्यर्थः ॥ उपरिष्टाद्धुती घर्मदेवत्या । हे घर्म वयं त्वा त्वामनुक्रामाम अनुगच्छाम तं ब्रह्मणः तन्वं शरीरं पाहि पालय । किमर्थमनुगमनम् क्षत्रस्य क्षत्रियस्य दैवस्य सूर्यस्य परस्पाय परमपालनाय परःशब्दोऽव्ययम् पर उत्कृष्टं पायते रक्ष्यतऽइति परस्पम् तस्मै एतद्वै दैवं क्षत्रं य एष तपतीति [१४. ३. १. १.] श्रुतेः । किं च विशः यज्ञस्य धर्मणा धारणेन

निमित्तेन वयं त्वामनुक्रामाम यज्ञो वै विष्णुस्य त्वारिष्ट्यै इति [१४.३.१.१.] श्रुतेः । किमर्थम् नव्यसे सुविताय नवीयसे नूतनाय सुगताय सुप्रसूताय कर्मणे कर्मसिद्ध्यर्थं त्वामनुगच्छामित्यर्थः सुष्ठु इतं सुवितम् इण् गतौ क्तः उपसर्गस्योवङादेशः यद्वा षू प्रेरणे सूयते प्रेर्यते सुवितम् इडागमे धातोरुवङ् ॥ ११॥

चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः । अप द्वेषोऽअप ह्वरोऽन्यव्रतस्य सश्चिम ॥ २० ॥

का० [२६.७.१४.] नाभिस्पृशं प्रवृञ्जनीयं निदधाति चतुःस्रक्तिरिति । प्रवृञ्जनीयं महावीरमुत्तरवेदौ नाभिलग्नं स्थापयतीत्यर्थः ॥ महाबृहती घर्मदेवत्या । स घर्मो नोऽस्माकं सर्वायुरस्तु सर्वं पूर्णमायुर्यस्मात्स सर्वायुः पूर्णायुःप्रदोऽस्त्वित्यर्थः पुनरुक्तिरादरार्था । कीदृशः सः चतुःस्रक्तिः चतस्रः स्रक्तयः कोणा दिग्रूपा यस्य सः एष वै चतुःस्रक्तिर्य एष तपति दिशो ह्येतस्य स्रक्तय इति [१४.३.१.१७.] श्रुतेः । तया ऋतस्य सत्यस्य यज्ञस्य वा नाभिः नह्यनं बन्धनस्थानम् । सप्रथाः सविस्तारः । विश्वायुः विश्वस्य जगतः आयुर्यस्मात् जगत आयुर्दाता । सप्रथाः सर्वतः प्रथयिता च । हे घर्म त्वत्प्रसादात् द्वेषः अप गच्छत्विति शेषः अस्मत्तो द्वेषः गच्छतु वीतरागाः स्यामिति भावः । ह्वर चलने ह्वरः चलनं जन्ममरणलक्षणं चास्मत्तो ऽपगच्छतु । वयमन्यव्रतस्य सश्चिम अन्यत् मनुष्यकर्मणः सकाशाद्भिन्नं व्रतं कर्म जगदनुग्रहरूपं यस्य सोऽन्यव्रतः परमात्मा तस्य कर्मणि षष्ठी सश्च सेवने धातुः अन्यव्रतं परमात्मानं सेवामहे सायुज्यं प्राप्नुम इति भावः अन्यद्वाऽएतस्य व्रतमन्यन्मनुष्याणामिति [१४.३.१.११.] श्रुतेः ॥ २० ॥

घर्मैतत्ते पुरीषं तेन वर्धस्व चा च प्यायस्व ।
वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ २१ ॥

का० [२६.७.३२.] आसेचनवत्ति पयसः पूरयति घर्मैतत्तऽइति । आसेचनं गर्तः तद्युतानि पात्राणि दुग्धेन पूरयति तानि सप्त महावीरत्रयं द्वे पिन्वने उपयमनी स्रुवश्चेत्यर्थः ॥ अनुष्टुप् घर्मदेवत्या । हे घर्म एतत्पयः ते तव पुरीषम् पृणाति पूरयति पुरीषं पूरयितृ अन्नम् अन्नं वै पुरीषमन्नमेवास्मिन्नेतद्दधातीति [१४.३.१.

२३.] श्रुतेः तेन पयसा वर्धस्व आप्यायस्व च भवत्प्रसादाद्वयं वर्धिषीमहि आप्यासिषीमहि चेति व्याख्यातम् [२. १४.] ॥ २१ ॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
सꣳ सूर्येण दिद्युतद्दधिर्निधिः ॥ २२ ॥

का° [२६. ७. १२.] त्रिः परिषिच्याचिक्रददिति । सामगानानन्तरमुत्सादनदेशे परिषिच्य वक्ष्यमाणं करोतीत्यर्थः ॥ परोक्षिक् घर्मदेवत्या । घर्मः सूर्यात्मना स्तूयते । वृषा आकृतिद्वारेण वृष्टिकर्ता घर्मः प्रवक्ष्यमानः सन् अचिक्रदत् क्रदि शब्दे पुनः पुनः शब्दमकरोत् । कीदृशः हरिः हरितवर्णः रसानां हर्ता वा एष वै वृषा हरिर्य एष तपत्येष उ प्रवर्ग्य इति [१४. ३. १. २६.] श्रुतिः । महान् प्रभावान् (14.) । मित्रो न दर्शतः न उपमार्थः मित्र-इव दर्शनीयः अत एव सूर्येण सह संदिद्युतत् सूर्यतुल्यो द्योतते द्युतेर्लुडि णिजन्तस्य रूपमडभावः सूर्यवत्सर्वं द्योतयतीत्यर्थः उदधिः उदकं धीयते यस्मिन् जलस्य धर्ता निधिः सुखानामिति शेषः सुखनिधिः ॥ २२ ॥

समित्रिया न आप ओषꣳ° ॥ २३ ॥

का° [२६. ७. ३७.] चात्वाले मार्जयन्ते सपत्नीकाः समित्रिया न इति । सपत्नीकाः ऋत्विग्यजमानाः चात्वाले मार्जनं कुर्वते । पत्न्या अपि मन्त्रपाठः ॥ व्याख्याता [६. २२. २०, ११. ३५, १२. ३६, २३.] ॥ २३ ॥

उद्वयं तमसस्परि स्वः पꣳ° ॥ २४ ॥

का° [२६. ७. ३८.] उद्वयमित्युत्क्रामत्युत्तरपूर्वार्धम् । ऐशानीं दिशं प्रति यजमानो गच्छतीत्यर्थः ॥ व्याख्याता [२०, २१. २७, १०. ३५, १४.] ॥ २४ ॥

a. एधोऽस्येधिषीमहि । b. समिदसि तेजोऽसि तेजो मयि धेहि ॥ २५ ॥

का° [२६. ७. ३५.] अनेपेक्षमेत्यैधोऽसीति समिधमादायाहवनीयेऽभ्यादधाति समिदसीति । यजमानः पश्चादनवलोकयन्नीशानदेशादेत्यैधोऽसीति मन्त्रेणैकां समिधं

गृहीत्वा समिदसीति मन्त्रेणाहवनीये दधातीत्यर्थः ॥ मन्त्रद्वयं व्याख्यातम् [२०.२३.] ॥ २५ ॥

यावंती द्यावापृथिवी यावंच्च सप्त सिन्धंवो वितस्थिरे ।
तावंत्तमिन्द्र ते ग्रहंमूर्जा गृह्णाम्यक्षितं मयिं गृह्णाम्यक्षितम् ॥ २६ ॥

का° [२६.७.५४.] यावती द्यावापृथिवीऽइति दधिघर्मग्रहणम् । सपवित्रायामग्निहोत्रहवण्यां दधिघर्मं गृह्णातीत्यर्थः ॥ ब्राह्मी उष्णिक् दधिघर्मदेवत्या इन्द्रदेवत्या च । हे इन्द्र ऊर्जा अन्नेन सह अक्षितमनुपक्षीणं ते तव ग्रहं तावन्तं तत्परिमाणमहं गृह्णामि मयि च अक्षितं यथा स्यात्तथा गृह्णामि तव ग्रहग्रहणेन मयि यज्ञक्षयो मास्त्वित्यर्थः । तावन्तं कियत्तम् द्यावापृथिवी यावती द्यावाभूमी यत्परिमाणे च पुनः सप्त सिन्धवः सप्त समुद्राः क्षीरोदाद्याः (15.) यावत् यत्परिमाणे देशे वितस्थिरे विशेषेण स्थिताः तावत्तमतिमहत्तरं दधिघर्मं गृह्णामीत्यर्थः ॥ २६ ॥

मयि त्यदिंन्द्रियं बृहन्मयि द्क्षो मयि क्रतुंः ।
घर्मस्त्रिशुग्विरांजति विराजा ज्योतिंषा सह ब्रह्मणा तेजंसा सह ॥ २७ ॥

का° [२६.७.५५.] मयि त्यदिति भक्षणम् । हुतशेषं दधिघर्मं यजमानऽर्त्विजः सोपहवं भक्षयन्तीत्यर्थः ॥ पङ्क्तिः अष्टाक्षरपञ्चपादा दधिघर्मदेवत्या यजमानाशीर्देवतेति केचित् । बृहत् महत् त्यत् तत् इन्द्रियं प्रसिद्धं वीर्यं मयि विराजति विराजतु लकारव्यत्ययः । दक्षः संकल्पसिद्धिः मयि विराजतु । क्रतुः सत्संकल्पो मयि विराजतु । विशेषेण राजते विराट् तेन जगत्प्रसिद्धेन ज्योतिषा तेजसा आदित्याख्येन सह ब्रह्मणा त्रयीलक्षणेन ज्योतिषा च सह घर्मो मयि विराजतु । कीदृशो घर्मः त्रिशुक् तिस्रः शुचः दीप्तयो यस्य सः तास्तिस्रः शुचो या ते घर्म दिव्या शुगित्यष्टादश्यां कण्डिकायां शालाकमन्त्रे व्याख्याताः ॥ २७ ॥

a. पयंसो रेत आभृंतं तस्य दोहंमशीमक्षुत्तंरामुत्तरा६ समांम् ।
b. विषंः संवृक् क्रत्वे दक्षंस्य ते सुषुम्णास्यं ते सुषुम्णाग्निंहुतः ।

इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपक्षुत उपक्षुतस्य भक्षयामि ॥२८॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामष्टात्रिंशोऽध्यायः ॥३८॥ ॥

गायत्र्यवसानक्षीणा । दधिघर्मभक्षणे एव विनियुक्ता । पयसो रेतो वीर्यं सारं जगदुत्पत्तिबीजं यत् आभृतमाहृतम् दधिघर्मरूपं यत् तस्य दोहं प्रपूरणं वयमुत्तरामुत्तरां समामुत्तरोत्तरमस्मिन्वर्षे अशीमहि व्याप्नुयाम कालाधनोरिति [पा° २.३.५.] द्वितीया वयं सर्वदा गायत्रूकाः स्यामित्यर्थः ॥ का° [२६.७.५६.] विषः संवृगिति महाव्रतीये । महाव्रतीयेऽहनि विष इति मन्त्रेण हुतशेषदधिघर्मभक्षणं कार्यमित्यर्थः ॥ अतिजगती दधिघर्मदेवत्या । संवृणक्ति स्वीकरोतीति संवृक् स्वीकर्ता सम्पूर्वो वृञिः स्वीकरणार्थः हे विषः संवृक् (16.) क्षत्तेः स्वीकर्तः हे सुषुम्णा शोभनं सुम्नं सुखं यस्मात् सुषुम्णाः तत्सम्बोधनम् हे सुखदातः हे दधिघर्म अहमुपक्षुतः कृतोपक्षवः सन् ते तवांशं भक्षयामि कर्मणि षष्ठी वा त्वां भक्षयामि एकस्ते-शब्दः पादपूरणः । कीदृशस्य ते क्रत्वे दक्षस्य चतुर्थी षष्ठ्यर्थे क्रतोः संकल्पस्य दक्षः सिद्धिदाता तस्य संकल्पसिद्धिदातुः क्रतुशब्दस्य चतुर्थ्येकवचने गुणाभाव आर्षः । तथा सुषुम्णास्य शोभनसुखभूतस्य । अग्निहुतः अग्नौ हूयतऽइत्यग्निहुत् तस्य अग्नौ हुतस्य । इन्द्रपीतस्य इन्द्रेण पीतो भक्षितस्तस्य । प्रजापतिभक्षितस्य प्रजापतिना भक्षितस्तस्य । मधुमतः मधुरस्वादोपेतस्य । उपक्षुतस्य कृतोपक्षवस्य । एवंविधस्य तवांशं हे दधिघर्माहं भक्षयामीत्यर्थः ॥ ॥ समाप्ता धर्मेतिकर्तव्यता ॥२८॥

श्रीमन्महीधरकृते वेददीपे निरूपितः (17.) । अष्टात्रिंशोऽयमध्यायो महावीरनिरूपणः ॥३८॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १ ॥१॥ २ [इल] - ३ [इन्द्राण्याः J] - ६ ॥२-६॥ ॥

II. ॥ ७-९ ॥७-९॥ १० [सर्वान्देवानर्याल्लिङ्] - १४ ॥१०-१४॥ ॥

III. ॥ १५. १६ [अग्नाऽअश्या°] ॥१५. १६॥ ॥ IV. ॥ १७ ॥१७॥ ॥

V. ॥ १८-२३ ॥१८-२३॥ २४. २५ ॥२४॥ ॥

VI. ॥ २६ ॥२५॥ २७. २८ a ॥२६॥ ॥ VII. ॥ २८ b ॥२७॥ ॥

॥ सप्तानुवाकेषु सप्तविंशतिः ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायामष्टात्रिंशोऽध्यायः ॥३८॥ ॥

I. a. स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । b. पृथिव्यै स्वाहा । c. अग्नये स्वाहा । d. अन्तरिक्षाय स्वाहा । e. वायवे स्वाहा । f. दिवे स्वाहा । g. सूर्याय स्वाहा ॥१॥

श्रीगणेशाय नमः (1.) ॥ प्रवर्ग्ये धर्मभेदे प्रायश्चित्तम् तत्र का° [२६.७.४९.] स्वाहा प्राणेभ्यः साधिपतिकेभ्य इति पूर्णाकृतिमाद्यामुत्तमां च मनसः काममाकूतिमिति । तदर्थोऽयम् अध्वर्युः भूमिर्भूमिम् यज्ञस्यचिदिति मन्त्राभ्यां भग्नं धर्ममभिमृश्य परमेष्ठ्यादिचतुस्त्रिंशदाकृतीर्कृत्वा स्वाहा प्राणेभ्य इत्याद्यां पूर्णाकृतिं कृत्वा पृथिव्यै स्वाहेत्याकृतिविंशतिं सकृदुक्तीतेन कृत्वा मनस इत्यन्त्यां पूर्णाकृतिं करोतीति ॥ मन्त्रार्थो यथा । साधिपतिकेभ्यः अधिपतिना हिरण्यगर्भेण सह वर्तमानेभ्यः प्राणेभ्यः स्वाहा सुकृतमस्तु इति पूर्णाकृतिमन्त्रः । ततो विंशतिः स्पष्टा मन्त्राः पृथिव्यै सुकृतमस्तु । एवमग्नेऽपि अग्नये अन्तरिक्षाय वायवे दिवे सूर्याय ॥१॥

a. दिग्भ्यः स्वाहा । b. चन्द्राय स्वाहा । c. नक्षत्रेभ्यः स्वाहा । d. अद्भ्यः स्वाहा । e. वरुणाय स्वाहा । f. नाभ्यै स्वाहा । g. पूताय स्वाहा ॥२॥

दिग्भ्यः चन्द्राय नक्षत्रेभ्यः अद्भ्यः वरुणाय नाभ्यै देवतायै पूताय शोधकाय पुनाति पूतः देवस्तस्मै ॥२॥

a. वाचे स्वाहा । b. प्राणाय स्वाहा । c. प्राणाय स्वाहा । d. चक्षुषे स्वाहा । e. चक्षुषे स्वाहा । f. श्रोत्राय स्वाहा । g. श्रोत्राय स्वाहा ॥३॥

वाचे वागधिष्ठात्रे एवमग्रेऽपि । प्राणाय प्राणेन्द्रियाधिष्ठात्रे प्राणादीनां द्वित्वान्मन्त्रावृत्तिः । चक्षुषे तदधिष्ठात्रे । श्रोत्राय ॥३॥

मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥४॥

द्वितीयः पूर्णाहुतिमन्त्रः । अहं मनसः काममभिलाषम् आकुञ्चनमाकूतिः प्रयत्नस्तं चाशीय प्राप्नुयाम् वाचः सत्यं चाशीय यद्वाक् सत्यं वदतु । मयि एतत्सर्वं श्रयतां तिष्ठतु पशूनां रूपं पशुसम्बन्धिनी शोभा अन्नस्य रसः स्वादुत्वम् यशः कीर्तिः श्रीर्लक्ष्मीश्च ॥४॥

प्रजापतिः सम्म्रियमाणः सम्राट् सम्भृतो वैश्वदेवः संꣳसन्नो घर्मः प्रवृक्तस्तेज उद्यत आश्विनः पयस्यानीयमाने पौष्णो विष्यन्दमाने मारुतः क्लाथ्यन् ।
मैत्रः शरसि संताय्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥५॥

का° [२६.७.५०.] प्रजापतिः सम्म्रियमाण इति यथाकालमिति । सम्म्रियमाणावस्थायां महावीरभेदे प्रजापतये स्वाहेत्याद्या यथाकालमाकृतयो होतव्या इति सूत्रार्थः ॥ तत्यथा मन्त्रो दर्शयति सम्म्रियमाणो महावीरो यदि भिद्यते तदा प्रायश्चित्तहोमे प्रजापतिर्देवता प्रजापतये स्वाहेति प्रायश्चित्ताकृतिर्होतव्येत्यर्थः प्रजापतिः सम्म्रियमाणो यथाकालं प्रायश्चित्तदेवतेत्युक्तत्वात् [अनुक्रम° ४.८.] ॥ निष्ठिताभिमर्शनादारभ्याज्ञापयोऽवसेचनान्तं सम्म्रियमाणः ॥ सम्राट् सम्भृतः । पयोऽवसेकानन्तरं कुशासादनात्प्राक् सम्भृत इत्युच्यते तत्र भेदे सम्राट् प्रायश्चित्तदेवता सम्राजे स्वाहेति ॥ वैश्वदेवः संसन्नः । आसादनादारभ्य मुञ्जप्रत्नवेधधिश्रयणात्प्राक् संसन्नः तत्र भेदे विश्वदेवदैवतः विश्वेभ्यो देवेभ्यः स्वाहेति ॥ घर्मः प्रवृक्तः । अधिश्रयणादारभ्य परिशासाभ्यां ग्रहणात्प्राक् प्रवृक्तः प्रवृज्यतेऽइति तत्र भेदे घर्माय स्वाहेति ॥ तेज उद्यतः । उद्यम्यतेऽइत्युद्यतः उद्यमनादारभ्य प्राग्ज्ञापयोऽवसेकादुद्यतः तत्र भेदे तेजसे स्वाहेति ॥ आश्विनः पयस्यानीयमाने । अ-

ज्ञापयस्यासिच्यमाने घर्मभेदे आश्विनः अश्विदेवत्यो घर्मः अश्विभ्यां स्वाहेति जुहोति ॥ पौष्णो विष्यन्द्माने स्यन्दू (2.) स्रवणे विशेषेण स्यन्द्माने घृते बर्हिर्निःसरति सति भेदे घर्मः पौष्णः पूषदेवत्यः पूष्णे स्वाहेति जुं° ॥ मारुतः क्लायन् । क्लायने मध्ये घृतस्यावर्तनम् (3.) तदा मरुद्देवत्यः तत्र भेदे मरुद्भ्यः स्वाहेति जुं° ॥ मैत्रः शरसि संताप्यमाने । पयोऽवसेके योपरि तरिका ज्ञायते सा शरःशब्देनोच्यते तस्मिन्संताप्यमाने ध्यमाने मैत्रो मित्रदेवत्यः तापृ पालनसंतत्योः कर्मणि यकि शानचि रूपम् तत्र शरआदिहरणात्प्राक् भेदे मित्राय स्वाहेति जुं° ॥ वायव्यो ह्रियमाणः । आहवनीयं ह्रियमाणो होमात्प्राक् वायुदेवतः तत्र भेदे वायवे स्वाहेति जुं° ॥ आग्नेयो ह्रूयमानः । ह्रूयमानो घर्मोऽग्निदेवतः तत्र तद्भेदे अग्नये स्वाहेति जुं° ॥ वाग्घुतः । हुतो हुतहोमादूर्ध्वं प्रागुत्तरघर्मारम्भात् वाक् वाग्देवतः तत्र भेदे वाचे स्वाहेति जुं° ॥ एता आहुतयः सकृद्गृहीताज्यैः ॥५॥

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीयेऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चमेऽऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे । मित्रो नवमे वरुणो दशमेऽइन्द्र एकादशे विश्वे देवा द्वादशे ॥६॥

का° [२६.७.५१.] सविता प्रथमेऽहन्निति च प्रत्यृक्मिति । प्रथमे अहन् दिने घर्मभेदे सविता देवता सवित्रे स्वाहेति जुं° । एवमग्नेऽपि । अग्निर्द्वितीये द्वितीयेऽहनि घर्मभेदेऽग्निर्देवता । वायुस्तृतीये तृतीयेऽहनि वायुर्देवता । चतुर्थे आदित्यो देवता । चन्द्रमाः पञ्चमेऽह्नि । ऋतुः षष्ठेऽह्नि । मरुतः सप्तमेऽह्नि । बृहस्पतिरष्टमेऽह्नि । मित्रो नवमेऽह्नि । वरुणो दशमेऽह्नि । इन्द्र एकादशेऽह्नि । विश्वे देवाः द्वादशेऽह्नि देवता तत्र भेदे विश्वेभ्यो देवेभ्यः स्वाहेति जुं° । उपसत्प्रवृद्धौ एता एवाहुतयः पुनरादित आरभ्यावर्त्यन्ते ॥६॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥७॥

का° [१८.४.२४.] विमुखेनारण्येऽनूच्यमिति । चयने मारुतान्षट् पुरोडाशान् शुक्रज्योतिश्चेत्यादिषण्मारुतमन्त्रैः [१७.८०-८५.] कृत्वारण्येऽनूच्यसंज्ञं सप्तमं पुरोडाशं विमुखसंज्ञेनोग्रश्चेति मन्त्रेण जुहुयात् तथाचानुक्रमणी [४.८.] उग्रश्च मारुती

गायत्री विमुखाख्यो मन्त्रोऽग्नौ विनियुक्तास्तस्मादाग्निक एवास्यर्षिः परमेष्ठी प्राजापत्यो वेति । आग्निकः प्रजापतिर्ऋषिः । अस्य मन्त्रस्यात्र पाठोऽरण्ये पाठयोग्यत्वात् । अथ मन्त्रार्थः यज्ञते उग्रादिनामकाः सप्त मरुतः तेभ्यः स्वाहा सुकृतमस्तु । उग्रः उत्कृष्टः । विभेत्यस्मादसौ भीमः । धनति शब्दं करोतीति धान्तः । धूनयति कम्पयति शत्रूनिति धुनिः । सकृते शत्रूनभिभवति ससक्वान् सकृतेः क्वासुश्चेति [पा॰ ३.२.१०७.] क्वासुप्रत्ययः संहितायामभ्यासदीर्घश्छान्दसः । अभियुनक्ति अस्मत्संमुखं योगं प्राप्नोतीत्यभियुग्वा अन्येभ्योऽपि दृश्यन्तऽइति [पा ३.२.७५.] युन्नेः क्वानिप्प्रत्ययः । विक्षिपः विविधं क्षिपति रिपूनिति विक्षिपः इगुपधेति [पा॰ ३.१.१३५.] कप्रत्ययः ॥७॥

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना ।
शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना
वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥८॥

का॰ [२०.८.६-८.] विमुखाच्च परेभ्यो मा नो मित्र इति प्रत्यृचमनुवाकाभ्यामल्यां द्यावापृथिवीयामिति । अस्यार्थः उग्रश्चेति मन्त्रो विमुखः ततः परेभ्यो देवताश्चाङ्गेभ्योऽग्निं हृदयेणेत्यादिभ्यश्चतुर्गृहीतमाज्यं गृहीत्वा गृहीत्वा जुहोति । तत्रापि पक्षद्वयम् । अग्नये स्वाहा हृदयाय स्वाहा अशनये स्वाहा हृदयाग्राय स्वाहा इत्यादि कात्यायनादीनामभिप्रायः अग्निं हृदयेन प्रीणामि स्वाहेत्यादि हरिस्वामिमते प्रयोगः । ततश्चाग्निं हृदयेनेत्यादीन्विश्वेभ्यो देवेभ्यः स्वाहेत्यन्तान्होमान्कृत्वा मा न इत्यनुवाकाभ्यां [२५.२४-३१.] षोडशाकृतीर्जुहुत्वा द्यावापृथिवीभ्यां स्वाहेति चरमामाकृतिं जुहोतीति सूत्रार्थः ॥ अरण्येऽनूच्यान्जुहुत्वा द्यावापृथिव्यामुत्तमामाकृतिं जुहोतीति श्रुतेः अरण्येऽनूच्यानरण्ये पठितानग्निं हृदयेनेत्यादीन्विश्वेभ्यो देवेभ्यः स्वाहेत्येवमन्तान्होमान्कृत्वा द्यावापृथिवीयामुत्तमामाकृतिं जुहोतीति श्रुतेरर्थः । तथा चानुक्रमणी [8.८.] अग्निꣳ हृदयेणाश्वमेधिकानि तत्रत्य (4.) एवर्षिर्लोमभ्यः स्वाहेति प्रायश्चित्ताकृतयो द्विचत्वारिंशत् । तत्राग्निं हृदयेण उग्रं लोकितेन द्वे कण्डिके ब्राह्मणरूपे देवताश्चावयवसम्बन्धविधानात्

अरण्येऽध्येयत्वादिह पाठः । लोमादीन्यङ्गान्येव पठितानि आयासादयो देवता एव ॥ अथ मन्त्रार्थः हृदयेनाङ्गिनाग्निं देवं प्रीणामि । हृदयस्याग्रभागेनाशनिं देवं प्रीणामि । समग्रहृदयेन पशुपतिं देवं प्रीणामि । यक्ना यकृता कालखण्डेन भवं देवं प्रीणामि पद्दन्न इत्यादिना [पा° ६. १. ६३.] यकृच्छब्दस्य यकन्नादेशः । मतस्ने हृदयास्थिविशेषौ ताभ्यां शर्वं देवं प्रीणामि । मन्युना अश्वसम्बन्धिक्रोधेन ईशानं देवं प्रीणामि । अन्तर्वर्तमानेन पर्शव्येन पार्श्वास्थिसम्बन्धिना मांसेन महादेवं देवं प्रीणामि पर्शवः पार्श्वास्थीनि । वनिष्ठुः (5.) स्थूलान्त्रं तेनोग्रं देवं प्रीणामि । वसिष्ठहनुः वसिष्ठस्य देवस्य हनुः कपोलैकदेशो ज्ञातव्यः यद्वा वसिष्ठा या हनुः कपोलाधोदेशः तत्परा हनुरित्यमरः [२. ६. १०.] तत्परा कपोलाधोभागस्था हन्त्याहारमिति हनुः लिङ्गव्यत्ययः वसिष्ठहन्वा कोश्याभ्यां (6.) कोशो हृदयकोशः तत्स्थाभ्यां मांसपिण्डाभ्यां च शिङ्गीनि (7.) शिङ्गिसंज्ञानि दैवतानि प्रीणामि ॥ ८ ॥

उग्रं लोहितेन मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडिनं मरुतो बलेन साध्यान्प्रमुदा । भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृत्क्लोम्नः वनिष्ठुः पशुपतेः पुरीतत् ॥ ९ ॥

लोहितेनासृजा उग्रं देवं प्रीणामि । शोभनं व्रतं कर्म यस्य स सुव्रतस्तस्य भावः सौव्रत्यं शोभनगत्यादिकर्मकर्तृत्वम् (8.) तेन मित्रं देवं प्रीणामि । दुष्टं स्खलनोल्लनादि व्रतं (9.) यस्य स दुर्व्रतः तस्य भावो दौर्व्रत्यम् तेन रुद्रं देवं प्रीणामि । प्रकृष्टं क्रीडनं प्रक्रीडः तेनेन्द्रं देवं प्रीणामि । बलेन सामर्थ्येन मरुतो देवान्प्रीणामि । प्रमुदा प्रकृष्टा मुत् हर्षः प्रमुत् तया साध्यान्देवान्प्रीणामि ॥ भवस्य कण्ठ्यम् अत्र षष्ठ्यन्तो देवः अङ्गं प्रथमान्तम् कण्ठ्यं कण्ठे भवं मांसं भवस्यास्तु विभक्तिव्यत्ययो वा कण्ठ्येन भवं देवं प्रीणामि । एवमग्रेऽपि । पार्श्वस्यान्तर्मध्ये भवं मांसमन्तःपार्श्व्यं तद्रुद्रस्यास्तु । यकृत् कालखण्डं महादेवस्यास्तु । वनिष्ठुः स्थूलान्त्रं शर्वस्यास्तु । पुरीतत् हृदयाच्छादकमन्त्रं पशुपतेर्देवस्यास्तु ॥ १ ॥

लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय

स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा । माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ॥१०॥

लोमभ्यः स्वाहेति प्रायश्चित्ताङ्गतयो द्विचत्वारिंशत् । लोमादीन्यङ्गानि । लोमभ्यः स्वाहा लोमानि जुहोमीत्यर्थः २. त्वचे ३. लोहिताय ६. मेदोभ्यः मेदो धातुविशेषः ८. मांसेभ्यः १०. स्नावभ्यः स्नावानः स्नायवो नसाः १२. अस्थभ्यः छन्दस्यपि दृश्यते [पा० ७.१.७६.] इत्यस्थिशब्दस्य क्लादिविभक्तावप्यनङादेशः १४. मज्जभ्यः मज्जा षष्ठो धातुः १६. रेतसे रेतो वीर्यम् १७. पायवे पायुर्गुदम् १८. ॥१०॥

आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ।

शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥११॥

तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा ।

निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥१२॥

यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहा ब्रह्मकृत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा ॥१३॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायामेकोनचत्वारिंशोऽध्यायः ॥३९॥ ॥

आयासाय आयासादयो देवविशेषाः ११. प्रायासाय (10.) २०. संयासाय २१. वियासाय २२. उद्यासाय २३. शुचे २४. शोचते २५. शोचमानाय २६. शोकाय २७. तपसे २८. तप्यते २९. तप्यमानाय ३०. तप्ताय ३१. घर्माय ३२. निष्कृत्यै ३३. प्रायश्चित्यै ३४. भेषजाय ३५. यमाय ३६. अन्तकाय ३७. मृत्यवे ३८. ब्रह्मणे ३९. ब्रह्मकृत्यायै ४०. विश्वेभ्यो देवेभ्यः ४१. एतेभ्यो देवेभ्यः सुकृतमस्तु । एता आ-

कृतीर्कृत्वा द्यावापृथिवीभ्यां स्वाहेत्यन्त्यामाकृतिं जुहुयात् ४२. ॥ एतावता कर्मकाण्डं समाप्तम् ॥ ११ ॥ १२ ॥ १३ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । गतोऽध्याय उपाख्योऽयं प्रोक्तधर्मादिनिष्कृतिः ॥ ३१ ॥ ॥

अथ काण्वशाखायां पाठविशेषः ॥

I. ॥ १. २ ॥ १ ॥ ॥ II. ॥ ३ ॥ २ ॥ ॥ ४ ॥ ३ ॥ ॥

III. ॥ ५ [पूषा विष्णु॰ - - क्रयन् । - -] ॥ ४ ॥ ॥ IV. ॥ ६ ॥ ५ ॥ ॥

V. ॥ ७ [॰श्च धातुश्च] ॥ ६ ॥ ॥ VI. ॥ ८ ॥ ७ ॥ ॥

VII. ॥ ९ [प्रक्रीलेन] ॥ ८ ॥ ॥ VIII. ॥ १० [मेदस्] ॥ ९ ॥ ॥

IX. ॥ ११ [शोचते स्वाहा शोकाय स्वाहा] ॥ १० ॥ १२ [तपसे स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा । निष्कृ॰] ॥ ११ ॥ १३ [मृत्यवे स्वाहा ब्रह्महत्यायै स्वा॰] ॥ १२ ॥ ॥ नवानुवाकेषु द्वादश ॥ ॥

इति काण्वीयायां वाजसनेयसंहितायामेकोनचत्वारिंशोऽध्यायः ॥ ३१ ॥ ॥

ईशा वास्यमिदꣳ सर्वं यत्किं च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

श्रीगणेशाय नमः ॥ गणेशनरहरिलक्ष्मीन्त्वा (1.) तत्कृपया मया । संहिताचरमाध्याये (2.) वेददीपो वितन्यते ॥ एकोनचत्वारिंशताध्यायैः कर्मकाण्डं निरूपितम् इदानीं कर्माचरणशुद्धान्तःकरणं प्रति ज्ञानकाण्डमेकेनाध्यायेन निरूप्यते । ईशा वास्यमित्यादिमन्त्राणां कर्मसु विनियोगो नास्ति तेषां शुद्धत्वैकत्वापापविद्धत्वाशरीरत्वसर्वगतत्वाद्यात्मयाथात्म्यप्रतिपादनात् तच्च कर्मणा विरुध्यते न कीदृगात्मोत्पाद्यो विकार्य आप्यः संस्कार्यः कर्ता भोक्ता वा भवेद्येन कर्मशेषता स्यात् तस्मादविद्याकृतमात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वाशुद्धत्वपापविद्धत्वाद्यङ्गीकृत्य लोकबुद्धिसिद्धानि कर्माणि विहितानि यो हि दृष्टेन ब्रह्मवर्चसादिनादृष्टेन स्वर्गादिना

कर्मफलेनार्थी सन्नहं द्विजातिः कर्माधिकारवानित्यात्मानं मन्यते तस्य कर्माधिकारः तस्मादेते मन्त्रा आत्मयाथात्म्यप्रकाशनेन शोकमोहादिसाधनमज्ञानं विनिवर्त्यात्मज्ञानं जनयन्तीत्यभिधेयसम्बन्धप्रयोजनानि । इदानीं ते मन्त्रा व्याख्यायन्ते । ईशा वास्यम् । आत्मदेवत्य अनुष्टुप्छन्दस्कोऽध्यायो दधीचाथर्वणेन दृष्टः । गर्भाधानादिसंस्कारसंस्कृतमधीतवेदं जनितसुतं यथाशक्तिकृतयज्ञं निष्पापं निःस्पृहं यमनियमोपेतं मुमुक्षुमुपसन्नं शिष्यं पुत्रं वा ऋषिरुपदिशन्नाह । ईश ऐश्वर्ये क्विप् ईष्टेऽनीट् ईशिता परमेश्वरः स हि सर्वज्ञत्वानामात्मा सन्सर्वमीष्टे तेन स्वेनात्मनेशा इदं प्रत्यक्षतो दृश्यमानं सर्वं वास्यम् वस आच्छादने ऋहलोर्ण्यदिति [पा० ३. १. १२४.] ण्यत्प्रत्ययः आच्छादनीयम् परमात्माहमेवेदं सर्वमिति परमार्थसत्यरूपेणात्मना सर्वमिदमनृतमाच्छादनीयम् परमात्माहमेवास्मि नान्यदस्तीति चिन्तयेदित्यर्थः । यत् किम् चेति भिन्नक्रमः किं च यत् जगत्यां लोकत्रये जगत् जङ्गमादिकं स्वामिसम्बन्धालिङ्गितं भवेत् तेन सर्वेण त्यक्तेन त्यक्तस्वस्वामिसम्बन्धेन भुञ्जीथाः भोगमनुभवेः मा गृधः गृधु अभिकाङ्क्षायाम् आकाङ्क्षां मा कृथाः ममेदमिति धियं त्यजेत्यर्थः । किमिति स्विदिति निपातो वितर्के धनं कस्य स्वित् न कस्यापीत्यर्थः सर्वाणि द्रव्याण्यन्योऽन्यमुपगच्छन्ति दृश्यन्ते अतो ममेदमिति बुद्धिरविद्या तां त्यजतो योगेऽधिकार इत्यर्थः ॥ १ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

आत्मज्ञानाशक्तस्य कर्मोपदेशमाह । कर्माणि अग्निहोत्रादीनि निष्कामानि (4.) मुक्तिहेतुकानि कुर्वन्नेवेह लोके शतं समाः शतवर्षपर्यन्तं जिजीविषेत् पुरुषव्यत्ययः त्वं जिजीविषेः जीवितुमिच्छेः पुरुषायुषः शतवर्षत्वाच्छतग्रहणम् । त्वयीति विभक्तिव्यत्ययः तवैवं कर्म कुर्वतो जिजीविषतो मुक्तिरस्तीति शेषः इतः प्रकारादन्यथा प्रकारान्तरेण मुक्तिर्नास्ति अयमर्थः स्वर्गादिप्राप्तौ यथा नानाप्रकारा न तथा मुक्तावित्यर्थः निष्कामकर्मानुष्ठानेन शुद्धान्तःकरणस्यैव मुक्तिरित्यर्थः न तु कर्मणाः फलेन भाव्यम् कथं मुक्तिरित्यत आह न कर्मेति मुक्त्यर्थं क्रियमाणं कर्म

नरे मनुष्ये न लिप्यते न सम्बध्यते मुक्तिकारणान्तःकरणशुद्ध्यापादकत्वेनोपक्षीणशक्तित्वात् यावदिच्छा तावत्कर्मस्वधिकार इति दर्शितम् । उत्तरार्धस्यार्थान्तरं वा एवं प्रकारे त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मात्कर्मकरणादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते अतः शास्त्रविहितं कर्म कुर्वन्नेव जीवितुमिच्छेत् प्रत्यवायपरिहारायेत्यर्थः तदुक्तम् द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभाषित इति ॥२॥

असुर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्यापिगच्छन्ति ये के चात्महनो जनाः ॥३॥

अथ काम्यकर्मपरान्निन्दति । ये के च ये केचित् [जनाः] नराः आत्महनः आत्मानं घ्नन्तीत्यात्महनः अविद्वांसः काम्यकर्मपराः विद्यमानस्याज्ञारामस्यात्मनोऽविद्यादोषेण तिरस्कारणादात्महन्तारः ते प्रेत्य मृत्वा देहं त्यक्त्वा तान् लोकान् जन्मानि (5.) स्थावरान्तानि अपिगच्छन्ति प्राप्नुवन्ति । तान् कान् नाम प्रसिद्धं ते ये यत्तद्दोर्व्यत्ययः ये लोकाः लोक्यन्ते दृश्यन्ते भुज्यन्ते कर्मफलानि यत्रेति लोका जन्मानि असुर्याः असुराणामिमे असुर्याः असुषु प्राणेषु रमन्तेऽसुराः प्राणापोषणपराः अद्वैतमपेत्य देवा अपि असुराः । कीदृशाः लोकाः अन्धेन तमसा अदर्शनात्मकेनाज्ञानेन आवृताः आच्छादिताः । अनात्मज्ञाः पुनर्जायन्ते म्रियन्ते चेत्यर्थः ॥३॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

मुमुक्षुभिर्यादृशं ब्रह्मात्मत्वेनोपास्यम् यस्याज्ञानात्संसारस्तदात्मस्वरूपमाह (6.)। त्रिष्टुप्छन्दस्कैयमृक् । यत् ब्रह्म अनेजत् एजृ कम्पने न एजतीत्यनेजत् अचलत् स्वावस्थाप्रच्युतिः कम्पनम् तद्रहितम् सदेकरूपमित्यर्थः एकमद्वितीयं सर्वभूतेषु विज्ञानघनरूपेण । मनसः संकल्पादिलक्षणाज्जवीयः वेगवत्तरम् जवोऽस्यास्तीति जववत् अत्यन्तं जववत् जवीयः ईयसुनि कृते विन्मतोर्लुगिति [पा° ५.३.६५.] मतुपो लुक् । नन्वनेजद्वेगवतोर्विरोधः नैवम् निरुपाधित्वेनानेजत् संकल्प-

विकल्पद्वयान्तःकरणस्योपाधेरनुवर्तनाज्जविष्ठम् देहस्थस्य मनसो दूरस्थब्रह्मलोकादिसंकल्पनं क्षणमात्राद्भवतीति मनो त्रेगवत्तरं लोके प्रसिद्धम् मनसि दूरं गच्छत्यात्मचैतन्यावभासः (7.) प्रथमप्राप्त-इव गृह्यतेऽतो मनसो जवीय इत्युक्तम् । देवा द्योतनात्मकाश्चक्षुरादीन्द्रियाणि एनत् प्रकृतमात्मतत्त्वं नाप्नुवन् न प्राप्तवन्तः चक्षुरादिभ्यो मनो जवीयोऽतो मनोव्यापारे-व्यवहितत्वादात्मन आभासमात्रमपि (8.) देवानां गोचरो न भवतीत्यर्थः यतः पूर्वमर्शत् वेगवन्मनसोऽपि प्रथममेव गच्छत् ऋश गतौ व्योमवद्व्यापित्वात्सर्वसंसारधर्मवर्जितं तदात्मतत्त्वं निरुपाधिकेन स्वद्रूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवेत्यविवेकिनां प्रतिदेहमनेकमिव प्रतिभासतऽइति भावः यद्वा पूर्वम् पूर्वमपि विद्यमानम् अर्शत् रिश हिंसायां रिशति नश्यति रिशत् न रिशदरिशत् अर्शत् धातोरिकारलोपश्छान्दसः । किं च तत् तदः स्थाने यदो वृत्तिः यदात्मतत्त्वं धावतो द्रुतं गच्छतोऽन्यान् मनोवागिन्द्रियादीनात्मविलक्षणान् अत्येति अतीत्य गच्छतीव कीदृशम् तिष्ठत् स्वयमविक्रियमेव सद्गच्छतीव । मातरि अन्तरिक्षे श्वसिति गच्छतीति मातरिश्वा वायुः तस्मिन्नित्यचैतन्यस्वभावे आत्मतत्त्वे सति अपः कर्माणि दधाति धारयति कार्यकारणज्ञातानि यस्मिन्नोतानि प्रोतानि यः सूत्रसंज्ञः सर्वस्य जगतो विधारयिता सर्वप्राणभृत्क्रियात्मकः सोऽपि वायुः प्राणिनां चेष्टा लक्षणानि अग्निरविमेघादीनां ज्वलनदहनप्रकाशाभिवर्षणादीनि च कर्माणि यस्मिन्ब्रह्मणि सत्यवद्धाति विभजति धारयति वा भीषास्माद्वातः पवते भीषोदेति सूर्य इत्यादिश्रुतेः [तैत्तिरी॰ आरण्य॰ ८.८.] सर्वा हि कार्यकारणादिक्रियाः सर्वास्पदे नित्यचैतन्यद्रूपे ब्रह्मणि सत्येव भवन्तीत्यर्थः । यद्वा मातरिश्वा वायुरपः कर्माणि आप्यन्ते प्राप्यन्ते सुखदुःखानि याभिस्ता आपः कर्माणि आप्नोतेर्ह्रस्वश्चेति [उणा॰ २.५१.] क्विप् धातोर्ह्रस्वश्च तानि कर्माणि यज्ञहोमादीनि यस्मिन्दधाति स्थापयति स्वाहा वाते धा इति [८.२१.] समिष्टयजुषि वायुस्थत्वोक्तेः कर्माणि तावद्वायौ स्थाप्यन्ते समष्टिद्रूपोऽसौ वायुरपि यस्मिन्कर्माणि स्थापयति यागहोमदानादिकर्मणां परमं निधानमित्यर्थः ॥४॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

रहस्यं सकृदुक्तं चित्ते नायातीति पूर्वमन्त्रोक्तमप्यर्थं पुनर्वदति । तत् प्रकृतमात्मतत्त्वमेजति चलति तदेव च न एजति स्वतो नैव चलति अचलमेव सत् मूढदृष्या चलतीवेत्यर्थः । किं च तत् दूरे अविदुषामब्रह्मोद्याप्यप्राप्यत्वाद्दूरे इवेत्यर्थः । तत् उ तदेव अन्तिके समीपे विदुषामात्मत्वेन भासमानत्वान्न केवलं दूरेऽन्तिके च । अस्य सर्वस्य नामरूपक्रियात्मकजगतोऽन्तरभ्यन्तरे तदेव । अस्य सर्वस्य बाह्यतः बहिरपि तदु तदेव ब्रह्म नभोवद्व्यापकत्वात् ॥ अस्य मन्त्रस्यार्थान्तरम् यथा पूर्वमन्त्रेण कारणरूपमात्मानमुद्दिश्य कार्यरूपमुद्दिश्यति । तदेजति । तिस्रोऽनुष्टुभः । तत् आत्मतत्त्वमेजति सर्वजन्तुरूपेण स्थितं सत् कम्पते क्रियावद्भवति तदेव च न एजति स्थावररूपावस्थं न चलति । तदेव दूरे आदित्यनक्षत्रादिरूपेण स्थितत्वात् तदु अन्तिके समीपे धरादिरूपत्वात् सर्वं खल्विदं ब्रह्मेति श्रुतेः । अस्य सर्वस्य प्राणिजातस्यान्तर्मध्ये तदेवास्ते विज्ञानघनरूपेण । अस्य सर्वस्य बहिः तदु तदेव जडरूपत्वात् चेतनाचेतनरूपमनन्तं ब्रह्मेत्यर्थः एतदुपासितुरर्चिरादिमार्गेण गमनं नास्ति इहैव ब्रह्मप्राप्तेः न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः ॥५॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥६॥

अथोपासनप्रकारमाह । यस्तु यः पुनः मुमुक्षुः सर्वाणि भूतानि अव्यक्तादीनि स्थावरान्तानि चेतनानि आत्मन् सप्तम्या लुक् आत्मनि एवानुपश्यति मय्येव सर्वभूतानि (9.) स्थितानि न मद्व्यतिरिक्तानीति पश्यति आत्मव्यतिरिक्तानि न पश्यतीत्यर्थः सर्वभूतेषु चात्मानमवस्थितमव्यतिरिक्तं पश्यति (10.) तेषां भूतानां स्वं आत्मानमात्मत्वेन पश्यतीत्यर्थः । अयमर्थः । अस्य कार्यकारणसंघातस्यात्माहं सर्वप्रत्ययसाक्षीभूतश्चेतयिता निर्गुणश्च तथा तेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वेषु चात्मानं निर्विशेषं पश्यति । ततस्तस्माद्दर्शनात् न विचिकित्सति न संशेते किंरोगापनयने संशये चेति धातोः गुप्तिङ्किद्भ्यः सन्निति

[पा° ३.१.५.] स्वार्थे सन्प्रत्ययः आत्मनोऽन्यत्पश्यतः सर्वः संदेहो भवत्यात्मानमेवात्यन्तं शुद्धं निरन्तरं पश्यतो न संदेहावकाश इति भावः अत आत्मज्ञस्य विचारनिवृत्तिः ॥ ६ ॥

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

इममेवार्थमन्यो मन्त्रो वदति । यस्मिन्नवस्थाविशेषे विजानतः आत्मैवेदम् सर्वं खल्विदं ब्रह्मेत्यादिवाक्यविचारेणावधृतपरमार्थस्य सतः सर्वाणि भूतानि आत्मैवाभूत् परमार्थदर्शनादात्मैव संवृत्तः तत्र तस्यामवस्थायामेकत्वं विशुद्धं गगनोपममात्मैकत्वं पश्यतः जानतः को मोहः कः शोकश्च अविद्याकार्ययोः शोकमोहयोरसम्भवात्सकारणस्य संसारस्यात्यन्तमुच्छेद इति भावः ॥ ७ ॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः
॥ ८ ॥

एवम्भूतात्मज्ञस्य फलमाह । य एवमात्मानं पश्यति स ईदृशं ब्रह्म पर्यगात् परिगच्छति प्राप्नोतीत्यर्थः । कीदृशम् शुक्रं शुद्धं विज्ञानानन्दस्वभावमचिन्त्यशक्ति । अकायम् न कायः शरीरं यस्य तत् । अकायत्वादेवाव्रणमक्षतम् । अस्नाविरं न विद्यते स्नावाः शिरा यत्र तदस्नाविरं स्नायुरहितम् अकायत्वादेव । शुद्धमनुपहतं सत्त्वरजस्तमोभिः । अपापविद्धं न पापैर्विद्धं क्लेशकर्मविपाकाशयैरस्पृष्टम् । अकायमव्रणमस्नाविरमिति पुनरुक्तमर्थातिशयद्योतनाय अभ्यासे भूयांसमर्थं मन्यन्तऽइति यास्कोक्तेः [निरु° १०.४२.] । ईदृशं ब्रह्मात्मज्ञः प्रतिपद्यतऽइत्यर्थः । पुनस्तस्यैव फलान्तरमाह य ईदृश उपासकः स शाश्वतीभ्यः निरन्तरमनन्तवर्षेभ्योऽर्थाय (11.) अनन्तवर्षप्राप्तये याथातथ्यतः यथातथाभावो याथातथ्यं तेन यथास्वरूपमर्थान्व्यदधात् विहितवान् त्यक्तस्वस्वामिसम्बन्धैश्चेतनाचेतनैरर्थैरुपभोगं कृतवानित्यर्थः । कीदृशः कविः क्रान्तदर्शी । मनीषी मेधावी ।

परि सर्वतो भवतीति परिभूः ज्ञानबलात्सर्वरूपः । स्वयं भवतीति स्वयम्भूः ब्रह्मरूपेण भविता । ईदृशोऽपि पूर्वोक्तं शुक्रमकायमित्यादिविशेषणविशिष्टं ब्रह्म प्राप्नोतीत्यर्थः ॥ एतस्या ऋचोऽर्थान्तरम् । यथा । योऽयमतीतमन्त्रोक्त आत्मा स पर्यगात् परितः सर्वत्र गच्छति नभोवत्सर्वं व्याप्नोति व्याप्य च शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यो याथातथ्यतः यथाभूतकर्मफलसाधनतोऽर्थान्कर्तव्यपदार्थान्व्यदधात् यथानुरूपं व्यभजदित्यर्थः । स कीदृशः शुक्रमित्यादिविशेषणानि लिङ्गव्यत्ययेन पुल्लिङ्गे नेतव्यानि शुक्रः शुद्धो दीप्तिमान् अकायोऽशरीरः लिङ्गशरीरवर्जित इत्यर्थः (12.) अव्रणोऽक्षतः अस्नाविरः शिरारहितः अव्रणोऽस्नाविर इति विशेषणद्वयेन स्थूलशरीरप्रतिषेधः शुद्धो निर्मलः अपापविद्धोऽधर्मादिवर्जितः कविः सर्वदृक् नान्यदतोऽस्ति द्रष्टृति (13.) श्रुतेः मनीषी मनस ईशिता सर्वज्ञः परिभूः परि सर्वेषामुपर्युपरि भवतीति परिभूः स्वयम्भूः स्वयमेव भवतीति येषामुपरि भवति यश्चोपरि भवति स स्वयमेव भवतीति स्वयम्भूः । स नित्य ईश्वरः सर्वं कृतवानित्यर्थः ॥ ८ ॥

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय-इव ते तमो यऽउ सम्भूत्याꣳ रताः ॥ ९ ॥

अतः परमुपासनामन्त्रा उच्यन्ते । षडनुष्टुभः । यमनियमसम्बन्धवान्विज्ञानात्मा कश्चिन्नास्ति जलबुद्बुदवज्जीवाः (14.) मदशक्तिवद्विज्ञानमित्यादिमतवादिनो बौद्धाः प्रस्तूय निन्द्यन्ते । ये नराः असम्भूतिमसम्भवमुपासते मृतस्य पुनः सम्भवो नास्ति अतः शरीरान्तेऽस्माकं मुक्तिरेवेति वदन्ति ते अन्धं तमोऽज्ञानलक्षणं प्रविशन्ति । ये उ ये च सम्भूत्यामेव रताः सम्भवत्यस्या इति सम्भूतिरात्मा तत्रैवासक्ताः कर्मपराङ्मुखाः स्वबुद्धिलाघवमजानाना आत्मज्ञानमात्ररताः आत्मैवास्ति नान्यत् कर्मादीनि कर्मकाण्डज्ञानकाण्डयोः सम्बन्धो नास्तीत्यभिप्रायवन्त इत्यर्थः ते नराः ततोऽन्धात्तमसो भूय-इव इवशब्दोऽनर्थकः बहुतरं तमोऽज्ञानं विशन्ति ॥ अस्या ऋचोऽर्थान्तरमुच्यते अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्द्योच्यते । सम्भवनं सम्भूतिः कार्यस्योत्पत्तिः त-

स्या अन्या असम्भूतिः प्रकृतिः कारणमव्याकृताख्यम् तामसम्भूतिमव्याकृताख्यां प्रकृतिं कारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकां ये ऽपासते ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं संसारं प्रविशन्ति । ये सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः ते ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति ॥ १ ॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

अथोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह । सम्भवात् सम्भूतेः कार्यब्रह्मोपासनात् अन्यदेव पृथगेवाणिमाद्यैश्वर्यलक्षणं फलमाहुः कथयन्ति धीराः । तथा असम्भवात् असम्भूतेरव्याकृताद्व्याकृतोपासनादन्यदेव फलमुक्तम् अन्धं तमः प्रविशन्तीत्युक्तं प्रकृतिलय इति पौराणिकोक्तं फलमाहुः । इत्येवंविधं धीराणां विदुषां वचः शुश्रुम वयं श्रुतवन्तः ये धीराः नोऽस्माकं तत्पूर्वोक्तं सम्भूत्यसम्भूत्युपासनाफलं विचचक्षिरे व्याख्यातवन्तः ॥ १० ॥

सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥ ११ ॥

सम्भूतिं सर्वज्ञगत्सम्भवैककहेतुं परं ब्रह्म । विनाशं विनाशोऽस्यास्तीति विनाशः अर्शआदित्वादच्प्रत्ययः विनाशधर्मकं शरीरम् । तदुभयं शरीरिशरीररूपं द्वयं यो योगी सह एकीभूतं वेद जानाति देहभिन्नोऽहं देही वासे कर्मवशादिति ज्ञात्वा शरीरेण ज्ञानोत्पत्तिकराणि निष्कामकर्माणि करोतीत्यर्थः । स विनाशेन विनाशिना शरीरेण मृत्युं तीर्त्वात्मःकरणशुद्धिं सम्पाद्य सम्भूत्यात्मज्ञानेनामृतमश्नुते मुक्तिं प्राप्नोति ॥ अस्या ऋचोऽर्थान्तरम् । यथा । सम्भूत्युपासनयोरेकपुरुषार्थत्वात्समुच्चय एव युक्त इत्याह । अत्र विनाशशब्दद्वयेऽवर्णलोपो द्रष्टव्यः पृषोदरादित्वात् अन्यदाहुरसम्भवादित्युक्तेः । सम्भूतिमविनाशं च व्याकृताव्याकृतोपासनद्वयं (15.) यः सह वेद उभयमुपास्तेऽइत्यर्थः स योगी अविनाशेनाव्याकृतोपासनेन मृत्युमनैश्वर्यमधर्मकामादिदोषजातं च तीर्त्वातिक्रम्य सम्भूत्या हिरण्यगर्भोपासनेनामृतं प्रकृतिलयलक्षणमश्नुते (16.) ॥ ११ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय-इव ते तमो यऽउ विद्यायाꣳ रताः ॥ १२ ॥

ये तु कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषन्ति तान्प्रत्युच्यते । विद्याविद्ययोः समुच्चिचीषया प्रत्येकं निन्द्योच्यते । विद्याया अन्या अविद्या कर्म । ये ज्ञना अविद्यामग्निहोत्रादिलक्षणां केवलामुपासते स्वर्गार्थानि कर्माणि केवलमनुतिष्ठन्ति ते अन्धमदर्शनात्मकं तमोऽज्ञानं प्रविशन्ति संसारपरम्परामनुभवन्तीत्यर्थः । ततस्तस्मादन्धात्मकात्तमसो भूय-इव बहुतरमेव तमः ते प्रविशन्ति ये ऽ ये पुनर्विद्यायामात्मज्ञाने देवताज्ञानि एव रताः कर्माणि हित्वा कर्माकरणे प्रत्यवायोत्पत्त्यान्तःकरणशुद्ध्यभावेन ज्ञानानुदयादिति भावः ॥ १२ ॥

अन्यदेवाहुर्विद्यायां अन्यदाहुरविद्यायाः ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

तयोः फलभेदमाह । विद्याया आत्मज्ञानस्य फलमन्यदेवाहुरमृतत्वरूपम् अविद्यायाः कर्मणश्च फलं पितृलोकत्वरूपमन्यदेवाहुः धीराः कर्मणा पितृलोको विद्यया देवलोक इति श्रुतेः । ये धीरा धीमन्तः आचार्याः नोऽस्मभ्यं ज्ञानं कर्म च विचचक्षिरे व्याचख्युः तदुक्तम् इत्येवं धीराणां वचः शुश्रुम श्रुतवन्तः ॥ १३ ॥

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ १४ ॥

समुच्चयमाह । विद्यां देवताज्ञानमविद्यां कर्म च तदुभयं विद्याविद्यारूपं द्वयं यः सह वेद एकीकृत्य वेद एकेन पुरुषेणानुष्ठेयं जानाति कर्मकाण्डं ज्ञानकाण्डस्य गुणभूतमित्यर्थः । सोऽविद्ययाग्निहोत्रादिकर्मणा मृत्युं स्वाभाविककर्मज्ञानं मृत्युशब्दवाच्यं तीर्त्वोत्तार्यान्तःशुद्धा कृतकृत्यो भूत्वा विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति तद्धामृतमुच्यते यद्देवतात्मगमनमिति श्रुतेः ॥ १४ ॥

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ओꣳ क्रतो स्मर क्लिबे स्मर कृतꣳ स्मर ॥ १५ ॥

अथ कृतोपासनो योगी अन्तकाले प्रार्थयते । द्वे यजुषी । अथेदानीं परीष्यतो (17.) मम वायुः प्राणः वायुग्रहणं सप्तदशकलिङ्गोपलक्षणार्थम् सप्तदशात्मकलिङ्गरूपः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतरूपं सर्वात्मकममृतं (18.) सूत्रात्मानमनिलं वायुं प्रतिपद्यतामिति वाक्यशेषः वायुर्वाव गौतम सूत्रं वायुना गौतम सूत्रेणेदꣳ सर्वꣳ संदृब्धमिति श्रुतेः [बृहदारण्य° माध्य° ३.५.६.] ज्ञानकर्मसंस्कृतं लिङ्गमुत्क्रामत्वित्यर्थः । अथ इदं स्थूलं शरीरमग्नौ हुतं सत् भस्मान्तं भस्मरूपं भूयात् भस्मान्तः स्वरूपं यस्य तत् कृतप्रयोजनत्वात् ॥ अथ योगिनोऽवलम्बभूतमक्षरमुच्यते ओमिति ब्रह्मणः प्रतिमा नाम वा । अस्य ब्रह्म ऋषिः गायत्री छन्दः परमात्मा देवता वेदारम्भे होमे शान्तिपुष्टिकर्मसु काम्येषु नैमित्तिकेषपि कर्मसु विनियोगः । ओंप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते हे ओम् हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्तव्यं तस्यायं कालः प्रत्युपस्थितोऽतः स्मर (19.) यस्त्वं (20.) ब्रह्मचर्ये गार्हपत्ये च मया परिचरितस्तत्स्मर । क्लिबे (21.) स्मर कल्प्यते भोगायेति क्लृप् लोकः तस्मै स्मर ज्ञशादिश (22.) आर्षः छन्दस्युभयथेति पदान्तत्वात् मयास्मै अयं लोको दातव्यस्तस्मै क्लृप्ताय लोकाय स्मर । कृतं स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । स्मरेत्यस्यावृत्तिरादरार्था । क्रतो त्रिभिर्यजुर्भिरुक्ते यज्ञान्योगी स्मारयतीति कात्यायनः [अनुक्रम° ४. १.] ॥ १५ ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १६ ॥

पुनरन्येन मन्त्रेणाग्न्याख्यं ब्रह्म प्रति योगी मार्गं याचते । अगस्त्यदृष्टाग्नेयी त्रिष्टुप् व्याख्यातापि [५.३६.] विशेषाय पुनर्व्याख्यायते । हे देव दानादिगुणयुक्त हे अग्ने अस्मान् सुपथा शोभनेन मार्गेण देवयानेन नय सुपथेति विशेषणं दक्षिणामार्गनिवृत्त्यर्थम् गतागतलक्षणेन दक्षिणमार्गेण निर्विष्टोऽहम् अतोऽग्ने त्वां याचे पुनर्गमनागमनवर्जितेन शोभनेन पथास्मान्कर्मफलविशिष्टान्नय । किमर्थम् राये धनाय मुक्तिलक्षणाय कर्मफलभोगायेत्यर्थः । किंविधस्त्वम् विश्वानि सर्वाणि

वयुनानि कर्माणि प्रज्ञानानि वा विद्वान् जानन् । किं च जुक्कराणं कुर्हा कौटिल्ये शानचि जुह्वोत्यादिर्विन द्रूपम् कुटिलं प्रतिबन्धकं वञ्चनात्मकमेनः (23.) पापमस्मत् अस्मत्तः सकाशात् युयोधि पृथक्कुरु वियोजय नाशयित्यर्थः यु मिश्रणामिश्रणयोः ह्वादिर्वाङ्ब्लोपद्वित्वे छान्दसं हेर्धित्वम् ततो विशुद्धा वयं ते तुभ्यं भूयिष्ठां बहुतरां नमउक्तिं नमस्कारवचनं विधेम कुर्याम इदानीं सपापत्वात्तव परिचर्यां कर्तुं न शक्नुमस्ततस्त्वया पापनाशे कृते शुद्धा वयं नमस्कारेण त्वां परिचरेमित्यर्थः ॥ १६ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
योऽसावादित्ये पुरुषः सोऽसावहम् ॥
ओ३म् खं ब्रह्म ॥ १७ ॥

इति माध्यन्दिनीयायां वाजसनेयसंहितायां चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥

पुनरादित्योपासनमाह । उक्लिक् यजुर्द्वयात्ता उक्लिक् त्रिपादात्यो द्वादशक इति वचनात् । हिरण्मयमिव हिरण्मयं ज्योतिर्मयं यत्पात्रम् पिबन्ति यत्र स्थिता रश्मयो रसानिति पात्रं मण्डलम् तेन तेजोरूपेण मण्डलेन सत्यस्यादित्यमण्डलस्थस्याविनाशिनः पुरुषस्य मुखं शरीरमपिहितमाच्छादितं वर्तते । तथापि यः असौ प्रत्यक्षः आदित्ये रविमण्डले पुरुषः पुरुषाकारत्वात् पूर्णमनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति वा पुरुषः परिशयनाद्वा स मण्डलस्थः पुरुषः असौ प्रत्यक्षः कार्यकारणसंघातप्रविष्टोऽहमस्मि । एतां चोपासनां कुर्यादित्यर्थः ॥ ओम् खं ब्रह्मेति (24.) यजुषी । ओ३मिति नामनिर्देशो ब्रह्मणः खं ब्रह्मेत्याकाशरूपमत्ति ब्रह्म ध्यायेत् [अनुक्रम° 8. १.] यद्यपि ब्रह्म चेतनमाकाशस्त्वचेतनस्तथाप्येकदेशे सादृश्यम् नभोवद्व्यापकं ब्रह्म ओमिति जपन्ध्यायेदित्यर्थः । सूर्यमण्डलस्थः पुरुषोऽहमेवेत्यभेदेन चिन्तयेत् ॥ १७ ॥

अथ विचारः । विद्यां चाविद्यां चेत्यत्र [क° १४.] विद्याशब्देन किं मुख्या परमात्मविद्योच्यते उतोपासना वा अमृतमश्नुतऽइत्यत्र [क° १४.] अमृतशब्देन साक्षान्मुक्तिरुत्तरमार्गेण परम्परया वा । नाद्यः । विद्याकर्मणोर्यस्तद्वेदोभयꣳ सहेति

[कः १४.] समुच्चयानुपपत्तेः तयोर्विरोधात् विद्योत्पत्तौ तदाश्रयेऽविद्यानुत्पत्तेः वह्निरुष्णः प्रकाशश्चेति ज्ञानोत्पत्तौ शीतोऽग्निरप्रकाशश्चेति अविद्योत्पत्तिर्न सम्भवति नापि संशयोऽज्ञानं वा यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक इत्युक्तत्वात् । किं च विद्याशब्देन परमात्मविद्याग्रहणेऽग्ने नयेति सुपथयाचनमनुपपन्नम् । तस्माद्विद्योपासना अमृतं चापेक्षिकमिति दिक् (25.) ॥ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे । व्यरमच्चरमोऽध्यायः परमात्मनिरूपकः ॥

इति वेददीपे चत्वारिंशोऽध्यायः ॥४०॥

अथ काण्वशाखायां पाठविशेषः ॥

१-३ [प्रेत्याभिगं°] ॥१-३॥ ४ [°मर्षत्] - ६ [विङ्गुगुप्सते] ॥४-६॥ ७ [यस्मिन्त्स°] ॥७॥ ८ ॥८॥ १२ ॥१॥ १३ [°र्विद्ययान्यदाहुरविद्यया । -] ॥१०॥ १४ ॥११॥ १-११ ॥१२-१४॥ १७ [- मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये] ॥१५॥ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः । सोऽहमस्मि ॥१६॥ १५ [ओ३म् क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ।] ॥१७॥ १६ ॥१८॥ ओम् खं ब्रह्म ॥ ॥ अनुवाकेऽष्टादश ॥

इति काण्वीयायां वाजसनेयसंहितायां चत्वारिंशोऽध्यायः ॥४०॥ ॥

ओम् । शुभं भवतु । कल्याणमस्तु ।
संवत्सरे खृष्टीये १८५१. विक्रमार्कगति ११०७. शके १७७३.
समाप्तिमगात्
वोग्देन मुद्रिता सेयं वेवेरेण च शोधिता ।
वाजसनेयसंहिता वेददीपेन संयुक्ता ॥

ओम् श्रीवेदपुरुषाय नमः ॥ ॥